अपृच्छद्विविधान्धर्मान्नृषीणामनुशृण्वताम् ॥ २५ ॥ पुरुषस्वभावविहितान्यथावर्णयथाऽऽश्रमम्। वैराग्यरागोपाधिभ्यामाम्नातोभयलक्षणान् ॥२६॥ दानधर्मान्राजधर्मान्मोक्षधर्मान्विभागशः। स्त्रीधर्मान्भगवद्धर्मान्समासव्यासयोगतः ॥ २७ ॥ धर्मार्थकाममोक्षांश्च सहोपायान्यथामुने । नानाख्यानेतिहासेषु वर्णयामासतत्त्ववित् ॥ २८ ॥ धर्मंप्रवदतस्तस्यसकालःप्रत्युपस्थितः । योयोगिनश्छन्दमृत्योर्वाञ्छितस्तूत्तरायणः ॥ २९ ॥ तदोपसंहृत्यगिरःसहस्रणीर्विमुक्तसङ्गंमनआदिपुरुषे। कृष्णेलसत्पीतपटेचतुर्भुजेपुरःस्थितेमीलितदृग्व्यधारयत् ॥ ३० ॥ विशुद्धयाधारणयाहताशुभस्तदीक्षयैवाऽऽशुगतायुधव्यथः। निवृत्तसर्वेन्द्रियवृत्तिविभ्रमस्तुष्टावजन्यंविसृजञ्जनार्दनम् ॥ ३१ ॥ भीष्मउवाच ॥ इतिमतिरुपकल्पितावितृष्णा भगवतिसात्वतपुङ्गवेविभूम्नि । स्वसुखमुपगतेक्वचिद्विहर्तुंप्रकृतिमुपेयुषियद्भवप्रवाहः ॥ ३२ ॥ त्रिभुवनकमनंतमालवर्णं रविकरगौरवराम्बरंदधाने। वपुरलककुलावृताननाब्जं विजयसखेरतिरस्तुमेऽनवद्या ॥ ३३ ॥ युधितुरगरजोविधूम्रविष्वक्कचलुलितश्रमवार्यलंकृतास्ये। मम निशितशरैर्विभिद्यमानत्वचि विलसत्कवचेऽस्तुकृष्णआत्मा ॥ ३४ ॥ सपदिसखिवचो निशम्यमध्ये निजपरयोर्बलयोरथं निवेश्य। स्थितवतिपरसैनिकायुरक्ष्णा हृतवतिपार्थसखेरतिर्ममास्तु ॥ ३५ ॥ व्यवहितपृतनामुखंनिरीक्ष्य स्वजनवधाद्विमुखस्यदोषबुद्ध्या। कुमतिमहरदात्मावि-

सूतजी बोले किबाणों की सेजमें सोते हुए भीष्म जी से युधिष्ठिर ने यह बात सुनकर मुनिलोगों के सुनते अनेक भांतिके धर्म पूंछे ॥ २५ ॥ वर्णधर्म, आश्रम धर्म, वैराग्य तथा रागरूप उपाधियों से निवृत्ति और प्रवृत्ति के लक्षण पुरुष के साधारण कर्म ॥ २६ ॥ इनमें विशेष करके दान धर्म, राज धर्म, स्त्री धर्म संक्षेप से कहे ॥ २८ ॥ और धर्म, अर्थ, काम, मोक्ष इनका उपाय तत्व वेत्ता श्री भीष्म जीने कहा ॥ २८ ॥ जिस कालको योगीजन चाहते हैं, वह उत्तरायण काल स्वच्छन्द मृत्यु श्रीभीष्म जी के धर्म कहते २ आप्राप्त हुआ ॥ २९ ॥ सग्राम में सहस्रों रथियोंकी रक्षाकरने वाले भीष्म जी ने वाणी एकाग्रकर विनाआंख बंदकिये, संग रहित अपने चित्तको पीत पटसे शोभित, चतुर्भुज, आदि पुरुष, सन्मुख स्थित श्रीकृष्ण भगवान में लगाया ॥ ३० ॥ शुद्ध धारणा से पाप दूरहोगये और परमेश्वर के दर्शन मात्र से सब शस्त्रों की पीड़ा निवृत्त होगई तथा इन्द्रियों की वृत्ति और भ्रम जातारहा भीष्म जी ने शरीर त्यागने के समय श्रीजनार्दन भगवान की स्तुति की ॥ ३१ ॥ भीष्म जी ने कहाकि–जो अपने पारमानंद रूपको सदैव प्राप्त है तौभी किसी काल क्रीड़ा करने के हेतु जिसयोग मायासे सृष्टिका प्रवाह होता है उस मायाको स्वीकार करते हैं उन यादवों में शिरोमणि श्रीभगवान में अपनी तृष्णा रहित बुद्धि अर्पण की है ॥ ३२ ॥ त्रिलोकी में सुंदर स्वरूप जिनका तमाल पत्रकी समान श्याम बरण, सूर्य्य की किरण के समान श्रेष्ठ पीतपट पहिने, अलकावली से शोभितमुख, ऐसा शरीर धारण किये ऐसे अर्जुन के सखा में मेरी निष्काम प्रितिहो होवे ॥३३॥ युद्धमें घोड़ों की धूलसे धूसर और इधर उधर विचलित केश तिनसे विखरते हुए पसीने की बुंदों से जिनका कमल स्वरूपी मुख शोभित है और मेरे तीक्ष्ण शरोंसे जिन की त्वचा विदीर्ण होरही है और शरोंहीसे जिनका कवच विखर रहा था ऐसे श्रीकृष्ण परमेश्वर में मेरा चित्त लगा रहे ॥ ३४ ॥ मित्रके वाक्य सुनकर तुरंत दोनों कटकों के मध्य रथको खड़ाकरके और शत्रुके कटक के वीरों की आयुको काल दृष्टिसे हरण करते अर्जुन के मित्र श्रीकृष्ण में मेरीप्रीति होवे ॥ ३५ ॥ शत्रु सेना में अपने कुटुंवियों को देखकर अज्ञानता से कुटुंवियों के न मारने से विमुख ऐसे अर्जुन

यया यश्चरणरतिः परमस्त्वतस्यमेऽस्तु ॥३६॥ स्वनिगममपहायमत्प्रतिज्ञामृतमधिकर्तुमवप्लुतोरथस्थः। धृतरथचरणोऽभ्ययाच्चलद्गुर्हरिरिव हन्तुमिभंगतोत्तरीयः ॥ ३७ ॥ शितविशिखहतोविशीर्णदंशः क्षतजपरिप्लुतआततायिनोमे। प्रसभमभिससारमद्वधार्थं सभवतुमेभगवान्गतिर्मुकुन्दः ॥३८॥ विजयरथकुटुम्बआत्ततोत्रे धृतहयरश्मिनि तच्छ्रियेक्षणीये। भगवतिरतिरस्तुमेमुमूर्षोर्यमिह निरीक्ष्य हताःगताःस्वरूपम् ॥ ३९ ॥ ललितगतिविलासवल्गुहासप्रणयनिरीक्षणकल्पितोरुमानाः। कृतमनुकृतवत्यउन्मदान्धाः प्रकृतिमगन्किलयस्यगोपवध्वः ॥ ४० ॥ मुनिगणनृपवर्यसंकुलेऽन्तःसदसि युधिष्ठिरराजसूयएषाम्। अर्हणमुपपेदईक्षणीयो ममदृशिगोचर एषआविरात्मा ॥ ४१ ॥ तमिममहमजंशरीरभाजांहृदिहृदिधिष्ठितमात्मकल्पितानाम्। प्रतिदृशमिवनैकधाऽर्कमेकं समधिगतोऽस्मिविधूतभेदमोहः ॥ ४२ ॥ सूत उवाच॥कृष्णएवंभगवति मनोवाग्दृष्टिवृत्तिभिः। आत्मन्यात्मानमावेश्य सोन्तःश्वासउपारमत् ॥ ४३ ॥ संपद्यमानमाज्ञाय भीष्मंब्रह्मणिनिष्कले। सर्वेबभूवुस्तेतूष्णीं वयांसीवदिनात्यये ॥ ४४ ॥ तत्रदुन्दुभयोनेदुर्देवमानववादिताः। शशंसुःसाधवोराज्ञां खात्पेतुःपुष्पवृष्टयः ॥ ४५ ॥ तस्यनिर्हरणादीनि संपरेतस्य

की मूर्खता जिन्हों ने आत्मविद्या की शिक्षासे दूरकी उन ईश्वर के चरणों में मेरी रतिहोवे ॥ ३६ ॥ अपनी प्रतिज्ञा को कि म शस्त्र नहीं धारण करूंगा छोड़ मेरीप्रतिज्ञा को कि मैं श्रीकृष्ण को शस्त्र धारण कराऊंगा सत्य करने के लिये रथमें बैठेहुये श्रीभगवान उससे उतरकर रथका पहिया हाथमें ले पृथ्वीको विचलित करतेहुए, जैसे सिंह हाथीको मारने दौड़े ऐसेदौड़करआये, उसी क्रोधसे उनका दुपट्टा भूमिपर गिरगया था हे मुकुंद मेरी गतिकरो ॥ ३७ ॥ उस काल हाथमें धनुषबाण लियेमेरे तीक्ष्ण शरोंसे प्रहार कियेहुए और उसी कारण से जिनका कवच टूटगया है और रक्तसे व्याप्त हरिभगवान रोकतेहुए अर्जुन को बल पूर्वक छुटाकर मेरे मारने को दौड़े हे भगवान मेरीगति होवे ॥३८॥ अर्जुनको रथकी रक्षाकरनेहारे, चाबुक हाथमेंलिये, घोड़ोंकी वागडोर पकड़े, सारथी पनेकी शोभासे शोभित जो देखने योग्य श्री भगवान के विषे मेरी प्रीति होवेकि जिनके दर्शन मात्रसे युद्ध में मरेहुए सबवीर इसी स्वरूपमें प्राप्त हुए हैं ॥ ३९ ॥ जिसकी सुंदर चाल, मन्द हंसन, प्रेम सहित देखना, जिनके द्वारा बहुत मान पायी हुई, और उसीके कारण काममदसे अधगोप वधूएं, गोवर्धन धारण करने आदि की लीला करने वाले ऐसे भगवान स्वरूपमें मेरी प्रीति होवे ॥ ४० ॥ श्रेष्ठ राजाओं और मुनिगणों युक्तराजा युधिष्ठिर के राजसूय यज्ञमें भी जो भगवान प्रथम पूजाको प्राप्तहुए वेही प्रगट रीतिसे मेरे दृष्टिगोचर हुए आजमेरा अहोभाग्यहै ॥ ४१ ॥ जैसे सब प्राणियों की दृष्टिमें सूर्य एक होनेपर भी अनेक रूपसे ज्ञात होता है वैसे ही प्रत्येक प्राणियों के हृदय में एक अधिष्ठान रूपसे रहने पर भी आप अनेक रूपसे ज्ञातहोते हैं उन अजन्मा भगवान के मैं भेद व मोहसे छूटकर प्राप्तहुआ हूं ॥ ४२ ॥ सूतजीबोले- कि इस भांति भीष्म जी मन, बाणी और दृष्टि की वृत्तिद्वारा परमात्मा श्रीकृष्ण भगवान में चित्त लगाकर श्वासको भीतर लीन करके उपरामको प्राप्त हुये ॥ ४३ ॥ भीष्म जी को परमात्मा में लीनहुआ जानकर संध्या समय के पक्षियों की समान सब मौन होगये ॥ ४४ ॥ उसी समय सब देवता और मनुष्य नगाड़े वजाने लगे साधूजनों ने राजा युधिष्ठिर की प्रशंसा की और उसी कालमें आकाश से फूलोंकी वर्षा भी हुई ॥ ४५ ॥ हे शौनक मृत्युको प्राप्तहुए भीष्म की राजा युधिष्ठिर ने पार लौकिक क्रियाकी और एक मुहूर्तको बड़े दुखी

भार्गव । युधिष्ठिरःकारयित्वा मुहूर्तंदुःखितोऽभवत् ॥ ४६ ॥ तुष्टुवुर्मुनयोहृष्टाःकृष्णं तद्गुह्यनामभिः।ततस्तेकृष्णहृदयाःस्वाश्रमान्प्रययुःपुनः॥४७॥ ततोयुधिष्ठिरोगत्वा सहकृष्णोगजाह्वयम्। पितरंसान्त्वयामास गान्धारींचतपस्विनीम् ॥ ४८ ॥ पित्राचानुमतोराजा वासुदेवानुमोदितः।चकारराज्यंधर्मेण पितृपैतामहंविभुः॥४९॥

इतिश्रीमद्भा०प्रथ०युधिष्ठिरराज्यप्रलम्भनोनामनवमोऽध्यायः ॥ ९ ॥

शौनक उवाच ॥ हत्वास्वरिक्थस्पृधआततायिनो युधिष्ठिरोधर्मभृतांवरिष्ठः। सहानुजैःप्रत्यवरुद्धभोजनः कथंप्रवृत्तः किमकारषीत्ततः ॥ १ ॥ सूत उवाच ॥ वंशं कुरोर्वंशदवाग्निनिर्हृतं संरोहयित्वाभवभावनोहरिः।निवेशयित्वा निजराज्य ईश्वरोयुधिष्ठिरंप्रीतमनावभूवह ॥ २ ॥ निशम्यभीष्मोक्तमथाच्युतोक्तं प्रवृत्तविज्ञानविधूतविभ्रमः। शशासगामिन्द्रइवाऽजिताश्रयः परिध्युपान्तामनुजानुवर्तितः ॥ ॥ ३ ॥ कामंववर्षपर्जन्यः सर्वकामदुघामही। सिषिचुःस्मव्रजान्गावः पयसोधस्वतीर्मुदा ॥ ४ ॥ नद्यःसमुद्रागिरयः सवनस्पतिवीरुधः। फलन्त्योषधयःसर्वाः काममन्वृतुतस्यवै ॥ ५ ॥ नाधयोव्याधयःक्लेशाः दैवभूतात्महेतवः। अजातशत्रावभवन्जन्तूनांराज्ञिकर्हिचित् ॥ ६ ॥ उषित्वाहास्तिनपुरेमासान्कतिपयान्हरिः। सुहृदांचविशोकाय स्वसुश्चप्रियकाम्यया ॥ ७ ॥ आमन्त्र्यचाभ्यनुज्ञातः परिष्वज्याऽभिवाद्यतम्। आरुरोहरथंकैश्चित्परिष्वक्तोऽभिवादितः ॥ ८ ॥ सुभद्राद्रौपदीकुन्तीविराटतनयातथा। गान्धारीधृतराष्ट्रश्चयुयुत्सुर्गौतमोयमौ ॥ ९ ॥ वृकोदरश्चधौम्यश्च

हुए ॥ ४६ ॥ मुनिलोग प्रसन्न होकर कृष्ण जी के गुह्यनामों से उनकी स्तुतिकर उनको हृदय में धारण कर अपने २ स्थानों को गये ॥ ४७ ॥ इसके अनंतर राजा युधिष्ठिर ने श्रीकृष्ण जी सहित हस्तिना पुरमें जाकर पितर धृतराष्ट और माता गांधारी को शांत किया ॥४८॥ राजा धृतराष्ट और बासुदेव भगवान की आज्ञा से राजा युधिष्ठिर ने अपने बाप दादों से प्राप्त धर्म राज्य किया ॥४९॥

इतिश्रीभागवतेमहापुराणेप्रथमस्कंधेसरलाभाषाटीकायांनवमोऽध्यायः ॥ ९ ॥

शौनकजी बोले—कि अपने धन की तथा राज्य की चाहना करने वाले आततायी, धर्म धुरीण राजा युधिष्ठिरने अपने शत्रु भाइयोंको मारकर तथा राज्य लेकर किस भांति अपनेअनुजों सहित राज्य किया ॥ १ ॥ सूतजी बोले कि—जो कौरवों का बंश भगवान की क्रोधाग्नि से नाश को प्राप्त हुआ था उस को परीक्षित की रक्षाके द्वारा अंकुरित कर अपनें राज्य में युधिष्ठिर को स्थापित कर श्री भगवान प्रसन्न हुए ॥ २ ॥ उस राजा युधिष्ठिर को श्रीकृष्णजी तथा भीष्मजीके धर्म वाक्य सुनकर ज्ञान उत्पन्न हुआ और सब भ्रम दूर हुए, फिर भगवानकेआश्रित अपने अनुजों समेत राजा युधिष्ठिर समुद्र पर्यंत पृथ्वी का राज्य करने लगे ॥ ३ ॥ युधिष्ठिर के सुराज्य में मेघ इच्छानुसार वर्षने लगा, पृथ्वी सम्पूर्ण इच्छाएं पूर्ण करने लगी गायें बहुत दूध देने लगी ॥ ४ ॥ लता, औषधियों सहित तथा नदियां, पर्वत, वनस्पति ऋतु २ में यथेष्ट २ फल देने लगे ॥ ५ ॥ युधिष्ठिर के राज्य में प्राणियों को दैविक, भौतिक, और आध्यात्मिक क्लेशतथा मन की व शरीरकी पीडा न रही ॥ ६ ॥ श्रीभगवान अपने सुहृदोंका शोक दूरकरने तथाअपनी वहिन सुभद्रा को प्रसन्न करने के लिये कुछ काल हास्तिनापुर में रहे ॥ ७ ॥ फिर युधिष्ठिर से आज्ञाले, उनसे मिल, प्रणाम कर तथा और भी बडों को प्रणाम करके और कितनों से मिलकर रथपर चढे ॥ ८ ॥ सुभद्रा, द्रौपदी कुंती, उत्तरा, गांधारी, धृतराष्ट्र, युयुत्सु, कृपाचार्य, नकुल, सहदेव ॥ ९ ॥ भीम, धौम्य, सत्यवती आदि स्त्रियां श्री परमेश्वर का बिरह न सहसके—और

स्त्रियोमत्स्यसुतादयः । नसेहिरेविमुह्यन्तो विरहंशार्ङ्गधन्वनः ॥ १० ॥ सत्सङ्ग न्मुक्तदुःसङ्गो हातुंनोत्सहतेबुधः । कीर्त्यमानंयशोयस्य सकृदाकर्ण्यरोचनम् ॥११॥ तस्मिन्न्यस्तधियःपार्थाः सहेरन्विरहंकथम् । दर्शनस्पर्शसंलापशयनासनभोजनैः ॥ १२ ॥ सर्वेतेऽनिमिषैरक्षैस्तमनुद्रुतचेतसः । वीक्षन्तःस्नेहसंबद्धा विचेलुस्तत्र तत्रह ॥ १३ ॥ न्यरुन्धन्नुद्गलद्बाष्पमौत्कण्ठ्याद्देवकीसुते । निर्यात्यगाराज्ञोऽभद्रमिति स्याद्बान्धवस्त्रियः ॥ १४ ॥ मृदङ्गशंखभेर्यश्च वीणापणवगोमुखाः । धुन्धुर्यानकघण्टाद्या नेदुर्दुन्दुभयस्तथा ॥ १५ ॥ प्रासादशिखरारूढाः कुरुनार्योदिदृक्षया । ववृषुःकुसुमैःकृष्णं प्रेमव्रीडास्मितेक्षणाः ॥ १६ ॥ सितातपत्रंजग्राह मुक्तादामविभूषितम् । रत्नदण्डंगुडाकेशः प्रियःप्रियतमस्यह ॥ १७ ॥ उद्धवःसात्यकिश्चैव व्यजनेपरमाद्भुते । विकीर्यमाणःकुसुमै रेजेमधुपतिःपथि ॥ १८ ॥ अश्रूयन्ताऽऽशिषःसत्यास्तत्रतत्रद्विजेरिताः । नानुरूपानुरूपाश्च निर्गुणस्यगुणात्मनः ॥१९॥ अन्योन्यमासीत्संजल्प उत्तमश्लोकचेतसाम् । कौरवेन्द्रपुरस्त्रीणां सर्वश्रुतिमनोहरः ॥ २० ॥ स्त्रियऊचुः ॥ सवैकिलायंपुरुषःपुरातनोयएकआसीदविशेषआत्मनि। अग्रेगुणेभ्योजगदात्मनीश्वरे निमीलितात्मन्निशिसुप्तशक्तिषु ॥ २१ ॥ सएवभूयो निजवीर्यचोदितां स्वजीवमायांप्रकृतिंसिसृक्षतीम् । अनामरूपात्मनिरूपनामनीविधित्समानोऽनुससारशास्त्रकृत् ॥ २२ ॥ सवाअयंयत्पदमत्रसूरयो जितेन्द्रियानि-

मोहित होगये ॥ १० ॥ सत्संग से जिस का विषय रूपी कुसंग नष्ट होगया है वह बुद्धिवानपुरुष यदि भगवान के रुचिकर यश को एक बार भी सुन लेता है तो फिर उसे नहीं छोड़सकता ११ उन परमात्मा श्रीभगवान के दर्शन, स्पर्श, वार्ता, शयन, आसन तथा भोजन आदि से जिन को ज्ञान प्राप्त होगया है ऐसे पांडव उनश्री कृष्ण भगवान का विरह कैसे सहन कर सकें ॥ १२ ॥ जिन के मन भगवान के पीछे चले गये हैं वे सब पलक रहित चक्षुओं से उन्हीं का दर्शन करते, प्रेम से बंधकर, भेंट आदि की वस्तुएं लेने को इधर उधर फिरने लगे ॥ १३ ॥ घर से परमेश्वर के जाते समय जो बंधुओं की स्त्रियों के नेत्रों से अश्रु निकलने लगे उनको उन्हों ने रोक लिया कि जिस से जाते समय श्रीभगवान को अमंगल न होवे ॥ १४ ॥ श्रीकृष्ण भगवान के जाते समय अनेकों मृदंग, शंख, भेरि, ढोल, सहनाई, दुंदुभी, घंटे, नगाडे आदि बाजे वजनेलगे १५॥ श्रीभगवान के देखने की इच्छा करके महलके ऊपर चढकर प्रेम, लज्जा, मंद मुसकान श्रेष्ठ चितवनसे प्रेम सहित श्रीकृष्ण भगवान के ऊपर पुष्प वर्षा करने लगीं ॥ १६ ॥ उस काल मोतियों की झालर तथा रत्न की डंडी वाला श्रीकृष्णजीके सुफेद छत्रको उनके प्यारे अर्जुन१७॥ तथा ऊधो और सात्यकी ने चमर ग्रहण किया ऐसे श्रीकृष्ण भगवान पुष्पों की वर्षा होते हुए बड़ी शोभा को प्राप्त हुए ॥ १८ ॥ तहांपर ब्राह्मणों ने निर्गुण के अयोग्य और सगुण के योग्य सत्य आशीर्वाद कहे ॥ १९ ॥ जिन का श्रीकृष्णजी में चित्त लगा हुआ है ऐसी हस्तिनापुर की स्त्रियां परस्पर संवाद करने लगीं ॥ २० गुणोंके क्षोभ से प्रथम प्रलय कालमें जब जीव परमेश्वर में व्याप्त होगये और जीव की सब शक्तियांभी लीन होगईं उस काल निष्प्रपंच निज स्वरूप में जो एक आदि पुरुष शेष रहाथा वह यही श्रीकृष्ण है ॥ २१ ॥ रूप रहित जीव में नामरूपकरने की इच्छा वाले, जिन वेद शास्त्र के कर्त्ता भगवान ने, अपनी काल शक्ति से प्रेरीहुई, सृष्टि रचने की इच्छा वाली, अपने अंश से जीवों को मोहित करने वाली, प्रकृति को फिर स्वीकार किया, वह यही हैं ॥ २२ ॥ जो विद्वान लोग, इंद्रियों को जीतकर, प्राणों को दबाकर, भक्ति से उत्कं

र्जितमातरिश्वनः । पश्यन्तिभक्त्युत्कलितामलात्मना नन्वेषसत्त्वंपरिमार्ष्टुमर्हति ॥ २३ ॥ सर्वाअयंसख्यनुगीतसत्कथो वेदेषुगुह्येषुचगुह्यवादिभिः। यएकईशोज गदात्मलीलया सृजत्यवत्यत्तिनतत्रसज्जते ॥ २४ ॥ यदाह्यधर्मेणतमोधियोनृपाजी वन्तितत्रैषहिसत्त्वतःकिल । धत्तेभगंसत्यमृतंदयांयशोभवायरूपाणिदधद्युगेयुगे ॥ २५ ॥ अहोअलंश्लाघ्यतमंयदोःकुलमहोअलंपुण्यतमंमधोर्वनम् ॥ यदेषपुंसा. मृषभःश्रियःपतिःस्वजन्मनाचङ्क्रमणेनचांचति ॥ २६ ॥ अहोबतस्वर्यशसस्ति रस्करीकुशस्थलीपुण्ययशस्करीभुवः । पश्यन्तिनित्यंयदनुग्रहेषितंस्मितावलोकं स्वपतिंस्मयत्प्रजाः ॥ २७ ॥ नूनंव्रतस्नानहुतादिनेश्वरः समर्चितोह्यस्यगृहीतपा णिभिः । पिबन्तियाःसख्यधरामृतं मुहुर्व्रजस्त्रियःसंमुमुहुर्यदाशयाः ॥ २८ ॥ या वीर्यशुल्केनहृताःस्वयंवरेप्रमथ्यचैद्यप्रमुखान्हिशुष्मिणः । प्रद्युम्नसाम्बाम्बसुताद योऽपराश्चाहृताभौमवधेसहस्रशः॥२९॥एताःपरंस्त्रीत्वमपास्तपेशलंनिरस्तशौचं बतसाधुकुर्वते । यासांगृहात्पुष्करलोचनःपति र्नजात्वपैत्याहृतिभिर्हृदिस्पृशन् ॥ ३० ॥ एवंविधागदन्तीनांसगिरःपुरयोषिताम् । निरीक्षणेनाभिनन्दन्सस्मितेन ययौहरिः ॥ ३१ ॥ अजातशत्रुःपृतनांगोपीथायमधुद्विषः । परेभ्यःशङ्कितःस्नेहा त्प्रायुङ्क्तचतुरङ्गिणीम् ॥ ३२ ॥ अथदूरागताञ्छौरिः कौरवान्विरहातुरान् । सन्नि वर्त्यदृढंस्निग्धान्प्रायात्स्वनगरींप्रियैः ॥ ३३ ॥ कुरुजांगलपाञ्चालाञ्छूरसेनान्स यामुनान् । ब्रह्मावर्तंकुरुक्षेत्रं मत्स्यान्सारस्वतानथ ॥ ३४ ॥ मरुधन्वमतिक्रम्य सौ-

ठित, निर्मल बुद्धि से परमात्मा का भजन करते हैं वह यही श्रीकृष्ण हमारी बुद्धि को शुद्ध करैं ॥ २३ ॥ हे सखी ! वेदों में जिन गुह्य वक्ताओं ने कथा कही है और जो अपनी लीला से संसार को सृजता पालन करता तथा संहारता है परन्तु उस में आसक्त नहीं है वही यह श्रीकृष्णहैं २४ जब तमोगुणी राजा लोग अधर्म से जीते हैं तब यही भगवान सत्व गुण द्वारा रक्षा के हेतु युग२ में अवतार धारण कर ऐश्वर्य्य, सत्य, और यशको विस्तारित करते हैं ॥ २५ ॥ हे सखी ! यदु का कुल अतिशय बडाई के योग्य है और मथुरा भी अतिशय बडाई के योग्य है क्योंकि इनश्री लक्ष्मी पति भगवान के यदुकुल में जन्म लेने से और मथुरा में विचरनेसे वह सत्कार युक्त हैं ॥ २६ ॥ हे सखी ! यह द्वारिका पृथ्वीके पुण्य बढानेवाली स्वर्ग का भीतिरस्कार करती है यहांकी प्रजा अनुग्रह के हेतु मंद हास्य से अपने स्वामी श्रीकृष्ण का सदा अवलोकन करती है २७ ॥ हे सखी ! इनका पाणिग्रहण करने वाली स्त्रियों ने अवश्य ही व्रत, स्नान होमआदि से ईश्वर का पूजन किया होगा कारण कि जिस अधरामृत से ब्रज स्त्रियें मोहको प्राप्तहुई उस अधरा मृतको वह वारंवार पान करती होंगी ॥ २८ ॥ प्रद्युम्न, शांबआदि की माता रुक्मिणी जाम्बवंती आदि स्त्रियें जो स्वयम्बर में शिशुपाल आदि से प्रभावरूप मूल्य से हरण करलाई गई और भी दूसरी भौमासुर का वधकर के सोलह सहस्र स्त्रियां लाई गई ॥ २९ ॥ वे सब स्वतंत्रता शून्य तथा पवित्रता हीन स्त्री पनको भी शोभित करती हैं क्योंकि कमलदललोचन श्रीकृष्ण जी अनेक वचनों से उनके हृदयको आनंद देते हैं और कभी घरसे बाहर नहीं जाते ॥ ३० ॥ इस प्रकार अनेक भांति के वचनों को कहती हुई नगर की स्त्रियों की और श्रीकृष्ण जी मृदु मुसकान से सब की ओर देखकर वहां से पधारे ॥ ३१ ॥ शत्रुओं से शंकित युधिष्ठिर ने डरकर भगवान की रक्षाके हेतु चतुरंगिणी सेना साथ करदी ॥ ३२ ॥ विरहसे आतुर, स्नेह युक्त आयेहुए पांडवों को पीछे लौटाकर श्रीकृष्ण भगवान उद्धव आदिक के साथ द्वारिका पुरीकोगये॥३३॥ कुरु,जांगल, पांचाल,

वीराभीरयोःपरान् । आनर्तान्भार्गवोपागाच्छ्रान्तवाहोमनाग्विभुः ॥ ३५ ॥ तत्रतत्र हतत्रत्यैर्हरिःप्रत्युद्यतार्हणः । सायंभेजेदिशंपश्चाद्गविष्ठोगांगतस्तदा ॥ ३६ ॥

इतिश्रीमद्भा०प्र० दशमोऽध्यायः ॥ १० ॥

॥ सूतउवाच ॥ आनर्तान्सउपव्रज्य स्वृद्धाञ्जनपदान्स्वकान् । दध्मौदरवरंतेषां विषादंशमयन्निव ॥ १ ॥ सउच्चकाशेधवलोदरोदरोऽप्युरुक्रमस्याऽऽधर-शोणशोणिमा । दाध्मायमानःकरकञ्जसंपुटे यथाब्जखण्डेकलहंसउत्स्वनः ॥ २ ॥ तमुपश्रुत्यनिनदं जगद्भयभयावहम् । प्रत्युद्ययुःप्रजाःसर्वा भर्तृदर्शनलालसाः ॥३॥ तत्रोपनीतबलयो रवेर्दीपमिवाऽऽदृताः । आत्मारामंपूर्णकामं निजलाभेननित्यदा ॥ ४ ॥ प्रीत्युत्फुल्लमुखाःप्रोचुर्हर्षगद्गदयागिरा । पितरंसर्वसुहृदमवितारमिवार्भकाः ॥ ५ ॥ नताःस्मतेनाथसदांघ्रिपङ्कजं विरिञ्चवैरिञ्चसुरेन्द्रवन्दितम् । परायणंक्षेममिहेच्छतां परंनयत्रकालःप्रभवेत्परःप्रभुः ॥ ६ ॥ भवायनस्त्वंभवविश्वभावनत्वमेवमाताऽथसुहृत्पतिःपिता । त्वंसद्गुरुर्नः परमंचदैवतंयस्यानुवृत्त्याकृतिनोबभूविम ॥ ७ ॥ अहोसनाथाभवतास्मयद्वयंत्रैविष्टपानामपिदूरदर्शनम् । प्रेमस्मितस्निग्धनिरीक्षणाननं पश्येमरूपंतवसर्वसौभगम् ॥ ८ ॥ यर्ह्यम्बुजाक्षाऽपससारभो भवान्कुरून्मधून्वाऽथसुहृद्दिदृक्षया । तत्राब्दकोटिप्रतिमःक्षणोभवद्रविंविनाऽक्ष्णोरिवनस्तवाच्युत ॥ ९ ॥ इतिचोदीरितावाचः प्रजानांभक्तवत्सलः । शृ-

शूरसेन के देश, ब्रह्मावर्त्त, कुरुक्षेत्र, मत्स्यदेश, सारस्वत देश ॥ ३४ ॥ मरुदेश, धन्व और शौवीर देशको उलंघन कर–प्रभु आनर्त देशमे पहुंचे उस समय घोड़े कुछ थकगये ॥ ३५ ॥ श्रीभगवान जिस २ देश से पधारे वहां २के मनुष्योंने भेटे ला २ कर अर्पण कीं उन्हे स्वीकार करते श्रीभगवान संध्या के समय पश्चिम दिशामें पहुंचे तबसूर्य भी अस्तहुए ॥ ३६ ॥

इतिश्रीभागवतेमहापुराणेसरलाभाषाटीकायांप्रथमस्कन्धे,दशमोऽध्यायः ॥ १० ॥

सूतजी बोलेकि–समृद्धि युक्त अपने आनर्त देशमें जाकर भगवान ने श्रेष्ठ शंखको बजाया–मानों वहांके लोगोंका दुःख मिटाया ॥ १ ॥ श्वेत है मध्यभाग जिसका ऐसाशंख श्रीभगवान के ओठों की ललाई में लगकर कमल स्वरूपी हाथोंके सम्पुट मे ऐसा शोभाय मान है मानो कमलों के वनमें राजहंस ऊंचे स्वरसे बोलता हो ॥ २ ॥ जगत के भयका नाश करने वाले श्रीकृष्ण जी के शंखका नाद सुनकर सम्पूर्ण प्रजा उनके देखने की लालसा से आई ॥ ३ ॥ आदर पाई हुई प्रजाने स्वरुप लाभ से सदैव पूर्णकाम और आत्माराम भगवान को भेटेंदी ॥ ४ ॥ जैसे बालक अपने पितासे कहते हैं वैसेही प्रीतिसे प्रफुल्लित होकर प्रजाने सबके सुहृद, रक्षाकरने वाले श्री भगवान से गदगद वाणीसे कहा ॥ ५ ॥ हेनाथ ! ब्रह्मा, तथा ब्रह्माके पुत्र देवता, देवताओंके पति इन्द्र से वंदना कियेहुए तुम्हारे कमल रूपीचरण ससार में कल्याण पानेवाले पुरुषों केलिये परम शरण रूप हैं ऐसे चरणों को कि जिनका ब्रह्मादिकोंका प्रभु काल भीकुछनहीं करसकता हम प्रणाम करते हैं ॥ ६ ॥ हेविश्व पालक ! तुमहमारे कल्याण कारक हो तुम्हीं हमारे माता, पिता, सुहृद, गुरू, देवता हो जिन की टहल करके हम कृतार्थ हुये हैं ॥ ७ ॥ आजहम आपसे सनाथ हुए क्योंकि देवताओं कोभी जो स्वरूप दुर्लभ है उसको तथा प्रेमयुक्त मंद मुसकान, स्नेहभरी दृष्टि वाले मुखका व सुंदर अंगका हम दर्शन करते हैं ॥ ८ ॥ हे कमल नयन ! जब आप अपने सुहृदो को देखने के हेतु कुरू या मधुदेश को पधारे तो आप विना हमको एक २ क्षण एक २ कोटि वर्षकी समान बीतताथा जैसे सूर्यबिना नेत्रोंको होताहै ॥९॥ इस भांति प्रजाके प्रियवाक्य सुनकर

ध्यानोऽनुग्रहंदृष्ट्या वितन्वन्प्राविशत्पुरीम् ॥ १० ॥ मधुभोजदशार्हार्हकुकुरान्धक वृष्णिभिः ॥ आत्मतुल्यबलैर्गुप्तां नागैर्भोगवतीमिव ॥ ११ ॥ सर्वर्तुसर्वविभवपुण्य वृक्षलताश्रमैः । उद्यानोपवनारामैर्वृतपद्माकरश्रियम् ॥ १२ ॥ गोपुरद्वारमार्गेषु कृत कौतुकतोरणाम् । चित्रध्वजपताकाग्रैरन्तःप्रतिहतातपाम् ॥ १३ ॥ संमार्जितमहा-मार्गरथ्यापणकचत्वराम् । सिक्तांगन्धजलैरुप्तां फलपुष्पाक्षताङ्कुरैः ॥ १४ ॥ द्वारि द्वारिगृहाणांच दध्यक्षतफलेक्षुभिः । अलंकृतांपूर्णकुम्भैर्बलिभिर्धूपदीपकैः ॥ १५ ॥ निशम्यप्रेष्ठमायान्तं वसुदेवोमहामनाः । अक्रूरश्चोग्रसेनश्चरामश्चाद्भुतविक्रमः । ॥ १६ ॥ प्रद्युम्नश्चारुदेष्णश्च साम्बोजाम्बवतीसुतः । प्रहर्षवेगोच्छ्वसितशयनासन भोजनाः ॥ १७ ॥ वारणेन्द्रंपुरस्कृत्य ब्राह्मणैस्ससुमङ्गलैः । शंखतूर्यनिनादेन ब्रह्म घोषेणचादृताः प्रत्युज्जग्मूरथैर्हृष्टाः प्रणयागतसाध्वसाः ॥ १८ ॥ वारमुख्याश्चश तशो यानैस्तद्दर्शनोत्सुकाः । लसत्कुण्डलनिर्भात कपोलवदनश्रियः ॥ १९ ॥ नट नर्तकगन्धर्वाः सूतमागधबन्दिनः । गायन्तिचोत्तमश्लोक चरितान्यद्भुतानि च ॥ २० ॥ भगवांस्तत्रबन्धूनां पौराणामनुवर्तिनाम् । यथाविध्युपसंगम्य सर्वेषांमा-नमादधे ॥ २१ ॥ प्रह्वाभिवादनाश्लेष करस्पर्शस्मितेक्षणैः । आश्वास्यचाऽश्व पाकेभ्योवरैश्चाभिमतैर्विभुः ॥ २२ ॥ स्वयंचगुरुभिर्विप्रैः सदारैःस्थविरैरपि । आ शीर्भिर्युज्यमानोऽन्यैर्वन्दिभिश्चाऽविशत्पुरम् ॥ २३ ॥ राजमार्गंगतेकृष्णे द्वारका याः कुलस्त्रियः । हर्म्याण्याऽऽरुरुहुर्विप्र तदीक्षणमहोत्सवाः ॥ २४ ॥ नित्यंनिरीक्ष

भक्त वत्सल श्रीभगवान कृपा दृष्टि करते हुये पुरीमें पधारे ॥ १० ॥ उस द्वारका की रक्षा श्रीभ-गवान की समान बलवाले मधु, भोज, दशार्ह, अर्ह, कुकुर अंधक, और वृष्णि जातिके क्षत्री कर रहे हैं जैसे नाग भोगपुरी की रक्षा करते हैं ॥ ११ ॥ जिसमें सब ऋतुओं के फल फूल आदि पुण्य वृक्ष, लता मंडप वाले उपवन व सुंदर घिरेहुए कमलों से तालाबों की शोभा होरही है ॥ १२॥ नगर के घरों व द्वारों पर तथा मार्ग में उत्सव के हेतु वंदनवारबंधे हैं चित्र विचित्र ध्वजा, पताका के अग्रभाग से नगर का ताप दूरहोता है ॥ १३ ॥ राजमार्ग में धूल नहीं है तथा गली, चौहटे, बाजार, चौक आदि सुंगध के जलसे छिड़के हैं और वहां फूलफल, अंकुर, बिखर रहे हैं ॥ १४ ॥ घरोंके द्वारमें दही, अक्षत, फल, फूल, जलसे भरेहुये घड़े, भेंटें, धूप व दीपों की शोभा होरही है ॥ १५ ॥ प्यारे श्रीकृष्ण का आना सुनकर बड़े मनवाले बसुदेव, उग्रसेन, अक्रूर और महा परा-क्रमी बलदेव जी ॥ १६ ॥ प्रद्युम्न, चारुदेष्ण, जाम्ववंती का बेटा शांब यह सब हर्ष से शयन, आसन, भोजन इनको त्यागकर ॥ १७ ॥ हाथी को आगेकर मंगल कारी वस्तुओं को हाथमें ले शंख, तुरही आदि बाजे बजाते हुए और वेदपाठ करते हुए ब्राह्मण रथोंपर वैठकर श्रीकृष्ण जी के सामने गये ॥ १८ ॥ आनंदके वेग से जिन्होंने शयन, आसन, भोजन आदि त्यागे हैं और स्नेह से जिनको संभ्रम होगया है ऐसी वेश्यायें श्रीकृष्ण जी के दर्शनों की उत्कंठा करके रथपर बैठकर दर्शनों को गई ॥ १९ ॥ कि जिनके कपोल देदीप्य मान कुंडलों से शोभित हैं—नट, नर्तक, गंधर्व, भाट यह स्तुति कर रहे हैं ॥ २० ॥ उस काल श्रीकृष्णजीने भी सबबंधु वर्गों और गायक लोगों को यथोचित प्रणाम किया ॥ २१ किसी को शिरसे किसी को बचन से नमस्कार कर किसी को स्पर्शकर, किसी से हाथ मिलाकर, किसी से हंसकर, सबसे यथा योग्य मिले और चांडालादिकों कोभी दान दे विदाकिया ॥ २२ ॥ आपने भी ब्राह्मणों, वृद्ध पुरुषों गुरू स्त्रियों, तथा बंदी जनों के आशीर्वाद लेतेहुए नगर में प्रवेश किया ॥ २३ ॥ श्रीभगवान जिस समय राज मार्गमे गए उस

माणानां यद्यपिद्वारकौकसाम्। न वितृप्यन्तिहिदृशः श्रियोधामांगमच्युतम्॥२५॥ श्रियोनिवासोयस्योरः पानपात्रंमुखंदृशाम्। बाहवोलोकपालानां सारङ्गाणांपदाम्बुजम् ॥ २६ ॥ सितातपत्रव्यजनैरुपस्कृतः प्रसूनवर्षैरभिवर्षितःपथि। पिशंगवासा वनमालयाबभौ घनोयथार्कोडुपचापवैद्युतैः ॥ २७ ॥ प्रविष्टस्तुगृहंपित्रोः परिष्वक्तःस्वमातृभिः। ववन्देशिरसासप्त देवकीप्रमुखामुदा ॥ २८ ॥ ताःपुत्रमङ्कमारोप्य स्नेहस्नुतपयोधराः। हर्षविह्वलितात्मानःसिषिचुर्नेत्रजैर्जलैः ॥ २९ ॥ अथाविशत्स्वभवनं सर्वकाममनुत्तमम्। प्रासादायत्रपत्नीनां सहस्राणिचषोडश ॥ ॥ ३० ॥ पत्न्यःपतिंप्रोष्यगृहानुपागतं विलोक्यसंजातमनोमहोत्सवाः। उत्तस्थुरारात्सहसाऽऽसनाशयात्साकं व्रतैर्व्रीडितलोचनाननाः ॥ ३१ ॥ तमात्मजैर्दृष्टिभिरन्तरात्मना दुरन्तभावाः परिरेभिरेपतिम्। निरुद्धमप्यास्रवदम्बुनेत्रयोर्विलज्जतीनां भृगुवर्यवैक्लवात् ॥ ३२ ॥ यद्यप्यसौपार्श्वगतोरहोगतस्तथापि तस्यांघ्रियुगंनवंनवम्। पदेपदेकाविरमेततत्पदाच्चलापियच्छ्रीर्नजहातिकर्हिचित् ॥३३॥ एवंनृपाणां क्षितिभारजन्मनामक्षौहिणीभिः परिवृत्ततेजसाम्। विधायवैरंश्वसनोयथानलं मिथोवधेनोपरतो निरायुधः ॥ ३४ ॥ सएषनरलोकेऽस्मिन्नवतीर्णःस्वमायया। रेमेस्त्रीरत्नकूटस्थो भगवान्प्राकृतोयथा ॥ ३५ ॥ उद्दामभावपिशुनामलवल्गुहासव्रीडावलोकनिहतो मदनोपियासाम्। संमुह्यचापमजहात्प्रमदोत्तमास्तायस्येन्द्रियं

काल हे शौनक! ईश्वर के दर्शन से उत्साहित स्त्रियां अटारियों पर चढ़ीं ॥ २४ ॥ यद्यपि द्वारका निवासी श्रीभगवान का नित्य ही दर्शन करते हैं परन्तु तौभी उनके नेत्र अच्युत भगवान के दर्शन से तृप्त नहीं होते ॥ २५ ॥ जिनकी छाती लक्ष्मी, भुजा लोक पालों और चरणकमल भक्तों के निवास स्थान हैं और मुख दृष्टियोंका पान पात्र है उन भगवानके दर्शनसे नेत्रतृप्त नहीं होते॥२६॥ श्रीकृष्णचन्द्र आनंदकन्द श्वेतछत्र शिरपर धारण किये चमरहिलते फूलोंकी वृष्टिहोती पीताम्बर और बनमाला से ऐसे शोभायमानथे जैसेमेघ, सूर्य, चन्द्र, इन्द्रधनुष और बिजली के तेजसे शोभित होताहै ॥ २७ ॥ श्रीकृष्णजीने मातापिताके घरजा देवकी आदिक सात माताओंको प्रीति पूर्वक प्रणामकिया ॥ २७ ॥ प्रेमसे जिनका दूधस्रवीभूत होताहै ऐसी माताएं हर्षसे विह्वलहो गोदीमें श्रीकृष्णजीको बैठा नेत्रोंके जलसे उन्हें सींचनेलगीं ॥ २९ ॥ फिर सम्पूर्ण कामनाओं से परिपूर्ण उत्तम घरमें प्रवेश किया जहां १६१०८ रानियोंके महलथे ॥ ३० ॥ वह स्त्रियें देशाटन करके आये पतिको दूरही से देख अति उत्सव को प्राप्त हो लज्जा से मुख नीचा किये जैसे नियम से व्रती बैठींथीं वैसेही सोलहों श्रृंगारकर उठधाईं ॥ ३१ ॥ हे शौनक! वह गंभीर भाव वाली स्त्रियां अपनेपति श्रीकृष्ण भगवानसे पहिले बुद्धिद्वारा फिर बालकोंद्वारा तदनंतर दृष्टिद्वारा मिलीं लज्जायुक्त स्त्रियों के नेत्रों का जल विवश होकर निकल आया ॥ ३२ ॥ यद्यपि श्रीकृष्ण भगवान सदां ही उनके पास रहते थे और एकांत में भी मिलते थे परन्तु उनके चरण क्षण २ में नवीन ही नवीन ज्ञात होते थे-चंचल लक्ष्मी भी जिन चरणोंको कभी नहीं त्यागतीं उन्हें फिर कौन त्यागकरसकता है ॥ ३३ ॥ श्रीकृष्ण भगवान ने पृथ्वी का भार दूर करने के हेतु जन्म लिया था इससे आपने विना शस्त्र धारण किये ही प्रभावशाली राजाओं में परस्पर शत्रुता उत्पन्न कराके एक दूसरे का नाशकरा उपराम को प्राप्त हुए जैसे वायु बांसको परस्पर घिसकर अग्नि उत्पन्नकर एक दूसरेका नाशकर शांत होजाताहै ॥ ३४ ॥ श्रीकृष्ण भगवान इसनर लोकमें अपनी मायासे अवतारले मनुष्यों की भांति स्त्रियोंके मध्यमें रमण करनेलगे ॥ ३५ ॥ जिन स्त्रियों के गंभीर प्रयोजन को बताने वाले

विमथितुंकुहकैर्नेशेकुः ॥ ३६ ॥ तमयंमन्यतेलोको ह्यसंगमपिसंगिनम् । आत्मौपम्येनमनुजं व्यापृण्वानंयतोऽबुधः ॥ ३७ ॥ एतदीशनमीशस्य प्रकृतिस्थोऽपितद्गुणैः । नयुज्यतेसदात्मस्थैर्यथाबुद्धिस्तदाश्रया ॥ ३८ ॥ तंमेनिरेऽबलामूढाः स्त्रैणं चाऽनुव्रतंरहः । अप्रमाणविदो भर्तुरीश्वरंमतयोयथा ॥ ३९ ॥

इतिश्रीभा०महा०प्र०एकादशोऽध्यायः ॥ ११ ॥

शौनक उवाच ॥ अश्वत्थाम्नोपसृष्टेन ब्रह्मशीर्ष्णोरुतेजसा । उत्तरायाहतोगर्भ ईशेनाऽऽजीवितःपुनः ॥ १ ॥ तस्यजन्ममहाबुद्धेः कर्माणिचमहात्मनः । निधनंच यथैवासीत्सप्रेत्यगतवान्यथा ॥ २ ॥ तदिदंश्रोतुमिच्छामि गदितुंयदिमन्यसे । ब्रूहिनःश्रद्दधानानां यस्यज्ञानमदाच्छुकः ॥ ३ ॥ सूत उवाच ॥ अपीपलद्धर्मराजः पितृवद्रंजयन्प्रजाः । निःस्पृहःसर्वकामेभ्यः कृष्णपादानुसेवया ॥ ४ ॥ संपदः क्रतवोविप्रा महिषीभ्रातरोमही । जम्बूद्वीपाधिपत्यंच यशश्चत्रिदिवंगतम् ॥ ५ ॥ किंतेकामाः सुरस्पार्हा मुकुन्दमनसोद्विजाः । अधिजह्रुर्मुदंराज्ञः क्षुधितस्ययथेतरे ॥ ६ ॥ मातुर्गर्भगतोवीरः सतदाभृगुनन्दन । ददर्शपुरुषंकंचिद्दह्यमानोऽस्त्रतेजसा ॥ ७ ॥ अंगुष्ठमात्रममलं स्फुरत्पुरटमालिनम् । अपीच्यदर्शनंश्यामं तडिद्वाससमच्युतम् ॥ ८ ॥ श्रीमद्दीर्घचतुर्बाहुं तप्तकांचनकुण्डलम् । क्षतजाक्षंगदापाणिमात्मनःसर्वतोदिशम् ॥ ९ ॥ परिभ्रमन्तमुल्काभां भ्रामयन्तंगदांमुहुः । कौमोदकीमतिश्रेष्ठां भक्त

निर्मल तथा सुंदर हास्य, और लज्जायुक्त चितवनसे मोहित श्रीमहादेव जीने भी मोहितहोकर अपने धनुषको त्यागदिया वे श्रेष्ठ स्त्रियां हाव भाव से भगवान के चित्तको लोभित न करसकीं ॥ ३६ ॥ वे परमेश्वर असंग हैं तौभी मनुष्य अज्ञान के वश होकर उनको अपने समान मानते हैं ॥ ३७ ॥ परमेश्वर की यहीतो परमेश्वरता है कि जैसे आत्माके आश्रय बुद्धि आत्मा ही मे रहकर आनंदादिक धर्म्मों से युक्त नहीं होती वैसेही परमेश्वर प्रकृति में रहने पर भी उसके सुख दुःख आदिक गुणों से कभी युक्त नहीं होते ॥ ३८ ॥ जैसे अहंकार की वृत्तियां क्षेत्रज्ञ को अपने आधीन मानती हैं वैसे ही स्वामी के प्रभाव को न जानने वाली मूर्ख स्त्रियें उनको अपने आधीन मानन लगीं ॥ ३९ ॥

इतिश्रीमद्भागवतेमहापुराणे०प्रथमस्कंधसरलाभाषाटीकायांएकादशोऽध्यायः ॥ ११ ॥

शौनक ने कहा–कि अश्वत्थामाके चलायेहुये प्रबल तेजवाले ब्रह्मास्त्र से उत्तरा का गर्भ नष्ट हुआ और उसे श्रीकृष्ण भगवान ने फिर से जीवित किया ॥ १ ॥ बड़े बुद्धिमान, महात्मा राजा परीक्षित के जन्म और कर्म हमसे कहो और जैसे उनकी मृत्युहुई और वह परलोक में गये वह सबकथा कहो ॥ २ ॥ मैं यह सम्पूर्ण सुननेकी इच्छा करताहूं मुझ श्रद्धायुक्त श्रोता के सुनने योग्यहो तो कहो ॥ ३ ॥ सूतजी बोले कि–धर्मराज श्री युधिष्ठिरजी ने श्रीकृष्णजी के चरणोंकी सेवा करतेहुए सब कामनाओं से निस्पृह हो पिताकी भांति प्रजा का पालन किया ॥ ४ ॥ संपत्ति, यज्ञ, मनुष्य, प्राणी भैय्या, पृथ्वी, जम्बूद्वीप का राज्य तथा स्वर्ग तक गईहुई कीर्त्ति ॥ ५ ॥ यह सब पदार्थ कि देवता भी जिनकी वाञ्छा करें उस राजा को प्राप्त थे परन्तु उसका चित्त श्रीकृष्ण भगवानमें लगे रहनेसे उसकी किसी गणना में नहीं थे हे ब्रह्मन् ! जैसे क्षुधार्त मनुष्यको फूल आदि की माला प्रसन्न नहीं करती वैसेही वे ऐश्वर्य्यभी उसको मोह नहीं प्राप्त करासके ॥ ६ ॥ हे शौनक ! माताके गर्भ में प्राप्ति और ब्रह्मास्त्र के तेज से जलतेहुए उस वीरबालक ने एक पुरुष देखा ॥ ७ ॥ वह पुरुष कैसा है कि अंगूठेकी समान उसका आकार, निर्मल, सुन्दर, सोनेका मुकुट धारण कियेहुए, बिजली सा पीताम्बर पहिनेहुये, निर्विकार ॥ ८ ॥ जिसकी चार शोभायमान भुजा हैं वे सुवर्णके कुंडल धारण

रक्षणतत्परम् ॥ १० ॥ अस्त्रतेजःस्वगदया नीहारमिवगोपतिः । विधमन्तंसंनिक्षेपर्यैक्षतकइत्यसौ ॥ ११ ॥ विधूयतदमेयात्मा भगवान्धर्मगुब्विभुः । मिषतोदशमास्यस्य तत्रैवान्तर्दधेहरिः ॥ १२ ॥ ततःसर्वगुणोदर्के सानुकूलग्रहोदये । जज्ञेवंशधरःपाण्डोर्भूयःपाण्डुरिवौजसा ॥ १३ ॥ तस्यप्रीतमनाराजा विप्रैर्धौम्यकृपादिभिः । जातकंकारयामास वाचयित्वाचमङ्गलम् १४ हिरण्यंगांमहींग्रामान्हस्त्यश्वान्नृपतिर्वरान् । प्रादात्स्वन्नंचविप्रेभ्यः प्रजातीर्थेसतीर्थवित् ॥ १५॥ तमूचुर्ब्राह्मणास्तुष्टा राजानंप्रश्रयानतम् । एषह्यस्मिन्प्रजातन्तौ कुरूणांपौरवर्षभ ॥ १६ ॥ दैवेनाप्रतिघातेन शुक्ले संस्थामुपेयुषि । रातोवोऽनुग्रहार्थाय विष्णुनाप्रभविष्णुना १७। तस्मान्नाम्नाविष्णुरात इतिलोकबृहच्छ्रवाः । भविष्यतिनसंदेहो महाभागवतोमहान् ॥ १८ ॥ युधिष्ठिर उवाच ॥ अप्येषवंश्यान्राजर्षीन्पुण्यश्लोकान्महात्मनः ॥ अनुवर्तिता स्विद्यशसासाधुवादेनसत्तमाः ॥ १९ ॥ ब्राह्मणा ऊचुः ॥ पार्थप्रजाऽविताक्षादिक्ष्वाकुरिवमानवः । ब्रह्मण्यः सत्यसंधश्च रामोदाशरथिर्यथा ॥२०॥ एषदाताशरण्यश्च यथाह्यौशीनरःशिबिः। यशोवितानितास्वानां दौष्यन्तिरिवयज्वनाम् ॥ २१ ॥ धन्विनामग्रणीरेष तुल्यश्चाऽर्जुनयोर्द्वयोः । हुताशइवदुर्धर्षः समुद्रइवदुस्तरः ॥ २२ ॥ मृगेन्द्रइवविक्रांतो निषेव्योहिमवानिव । तितिक्षुर्वसुधेवाऽसौ सहिष्णुःपितराविव ॥ २३ ॥ पितामहसमःसाम्ये प्रसादेगिरिशोपमः । आश्रयःस

किये कालनेत्र तथा उल्कासी प्रकाशमान गदा हाथ में लिये चारोंओर घुमाता है ॥९॥ जैसे सूर्य को कुहर नाश करता है वैसेही अपनी गदासे अस्त्रके तेजका नाश करता, ऐसा पुरुष अपनें निकट देखकर विचारनेलगा कि यह कौन है ॥१०॥ जिनकी आत्मा अप्रमेय हैं, धर्म की रक्षा करनेवाले विभु भगवान उस अस्त्र का संहारकर दश महीने के गर्भ के देखते २ वहीं अंतर्हित होगये ॥ ११ ॥ इसके अनंतर दूसरे ग्रहो के साथ शुभ ग्रहो के उदयकाल में पांडु के समान पांडु वंश का धारण करनेवाला बालक उत्पन्न हुआ ॥ १२ ॥ प्रसन्न चित होकर राजा युधिष्टिर ने धौम्य और कृप आदि ब्राह्मणों से स्वति वाचन करवा उसका जाति कर्म करवाया ॥ १३ ॥ पुण्यकाल के जाननेवाले राजा युधिष्टिर ने उस समय सुवर्ण, गौ, पृथ्वी, ग्राम, हाथी, घोड़े, और सुन्दर अन्न पुत्र जन्म के समय दान किये ॥ १४ ॥ सन्तुष्ट हुए ब्राह्मण प्रसन्न होकर बिनययुक्त युधिष्टिर से कहनेलगे कि हे पुरवंशियों में श्रेष्ठ!यह बालक तुम्हारी संतान।।१५॥ऐसे दैवसे नाशकोप्राप्त होगयाथा वहां तुमपर कृपा करके त्रिभुवनशील श्रीविष्णुजी ने यह पुत्र आपको दिया है ॥ १६ ॥ इस लिये इस लोक में इसकानाम विष्णुरात होगा और यह बड़ा यशस्वी व भगवद्भक्त होगा इसमें संशय कुछभी नहीं है ॥ १७ ॥ राजा युधिष्टिर ने कहा कि हे ब्राह्मणों ! उदार चित्त और सुदर यश से जिस भांति हमारे वंश के महात्मा राजर्षि बरतते आये हैं वैसेही बरतनेवाला यह पुत्र होगा ? ॥१८॥ ब्राह्मणों ने कहा कि हे राजा युधिष्टिर ! प्रजा रक्षण में तो मनुके पुत्र इक्ष्वाकु की समान और विप्रभक्त व सत्य प्रतिज्ञ राजा दशरथ के पुत्र श्रीरामचन्द्रजी की समान होगा ॥१९ ॥ पुण्यात्मा और शरणागत वत्सल राजा उशीनर के पुत्र राजा शिबि की समान और अपनी ज्ञाति तथा यज्ञ करताओंके यश विस्तार करनें में दुष्यंत के पुत्र भरतकी समान होगा ॥ २० ॥ धनुष धारियों में सहस्राजुंन तथा अर्जुनकी समान अग्नि की समान दुर्धर्ष और समुद्र की समान दुस्तर होगा ॥ २१ ॥ सिंह की समान पराक्रमी हिमालय की समान सबके सेवनेयोग्य, पृथ्वी की समान क्षमावान और माता पिता की समान शीलवानहोगा ॥२२॥समतामें ब्रह्माकी समान प्रसन्न होनेमें महादेवजी की समान, तथा विष्णु

वेभूतानां यथादेवोरमाश्रयः ॥ २४ ॥ सर्वसद्गुणमाहात्म्य एषकृष्णमनुव्रतः । र-न्तिदेवइवोदारो ययातिरिवधार्मिकः ॥ २५ ॥ धृत्याबलिसमःकृष्णे प्रह्लाद इव सद्ग्रहः । आहर्तैषोऽश्वमेधानां वृद्धानांपर्युपासकः ॥ २६ ॥ राजर्षीणांजनयिता शास्ताचोत्पथगामिनाम् । निग्रहीताकलेरेष भुवोधर्मस्यकारणात् ॥ २७ ॥ तक्ष-कादात्मनोमृत्युं द्विजपुत्रोपसर्जितात् । प्रपत्स्यतउपश्रुत्य मुक्तसंगःपदंहरेः ॥२८॥ जिज्ञासितात्मयाथात्म्यो मुनेर्व्याससुतादसौ । हित्वेदंनृपगङ्गायां यास्यत्यद्धाऽकु-तोभयम् ॥ २९ ॥ इतिराज्ञउपादिश्य विप्राजातककोविदाः । लब्धापचितयःसर्वे प्रतिजग्मुः स्वकान्गृहान् ॥ ३० ॥ सएषलोकविख्यातः परीक्षिदितियत्प्रभुः । पूर्वं दृष्टमनुध्यायन्परीक्षेतनरेष्विह ॥ ३१ ॥ सराजपुत्रोववृध आशुशुक्लइवोडुपः । आ-पूर्यमाणःपितृभिः काष्ठाभिरिवसोऽन्वहम् ॥ ३२ ॥ यक्ष्यमाणोऽश्वमेधेन ज्ञातिद्रो-हजिहासया । राजाऽलब्धधनोदध्यौ वन्यत्रकरदण्डयोः ॥ ३३ ॥ तदभिप्रेतमा-लक्ष्य भ्रातरोऽच्युतचोदिताः । धनंप्रहीणमाजह्रुरुदीच्यांदिशिभूरिशः ॥ ३४ ॥ तेनसंभृतसंभारो लब्धकामोयुधिष्ठिरः । वाजिमेधैस्त्रिभिर्भीतो यज्ञैःसमयजद्ध-रिम् ॥ ३५ ॥ आहूतोभगवान्राज्ञा याजयित्वाद्विजैर्नृपम् । उवासकतिचिन्मासान्सु-हृदांप्रियकाम्यया ॥ ३६ ॥ ततोराज्ञाऽभ्यनुज्ञातः कृष्णयासहबन्धुभिः । ययौ द्वारवतींब्रह्मन्सानुगैर्यदुभिर्वृतः ॥ ३७ ॥

इतिश्रीमद्भा०प्रथम०परीक्षिज्जन्माद्युत्कर्षोनामद्वादशोऽध्यायः ॥ १२ ॥

की समान सब प्राणियों का आश्रयभूत होगा ॥ २३ ॥ सब सद्गुणों और महिमा में श्रीकृष्णचंद्र की समान उदारता में रंतिदेव की समान और ययाति राजा के समान धर्मात्मा होगा ॥ २४ ॥ धीरज में राजाबलि की समान कृष्ण विषेमें प्रह्लाद की भांति आग्रह करेगा अश्वमेध यज्ञोंका करने वाला तथा वृद्ध मनुष्योंकी उपासना करनेवाला होगा ॥ २५ ॥ राजर्षियों को उत्पन्न करेगा उत्पथ गामियों को शिक्षा देवेगा पृथ्वी और धर्म के कारण यह कलियुग का निग्रह करेगा ॥ २६ ॥ ब्राह्मण के पुत्र द्वारा भेजेहुए तक्षक से अपनी मृत्यु सुनकर हरिभगवान के पद को प्राप्त होगा ॥ २७ ॥ हे राजा ! व्यासजीके पुत्र शुकदेवजीसे आत्म स्वरूपको जानकर गंगा तट पर इस शरीरको छोड़ मोक्षपद को प्राप्त होगा ॥ २८ ॥ ज्योतिष, जात में निपुण ब्राह्मण राजा को इस भांति से उप देश कर पूजा पा अपने २ घर को गये ॥ २९ ॥ जिस पुरुष को गर्भ में देखाथा उसकोमनुष्यों में भी आकर देखातो ध्यान करते २ परीक्षा की कि वह पुरुष है कि नहीं—इससे राजपुत्र परीक्षित इस नाम से जगत में प्रसिद्ध हुआ ॥ ३० ॥ वह राज पुत्र शुक्ल पक्ष के चन्द्रमा की भांति दिन २ बढ़ने लगा और युधिष्ठिर आदि नित्य उस का पालन करने लगे ॥ ३१ ॥ जाति द्रोहता नाश करने की इच्छा से युधिष्ठिर को अश्वमेध यज्ञ करने की कांक्षा हुई परन्तु कर और दंड इन के अतिरिक्त धनको न देखकर विचारने लगे ॥ ३२ ॥ राजाके इस प्रयोजन को जान कर श्रीभगवान ने युधिष्ठिर के भाइयों को उत्तर दिशा में भेजा वे वहां से मरुत राजाके यज्ञके त्याग किये हुये बहुत से धनको ले आये ॥ ३३ ॥ उस धनसे धर्म पुत्र युधिष्ठिरने यज्ञकीसामग्री की और जाति द्रोह से डरकर तीन अश्वमेध यज्ञों से भगवानकी पूजाकी ॥ ३४ ॥ राजायुधिष्ठिर के बुलाये हुए श्रीकृष्णभगवान आकर ब्राह्मणों से यज्ञ करा सुहृदों के प्रिय के हेतु कुछ महीने वहां बास किया ॥ ३५ ॥ इसके उपरांत राजा युधिष्ठिर व द्रौपदीसे आज्ञा ले यादवों व अर्जुन को साथ ले श्रीकृष्णभगवान द्वारका को आये ॥ ३६ ॥

इतिश्रीमद्भागवतेमहापुराणे०प्रथम०परीक्षितजन्मद्वादशोऽध्यायः ॥ १२ ॥

सूतउवाच ॥ विदुरस्तीर्थयात्रायां मैत्रेयादात्मनोगतिम् । ज्ञात्वाऽगाद्धास्तिन पुरं तयाऽवाप्तविवित्सितः ॥ १ ॥ यावतःकृतवान्प्रश्नान्क्षत्ताकौषारवाग्रतः । जातैक भक्तिर्गोविन्दे तेभ्यश्चोपरराम ह ॥ २ ॥ तंबंधुमागतंदृष्ट्वा धर्मपुत्रःसहानुजः । धृतराष्ट्रोयुयुत्सुश्च सूतःशारद्वतःपृथा ॥ ३ ॥ गांधारीद्रौपदीब्रह्मन्सुभद्राचोत्तराकृपी अन्याश्चजामयःपाण्डोर्ज्ञातयःससुताःस्त्रियः ॥४॥प्रत्युज्जग्मुःप्रहर्षेण प्राणंतन्वइवागतम् । अभिसंगम्यविधिवत्परिष्वङ्गाभिवादनैः ॥ ५ ॥ मुमुचुःप्रेमबाष्पौघंविरहौत्कण्ठ्यकातराः । राजातमर्हयांचक्रे कृतासनपरिग्रहम् ॥ ६ ॥ तंभुक्तवंतमासीनं विश्रांतंसुखमासने । प्रश्रयावनतोराजा प्राहतेषांचशृण्वताम् ॥ ७ ॥ युधिष्ठिर उवाच ॥ अपिस्मरथनोयुष्मत्पक्षच्छायासमेधितान् । विपद्गणाद्विषाग्न्यादेर्मोचिता यत्समातृकाः ॥ ८ ॥ कयावृत्यावर्तितंवश्चरद्भिःक्षितिमंडलम् । तीर्थानिक्षेत्रमुख्यानि सेवितानीहभूतले ॥ ९ ॥ भवद्विधाभागवतास्तीर्थभूताःस्वयंविभो । तीर्थी कुर्वन्तितीर्थानि स्वांतःस्थेनगदाभृता ॥ १० ॥ अपिनःसुहृदस्तात बांधवाःकृष्ण देवताः । दृष्टाःश्रुतावायदवःस्वपुर्यांसुखमासते ॥ ११ ॥ इत्युक्तोधर्मराजेन सर्वं तत्समवर्णयत् । यथानुभूतंक्रमशो विनायदुकुलक्षयम् ॥१२॥नन्वप्रियंदुर्विषहंनृणां स्वयमुपस्थितम् । नावेदयत्सकरुणो दुःखितान्द्रष्टुमक्षमः ॥ १३ ॥ कंचित्कालमथावात्सीत्सत्कृतो देववत्सुखम् । भ्रातुर्ज्येष्ठस्य श्रेयस्कृत्सर्वेषांप्रीतिमावहन् १४॥

सूतजी बोले कि विदुरजी तीर्थ में मैत्रेयजी से आत्माकी गति से श्रीकृष्णको जान उससे सब इष्ट जानकर हस्तिनापुर को गये ॥१॥ विदुरजी ने मैत्रेयजी से जितने प्रश्न किये, उनसे श्रीकृष्ण भगवान में एक भक्ति प्राप्त हुई और विदुरजी उन प्रश्नों से उपराम को प्राप्त हुए ॥ २ ॥ अपने भाई विदुरजी को आया जानकर धृतराष्ट्र, राजा युधिष्ठिर अपने भाइयों समेत, युयुत्सु, संजय, कृपाचार्य, कुंती ॥ ३ ॥ गांधारी, द्रौपदी, सुभद्रा, उत्तरा, कृपी और भी पांडु जाति की स्त्रीयां, जातिवाले, और दूसरी भी कितनी एक पुत्रवती स्त्रियां ॥ ४ ॥ ये सब जैसे जीव के आनेपर सब इन्द्रियां उसके सन्मुख जांय वैसेही प्रेम पूर्व्वक उनके सन्मुख गए ॥ ५ ॥ स्पर्श और वंदन द्वारा विधिवत सबसे मिल विरह से व्याकुल हो प्रेमाश्रु बहाने लगे ॥ ६ ॥ राजा युधिष्ठिर ने विदुरजी को पूज, आसन दे भोजन कराया तत्पश्चात् जहांपर वह सुख पूर्व्वक बैठेथे वहांपर युधिष्ठिरजी ने नम्रता से कहा ॥ ७ ॥ युधिष्ठिरजी बोले । आपके पक्ष की छाया से हमको वृद्धि प्राप्त हुई है आप कभी हमारा स्मरण करते हो ? आपने विष, अग्नि, आपत्तिओं से माता सहित हमको छुड़ाया है ॥ ८ ॥ पृथ्वी में विचरकर आपने किस भांति से निर्वाह किया और पृथ्वी में कौन २ से मुख्य २ तीर्थ व क्षेत्रों का सेवन किया है ॥ ९ ॥ हे विभो आप सरीखे भगवद्भक्त तो आपही तीर्थ रूप हैं आप का तीर्थ जानातो उलटा उनका पवित्र करना है क्योंकि हृदय में परमेश्वर का अंश होनेसे आप लोग तीर्थों को पवित्र करते हैं ॥ १० ॥ हे तात ? हमारे सुहृद श्रीकृष्णजी और बांधव, यादव अपनी पुरी में कुशल पूर्व्वक तो हैं आपने उनका वृत्तांत सुना है या उनको देखा है ! ॥११॥ ऐसे धर्म राजके पूछनेपर विदुरजी ने क्रमानुसार सब वृत्तांत कहे परन्तु यदुकुल के नाश के समाचार न कहे ॥ १२ ॥ दैवयोग से प्राप्तहुआ दुःख मनुष्य से नहीं सहाजाता और आप पांडवों का दुःख नहीं देखसकते इस कारण विदुरजी ने यादवों के क्षय का वृत्तांत नहीं कहा ॥ १३ ॥ देवताओं की भांति सत्कार कियेजाते विदुरजी जेठे भाई के कल्याण के अर्थ सबको प्रसन्न करते कुछकाल घरमें रहे ॥१४॥ (विदुरजी शूद्रथे सो वे धृतराष्ट्र

अबिभ्रदर्यमादण्डं यथावदघकारिषु । यावद्धारशूद्रत्वं शापाद्वर्षशतंयमः ।१५। युधिष्ठिरोलब्धराज्योदृष्ट्वापौत्रंकुलंधरम् । भ्रातृभिर्लोकपालाभैर्मुमुदेपरयाश्रिया ॥ १६ ॥ एवंगृहेषुसक्तानां प्रमत्तानांतदीहया । अत्यक्रामदविज्ञातः कालःपरमदु· स्तरः ॥ १७ ॥ विदुरस्तदभिप्रेत्य धृतराष्ट्रमभाषत । राजन्निर्गम्यतांशीघ्रं पश्येदं भयमागतम् ॥ १८ ॥ प्रतिक्रियानयस्येह कुतश्चित्कर्हिचित्प्रभो । सएषभगवान् कालः सर्वेषांनःसमागतः ॥ १९ ॥ येनचैवाऽभिपन्नोऽयं प्राणैःप्रियतमैरपि । जनः सद्योवियुज्येत किमुतान्यैर्धनादिभिः २० ॥ पितृभ्रातृसुहृत्पुत्रा हतास्तेविगतंवयः आत्माचजरयाग्रस्तः परगेहमुपाससे ॥ २१ ॥ अहोमहीयसीजन्तोर्जीविताशा यथाभवान् । भीमेनावर्जितंपिण्ड माद्त्सेगृहपालवत् २२अग्निर्निसृष्टोदत्तश्च गरो दाराश्चदूषिताः । हृतंक्षेत्रंधनंयेषां तद्दत्तैरसुभिःकियत् ॥२३॥ तस्यापितवदेहोऽयं कृपणस्यजिजीविषोः । परैत्यनिच्छतोजीर्णो जरयावाससीइव ॥ २४ ॥ गतस्वा र्थमिमंदेहं विरक्तोमुक्तबन्धनः ।अविज्ञातगतिर्जह्यात्सवैधीरउदाहृतः ॥ २५ ॥ यःस्व

को किस भांति उपदेश करते हैं कदाचित ऐसी शंका हो तो कहते हैं कि यह आपही यमराज थे परन्तु मांडव्य ऋषि के श्राप से शूद्र हुए) यमराज ने मांडव्य (१) ऋषिके श्राप से १००वर्षतक शूद्रपन धारण किया तबतक पापी लोगों को अर्यमा पितर यथो चित दण्डदेते रहे ॥ १५ ॥ राज्य को प्राप्त हुए राजा युधिष्ठिर कुल का धारण करने वाला पौत्र देखकर ऐश्वर्य्य से लोकपालों की समान कांति वाले अनुजों समेत बडे आनंद को प्राप्त हुए ॥ १६ ॥ ऐसे घरों में आसक्त और घर के कामो से प्रमत्त उन पांडवों का परम दुस्तर काल व्यतीत होगया ॥ १७ ॥ विदुरजी उस समय निकलकर धृतराष्ट्रसे कहने लगे कि हे राजा धृतराष्ट्र शीघ्रही घरसे निकलो और इस आये हुए भयको देखो ॥ १८ ॥ हे प्रभु यहां जिसका यत्न किसी से कहीं नहीं हो सकता वही काल अब हम सबको आ प्राप्त हुआ ॥ १९ ॥ जिस काल से ग्रसाहुआ यह मनुष्य अति प्रिय अपने प्राणों से भी हीन हो जाता है फिर दूसरे धन आदि की कौनबात है ॥ २० ॥ तुम्हारे पिता, भैया सुहृद, पुत्र सब मरगए तुम्हारी अवस्था भी व्यतीत होगई परन्तु तो भी दूसरे के घरका सेवन करते हो ॥ २१ ॥ अहो ! प्राणी के जीने की आशा बहुतबड़ी है, जिस आशा से तुम भीमसेनका दियाहुआ टुकडा जिसने तुम्हारे पुत्रों को मारा खातेहो ॥ २२ ॥ देखो जिन पाडवों को तुमने आग में जलाया, विष के लड्डू खिलाये, जिनकी स्त्रियों को दुख दिया और धन व घर का भी हरण करलिया उन पांडवों के दियेहुए जीव से कितना काम चलेगा ॥ २३ ॥ चाहे आप इस दीनता का भले अनुभव करलौ तोभी जीनेकी आशावाले और कृपण, आपका यह शरीर बुढ़ापा के कारण जीर्ण वस्त्र की भांति आपसे आप विनाही इच्छा क्षीण होताजाता है, इस लिये अब आप धैर्य्य धारण करो ॥ २४ ॥ जो पुरुष वैराग्य को धारण कर आवागमन से छूट, ऐसे स्थान में जाकर बसे जहां किसी को ज्ञात नहोवे तो उसे धीर कहते हैं ॥ २५ ॥ जो अपने ज्ञान से तथा

१—किसी काल में एक राजा के सिपाहीयो ने मांडव्य ऋषि को तप करते हुए चोरोंके साथ राजाके पास लेगए तब राजाकी अज्ञासे चोर और ऋषिको भी सिपाहीयों ने सूली पर चढादिया पीछे ऋषि जान शूलीसे उतार राजाने ऋषिको प्रसन्नकिया तदनंतर ऋषि यमराजके निकट जाकर बोले कि मैं किस कारण से सूलीपर चढाया गया तब यमराज ने कहा कि आपने बालकपन में एक कुशा की नोंक से कीडोंको छेदकर खेल किया था इस पाप से आपको सूली· हुई यह सुन ऋषि ने यमराज से कहा कि लड़कपन के अज्ञानता के पाप में इतना बड़ा दंड दिया जा तू १०० वर्षतक शूद्र हो ।

कालपरमोवेह जातनिर्वेदआत्मवान् । हृदिकृत्वाहरिंगेहात्प्रव्रजेत्सनरोत्तमः ॥ २६ ॥ अथोदीचींदिशंयातु स्वैरज्ञातगतिर्भवान् । इतोऽर्वाक्प्रायशःकालः पुंसांगुणविकर्षणः ॥ २७ ॥ एवंराजाविदुरेणानुजेन प्रज्ञाचक्षुर्बोधितोह्याजमीढः । छित्वास्वेषु स्नेहपाशान्द्रढिम्नो निश्चक्रामभ्रातृसंदर्शिताध्वा ॥ २८ ॥ पतिंप्रयान्तंसुबलस्य पुत्री पतिव्रताचानुजगामसाध्वी । हिमालयंन्यस्तदण्डप्रहर्षं मनस्विनामिवसत्संप्रहारः ॥ २९ ॥ अजातशत्रुःकृतमैत्रोहुताग्निर्विप्रान्नत्वा तिलगोभूमिरुक्मैः । गृहंप्रविष्टोगुरुवन्दनाय नचापश्यत्पितरौसौबलींच ॥ ३० ॥ तत्रसंजयमासीनं पप्रच्छोद्विग्नमानसः । गावल्गणेक्वनस्तातो वृद्धोहीनश्चनेत्रयोः ॥ ३१ ॥ अम्बाचहतपुत्राऽऽर्तापितृव्यःक्वगतःसुहृत् । अपिमय्यकृतप्रज्ञे हतबन्धुःसभार्यया । आशंसमानःशमलं गंगायांदुःखितोपतत् ॥ ३२ ॥ पितर्युपरतेपाण्डौ सर्वान्नःसुहृदःशिशून् । अरक्षतांव्यसनतः पितृव्यौक्वगतावितः ॥ ३३ ॥ सूतउवाच ॥ कृपयास्नेहवैक्लव्यात्सूतोविरहकार्शितः । आत्मेश्वरमचक्षाणो नप्रत्याहातिपीडितः ॥ ३४ ॥ विमृज्याऽश्रूणिपाणिभ्यां विष्टभ्यात्मानमात्मना ॥ अजातशत्रुंप्रत्यूचे प्रभोःपादावनुस्मरन् ॥ ३५ ॥ संजयउवाच ॥ नाहंवेदव्यवसितं पित्रोर्वःकुलनन्दन । गांधार्यावामहाबाहो मुषितोऽस्मिमहात्मभिः ॥ ३६ ॥ अथाजगामभगवान्नारदःसहतुम्बरुः । प्रत्युत्थायाभिवाद्याऽऽहसानुजोऽभ्यर्चयन्निव ॥ ३७ ॥ युधिष्ठिरउवाच ॥ नाहंवेदग

दूसरे के उपदेश से वैराग्य धारण कर हरिभगवान को हृदय में धार घर से निकलजाय तो उस पुरुष को प्राणियों में श्रेष्ट समझना चाहिये ॥ २६ ॥ अब आप अपने आत्मीय जनों को तो ज्ञात न्होने दो और आप उत्तर दिशाको चलेजाओ क्योंकि अब मनुष्यों के धर्मादिक गुणोंका नाशकरने वाला काल आवेगा ॥ २७ ॥ इस प्रकार छोटे भाई विदुर ने अंध राजा धृतराष्ट्र को शिक्षा दी तो बांधवों के स्नेह रूप पाशको काटकर भाईके दिखायेहुए बंध मोक्ष के रास्ते को जान बाहर निकल पड़े ॥ २८ ॥ सुबल की बेटी साध्वी सुशीला गांधारी पति धृतराष्ट्र को जाता देखकर उनके पीछे२ आनंददायक हिमालय को चलपड़ी जैसे युद्ध में शूर बीरों को शर लगने से आनंद होता है वैसेही आनंदित गंधारी भी गई ॥ २९ ॥ राजा युधिष्ठिर संध्या वंदन कर होम के पश्चात् तिल, गौ, भूमि और सुवर्ण सेब्राह्मणों की पूजाकर गुरूको प्रणाम करने के लिये घरमें गये तो वहां विदुर, धृतराष्ट्र तथा गांधारी को न देखा ॥ ३० ॥ तब व्याकुल चित्तहो वहां बैठेहुए संजय से पूछा कि हे गवल गण के पुत्र संजय ! नेत्रों से हीन और वृद्ध हमारे ताऊ कहां गये ॥ ३१ ॥ पुत्रों के मरने से दुःखित हमारी माता गांधारी कहां गई और हमारे सुहृद विदुर कहां गये जिन के बंधु मर गये हैं ऐसे पिता धृतराष्ट्र मुझ मंद मतिपर शंका लाकर गांधारी समेत दुःखी होकर गंगा में तो न गिरपड़े ॥ ३२ ॥ पांडु पिता के मरजाने से जिन्होंने कष्ट से बचाकर हमारी रक्षा की वे दोनो कहां गए ॥ ३३ ॥ सूतजी बोले कि-कृपा और स्नेह से उत्पन्न हुई बिकलता से अति दुःखित और बिरह से कर्षित संजय अपने स्वामी धृतराष्ट्रको न देखकर कुछ न बोला ॥ ३४ ॥ फिर हाथों से आंसू पोंछकर, बुद्धि से चित्तमें धैर्य्य धारण कर, अपने स्वामी के चरणोंका स्मरण करता हुआ संजय राजा युधिष्ठिर से कहनेलगा ॥ ३५ ॥ हे कुलनंदन ! आपके पिता महात्मा धृतराष्ट्र तथा बिदुर व गंधारीकी मुझेकुछ खबर नहीं है हे महाबाहु ! मैं तो उन महात्माओं से ठगागया ॥ ३६ ॥ इसके अनंतर तुंबुरु गंधर्वको लियेहुए श्रीभगवान नारद जी आये, राजा युधिष्ठिर ने उठकर इनको दंडवतकर भाइयों समेत पूजाकी और यह पूछा ॥ ३७ ॥ हे भगवन् !

तिपित्रोर्भगवन्क्वगताश्चितः । अम्बावाहतपुत्राऽऽर्तीक्वगताचतपस्विनी ॥ कर्णे धारइवापारे भगवान्पारदर्शकः ॥ ३८ ॥ अथाबभाषेभगवान्नारदो मुनिसत्तमः । माकंचनशुचोराजन्यदीश्वरवशंजगत् ॥ ३९ ॥ लोकाःसपालायस्येमे वहन्तिबलिमीशितुः । ससंयुनक्तिभूतानि सएवावियुनक्तिच ॥ ४० ॥ यथागावो नसिप्रोतास्तन्त्यां बद्धाःस्वदामभिः । वाक्तन्त्यांनामभिर्बद्धा वहन्तिबलिमीशितुः ॥ ४१ ॥ यथाक्रीडोपस्कराणां संयोगविगमाविह । इच्छयाक्रीडितुःस्यातां तथैवेशेच्छयानृणाम् ॥ ४२ ॥ यन्मन्यसेध्रुवंलोकमध्रुवं वानचोभयम् । सर्वथाहिनशोच्यास्ते स्नेहादन्यत्रमोहजात् ॥ ४३ ॥ तस्माज्जह्यङ्गवैक्लव्यमज्ञानकृतमात्मनः ।कथंत्वनाथाःकृपणा वर्तेरंस्त्वनमाश्रिताः ॥ ४४ ॥ कालकर्मगुणाधीनो देहोऽयंपाञ्चभौतिकः । कथमन्यांस्तुगोपायेत्सर्पग्रस्तोयथापरम् ॥ ४५ ॥ अहस्तानिसहस्तानाम पदानिचतुष्पदाम् ॥ फल्गूनितत्रमहतां जीवोजीवस्यजीवनम् ॥ ४६ ॥ तदिदंभगवान्राजन्नेकआत्माऽऽत्मनांस्वदृक् । अन्तरोऽनन्तरोभाति पश्यतंमाययोरुधा॥४७॥ सोयमद्यमहाराजभगवान्भूतभावनः। कालरूपोऽवतीर्णोऽस्यामभावायसुरद्विषाम् ॥ ४८ ॥ निष्पादितंदेवकृत्यमवशेषंप्रतीक्षते । तावद्यूयमवेक्षध्वं भवेद्यावदिहेश्वरः ॥ ४९ ॥ धृतराष्ट्रःसहभ्रात्रा गांधार्याचस्वभार्यया । दक्षिणेनहिमवत ऋषीणामा-

---

मै अपने पिता धृतराष्ट्र, गंधारी तथा विदुर जी की गति नहीं जानता कि वे इस स्थान से कहां चले गये और पुत्रों के मरण से गांधारी कहां गई । हे मुनिसत्तम ! इस अपार दुःखरूपी समुद्र में पार दिखाने वाले खेवटिया आपही हो ॥ ३८ ॥ यह सुन नारद जी ने कहा—कि हे राजन् ! आप किसी का शोच न करें क्योंकि यह सब जगत् ईश्वर के वश है ॥ ३९ ॥ यह सब लोक लोकपालों समेत जिन भगवान परमात्मा को वलिदेते हैं वेही परमात्मा प्राणियों को मिलाते और बिछुड़ाते हैं ॥ ४० ॥ जैसे नाक में नाथ डालकर रस्सी में बंधेहुए बैल अपने स्वामी की आज्ञा मानते हैं वैसेही वाणी रूप डोरी में परमेश्वर की आज्ञा रूप नथनियों से बंधे हुए मनुष्य ईश्वर की आज्ञा को मानते हैं ॥ ४१ ॥ जैसे खिलौनों का संयोग वियोग खेलने वाले की इच्छा से होता है वैसेही मनुष्यों का संयोग वियोग ईश्वर की इच्छा से होता है ॥ ४२ ॥ यदि तुम इस सृष्टि को जीव रूप से सचा और देह रूप से झूठा मानते हो और शुद्ध ब्रह्म करके सचा और झूठा भी नहीं मानते तो माता पिता का शोच करना योग्य नहीं है मोह से उत्पन्न हुआ स्नेहही शोक का कारण है ॥ ४३ ॥ हे राजा ! इस अज्ञानता को जिस से चित्त व्याकुल है त्याग करो और मेरे बिना अनाथ गरीब, बनमें रहे धृतराष्ट्र कैसे गुजर करेंगे इस व्याकुलता को त्याग करो ॥ ४४ ॥ सांप का डसाहुआ मनुष्य दूसरों की रक्षा नहीं करसकता वैसेही काल, कर्म, गुणों के आधीन इन पंच महाभूतों का शरीर भी दूसरों की रक्षा नहीं करसकता॥ ४५ ॥ देखो हाथवालों के बिना हाथ वाले, (चौपाये) चौपायों के बिना पांव वाले (तृण) उन में भी बड़ों के छोटे— इस भांति सब प्राणियों की जीविका प्राणियों ही से है ॥ ४६ ॥ हे राजा युधिष्ठिर ! आत्माओं का आत्मा यह जगत् है आपही भगवत रूप हैं वे परमात्मा सब भोग्य भोक्ताओं के आत्म रूप एकही हैं इस लिये उनमें सजातीय भेद नहीं है और बाहर, भीतर भोक्ता और भोग्यरूप प्रतीत होते हैं इस से विजातीय भेद नहीं है तोभी माया से अनेक रूप ज्ञात होते हैं उन्हें तुम देखो ॥ ४७ ॥ हे महाराज ! उन्हीं भगवान प्राणियों के रक्षक ने राक्षसों का नाश करने के लिये पृथ्वी में अवतार लिया है ॥ ४८ ॥ देवताओं का कार्य तो करचुके हैं अब शेष कामकी प्रतीक्षा करते हैं जब तक

श्रमंगतः ॥ ५० ॥ स्रोतोभिःसप्तभिर्यावै स्वर्धुनीसप्तधाव्यधात्। सप्तानांप्रीततनाम्नो सप्तस्रोतःप्रचक्षते ॥ ५१ ॥ स्नात्वाऽनुसवनंतस्मिन्हुत्वाचाग्नीन्यथाविधि । अब्भक्षउपशांतात्माससआस्तेविगतैषणः ॥ ५२ ॥ जितासनोजितश्वासः प्रत्याहृतषाडिन्द्रियः। हरिभावनयाध्वस्तरजःसत्त्वतमोमलः ॥ ५३ ॥ विज्ञानात्मनिसंयोज्य क्षेत्रज्ञेप्रविलाप्यतम्। ब्रह्मण्यात्मानमाधारे घटाम्बरमिवाम्बरे ॥ ५४ ॥ ध्वस्तमायागुणोदर्कोनिरुद्धकरणाशयः। निवर्तिताखिलाहार आस्तेस्थाणुरिवाधुना ॥ ५५ ॥ तस्यान्तरायोमैवाभूःसंन्यस्ताखिलकर्मणः। सवाअद्यतनाद्राजन्परतःपंचमेऽहनि। कलेवरंहास्यतिस्वंतच्च भस्मीभविष्यति ॥ ५६ ॥ दह्यमानेऽग्निभिर्देहे पत्युःपत्नी सहोटजे। बहिःस्थितापतिंसाध्वी तमग्निमनुवेक्ष्यति ॥ ५७ ॥ विदुरस्तुतदाश्चर्यं निशाम्यकुरुनन्दन। हर्षशोकयुतस्तस्माद्गन्ता तीर्थनिषेवकः ॥ ५८ ॥ इत्युक्त्वाऽथारुहत्स्वर्गंनारदःसहतुम्बरुः। युधिष्ठिरोवचस्तस्य हृदिकृत्वाऽजहाच्छुचः ॥५९॥

इतिश्री०म०प्र०विदुरोक्त्याधृतराष्ट्रमोक्षवर्णननामत्रयोदशोऽध्यायः ॥ १३ ॥

सूतउवाच ॥ संप्रस्थितेद्वारकायां जिष्णौबन्धुदिदृक्षया। ज्ञातुंचपुण्यश्लोकस्य कृष्णस्यचविचेष्टितम् ॥१॥ व्यतीताः कतिचिन्मासास्तदा नाऽयात्ततोऽर्जुनः। ददर्शघोररूपाणि निमित्तानिकुरूद्वह ॥ २॥ कालस्यचगतिंरौद्रांविपर्यस्तर्तुधर्मिणः पापीयसींनृणांवार्तां क्रोधलोभानृतात्मनाम् ॥ ३ ॥ जिह्मप्रायंव्यवहृतं शाठ्यमिश्रं-

ईश्वर यहां रहें तबतक आपभी रहो ॥ ४९ ॥ धृतराष्ट्र अपनेभाई विदुर और गांधारी समेत हिमालय के दक्षिण ओर जहां ऋषियों का आश्रम है तहां गये हैं ॥ ५० ॥ जिस आश्रम में सप्त ऋषियों के प्रीति के हेतु गंगाजी सात धारा होकर वही हैं और जिसे सप्तस्रोत करते हैं ॥ ५१ ॥ उस स्थान में धृतराष्ट्र त्रिकाल स्नान करके विधिपूर्वक, शांत चित्त व अनिच्छित होकर जलका भोजनकर अग्नि में होम कर रहे हैं ॥ ५२ ॥ आसन को जीतकर छहों इन्द्रियों को वश में कर श्वास रोककर, परमात्मा की भावना से रज, सत्व, तम गुणों के मलको त्याग कर ॥ ५३ ॥ विज्ञान को आत्मा में योजनाकर और आत्मा को क्षेत्रज्ञ में और क्षेत्रज्ञको साक्षात् श्री भगवान् से मिलाकर के—जैसे घटाकाश को घटोपाधि से योजना करके महाकाश में लीन किया करते हैं ॥ ५४ ॥ माया सम्बन्धी वासनाओंका त्याग कर इन्द्रियों और मनको रोक, सब भोग्य पदार्थों को छोड़ काठ के ठूंठ की भांति अचल बैठे हैं उन्होंने सम्पूर्ण कर्मों को त्यागदिया है इस लिये हे राजा ! तू विघ्न मतकरे ॥ ५५ ॥ वह आज पांचवें दिन अपने शरीर को छोड़कर भस्म होजायेंगे ॥ ५६ ॥ पर्णशाला में योगकी अग्नि से पति को जलता देखकर बाहर बैठीहुई पतिव्रता गांधारीभी उस अग्नि में प्रवेश करजांयगी ॥ ५७ ॥ हे युधिष्ठिर ! उस आश्चर्य को देखकर विदुरजी हर्ष व शोक युक्तहो वहांसे तीर्थ सेवन को निकल जांयगे ॥ ५८ ॥ नारदजी इस भांति कहकर तुंबुरु गंधर्व को संगले स्वर्गको गए और युधिष्ठिरजीने उनके बचनों को हृदय में धारण कर शोक का त्याग किया ॥५९॥

इति श्री भागवते महापुराणे प्रथमस्कंधेसरलाभाषाटीकायां त्रयोदशोऽध्यायः ॥ १३ ॥

सूतजी बोले कि—बंधुओंके देखनेकी इच्छा तथा श्रीकृष्णके चरित्र जाननेको द्वारकागये अर्जुन को ॥१॥ कई महीने होगये परन्तु अर्जुन वहां से न आये इससे प्रथम युधिष्ठिरने घोररूप उत्पात देखे ॥ २ ॥ कालकी विपरीत गति, ऋतुओं के विपरीत धर्म, मनुष्योंको पापरूप, मनुष्योंको क्रोध

चसौहृदम् । पितृमातृसुहृद्भ्रातृदम्पतीनां च कल्कनम् ॥४॥निमित्तान्यत्यरिष्टानि कालेत्वनुगतेनृणां। लोभाद्यधर्मप्रकृतिं दृष्ट्वोवाचानुजंनृपः ॥ ५॥ युधिष्ठिरउवाच। संप्रेषितोद्वारकायां जिष्णुर्बन्धुदिदृक्षया।ज्ञातुंचपुण्यश्लोकस्य कृष्णस्यचविचेष्टितम् ॥ ६॥ गताःसप्ताऽधुनामासा भीमसेनतवानुजः । नायातिकस्यवाहेतो नाहंवेदेद मंजसा ॥ ७ ॥ अपिदेवर्षिणाऽऽदिष्टःसकालोयमुपस्थितः । यदात्मनोऽङ्गमाक्रीडं भगवानुत्सिसृक्षति ॥ ८ ॥ यस्मान्नःसंपदोराज्यं दाराःप्राणाःकुलंप्रजाः । आसन्सपत्नविजयो लोकाश्चयदनुग्रहात् ॥ ९ ॥ पश्योत्पातान्नरव्याघ्रदिव्यान्भौमान्सदैहिकान् । दारुणान्शंसतो दूराद्भयंनोबुद्धिमोहनम् ॥ १० ॥ ऊर्वक्षिबाहवोमह्यं स्फुरन्त्यङ्गपुनःपुनः । वेपथुश्चापिहृदय आराद्दास्यन्तिविप्रियम् ॥ ११ ॥ शिवैषोद्यन्तमादित्यमभिरौत्यनलानना । मामंगसारमेयोऽयमभिरौतिह्यभीरुवत् ॥ १२ ॥ शस्ताःकुर्वन्तिमांसव्यं दक्षिणंपशवोऽपरे । वाहांश्चपुरुषव्याघ्रलक्षयेरुदतोमम१३ मृत्युदूतःकपोतोऽयमुलूकःकम्पयन्मनः।प्रत्युलूकश्च कुह्वानैरानिद्रौशून्यमिच्छतः१४ धूम्रादिशःपरिधयःकम्पते भूःसहाद्रिभिः । निर्घातश्चमहानासीत्साकंचस्तनयित्नुभिः ॥ १५ ॥ वायुर्वातिखरस्पर्शो रजसाविसृजंस्तमः । असृग्वर्षन्तिजलदा बीभत्समिवसर्वतः ॥ १६ ॥ सूर्यंहतप्रभंपश्य ग्रहमर्दंमिथोदिवि । ससंकुलैर्भूतगणैर्ज्वलितेइवरोदसी ॥ १७ ॥ नद्योनदाश्चक्षुभिताः सरांसिचमनांसिच । नज्वलत्यग्नि राज्यन कलोऽयंकिंविधास्यति ॥ १८ ॥ नपिबन्तिस्तनंवत्सानदुह्यन्तिचमातरः ।

केनवातेप्रतिकृतमित्युक्तःसन्यवेदयत् ॥ ४० ॥ निशम्यशप्तमतदर्हंनरेन्द्रं सब्राह्मणोनाऽऽत्मजमभ्यनन्दत् । अहोबतांहोमहदद्यतेकृतं स्वल्पीयसिद्रोहउरुर्दमोधृतः ॥ ४१ ॥ नवैनृभिर्नरदेवंपराख्यं संमातुमर्हस्यविपक्वबुद्धे । यत्तेजसादुर्विषहेण गुप्ताविन्दन्तिभद्राण्यकुतोभयाःप्रजाः ॥ ४२ ॥ अलक्ष्यमाणेनरदेवनाम्नि रथांगपाणावयमंगलोकः । तदाहिचोरप्रचुरोविनङ्क्ष्यत्यरक्ष्यमाणोऽविवरूथवत्क्षणात् ॥ ४३ ॥ तदद्यनःपापमुपैत्यनन्वयं यन्नष्टनाथस्यवसोर्विलुम्पकात् ॥ परस्परंघ्नन्ति शपन्तिवृंजतेपशून्स्त्रियोऽर्थान्पुरुदस्यवोजनाः ॥ ४४ ॥ तदार्यधर्मश्चावलीयतेनृणां वर्णाश्रमाचारयुतस्त्रयीमयः । ततोर्थकामाभिनिवेशितात्मनां शुनांकपीनामिववर्णसंकरः ॥४५॥ धर्मपालोनरपतिःसतुसम्राड्बृहच्छ्रवाः । साक्षान्महाभागवतोराजर्षिर्हयमेधयाट् क्षुत्तृट्श्रमयुतोदीनोनैवाऽस्मच्छापमर्हति ॥ ४६ ॥ अपापेषुस्वभृत्येषु बालेनाऽपक्वबुद्धिना ॥ पापंकृतंतद्भगवान्सर्वात्माक्षन्तुमर्हति ॥ ४७ ॥ तिरस्कृताविप्रलब्धाः शप्ताःक्षिप्ताहताअपि । नास्यतत्प्रतिकुर्वन्तितद्भक्ताःप्रभवोऽपि हि ॥ ४८ ॥ इतिपुत्रकृताघेन सोऽनुतप्तोमहामुनिः ॥ स्वयंविप्रकृतोराज्ञा नैवाऽघंतदचिन्तयत् ॥ ४९ ॥ प्रायशःसाधवोलोके परैर्द्वन्द्वेषुयोजिताः । नव्यथन्तिन हृष्यन्ति यतआत्माऽगुणाश्रयः ॥ ५० ॥

इतिश्रीमद्भा०महापु०प्रथमस्कन्धेविप्रशापोपलम्भनंनामाऽष्टादशोऽध्यायः १८॥

रोता है किसने तेरा अपराध किया है तब उस बालक ने श्राप आदि का सब वृत्तांत वर्णन किया ॥ ४० ॥ श्रापदेने के अयोग्य राजाको श्राप दिया सुन उस ब्रह्माण ने अपने पुत्र का निरादर किया और कहा कि अरेमूर्ख तूने बहुत बुराकिया थोड़े से अपराध पर इतना भारी दंडदिया ॥ ४१ ॥ हेदुर्बुद्धी ! राजा परमेश्वर की समान है वह समान लोगों के गिनने योग्य नहीं है जिस राजाके बड़े तेज से रक्षित प्रजा निर्भय हो सुख प्राप्त करता है ॥ ४२ ॥ विष्णु की समान राजा जोक्षण मात्र भी देखने में न आवे तो यह सबलोग चोर की भांति होकर नाश होजांय जैसे विना रक्षक भेड़ों को भेड़िया नाश करजाते है ॥ ४३ ॥ विनास्वामी के धनको लूटने वाले चोर जो पाप करेंगे वह पाप अपने किये विनाभी अपने को लगेगा जिनमें चोर का भाग बहुत है ऐसे लोग आपस में मारत और गाली देते, पशु, स्त्रियां औरधन हरलेते हैं ॥ ४४ ॥ जब ऐसें होता है तब मनुष्यों का वर्णाश्रम सहित सदाचार नष्ट होजाता है अर्थ और काम में आसक्त मनुष्य कुत्ते और बंदरा की भांति वर्णसंकर होजाते हैं ॥ ४५ ॥ धर्म पालक, यशस्वी, चक्रवर्ती, साक्षात महा भागवत, राजर्षि, अश्वमेध का करने वाला और भूंख, प्यास से दीन ऐसा राजा हमारे श्रापके योग्य नहीं था ॥ ४६ ॥ निरपराधी अपने सेवकों का इस लड़के ने अपराध किया है सो सबके अन्तर्यामी श्री भगवान क्षमाकरने योग्य हैं ॥ ४७ ॥ श्री भगवान के भक्त समर्थ होने परभी चाहे कोई उन की अवज्ञाकरे, निरादरकरे, ताड़ना आदि देवै तोभी अपने अपराध करने वाले के ऊपर वह क्रोध नहीं करते ॥ ४८ ॥ इस भांति पुत्रके किये हुये अपराध का शमीक मुनिने बड़ा पश्चात्ताप किया, राजाने मुनिका अपराध किया था परन्तु मुनिने उस पर कुछभी ध्यान न दिया ॥ ४९ ॥ सृष्टिमें चाहे दूसरे लोग साधुओं को सुख दुःखदेवैं परन्तु वह उसका हर्ष, शोक नहीं मानते क्योंकि जीव सुख दुःखादि द्वंद्व धर्म रहित है ॥ ५० ॥

इतिश्रीभागवतेमहापुराणे०प्रथमस्कंधेसरलाभाषाटीकायांअष्टादशोऽध्यायः ॥ १८ ॥

॥ सूतउवाच ॥ महीपतिस्त्वथतत्कर्मगर्ह्यं विचिन्तयन्नात्मकृतंसुदुर्मनाः। अहो मया नीचमनार्यवत्कृतं निरागसिब्रह्मणिगूढतेजसि ॥१॥ ध्रुवंततोमकृतदेवहेलना द्दुरत्ययंव्यसनंनातिदीर्घात् । तदस्तुकामंत्वघनिष्कृतायमेयथानकुर्यांपुनरेवमद्धा ॥ २ ॥ अद्यैवराज्यंबलमृद्धकोशंप्रकोपितब्रह्मकुलानलोमे । दहत्वभद्रस्यपुनर्नमेऽभूत्पापीयसीधीर्द्विजदेवगोभ्यः ॥ ३ ॥ सचिन्तयन्नित्थमथाशृणोद्यथामुनेःसुतोक्तोनिर्ऋतिस्तक्षकाख्यः । ससाधुमेनेनचिरेणतक्षकानलंप्रसक्तस्यविरक्तिकारणम् ॥ ४ ॥ अथाविहायेममंमुंचलोकं विमर्शितौहेयतयापुरस्तात् । कृष्णांघ्रिसेवामधिमन्यमान उपाविशत्प्रायममर्त्यनद्याम् ॥ ५ ॥ यावैलसच्छ्रीतुलसीविमिश्रकृष्णांघ्रिरेण्वभ्यधिकाम्बुनेत्री । पुनातिलोकानुभयत्र सेशान्कस्तांनसेवेतमरिष्यमाणः ६ इतिव्यवच्छिद्यसपाण्डवेयःप्रायोपवेशंप्रतिविष्णुपद्याम् । दध्यौमुकुन्दांघ्रिमनन्यभावो मुनिव्रतोमुक्तसमस्तसंगः ॥ ७ ॥ तत्रोपजग्मुर्भुवनं पुनाना महानुभावामुनयः सशिष्याः।प्रायेणतीर्थाभिगमापदेशैः स्वयंहितीर्थानिपुनन्तिसन्तः॥८॥ अत्रिर्वसिष्ठश्च्यवनःशरद्वानरिष्टनेमिर्भृगुरंगिराश्च । पराशरोगाधिसुतोऽथराम उतथ्यइंद्रप्रमदेध्मवाहौ ॥ ९ ॥ मेधातिथिर्देवलआर्ष्टिषेणो भारद्वाजोगौतमःपिप्पलादः । मैत्रेयऔर्वःकवषःकुम्भयोनिर्द्वैपायनोभगवान्नारदश्च ॥ १० ॥ अन्येचदेवर्षिब्रह्मर्षिवर्या राजर्षिवर्याअरुणादयश्च । नानार्षेयप्रवरान्समेतानभ्यर्च्यराजाशिरसाववन्दे॥११॥

सूतजी बोलेकि–वह राजा अपने निंदित कर्मोंका विचार कर उदासचित्त हो घर आ सोचने लगा कि मैंने नीचकी भांति बड़ाबुरा कार्य्य किया कि उस तेजस्वी ब्राह्मणका मैंने अपराध किया ॥ १ ॥ यह मैंने भगवानका अवज्ञा का इस का फल अत्यन्त कठिन क्लेश मुझे मिलना चाहिये वह भी पुत्रादि द्वारा नहीं वरन साक्षात मुझ मिलना चाहिये जिस से मेरे पाप का प्रायश्चित हो जाय जिससे फिर ऐसा अपराध न करूं ॥ २ ॥ कुपित ब्राह्मण कुलरूप अग्नि मुझ पापीका राज 'सोना' भरपूर कोष इन सब को शीघ्र भस्म करदे जिससे ब्राह्मण, देवता और गौओं पर फिर ऐसी पाप बुद्धि नहो ॥ ३ ॥ राजा इस भांति बिचार कररहा था कि शमीक के भेजे हुये शिष्यों से मुनि के पुत्र के श्राप का वृतांत सुना कि तक्षक सर्प से मृत्यु होगी इस तक्षक के विषरूप अग्नि को राजा ने अत्युत्तम माना, क्योंकि विषयों मे आसक्त राजाको यह वैराग्यका शीघ्रही कारणहुआ ॥ ४ ॥ जिस का पहिलेही से छोड़ने का बिचार था ऐसे इस लोकका छोड़कर श्रीकृष्ण भगवानके चरणों की सेवा को बहुत अधिक मानता गंगाजीके तट पर अनशन व्रत लेके जा बैठा ॥ ५ ॥ जोगंगा तुलसी से मिली श्री कृष्ण भगवानके चरण रज संवर्धी सब से पावन व श्रेष्ठ जल से बहती तथा बाहर और भीतर लोकपालों सहित लोकोंको पवित्र करती है उसगंगाका मरतीसमय कौन मनुष्य सेवन न करे ॥ ६ ॥ इस भांति वह परीक्षित गंगा जी के तटपर अनशन व्रतलेने का निश्चयकर सबका साथछोड़ शान्तहो श्री मुकुंद के चरणों का ध्यानकरने लगा ॥ ७ ॥ संसार को पावन करने श्रेष्ठमुनि राजा के देखने को शिष्यों समेत वहां आये बहुधा सत्पुरुष लोग तीर्थ यात्रा के मिससे तीर्थों हीको पवित्र करते हैं ॥ ८ ॥ अत्रि, वशिष्ठ, च्यवन, शरद्वान्, अरिष्टनेमि, भृगु, अंगिरा, पराशर, विश्वामित्र, परशुराम, उतथ्य, इंद्रप्रमद, इध्मवाहु ॥ ९ ॥ मेधातिथि, देवल, आर्ष्टिषेण , भारद्वाज, गौतम, पिप्पलाद मैत्रेय, और्व, कवष, अगस्त, भगवान वेद व्यासजी, नारद ॥ १० ॥ और देवर्षि, ब्रह्मर्षि, और राजर्षियों में उत्तम अरुणादिक ऋषिआये अनेक उत्तम २ ऋषि जो वहां आये थे उन सबकी राजाने पूजा करके शिर से

सुखोपविष्टेष्वथतेषुभूयः कृतप्रणामःस्वचिकीर्षितंयत्। विज्ञापयामासविविक्तचेता उपस्थितोऽग्रेऽभिगृहीतपाणिः ॥ १२ ॥ परीक्षिदुवाच ॥ अहोवयंधन्यतमा नृपाणां महत्तमानुग्रहणीयशीलाः। राज्ञांकुलंब्राह्मणपादशौचाद्दूराद्विसृष्टंबतगर्ह्यकर्म ॥ १३ ॥ तस्यैवमेऽघस्यपरावरेशो व्यासक्तचित्तस्यगृहेष्वभीक्ष्णम्। निर्वेदमूलोद्विजशापरूपोयत्रप्रसक्तोभयमाशुधत्ते ॥ १४ ॥ तंमोपयातंप्रतियन्तुविप्रा गङ्गाचदेवीधृतचित्तमीशे । द्विजोपसृष्टःकुहकस्तक्षकोवा दशत्वलंगायतविष्णुगाथाः ॥ १५ ॥ पुनश्चभूयाद्भगवत्यनन्ते रतिःप्रसङ्गश्चतदाश्रयेषु। महत्सुयांयामुपयामिसृष्टिं मैत्र्यस्तुसर्वत्रनमोद्विजेभ्यः ॥ १६ ॥ इतिस्मराजाध्यवसाययुक्तः प्राचीनमूलेषुकुशेषुधीरः। उदङ्मुखोदक्षिणकूलआस्ते समुद्रपत्न्याःस्वसुतन्यस्तभारः ॥ १७ ॥ एवंचतस्मिन्नरदेवदेवेप्रायोपविष्टेदिविदेवसंघाः। प्रशस्यभूमौव्यकिरन्प्रसूनैर्मुदामुहुर्दुन्दुभयश्चनेदुः ॥ १८ ॥ महर्षयोवैसमुपागतायेप्रशस्यसाध्वित्यनुमोदमानाः। ऊचुःप्रजानुग्रहशीलसारा यदुत्तमश्लोकगुणाभिरूपम् १९॥ नवाइदंराजर्षिवर्यचित्रं भवत्सुकृष्णंसमनुव्रतेषु। येऽध्यासनंराजकिरीटजुष्टंसद्यो जहुर्भगवत्पार्श्वकामाः ॥ २० ॥ सर्वेवयंतावदिहास्महेऽथकलेवरंयावदसौविहाय लोकंपरंविरजस्कंविशोकं यास्यत्ययंभागवतप्रधानः ॥ २१ ॥ आश्रुत्यतदृषिगणवचःपरीक्षित्समंमधुच्युद्गुरुचाव्यलीकम्। आभाषतैतानभिनन्द्ययुक्तान् शुश्रूषमाणश्चरितानिविष्णोः ॥ २२ ॥ समागताःसर्वतएवसर्वेवेदायथामूर्तिधरास्त्रिपृष्ठे।

प्रणाम किया, ॥ ११ ॥ वेसब जब आनंद चित्त होकर बैठगये तब राजा उन्हे प्रणाम कर शुद्ध चित्तहो उनके आगे हाथ जोड़ अपने कर्म्मों का वर्णन करने लगा ॥ १२ ॥ राजा ने कहा कि मै राजाओं मे बड़ा धन्य हूं कि जिसपर आपके समान महात्माओ ने कृपाकी, क्योंकि विहित कर्म करने वाला यह राजाओं का वंश ब्राह्मणो के पैर धोने के जल डालने के स्थान से भी दूर रहने के योग्य है ॥ १३ ॥ निंदित कर्म करने वाले पाप रूप घरों में सदैव आसक्तचित्त मुझको कार्य कारण के नियामक परमेश्वर ही वैराग्य के कारण ब्राह्मण के शाप रूपसे हुए हैं कि जिस शापसे घरोंमें आसक्त मनुष्य तुरत ही डरजाता है ॥ १४ ॥ हेविप्रों वह मै परमात्मा में मन लगाके देवी गंगा तथा आपकी शरण आया हू, ब्राह्मग का भेजा हुआ कपटी तक्षक चाहेमुझे भलेकाटे परन्तु अब आप हरिकी कथा का गानकरो ॥ १५ ॥ मेरी भगवान में रतिहोवे, साधुओं का सदासंग रहे, और जिस योनिमें जाऊं वहीं साधन, मैत्रता तथा ब्राह्मणो को प्रणाम करता रहूं ॥ १६ ॥ वह धैर्य्य वान राजा ऐसा निश्चय कर पुत्रको राज्यका भारदे गंगाके दक्षिण किनारे पर पूर्वाभिमुख अग्रभाग वाले कुशाको विछा उस आसन पर उत्तर मुख होकर बैठा ॥ १७ ॥ जब राजा ऐसा अनशन व्रतलेकर वैठा तब देवताओं ने बड़ाई करके फूलोंकी वर्षाकी तथा बारंबार नगाड़े बजाये ॥ १८ ॥ ऐसे जो वड़े २ ऋषि जिनका स्वभाव और बल प्रजाके कल्याण की ओर है आये थे उन्हो ने बड़ाई करके अनुमोदन किया उत्तम श्लोक भगवान के गुणों से सदृश यह कहने लगे कि ॥ १९ ॥ हे राजर्षियों मे श्रेष्ठ कृष्ण भक्त! जो तुम ने ऐसे वचन कहे यह आश्चर्य नहीं है क्योंकि जिनने राजाओं के छत्रसे सेवित श्रेष्ठ राज सिंहासन कोभी भगवत प्रीतिके हेतु शीघ्रही त्यागदिया ॥२०॥ जबतक श्रेष्ठ भगवद्भक्त राजापरीक्षित अपनी देहछोड़, रजोगुण तथा शोकहीन श्रेष्ठ लोकको प्राप्त होगा तबतक हम सबलाग यहां वैठे रहेंगे ॥२१॥ जिसमें अमृत बहरहाहै ऐसे गंभीर सार्थ, सत्य, पक्षपात रहित मुनिलोगों के वाक्य सुनकर, उन्हें दंडवत कर भगवत चरित्र

नेहाथवाऽमुत्रचकश्चनाऽर्थे ऋतेपरानुग्रमात्मशीलम् ॥ २३ ॥ ततश्चवःपृच्छ्यमिमंविपृच्छेविश्रभ्यविप्राइतिकृत्यतायाम् । सर्वात्मनाम्रियमाणैश्च कृत्यंशुद्धंचतत्रामृशताभियुक्ताः ॥ २४ ॥ तत्राभवद्भगवान्व्यासपुत्रो यदृच्छयागामटमानोऽनपक्षः । अलक्ष्यलिंगोनिजलाभतुष्टो वृतःस्त्रिबालैरवधूतवेषः ॥ २५ ॥ तंव्यष्टवर्षंसुकुमारपादकरोरुबाह्वंसकपोलगात्रम् । चार्वायताक्षोन्नसतुल्यकर्णसुभ्र्वाननंकम्बुसुजातकण्ठम् ॥ २६ ॥ गिगूढजत्रुंपृथुतुङ्गवक्षसमावर्तनाभिंवलिवल्गूदरंच । दिगम्बरंवक्त्रविकीर्णकेशंप्रलम्बबाहुंस्वमरोत्तमाभम् ॥ २७ ॥ श्यामंसदाऽपीच्यवयोऽङ्गलक्ष्म्यास्त्रीणांमनोज्ञंरुचिरस्मितेन । प्रत्युत्थितास्तेमुनयःस्वासनेभ्यस्तल्लक्षणज्ञा अपिगूढवर्चसम् ॥ २८ ॥ सविष्णुरातोऽतिथयआगताय तस्मैसपर्यांशिरसाऽजहार । ततोनिवृत्ताह्यबुधाःस्त्रियोऽर्भकामहासनेसोपविवेशपूजितः ॥ २९ ॥ ससंवृतस्तत्रमहान्महीयसां ब्रह्मर्षिराजर्षिदेवर्षिसंघैः। व्यरोचताऽलंभगवान्यथेन्दुर्ग्रहक्षेतारानिकरैःपरीतः ॥ ३० ॥ प्रशान्तमासीनमकुण्ठमेघसंमुनिंनृपोभागवतोऽभ्युपेत्य । प्रणम्यमूर्ध्नाऽवहितःकृतांजलिर्नत्वागिरासूनृतयाऽन्वपृच्छत् ॥ ३१ ॥ अहो अद्यवयंब्रह्मन्सत्सेव्याःक्षत्रबन्धवः । कृपयाऽतिथिरूपेण भवद्भिस्तीर्थकाःकृताः

सुनने की कामना से, राजा परीक्षित ने कहा ॥ २२ ॥ जिस भांति सत्यलोक में मूर्त्तिमान वेद विराजमान हैं, उसीभांति वेद रूप आप सब दिशाओं से आ यहां एकत्रित हुये हो, दूसरों पर कृपा करना यह तो आपलोगों की टेव ही है आप लोग परलोक में अनुग्रह करते हो ॥ २३ ॥ हे ब्राह्मणों ! इस लिये मैं आप से विश्वास युक्त होकर यह पूछता हूं कि जब मृत्यु मनुष्य की निकट आजाय उस समय क्या करना चाहिये इस लिये आप सब एकमत होकर सर्व अवस्था मे करनें योग्य पाप से रहित कर्तव्य कर्म का विचार करो ॥ २४ ॥ राजाकी यह बात सुन सब परस्पर में कहने लगे कि यज्ञ कराओ योग कराओ तप और दान कराओ ऐसे विवाद करनें लगे इतनें में अकस्मात पृथ्वी में घूमते हुए, अपनें लाभ से संतुष्ट, अपेक्षा रहित, व्यासजी के पुत्र शुकदेवजी उसी समय आगए, उन शुकदेवजी के आश्रम आदि का चिन्ह प्रगट नहीं होता अवधून वेष धरे, जिन्हें स्त्रियें तथा बालक घेर रहे हैं ॥ २५ ॥ सुंदर जिनकी १६ वर्ष की अवस्था है और चरण, हाथ, उरु, भुजा, कंधा, कपोल गात्र यह सुंदर हैं और विशाल नेत्र तथा ऊंची नासिका है बराबर जिन के कान तथा सुन्दर भौंह युक्त जिनका श्रेष्ठ मुख है शंख कीसी तीन रेखा वाला जिनका सुंदर गला है ॥ २६ ॥ जिनके छाती के हाड़ मांस से ढके हुए और ऊंचा वक्षस्थल है भौरिसी जिनकी गहरी नाभि है तीन रेखा युक्त जिनका उदर है दिगंवर (नंग) हैं जिनके बाल टेढ़े हैं लम्बी जिनकी भुजा हैं देवताओं में श्रेष्ठ हरि कीसी कांति है ॥ २७ ॥ जिनका सांमला रंग है सदैव उत्तम योवन से अंग शोभावमान है सुंदर मुसकान से स्त्रियों के मनको हरते हैं ऐसे गुप्त तेज वाले शुकदेवजी के लक्षणों को जाननें वाले मुनिलोग उन्हें देखकर अपनें अपनें आसनों से उठखड़े हुए ॥ २८ ॥ राजा परीक्षित नें आयेहुए उन अतिथि रूप श्री शुकदेवजी को नमस्कार कर पूजन किया उस समय अज्ञानी स्त्री बालक लौटगये और श्री शुकदेवजी स्वेच्छा पूर्वक श्रेष्ठ सिंहासन पर विराजे ॥ २९ ॥ महंतों मे श्रेष्ठ राजार्षि, देवर्षि इन के समूह में श्रीशुकदेवजी ऐसे शोभायमान हुए जैसे ग्रह, नक्षत्र, और तारागणों के समूह में चन्द्रमा शोभायमान होता है॥ ३० ॥ अकुंठित बुद्धि, प्रशांत रूप सिंहासनपर बैठे हुए श्री शुकदेवजी के निकट राजा परीक्षित जाकर मस्तक से दंडवत कर सुंदर वाणी से पूछनें लगे ॥ ३१ ॥ राजा परीक्षित नें

॥ ३२ ॥ येषांसंस्मरणात्पुंसां सद्यःशुध्यंतिवैगृहाः। किंपुनर्दर्शनस्पर्शपादशौचा सनादिभिः ॥ ३३ ॥ सान्निध्यात्तेमहायोगिन्पातकानिमहान्त्यपि । सद्योनश्यंति वैपुंसांविष्णोरिवसुरेतराः ॥ ३४ ॥ अपिमेभगवान्प्रीतः कृष्णःपांडुसुतप्रियः। पैतृ-ष्वसेयप्रीत्यर्थंतद्गोत्रस्यात्तबान्धवः ॥ ३५ ॥ अन्यथातेऽव्यक्तगतेर्दर्शनंनःकथं नृणाम्। नितरांम्रियमाणानां संसिद्धस्यवनीयसः ॥ ३६ ॥ अतःपृच्छामिसंसिद्धिं योगिनांपरमंगुरुम्। पुरुषस्यहयत्कार्यं म्रियमाणस्यसर्वथा ॥ ३७ ॥ यच्छ्रोतव्य-मथोजाप्यंयत्कर्तव्यंनृभिःप्रभो। स्मर्तव्यंभजनीयंवाब्रूहिदवाविपर्ययम् ॥ ३८ ॥ नूनंभगवतोब्रह्मन्गृहेषुगृहमेधिनाम् । नलक्ष्यतेह्यवस्थानमपिगोदोहनंक्वचित् ॥ ३९ ॥ सूतउवाच ॥ एवमाभाषितःपृष्टः सराज्ञाश्लक्ष्णयागिरा। प्रत्यभाषतधर्म-ज्ञो भगवान्बादरायणिः ॥ ४० ॥

इतिश्री भागवतेमहापुराणेऽष्टादशसाहस्र्यांपारमहंस्यांसंहितायांप्रथमस्कन्धे शुकागमनंनामएकोनविंशोऽध्यायः ॥ १९ ॥

॥ समाप्तोऽयं प्रथमस्कन्धः ॥ १ ॥

प्रसन्न चित्त होकर कहा कि हे ब्राह्मन्! मैं क्षत्री जाति हूं तौभी महात्माओं के सेवनीय आपने जो कृपाकी उसके प्रभावसे आज मैं पवित्रहुआ ॥ ३२ ॥ जिनके केवल स्मर्ण करनेंसे घरपवित्र होजाता है तो फिर साक्षात् उनके दर्शन, स्पर्शन, चरण धोनेका जल और आसनादि से पवित्र होवे तो इसमें क्या कहना है ॥ ३३ ॥ हे महायोगीन्! आपके निकट से मनुष्यों के बड़े २ पाप तत्काल नष्ट होजाते हैं जैस बिष्णुजी के निकट से असुरों का नाश होजाता है ॥ ३४ ॥ क्या अपनी फूफी के पुत्र पांडवों के पुत्रों को प्रसन्न रखनें के हेतु उनके वंश वाले मुझपर श्रीकृष्ण भगवान ने कृपा की है ॥ ३५ ॥ बिना श्रीकृष्णजी की कृपा के भली भांति से सिद्ध, अत्यन्त उदार चित्त, मन वांछित फल देनेवाले, अव्यक्तगति आपका दर्शन हम मनुष्यों को कहां! तिसपर भी जिनकी मृत्यु निकट आई है उनको आपका दर्शन दुर्लभ है ॥ ३६ ॥ हे योगी जनोंके श्रेष्ठ गुरु! इसी लिये मैं आपसे पूछता हूं कि जिसकी मृत्यु निकट आगईहो उसे मोक्ष के हेतु कौनसा कृत्य करना चाहिये ॥ ३७ ॥ हे प्रभु! पुरुषों को क्या जपना, क्या सुनना, किसका स्मर्ण, किसका भजन और क्या करना चाहिये, सो मुझ से आप कहो ॥ ३८ ॥ हे ब्रह्मन्! गृहस्थीयों के घर ठहरना आपका तो गोदोहन मात्र होनाही नहीं ॥ ३९ ॥ सूतजी ने कहा कि जब राजा ने श्री शुकदेवजी से मधुर वाणी में यह प्रश्न किया तब श्री शुकदेवजी ने उत्तर दिया ॥ ४० ॥

इतिश्री मद्भागवते महापुराणे० प्रथमस्कन्धे सारस्वत जगन्नाथात्मज कन्हैयालाल उपाध्याय बिरचितायां सरला भाषाटीकायां एकोनविंशोऽध्यायः ॥ १९ ॥

श्रीमद्भागवत भाषाटीका सहित.

द्वितीयस्कन्ध

ओं नमो भगवते वासुदेवाय ॥ श्रीशुकउवाच ॥ वरीयानेषतेप्रश्नः कृतोलोकहितंनृप । आत्मवित्संमतःपुंसां श्रोतव्यादिषुयःपरः ॥ १ ॥ श्रोतव्यादीनिराजेन्द्र नृणांसान्तिसहस्रशः । अपश्यतामात्मतत्त्वं गृहेषुगृहमेधिनाम् ॥ २ ॥ निद्रयाह्रियतेनक्तं व्यवायेनचवावयः । दिवाचार्थेहया राजन्कुटुम्बभरणेनवा ॥ ३ ॥ देहापत्यकलत्रादिष्वात्मसैन्येष्वसत्स्वपि । तेषांप्रमत्तोनिधनं पश्यन्नपिनपश्यति ॥ ४ ॥ तस्माद्भारतसर्वात्मा भगवान्हरिरीश्वरः। श्रोतव्यःकीर्तितव्यश्च स्मर्तव्यश्चेच्छताऽभयम् ॥ ५ ॥ एतावान्सांख्ययोगाभ्यां स्वधर्मपरिनिष्ठया । जन्मलाभःपरःपुंसामन्तेनारायणस्मृतिः ॥ ६ ॥ प्रायेणमुनयोराजन्निवृत्ताविधिषेधतः । नैर्गुण्यस्थारमन्तेस्म गुणानुकथनेहरेः॥७॥इदंभागवतंनाम पुराणंब्रह्मसंमितम् । अधीतवान्द्वापरादौ पितुर्द्वैपायनादहम् ॥ ८ ॥ परिनिष्ठितोऽपिनैर्गुण्य उत्तमश्लोकलीलया । गृहीतचेताराजर्षे आख्यानंयदधीतवान् ॥ ९ ॥ तदहंतेऽभिधास्यामि महापौरुषिकोभवान् । यस्यश्रद्दधतामाशु स्यान्मुकुन्देमतिःसती ॥ १० ॥ एतन्निर्विद्यमानामिच्छतामकुतोभयम् । योगिनांनृपनिर्णीतं हरेर्नामानुकीर्तनम् ॥ ११ ॥ किंप्रमत्तस्य

श्रीशुकदेव जी बोले कि—महाराज आत्मवेत्ता मनुष्यों के पूजने तथा सुनने योग्य विषयों में आपने यह परम श्रेष्ठ प्रश्नकिया क्योंकि इससे संसार का भलाहोगा ॥ १ ॥ हे राजेन्द्र आत्म तत्व को न जानने वाले गृहमें आसक्त गृहस्थी पुरुषों के सुनने योग्य हजारों विषय हैं ॥ २ ॥ पुरुषों की आधी अवस्था तो सोने या मैथुन से व्यतीत होजाती है हेराजा ! आधी दिनमें गृह कार्य्य, धन, उद्यम या कुटुम्ब पोषण से व्यय होजाती है ॥ ३ ॥ देखो स्त्री, पुत्र, शरीर आदि यह सब अपना परिवार स्थिर नहीं है तोभी यह मनुष्य अचेत होकर पिताआदिको मरते देखकर भी नहीं समझता ॥ ४ ॥ हेराजा ! इस लिये जो मुक्ति की कांक्षा करे वह सर्वात्मापरमेश्वर के गुणानुवाद का श्रवण तथा कीर्तन करे ॥ ५ ॥ सांख्य योग और धर्मके आचरण से यही पुरुषों के जन्म का फल है कि अंत कालमें श्री परमेश्वर का स्मर्ण बनारहे ॥ ६ ॥ महाराज ! बहुत से विधि निषेध से निवृत्त मुनिलोग निर्गुण ब्रह्ममें स्थित होकर परमेश्वर के गुणों का कीर्तन करते हैं ॥ ७ ॥ यह वेदों की समान श्री मद्भागवत पुराण मैंने अपने पितासे द्वापर युगकी आदिमें पढाथा ॥ ८ ॥ यद्यपि मैं निर्गुण, ब्रह्ममें निष्ठावान हूं हेराजर्षि ! तौभी उत्तम श्लोक भगवान के चरित्रों से चित्त खिंच जाने के कारण मैंने यह भागवत पढ़ी ॥ ९ ॥ तू भगवान का परम भक्त है इससे यह भागवत मैं तुझसे कहूंगा जो मनुष्य इस श्री मद्भागवत में श्रद्धा रक्खेंगे उनकी बुद्धि शीघ्रही परमेश्वर में निश्चलहोजायगी ॥ १० ॥ हे महाराज ! श्री भगवान के गुणानुवादही सकाम पुरुषों को मनवांछित

बहुभिः परोक्षैर्हायनैरिह । वरंमुहूर्तंविदितं घटेतश्रेयसेयतः ॥ १२ ॥ खट्वाङ्गो नामराजर्षिर्ज्ञात्वेयत्तामिहायुषः । मुहूर्तात्सर्वमुत्सृज्य गतवानभयंहरिम् ॥ १३ ॥ तवाप्येतर्हिकौरव्य सप्ताहंजीवितावधिः । उपकल्पयतत्सर्वं तावद्यत्सांपरायिकम् ॥ १४ ॥ अन्तकालेतुपुरुष आगतेगतसाध्वसः । छिन्द्यादसङ्गशस्त्रेण स्पृहांदेहेऽनु येचतम् ॥ १५ ॥ गृहात्प्रव्राजितोधीरःपुण्यतीर्थजलप्लुतः । शुचौविविक्तआसीनो विधिवत्कल्पितासने ॥ १६ ॥ अभ्यसेन्मनसाशुद्धं त्रिवृद्ब्रह्माक्षरंपरम् । मनो यच्छेज्जितश्वासो ब्रह्मबीजमविस्मरन् ॥ १७ ॥ नियच्छेद्विषयेभ्योऽक्षान्मनसा बुद्धिसारथिः । मनःकर्मभिराक्षिप्तंशुभार्थेधारयेद्धिया ॥ १८ ॥ तत्रैकावयवंध्याये-दव्युच्छिन्नेनचेतसा । मनोनिर्विषयंयुक्त्वा ततःकिंचननस्मरेत् ॥१९॥ पदंतत्परमं विष्णोर्मनोयत्रप्रसीदति । रजस्तमोभ्यामाक्षिप्तं विमूढंमनआत्मनः ॥ यच्छेद्धारण-याधीरोहन्तियातत्कृतंमलम् ॥ २० ॥ यतःसंधार्यमाणायां योगिनोभक्तिलक्षणः । आशुसंपद्यतेयोग आश्रयंभद्रमीक्षतः ॥ २१ ॥ राजोवाच ॥ यथासंधार्यतेब्रह्मन्धा-रणायत्रसंमता । यादृशीवाहरेदाशुपुरुषस्यमनोमलम् ॥ २२ ॥ श्रीशुकउवाच ॥

फलदेने वाले हैं, मुमुक्षुको मोक्षफल, योगी को योग और ज्ञानी को ज्ञान का फल देनेवाला यही है ॥ ११ ॥ जो यहां अचेत मनुष्यों की अचेतता में बहुत से वर्ष व्यतीत होगये तो क्या ! और चैतन्यता अर्थात् जाना हुआ समय दो घड़ी भी अच्छा, कि जिससे सुख के हेतु उपाय करे ॥ १२ ॥ खट्वांग नाम राजर्षि * ऐसा जानकर कि मेरीआयुकी दोघड़ी शेषरही है एकही मुहूर्तमें यहांके सब संगका त्याग करके मुक्ति रूप भगवान में जामिला ॥ १३ ॥ फिर हेराजा परीक्षित ! तुम्हारे जीने के तो अभी सात दिवस शेष हैं इस काल में तुम परलोक सुधारने के सब साधन करलो ॥१४॥ हेराजन् ! जब मनुष्य का अंत काल आवे तब मरनेका डरछाड़ वैराग्य रूपी खड्ग से देह तथा देह सम्बन्धी वांछा पुत्र, स्त्री, आदि का लालसा को काटडाले ॥१५॥ घरसे बाहर निकल, धीरज धर, तीर्थ जल से स्नान कर पवित्र एकांत भूमि में विधिवत कुशासन पर आसन जमाकर उस पर बैठे ॥ १६ ॥ अ, उ, म, इन तीन वर्णों से बने हुए ओंकार का चित्तसे भजन करना और प्रणव का विस्मरण किये विना प्राणायाम से चित्तका निरोध करना ॥ १७ ॥ बुद्धि जिसकी सार थी है ऐसे मनुष्य को उचित है कि पहिले तो इन्द्रियों को विषयोंसे मन द्वारा पाछे फेरे फिर कर्मों की वासनाओं से भकटते हुए चित्त को बुद्धि द्वारा परमात्मा के स्वरूपमें लगावे ॥ १८ ॥ फिर परमेश्वर का ध्यान करे—वहां सम्पूर्ण स्वरूप से चित्त को अलग न करके एक २ अंगका ध्यान करे फिर समाधि लगाकर निर्विषय चित्त को एकाग्र करके परमात्मा का स्मर्ण करे जिसस्वरूप में चित्त प्रसन्न होजाय वही विष्णु भगवान का परमपद है ॥ १९.॥ धनवान मनुष्य को चाहिये कि रजोगुण और तमो गुण से विक्षिप्त तथा महामूढ़ मन को धारणा द्वारा रोक रक्खे जो धारणा रजो गुण तथा तमो गुण के मैल को दूर करती है ॥ २०.॥ जिस धारणाके धारण करने से सुख रूप विषय को देखने वाले योगी का भक्ति लक्षण योग तत्काल सिद्ध होता है ॥ २१ ॥ राजा परीक्षित ने कहा कि हे ब्रह्मन् ! आपने जो चित्त की धारणाकही कि जो मनुष्यके मनके मैल को

* इस राजा ने देवताओं की ओरसे संग्राम करके असुरों को जीत लिया इससे देवताओं ने प्रसन्न होकर वर मांगने को कहा तब राजा ने कहा कि हे महाराज प्रथम मेरी आयु बताओ तब उन्होंने कहा कि एक मुहूर्त रहगया है तब वह राजा विमान पर सवार हो अति शीघ्र कर्म भूमि भारत खंडमें आय मोदनरूप हरिको प्राप्त हुआ ।

जितासनोजितश्वासोजितसङ्गोजितेन्द्रियः। स्थूलेभगवतोरूपेमनःसंधारयेद्धिया ॥ २३ ॥ विशेषस्तस्यदेहोऽयं स्थविष्ठश्चस्थवीयसाम्। यत्रेदंदृश्यतेविश्वं भूतं भव्यंभवच्चसत् ॥ २४ ॥ आण्डकोशेशरीरेऽस्मिन् सप्तावरणसंयुते। वैराजः पुरुषोयोऽसौ भगवान्धारणाश्रयः ॥ २५ ॥ पातालमेतस्यहिपादमूलं पठन्तिपार्ष्णि प्रपदेरसातलम् ॥ महातलंविश्वसृजोऽथगुल्फौ तलातलंवैपुरुषस्यजंघे ॥ २६ ॥ द्वे जानुनीसुतलंविश्वमूर्तेरूरुद्वयंवितलंचातलंच। महीतलंतज्जघनंमहीपतेनभस्तलं नाभिसरोगृणन्ति ॥ २७ ॥ उरःस्थलंज्योतिरनीकमस्यग्रीवा महर्वदनंवैजनोऽस्य तपोरराटींविदुरादिपुंसः सत्यंतुशीर्षाणिसहस्रशीर्ष्णः ॥ २८ ॥ इन्द्रादयोबाहव आहुरुस्राःकर्णौदिशःश्रोत्रममुष्यशब्दः। नासत्यदस्रौपरमस्यनासे घ्राणोऽस्यगंधो मुखमग्निरिद्धः ॥ २९ ॥ द्यौरक्षिणीचक्षुरभूत्पतङ्गः पक्ष्माणिविष्णोरहनीउभेच। तद्भ्रूविजृम्भःपरमेष्ठिधिष्ण्यमापोऽस्यतालूरसएवजिह्वा ॥३०॥ छन्दांस्यनन्तस्य शिरोगृणन्तिदंष्ट्रा यमःस्नेहकलाद्विजानि। हासोजनोन्मादकरीच मायादुरन्तसर्गो यदपांगमोक्षः ॥ ३१ ॥ व्रीडोत्तरोष्ठोऽधरएवलोभोधर्मःस्तनोऽधर्मपथोऽस्य पृष्ठः। कस्तस्यमेढ्रं वृषणौचमित्रौकुक्षिःसमुद्रागिरयोऽस्थिसंघाः ॥ ३२ ॥ नद्योऽस्यनाड्योऽथतनूरुहाणि महीरुहाविश्वतनोर्नृपेन्द्र।अनन्तवीर्यःश्वसितंमातरिश्वा गतिर्वयःकर्मगुणप्रवाहः ॥ ३३ ॥ ईशस्यकेशान्विदुरम्बुवाहान्वासस्तुसंध्यांकुरुवर्यभूम्नः। अव्यक्तमाहुर्हृदयंमनश्च सचन्द्रमाःसर्वविकारकोशः ॥ ३४ ॥ विज्ञान-

नष्ठ करती हैं कहो वह किस के विषय, कैसे और किस प्रकार करनी चाहिये ॥ २२ ॥ श्रीशुकदेवजी बोले कि—हे राजा आसन को जीत, प्राणको वशीभूत कर, संगको तज, जितेन्द्रिय हो, परमेश्वर के विराटस्वरूप में बुद्धि द्वारा चित्तको लगावे ॥ २३ ॥ यह विराट देह परमेश्वर के स्थूलरूपों में सबसे स्थूल है जिस रूप में यह भूत, भविष्यत और वर्तमान कार्यरूप सब संसार दीखताहै ॥२४॥ सात आवरण अर्थात् पृथ्वी, जल, तेज, वायु, आकाश, अहंकार और महतत्व वाले इस ब्रह्माण्ड रूप विराट शरीर का ध्यानजो मनुष्य करताहै, वही परमात्मा सम्पूर्ण धारणाके आश्रय हैं ॥ २५ ॥ इस विराट रूपका पादमूल पाताल, पैरोंके अगाड़ीका भाग रसातल,टखना (गुल्फ) महातल, और पिंडली तलातल ॥ २६ ॥ जंघा सुतल, दोनो उरू वितल और ऊपरके भाग अतल, जघन महीतल और नाभि रूप सरोवर नभस्तल कहलाता है ॥ २७ ॥ इस विराट का उरः स्थल ज्योतिश्चक्र, ग्रीवा महर्लोक, मुख जनलोक, ललाट तपलोक, और सहस्रों सिखा वाले परमात्मा के शिरको सत्य लोक कहते है ॥ २८ ॥ इन्द्रादिक देवता भुजा, दिशायें कर्ण, शब्द श्रोत्रेन्द्रिय, अश्विनीकुमार नाशिका, गंध घ्राणेन्द्रिय, और अग्नि, इन भगवान का मुख है ॥ २९ ॥ स्वर्ग लोक नेत्र, सूर्य चक्षु, विष्णुभगवानकी पलकें लगना रात दिन और ब्रह्मपद परमेश्वर का भ्रूविलास, जल तालु, और रस जीभ कहलाती है ॥ ३० ॥ वेद अनंत भगवान का ब्रह्मरन्ध्र, यमराज डाढ, पुत्रादिकों के स्नेह का लेश दांत, मनुष्यों को उन्मत्त करनेवाली माया भगवानका हास्य, अपार सर्ग भगवान का कटाक्ष कहलाता है ॥ ३१ ॥ लाज ऊपर का ओष्ठ, लोभ नीचे का ओष्ठ, धर्म स्तन, अधर्म पीठ, प्रजापति लिंग, मित्रावरुण वृषण, समुद्र कुक्षि, और पर्वत हाड़ कहाते हैं ॥ ३२ ॥ हे महाराज ! नदियां भगवान की नाड़ियां, वृक्ष रोम, अनन्त पराक्रम वाली वायु श्वास, वय भगवान की चाल, गुणों का प्रवाह भगवान का कर्म कहलाता है ॥ ३३ ॥ मेघ श्रीभगवान के केश कहलाते हैं, हे कुरुवर्य्य ! सध्या में उसके बस्त्र, प्र-

यस्य महिमानमग्निं सर्वात्मनोऽन्तःकरणं गिरित्रम् । अश्वाश्वतर्युष्ट्रगजानखानि सर्वे मृगाः पशवः श्रोणिदेशे ॥ ३५ ॥ वयांसि तद्व्याकरणं विचित्रं मनुर्मनीषा मनुजो निवासः । गन्धर्वविद्याधरचारणाप्सरः स्वरस्मृतीरसुरानीकवीर्यः ॥३६॥ ब्रह्माऽऽननं क्षत्रभुजो महात्मा विडूरुरङ्घ्रिश्रितकृष्णवर्णः । नानाभिधाभीज्यगणोपपन्नो द्रव्यात्मकः कर्मवितानयोगः ॥ ३७ ॥ इयानसावीश्वरविग्रहस्य यः सन्निवेशः कथितो मया ते । संधार्यतेऽस्मिन्वपुषि स्थविष्ठे मनः स्वबुद्ध्या न यतोऽस्ति किंचित् ॥३८॥ स सर्वधीवृत्त्यनुभूतसर्व आत्मा यथा स्वप्नजनेक्षितैकः । तं सत्यमानन्दनिधिं भजेत नान्यत्र सज्जेद्यत आत्मपातः ॥ ३९ ॥ इतिश्रीमद्भागवते महापुराणे द्वितीयस्कन्धे महापुरुषसंस्थानुवर्णने विराड्रूपकथनं नाम प्रथमोऽध्यायः ॥ १॥

॥ श्रीशुकउवाच ॥ एवं पुरा धारणयाऽऽत्मयोनिर्नष्टां स्मृतिं प्रत्यवरुध्य तुष्टात् । तथा ससर्जेदममोघदृष्टिर्यथाप्ययात्प्राग्व्यवसायबुद्धिः ॥१॥ शाब्दस्य हि ब्रह्मण एष पन्था यन्नामभिर्ध्यायति धीरपार्थैः । परिभ्रमंस्तत्र न विन्दतेऽर्थान्मायामये वासनया शयानः ॥ २ ॥ अतः कविर्नामसु यावदर्थः स्यादप्रमत्तो व्यवसायबुद्धिः । सिद्धेऽन्यथाऽर्थे न यतेत तत्र परिश्रमं तत्र समीक्षमाणः ॥ ३ ॥ सत्यां क्षितौ किं कशिपोः प्रयासैर्बाहौ स्वसिद्धे ह्युपबर्हणैः किम् । सत्यञ्जलौ किं पुरुधाऽन्नपात्र्या दिग्वल्कलादौ सति किं दुकूलैः ॥४॥ चीराणि किं पथि न सन्ति दिशन्ति भिक्षां नैवाङ्घ्रिपाः परभृतः सरितो

धान उस का हृदय, सब विकारों का आश्रय भूत चंद्रमा उस का मन कहलाता है ॥ ३४ ॥ प्राणियों की आत्मा—विज्ञान शक्ति भगवान की महिमा, शिव अतः करण, घोडे खच्चर, ऊट, हाथी, यह नख हैं सम्पूर्ण मृग पशु भगवान के नितंब क पिछले भाग में माने जाते हैं ॥ ३५ ॥ सम्पूर्ण पक्षी भगवान की विचित्र वाणी, स्वायम्भू मुनि बुद्धि, मनुष्य निवास स्थान, गंधर्व, विद्याधर चारण और अप्सरा यह भगवान के स्वर की स्मृति है असुरो की सेना भगवानका पराक्रम है ॥ ३६ ॥ ब्राह्मण मुख क्षत्रिय भुजा, वैश्य जंघा, शूद्र भगवान के चरण हैं ऐसे ही नानाप्रकार के पूजनीय देवताओं के गुणों सहित द्रव्यात्मक यज्ञ क्रिया भगवान का कर्म कहलाता है॥३७॥ मैंने ईश्वर के शरीर के अवयवों का वर्णन जो तुमसे किया वह इतना ही है भगवान के इसीस्थूल बिराट स्वरूप में मुमुक्षु लोग अपनी बुद्धि से मनकी धारणा करते हैं इससे आगे और कुछ किंचित मात्रभी नहीं है ॥ ३८ ॥ जैसे मनुष्य स्वप्न में वृत्ति को जान लेता है वैसे ही प्राणी को उचित है कि आत्मा को जानकर सत्यानंद निधि भगवान का भजन करे जिस से जन्म मरण से छूटै ॥ ३९ ॥ इतिश्रीभद्भागवतमहापुराणे० द्वितीयस्कंधे सरलभाषाटीकायां प्रथमोऽध्यायः ॥ १ ॥

श्रीशुकदेवजी बोले कि—ब्रह्माजी ने पहिले इस भांति धारणा की थी इससे परमेश्वर ने प्रसन्न होकर उनको प्रलय समय मे नाश हुई सृष्टि की स्मृतिदी, जिसे पाकर अमोघ दृष्टि व बडी बुद्धिवाले ब्रह्माजी ने पूर्वकाल की समान फिर संसार को रचा ॥१॥ वेदका मार्ग यही है कि जिस से मनुष्य अर्थ शून्य स्वर्गादि नाम सुन कर अपनी बुद्धि से उनके साधनों की इच्छा करता है परन्तु माया मय मार्ग में सोता हुआ जीव ऊपर नीचेके लोकों मे भ्रमता हुआ पुरुषार्थ को नहीं प्राप्त होता ॥ २ ॥ इसी लिये चतुर मनुष्य को चाहिये कि शरीर निर्वाह के निमित्त ससार के पदार्थों में जिस २ वस्तु की आवश्यकता हो उसी २ का यत्न करे परन्तु उन में आनद नही है यह विश्वास कर उन में लिप्त नहो, अपनी देह का निर्वाह सहज में होजाय तो उनके लिये यत्न न करे ॥ ३ ॥ पृथ्वी ही शय्या और भुजा तकिया अंजुली ही भोजन के पात्र और दिशा ही

प्यशुष्यन् । रुद्धागुहाःकिमजितोऽवतिनोपपन्नान्कस्माद्भजन्ति कवयोधनदुर्मदान्धान् ॥ ५ ॥ एवंस्वचित्तेस्वतएवसिद्ध आत्माप्रियोर्थोभगवाननन्तः तंनिर्वृतो नियतार्थोभजेत संसारहेतूपरमश्चयत्र ॥ ६ ॥ कस्तांत्वनादृत्यपरानुचिन्तामृते पशूनसतींनामयुञ्ज्यात् । पश्यंजनंपतितंवैतरण्यां स्वकर्मजान्परितापाञ्जुषाणम् ॥७॥ केचित्स्वदेहान्तर्हृदयावकाशे प्रादेशमात्रंपुरुषंवसन्तम् । चतुर्भुजंकंजरथांगशंखगदाधरं धारणयास्मरन्ति ॥८॥ प्रसन्नवक्त्रंनलिनायतेक्षणं कदम्बकिंजल्कपिशंगवाससम् । लसन्महारत्नहिरण्मयांगदं स्फुरन्महारत्नकिरीटकुण्डलम्॥९॥उन्निद्रहृत्पंकजकर्णिकालयं योगेश्वरास्थापितपादपल्लवम् । श्रीलक्ष्मणंकौस्तुभरत्नकन्धरमम्लानलक्ष्म्यावनमालयाऽऽचितम् ॥ १० ॥ विभूषितंमेखलयांगुलीयकैर्महाधनैर्नूपुरकंकणादिभिः । स्निग्धामलाकुंचितनीलकुन्तलैर्विरोचमानाननहासपेशलम् ॥ ११ ॥ अदीनलीलाहसितेक्षणोल्लसद्भ्रूभंगसंसूचितभूर्यनुग्रहम् । ईक्षेतचिन्तामयमेनमीश्वरं यावन्मनोधारणयाऽवतिष्ठते ॥ १२ ॥ एकैकशोऽङ्गानिधियाऽनुभावयेत्पादादियावद्धसितंगदाभृतः जितंजितंस्थानमपोह्य धारयेत्परंपरंशुध्यतिधीर्यथायथा ॥ १३ ॥ यावन्नजायतपरावरेऽस्मिन्विश्वेश्वरेद्रष्टरिभक्तियोगः । तावत्स्थवीयःपुरुषस्यरूपं क्रियावसानेप्रयतःस्मरेत ॥ १४ ॥ स्थिरंसुखंचासनमाश्रि

वल्कल रूप वस्त्र वर्तमान है तो वृथा श्रम क्यों करे ॥ ४ ॥ हे राजा क्या मार्गमें चीर नहींपड़े ! क्या दूसरों का पोषण करने वाले वृक्ष भिक्षा नहीं देते ! क्या नदियां सूख गईं [या गुफाएं रुकगईं ! क्या परमात्मा शरणागतोंकी रक्षा नहीं करते ! फिर धनके मदमें अंधे रजोगुणीकासेवा क्यों करे ? और वैराग्यको क्यों न लेवे ॥५॥ ऐसे समझकर मनुष्यको अपने हृदयमें स्वयं सिद्ध सत्य स्वरूप आत्मा अनन्त भगवान् हैं उसके अनुभव से आनंदित होकर भजन करना चाहिये जिससे आवागवन से छूटे ॥ ६ ॥ संसारके जन्म, मरण रूप वैतरणीमें पड़े हुए अपनेकर्मके हेतु त्रिविध ताप का सेवन करने वाले मनुष्य को देखना हुआ कौन पुरुष कर्म जड़ मनुष्य बिना इस भागवत भक्ति को तर्क करके अन्य विषयों का ध्यान करे ॥ ७ ॥ कितने एक पुरुष अपनी देह के भीतर प्रादेश प्रमाण में विराजमान चतुर्भुज तथा शंख, चक्र, गदा, पद्म, धारण करने वाले भगवान् का भक्ति से स्मरण करते हैं ॥ ८ ॥ कैसे हैं भगवान् कि जिनका मुख प्रसन्न है, कमल के समान जिनके नेत्र हैं कदम्ब के केशर सदृश पीताम्बर को ओढ़े, प्रकाशित अमूल्य रत्नों से जड़े हुए भुजबन्ध पहिने, जगमगाते हुए महारत्नों के किरीट और कुंडल जिन के शोभायमान होरहे हैं ॥ ९ ॥ हृदय कमल का प्रकाशित कर्णिका रूप स्थल में योगेश्वर जिनके चरण कमल का स्मरण करते हैं जिनके लक्ष्मी का चिन्ह है जिनका ग्रीवामें कौस्तुभमणि शोभायमान है, न कुम्हलाने वाली सुंदर वन माला पहिने ॥ १० ॥ अमूल्य मेखला, क्षुद्र घंटिका, अंगूठी नूपुर, कंकण, इत्यादिक आभूषणों से विभूषित, चिकने, निर्मल, और घूघर वाले नीले बालों से शोभित मुख व मन्द मुसकान ॥ ११ ॥ उदार लीला पूर्वक चितवनसे भ्रूभंग शोभायमान । भक्तों पर अत्यंत कृपा करनेहारे, चिंताहीन से भक्तोंके हृदयमें प्रगट होतेहैं इन भगवान का ध्यान जब तक मन स्थिररहे करना चाहिये ॥ १२ ॥ गदाधर भगवान हाथ से पावतक जुदे २ अंगों बुद्धि द्वारा ध्यान करना चाहिये, जैसे २ बुद्धि शुद्धहोती जाय वैसे वैसे उन अंगों का ध्यान छोड़कर दूसरे अंगोंका ध्यान करना चाहिये॥ १३ ॥ हे राजन ! जबतक सगुण रूप भगवान में भक्ति न होवे तबतक नित्य कर्मादिक के अंतमें सावधान होकर भगवानके स्थूल स्वरूप का स्मरण करे

तो यतिर्यदा जिहासुरिममंगलोकम् कालेचदेशेचमनोनसज्जयेत्प्राणं नियच्छेन्मनसा सोजितासुः ॥ १५ ॥ मनःस्वबुद्ध्याऽमलयानियम्य क्षेत्रज्ञएतांनिनयेत्तमात्मनि । आत्मानमात्मन्यवरुध्यधीरो लब्धोपशांतिर्विरमेतकृत्यात् ॥ १६ ॥ नयत्रकालोऽनिमिषांपरः प्रभुःकुतोनुदेवाजगतांयईशिरे । नयत्रसत्त्वनरजस्तमश्च नवैविकारोन महान्प्रधानम् ॥ १७ ॥ परंपदंवैष्णवमामनन्ति तद्यन्नेतिनेतीत्यतदुत्सिसृक्षवः । विसृज्यदौरात्म्यमनन्यसौहृदा हृदोपगुह्यार्हपदंपदेपदे ॥ १८ ॥ इत्थंमुनिस्तूपरमेद्व्यवस्थितो विज्ञानदृग्वीर्यसुरन्धिताशयः । स्वपार्ष्णिनापीड्यगुदं ततोऽनिलंस्थानेषुषट्सून्नमयेज्जितक्लमः ॥ १९ ॥ नाभ्यांस्थितंहृद्यधिरोप्य तस्मादुदानगत्योरसि तंनयेन्मुनिः । ततोऽनुसंधाय धियामनस्वी स्वतालुमूलंशनकैर्नयेत ॥ २० ॥ तस्माद्भ्रुवोरन्तरमुन्नयेत निरुद्धसप्तायतनोऽनपेक्षः । स्थित्वामुहूर्तार्धमकुण्ठदृष्टिर्निर्भिद्य मूर्धन्विसृजेत्परंगतः ॥ २१ ॥ यदिप्रयास्यन्नृप पारमेष्ठ्यं वैहायसानामुतयद्विहारम् । अष्टाधिपत्यंगुणसन्निवाये सहैवगच्छेन्मनसेन्द्रियैश्च ॥ २२ ॥ योगेश्वराणां गतिमाहुरन्तर्बहिस्त्रिलोक्याः पवनान्तरात्मनाम् । नकर्मभिस्तांगतिमाप्नुवन्ति विद्यातपोयोगसमाधिभाजाम् ॥ २३ ॥ वैश्वानरंयातिविहायसा गतः सुषुम्णयाब्रह्मपथेनशोचिषा । विधूतकल्कोऽथहरेरुदस्तात्प्रयाति चक्रंनृपशैशुमारम् ॥ २४ ॥

१४॥ जब यह संन्यासी वैराग्य युक्त इस देहको छोडना चाहै तब स्थिर होकर सुख पूर्वक आसन पर बैठ देशकाल में मन न लगावे और प्राणायाम करिके मन सहित प्राणों को जीते ॥ १५ ॥ अपनी शुद्ध बुद्धिसे विनको रोककर उस बुद्धिको बुद्ध्यादिकके द्रष्टा क्षेत्रज्ञमें लीनकरे और क्षेत्रज्ञका आत्मा व आत्माका परब्रह्म में लीन करके धैर्यवान पुरुषको चाहिये कि शान्ति चित्त होकर सम्पूर्णकर्मों से विरक्त होजावे ॥ १६ ॥ जिस ब्रह्म स्वरूपमें देवताओं के स्वामी कालकीभी कुछ सामर्थ्य नहीं है तो फिर संसारके गुरु देवताओं का क्या समर्थहै । जिस स्वरूपमें न तो रज, सत्व, तम समर्थ होतेहैं न अहंकार महतत्त्व, और प्रधान समर्थ होते है ॥ १७ ॥ जो कोई आत्मके व्यतिरिक्त पदार्थों को नेति २ कहके छोडना चाहते हैं वह देहादिकों में आत्मतत्त्व छोड़कर श्री विष्णु केही परम पद को श्रेष्ठ मानते हैं ॥ १८ ॥ ऐसे ब्रह्मतत्वमें स्थित विज्ञान बलसे जिसकी विषय वासना नाश होगई हो उस ब्रह्मनिष्ठ मुनिको उपराम पाना चाहिये-उसे जैसे देह त्यागकरना चाहिये वह कहते हैं— अपनी एडीसे गुदाको दाब प्राणवायुको ऊपरले छहों ठिकानों मे चढ़ावे ॥ १९ ॥ नाभिमें स्थित पवन को हृदय अर्थात् अनाहत चक्रमें लेजावे फिर वहांसे उदान वायुके द्वारा कण्ठसे नीचेके भाग विशुद्धि चक्रमें लेजावे फिर वहांसे सावधानी से बुद्धि द्वारा धीरे २ श्वासको तालु मूलमें चढावे ॥ २० ॥ फिर वहांसे उस वायुको दोनों भौंहों के मध्य आज्ञाचक्र में लेजावे इसकाल में दो कानो के छिद्र दो नाकके छिद्र दो नेत्र तथा एकमुख इन सातों द्वारोंको बन्दकरके किसी बातकी अपेक्षा न करनेवाले योगी, आधे महूर्त्त आज्ञा चक्रमे ठहर, ब्रह्मरूपको प्राप्तहो ब्रह्मरंध्रका भेदकर, देह और इन्द्रियों का त्यागकरे ॥ २१ ॥ महाराज ! सर्व सम्पन्न गुण इस ब्रह्माण्ड में या योगियों के ब्रह्मलोक में या अष्ट सिद्धिवाले सिद्धलोकोंमें जानकी कांक्षाहोवे तो चित्त और इन्द्रियों को अपने संग ले जावे ॥ २२ ॥ पवनके अन्तरात्मा जिनका रूपहै ऐसे योगेश्वरोंकी गति त्रिलोकी के भीतर और बाहर दोनों स्थानों में है यह संसारी मनुष्य विद्या, तप, अष्टांग योग, चित्तकी एकाग्रता, समाधि के सेवनकरनेवाले मनुष्योंकी गतिको कर्म्मोंसे नहीं प्राप्त करसक्ते ॥ २३ ॥ आकाशमें ब्रह्मलोकके मार्गसे तेजोमय सुषुम्ना नाडीद्वारा गति प्राप्तहुए जीव प्रथम अग्नि अभिमानी देवता

तद्विश्वनाभिंत्वतिवर्त्य विष्णोरणीयसा विरजेनात्मनैकः। नमस्कृतंब्रह्मविदामुपैति कल्पायुषोयद्विबुधारमन्ते ॥ २५॥ अथोअनन्तस्यमुखानलेनदन्दह्यमानंसनिरीक्ष्य विश्वम्। निर्यातिसिद्धेश्वरजुष्टधिष्ण्यंयद्वैपरार्ध्यंतदुपारमेष्ठयम् ॥ २६ ॥ नयत्र शोकोनजरानमृत्युर्नार्तिर्नचोद्वेगऋतेकुतश्चित्।यच्चित्ततोदःकृपयाऽनिदंविदांदुरन्त दुःखप्रभवानुदर्शनात् ॥ २७ ॥ ततोविशेषंप्रतिपद्यनिर्भयस्तेनात्मनाऽपोनलमूर्तिरत्वरन्। ज्योतिर्मयोवायुमुपेत्यकालेवाय्वात्मनाखंबृहदात्मलिङ्गम् ॥ २८॥ घ्राणेन-गन्धंरसनेनवैरसंरूपंतुदृष्ट्याश्वसनंत्वचैव। श्रोत्रेणचोपेत्यनभोगुणत्वंप्राणेनचाकूतिमुपैतियोगी ॥२९॥ सभूतसूक्ष्मेन्द्रियसन्निकर्षंमनोमयंदेवमयंविकार्यम्। संसाद्य गत्यासहतेनयातिविज्ञानतत्वंगुणसंनिरोधम्॥ ३० ॥तेनाऽऽत्मनात्मानमुपैतिशान्तमानन्दमानन्दमयोऽवसाने।एतांगतिंभागवतींगतोयःसवैपुनर्नेहविषज्जतेऽङ्ग॥३१॥ एतेसृतीतेनृपवेदगीतेत्वयाऽभिपृष्टेहसनातनेच । एतंपुराब्रह्मणआहपृष्टआराधितो भगवान्वासुदेवः ॥ ३२ ॥ नह्यतोऽन्यःशिवःपन्थाविशतःसंसृताविह । वासुदेवे भगवतिभक्तियोगोयतोभवेत् ॥ ३३ ॥ भगवान्ब्रह्मकार्त्स्न्येनत्रिरन्वीक्ष्यमनीषया । तदध्यवस्यत्कूटस्थोरतिरात्मन्यतोभवेत् ॥३४॥ भगवान्सर्वभूतेषुलक्ष्यतस्वात्मना

को प्राप्त होते हैं हे राजा! फिर वह ऊपरको वर्त्तमान हरिके शिशुमार चक्रको प्राप्त होते हैं ॥२४॥ सूर्य्यादिको का आश्रय वह विष्णु के शिशुमार चक्रको उलंघकर ब्रह्मवेत्तासे पूजित सूक्ष्म निर्मल स्वरूप महर्लोकमें जाता है जहां कल्प २ भर आयुवाले भृगु आदिक देवता रमण करतेहैं ॥ २५ ॥ फिर वह इस सन्सारको शेषजीके मुखकी अग्निसे जलतेहुये देखकर जहां सिद्धेश्वर बिमानों में बैठे फिररहेहैं ऐसे दो परार्द्ध पर्यन्त रहनेवाले श्रेष्ठ ब्रह्मलोकमें चलाजाता है ॥ २६ ॥ जहां शोक, जरा, पीड़ा, मृत्यु, उद्वेग कुछभी नहीं है हां उसको अज्ञानी लोगोंके जन्म मरणादिकके दुःखके अतिरिक्त और कोई दुःख नहीं है ॥ २७ ॥ फिर ब्रह्मलोकमें वह प्राणी पृथ्वी आदि आवरणोंके भेदकी शंकाको छोड़ प्रथम लिंग देहसे पृथ्वीरूप होजाताहै फिर पृथ्वीरूपसे जलरूप फिर जलरूपमें यथेष्ट भोग भोगकर क्रमशः अग्निरूप होजाता है फिर तेज, वायु आदि रूपके उपरांत व्यापकता धर्म से आकाशके रूपको प्राप्त होजाताहै॥२८॥ फिर वह प्राणी नासिकाद्वारा गंध, जिह्वाद्वारा रस, दृष्टिद्वारा रूप, त्वचा द्वारा स्पर्श को प्राप्त होता है कर्णों द्वारा शब्द और २ कर्मेन्द्रियों द्वारा उनकी क्रियाओं को प्राप्त होता है ॥ २९ ॥ फिर वह प्राणी शब्दादिक तन्मात्राओं के लीन स्थान तामस अहंकार को तथा दशों इन्द्रियों के लीन स्थान राजस अहंकार को और मन व इन्द्रियादिकों के लय स्थान सात्विक अहंकार को प्राप्त होकर उपरांत में इन तीनों प्रकारों के अहंकारों के संग वह प्राणी महत्तत्व को प्राप्त होता है इन सबके उपरांत सर्व कार्यों के लयहोने के प्रधान को प्राप्त होता है ॥ ३० ॥ इसके उपरांत वह प्राणी प्रधान रूप आनंद रूपहो अन्तमें निर्विकार परमात्मा को प्राप्त होता है हे महाराज! जो मनुष्य इस परमेश्वर की भक्ति को प्राप्त होता है वह जगत में कभी लीन नहीं होता ॥ ३१ ॥ हे राजन्! आपने जो वेदोक्त धर्म मार्ग पूछे वेदोनो मार्ग मैंने आप से कहे प्रथम ब्रह्माजी ने श्री भगवान से पूछे थे तब भगवान ने ब्रह्माजी से यह मार्ग कहे थे ॥ ३२ ॥ सृष्टि के प्राणियों की मुक्ति के हेतु इन दो मार्गों से उत्तम और कोईभी सुख देनेवाला मार्ग नहीं है कारण कि इनमार्गों में चलने से श्री भगवान में भक्ति योग प्राप्त होता है ॥ ३३ ॥ भगवान ब्रह्माजी ने एकाग्र चित्तसे तीनवार समस्त वेदको विचार करके निश्चय किया कि जिससे परमेश्वरकी भक्ति होवे वही श्रेष्ठ मार्ग है ॥ ३४ ॥ भगवान सब प्राणियों में अपने आत्मा अंतर्यामी रूप से देखने

हरिः । दृश्यैर्बुध्यादिभिर्द्रष्टालक्षणैरनुमपकै ॥ ३५ ॥ तस्मात्सर्वात्मना राजन् हरिः सर्वत्रसर्वदा । श्रोतव्यःकीर्तितव्यश्चस्मर्तव्योभगवान्नृणाम् ॥ ३६ ॥ पिबंतियेभगवतआत्मनःसतांकथामृतंश्रवणपुटेषुसंभृतम् । पुनन्तितेविषयाविदूषिताशयंव्रजन्ति तच्चरणसरोरुहान्तिकम् ॥ ३७ ॥ इतिश्रीमद्भा०म०द्वितीयस्कन्धेपुरुषसंस्थानुवर्णनंनामाद्वितीयोऽध्यायः ॥ २ ॥

॥ श्रीशुकउवाच ॥ एवमेतन्निगदितंपृष्टवान्यद्भवान्मम । नृणांयन्म्रियमाणानां मनुष्येषुमनीषिणाम् ॥ १ ॥ ब्रह्मवर्चसकामस्तुयजेतब्रह्मणस्पतिम् । इन्द्रमिन्द्रियकामस्तुप्रजाकाम प्रजापतीन् ॥ २ ॥ देवींमायांतुश्रीकामस्तेजस्कामोविभावसुम् । वसुकामोवसून्रुद्रान्वीर्यकामोऽथवीर्यवान् ॥ ३ ॥ अन्नाद्यकामस्त्वदितिंस्वर्गकामोऽदितेःसुतान् । विश्वान्देवान्राज्यकामःसाध्यान्संसाधकोविशाम ॥ ४ ॥ आयुःकामोऽश्विनौदेवौपुष्टिकामइलांयजेत् । प्रतिष्ठाकामःपुरुषोरोदसीलोकमातरौ ॥ ५ ॥ रूपाभिकामोगन्धर्वान्स्त्रीकामोऽप्सरउर्वशीम् । आधिपत्यकामःसर्वेषांयजेतपरमेष्ठिनम् ॥ ६ ॥ यज्ञंयजेद्यशःकामःकोशकामःप्रचेतसम् । विद्याकामस्तुगिरिशंदाम्पत्यार्थउमांसतीम् ॥ ७ ॥ धर्मार्थउत्तमश्लोकंतन्तुंतन्वन्पितॄन्यजेत् । रक्षाकामःपुण्यजनानोजस्कामोमरुद्गणान् ॥ ८ ॥ राज्यकामोमनून्देवान्निर्ऋतिंत्वभिचरन्यजेत् । कामकामोयजेत्सोममकामःपुरुषंपरम् ॥ ९ ॥ अकामःसर्वकामोवा मोक्षकाम

में आते हैं वह अनुस्मरण करने वाली बुद्धि के लक्षणोंसे देखने योग्य हैं ॥ ३५ ॥ हे महाराज! इस ही हेतुसे सम्पूर्ण प्रकार के मनुष्यों को परमेश्वर का ही यश, गान, स्मरणकरना चाहिये ॥ ३६ ॥ अच्छे मनुष्यों की आत्मा के हेतु यह श्री भगवान की कथा अमृत रूप है सो जो मनुष्य कान रूप दोने में इसे भरकर पीते हैं अर्थात् श्रवण करते है वह विषयों से बिगड़े हुये अंतः करण को पवित्र करते हैं, और उन परमेश्वर के कमल स्वरूपी चरणों के निकट वास करते हैं ॥ ३७ ॥

इतिश्रीभागवतेमहापुराणेद्वितीयस्कन्धेसरलाभाषाटीकायाद्वितीयोऽध्यायः ॥ २ ॥

श्री शुकदेवजी बोले—कि हे राजा परीक्षित ! जो २ आपने पूछा वह २ मैंने कहा जिन मनुष्यों की मृत्यु निकट आगई है और बुद्धिमान हैं उनके लिये यही आनंद दायक है ॥ १ ॥ ब्रह्म तेज की कामना करने वाला ब्रह्मा का, इन्द्रियों की चतुराई की कामना होतो इन्द्र की, संतान की कामना हो तो प्रजापति की उपासना करे ॥ २ ॥ लक्ष्मी की कामना हो तो दुर्गा का, तेज की कामना हो तो अग्निका, धनकी कामना हो तो वसु का, वीर्य की कामना हो तो रुद्र गणों का पूजन करे ॥ ३ ॥ भक्ष्य, भोज्य, लेह्य, चोस्य, इन चार प्रकार की कामना हो तो आदित्य (सूर्य) का और स्वर्ग की कामना हो तो देवताओं का, राज्य वृद्धि की कामना हो तो विश्वेदेवो का, देश की प्रजा को अपने आधीन करना चाहे तो साध्य गणो का पूजन करे ॥ ४ ॥ बड़ी आयु चाहे तो अश्विनी कुमारों का, मोटा होना चाहे तो पृथ्वी का, प्रतिष्ठा चाहे तो लोक की माता भूमिका पूजन करे ॥ ५ ॥ सुंदर रूप की कामना हो तो गन्धर्वोंको, सुंदर स्त्री की कामना हो तो अप्सराओं को भजे और जो सबका आधिपत्य चाहे तो ब्रह्माका पूजन करे ॥ ६ ॥ यशकी कामना हो तो नारायण भगवान का भजन करे, कोष की चाहना होवेतो कुवेर को, विद्या की कामना होतो शिवको, स्त्री पुरुषों में परस्पर प्रीति चाहे तो पार्वती को, स्मरण करे ॥ ७ ॥ धर्म की वृद्धि चाहेतो उत्तम श्लोक भगवानकी, संतान चाहेतो पित्रोंकी, अपनी रक्षा चाहेतो यक्षोंकी, बल चाहेतो मरुद्गणों की पूजा करे ॥ ८ ॥ राज्य की कामना होतो मनुदेवता की, शत्रुवध की कामना होतो निर्ऋति की, बहुत भोग की इच्छाहोतो चन्द्रमाकी और जो वैराग्य,

उदारधीः । तीव्रेणभक्तियोगेनयजेतपुरुषंपरम् ॥ १० ॥ एतावानेवयजतामिहनिः श्रेयसोदयः । भगवत्यचलोभावोयद्भागवतसंगतः ॥ ११॥ ज्ञानंयदाप्रतिनिवृत्तगुणो र्मिचक्रमात्मप्रसादउतयत्रगुणेष्वसङ्गः । कैवल्यसंमतपथस्त्वथभक्तियोगः कोनिर्वृ- तोहरिकथासुरतिंनकुर्यात् ॥ १२ ॥ शौनकउवाच ॥ इत्यभिव्याहृतंराजानिशम्य भरतर्षभः । किमन्यत्पृष्टवान्भूयोवैयासकिमृषिंकविम् ॥ १३ ॥ एतच्छुश्रूषतांविद्व न्सूतनोऽर्हसिभाषितुम् । कथाहरिकथोदर्काःसतांस्युःसदसिध्रुवम् ॥ १४ ॥ सवै- भागवतोराजापाण्डवेयोमहारथः । बालक्रीडनकैःक्रीडन्कृष्णक्रीडांयआददे ॥१५॥ वैयासकिश्चभगवान्वासुदेवपरायणः । उरुगायगुणोदाराः सतांस्युर्हिसमागमे ॥ ॥ १६ ॥ आयुर्हरतिवैपुंसामुद्यन्नस्तंचयन्नसौ । तस्यर्तेयत्क्षणोनीत उत्तमश्लोकवा र्तया ॥ १७ ॥ तरवःकिंनजीवन्ति भस्त्राःकिंनश्वसन्त्युत । नखादन्तिनमेहन्ति किं ग्रामपशवोऽपरे ॥ १८ ॥ श्वविड्वराहोष्ट्रखरैः संस्तुतःपुरुषःपशुः । नयत्कर्णपथो पेतो जातुनामगदाग्रजः ॥ १९ ॥ बिलेबतोरुक्रमविक्रमान्ये नशृण्वतःकर्णपुटेनर- स्य । जिह्वासतीदार्दुरिकेवसूत नचोपगायत्युरुगायगाथाः ॥ २० ॥ भारःपरंप- ट्टकिरीटजुष्टमप्युत्तमाङ्गं ननमेन्मुकुन्दम् । शावौकरौनोकुरुतःसपर्यां हरेर्लसत्काञ्च नकङ्कणौवा ॥ २१ ॥ बर्हायितेतेनयनेनराणां लिङ्गानिविष्णोर्ननिरीक्षतोये । पादौनृ- णांतौद्रुमजन्मभाजौ क्षेत्राणिनानुव्रजतोहरेर्यौ ॥ २२ ॥ जीवञ्छवोभागवताङ्घ्रिरेणुन-

की कामना होतो श्री भगवान की उपासना करे ॥ ९ ॥ यदि मोक्ष की कामना होतो तीव्र भक्ति योग से परमात्मा का पूजन करे, देवता तो एकही कामना के देनेवाले हैं परन्तु श्रीकृष्ण भगवान भक्तों का सम्पूर्ण कामनायें पूर्णकरते है ॥ १० ॥ पूजन करने वाले मनुष्यों को केवल इतना ही लाभ है कि भगवद्भक्तों के साथ श्री परमेश्वर में अचल भावहोवे ॥ ११ ॥ जिन कथाओं के सुनने से रागद्वेषादि रहित ज्ञान हो लोक परलोक के विषय मे वैराग्य हो और मोक्षके हेतु सब मनुष्यों के समान मार्ग प्राप्त हो । उन भगवान की कथाओं में कौन मनुष्य स्नेह न करे ॥ १२ ॥ शौनक ने कहा कि राजा परीक्षित ने यह कथा सुनकर फिर शुकदेव जी से और क्या प्रश्न किया ॥ १३ ॥ हे विद्वन् ! यह हम सुना चाहते है हमारे सन्मुख आप कहने के योग्य हो हे श्री सूतजी सत्पुरुषों की सभामें हरिकथा अवश्य ही होती है ॥ १४ ॥ वह राजा परीक्षित पांडवों का नाती भगवानका परम भक्तथा क्योंकि बाल्यावस्थामें खिलौनोंमे खेलता था भी श्रीकृष्ण भगवान की पूजा करना इत्यादि खेल खेलता था ॥ १५ ॥ व्यासजी के पुत्र श्री शुकदेवजी भी भगवत् परायण थे यह निश्चय ही है कि सत्पुरुषों के समागम मे भगवान के उदार गुणों की कथा हुआ करती है ॥ १६ ॥ श्री परमेश्वर का लीला मे जिनका समय व्यतीत होता है उनकी आयु सफल है और जिनका समय हरिकथा बिन व्यतीत होता है उन मनुष्यों का आयु सूर्य उदय और अस्त होकर वृथाही हरलेता है ॥ १७ ॥ क्या पेड़ नहीं जाते, यांधाकनी श्वास नहीं लेती इनके अतिरिक्त क्या गांव के पशु आहार विहार नहीं करते ॥ १८ ॥ जिनके कर्ण मार्गमें गदाग्रज भगवान के गुणानु- वाद नहीं गाये वे मनुष्य कुत्ता, सुअर, ऊंट, गधाके तुल्य हैं ॥ १९ ॥ जिनकर्ण पुटोंने हरिके गुणानुवाद नहीं सुने वह सांप की बांबीके समान हैं और जिन्होंने श्री भगवानके चरित्र नहीं गाये उनकी जिह्वा मेंड़क के समान है ॥ २० ॥ सुंदर जरकसी, चीरा काट, मुकुट से शोभित जो शिर श्री हरि भगवान कोनन मे वह केवल बोझही है और हाथों मे सुंदर सोने के कड़ा हैं परन्तु वह हाथ हरिकी सेवा न करे तो मृतक की समान हाथ हैं ॥ २१ ॥ जिन नेत्रोंने विष्णु भगवान की

जातुमर्त्योऽभिलभेतयस्तु ॥ श्रीविष्णुपद्यामनुजस्तुलस्याः श्वसञ्छवोयस्तुनवेद गन्धम् ॥ २३ ॥ तदश्मसारंहृदयंबतेदं यद्गृह्यमाणैर्हरिनामधेयैः। नविक्रियेताऽथ यदाविकारोनेत्रेजलं गात्ररुहेषुहर्षः ॥ २४ ॥ अथाभिधेह्यङ्गमनोनुकूलं प्रभाषसेभा गवतप्रधानः। यदाहवैयासकिरात्मविद्याविशारदो नृपतिंसाधुपृष्टः ॥ २५ ॥

इति श्री मद्भागवते महापुराणे द्वितीयस्कन्धे तृतीयोऽध्यायः ॥ ३ ॥

॥ सूतउवाच। वैयासकेरिति वचस्तत्त्वनिश्चयमात्मनः। उपधार्यमतिं कृष्णे औत्तरेयःसतींव्यधात् ॥ १ ॥ आत्मजायासुतागारपशुद्रविणबन्धुषु। राज्येचाविक लेनित्यं निरूढांममतांजहौ ॥ २ ॥ पप्रच्छचेममेवार्थं यन्मांपृच्छथसत्तमाः। कृष्णा नुभावश्रवणे श्रद्दधानोमहामनाः ॥ ३ ॥ संस्थांविज्ञायसंन्यस्य कर्मत्रैवर्गिकंचयत्। वासुदेवेभगवति आत्मभावंदृढंगतः ॥ ४ ॥ राजोवाच ॥ समीचीनंवचो ब्रह्मन्सर्वज्ञस्यतवाऽनघ। तमोविशीर्यतेमह्यं हरेःकथयतःकथाम् ॥ ५॥ भूयएवविवित्सामि भगवानात्ममायया। यथेदंसृजतेविश्वं दुर्विभाव्यमनीश्वरैः ॥ ६ ॥ यथागोपायति विश्वं यथासंयच्छतेपुनः। यांयांशक्तिमुपाश्रित्य पुरुशक्तिःपरःपुमान्। (आत्मानं क्रीडयन्क्रीडन्करोतिविकरोतिच) ॥ ७ ॥ नूनंभगवतो ब्रह्मन्हरेरद्भुतकर्मणः। दु-र्विभाव्यमिवाभाति कविभिश्चापिचेष्टितम् ॥ ८॥ यथागुणांस्तु प्रकृतेर्युगपत्क्रमशो ऽपिवा ॥ बिभर्ति भूरिशस्त्वेकः कुर्वन्कर्माणिजन्मभिः ॥ ९ ॥ विचिकित्सितमे-

मूर्ति नहीं देखी वह नेत्र नहीं है मोर पखके चंदोवा हैं और जो हरिक्षेत्र मे जिनमे भगवान के मंदिर हैं वहां न गये तो वह पाव नहीं हैं केवल दावृक्षों ने जन्म लिया है ॥ २२ ॥ जिस मनुष्यने भगवत भक्तोंकी चरणरजका स्पर्श नहीं किया वह जीवित होनेपरभी मुर्देकी समान है श्री भगवान के चरणों मे अर्पण की हुई तुलसीकी गन्ध जिसने नली वह जीवित ही मृतकके समानसे ॥ २३ ॥ वह हृदय पत्थरसे भी कठोर है कि जोनाम सुनकर विकार को न प्राप्त हो जब विकार प्राप्त होजाता है तब नेत्रों मे जल आजाता है और रोमाच होआते है॥ २४ ॥ हे सूतजी! भगवद्भक्तों में श्रेष्ठ आप हमारे चित्तके ही अनुकूल कहतेहो इसमे आत्म विद्यामे निपुण शुकदेव जीने राजा परीक्षित के प्रश्न का जो उत्तर दियाहै वह आप हमसे कहो ॥ २५ ॥

इतिश्रीभागवतेमहापुराणे० द्वितीयस्कंधे सरलाभाषा टीकायां तृतीयोऽध्यायः ॥३॥

सूतजी ने कहा! कि हे मुनियो उस राजा परीक्षित ने श्री शुकदेवजी के आत्मतत्व का निश्चय करनेवाले बचन सुनकर श्रीकृष्ण भगवान मे दृढ़ बुद्धि लगाई ॥ १ ॥ और आत्मा, देह स्त्री, पुत्र, घर, पशु, बन्धु, द्रव्य भाई इत्यादिकोंकी ममता को त्यागन किया ॥ २ ॥ हे शौनक श्रीकृष्ण भगवान का प्रभाव सुननेमें श्रद्धावान, उदार चित्त राजा परीक्षितने भी श्रीशुकदेवजीसे यही पूछाथा कि जो आप हमसे पूछते है॥३॥ अपनीमृत्यु जानकर–धर्म अर्थ काम इत्यादिक विषयों को त्याग वासुदेव भगवानमें दृढ़ आत्म भावको प्राप्तहो यह पूछा॥४॥ हे ब्रह्मन्! आप सर्वज्ञहो और आपके बचन भले है इससे आप हरिकी जो लीला कहतेहो उससे मरे हृदयका अन्धकार दूर होता जाताहै ॥ ५ मैं यह जानना चाहताहूं कि भगवान ब्रह्मादिकोंके भी तर्कना करनेम न आवे ऐसे इस सृष्टिको अपनी मायासे किसभांति सृजतेहै ॥ ६ ॥ अनन्त शक्तिवाले भगवान जिस २ शक्ति को अंगीकार करके विश्वका पालन तथा सहार करते हैं वह सब मुझसे कहो ॥ ७ ॥ हेब्रह्मन्! अद्भुत आश्चर्य रूप श्री भगवान के कर्मज्ञानी लोगों को भी अतर्कसेही भासते हैं ॥ ८ ॥ तथा वह परमेश्वर अकेलेही जन्म लेकर अनेक कर्म करतेहुये बहुत से मायाके गुणोंको क्रमानुसार अथवा एक साथही धारण करते है ॥ ९ ॥ यह जो मेरा सन्देहहै उसे आप भलीभांतिकहो

तन्मे प्रब्रीहि भगवान्यथा । शाब्देब्रह्मणिनिष्णातः परस्मिन्भगवान्खलु ॥ १० ॥ सूतउवाच । इत्युपामंत्रितोराज्ञा गुणानुकथनेहरेः । हृषीकेशमनुस्मृत्य प्रतिवर्क्तुप्रचक्रमे ॥ ११ ॥ श्रीशुकउवाच । नमःपरस्मैपुरुषाय भूयसे सदुद्भवस्थाननिरोधलीलया । गृहीतशक्तित्रितयाय देहिनामन्तर्भवायानुपलक्ष्यवर्त्मने ॥ १२ ॥ भूयोनमः सद्वृजिनच्छिदेऽसतामसंभवायाऽखिलसत्त्वमूर्तये ॥ पुंसांपुनःपारमहंस्य आश्रमे व्यवस्थितानामनुमृग्यदाशुषे ॥ १३ ॥ नमोनमस्तेऽस्त्वृषभाय सात्वतांविदूरकाष्ठायमुहुःकुयोगिनाम । निरस्तसाम्यातिशयेनराधसा स्वधामनिब्रह्मणिरंस्यतेनमः ॥ १४ ॥ यत्कीर्तनंयत्स्मरणंयदीक्षणंयद्वन्दनं यच्छ्रवणंयदर्हणम् । लोकस्य सद्यो विधुनोतिकल्मषं तस्मैसुभद्रश्रवसेनमोनमः ॥ १५ ॥ विचक्षणायच्चरणोपसादनात्संगं व्युदस्योभयतोऽन्तरात्मनः । विन्दन्तिहिब्रह्मगतिंगतक्लमास्तस्मै सुभद्रश्रवसेनमोनमः ॥ १६ ॥ तपस्विनोदानपरायशस्विनो मनस्विनोमन्त्रविदः सुमंगलाः ॥ क्षेमंनविन्दन्तिविनायदर्पणं तस्मैसुभद्रश्रवसेनमोनमः ॥ १७ ॥ किरातहूणान्ध्रपुलिन्दपुल्कसा आभीरकंका यवनाः खसादयः । येऽन्येचपापायदुपाश्रयाश्रयाः शुध्यन्ति तस्मैप्रभविष्णवेनमः ॥ १८ ॥ सएष आत्मात्मवतामधीश्वरस्त्रयीमयो धर्ममयस्तपोमयः । गतव्यलीकैरजशंकरादिभिर्वितर्क्यलिंगो भगवान्प्रसीदताम् ॥१९॥ श्रियःपतिर्यज्ञपतिः प्रजापतिर्धियांपतिर्लोकपतिर्धरापतिः । पतिर्गतिश्चान्धकवृष्णिसात्वतां प्रसीदतांमभगवान्सतांपतिः ॥ २० ॥ यदंघ्र्यनुध्यानसमाधिधौतयाऽधि

आप शब्द ब्रह्म तथा परब्रह्म मेंभी निपुण हो ॥ १० ॥ सूतजी बोले कि जब राजा परीक्षित ने इस भांति श्रीशुकदेवजी से हरिके गुणानुवाद कहनेके लिये प्रार्थना की तो श्रीशुकदेवजी श्री भगवान् का ध्यान करके कहने लगे, ॥ ११ ॥ श्रीशुकदेवजी बोले कि—सृष्टि की उत्पत्ति, पालन, संहार की लीला के हेतु रजोगुण आदि तीनों शक्तियें धारण कर, अलक्ष्यमार्ग में बिराजमान, अंतर्यामी अपरिमित महिमा वाले श्रीकृष्ण भगवान को प्रणाम करता हूं ॥ १२ ॥ भक्तों के दुःख नाश करने वाले परमहंस आश्रम में रहने वाले, मनुष्यों को आत्मतत्त्व के देने वाले श्रीभगवान को बारम्बार प्रणाम करता हूं ॥ १३ ॥ भक्तों के पालक, अभक्तों से दूर, जिनके ऐश्वर्य्य की समान किसी का ऐश्वर्य्य नहीं जो अपनेही ऐश्वर्य से आपनेही ब्रह्म रूप में रमण करते हैं उन आपको मैं बारबार प्रणाम करता हूं ॥ १४ ॥ जिन भगवान के श्रवण, कीर्तन, स्मरण दर्शन, प्रणाम और पूजन से सांसारिक पाप और विषय तत्काल नष्ट होजाते हैं ऐसे उज्वल यशवाले भगवान को बारंबार प्रणाम करता हूं ॥ १५ ॥ विवेकी मनुष्य जिनके चरणों का भजन करके इस लोक और परलोक की आशक्ति छोड़ दुःख रहित हो ब्रह्म गति को प्राप्त होते हैं एसे उज्वल यशवाले भगवान को प्रणाम है ॥ १६ ॥ बड़े २ तपस्वी, दाता, यशस्वी, मंत्रवेत्ता योगी तथा मंगल कार्य के करनेवाले मनुष्य जिनके अर्पण किये विना कल्याण को प्राप्त नहीं होते उन उज्वल यशवाले हरि भगवान को बारंबार प्रणाम करता हूं ॥ १७ ॥ किरात, भील, हूण, अंध्र, पुलिंद, पुल्कस, आभीर, अहीर, कंक यवन, तथा खसिया और इन म्लेक्षों के अतिरिक्त और भी जो पाप रूप हैं वेसब जिनके भक्तों का आश्रय लेकर पवित्र होजाते हैं उन श्रीभगवान को बारम्बार प्रणाम है ॥ १८ ॥ ऐश्वर्यवान मनुष्यों के आत्मभाव करके उपासनीय, वेदत्रयीमय, धर्ममय, तपोमय, सबके स्वामी हरि, जिनके रूप का ब्रह्मा तथा शिवादिक देवता निष्कपट होकर तर्क करते हैं वह भगवान हमपर कृपा करें ॥ १९ ॥ जो भगवान लक्ष्मी पति, यज्ञ पति, प्रजा पति, बुद्धि पति, लोक पति, भूमि पति, अंधक

या नुपदयन्तिहितत्वमात्मनः। वदंतिचैतत्कवयोयथारुचं समेमुकुन्दोभगवान्प्रसी दताम् ॥ २१ ॥ प्रचोदितायेनपुरासरस्वती वितन्वताऽजस्यसतींस्मृतींहृदि। स्वलक्षणाप्रादुरभूत्किलाऽऽस्यतः समेऋषीणामृषभः प्रसीदताम् ॥२२॥ भूतैर्महद्भिर्य इमाःपुरोविभुर्निर्माय शेतेयदमूषुपूरुषः। भुंक्तेगुणान्षोडश षोडशात्मकः सोऽलंकृषीष्टभगवान्वचांसिमे ॥ २३ ॥ नमस्तस्मैभगवते व्यासायामिततेजसे। पपुर्ज्ञानमयंसौम्या यन्मुखाम्बुरुहासवम् ॥ २४ ॥ एतदेवात्मभू राजन्नारदाय विपृच्छते। वेदगर्भोऽभ्यधात्साक्षाद्यदाहहरिरात्मनः ॥ २५ ॥

इतिश्रीमद्भागवतेमहापुराणेद्वितीयस्कन्धेचतुर्थोऽध्यायः ॥ ४ ॥

॥ नारदउवाच ॥ देवदेवनमस्तुभ्यं भूतभावनपूर्वज। तद्विजानीहियज्ज्ञानमात्मतत्त्वनिदर्शनम् ॥ १ ॥ यद्रूपंयदधिष्ठानं यतःसृष्टमिदंप्रभो। यत्संस्थंयत्परंयच्च तत्तत्त्वंवदतत्त्वतः ॥२॥ सर्वंह्येतद्भवान्वेद भूतभव्यभवत्प्रभुः। करामलकवद्विश्वं विज्ञानावसितंतव ॥ ३ ॥ यद्विज्ञानोयदाधारो यत्परस्त्वंयदात्मकः। एकःसृजसि भूतानि भूतैरेवात्ममायया ॥ ४ ॥ आत्मन्भावयसेतानि नपराभावयन्स्वयम्। आत्मशक्तिमवष्टभ्य ऊर्णनाभिरिवाक्लमः ॥ ५ ॥ नाहंवेदपरंह्यस्मिन्नापरंनसमंविभो। नामरूपगुणैर्भाव्यं सदसत्किंचिदन्यतः ॥६॥ सभवानचरद्घोरंयत्तपःसुसमाहितः तेनखेदयसेनस्त्वं पराशङ्कांप्रयच्छसि ॥ ७ ॥ एतन्मेपृच्छतःसर्वं सर्वज्ञसकलेश्वर।

वृष्णि यादवों के पति, और गति साधन के पति, तथा सद्भक्तों के पति हैं वह हमपर प्रसन्न होवें ॥ २० ॥ जिनके चरणारविंद के ध्यान रूप समाधि से निर्मल बुद्धि द्वारा बुद्धिमान पुरुष आत्मतत्व को देखते हैं और यथा रुचि कहते भी हैं वह भगवान मुकुन्द हमपर कृपा करें ॥ २१ ॥ सृष्टि के आदि में ब्रह्माजी के हृदय में श्रेष्ठ स्मृति के विस्तार करने वाले, भगवान की प्रेरित कीहुई सरस्वती से उन ब्रह्माजी के मुख से वेदवाणी प्रगट हुई वे ज्ञान देन वालों में उत्तम भगवान हमपर प्रसन्न होवे ॥ २२ ॥ जो भगवान पंच महाभूतोंसे अनेक शरीर रचकर उनमें जीवरूपसे प्रवेशकरते हैं और अंतःकरण समेत एकादश इन्द्रियें और पंच महाभूत इनसोलह कलाओं को अंतर्यामी रूपसे प्रकट करते हैं वह भगवान मेरी वाणी को शोभायमान करें ॥ २३ ॥ जिनके मुख रूपी कमलसे उत्पन्न हुये ज्ञान रूपी मकरंद का सज्जन लोग पान करते हैं उन वासुदेव मूर्ति श्रीव्यासजी को मै प्रणाम करता हूं ॥ २४ ॥ हे महाराज ! यही बात नारदजी ने ब्रह्माजी से पूछी थी तब वेदमूर्ति ब्रह्माजीने भगवान से जो सुनाथा वह नारदजी से कहा ॥ २५ ॥

इतिश्रीभागवतेमहापुराणेद्वितीयस्कंधेसरलाभाषाटीकायांचतुर्थोऽध्यायः ॥ ४ ॥

नारदजी ने कहा—कि हे देवोंके देव ! भूत भावन ! जगत पालक ! हे पूर्व्वज ! हमको वह साधन बताओ कि जिस से आत्म तत्व का बोध होजाय—॥ १ ॥ हे प्रभो ! इस विश्व का प्रकाशक कौन हैं ? तथा यह किस के आश्रय है ? किसने सृजा ? किस में लीन होता है ? किसके वशीभूत है यह सब आप मुझसे कहो ॥ २ क्योंकि आप भूत, भविष्य और वर्तमान सब जानते हो और यह संसार कर स्थित आमले की समान आप का जानाहुआ है ॥ ३ ॥ आप को विज्ञान देने वाला कौन है ? आश्रय कौन है ? किसके अधीन हो आप अपनी मायासे पंच भूतों के द्वारा जैसे प्राणियों को सृजते हो सो कहो ॥ ४ ॥ पराभव रहित आपही इस विश्वका पालन करते हो अपनी ही शक्ति को धारण कर मकरी के जाले की भांति सृष्टि को सृजते हो ॥ ५ ॥ हे विभो ! इस विश्व में उत्तम, मध्यम, अधम और जो वस्तु नाम, रूप, गुण द्वारा जानी जा सकती हैं वह सब आपही से उत्पन्न हुई हैं ऐसा मैं जानता हूं ॥ ६ ॥ परन्तु

तयोःस्पृधोस्तिग्मगदाहतांगयोः क्षतास्रवघ्राणविवृद्धमन्य्वोः विचित्रमार्गांश्चरतो जिगीषया व्यभादिलायामिवशुष्मिणोर्मृधः ॥ १९ ॥ दैत्यस्ययज्ञावयवस्यमाया गृहीतवाराहतनोर्महात्मनः। कौरव्यमह्यांद्विषतोर्विमर्दनं दिदृक्षुरागादृषिभिर्वृतः स्वराट् ॥ २० ॥ आसन्नशौण्डीरमपेतसाध्वसं कृतप्रतीकारमहार्यविक्रमम्। विलक्ष्यदैत्यं भगवान्सहस्रणीर्जगादनारायणमादिसूकरम् ॥ २१॥ ब्रह्मोवाच ॥ एषते देवदेवानामंघ्रिमूलमुपेयुषाम्। विप्राणांसौरभेयीणां भूतानामप्यनागसाम् २२ ॥ आगस्कृद्भयकृद्दुष्कृदस्मद्राद्धवरोऽसुरः। अन्वेषन्नप्रतिरथो लोकानटतिकंटकः ॥ २३ ॥ मैनंमायाविनंदृप्तं निरंकुशमसत्तमम्। आक्रीडबालवद्देव यथाऽऽशीविष मुत्थितम् ॥ २४ ॥ नयावदेषवर्धेत स्वांवेलांप्राप्यदारुणः स्वांदेवमायमास्थाय तावज्जह्यघमच्युत ॥ २५ एषाघोरतमासंध्या लोकच्छम्बट्करीप्रभो। उपसर्पति सर्वात्मन्सुराणांजयमावह ॥ २६ ॥ अधुनैषोऽभिजिन्नाम योगोमौहूर्तिकोह्यगात्। शिवायनस्त्वंसुहृदामाशु निस्तरदुस्तरम् ॥ २७ ॥ दिष्ट्यात्वांविहितं मृत्युमयमासादितःस्वयम्। विक्रम्यैनंमृधेहत्वा लोकानाधेहिशर्मणि ॥ २८ ॥

इतिश्रीमद्भा० तृतीय० हिरण्याक्षश्रीवराहयुद्धवर्णननामाऽष्टादशोऽध्यायः १८ ॥

मैत्रेयउवाच॥अवधार्यविरिंचस्य निर्व्यलीकामृतंवचः। प्रहस्यप्रेमगर्भेण तदपाङ्गेनसोऽग्रहीत् ॥ १ ॥ ततःसपत्नंमुखतश्चरन्तमकुतोभयम्। जघानोत्पत्यगदया हनावसुरमक्षजः ॥ २ ॥ साहतातेनगदया विहताभगवत्करात्। विघूर्णिताऽपतद्रेजे तदद्भुतमिवाऽभवत् ॥ ३ ॥ सतदालब्धतीर्थोपि नबबाधेनिरायुधम्। मानयन्

तीक्ष्ण गदाके प्रहारसे घाव होकर उन दोनो के जो रुधिर निकलता था उस की गंध से और भी क्रोध बढ़ता था पृथ्वी के हेतु वह दोनों ऐसें लड़ते थे कि जैसे गऊ के हेतु परस्पर बैल लड़ते हैं ॥ १९ ॥ मायाँसे वाराह रूप धारी भगवानसे और हिरण्याक्ष दैत्य से जो पृथ्वीके हेतु युद्ध होरहा था उसे देखने के निमित्त ब्रह्मा जी ऋषियों को संग लेकर आये ॥ २० ॥ मद से मतवाला, निडर, समयुद्ध करने वला जिसका पराक्रम न्यून न हो ऐसे असुर को देख ब्रह्मा जी ने वाराह रूप नारायण से कहा ॥ २१ ॥ हे प्रभु! आपके चरणो के शरणागत निरपराधी जीवो, ब्राह्मण, गौ और देवताओं का ॥ २२ ॥ अपराध करने वाला, भयकारी दुष्टकर्मी यह दैत्य मुझसे वरदान पाकर, सृष्टि में अपनी बराबर के युद्ध वाले को ढूंढता हुआ कंटक रूप विचरता है ॥ २३ ॥ यह बड़ा मायावी गर्वित, और अशंकित है जैसे विषधर सांप से क्रीड़ा नहीं की जाती उसी प्रकार इससे भी आप क्रीड़ा मतकरो ॥ २४ ॥ हे देव! यह अपने दारुण सायंकालका पाकर न बढ़जाय इस हेतु आप अपनी योग माया मे स्थित होकर इस पापी को सायंकाल से प्रथम ही मारिये ॥ २५ ॥ हे स्वामी! अत्यत घोर और सृष्टिनाशक सायंकाल चला आता है हे सर्वात्मन्! यह असुरो को जय देने वाला है ॥ २६ ॥ मुहूर्तों मे यह अभिजित नामका योग आगया है इससे आप सुहृदों के कल्याण के हेतु इस दुष्टको शीघ्रही मारो ॥ २७ ॥ यह मंगल हुआ कि यह पापी आपसे आप मृत्यु मुख में आफसा है, आप अपने ऐश्वर्य्य से इसे संग्राम मे मार शीघ्रही हमलोगो को सुखीकरो ॥२८॥

इतिश्रीमद्भागवतेमहापुराणे०तृतीयस्कंधे सरलाभाषाटीकायां अष्टादशोऽध्यायः ॥ १८ ॥

मैत्रेयजी ने कहा कि–परमेश्वर ने निश्छल और अमृत की समान ब्रह्माजी के बचन सुन हंस स्नेह युक्त दृष्टि से उनकी प्रार्थना स्वीकार की ॥ १ ॥ फिर निडर होकर अपने सन्मुख बैरी को घूमता देख वाराह भगवान नें कूद कर उस असुर की ठोडी मे गदा मारी ॥ २ ॥ तब उस असुर ने अपनी गदा ऐसी मारी कि वाराहजी की गदा हाथ से गिरपड़ी यह बडा अद्भुत चरित्र

सम्पृधेधर्मंधिष्यक्सेनंप्रकोपयन् ॥ ४ ॥ गदायामपविद्धायां हाहाकारेविनिर्गते। मानयामासतद्धर्मं सुनाभंचास्मरद्विभुः ॥ ५ ॥ तंव्यग्रचक्रंदितिपुत्राधमेन स्वपार्षदमुख्येनाविज्जमानम्। चित्राथावोऽतद्विदांखेचराणां तत्रास्मासन्स्वस्तितेऽमुंजहीति ॥ ६ ॥ सतंनिशाम्यात्तरथाङ्गमग्रतो व्यवस्थितंपद्मपलाशलोचनम्। विलोक्यचामर्षपरिप्लुतेन्द्रियो रुषास्वदन्तच्छदमादशच्छ्वसन् ॥ ७॥ करालदंष्ट्रश्चक्षुर्भ्यांसंचक्षाणोदहन्निव। अभिप्लुत्यस्वगदया हतोऽसीत्याहनद्धरिम् ॥ ८ ॥ पदा सव्येनतांसाधो भगवान्यज्ञसूकरः। लीलयामिषतःशत्रोः प्राहरद्वातरंहसम् ॥ ९ ॥ आहचायुधमाधत्स्व घटस्वत्वंजिगीषसि। इत्युक्तःसतदाभूयस्ताडयन्व्यनदद्भृशम् ॥ १० ॥ तांसआपततींवीक्ष्य भगवान्समवस्थितः। जग्राहलीलयाप्राप्तां गरुत्मानिवपन्नगीम् ॥ ११ ॥ स्वपौरुषेप्रतिहते हतमानोमहासुरः। नैच्छद्गदांदीयमानां हरिणाविगतप्रभः ॥ १२ ॥ जग्राहत्रिशिखंशूलं ज्वलज्ज्वलनलोलुपम्। यज्ञायधृतरूपाय विप्रायाभिचरन्यथा ॥ १३ ॥ तदोजसादैत्यमहाभटार्पितं चकासदन्तःखउदीर्णदीधिति। चक्रेणचिच्छेदनिशातनेमिना हरिर्यथाताक्ष्यपतत्रमुज्झितम् ॥ १४ ॥ वृकणेस्वशूलेबहुधाऽरिणाहरेः प्रत्येत्यविस्तीर्णमुरोविभूतिमत्। प्रवृद्धरोषःसकठोरमुष्टिना नदन्प्रहृत्यान्तरधीयतासुरः ॥ १५ ॥ तेनेत्थमाहतःक्षत्तर्भगवानादिसूकरः। नाकम्पतमनाक्क्वापि स्रजाहतइवद्विपः ॥ १६ ॥ अथोरुधासृजन्मायां योगमायेश्वरेहरौ। यांविलोक्यप्रजास्त्रस्ता मेनिरेऽस्योपसंयमम् ॥

हुआ ॥ ३ ॥ उस समय दैत्य को अबसर तो मिला परन्तु उसनें धर्म युद्ध जान शस्त्र नहीं चलाया, ॥ ४ ॥ गदा के गिरनें से बड़ा हाहाकार शब्द हुआ तब भगवान नें युद्ध धर्म को मान चक्र का स्मरण किया ॥ ५ अधम अदिति के पुत्र, हिरण्याक्ष से परमेश्वर को चक्र लिये भिड़ा देख, उनकी माया के नजानने वाले देवता नाना भांति के बचन कहने लगे, कि हे प्रभु! आपका कल्याण हो आप इसे शीघ्र मारो ॥ ६ ॥ उस असुर की इन्द्रियां, कमलदल नेत्र वाले भगवान को चक्र धारण किये हुए देख, क्रोध से परिपूर्ण होगई, उसी रोष बश अपने ओंठ को काटता श्वांस लेता, और ॥ ७ कराल डाढ़ों वाला, वह असुर प्रभु की ओर इस प्रकार देखने लगा मानों भस्म करदेगा, फिर उस असुर नें "मार लियाहै" ऐसा कहकर बाराहजी के ऊपर गदा का प्रहार किया ॥ ८ ॥ हे बिदुर! फिर भगवान नें वैरी के देखते २ वायु के समान बेगवाली गदा को बाएं पांव से बचालिया ॥ ९ ॥ तब दैत्य नें कहा कि तू आयुध लेकर फिर जीतना चाहता है यह कह ताड़ना कर बड़ी गर्जना की ॥ १० ॥ भगवान ने उसकी फेंकी हुई गदा को आते देख लीला पूर्वक ऐसे पकड़ लिया जैसे गरुड़ सर्पिणी को पकड़ लेता है ॥ ११ ॥ अपने पुरुषार्थ के नाश होनेपर तेजहत दैत्य ने परमेश्वर के हाथ से देनेपर भी गदा नली, ॥ १२ ॥ जैसें ब्राह्मण के हेतु दृष्टि मुष्ट धारण कीजाती है वैसेही यज्ञ भगवान के हेतु उस दैत्य नें तीन शिखा वाले त्रिशूलको कि जिसमें बड़ी२ ज्वाला निकलरही हैं धारणाकिया १३ इसके उपरांत उसमहायोद्धा हिरण्याक्ष नें उसे बलपूर्वक चलाया, वह अति तेजवाला त्रिशूल आकाशके भीतर चमकने लगा किन्तु बाराहजी ने अपने तीक्ष्ण धार वाले चक्रसे उस ऐसे काट गिराया जैसे इन्द्रनें गरुड़के त्यागेहुए पक्षको अपने बज्र से काट गिरायाथा ॥ १४ ॥ जब भगवान ने इस भांति त्रिशूल के टुकड़े २ कर दिये तब वह असुर उनके सामनें आ अति रोषकर लक्ष्मी स्थित हृदयमें कठोर मुष्टिका घात कर अंतर्ध्यान होगया ॥ १५ ॥ हे विदुर! उसने बाराह अवतारी परमेश्वर पर इस भांति प्रहार किया किन्तु माला से मारे हुए हाथी के शदस वे तनिक भी नहीं बिचलित हुए ॥ १६ ॥ योगमाया के ईश्वर

॥ १७ ॥ प्रववुर्वायवश्चण्डास्तमः पांसवमैरयन् । दिग्भ्योनिपेतुर्ग्रावाणः क्षेपणैःप्रहिता इव ॥ १८ ॥ द्यौर्नष्टभगणाभ्रौघैः सविद्युत्स्तनयित्नुभिः । वर्षद्भिःपूयकेशासृग्विण्मूत्रास्थीनिचासकृत् ॥ १९ ॥ गिरयः प्रत्यदृश्यन्तनानायुधमुचोऽनघ । दिग्वाससो यातुधान्यःशूलिन्योमुक्तमूर्धजाः ॥ २० ॥ बहुभिर्यक्षरक्षोभिः पत्त्यश्वरथकुंजरैः । आततायिभिरुत्सृष्टा हिंस्रावाचोऽतिवैशसाः ॥ २१ ॥ प्रादुष्कृतानां मायानामासुरीणांविनाशयत् ॥ सुदर्शनास्त्रंभगवान् प्रायुंक्तदयितंत्रिपात् ॥ २२ ॥ तदादितेःसमभवत्सहसाहृदिवेपथुः । स्मरन्त्याभर्तुरादेशं स्तनाच्चासृक्प्रसुस्रुवे ॥ २३ ॥ विनष्टासुस्वमायासुभूयश्चाव्रज्यकेशवम् । रुषोपगूहमानोमुं ददृशेऽवस्थितंबहिः ॥ २४॥ तंमुष्टिभिर्विनिघ्नन्तं वज्रसारैरधोऽक्षजः । करेणकर्णमूलेऽहन्यथात्वाष्ट्रंमरुत्पतिः । ॥ २५ ॥ सआहतोविश्वजिताह्यवज्ञया परिभ्रमद्गात्र उदस्तलोचनः । विशीर्णबाहुंघ्रिशिरोरुहोऽपतद्यथा नगेन्द्रोलुलितोनभस्वता ॥२६॥क्षितौशयनंतमकुण्ठवर्चसं करालदंष्ट्रंपरिदष्टदच्छदम् । अजादयोवीक्ष्यशशंसुरागता अहोइमांकोनुलभेतसंस्थितिम् ॥ २७ ॥ यंयोगिनोयोगसमाधिनारहो ध्यायन्तिलिंगादसतोमुमुक्षया तस्यैषदैत्याऋषभःपदाहतो मुखंप्रपश्यंस्तनुमुत्ससर्जह ॥ २८ ॥ एतौतौपार्षदावस्य शापाद्यातावसद्गतिम् । पुनःकतिपयैःस्थानं प्रपत्स्येतेहजन्मभिः ॥ २९ ॥ देवाऊचुः ॥ नमोनमस्तेऽखिलयज्ञतन्तवे स्थितौगृहीतामलसत्त्वमूर्तये। दिष्ट्याहतो

पर उस दैत्य ने नाना भांति की माया की, जिसको देखकर सम्पूर्ण प्रजा त्रसित होगई और जानने लगी कि सृष्टिका अब अंतहोगा॥१७॥प्रचण्ड वायुके वेगसे उडी हुई धूलसे सर्वत्र अंधकार फैलगया और सब ओरसे बड़े २ पत्थर गिरने लगे मानो वह गोफन से चलाये गये हो ॥ १८ ॥ बादलों के समूह में तारागण दबगए, और बिजली चमकने लगी घोर गर्जन होनेंलगा और राध, केश, रुधिर, मल, मूत्रकी बर्षा होनेलगी ॥१९॥ हे विदुर ! अनेक शस्त्र आते हुए पहाड तथा त्रिशूल लिये हुए राक्षसियां देख पडने लगीं ॥ २० ॥ बहुत से यक्ष, राक्षस, घोड़े रथ, हाथी लिये हुए और शस्त्र ग्रहण किये "मारो, काटो" ऐसी कठोर वांणी बोलते हुए देखपड़े ॥ २१ ॥ जब यह आसुरी माया प्रगट हुई, तब उसके नाश करनेंवाले सुदर्शन चक्र को भगवान ने अज्ञा दी ॥ २२ ॥ उस समय दिति के हृदय में बड़ी कपकपी हुई और कश्यपजी की आज्ञा का स्मरण करतेही उसके स्तनों से रुधिर बहनेलगा ॥२३॥ फिर वह असुर अपनी मायाका नाश देखकर, नारायणके समीप आ, रोषकरके उनको भुजाओं से दबानेलगा किन्तु वाराहजी उसको बाहर दीखनें लगे ॥ २४ ॥ वह बज्रवत कठोर मुष्टियां से माररहाथा ऐसे दैत्यके भगवान ने कनपटी में ऐसा थप्पडमारा जैसे इन्द्र ने वृत्रासुर के बज्रमाराथा ॥ २५ ॥ विश्वस्रष्टा भगवान के अनादर करने वाले दैत्य के थप्पड़ लगतेही उस का शरीर घूमगया, आंखें बाहर निकल आईं, भुजा, पांव तथा केश फैल गये वह असुर बड़े भारी वायु से गिरेहुए वृक्ष की सदृश पृथ्वी में गिरपड़ा २६ अकुण्ठित कांति भयंकर डाढ़ों वाले, तथा जिसने होठ चाबे हैं ऐसे दैत्य को पड़ा देखकर ब्रह्मादिक देवता उस की बड़ी प्रसंसा करने लगे, किऐसी गति को कौन प्राप्त होसक्ता है ॥ २७ ॥ बड़े २ योगी राज मोक्ष की इच्छा करके समाधि से ध्यान लगाय जिन भगवान के स्वरूप को देखतेहैं, उन्हीं भगवान के मुख को देखकर इसने अपनी देहछोड़ी ॥ २८ ॥ यह भी भगवानके पार्षद हैं शापके कारण नीच गति को प्राप्त हुए हैं, सोयह यहां कुछ जन्म पाकर फिर पीछे बैकुण्ठ को जायँगे ॥ २९ ॥ देवता बोले कि सम्पूर्ण यज्ञों के कारण और पोषण के हेतु शुद्ध सत्वगुण मूर्ति के धारण करनेवाले आप को प्रणामहै यह बड़ाही मंगल हुआ किआपने हिरण्याक्ष

ऽयंजगतामरुन्तुदस्त्वत्पादभक्त्या वयमीशनिर्वृताः ॥३०॥ मैत्रेयउवाच॥ एवंहिरण्याक्षमसह्यविक्रमंससादयित्वाहरिरादिसूकरः । जगामलोकंस्वमखण्डितोत्सवंसमीडितः पुष्करविष्टरादिभिः ॥ ३१ ॥ मयायथाऽनूक्तमवादितेहरेः कृतावतारस्यसुमित्रचेष्टितम् । यथाहिरण्याक्षउदारविक्रमो महामृधेक्रीडनवन्निराकृतः॥३२॥ सूतउवाच ॥ इतिकौषारवाख्यातामाश्रुत्यभगवत्कथाम् । क्षत्तानन्दंपरंलेभे महाभागवतोद्विज ॥ ३३ ॥ अन्येषां पुण्यश्लोकानामुद्दामयशसांसताम् । उपश्रुत्यभवेन्मोदः श्रीवत्साङ्कस्यकिंपुनः ॥३४॥ योगजेन्द्रंझषग्रस्तं ध्यायान्तंचरणाम्बुजम् । क्रोशान्तीनांकरेणूनां कृच्छ्रतोऽमोचयद्द्रुतम् ॥ ३५ ॥ तंसुखाराध्यमृजुभिरनन्यशरणैर्नृभिः । कृतज्ञः कोनसेवेत दुराराध्यमसाधुभिः ॥ ३६ ॥ योवैहिरण्याक्षवधंमहाऽद्भुतं विक्रीडितंकारणसूकरात्मनः ।शृणोतिगायत्यनुमोदतेंजसा विमुच्यतेब्रह्मवधादपिद्विजाः ॥३७॥ एतन्महापुण्यमलंपवित्रं धन्यंयशस्यं पदमायुराशिषाम् । प्राणेन्द्रियाणां युधिशौर्यवर्धनं नारायणोन्ते गतिरंगशृण्वताम् ॥ ३८ ॥

इतिश्रीमद्भा० तृतीय० हिरण्यक्षवधवर्णनंनामएकोनविंशोऽध्यायः १९ ॥

शौनकउवाच ॥ महींप्रतिष्ठामध्यस्य सौतेस्वायम्भुवोमनुः : कान्यऽन्वतिष्ठद्द्वाराणि मार्गायावरजन्मनाम् ॥१॥ क्षत्तामहाभागवतः कृष्णस्यैकान्तिकःसुहृत्। यस्तत्याजाग्रजंकृष्णे सापत्यमघवानिति ॥२॥ द्वैपायनादनवरो महित्वेतस्यदेहजः । सर्वात्मनाश्रितःकृष्णं तत्परांश्चाप्यनुव्रतः ॥ ३ ॥ किमन्वपृच्छन्मैत्रेयं विरजा

को मारा, हे ईश ! आप की कृपासे हम बड़े आनन्दितहुए ॥ ३० ॥ मैत्रेयजी ने कहा कि- उस असह्यपराक्रमवाले दैत्य को वाराह रूप धारी श्रीभगवान ने इस भांति मारा तब ब्रह्मादिकों ने उन की स्तुति की तदनन्तर अखण्डित उत्सववाले भगवान अपने वैकुण्ठ लोक को गये ३१॥ हे विदुर ! मैंने वाराह अवतारधारी परमेश्वर के चरित्र तथा उदार पराक्रमवाले हिरण्याक्षका युद्ध में माराजाना जैसा अपने गुरू के मुंह से सुनाथा वैसाही आप को सुनाया ॥ ३२ ॥ सूतजी बोले-किहे शौनक !इस भांति मैत्रेयजी की कही हुई भगवत्सम्बन्धी कथासुनकर विदुरजीको बड़ा आनंदउत्पन्नहुआ ॥३३॥ जब कि यशस्वी भक्त तथा उदारचित्त मनुष्योंकी कथासुनकर आनंद उत्पन्न होताहै तो फिर श्री भगवानके चरित्र सुनकर क्यों न आनन्द उत्पन्नहो॥३४॥ जिससमय मगर ने हाथी का पांव पकड लिया तब उस ने परमेश्वर के चरणों का ध्यान किया और हथनियां चिल्लाने लगीं तब जिस ने शीघ्रही उसे दुःख से छुड़ादिया ॥ ३५ ॥ उन शरणागत तथा भक्तों के आराधना करने योग्य, तथा जिनका असाधु आराधन नहीं करसक्ते उन भगवान का कौन पुरुष सेवन न करै ॥ ३६ ॥ हे ब्राह्मणो ! जो पुरुष हिरण्याक्ष के वधके कारण से वाराह मूर्ति भगवान की अद्भुत लीला गावेंगे अथवा सुनेंगे तो वह ब्रह्महत्या से भी सहज में छूटजायँगे ॥ ३७ ॥ हे विदुर!जो वैकुण्ठ आदिक फलके देने वाले, अति पवित्र द्रव्य, यश देनेवाले तथा आयु बढ़ाने व मनोवांछित फल देनेवाले, जीव और इन्द्रियों के रक्षक तथा संग्राममें शूरता बढ़ाने वाले इस चरित्र को सुनते हैं वह अन्तकाल में भगवान को प्राप्त होते हैं ॥ ३८ ॥

इतिश्रीभागवते महापुराणेतृतीयऽस्कंधेसरलाभाषाटीकायांएकोनविंशोऽध्यायः ॥ १९ ॥

शौनकजीने कहा कि--हे सूतजी ! जब पृथ्वी प्रतिष्ठा को प्राप्तहुई तो मनुजीने उसेपाकर ईश्वर में व्याप्त जीवों की सृष्टि के हेतु कौन २ से यत्न किये ? ॥ १ ॥ परमेश्वर के श्रेष्ठ भक्त और श्रीकृष्णजीके एकांतिकमित्र तथा जिन्होंने अपने ज्येष्ठ भ्राता के पुत्रों को परमेश्वर का अपराधी जान त्याग दिया ॥ २ ॥ और जो श्री वेदव्यास जी से उत्पन्न होने के कारण महिमामें उनसे कुछभी न्यून नहींहै तथा जो सर्वात्मा कृष्ण भगवान के आश्रित व उनके भक्तोंके आज्ञा

स्तीर्थसेवया । उपगम्यकुशावर्त आसीनंतत्त्ववित्तमम् ॥ ४ ॥ तयोःसंवदतोःसूत प्रवृत्ताह्यमलाःकथाः । आपोगांगाइवाघघ्नीर्हरेः पादाम्बुजाश्रयाः ॥ ५ ॥ तानःकीर्तयभद्रंते कीर्तन्योदारकर्मणः । रसज्ञःकोनुतृप्येत हरिलीलामृतंपिवन् ॥ ६ ॥ एव मुग्रश्रवाःपृष्ट ऋषिभिर्नैमिषायनैः । भवत्यर्पिताध्यात्मस्तानाह श्रूयतामिति ॥ ७॥ सूतउवाच ॥ हरेर्धृतक्रोडतनोःस्वमायया निशम्यगोरुद्धरणंरसातलात् । लीलां हिरण्याक्षमवज्ञयाहतं संजातहर्षोमुनिमाहभारतः ॥ ८ ॥ विदुरउवाच ॥ प्रजापतिपतिःसृष्ट्वा प्रजासर्गेप्रजापतीन् । किमारभतमेब्रह्मन्प्रब्रूह्यव्यक्तमार्गवित् ॥ ९ ॥ येमरीच्यादयोविप्रा यस्तुस्वायम्भुवोमनुः । तेवैब्रह्मणआदेशात्कथमेतदभावयन् ॥ १० ॥ सद्वितीयाःकिमसृजन्स्वतन्त्रा उतकर्मसु । आहोस्वित्संहताःसर्व इदंस्म समकल्पयन् ॥ ११ ॥ मैत्रेयउवाच ॥ दैवेनदुर्वितर्क्येण परणानिमिषेणच । जातक्षोभाद्भगवतो महानासीद्गुणत्रयात् ॥१२॥ रजःप्रधानान्महतस्त्रिलिंगो दैवचोदिनात् । जातःससर्जभूतादिर्वियदादीनिपंचशः ॥ १३ ॥ तानिचैकैकशः स्त्रष्टुमसमर्थानिभौतिकम् । संहत्यदैवयोगेन हैममण्डमवासृजन् ॥ १४ ॥ सोऽशयिष्टाब्धिसलिले आण्डकोशोनिरात्मकः । साग्रंवैवर्षसाहस्रमन्ववात्सीत्तमीश्वरः ॥ १५ ॥ तस्यनाभेरभूत्पद्मं सहस्रार्कोरुदीधिति । सर्वजीवनिकायौको यत्रस्वयमभूत्स्वराट् ॥ १६ ॥ सोऽनुविष्टोभगवता यःशेतेसलिलाशये । लोकसंस्थांयथापूर्वं निर्ममेसंस्थयास्वया ॥ १७ ॥ ससर्जच्छायया विद्यां पंचपर्वाणमग्रतः । तामिस्रमन्धतामि

नुवर्ती हैं ॥ ३ ॥ उन तत्त्व वेत्ता तथा तीर्थोंकी सेवासे पवित्रहुये विदुरजीने हरिद्वार में श्रीमैत्रेयजी से क्या क्या पूछा ? ॥ ४ ॥ हेसूत । उनमें भगवत्सम्बन्धी गंगाजल की समान पाप दूर करनेंवाली जो कथायें हुईहैं ॥ ५ ॥ जिनके उदारकर्म कहने योग्य हैं ऐसे भगवान के चरित्र आप हमसे कहो हे भद्र । आपका कल्याण होगा, हे सूत ! परमेश्वरके चरितामृत स्वादको जो मनुष्य जानता है वह उसे पीता २ कैसे तृप्त होसक्ता है ॥ ६ ॥ जब नैमिषाराय वासी ऋषियों ने इसभांति सूतजी से पूछा तब परमेश्वर का ध्यानकर सूतजी ने उनसे कहा ॥ ७ ॥ सूतजीने कहा कि---भगवान ने वाराहरूप धारणकर पृथ्वी को रसातल से लाय हिरण्याक्ष को सहजही में मारा यह सुन विदुरजी प्रसन्न होकर मैत्रयजी से बोले ॥ ८ ॥ विदुरजी ने कहा कि हे ब्रह्मन् ! प्रजापतियों के पति ब्रह्माजीने प्रजापतियोंको रचकर क्या किया वह आप मुझसे कहिये क्योंकि आप गुप्त मार्गों के जाननेवालेहो ॥ ९ ॥ मरीचि आदिक ऋषि तथा स्वायंभुवमनुजो उत्पन्न हुयेथे उन्होंने भगवान ब्रह्माजी की आज्ञा पाकर सृष्टिको किसभांति बढ़ाया ॥ १० ॥ क्या उन्होंने स्त्रियों समेत प्रजाकी रचना की अथवा विना स्त्रियोंके—अथवा सम्पूर्णोंने इकट्ठे होकर इस जगतको उत्पन्न किया ॥ ११ ॥ मैत्रेयजीने कहा कि—प्राणियोंके अदृष्ट प्रकृति के अधिष्ठाता कालरूप परमात्मा से प्रथम महत्तत्व उत्पन्न हुआ ॥ १२ ॥ रजोगुण श्रेष्ठ दैव प्रेरित महत्तत्व से त्रिगुण अहंकार प्रगट हुआ और अहंकारसे पंचमहाभूत पंचतन्मात्रा, पांच ज्ञानेंद्री तथा पांच कर्मेंद्री उत्पन्न हुई ॥ १३ ॥ जबतक यह एकांत में रहे तबतक ब्रह्माण्ड को न उत्पन्न करसके फिर इकठौर होकर इन्होंने अण्डकोश की रचनाकी ॥ १४ ॥ वह सहस्रोंवर्ष पर्य्यंत प्रलयकाल के जलमें पड़ारहा फिर परमेश्वर ने उसमें निवास किया ॥ १५ ॥ तदनन्तर उनकी नाभिसे सहस्रों सूर्य की समान तेजवाला कमल उत्पन्न हुआ, जो सम्पूर्ण प्राणियों का स्थान था उसीसे ब्रह्माजी उत्पन्नहुये ॥ १६ ॥ जलके भीतर शयन करतेहुये श्रीभगवानकी सत्ता से ब्रह्माजी ने प्रथम की समान सृष्टि रचना की ॥ १७ ॥ भगवान की छायारूपी विद्या से प्रथम

स्रं तमोमोहोमहातमः ॥ १८ ॥ विससर्जात्मनःकायं नाभिनन्दंस्तमोमयम् । जगृहु र्यक्षरक्षांसिरात्रिं क्षुत्तृट्समुद्भवाम् ॥ १९ ॥ क्षुत्तृड्भ्यामुपसृष्टास्ते तंजग्धुमभिदु- द्रुवुः । मारक्षतैनंजक्षध्वमित्यूचुः क्षुत्तृडर्दिताः ॥ २० ॥ देवस्तानाहसंविग्नो मामा जक्षतरक्षत । अहोमेयक्षरक्षांसि प्रजायूयंबभूविथ ॥ २१ ॥ देवताःप्रभयायायादी व्यन्प्रमुखतोऽसृजत् । तेअहार्षुर्देवयन्तो विसृष्टांतांप्रभामहः ॥ २२ ॥ देवोऽदेवांज घनतः सृजतिस्मातिलोलुपान् । तएनंलोलुपतयां मैथुनायाभिपेदिरे ॥ २३ ॥ त- तोहसन्स भगवानसुरैर्निरपत्रपैः । अन्वीयमानस्तरसा क्रुद्धोभीतःपरापतत् ॥२४॥ सउपव्रज्यवरदं प्रपन्नार्तिहरंहरिम् । अनुग्रहायभक्तानामनुरूपात्मदर्शनम् ॥ २५ ॥ पाहिमांपरमात्मंस्ते प्रेषणेनाऽसृजंप्रजाः । ताइमायभितुंपापा उपाक्रामन्तिमांप्रभो २६॥ त्वमेकःकिललोकानां क्लिष्टानांक्लेशनाशनः त्वमेकःक्लेशदस्तेषामनासन्नपदांतव ॥२७॥ सोऽवधार्यास्यकार्पण्यं विविक्ताध्यात्मदर्शनः । विमुंचात्मतनुं घोरामित्यु क्तोविमुमोचह ॥ २८ ॥ तांक्वणच्चरणांभोजां मदविह्वललोचनाम् काञ्चीकलापविल सद्दुकूलच्छन्नरोधसम् ॥२९॥अन्योऽन्यश्लेषयोत्तुङ्गनिरन्तरपयोधराम्।सुनासांसुद्वि जां स्निग्धहासलीलाऽवलोकनाम् ॥३०॥ गूहन्तींव्रीडयात्मानं नीलालकवरूथिनीम् उपलभ्यासुराधर्म सर्वेसंमुमुहुःस्त्रियम् ॥३१॥अहाधैर्यमहोरूपमहोअस्यानवंवयः .।

तो पचपर्वा की रचना की जैसे तामिश्र, अन्धतामिश्र तम, मोह, महातम ॥ १८ ॥ उस तममयं आत्मा की देहको जब ब्रह्माजीनें त्यागन किया तो उससे रात्रि प्रगटहुई जिसमें, भूख और प्यास की उत्पत्ति है और जिसको तमोगुणी यक्ष तथा राक्षसों ने ग्रहण किया ॥ १९ ॥ वह यक्ष और राक्षस भूख प्यास से आतुर होकर ब्रह्माजी के खाने के हेतु दौड़े उसमें से कितने एकने कहा कि इसकी रक्षा मतकरो और कितनोहीं नें कहा कि इसे खाजावो ॥ २० ॥ तब व्याकुल होकर ब्रह्माजीने उनसे कहा कि तुम दोनों जिन्होंने रक्षा मतकरो कहा वह राक्षस और जिन्होने कहा कि खाजावो' वह यक्ष नामक मेरी प्रजा हुये, ॥ २१ ॥ कांति से प्रकाशमान जिन २ देवताओं को ब्रह्माजी नें उत्पन्न किया, उन २ देवताओं नें ब्रह्माजी के छोड़े हुये प्रकाश दिन रूप देह को धा- रण किया ॥ २२ ॥ ब्रह्माजी नें अति लोलुप, चंचल असुरों को जंघा से प्रगट किया' वह स्त्री लंपट होनें के कारण उन्हीं से मैथुन करने को दौड़े ॥ २३ ॥ इसके उपरांत भगवान ब्रह्माजी हं- सते हुए, निर्लज्ज असुरों को पीछे लगा देख शीघ्रता पूर्वक आते हुए जान क्रोध युक्त हो वहां से भय खाकर भागचले ॥२४॥ उन ब्रह्माजी नें, भक्तों के दुःख दूर करनेंवाले शरणागतों के रक्षक अवतारधारी परमेश्वरकी शरणली॥२५॥और कहा कि हे भगवान!आपकी आज्ञानुसार मैंने सृष्टिकी रचना की है अब यह सम्पूर्ण प्रजा मेरे संग मैथुन करने को उद्यत हुई है ॥ २६ ॥ आपही दुः- खियों के दुःख दूर करनेवाले तथा उत्पथ मार्ग के ग्रहण करनेवालो को क्लेश देने वाले हो ॥ २७ ॥ वे अंतर्यामी भगवान, ब्रह्मा जी के आतुरवाक्य सुन उन की ओर देखकर बोले कि हे ब्रह्मन् ! इस अपनी घोर देह को शीघ्रही त्यागन करो इस बात के सुनतेही ब्रह्मा जीने उस देह को त्याग दिया ॥ २८ ॥ जिस के नूपुर शब्दायमान हैं तथा मद से नेत्र विह्वल होरहे हैं और कटिप्रदेश में क्षुद्र घंटिका प्रकाशित होरही है ॥ २९ ॥ जिस के कुच दोनों आपसमें ऊंचे हैं, सुन्दर नाक, सुंदर दांत, प्रेम युक्त हास्य और लीला पूर्वक जिसका देखना है ॥ ३० ॥ हे विदुर ! जो लाज से अपनी देह को ढांकती है तथा नील अलकावली से शोभित है ऐसी उस स्त्री को देख कर सम्पूर्ण दैत्य मोह को प्राप्त हुए ॥ ३१ ॥ और कहने लगे कि इस का रूप, इसकी धैर्यता, इस

मध्येकामयमानानामकामेव विसर्पति ३२ वितर्कयन्तोबहुधातां संध्यांप्रमदाकृतिम्। अभिसंभाव्यविश्रम्भात्पर्यपृच्छन्कुमेधसः ॥३३॥ कासिकस्यासिरम्भोरु कोवाऽर्थस्तेऽत्रभामिनि। रूपद्रविणपण्येन दुर्भगान्नोविबाधसे ॥ ३४ ॥ यावाकाचित्त्वमबले दिष्ट्यासंदर्शनंतव। उत्सुनोषीक्षमाणानां कन्दुकक्रीडयामनः ॥३५॥ नैकत्रतेजयति शालिनीपादपद्मंघ्नन्त्यामुहुः करतलेनपतत्पतंगम्। मध्यंविषीदातिबृहत्स्तनभारभीतं शांन्तेवदृष्टिरमलासुशिखासमूहः ॥ ३६ ॥ इतिसायंतनींसंध्यामसुराःप्रमदायतीम्। प्रलोभयन्तींजगृहुर्मत्वामूढधियःस्त्रियम् ॥३७॥ प्रहस्यभावगम्भीरं जिघ्रन्त्यात्मानमात्मना कान्त्याससर्जभगवान् गन्धर्वाप्सरसांगणान् ॥ ३८ ॥ विससर्जतनुंतांवैज्योत्स्नांकान्तिमतींप्रियाम्। तएवचाददुःप्रीत्या विश्वावसुपुरोगमाः ॥३९॥ सृष्ट्वाभूतपिशाचांश्चभगवानात्मतन्द्रिणा। दिग्वाससोमुक्तकेशान्वीक्ष्यचामीलयद्दृशौ ॥४०॥ जगृहुस्तद्विसृष्टां तांजृम्भणाख्यांतनुंप्रभोः। निद्रामिन्द्रियविक्लेदो यथाभूतेषुदृश्यते ॥ ४१ ॥ येनोच्छिष्टान्धर्षयन्ति तमुन्मादंप्रचक्षते। ऊर्जस्वन्तंमन्यमान आत्मानंभगवानजः। साध्यान्गणान्पितृगणान्परोक्षेणासृजत्प्रभुः ४२॥ तआत्मसर्गंतंकायं पितरःप्रतिपेदिरे। साध्येभ्यश्चपितृभ्यश्च कवयोयद्वितन्वते ॥ ॥ ४३ ॥ सिद्धान्विद्याधरांश्चैव तिरोधानेनसोऽसृजत्। तेभ्योऽददात्तमात्मानमन्तर्धानाख्यमद्भुतम् ॥ ४४ ॥ सकिन्नरांकिंपुरुषांप्रत्यात्म्येनासृजत्प्रभुः। मानयन्नात्मनाऽऽत्मानमात्माभासंविलोकयन् ॥ ४५ ॥ तेतुतज्जगृहूरूपं त्यक्तंयत्परमेष्ठिना। मि

की नवीन अवस्था को देखो, हम इसकी कामना करते हैं परन्तु यह अकाम की समान चली जाती है ॥ ३२ ॥ अनेक प्रकार की तर्कना करते हुए संध्या काल में उस स्त्री का सुंदर स्वरूप देख उन कुबुद्धियो नें आदर पूर्वक उस से पूछा ॥ ३३ ॥ कि हे केलाकी सदृश जंघा वाली तू कौन है हे भामनि ! यहां तेरा क्या प्रयोजन है, तू रूप के द्रव्य के व्यवहारसे हम दुर्भागियों को क्यों दुःख देती है ॥ ३४ ॥ हे अबला ! तू चाहे कोई क्योंनहो हमको क्या प्रयोजन परन्तु यह अत्युत्तम हुआ कि जो तेरे दर्शन हमको हुए, हमको अत्यन्त उत्कंठा होती है कि जब हम तेरे गेंद के खेलको देखते हैं ॥ ३५ ॥ हे जयति शालिनि ! बारम्वार हाथों से गेंद उछालनें के कारण तेरे कमल स्वरूपी चरण एकत्र नहीं रहते, बडे स्तनों के बोझसे तेरा मध्य भाग भ्रमित होरहाहै तेरी निर्मल शांत दृष्टि तथा सुंदर चोटी है ॥३६॥ सायंकाल की संध्यामें जो स्त्री रूपहै उनके लोभको उत्पादन किया उन मूढ़ों नें उसको स्त्री रूप से ग्रहण किया ॥ ३७ ॥ तदनंतर ब्रह्माजी नें गंभीरतापूर्वक हँसकर अपनी आत्मा से गंधर्व, अप्सराओंके समूह उत्पन्न किये ॥ ३८ ॥ अतिप्यारी कांतिवाली उस देह के त्यागकरने पर उसे गन्धर्वों ने ग्रहण किया ॥ ३९ ॥ फिर ब्रह्माजी ने अपनीतन्द्रासे भूत, पिशाच आदिकों को उत्पन्न किया, उन्हें नग्न तथा छुटे केशवाले देख ब्रह्माजीने आंखें बंदकरलीं और उस देह का भी त्याग किया ॥ ४० ॥ ब्रह्माजी के त्यागेहुए उस जृंभारूप को भूतादिकों ने ग्रहण किया, उस से उत्पन्नहुई निद्रा इन्द्रियों को बशमें करनेवाली है किजो सब जीवों में व्याप्त है। जिस से उच्छिष्ट को घिसते हैं उस को उन्माद कहते हैं, उन्माद से सब जीवों को महा क्लेश होता है ॥ ४१ ॥ फिर ब्रह्माजीने अपनीआत्मा को बड़ा पराक्रमी मान साध्यगण तथा पितृगणों को उत्पन्न किया ॥ ४२ ॥ आत्मा से उत्पन्न उस देहको साध्य और पितृगण प्राप्त हुए कि जिस देह को बिवेकी लोग हव्य देते हैं ॥ ४३ ॥ सिद्ध और बिद्याधरों को गुप्त होकर रचा और उनको अन्तर्ध्यान नाम अद्भुत देहदी ॥ ४४ ॥ फिर अपने मनसे ब्रह्माजीने अपने आत्मा को मानंदकर अपने प्रतिबिम्बसे किन्नर और किंपुरुषों को उत्पन्न

थुनीभूयगायन्तस्तमेवोषस्त्रिकर्मभिः ॥ ४६ ॥ देहेनवैभोगवता शयानोबहुचिन्त या। सर्गेऽनुपचितेक्रोधा दुत्ससर्जहतद्वपुः ॥ ४७ ॥ येऽहीयन्ताऽमुतःकेशा अहय स्तेङ्गजज्ञिरे। सर्पाःप्रसर्पतःक्रूरानागाभोगोरुकन्धराः ॥ ४८ ॥ सआत्मानंमन्य मानः कृतकृत्यमिवात्मभूः। तदामनून्ससर्जांते मनसालोकभावनान् ॥४९॥ तेभ्यः सोऽत्यस्त्रजत्स्वीयं पुरंपुरुषमात्मवान्। तान्दृष्ट्वायेपुरासृष्टा प्रशशंसुः प्रजाप तिम् ॥ ५० ॥ अहोएतज्जगत्स्रष्टः सुकृतंवततेकृतम्। प्रतिष्ठिताःक्रियायस्मिन्साक मन्नमदामहे ॥५१॥ तपसाविद्ययायुक्तो योगेनसुसमाधिना। ऋषीनृषिर्हृषीकेशः ससर्जाभिमताःप्रजाः ॥ ५२ ॥ तेभ्यश्चैकैकशःस्वस्य देहस्यांशमदादजः। यत्तत्समाधियोगर्द्धितपोविद्याविरक्तिमत् ॥ ५३ ॥

इतिश्रीमद्भागवतेमहापुराणेतृतीयस्कन्धेसर्गवर्णनंनामाविंशतितमोऽध्यायः २० ॥

विदुरउवाच ॥ स्वायम्भुवस्यच मनोर्वंशःपरमसंमतः। कथ्यतांभगवन्यत्र मैथुनेनैधिरेप्रजाः ॥१॥ प्रियव्रतोत्तानपादौसुतौ स्वायंभुवस्यवै। यथाधर्मंजुगुपतुः सप्तद्वीपवतींमहीम् ॥ २ ॥ तस्यवैदुहिताब्रह्मन्देवहूतीतिविश्रुता। पत्नीप्रजापतेरु क्ता कर्दमस्यत्वयानघ ॥ ३ ॥ तस्यांसवैमहायोगी युक्तायांयोगलक्षणैः। ससर्ज कतिधावीर्यं तन्मेशुश्रूषवेवद ॥ ४ ॥ रुचिर्योभगवान्ब्रह्मन् दक्षोवाब्रह्मणःसुतः। यथाससर्जभूतानि लब्ध्वाभार्यांचमानवीम् ॥ ५ ॥ मैत्रेयउवाच ॥ प्रजाःसृजेति भगवान्कर्दमो ब्रह्मणोदितः। सरस्वत्यांतपस्तेपे सहस्राणांसमादश ॥ ६ ॥ ततः समाधियुक्तेन क्रियायोगेनकर्दमः। संप्रपेदेहरिंभक्त्या प्रपन्नवरदाशुषम् ॥ ७ ॥

किया ॥ ४५ ॥ जिस देह का ब्रह्मा जीने त्यागन कियाथा उसी को उन्होंने ग्रहण किया वह परस्पर मिलकर श्रेष्ठ कर्म करने लगे ॥ ४६ ॥ जब सर्गरचना न हुई तो ब्रह्माजीने बड़ी चिन्ता कर हाथ पांव फैला क्रोधकर उस देह को त्याग दिया ॥४७॥ उस देह के केशों से अहि (सांप) और कंधे से बड़े मोटे फनवाले नाग उत्पन्न हुए ॥ ४८ ॥ फिर ब्रह्माजी ने अपने आत्माको कृतकृत्यमाना और अन्त में मनसे लोकभावन मनुको उत्पन्न किया ॥ ४९ ॥ उन के निमित्त ब्रह्माजीने उन को अपनी पुरुषाकार देहदी। जो पहिले उत्पन्न हुएथे उन्होंने मनुके उत्पन्नहोनेसे ब्रह्माजी की बड़ी प्रशंसा की ॥ ५० ॥ हे जगत्स्रष्टा ! आपने अत्युत्तम किया आपने बड़ाही सुकृत किया, अब हम सबको अन्न भक्षण करने को मिलेगा ॥ ५१॥ फिर ब्रह्माजी ने तप विद्या तथासमाधि से योग्य ऋषियों को उत्पन्न किया ॥ ५२ ॥ और उन एक २ को अपनी देहका अंश दिया कि जिस से समाधियोग में ऋद्धि और तप, विद्या तथा वैराग्य युक्तहुए ॥ ५३ ॥

इतिश्रीमद्भागवतेमहापुराणे तृतीयस्कन्धेसरलभाषाटीकायांविंशतितमोऽध्यायः ॥ २० ॥

विदुरजीने कहा कि—स्वायंभूमनुका वंश जो परम माननीय है हे भगवन्! जिसमें मैथुन धर्म से प्रजाकी वृद्धि हुई उसका मुझसे वर्णनकरिये॥१॥प्रियव्रत औरउत्तानपाद इनदोनों स्वायंभुवमनु के पुत्रोंने जिसप्रकारसे सातों द्वीप में धर्मपूर्वक राज्य किया ॥ २ ॥ हे ब्रह्मन् ! उन की देवहूती नामकन्या कि जिसको आपने प्रजापति कर्दमजीकी स्त्री कहा है ॥ ३ ॥ उस योग्य लक्षणोंवाली देवहूती कन्यासे महायोगी कर्दमजी के कितनी संतानें उत्पन्न हुई वह मैं सुनाचाहताहूं ॥ ४ ॥ हे ब्रह्मन् ! रुचिभगवान ने आकूति और दक्ष प्रजापति ने प्रसूति को पाकर किस भांति सृष्टि रचनाकी ॥ ५ ॥ मैत्रेयजी ने कहा कि—हे विदुर ! ब्रह्माजी ने कर्दमजी को आज्ञादी कि हे बेटा ! तुम सृष्टिरचनाकरो, यह सुन ब्रह्माजी के प्रेरेहुए कर्दमजी ने सरस्वती तटपर दससहस्र वर्ष तप किया ॥ ६ ॥ इस के अनन्तर कर्दमजी समाधियुक्त, भक्तियोग से परमेश्वरको प्राप्त हुए ॥ ७॥

तावत्प्रसन्नोभगवान्पुष्कराक्षः कृतेयुगे । दर्शयामासतंक्षत्तः शाब्दंब्रह्मदधद्वपुः ॥ ८॥ सतंविरजमर्काभं सितपद्मोत्पलस्रजम् । स्निग्धनीलालकव्रातवक्त्राब्जं विरजोम्बरम् ॥ ९ ॥ किरीटिनंकुंडलिनं शंखचक्रगदाधरम् । श्वेतोत्पलक्रीडनकंमनःस्पर्शस्मितेक्षणम् ॥ १० ॥ विन्यस्तचरणाम्भोजमंसदेशे गरुत्मतः । दृष्ट्वाखेऽवस्थितंवक्षः श्रियंकौस्तुभकन्धरम् ॥ ११ ॥ जातहर्षोऽपतन्मूर्ध्नाक्षितौलब्धमनोरथः गीर्भिस्त्वभ्यगृणात्प्रीतिस्वभात्मा कृतांजलिः ॥ १२ ॥ ऋषिरुवाच ॥ जुष्टंबताऽद्याऽखिलसत्वराशेः सांसिद्ध्यमक्ष्णोस्तवदर्शनान्नः । यद्दर्शनंजन्मभिरीड्य सद्भिराशासतेयोगिनोरूढयोगाः ॥ १३ ॥ येमाययातेहतमेधसस्त्वत्पादारविंदं भवसिंधुपोतम् । उपासतेकामलवायतेषां रासीशकामान्निरयेऽपियेस्युः ॥ १४ ॥ तथाससचाहंपरिवोढुकामः समानशीलांगृहमेधधेनुम् । उपेयिवान्मूलमशेषमूलं दुराशयः कामदुघांघ्रिपस्य ॥ १५ ॥ प्रजापतेस्तेवचसाधीशतन्त्या लोकःकिलायंकामहतोऽनुबद्धः । अहंचलोकानुगतोवहामि बलिंचशुक्लानिमिषायतुभ्यम् ॥१६॥ लोकांश्चलोकानुगतान्पशूंश्च हित्वाश्रितास्तेचरणातपत्रम् । परस्परंत्वद्गुणवादसीधुपीयूषनिर्यापितदेहधर्माः ॥ १७ ॥ नतेजराक्षभ्रमिरायुरेषां त्रयोदशारंत्रिशतंषष्टिपर्व । षण्नेम्यनंतच्छदियत्रिणाभिकरालस्रोतो जगदाच्छिद्यधावत् ॥ १८ ॥ एकःस्वयंसंजगतःसिसृक्षयाद्वितीययात्मन्नधियोगमायया । सृजस्यदःपासिपुनर्ग्रसिष्यसे यथो-

हे विदुर ! कमलदल नेत्र भगवान ने प्रसन्नहो शब्द ब्रह्म का रूप धर कर्दमजी को दर्शन दिया ॥ ८ ॥ उस स्वरूप की निर्मल स्वर्गवत् कांति है तथा सफेदकमल की मालापहिने और नील केशों से उनका मुख शोभित है तथा निर्मलवस्त्र पहिने ॥ ९ ॥ क्रीट, कुण्डल धारण किये हैं और मन्दमुसकान से देखते हैं ॥ १० ॥ गरुड़ के कन्धे पर चरण कमल तथा वक्षस्थल में लक्ष्मीजी को धारण किये और कौस्तुभ मणि पहिने उस रूपको आकाशमें आया देखकर ११ ॥ कर्दमजी अपनी इच्छाके प्राप्त होने से अत्यन्त प्रसन्न हुए और पृथ्वी पर माथाधर दण्डवतकर हाथ जोड़ स्तुति करने लगे ॥ १२ ॥ कर्दमजी बोले कि हे ईश ! जिन के दर्शनों की अभिलाषा श्रेष्ठ योगी जन जो अनेक जन्मों मे योग साधन करते हैं रखते हैं उन्हीं अखिल सत्व आप के दर्शनों से मेरे नेत्र सफल हुये ॥ १३ ॥ हे ईश ! जोमनुष्य विषय सम्बन्धी तुच्छ सुखों के हेतु आप के कमल चरणों का किजो समुद्रतरने के हेतु नौकारूपी हैं भजन करते हैं उनको आपनरक में मिलनेवाले विषय सुख देते तो हो परन्तु उन की बुद्धि माया से नाश हुई जाननी चाहिये १४ वैसाही मैंभीहूं, क्योंकि मैं शीलस्वभाव स्त्रीके संग ब्याह करने की इच्छा से आप के कमलरूपी चरणोंकी शरणमें किजो कल्पवृक्षकी भांति सबपुरुषार्थोंके देनेवाले हैं आयाहूं ॥१५॥ हे अधीश ! जैसे प्रजापति ब्रह्माकी बाणीरूप डोर से यह सम्पूर्ण जगत बँधाहुआ है, वैसेही मैंभी काल के भयसे आप शुक्ल और धर्ममूर्ति अनिमिष कालरूप आप को आपकी आज्ञापालन के हेतु प्रणाम करताहूं ॥ १६ ॥ लोकमें प्राप्तहुए पशुरूप पुरुषों का निरादरकरके जो मनुष्य आपके चरणरूपी छत्रके आश्रितहैं और आपके कथारूपअमृत से जिनकी भूखप्यासआदिक देहिकधर्म निवृत्तहोगये हैं ॥ १७॥ हे भगवान ! ऐसे भक्तों की आयुको आपका कालरूपी चक्र जिसके १३ महीन रूप आरा, ३६० दिन उसके पर्व (पुरजे) ६ ऋतु उसकी नेमी, क्षण, लवादिक जिसकी धारा, चातुर्मासादिक जिस की नाभि अर्थात् आधार भूत चक्र है तथा जिसका कराल प्रभावहै ऐसा सम्वत् सरात्मक काल चक्र कुछ नहीं करसकता ॥ १८ ॥ आप अकेले ही प्रथम उत्पन्न हुए फिर सृष्टि सृजने की इच्छा से दूसरी योग मायाको उत्पन्न किया जिससे इस विश्वको मकड़ी के जाले की भांति रचते

णैनाभिर्भगवन्स्वशक्तिभिः ॥ १९ ॥ नैतद्बताऽधीशपदंतवेप्सितं यन्मायथानस्तनुषेभूतसूक्ष्मम् । अनुग्रहायास्त्वपियर्हिमायया लसत्तुलस्यातनुवाविलक्षितः ॥२०॥ तंत्वाऽनुभूत्योपरतक्रियार्थं स्वमाययावर्तितलोकतन्त्रम् । नमाम्यभीक्ष्णंनमनीयपादसरोजमल्पीयसिकामवर्षम् ॥ २१ ॥ मैत्रेयउवाच ॥ इत्यव्यलीकंप्रणतोऽब्जनाभस्तमावभाषे वचसाऽमृतेन । सुपर्णपक्षोपरिरोचमानः प्रेमस्मितोद्वीक्षणाविभ्रमद्भ्रूः ॥ २२ ॥ श्रीभगवानुवाच ॥ विदित्वातवचैत्यंमेपुरैवसमयोजितत् । यदर्थमात्मनियमैस्त्वयैवाहंसमर्चितः ॥ २३ ॥ नवैजानुमृषैवस्यात्प्रजाध्यक्षमदर्हणम् । भवद्विधेष्वातितरांमयि संगृभितात्मनाम् ॥ २४ ॥ प्रजापतिसुतःसम्राड् मनुर्विख्यातमङ्गलः । ब्रह्मावर्तंयोऽधिवसञ्छास्ति सप्तार्णवांमहीम् ॥ २५ ॥ सचेहविप्रराजर्षिर्महिष्याशतरूपया । आयास्यतिदिदृक्षुस्त्वां परश्वोधर्मकोविदः ॥ २६ ॥ आत्मजामसितापांगीं वयःशीलगुणान्विताम् । मृगयन्तींपतिं दास्यत्यनुरूपायतेप्रभो ॥ २७ ॥ समाहितंतेहृदयं यत्रेमान्परिवत्सरान् । सात्वांब्रह्मन्नृपवधूः काममाशुभजिष्यति ॥ २८ ॥ यातआत्मभृतंवीर्यं नवधाप्रसविष्याति । वीर्येत्वदीयेऋषय आधास्यन्त्यञ्जसात्मनः ॥ २९ ॥ त्वंचसम्यगनुष्ठाय निदेशंमउशत्तमः । मयितीर्थीकृताशेषक्रियाऽर्थो मांप्रपत्स्यसे ॥ ३० ॥ कृत्वादयांचजीवेषु दत्त्वाचाभयमात्मवान् । मय्यात्मानंसहजगत्द्रक्ष्यस्यात्मनिचापिमाम् ॥ ३१ ॥ सहाहंस्वांशकलया त्वद्वीर्येणमहामुने । तवक्षेत्रेदेवहूत्यां प्रणेष्येतत्त्वसंहिताम् ॥ ३२ ॥ मैत्रेयउवाच ॥

पालते तथा संहार करते हो ॥ १९ ॥ हे अधीश ! आप अपनी माया से भक्तों को मनोवांछित फल देते हो यह आपका अनुग्रह है । आपका तुलसी की माला से शोभित स्वरूप दर्शन करने वालोंको भुक्ति, मुक्तिका दाता है ॥ २० ॥ आप अपनी माया से सृष्टिको सृजते हो और सकाम पुरुषों को विषय सुख देते हो, हे भगवान ! ज्ञानके प्रभाव से जिनमें से कर्म फलका भोग उपराम होगया है तथा जिनके कमल स्वरूपी चरण वारंवार नमस्कार के योग्य हैं उन आपको, मैं बारंबार नमस्कार करता हूं ॥ २१ ॥ मैत्रेय जी ने कहा कि—जब कर्दम जी ने इस भांति निश्छल भाव से गरुड़ के ऊपर विराजमान भगवान की स्तुति की तो भगवान स्नेह सहित मंद मुसकान से उन की ओर देख भृकुटी को घुमा, अमृत रूपी वाणीबोले ॥ २२ ॥ हे ऋषे ! जिस हेतु तुमने नियम धारण कर मेरी अर्चना की है उसको मैंने जानकर पहिले ही से प्रबंध करादिया है ॥२३॥ हे प्रजाओं मे श्रेष्ठ ! जो मेरा पूजन करते हैं उनकी पूजा कभी निष्फल नहीं होती फिर इसमें तुम्हारी समान महात्माओं की पूजाके सफल होने में क्या संदेह है ॥ २४ ॥ प्रजापति के पुत्र चक्रवर्ती विख्यात राजामनु किजो ब्रह्मावर्त (विठूर) देश में बैठे हुये सातद्वीप नौखंड पृथ्वी की रक्षा करते हैं ॥ २५ ॥ वह धर्म वेत्ताओं में श्रेष्ठ राजर्षि अपनी स्त्री के संग परसों आपके दर्शनों को यहां आवेगे ॥ २६ ॥ सो आपको अपनी पुत्रीके योग्य देखकर हे प्रभो ! सुंदर कटाक्ष वाली अवस्था शीलगुणयुक्त कन्या को देजायगे ॥ २७ ॥ हे ब्रह्मन् ! वह राज कन्या बहुत बर्षोंतक आप की इच्छित सेवा करेगी ॥ २८ ॥ इस भांति उसमें से आपके वीर्य्य से ९ कन्या उत्पन्न होंगी, और उन पुत्रियों को ऋषिधारण करेंगे ॥ २९ ॥ और आपभी भली प्रकार मेरा अनुष्ठान कर मेरी आज्ञा का पालन कर सब कर्म फल मुझको समर्पण कर मुझे प्राप्त होगे ॥ ३० ॥ सब जीवोंपर दयाकर आत्म ज्ञानीहो सबको अभय दानदे आत्मा रूप मुझको सम्पूर्ण जगत में देखोगे और अपने आपमेंभी मुझे देखोगे ॥ ३१ ॥ हे महामुने ! मैं भी अपनी अंश, कला से तुम्हारे वीर्य से तुम्हारी देवहूती स्त्री मे अवतार ले तत्व संहिता कहूंगा ॥ ३२ ॥ मैत्रेय जी ने कहा कि

पर्वतमनुभाष्याथ भगवान्प्रत्यगक्षजः। जगामबिन्दुसरसः सरस्वत्यापरिश्रितात् ॥ ३३ ॥ निरीक्षतस्तस्ययथावशेषसिद्धेश्वराभिष्टुतसिद्धमार्गः आकर्णयन्पत्ररथेंद्रपक्षैरुच्चारितं स्तोममुदीर्णसाम ॥ ३४ ॥ अथसंप्रस्थितेशुक्ले कर्दमोभगवानृषिः। आस्तेस्मबिंदुसरसि तंकालंप्रतिपालयन् ॥ ३५ ॥ मनुःस्यन्दनमास्थाय शातकौम्भपरिच्छदम्। आरोप्यस्वांदुहितरं सभार्यःपर्यटन्महीम् ॥ ३६ ॥ तस्मिन्सुधन्वन्नहनि भगवान्यत्समादिशत्। उपायादाश्रमपदंमुनेः शान्तव्रतस्यतत् ॥ ३७ ॥ यस्मिन्भगवतो नेत्रान्न्यपतन्नश्रुबिन्दवः। कृपयासंपरीतस्य प्रपन्नेऽर्पितयाभृशम् ॥ ३८ ॥ तद्वैबिन्दुसरोनाम सरस्वत्यापरिप्लुतम्। पुण्यंशिवामृतजलं महर्षिगणसेवितम् ॥ ३९ ॥ पुण्यद्रुमलताजालैःकूजत्पुण्यमृगद्विजैः। सर्वर्तुफलपुष्पाढ्यं वनराजिश्रियाऽन्वितम् ॥ ४० ॥ मत्तद्विजगणैर्घुष्टं मत्तभ्रमरविभ्रमम्। मत्तबर्हिनटाटोपमाह्वयन्मत्तकोकिलम् ॥ ४१ ॥ कदम्बचम्पकाशोककरञ्जबकुलाशनैः। कुन्दमन्दारकुटजैश्चूतपोतैरलंकृतम् ॥ ४२ ॥ कारण्डवैःप्लवैर्हंसैःकुररैर्जलकुक्कुटैः। सारसैश्चक्रवाकैश्च चकोरैर्वल्गुकूजितम् ॥ ४३ ॥ तथैवहरिणैःक्रोडैः श्वाविद्गवयकुंजरैः। गोपुच्छैर्हरिभिर्मर्कैर्नकुलैर्नाभिभिर्वृतम् ॥ ४४ ॥ प्रविश्यतत्तीर्थवरमादिराजःसहात्मजः। ददर्शमुनिमासीनं तस्मिन्हुतहुताशनम्। विद्योतमानं वपुषातपस्युग्रयुजाचिरम्। नातिक्षामंभगवतःस्निग्धापांगावलोकनात् तद्व्याहृतामृतकलापीयूषश्रवणेनच ॥ ४६ ॥ प्रांशुंपद्मपलाशाक्षं जटिलंचीरवाससम् उपसं

हे विदुर! भगवान ऐसे प्रगट हो कर्दम जी से इस भांति कह बिंदुसर सरस्वती के तट से परम धामको चलेगये ॥ ३३ ॥ जिस वैकुंठ मार्गकी सम्पूर्ण सिद्धेश्वर स्तुति करते हैं ऐसे तथा गरुड़ के पंखों से उच्चारण हुई साम वेद की ऋचायें सुनते ॥ ३४ ॥ भगवान जब चलेगये तब कर्दम जी सरस्वती के तटपर विराज मनुके आनेकी बाट जोहने लगे ॥ ३५ ॥ स्वायंभूमनु सोने की सामग्री वाले रथमें बैठकर, अपनी कन्या तथा शतरूपा स्त्री को संगले पृथ्वी पर्यटन करने को चलदिये ॥ ३६ ॥ हे विदुर! राजा विचरते२ उसी दिन जिस दिन भगवान ने कहाथा शांतव्रत मुनिके आश्रम में आये, जहां कर्दम ऋषिने विवाह के हेतु तप कियाथा ॥ ३७ ॥ जिस सरोवर में भगवान के अश्रु शरणागत कर्दम जी पर कृपाके कारण गिरेथे ॥ ३७ ॥ इसी से उसको बिंदुसर कहते हैं, जहांपर सरस्वती नदी बह रही है और जिस में पुण्य पवित्र अमृत रूपी जल, ऋषिगणों का सेवनीय भराहै और जो सदैव पुण्यकारी है ॥३९॥ जिसके किनारे पर पवित्र वृक्ष तथा लता समूह शोभायमान हैं और जिनपर सुंदर पक्षी शब्द कररहे हैं तथा सब ऋतुओं में फल फूलों से पूर्ण हैं वन पंक्तियों से शोभायमान है ॥४० ॥जहां मतवारे पक्षी बास करते तथा मतवारे भौंरेगुंज रहे हैं और मतवारे मोर तथा मतवारी कोकिला बोलरही हैं॥ ४१ ॥ जहां कदंब, चम्पा, अशोक, करौंदा, जामुन, मौलसिरी, कटहर, बडहर, कुंद, मंदार, कुडा और आमादिक वृक्ष शोभायमान हैं ॥ ४२ ॥ जहां कुरंव, हंस, टिटिहरी, सारस, चकवा, चकई, और चकोर सुंदर शब्द कररहे हैं ॥ ४३ ॥ वैसेही वहां हरिण, वाराह, रोम, हाथी, सुरागऊ, वंदर, न्यौला, मृग फिर रहे हैं ॥ ४४ ॥ ऐसे आश्रम में विराजे हुये कर्दम जी को किजो हवन करके बैठेही थे, आदि राजा स्वायंभुवमनुने अपनी दुहिता समेत देखा ॥ ४५ ॥ जिनकी देह उग्रतप से प्रकाशित होरही थी, तपसे कृश होनेपर भी भगवान के स्नेह युक्त देखने के कारण अतिकृश नहीं थे ॥ ४६ ॥ परमेश्वर के भाषण रूप अमृत की सदृश, कला सम्बन्धी, अमृत का सेवन करते हुए, कमल

सत्यमलिनं यथार्हणमसंस्कृतम् ॥ ४७ ॥ अथोटजमुपायांतं नृदेवंप्रणतंपुरः सपर्यया पर्यगृह्णात्प्रतिनन्द्यानुरूपया ॥ ४८ ॥ गृहीतार्हणमासीनं संयतंप्रीणयन्मुनिः। स्मरन्भगवदादेशमित्याह श्लक्ष्णयागिरा ॥ ४९ ॥ नूनंचंक्रमणंदेव सतांसंरक्षणाय ते। वधायचासतांयस्त्वंहरेःशक्तिर्हिपालिनी ॥ ५० ॥ योऽर्केन्द्वग्नीन्द्रवायूनांयमधर्मप्रचेतसाम् । रूपाणिस्थानआधत्सेतस्मैशुक्लायतेनमः ॥५१॥ नयदारथमास्थाय जैत्रंमणिगणार्पितम् । विस्फूर्जयश्चण्डकोदण्डो रथेनत्रासयन्नघान् ॥५२॥ स्वसैन्यचरणक्षुण्णं वेपयन्मण्डलंभुवः॥ विकर्षन्बृहतींसेनां पर्यटस्यंशुमानिव ॥५३॥ तदैव सेतवःसर्वे वर्णाश्रमनिबन्धनाः। भगवद्रचिताराजन् भिद्येरन्बतदस्युभिः अधर्मश्चसमेधेत लोलुपैर्व्यंकुशैर्नृभिः॥ शयानेत्वयिलोकोऽयंदस्युग्रस्तोविनंक्ष्यति ५५ ॥ अथापिपृच्छेत्वां वीरयदर्थंत्वमिहागतः। तद्वयंनिर्व्यलीकेनप्रतिपद्यामहेहृदा ५६ ॥

इतिश्रीमद्भा० तृतीय० एकविंशतिमोऽध्यायः ॥ २१ ॥

मैत्रेयउवाच ॥एवमाविष्कृताशेषगुणकर्मोदयोमुनिम् । सव्रीडइवतंसम्राडुपारतमुवाचह ॥ १ ॥ मनुरुवाच ॥ ब्रह्माऽसृजत्स्वमुखतो युष्मानात्मपरीप्सया। छन्दोमयस्तपोविद्यायोगयुक्तानलम्पटान् ॥ २ ॥ तत्त्राणायासृजच्चास्मान् दोःसहस्रात्सहस्रपात् । हृदयंतस्यहिब्रह्म क्षत्रमंगंप्रचक्षते ॥ ३ ॥ अतोह्यन्योन्यमात्मानं ब्रह्मक्षत्रंचरक्षतः। रक्षतिस्माव्ययोदेवः सयःसदसदात्मकः ॥ ४ ॥ तवसंदर्शं

दल नेत्र तथा जटाओं को धारण किये हुए और वल्कल वस्त्र पहिरे ॥ ४७ ॥ कर्दम मुनि को कि जो मलिन तथा पूजा के योग्य हैं जिनके देह का संस्कार नहीं है ऐसा देख उनके निकट जाय पर्णशाला के समीप पहुंच उनको प्रणाम किया फिर मुनिने आशीर्वाद दे पूजा कर राजाको ग्रहण किया ॥ ४८ ॥ कर्दमजी मनुजी को नियम सहित बैठा देख उनको प्रसन्न करते हुए परमेश्वर के वचनों का स्मरण कर मीठी वाणी से बोले ॥ ४९ ॥ हे राजा ! आप लोगों का विचरना केवल महात्माओं की रक्षा और दुष्टों के संहार केही हेतु होता है क्योंकि आप परमेश्वर की पालन शक्ति हो ॥ ५० ॥ जो सूर्य, चन्द्रमा, अग्नि, इन्द्र, पवन, यम, धर्म, और प्रचेता इनका रूप धारणकर स्थान२ में सबकार्य करते हुए उन शुक्ल रूप आपको मेरा नमस्कार है ॥५१॥ जो आप मणि जटित बिजयी रथपर सवार हो प्रचंड धनुष की टंकार से पापियों को त्रास देते ॥ ५२ ॥ और अपनी सेना के चरणों से पृथ्वी मण्डल को कंपाते हुए तथा सेना को खींचते हुए सूर्य की भांति नहीं घूमो तो ॥ ५३ ॥ हे राजन् ! परमेश्वर की बांधी हुई वर्णाश्रम के बंधन की मर्यादा तत्काल दुष्टों के द्वारा भेदको प्राप्त होजावे ॥ ५४ ॥ और निरंकुश तथा खोटे मनुष्यों से अधर्म बढ़जाय यदि आप निश्चित हो जावें तो यह संसार चोरों से नाशको प्राप्त होजाय ५५॥ हे बीर ! मैं तुम से पूछता हूं कि आप यहां किस हेतु आयेहो आप निष्कपट हृदय होकर मुझसे कहिये वह आपकी आज्ञा मैं पूर्ण करूं ॥ ५६ ॥

इतिश्रीभागवते महापुराणे० तृतियस्कन्धे सरलाभाषाटीकायां एकविंशोध्यायः ॥ २१ ॥

मैत्रेयजी बोले कि–जिनके गुण कर्मका प्रकाश संसार में होरहा है, सो मनु लज्जा वालोंकी नाई लज्जा करके अत्यन्त हर्षित हो ॥ १ ॥ मनुजी बोले हे मुनिराज ! ब्रह्माजी नें आत्मा के जाननें की इच्छा से वेद विद्या, तथा योगयुक्त आप लोगों को अपनें मुह से प्रगट कियाहै ॥ २ ॥ और उन्ही ब्रह्माजी नें आप लोगों की रक्षा के हेतु अपनें हजार हाथों से हम (क्षत्रियों) को प्रगट किया है कारण कि ब्राह्मण उनका हृदय और क्षत्री उनकी भुजा हैं ॥ ३ ॥ इसी हेतु यह दोनों ब्राह्मण और क्षत्री आपस में अपनें आत्मा की रक्षा करते हैं और इन दोनों वर्णों की अ-

नादेव च्छिन्नामेसर्वसंशयाः । यत्स्वयंभगवान्प्रीत्या धर्ममाहरिरक्षिषोः॥५॥दिष्ट्या मेभगवान्दृष्टो दुर्दर्शोयोऽकृतात्मनाम् । दिष्ट्यापादरजःस्पृष्टं शीर्ष्णामेभवतःशिवम् ॥ ६ ॥ दिष्ट्यात्वयानुशिष्टोऽहं कृतश्चानुग्रहोमहान् । अपावृतैःकर्णरन्ध्रैर्जुष्टा दिष्ट्योशतीर्गिरः ॥ ७ ॥ सभवांदुहितृस्नेहपरिक्लिष्टात्मनोमम । श्रोतुमर्हसिदीनस्यश्रावितंकृपयामुने ॥ ८ ॥ प्रियव्रतोत्तानपदोः स्वसेयंदुहितामम । अन्विच्छति पतिंयुक्तंवयः शीलगुणादिभिः ॥९ ॥ यदातुभवतःशीलश्रुतरूपवयोगुणान् । अशृणोन्नारदादेषा त्वय्यासीत्कृतनिश्चया ॥ १० ॥ तत्प्रतीच्छद्विजाग्र्येमां श्रद्धयोपहृतांमया । सर्वात्मनानुरूपांते गृहमेधिषुकर्मसु ॥ ११ ॥ उद्यतस्यहिकामस्य प्रतिवादोनशस्यते । अपिनिर्मुक्तसङ्गस्य कामरक्तस्यकिंपुनः ॥ १२ ॥ यउद्यतमनादृत्य कीनाशमभियाचते । क्षीयतेतद्यशःस्फीतं मानश्चावज्ञयाहतः ॥ १३ ॥ अहंत्वाशृणवं विद्वन्विवाहार्थंसमुद्यतम् । अतस्त्वमुपकुर्वाणः प्रत्तांप्रतिगृहाणमे ॥१४॥ऋषिरुवाच ॥ बाढमुद्वोढुकामोऽहमप्रत्ता चतवात्मजा । आवयोरनुरूपोऽसावाद्यो वैवाहिकोविधिः ॥ १६ ॥ कामःसभूयान्नरदेवतेऽस्याः पुत्र्याःसमाम्नायविधौप्रतीतः । कएवतेतनयांनाद्रियेतस्वयैव कान्त्याक्षिपतीमिवश्रियम् ॥ १६ ॥ यांहर्म्यपृष्ठेक्कणदंघ्रिशोभां विक्रीडतींकन्दुकविह्वलाक्षीम् । विश्वावसुर्न्यपतत्स्वाद्विमानाद्विलोक्य संमोहविमूढचेताः ॥ १७ ॥ तांप्रार्थयन्ती ललनाललाममसेवितश्रीचर

तर्यामी, अविनाशी परमेश्वर रक्षा करते हैं ॥ ४ ॥ हे देव ! आपके दर्शनों से मेरे सम्पूर्ण संदेह दूर होगये क्यों कि आपनें स्वयंही स्नेह से राजधर्म का वरणन किया ॥ ५ ॥ उन प्रभु का दर्शन कि जिनका दर्शन बिषयी पुरुषों को अति दुस्तर है मुझे हुआ यह अत्यन्त मंगलहुआ, और आपके कमल स्वरूपी चरणों की धूल मेरे शिरमें लगी यह अत्यंत ही उत्तम हुआ ॥ ६ ॥ यह आपकी बड़ी ही कृपा है कि-आपने मुझे शिक्षा दी और मेंरे रुके हुये कानों के छिद्रों में आपकी सुन्दर बाणी सुनने में आई ॥ ७ ॥ हे मुने ! दुहिता के स्नेह से मेंरामन अत्यंत दुःखित है और मैं दीन होरहा हूं आप मेंरी बिनती को कृपा पूर्वक सुनिये ॥ ८ ॥ यह प्रियव्रत तथा उत्तानपादकी भगनी, मेंरी बेटी अपने योग्य अवस्था, तथा शीलवान पति की इच्छा करती है ॥ ९ ॥ हे मुने ! जबसे इसने आपके शील, शास्त्र, रूप, वय, और गुणों को नारद जी के मुख से सुना है तब से इसने आपको बरने का निश्चय करलिया है ॥ १० ॥ हे द्विजाग्र ! इसी हेतु मैं श्रद्धा पूर्वक इस अपनी दुहिता को देता हूं आप इसे स्वीकार करें आपके गृहस्थ कार्य्य करने को यह सब प्रकार योग्य है ॥ ११ ॥ जोवस्तु आप घरबैठे मिलजाय उसका त्यागना उचित नहीं जो सब सङ्गसे निर्मुक्त है, उसकी तो बातही क्या है ॥ १२ ॥ जो घरआई वस्तुका निरादर करते हैं और फिर कृपण के निकट जाकर याचना करैं हैं उन पुरुषों का उज्वल यश नाशको प्राप्त हो जाता है और अवज्ञा से उनका मान भंग होजाता है ॥ १३ ॥ हे विद्वन् ! मैंने सुनाथा कि आप विवाह करने पर उद्यत हैं इसी से मैं इस कन्या को देता हूं आप स्वीकार करो ॥ १४ ॥ कर्दम ऋषिने कहा—कि बहुत अच्छा मुझे भी विवाह की कामना है यह आप की कन्या बड़ी गुणवान तथा शीलवान है हम दोनो का आद्य विवाह सब भांति से योग्य है ॥ १५ ॥ हे नरदेव ! वेद की विधिसे आप की कन्याको व्याहकर ग्रहण करूंगा यह अपनी कांति सेही लक्ष्मी का तिरस्कार करती है फिर इस कन्या का आदर कौन न करेगा ! ॥ १६ ॥ जो महलकी अटारी पर चढ़कर अपने पैरों के नूपुरके शब्द से शोभा प्रगट करती तथा गेंद के खेल से व्याकुल नेत्र होरही थी, विश्वावसु गंधर्व यह देखकर मोहित हो मूढ़की भांति अपने विमान से गिरगया था ॥ १७ ॥ जिन्हों

णैरहृष्टाम्। चन्त्सांमनोरुथपदःस्वसारं कोमानुमन्येतबुधोऽभियाताम् ॥ १८ ॥अतो भजिष्येसमयेनसाध्वीं यावत्तेजोविभृयादात्मनोमे। अतोधर्मान्पारमहंस्यमुख्यान् शुक्लप्रोक्तान्बहु मन्यऽविहिंस्नान् ॥ १९ ॥ यतोऽभवद्विश्वमिदंविचित्रं संस्थास्यते यत्रचवाऽवतिष्ठते। प्रजापतीनांपतिरेषमह्यं परंप्रमाणंभगवाननन्तः ॥ २० ॥ मैत्रेय उवाच ॥ सउग्रधन्वन्नियदेवाबभाषे आसीच्चतूष्णींमरविन्दनाभम्। धियोपगृह्णन्स्मितशोभितेन मुखेनचेतोलुलुभेदेवहूत्याः ॥२१॥ सोऽनुज्ञात्वाव्यवसितं महिष्यादुहितुःस्फुटम्। तस्मैगुणगणाढ्याय ददौतुल्यांप्रहर्षितः ॥ २२ ॥ शतरूपा महाराज्ञी पारिबर्हान्महाधनान्। दम्पत्योःपर्यदात्प्रीत्या भूषावासःपरिच्छदान्२३ प्रत्तांदुहितरंसम्राट् सदृक्षायगतव्यथः। उपगुह्यचबाहुभ्यामौत्कण्ठ्योन्मथिताशयः ॥ २४ ॥ अशक्नुवंस्तद्विरहं मुंचन्बाष्पकलांमुहुः। आसिंचदेववत्सेति नेत्रोदैर्दुहितुःशिखाः ॥ २५ ॥ आमन्त्र्यतंमुनिवरमनुज्ञातःसहानुगः। प्रतस्थेरथमारुह्य सभार्यःस्वपुरंनृपः ॥ २६ ॥ उभयोर्ऋषिकुल्यायाः सरस्वत्याःसुरोधसोः। ऋषीणामुपशान्तानां पश्यन्नाश्रमसंपदः ॥ २७ ॥ तमायान्तमभिप्रेत्य ब्रह्मावर्तात्प्रजापतिम्। गीतसंस्तुतिवादित्रैः प्रत्युदीयुःप्रहर्षिताः ॥ २८ ॥ बर्हिष्मतीनामपुरी सर्वसंपत्समन्विता। न्यपतन्यत्ररोमाणि यस्यांगंविधुन्वतः ॥ २९ ॥ कुशाःकाशास्तएवासन् शश्वद्धरितवर्चसः। ऋषयोयैःपराभाव्य यज्ञघ्नान्यज्ञमीजिरे ॥ ३० ॥

ने लक्ष्मी तक की सेवा नहीं की, ऐसे पुरुषों को भी जिनके दर्शन असम्भव हैं, ऐसी स्त्रियों में श्रेष्ठ उत्तान पादकी भगनी को जोस्वयं आकांक्षा करती है कौन बुद्धिमान पुरुष ग्रहण न करेगा ॥ १८ ॥ इस हेतु जबतक यह मेरे तेजको ग्रहणकर संतानोत्पत्ति करेगी तबतकमैं इसको ग्रहण करूंगा अनंतर भगवान के कहे हुये ज्ञान योग में प्रधान परम हंस आश्रम का अनुष्ठान करना चाहता हूं वह करूंगा ॥ १९ ॥ यह अद्भुत सृष्टि जिससे उत्पन्न हुई है तथा जिस में लयहोगी और जिस में यह सृष्टि रहती है वही प्रजा पतियों के पति परमेश्वर मेरे प्रमाण हैं ॥ २० ॥ मैत्रेय जी ने कहा कि हे विदुर जी ! कर्दम जी इस भांति कहकर परमेश्वर का ध्यान करते हुय चुप होगये तब उन की मंद मुसकान से शोभित मुखको देखकर देवहूती को लोभप्राप्त हुआ॥२१॥ मनुने अपनी रानी तथा बेटी का प्रयोजन जान प्रसन्न होकर शीलवान तथा गुणवान कर्दम जी को उनके गुणों के तुल्य अपनी कन्या दी ॥ २२ ॥ महाराणी शतरूपा ने स्नेह पूर्वक इन स्त्री, पुरुष को बहुत से गहने, वस्त्र आदिक बहुमूल्य दहेज दिया ॥ २३ ॥ अपनी कन्या के तुल्य गुणवाले कर्दम ऋषिको राजामनु अपनी कन्या देवहूती देकर निश्चिंत हुए और चलते समय अपनी कन्या से दोनो भुजाओं से मिले और उत्कंठा से उनका हृदय भरआया ॥ २४ ॥ उस का वियोग राजा रानी सहनसके नेत्रों से वारंवार आंसू गिरने लगे, फिर शतरूपा अपनी कन्या को गोदमें बैठाय, हे दुहिता ! हे वत्से ! कह नेत्रों के नीरसे पुत्री की शिखाको गीला करने लगी ॥ २५ ॥ फिर उन श्रेष्ठ मुनि कर्दम जी से आज्ञाले, रथपर बैठ, रानीको संगले नगरको चलदिये ॥ २६ ॥ ऋषिकुल के योग्य सरस्वती के सुंदर तटोंपर शांतिस्वरूप मुनिलोगों के आश्रमों की सम्पदा देखते हुए चलने लगे ॥ २७ ॥ जब स्वायंभुव मनु ब्रह्मावर्त्तदेश में आये, तो प्रजागण गीतगाय बाजे बजाय अत्यन्त हर्ष से सब सन्मुख खड़ेहो स्तुतिकर ॥ २८ ॥ सब सम्पति सहाय बर्हिष्मती नाम पुरीमें गये जहांपर भगवान श्री वराह जी के अंगके बाल उनके फड़ फड़ाने से गिरे थे ॥ २९ ॥ वही रोम, कुश तथा काशरूप से उत्पन्न हुये कि जो सदैव हरे रहते हैं, जिन

कुशकाशमयंबर्हिरास्तीर्य भगवान्मनुः । अयजद्यज्ञपुरुषंलब्धा स्थानंयतोभुवम् ॥ ३१ ॥ बर्हिष्मतींनामविभुर्यांनिर्विश्यसमावसत् । तस्यांप्रविष्टोभवनं तापत्रयनिनाशनम् ॥ ३२ ॥ सभार्यःसप्रजःकामान् बुभुजेऽन्याविरोधतः । संगीयमानसत्कीर्तिः सस्त्रीभिःसुरगायकैः प्रत्युपेष्वनुबद्धेन हृदाशृण्वन्हरेःकथाः ॥ ३३ ॥ निष्णातंयोगमायासु मुनिंस्वायंभुवंमनुम् ।यदाभ्रंशयितुंभोगा नशेकुर्भगवत्परम् ३४ अयातयामास्तस्यासन् यामाःस्वान्तरयापनाः । शृण्वतोध्यायतोविष्णोः कुर्वतो ब्रुवतःकथाः ॥ ३५ ॥ सएवंस्वान्तरंनिन्ये युगानामेकसप्ततिम् । वासुदेवप्रसङ्गेन परिभूतगतित्रयः ॥ ३६ ॥ शारीरामानसादिव्या वैयासेयेचमानुषाः । भौतिकाश्च कथंक्लेशा बाधन्तेहरिसंश्रयम् ॥ ३७ ॥ यःपृष्टोमुनिभिःप्राह धर्मान्नानाविधान् शुभान् । नृणांवर्णाश्रमाणांच सर्वभूतहितःसदा ॥३८॥एतत्तआदिराजस्य मनोश्चरितमद्भुतम् । वर्णितंवर्णनीयस्य तदपत्योदयंशृणु ॥ ३९ ॥

इतिश्रीमद्भा०तृती०द्वाविंशतितमोऽध्यायः ॥ २२ ॥

मैत्रेयउवाच ॥ पितृभ्यांप्रस्थितेसाध्वी पतिमिंगितकोविदा। नित्यंपर्यचरत् प्रीत्याभवानीवभवंप्रभुम् ॥ १ ॥ विश्रम्भेणात्मशौचेन गौरवेणदमेनच । शुश्रूषया सौहृदेनवाचामधुरयाचभो ॥ २ ॥ विसृज्यकामंदम्भंचद्वेषंलोभमघंमदम् । अप्रमत्तोद्यतानित्यंतेजीयांसमतोषयत् ॥ ३ ॥ सवैदेवर्षिवर्यस्तां मानवींसमनुव्रताम् ।

से ऋषिलोग यज्ञ विघ्न कर्त्ताओं का नाशकर यज्ञ करने लगे ॥ ३० ॥ भगवान मनु कांस कुशका आसन बिछा यज्ञ पुरुष भगवान का यजन कर घरको आये ॥ ३१ ॥ फिर अपनी बर्हिष्मती पुरीमें आत्रिताप नाशक, अपने गृह में रहकर रानी और अपने सन्तानों के संग सृष्टि के आनंदों का भोग इस भांति करने लगे कि जिससे धर्म, अर्थ और मोक्ष में विरोध न हो ॥ ३२ ॥ प्रातः काल में गन्धर्व अपनी स्त्रियों समेत आकर मनुके यशका बखान करते थे परन्तु वह एकाग्र चित्त से परमेश्वर ही के चरित्रों को सुना करते थे ॥ ३३ ॥ उस स्वायंभुव मनुके बशीभूत सम्पूर्ण सिद्धियां थीं परन्तु परमेश्वर के चरित्रों के प्रभाव से कोई बिषय सुख मनुको अपने आधीन करने में समर्थ न हुये ॥ ३४ ॥ वे सदैव परमेश्वर के चारित्र सुनते उनका ध्यान करते और उनके चरित्रों का स्वयं बखान करते इस भांति उनका एक क्षण भी व्यर्थ नहीं व्यतति होता था ॥ ३५ ॥ इस प्रकार भगवान के चारित्रों का वर्णन उन्हीं ने जाग्रत आदि तीनो अवस्थाओं में करते हुये ७१ युगों तक काल व्यतीत किया ॥ ३६ ॥ हे विदुर ! परमेश्वर के भक्तों को शारीरिक, मानसिक, दैहिक, दैविक, भौतिक, आदि दुःख कभी बाधा नहीं देते ॥ ३७ ॥ स्वायंभूव मनुने मुनियों के पूछने पर नाना भांति के मनुष्यों के साधारण तथा वर्णाश्रम सम्बंधीधर्म सम्पूर्ण प्राणियों के हितार्थ कहे ॥ ३८ ॥ वर्णन के योग्य मनुजी के इस अद्भुत चरित्र का वर्णन मैंने तुमसे किया अब इन की संतान का वर्णन करता हूं ॥ ३९ ॥

इतिश्रीमद्भागवतेमहापुराणे०तृतीयस्कंधेसरलाभाषाटीकायांद्वाविंशोऽध्यायः ॥ २२ ॥

मैत्रेयजी ने कहा—कि मा, बाप, के जाने के पश्चात्, स्वामी की मनोकामना जानने वाली पतिव्रता देवहूती प्रति दिन अपने स्वामी की इस प्रकार सेवा करने लगी जैसे पार्वतीजी महादेवजी की सेवा करती हैं ॥ १ ॥ हे विदुर ! विश्वास, शौच और अपनी गौरवतासे सुहृदता व मधुरबाणी से सेवा करैं ॥ २ ॥ कपट, दंभ, द्वेष, लोभ, पाप और मद इन सबको त्याग तेजस्वी मुनि को संतुष्ट करती रहैं, इस प्रकार अपने शरीर की सब सुध बिसार पति की सेवा करते करते सब शरीर शिथिल होगया, किंतु पति की सेवाकरने से मन न थका ॥ ३ ॥ निश्चयकरके

देवाद्गरीयसः पत्युराशासानां महाशिषः ॥ ४ ॥ कालेनभूयसाक्षामां कर्शितांव्रत चर्यया । प्रेमगद्गदयावाचा पीडितःकृपयाऽब्रवीत् ॥ ५ ॥ कर्दमउवाच ॥ तुष्टोऽहमद्यतवमानविमानदायाः शुश्रूषयापरमयापरयाचभक्त्या । योदेहिनामयमतीव सुहृत्स्वदेहो नावेक्षितःसमुचितःक्षपितुंमदर्थे ॥ ६ ॥ येमेस्वधर्मनिरतस्य तपःसमाधिविद्यात्मयोगविजिताभगवत्प्रसादाः । तानेवतेमदनुसेवनयावरुद्धान् दृष्टिंप्रपश्य वितराम्यभयानशोकान् ॥ ७ ॥ अन्येपुनर्भगवतोभ्रुवउद्विजृम्भविभ्रंशितार्थरचनाःकिमुरुक्रमस्य । सिद्धाऽसिभुंक्ष्व विभवान्निजधर्मदोहान् दिव्यान्नरैर्दुरधिगान्नृपविक्रियाभिः ॥ ८ ॥ एवंब्रुवाणमबलाऽखिलयोगमाया विद्याविचक्षणमवेक्ष्य गताधिरासीत् ।संप्रश्रयप्रणयविह्वलया गिरेषद्व्रीडावलोकविलसद्धसिताननाह ॥ ९ ॥ देवहूतिरुवाच ॥ राद्धंबतद्विजवृषैतदमोघयोगमायाऽधिपे त्वयिविभोतद वैमिभर्तः । यस्तेऽभ्यधायिसमयः सकृदङ्गसङ्गो भूयाद्गरीयसिगुणःप्रसवःसतीनाम् ॥ १० ॥ तत्रेतिकृत्यमुपशिक्षयथोपदेशं येनैषमेकर्शितोऽतिरिरंसयात्मा । सिध्येततेकृतमनोभवधर्षिताया दीनस्तदीशभवनं सदृशंविचक्ष्व ॥ ११ ॥ मैत्रेयउवाच प्रियायाःप्रियमन्विच्छन्कर्दमोयोगमास्थितः । विमानंकामगंक्षत्तस्तर्ह्येवाविरचीकरत् ॥ १२ सर्वकामदुघंदिव्यं सर्वरत्नसमन्वितम । सर्वर्द्ध्युपचयोदर्कं मणिस्तम्भैरुपस्कृतम् ॥ १३ ॥ दिव्योपकरणोपेतं सर्वकालसुखावहम । पट्टिकाभिःपताकाभिर्विचित्राभिरलंकृतम् ॥१४॥ स्रग्भिर्विचित्रमाल्याभिर्मञ्जुसिंजत्षडंघ्रिभिः दुकूलक्षौमकौशेयैर्नानावस्त्रैर्विराजितम् ॥ १५ ॥ उपर्युपरिविन्यस्तनिलयेषुपृथक्पृथक् । क्षि

सो देवर्षियों में श्रेष्ठ कर्दमजी सदा सेवा करनेवाली, सबसे बड़े भाग्यवाली, पति से बड़ेरआशीर्वादों की इच्छा करनेवाली ॥ ४ ॥ बहुत कालतक व्रताचरण करने से जीर्ण, तिसपरभी सेवा में तत्पर देख कर्दमजी प्रेम से गद्गदकण्ठ हो मीठे स्वरों से बोले ॥ ५ ॥ हे मनुपुत्रि ! आज मैं तुझ पर अत्यन्त प्रसन्नहूं तू ने मेरी बड़ी शुश्रुषा की है देहधारियों को अपना देह बहुत प्यारा लगता है परन्तु तूने मेरे पीछे अपने देहका तिरस्कार दियाहै ॥ ६ ॥ जो मेरे निर्भय,शोकरहित दिव्य ऐश्वर्य, धर्म, तप, समाधि और उपासना से वशीभूत हुए हैं उन को तू देख,मैं तुझे दिव्य दृष्टि देताहूं ॥ ७ ॥ परमेश्वर की भौंह चढ़ानेसे जिनकी रचना का नाश होजाता है, ऐसे दूसरे वैभव तो कौन पदार्थ हैं, तू सिद्ध होगई है इस हेतु अपने धर्म से मिलेहुए उन वैभवों का कि जो राजाओं को भी दुर्लभ हैं भोगकर ॥ ८ ॥ मैत्रेयजी बोले कि–इसभांति सम्पूर्ण सिद्धियों तथा योगमाया के बलको अपने पति में देखकर देवहूती लजाती हुई हँसकर गदगदहो मीठी वाणीसे बोली कि– ॥ ९ ॥ हे ब्राह्मणों में श्रेष्ठ ! हे भर्त्ता ! आप अमोघ योगमाया के अधिपतिहो, मैं आप के सम्पूर्ण विभवोंको प्रथमही से जानती हूं । हे स्वामी ! एक बेर अंगका संग होनाचाहिए क्योंकि सती स्त्रियों को श्रेष्ठों से संतान प्राप्त होना बड़ाही लाभदायक है ॥ १० ॥ इस हेतु काम शास्त्र के अनुसार साधन प्रस्तुत करिये कि जिससे मेरा आत्मा जो रमण की कामना से कर्षित होरहा है वह कामदेव से हर्षितहो इस लिये अब भोगभवन की रचना करिये ॥११॥ मैत्रेयजी ने कहा–कि हे विदुरजी! कर्दमजी ने प्यारी के प्रियकी इच्छा से योग धारण कर तत्कालइच्छाचारी बिमान को प्रगट किया ॥ १२ किजो विमान सम्पूर्ण रत्नों से युक्त तथा सामग्रीयों से परिपूर्ण है और मणिजटित खम्भों से शोभायमान है ॥ १३ ॥ दिव्य सामाग्रियोंयुक्त सम्पूर्ण काल में सुख को देनेवाला तथा ध्वजा पताकाओं से शोभायमान ॥ १४ ॥ फूलों की तथा मोतियों की माला कि जिन में भौंरे गूंज रहे हैं रेशम जरी के वस्त्र तथा और भी नानाभांति के वस्त्रों से अलंकृत

तैःकशिपुभिःकान्तं पर्यंकव्यजनासनैः ॥ १६ ॥ तत्रतत्रविनिक्षिप्तनानाशिल्पोपशोभितम्। महामरकतस्थल्या जुष्टंविद्रुमवेदिभिः ॥ १७ ॥ द्वाःसुविद्रुमदेहल्याभातं वज्रकपाटवत्। शिखरेष्विन्द्रनीलेषु हेमकुम्भैरधिश्रितम् ॥१८॥ चक्षुष्मत्पद्मराग प्रेर्यवज्राभित्तिषुनिर्मितैः जुष्टंविचित्रवैतानैर्महार्हैर्हेमतोरणैः ॥१९॥ हंसपारावतव्रातैस्तत्र तत्रनिकूजितम्। कृत्रिमान्मन्यमानैःस्वा नधिरुह्याधिरुह्य च ॥ २० ॥ विहारस्थानविश्रामसंवेशप्रांगणाजिरैः। यथोपजोषंरचितैर्विस्मापनमिवात्मनः ॥ २१ ॥ ईदृग्गृहंतत्पश्यन्तीं नातिप्रीतेनचेतसा । सर्वभूताशयाभिज्ञः प्रावोचत्कर्दमःस्वयम् ॥ २२ ॥ निमज्ज्यास्मिन्हृदेभीरु विमानमिदमारुह। इदंशुक्लकृतंतीर्थमाशिषां यापकंनृणाम् ॥ २३ ॥ सातद्भर्तुःसमादाय वचःकुवलयेक्षणा। सरजंबिभ्रतीवासो वेणीभूतांश्चमूर्द्धजान् ॥ २४ ॥ अंगंचमलपंकेनसंछन्नं शबलस्तनम्। आविवेशसरस्वत्याः सरःशिवजलाशयम् ॥ २५ ॥ साऽन्तःसरसिवेश्मस्थाःशतानिदशकन्यकाः सर्वाकिशोरवयसो ददर्शोत्पलगन्धयः २६॥ तांदृष्ट्वासहसोत्थाय प्रोचुःप्रांजलयःस्त्रियः। वयंकर्मकरीस्तुभ्यं शाधिनःकरवामकिम् ॥ २७ ॥ स्नानेनतांमहार्हेण स्नापयित्वा मनस्विनीम्। दुकूलेनिर्मलेनूत्ने ददुरस्यैचमानदाः॥ २८ ॥ भूषणानिपरार्ध्यानिवरीयांसिद्युमन्तिच। अन्नंसर्वगुणोपेतं पानंचैवामृतासवम् ॥ २९ ॥ अथादर्शेस्वमात्मानं स्रग्वणंविरजाम्बरम्। विरजंकृतस्वस्त्ययनं कन्याभिर्बहुमानितम्। ३०॥स्नातंकृतशिरस्स्नानं सर्वाभरणभूषितम् ।निष्कग्रीवंवलयिनं कूजत्कांचननूपुरम्

तथा अन्य दर्शन दूर होजाताहै जैसे कि नेत्रका द्रष्टा सूर्य है वैसेही आत्माका द्रष्टा ईश्वरहै ॥१०॥ इसीभांति करते२ जो परमात्मा उपाधि रहित है सदा प्रकाश रूपहै जिसमें अहंकार प्राप्तहुआ है, कार्य का प्रकाशक है और सम्पूर्ण में व्याप्त है उसका साक्षात्कारहोताहै॥११॥जैसे सूर्यका प्रतिबिंब जल में पड़ाहो और उस जल में पडे हुए प्रतिबिंब का प्रतिबिंब स्थलपर पडाहो वहां मनुष्य की दृष्टि पहिले स्थल के प्रतिबिंब पर. फिर जल के प्रतिबिंब पर फिर उसके सहारे से आकाश के प्रतिबिंब पर पड़ती है ॥ १२ ॥ वैसेही प्रथम आत्मा से प्रकाशित देह, इन्द्री तथा मनमें दृष्टि पड़ती है फिर उस के आश्रय से अपनें आत्मा पर फिर उसके सहारे से सत्य चैतन्य रूप परमात्मा में पड़ती हैं ॥ १३ ॥ निद्रा वस्था में जब निद्रा के कारण पंचभूत,उनकी सूक्ष्म तन्मात्रा, इन्द्री,मन बुद्धि, जब अज्ञान में लीन होजाती है तब यह स्वरूप साक्षात विनिद्र हो अहंकार रहित होजाता है ॥ १४ ॥ और निद्रावस्था के आनंद तथा अज्ञान का जानता है, तौभी अहंकार के नाश होनेके कारण वह आत्मा उस काल में इस भांति से ऐसा प्रतीत होता है कि मानों आत्मा हैही नहीं और जैसे कोई द्रव्य के नाश होने से आतुर होता है वैसेही वह आतुर होताहै १५ । १६ ॥ देवहूती ने कहा-कि हे ब्रह्मन् ! यह पुरुष (परमात्मा) तथा प्रकृति (माया) यह दोनों एक दूसरे के आश्रय हैं तथा नित्य हैं इसी हेतु यह परस्पर एक दूसरे का त्यागन नहीं करते ॥१७॥ जैसे गंध और पृथ्वी का और रस तथा जल का भाव न्यारा नहीं हैं तैसेही माया तथा परमेश्वर का न्यारा होना असम्भव है ॥ १८ ॥ माया के गुण देहादिक कि जिनके हेतु परमात्मा के अकर्ता होनेंपर भी कर्मबंधन हुआ है उन गुणों के वर्तमान रहनेपर जो मायाके आश्रयहैं मनुष्य कैसे मोक्ष पासकता है ॥ १९ ॥ कभी तत्व विचार करने से यह महाभय निवृत्त होजाता है परन्तु माया के निवृत्तनहोंने से वह फिर स्थित होजाता है ॥ २० ॥ भगवान ने देवहूती से कहा कि निष्काम धर्म करने से मन निर्मल करने से शास्त्र श्रवण से मुझमें तीव्रदृढ भक्ति करने से ॥ २१ ॥ दृढ तत्वज्ञान से बलवान वैराग्य से तपयुक्त योगाभ्यास से तीव्र अपनी समाधि से ॥ २२ ॥ इस पुरुष की माया पराभव को प्राप्त होती है और रातदिन धीरे २ काष्ठ की अग्नि की समान गुप्त

परित्यक्तादृष्टदोषाचानित्यशः । नेश्वरस्याशुभंधत्तेस्वे महिम्निःस्थितस्यच २४ ॥ यथाह्यप्रतिबुद्धस्य प्रस्वापोबह्वनर्थभृत् । सएवप्रतिबुद्धस्य नवैमोहायकल्पते ॥२५ एवंविदिततत्त्वस्य प्रकृतिर्मयिमानसम् । युंजतोनापकुरुतआत्मारामस्यकर्हिचित्॥ ॥ २६ ॥ यदैवमध्यात्मरतः कालेनबहुजन्मना । सर्वत्रजातवैराग्य आब्रह्मभवना न्मुनिः ॥ २७ ॥ मद्भक्तःप्रतिबुद्धार्थोमत्प्रसादेनभूयसा । निःश्रेयसंस्वसंस्थानं कैवल्याख्यंमदाश्रयम् ॥ २८ ॥ प्राप्नोतीहांजसाधीरः स्वदृशाच्छिन्नसंशयः । यद्गत्वा न निवर्त्तेत योगीलिंगाद्विनिर्गमे ॥ २९॥ यदानयोगोपचितासुचेतो मायासु सिद्धस्यविषज्जतेऽङ्ग । अनन्यहेतुष्वथमेगतिःस्यादात्यन्तिकीयत्रनमृत्युहासः३०

इतिश्रीमद्भा० तृतीय०मोक्षरीतिवर्णनंनामसप्तविंशोऽध्यायः ॥ २७ ॥

श्रीभगवानुवाच ॥ योगस्यलक्षणंवक्ष्ये सबीजस्यनृपात्मजे । मनोयेनैवविधिना प्रसन्नंयातिसत्पथम् ॥ १ ॥ स्वधर्माचरणंशक्त्या विधर्माच्चनिवर्तनम् । दैवाल्लब्धेनसंतोष आत्मविच्चरणार्चनम् ॥ २ ॥ ग्राम्यधर्मनिवृत्तिश्च मोक्षधर्मरतिस्तथा । मितमेध्यादनं शश्वद्विविक्तक्षेमसेवनम् ॥ ३ ॥ अहिंसासत्यमस्तेयं यावदर्थपरिग्रहः । ब्रह्मचर्यंतपःशौचं स्वाध्यायःपुरुषार्चनम् ॥ ४ ॥ मौनंसदासनजयः स्थैर्यंप्राणजयःशनैः । प्रत्याहारश्चेन्द्रियाणां विषयान्मनसाहृदि ॥ ५ ॥ स्वधिष्ण्यानामेकदेशे मनसाप्राणधारणम् । वैकुण्ठलीलाऽभिध्यानं समाधानंतथात्मनः ॥ ६ ॥ एतैरन्यैश्चपथिभिर्मनो दुष्टमसत्पथम् । बुद्ध्यायुंजीतशनकैर्जितप्राणोह्यत-

होती जाती है ॥ २३ ॥ जिसने भोग भोगे हैं और फिर जिसने दोष देखकर उनका त्यागकर दिया है ऐसे पुरुषों का माया कुछभी अशुभ नहीं करसकती ॥ २४ ॥ जैसे सोतेहुये मनुष्य के हेतु स्वप्न नाना अनर्थों का मूलहोता है परन्तु जागने पर उसका कुछभी अनर्थ कारी नहीं होसकता ॥ २५ ॥ इसी भांति तत्वके जानने वाले और मेरेविषे मनको धारण करने वाले पुरुष का माया कभी अपकार नहीं करसकती ॥ २६ ॥ इस प्रकार अध्यात्म जिन कीरति है और अनेकों जन्म धारण करने पर उसको वैराग्य प्राप्त हुआ है वे मुनिब्रह्मा के भवन में विचरते हैं ॥ २७ ॥ मेराभक्त मेरीबड़ी भारी कृपासे कल्याण के स्थान आत्म तत्वको जानता है कि जिससे मोक्षप्राप्त होता है ॥ २८ ॥ अनायास ही जिसके संदेह ज्ञान करके दूर होगये हैं वह इस लिंग शरीर से मुक्त होजाता है ॥ २९ ॥ हे माता ! योग सिद्धि में अणिमादिक अष्ठ सिद्धियां विघ्न करने को आती हैं परन्तु जिस भक्त का चित्त उन में आसक्त नहीं होता वही मोक्ष की गतिको प्राप्त होता है ॥ ३० ॥

इतिश्रीमद्भागवतेमहापुराणेतृतीयस्कन्धेसरलाभाषाटीकायांसप्तविंशोऽध्यायः ॥ २७ ॥

श्री भगवान ने कहा कि–हे मानवि, ! अब सबीज योग का लक्षण कहूंगा कि जिस से चित्त प्रसन्न होकर श्रेष्ठ मार्ग में चलता है ॥ १ ॥ प्रथम यम और नियम कहता हूं, शक्त्यानुसार धर्मका व्यौहार करना, जो भगवदेच्छा से मिले उसीपर संतुष्ट रहना, तथा तत्व ज्ञानी मनुष्यों की सेवा करना ॥ २ ॥ ग्राम्य धर्म की निवृत्ति, तथा मोक्ष धर्म में रति और थोड़ा भोजन करना तथा एकांत में रहना ॥ ३ ॥ ॥ प्राणियों की हिंसा न करना, सत्य बोलना, किसी पदार्थ का ग्रहण न करना, जितने पदार्थ की आवश्यकता हो उतनाही लेना, ब्रह्मचर्य व्रत का धारण करना, तप, शौच, वेदपढना, परमात्मा का पूजन करना ॥ ४ ॥ मौन धारण करके आसन को जीतना स्थिरता करके धीरे २ प्राणों को जीतना, इन्द्रियों को एकाग्र करना, तथा मन से विषयों को जीतना ॥५॥ एक स्थान में मन समेत प्राणों का धारण करना, बैकुंठ भगवान में बुद्धिको लगाना और मनको एकाग्रकरना ॥ ६ ॥ यह और इनके अति रिक्त और भी योग के साधन हैं, उन से बुरेमार्गों में

न्द्रितः ॥ ७ ॥ शुचौदेशेप्रतिष्ठाप्य विजितासनआसनम् । तस्मिन्स्वस्तिसमासीन ऋजुकायःसमभ्यसेत् ॥ ८ ॥ प्राणस्यशोधयेन्मार्गं पूरकुम्भकरेचकैः ।प्रातिकूलेनवाचित्तं यथास्थिरमचंचलम् ॥ ९ ॥ मनोऽचिरात्स्याद्विरजं जितश्वासस्य योगिनः। वाय्वग्निभ्यांयथालोहं ध्मातंत्यतिवैमलम् ॥ १० ॥ प्राणायामैर्दहेद्दोषान्धारणाभिश्च किल्बिषान्। प्रत्याहारेणसंसर्गान्ध्यानेनानीश्वरान्गुणान् ॥ ११॥ यदामनः स्वंविरजं योगेनसुसमाहितम् । काष्ठांभगवतोध्यायेत्स्वनासाग्रावलोकनः ॥ १२ ॥ प्रसन्नवदनाम्भोजं पद्मगर्भारुणेक्षणम्। नीलोत्पलदलश्यामं शंखचक्रगदाधरम् ॥ १३ ॥ लसत्पंकजकिंजल्कपीतकौशेयवाससम्। श्रीवत्सवक्षसं भ्राजत्कौस्तुभामुक्तकन्धरम् ॥ १४ ॥ मत्तद्विरेफकलया परीतंवनमालया। परार्घ्यहारवलयाकिरीटाङ्गदनूपुरम् ॥ १५॥ कांचीगुणोल्लसच्छ्रोणिं हृदयाम्भोजविष्टरम्। दर्शनीयतमंशांतं मनोनयनवर्धनम् ॥ १६ ॥ अपीच्यदर्शनं शश्वत्सर्वलोकनमस्कृतम्। संतंवयसिकैशोरे भृत्यानुग्रहकातरम् ॥ १७ ॥ कीर्तन्यतीर्थयशसं पुण्यश्लोकयशस्करम्। ध्यायेद्देवंसमग्राङ्गं यावन्नच्यवतेमनः ॥ १८ ॥ स्थितंव्रजन्तमासीनं शयानंवागुहाशयम्। प्रेक्षणीयेहितं ध्यायेच्छुद्धभावेनचेतसा ॥ १९ ॥ तस्मिल्लब्धपदंचित्तं सर्वावयवसंस्थितम्। विलक्ष्यैकत्रसंयुज्यादङ्गे भगवतोमुनिः ॥ २० ॥ संचिन्तयेद्भगवतश्चरणारविंदं वज्रांकुशध्वजसरोरुहलाञ्छनाढ्यम्। उत्तुङ्गरक्त-

जातेहुये मनको खींच प्राणोंको जीत धीरे २ बुद्धिसे वशीभूत करै और निरालस्य होकर रहै॥७॥ पवित्र देशमें निवास करै, प्रथम आसन को जीतै, फिर कुशापर कृष्णचर्म, उसपर वस्त्र बिछाकर मंगलीक आसन मारकर बैठे शरीर को सीधा रखकर प्राणको वश करने का अभ्यास करै, यह स्वस्तिक आसन है ॥८॥ पूरक, कुम्भक, रेचक से प्राणके मार्गको शोधे, और प्राणायामों के उलटे क्रम से चित्तका शोधन करै, जिससे यह चित्त भिर चंचल नहो ऐसा करै ॥ ९ ॥ जिस भांति रुकाहुआ वायु अग्नि से सुवर्ण के मलको जलादेता है वैसे ही श्वासके जीतने से धीरे २ मनशुद्ध होकर निर्मल होजाता है ॥ १० ॥ प्राणायामों से देह के दोषों को दूरकरे और धारणाओं से मन के पापों को दूरकरे, प्रत्याहार से विषयादिकों को जीते तथा ध्यान से रागादिक को दूरकरे॥११॥ जिस काल योग से निर्मल मन होजाय उस काल भगवान की मूर्तिका ध्यान करे और अपनी नासिका के अग्रभाग को देखता रहै ॥ १२ ॥ जिनका कमल स्वरूपी मुख प्रसन्न है, कमलवत जिनके अरुण नेत्र हैं तथा नीले कमल की समान श्यामसुंदर अंग है, तथा शंख, चक्र, गदाको धारण किये हैं ॥ १३ ॥ सुन्दर पीताम्बार धारण किये हैं, वक्षस्थल में लक्ष्मी का चिह्न है, कौस्तुभमणि तथा मोतियों की माला धारण किये हैं ॥ १४ ॥ ऐसी वनमाला कि जिस में भौंरे गुंजरहे हैं धारण किये हैं बहु मूल्यके हार, किरिट, नूपुर, बाजू पहिने हुये हैं ॥ १५॥ जिनकी कमर में क्षुद्रघंटिका शोभायमान है भक्तों के हृदय कमल में जिनका आसन है, योग्य, अति सुन्दर, शांत तथा चित्त और नेत्रों को आनन्दायी जिनका मनोहर स्वरूप है ॥ १६ ॥ अति सुन्दर जिनका दर्शन है सम्पूर्ण मनुष्य जिनकोनमस्कार करते हैं, जिनकी किशोर अवस्था है अपने अनुचरों पर नित्यप्रति अनुग्रह करने में कुशल हैं ॥ १७ ॥ पुण्य श्लोकों में यशकरनेवाले नारायण के अंगों का ध्यान करै, अपनी नासाके अग्रभाग को देखता रहै, जबतक मन उसवांकी छबि में लय न होजाय ॥ १८ ॥ चित्त के शुद्ध भाव से, चलते फिरते, बैठते, उठते, सोते इन्हीं भगवान का ध्यान करै ॥१९॥ जिस काल में चित्त स्थिर होजाय, तब एकाग्र चित्तहो परमात्मा के सम्पूर्ण अंगों को देखे ॥२०॥ प्रथमतो परमेश्वर के बज्र, अंकुश, ध्वजा संयुक्त चरणारविंदों

विलसन्नखचक्रवालज्योत्स्नाभिराहतमहद्धृदयान्धकारम् ॥ २१ ॥ यच्छौचनिः
सृतसरित्प्रवरोदकेन तीर्थेन मूर्ध्न्यधिकृतेन शिवः शिवोऽभूत् । ध्यातुर्मनःशमलशैल
निसृष्टवज्रं ध्यायेच्चिरं भगवतश्चरणारविंदम् ॥ २२ ॥ जानुद्वयं जलजलोचनया जन-
न्या लक्ष्म्याऽखिलस्य सुरवन्दितया विधातुः । ऊर्वोर्निधाय करपल्लवरोचिषा य-
त्संलालितं हृदि विभोरभवस्य कुर्यात् ॥ २३ ॥ ऊरू सुपर्णभुजयोरधिशोभमानावो-
जोनिधी अतसिकाकुसुमावभासौ । व्यालम्बिपीतवरवाससि वर्तमानकांचीकला
पपरिरम्भि नितम्बबिम्बम् ॥ २४ ॥ नाभिह्रदं भुवनकोशगुहोदरस्थं यत्रात्मयोनिधि
षणाखिललोकपद्मम् । व्यूढं हरिन्मणिवृषस्तनयोरमुष्य ध्यायेद्द्वयं विशदहारमयू-
खगौरम् ॥ २५ ॥ वक्षोऽधिवासमृषभस्य महाविभूतेः पुंसांमनोनयननिर्वृतिमाद-
धानम् । कण्ठं च कौस्तुभमणेरधिभूषणार्थं कुर्यान्मनस्यखिललोकनमस्कृतस्य २६॥
बाहूंश्च मन्दरगिरेः परिवर्तनेन निर्णिक्तबाहुवलयानधिलोकपालान् । संचिन्तयेद्द-
शशतारमसह्यतेजः शङ्खं च तत्करसरोरुहराजहंसम् ॥ २७॥ कौमोदकीं भगवतो
दयितां स्मरेत दिग्धामरातिभटशोणितकर्दमेन । मालां मधुव्रतवरूथगिरोपघुष्टां चै-
त्यस्य तत्त्वममलं मणिमस्य कण्ठे ॥ २८ ॥ भृत्यानुकम्पितधियेह गृहीतमूर्तेः संचि-
न्तयेद्भगवतो वदनारविन्दम् । यद्विस्फुरन्मकरकुण्डलवल्गितेन विद्योतितामलक-
पोलमुदारनासम् ॥ २९ ॥ यच्छ्रीनिकेतमलिभिःपरिसेव्यमानं भूत्यास्वयाकुटिल-

का कि जो ऊंचा अरुण और प्रकाशित नख मंडलवाले, जो साधुओ के हृदय के अन्धकार को नष्टकरदेते हैं ध्यान करे ॥ २१ ॥ जिन भगवान के चरणों के जल से तीर्थरूप गंगाजी हुई कि जिन को भगवान शिव धारण करके कल्याणरूप हुए, और जिनके वज्र के चिह्नवाले चरणों का ध्यान करने से पर्वतरूपी पाप नाश होजाते हैं ॥ २२ ॥ जिस की सम्पूर्ण देवता वंदना करते हैं, जिस के कमल की सदृश नेत्र हैं ऐसी लक्ष्मीजी जिन चरणकमलों को दोनों जंघाओं में धरकर हाथों से बड़ी चतुराई के साथ सेवा करती हैं उन्हीं परमेश्वर के चरणों का ध्यान करना योग्य है ॥ २३ ॥ गरुड़ के कंधे पर धरी हुई भगवान की जांघों का किजो अलसीके फूल की सदृश कांतिवान तथा बल की निधि हैं और पीताम्बर धारण किये, जिनका कटि प्रदेश क्षुद्रघण्टिका से शोभायमान है ऐसे भगवान का ध्यानकरे ॥ २४ ॥ फिर भगवान की नाभिका ध्यानकरे कि जिस में से इस ब्रह्माण्ड की उत्पत्ति हुई, तथा जिस से सम्पूर्ण सृष्टि का करनेवाला कमल और कमल से ब्रह्माजी उत्पन्न हुए हैं फिर उत्तम हरितमणिकेसदृश भगवान के दोनों स्तनों का कि जो सुंदरहारों से शोभायमान होरहे हैं ध्यान करे ॥ २५ ॥ इस से आगे भगवान के वक्षस्थल का ध्यान करे कि जिस में श्रेष्ठ विभूति लक्ष्मी जी का निवास है और भक्तों के मन तथा नेत्रों को आनन्ददायी है । फिर कण्ठ का ध्यान करे किजो कौस्तुभमणिका आभूषणरूप है ऐसा अपने मनमें ध्यानकरै ॥ २६ ॥ फिर भगवानकी भुजाओं का कि जिनके कंकण और बाजू मंदराचलके चलाने से उज्वल हुए हैं और लोकपाल जिन के आश्रय हैं तथा ऐसा असह्य चक्र कि जिस में सहस्रों आरे हैं धारण किये हुए हैं फिर भगवान के हस्त कमलों का कि जिन में राजहंस की समानशंख शोभायमान है ध्यान करे ॥ २७ ॥ फिर भगवान की प्यारी गदाका कि जो वैरि-यों के रुधिर से लिप्त है स्मर्ण करे फिर उन की मालाका कि जिस में भौंरे गूंज रहे हैं स्मर्ण करे फिर परमेश्वर के कण्ठ में बिराजी हुई कौस्तुभ मणि कि जो जीवात्मा का निर्मल तत्वरूपहै ध्यान करे ॥ २८ ॥ फिरभक्तों के हेतु अवतार धारण करने वाले परमेश्वर के कमलस्वरूप मुख का कि जिन के कपोल मकराकृत कुण्डल से शोभित होरहे हैं तथा जिस में शुकवत नाकि

कुन्तलवृन्दजुष्टम्। मीनद्वयाश्रमधिक्षिपदब्जनेत्रं ध्यायेन्मनोमयमतन्द्रितउल्लसद्भ्रु ॥ ३० ॥ तस्यावलोकमधिकंकृपयाऽतिघोरतापत्रयोपशमनाय निसृष्टमक्ष्णोः। स्निग्धस्मितानुगुणितंविपुलप्रसादं ध्यायेच्चिरंविपुलभावनयागुहायाम्॥ ३१ ॥ हासंहरेरवनताखिललोकतीव्रशोकाश्रुसागरविशोषणमत्युदारम् ।संमोहनायरचितंनिजमाययाऽस्यभ्रुमण्डलं मुनिकृतेमकरध्वजस्य ॥ ३२ ॥ ध्यानायनंप्रहसितंबहुलाधरोष्ठभासाऽरुणायिततनुद्विजकुन्दपंक्ति। ध्यायेत्स्वदेहकुहरेऽवसितस्यविष्णोर्भक्त्यार्द्रयार्पितमनानपृथक्दिदृक्षेत् ३३ ॥ एवंहरौभगवतिप्रतिलब्धभावो भक्त्याद्रवद्धृदयउत्पुलकप्रमोदात्। औत्कण्ठ्यबाष्पकलया मुहुरर्द्यमानस्तच्चापिचित्तबडिशंशनकैर्वियुङ्क्ते ॥ ३४॥मुक्ताश्रयंयर्हिनिर्विषयंविरक्तं निर्वाणमृच्छतिमनःसहसायथार्चिःआत्मानमत्रपुरुषोऽव्यवधानमेकमन्वीक्षते प्रतिनिवृत्तगुणप्रवाहः ३५॥ सोप्येतयाचरमयामनसोनिवृत्त्या तस्मिन्महिम्न्यवसितःसुखदुःखबाह्ये। हेतुत्वमप्यसतिकर्तरिदुःखयोर्यत्स्वात्मन्विधत्त उपलब्धपरात्मकाष्ठः॥ ३६ ॥ देहंचतंनचरमः स्थितमुत्थितंवासिद्धोविपश्यति यतोऽध्यगात्स्वरूपम्। दैवादुपेतमथ दैववशादपेतं वासोयथापरिकृतंमदिरामदान्धः ॥ ३७ ॥ देहोऽपिदैववशगःखलुकर्म यावत्स्वारम्भकंप्रतिसमीक्षतएवमासुः। तंसप्रपंचमधिरूढसमाधियोगःस्वाप्नंपुनर्नभजतेप्रतिबुद्धवस्तुः ॥ ३८ ॥ यथापुत्राच्चवित्ताच्च पृथङ्मर्त्यःप्रतीयते। अप्या

का है ॥२९॥ जिस में टेढे घूंघरवाले वाल हैं, कमलकी सदृश नेत्रवाला देदीप्यमान भ्रकुटी युगुल तथा जिस को भौंरों का झुण्ड सेवनकर रहा है ऐसे परमेश्वर के मुखारबिंद का ध्यान करे ३०॥ जिन की स्नेह पूर्वक चितवन तीनों तापों के भीतापों का नाश करनेवाला है तथा अत्यन्त कृपा किये हुए मुसकानयुक्त मुख का ध्यान हृदय में बहुत समय तक करे ॥ ३१ ॥ फिर भगवान के परमउदार हास्य का कि जो भक्तों के शोकरूपी समुद्र का शोषण हारा है ध्यान करे ; तदनंतर भगवान की भ्रकुटिमंडल का कि जो निज रचित माया के मोह उत्पन्नकरनके निमित्त रचागया है, स्मर्ण करे ॥ ३२ ॥ तदुपरांत ध्यान योग्य मुसकानयुक्त मुख के सुंदर अधरों का, कि जिन की अरुणाई का प्रतिबिम्ब पड़ने से दांतों की पंक्तियें भी अरुण ज्ञात होती हैं ध्यान करे [illegible] भांति प्रेमयुक्त विष्णु भक्तिसे उसी में चितको लगावे, [illegible] दूसरे पदार्थ [illegible] देखनेका इच्छा नकरै चित्त को उसी में स्थिर रक्खे ॥ ३३ ॥ इस भांति पर[illegible] ध्यान करते [illegible] भक्ति से द्रवीभूत हृदय में अत्यन्त आनंदित व प्रफुल्लित होजाय, और भगवा[illegible] [illegible]त्कण्ठा से आंसू बहाय, बारम्बार पीड़ित होकर चित्त रूप मछली पकड़ो [illegible] क्रमशः भगवत के अंग से ध्यान न्यून करद ॥ ३४ ॥ मु[illegible] आश्रय जब विषय रहित विरक्त मन अनायास सूर्य की समान मुक्ति को प्राप्त होजाता है, जब मनुष्य आत्मा को आनंद मय एक रूप देखता है तब संसार से छूटजाता है ॥ ३५ ॥ इस भांति जिस काल योगी मनकी निवृत्ति द्वारा सुख दुःख से रहित हो ब्रह्माकार होजाता है उस समय वह दुःख सुख का भोक्तापन अविद्या उत्पन्न हुए अहंकार में रख देता है ॥३६ ॥ उपरोक्त लक्षणों से सिद्धहुआ योगी अपने शरीर को नहीं देखता फिर सुख दुःख को कैसे देखे ? जैसे मत्त मनुष्यको पहिरे हुए वस्त्र का ज्ञान नहीं रहता उसी प्रकार योगी को अपने शरीर का ज्ञान नहीं रहता ॥ ३७ ॥ प्रारब्ध के बशहुआ वह शरीर जब तक उस का प्रेरक होवे तबतक इंद्रिय समेत जीतारहता है, किंतु समाधि योग को प्राप्तहुआ, आत्मस्वरूप का जाननेवाला योगी स्वप्नावस्था के शरीर की सदृश "मैं और मेरा" करके नहीं जानता ॥ ३८ ॥ जिस प्रकार पुत्र धनसे मनुष्य अपने आपको

त्मत्वेनाभिमताद्देहादेःपुरुषस्तथा ॥ ३९ ॥ यथोल्मुकाद्विस्फुलिंगाद्धूमाद्वाऽपिस्व संभवात्। अप्यात्मत्त्वेनाभिमताद्यथाग्निः पृथगुल्मुकात् ॥ ४० ॥ भूतेन्द्रियान्तः करणात्। प्रधानाज्जीवसंज्ञितात्। आत्मातथापृथग्द्रष्टा भगवान्ब्रह्मसंज्ञितः ॥ ॥ ४१ ॥ सर्वभूतेषुचात्मानं सर्वभूतानिचात्मनि। ईक्षेतानन्यभावेनभूतेष्विवतदा त्मताम् ॥ ४२ ॥ स्वयोनिषु यथाज्योति रेकंनानाप्रतीयते। योनीनां गुणवै षम्यात्तथाऽऽत्माप्रकृतौस्थितः ॥ ४३ ॥ तस्मादिमांस्वांप्रकृतिं दैवींसदसदा त्मिकाम्। दुर्विभाव्यांपराभाव्य स्वरूपेणावतिष्ठते ॥ ४४ ॥

इतिश्रीमद्भा०तृतीय०साधनानुष्ठानंनामाष्टाविंशतिमोऽध्यायः ॥ २८ ॥

देवहूतिरुवाच ॥ लक्षणंमहदादीनां प्रकृतेःपुरुषस्यच। स्वरूपंलक्ष्यतेऽमीषां येनतत्पारमार्थिकम् ॥ १ ॥ यथासांख्येषुकथितं यन्मूलंतत्प्रचक्षते। भक्तियोगस्य मेमार्गं ब्रूहिविस्तरशःप्रभो ॥ २ ॥ विरागोयेनपुरुषो भगवन्सर्वतोभवेत्। आच क्ष्वजीवलोकस्य विविधाममसंसृतीः ३ ॥ कालस्येश्वररूपस्य परेषांचपरस्यते। स्वरूपंबतकुर्वंति यद्धेतोःकुशलंजनाः ॥ ४ ॥ लोकस्यमिथ्याभिमतेरचक्षुषश्चिरं प्रसुप्तस्यतमस्यनाश्रये। श्रान्तस्यकर्मस्वनुविद्धयाधिया त्वमाविरासीःकिलयोग भास्करः ॥ ५ मैत्रेयउवाच ॥ इतिमातुर्वचःश्लक्ष्णंप्रतिनन्द्यमहामुनिः। आबभाषे कुरुश्रेष्ठ प्रीतस्तांकरुणार्दितः ॥ ६ ॥ श्रीभगवानुवाच ॥ भक्तियोगोबहुविधोमार्गै

पृथक मानता है ऐसेही निजरूप माने हुए देहादिक से ईश्वरको पृथकमानता है ॥ ३९ ॥ जैसे मूर्ख मनुष्य जलते हुए काठसे कणव धूमहोता है ऐसे पृथक मानता है, किंतु यथार्थ में दाह करनेवाला और प्रकाश करनेवाला अग्नि से पृथक है, इस भांति सत ब्रह्मयही है॥ ४० ॥ जैसे आत्मा पंचभूत, इंद्रियें, अंतःकरण प्रधान जीव संज्ञा से पृथक है इसी भांति द्रष्टाभगवान ब्रह्म पृथक है ॥ ४४ ॥ जैसे समस्तभूत मात्र में आत्मा व्याप्त है और सब प्रणिमात्र आत्मा में व्याप्त हैं; इसी भांति सब वस्तुओं में मैं हूं और मुझ में सब वस्तुयें हैं; ऐसे अनन्य भाव से जो सब प्राणियों में तदात्मा से देखते हैं वह सिद्ध हैं ॥ ४२ ॥ जैसे अग्नि एक होने पर काठ की लम्बाई चौड़ाई से पृथक २ न्यूनाधिक प्रतीत होता है वैसेही आत्मा एक होने पर भी देह के गुणों की न्यूनाधिकता से अनेक प्रकार का दृष्टि आता है ॥ ४३ ॥ इसी कारण योगीजन सत् असत्आत्मिक बिचारमें आवे ऐसी यह अपनी खोटी और तिरस्कारके योग्य प्रकृति भगवत् कृपासे जीतकर अपनें स्वरूप में स्थित होते हैं ॥ ४४ ॥

इतिश्री मद्भागवते महापुराणे तृतीयस्कन्धे सरलाभाषाटीकायां अष्टाविंशतितमोऽध्यायः ॥ २८ ॥

देवहूती बोली कि–हे प्रभो ! महत्तत्वादिकों का लक्षण, प्रकति पुरुष का स्वरूप तथा इन दोनों की परस्परता कहिये ॥ १ ॥ हे भगवन् ! जैसे तुमनें सांख्य योग में कहाहै परन्तु उसके कहनें का अभिप्राय भक्ति योग है अतएव आप विस्तार पूर्वक भक्ति योग का मार्ग मुझसे कहिये ॥ २ ॥ हे जगत् पते ! जिसके सुनने से वैराग्य उत्पन्न हो ऐसी सम्पूर्ण प्राणियों के आवागमन की कथा कहिये ॥ ३ ॥ तथा ईश्वर रूप काल का स्वरूप भी कहो कि जिसके डर से मनुष्य पुण्यादिक कार्य करते हैं ॥ ४ ॥ मिथ्यावादी, अहंकारी, देहादिक पदार्थों में अभिमान करने वाले, मूर्ख, कर्मासक्त, निराधार, अभिमान में बहुत दिनो से सोये हुए, कर्म करते करते थकित होगए, ऐसे अज्ञान लोगों के चैतन्य करने के निमित्त, और उनकी स्वच्छ बुद्धि करने के लिये योग शास्त्र का प्रकाश करने को आप इस सृष्टि में सूर्य रूप उत्पन्न हुए हो ॥ ५ ॥ मैत्रेय जी ने कहा कि हे महामुने ! हे विदुर ! हे कुरुश्रेष्ठ ! इस भांति माता के कहेहुए मधुर बचनों

र्थमिनिभाव्यते। स्वभावगुणमार्गेण पुंसांभावोविभिद्यते ॥ ७ ॥ अभिसंधाययो हिंसांदम्भंमात्सर्यमेववा। संरम्भीभिन्नहग्भावं मयिकुर्यात्सतामसः ॥ ८ ॥ विषयानभिसंधाययशऐश्वर्यमेववा। अर्चादावर्चयेद्योमां पृथग्भावःसराजसः ॥ ९ ॥ कर्मनिर्हारमुद्दिश्यपरस्मिन्वातदर्पणम्। यजेद्यष्टव्यमितिवा पृथग्भावःससात्विकः ॥ १० ॥ मद्गुणश्रुतिमात्रेण मयिसर्वगुहाशये। मनोगतिरविच्छिन्ना यथागङ्गाऽम्भसोऽम्बुधौ ॥ ११ ॥ लक्षणंभक्तियोगस्य निर्गुणस्यह्युदाहृतम्। अहैतुक्यव्यवहिताया भक्तिःपुरुषोत्तमे ॥ १२ ॥ सालोक्यसार्ष्टिसामीप्यसारूप्यैकत्वमप्युत। दीयमानंनगृह्णन्ति विनामत्सेवनंजनाः ॥ १३ ॥ सएवभक्तियोगाख्यआत्यन्तिकउदाहृतः। येनातिव्रज्यत्रिगुणं मद्भावायोपपद्यते ॥ १४ ॥ निषेवितेनानिमित्तेन स्वधर्मेणमहीयसा। क्रियायोगेनशस्तेन नातिहिंस्रेणनित्यशः ॥ १५ ॥ मद्धिष्ण्यदर्शनस्पर्शपूजास्तुत्यभिवन्दनैः। भूतेषुमद्भावनयासत्त्वेनासंगमेनच ॥ १६ ॥ महतांबहुमानेनदीनानामनुकम्पया। मैत्र्याचैवात्मतुल्येषु यमेननियमेनच ॥ १७ ॥ आध्यात्मिकानुश्रवणान्नामसंकीर्तनाच्चमे। आर्जवेनार्यसङ्गेन निरहंक्रिययातथा ॥ १८ ॥ मद्धर्मणो

की प्रशंसा कर, अत्यन्त प्रसन्न हो प्रीति युक्त करुणा से पीडित कपिलदेवजी मधुर वाणी से कहने लगे ॥ ६ ॥ श्रीभगवान बोले कि हे जननि ! भक्ति योग नाना भांति का है और अनेक मार्गों से प्रकाश होता है, पुरुषों की प्रकृति सत, रज, तमोगुण के होनेसे उनकी भक्ति भाव मे भेद पड़ जाता है ॥ ७ ॥ संकल्प से, हिंसा से, पाखण्ड से, मत्सरता से, क्रोध से, भिन्न दृष्टि का भाव मुझमें करते है वह तामसी भक्ति है ॥ ८ ॥ विषयों की इच्छा कर कीर्ति यश के निमित्त जो मूर्ति आदि में मेरी पूजा करते हैं वह राजसी भक्ति है ॥ ९ ॥ पाप नाश करने के अभिप्राय से अथवा सिद्ध साधन के अभिप्राय से मूर्ति आदिक में जो कर्म करे अथवा जो पूजन करे उस में यह मानो कि भगवान की आज्ञा है इस कारण आराधनाही के योग्य है, ऐसे भावसे जो भक्ति करते है वह सात्विकी भक्ति है इसका अभिप्राय यह है कि श्रवण, कीर्तन आदिक करना, जो नवधा भक्ति है, वही फल देने के निमित्त तीन भांति की तामस, तीन भांति की राजस, ३ भांति की सात्विक होने से सत्ताईस (२७) भांति की हुई और सुननें से एक २ में नौ २ भेद होजाते है, तब इक्यासी (८१) प्रकार की होजाती है यह सगुण भक्ति के भेद हैं ॥ १० ॥ मेरे गुणों को सुनकर गंगा अन्तर्यामी मुझमे से कभी न निकले, इस भांति मनकी गति लगावे जैसे गंगाजल धारा मे बहकर समुद्र मे लीन होजाता है, फिर नहीं लौटता है ऐसेही ईश्वर में लीन हो जाय भेद न रक्खे ॥ ११ ॥ निर्गुण भक्ति योग का यह लक्षण है, भगवान की निष्काम भेद भाव रहित भक्ति करे, परब्रह्म के सिवाय अन्य किसी की आशा न करै ॥ १२ ॥ मेरे संग एक लोक मे निवास, समान कीर्ति, सदैव समीप रहै, मेरी सदृश रूप होजावे एक रूप होजाय, इन पांचों मुक्तियों को मै देता हूं परन्तु मेरे सेवक मेरी सेवा के अतिरिक्त और कुछ नहीं लेते ॥ १३ ॥ यह आत्यंतिक निर्गुणभक्ति योग भक्ति है, जिससे तीनों गुणो को उलंघ कर मेरे भावको प्राप्त होता है इससे अधिक और दूसरी भक्ति नहीं ॥ १४ ॥ श्रेष्ठ नित्य नैमित्तिक स्वधर्म का अनुष्ठान करके निष्काम हो हिंसा रहित पूजाकरने से हृदय पवित्र होजाता है॥ १५ ॥ मेरीमूर्ति के दर्शन, स्पर्शन, पूजा, स्तुति, दण्डवत इत्यादिक से सब भूतमात्र में मेरी भावना से धैर्य, वैराग्य से अंतःकरण शुद्धहोता है ॥ १६ ॥ साधुओं का सत्कार करने से, दीनजनो पर दया करने से, अपने समवय वालों से प्रीति करने से, यम, नियम से देह पवित्र होजाती है ॥ १७ ॥ ब्रह्म विद्याके सुनने से, मेरे नामों के कहने सुनने से, महात्माओं की संगति करने से, अभिमान छोड़ देने से चित्त

गुणैरेतैः परिसंशुद्धआशयः । पुरुषस्यांजसाऽभ्येति श्रुतमात्रगुणंहिमाम् ॥ १९ ॥ यथावातरथोघ्राणमावृंतेगन्धआशयात् । एवंयोगरतंचेत आत्मानमविकारियत् । ॥ २० ॥ अहंसर्वेषुभूतेषु भूतात्माऽवस्थितःसदा । तमवज्ञायमांमर्त्यःकुरुतेऽर्चाविडम्बनम् ॥ २१ ॥ योमांसर्वेषुभूतेषु सन्तमात्मानमीश्वरम् । हित्वाऽर्चांभजतेमौढ्याद्भस्मन्येवजुहोतिसः ॥ २२ ॥ द्विषतःपरकायेमां मानिनोभिन्नदर्शिनः । भूतेषु बद्धवैरस्य नमनःशांतिमृच्छति ॥२३॥ अहमुच्चावचैर्द्रव्यैःक्रिययोत्पन्नयाऽनघे । नैवतुष्येऽर्चितोऽर्चायांभूतग्रामावमानिनः ॥ २४ ॥ अर्चादावर्चयेत्तावदीश्वरं मां स्वकर्मकृत् । यावन्नवेदस्वहृदि सर्वभूतेष्ववस्थितम् ॥२५॥ आत्मनश्चपरस्यापियः करोत्यन्तरोदरम् । तस्यभिन्नदृशो मृत्युर्विदधेभयमुल्बणम् ॥ २६ ॥ अथमां सर्वभूतेषु भूतात्मानंकृतालयम् । अर्हयेद्दानमानाभ्यां मैत्र्याऽभिन्नेनचक्षुषा । ॥ २७ ॥ जीवाःश्रेष्ठाह्यजीवानां ततःप्राणभृतःशुभे । ततःसचित्ताप्रवरास्ततश्चेन्द्रियवृत्तयः ॥२८॥ तत्रापिस्पर्शवेदिभ्यः प्रवरारसवेदिनः । तेभ्योगन्धविदःश्रेष्ठास्ततःशब्दविदोवराः ॥ २९॥ रूपभेदविदस्तत्र ततश्चोभयतोदतः । तेषांबहुपदाःश्रेष्ठाश्चतुष्पादस्ततोद्विपात् ॥ ३० ॥ ततोवर्णाश्च चत्वारस्तेषांब्राह्मणउत्तमः । ब्राह्मणेष्वपिवेदज्ञो ह्यर्थज्ञोऽभ्यधिकस्ततः ॥ ३१ ॥ अर्थज्ञात्संशयच्छेत्ता ततःश्रेयान्स्वकर्मकृत् । मुक्तसंगस्ततोभूयानदोग्धाधर्ममात्मनः ॥३२॥ तस्मान्मय्यर्पिताशेषक्रियार्थात्मानिरन्तरः मय्यर्पितात्मनःपुंसोमयिसंन्यस्तकर्मणः नपश्यामिपरंभूतमकर्तुःस

पवित्र होता है ॥ १८ ॥ जो मनुष्य इन धारणाओंसे मेरा पूजनकरता है उसका अंतःकरण पवित्र होजाता है मेरे गुणों के श्रवण मात्र से पुरुष को मेरा स्वरूप बिना श्रमही प्राप्त होता है ॥१९॥ जिस भांति सब स्थानों मे वायुद्वारा गन्धआती है उसी भांति भक्ति होग में लगाहुआ विकार रहित मन आत्मा में स्वयही आमिलताहै ॥२०॥ सब प्राणियों मे जीवात्मारूपसे मै व्याप्त रहता हूं जो मेरा निरादर करके केवल मूर्तिका पूजन करते है वह सब विडम्बना है ॥ २१ ॥ मै सबकी देह में रहने वाला हूं जो मनुष्य मुझे त्यागकर प्रतिमा का पूजन करते है, वह अपनी अज्ञानता से राख में हवन करते है ॥ २२ ॥ मैं सब भूतोंकी देह में विराजमान हूं, जो मुझसे शत्रुता रखते है, अहंकार रखते है, भेदभाव रखते हैं उन प्राणियोंका मनकभी नहीं शांतहोता ॥ २३ ॥ हे जननि ! ऊंचे नीचे पदार्थों से, कर्म से, पूजा से, मै संतुष्ट नहीं होताहूं तथा जो प्राणियों का तिरस्कार करताहै उसपर मैं प्रसन्न नहीं होता ॥ २४ ॥ सब प्राणियों मे परमात्मा मैं हूं, जबतक मेरा अनुभव अंतःकरण मे प्रकाशित न होवे तबतक मनुष्यों को प्रतिमा इत्यादि का पूजन करना चाहिये ॥२५॥ जोप्राणी अपने मे और मुझमें भेद समझते हैं उनकोमें सदैव दुःख देतारहता हूं ॥२६॥ अतएव मुझको सब प्राणियों का अतर्यामी और सबभूतो में विराजमान जानकर मुझसे दान, मान मैत्री रख भेद दृष्टिसे न देखना चाहिये॥२७॥हे माता ! अचेतन जीवोंमे सचेतन जीवश्रेष्ठहै, उनसे जीव वृत्तिवाले तथा उन से चित्त वृत्तिवाले और उनसे इन्द्रिय वृत्तिवाले उत्तम हैं ॥२८॥ उनस स्पर्श ज्ञानी तथा उन से रसज्ञानी मत्स्यादि उत्तम है, उनस गंधज्ञानी भ्रमरादिक, उन से शब्द ज्ञानी सर्पादिक उत्तम हैं ॥ २९ ॥ उन से रूपवेत्ता काक आदिक फिर उनसे दोनो ओर दांतवाले तथा उन से बहुत पांव वाले फिर उन से चौपाये और उन से दोपैर वाले श्रेष्ठ हैं ॥ ३० ॥ द्विपदों में चारोवर्ण उत्तम हैं, उनमें ब्राह्मण वर्ण, ब्राह्मणो मे वेदपाठी, वेदपाठियों में अर्थ वेत्ता श्रेष्ठ हैं ॥ ३१ ॥ अर्थ वेत्ताओं में संशय हारी मीमांसक, मीमांसकों से स्वकर्म करता श्रेष्ठ हैं उन से मुक्त सगी तदनतर उन से ईश्वर के धर्म कर्ता उत्तम हैं ॥ ३२ ॥जिसने अपने धर्म कर्मका फल

मद्दर्शनात् ॥ ३३ ॥ मनसैतानिभूतानि प्रणमेद्बहुमानयन् । ईश्वरोजीवकलयाप्रविष्टोभगवानिति ॥३४॥ भक्तियोगश्चयोगश्च । मयामानव्युदीरितः ययोरेकतरेणैव पुरुषःपुरुषंव्रजेत् ॥३५॥ एतद्भगवतोरूपं ब्रह्मणःपरमात्मनः । परंप्रधानंपुरुषंदैवंकर्मविचेष्टितम् ॥ ३६ ॥ रूपभेदास्पदंदिव्यं कालइत्यभिधीयते । भूतानांमहदादीनांयतोभिन्नदृशांभयम् ॥ ३७ ॥ योऽन्तःप्रविश्यभूतानि भूतैरत्त्यखिलाश्रयःसविष्ण्वाख्योऽधियज्ञोऽसौ कालःकलयतांप्रभुः ॥ ३८ ॥ नचाऽस्यकश्चिद्दयितो न द्वेष्यो नचबान्धवः । आविशत्यप्रमत्तोऽसौप्रमत्तंजनमन्तकृत् ॥४० ॥ यद्भयाद्वातिवातोऽयंसूर्यस्तपतियद्भयात् यद्भयाद्वर्षतेदेवो भगणोभातियद्भयात् ॥ ४० ॥ यद्वनस्पतयोभीता लताश्चौषधिभिःसह स्वेस्वेकालेऽभिगृह्णन्तिपुष्पाणिचफलानि च ॥ ४१ ॥ स्रवन्तिसरितोभीता नोत्सर्पत्युदधिर्यतः । अग्निरिन्धेसगिरिभिर्भूर्न मज्जतियद्भयात् ॥ ४२ ॥ नभोददातिश्वसतां पदंयन्नियमाददः । लोकंस्वदेहं तनुते महान्सप्तभिरावृतम् ॥ ४३ ॥ गुणाभिमानिनोदेवाः सर्गादिष्वस्ययद्भयात् । वर्तन्तेऽनुयुगंयेषां वशएतच्चराचरम् ॥४४॥ सोऽनन्तोन्तकरः कालोऽनादिरादिकृदव्ययः । जनंजनेनजनयन्मारयन्मृत्युनान्तकम् ॥ ४५ ॥

इतिश्रीमद्भा०तृती०बहुविधभक्तियोगवर्णननामएकोनत्रिंशत्तमोऽध्यायः २९॥

और अपना देह मुझमें अर्पण करदिया है उनमें वह उत्तम है, जिसने अपनी आत्मा मुझमें अर्पण करदी और जो मुझमेंही सब कर्मों का संन्यास करता है उस समदर्शी साधुसे और कोई उत्तम नहीं ॥ ३३ ॥ समदर्शी मनुष्य स्वर्गको जाता है वह भगवान सबके घट २ में विराजमान हैं यह विचार कर सब प्राणियों का सत्कार पूर्वक मनही मनमें प्रणाम करता है॥ ३४ ॥ हे शुभे! मैंने तुमसे भक्ति योग और योग दोनोंही कहे, यदिकोई पुरुष इन दोनोंमें से एक काभी साधन करे तो वह भगवान के समीप पहुंच जाता है ॥ ३५ ॥ सबका ईश्वर प्रकृति पुरुष रूप और उन से भिन्न जो परमात्मा स्वरूप है, परम प्रधान पुरुष उसी को देव कहते हैं, जिसमें यह प्राणी नाना प्रकार की योनियों को भोगता है ॥ ३६ ॥ वही रूप भेदके आश्रय होनेसे दिव्य काल कहाता है कि जिससे भेद दृष्टि वाले को महदादि भूतों का भय होताहै ॥ ३७ ॥ सबके आधार स्वरूप और यज्ञों के फल देनेवाले जो कालरूप भगवान प्राणियों के भीतर प्रवेश करके सब प्राणियों का भक्षणकरते हैं वही विष्णु हैं तथा वही यज्ञपति और वही वशी करनेवालों के प्रभु हैं ३८ ॥ इसकाल का न तो कोई प्रिय है न कोई अप्रिय और न कोई मित्र स्वजनहै यह अप्रमत्त होकर प्रमत्त मनुष्यों का अन्त करता है ॥ ३९ ॥ जिसकालके डरसे वायु चलता सूर्य तपता इन्द्र वर्षा करता और तारागण प्रकाश करते हैं ॥ ४० ॥ जिसके डरसे वृक्ष, लता, वनस्पति औषधि समेत समयानुसार फल फूल उत्पन्न करती हैं ॥ ४१ ॥ जिस के भयसे नदियें दिनरात प्रवाहित रहती समुद्र अपनी मर्यादा को नहीं छोड़ते अग्नि प्रज्वलित रहता और भूमि पर्वतों समेत नहीं डूबती ॥ ४२ ॥ जिसके भयसे यह आकाश सब श्वास लेनेवालों को अवकाश देता है महत्तत्त्व सात आवरण युक्त इस जगत में इस शरीर का विस्तार करताहै ॥ ४३ ॥ जिसके भयसे गुणाभिमानी देवता ब्रह्मा, विष्णु, महेश, स्वर्गादिक में तथा युग२में विद्यमान रहते हैं और पुनः पुनः सृष्टिकी उत्पत्ति स्थिति और प्रलयकरते हैं॥४४॥ वह अनन्त, अन्त करनेवाला, काल अनादि, आदि करने वाला है । अव्ययहै जनोंसे जनों को उत्पन्न करता है परन्तु कालको भी मृत्युसे नाश कराता है वह कालरूप परब्रह्म अपनी इच्छानुसार काम करता है ॥ ४५ ॥

इतिश्रीमद्भा०महापु० तृतीयस्कन्धे सरलाभाषाटीकायां एकोनत्रिंशतमोऽध्यायः ॥ २९ ॥

कपिलउवाच ॥ तस्यैतस्यजनोनूनं नायंवेदोरुविक्रमम्। काल्यमानोऽपिबलि.नो वायोरिवघनावलिः ॥ १ यंयमर्थमुपादत्ते दुःखेनसुखहेतवे। तंतंधुनोतिभगवान्पुमानशोचतियत्कृते ॥ २ ॥ यदध्रुवस्यदेहस्य सानुबन्धस्यदुर्मतिः । ध्रुवाणि मन्यते मोहाद्गृहक्षेत्रवसूनिच॥३॥जन्तुर्वैभवएतस्मिन्यांयां योनिमनुव्रजेत्।तस्यां तस्यांसलभते निर्वृतिंनाविरज्यते ॥४॥ नरकस्थोऽपिदेहंवै नपुमांस्त्यक्तुमिच्छति। नारक्यांनिर्वृतौसत्यां देवमायाविमोहितः ॥ ५ ॥ आत्मजायासुतागारपशुद्रविणबन्धुषु। निरूढमूलहृदयआत्मानं बहुमन्यते ॥ ६ ॥ संदह्यमानसर्वांग एषामुद्वहनाधिना। करोत्यविरतंमूढो दुरितानिदुराशयः ॥ ७ ॥ आक्षिप्तात्मेन्द्रियः स्त्रीणामसतीनांचमायया। रहोरचितयाऽऽलापैः शिशूनांकलभाषिणाम् ॥ ८ ॥ गृहेषुकूटधर्मेषु दुःखतन्त्रेष्वतन्द्रितः कुर्वन्दुःखप्रतीकारं सुखवन्मन्यतेगृही ॥ ९ ॥ अर्थैरापादितैर्गुर्व्या हिंसयेतस्ततश्चतान्। पुष्णातियेषां पोषेण शेषभुग्यात्यधःस्वयम् ॥ १० ॥ वार्तायांलुप्यमानायामारब्धायांपुनःपुनः। लोभाभिभूतोनिःसत्त्वः परार्थे कुरुतेस्पृहाम् ॥ ११ ॥ कुटुम्बभरणाकल्पो मन्दभाग्योवृथोद्यमः। श्रियाविहीनः कृपणो ध्यायन्श्वसितिमूढधीः ॥ १२ ॥ एवंस्वभरणाकल्पं तत्कलत्रादयस्तथा। नाद्रियन्तेयथापूर्वं कीनाशाइवगोजरम् ॥ १३ ॥ तत्राप्यजातनिर्वेदो भ्रियमाणाः

कपिलदेवजी ने कहा कि—इस प्रचण्डकाल के विक्रम को यह जीव नहीं जानसकता जैसे वायु से चलती हुई मेघमाला पवन के परमपराक्रम को नहीं जानसकती ॥ १ ॥ अपने दैहिक सुखों के निमित्त यह जीव नाना दुःखों से जिस पदार्थ को इकट्ठा करता है; उस पदार्थ को भगवान काल नष्ट करदेते हैं कि जिस के निमित्त प्राणी रात दिन शोक में निमग्नरहता है ॥ २ ॥ कारण जो पदार्थ नाशवान हैं यह मूढ कुटुम्ब समेत शरीर को, लक्ष्मी को, खेत को मोह से इन नाश होनेवाले पदार्थों को ध्रुव की सदृश अचल मानता है ॥ ३ ॥ यह जीव जगत में जिस २ योनि में जाता है निश्चयही उस२ योनि में आनन्दसे रहताहै किंतु कभी वैराग्य धारण नहीं करता ॥४॥ नारकी जीव भी अपनी देह छोड़ने की इच्छा नहीं करते नरकही को सुख का घर मानते हैं; भगवत्माया से जीव ऐसे मोहित होरहे हैं ॥ ५ ॥ और देह, गेह, पुत्र, कलत्र, पशु, हाथी, घोड़ा बन्धुओं में अपना हृदय अत्यन्त फंसा है सो आपे को अत्यन्त बुद्धिमान और सुखनिधान विचारता है ॥ ६ ॥ अपने परिवारके पालन पोषण में उस का देह गरमी, सरदीसे जलता गलता रहता है परन्तु वह मूढ़ बुरे हृदय से सदैव बुरेही बुरे कार्य करता रहता है ॥ ७ ॥ दुष्ट वेश्यादिक स्त्रियों के साथ मैथुनादिक मायासे देह इंद्रिय सब उन्मत्त रहती हैं और तोतली रस युक्त बालकों की मीठी वाणी के साथ मिथ्या बातें कर २ प्रमत्त सा बना रहता है ॥ ८ ॥ द्रव्य के लालच से धर्म करे उस में भी अधर्म, सदैव कष्ट, ऐसे गृह में आलस्य छोड़ दुःख नाशकरने के निमित्तयत्न करते हैं और गृहस्थही को आनन्द की सदृश मानते हैं ॥ ९ ॥ तथा घोर हिंसायें कर २ के द्रव्य इकट्ठा कर, कुटुम्ब का पालन पोषण करते हैं और स्वयं उस की जूठन खाय २ अपनी आयु पूरी कर अंतकाल नरकमें जाते हैं ॥ १० ॥ जब उन की आय रुकजाती है तब उस के प्राप्त करने के निमित्त सहस्रों यत्न करते हैं इस भांति पुनः पुनः वह महालालची दरिद्री उपाय करताहुआ जब मन में हारमानता है तब दूसरेके द्रव्य लेने की कामना करताहै ॥ ११ ॥ जब वह मंदभाग्य कुटुम्ब के पोषणमें असमर्थ होता है और सम्पूर्ण उद्यम वृथा जाते हैं तथा लक्ष्मी हीन होता है तबवह कृपण बनकर शोचताहुआ श्वासलेता है ॥ १२ ॥ इस भांति जब वह स्त्री पुत्रादिकों के पालन में असमर्थ होता है तब वह स्त्री पुत्रादि उस का पहिले का सा

स्वयंभृतैः । जरयोपात्तवैरूप्यो मरणाभिमुखोगृहे ॥ १४ ॥ आस्तेऽवमत्योपन्यस्तं गृहपालइवाहरन् । आमयाव्यप्रदीप्ताग्निरल्पाहारोऽल्पचेष्टितः ॥ १५॥ वायुनोत्क्रमतोत्तारःकफसंरुद्धनाडिकः । कासश्वासकृतायासः कण्ठेघुरघुरायते ॥ १६ ॥ शयानःपरिशोचद्भिः परिवीतःस्वबन्धुभिः । वाच्यमानोऽपिनब्रूतेकालपाशवशंगतः ॥ १७ ॥ एवंकुटुम्बभरणे व्यापृतात्माऽजितेंद्रियः । म्रियतेरुदतां स्वानामुरुवेदनयाऽस्तधीः ॥ १८ ॥ यमदूतौतदाप्राप्तौ भीमौसरभसेक्षणौ । सदृष्ट्वात्रस्तहृदयः शकृन्मूत्रंविमुंचति ॥ १९ ॥ यातनादेहआवृत्य पाशैर्बध्वागलेबलात् । नयतोदीर्घमध्वानंदण्ड्यं राजभटायथा ॥ २० ॥ तयोर्निर्भिन्नहृदयस्तर्जनैर्जातवेपथुः । पथिश्वभिर्भक्ष्यमाणआर्तोऽघं स्वमनुस्मरन् ॥ २१ ॥ क्षुत्तृट्परीतोऽर्कदवानलानिलैः संतप्यमानःपथितप्तवालुके । कृच्छ्रेणपृष्ठेकशयाचताडितश्चलत्यशक्तोऽपिनिराश्रमोदके ॥२२॥ तत्रतत्रपतञ्छ्रान्तो मूर्छितःपुनरुत्थितः । पथापापीयसा नीतस्तमसायमसादनम् ॥२३॥ योजनानांसहस्राणि नवतिंनवचाध्वनः । त्रिभिर्मुहूर्तैर्द्वाभ्यां वानीतःप्राप्नोतियातनाः ॥ २४ ॥ आदीपनंस्वगात्राणां वेष्टयित्वोल्मुकादिभिः ।

आदर ऐसे नहीं करते कि जैसे बूढ़े बैलका आदर किसान नहीं करता ॥ १३ ॥ जिनका प्रथम आपने पालन पोषण किया है वह लोग अबअपने को पालते हैं तथा बुढ़ापे से रूप कुरूप होगया तौ भी उस को वैराग्य नहीं उत्पन्न होता, और मरने के सन्मुख हो घर में पड़ारहता है ॥१४॥ कुटुम्बी जो कुछ अवज्ञा करके देते हैं उसी को कुत्ते की भांति खाकर घर में बैठारहता है, तथा रोग के कारण और मन्दाग्नि से अल्प आहार होजाता है और उसी से चेष्टा बिगड़कर उठने बैठने की शक्ति नहीं रहती ॥ १५ ॥ मृत्यु आकर उस को घेर लेता है, वायु से नेत्र फिरजाते हैं कफ से नाड़ियें रुकजाती हैं श्वास तथा खांसी बढ़जाती है और कण्ठ में घुरघुराहट का शब्द हुआ करता है ॥ १६ ॥ उस काल उस के भाई बन्धु शोच से व्याप्त काल की फांसी के वशीभूत मनुष्य से अनेक बातों को पूछते हैं परन्तु वह नहीं बोलसक्ता ॥ १७ ॥ जो मनुष्य आत्मा को न जीतकर ऐसेही अपने कुटुम्ब के भरण पोषण में लगारहता है, वह अपने कुटुम्ब को रोते देख अति वेदनासे अचेत होकर मरजाताहै ॥ १८ ॥ उस काल उस के लेने के लिये बड़े भयानक, क्रोधयुक्त भयानक नेत्रों वाले दो यमराज के दूत आते हैं उन्हें देखतेही वह त्रसित होजाता है तथा उस का बारम्बार मल मूत्र निकलने लगता है ॥ १९ ॥ वह दूत इस प्रकार यातना को प्राप्त करके उस मनुष्य के गले में फांसीडाल प्राण निकाल दीर्घ मार्ग से ऐसे लेजाते हैं कि जैसे दण्ड के हेतु अपराधी को राजदूत लेजाते हैं ॥ २० ॥ उन यमराज के दूतोंकेमारने से उस का हृदय फटजाता है, तथा वह कांपता है, मार्ग में उस को कुत्ते काटते हैं तब वह आर्त्त होकर अपने पापों का स्मरण करता है ॥ २१ ॥ मार्ग में क्षुधा तृषा सताती है भोजन नहींमिलता, ऊपर से सूर्य की गरमी पड़ती है नीचे तपी हुई बालूपर तपना पड़ता है, जब कहीं थककर बैठजाता है तब यमराज के दूत निर्दयीपनसे कोड़े मारते हैं, मार्ग में न कहीं ठहरनेका ठिकाना है, न कहीं कुछ प्राप्त होता है उस समय दुःख से हाय २ करता है ॥ २२ ॥ चलते२ थककर मूर्छितहो गिरपड़ता है किंतु फिर उठकर चलने लगता है इस भांति वह यमराजके दूत उसप्राणी पापी को ऐसे कठिनमार्ग से यमलोक में लेजाते हैं ॥ २३ ॥ ऐसे ९९००० योजन मार्ग उस महापापी को ३ मुहूर्त में लेजाते हैं तथा पापी प्राणी को दो मुहूर्त में लेजाते हैं वह वहां पर अनेक यातनाओं को प्राप्त होता है ॥ २४ ॥ कहीं तो उस पापी के शरीर को जलाते हैं

आत्ममांसादनंक्वापि स्वकृत्तंपरतोऽपिवा ॥२५॥ जीवतश्चान्त्राभ्युद्धारः श्वगृध्रैर्यमसादने । सर्पवृश्चिकदंशाद्यैर्दशद्भिश्चात्मवैशसम् ॥ २६ ॥ कृन्तनंचावयवशो गजादिभ्योभिदापनम् । पातनंगिरिशृङ्गेभ्यो रोधनंचाम्बुगर्तयोः ॥ २७ ॥ यास्तामिस्रान्धतामिस्रा रौरवाद्याश्चयातनाः । भुंक्तनरोवानारीवामिथःसङ्गेननिर्मिताः २८ ॥ अत्रैवनरकःस्वर्ग इतिमातःप्रचक्षते । यायातनावै नारक्यस्ताइहाप्युपलक्षिताः ॥ ॥ २९ ॥ एवंकुटुम्बंबिभ्राण उदरंभरएववा । विसृज्येहोभयंप्रेत्य भुंक्तेतत्फलमीदृशम ॥ ३० ॥ एकःप्रपद्यतेध्वान्तं हित्वेदंस्वकलेवरम् । कुशलेतरपाथेयो भूतद्रोहेण यद्भृतम् ॥ ३१ ॥ दैवेनासादितंतस्य शमलंनिरयेपुमान् । भुंक्तेकुटुम्बपोषस्य हृतवित्तइवातुरः ॥ ३२ ॥ केवलेनह्यधर्मेण कुटुम्बभरणोत्सुकः । यातिजीवोन्धतामिस्रं चरमंतमसःपदम् ३३ ॥ अधस्तान्नरलोकस्य यावतीर्यातनादयः । क्रमशः समनुक्रम्य पुनरत्राव्रजेच्छुचिः ॥ ३४ ॥

इतिश्रीमद्भा०तृती०नरकादिवर्णननामत्रिंशत्तमोऽध्यायः ॥ ३० ॥

श्रीभगवानुवाच ॥ कर्मणादैवनेत्रेण जन्तुर्देहोपपत्तये । स्त्रियाःप्रविष्टउदरं पुंसोरेतःकणाश्रयः ॥ १ ॥ कललंत्वेकरात्रेण पंचरात्रेणबुद्बुदम् । दशाहेनतुकर्कन्धुः पेश्यण्डंवाततःपरम् ॥ २ ॥ मासेनतुशिरोद्वाभ्यां बाह्वङ्घ्र्याद्यङ्गविग्रहः । नखलोमास्थिचर्माणि लिंगच्छिद्रोद्भवस्त्रिभिः ॥ ३ ॥ चतुर्भिर्धातवःसप्तःपंचभिःक्षुत्तृडुद्भवः

कहीं उसी का मांस उसीको भक्षण कराते हैं कहीं वह अपनेही मांससे आप पेटभरताहै ॥२५॥ यमपुरी में कभी कुत्ते और गीध उस प्राणी के आंत निकाल २ लेजाते हैं, कहीं सर्प, बिच्छू, मच्छर, डांस यह चारोंओरसे काटते हैं तब वह प्राणी अपने अपराधोंका स्मरण करताहै ॥२६॥ कहीं २ उस के अंगों को काट काट कर खण्ड २ करते हैं कहीं हाथियों के आगे डालकर उन से खुँदवाते हैं, कहीं पर्वत के शिखरों से नीचे डालते तथा कहीं जल में डुबोते कहीं गढ़े में बंद करदेते हैं ॥ २७ ॥ परस्पर दुष्ट कर्म करने से स्त्री पुरुष को तामिस्र, अंधतामिस्र, और रौरव आदि नरकों की पीड़ा भोगनी पड़ती है ॥ २८ ॥ हे माता ! यह बात कुछ आश्चर्य की नहीं है क्योंकि यहांही नर्क और यहांही स्वर्ग है जो नरक के कष्ट हैं वह यहांभी देखने में आते हैं ॥ २९ ॥ जो प्राणी केवल इस भांति अपने कुटुम्ब अथवा पेट का भरणपोषण करता है उस के वह कर्म साथ जाते हैं और यमपुर में पहुंचकर अपने कर्मों का फल अकेलेही भुगतनापड़ता है ॥ ३० ॥ यह अपना देह भी यहांही रहजाता है और परलोक के मार्ग में अकेले जीव ही को जानापड़ता है, साथ कोई नहीं रहता केवलपाप और पुण्य जो जीवों के द्रोह तथा कृपाकरके हुए हैं अवश्यही साथरहते हैं ॥ ३१ ॥ परमेश्वर के उत्पन्न कियेहुए उस कुटुम्बपोषण के पाप को वह नर्क में भोगता है और द्रव्यनाशहुए मनुष्य की भांति आतुर होता है ॥ ३२ ॥ जो प्राणी अधर्म से कुटुम्बपोषण करता है वह अंधतामिस्र नरक में गिरता है ॥ ३३ ॥ नर लोक के नीचे जितने नर्क हैं उन सब को वह क्रमानुसार भोगकरपवित्रहो फिर मनुष्य लोक में आता है ॥३४॥

इतिश्री मद्भागवते महापुराणे तृतीयस्कन्धे सरलभाषाटीकायां त्रिंशोऽध्यायः ॥ ३० ॥

श्रीभगवान ने कहा कि—यह जीव पिछले जन्मकर्मों के प्रभावसे देह धारण करने के लिये मनुष्य के वीर्य द्वारा स्त्री के उदर में प्रवेश करता है, ॥ १ ॥ एकरात में तो वीर्य तथा रज मिलता है पांच रातमें बुदबुदा सा होता है, दशदिनमें बेरके फलकी समान फिर मांस पिंडाकार होजाता है ॥ २ ॥ एक महीने में शिर दो महीनेमें भुजा पांव तथा अंगों के चिह्न तीसरे महीने में रोम, नख, हाड, चर्म, लिंग, सब इन्द्रियों के छिद्र यह उत्पन्न होते हैं ॥ ३ ॥ चौथे महीनें में

बहुभिर्जरायुणावीतः कुक्षौ भ्राम्यति दक्षिणे ॥४॥ मातुर्जग्धान्नपानाद्यैरेधद्धातुरसम्मते। शेते विण्मूत्रयोर्गर्ते स जन्तुर्जन्तुसंभवे ॥५॥ कृमिभिः क्षतसर्वांगः सौकुमार्यात् प्रतिक्षणम्। मूर्छामाप्नोत्युरुक्लेशस्तत्रत्यैः क्षुधितैर्मुहुः ॥ ६ ॥ कटुतीक्ष्णोष्णलवणरूक्षाम्लादिभिरुल्बणैः। मातृभुक्तैरुपस्पृष्टः सर्वांगोत्थितवेदनः ॥ ७ ॥ उल्बेन संवृतस्तस्मिन्नन्त्रैश्च बहिरावृतः। आस्ते कृत्वा शिरः कुक्षौ भुग्नपृष्ठशिरोधरः ॥ ८ ॥ अशक्तः स्वांगचेष्टायां शकुन्त इव पंजरे। तत्र लब्धस्मृतिर्दैवात्कर्म जन्मशतोद्भवम् ९ ॥ स्मरन्दीर्घमनुच्छ्वासं शर्म किं नाम विन्दते । आरभ्य सप्तमान्मासाल्लब्धबोधोऽपि वेपितः । नैकत्रास्ते सूतिवातैर्विष्ठाभूरिव सोदरः ॥ १० ॥ नाथमान ऋषिर्भीतः सप्तवध्रिः कृतांजलिः स्तुवीत तं विक्लवया वाचा येनोदरेऽर्पितः ॥ ११ ॥ जन्तुरुवाच ॥ तस्योपसन्नमवितुं जगदिच्छयात्तनानातनोर्भुवि चलच्चरणारविंदम्। सोऽहं व्रजामि शरणं ह्यकुतोभयं मे येनेदृशी गतिरदर्श्यतोऽनुरूपा ॥ १२ ॥ यस्त्वत्र बद्ध इव कर्मभिरावृतात्मा भूतेन्द्रियाशयमयीमवलम्ब्य मायाम्। आस्ते विशुद्धमविकारमखण्डबोधमातप्यमानहृदयेऽवसितं नमामि ॥ १३ ॥ यः पंचभूतरचिते रहितः शरीरे छन्नोऽयथेन्द्रियगुणार्थचिदात्मकोऽहम्। तेनाऽविकुण्ठमहिमानमृषिं तमेनं वन्दे परं प्रकृतिपूरुषयोः पुमांसम् ॥१४॥ यन्माययोरुगुणकर्मनिबन्धनेऽस्मिन् सांसा

सातों धातु उत्पन्न होती हैं पांचवें महीने में क्षुधा प्यास उत्पन्न होती है छठे महीने में वह जेल में लिपटकर माताकी दाहिनी कोखमें घूमा करता है ॥ ४ ॥ सातवें महीनेमें पहिले जन्मके कर्म स्मरण होते हैं और जो कुछ माता अन्नका आहार पान करतीहै, उसका रसांस गर्भमें पहुँचता रहताहै जिससे धातु बढ़ती हैं फिर वह प्राणी मल मूत्र के गढेमें पड़ारहता है ॥ ५ ॥ गर्भके कीड़े भूखसे उसके कोमल अगों को काटतेहैं और उन कठिन पीड़ासे बारम्बार उसको दुःख प्राप्त होताहै ॥ ६ ॥ माता के खायेहुये कडवे चरपरे नमकीन कसैले पदार्थोंसे जो उसके कीडों के काटेहुये घावमें जाकर लगते हैं उस जीव के शरीर में बडी पीड़ा होताहै ॥ ७ ॥ वहप्राणी गर्भाशय में जरायु से तथा बाहर माताके आंतरोंसे लिपटा हुआ योनिकी ओर शिरकिये धनुषसा हो मल मूत्रमें पड़ा रहता है ॥ ८ ॥ जिसभांति पिंजरेके भीतरका पक्षी कछ अच्छिन प्रयत्न नहीं कर सकता वैसेही यह भी कुछ अपने अंगकी चेष्टा नहीं करसकता, उसकाल [illegible] की स्मृति होतीहै तब उनका स्मरणकर बड़े२ श्वास लेताहुआ पश्चात्ताप करताहै ॥ ९ ॥ सातवें महीने में जब इसे ज्ञान प्राप्त होताहै तब यह बड़ा कंपायमानहोता है प्रसूति के वायुसे वह एकत्र न रहकर भ्रमता रहताहै और विष्ठाके कीड़ोंको अपना समान सम्बन्धी समझताहै ॥ १० ॥ उस समय जीव गर्भके त्रासस दुःखी होकर जिसने उदरमें रक्खाहै उसको स्तुति हाथ जोड़ व्याकुल वाणीसे नीचेको मस्तक कर इसभांति करताहै ॥११॥ जीव कहताहै कि—हे शरणागत वत्सल; आप जगतकी रक्षाके निमित्त नानाप्रकारके रूप धारणकरके पृथ्वीपर पर्यटन करतेहुये एस आप भगवानकी मैं शरणागतहूं कि जिसने मुझ पापीको यह गर्भवासकी गति दिखलाई है ॥१२॥इस भांति माताके देहमें पंचमहाभूत इन्द्री तथा मायामें व्याप्त अपने कर्मोंसे बँधाहुआहूं अब इससंतप्त हृदयमें विशुद्ध निर्मल निर्विकार तथा अखंड बोधवाले परमेश्वरको बारम्बार प्रणाम करताहूं १३ ॥ जो परमात्मा पंचभूतसे रचेहुये शरीरमें ढकाहुआ प्रतीत होता है वैसाही इंद्रिय गुण अर्थ चैतन्य आत्मक मैंहूं।जैसेशरीर रहितहोनेपरभी प्रकृति पुरुषसे परे जो आपहैं सो मैं आपके चरणारविन्दों की बारंबार बन्दनाकरताहूं ॥१४॥ जिसकी मायाके गुणोंसे, यहजीव कर्मों के बंधनोंसे बंधाहुआ,

रिके पथिचरंस्तदभिश्रमेण । नष्टस्मृतिःपुनरयंप्रवृणीतलोकं युक्त्याकयामहदनुग्रहमन्तरेण १६ ॥ ज्ञानंयदेतददधात्कतमःसदेवस्त्रैकालिकं स्थिरचरेष्वनुवर्तितांशः तंजीवकर्मपदवीमनुवर्तमानास्तापत्रयोपशमनायवयंभजेम ॥ १६ ॥ देह्यन्यदेहविवरे जठराग्निनाऽसृग्विण्मूत्रकूपपतितो भृशतप्तदेहः । इच्छन्नितोविवसितुं गणयन्स्वमासान् निर्वास्यतेकृपणधीर्भगवान्कदानु ॥ १७ ॥ येनेदृशींगतिमसौदशमास्यईश संग्राहितःपुरुदयेनभवादृशेन । स्वेनैवतुष्यतुकृतेनसदीननाथः कोनाम तत्प्रति विनाऽञ्जलिमस्यकुर्यात् ॥ १८ ॥ पश्यत्ययंधिषणयाननुसप्तवध्रिःशारीरकेदमशरीर्यपरःस्वदेहे । यत्सृष्टयाऽऽसंतमहं पुरुषंपुराणं पश्येबहिर्हृदिच चैत्यमिवप्रतीतम् ॥ १९ ॥ सोऽहंवसन्नपिविभो बहुदुःखवासं गर्भान्ननिर्जिगमिषे बहिरन्धकूपे । यत्रोपयातमुपसर्पतिदेवमाया मिथ्यामतिर्यदनुसंसृतिचक्रमेतत् २० ॥ तस्मादहंविगतविक्लवउद्धरिष्य आत्मानमाशुतमसःसुहृदात्मनैव । भूयोयथाव्यसनमेतदनेकरन्ध्रं मामेभविष्यदुपसादितविष्णुपादः ॥ २१ ॥ कपिलउवाच ॥ एवंकृतमतिर्गर्भे दशमास्यःस्तुवन्नृषिः । सद्यःक्षिपत्यवाचीनं प्रसूत्यैसूतिमारुतः २२ ॥ तेनावसृष्टःसहसा कृत्वाऽवाक्शिरआतुरः । विनिष्क्रामतिकृच्छ्रेण निरुच्छ्वासोहतस्मृतिः ॥२३॥पतितोभुव्यसृङ्मूत्रे विष्ठाभूरिवचेष्टते । रोरूयतिगतेज्ञानेविपरीतांगतिंगतः ॥ २४ ॥ परच्छन्दंनविदुषा पुष्यमाणोजनेनसः । अनभिप्रेतमापन्नः प्रत्या

संसार के मार्ग में नष्ट बुद्धिहो, भ्रमण करता फिरता है, उस मार्ग से यह जीव विना ईश्वर की कृपाके, निकलकर मुक्तिको नहीं प्राप्तहोसकता॥१५॥जिस भगवान की कृपासे मुझे तीनों कालका जाननेवाला ज्ञानउत्पन्न हुआहै वह परमेश्वर-स्थावर, जंगम में अंतर्यामी रूपसे रहता है अतएव जीवको कर्म पदवीके कराने वाले परमेश्वरको तीनोंतापोंके दूरहोनेके हेतु मैं प्रणामकरताहूं १६ ॥ माता के गर्भ की जठराग्नि से अत्यन्त संतप्त देह, तथा विष्ठा, मूत्रमें पड़ेहुए अतिशय दुःखी, और यहां से निकलने के हेतु महीनों को गिनते हुए, इस दुःखी प्राणी (मुझ) को हे दीनानाथ कब बाहर निकालोगे ॥ १७ ॥ हे नाथ ! जिन आपने इस दश महीने के (मुझ) प्राणी को ऐसा ज्ञान दिया, वह आप अपनेही कियेहुए उपकार से आपही प्रसन्न होतेहो केवल हाथ जोड़ने के अतिरिक्त आपका प्रत्युपकार कौन करसक्ता है ॥ १८ ॥ इस सात धातुओं से बँधे हुए देहादिक के शरीर सम्बन्धी सुख दुःख का ज्ञान होता है, हे दीनवन्धो ! मैं तो आप के दिये हुए ज्ञान से आप के चैतन्य स्वरूप को हृदय में देखताहूं ॥ १९ ॥ हे विभो ! सो मैं अत्यन्त दुःख में हूं कारण कि यह गर्भ महा दुःख का स्थान है परन्तु तौभी बाहर नहीं निकलना चाहता, क्योंकि बाहर निकलतेही, अंध कूपीसंसार में पड़कर, आप की माया में तत्कालही फँसना पड़ेगा, तथा यहस्त्री, पुत्र आदि का मिथ्या संसर्ग प्राप्त होजावेगा ॥ २० ॥ इसी कारण धैर्यधर कर, यही पर रह आप के चरण कमलों का ध्यानधर, उन्हीं के प्रभाव तथा अपनी श्रेष्ठ बुद्धि की सहायता से इस जगत् से अपना उद्धार करके आवागवनसे छूटूंगा ॥ २१ ॥ कपिलदेवजी ने कहा कि-इस भांति दश महीने के जीव को स्तुति करते हुए, उस के बाहर निकलने को प्रसूतिका वायु उस का नीचा मुख कर पटककर धक्का देती है ॥ २२ ॥ उस काल वायु के धक्के से व्याकुलहो वह जीव नीचे को शिर करके, कि जिस से श्वास नहीं आता जाता, महा व्याकुलहो बाहर निकलता है, उसी काल उस की सब स्मृति का नाश होजाता है, ॥ २३ ॥ भूमि पर गिरकर रुधिर मूत्रमें विष्ठा की समान चेष्टा करता है और ज्ञान नष्ट होजाता है उस काल वह ज्ञान नाश होने के कारण विपरीत गति को प्राप्त होकर बहुत रुदन करता है ॥२४॥

स्यातुमसमाश्वरः ॥ २५ ॥ शायितोऽशुचिपर्यंके जन्तुः स्वेदजदूषिते । नेशः कण्डूय नेऽगानामासनोत्थानचेष्टने ॥२६॥ तुदन्त्यामत्वचं दंशा मशकामत्कुणादयः रुदन्तं विगतज्ञानं कृमयः कृमिकं यथा॥२७॥इत्येवंशैशवं भुक्त्वा दुःखं पौगण्डमेव च।अलब्धाभीप्सितोऽज्ञानादिद्धमन्युः शुचार्पितः॥२८ सहदेहेन मानेन वर्द्धमानेन मन्युना । करोति विग्रहं कामी कामिष्वन्ताय चात्मनः॥२९॥भूतैः पंचभिरारब्धे देहे देह्यबुधोऽसकृत् । अहंममेत्यसद्ग्राहः करोति कुमतिर्मतिम् ॥ ३० ॥ तदर्थं कुरुते कर्म यद्बद्धो याति संसृतिम् । योऽनुयाति ददत्क्लेशमविद्याकर्मबन्धनः ॥ ३१ ॥ यद्यसद्भिः पथि पुनः शिश्नोदरकृतोद्यमैः । आस्थितो रमते जन्तुस्तमो विशति पूर्ववत् ॥ ३२ ॥ सत्यं शौचं दया मौनं बुद्धिः श्रीर्ह्रीर्यशः क्षमा । शमो दमो भगश्चेति यत्संगाद्याति संक्षयम् ॥ ३३ ॥ तेष्वशान्तेषु मूढेषु खण्डितात्मस्वसाधुषु । संगं न कुर्याच्छोच्येषु योषित्क्रीडामृगेषु च ॥ न तथाऽस्य भवेन्मोहो बन्धश्चान्यप्रसंगतः । योषित्संगाद्यथा पुंसो यथा तत्संगिसंगतः ॥ ३५ ॥ प्रजापतिः स्वां दुहितरं दृष्ट्वा तद्रूपधर्षितः रोहिद्भूतां सोऽन्वधावदृक्षरूपी हतत्रपः ॥ ३६ ॥ तत्सृष्टसृष्टसृष्टेषु को न्वखण्डितधीः पुमान् । ऋषिं नारायणमृते योषिन्मय्येह मायया ॥ ३७ ॥ बलं मे पश्य मायायाः स्त्रीमय्या जयिनो दिशाम् । याकरो

उस के प्रयोजन के न जाननेवाले मनुष्यों से पोषण होताहुआ बिन चाहे पदार्थों को पाकर वह अपने दुःख के कहने में असमर्थ होता है ॥ २५ ॥ वहीं मलीन खाटपर सोयाहुआ वह जीव, मक्खियों तथा खटमलों के काटने से अपने देह को नहीं खुजा सकता है न उठ सकता है, न चल सकता है ॥ २६ ॥ जिस भांति कि एक कीड़ा दूसरे को काटता है, उसी भांति डांसमच्छर इत्यादिक—इस कोमल त्वचावाले कीड़े के समान अज्ञान बालक को काटते हैं इसी से वह रुदन किया करता है ॥ २७ ॥ इस प्रकार वह नाना भांति के कष्टों को भुगत बाल्यावस्था के कष्ट भोगता है, फिर पौगण्ड अवस्था के कष्टों को भुगत युवावस्था को पहुँचता है, तथा उस काल भी इच्छित पदार्थ न पाकर मूर्खता से अत्यन्त क्रोध करता है।कि जिस से प्रति समय शोच से घिरारहता है ॥ २८ ॥ देह से बढ़ाहुए क्रोध तथा अभिमान के कारण वह कामी मनुष्यों के संग मिलकर अपनी आत्मा के नाशार्थ लड़ाई कियाकरता है, ॥ २९ ॥ पंच महाभूतों से रचित इस देह में अज्ञानी जीव अज्ञानतावश "यह मैं हूं" "यह मेरा" है, इस भांति कहाकरता है ॥ ३० ॥ अविद्या तथा कर्म के बंधन से बंधाहुआ और कष्ट देताहुआ यह शरीर बारम्बार आयाकरता है, इसी के हेतु यह प्राणी कर्म कियाकरता है, और उन्हीं कर्मों से बंधनमें आता है इस भांति वह आवागवन में पड़ा घूमताही रहता है ॥ ३१ ॥ फिर वह यहां शिश्न व पेट के हेतु खोटे कर्मों के करने में प्रिय होकर वैसीही संगति में रमने लगता है फिर कुसंगति के प्रभावसे वह पहिले की समान नर्कों में जाता है ॥ ३२ ॥ क्योंकि खोटे मनुष्यों की संगति से, सत्य, पवित्रता, दया, मौन, बुद्धि, लज्जा, लक्ष्मी, यश, क्षमा, समता, इंद्रियोंका दमन और ऐश्वर्य इन सबका नाश होजाता है ॥ ३३ ॥ इसी हेतु अशांत, आत्मघाती, देहात्म बुद्धिवाले, स्त्रियों के क्रीड़ामृग, तथा नीच मनुष्यों की संगति कभी न करे ॥ ३४ ॥ कारण कि इस जीवको जितनाबंधन स्त्री के संग से तथा उनका संग करनेवाले मनुष्यों के संगसे होताहै, वैसा अन्यके संगसे नहीं होता ॥३५॥ प्रजापति ब्रह्माजी अपनी बेटी सरस्वती को देखकर उसके रूपसे मोहित होगये तब सरस्वती ने अपने बचने के हेतु मृगी का रूप धारण किया तो ब्रह्माजी ने मृगका रूप धारण करके उसका पीछा निर्लज्ज की भांति किया ॥ ३६ ॥ जब ब्रह्माजी की यह दशा है तब उनके सृजे हुओं में ऐसा कौन है जिस की बुद्धि स्त्री रूपीमाया से खण्डित न होवे । परन्तु नारायण जो ऋषि रूप

तिपदाक्रांताभ्रूविजृम्भेणकेवलम्॥ ३८ ॥ संगंनकुर्यात्प्रमदासुजातु योगस्यपारं परमारुरुक्षुः। मत्सेवयाप्रतिलब्धात्मलाभो वदन्तियानिरयद्वारमस्य ॥ ३९ ॥ योपयातिशनैर्मायायोषिद्देवविनिर्मिता तामीक्षेतात्मनोमृत्युं तृणैःकूपमिवावृतम् ॥ ४० ॥ यांमन्यतेपतिं मोहान्मन्मायामृषभायतीम्। स्त्रीत्वंस्त्रीसंगतः प्राप्तोवित्ताप त्यगृहप्रदम्॥ ४१ तामात्मनोविजानीयात्पत्यपत्यगृहात्मकम्। दैवोपसादितंमृत्यु म्मृगयोर्गायनं यथा॥४२॥ देहेनजीवभूतेन लोकाल्लोकमनुव्रजन्। भुञ्जानएवकर्मा णि करोत्यविरतंपुमान्॥४३॥ जीवाह्यस्यानुगोदेहोभूतेन्द्रियमनोमयः। तन्निरोधो ऽस्यमरणमाविर्भावस्तुसंभवः॥४४॥ द्रव्योपलब्धिस्थानस्यद्रव्येक्षायोग्यतायदा। तत्पञ्चत्वमहंमानादुत्पत्तिर्द्रव्यदर्शनम्॥ ४५ ॥ यथाऽक्ष्णोर्द्रव्यावयवदर्शनायोग्य तायदा। तदैवचक्षुषोद्रष्टुर्द्रष्टृत्वायोग्यताऽनयोः ॥ ४६ ॥ तस्मान्नकार्यःसंत्रासो न कार्पण्यंनसंभ्रमः। बुद्ध्वाजीवगतिंधीरो मुक्तसंगश्चरेदिह ॥ ४७ ॥ सम्यग्दर्शन याबुद्ध्या योगवैराग्ययुक्तया। मायाविरचितेलोके चरेन्न्यस्यकलेवरम्॥ ४८ ॥

इतिश्रीमद्भा०तृतीय०पुरुषप्रगतिवर्णनंनामएकत्रिंशत्तमोऽध्यायः ॥ ३१ ॥

॥ कपिलउवाच। अथयोगृहमेधीयान् धर्मानेवावसन्गृहे ॥ काममर्थंचधर्मान् स्वान्दोग्धभूयःपिपर्तितान्॥१॥सचापिभगवद्धर्मात् काममूढःपराङ्मुखः। यजते

धारण करके विराजते हैं उनको नहीं कहसकता ॥ ३७ ॥ मेरी स्त्री रूप मायाके बल को देखो, किजो सम्पूर्ण दिशाओं के जीतने वालों कोभी केवल भ्रुकुटी मात्र चलाने से अपने पैरों के नाच करलेती है ॥ ३८ ॥ इस हेतु जो मनुष्य योग के पार पानेकी इच्छा करे वह स्त्रियों का संगनि कदापि न करे– क्योंकि जिस को मेरी सेवासे आत्म लाभ होगया है वह योगी स्त्रियोंको नरकका द्वार समझता है ॥ ३९ ॥ यदि परमेश्वर की निर्माण की हुई यह स्त्री रूप माया धीरे२ प्राप्त होवे तो अपनी आत्मा की मृत्यु, घास से ढके हुये कूप की समान समझना चाहिये ॥ ४० ॥ जीव स्त्री संगके वशहो स्त्रीत्वको प्राप्त होता है मोह से बंधेहुये उस पुरुष के सदृश आचरण करने वाली मेरीमाया को धन, सन्तान, और घरमें प्राप्त हुये पतिरूप से मानता है ॥ ४१ ॥ जिस भांति व्याध का गाना मृगों का काल स्वरूप है इसीभांति दैव से प्राप्त पति, पुत्र गृहरूप स्त्री को अपनी मृत्यु जानना चाहिये ॥ ४२ ॥ यह प्राणी अपने देह से एक लोक से दूसरे लोक को जाता हुआ, एक कर्म का भोग करता हुआ निरंतर दूसरे कर्म किया करता है ॥ ४३ ॥ यह लिंग देह और उसके अनुगामी पंचभूत, इन्द्री, विकार रूप स्थूल देह, जब कार्य के अयोग्य होजाते हैं तब उस प्राणी की मृत्यु होती है और जब यह कार्य के योग्य होते हैं तब जीवका जन्म होता है ॥४४॥ जब नेत्र पदार्थों को नहीं देखसकते तब उसके भीतर की चक्षुइन्द्री अयोग्य होजाती है, इन दोनों की अयोग्यता से उसके द्रष्टापन की अयोग्यता होती है इसी भांति स्थूल देह तथा लिंग देह भी जब अयोग्य होजाते हैं तब वही जीवात्मा का मरण कहलाता है और इनकी योग्यता होने से प्राणी में ज्ञान उत्पन्न होता है वही जन्म कहलाता है ॥ ४५ ॥ ४६ ॥ इसीहेतु मरने का त्रास न करना चाहिये तथा जीवन के हेतु दीनताभी नहीं करनी चाहिये, किंतु जीव क सत्य रूपको जान निसंग हो, धैर्य धर, संसार में विचरे ॥ ४७ ॥ इस माया से बनीहुई सृष्टिको छोड़, योग तथा वैराग्य वाली बुद्धि से भ्रमण करना चाहिये ॥ ४८ ॥

इतिश्रीभागवते महापुराणे• तृतीयस्कंधेसरलाभाषाटीकायांएकत्रिंशत्तमोऽध्यायः ॥ ३१ ॥

कपिल देव जीने कहा—जोगृहस्थी मनुष्य घरमें रह कर गृहस्थ के धर्मोंका आचरण करते हैं अर्थात् काम, अर्थ, धर्म इनका पालन कर गृहस्थ के धर्मोंका निरबाह करते हैं ॥ १ ॥ वे मूर्ख

क्रतुभिर्देवान् पितृंश्चश्रद्धयाऽन्वितः ॥ २ ॥ तच्छ्रद्धयाक्रान्तमतिः पितृदेवव्रतःपुमान् । गत्वाचान्द्रमसंलोकं सोमपाःपुनरेष्यति ॥ ३ ॥ यदाचाहीन्द्रशय्यायां शेतेऽनंतासनोहरिः । तदालोकालयंयान्ति तएतेगृहमेधिनाम् ॥ ४ ॥ येस्वधर्मान्नदुह्यन्ति धीराःकामार्थहेतवे । निःसङ्गान्यस्तकर्माणः प्रशांताःशुद्धचेतसः ॥ ५ ॥ निवृत्तिधर्मनिरतानिर्ममानिरहंकृताः । स्वधर्माख्येनसत्त्वेन परिशुद्धेनचेतसा ॥ ६ ॥ सूर्यद्वारेणतेयान्ति पुरुषंविश्वतोमुखम् । परावरेशं प्रकृतिमस्योत्पत्त्यन्तभावनम् ७॥ द्विपरार्धावसाने यःप्रलयोब्रह्मणस्तुते। तावदध्यासतेलोकं परस्यपरचिन्तकाः ८॥ क्ष्माऽम्भोऽनलाऽनिलवियन्मनइन्द्रियार्थभूतादिभिः परिवृतंप्रतिसञ्जिहीर्षुः । अव्याकृतंविशतियर्हिगुणत्रयात्मा कालंपराख्यमनुभूयपरःस्वयंभूः ॥ ९ ॥ एवंपरेत्य भगवन्तमनुप्रविष्टा येयोगिनोजितमरुन्मनसोविरागाः । तेनैवसाकममृतंपुरुषंपुराणं ब्रह्मप्रधानमुपयान्त्यगताभिमानाः ॥ १० ॥ अथतंसर्वभूतानां हृत्पद्मेषुकृतालयम् । श्रुतानुभावंशरणं व्रजभावेनभामिनि ॥ ११ ॥ आद्यःस्थिरचराणांयो वेदगर्भःसहर्षिभिः । योगेश्वरैःकुमाराद्यैः सिद्धैर्योगप्रवर्तकैः ॥ १२ ॥ भेददृष्ट्याऽभिमानेन निःसङ्गेनापिकर्मणा । कर्तृत्वात्सगुणं ब्रह्मपुरुषंपुरुषर्षभम् ॥ १३ ॥ ससंसृत्य पुनःकाले कालेनेश्वरमूर्तिना । जातेगुणव्यतिकरे यथापूर्वंप्रजायते ॥ १४ ॥ ऐश्वर्यं पारमेष्ठ्यंच तेऽपिधर्मविनिर्मितम् । निषेव्यपुनरायान्ति गुणव्यतिकरेसति ॥ १५ ॥ येत्विहासक्तमनसःकर्मसुश्रद्धयाऽन्विताः । कुर्वन्त्यप्रतिषिद्धानि नित्यान्यपिचकृ-

कामी मनुष्य परमेश्वर के आराधन से विमुख हो यज्ञ, तथा देवता और पितरों की पूजा करते हैं ॥ २ ॥ ऐसे पुरुष यज्ञादिक करके चन्द्र लोक को जाते हैं और फिर वहां अमृत पीकर पीछे इसी मनुष्य लोक में आते हैं ॥ ३ ॥ जब शेष शय्यापर अनंतासन भगवान सोते हैं तब सम्पूर्ण लोक लीनहोजाते हैं तथा यह सम्पूर्ण गृह मेधीके धर्म भी लीनहोजाते हैं ॥४॥ और जोकाम तथा अर्थ के हेतु धर्म नहीं करते वह आसक्ति रहित, भगवान को अर्पण करने वाले, प्रशांत, तथा शुद्ध चित्तवाले ॥ ५ ॥ निवृत्ति धर्ममें परायण, धीरजवान मनुष्य निरहंकृत, तथा अपने धर्म में ममता द्वारा सत्वगुण से अंतः करण शुद्ध होनेके कारण ॥ ६ ॥ सूर्यलोक द्वारा, सम्पूर्ण सृष्टिको उत्पन्न करने वाले, तथा स्थिति, पालन, संहार करने वाले पर अपवर्गके स्वामी पूर्ण पुरुषोत्तम श्री भगवान को प्राप्त होते हैं ॥ ७ ॥ जो मनुष्य ब्रह्माजी को परमेश्वर जानकर उन्हीं की उपासना करते हैं वे प्रलय के अंततक ब्रह्म लोक में रहते हैं ॥ ८ ॥ और जब ब्रह्माजी पृथ्वी, जल, तेज, वायु, आकाश, मन, इन्द्रियां, तथा प्राणी आदि संयुक्त इस ब्रह्मांड के नाश की इच्छाकर परमात्मा में प्रवेश करते हैं ॥ ९ ॥ तब उन ब्रह्माजी में प्रवेश किये हुये, मन, तथा पवन को जीतने वाले योगी वैरागी उन्हीं ब्रह्माजी के साथ अमृत रूप, पुरुष प्रधान, अनादि परमात्मा को प्राप्त होते हैं ॥ १० ॥ परन्तु भगवत् उपासना करने वाले तो उसे तत्कालही प्राप्त होते हैं इसी हेतु हे माता! सम्पूर्ण प्राणी मात्रके हृदय कमल में विराजने वाले श्री भगवान, कि जिनका प्रभाव अभी मैंने सुनायाहै, उनकी भक्ति भाव से शरण जाओ ॥११॥ भगवद्भक्त निरंतर भगवान को प्राप्त होते हैं; परन्तु भेदभाव से उपासना करने वाले, साक्षात् ब्रह्माजी भी मरीचे आदि ऋषि, योगेश्वर कुमारादिक, तथा पूर्व सिद्धों के साथ ॥ १२ ॥ भेद दृष्टि करके, अभिमान से निःसंग कर्म करके कर्ताभाव होनेसे सगुण में लीनहोकर ॥ १३ ॥ ईश्वररूप काल करके संसार में फिरजन्म ले जैसे पहले ब्रह्मा थे उसी पदवी को फिर प्राप्तहुये ॥१४॥ हे सति! धर्म विनिर्मित वे पुरुष भी पारमेष्ठ्य के ऐश्वर्य का सेवन कर फिर संसार में जन्म लेते हैं ॥ १५ ॥ और जो मनुष्य इस लोक में आसक्त

त्स्नशः ॥ १६ ॥ रजसाकुण्ठमनसः कामात्मानोऽजितेन्द्रियाः । पितॄन्यजन्त्यनुदिनं गृहेष्वभिरताशयाः ॥ १७ ॥ त्रैवर्गिकास्तेपुरुषा विमुखाहरिमेधसः । कथायां कथनीयोरुविक्रमस्य मधुद्विषः ॥ १८ ॥ नूनंदैवेनविहताये चाच्युतकथासुधाम् ॥ हित्वाशृण्वन्त्यसद्गाथाः पुरीषमिवविड्भुजः ॥ १९ ॥ दक्षिणेनपथाऽर्यम्णः पितृलोकंव्रजन्तिते । प्रजामनुप्रजायन्ते श्मशानान्तक्रियाकृतः ॥ २० ॥ ततस्तेक्षीणसुकृताः पुनर्लोकमिमंसति । पतन्तिविवशादेवैः सद्योविभ्रंशितोदयाः ॥ २१ ॥ तस्मात्त्वंसर्वभावेन भजस्वपरमेष्ठिनम् । तद्गुणाश्रयया भक्त्या भजनीयपदाम्बुजम् ॥ ॥ २२ ॥ वासुदेवेभगवति भक्तियोगःप्रयोजितः । जनयत्याशुवैराग्यं ज्ञानंयद्ब्रह्मदर्शनम् ॥२३॥ यदाऽस्यचित्तमर्थेषु समेष्विन्द्रियवृत्तिभिः । नविगृह्णातिवैषम्यं प्रियमप्रियमित्युत ॥ २४ ॥ सतदैवाऽऽत्मनाऽऽत्मानं निःसङ्गंसमदर्शनम् । हेयोपादेयरहितमारूढपदमीक्षते ॥ २५ ॥ ज्ञानमात्रंपरंब्रह्म परमात्मेश्वरःपुमान् । दृश्यादिभिः पृथग्भावैर्भगवानेकईयते ॥ २६ ॥ एतावानेवयोगेन समग्रेणेहयोगिनः । युज्यतेऽभिमतोह्यर्थो यदसंगस्तुकृत्स्नशः ॥ २७ ॥ ज्ञानमेकंपराचीनैरिन्द्रियैर्ब्रह्म निर्गुणम् । अवभात्यर्थरूपेण भ्रान्त्याशब्दादिधर्मिणा ॥ २८ ॥ यथामहानहंरूपस्त्रिवृत्पंचविधः स्वराट् । एकादशविधस्तस्य वपुरण्डंजगद्यतः ॥ २९ ॥ एतद्वैश्रद्धयाभक्त्या योगाभ्यासेननित्यशः । समाहितात्मानिसंगो विरक्त्यापरिपश्यति ॥ ३० ॥ इत्येतत्

चित्तहो श्रद्धा संयुक्त, नित्य नैमित्तिक कर्म करते हैं ॥ १६ ॥ तथा रजोगुण में व्याप्त हो जो कामी पुरुष, अजितेन्द्रिय, घरके धंधों में फंसहुये प्रतिदिन पित्रोंका पूजन करते हैं ॥ १७ ॥ ऐसे त्रैवर्गिक पुरुष, अति पराक्रमी, कहने योग्य जिनके चरित्र हैं ऐसे भगवान की कथा से विमुख हैं ॥ १८ ॥ और जो पुरुष नारायण की अमृत रूप कथा को त्याग रसिक प्रसंगों में मन लगाते हैं, जैसे सब उत्तम २ पदार्थों का भक्षण करके विष्ठा भोजी विष्ठाही से प्रसन्न होता है, ऐसे ही जो नीच लोगों की कथा सुनते रहते हैं वह निश्चय ही भाग्य के मारेहुये हैं ॥ १९ ॥ जन्म काल से मरण काल तक—सम्पूर्ण क्रिया इस भांतिसे करनेवाले मनुष्य सूर्यसे बांए मार्ग होकर दक्षिण दिशामें पितृलोकमें जाकर फिर पीछेसे प्रजारूप अपने वंशमें उत्पन्नहोते हैं ॥२०॥ हे माता ! जब उन पुरुषोंका सुकृत क्षीण होजाताहै तब देवता उनके स्वर्गोंको नष्ट करदेते हैं उसकाल वे पराधीन हो फिर इस सृष्टिमें आतेहैं ॥२१॥ इसहेत परमेश्वरका कि जिनके कमल स्वरूपी चरण भजने योग्यहै, सम्पूर्ण भावस, गुणोंको आश्रयकरनेवाली भक्तिसे, भजनकरो ॥२२॥ जिसकाल परमेश्वरकी भक्ति योगका साधन किया जाताहै उसकाल ज्ञान तथा वैराग्य आपही प्राप्त होजाते हैं जिससे ब्रह्मका दर्शन होता है ॥ २३ ॥ जब इसभक्त का मन इन्द्रियों की वृत्ति से समान अर्थों में और प्रिय अप्रिय में विषय भावको नहीं ग्रहण करता ॥ २४ ॥ तब उस काल वह स्वयंही आत्मा का स्वप्रकाशरूप, किजो निःसंग, समदर्शी, त्यागने और ग्रहण करने से रहित, ज्ञानमय है देखता है ॥ २५ ॥ ज्ञानमात्र परब्रह्म, भगवान परमेश्वर, पुरुष, देखने योग्य पृथक भागों से भगवान एक प्रतीत होते हैं ॥ २६ ॥ योगी को इन सम्पूर्ण साधनों में मुख्य अभिप्राय यही है कि सब ओर से संग छूटजाय ॥ २७ ॥ ज्ञान रूप निर्गुण ब्रह्म बहिर्मुख इन्द्रिय गणों द्वारा, भ्रांतिवश शब्दादि धर्मयुक्त अर्थ रूप से प्रतीत होते हैं ॥ २८ ॥ जैसे एक महत्तत्व, अहंकार रूप से त्रिगुणात्मक फिरभूतरूप से पांचप्रकार, तथा इन्द्रिय रूप से एकादश प्रकारकी हुआ है और उसीमहदादि से स्वराट् अर्थात् जीव और जीवका शरीर इस ब्रह्माण्ड और जगत में प्रकाशित होता है, वैसेही परब्रह्म भी इस प्रपंच अर्थ रूपसे प्रकाश पाता है ॥ २९ ॥ जिसका चित्त श्रद्धा, भक्ति, वैराग्य और सदैव योगाभ्यास करने से स्थिर होगया है वही निःसंग मनुष्य इस बातको यथार्थ रूप से

कथितंगुर्वि ज्ञानंतद्ब्रह्मदर्शनम्। येनानुबुध्यतेतत्त्वं प्रकृतेःपुरुषस्यच ॥ ३१॥ ज्ञानयोगश्चमन्निष्ठो नैर्गुण्योभक्तिलक्षणः। द्वयोरप्येकएवार्थो भगवच्छब्दलक्षणः॥३२॥ यथेन्द्रियैःपृथग्द्वारैरर्थो बहुगुणाश्रयः। एकोनानेयते तद्वद्भगवाञ्छास्त्रवर्त्मभिः ॥ ॥ ३३ ॥ क्रियया क्रतुभिर्दानैस्तपःस्वाध्यायमर्शनैः। आत्मेन्द्रियजयेनापि संन्यासेनचकर्मणाम् ॥ ३४ ॥ योगेनविविधांगेन भक्तियोगेनचैवहि। धर्मेणोभयचिन्हेन यःप्रवृत्तिनिवृत्तिमान् ॥ ३५ ॥ आत्मतत्त्वावबोधेन वैराग्येण दृढेनच ॥ ईयते भगवानेभिः सगुणो निर्गुणः स्वदृक् ॥ ३६ ॥ प्रावोचं भक्तियोगस्य स्वरूपं ते चतुर्विधम् ॥ कालस्यचाव्यक्तगतेर्योऽन्तर्धावति जन्तुषु ॥ ३७ ॥ जीवस्य संसृतीर्बह्वीरविद्याकर्मनिर्मिताः ॥ यास्वङ्ग प्रविशन्नात्मा न वेद गतिमात्मनः ॥ ३८ ॥ नैतत् खलायोपदिशेन्ना विनीताय कर्हिचित् ॥ नस्तब्धाय न भिन्नाय नैव धर्मध्वजायच ॥ ३९ ॥ न लोलुपायोपदिशेन्न गृहारूढचेतसे ॥ नाभक्ताय च मे जातु न मद्भक्तद्विषामपि ॥ ४० ॥ श्रद्दधानाय भक्ताय विनीतायानसूयवे ॥ भूतेषु कृतमैत्राय शुश्रूषाऽभिरतायच ॥ ४१ ॥ बहिर्जातविरागाय शांतचित्ताय दीयताम् ॥ निर्मत्सराय शुचये यस्याहं प्रेयसां प्रियः ॥ ४२ ॥ य इदं शृणुयादम्ब श्रद्धयापुरुषःसकृत् ॥ यो वाऽभिधत्ते मच्चितः सह्येति पदवीं च मे ॥ ४३ ॥

इतिश्रीमद्भागवते म०तृतीयस्कन्धेकापिलेयेवर्णनंनामद्वात्रिंशोऽध्यायः ॥ ३२ ॥

मैत्रेय उवाच ॥ एवंनिशम्य कपिलस्य वचो जनित्रीसा कर्दमस्य दयिता किलदेवहूतिः ॥ विस्रस्तमोहपटला तमभिप्रणम्य तुष्टावतत्त्वविषयाङ्कितसिद्धि

जान सकता है ॥ ३० ॥ हे माता ! ब्रह्मका दर्शन ज्ञान तथा प्रकृति पुरुषका तत्व ज्ञान जानने वाला मैंने यह ज्ञान कहा ॥ ३१ ॥ मेरी निष्ठा का भक्ति योग तथा निर्गुण ज्ञान योग इन दोनों का अभिप्राय एकही है। भगवत शब्द का लक्षण भगवान ने अपने आप गीता में कहा है ॥ ३२॥ जिस भांति रूपरस आदि नाना गुणवाले पदार्थ पृथक २ मार्ग वाली इन्द्रियों से नाना भांति के ज्ञात होते हैं वैसेही एक परमात्मा शास्त्रोंके मार्गों से अनेक भांति के ज्ञात होते हैं ॥ ३३ ॥ पूर्त कर्मादि (कूप आदि बनाना) यज्ञ, क्रिया, दान, तप, वेदाध्ययन, मीमांसादिक, आत्मा तथा इन्द्रियों का जीतना, सन्यास ॥ ३४ ॥ अष्टांग योग, भक्तियोग, सकाम तथा निष्काम धर्म ॥३५॥ आत्म तत्व का ज्ञान, दृढ़वैराग्य, इन सब साधनों से सगुण तथा निर्गुण, स्वप्रकाश भगवान जानने में आते हैं ॥ ३६ ॥ भक्ति योगका तो चार प्रकार का स्वरूप मैंने वर्णन किया तथा अव्यक्त गतिवाले काल कामी कि जो सम्पूर्ण जीव जंतुओं में दौड़ा फिरा करता है, रूप वर्णन किया ॥३७॥ हे माता ! अविद्या से उत्पन्न कर्मो से प्राप्त होने वाले जीवों की नाना योनियोंकाभी वर्णन किया कि जिनमें जाने से प्राणी अपने रूपको भूलजाता है ॥३८॥ यह कथा जिसका दुष्ट, चित्त है घरमें आसक्त हैं, अभक्त, पाखण्डी, अभिमानी, विनय रहित, दुराचारी, मेरे भक्तों का द्वेषी ऐसे से कदापि नहीं कहनी चाहिये ॥३९।४०॥ तथा विनयवान, प्राणीमात्रसे मित्रता रखनेवाला शुश्रूषा परायण ॥ ४१ ॥ तथा बैराग्य वाला, प्रशांत, निर्मत्सर, पवित्र, मुझको सबसे प्यारा माननेवाला, जो होवे उसको यह कथा श्रवण करानी चाहिये ॥४२॥ हे माता ! जो मनुष्य श्रद्धापूर्वक, मुझमें चित्तलगा इसको एकबारभी सुनेगा अथवा कहेगा तो वह शीघ्रही मेरी पदवीको प्राप्तहोगा॥४३॥

इतिश्रीमद्भागवते,महापुराणे०तृतीयस्कंधेसरलाभाषाटीकायांद्वात्रिंशतितमोऽध्यायः ॥ ३२ ॥

मैत्रेयजी बोले कि हे विदुरजी ! कर्दमजी की प्यारी तथा कपिलदेवजीकी माता देवहूती ने जिसका अज्ञान तथा मोह का कपटजाल कपिलजीके वाक्यों से नष्ट होगयाहै, उनकी स्तुतिकरने

भूमिम् ॥ १ ॥ देवहूतिरुवाच ॥ अथाप्यजोऽन्तः सलिलेशयानं भूतेन्द्रियार्थात्ममयंवपुस्त ॥ गुणप्रवाहं सदशेषबीजं दध्यौ स्वयं यज्जठराब्जजातः ॥ २ ॥ सएव विश्वस्य भवान्विधत्ते गुणप्रवाहेण विभक्तवीर्यः ॥ सर्गाद्यनीहोऽवितथाभिसंधिरात्मेश्वरोऽतर्क्यसहस्रशक्तिः ॥ ३ ॥ सत्वंभृतोमे जठरेणनाथ कथंनु यस्योदर एतदासीत् । विश्वंयुगान्ते वटपत्र एकः शेतेस्ममायाशिशुरंघ्रिपानः ४॥ त्वं देहतन्त्रःप्रशमायपाप्मनां निदेशभाजां च विभो विभूतये । यथाऽवतारास्तव सूकरादयस्तथाऽयमप्यात्मपथोपलब्धये ॥ ५ ॥ यन्नामधेयश्रवणानुकीर्तनाद्यत्प्रह्वणाद्यत्स्मरणादपिक्वचित् । श्वादोऽपिसद्यः सवनायकल्पते कुतःपुनस्तेभगवन्नु दर्शनात् ॥ ६ ॥ अहो बतश्वपचोऽतो गरीयान्यज्जिह्वाऽग्रे वर्तते नामतुभ्यम् । तेपुस्तपस्ते जुहुवुः सस्नुरार्या ब्रह्मानूचुर्नाम गृणन्ति ते ये ॥ ७ ॥ तंत्वामहंब्रह्म परंपुमांसं प्रत्यक्स्रोतस्यात्मानसंविभाव्यम् । स्वतेजसा ध्वस्तगुणप्रवाहं वन्दे विष्णुं कपिलं वेदगर्भम् ॥ ८ ॥ मैत्रेयउवाच ॥ ईडितो भगवानेवं कपिलाख्यःपरः पुमान् । वाचा विक्लवयेत्याह मातरं मातृवत्सलः ॥ ९ ॥ कपिलउवाच ॥ मार्गेण नेन मातस्ते सुसेव्येनोदितेनमे । आस्थितेनपरांकाष्ठा मचिरादवरोत्स्यसि १० श्रद्धत्स्वैतन्मतंमह्यं जुष्टंयद्ब्रह्मवादिभिः । येनमामभवंयाया मृत्युमृच्छन्त्यतद्विदः ॥ ११ ॥ मैत्रेय उवाच ॥ इतिप्रदर्श्यभगवान् सतीं तामात्मनोगतिम् । स्वमात्रा

लगा ॥ १ ॥ देवहूतीने कहा कि हे भगवन् ! तुम्हारा यह प्रगट शरीर भूत ,इन्द्रिय, आत्मा, और मन इन सबोंमें व्याप्त है यह सबका बीज है और इसी मे सब गुणों का प्रवाह होता है, ब्रह्माजी ने तुम्हारे नाभि कमल से उत्पन्न होकर जल में सोएहुए तुम्हारे इस शरीर का ध्यान किया था किंतु उसको न देखपाया ॥ २ ॥ हे विभो ! तुम स्वयं क्रिया रहित होकर गुण प्रवाह रूप से अपनी शक्ति का विभाग कर इस जगत की उत्पत्ति, स्थिति और संहार करते रहते हो तुम सत्य संकल्प तथा सब जीवों के ईश्वर हो तुम्हारी अगोचर शक्ति तर्कना रहित है ॥ ३ ॥ प्रलयकाल में तुमने अपने उदर मे इस विश्व को धारण कियाथा ! मैंने तुमको किस प्रकार गर्भमें धारण किया हे नाथ ! आप प्रलयकाल के अन्त में मायासे बालक रूप हो एक बटके पत्तेपर शयन करतेतथा अंगूठे को पड़े हुये चूस रहे थे ॥ ४ ॥ हे विभो ! आप पापियों के नाश के हेतु अवतार धारण करते हो, जिस भांति आपने भक्तों की रक्षा के हेतु शूकरादिक रूप धारण किये हैं उसी भांति आध्यात्मिक ज्ञान प्राप्ति के हेतु आपने यहभी रूप धारण किया है ॥ ५ ॥ हे भगवान ! चाण्डालभी आपके नाम श्रवण कीर्तन तथा दंडवतकरने से मोक्षको प्राप्त होता है फिर जो आपका वारम्वार दर्शन करताहै उसकी मुक्ति होना क्या आश्चर्य की बात है ॥ ६ ॥ हे भगवन् ! जिह्वा के अग्र भाग से आप का नाम लेने वाला चाण्डाल भी श्रेष्ठ है, जिसने आप का नाम उच्चारण किया, उसने सम्पूर्ण तप तप लिये, होम तथा तीर्थादिक कर लिये और वेदों को पढ़ लिया ऐसा जानना चाहिये ॥ ७ ॥ परब्रह्म, परमपुरुष, अंतर्दृष्टि से ध्यान करने योग्य तथा वेद गर्भ, विष्णु आप को मैं प्रणाम करती हूं ॥ ८ ॥ मैत्रेयजीने कहा कि—देवहूती ने जब कपिल भगवानको इस भांति स्तुति की, तो मातृ वत्सल कपिल मुनि ने गंभीर बाणी से कहा कि— ॥ ९ ॥ हे माता ! सेवन करने योग्य इस वर्णन कियेहुए मार्ग पर तू चलेगी तो थोड़ेही काल में मुक्ति को प्राप्त होगी ॥ १० ॥ इस मेरे मत पर जिस का सेवन ब्रह्म वादी मुनि लोग करते हैं, श्रद्धा रख तो कल्याण कारक मुझ को प्राप्त होगी, जो इस मत को नहीं जानते वह सदैव जन्म मरणपाते है ॥ ११ ॥ श्री मैत्रेयजी ने कहा कि,—भगवान कपिलदेवजी इस भांति अपनी माता को

ब्रह्म वादिन्या कपिलोऽनुमतो ययौ ॥ १२ ॥ साचापि तनयोक्तेन योगादेशेनयोग युक्। तस्मिन्नाश्रम आपीडे सरस्वत्याःसमाहिता ॥ १३ ॥ अभीक्ष्णावगाहकपिशान जटिलान् कुटिलालकान्। आत्मानं चोग्रतपसा बिभ्रतीचीरिणंकृशम् १४ ॥ प्रजापतेःकर्दमस्य तपोयोगविजृम्भितम् । स्वगार्हस्थ्यमनौपम्यं प्रार्थ्यं वैमानिकैरपि ॥ १५ ॥ पयः फेननिभाः शय्या दान्तारुक्मपरिच्छदाः । आसनानिचहैमानि सुस्पर्शास्तरणानिच ॥ १६ ॥ स्वच्छस्फटिककुड्येषु महामारकतेषुच । रत्न प्रदीपा आभांति ललनारत्नसंयुताः ॥ १७ ॥ गृहोद्यानं. कुसुमितैःरम्यंबह्वमरद्रुमैः । कूजद्विहङ्गमिथुनं गायन्मत्तमधुव्रतम् ॥ १८ ॥ यत्र प्रविष्टमात्मानं विबुधानुचरा जगुः वाप्यामुत्पलगन्धिन्यां कर्दमेनोपलालितम् ॥ १९॥ हित्वातदीप्सिततममप्याखण्डलयोषिताम्। किंचिच्चकारवदनं पुत्रविश्लेषणातुरा ॥ २० ॥ वनंप्रव्रजिते पत्यावपत्यविरहातुरा । ज्ञाततत्त्वाऽप्यभून्नष्टे वत्सेगौरिववत्सला ॥ २१ ॥ तमेव ध्यायती देव मपत्यंकपिलंहरिम् । बभूवाचिरतोवत्स निःस्पृहातादृशेगृहे ॥ २२ ॥ ध्यायन्तीभगवद्रूपं यदाह ध्यान गोचरम् । सुतःप्रसन्नवदनं समस्तव्यस्तचिंतया ॥ २३ ॥ भक्तिप्रवाह योगेन वैराग्येणवलीयसा । युक्तानुष्ठानजातेन ज्ञानेनब्रह्महेतुना ॥ २४ ॥ विशुद्धेनतदात्मान मात्मनाविश्वतोमुखम् । स्वानुभूत्या तिरोभूत मायागुण विशेषणम् ॥ २५ ॥ ब्रह्मण्यवस्थितमतिर्भगवत्यात्मसंश्रये । निवृत्त

आत्मगति दिखा कर तथा उस ब्रह्म वादिनी से आज्ञा माग वहां से चले गये ॥ १२ ॥ वह देवहूती अपने पुत्रके कहे हुये योग के उपदेश को धारणकर, सरस्वती के तीर पर, एकाग्रचित्त हो सावधान होकर वैठी ॥ १३ ॥ वह बारम्बार स्नान करके कुटिल (जटिल) केशों को धारकर उग्र तपस्या के हेतु चीर धारण कर कृश देह को धारण किये हुये रहने लगी ॥ १४ ॥ कर्दम जी के तप व योग से उत्पन्न हुये सुन्दर विमान को, कि जिस को चाहना बड़े २ विमान वासी करते हैं त्याग दिया ॥ १५ ॥ जिस शय्या में दुग्ध के झाग की सदृश कोमल शय्या हाथी दांत की वनी हुई तथा सुवर्ण की सामग्री व सुवर्ण मय आसन और सुंदर कोमल बिछौना बिछा हुआ है ॥ १६ ॥ जिस स्वच्छ उज्ज्वल बिल्लौर पत्थर की दीवार में मणियें जड़ी हुईहैं तथा रत्नों के दीपक लगे हुये हैं और स्त्री रत्न आभूषण युक्त शोभायमान हैं ॥ १७ ॥ जिस में फूलों समेत उत्तम वगीचे हैं जहांपर बहुत से कल्पवृक्ष शोभायमान हैं और पक्षियों के जोड़े जहां शब्द और भौंरे गानकररहे हैं ॥ १८ ॥ उस बगीचे में जब देवहूती प्रवेश करती तब देवताओं के अनुचर गान किया करते, और जहां कर्दम जी कमलों की सुगंध से सुवासित बावड़ी में रमण कराया करते ॥ १९ ॥ ऐसे सुख को देवहूती ने पुत्र के योग उपदेश से त्यागन कर दिया परन्तु पुत्रके वियोग से कुछ एक शरीर मलीन रहताथा ॥ २० ॥ पति तो बनको चले गये थे उस विरह तथा पुत्रके वियोग से तत्वज्ञान जानने पर भी ऐसी दशा होगई कि जैसे बछड़ा के बिछुड़ने पर गऊ की होती है ॥ २१ ॥ हे विदुर ! वह अपने पुत्र कपिलदेव का ध्यान करती हुई.वैभवयुक्त गृहोंके विषय निस्पृह होगई ॥ २२ ॥ भगवान कपिल देवजी के बताये हुयेज्ञान का ध्यान करने लगी और प्रसन्न मुख से पुत्रकी चिंता का त्याग किया ॥ ॥ २३ ॥ भक्तिके प्रवाह रूप योग से, पलिष्ट वैराग्य से, और अनुष्ठान से उत्पन्न हुए ब्रह्मस्वरूप को प्राप्त कराने वाला ज्ञान ॥ २४ ॥ उससे विशेष करके शुद्ध हुआ अंतःकरण उससे सर्व व्यापक आत्मा किजो अपने रूपके प्रकाश से माया के गुणों से रहित है उस विश्वमुख आत्मा का ध्यान करने लगी ॥ २५ ॥ उसका चिंतवन करती हुई, सर्व प्राणियों के आश्रय भूत परमेश्वर में स्थिर बुद्धि होगई

जीवापत्तित्वात् क्षीणक्लेशाप्तऽऽनिर्वृतिः ॥ २६ ॥ नित्यारूढसमाधित्वात्परावृत्त-गुणभ्रमा । न सस्मार तदाऽऽत्मानं स्वप्नेदृष्टमिवोत्थितः ॥ २७ ॥ तद्देहः परतःपोषो ऽप्यकृशश्चाध्यसंभवात् । बभौमलैरवच्छन्नः सधूमइवपावकः ॥ २८ ॥ स्वाङ्गंतपो योगमयंमुक्तकेशंगताम्बरम् । दैवगुप्तं न बुबुधे वासुदेवप्रविष्टधीः ॥ २९ ॥ एवंसा कपिलोक्तेन मार्गेण चिरतःपरम् । आत्मानंब्रह्मनिर्वाणं भगवन्तमवाप ह ॥ ३० ॥ तद्वीराऽऽसीत्पुण्यतमं क्षेत्रं त्रैलोक्य विश्रुतम् । नाम्नासिद्धपदंयत्र सासंसिद्धि मुपेयुषी ॥ ३१ ॥ तस्यास्तद्योगविधुतमार्त्यं मर्त्यमभूत्सरित् । स्रोतसां प्रवरासौम्य सिद्धिदासिद्धसेविता ॥ ३२ ॥ कपिलोऽपिमहायोगीभगवा न्पितुराश्रमात् । मातरंसमनुज्ञाप्यप्रागुदीचींदिशंययौ ॥ ३३ ॥ सिद्ध चारणगन्धर्वैर्मुनिभिश्चाप्सरोगणैः । स्तूयमानःसमुद्रेणदत्तार्हणनिकेतनः ३४ ॥ आस्तेयोगंसमास्थाय सांख्याचार्यैरभिष्टुतः । त्रयाणामपिलोकानामुपशान्त्यैस माहितः ॥ ३५ ॥ एतन्निगदितंतात यत्पृष्टोऽहंतवानघ । कपिलस्यचसम्वादोदे वहूत्याश्चपावनः ॥ ३६ ॥ यइदंमनुशृणोति योऽभिधत्तेकपिलमुनेर्मतमात्मयोग गुह्यम् । भगवतिकृतधीःसुपर्णकेतावुपलभते भगवत्पदारविंदम् ॥ ३७ ॥

इतिश्रीमद्भा०महा०तृतीय० कपिलान्तर्धानवर्णनंनामत्रयस्त्रिंशोऽध्यायः ॥३३ ॥

समाप्तोऽयं तृतीयः ऽस्कन्धः ॥ ३ ॥

उस काल जीव भावके क्षीण होने से सब दुःख मिटगये और आत्मा का सुख प्राप्त हुआ तथा अपनी देह का स्मर्ण नरहा ॥ २६॥ नित्य समाधि में आरूढ़ रहने से देहादिक की भ्रांति निवृत्त होने पर अपनी देह का स्मर्ण ऐसे नहीं रहा कि जैसे स्वप्न में देखे हुए पदार्थ का स्मरण नहीं रहता ॥ २७ ॥ कर्दमादि से रक्षित, कृश देह होने पर भी वह मनको कुछ ग्लानि नहीं मानती थी, मलसे ढकीहुई धूम सहित अग्नि जैसे प्रकाश करती है ऐसेहीप्रकाश पानेलगी ॥ २८ ॥ दैव करके रक्षित, तथा प्रारब्ध कर्म करके पालित तप व योगमय देह के केश व वस्त्र छूट जानेपर भी परमेश्वर के ध्यान में उसे कुछ ज्ञान नहीं रहा ॥ २९ ॥ इस भांति देवहूती, कपिलदेव जी के कहेहुए मार्गका अनुसरण कर शीघ्रही परमात्मा को प्राप्त हुई ॥ ३० ॥ हे विदुर ! जहांपर देवहूती सिद्धहुई, वह श्रेष्ठ पवित्र स्थान सिद्धपद नाम से त्रिलोकी में विख्यात हुआ ॥ ३१ ॥ हेविदुर ! जिसके देहके मल योग करके महादूरगयेहैं ऐसी उस देवहूती की मृतक देह सरस्वती नदीरूप होगई । किजो सब नदियों में श्रेष्ठ, तथा सिद्धों करके सेवित और सिद्धि को देनेवाली है ॥ ३२ ॥ महायोगी, परमेश्वर रूप श्री कपिलदेव जी भी माता की आज्ञानुसार पिताके आश्रम से ईशान कोण की ओर गये ॥ ३३ ॥ वहांपर उनकी सिद्ध, चारण, गन्धर्व, तथा अप्सराओं ने स्तुति की और समुद्र ने अर्घ देकर रहने को स्थान दिया ॥ ३४ ॥ वह कपिल देवजी तीनो लोकों की शांति के हेतु एकाग्र मनहो, योग धारण कर वहांपर स्थित हुए कि जिनकी सांख्य के आचार्य सदैव स्तुति करते हैं ॥ ३५ ॥ हे तात ! हे विदुर ! जो तुमने अति पवित्र देवहूती तथा कपिल देवजी का संवाद पूंछा वह मैंने कहा ॥ ३६ ॥ आत्म तत्व के साधनों में यह कपिल देव जी का गुप्तयोग जो कहेगा अथवा सुनेगा, उस की बुद्धि गरूड़ध्वज भगवान में प्राप्त होगी जिसके कारण वह परमेश्वर के चरणों में प्राप्तहोगा ॥ ३७ ॥

इतिश्रीभागवतेमहापुराणेतृतीयस्कन्धसारस्वतवंशोद्भवपं०जगन्नाथात्मजकन्हैयालालउपाध्यायकृत सरलाभाषाटीकायांकपिलान्तर्धानवर्णनंनामत्रयस्त्रिंशोऽध्यायः ॥ ३३ ॥

समाप्तोयंतृतियःऽस्कंधः ॥ ३ ॥

श्रीमद्भागवत भाषाटीका सहित.

चतुर्थ स्कन्ध ।

श्रीकृष्णायनमः ॥ मैत्रेयउवाच ॥ मनोस्तुशतरूपायां तिस्रः कन्याश्चजज्ञिरे । आकूतिर्देवहूतिश्चप्रसूतिरितिविश्रुताः ॥ १ ॥ आकूतिंरुचयेप्रादादपिभ्रातृमतींनृपः पुत्रिकाधर्ममाश्रित्य शतरूपानुमोदितः ॥ २ ॥ प्रजापतिःसभगवान्रुचिस्तस्यामजीजनत् । मिथुनंब्रह्मवर्चस्वी परमेणसमाधिना ॥ ३ ॥ यस्तयोःपुरुषःसाक्षाद्विष्णुर्यज्ञस्वरूपधृक् । यास्त्रीसादक्षिणाभूतेरंशभूताऽनपायिनी ॥ ४ ॥ आनिन्येस्वगृहंपुत्र्याः पुत्रंविततरोचिषम् । स्वायंभुवोमुदायुक्तो रुचिर्जग्राहदक्षिणाम् ॥ ५ ॥ तांकामयानांभगवानुवाहयजुषांपतिः । तुष्टायांतोषमापन्नोऽजनयद्द्वादशात्मजान् ॥ ६ ॥ तोषःप्रतोषःसन्तोषो भद्रःशान्तिरिडस्पतिः । इध्मःकविर्विभुःस्वह्नःसुदेवोरोचनोद्विषट् ॥ ७ ॥ तुषितानामतेदेवा आसन्स्वायंभुवान्तरे । मरीचिमिश्रा ऋषयोयज्ञःसुरगणेश्वरः ॥८॥ प्रियव्रतोत्तानपादौ मनुपुत्रौमहौजसौ । तत्पुत्रपौत्रनप्तॄणामनुवृत्तंतदन्तरम् ॥ ९ ॥ देवहूतिमदात्तात कर्दमायात्मजांमनुः तत्संबंधिश्रुतप्रायं भवतागदतोमम ॥ १० ॥ दक्षायब्रह्मपुत्राय प्रसूतिंभगवान्मनुः । प्रायच्छद्यत्कृतः सर्गस्त्रिलोक्यांविततोमहान् ॥ ११ ॥ याःकर्दमसुताःप्रोक्ता नवब्रह्म

मैत्रेयजी बोले—हे विदुर ! शतरूपाके गर्भ में मनुके औरस से आकूति, देवहूति प्रसूति नाम क तीन कन्याओं ने जन्म ग्रहण किया ॥ १ ॥ इनके अतिरिक्त मनुके और दो पुत्र उत्पन्न हुए थे परन्तु मनुने शतरूपा की प्रेरणासे अपनी आकूति नाम कन्याको पुत्रिका करके रुचि ऋषिको देदी "इस गर्भसे जो पुत्र उत्पन्न होगा वह मेरा होगा" ऐसा मानकर जो कन्यादान किया जाता है उसको पुत्रिका कहते हैं ॥ २ ॥ ब्रह्मतेज से युक्त भगवान् रुचि ने ईश्वर की कृपासे आकूति के गर्भ से एक पुत्र और कन्या उत्पन्न की उनमें से पुत्र तो साक्षात् यज्ञ रूप विष्णु और कन्या लक्ष्मी के अंश से युक्त दक्षिणा हुई ॥ ४ ॥ स्वायंभुव मनुने जब सुना कि आकूति के गर्भ से एक कोमल पुत्र उत्पन्न हुआ है, तब वह प्रसन्न चित्त से उस पुत्र को अपने घर लेआए रुचि दक्षिणा काही पालन पोषण करने लगे ॥ ५ ॥ कुछ काल के अनन्तर दक्षिणा को अपने सहोदर यज्ञके साथ विवाह करने की इच्छाहुई यज्ञने उसकी इच्छाके अनुसार प्रसन्न चित्तसे उसके साथ विवाह करके उस के गर्भ से १२ पुत्र उत्पन्न किये ॥ ६ ॥ उनके नाम—तोष, प्रतोष, सन्तोष भद्र, शान्ति, इडस्पति इध्म, कवि, विभु, स्वाह, सुदेव और रोचन ॥ ७ ॥ स्वायंभुव मन्वन्तर में तुषितादि नाम के यह बारह देवता हुए मरीचि आदि ऋषि हुए और यज्ञ सुरगणेश्वर (इन्द्र) हुए, श्रीनारायण के छःप्रकार के अवतार यहीहैं ॥ ८ ॥ मनुके दो पुत्र प्रियव्रत और उत्तानपाद बड़े पराक्रमी हुए कि जिनके पुत्र पौत्रादिकों से सम्पूर्ण जगत् व्याप्त होगया ॥ ९ ॥ स्वायंभुवमनु ने अपनी देवहूती पुत्री कर्दम ऋषि को दी कि जिसका सम्बन्ध मैंने पहिलेही वर्णन किया है ॥ ॥ १० ॥ मनुने अपनी प्रसूति नाम कन्या ब्रह्म पुत्र दक्ष को दी जिसके वंश को त्रिलोकी में बड़ा

र्षिपत्नयः । तासांप्रसूतिप्रसवं प्रोच्यमानंनिबोधमे ॥ १२ ॥ पत्नीमरीचेस्तु कलासुषुवे कर्दमात्मजा । कश्यपंपूर्णिमानंच ययोरापूरितंजगत् ॥ १३ ॥ पूर्णिमासूतविरजं विश्वगंचपरंतप । देवकुल्यांहरेःपादशौचाद्याऽभूत्सरिद्दिवः ॥१४॥ अत्रेःपत्न्यनसूयात्रीन्जज्ञेसुयशसःसुतान् । दत्तंदुर्वाससंसोममात्मेशब्रह्मसंभवान् ॥१५॥ विदुरउवाच ॥ अत्रेर्गृहेसुरश्रेष्ठाःस्थित्युत्पत्त्यन्तहेतवः किंचिच्चिकीर्षवोजाता एतदाख्याहिमेगुरो ॥ १६ ॥ मैत्रेयउवाच ॥ ब्रह्मणानोदितःसृष्टावत्रिर्ब्रह्मविदांवरः । सह पत्न्याययावृक्षं कुलाद्रिंतपसिस्थितः ॥ १७ ॥ तस्मिन्प्रसूनस्तबकपलाशाशोककानने । वार्भिःस्रवद्भिरुद्घुष्टे निर्विन्ध्यायाःसमन्ततः ॥ १८ ॥ प्राणायामेनसंयम्य मनोवर्षशतंमुनिः । अतिष्ठदेकपादेन निर्द्वन्द्वोऽनिलभोजनः ॥ १९ ॥ शरणंतंप्रपद्येऽहं यएवजगदीश्वरः । प्रजामात्मसमांमह्यं प्रयच्छत्वितिचिन्तयन् ॥ २० ॥ तप्यमानंत्रिभुवनं प्राणायामैधसाऽग्निना । निर्गतेनमुनेर्मूर्ध्नःसमीक्ष्यप्रभवस्त्रयः ॥२१॥ अप्सरोमुनिगन्धर्व सिद्धविद्याधरोरगैः । वितायमानयशसस्तदा श्रमपदंययुः ॥ ॥ २२ ॥ तत्प्रादुर्भावसंयोग विद्योतितमनामुनिः । उत्तिष्ठन्नेकपादेन ददर्शविबुधर्षभान् ॥ २३ ॥ प्रणम्यदण्डवद्भूमावुपतस्थेऽर्हणांजलिः । वृषहंससुपर्णस्थान्स्वैः स्वैश्चिह्नैश्चचिह्नितान् ॥ २४॥ कृपावलोकेनहसद्वदनेनोपलम्भितान् । तद्रोचिषा प्रतिहते निमील्यमुनिरक्षिणी ॥ २५ ॥ चेतस्तत्प्रवणं युंजन्नस्तावीत्संहतांजलिः ।

भारी विस्तार हुआ ॥ ११ ॥ कर्दम जी की नौ पुत्रियें जो ब्रह्म ऋषियों की स्त्री हुईं उनकी संतान का विस्तार मैं कहता हूं तुम सुनो ॥ १२ ॥ कर्दमजी की पुत्री मरीचि की स्त्री कलाने कश्यप और पूर्णमान यह दो पुत्र उत्पन्न किये कि जिनके वंश से संसार भरगया ॥ १३ ॥ पूर्णमान के दो पुत्र विरज और विश्वग् तथा देवकुल्या नामक एककन्या हुई कि जो जन्मांतर में परमेश्वर के चरण कमल के धोने के प्रभाव से आकाश गंगा हुई ॥ १४ ॥ अत्रि की अनुसूया नाम स्त्री में विष्णु, शिव और ब्रह्माजी के अंश से तीन पुत्र दत्तात्रेय, दुर्वासा तथा चन्द्रमा उत्पन्न हुए ॥ १५ ॥ विदुरने कहा कि हे गुरो ! अत्रि के गृह में देवताओं में श्रेष्ठ उत्पत्ति, पालन, संहार करनेवाले यह तीनों देव किस कार्य की इच्छा से उत्पन्न हुए वह मुझसे कहो ॥ १६ ॥ मैत्रेय जी बोले—कि ब्रह्मवेत्ताओं में श्रेष्ठ अत्रि, ब्रह्माजी की प्रेरणासे, विश्व सृजने के हेतु अपनी स्त्रीको साथ ले, कुलाद्रि पर्वत पर तप के हेतु गए ॥ १७ ॥ जहां फूलों के गुच्छे लटक रहे हैं पलाश के वृक्ष शोभायमान हैं तथा निर्विन्ध्या नदी के चारों ओर पानीके झरनों का बड़ा भारी शब्द होरहा है ॥ १८ ॥ ऐसे उस पर्वत में निःसंग हो एकाग्र मनकर एकपांव उठा प्रणायाम करते तथा पवन भक्षण करते हुए, सौ वर्ष पर्यंत तप किया ॥ १९ ॥ उस काल वह यह चिंतवन करके स्मर्ण करने लगे कि जो जगत् का ईश्वर है उसी की शरण में मैं प्राप्त हुआ हूं वह अपनी समान मुझ को पुत्र देवे ॥ २० ॥ प्राणायाम रूपी वृद्धि को प्राप्ति हुई अग्नि से जो मुनि के मस्तक से निकलीथी उससे त्रिलोकी संतप्तहोनेलगी यह देखकर तीनों देवता उनके आश्रममें आए॥२१॥उस काल अप्सरा ये मुनि, गन्धर्व, सिद्ध; विद्याधर और नाग इन देवताओं का यश गाने लगे ॥२२॥ इन देवताओं के प्रगट होनके संयोग से मुनि का मन चकित होगया तौभी एक पैर से खड़े रहकर उन श्रेष्ठ देवताओं के दर्शन किए ॥ २३ ॥ वृषभ, हंस, गरुडपर विराजे हुए अपने२ चिन्हों से चिन्हित देवताओं को साष्टांग दंडवत कर फूल अंजली में भरकर पूजन किया ॥ २४ ॥ कृपा करके देखते और हंसते हुए मुख से अपने ऊपर प्रसन्न जान उनकी कांति से अपने मूंदे हुए नेत्रों को मल ॥ २५ ॥ अपने मनको उन्हीं में लगा हाथजोड़ सुंदर बाणी से सबलोकों में श्रेष्ठ

श्लक्ष्णयासूक्तयावाचा सर्वलोकगिरीयसः ॥ २६ ॥ अत्रिरुवाच ॥ विश्वोद्भवस्थितिलयेषु विभज्यमानैर्मायागुणैरनुयुगं विगृहीतदेहाःतेब्रह्मविष्णुगिरिशाःप्रणतोऽस्म्यहंवस्तेभ्यःकएवभवतांमइहोपहूतः ॥ २७ ॥ एकोमयेहभगवान्विविधप्रधानैश्चित्तीकृतः प्रजननायकथंनुयूयम् । अत्रागतास्तनुभृतांमनसोऽपिदूरां ब्रूतप्रसीदत महानिह विस्मयो मे ॥ २८ ॥ मैत्रेय उवाच ॥ इतितस्यवचःश्रुत्वा त्रयस्ते विबुधर्षभाः । प्रत्याहुःश्लक्ष्णयावाचा प्रहस्य तमृषिंप्रभो ॥ २९ ॥ देवा ऊचुः ॥ यथाकृतस्तेसंकल्पो भाव्यंतेनैवनान्यथा । सत्संकल्पस्य ते ब्रह्मन्यद्वै ध्यायति ते वयम् ॥ ३० ॥ अथास्मदंशभूतास्ते आत्मजा लोकविश्रुताः । भवितारोऽङ्ग भद्रं ते विस्रप्स्यन्ति च तेयशः ॥ ३१ ॥ एवंकामवरंदत्वा प्रतिजग्मुःसुरेश्वराः । सभाजितास्तयोः सम्यग्दम्पत्योर्मिषतोस्ततः ॥ ३२ ॥ सोमोऽभूद्ब्रह्मणोऽशेन दत्तो विष्णोस्तु योगवित् । दुर्वासाः शंकरस्यांशो निबोधाङ्गिरसः प्रजाः ॥ ३३ ॥ श्रद्धा त्वंगिरसः पत्नी चतस्रोऽसूतकन्यकाः । सिनीवाली कुहू राका चतुर्थ्यनुमतिस्तथा ॥ ३४ ॥ तत्पुत्रावपरावास्तां ख्यातौ स्वारोचिषेऽन्तरे । उतथ्यो भगवान्साक्षाद्ब्रह्मिष्ठश्चबृहस्पतिः ॥ ३५ ॥ पुलस्त्योऽजनयत्पत्न्यामगस्त्यं च हविर्भुवि । सोऽन्यजन्मनि दह्राग्निर्विश्रवाश्चमहातपाः ॥ ३६ ॥ तस्ययक्षपतिर्देवः कुबेरस्त्विडविडासुतः । रावणःकुम्भकर्णश्च तथाऽन्यस्यांविभीषणः ॥ ३७ ॥ पुलहस्य गतिर्भार्या त्रीनसूतसतीसुतान् । कर्मश्रेष्ठंवरीयांसं सहिष्णुंच महामते ॥ ३८ ॥ क्रतोरपिक्रियाभार्या बालखिल्यानसूयत । ऋषीन्षष्टिसहस्राणि ज्वलतोब्रह्मतेज

तीनों देवताओं की स्तुति करनेलगे ॥ २६ ॥ अत्रिजी बोले कि विश्वकी उत्पत्ति स्थिति और क्षय के हेतु विभज्यमान माया के गुणों से जो युग २ में देह ग्रहण करते हैं उन ब्रह्मा, विष्णु, महेश, आपको मैं दण्डवत् करता हूं, मैंने तो आप में से किसी एक देवताकी इच्छा की थी ॥ २७ ॥ मैं ने तो एकही भगवान् बिष्णु का नाना उपचारों से पुत्र के हेतु ध्यान कियाथा परन्तु आप तीनों देव कैसे पधारे, यह आप मुझसे कृपाकरकेकहिये, क्योकि इसमें मुझे बड़ा आश्चर्यहुआहै ॥२८॥ मैत्रेयजी बोले कि–वह तीनों देवता इस भांति उन मुनि के बचन सुन और हंसकर मनोहर वाणी से बोले ॥ २९ ॥ हे अत्रि ! जो तुम ने संकल्प कियाहै वही होगा अन्यथा नहीं होगा, और जिस एक तत्व का तुम ध्यान करते हो वह हम तीनों देवता एकही हैं हममें भेद नहीं है ॥ ३० ॥ अब हम तीनों के अंश से तुम्हारे जगद्विख्यात तीनपुत्र होंगे जो तुम्हारे यशका विस्तार करेंगे॥३१॥ वह सुरेश्वर इस भांति मनोवांछित वरदान दे ऋषि से सनमान पा, उन दोनों स्त्री पुरुषों के देखते २ उस स्थान से चले गए ॥ ३२ ॥ फिर ब्रह्माजी के अंश से चन्द्रमा, विष्णु के अंश से दत्तात्रेय तथा महेश के अंश से दुर्वासा उत्पन्न हुए । अब अंगिराका वंश सुनों ॥ ३३ ॥ अंगिराकी श्रद्धा नाम स्त्री से चार पुत्रियें सिनीवाली, कुहुराका और अनुमती, उत्पन्न हुई ॥ ३४ ॥ उनके दो पुत्र और भी हुए जो स्वारोचिष मन्वन्तर के अंत में विख्यात हुए एक तो भगवान उतथ्य दूसरे बृहस्पतिजी, ॥ ३५ ॥ पुलस्त्य की हविर्भूनाम स्त्री से अगस्त उत्पन्न हुए जो दूसरे जन्म में जठराग्नि हुए उन पुलस्त्य के दूसरा पुत्र बड़ा तपस्वी बिश्रवा हुआ ॥ ३६ ॥ बिश्रवा की इडविडा नाम स्त्री से यक्षपति कुबेर उत्पन्न हुए तथा दूसरी स्त्री केशिनी से रावण, कुम्भकरण, और बिभीषण उत्पन्न हुए ॥ ३७ ॥ हे बिदुर ! पुलह की गति नाम स्त्री से तीन पुत्र कर्मश्रेष्ठ, वरीयांस और सहिष्णु उत्पन्न हुए ॥ ३८ ॥ क्रतु की क्रिया नाम स्त्री से ६० हजार बालखिल्य आदि ऋषि

सा ॥ ३९ ॥ ऊर्जायांजज्ञिरेपुत्रा वसिष्ठस्य परंतप । चित्रकेतुप्रधानास्तेसप्तब्रह्मर्षयोमलाः ॥ ४० ॥ चित्रकेतुः सुरोचिश्च विरजा मित्रएवच । उल्वणो वसुभृद्यानो द्युमानशक्त्यादयोऽपरे ॥ ४१ ॥ चित्तिस्त्वथर्वणःपत्नी लेभेपुत्रंधृतव्रतम् । दध्यञ्च मश्वशिरसं भृगोर्वंशं निबोधमे ॥ ४२ ॥ भृगुःख्यात्यांमहाभागः पत्न्यांपुत्रानजीजनत् । धातारं च विधातारंश्रियंचभगवत्पराम् ॥ ४३ ॥ आयतिं नियतिं चैव सुतेमेरुस्तयोरदात् । ताभ्यांतयोरभवतां मृकण्डः प्राणएवच ॥ ४४ ॥ मार्कण्डेयो मृकण्डस्य प्राणाद्वेदशिरामुनिः । कविश्च भार्गवोयस्य भगवानुशनासुतः॥ ४५ ॥ तएतेमुनयःक्षत्तर्लोकान् सर्गैरभावयन् । एषकर्दमदौहित्रसंतानः कथितस्तव ४६ शृण्वतः श्रद्दधानस्यसद्यः पापहरःपरः । प्रसूतिं मानवींदक्ष उपयेमे ह्यजात्मजः ॥ ४७ ॥ तस्यांससर्जदुहितः षोडशामललोचनाः । त्रयोदशादाद्धर्माय तथैकामग्नये विभुः ॥ ४८ ॥ पितृभ्यएकांयुक्तेभ्यो भवायैकांभवच्छिदे । श्रद्धा मैत्रीदया शांतिस्तुष्टिः पुष्टिः क्रियोन्नतिः ॥ ४९ ॥ बुद्धिर्मेधा तितिक्षाह्रीर्मूर्तिर्धर्मस्यपत्नयः। श्रद्धाऽसूतशुभंमैत्री प्रसादमभयंदया ॥ ५० ॥ शांतिःसुखंमुदंतुष्टिः स्मयंपुष्टिरसूयत । योगंक्रियोन्नतिर्दर्प मर्थबुद्धिरसूयत ॥ ५१ ॥ मेधास्मृतिं तितिक्षातु क्षेमंह्रीः प्रश्रयंसुतम् । मूर्तिःसर्वगुणोत्पत्तिर्नरनारायणावृषी ॥ ५२ ॥ ययोर्जन्मन्यदो विश्व मभ्यनन्दत्सुनिर्वृतम् । मनांसिककुभोवाताः प्रसेदुः सरितोऽद्रयः ॥ ५३ ॥ दिव्य वाद्यन्त तूर्याणि पेतुः कुसुमवृष्टयः । मुनयस्तुष्टुवुस्तुष्टा जगुर्गन्धर्वकिन्नराः ५४ ॥

उत्पन्न हुए ॥ ३९ ॥ परम तपस्वी वशिष्ठजी की ऊर्जा नाम स्त्री से चित्रकेतु आदिक सात पुत्र उत्पन्न हुए ॥ ४० ॥ चित्रकेतु,सुरोचिस,विरज,मित्र, उल्वण, वसुभृद्यान, और द्युमान उत्पन्न हुए और दूसरी स्त्री में शक्ति आदिक और पुत्र उत्पन्न हुए ॥ ४१ ॥ अथर्वण की चित्ति नाम पत्नीसे धृतव्रत दध्यंच और अश्वसिरा नाम पुत्र हुये अब भृगु के वंशको सुनो ॥ ४२ ॥ महाभाग भृगुकी ख्याति नाम स्त्री में धाता, विधाता दो पुत्र और भगवत्परायण लक्ष्मी नाम कन्या उत्पन्न हुई ॥ ४३॥ मेरुने अपनी आयति और नियति दोनोंपुत्रियें धाता और विधाता को ब्याहदीं उनमें से धाताके मृकण्ड और विधाता के प्राणनाम पुत्र उत्पन्न हुआ ॥ ४४ ॥ मृकण्ड के मार्कंडेय और प्राणके वेदशिरा नामक पुत्र उत्पन्न हुआ, भृगुके पुत्र भार्गव और भार्गवके उशना पुत्र हुआ ॥ ४५ ॥ हेविदुर । इसभांति मुनियों ने सर्ग रचना की यह कर्दमजीकी पुत्रियों का वंश मैंने आपसेकहा जो मनुष्य श्रद्धापूर्वक इसकोसुनेगा उसके सम्पूर्ण पाप नाशहोजायँगे ४६॥ प्रसूति नाम मनु की पुत्री का दक्ष से विवाह हुआ सो दक्षने उस में १६ निर्मल कान्ति वाली कन्यायें उत्पन्न की ॥ ४७ ॥ दक्ष ने १३ पुत्रियें तो धर्म को दीं, एक अग्नि को, एक पितृगण को, और एक संसार के छेदने वाले महादेवजी को दी ॥ ४८ ॥ श्रद्धा, मैत्री, दया, शांति, तुष्टि, पुष्टि, क्रिया, उन्नति, बुद्धि, मेधा,तितिक्षा,ह्री और मूर्ति यह धर्म की १३ पत्नी हैं ॥ ४९ ॥ श्रद्धा के, शुभ, मैत्री के प्रसाद, दयाके अभय, शांति के सुख, तुष्टि के मुद, पुष्टि के स्मय पुत्र उत्पन्न हुए ॥ ५० ॥ क्रिया योग को, उन्नति, दर्प को, बुद्धि, अर्थ को, मेधा. स्मृति को,तितिक्षा, क्षेम को ह्री ने प्रश्रय, नामक पुत्रों को उत्पन्न किया ॥ ५१ ॥ सम्पूर्ण गुण युक्त मूर्त्ति ने भगवान नर नारायण को उत्पन्न किया, जिन के जन्म को देख कर सम्पूर्ण विश्व बड़ाई करने लगा ॥ ५२ ॥ सब के मन और दिशा, पवन, नदी, पर्वत यह सब प्रसन्न होगये, स्वर्ग से देवताओं ने फूलों की वृष्टि की तथा नगाड़े बजाये ॥ ५३ ॥ ऋषि मुनि प्रसन्न हो स्तुति करने लगे गन्धर्व, किन्नर गान तथा देवांगनायें नृत्य और ब्रह्मादिक देवता स्तुति करने लगे उस समय

नृत्यतिस्मस्त्रियोदेव्य आसीत्परममङ्गलम्। देवाब्रह्मादयःसर्वे उपतस्थुरभिष्टवैः॥ ५५॥ देवा ऊचुः॥ योमायया विरचितं निजयाऽऽत्मनीदं खंरूपभेदमिवतत्प्रति चक्षणाय। एतेनधर्मसदने ऋषिमूर्तिनाऽद्य प्रादुश्चकारपुरुषायनमःपरस्मै ५६॥ सोऽयंस्थितिव्यतिकरोपशमायसृष्टान् सत्त्वेननः सुरगणाननुमेयतत्त्वः। दृश्याददभ्रकरुणेन विलोकनेन यच्छ्री निकेतममलं क्षिपतारविंदम्॥ ५७॥ एवंसुरगणैस्तात भगवन्तावभिष्टुतौ। लब्धावलोकैर्ययतुरर्चितौगंधमादनम्॥ ५८॥ ताविमौ वै भगवतो हरेरंशाविहागतौ। भारव्ययायचभुवः कृष्णौयदुकुरूद्वहौ॥५९॥ स्वाहाभिमानिनश्चाग्ने रात्मजांस्त्रीनजीजनत्। पावकंपवमानंच शुचिंचहुतभोजनम्॥ ६०॥ तेभ्योऽग्नयःसमभवंश्चत्वारिंशच्चपञ्चच। त एवैकोनपञ्चाशत् साकंपितृपितामहैः॥ ६१॥ वैतानिकेकर्मणि यन्नामभिर्ब्रह्मवादिभिः। आग्नेय्य इष्टयोयज्ञे निरूप्यंतेऽग्नयस्तुते॥ ६२॥ अग्निष्वात्ता बर्हिषदः सौम्याःपितरआज्यपाः। साऽग्नयोऽनग्नयस्तेषां पत्नीदाक्षायणीस्वधा॥ ६३॥ तेभ्योदधारकन्ये द्वे वयुनांधारिणींस्वधा। उभे ते ब्रह्मवादिन्यौ ज्ञानविज्ञानपारगे॥ ६४॥ भवस्य पत्नीतुसती भवंदेवमनुव्रता। आत्मनःसदृशंपुत्रं न लेभेगुणशीलतः॥ ६५॥ पितर्यप्रतिरूपेस्वे भवायानागसेरुषा। अप्रौढैवात्मनात्मान मजहाद्योगसंयुता॥ ६६॥ इतिश्रीमद्भा०चतुर्थस्कन्धेमनुकन्यान्वयेनरनारायणावतारवर्णनंप्रथमोऽध्यायः १॥

बडाभारी मंगल हुआ॥ ५४॥ देवता स्तुति करने लगे कि जिस परमेश्वरने यह विश्व रचा है उन्हीं परमेश्वर ने रूप भेद देखने के हेतु माया रूप भेद से धर्म के घर में ऋषि मूर्ति से जन्म ग्रहण किया है ऐसे पुरुष परमात्मा को हम नमस्कार करते हैं॥ ५५॥ उन्हीं इन भगवान ने हम देवता गणोंको उत्पत्ति, पालन, तथा संहारके हेतु सृजाहै सृष्टि की मर्य्यादा रखने के हेतु सत्वगुण से सृजे हुये लोकों को आप अपनी अत्यन्त करुणावाली श्री लक्ष्मी के धाम, कमल को भी, तिरस्कार करने वाली अपनी अत्यन्त सुन्दर दृष्टि से देखो॥ ५६॥ हे विदुर! जब देवताओं ने इस भांति स्तुति की तो भगवान् नर नारायण देवताओं की ओर निहार पूजा ग्रहण कर गंधमादन पर्वत को चले गये॥ ५७॥ वे दोनों ही भगवान के अंश पृथ्वी का भार दूर करने के हेतु प्रगट हुये हैं जिस में नरके अंशसे अर्जुन तथा नारायण के अंश से यदु कुल में भगवान् श्री कृष्ण रूप से प्रगट हुये॥ ५८॥ अग्नि की स्वाहा नाम स्त्री से पावक, पवमान, और शुचि यह तीन पुत्र हुये॥ ५९॥ इन तीनों से ४५ अग्नि हुए तथा पितर, पितृ पिता और पितामहोंसमेत ४९ पवन हुए॥ ६०॥ जिन अग्नि देवता संबंधी इष्टियों को ब्रह्म वादी लोग वैदिक कर्मरूप यज्ञमें, नाम ले ले कर किया करते हैं वह अग्नि यह है॥ ६१॥ अग्निष्वाता, बर्हिषद, सौम्य और आज्य यह पितृगण कितने ही साग्नि तथा कितने ही अनाग्नि हैं इन सब के दक्षकी पुत्री स्वधा एक ही स्त्री है॥ ६२॥ स्वधा स्त्री ने उन पितरों से वयुना और धारिणी नाम कन्या को उत्पन्न किया जो दोनो वेद वादिनी तथा ज्ञान में पारायण हुई॥ ६३॥ शिवजी के अनुकूल उनकी स्त्री सतीके अपने गुण शील सदृश पुत्र उत्पन्न नहीं हुआ॥ ६४॥ निरपराध महादेवजी पर पिता दक्ष जब प्रतिकूल हुआ तब योग का आश्रय लेकर सतीने बालकपन ही में अपने देहको त्याग दिया॥ ६५॥

इतिश्रीभागवतेमहापुराणेचतुर्थस्कंधेसरलाभाषाटीकायांप्रथमोऽध्यायः॥ १॥

विदुरउवाच ॥ भवेशीलवतांश्रेष्ठे दक्षोदुहितृवत्सलः विद्वेषमकरोत्कस्मा दनादृत्यात्मजांसतीम् ॥ १ ॥ कस्तंचराचरगुरुं निर्वैरंशांतविग्रहम्। आत्मारामंक थंद्वेष्टि जगतांदैवतंमहत् ॥ २॥ एतदाख्याहिमे ब्रह्मन्जामातुश्वशुरस्यच। विद्वे षस्तुयतःप्राणांस्तत्यजे दुस्त्यजान्सती ॥ ३ ॥ मैत्रेयउवाच ॥ पुराविश्वसृजांसत्रे समेताःपरमर्षयः। तथाऽमरगणाःसर्वे सानुगामुनयोऽग्नयः ॥ ४ ॥ तत्रप्रविष्टमृ षयो दृष्ट्वाऽर्कमिवरोचिषा। भ्राजमानंवितिमिरं कुर्वंतंतन्महत्सदः ॥५॥ उदति ष्ठन्सदस्यास्ते स्वधिष्ण्येभ्यःसहाग्नयः। ऋतेविरिंचंशर्वंचतद्भासाक्षिप्तचेतसः ॥६॥ सदसस्पतिभिर्दक्षो भगवान्साधुसत्कृतः। अजंलोकगुरुंनत्वा निषसादत दाज्ञया ॥ ७ प्राङ्निषण्णंमृडंदृष्ट्वा नामृष्यत्तदनादृतः। उवाचवामंचक्षुर्भ्यामभि वीक्ष्यदहन्निव ॥ ८ ॥ श्रूयतांब्रह्मर्षयोमे सहदेवाःसहाग्नयः साधूनांब्रुवतोवृत्तंना ज्ञानान्नचमत्सरात् ॥९॥ अयंतुलोकपालानां यशोघ्नोनिरपत्रपः। सद्भिराचरितःपं था येनस्तब्धेनदूषितः १० ॥ एषमेशिष्यतांप्राप्तो यन्मेदुहितुरग्रहीत्। पाणिंविप्रा ग्निमुखतः सावित्र्याइवसाधुवत् ॥ ११ ॥ गृहीत्वामृगशावाक्ष्याः पाणिमर्कटलो चनः प्रत्युत्थानाभिवादार्हे वाचाऽप्यकृतनोचितम् ॥ १२ ॥ लुप्तक्रियायाशुचये मानिनेभिन्नसेतवे। अनिच्छन्नप्यदांबालां शूद्रायेवोशतींगिरम् ॥ १३ ॥ प्रेतावा सेषुघोरेषु प्रेतैर्भूतगणैर्वृतः अटत्युन्मत्तवन्नग्नो व्युप्तकेशोहसन्रुदन् ॥ १४ ॥ चि ताभस्मकृतस्नानः प्रेतस्रङ्न्स्थिभूषणः। शिवापदेशोह्यशिवो मत्तोमत्तजनप्रियः।

विदुर जी ने कहा कि-दुहितृ वत्सल दक्षने, अपनी कन्या सतीका तिरस्कार करके, शील वानों में श्रेष्ठ महादेव जी से क्यों द्वेष किया ॥ १ ॥ चराचर के गुरू, वैरभाव रहित शांत स्वरूप, आत्माराम, जगत् के पूज्य महादेव जी से दक्षने क्यों शत्रुता की ॥ २ ॥ हे ब्रह्मन्! यह जामाता और श्वसुर में ऐसा बैर कैसेपड़ा कि जिससे सती ने अपने दुस्त्यज प्राणों को छोड़दिया ॥३॥ मैत्रेय जी ने कहा कि—हे विदुर! पहिले विश्वस्रष्टाओं के समाजमें सम्पूर्ण ऋषि, और देवता अपने२ अनुचरों समेत तथा मुनि और अग्नि सबही स्थित हुए थे ॥ ४ ॥ उस बृहत सभा का अंधकार नष्ट करते हुये ऐश्वर्य्य से सूर्य की समान प्रकाशित दक्षको ऋषियों ने सभा में आया देख ॥५॥ अग्नि सहित सब अपने २ आसनोंसे उठबैठे क्योंकि उनका चित्त उसकी कांति से आक्षिप्त होगया था, परन्तु महादेव जी और ब्रह्माजी अपने आसन से न उठे ॥ ६ ॥ सभासदों ने दक्षका भली भांति सन्मान किया, फिर दक्षलोकगुरू ब्रह्माको नमस्कार कर उनकी आज्ञा पाकर बैठगया ॥ ७ ॥ महादेव जी वहां पहिलेही से बैठे थे उन्हें देख उनसे हुए तिरस्कार को न सहकर मानों भस्म करेगा इस भांति कुटिल नेत्र करके बोला कि—८—हे देवताओ! हे ब्रह्मर्षियो! अग्नि समेत सुनो मैं अज्ञान और मत्सर भावको छोड़कर साधुओं का सदाचार कहता हूं ॥ ९ ॥ यह निर्लज्जतो लोकपालों के यश का नाश करने वाला है क्योंकि जिसने. सभासदों के चलाये मार्गको दूषित किया ॥ १० ॥ यह मेरी शिष्यता को प्राप्त हुआ है; क्योंकि ब्राह्मण और अग्निके सन्मुख, साधु की भांति मेरीकन्या का इसने पाणिग्रहण किया है ॥ ११ ॥ इस वन्दर के से नेत्रवाले ने मेरी मृगछौने के से नेत्रवाली भोली भाली कन्या का व्याह किया, मुझ नमस्कार के योग्य का इसने वाणी से भी सन्मान नहीं किया ॥ १२ ॥ इस लुप्त क्रिया, अपवित्र, मर्यादा भंगी, तथा अहंकारी को मैं कन्या नहीं देना चाहता था परन्तु जैसे शूद्रको वेदवाणी दीजाय इसी भांति मैंने इसे कन्या दी ॥ १३ ॥ यह श्मशानों मे भूतप्रेतों को साथ लिये हुये उन्मत्त की सदृश नंगा, बालखोले, हँसता, खेलता तथा रोता हुआ फिरता है ॥ १४ ॥ चिताकी भस्म में स्नान कर, प्रेतोंके मुंडों

पतिःप्रथमभूतानां तमोमात्रात्मकात्मनाम् ॥ १५ ॥ तस्माउन्मादनाथाय नष्टशौचाय दुर्हृदे। दत्तावतमयासाध्वी चोदितेपरमेष्ठिना ॥ १६ ॥ मैत्रेयउवाच ॥ विनिंद्यैवंसगिरीशमप्रतीपमवस्थितम्। दक्षोऽथापउपस्पृश्य क्रुद्धःशप्तुंप्रचक्रमे ॥ १७ ॥ अयंतुदेवयजनइन्द्रोपेंद्रादिभिर्भवः सहभागंनलभतां देवैर्देवगणाधमः ॥ १८ ॥ निषिध्यमानःससदस्यमुख्यैर्दक्षो गिरित्राय विसृज्यशापम्। तस्माद्विनिष्क्रम्यविवृद्धमन्युर्जगाम कौरव्यनिजंनिकेतनम् ॥ १९ ॥ विज्ञायशापंगिरिशानुगाग्रणीर्नंदीश्वरोरोषकषायदूषितः दक्षायशापं विससर्जदारुणंये चान्वमोदंस्तदवाच्यतांद्विजाः ॥ २० ॥ यएतन्मर्त्यमुद्दिश्यभगवत्यप्रतिद्रुहि। द्रुह्यत्यज्ञः पृथग्दृष्टिस्तत्त्वतोविमुखोभवेत् ॥ २१ ॥ गृहेषुकूटधर्मेषु सक्तोग्राम्यसुखेच्छया। कर्मतंत्रंवितनुतेवेदवादविपन्नधीः ॥ २२ ॥ बुद्ध्यापराभिध्यायिन्या विस्मृतात्मगतिःपशुः। स्त्रीकामःसोऽस्त्वतितरांदक्षोबस्तमुखोऽचिरात् ॥ २३ ॥ विद्याबुद्धिरविद्यायांकर्ममय्यामसौजडः। संसरन्त्विहयेचामुमनुशर्वावमानिनम् ॥ २४ ॥ गिरःश्रुतायाःपुष्पिण्यामधुगन्धेनभूरिणा। मथ्नाचोन्मथितात्मानः संमुह्यन्तुहरद्विषः ॥ २५ ॥ सर्वभक्षाद्विजावृत्त्यै धृतविद्यातपोव्रताः। वित्तदेहेन्द्रियारामा याचकाविचरन्त्विह २६ ॥ तस्यैवंवदतःशापंश्रुत्वाद्विजकुलायवै। भृगुःप्रत्यसृजच्छापं ब्रह्मदंडंदुरत्ययम् ॥ २७ ॥ भवव्रतधरायेचयेचतान्समनुव्रताः। पाखण्डिनस्तेभवन्तु सच्छास्त्रपरिप

की माला, हाडों के आभूषण पहिने घूमता है नामतो शिव और है अशिव, आपभी मत्त है और मत्तजनही इसे प्यारे हैं, और तमोगुणी प्रथम भूतों का यह पति है, ॥ १५ ॥ इस उन्माद नाथ, नष्टाचार खोटे चित्तवाले को ब्रह्माजी के कहने से मैंने अपनी सती कन्यादी ॥ १६ ॥ श्री मैत्रेय जीने कहा कि—दक्ष महादेवजी को अयोग्य की समान बैठे देख निंदाकर जल हाथ में ले क्रोधित हो शापदेने लगा ॥ १७ ॥ कि देवताओं में अधम यह महादेव देवयज्ञादिकों में इन्द्र उपेंद्र के साथ भाग न पावे ॥ १८ ॥ हे बिदुर सभासदों ने उसे निषेध किया परन्तु तो भी वह क्रोध से महादेव जी को शापदे उस स्थानसे निकल अपने स्थान को चलागया ॥ १९ ॥ महादेवजी के पार्षदों में मुख्य नन्दीश्वरने जिसके क्रोधसे लाल नेत्रहोरहे हैं दक्षको दारुण शापदिया और वहांपर जिस २ ने महादेवजी की निन्दा का अनुमोदन कियाथा उस२को भी शाप दिया ॥ ॥ २० ॥ यह दक्ष जो मनुष्य शरीरको श्रेष्ठ मानकर द्रोह रहित महादेवजी से द्रोह करताहै, इससे यह भेद दर्शी तत्वसे विमुख होजाय ॥ २१ ॥ जिसमें कपटही का धर्महै और गृहमें आशक्त है तथा ग्राम्य सुखों की इच्छा करताहै और कर्मतंत्रों का विस्तार करताहै तथा वेदवादियों में जिस की बुद्धि नाश होगई है ॥ २२ देहादिकों में जिसका अभिमान है और आत्मगति को जो भूल गयाहै सो पशुकी सदृश दक्ष अतिशय स्त्रीयोंकी कामनावाला, तथा बकरेकेसे मुखवाला होजाय ॥ ॥२३॥ विद्या बुद्धि अविद्या कर्ममयी में यहीतत्व ;विद्याहै ऐसा ज्ञान रखता है इसहेतुयह जड़ही है, तथा जो महादेवजीके अपमान करनेवाले दक्ष का अनुसरण करते हैं वहभी जन्ममृत्यु को प्राप्त हों ॥ २४ ॥ जिसमें बहुतसे वाक्य केवल मन प्रसन्न करनेवाले फूल की सदृश हैं ऐसे वेदवाणी के मोह उत्पन्नकरनेवाले रोजकवचनोंसे मूर्ख बनेहुये ये महादेवजीके बैरी केवल कर्मही में आसक्त रहैं ॥ २५ ॥ भक्ष्याभक्ष्य के विचार शून्य केवल पेट भरने के हेतु, विद्या, तप और व्रत करने वाले धन इन्द्रियां तथा देहही में सुख माननेवाले, यह ब्राह्मण इस सृष्टि में भिखारी होकर भिक्षा मांगते फिरैं ॥ २६ ॥ नन्दीश्वर ने इसभांति ब्राह्मण कुलको शापदिया, उसे सुनकर भृगु ऋषिने दुरत्यय शापरूप ब्रह्मदण्ड चलाया ॥ २७ ॥ कि जो महादेव के व्रतके धारण करनेवाले तथा

निधनः ॥ २८ ॥ नष्टशौचामूढधियो जटाभस्मास्थिधारिणः । विशन्तुशिवदीक्षायां यत्रदैवंसुरासवम् ॥ २९ ॥ ब्रह्मचब्राह्मणांश्चैव यद्यूयंपरिनिन्दथ । सेतुंविधारणंपुंसामतःपाखण्डमाश्रिता; ॥ ३० ॥ एषएवहिलोकानां शिवःपन्थाःसनातनः । यंपूर्वेचानुसंतस्थुर्यत्प्रमाणंजनार्दनः ॥ ३१ ॥ तद्ब्रह्मपरमंशुद्धं सतांवर्त्मसनातनम् विगर्ह्ययातपाखण्डं दैवंवो यत्रभूतराट् ॥ ३२ ॥ मैत्रेयउवाच ॥ तस्यैवंवदतःशापं भृगोःसभगवान्भवः । निश्चक्रामततःकिंचिद्विमना इवसानुगः ॥ ३३ ॥ तेऽपि विश्वसृजःसत्रं सहस्रपरिवत्सरान् । संविधायमहेष्वास यत्रेज्यऋषभोहरिः ३४ ॥ आप्लुत्यावभृथंयत्रगंगायमुनयान्विता । विरजेनात्मनासर्वेस्वंस्वंधामययुस्ततः ३५

इतिश्रीमद्भ० महा० चतुर्थेऽस्कन्धेदक्षशापवर्णननामद्वितीयोऽध्यायः ॥ २ ॥

मैत्रेय उवाच ॥ सदाविद्विषतोरेवं कालोवै ध्रियमाणयोः । जामातुःश्वशुरस्यापि सुमहानतिचक्रमे ॥ १ ॥ यदाभिषिक्तोदक्षस्तु ब्रह्मणापरमेष्ठिना । प्रजापतीनांसर्वेषा माधिपत्येस्मयोऽभवत् ॥ २ ॥ इष्ट्वासवाजपेयेन ब्रह्मिष्ठानभिभूयच ।बृहस्पतिसवंनाम समारेभो क्रतूत्तमम् ॥ ३ ॥ तस्मिन्ब्रह्मर्षयःसर्वे देवर्षिपितृदेवता । आसन् कृतस्वस्त्ययनास्तत्पत्न्यश्चसभर्तृकाः ॥ ४ ॥ तदुपश्रुत्यनभसि खेचराणां प्रजल्पताम् । सतीदाक्षायणी देवी पितुर्यज्ञमहोत्सवम् ॥ ५ ॥ व्रजंतीः सर्वतो दिग्भ्य उपदेववरस्त्रियः । विमानयानाः सप्रेष्ठा निष्ककण्ठीःसुवाससः ॥ ६ ॥ दृष्ट्वास्वनिलयाभ्याशे लोलाक्षीर्मृष्टकुण्डलाः । पतिंभूतपतिं देव मौत्सुक्या दभ्यभाषत ॥ ७ ॥ सत्युवाच ॥ प्रजापतेस्तेश्वशुरस्य साम्प्रतं निर्यापितो यज्ञ

उनके आज्ञानुकूल हैं वह श्रेष्ठ शास्त्रों से पाखण्डी होजावें ॥ २८ ॥ और नष्ट आचार होकर मूर्ख बुद्धिवाले वह लोग जटा भस्म अस्थि, को धारणकर शिवकी दीक्षा में प्रवेशकरें कि जहां मांस मदिराही देवता की भांति पूजनीय गिना जाता है ॥ २९ ॥ पुरुषों के मध्यमें मर्यादा के धारण करनेवाले वेद तथा ब्राह्मणोंकी तुमने निन्दा की इसहेतु तुम पाखण्डमें पड़रहो ॥३०॥लोकों का वेदमार्ग सनातन तथा कल्याणकारी है क्योंकि प्रथम ऋषियोंने इसका आश्रय लियाहै इसका प्रमाण जनार्दन भगवान हैं ॥ ३१ ॥ मैंतोंक सनातन मार्गरूप इस शुद्ध वेदकी निंदा करके तुम पाखण्ड मे पड़ो ॥ ३२ ॥ मैत्रेयजीने कहा—कि जब भृगुजी इसभांति शाप देनेलगे—तब वे भगवान् महादेव कुछ उदास चित्तहो अपने अनुचरों समेत वहांसे चलेगये ॥ ३३ ॥ हेविदुर! उन विश्व स्रष्टाओं ने विष्णु भगवान के पूजन वाले इस यज्ञ को सहस्र वर्ष पर्य्यन्त किया ३४ ॥ फिर प्रयाग में जहां गंगा यमुना मिलीहैं वहांजा स्नान कर शुद्ध हो अपने २ धाम कोगये ३५ ॥

इतिश्री मद्भागवते महापुराणे चतुर्थस्कन्धे सरलाभाषाटीकायां द्वितीयोऽध्यायः ॥ २ ॥

मैत्रेय जी ने कहा कि—इस भांति इन दोनों श्वसुर जामाता में शत्रुता करतेरहते बहुत समय व्यतीत होगया, ॥ १ ॥ जब ब्रह्माजी ने दक्षको सम्पूर्ण प्रजापतियों का अधिपति किया ॥ २ ॥ तब उसने घमण्ड में आकर सब ब्रह्म वादियों का तिरस्कार करके बृहस्पति सव नामक श्रेष्ठ यज्ञका आरम्भ किया ॥ ३ ॥ इस यज्ञमें ब्रह्मर्षि, देवर्षि, तथा पितृगण और देवता यह सम्पूर्ण शृंगार को हुई अपनी २ स्त्रियों को संग लेकर आये ॥४॥ आकाश मार्ग से स्त्रियो समेत जाते हुये देवताओंके मुखसे पिता के यज्ञका महोत्सव सुनकर ॥ ५ ॥तथा गले में पदक पहिने सुंदर वस्त्र धारण किये देवताओं को स्त्रियोंके साथ अपने घरके निकट से जाते देख ॥ ६ ॥ प्रसन्न तथा प्रफुल्लित होकर सतीजी ने भूतपति महादेवजी से कहा ॥ ७ ॥ कि आपके श्वशुर प्रजापति

महोत्सवः किल । वयंचतत्राभिसरामवाम तेयत्यर्थिनामी विबुधाव्रजंतिहि ॥ ८ ॥ तस्मिन्भगिन्यो ममभर्तृभिः स्वकैर्ध्रुवं गमिष्यन्ति सुहृद्दिदृक्षवः । अहंचतस्मिन्भवताभिकामये सहोपनीतं परिबर्हमर्हितुम् ॥ ९ ॥ तत्रस्वसॄर्मेननुभर्तृसंमिता मातृष्वसॄः क्लिन्नधियंचमातरम् । द्रक्ष्ये चिरोत्कण्ठमनाः महर्षिभिरुन्नीयमानंच मृडाध्वरध्वजम् ॥ १० ॥ त्वय्येतदाश्चर्यमजात्ममायया विनिर्मितंभातिगुणत्रयात्मकम् तथाऽप्यहंयोषिदतत्त्वविच्च ते दीनादिदृक्षे भव मे भवक्षितिम् ॥ ११ ॥ पश्यप्रयांतीरभवान्ययोषितोऽप्यलंकृताः कांतसखा वरूथशः । यासांव्रजद्भिःशितिकंठ मण्डितम् नभो विमानैः कलहंसपाण्डुभिः ॥ १२ ॥ कथंसुतायाःपितृगेहकौतुकं निशम्य देहः सुरवर्यनेङ्गते । अनाहूताअप्यभियंति सौहृदं भर्तुर्गुरोर्देहकृतश्च केतनम् ॥ १३ ॥ तन्मेप्रसीदेदममर्त्यवांछितं कर्तुंभवान्कारुणिकोवतार्हति । त्वयात्मनोऽर्धेऽहमदभ्रचक्षुषा निरूपितामाऽनुगृहाणयाचितः ॥ १४ ॥ ऋषिरुवाच ॥ एवंगिरित्रः प्रियया ऽभिभाषितः प्रत्यभ्यधत्तप्रहसन्सुहृत्प्रियः । संस्मारितोमर्मभिदः कुवागिषून् यानाह को विश्वसृजांसमक्षतः ॥ १५ ॥ श्रीभगवानुवाच ॥ त्वयोदितं शोभनमेवशोभने अनाहुता अप्यभियन्तिबन्धुषु । ते यद्यनुत्पादितदोषदृष्टयो बलीयसाऽनात्म्यमदेनमन्युना ॥ १६ ॥ विद्यातपोवित्तवपुर्वयःकुलैःसतां गुणैःषड्भिरसत्तमेतरैः । स्मृतौ हतायांभृतमानदुर्दृशः स्तब्धानपश्यन्तिहिधाम भूयसाम् ॥ १७ ॥ नैतादृशानां स्वजनव्यपेक्षया गृहान्प्रतीयादनवस्थितात्मनाम् । येऽभ्यागतान् वक्रधियाऽभिचक्षते आरोपितभ्रूभिरमर्षणाक्षिभिः ॥ १८ ॥ तथा

दक्षके घरमें यज्ञ होरहा है इस हेतु हे भर्त्ता ! हम और तुम दोनो वहां को चलें, क्योंकि सब देवतागण वहां जारहे हैं ॥८॥ उस यज्ञमें मेरी बहिनें भी अपनेर पतियों के साथ सुहृदोंके देखने की इच्छा से आवेंगी उस यज्ञमें तुम सहित मैं कामना करती हूं कि यज्ञमें पिताके दियहुये दहेज का ग्रहण करूं ॥ ९ ॥ और मुझको वहांपर अपनी बहनों को उनके सतीओं युक्त तथा मातो व माता की बहिनों तथा ऋषिलोगोंके संयुक्त यज्ञ तथा उसकी ध्वजा के देखनेका उत्कंठा है ॥१०॥ हे अज ! यह त्रिगुणात्मक सृष्टि आप की माया से प्रकाशित है इस हेतु आपको कुछ आश्चर्य नहीं परन्तु मैं स्त्री आपके तत्वको न जानने वाली कृपण होकर अपनी जन्म भूमिको देखना चाहती हूं ॥ ११ ॥ हे स्वामी ! यह दूसरी स्त्रियें भी समूहके समूह श्रृंगार से सज्जित हो अपने पतियोंके संगजाती हैं हे नीलकंठ ! जिनके जातेहुये विमानो से आकाश छारहा है ॥ १२ ॥ हे सुरश्रेष्ठ ! पिताके घर कौतुक सुनकर मैं कैसे इच्छा न करूं, मित्र, पिता गुरू, और पति इनके घर बिना बुलाये भी जाना चाहिये ॥ १३ ॥ हे देव ! मेरे ऊपर प्रसन्नहो हे कृपालु ! मेरी मनोकामना आप पूर्णकरने योग्य हो, ज्ञान चक्षुसे मैं तुम्हारे आत्मा की अर्द्ध भागिनी हूं इससे याचना करती हूं आप मुझपर अनुग्रह करो ॥१४॥ मैत्रेय जीने कहा कि-सतीने जब भगवान महादेव से इस भांति विनतीकी तो दक्षके खोटे बचनोंको जो मर्म स्थलके भेदने वाले थे स्मरणकर सबके प्रिय महादेव जी ने हंसकर कहा ॥ १५ ॥ श्री महादेव जी बोले कि-हे शोभने ! जो तुमने कहा कि भाई, पिता केघर बिना बुलाये भी जाना चाहिये, सो यह ठीक है, किंतु जब इन संबंधियों की दृष्टि बलवान तथा अनात्मा रूपी क्रोध से दूषित न होवे ॥ १६ ॥ विद्या, तप, द्रव्य, देह, अवस्था तथा कुल यह छहसंतों के गुण हैं और खोटों के यही दोषभूतहैं, इनसे विचार नष्टहोनेके कारण बढ़ेहुये घमण्ड से अंध पुरुष महात्माओं के तेजको नहीं देखते ॥ १७ ॥ इससे संबंधियों के घरकी ओर भी न देखना चाहिये, क्योंकि यह अपने घरआये हुओं को खोटी बुद्धि और कुटिल भ्रकुटी से देखा करते हैं,

ऽरिभिर्नव्यथतेशिलीमुखैःशेतेऽर्दिताङ्गो हृदयेनदूयता। स्वानांयथावक्रधियांदुरुक्तिभिर्दिवानिशंतप्यति मर्मताडितः ॥ १९ ॥ व्यक्तंत्वमुत्कृष्टगतेःप्रजापतेः प्रियात्मजानामसिसुभ्रुसंमता। अथापिमानंनपितुःप्रपत्स्यसे मदाश्रयात्कः परितप्यते यतः ॥ २० ॥ पापच्यमानेनहृदातुरेन्द्रियः समृद्धिभिः पूरुषबुद्धिसाक्षिणाम्। अकल्प एषामधिरोढुमञ्जसा परंपदंद्वेष्टियथाऽसुराहरिम् ॥ २१ ॥ प्रत्युद्गमप्रश्रयणाभिवादनंविधीयतेसाधुमिथःसुमध्यमे। प्राज्ञैःपरस्मैपुरुषायचेतसा गुहाशयायैवनदेहमानिने ॥ २२ ॥ सत्त्वंविशुद्धंवसुदेवशब्दितंयदीयतेतत्रपुमानपावृतः। सत्त्वेचतस्मिनभगवान्वासुदेवो ह्यधोक्षजोमेनमसाविधीयते ॥ २३ ॥ तत्तेनिरीक्ष्योनपिताऽपिदेहकृद्दक्षो ममद्विट्तदनुव्रताश्चये। योविश्वसृग्यज्ञगतंवरोरु मामनागसंदुर्वचसाऽकरोत्तिरः ॥ २४ ॥ यदिव्रजिष्यस्यतिहायमद्वचो भद्रंभवत्यान ततोभविष्यति। सम्भावितस्यस्वजनात्पराभवोयदा ससद्योमरणायकल्पते ॥२५॥

इतिश्रीमद्भा०महापु०चतुर्थ०उमारुद्रसंवादेतृतीयोऽध्यायः ॥३॥

मैत्रेयउवाच ॥ एतावदुक्त्वाविररामशंकरः पत्न्यंगनाशं ह्युभयत्रचिन्तयन्। सुहृद्दिदृक्षुःपरिशंकिता भवान्निष्क्रामती निर्विशतीद्विधाऽऽससा ॥ १ ॥ सुहृद्दिदृक्षाप्रतिघातदुर्मनाः। स्नेहाद्रुदत्यश्रुकलातिविह्वला। भवंभवान्यप्रतिपूरुषंरुषा प्रधक्ष्यतीवैक्षतजातवेपथुः ॥ २ ॥ ततोविनिःश्वस्यसतीविहाय तंशोकेनरोषेणचदू

॥ १८ ॥ खोटी बुद्धि वाले संबंधियों के खोटे बचनो से जितना कष्ट होता है उतना शत्रुके बाणों से सम्पूर्ण अंगछिद जानेपर भी नहीं होता क्योंकि खोटे बचनो से नींद भी नहीं आती और शरों से बिंधेहुये को निद्रातो आजाती है ॥ १९॥ ऊंची गतिको प्राप्त हुये दक्षकी पुत्रियों में तू प्यारी है परन्तु तेरा सन्मान नहीं होगा क्योंकि मेरे संबंध से दक्षको बड़ा संताप रहता है ॥ २० ॥ निरहंकार पुरुषों की समृद्धि पुण्य और कीर्त्यादिक को देखकर दुर्जन पुरुष साधुओं पर जल उठते हैं, कारण कि वह उनके ऐश्वर्य को पातो सकते नहीं परद्वेष रखते हैं जैसे असुर श्रीहरिका कुछ कर नहीं सके परन्तु उनसे द्वेष रखते हैं ॥ २१ ॥ हे सुमध्यमे! आसन से उठखड़ा होना, नम्रीभूत होना—यह साधुओं के मिषसे अंतर्यामी भगवान को किया जाता है देहाभिमानियों को नहीं किया जाता ॥ २२ ॥ विशुद्ध, सत्व वसुदेव यह सब सतोगुण, सर्वव्याप्त भगवान को कहते हैं, उन भगवान वासुदेव अधोक्षज को मैं नमस्कार करता हूं ॥ २३ ॥ दक्ष तुम्हारा उत्पन्न करने वाला पिता है, परन्तु उसकी तथा उसके अनुवर्तियों की ओर तुम्हें देखना भी न चाहिये हे वरोरू! मेरा कुछ भी अपराध न था परन्तु तुम्हारे पिताने खोटे वाक्यों से मेरा तिरस्कार किया ॥ २४ ॥ जो तुम मेरीबात न मानकर वहां जाओगी तो तुम्हारा भला कदापि नहोगा क्योंकि सम्बधियों के तिरस्कार से निश्चयही मरण प्राप्त होता है ॥ २५ ॥

इति श्री भागवते महापुराणे चतुर्थस्कन्धे सरला भाषाटीकायां तृतीयोऽध्यायः ॥ ३ ॥

मैत्रेयजी ने कहा—कि महादेवजी पत्नी के अंग का नाश दोनों ओर विचार कर ऐसा कह चुप होरहे, और सुहृदों के देखने की इच्छा करने वाली सती कभी बाहरजाती है और कभी महादेवजी की शंका करके फिर भीतर आती है ॥ १ ॥ सुहृदों को देखने की कामना के प्रतिघात से सती उदास चित्त, प्रेम के मारे रुदन कर रही है, तथा उस के नेत्रों से अश्रुधारा बहरही है ऐसे वह बिह्वल सती क्रोध से कांपती हुई महादेवजी की ओर ऐसे देखने लगी कि मानो भस्मकर देगी ॥ २ ॥ फिर स्त्री स्वभाव से मूढ़मति सती शोकित तथा क्रोधित हृदय से श्वास लेकर संतोंके प्यारे महादेवजी को जिनोंने स्नेह से अपना आधा अंग देदियाहै, उन्हे छोड़कर अकेले पिता

यताद्द्रुतम् । पित्रोरगात्स्त्रैणविमूढधीर्गृहान् प्रेम्णात्मनो योऽर्धमदात्सतांप्रियः ॥ ३ ॥ तामन्वगच्छन्द्रुतविक्रमांसतीमेकां त्रिनेत्रानुचराःसहस्रशः । सपार्षदयक्षामणिमन्मदादयः पुरोवृषेन्द्रास्तरसागतव्यथाः ॥ ४ ॥ तांसारिकाकन्दुकदर्पणाम्बुजश्वेतातपत्रव्यजनस्रगादिभिः । गीतायनैर्दुन्दुभिशंखवेणुभिर्वृषेन्द्रमारोप्य विटङ्कितायगुः ॥ ५ ॥ आब्रह्मघोषोर्जितयज्ञवैशसं विप्रर्षिजुष्टंविबुधैश्चसर्वशः । मृद्दार्वयःकांचनदर्भचर्मभिर्निसृष्टभाण्डं यजनंसमाविशत् ॥६ ॥ तामागतांतत्रनकश्चनाऽऽद्रियद्विमानितां यज्ञकृतोभयाज्जनः । ऋतेस्वसॄर्वैजननींचसादराः प्रेमाश्रुकण्ठ्यःपरिषस्वजुर्मुदा ॥ ७ ॥ सोदर्यसंप्रश्नसमर्थवार्तया मात्राचमातृष्वसृभिश्चसादरम् । दत्तांसपर्यांवरमासनंच सानादत्तापित्राऽप्रतिनन्दितासती ॥ ८ ॥ अरुद्रभागंतमवेक्ष्यचाध्वरं पित्राचदेवे कृतहेलनंविभौ । अनादृतायज्ञसदस्यधीश्वरी चुकोपलोकानिवधक्ष्यतीरुषा ॥ ९ ॥ जगर्हसाऽमर्षविपन्नयागिरा शिवद्विषंधूमपथश्रमस्मयम् । स्वतेजसाभूतगणान्समुत्थितान्निगृह्य देवीजगतोऽभिशृण्वतः१० ॥ श्रीदेव्युवाच ॥ नयस्यलोकेऽस्त्यतिशायिनः प्रियस्तथाऽप्रियोदेहभृतांप्रियात्मनः । तस्मिन्समस्तात्मनिमुक्तवैरके ऋतेभवन्तंकतमःप्रतीपयेत् ॥ ११ ॥ दोषान्परेषांहिगुणेष्वसाधवो गृह्णन्तिकेचिन्नभवादृशाद्विज । गुणांश्चफल्गून्बहुलीकरिष्णवो महत्तमास्तेष्वविदद्भवानघम् ॥ १२॥ नाश्चर्यमेतद्यदसत्सुसर्वदा महद्विनिन्दाकुणपात्मवादिषु । सेर्ष्यंमहापूरुषपादपांसुभिर्निरस्ततेजस्सु तदेवशोभनम्१३

के घर को चली ॥ ३ ॥ अकेली शीघ्रता पूर्वक जाती देख महादेवही के अनुचर नंदीश्वर के साथ तथा पार्षद, यक्ष, मणिमान और मद आदिक निर्भय होकर सती के पीछे चलदिये ॥ ४ ॥ सतीजीको नंदीगण पर बिठाय मैना, गेंद, दर्पण, कमल, श्वेतछत्र, बीजना, माला इत्यादिक से शोभित श्रीशिवजी के सेवक गाते दुंदुभी, शंख, वंशी आदि बजाते चले ॥ ५ ॥ जहांपर वेदगान से यज्ञ सम्बन्धी पशुओं की हिंसा चारों ओर होरही है और जिसके आसपास ब्राह्मण और देवता बैठेहुए हैं जहांपर मिट्टी, काष्ठ, लोह, सुवर्ण दाभ, चर्म, इनके पात्र शोभायमान हैं ऐसी यज्ञ भूमि में सती नें प्रवेश किया ॥ ६ ॥ यज्ञमें सतीजी को आया देख दक्ष के डरसे माता, मौसी तथा बहिनों के अतिरिक्त किसीने भी उसका सत्कार नकिया परन्तु माता आदिक प्रेम से गद्गद होकर आनन्द पूर्वक आंसुओं से निरुद्ध कंठ हो मिलीं ॥ ७ ॥ पिता से तिरस्कार की हुई सती नें माता तथा मौसियों का सन्मान पूर्वक दीहुई पूजा और उत्तम आसन को ग्रहण नहीं किया और ॥ ८ ॥ जिसमें रुद्र का भाग नहीं है और जिसमें पिता नें विभु शिवजी का अपराध किया, ऐसे यज्ञको देख अपमानित सती नें उस यज्ञ सभा में इस भांति कोप किया कि मानों त्रिलोकी का नाशकर देंगी ॥ ९ ॥ शिव द्रोही और कर्ममार्ग के अभ्यास से अभिमानी दक्ष को भूतगण मारनें के हेतु उठे, परन्तु देवी सती नें उन्हें अपनें ऐश्वर्य से निवारण कर सब जगत के सुनते क्रोध से निन्दा करती हुई बोली ॥१०॥ देवीजीनेंकहा कि लोकोंके प्रिय आत्मा, सर्वरूप तथा निर्वैर महादेव जी का नकोई अप्रिय है और नकोई प्रिय है ऐसे महादेव से तेरे अतिरिक्त और कौन शत्रुता करे। ॥ ११ ॥ हे द्विज ! तेरी सदृश निंदक तथा दुर्जन दूसरोंके गुणों में से केवल दोषही लेते हैं और जो गुण, दोष दोनोंही को ग्रहण करते हैं वह मध्यस्थ और जो थोडे से गुणों को बहुत करके मानते हैं वह महत्तम हैं तूने ऐसे महात्मा शिवजी का अपमान किया ॥ १२ ॥ मिथ्या भूत देहको बडा मानने वाला दुर्जन मनुष्य सज्जनों की डाह से निंदा करे तो कोई आश्चर्य नहीं है, क्यों कि महात्माओं की चरण रेणुकासे निरस्त तेज हुए दुष्ट लोगों को यही योग्य है ॥ १३ ॥ किसी

यद्द्व्यक्षरंनाम गिरेरितंनृणां सकृत्प्रसङ्गादघमाशुहन्ति तत्। पवित्रकीर्तिंतमलंघ्यशासनं भवानहोद्वेष्टिशिवंशिवेतरः॥ १४ ॥ यत्पादपद्मंमहतां मनोऽलिभिर्निषेवितंब्रह्मरसासवार्थिभिः। लोकस्ययद्वर्षतिचाशिषोऽर्थिनस्तस्मै भवान्द्रुह्यतिविश्वबन्धवे ॥ १५ ॥ किंवाशिवाख्यमशिवंनविदुस्त्वदन्ये ब्रह्मादयस्तमवकीर्यजटाःश्मशाने। तन्माल्यभस्मनृकपाल्यवसत्पिशाचैर्ये मूर्धभिर्दधतितच्चरणावसृष्टम्॥१६ कर्णौपिधायनिरयाद्यदकल्पईश धर्मावितर्यसृणिभिर्नृभिरस्यमाने। छिन्द्यात्प्रसह्यरुशतीमसतीं प्रभुश्चेज्जिह्वामसूनपिततोविसृजेत्सधर्मः॥ १७ ॥ अतस्तवोत्पन्नमिदंकलेवरं नधारयिष्येशितिकण्ठगर्हिणः। जग्धस्यमोहाद्धिविशुद्धिमन्धसो जुगुप्सितस्योद्धरणंप्रचक्षते ॥ १८ ॥ नवेदवादाननुवर्ततेमतिः स्वएवलोकेरमतोमहामुनेः। यथागतिर्देवमनुष्ययोःपृथक् स्वएवधर्मेनपरंक्षिपेत्स्थितः॥ १९ ॥ कर्मप्रवृत्तंचनिवृत्तमप्यृतं वेदेविविच्योभयलिंगमाश्रितम्। विरोधितद्यौगपदैककर्तरि द्वयंतथाब्रह्मणिकर्मनर्च्छति ॥ २० ॥ मावःपदव्यःपितरस्मदास्थिता यायज्ञशालासु नधूमवर्त्मभिः। तदन्नतृप्तैरसुभृद्भिरीडिता अव्यक्तलिंगाअवधूतसेविताः॥ २१ ॥ नैतेनदेहेनहरेकृतागसो देहोद्भवेनालमलंकुजन्मना। व्रीडाममाभूत्कुजनप्रसङ्गतस्तज्जन्मधिग्योमहतामवद्यकृत् ॥ २२ ॥ गोत्रंत्वदीयं भगवान्वृषध्वजो दाक्षायणीत्याहयदासुदुर्मनाः। व्यपेतनर्मस्मितमाशुतद्ध्यहं व्युत्स्रक्ष्यएतत्कुणपंत्वदंगजम् ॥

वार्तापर मुख से एकबार भी शिव कहाजाय तो शीघ्रही उसके सम्पूर्ण पाप नाश होजावें ऐसे निर्मल यश महादेवजी से कि जिनकी आज्ञा का कोई उलंघन नहीं करसक्ता तूने वैर किया, तू बड़ा अमंगल रूप है ॥ १४ ॥ जिन भगवान् शिवजी के चरण कमलों से भौरा रूपी सज्जन पुरुष ब्रह्म रस की चाहना करते हैं तथा जिनके चरण कमल कामार्थी मनुष्यों के काम पूर्ण करते हैं ऐसे विश्व भगवान् से तू द्रोह करता है ॥ १५ ॥ उनका नाम शिव है परन्तु अशिव होने पर भी वह कल्याण कारी है क्या कोई नहीं जानता? ब्रह्मादिक भी जानते हैं। तथा श्मशान मे जटाओं को फैलाय भस्म और मनुष्य के मस्तकों की माला धारण किये पिशाचों सहित विचरते हुये उन्हीं शिव भगवानके चरणकमल की रजको ब्रह्मादिक भी धारणकरते हैं ॥ १६ ॥ जहां निंदक ईश्वरके धर्मकी निन्दा करतेहों वहांपरसे यदि अपने मारने तथा दूसरेके मारनेमें असमर्थ हों तो कानबन्दकर वहांसे निकलजाय और जो सामर्थ्य हो तो उस नीचकी जीभको काटडाले, नहीं तो अपने प्राणों कोही त्याग करदे ॥ १७ ॥ इसीहेतु शिवजीके निन्दक तेरी देहमे उत्पन्न इस देहको नहीं रक्खूंगी क्योंकि भूल से अपवित्र अन्न के खायेहुयेकी शुद्धि वमन ही है १८ ॥ स्वरूपानन्द महामुनिकी मति, निषेध कियेहुये वेदवाक्यों का अनुसरण नहीं करती, इसी हेतु प्रवृत्ति तथा निवृत्तिमार्गमें स्थितहोकर दूसरे धर्म तथा दूसरे की निंदा नहीं करनाचाहिये १९ ॥ प्रवृत्ति और निवृत्ति मार्ग दोनोंही ठीक हैं कारण कि वेदने विचारकर दोनोंका आश्रय किया है रोगीको प्रवृत्ति तथा विरागी को निवृत्ति कर्म करना चाहिये और इन दोनों कर्मोंको जो एकही काल में करै तो ये विरोधी होजाते हैं इन दोनोंही का परब्रह्म परमात्मा शिवमें नामतक नहीं है ॥ २० ॥ हे पिता! हमारी पदवियां कि जिनके द्वारा केवल इच्छामात्र से अणिमादिक सिद्धियां प्राप्त होतीहैं तथा जिनका ब्रह्मवादी सेवन करते हैं वह तुमको नहीं मिलसक्तीं कारण कि तुम्हारी पदवियां तो यज्ञशालामें रहती हैं और धूममार्गवाले लोग तथा यज्ञमें इकट्ठहुये अन्नसे तृप्त प्राणीही उनका सेवन करते हैं ॥ २१ ॥ महादेवजीके अपराधी से उत्पन्नहुआ यह देह मेरे किसी कामका नहीं है महात्माजनों की अवज्ञा करनेवाले तुझ कुजनके प्रसंगसे मुझे लज्जा होतीहै ॥ २२ ॥ अब भगवान शिव के दक्षसुते! ऐसा कहकर तेरे सम्बन्ध का नाम लेंगे तब मुझे हास्य के विरुद्ध बड़ा

॥२३॥ मैत्रेयउवाच ॥ इत्यध्वरेदक्षमनूद्यशत्रुहन्क्षितावुदीचीं निषसादशांतवाक् स्पृष्ट्वाजलंपीतदुकूलसंवृता निमील्यदृग्योगपथंसमाविशत् ॥ २४ ॥ कृत्वासमानावनिलौजितासनासोदानमुत्थाप्यचनाभिचक्रतः शनैर्हृदिस्थाप्यधियोरसिस्थितंकण्ठाद्भ्रुवोर्मध्यमनिन्दिताऽनयत् ॥ २५ ॥ एवंस्वदेहंमहतांमहीयसा मुहुःसमारोपितमंकमादरात् । जिहासतीदक्षरुषामनस्विनीदधारगात्रेष्वनिलाग्निधारणाम् ॥ ॥ २६ ॥ ततःस्वभर्तुश्चरणाम्बुजासवं जगद्गुरोश्चिन्तयतीनचापरम् । ददर्शदेहोहतकल्मषासतीसद्यःप्रजज्वालसमाधिजाग्निना ॥ २७ ॥ तत्पश्यतांखेभुविचाद्भुतं महद्धाहेतिवादःसुमहानजायत । हन्तप्रियादैवतमस्यदेवीजहावसून्केनसतीप्रकोपिता ॥ २८ ॥ अहोअनात्म्यं महदस्यपश्यत प्रजापतेर्यस्यचराचरंप्रजाः जहावसून्यद्विमतात्मजा सतीमनस्विनीमानमभीक्ष्णमर्हति २९॥ सोयंदुर्मर्षहृदयो ब्रह्मध्रुक्चलोकेऽपकीर्तिम्महतीमवाप्स्यति यदंगजांस्वांपुरुषाद्विडुद्यतांनप्रत्यषधन्मृतयेऽपराधतः ॥ ३० ॥ वदत्येवंजनेसत्या दृष्ट्वाऽसुत्यागमद्भुतम् । दक्षंतत्पार्षदाहन्तुमुदतिष्ठन्नुदायुधाः ॥ ३१ ॥ तेषामापततांवेग निशाम्यभगवान्भृगुः । यज्ञघ्नघ्नेनयजुषा दक्षिणाग्नौजुहावह ॥ ३२ ॥ अध्वर्युणाहूयमानेदेवाउत्पेतुरोजसा । ऋभवोनामतपसासोमंप्राप्ताःसहस्रशः ॥ ३३ ॥ तैरलातायुधैःसर्वेप्रमथाःसहगुह्यकाःहन्यमानादिशोभेजुरुशद्भिर्ब्रह्मतेजसा ॥ ३४ ॥

इतिश्रीमद्भागवतेचतुर्थस्कन्धेसतीदेहोत्सर्गे०चतुर्थोऽध्यायः ४ ॥

दुःख होगा इसकारण तुझसे उत्पन्न इस अधम देहका अवश्यही त्याग करूंगा ॥ २३ ॥ मैत्रेयजीने कहा कि हे विदुर ! दक्षसुता सतीजीने इसभांति कह मौनहो उत्तरकी ओर भूमिपर बैठ, पीतांबर धारणकर आचमन ले आंखें मूंद योगमार्गका साधन किया ॥ २४ ॥ उस दूषण रहित सतीने आसन जीत प्राण और अपान वायु को समानकर उदानवायुको नाभिचक्रसे उठाय बुद्धि पूर्वक हृदयमे लाय धीरे २ कण्ठ मार्गसे भ्रुकुटी के मध्य मे चढ़ाया ॥ २५ ॥ इसभांति साधुओं के पूज्य श्रीशिवजी से बारम्बार सत्कार पूर्वक गोदमें लियेहुये अपने शरीर को उदार चित्त श्री सतीजीने दक्षकी निन्दा से त्यागने की इच्छाकर शरीर में पवन तथा अग्निको धारण किया ॥२६॥और अपनेस्वामी जगद्गुरु श्री शिवजीके चरणकमलकी गन्धका चिन्तवन करतीहुई पाप रहित सतीने औरको नहीं देखा फिर उससमय समाधि की अग्नि से उसका शरीर तत्कालही भस्म होगया ॥ २७ ॥ यह आश्चर्यहुआ देख पृथ्वी और आकाशमे बड़ा हाहाकार शब्दहुआ, कि खेदकी बात है परमदेव श्री शिवजी की प्यारी सती ने दक्ष के तिरस्कार से क्रोधित हो अपना जीवन त्याग दिया ॥२८॥ जिस प्रजापति दक्षका सम्पूर्ण प्रजाहै उसकी दुर्जनताको तो देखो कि जिसके तिरस्कारसे बारम्बार सत्कार देनेवाली उदारचित्त सती पुत्रीने प्राणत्यागदिया ॥ २९ ॥ यह ब्रह्मद्रोही, शिवद्रोही, खोटे चित्तवाला दक्ष संसार में बड़ी अपकीर्ति को प्राप्त होगा, क्योंकि जिसने अपने अपराध से प्राण त्यागतीहुई अपनी बेटीको नहीं बचाया ॥३०॥ मनुष्य ऐसा कह रहेथे, कि इतनेही में सतीका अद्भुत प्राण त्यागने देखकर भगवान शिवके पार्षदोंने दक्ष के मारने के हेतु आयुध उठाये ॥ ३१ ॥ भृगु ऋषिने पार्षदों को वेगसे आतेहुये देख यज्ञके नाश करनेवाले को नाश करनेवाली यजुर्वेद की ऋचाओंसे दक्षिणाग्निमें होमकिया ॥ ३२॥ अध्वर्यु भृगु के होम करतेहि तपसे अमृत को प्राप्तहुये सहस्रों देवता बड़े बलसे उठे ॥ ३३ ॥ देदीप्यमान देवताओं से जलतेहुये ब्रह्मतेज युक्त लकड़ियोंसे मारे जानेपर श्री शिवजी के पार्षदगण यक्ष और भूत प्रेत दशों दिशाओं में जहां तहां भागने लगे ॥ ३४ ॥

इतिश्रीमद्भा०महापुराणेचतुर्थस्कन्धेसरलाभाषाटीकायांचतुर्थोऽध्यायः ॥ ४ ॥

मैत्रेय उवाच ॥ भवोभवान्यानिधनंप्रजापते रसत्कृतायाअवगम्यनारदात् स्वपार्षदसैन्यंचतदध्वरर्भुभिर्विद्रावितंक्रोधमपारमादधे ॥ १ ॥ क्रुद्धःसुदष्टोष्ठपुटः सधूर्जटिर्जटांतडिद्वह्निसटोग्ररोचिषम् । उत्कृत्यरुद्रःसहसोत्थितोहसन्गम्भीरना दोविससर्जतांभुवि ॥२॥ ततोऽतिकायस्तनुवास्पृशन्दिवं सहस्रबाहुर्घनरुक्त्रिसूर्य दृक् । करालदंष्ट्रोज्ज्वलदग्निमूर्धजःकपालमालीविबुधोद्यतायुधः ॥३॥ तंकिंकरोमी तिगृणन्तमाहबद्धाञ्जलिंभगवान्भूतनाथः । दक्षंसयज्ञंजहिमद्भटानांत्वमग्रणीरुद्र भटांशकोमे ॥ ४ ॥ आज्ञप्तएवंकुपितेनमन्युना सदेवदेवंपरिचक्रमेविभुम् । मेनेत दात्मानमसङ्गरंहसामहीयसांतातसहःसहिष्णुम् ॥ ५ ॥ अन्वीयमानःसतुरुद्रपार्ष दैर्भृशंनदद्भिर्व्यनदत्सुभैरवम् । उद्यम्यशूलंजगदन्तकान्तकं सप्राद्रवद्घोषणभूष- णांघ्रिः ॥ ६ ॥ अथर्त्विजोयजमानःसदस्याःककुभ्युदीच्यांप्रसमीक्ष्यरेणुम् । तमः किमेतत्कुतएतद्रजोऽभूदितिद्विजाद्विजपत्न्यश्चदध्युः ॥ ७ ॥ वातानवांतिनहिसं न्तिदस्यवःप्राचीनबर्हिर्जीवतिहोग्रदण्डः । गावोनकाल्यन्तइदंकुतोरजो लोको धुनाकिंप्रलयायकल्पते ॥ ८ ॥ प्रसूतिमिश्राःस्त्रियउद्विग्नचित्ता ऊचुर्विपाकोवृजि नस्यैषतस्य । यत्पश्यन्तीनांदुहितॄणांप्रजेशः सुतांसतीमवदध्यावनागाम् ॥ ९ ॥ यस्त्वन्तकालेव्युप्तजटाकलापःस्वशूलसूच्यर्पितदिग्गजेन्द्रः । वितत्यनृत्यत्युदिता स्त्रदोर्ध्वजानुच्चाट्टहासस्तनयित्नुभिन्नदिक् ॥ १० ॥ अमर्षयित्वातमसह्यतेजसं

मैत्रय जी ने कहा कि—दक्षसे तिरस्कार पा, सतीका मरना, और यज्ञके देवताओं से पार्षदों की सेना का भागना महादेवजी ने नारदजी से सुनकर अत्यंत क्रोध किया ॥ १ ॥ रोष में भरे हुये श्री शिवजी ने होंठ चाबते हुये भयानक रूप से गंभीर नादकर, बिजली तथा आगकी सदृश तेजवाली जटाको उखाड़ कर भूमिपर पटका ॥ २ ॥ उस जटा से; अतिऊंचे शरीर से आकाश छाताहुआ, सहस्र भुजाओं वाला, कृष्णवर्ण, सूर्यके सदृश तीन नेत्रवाला, कि जिसकी भयंकर डाढें तथा प्रज्वलित अग्निके सदृश जिसके बाल मुंडमाला धारण किये और अनेक शस्त्र लियेहुये वीरभद्र उत्पन्न हुआ, और उसने विनती की ॥ ३ ॥ कि हे नाथ! मुझे क्याआज्ञा है ! मैं क्या करूं इस भांति कह हाथजोड़ खड़ाहुआ, तब शिवजी ने कहा कि हे रुद्रभट ! तूमेरे पार्षदों में श्रेष्ठ तथा मेरेअंश से उत्पन्न हुआ है इस हेतु तू दक्षके मारने योग्य है सो तू दक्षका यज्ञ समेत विनाश कर ॥ ४ ॥ हे विदुर ! क्रोधित शिवजी से आज्ञापाय देवोंके देव शिवजी की परिक्रमा करके वीरभद्र चला, उस काल बड़े वेगसे वह अपने आत्माको दूसरे बलवान लोगों के नाश करने में समर्थ समझता था ॥ ५ ॥ उसके पीछे रुद्र पार्षद नाद करते हुये चले उस समय वीर भद्रने बड़ा भयंकर गर्जना की और त्रिशूल उठाय दिशाओं को पैरोंके शब्द से शब्दाय मान करता हुआ इस प्रकार दौड़ा कि मानो मृत्युको मारेगा ॥६॥ जब दक्षका मखपांच योजनदूररहा तब ब्राह्मण ऋत्विज, यजमान, और सभासदों तथा स्त्रियों ने उत्तर दिशामें बड़ीधूल उड़ती देख चिंता की कि यह क्या है ॥ ७ ॥ ऐसी तीव्र पवन भी नहीं चलती, चोरोंके घोड़े भी नहीं हैं, उग्रदण्ड देने वाले प्राचीन बर्हिराजा के होते, कोई चोर गौओंको भी नहीं लेजासकता कि उनकी धूल होवे फिर यह धूल कहां से आई क्या अभीतो प्रलय न होजायगी ॥ ८ ॥ दक्षपत्नी प्रसूति आदिक व्याकुल चित्त होकर कहने लगीं कि अपनी निरपराधनी कन्या सतीका दक्षने तिरस्कार किया है उसी पापका यह फल है ॥ ९ ॥ जो प्रलय काल में जटाओं को फैलाकर अपने त्रिशूल के अग्रभाग से दिशाओं के हाथियों को मारते हैं तथा अस्त्र उठाये भुजारूपी ध्वजाओं को फैलाये हुये जिसके कठोर बिजली की तरह तड़ाहत के सदृश हास्य से सम्पूर्ण दिशायें फटजाती हैं ॥ १० ॥ और

मन्युप्लुतं दुर्विषहं भ्रुकुट्या । करालदंष्ट्राभिरुदस्तभागणं स्यात्स्वस्ति किं कोपयतो विधातुः ॥ ११ ॥ बह्वेवमुद्विग्नदृशोच्यमाने जनेन दक्षस्य मुहुर्महात्मनः । उत्पेतुरुत्पाततमाः सहस्रशो भयावहा दिवि भूमौ च पर्यक् ॥ १२ ॥ तावत्स रुद्रानुचरैर्मखो महानानायुधैर्वामनकैरुदायुधैः । पिंगैःपिशंगैर्मकरोदराननैः पर्याद्रवद्भिर्विदुरान्वरुध्यत ॥ १३ ॥ केचिद्बभंजुः प्राग्वंशं पत्नीशालां तथापरे । सद आग्नीध्रशालां च तद्विहारं महानसम् ॥ १४ ॥ रुरुजुर्यज्ञपात्राणि तथैकेऽग्नीननाशयन् । कुण्डेष्वमूत्रयन्केचिद्बिभिदुर्वेदिमेखलाः ॥ १५ ॥ अबाधन्त मुनीनन्ये एके पत्नीरतर्जयन् । अपरे जगृहुर्देवान्प्रत्यासन्नान्पलायितान् ॥ १६ ॥ भृगुं बबन्ध मणिमान्वीरभद्रः प्रजापतिम् चण्डीशः पूषणं देवं भगं नन्दीश्वरोऽग्रहीत् ॥ १७ ॥ सर्व एवर्त्विजो दृष्ट्वा सदस्याः सदिवौकसः । तैरर्द्यमानाः सुभृशं ग्रावभिर्नैकधाऽद्रवन् ॥ १८ ॥ जुह्वतः स्रुवहस्तस्य श्मश्रूणि भगवान्भवः । भृगोर्लुलुंचे सदसि योऽहसच्छ्मश्रु दर्शयन् ॥ १९ ॥ भगस्य नेत्रे भगवान्पातितस्य रुषा भुवि । उज्जहार सदःस्थोऽक्ष्णा यः शपन्तमसूसुचत् ॥२०॥ पूष्णश्चापातयद्दन्तान्कालिंगस्य यथा बलः । शप्यमाने गरिमाणि योऽहसद्दर्शयन्दतः ॥ २१ ॥ आक्रम्योरसि दक्षस्य शितधारेण हेतिना । छिन्दन्नपि तदुद्धर्तुं नाशक्नोत्त्र्यम्बकस्तदा ॥ २२ ॥ शस्त्रैरस्त्रान्वितैरेवमनिर्भिन्नत्वचं हरः । विस्मयं परमापन्नो दध्यौ पशुपतिश्चिरम् ॥ २३ ॥ दृष्ट्वा संज्ञपनं योगं पशूनां स पतिर्मखे । यजमानपशोः कस्य कायात्तेनाहरच्छिरः ॥ २४ ॥ साधुवादस्तदा तेषां कर्म तत्तस्य शं-

---

जिसके रोषको कोई नहीं सह सकता तथा जिसका क्रोधभरी कुटिल भ्रकुटी म और करालडाढ़ों से सम्पूर्ण तारागण अस्त होजाते हैं ऐसे असह्य प्रभाव वाले श्री शिवजी को क्रोधित करके ब्रह्मा काभी कल्याण नहीं होसकता ॥ ११ ॥ सब मनुष्य इसप्रकार व्याकुल चित्त होकर कह रहेथे कि इतनेहीमें अनेक भांतिके भय सूचक उत्पात आकाश और पृथ्वी में होनेलगे ॥ १२ ॥ हे विदुर ! इतनेही में नाना भांतिके शस्त्रों वाले काले, पीले, मगर केसे उदर और मुखवाले वामन इत्यादिक नाना भांतिके रुद्रगणों ने उस महा यज्ञको आघेरा ॥ १३ ॥ उस में कितनों होने यज्ञके आगे की ध्वजा उखाड़ली, कितनो हीने पत्नीशाला, कितनो हीने यज्ञशाला और कितनों हीने विहार स्थान को नष्ट भ्रष्ट करडाला ॥ १४ ॥ किसी ने यज्ञके पात्रों का फोड़डाला, किसी ने अग्निबुझा दी, किसी ने कुंडमें मूत्र करदिया और किसी ने वेदी और मखला को भेदन करदिया ॥ १५ ॥ किसी नें मुनियों को बांध लिया, किसी नें स्त्रियों का तर्ज्जना आरम्भ किया और कितनोंहीनें बैठे हुए तथा भागते हुए देवताओं को पकड लिया ॥ १६ ॥ मणिमाननें भृगु को बीरभद्रनें प्रजापति दक्षको चंडीश नें पूषा को और नंदीश्वर नें भग को बांध लिया ॥ १७ ॥ सम्पूर्ण ऋत्विज सभापति और देवता पार्षदों के पत्थरों से पीडित हो जहांतहां भागगए ॥ १८ ॥ भृगु ऋषि जो हाथ में स्रुवा लिये यज्ञ कररहे थे, उनकी डाढी भगवान बीरभद्र नें उखाड ली क्यो कि इन्हों नें सभा में डाढी दिखाकर हास्य कियाथा ॥ १९ ॥ भगवान बीरभद्र नें भगदेवता को भूमिपर पटक उनकी आंखें निकाल लीं कारण कि शाप देते हुए दक्ष को सभा में उसनें आंखों से सूचना दीथी ॥ २० ॥ जिस भांति भगवान् बलदेवजी नें कलिंग के दांत तोडे थे उसी भांति पूषाके भी दांत तोड गए क्यों कि महादेवजी को शाप देते समय यह दांत दिखाकर हंसा था ॥ २१ ॥ बीरभद्र दक्ष की छाती पर चढ तीव्र शस्त्र से उस का शिर काटने लगे परन्तु उस समय वह नहीं काट सके ॥ २२ ॥ जब अस्त्र शस्त्र सेभी उसका थोडासा चर्म नकटा तब बीरभद्रजी उसको अस्त्रशस्त्र से अबध्य जान बड़े काल तक विचार करते रहे ॥ २३ ॥ फिर यज्ञ के हेतु संज्ञपन योग अर्थात्

सताम्। भूतप्रेतपिशाचानामन्येषां तद्विपर्ययः ॥ २५ ॥ जुहावैतच्छिरस्तस्मिन्दक्षिणाग्नावमर्षितः। तद्देवयजनं दग्ध्वा प्रातिष्ठद्गुह्यकालयम् ॥ २६ ॥

इतिश्रीमद्भा० चतु० दक्षयज्ञविध्वंसनोनामपंचमोऽध्यायः ॥ ५ ॥

मैत्रेय उवाच ॥ अथदेवगणाःसर्वे रुद्रानीकैःपराजिताः। शूलपट्टिशनिस्त्रिंशगदापरिघमुद्गरैः ॥ १ ॥ संछिन्नभिन्नसर्वाङ्गाः सर्त्विक्सभ्याभयाकुलाः। स्वयंभुवेनमस्कृत्यकार्त्स्न्येनैतन्न्यवेदयन् ॥ १ ॥ उपलभ्यपुरैवैतद्भगवानब्जसंभवः। नारायणश्च विश्वात्मानकस्याध्वरमीयतुः ॥ ३ ॥ तदाकर्ण्यविभुःप्राह तेजीयसि कृतागसि। क्षेमायतत्रसाभूयान्नप्रायेणबुभूषताम् ॥ ४ ॥ अथापियूयंकृतकिल्बिषा भवंयेबर्हिषोभागभाजंपरादुः। प्रसादयध्वंपरिशुद्धचेतसाक्षिप्रप्रसादंप्रगृहीताङ्घ्रिपद्मम् ॥ ५ ॥ आशासानाजीवितमध्वरस्य लोकःसपालःकुपितेनयस्मिन्। तमाशु देवंप्रिययाविहीनंक्षमापयध्वंहृदिविद्धंदुरुक्तैः ॥ ६ ॥ नाहंनयज्ञोनचयूयमन्येयेदेहभाजोमुनयश्चतत्त्वम्। विदुःप्रमाणंबलवीर्ययोर्वायस्यात्मतन्त्रस्यकउपायंविधित्सेत् ॥ ७ ॥ सइत्थमादिश्यसुरानजस्तैःसमन्वितःपितृभिःसप्रजेशैः। ययौस्वधिष्ण्यान्निलयंपुरद्विषःकैलासमद्रिप्रवरंप्रियंप्रभोः ॥८॥ जन्मौषधितपोमंत्रयोगसिद्धैर्नरेतरैः। जुष्टंकिन्नरगन्धर्वैरप्सरोभिर्वृतंसदा ॥ ९ ॥ नानामणिमयैःशृङ्गैर्नानाधातुविचित्रितैः। नानाद्रुमलतागुल्मैर्नानामृगगणावृतैः ॥ १० ॥ नानाऽमलप्रस्रवणैर्नानाकन्दरसानु

कंठ घोटकर मारनेका मन्त्र जान वीरभद्रने यजमान रूपी पशु का सिर मरोड़कर देहसे उतार लिया ॥ २४ ॥ इस कर्म को देखकर भूत प्रेत पिशाचों में बड़ा उत्साह और आनन्द हुआ परन्तु देवताओं को शोक हुआ ॥ २५ ॥ वीरभद्र ने क्रोधित होकर दक्ष का सिर दक्षिणाग्नि में होमदिया इस भांति वह यज्ञ को नष्ट भ्रष्ट कर के कैलाश को चलगए ॥ २६ ॥

इति श्रीभागवते महापुराणे चतुर्थस्कन्धे सरला भाषाटीकायां पञ्चमोऽध्यायः ॥ ५ ॥

मैत्रेयजीने कहा कि—शिवजी के कटक से हारे तथा शूल, पट्टिश खांडा, गदा मुद्गर ॥ १ ॥ से छिन्नभिन्न हुये सम्पूर्ण देवताओं ने ऋत्विज और सभासदों को साथ ले डरसे व्याकुल होतेहुए ब्रह्माजी के निकट जाकर प्रणाम कर सम्पूर्ण वृत्तांत निवेदन किया ॥ २ ॥ परन्तु ब्रह्मा और विश्वात्मा भगवान पहिलेहीसे इस भविष्य वृत्तांतको जान दक्षयज्ञमें नहीं गयेथे ॥ ३ ॥ देवताओं की दुहाई सुन ब्रह्माजीने कहा कि तेजस्वी मनुष्य के अपराध करने के पीछे जो उनके अपराध करने की इच्छा रखताहै उसका फल अच्छा नहीं होता है ॥ ४ ॥ तिसपर भी तुमने यज्ञके भाग योग्य महादेव जी को यज्ञके भाग से वंचित रक्खा, इस कारण अवतक शीघ्र प्रसन्न होनेवाले शिवजी के चरणों में शुद्ध चित्त से गिरकर उनको प्रसन्न करो ॥ ५ ॥ यदि यज्ञ करने की फिर इच्छा हो तो खोटे वचनों से हृदय में बिंधेहुए स्त्री रहित उन शिवजी के निकट जाकर क्षमा मांगो कि जिनके कोप से लोक पालों समेत इस लोक का नाश होता है ॥ ६ ॥ और उन स्वतन्त्र शिवजीके आत्म तत्त्व बल तथा पराक्रमकी थाह न मैं जानताहूं न यज्ञभगवानही जानतेहैं और न तुम जानतेहो तथा न कोई प्राणी और मुनिही जानताहै वहां कोई कुछ यत्न नहीं करसकता ॥ ७ ॥ ब्रह्माजी इसभांति देवताओं को आज्ञा दे पितरों और प्रजापतियों को संगले ब्रह्मलोकसे शिवजीके पर्वतोत्तम कैलाश पर्वतपर गये ॥ ८ ॥ जहांपर जन्म औषधि तप मंत्र और योगकी सिद्धियें देनेवाले देवता किन्नर गन्धर्व, अप्सरा सदैव बसा करते हैं ॥ ९ ॥ नानाभांति की धातुओं से चित्रित रंगविरंगी पर्वतों की चोटियों में नानाप्रकार की मणियें शोभित हैं और नानाभांति के वृक्ष लता और गुल्म फूल फलों से भरे शोभित होरहे हैं और मृगों के यूथ के यूथ दौड रहेहैं ॥ १० ॥ अनेक प्रकारके

भिः। रमणंविहरंतीनांरमणैःसिद्धयोषिताम्॥ ११ ॥ मयूरकेकाभिरुतंमदान्धालिविमूर्च्छितम्। प्लावितैरक्तकण्ठानांकूजितैश्चपतत्रिणाम्॥१२॥आह्वयन्तमिवोद्धस्तैर्द्विजान्कामदुघैर्द्रुमैः। व्रजन्तमिवमातङ्गैर्गृणन्तमिवनिर्झरैः॥ १३॥ मंदारैःपारिजातैश्च सरलैश्चापशोभितम्। तमालैःशालतालैश्चकोविदारासनार्जुनैः॥ १४॥ चूतैःकदम्बैर्नीपश्चनागपुन्नागचम्पकैः। पाटलाशोकबकुलैःकुन्दैःकुरबकैरपि॥ १५ ॥ स्वर्णार्णशतपत्रैश्चवरवेणुकजातिभिः। कुब्जकैर्मल्लिकाभिश्च माधवीभिश्चमण्डितम्॥ १६॥ पनसोदुम्बराश्वत्थप्लक्षन्यग्रोधहिंगुभिः। भूर्जैरोषधिभिःपूगै राजपूगैश्चजम्बुभिः॥ १७॥ खर्जूराम्रातकाम्राद्यैःप्रियालमधुकेंगुदैः। द्रुमजातिभिरन्यैश्चराजितंवेणुकीचकैः॥ १८ ॥ कुमुदोत्पलकल्हारशतपत्रवनर्द्धिभिः। नलिनीषु कलंकूजत्खगवृंदोपशोभितम्॥ १९. ॥ मृगैःशाखामृगैःक्रोडैर्मृगेन्द्रैर्ऋक्षशल्यकैः। गवयैःशरभैर्व्याघ्रै रुरुभिर्महिषादिभिः॥ २०॥ कर्णान्त्रैकपदाश्वास्यैर्निर्जुष्टंवृकनाभिभिः। कदलीखण्डसंरुद्धनलिनीपुलिनश्रियम्॥ २१॥ पर्यस्तंनन्दयासत्याःस्नानपुण्यतरोदया। विलोक्यभूतेशगिरिंविबुधाविस्मयंययुः॥ २२॥ ददृशुस्तत्र तेरम्यामलकांनामवैपुरीम्। वनंसौगंधिकंचापि यत्रतन्नामपङ्कजम्॥ २३॥ नंदाचालकनंदाच सरितौबाह्यतःपुरः। तीर्थपादपदाम्भोजरजसाऽतीवपावने॥ २४॥ ययोःसुरस्त्रियःक्षत्तरवरुह्यस्वधिष्ण्यतः। क्रीडंतिपुंसःसिञ्चन्त्यो विगाह्यरतिकर्शिताः॥२५॥ ययोस्तत्स्नानविभ्रष्टनवकुंकुमपिंजरम्। वितृषोऽपिपिबंत्यम्भः पायय

झरने सुन्दर निर्मल बहते हैं अनेकप्रकार की कन्दरा तथा नानाभांतिके सिद्ध अपनी स्त्रियों समेत क्रीडा कर रहे हैं॥ ११॥ मोर बोल रहे हैं मदसे अंधेहुए भौंरे गूंज रहेहैं, तथा और भी अनेक प्रकारके पक्षी बोलरहे हैं॥१२॥ कामना पूर्ण करनेवाले बड़े२ ऊंचेवृक्ष मानो पक्षिओंको बुलारहे हैं, बड़े२ हाथियोंके गमनकरनेसे चलताहुआ और झरनोंके शब्दसे बोलताहुआ प्रतीतहोताहै१३॥ वहां मंदार, पारिजात, सरल, तमाल, शाल, ताल, लालकचनार, असन, अर्जुन॥ १४॥ आम, कदंब, नीम, अशोक, पुन्नाग, नागकेशर, चम्पा, गुलाब, सेवती, अशोक, मौलसिरी, कुंद, कुरबक, ॥ १५॥ सुनहला रंग के सौ पंखुरी वाले कमल, सुंदर २ बांस, कुब्जक, मल्लिका, माधवी, ॥ १६॥ कटहल, गूलर, पीपल, पिलखन, वट, हिंगु, भूर्ज, औषधियां, सुपारी, राजपूग, जामुन, ॥ १७॥ खजूर, आंबला, आम्र, दाख, मौहा, और इंगुदी इत्यादिक नाना भांति के वृक्षों की शोभा होरही है और भी नाना भांति के वृक्ष, वायु से शब्दायमान बांस॥१८॥ व कुमुद, उत्पल, कल्हार तथा शतपत्रवाले कमलोंसे बन शोभित होरहा है, सरोवरों में पक्षियों के केलि करने से अपूर्व शोभा होरही है॥१९॥ हिरन, बन्दर, बाराह, सिंह, रीछ, सेही, लालगाय, कस्तूरीमृग, बाघ, और अरने भैंस इत्यादिक फिररहे हैं॥ २०॥ जिनके कानोंमें आंत है, ऐसे पशु, घोड़ेके मुखकी सदृश मुखवाले जीव अर्थात् किन्नर, कस्तूरी मृग आदिक केलेके बन से घिरेहुए सरोवरों के तट शोभायमानहैं॥२१॥आगे बढ़कर देखा तो नन्दानामगंगा चारोंओर बहरही है ऐसे शिवजीके कैलाश पर्वतको देख देवताओंको बड़ा आश्चर्यहुआ॥२२॥ कैलाश पर्वतमें अति सुंदर कुबेरकी अलकापुरी देखी, और वहांही पर सौगंधिक कमलों वाला सौगंधिक बन देखा॥ २३॥ उस पुरके बाहरकी ओर हरिभगवान् के चरणों से अति पवित्र नंदा तथा अलकनंदा नदियें बहरही हैं॥ २४॥ हे विदुर! उन नदियों में देवताओं की स्त्रियाँ रति से व्याकुल होकर अपने विमानों से उतर २ क्रीड़ा करती हैं और अपने स्वामियों समेत स्नान किया करती हैं॥ २५॥ देवताओं की स्त्रियों के स्नान से उनकी कुचाओं का केसर छुटने पर नदियों का जल पीतवर्ण तथा सुगंधित रहाक-

न्तोगजागजीश्र॥२६॥तारहेममहारत्न विमानशतसंकुलाम् । जुष्टांपुण्यजनस्त्रीभिर्यथाखंसतडिद्घनम्॥२७॥हित्वायक्षेश्वरपुरींवनंसौगान्धिकंचतत् । द्रुमैःकामदुघैर्हृद्यं चित्रमाल्यफलच्छदैः ॥ २८ ॥ रक्तकण्ठखगानीकस्वरखण्डितषट्पदम् । कलहंस कुलप्रेष्ठंखरदण्डजलाशयम् ॥२९॥ वनकुञ्जरसंघृष्टहरिचन्दनवायुना। अधिपुण्य जनस्त्रीणांमुहुरुन्मथयन्मनः ॥ ३० ॥ वैडूर्यकृतसोपानावाप्यउत्पलमालिनीः । प्राप्तं किंपुरुषैर्दृष्ट्वातआराद्ददृशुर्वटम् ॥ ३१ ॥ सयोजनशतोत्सेधःपादोनविटपायतः । पर्यक्कृताचलच्छायो निर्नीडस्तापवर्जितः ॥ ३२ ॥तस्मिन्महायोगमयेमुमुक्षुशरणे सुराः । ददृशुःशिवमासीनंत्यक्तामर्षमिवान्तकम् ॥ ३३ ॥ सनन्दनाद्यैर्महासिद्धैः शांतैःसंशांतविग्रहम् । उपास्यमानंसख्याचभर्त्रागुह्यकरक्षसाम् ॥ ३४ ॥ विद्यातपोयोगपथमास्थितंतमधीश्वरम् । चरन्तंविश्वसुहृदंवात्सल्यालोकमङ्गलम् ॥ ३५ ॥ लिङ्गंचतापसाभीष्टंभस्मदण्डजटाजिनम् । अङ्गेनसन्ध्याभ्ररुचाचन्द्रलेखांचबिभ्रतम् ॥ ३६ ॥ उपविष्टंदर्भमय्यांबृस्यांब्रह्मसनातनम् । नारदायप्रवोचन्तंपृच्छतेशृण्वतां सताम् ॥ ३७ ॥ कृत्वोरौदक्षिणेसव्यंपादपद्मंचजानुनि। बाहुंप्रकोष्ठेऽक्षमालामासीनंतर्कमुद्रया ॥ ३८ ॥ तंब्रह्मनिर्वाणसमाधिमाश्रितंव्युपाश्रितंगिरिशंयोगकक्षाम् । सलोकपालामुनयोमनूनामाद्यंमनुंप्राञ्जलयःप्रणेमुः ॥ ३९ ॥ सतूपलभ्यागतमात्मयोनिंसुरासुरेशैरभिवन्दिताङ्घ्रिः । उत्थायचक्रेशिरसाऽभिवन्दनमर्हत्तमः कस्य

रता है उसी सुगंधि के कारण हाथी बिना प्यास भी जल पीते और हथिनियों को पिलाते हैं ॥ ॥ २६ ॥ वहां यक्षों की स्त्रियां सोनें, चांदी, तथा रत्नों के विमानों पर बैठाहुई इस भांति शोभित होती है कि जैसे गगन मण्डल के वादलों में बिजली शोभित होती है ॥ २७ ॥ उस कुबेर की अलका पुरी में सौगंधिक बन के भीतर नाना भांति के विचित्र फल, फूल, पत्तवाले, कामना पूरी करने वाले, वृक्ष शोभा देरहे हैं ॥ २८ ॥ कोकिलायें कूजरही हैं, भौंर मीठी मीठी गुंजारों से गूंजरहे हैं तथा कमल बनवाले जलाशय शोभाय मान हैं ॥ २९ ॥ बनके हाथियों से रगड़ खाकर चंदन से निकली हुई सुगंधि वायु में फैलकर यक्षों की स्त्रियों का चित्त कामातुर कररही है ॥ ३० ॥ सुन्दर बावड़ियें स्फटिक मणिकी सीढ़ीयों से और कमल माला से शोभित होरही हैं ऐसे उस बनके निकट ही एक बड़ा बटका वृक्ष देखा ॥ ३१ ॥ यह बटवृक्ष १०० योजन ऊंचा तथा ७५ योजन विस्तार वाला है, इसके चारों ओर सर्वत्र अचल छायाबनी रहती है उसमें किसी पक्षी का घोसला नहीं है तथा धूप नाम को भी नहीं आती ॥ ३२ ॥ उस बट के नीचे महायोगमय मुमुक्षु जनों के शरण रूप शिवजी विराजमान हैं मानों रोष त्याग कर काल बैठाहो इस भांति देवताओं नें महादेवजी को बैठे देखा ॥ ३३ ॥ वहां प्रशांत सनंदन इत्यादिक परम सिद्ध शांतस्वरूप शिवजी की उपसना कररहे हैं, और राक्षस तथा यक्षोंके राजा शिवजी के मित्र कुवेरभी उपासना कररहे हैं ॥ ३४ ॥ वे शिव, विद्या, तप, और योग मार्ग में स्थित तथा सृष्टि के सुहृद स्नेह पूर्वक विश्व का कल्याण करनेवाले मंगलरूप सर्वेश्वर हैं ॥ ३५ ॥ भस्म दंड जटा मृगचर्म तपस्वियों के अभीष्ट चिह्न अपनें कांतिवाले शरीर में धारण किये और ललाटमें चन्द्रमा की रखा को धारण किये हैं ॥३६॥ तथा कुशासनपर विराजमान और नारदजी प्रश्नों का उत्तर तथा सज्जनों को सनातन परब्रह्म का उपदेश कररहे हैं ॥ ३७ ॥ दाहिनी जंघा पर बाम चरणको धर और बायें घुटने पर अपनाकर धरकर हाथ में रुद्राक्ष की माला लिये तर्क मुद्रा को धारण किये विराजमानहैं ॥ ३८ ॥ ब्रह्मानन्द में एकचित्तहो तथा योगपदसे विराजमान ज्ञानी पुरुषों में श्रेष्ठ शिवजी को लोकपाल तथा मुनियों ने हाथ जोड़कर दण्डवतकी ॥ ३९ ॥

यथैवविष्णुः ॥ ४० ॥ तथाऽपरेसिद्धगणामहर्षिभिर्येवैसमन्तादनुनीललोहितम्। नमस्कृतःप्राहशशाङ्कशेखरंकृतप्रणामंप्रहसन्निवात्मभूः ॥ ४१ ॥ ब्रह्मोवाच ॥ जाने त्वामीशंविश्वस्यजगतोयोनिवीजयोः। शक्तेःशिवस्यचपरंयत्तद्ब्रह्मनिरंतरम्४२ त्वमेवभगवन्नेतच्छिवशक्त्योःस्वरूपयोः। विश्वंसृजसिपास्यत्सिक्रीडन्नूर्णपटोयथा ॥ ४३ ॥ त्वमेवधर्मार्थदुघाभिपत्तयेदक्षेणसूत्रेणससर्जिथाध्वरम्। त्वयैवलोकेऽवसिताश्चसेतवोयान्ब्राह्मणाःश्रद्धतेधृतव्रताः ॥ ४४ ॥ त्वंकर्मणांमङ्गलमङ्गलानां कर्तुःस्मलोकंतनुषेस्वःपरंवा। अमङ्गलानांचतमिस्रमुल्वणंविपर्ययःकेनतदेवकस्यचित् ॥ ४५ ॥ नवैसतांत्वच्चरणार्पितात्मनांभूतेषुसर्वेष्वभिपश्यतांतव। भूतानिचात्मन्यपृथग्दिदृक्षतांप्रायेणरोषोऽभिभवेद्यथापशुम् ॥ ४६ ॥ पृथग्धियःकर्मदृशोदुराशयाः परोदयेनार्पितहृद्रुजोऽनिशम्। परान्दुरुक्तैर्वितुदन्त्यरुन्तुदास्तान्मावधीदैववधान्भवद्विधः ॥ ४७ ॥ यस्मिन्यदापुष्करनाभमाययादुरन्तयास्पृष्टधियःपृथग्दृशः। कुर्वीतितत्रह्यनुकंपयाकृपांनसाधवोदैवबलात्कृतंक्रमम् ॥ ४८ ॥ भवांस्तु पुंसःपरमस्यमाययादुरन्तयाऽस्पृष्टमतिःसमस्तदृक्। तयाहतात्मस्वनुकर्मचेतःस्वनुग्रहंकर्तुमिहार्हसिप्रभो ॥ ४९ ॥ कुर्वध्वरस्योद्धरणंहतस्य भोस्त्वयाऽसमाप्तस्यमनोःप्रजापतेः। नयत्रभागंतवभागिनोददुःकुयज्विनोयेनमखोनिनीयते ५० ॥

उन ब्रह्माजी को कि जिनके चरणों में बड़े २ सुर, असुर, प्रणाम करते हैं आया देख शिवजी शीघ्रता से उठे और शिरसे इसभांति प्रणाम किया कि जैसे कश्यपजीको वामनजीने प्रणाम किया था ॥ ४० ॥ इसीभांति शिव निकटस्थ दूसरे मुनियों ने भी ब्रह्माजी को दण्डवत की, अनन्तर ब्रह्माजी ने सम्पूर्ण सृष्टि से नमस्कृत चन्द्रशेखर शिवजी से कहा ॥ ४१ ॥ ब्रह्माजी बोले—हे ईश ! तुमको मैं भलीभांति जानता हूं कि तुम विश्वरूप जगत् के योनि वीज, शक्ति, प्रकृति के पुरुषके ईश, भेद रहित निर्विकार, परब्रह्म सर्वान्तरयामी हो ॥ ॥ ४२ ॥ हे भगवन् ! तुम इस विश्वको शिव शक्ति स्वरूपसे मकड़ी के जालेकी सदृश उत्पन्न करते पालते और संहार करतेहो ॥ ४३ ॥ आपने वेदही की रक्षाके हेतु दक्षसे यज्ञ करवायाथा यह सम्पूर्ण सृष्टि की मर्यादा आपही की बांधीहुई है, कि जिसका ब्राह्मण लोग श्रद्धा पूर्वक नियमानुसार पालन करते हैं ॥ ४४ ॥ हे मंगलरूप ! श्रेष्ठ कर्म करनेवालों को वैकुण्ठ तथा मुक्ति और निषिद्ध कर्म करनेवालों को घोर नरक देनेवाले आपही हो तो फिर किसकारण से किसी पुरुष को नियम विरुद्ध फल प्राप्त होता है ॥ ४५ ॥ आपके चरणों में मन रखनेवाले, सम्पूर्ण प्राणियों में आपही को देखनेवाले सर्व विश्वको अपने रूपसे अपृथक् देखनेवाले सज्जनों का मूर्खों की भांति क्रोधसे पराभव नहीं होसकता, तो फिर आपका तो कहनाहीं क्या है ॥ ४६ ॥ इसहेतु भेद बुद्धिवाले, कर्म में दृष्टि रखनेवाले खोटी वासनावाले दूसरे का उदय देखकर कुढ़नेवाले मर्म भेदी पुरुष दूसरे मनुष्यों का खोटे बचनों से चाहे पीड़ित करें तौ भी आपसे महात्माओं का धर्म है कि दैवसे मारे इन मनुष्यों को न मारें ॥ ४७ ॥ परमेश्वर की अपार मायासे मोहित जन चाहैं भेद बुद्धि रक्खें तौ भी साधु पुरुष अपनी नम्रतासे यह बिचारकर कि ईश्वरकी इच्छा ऐसीही थी उनपर कृपाही करते हैं किन्तु मारतेही नहीं॥४८॥हे प्रभु! इसीकारण मायासेनष्टबुद्धि तथा कर्मामें लगेहुये इनलोगों के इस अपराधको क्षमाकरो; क्योंकि आपकी बुद्धि भगवान् की मायासे मोहित नहीं है इसहेतु आप सबजानतेहो॥४९॥हे रुद्र ! इस यज्ञमें यज्ञ करनेवालोंने इसके फल देनेवाले आपको यज्ञकाभाग नहींदिया, इसकारण आपने इसको विध्वन्सकिया अब आपही प्रजापति दक्षके

जीवताद्यजमानोऽयंप्रपद्येताक्षिणीभगः । भृगोःश्मश्रूणिरोहन्तुपूष्णोदन्ताश्चपूर्ववत् ॥ ५१ ॥ देवानांभग्नगात्राणामृत्विजांचायुधाश्मभिः । भवतानुगृहीतानामाशुमन्योस्त्वनातुरम् ॥ ५२ ॥ एषतेरुद्रभागोऽस्तुयदुच्छिष्टोऽध्वरस्यवै । यज्ञस्तेरुद्रभागेनकल्पतामद्ययज्ञहन् ॥ ५३ ॥

इतिश्रीमद्भा०चतुर्थस्कन्धेरुद्रसान्त्वनंनामषष्ठोऽध्यायः ॥ ६ ॥

मैत्रेयउवाच ॥ इत्यजेनानुनीतेन भवेनपरितुष्यता । अभ्यधायिमहाबाहो प्रहस्यश्रूयतामिति ॥ १ ॥ श्रीमहादेव उवाच ॥ नाघंप्रजेशबालानां वर्णयेनानुचिन्तये । देवमायाऽभिभूतानां दण्डस्तत्रधृतोमया ॥ २ ॥ प्रजापतेर्दग्धशीर्ष्णो भवत्वजमुखंशिरः मित्रस्यचक्षुषेक्षेत भागंस्वंबर्हिषोभगः ॥ ३ ॥ पूषातुयजमानस्य दद्भिर्जक्षतुपिष्टभुक् । देवाःप्रकृतसर्वाङ्गा येमउच्छेषणंददुः ॥ ४ ॥ बाहुभ्यामश्विनोःपूष्णो हस्ताभ्यांकृतबाहवः । भवन्त्वध्वर्यवश्चान्ये बस्तश्मश्रुर्भृगुर्भवेत् ॥ ५ ॥ ॥ मैत्रेयउवाच ॥ तदासर्वाणिभूतानि श्रुत्वामीढुष्टमोदितम् । परितुष्टात्मभिस्तात साधुसाध्वित्यथाब्रुवन् ॥ ६ ॥ ततोमीढ्वांसमामन्त्र्य शुनासीराःसहर्षिभिः । भूयस्तद्देवयजनं समीढ्वद्वेधसोययुः ॥ ७ ॥ विधायकार्त्स्न्येनचतद्यदाहभगवान्भवः संदधुःकस्यकायेनसवनीयपशोःशिरः ॥ ८ ॥ संधीयमानेशिरसि दक्षोरुद्राभिवी-

---

यज्ञका उद्धार करो आप ही से यह समाप्तहोगा ॥ ५० ॥ हे विभो ! अब इतना अनुग्रह कीजिये कि हमारा यजमान दक्ष जीजाय, भग देवता के नेत्र अच्छे होजायँ, भृगु के डाढी तथा पूषा के दांत निकल आवें ॥ ५१ ॥ हे मन्यो ! इन देवताओं के और ऋत्विजों के सम्पूर्ण छिन्न भिन्न हुये अंग पहिले की समान ठीक होजायँ, यह कृपा आप करिये ॥५२॥ हे कल्याण रूप ! हे यज्ञ बिध्वंसक ! इस यज्ञ में जो कुछ शेष भाग बचा है, वह सब आप का भाग है, इस प्रकार यह सब अंगीकार करते हैं, हे रुद्र ! अब आप अनुग्रह करके यह कह दीजिये कि, रुद्रके भाग से यह यज्ञ तुम्हारा पूर्ण हो ॥ ५३ ॥

इति श्रीभागवते महापुराणे चतुर्थस्कन्धे सरला भाषाटीकायां षष्ठोऽध्यायः ॥ ६ ॥

मैत्रेय जी ने कहा कि–हे महाबाहो विदुर ! जब ब्रह्माजी ने शिवजी की इस भांति प्रार्थना की तब उन्हों ने हंसकर ब्रह्माजी से कहा ॥ १ ॥ शिवजी बोले कि–हे प्रजेश ! मैं इन अज्ञानियों के अपराध का न तो वर्णन ही करता हूं न स्मरणही करता हूं–कारण कि यह मूर्खलोग देव की माया से मोहित होरहे हैं, इस लिये मैंने इनको योग्य दंडादिया है ॥ २ ॥ प्रजापति दक्ष का मस्तक तो जलगया है इस कारण उसके धड़ पर बकरे का मुखलगा दियाजाय और भग देवता अपने यज्ञके भागको मित्र देवता के नेत्रों से देखें ॥ ३ ॥ पूषा देवता पिसा हुआ अन्न यजमान के दांतों से भक्षण किया करें, और शेष देवता जिन्हों ने मुझे यज्ञका शेषभाग दिया है उन सबके अंगपूर्ण होजांयगे ॥ ४ ॥ किंतु जिनके समस्त अंग नष्ट होगये हैं उनकी भुजाओं का काम अश्विनी कुमार की भुजाओं से और हाथों का काम पूषाके हाथों से चलेगा और अध्वर्यु तथा ऋत्विज जैसे पहले थे वैसेही होजांयगे, और भृगुकी डाढी बकरे की डाढी की होगी ॥ ५ ॥ मैत्रेयजी ने कहा–कि हे विदुर ! श्री शिवजी के यह स्नेहभरे बचन् सुन समस्त प्राणियों ने प्रसन्न हो साधु२ कहा ॥ ६ ॥ फिर सब ऋषियों और देवताओंने श्री शिवजी से विनती की कि वहांपर चलकर सम्पूर्ण कार्य सिद्ध करिये तब देवताओं की आज्ञा मान शिवजी ब्रह्मा और ऋषियों सहित देवताओं को साथले उस यज्ञशाला में आये ॥ ७ ॥ जिस भांति शिवजी ने कहा था उसी भांति दक्ष प्रजापति के मस्तक का बिधान किया गया ॥ ८ ॥ मस्तक के सधान

क्षितः । सद्यःसुप्तइवोत्तस्थौ ददृशेचाग्रतोमृडम् ॥ ९ ॥ तदापृषध्वजद्वेषकलिला-त्माप्रजापतिः । शिवावलोकादभवच्छरद्ह्रद इवामलः ॥ १० ॥ भवस्तवायकृतधी-र्नाशक्नोदनुरागतः । औत्कण्ठ्याद्बाष्पकालया संपरेतांसुतांस्मरन् ॥११॥ कृच्छ्रा त्संस्तभ्यचमनः प्रेमविह्वलितःसुधीः । शशंसनिर्व्यलीकेन भावेनेशंप्रजापतिः १२ ॥ दक्षउवाच ॥ भूयाननुग्रहअहोभवता कृतोमेदण्डस्त्वयामयिभृतोयदपिप्रलब्धः॥ नब्रह्मबन्धुषुचवांभगवन्नवज्ञा तुभ्यंहरेश्चकुतएवधृतव्रतेषु ॥ १३ ॥ विद्यातपोव्रत-धरान्मुखतःस्म विप्रान्ब्रह्मात्मतत्त्वमवितुंप्रथमंत्वमस्राक् । तद्ब्राह्मणान्परमसर्ववि-पत्सुपासिपालः पशूनिवविभोप्रगृहीतदण्डः ॥ १४ ॥ योऽसौमयाऽविदिततत्त्वदृ-शासभायांक्षिप्तो दुरुक्तिविशिखैरगणय्यतन्माम् । अर्वाक्पतन्तमर्हत्तमनिन्दयाऽ-पाद्दृष्ट्याऽऽर्द्रया सभगवान्स्वकृतेनतुष्येत् ॥ १५ ॥ मैत्रेयउवाच ॥ क्षमाप्यैवंस मीढ्वांसं ब्रह्मणाचानुमन्त्रितः । कर्मसंतानयामास सोपाध्यायर्त्विगग्निभिः ॥१६॥ वैष्णवंयज्ञसंतत्यै त्रिकपालंद्विजोत्तमाः।पुरोडाशंनिरवपन्वीरसंसर्गशुद्धये ॥ १७ ॥ अध्वर्युणात्तहविषायजमानोविशांपते । धियाविशुद्धयादध्यौतथाप्रादुरभूद्धरिः॥ ॥१८॥तदास्वप्रभयातेषांद्योतयन्त्यादिशोदश । मुष्णंस्तेजउपानीतस्तार्क्ष्येणस्तोत्र वाजिना ॥ १९ ॥ श्यामोहिरण्यरशनोऽर्ककिरीटजुष्टोनीलालकभ्रमरमण्डितकुण्ड

करते ही शिवजीने दयादृष्टि से उसकी ओर देखा, दृष्टिके पड़तेही वह प्रजापति दक्ष ऐसेउठकर बैठगया मानो निद्रा से अभीजागा है और नेत्र खोलकर देखातो अपने आगे महादेव जी को देखा ॥९॥यद्यपि शिवके द्रोहसे उसका चित्त मलीनहोगयाथा परन्तु महादेवजीका दर्शन करतेही उसका चित्त शरद्के तड़ाग की भांति निर्मल होगया ॥ १० ॥ उसने शिवजी की स्तुतिका विचार किया परन्तु स्नेहवश कुछ न करसका और अपनी मृत कन्या सतीके शोच से दुःखके कारण आंखोंमें आंसू भरलाया ॥११॥फिर क्लेश पूर्वक चित्त को स्थिर कर, प्रेमातुर हो दक्ष प्रजापतिनें निस्कपट भावसे शिवजी की स्तुति करनलगा॥१२॥दक्षने कहा—कि हे भगवन् ! मैंने तो आपका तिरस्कार कियाथा, तौभी आपने उस अपमानका ध्यान त्यागकर मुझे दँडदिया यह बड़ीही कृपाकी, आप तथा हरि जब तुच्छ ब्राह्मणों की भी अवज्ञा नहीं करते तब तप व्रत धारी श्रेष्ठ ब्राह्मणों की अवज्ञा आपसे कैसे होसकती है ॥१३॥ हे प्रभो ! आपने विद्या, तप व्रत धारण करने वाले ब्राह्मणों को वेद मार्गकी रक्षाके हेतु प्रथम अपने मुख से उत्पन्न किया है हे भगवन् ! जैसे ग्वाला गौओं की रक्षा करता है इसी भांति आपभी सम्पूर्ण दुःखों से ब्राह्मणों की रक्षा करते हो ॥ १४ ॥ यद्यपि मैंने तत्व ज्ञान से रहित होकर सुर सभा के मध्य में खोटे बचनों से आप का तिरस्कार किया था तौ भी आपने उन अपराधों की गणना न करके साधुओं के तिरस्कार करनें के प्रभाव से नरक में गिरते हुए मुझको कृपा दृष्टि से बचाया हे नाथ ! अपने किये हुए उपकार से आपही सन्तुष्टहो मेरी सामर्थ्य नहीं जो इसका बदला मैं दे सकूं ॥ १५ ॥ मैत्रेयजी ने कहा कि— इस प्रकार दक्ष ने शिवजी से अपना अपराध क्षमा करवाय, ब्रह्माजी से आज्ञा मांग, उपाध्याय ऋत्विज और अग्नि सहित यज्ञ कर्म का आरम्भ किया ॥ १६ ॥ तीन प्रकार का पुरोडास विष्णु के निमित्त यज्ञ पूर्ण करने के हेतु, प्रमथादिक वीरों की शुद्धि के लिये श्रेष्ठ ब्राह्मणों को दिया ॥ १७ ॥ हे विदुर ! अध्वर्यु ने साकल्य ग्रहण किया और यजमान ने विशुद्ध बुद्धि से ध्यान किया तो उस काल हरि भगवान् प्रगट हुए ॥ १८ ॥ उस गरुड़ पर चढ़ कर कि जिस के पंखों से सामवेद निकलता है, भगवान् आये, उस काल उनके प्रभाव से सब के प्रभाव क्षीण होगये और उनकी कांति से दिशायें प्रकाशित होगईं ॥१९॥ श्यामअंग, सुवर्ण की क्षुद्र घंटिका

लास्यः। कम्ब्वब्जचक्रशरचापगदाऽसिचर्मव्यग्रैर्हिरण्मयभुजैरिवकर्णिकारः॥२०॥ वक्षस्यधिश्रितवधूर्वनमाल्युदारहासावलोककलयारमयंश्चविश्वम्। पार्श्वभ्रमद्व्यजनचामरराजहंसः श्वेतातपत्रशशिनोपररज्यमानः ॥ २१ ॥ तमुपागतमालक्ष्य सर्वेसुरगणादयः। प्रणेमुः सहसोत्थायब्रह्मेंद्रत्र्यक्षनायकाः ॥ २२ ॥ तत्तेजसाहत रुचःसन्नजिह्वाःससाध्वसाः। मूर्ध्नाधृतांजलिपुटाउपतस्थुरधोक्षजम् ॥ २३ ॥ अप्यर्वाग्वृत्तयोयस्यमहित्वात्मभुवादयः। यथामतिगृणन्तिस्मकृतानुग्रहविग्रहम् ॥ २४ ॥ दक्षोगृहीतार्हणसादनोत्तमंयज्ञेश्वरंविश्वसृजांपरंगुरुम्। सुनन्दनन्दाद्यनुगैर्वृतंमुदागृणन्प्रपेदेप्रयतःकृतांजलिः ॥ २५ ॥ दक्ष उवाच ॥ शुद्धंस्वधाम्न्युपरताखिलबुद्ध्यवस्थंचिन्मात्रमेकमभयंप्रतिषिध्यमायाम्। तिष्ठंस्तयैवपुरुषत्वमुपेत्यतस्यामास्तेभवानपरिशुद्धइवात्मतन्त्रः ॥ २६ ॥ ऋत्विज ऊचुः ॥ तत्त्वंनतेवयमनञ्जनरुद्रशापात्कर्मण्यवग्रहधियोभगवन्विदामः। धर्मोपलक्षणमिदंत्रिवृदध्वराख्यंज्ञातंयदर्थमधिदैवमदोव्यवस्थाः ॥ २७ ॥ सदस्या ऊचुः ॥ उत्पत्त्यध्वन्यशरणउरुक्लेशदुर्गेऽन्तकोग्रव्यालान्विष्टेविषयमृगतृष्णात्मगेहोरुभारः। द्वंद्वश्वभ्रेखलमृगभयेशोक

और सूर्य की भांति प्रकाशित किरीट मुकुट धारण किये, भ्रमर वत नील अलकें शोभित मुख वाले, कानों में कुंडल नाना प्रकार के आभूषण धारण किये भुजाओं में शंख, चक्र, बाण, धनुष, गदा, पद्म, खड्ग, ढाल लेने से पुष्प वृक्ष की भांति शोभित ॥ २० ॥ बनमालापहिने, उदार हास्य समेत दृष्टि की कला से सम्पूर्ण विश्वको रमण कराते वक्षः स्थल में लक्ष्मी को धारणकिये शोभायमान थे उनके दोनों ओर व्यजन और चंवर ढुल रहे थे और ऊपरकी ओर पूर्णचन्द्र की सदृश श्वेत छत्र अत्यन्त शोभा को बढ़ारहाथा ॥ २१ ॥ उन श्रीभगवान् को आया देख ब्रह्मा, रुद्र, इंद्र सहित सम्पूर्ण देवताओं ने उठ कर दंडवत प्रणाम किया ॥ २२ ॥ उन भगवान के तेज से जिनकी कांति मलीन होगई है ऐसे वह लोग भगवान की महिमा से क्षुभित चित्त हो गद्गद बर्णो से अधोक्षज भगवान की स्तुति करने लगे ॥ २३ ॥ तब ब्रह्मादिक देवताओं की मन वाणी की सब वृत्तियां बिसरगईं भगवान की महिमा का नहीं पहुंच सकी तौभी उन्हों नें कृपा करने के लियें निज स्वरूप धारणकर अपने निकट आयेहुए भगवानकी यथा मति अनुसार सबने स्तुति की ॥ २४ ॥ दक्ष नें यज्ञपात विश्वस्रष्टा ब्रह्मादिकों के श्रेष्ठ गुरु तथा सुनंदनन्द आदि पार्षदों से घिरे हुए श्री हरि के निकट जाकर पूजा की सामग्री अर्पण की, श्री भगवाननें उस पूजा की सामग्री का पात्र अपनें कर कमल से ग्रहण किया, इस से दक्ष प्रजापति ने आनंदित हो हाथ जोड़ बड़ा धैर्यता से स्तुति की ॥ २५ ॥ दक्ष नें कहा कि जाग्रदादि अवस्थाओं से रहित, शुद्ध स्वरूप, उपरामको प्राप्त हुई बुद्धि, अभय और अद्वितीय एक आपही हो, आप माया का तिरस्कार कर स्वतन्त्र होनें परभी माया से मनुष्य देहका नाटक धरते हो, उस माया में रहने से आपऐसे ज्ञान होते हैं कि मानों राग, द्वेष आदिक आपमें आगएहों परंतु यह मेरी दृष्टिका भेद है आप तो निर्लेप और निर्बिकार हैं ॥ २६ ॥ सब ऋत्विजों नें स्तुति की कि—हे निरंजन ! शिवजी के शाप से अपनें कर्मों में व्याप्त हुई बुद्धिसे धर्म के उत्पन्न करनेवाले तथा बेदके प्रतिपादक इसयज्ञ रूप आपके स्वरूप कोही हमतो जानते हैं कि जिस के हेतु देवताओं के पृथक् २ नियम हुए हैं किंतु आप के गूढ़ तत्व को नहीं जानते ॥ २७ ॥ सभासदों नें कहा कि—हे शरणागत वत्सल ! इस सृष्टि रूपी मार्ग में कि जहां कहीं ठहरनें का स्थान नहीं है और नानाभांति के दुःखदायी स्थान हैं जहां बिषय रूपी उग्रसर्प फुंकाररहाहै सुख दुःखरूप नाना भांति के गढ़े हैं दुष्ट मनुष्य घातक की समान, तथा शोक रूपी दावाग्नि प्रज्वलित होरही है उस में प्रवेश करता हुआ, तृष्णा से दुःखित

दार्थऽज्ञसार्थःपादौकस्तंशरणदकदायातिकामोपमष्टः ॥ २८ ॥ रुद्र उवाच ॥ तव वरदवरांघ्रावाशिषेहाखिलार्थेह्यपिमुनिभिरसक्तैरादरेणार्हणीये।यदिरचितधियंमाविद्यलोकोऽपविद्धं जपतिनगणयेतत्त्वत्परानुग्रहेण ॥ २९ ॥ भृगुरुवाच॥ यन्मायया गहनयाऽपहृतात्मबोधा ब्रह्मादयस्तनुभृतस्तमसिस्वपन्तः। नात्मन्श्रितंतवविदन्त्यधुनाऽपितत्त्वंसोयंप्रसीदतुभवान्प्रणतात्मबंधः ॥ ३० ॥ ब्रह्मोवाच ॥ नैतत्स्वरूपभवतोऽसौपदार्थभेदग्रहैःपुरुषायावदीक्षेत्। ज्ञानस्यचार्थस्यगुणस्यचाश्रयोमायामयाद्व्यतिरिक्तोयतस्त्वम् ॥ ३१ ॥ इंद्र उवाच ॥ इदमप्यच्युतविश्वभावनंवपुरानंदकरंमनोदृशाम्। सुरविद्विट्क्षपणैरुदायुधैर्भुजदण्डैरुपपन्नमष्टभिः ॥ ३२ ॥ पत्न्य ऊचुः ॥ यज्ञोयंतवयजनायकेनसृष्टोविध्वस्तःपशुपतिनाऽद्यदक्षकोपात्। तंनस्त्वं शवशयनाभशांतमेधंयज्ञात्मन्नलिनरुचादृशापुनीहि ॥ ३३ ॥ ऋषय ऊचुः ॥ अनन्वितंतेभगवन्विचेष्टितंयदात्मनाचरसिहिकर्मनाऽज्यसे। विभूतयेयतउपसेदुरीश्वरींनमन्यतेस्वयमनुवर्ततींभवान् ॥ ३४ ॥ सिद्धा ऊचुः ॥ अयंत्वत्कथामृष्टपीयूषनद्यांमनोवारणःक्लेशदावाग्निदग्धः। तृषार्तोऽवगाढोनसस्मारदावंननिष्क्रामतिब्रह्मसंपन्नवन्नः ॥ ३५ ॥ यजमान्युवाच॥स्वागतंतेप्रसीदेश तुभ्यंनमःश्रीनिवासश्रियाकांतयात्राहिनः। त्वामृतेऽधीशनांगैर्मखः शोभतेशीर्षहीनः कबन्धोयथापूरु

तथा विषय रूपी मृग तृष्णा के जलके वाले, शरीर तथा घरके बृहत बोझको उठाए इन अज्ञानियो का समूह किस काल आप के चरण रूपी स्थान को पावेगा ॥ २८ ॥ शिवजीने स्तुति की कि हे वरद ! मै आपके चरणारविंद में, कि जो सर्व विषय त्यागी ऋषियो के भी सत्कार पूर्वक पूजने योग्य हैं, सदैव मन लगाये रहताहूं उस मुझको यह मूर्ख लोग आचार भ्रष्ट कहते हे परन्तु मे आपकी असीम कृपा से उसे कुछभी नहीं गिनता ॥२९॥ भृगु ऋषि नें स्तुति की कि हे आत्मन् ! आपकी गम्भीर माया से ज्ञान रहित अंधकार मे पडे हुए ब्रह्मादिक भी आप के तत्व को नही जान सकते, हे भक्तों के आत्मबन्धो ! भगवान हम पर अनुग्रह करो ॥ ३० ॥ ब्रह्माजी ने स्तुति की कि—ज्ञान, अर्थ, गुणाश्रय पदार्थों को पृथक् २ भांति मे जानने वाली इंद्रियो द्वारा, जो कुछ पुरुष देखता है, उन ज्ञान पदार्थो से और अधिष्ठान रूप मायाके पदार्थों से आप पृथक् हो ॥ ३१ ॥ इंद्रने स्तुति की कि—हे अच्युत ! सृष्टि पालक चिदानन्द दृष्टिको आनन्ददायी और असुरों के नाश करनेवाले, ऊंचे आयुध उठाए हुए आपका यह आठ भुजाका स्वरूप आपको अत्यंत ही योग्य है ॥ ३२ ॥ स्त्रियों नें स्तुति की कि हे यज्ञ स्वरूप ! ब्रह्माजी नें आपकी ही पूजाके हेतु यज्ञ उत्पन्न किये हैं वही यज्ञ, दक्ष पर रोष के कारण श्रीशिवजी ने विध्वस कर दिया इससे यह अपवित्र होगयाहै हे यज्ञात्मन् ! आपनें कमल दल नेत्रो की दृष्टि से इसे पवित्र करो ॥ ३३ ॥ ऋषियों ने स्तुति की हे परमेश्वर ! आपकी लीला अत्यंत ही अद्भुत है कारण कि आप स्वयं कर्म करते हुए भी उनमे लिप्त नहीं होते, । जिन की समृद्धि के हेतु दूसरे मनुष्य भजन करते हैं, वह लक्ष्मी जी आपका अनुसरण करती हैं और आप उन का सत्कार नहीं करते, इसी कारण आपका निर्लिप्त होनाभी संभव है ॥ ३४ ॥ सिद्धों ने स्तुति की कि क्लेश रूपी दावाग्नि से दग्ध हुआ तथा तृष्णा से दुःखित यह हमारा मन रूपी हाथी आप के चरित्ररूपी पवित्र अमृत की नदी में स्नान करने से अब सृष्टि रूपी दावाग्नि का स्मरण भी नहीं करता, न उस नदी से बाहर निकलता है किंतु ऐसा ज्ञात होताहै कि वह परब्रह्म के साथ एक होगया है ॥ ३५ ॥ प्रसूति नें स्तुति की—कि हे लक्ष्मी निकेत भगवान ! आप अपनी प्यारी लक्ष्मी जी के संग आए यह बहुत अच्छा किया आप हमपर अनुग्रह करो, हमारी रक्षाकरो, हम आपको प्रणाम

षः ॥ ३६ ॥ लोकपाला ऊचुः ॥ दृष्टः किं नो दृग्भिरसद्ग्रहैस्त्वं प्रत्यग्द्रष्टा दृश्यते येन दृश्यम् । माया ह्येषा भवदीया हि भूमन् यस्त्वं षष्ठः पंचभिर्भासि भूतैः ॥ ३७ ॥ योगेश्वरा ऊचुः ॥ प्रेयान्न ते ऽन्यो ऽस्त्यमुतस्त्वयि प्रभो विश्वात्मनीक्षेन्न पृथग्य आत्मनः अथापि भक्त्येशतयोपधावतामनन्यवृत्त्याऽनुगृहाण वत्सल ॥ ३८ ॥ जगदुद्भवस्थितिलयेषु दैवतो बहुभिद्यमानगुणयात्ममायया । रचितात्मभेदमतये स्वसंस्थया विनिवर्तितभ्रमगुणात्मने नमः ॥ ३९ ॥ ब्रह्मोवाच ॥ नमस्ते श्रितसत्त्वाय धर्मादीनां च सूतये । निर्गुणाय च यत्काष्ठां नाहं वेदापरेऽपि च ॥ ४० ॥ अग्निरुवाच ॥ यत्तेजसाऽहं सुसमिद्धतेजा हव्यं वहे स्वध्वर आज्यसिक्तम् । तं यज्ञियं पञ्चविधं च पंचभिः स्विष्टं यजुर्भिः प्रणतोऽस्मि यज्ञम् ॥ ४१ ॥ देवा ऊचुः ॥ पुरा कल्पापाये स्वकृतमुदरीकृत्य विकृतं त्वमेवाद्यस्तस्मिन्सलिल उरगेन्द्राधिशयने । पुमान्शेषे सिद्धैर्हृदि विमृशिताध्यात्मपदविः स एवाद्याक्ष्णोर्यः पथि चरसि भृत्यानवसि नः ॥४॥ गंधर्वा ऊचुः ॥ अंशांशास्ते देव मरीच्यादय एते ब्रह्मेन्द्राद्या देवगणा रुद्रपुरोगाः । क्रीडाभाण्डं विश्वमिदं यस्य विभूमंस्तस्मै नित्यं नाथ नमस्ते करवाम ॥ ४३ ॥ विद्याधरा ऊचुः ॥ त्वन्मायया ऽर्थमभिपद्य कलेवरेऽस्मिन्कृत्वा ममाहमिति दुर्मतिरुत्पथैः स्वैः । क्षिप्तोऽ

करती हैं, जैसे धड़ और अंगों के होने परभी बिना शिर के शोभा नहीं देता उसी भांति यह यज्ञ भी दूसरे अंगों के होनेपर आप विना नहीं शोभित होता ॥ ३६ ॥ लोकपालों ने स्तुति की कि हे भूमन् ! सम्पूर्ण के देखने वाले आपके आत्म रूप को हमारी खोटे पदार्थों के ग्रहण करने वाली इन्द्रियां कदापि नहीं जान सकतीं, कारण कि पंचभूत से बने हुए शरीर में आप छठे जीव रूप से प्रकाश करते हो, यही आपकी माया है ॥ ३७ ॥ योगेश्वरों ने स्तुति की कि-हे प्रभु ! आप परब्रह्म हो जो पुरुष आपको अपने से पृथक् नहीं समझता उस से बढ़कर और आप को कोई प्यारा नहीं है हे भक्त वत्सल ! अनन्य वृत्ति से ध्यान करने वाले हम पर अनुग्रह करो ॥ ३८ ॥ सृष्टि की उत्पत्ति स्थिति तथा संहार में प्राणियों की अदृष्टता के कारण जिनके गुणों का नाना भांति से भेद होता है, ऐसी माया ने जिसके रूपमें त्रिगुणात्मक, (ब्रह्मा, विष्णु, महेश,) भेद सजे हैं, परन्तु रूपकी स्थिति देखते उनमें भेदकी भ्रांति तथा गुण उसका कुछ भी कारण नहीं है, ऐसे आप परमात्मा को हम प्रणाम करते हैं ॥ ३९ ॥ वेद ब्रह्मने स्तुतिकी—कि–धर्मों के उत्पन्न करनेवाले सत्वगुण के स्वीकार करनेवाले निर्गुण तथा जिनके तत्वको न मैं न दूसरा कोई जानता है उन आपको हम दण्डवत करते हैं ॥ ४० ॥ अग्निने स्तुतिकी–कि जिनकी कांति स मैं प्रकाशित हूं और श्रेष्ठ यज्ञ में घृतसे परिपूर्ण होकर हविको देवताओं के हेतु पहुंचाया करता हूं उन यज्ञपालक और पांचभांति के (अग्निहोत्र, दर्श पूर्णमास, चातुर्मास्य पशु और सोम)यज्ञ मूर्ति और पांच मंत्रों से (आः श्रावय, अस्तु श्रौषट्यज यजामहे, वषट्) पूजन किये जाते परमेश्वरको दंडवत करताहूं ४१ ॥ देवताओं ने स्तुतिकी कि—निज रचित सृष्टिको प्रलयकाल में अपने पेटमें लेकर प्रलय के जलमें शेष नागरूपी सेजके ऊपर जो सोयेथे वही भगवान जिनके ज्ञानमार्ग का सिद्ध पुरुष अपने चित्त में विचार करते हैं आज हमारे दृष्टिगोचर हुए आपने बड़ी कृपा की आप सदैव एसेही भक्तों की रक्षा करते हो ॥ ४२ ॥ गन्धर्वों ने स्तुतिकी—कि हे देव यह मरीचि आदिक ऋषी और ब्रह्मा, इन्द्र, रुद्र आदि देवता आपके अंशों के अंश हैं तथा यह सम्पूर्ण सृष्टि आपका खिलौना है उन आपको हम प्रणाम करते हैं ॥ ४३ ॥ विद्याधरों ने स्तुति की कि—जो मनुष्य सम्पूर्ण पुरुषार्थों के देनेवाले इस शरीर को पाकर आपकी मायाके वशीभूत हो" मेरा, मैं,, इस भांति का घमण्ड करते हैं तथा खोटे मार्गगामी अपने पुत्र आदिके अपमान

प्यसत्त्रिपथलालसआत्ममोहं युष्मत्कथाऽमृतनिषेवकउद्व्युदस्येत् ॥ ४४ ॥ ब्राह्मणाऊचुः ॥ त्वंक्रतुस्त्वंहविस्त्वंहुताशःस्वयंत्वंहिमन्त्रःसमिद्दर्भपात्राणिच । त्वंसदस्यर्त्विजोदम्पतीदेवता अग्निहोत्रंस्वधासोमआज्यंपशुः ॥ ४५ ॥ त्वंपुरागांरसायामहासूकरोदंष्ट्रया पद्मिनींवारणेन्द्रोयथा । स्तूयमानोनदँल्लीलयायोगिभिर्व्युज्जहर्थत्रयीगात्रयज्ञक्रतुः ॥ ४६ ॥ सप्रसीदत्वमस्माकमाकांक्षतांदर्शनंतेपरिभ्रष्टसत्कर्मणाम् । कीर्त्यमानेनृभिर्नाम्नियज्ञेशतेयज्ञ विघ्नाःक्षयंयांतितस्मैनमः ॥ ४७ ॥ मैत्रेय उवाच ॥ इतिदक्षःकविर्यज्ञंभद्ररुद्रावमर्शितम् । कीर्त्यमानेहृषीकेशेसंनिन्ये यज्ञभावने ॥४८॥ भगवान्स्वेनभागेनसर्वात्मासर्वभागभुक् । दक्षंबभाषआभास्य प्रीयमाणइवानघ ॥ ४९ ॥ श्रीभगवानुवाच ॥ अहंब्रह्माचसर्वश्च जगतःकारणंपरम्। आत्मेश्वरउपद्रष्टास्वयंदृगविशेषणः ॥ ५० ॥ आत्ममायांसमाविश्यसोऽहंगुणमयीं द्विज । सृजन्रक्षन्हरन्विश्वंदध्रेसंज्ञांक्रियोचिताम् ॥ ५१ ॥ तस्मिन्ब्रह्मण्यद्वितीये केवलेपरमात्मनि । ब्रह्मरुद्रौचभूतानिभेदेनाज्ञोऽनुपश्यति ॥ ५२ ॥ यथापुमान्न स्वांगेषुशिरःपाण्यादिषुक्वचित् । पारक्यबुद्धिंकुरुतएवंभूतेषुमत्परः ॥ ५३ ॥ त्रयाणामेकभावानांयानपश्यतिवैभिदाम् । सर्वभूतात्मनांब्रह्मन्सशांतिमधिगच्छति ५४ मैत्रेय उवाच ॥ एवंभगवतादिष्टःप्रजापतिपतिर्हरिम् । अर्चित्वाक्रतुनास्वेनदेवानुभयतोऽयजत् ॥ ५५ ॥ रुद्रंचस्वेनभागेनह्युपाधावत्समाहितः। कर्मणोदवसानेन

करने परभी, अज्ञानता से तुच्छ विषयों में तृष्णा रखते हैं वेमनुष्य भी यदि आपके चरित्रामृत का पानकरैं तो उनकी भी माया दूरहोजाय ॥ ४४ ॥ ब्राह्मणों ने स्तुतिकी, कि यज्ञ, हवि, अग्नि, मंत्र, समिधा, दर्भ, पात्र, सभासद, ऋत्विज, यजमान, तथा उसकी पत्नी, देवता, अग्निहोत्र, स्वधा, सोमवल्ली, घृत, दुग्ध, और पशु यह आपका ही स्वरूप हैं ॥ ४५ ॥ हे वेदमूर्ति ! यज्ञ और क्रतुरूप गर्जन करते हुये, वाराह मूर्ति धारण कर आप योगियों के स्तुति करत हुये, पृथ्वी को पाताल से डाढ़पर रखकर इसभांति ले आये कि जैसे हाथी कमलनी को ले आता है ॥ ४६ ॥ वह आप हमलोगों पर जो आपके दर्शनाभिलाषी तथा सत्कर्म से भ्रष्टहुये हैं, अनुग्रह करो, हे यज्ञ भवगन्! यज्ञके भीतर मनुष्य जिसकाल आपके नामका उच्चारण करते हैं उसी कालसमस्त यज्ञके विघ्न नष्ट होजाते हैं, हे भगवन् ! ऐसे आपको हम दंडवत करते हैं ॥ ४७ ॥ मैत्रेयजी ने कहा कि वहांपर सबलोग यज्ञपालक भगवान की इसभांति स्तुति कररहे थे, कि दक्ष प्रजापति ने शिवजी के विध्वंस किये यज्ञका फिर आरम्भ किया ॥ ४८ ॥ हे विदुर ! सम्पूर्ण भागों के भोक्ता सर्वरूप परमेश्वर अपना भागले प्रसन्न हो दक्ष प्रजापति से बोले ॥ ४९ ॥ श्री भगवान बोले कि सृष्टिका परम कारण सर्वात्मा, ईश्वर, साक्षी, स्वयं प्रकाश उपाधि रहित जो मैं हूं, वही ब्रह्मा और शिवजी भी हैं ॥ ५० ॥ हे द्विज ! मैं ही त्रिगुणात्मक मायाको धारण करके विश्वकी उत्पत्ति, स्थिति तथा संहार, करने के हेतु उन २ कार्य्यों के उचित पृथक् २ नाम धारण करता हूं ॥ ५१ ॥ मुझ अद्वितीय, परब्रह्म, परमात्मा को अज्ञानी मनुष्य, ब्रह्मा, रुद्र और प्राणियों से पृथक् देखते हैं ॥५२॥ जिसभांति मनुष्य अपने शिरहाथचरणादि अपनेअंगोंमेंसे किसी अंगकोभी दूसरेका नहीं जानता, इसीप्रकार मेराभक्तभी सब प्राणियों में मेराही रूप मानता है ॥५३ ॥ हे ब्रह्मन् ! सम्पूर्ण प्राणियोंके आत्मा और एक रूप हमतीनों देवोंमें जो मनुष्य अभेद बुद्धि रखता है वही शांति पाताहै ॥ ५४ ॥ मैत्रेय जी ने कहा कि श्री परमेश्वर ने दक्ष प्रजापति को जब इस भांति शिक्षादी तब दक्षने अपने यज्ञमें प्रथम उनका पूजन कर फिर दूसरे देवताओं का पूजन किया ॥ ५५ ॥ फिर मनको स्थिर करके यज्ञके शेषभाग से शिवजी का पूजनकर तथा दूसरे

सोमपानितरान्पि ॥ उदवस्यसहर्त्विग्भिःसस्नावबभृथंततः ॥ ५६ ॥ तस्माअप्यनुभावेनस्वेनैवावाप्तराधसे ॥ धर्मएवमतिंदत्त्वा त्रिदशास्तेदिवंययुः ॥ ५७ ॥ एवंदाक्षायणीहित्वासतीपूर्वकलेवरम् । यज्ञेहिमवतःक्षेत्रेमेनायामितिशुश्रुम ॥५८॥ तमेवदयितंभूयआवृङ्क्तेपतिमम्बिका अनन्यभावैकगतिंशक्तिःसुप्तेवपूरुषम् ॥५९॥ एतद्भगवतःशम्भोःकर्मदक्षाध्वर द्रुहः । श्रुतंभागवताच्छिष्यादुद्धवान्मेबृहस्पतेः ॥ ६० ॥ इदंपवित्रंपरमीशचेष्टितंयशस्यमायुष्यमघौघमर्षणम् । योनित्यदाऽऽकर्ण्यनरोऽनुकीर्तयेद्धुनोत्यघंकौरवभक्तिभावतः ॥ ६१ ॥

इतिश्रीमद्भा०म०च०दक्षयज्ञेसर्वदेवकृतस्तुतिवर्णनंनामसप्तमोऽध्यायः ॥ ७ ॥

मैत्रेय उवाच ॥ सनकाद्यानारदश्चऋभुर्हंसोऽरुणिर्यतिः । नैतेगृहान्ब्रह्मसुताह्यावसन्नूर्ध्वरेतसः ॥१॥ मृषाऽधर्मस्यभार्यासीद्दम्भंमायांचशत्रुहन् । असूतमिथुनंतत्तुनिर्ऋतिर्जगृहेऽप्रजः ॥ २ ॥ तयोःसमभवल्लोभो निकृतिश्चमहामते । ताभ्यां क्रोधश्चहिंसाचयद्दुरुक्तिःस्वसाकलिः ॥ ३ ॥ दुरुक्तौकलिराधत्तभयंमृत्युंचसत्तम । तयोश्चमिथुनंजज्ञेयातनानिरयस्तथा ॥ ४ ॥ संग्रहेणमयाऽऽख्यातःप्रतिसर्गस्तवानघ । त्रिःश्रुत्वैतत्पुमान्पुण्यंविधुनोत्यात्मनोमलम् ॥ ५ ॥ अथातःकीर्तयेवंशंपुण्यकीर्तेःकुरूद्वह । स्वायम्भुवस्यापिमनोर्हरेरंशांशजन्मनः ॥ ६ ॥ प्रियव्रतोत्तानपादौशतरूपापतेःसुतौ । वासुदेवस्यकलयारक्षायांजगतःस्थितौ ॥ ७ ॥ जायेत

सोमपीने वालों का समाप्ति देनेवाले कर्म से पूजन किया ॥ ५६ ॥ दक्षको अपनेही ऐश्वर्य्य से सम्पूर्ण सिद्धियां प्राप्त होगई थीं परन्तु तौभी देवता गण उसको धर्म में बुद्धि रहने का वरदान देकर वैकुंठ को गये ॥ ५७ ॥ दक्षकी कन्या सती इस भांति अपनी देह त्यागकर, हिमाचल की स्त्री मैनाके गर्भ से उत्पन्न हुई, ऐसा हमने सुना है ॥ ५८ ॥ प्रलय काल में सोई हुई शक्ति जिस भांति परमेश्वर को प्राप्त होती है उसी भांति हिमाचल की कन्या जगदम्बा पार्वती भी अनन्य वृत्ति से भजने वाले भक्तों के आश्रय रूप महादेव को दूसरीवार प्राप्त हुई ॥ ५९ ॥ दक्ष यज्ञ विध्वंसी श्री भगवान् महादेव जी का यह चरित्र मैंने बृहस्पति जी के शिष्य, भगवद्भक्त उधौजी के मुख से सुनाथा सो आपको सुनाया ॥ ६० ॥ हे विदुर ! यह महादेव जी का परम पवित्र चरित्र जो आयुका बढ़ाने वाला और पापोंका नाश करनेवाला है, जो नित्य सुनेगा तथा सुनावेगा वह प्राणी भगवद्भक्ति के प्रभाव से सम्पूर्ण पापों से छूट जायगा ॥ ६१ ॥

इतिश्रीभागवते०महापुराणेचतुर्थस्कंधेसरलाभाषाटीकायांसप्तमोऽध्यायः ॥ ७ ॥

मैत्रेयजी ने कहा कि—हे विदुर जी ! सनकादिक, नारद, ऋभु, हंस अरुणि और यति इन ब्रह्माजी के पुत्रों ने गृहस्थाश्रम नहीं किया यह ऊर्द्धरेता हुये ॥ १ ॥ हे शत्रुहन् ! ब्रह्माजी के पुत्र अधर्म की मृषा नाम स्त्री से दंभ पुत्र तथा माया नाम कन्या हुई—इस जोडे को निऋति ने लिया कारण कि उसके कोई पुत्र नहीं था ॥ २ ॥ इन दोनों से लोभ पुत्र और शठता नाम्नी कन्या हुई, तथा लोभ और शठता से क्रोध पुत्र और हिंसा नाम्नी कन्या उत्पन्न हुई और क्रोध तथा हिंसा से कलि नामक पुत्र और दुरुक्ति नाम्नी कन्या हुई ॥ ३ ॥ हे सत्तम ! कलि और दुरुक्ति से भय पुत्र तथा मृत्यु नाम्नी कन्या उत्पन्न हुई, भय और मृत्यु से निरयनाम पुत्र तथा यातना नाम्नीक कन्या हुई ॥ ४ ॥ हे विदुर ! संक्षेप से मैंने यह सर्ग वरणन किया है जो मनुष्य तीन बार इस को सुनते हैं उनके शरीर के सब मल नष्ट होजाते हैं ॥५॥ इसके अनन्तर पुण्य पवित्र यश ब्रह्माजी के अंश स्वायंभुवमनुका वंश कहता हूं, सो सुनो ॥ ६ ॥ प्रियव्रत और उत्तानपाद यह मनुकी शतरूपा स्त्री से दो पुत्र परमेश्वर के अंश से, जगत् की स्थिति

त्तानपादस्यसुनीतिःसुरुचिस्तयोः । सुरुचिःप्रेयसीपत्युर्नेतरायस्सुतोध्रुवः ॥ ८ ॥ एकदासुरुचेःपुत्रमङ्कमारोप्यलालयन् । उत्तमंनारुरुक्षन्तंध्रुवंराजाऽभ्यनन्दत ॥९॥ तथाचिकीर्षमाणंतंसपत्न्यास्तनयंध्रुवम् । सुरुचिःशृण्वतोराज्ञःसेर्ष्यमाहातिगर्विता ॥१०॥नवत्सनृपतेर्धिष्ण्यंभवानारोढुमर्हति । नगृहीतोमयायत्त्वंकुक्षावपिनृपात्मजः ॥ ११ ॥ बालोऽसिबतनात्मानमन्यस्त्रीगर्भसंभृतम् । नूनंवेदभवान्यस्यदुर्लभेऽर्थेमनोरथः ॥ १२ तपसाऽऽराध्यपुरुषंतस्यैवानुग्रहेणमे । गर्भेत्वंसाधयात्मानंयदीच्छसिनृपासनम् ॥ १३ ॥ मैत्रेय उवाच ॥ मातुःसपत्न्याःसुदुरुक्ति विद्धःश्वसन्रुषादण्डहतोयथाहिः । हित्वामिषंतंपितरंसन्नवाचंजगाममातुःप्ररुदन्सकाशम् १४ तंनिःश्वसन्तंस्फुरिताधरोष्ठंसुनीतिरुत्सङ्ग उदुह्यबालम् । निशम्यतत्पौरमुखान्नितांतंसाविव्यथेयद्गदितंसपत्न्याः ॥ १५ ॥ सोत्सृज्यधैर्यंविललापशोकदावाग्निनादावलतेवबाला । वाक्यंसपत्न्याःस्मरतीसरोजश्रियादृशावाष्पकलामुवाह ॥ १६ ॥ दीर्घंश्वसंतीवृजिनस्यपारमपश्यतीबालकमाहबाला । मामङ्गलंतातपरेषुमंस्थाभुङ्क्तेजनोयत्परदुःखदस्तत् ॥ १७ ॥ सत्यंसुरुच्याऽभिहितंभवान्मेयद्दुर्भगायाउदरेगृहीतः । स्तन्येनवृद्धश्चविलज्जतेयांभार्येतिवावोढुमिडस्पतिर्माम् ॥ १८ ॥ आतिष्ठतत्तातविमत्सरस्त्वमुक्तंसमात्राऽपियदव्यलीकम् । आराधयाऽधोक्षजपाद

के हेतु उत्पन्न हुए ॥ ७ ॥ उत्तानपाद के सुनीति और सुरुचि दो रानियाथीं, सुरुचि राजाको बहुत प्यारी थी और ध्रुवकी माता सुनीति राजा को अप्रियथी ॥ ८ ॥ एक समय उत्तानपाद सुरुचि के पुत्र उत्तम को गोद में लिये हुये प्यार कर रहेथे उसी समय ध्रुवजीभी आकर गोदपर चढ़ने लगे तो राजा ने उन का आदर नहीं किया ॥ ९ ॥ सुरुचि ने अपने सौत के पुत्र ध्रुवजी को राजा की गोदी में बैठते देख ईर्षायुक्त राजाके सुनते कहनेलगी ॥ १० ॥ सुरुचि ने कहा कि हे बेटा ! तू मेरी कोखमें से नहीं उत्पन्नहुआ है इसकारण सिंहासनपर बैठने योग्य नहीं है ११ ॥ अरे ! तू अभी बालक है तुझे इस बात का ज्ञान नहीं है कि मैं दूसरी स्त्री के गर्भ से जन्मा हूं जो चेष्टा तू करता है वह मनोरथ तेरा बहुत दूर है ॥ १२ ॥ जो तू राजसिंहासनपर बैठनेकी इच्छा करता है तो परमेश्वरका आराधन कर, कि जिस की कृपासे तू मेरे गर्भ में आवे और राज्य सिंहासन के योग्य हो ॥ १३ ॥ मैत्रेयजी ने कहा कि हे विदुर ! वह ध्रुव सौतेली माके खोटे वचनों से विंधकर, बेत से मारे हुये सर्प की समान रोष से श्वास लेता हुआ मौन साधे पिता को छोड़ रोता हुआ अपनी माताके समीप गया ॥ १४ ॥ क्रोध के मारे जिस के होठ फड़क रहे हैं ऐसे ध्रुवको गम्भीर श्वास लेता देख कर माता सुनीती ने दौड़कर उसे गोदमें उठा लिया, और सौत की कही हुई बातें अंतःपुर के मनुष्यों से सुन वह अति ही पीडितहुई ॥ १५ ॥ और दावाग्नि के मध्य लताकी भांति शोकरूप दावाग्निसे व्याप्त वह स्त्री धीरजको छोड़ व्याकुल हो, सौतकी बातों का स्मरण कर, कमल से नेत्रों से आंसू बहाने लगी ॥ १६ ॥ बड़ी दीर्घ श्वास लेकर, दुःखकी थाह न देख सुनीति अपने बालक ध्रुवसे कहने लगी, कि हे पुत्र ! इसमें दूसरों का अपराधक मतमानो क्योंकि जो पहले औरोंको दुःख देताहै उसको उसका फल भोगनाही पड़ता है ॥ १७ ॥ जो सुरुचि ने कहा—वह ठीक है, एक तो तू मुझ आभागिनी के उदरसे जन्मा, दूसरे तू मेरा दूध पीकर इतना बड़ा हुआ राजा मुझ को भार्या कहते तो हैं परन्तु मनमें लज्जित होते हैं ॥ १८ ॥ हे पुत्र ! इस कारण सौत ने जो बातें कहीं हैं उन्हें तू स्मरण रख, मत्सरता छोड़, अधोक्षज भगवान के चरणों का आराधन कर तो उत्तम कैसा

पद्मंयदीच्छसेऽध्यासनमुत्तमोयथा ॥ १९ ॥ यस्यांघ्रिपद्मंपरिचर्यविश्वविभावनायात्तगुणाभिपत्तेः। अजोऽध्यतिष्ठत्खलुपारमेष्ठ्यंपदंजितात्मश्वसनाभिवन्द्यम् २० तथामनुर्वोभगवान्पितामहो यमेकमत्यापुरुदक्षिणैर्मखैः। इष्ट्वाभिपेदेदुरवापमन्यतोभौमंसुखंदिव्यमथापवर्ग्यम् ॥ २१ ॥ तमेववत्साऽऽश्रयभृत्यवत्सलंमुमुक्षुभिर्मृग्यपदाब्जपद्धतिम्। अनन्यभावेनिजधर्मभावितेमनस्यवस्थाप्यभजस्वपूरुषम् ॥ २२ ॥ नान्यंततःपद्मपलाशलोचनाद्दुःखच्छिदंतेमृगयामिकंचन। योमृग्यतेहस्तगृहीतपद्मयाश्रियेतरैरंगविमृग्यमाणया ॥ २३ ॥ मैत्रेय उवाच ॥ एवंसंजल्पितंमातुराकर्ण्यार्थागमंवचः। संनियम्यात्मनात्मानं निश्चक्रामपितुःपुरात् ॥ २४ नारदस्तदुपाकर्ण्यज्ञात्वायस्यचिकीर्षितम्। स्पृष्ट्वामूर्धन्यघघ्नेनपाणिनाप्राहविस्मितः ॥ २५ ॥ अहोतेजःक्षत्रियाणांमानभङ्गममृष्यताम्। बालोऽप्ययंहृदाधत्तेयत्समातुरसद्वचः ॥ २६ ॥ नारद उवाच ॥ नाधुनाप्यवमानंतेसम्मानंवापिपुत्रक। लक्षयामःकुमारस्यसक्तस्यक्रीडनादिषु ॥ २७ ॥ विकल्पेविद्यमानेऽपिनह्यसंतोषहेतवः। पुंसो मोहमृतेभिन्ना यल्लोकेनिजकर्मभिः ॥ २८ ॥परितुष्येत्ततस्तातताबन्मात्रेणपूरुषः दैवोपसादितंयावद्वीक्ष्येश्वरगतिंबुधः २९ ॥ अथमात्रोपदिष्टेन योगनावरुरुत्ससि। यत्प्रसादंसवैपुंसां दुराराध्योमतोमम ॥ ३० ॥ मुनयःपदवींयस्यनिःसंगेनोरुजन्मभिः। नविदुर्मृगयन्तोऽपितीव्रयोगसमाधिना ॥ ३१ ॥

भगवान को देखनेलगा ॥ ११ ॥ उस शीलयुक्त ब्रह्मभक्त धर्मवत्सल दीनदयालु ध्रुवको सम्पूर्ण प्रजा पिताके सदृश माननेलगी ॥ १२ ॥ भोगसे पुण्यक्षय और अभोग (यज्ञादि) से पाप क्षय करतेहुये ध्रुवने इस पृथ्वीपर ३६००० वर्ष राज्यकिया ॥१३॥ उस महात्माने कि जिसकी इन्द्रियां वशीभूत होगई हैं त्रिवर्ग साधककालको व्यतीतकर पुत्रको नृपासन दिया ॥१४॥ सम्पूर्ण सृष्टिको मायासे रचाहुआ जानकर स्वप्न तथा गन्धर्वनगरके सदृश अविद्यासे रचाहुआ जाननेलगा ॥ १५ ॥ तन, धन, स्त्री, सन्तान सुहृद सेना ऋद्धि,कोष अन्तःपुर बिहारस्थान, पृथ्वी समुद्र इन सबको कालसे नाशवान मानकर बद्रिकाश्रमको चलेगये ॥ १६ ॥ वहां शुद्ध अन्तःकरण से निर्मल जलमें स्नानकर आसनबांध, पवनको जीत मन से इन्द्रियों को वशीभूतकर भगवानके स्थूलरूप में ध्यान लगाया, फिर बहुतकालतक ध्यान करते २ समाधि स्थित हो स्थूलरूप को भी त्याग ब्रह्मरूप होगये ॥ १७ ॥ भगवानके प्रतिभक्ति होनेसे सदैव आनन्दाश्रुपात होनेलगे जिससे शरीर बारंबार पीड़ितहो हृदय शिथिल होगया, शरीर पुलकायमान होआया; और लिंग देहके त्यागने से उसे अपनीआत्माकाभी स्मरण न रहा ॥१८॥ उससमय चन्द्रमाकी समान दशोंदिशाओंको प्रकाशित करताहुआ ध्रुवजीको आकाशसे विमान उतरते दिखाई दिया ॥ १९ ॥ उस विमानके पीछे देवताओं में श्रेष्ठ श्रीभगवानके दो पार्षद खड़ेदेखे जो चतुर्भुज रूप श्यामवर्ण,युवावस्था,कमलनेत्र सुन्दर बस्त्र धारणकिये क्रीट कुण्डलहार, बाजूबन्द पहने और गदा हाथमें लियेथे ॥ २० ॥ ध्रुव उन्हें भगवानका पार्षद समझ शीघ्रही खड़ाहुआ और हाथजोड़ उनके नामका उच्चारणकर नमस्कार करनेलगा क्योंकि वह मोहहोजाने के कारण पूजाका क्रम भूल गयाथा ॥ २१ ॥ भगवान के चरण कमलों में व्याप्त चित्त हाथ जोड़ नम्री भूत हुए ध्रुवके निकट जाकर भगवान के प्रधान पार्षद सुनन्द नन्दने मुसिका कर कहा ॥ २२ ॥ सुनन्द नंद बोले कि—हे राजन् ! तेरा कल्याण हो, हमारा बचन सावधान होकर सुनो,. तुमनें पांचवर्ष की अवस्था में ही तप करके, देवताओं को तृप्त करने वाले भगवान का प्रसन्न किया है ॥ २३ ॥ उन्हीं अखिललोक

भ्रातुराबादेवस्यशार्ङ्गिणः । पार्षदाविहसंप्राप्तौनेतुंत्वांभगवत्पदम् ॥ २४ ॥ सुदु-र्जयंविष्णुपदंजितंत्वयायत्सूरयोऽप्राप्यविचक्षतेपरम् । आतिष्ठतच्चन्द्रदिवाकरा द्योग्रहर्क्षताराःपरियंतिदक्षिणम् ॥ २५॥ अनास्थितंतेपितृभिरन्यैरप्यङ्गकर्हिचित् आतिष्ठजगतांवंद्यंतद्विष्णोःपरमंपदम् ॥२६ ॥ एतद्विमानप्रवरमुत्तमश्लोकमौलिना। उपस्थापितमायुष्मन्नधिरोढुंत्वमर्हसि ॥ २७॥ मैत्रेय उवाच ॥ निशम्यवैकुण्ठ नियोज्यमुख्ययोर्मधुच्युतंवाचमुरुक्रमप्रियः । कृताभिषेकःकृतनित्यमङ्गलोमुनीन्प्र णम्याशिषमभ्यवादयत् ॥ २८ ॥ परीत्याभ्यर्च्यधिष्ण्याग्र्यंपार्षदावभिवन्द्यच । इयेषतदधिष्ठातुंबिभ्रद्रूपंहिरण्मयम् ॥ २९ ॥ तदोत्तानपदःपुत्रोददर्शांतकमागतम्। मृत्योर्मूर्ध्निपदंदत्वाआरुरोहाद्भुतंगृहम् ॥ ३० ॥तदादुंदुभयोनेदुर्मृदङ्गपणवादयः। गन्धर्वमुख्याःप्रजगुःपेतुःकुसुमवृष्टयः ॥ ३१ ॥ सचस्वर्लोकमारोक्ष्यन्सुनीतिंजन-नींध्रुवः । अन्वस्मरदगंहित्वादीनांयास्येत्रिविष्टपम् ॥ ३२ ॥ इतिव्यवसितंतस्य व्यवसायसुरोत्तमौ । दर्शयामासतुर्देवींपुरोयानेनगच्छतीम्॥३३॥तत्रतत्रप्रशंसद्भिः पथिवैमानिकैःसुरैः । अवकीर्यमाणोददृशेकुसुमैःक्रमशोग्रहान् ॥ ३४ ॥ त्रिलोकीं देवयानेनसोऽतिव्रज्यमुनीनपि । परस्ताद्यद्ध्रुवगतिर्विष्णोःपदमथाभ्यगात् ३५ ॥ यद्भ्राजमानंस्वरुचैवसर्वतोलोकास्त्रयोह्यनुविभ्राजन्तएते । यन्नाव्रजञ्जन्तुषुयेऽन नुग्रहाव्रजन्तिभद्राणिचरन्तियेऽनिशम् ॥ ३६ ॥ शांताःसमदृशःशुद्धाःसर्वभूता

भ्राता परब्रह्म भगवान के हम दोनो पार्षद हैं हम तुमको भगवद्धाममें ले जानेके हेतु यहां आये हैं ॥ २४ ॥ आप ने उस दुर्लभ विष्णुपद को जीत लिया है कि जिस को बड़े २ विवेकियों ने भी नही पाया तथा जिसकी सूर्य, चन्द्रमा, ग्रह, नक्षत्र, और तारागण प्रदक्षिणाकरते हैं ॥२५॥ हे ध्रुव ! वहांपर तेरेपित्रादिकभी नहीं पहुंचे और न कोई पहुँचेगा,ऐसे जगतवंद्य विष्णुभगवानके श्रेष्ठ पदको तू प्राप्तहुआहै ॥२६॥ हे आयुष्मन् ! उत्तम श्लोक नारायणने यह विमान भेजाहै, सो आप इस पर चढ़ो ॥ २७ ॥ मैत्रेयजी ने कहा कि—भगवानके प्यारे ध्रुव ने भगवत् पार्षदों की अमृत मय वाणी सुन स्नान कर नित्त नैमित्तिक क्रिया से निवृत्त हो, मुनियों को दंडवतकर तथा उनसे आशीर्वादपा ॥ २८ ॥ उस श्रेष्ठ विमान का पूजन कर प्रदक्षिणादे, दिव्यरूप धारण कर उस विमान पर चढ़ने का विचार किया ॥ २९ ॥ उसी समय ध्रुवने मृत्यु को आया देखा और मृत्यु ने हाथ जोड़कर ध्रुवजी से कहा कि हे राजन् ! मुझे अंगीकार करो, तब ध्रुवजी बोले कि तू आगया यह बहुत अच्छा किया। तू एक क्षणमात्र विलंबकर इसप्रकार उसे बैठाय उसके मस्तक पर चरण धर उस अद्भुत विमान पर बैठे ॥ ३० ॥ उस समय दुंदुभी मृदङ्ग, ढोल इ-त्यादिक बाजे बजने लगे और गन्धर्व गाने तथा फूलों की वर्षा होने लगी ॥ ३१ ॥ जिस समय वह बैकुंठ को जानलेगा तब उसको अपनी माता सुनीति का स्मरण हुआ और विचारा कि मैं अपनी अबला माता को छोड़कर सुरलोक को कैसे जाऊं ॥ ३२ ॥ उन दोनों पार्षदों नें ध्रुवके मनकी वार्ता जानकर विमान में आगे जाती हुई सुनीति को दिखाया ॥ ३३ ॥ देव मार्ग में विमानों पर बैठे हुए देवता प्रशंसा तथा फूलों की बर्षा कररहे थे इस भांति क्रमसे उन्होंने ग्रहों को देखा ॥ ३४ ॥ इस प्रकार त्रिलोकी व सप्तर्षियों को भी उल्लंघनकर उसके आगे ध्रुवगति वाले विष्णुपदको प्राप्तहुए ॥ ३५ ॥ जो निजकांति से सदैव प्रकाशमान है और जिससे तीनों लोक प्रकाशित होते हैं कि जिस को निर्दय मनुष्य नहीं पाते और जो कल्याण कारी आचरणकरते हैं वह उस पदको प्राप्त होते हैं ॥ ३६ ॥ शांत, समदर्शी, शुद्ध,

नुरञ्जनाः। यान्त्यंजसाऽच्युतपदमच्युतप्रियबांधवाः ॥ ३७ ॥ इत्युत्तानपदःपुत्रो ध्रुवःकृष्णपरायणः। अभूत्त्रयाणांलोकानांचूडामणिरिवामलः ॥३८॥ गम्भीरवेगोऽनिमिषंज्योतिषांचक्रमाहितम्। यस्मिन्भ्रमतिकौरव्यमेढ्यामिवगवांगणः ॥३९॥ महिमानंविलोक्यास्यनारदोभगवानृषिः। आतोद्यंवितुदञ्श्लोकान्सत्रेऽगायत्प्रचेतसाम् ॥ ४० ॥ नारद उवाच ॥ नूनंसुनीतेःपतिदेवतायास्तपःप्रभावस्यसुतस्यतांगतिम्। दृष्ट्वाऽभ्युपायानपिवेदवादिनोनैवाधिगन्तुंप्रभवन्तिकिंनृपाः ॥ ४१ ॥ यःपंचवर्षोगुरुदारवाक्शरैर्भिन्नेनयातोहृदयेनदूयता। वनंमदादेशकरोऽजितंप्रभुंजिगायतद्भक्तगुणैःपराजितम् ॥ ४२ ॥ यःक्षत्रबन्धुर्भुविनस्याधिरूढमन्वारुरुक्षेदपिवर्षपूगैः। षट्पञ्चवर्षोयदहोभिरल्पैःप्रसाद्यवैकुण्ठमवापतत्पदम् ॥ ४३ ॥ मैत्रेय उवाच ॥ एतत्तेऽभिहितंसर्वंयत्पृष्टोहमिहत्वया। ध्रुवस्योद्दामयशसश्चरितंसंमतंसताम् ॥ ४४ ॥ धन्यंयशस्यमायुष्यंपुण्यंस्वस्त्ययनंमहत्। स्वर्ग्यंध्रौव्यंसौमनस्यंप्रशस्यमघमर्षणम् ॥ ४५ ॥ श्रुत्वैतच्छ्रद्धयाऽभीक्ष्णमच्युतप्रियचेष्टितम्। भवेद्भक्तिर्भगवतिययास्यात्क्लेशसंक्षयः ॥ ४६॥ महत्त्वमिच्छतांतीर्थंश्रोतुःशीलादयोगुणाः। यत्रतेजस्तदिच्छूनांमानोयत्रमनस्विनाम् ॥ ४७ ॥ प्रयतःकीर्तयेत्प्रातःसमवायेद्विजन्मनाम्। सायंचपुण्यश्लोकस्यध्रुवस्यचरितंमहत् ॥ ४८॥ पौर्णमास्यांसिनीवाल्यां द्वादश्यांश्रवणेऽथवा। दिनक्षयेव्यतीपातेसंक्रमेऽर्कदिनेऽपिवा ॥ ४९ ॥ श्रावयेच्छ्रद्दधानानांतीर्थपादपदाश्रयः। नेच्छंस्तत्रात्मनात्मानंसंतुष्टइतिसिध्यति ॥ ५० ॥

सम्पूर्ण प्राणियों पर अनुग्रह करनेवाले जिनके अच्युत भगवान्ही प्रियबंधु हैं ऐसे लोग बिनाश्रमही जिसपदको जाते हैं वहीलोक ध्रुवजीको प्राप्तहुआ ॥ ३७ ॥ इसभांति उत्तानपादके पुत्रध्रुव कृष्णपरायण होनेसे त्रैलोक्यके चूडामणि रूपहुये ॥ ३८ ॥ हेविदुर ! गंभीर वेगवाले आलसरहित कालरूपात्मक, ज्योतिषचक्र जिसमें कीलके आसपास घूमतेहुये बैलकी शहस घूमताहै उसपदको ध्रुवप्राप्तहुये ॥ ३९ ॥ ध्रुवकी महिमाको देखकर नारदऋषिने अपनी वीणा बजाकर प्रचेताके यज्ञमें ध्रुवजीकी महिमा तीनश्लोकोंमें बखाना॥४०॥नारदजीनेकहा, कि पतिव्रता सुनीतिके पुत्रध्रुवने तपके प्रभावसे जोगतिपाई उसको वेदवादी ब्रह्मर्षिलोगभी पानेको समर्थ नहीं होतेफिर और राजाओं कीतोवातही क्याहै ॥४१॥ जिसपांचही वर्षके ध्रुवने अपनी सौतेली माताके वाणीरूप शरोंसे विंधहुये हृदयसे वनमें जाकर मेरीशिक्षा परचल अजित भगवान्को कि जोभक्तोंके गुणोंसे हारजातेहैं, वशमें करलिया ॥ ४२ ॥ जोगति ध्रुवको मिलाहै वहगति अन्य क्षत्रियोंको अनेक वर्षोंमें तपकरके प्राप्तहोताहै उसको ध्रुवने पांचछहही वर्षकी अवस्थामें थोड़ेदिनोंके तपसेही भगवान्को प्रसन्न करके पाली ॥ ४३ ॥ मैत्रेयजी ने कहाकि–हे विदुर ! उदारयश ध्रुवकाजो आपने चारित्रपूछा वहमैंने आपसे वर्णनकिया ॥ ४४ ॥ यहचरित्र धनका देनेवाला, यश, पुण्यस्वर्ग, आयु तथा ध्रुवस्थानका देनेवाला और पापोंका नाश करनेवालाहै ॥ ४५ ॥ जोइस अच्युतप्रिय ध्रुवका चारित्रश्रद्धा पूर्वकसुनेगा, उसका क्लेशनाशक भगवद्भक्ति प्राप्तहोगी ॥ ४६ ॥ जोइस ध्रुवचरित्रका उच्चारण करेंगे उनमें महत्त्व चाहने वालोंको साधन, सुशीलको गुण, तेजकी इच्छा वालोंकोतेज, तथामान चाहने वालोंको मान प्राप्तहोगा ॥ ४७ ॥ पुण्यश्लोक भगवानका और ध्रुवका यह अतिपवित्र चरित्र ब्राह्मणों की सभामें संध्या तथा प्रातःकाल में सावधानता पूर्वक पढ़ना चाहिये ॥४८॥ पूर्णमासी, अमावस्या, द्वादशी, श्रवणनक्षत्रवाला दिन, क्षयदिवस, व्यतीपात, संक्रांति, और रविवार ॥ ४९ ॥ कोश्रद्धावान तथा तीर्थपाद भगवानका चरणोंमें आश्रयरखने वाले मनुष्यों को निष्काम होकर सुनावे, तो उसके सम्पूर्ण मनोरथ सिद्धहोते हैं ॥ ५० ॥

ज्ञानमज्ञाततत्त्वायपयोदद्यात्सत्पथेऽमृतम् । कृपालोर्दीननाथस्यदेवास्तस्यानुगृह्णते ॥ ५१ ॥ इदंमयातेऽभिहितंकुरूद्वहध्रुवस्यविख्यातविशुद्धकर्मणः ।हित्वार्भकःक्रीडनकानिमातुर्गृहंचविष्णुंशरणंयोजगाम ॥ ५२ ॥

इतिश्रीमद्भागवतमहापुराणेचतुर्थस्कन्धेध्रुवचरितंनामद्वादशोऽध्यायः ॥ १२ ॥

सूत उवाच ॥ निशम्यकौषारविणोपवर्णितंध्रुवस्यवैकुण्ठपदाधिरोहणम् । प्ररूढभावोभगवत्यधोऽक्षजेप्रष्टुंपुनस्तंविदुरःप्रचक्रमे ॥ १ ॥ विदुर उवाच ॥ केतेप्रचेतसोनामकस्यापत्यानिसुव्रत । कस्यान्ववायेप्रख्याताःकुत्रवासत्रमासते ॥ २ ॥ मन्येमहाभागवतंनारदंदेवदर्शनम् । येनप्रोक्तःक्रियायोगःपरिचर्याविधिर्हरेः ॥३॥ स्वधर्मशीलैःपुरुषैर्भगवान्यज्ञपूरुषः । इज्यमानोभक्तिमतानारदेनेरितःकिल ॥ ४ ॥ यास्तादेवर्षिणातत्रवर्णिताभगवत्कथाः।मह्यंशुश्रूषवेब्रह्मन्कार्त्स्न्येनाचष्टुमर्हसि५॥ मैत्रेय उवाच ॥ ध्रुवस्यचोत्कलःपुत्रःपितरिप्रस्थितेवनम् । सार्वभौमश्रियंनैच्छदधिराजासनंपितुः ॥ ६ ॥ सजन्मनोपशांतात्मानिःसङ्गःसमदर्शनः । ददर्शलोकेविततमात्मानंलोकमात्मनि ॥ ७॥आत्मानंब्रह्मनिर्वाणंप्रत्यस्तमितविग्रहम् ।अवबोधरसैकात्म्य मानन्दमनुसंततम् ॥ ८ ॥ अव्यवच्छिन्नयोगाग्निदग्धकर्ममलाशयः । स्वरूपमवरुन्धानोनात्मनोऽन्यंतदैक्षत॥९॥जडांधबधिरोन्मत्तमूकाकृतिरतन्मतिः । लक्षितःपथिबालानांप्रशांतार्चिरिवानलः ॥ १० ॥ मत्वातंजडमुन्मत्तंकुलवृद्धाः समन्त्रिणः । वत्सरंभूपतिंचक्रुर्यवीयांसंभ्रमेःसुतम् ॥ ११ ॥ स्वर्वीथिर्वत्सरस्येष्टा भार्याऽसूतषडात्मजान् । पुष्पार्णंतिग्मकेतुंचइषमूर्जंवसुंजयम् ॥ १२ ॥ पुष्पार्णस्य

जोमनुष्य अज्ञानी पुरुषको भगवत मार्गमें अमृतरूप ज्ञानदेताहै उस कृपालु और दीनजन उद्धारक पुरुषपर देवता सदा कृपा करते रहतेहैं ॥ ५१ ॥ हे विदुर ! विख्यात तथा विशुद्ध कर्मवाले ध्रुव का यह चरित्र मैंने तुमसकहा कि जो ध्रुव बाल्यावस्थामें खेल और अपनी माताके घरको छोड़कर परमेश्वरकी शरणमें गयाथा ॥ ५२ ॥

इतिश्रीभागवते०महापुराणेचतुर्थस्कंधेसरलाभाषाटीकायांद्वादशोऽध्यायः ॥ १२ ॥

सूतजी बोले कि विदुरजीने मैत्रेयजीके मुख से ध्रुवपदका वर्णन सुन भगवान में भावउत्पन्नहो जानेके कारण फिर मैत्रेयजी से पूछा ॥ १ ॥विदुरजी बोले कि हे सुव्रत ! प्रचेता कौनथे ! तथा किसके पुत्र और किसके वंश में उत्पन्न हुएथे और इन्होंने किस स्थान में यज्ञ किया ॥ २ ॥ देवदर्शन,महाभागवत नारदने योगक्रिया का वर्णन तथा हरिकी परिचर्याका वर्णन कियाहै ॥३॥ स्वधर्म पालक प्रचेता से पूजित नारदजी ने यज्ञ पुरुष भगवानके गुणोंकाही बखान कियाहोगा ॥४॥ हे ब्रह्मन् ! जो कुछ भगवत्सम्बन्धी कथा देवर्षि नारदनें उनसे कहीहो उसका आप मुझसे वर्णन करो मैं सुननेंकी इच्छा करता हूं ॥ ५॥ मैत्रेयजीनें कहा कि—हे विदुर ! ध्रुवजी के बनचले जानें पर उनके पुत्र उत्कलनें राजलक्ष्मी और पिताके राज्यासन की इच्छा नकी ॥ ६ ॥ क्योंकि वह जन्म सेही शांत, निःसंग,समदर्शी, सम्पूर्णलोक में एक आत्मा और आत्मा में सम्पर्ण लोकोंको मानताथा॥७॥ब्रह्म सुखमें निमग्नहो अपनेदेहको भूलगया और ज्ञानरस, आनन्द रूप परमात्मा परब्रह्मको जानताथा॥८॥और योगरूप अग्नि से उसके अंतःकरणका मल भस्म होगयाथा इसकारण अपनें स्वरूप से पृथक उसका और कुछभी दृष्टि नहीं आताथा ॥ ९ ॥ वह विद्वान् ज्वाला रहित अग्नि के सदृश मार्गमें बालकों को जड़, अंधा, गूंगा, बहरा, विक्षिप्त और अशांत बोध होताथा ॥ १० ॥ कुलवृद्ध और मंत्रिया नें उसको जड़ तथा उन्मत्त जान, उसके लघुभ्राता भ्रमि के पुत्र वत्सर को राज्याधिकार देदिया ॥ ११ ॥ वत्सरकी प्यारी स्त्री स्वर्वीथि के छः पुत्र पुष्पार्ण,तिग्म-

प्रभामार्यादोषाचद्वेबभूवतुः । प्रातर्मध्यंदिनंसायमितिह्यासन्प्रभासुताः ॥ १३ ॥ प्रदोषोनिशिथोव्युष्टइतिदोषासुतास्त्रयः । व्युष्टः सुतंपुष्करिण्यांसर्वतेजसमादधे ॥ १४ ॥ सचक्षुः सुतमाकूत्यांपत्न्यांमनुमवापह । मनोरसूतमहिषीविरजान्नड्वला सुतान् ॥ १५ ॥ पुरुंकुत्संत्रितंद्युम्नंसत्यवन्तमृतंव्रतम् । अग्निष्टोममतीरात्रंप्रद्युम्नंशि बिमुल्मुकम् ॥ १६ ॥ उल्मकोऽजनयत्पुत्रान्पुष्करिण्यांषडुत्तमान् । अङ्गंसुमनसं ख्यातिंक्रतुमङ्गिरसंगयम् ॥ १७ ॥ सुनीथाऽङ्गस्ययापत्नीसुषुवेवेनमुल्वणम् । यद्दौः- शील्यात्सराजर्षिर्निर्विण्णोनिरगात्पुरात् ॥ १८ ॥ यमङ्गशेपुःकुपितावाग्वज्रामुनयः किल । गतासोस्तस्यभूयस्तममन्थुर्दक्षिणंकरम् ॥ १९ ॥ अराजकेतदालोकेदस्यु भिःपीडिताःप्रजाः । जातोनारायणांशेनपृथुराद्यःक्षितीश्वरः ॥ २० ॥ विदुरउवाच तस्यशीलनिधेःसाधोर्ब्रह्मण्यस्यमहात्मनः । राज्ञःकथमभूद्दुष्टाप्रजायद्विमनायचौ ॥ २१ ॥ किंवांऽहोवेनउद्दिश्यब्रह्मदण्डमयूयुजन् । दण्डव्रतधरेराज्ञिमुनयोधर्मको- विदाः ॥ २२ ॥ नावध्येयःप्रजापालःप्रजाभिरघवानपि । यदसौलोकपालानांबिभ- र्त्योजःस्वतेजसा ॥ २३ ॥ एतदाख्याहिमेब्रह्मन्सुनीथात्मजचेष्टितम् । श्रद्दधानाय भक्तायत्वंपरावरवित्तमः ॥ २४ ॥ मैत्रेय उवाच ॥ अङ्गोऽश्वमेधंराजर्षिराजहार महाक्रतुम् । नाजग्मुर्देवतास्तस्मिन्नाहूताब्रह्मवादिभिः ॥ २५ ॥ तमूचुर्विस्मितास्तत्र यजमानमथर्त्विजः । हवींषिहूयमानानि नतेगृह्णन्तिदेवताः ॥ २६ ॥ राजन्हवींष्य दुष्टानि श्रद्धयाऽऽसादितानिते । छन्दांस्ययातयामानि योजितानिधृतव्रतैः ॥ २७ ॥

केतु, इष, ऊर्ज, वसु, और जय उत्पन्न हुए ॥ १२ ॥ पुष्पार्ण की प्रभा और दोषा नाम्नि दो स्त्रियें थीं, उनमें प्रभाके प्रातर, मध्यंदिन, और सायं यह तीन पुत्र हुए ॥ १३ ॥ और दोषाके प्रदोष निशिथ और व्युष्ट यह तीन पुत्र हुए व्युष्ट के पुष्करिणी नाम वाली स्त्री थी जिससे सर्वतेजस पुत्र उत्पन्न हुआ ॥ १४ ॥ सर्वतेजस से आकूती नाम स्त्री से चक्षु नाम पुत्र उत्पन्न हुआ, मनुकी नड्वला स्त्री से ॥ १५ ॥ पुरु, कुत्स, त्रित, द्युम्न, सत्यवान, धृतव्रत, अग्निष्टोम अतिरात्रि, प्रद्युम्न, शिबि, और उल्मुक, यह ग्यारहपुत्र उत्पन्नहुए ॥ १६ ॥ उल्मुककी पुष्करिणी रानीसे अंग, सुमना, ख्याति, क्रतु, अंगिरा और गय यह छः पुत्र उत्पन्न हुए ॥ १७ ॥ अंग की सुनीथा नाम स्त्री से बड़ा दुष्ट वेन नाम पुत्र उत्पन्न हुआ वेन के कुटिल कर्मों से राजा अंग दुःखित हो नगर से निकलगया ॥ १८ ॥ हे विदुर ! वाक्य रूपी वज्र वाले मुनियों के शाप से राजा वेन मरगया, तब मुनियोंनें मृत वेन के दाहिनें हाथ का मथन किया ॥ १९ ॥ उस समय पृथ्वी पर कोई राजा नहीं था इस कारण प्रजा चोरों से अत्यन्त दुःखित होगई तो वेन के हाथसे नारायण अंश आद्य राजापृथु उत्पन्नहुए ॥ २० ॥ बिदुरजी ने कहा कि शीलनिधि साधु ब्राह्मणों का सनमान करनेवाले राजा अंग के ऐसा दुष्ट पुत्र क्यों उत्पन्न हुआ जिसका अन्याय देखकर वह बिमनहो वनको चलेगए ॥ २१ ॥ इस वेनका कौन सा दुष्ट कर्म देख धर्मवेत्ता मुनियोंनें दंडधारी राजा को शाप दिया ॥ २२ ॥ कैसाही पापी राजा क्यों नहोय परन्तु प्रजाको उचित है कि उसको नमारे क्यों कि राजा अपनें तेजमैं लोकपालोंका तेज धारण करता है ॥ २५ ॥ हे ब्रह्मन् ! सनीथा के पुत्र राजा वेनका चरित्र मुझसे कहो मैं आप का भक्त हूं मुझे उसके सुननेंकी बड़ी इच्छा है ॥ २४ ॥ मैत्रेयजी बोले कि राजा अंगनें अश्वमेध- यज्ञ किया उस यज्ञमे ब्रह्मवादियोंनें देवताओं का आह्वान किया परन्तु वह नआए ॥ २५ ॥ तब ब्राह्मणों ने विस्मित होकर राजा से कहा कि हे राजन् ! हम बहुतसा हवि पदार्थ होमते हैं परन्तु उन्हें देवता ग्रहण नहीं करते ॥ २६ ॥ हे राजन् ! यज्ञ पदार्थों में कुछ दोष नहीं है आप श्रद्धासे

नाविद्मेिहदेवानां हेलनंवयमण्वपि। यन्नगृह्णन्तिभागान्स्वान्ये देवाःकर्मसाक्षिणः ॥ २८ ॥ मैत्रेय उवाच ॥ अङ्गोद्विजवचःश्रुत्वा यजमानःसुदुर्मनाः। तत्प्रष्टुंव्यसृजद्वाचं सदस्यांस्तदनुज्ञया ॥ २९ ॥ नागच्छन्त्याहुतादेवा नगृह्णन्तिग्रहानिह। सदसस्पतयोब्रूत किमवद्यंमयाकृतम् ॥ ३० ॥ सदसस्पतयऊचुः ॥ नरदेवेहभवतोनाघं तावन्मनाक्स्थितम्। अस्त्येकंप्राक्तनमघं यदिहेदृक्त्वमप्रजः ॥ ३१ ॥ तथासाधयभद्रंते आत्मानंसुप्रजंनृप। इष्टस्तेपुत्रकामस्य पुत्रंदास्यतियज्ञभुक् ॥ ३२॥ तथास्वभागधेयानि ग्रहीष्यन्तिदिवौकसः। यद्यज्ञपुरुषः साक्षादपत्यायहरिर्वृतः॥३३॥ तांस्तान्कामान्हरिर्दद्याद्यान्यान्कामयतेजनः। आराधितोयथैवैष तथापुंसांफलोदयः ॥ ३४ ॥ इतिव्यवसिताविप्रास्तस्य राज्ञःप्रजातये। पुरोडाशंनिरवपन्शिपिविष्टायविष्णवे ॥ ३५ ॥ तस्मात्पुरुषउत्तस्थौ हेममाल्यमलाम्बरः। हिरण्मयेनपात्रेण सिद्धमादायपायसम् ॥ ३६ ॥ सविप्रानुमतोराजा गृहीत्वाऽञ्जलिनौदनम्। अवघ्रायमुदायुक्तः प्रादात्पत्न्याउदारधीः ॥ ३७ ॥ सातत्पुंसवनंराज्ञी प्राश्यवैपत्युरादधे। गर्भंकालउपावृत्ते कुमारंसुषुवेऽप्रजा ॥ ३८ ॥ सबालएवपुरुषो मातामहमनुव्रतः। अधर्मांशोद्भवंमृत्युं तेनाभवदधार्मिकः ॥ ३९ ॥ सशरासनमुद्यम्य मृगयुर्वनगोचरः। हंत्यसाधुर्मृगान्दीनान्वेनोऽसावित्यरौज्जनः ॥ ४० ॥ आक्रीडे क्रीडतो बालान्वयस्यानतिदारुणः। प्रसह्यनिरनुक्रोशः पशुमारममारयत् ॥ ४१ ॥

यज्ञ पदार्थ देतेहो और हम विधिवत वेदको पढते हैं॥२७॥हम देवताओं का थोड़ासा भी अपराध हुआ नहीं देखते, फिर कर्म के साक्षी रूप देवता अपना२भाग क्यों नहीं ग्रहण करते कुछ हमारीसमझ में नहीं आता॥२८॥मैत्रेयजीबोले कि—हेविदुर! जबराजाअंगने इसभांति ब्राह्मणोंके वचनसुने तब शोकान्वितहो उनकी आज्ञासे मौनव्रत त्याग यह बात सभासदोंसे पूँछी ॥२९॥ राजाने कहा कि हे सभासदों ! देवता न तो बुलानेसे आते हैं और न अपना भागग्रहण करतेहैं, ऐसा मुझसे क्या निंदितकर्म हुआहै सो मुझसे कहो॥३०॥सभासदोंने कहा कि—हेराजन्!इसजन्मका तो तुम्हारा किंचिनभी पाप नहींहै यहकोई पूर्वजन्मका पापहै जिसके कारण आप संतानहीनहो ॥ ३१ ॥ इसहेतु आप अपने संतानहोनेकी इच्छासे भगवान का आराधन करो, यज्ञभोक्ता भगवान तुमको निश्चय पुत्रदेंगे ॥३२॥ ऐसा करनेसे देवताभी अपना२भाग ग्रहणकरेंगे क्योंकि पुत्रके हेतु जब तुम भगवान का यजन करोगे तो उनके साथ देवताभी आजायँगे ॥ ३३ ॥ मनुष्य जिस २ कामना की इच्छा करताहै श्रीभगवान उसी २ कामनाको पूराकरतेहैं क्योंकि जो जिसभावसे उनका यजन करताहै उसको वैसाही फलदेतेहैं ॥ ३४ ॥ मैत्रेयजीने कहा कि राजाने सभासदोंसे यह बात सुन निश्चयकर, संतान केहेतु ब्राह्मणों द्वारा पुरोडाश का हवन विष्णु भगवानके निमित्तकराया ॥३५॥ होमके करतेही एकपुरुष सुन्दर सुवर्णकी माला और सुन्दर वस्त्र पहिने सुवर्णके थालमें सुंदर खीर लिये कुण्डसे बाहरनिकला और उसनेकहा कि हे राजन् यह तुमग्रहणकरो॥३६॥तब उदार चित्त राजाने ब्राह्मणोंकी आज्ञासे अति आनंदितहो वह खीर उसपुरुषके हाथसेलेली और सूंघकर अपनी रानीकोदेदी ॥ ३७ ॥ फिर रानीने उस खीरको भक्षणकर अपने पतिका वीर्य धारणकिया जिससे गर्भरहकर समय पूर्णहोनेपर एकपुत्र उत्पन्नहुआ ॥ ३८ ॥ वह पुत्र बाल्यावस्थासेही अधर्मीहुआ क्योंकि उसने अपने नाना का (सुनीथाके पिता मृत्यु) जो अधर्मसे उत्पन्न हुआथा, अनुकरण किया ॥३९॥ वह राजपुत्र आखेटक हेतु वनोंमें फिरतातथा पशुओं और दीनजनों को मारताथा इसकारण उसको मनुष्य वेनकहनेलगे ॥४०॥ अतिकठोर दुष्ट वेन खेलमें अपनी समानके बालकों

तंविचक्ष्यखलंपुत्रं शासनैर्विविधैर्नृपः । यदानशासितंकल्पो भृशमासीत्सुदुर्मनाः ॥ ४२ ॥ प्रायेणाभ्यर्चितोदेवो येऽप्रजागृहमेधिनः । कदपत्यभृतंदुःखंयेनविन्दन्ति दुर्भरम् ॥ ४३ ॥ यतःपापीयसी कीर्तिरधर्मश्चमहान्नृणाम् । यतोविरोधः सर्वेषां यतआधिरनन्तकः ॥ ४४ ॥ कस्तंप्रजापदेशंवै मोहबन्धनमात्मनः । पंडितोबहुमन्येत यदर्थाःक्लेशदागृहाः ॥ ४५ ॥ कदपत्यंवरंमन्ये सदपत्याच्छुचांपदात् । निर्विद्येतगृहान्मर्त्यो यत्क्लेशनिवहागृहाः ॥ ४६ ॥ एवंसनिर्विण्णमनानृपो गृहान्निशीथ उत्थायमहोदयोदयात् । अलब्धनिद्रोऽनुपलक्षितोनृभिर्हित्वा गतोवेनसुवंप्रसुप्ताम् ॥४७॥ विज्ञायनिर्विद्यगतंपतिंप्रजाः पुरोहितामात्यसुहृद्गणादयः । विचिक्युरुर्व्यामतिशोककातरा यथानिगूढपुरुषंकुयोगिनः ॥ ४८ ॥ अलक्ष्यन्तःपदवींप्रजापतेर्हतोद्यमाः प्रत्युपसृत्यतेपुरीम् । ऋषीन्समेतानभिवन्द्यसाश्रवो न्यवेदयन्पौरवभर्तृविप्लवम् ॥ ४९ ॥ इतिश्रीमद्भा०चतु०त्रयोदशोऽध्यायः ॥ १३ ॥

मैत्रेयउवाच ॥ भृग्वादयस्तेमुनयो लोकानांक्षेमदर्शिनः। गोप्तर्यसतिवैनृणां पश्यन्तःपशुसाम्यताम् ॥ १ ॥ वीरमातरमाहूय सुनीथांब्रह्मवादिनः । प्रकृत्यसंमतं वेनमभ्यषिंचंपतिंभुवः ॥२॥ श्रुत्वानृपासनगतं वेनमत्युग्रशासनम् । निलिल्युर्दस्यवःसद्यः सर्पत्रस्ताइवाखवः ॥ ३ ॥ सआरूढनृपस्थान उन्नद्धोऽष्टविभूतिभिः । अवमेनेमहाभागान्स्तब्धः संभावितःस्वतः ॥ ४ ॥ एवंमदान्धउत्सिक्तो निरंकुशइवद्विपः । पर्यटन्रथमास्थाय कम्पयन्निवरोदसी ॥५॥ नयष्टव्यंनदातव्यं नहोतव्यं

को पशुकी समान मारडालता था ॥४१॥ राजा अंगने इसभांति पुत्रकी दुष्टता देख नानाप्रकार से उपदेश किया परन्तु जब राजा ताड़नासेभी उसको न समझासका तो अत्यन्त दुःखितहोकर आपही आप कहनेलगा ॥ ४२ ॥ कि जिन गृहस्थियोंके पुत्रनहीं है उन्होंने परमेश्वरकी आराधना भलीभांतिकीहै-क्योंकि उनको दुष्टपुत्रोंसे दुःखतो नहीं सहने पड़ते ॥ ४३ ॥ कि जिसकेहेतु अपकीर्ति, अधर्म तथा लोगोंके साथ शत्रुता आदिव्यथायें होती हैं ॥४४॥ तथा जिनकेहेतु क्लेशकारक घरमें रहना पड़ताहै, ऐसे आत्माके मोहबंधनको कौनविवेकी पुरुषश्रेष्ठ मानेगा ॥ ४५ ॥ शोक देनेवाले सुपुत्रसे कुपुत्रकोमैं श्रेष्ठमानताहूं क्योंकि कुपुत्रसे मनुष्य दुःखितहोकर गृहआदिकोंसे विरक्त होजाताहै ॥४६॥ इसप्रकार वैराग्ययुक्त, समृद्धिशाली राजाअंग आधीरात्रिको उठवेनकी माताको सोताहुआ छोड़ अकेला उसघरसे निकलगया ॥ ४७ ॥ जबप्रातः कालहुआ और राजाअंगको मन्दिरमें न देखा, तो पुरोहित, मंत्री, सुहृद, तथा प्रजा अपने स्वामीको वैराग्यकी गतिसे गयाजान इसभांति उसेपृथ्वीपर ढूंढनेलगे कि जैसे कुत्सितयोगी,हृदयके भीतर अंतरयामी पुरुषको अनुसरण करतेहैं, और नहींपाते ॥ ४८ ॥ जब राजाअंग इनको कहीं न मिला, तबसब उद्यमसे हारमान नगरको आये और सबने एकत्रहोकर ऋषियोंको प्रणामकिया, हेविदुर! वेलोग नेत्रोंमें आंसूभरकर कहने लगेकि, पुत्रका दुष्टाचरणदेख दुःखितहो आजराजाअंग कहींघरसे चलेगये ॥ ४९ ॥

इति श्रीमद्भागवतेमहापुराणे चतुर्थस्कंधेसरलाभाषाटीकायांत्रयोदशोऽध्यायः ॥ १३ ॥

मैत्रेयजीने कहाकि-जगतका कल्याण शोचनेवाले ब्रह्मवेत्ता भृगुआदिक ऋषियोंने कोईभी राजा न होनेसे मनुष्योंको पशुकी समानदेखा ॥ १ ॥ ब्रह्मवादी ब्राह्मणोंने और मन्त्रियोंने वेनकी माता सुनीथाको बुलाकर सबकी सम्मतिसे वेनको राजगद्दीपर बिठाया ॥ २ ॥ भारीदंड देनेवाले वेनको राज्य सिंहासनपर बैठासुन सम्पूर्ण चोरऐसे छिपगयेकि जैसे सांपके भयसेचूहे छिपजाते हैं॥ ३ ॥ यह वेन राज्यगद्दीपर बैठ, अष्टविभूतियों संयुक्त गर्वित अपनी आत्माको सबसेश्रेष्ठ मानताहुआ, महात्माओंका तिरस्कार करनेलगा ॥४॥ निरंकुश हाथीकी समान मतवाला होकर आकाश और

द्विजाःक्वचित्। इतिन्यवारयद्धर्मं भेरीघोषेणसर्वशः ॥ ६ ॥ वेनस्यावेक्ष्यमुनयो-दुर्वृत्तस्यविचेष्टितम्। विमृश्यलोकव्यसनं कृपयोचुःस्मसत्रिणः ॥ ७ ॥ अहोउभयतःप्राप्तं लोकस्यव्यसनंमहत्। दारुण्युभयतोदीप्ते इवतस्करपालयोः ॥ ८ ॥ अराजकभयादेष कृतोराजाऽतदर्हणः।ततोऽप्यासीद्भयं त्वद्यकथंस्यात्स्वस्तिदेहिनाम् ॥ ९ ॥ अहेरिवपयःपोषः पोषकस्याप्यनर्थभृत्। वेनःप्रकृत्यैवखलः सुनीथागर्भसंभवः ॥ १० ॥ निरूपितःप्रजापालः सजिघांसतिवैप्रजाः। तथाऽपिसान्त्वयेमामुं नास्मांस्तत्पातकंस्पृशेत् ॥११॥ तद्विद्वद्भिरसद्वृत्तोवेनोऽस्माभिः कृतोनृपः। सान्त्वितोयदिनोवाचं नग्रहीष्यत्यधर्मकृत् ॥ १२ ॥ लोकधिकारसंदग्धं दहिष्याम स्वतेजसा। एवमध्यवसायैनं मुनयोगूढमन्यवः उपव्रज्याब्रुवन्वेनं सान्त्वयित्वा चसामभिः ॥ १३ ॥ मुनयऊचुः ॥ नृपवर्यनिबोधैतद्यत्ते विज्ञापयामभोः। आयुःश्रीबलकीर्तीनां तवतातविवर्धनम् ॥ १४ ॥ धर्मआचरितःपुंसां वाङ्मनःकायबुद्धिभिः। लोकान्विशोकान्वितरत्यथानन्त्यमसङ्गिनाम् ॥ १५ ॥ सतेमाविनशेद्वीर प्रजानांक्षेमलक्षणः। यस्मिन्विनष्टे नृपतिरैश्वर्यादवरोहति ॥ १६ ॥ राजन्नसाध्वमात्येभ्यश्चोरादिभ्यः प्रजानृपः। रक्षन्यथावलिं गृह्णन्निहप्रेत्यचमोदते ॥१७॥यस्याराष्ट्रेपुरेचैव भगवान्यज्ञपूरुषः। इज्यतेस्वेनधर्मेण जनैर्वर्णाश्रमान्वितैः॥१८॥तस्य राज्ञोमहाभाग भगवान्भूतभावनः।परितुष्यतिविश्वात्मा तिष्ठतोनिजशासने १९॥ तस्मिंस्तुष्टेकिमप्राप्यंजगतामीश्वरेश्वरे। लोकाःसपालाह्येतस्मै हरन्तिबलिमादृताः

पृथ्वीको कंपानेवाले रथपरबैठकर वहचारो ओर घूमनलगा ॥५॥ सम्पूर्ण देशमें इसबातकी डौंडी पिटवादी, कोईब्राह्मण होमनकरे तथादान न देवे और परमेश्वरका आराधनभी न करे ॥ ६ ॥ उसदुराचारी वेणुका यह अत्याचार देखकर मनुष्योंको दुःखीजान दयाकरके सबमुनि एकत्रितहो विचार करनेलगे॥७॥और कहाकि देखोएक ओरसे राजा और दूसरी ओरसे चोरोंकाभय इसप्रकार से है किजैसे लकड़ीके दोनो ओरके जलनेसे उसके कीट इत्यादिकोंको भयहोताहै ॥ ८ ॥ अराजकताके कारणतो हमने इसेराजा किया अब इससेभी बड़ाभारीभय उत्पन्नहुआ, देहधारियोंका कल्याण किसभांतिसे होगा ॥९॥ जिसभांति सर्पकोदूध पिलावे तोवह पालनेवालेहीको दुःखदेताहै, ऐसेही इसवेणुको किजो स्वभावहीसे दुष्ट और सुनीथाके गर्भसे और भीदुष्ट होगयाथा ॥ १० ॥ हमने प्रजापालक निरूपण किया अबयह प्रजाका नाश करताहै तथापि इसेचलकर समझादेवें जिससे यह पातक हमेंनलगे ॥११॥ हमने जान बूझकर इसराजा बनायाहै अबइसे जाकर समझावेंगे यदि समझानें परभी नमानेगा तो सम्पूर्ण लोकोंके धिक्कार से दग्ध हुएइसे हमलोग अपने तेजसे भस्म करेंगे ॥ १२ ॥ इसभांति सोच विचार रोषको गुप्त रख वे सबमुनि राजाके निकटगए और उसको नीति वाक्यों से शांति करके बोले ॥ १३ ॥ मुनियोंने कहा कि हेनृप ! हम आपसे प्रार्थना करते हैं कि जिससे आपकी लक्ष्मी, वल तथा कीर्ति वढ़े वह आप सुनियें ॥ १४॥ मन वचन देह और बुद्धि से धर्मका आचरण कियेजानेपर शोक रहित लोककी प्राप्तिहोतीहै और निष्काम मनुष्यको तो अनंत फल (मुक्ति) मिलता है ॥२५॥ हे वीर ! प्रजा की रक्षा करने में राज्य धर्मका नाश नहीं करना चाहिये क्यों कि धर्म नाशसे राजका नाश होजाता है ॥ १६ ॥ हे राजन् असाधु, अमात्य (मंत्री) से और चोरादिकों से प्रजाकी रक्षा करने से और यथोचित भेंट (कर) लेनेसे राजाको इसलोक तथा परलोकमें आनन्द प्राप्त होता है ॥ १७ ॥ जिसके देश तथा नगरमें भगवान यज्ञपुरुष नारायणका धर्म पूर्वक यजन होताहै और वर्णाश्रम की मर्यादा का मनुष्य पालन करते हैं ॥ १८ ॥ हे महाभाग ! उस राजाको भगवान भूतभावन अपनी आज्ञामें स्थित हुआ देख अति प्रसन्न होते हैं ॥ १९ ॥ जिस समय ईश्वरोंका ईश्वर प्रसन्न होजाय तब

॥ २० ॥ तंसर्वलोकामरयज्ञसंग्रहं त्रयीमयंद्रव्यमयंतपोमयम् । यज्ञैर्विचित्रैर्यजतो भवायते राजन्स्वदेशाननुरोद्धुमर्हसि ॥ २१ ॥ यज्ञेनयुष्माद्विषये द्विजातिभिर्वितायमानेनसुराःकलाहरेः। स्विष्टाःसुतुष्टाःप्रदिशन्तिवाञ्छितं तद्धेलनंनार्हसिवीरचेष्टितुम् ॥२२॥वेनउवाच ॥ बालिशाबतयूयं वाअधर्मेधर्ममानिनः । येवृत्तिदंपतिंहित्वा जारंपतिमुपासते ॥ २३ ॥ अवजानन्त्यमीमूढा नृपरूपिणमीश्वरम् । नानुविन्दन्ति तेभद्रमिह लोकेपरत्रच ॥ २४ ॥ कोयज्ञपुरुषोनाम यत्रवोभक्तिरीदृशी । भर्तृस्नेहविदूराणां यथाजारकुयोषिताम् ॥ २५ ॥ विष्णुर्विरिंचोगिरिश इंद्रोवायुर्यमोरविः पर्जन्योधनदःसोमः क्षितिरग्निरपांपतिः ॥ २६ ॥ एतेचान्येचविबुधाः प्रभवोवरशापयोः । देहेभवन्तिनृपतेः सर्वदेवमयोनृपः ॥ २७ ॥ तस्मान्मांकर्मभिर्विप्रा यजध्वंगतमत्सराः बलिंचमह्यंहरतः मत्तोऽन्यः कोऽग्रभुक्पुमान् ॥ २८ ॥ मैत्रेय उवाच ॥ इत्थंविपर्ययमतिः पापीयानुत्पथंगतः । अनुनीयमानस्तद्याच्ञां नचक्रेभ्रष्टमंगलः ॥ २९ ॥ इतितेऽसत्कृतास्तेन द्विजाःपंडितमानिना । भग्नायाभव्ययाच्ञायां तस्मैविदुरकुक्रुधुः ॥ ३० ॥ हन्यतांहन्यतामेष पापःप्रकृतिदारुणः । जीवंजगदसावाशु कुरुतेभस्मसाद्ध्रुवम् ॥३१॥ नायमर्हत्यसद्वृत्तो नरदेववरासनम् । योऽधियज्ञपतिंविष्णुं विनिन्दत्यनपत्रपः ॥ ३२ ॥ कोवैनंपरिचक्षीत वेनमेकमृतेऽशुभम् । प्रापईदृशमैश्वर्यं यदनुग्रहभाजनः ॥ ३३ ॥ इत्थंव्यवसिता हन्तुमृषयोरूढमन्यवः । निजघ्नुर्हुंकृतैर्वेनं हतमच्युतनिंदया ॥३४॥ ऋषिभिःस्वाश्रमपदं गतेपुत्रकले-

सब उसकी कामना पूर्ण होती हैं क्योंकि सम्पूर्ण लोक लोकपालों समेत उसराजाको भेटदेते हैं२० महाराज! सम्पूर्ण लोकके देवता, यज्ञके ग्रहण करनेवाले वेदमय, द्रव्यमय, तपोमय, भगवानको नानाप्रकारके यज्ञोंसे अपने देशके कल्याणके हेतु उसका अनुसरण करनाचाहिये ॥ २१ ॥ आपके देशमें ब्राह्मणलोग यज्ञोंसे देवताओंका यजन करते हैं कि जिससे देवता प्रसन्नहो मनोवांछित मनोर्थ देतहैं इससे उन देवताओं का तिरस्कार न करना चाहिये ॥ २२ ॥ यहसुनकर वेननेकहा कि—तुममूर्खहो जो अधर्मको धर्म मानतेहो और मुझ अन्नादिकके देनेवालेको छोड़कर दूसरे जार पुरुषकी इच्छा करतेहो ॥ २३ ॥ जो मूढ़बुद्धि मनुष्य राजारूपी ईश्वरको नहीं जानते, उनको इस लोक तथा परलोकमें कल्याण नहींमिलता ॥ २४ ॥ वह यज्ञ पुरुष कौनहै जिसमें तुम्हारी इतनी भक्तिहै तुम स्वामीकी प्रीतिसे इसप्रकार दूरहो कि जैसे व्यभिचारिणी स्त्री दूसरेसे प्रीति करती है ॥ २५ ॥ विष्णु, ब्रह्मा, महादेव इन्द्र,पवन, यमराज, सूर्य, मेघ, कुबेर चन्द्रमा, पृथ्वी अग्नि, जल, ॥२६॥ और भी दूसरे देवता जो वर तथा शापके देनेवाले हैं वहसब राजाकी देहमें रहते हैं इससे राजा सर्वदेवमयहै ॥ २७ ॥ हेविप्र! इसकारण मत्सरताको छोड़ कर्मों से मेरा यजनकरो, और मुझे भेटदो मुझसे दूसरा और कौन भोक्ता पुरुषहै ॥२८॥ मैत्रेयजीने कहा—कि विपरीत बुद्धि तथा खोटेमार्ग पर चलनेवाले उसवेणुको मुनियोंने बहुतसमझाया तथापि उस अभागेने कुछ न समझा ॥ २९ ॥ हेविदुर! आपनेको बड़ा माननेवाले राजा वेनने जब ब्राह्मणोंका असत्कार किया और उनकी प्रार्थनाको न माना तो मुनियोंने बड़ा क्रोधकिया ॥ ३० ॥ और परस्परमें कहनेलगे कि यह स्वभावहीसे पापी और दुष्टहै यदियह जीवितरहा तो निश्चयही जगतको नष्टकरदेगा इसकारण इसके भस्मकरदो॥३१॥यह राज्यसिंहासनके योग्य नहींहै इसने यज्ञपति भगवानकी भी निन्दाकी यह बड़ाही निर्लज्जहै ॥ ३२ ॥ जिसने कृपाकरके ऐसा ऐश्वर्य दियाहै उन्ह भगवानकी इसदुष्ट के बिना और कौन निंदाकरेगा३३ जब सम्पूर्ण ऋषियोंने क्रोधितहो इसकेमारनेका बिचार करलिया तब इसवेनको केवल अपने हुंकार शब्दसे भस्मकरदिया ॥३४॥ ऋषिलोग इसभांति उसे मारकर अपने२

करम् । सुनीथापालयामास विद्यायोगेनशोचती ॥३५॥ एकदामुनयस्तेतु सरस्व-
त्सलिलाप्लुताः । हुत्वाऽग्नीन्सत्कथाश्चक्रुरुपविष्टाः सरित्तटे ॥३६॥ वीक्ष्योत्थि-
तान्महोत्पातानाहुर्लोकभयंकरान् । अप्यभद्रमनाथायादस्युभ्योनभवेद्भुवः ॥ ३७॥
एवंमृशंतऋषयोधावतांसर्वतोदिशम् । पांसुःसमुत्थितोभूरिश्चोराणामभिलुम्पताम्
॥ ३८ ॥ तदुपद्रवमाज्ञायलोकस्यवसुलुम्पताम् । भर्तर्युपरतेतस्मिन्नन्योन्यंचजिघां-
सताम् ॥ ३९ ॥ चोरप्रायंजनपदंहीनसत्त्वमराजकम् । लोकान्नावारयञ्छक्ताअपि
तद्दोषदर्शिनः ॥ ४० ॥ ब्राह्मणःसमदृक्शांतोदीनानांसमुपेक्षकः । स्रवतेब्रह्मतस्यापि
भिन्नभाण्डात्पयोयथा ॥ ४१ ॥ नांगस्यवंशोराजर्षेरेषसंस्थातुमर्हति । अमोघवीर्या
हिनृपावंशेऽस्मिन्केशवाश्रयाः ॥४२॥ विनिश्चित्यैवमृषयोविपन्नस्यमहीपतेः । मम
न्थुरूरुंतरसातत्रासीद्बाहुकोनरः ॥४३॥ काककृष्णोऽतिह्रस्वांगोह्रस्वबाहुर्महाहनुः
ह्रस्वपान्निम्ननासाग्रोरक्ताक्षस्ताम्रमूर्धजः ॥ ४४ ॥ तंतुतेऽवनतंदीनंकिंकरोमीति
वादिनम् । निषीदेत्यब्रुवंस्तातसनिषादस्ततोऽभवत् ॥ ४५ ॥ तस्यवंश्यास्तुनैषादा
गिरिकाननगोचराः । येनाहरज्जायमानोवेनकल्मषमुल्बणम् ॥ ४६ ॥
इतिश्रीमद्भागवतेच०स्कन्धपृथुचरित्रेनिषादोत्पत्तिर्नामचतुर्दशोऽध्यायः ॥१४॥
मैत्रेय उवाच ॥ अथतस्यपुनर्विप्रैरपुत्रस्यमहीपतेः । बाहुभ्यांमथ्यमानाभ्यांमि-
थुनंसमपद्यत ॥ १ ॥ तद्दृष्ट्वामिथुनंजातमृषयोब्रह्मवादिनः । ऊचुःपरमसंतुष्टा
विदित्वाभगवत्कलाम् ॥ २ ॥ ऋषय ऊचुः॥एषविष्णोर्भगवतःकलाभुवनपालिनी

आश्रमको गये फिर शोककरतीहुई सुनीथाने पुत्रकी देहको औषधि और मंत्रोंके प्रयोगों से रखछोड़ा ३५ एकसमयमें सम्पूर्ण मुनिलोग सरस्वती नदी में स्नानकर हवनादिसे निश्चिन्तहो सत्कथा कहरहे थे ॥ ३६ ॥ इतनेंमें लोकोंका भय देनेंवाले पूर्व्वापर बडे २ उत्पात दृष्टि आनेंलगे उन्हें देखकर महात्माओं नें विचार किया कि इस समय पृथ्वीपर कोई राजा नहीं है इस निमित्त हमको इस अनाथ पृथ्वीपर चोरोंका भय है॥३७॥मुनिलोग यह विचारही रहथे इतनेंमें चोरों के दलके दल घिरआए और उनके घोड़ोंके दौडनें से चारोओर धूल उड़ती उनके देखनेंमें आई ॥ ३८ ॥ वह सम्पूर्ण देश चोरोंसे व्याप्त होगया, सब पराक्रम हीनहोगए और सब ओर मार काट चोरी आदिक उत्पात प्रजा में होनेंलगे तब मुनियों नें विचार किया कि ॥ ३९ ॥ जो ब्राह्मण समदृष्टि, और शांत होनें परभी दीन लोगोंकी रक्षा नकरें, तो उनका तप फूटेहुए बर्तनमेंसे जिस प्रकार जल गिरजाता है ऐसे नष्ट होजाता है ॥ ४० ॥ अंग राजाका बंश निर्बंश नजाना चाहिये क्योंकि इसमें बडे२ पराक्रमी, भगवद्भक्त राजाहुए हैं और होवेंगे यह बंश नारायणके आश्रय है ॥ ४१ ॥ इसभांति विचारकर वे ऋषि राजा वेणुकी जंघाका मथन करनेंलगे उसमेंसे एक बौना पुरुष उत्पन्न हुआ ॥ ४२ ॥ यह पुरुष काक के सदृश काला, देह तथा हाथपैर छोटे २ लम्बी डाढ़ो और चपटी नाक तथा लालआंखे और इसके भूरेबाल थे ॥ ४३ ॥ यह पुरुष नम्री भूतहा दीनकी भांति कहनेंलगा कि हे महाराज मुझे क्या आज्ञा है तब उन मुनियोंने उससे कहा कि निषीद (बैठजा) इससे उसका नाम निषाद हुआ। ॥४४॥ इसकी जाति स निषाद अर्थात् भीललोगहुए कि जो पर्वत और बनोंमें रहते हैं हे महाराज बेनके शरीरमें पाप भराथा वही निषाद रूपसे बाहर निकला ॥ ४५ ॥

इति श्रीमद्भागवते महापुराणे चतुर्थस्कंधे सरला भाषाटीकायां चतुर्दशोऽध्यायः ॥ १४ ॥

मैत्रेयजीनें कहा—फिर उन मुनिलोगों नें अपुत्र राजा बेनकी भुजाओं का मथन किया तो उस से एक जोडा उत्पन्न हुआ ॥ १ ॥ वेदबादी ब्रह्मर्षियों उस जोडेको उत्पन्न हुआ देख भगवत कला जान बडे हर्षितहुए ॥ २ ॥ ऋषियोंनें कहा कि यह पुरुष भगवान विष्णुका अंश है और यह

इयंचलक्ष्म्याःसंभूतिःपुरुषस्यानपायिनी॥ ३ ॥अयंतुप्रथमोराज्ञांपुमान्प्रथयितायशः प्रथुर्नाममहाराजोभविष्यतिपृथुश्रवाः ॥ ४ ॥ इयंचसुदतीदेवीगुणभूषणभूषणा । अर्चिर्नामवरारोहापृथुमेवावरुन्धती ॥ ५ ॥ एषसाक्षाद्धरेरंशोजातोलोकरिरक्षया इयंचतत्पराहिश्रीरनुजज्ञेऽनपायिनी ॥ ६ ॥ मैत्रेय उवाच॥प्रशंसन्तिस्मतंविप्रागंधर्वप्रवराजगुः । मुमुचुःसुमनोधाराःसिद्धानृत्यन्तिस्वःस्त्रियः ॥ ७ ॥शंखतूर्यमृदंगाद्यानेदुर्दुंदुभयोदिवि । तत्रसर्वउपाजग्मुर्देवर्षिपितृणांगणाः॥८॥ ब्रह्माजगद्गुरुर्देवैःसहासृत्यसुरेश्वरैः । वैन्यस्यदक्षिणेहस्तेदृष्ट्वाचिह्नंगदाभृतः ॥ ९॥ पादयोररविंदंचतंवैमेनेहरेःकलाम् । यस्याऽप्रतिहतंचक्रमंशःसपरमेष्ठिनः ॥१० ॥तस्याऽभिषेकआरब्धोब्राह्मणैर्ब्रह्मवादिभिः । आभिषेचनिकान्यस्माआजह्रुःसर्वतोजनाः ॥११॥ सरित्समुद्रागिरयोनागागावःखगामृगाः । द्यौःक्षितिःसर्वभूतानिसमाजह्रुरुपायनम् ॥ १२ ॥ सोऽभिषिक्तोमहाराजःसुवासाःसाध्वलंकृतः । पत्न्याऽर्चिषाऽलंकृतया विरेजेऽग्निरिवापरः ॥ १३ ॥ तस्मैजहारधनदोहैमंवीरवरासनम् । वरुणःसलिलस्रावमातपत्रंशशिप्रभम् ॥ १४ ॥वायुश्चवालव्यजनेधर्मःकीर्तिमयींस्रजम् ।इंद्रःकिरीटमुत्कृष्टंदंडंसंयमनंयमः ॥ १५ ॥ ब्रह्माब्रह्ममयंवर्मभारतीहारमुत्तमम् ।हरिःसुदर्शनंचक्रंतत्पत्न्यव्याहतांश्रियम् ॥ १६ ॥ दशचंद्रमसिंरुद्रःशतचंद्रंतथाऽम्बिका।सोमोऽमृतमयानश्वांस्त्वष्टारूपाश्रयंरथम् ॥ १७ ॥ अग्निराजगवंचापंसूर्योरश्मिमयानिषून् । भूःपादुकेयोगमय्यौद्यौःपुष्पावलिमन्वहम् ॥ १८ ॥ नाट्यंसुगीतंवादित्र

कन्या भगवान विष्णुकी आज्ञानुवर्त्ती लक्ष्मीजी की विभूति है ॥ ३ ॥ यह पुरुष राजाओं में अग्रगण्य कीर्तिवान महाराज पृथुके नामसे विख्यातहोगा और सबसंसारमें अपनी कीर्तिको फैलावेगा ॥ ४ ॥ और यहसुन्दर सुदतीगुण आभूषणों से भूषित, वरारोहा अर्चिनाम रानी सदैव राजापृथुकी आज्ञानुवर्तिनी रहेगी, ॥ ५ ॥ यहपृथुनो सृष्टिकीरक्षा करने के लिये विष्णुभगवानका अंश उत्पन्न हुआहै । और यहउनकी आज्ञानुवर्तिनी श्रीलक्ष्मीजीकी कलासे उत्पन्न हुईहै ॥ ६ ॥ मैत्रेयजीने कहा—किइसप्रकार ब्राह्मण उनकी प्रशंसा करनेलगे, गन्धर्व यशगानेलगे, सिद्धफूलोंकी वर्षाकरने और अप्सरा नृत्यकरनेलगीं ॥ ७॥ स्वर्गसे शंख,धौंसा, मृदंग,नगाड़े बजाते उसीसमय सम्पूर्ण देवता, ऋषितथा पितृगणोंके समूह ॥ ८ ॥ जगद्गुरू ब्रह्माजी इन्द्रादिक देवताओं सहित आये और पृथुके दाहिने हाथमें गदाभृत चक्रकाचिह्न ॥ ९ ॥ और दोनोपांवोंमें कमलके चिह्नदेखकर ब्रह्माजीने कहाकि यहपरमेश्वरके अंशसे उत्पन्नहुआ राजाचक्रवर्त्तीहोगा ॥ १० ॥ वेदवेत्ता ब्राह्मणोंने उसके अभिषेकका आरंभकिया और सबमनुष्योंने प्रत्येक ठौरसे अभिषेककी सामग्रीयें लालाकर एकत्रितकीं ॥ ११ ॥ नदियें, समुद्र,पर्वत, वृक्ष, गऊ,नाग, पक्षी, मृग,स्वर्ग, पृथ्वी, और सम्पूर्ण प्राणीमात्र भेंटलेलेकर उपस्थितहुए ॥ १२ ॥ फिरउस महाराज पृथुका अभिषेक कियावह शुद्धहो सुंदरवस्त्र धारणकर अलंकारोंसे विभूषितहो अपनीपत्नी अर्चिकेसाथ अग्निकी सदृश, शोभाको प्राप्तहुआ ॥ १३ ॥ हेविदुर ! उसपृथुको कुवेरने श्रेष्ठआसन और वरुणने जलझरताहुआ चन्द्रमाकीसी कांतिवाला छत्रदिया ॥ १४ ॥ पवनने चमर, धर्मने कीर्त्तिमयीमाला, इन्द्रने कीटतथा यमराजने दण्डदिया ॥ १५ ॥ ब्रह्माने ब्रह्ममय कवच, सरस्वतीने सुंदरहार श्रीभगवानने सुदर्शन चक्र तथा लक्ष्मीजीने अतुल सम्पत्तिदी ॥ १६ ॥ रुद्रने दशचन्द्र नामकखड्ग पार्वतीजीने शतचन्द्रिका नामकढाल, चन्द्रमाने अमृत मयघोड़े और त्वष्टाने अतिसुन्दर रथदिया ॥ १७ ॥ अग्निने आजगव धनुष, सूर्यने रश्मीमयबाण, पृथ्वीने योगमय पादुका और आकाशने नित्यप्रति फूलोंका हारदिया

मन्तर्धानंचखेचराः। ऋषयश्चाशिष सत्याःसमुद्रःशंखमात्मजम् ॥ १९ ॥ सिंधवः पर्वतानद्योरथवीथिर्महात्मनः। सूतोऽथमागधोवंदीतंस्तोतुमुपतस्थिरे॥ २० ॥स्तावकांस्तानभिप्रेत्यपृथुर्वैन्यःप्रतापवान्। मेघनिर्ह्रादयावाचाप्रहसन्निदमब्रवीत्॥ २१॥ पृथुरुवाच ॥ भोसूतहेमागधसौम्यवन्दिँल्लोकेऽधुनाऽस्पष्टगुणस्यमस्यात्। किमाश्रयोमेस्तवएषयोज्यतांमामय्यभूवन्वितथागिरोवः ॥ २२ ॥ तस्मात्परोक्षेऽस्मदुपश्रुतान्यलंकरिष्यथस्तोत्रमपीच्यवाचः। सत्युत्तमश्लोकगुणानुवादेजुगुप्सितंनस्तवयन्तिसभ्याः ॥ २३ ॥ महद्गुणानात्मनिकर्तुमीशःकःस्तावकैःस्तावयतेऽसतोऽपि। तेऽस्याभविष्यन्नितिविप्रलब्धोजनावहासंकुमतिर्नवेद ॥ २४ ॥ प्रभवोह्यात्मनःस्तोत्रंजुगुप्सन्त्यपिविश्रुताः। ह्रीमन्तःपरमोदाराःपौरुषंवाविगर्हितम् ॥ २५ ॥ वयंत्वविदिताळोके सूताद्यापिवरीमभिः। कर्मभिः कथमात्मानं गापयिष्याम बालवत् ॥ २६ ॥

इतिश्रीमद्भा०चतु०पृथोरवतारप्रादुर्भाववर्णनंनामपञ्चदशोऽध्यायः ॥ १५ ॥

मैत्रेय उवाच ॥ इतिब्रुवाणंनृपतिं गायकामुनिचोदिताः तुष्टुवुस्तुष्टमनसस्तद्वागमृतसेवया ॥ १ ॥ नालंवयंतेमहिमानुवर्णनेयो देववर्योऽवततारमायया ॥ वेनांगजातस्यचपौरुषाणिते वाचस्पतीनामपिबभ्रमुर्धियः ॥ २ ॥ अथाप्युदारश्रवसः पृथोर्हरेः कलाऽवतारस्यकथाऽमृतादृताः। यथोपदेशंमुनिभिःप्रचोदिताः श्लाघ्यानिकर्माणिवयंवितन्महि ॥ ३ ॥ एषधर्मभृतांश्रेष्ठो लोकंधर्मेऽनुवर्तयन्। गोप्ताचध

॥ १८ ॥ आकाश चारियोने नृत्य, गीत, बाजेतथा अंतर्ध्यान होनेकी विद्यादी, ऋषियोंने सत्य आशीर्वाद और समुद्रने अपनापुत्र शंखदिया ॥ १९ ॥ समुद्र, पर्वत और नदियोंने महाराजा पृथुका मार्ग दिया, सूत, मागधतथा वंदीजन उसकी स्तुति करनेलगे ॥ २० ॥ उनको स्तुति करता जान प्रतापशाली राजा पृथु हसकरके मेघरूपी गम्भीर शब्दबोला ॥ २१ ॥ पृथुबोला कि— हे सूत ! हे मागध ! बन्दीजन, ! इसलोक में मेरे कौनसे गुण प्रगट हैं कि जिनका आश्रय करके तुम बड़ाई करतेहो तुम्हारी वाणी मेरेविषे मिथ्या न होवै ॥ २२ ॥ इसकारण कालांतर में जब मेरेगुण प्रसिद्धहोवैं तबमेरी कीर्तिकी बड़ाईकरना अब उत्तम श्लोक नारायणके गुणानुवाद कहो और मनुष्यके मत कहो ॥ २३ ॥ जो बड़े पुरुषोंके गुण आपमें सम्पादन करसकताहै, तो उन अवर्तमान गुणोंके केवल सम्भावनाहीसे कौन स्तुतिकरवावे अपने गुणोंकी अपने सन्मुखही श्लाघा करना यह मन्दमतियोंका कार्य है ॥ २४ ॥ जो सामर्थ लज्जावान और अति उदारहै, वह सृष्टिमें अपनी मुख्याति होनेपरभी ब्रह्मवध आदिक निंदितकार्यकी समान निंदाही करते हैं २५ ॥ हेसूत ! हमतो अबतक कोई श्रेष्ठ कार्य करके विख्यात नहींहुये फिर मूर्खकी भांति अपनी स्तुति कैसे करवावें ॥ २६ ॥

इति श्रीमद्भागवते महापुराणे सरलाभाषाटीकायां पंचदशोऽध्यायः ॥ १५ ॥

मैत्रेयजीनेकहा कि—राजातो इसप्रकार कहताहीरहा परन्तु मुनिलोगोंके प्रेरेहुये गायक प्रसन्न चित्तहोकर अमृतरूपी वाणीसे उसकीस्तुति करनेलगे ॥ १ ॥ गायक बोले—कि हेराजा ! हमें तेरी महिमाके वर्णन करने में सामर्थ नहीं हैं क्योंकि जो देवतदाओंमें श्रेष्ठ अपनी मायासे अवतार धारणकर वनके अंगसे उत्पन्न हुयेहैं उनके पौरुषके वर्णन करनेमें ब्रह्मादिकोंकी भी बुद्धि भ्रमित होती है ॥ २ ॥ तौभी उदार यशवाले भगवानके कलावतार आप पृथुके कथारूपी अमृतमें सादर होकर मुनियोंके कहनेसे जैसा उन्होंने हमारे हृदयमें उदय कियाहै उसके अनुसार हम आपके श्लाघनीय कर्मोंका विस्तार करेंगे ॥३॥ यह धर्मधारियोंमें श्रेष्ठ लोकमें धर्मकी प्रवृत्तिकरके धर्मकी

मैत्ता शास्तातत्परिपन्थिनाम् ॥ ४ ॥ एषवैलोकपालानां बिभर्त्येकस्तनौतनूः। कालेकालेयथाभागं लोकयोरुभयोर्हितम् ॥ ५ ॥ वसुकालउपादत्ते कालेचायंविमुंचति। समःसर्वेषुभूतेषु प्रतपन्सूर्यवद्विभुः ॥ ६ ॥ तितिक्षत्यक्रमंवैन्य उपर्याक्रमतामपि। भूतानांकरुणःशश्वदार्तानांक्षितिवृत्तिमान् ॥ ७ ॥ देवेऽवर्षत्यसौदेवो नरदेववपुर्हरिः। कृच्छ्रप्राणाःप्रजाह्येष रक्षिष्यत्यंजसेन्द्रवत् ॥ ८ ॥ आप्याययत्यसौलोकं वदनामृतमूर्तिना। सानुरागावलोकेन विशदस्मितचारुणा ॥ ९ ॥ अव्यक्तवर्त्मैषनिगूढकार्यो गम्भीरवेधाउपगुप्तवित्तः अनन्तमाहात्म्यगुणैकधामापृथुःप्रचेताइवसंवृतात्मा ॥ १० ॥ दुरासदोदुर्विषह आसन्नोऽपिविदूरवत्। नैवाभिभवितुंशक्यो वेनारण्युत्थितोऽनलः ॥ ११ ॥ अन्तर्बहिश्चभूतानां पश्यन्कर्माणिचारणैः। उदासीनइवाध्यक्षो वायुरात्मेवदेहिनाम् ॥ १२ ॥ नादण्ड्यंदण्डयत्येष सुतमात्मद्विषामपि। दण्डयत्यात्मजमपि दण्ड्यंधर्मपथेस्थितः ॥ १३ ॥ अस्याप्रतिहतंचक्रं पृथोरामानसाचलात्। वर्ततेभगवानर्को यावत्तपतिगोगणैः ॥ १४ ॥ रंजयिष्यति यल्लोकमयमात्मविचेष्टितैः। अथामुमाहूराजानं मनोरंजनकैःप्रजाः ॥ १५ ॥ दृढव्रतःसत्यसन्धोब्रह्मण्योवृद्धसेवकः। शरण्यःसर्वभूतानांमानदोदीनवत्सलः ॥ १६ ॥ मातृभक्तिःपरस्त्रीषुपत्न्यामर्धइवात्मनः। प्रजासुपितृवत्स्निग्धःकिंकरोब्रह्मवादिनाम् ॥ १७ ॥ देहिनामात्मवत्प्रेष्ठःसुहृदांनन्दिवर्धनः। मुक्तसङ्गप्रसङ्गोऽयंदण्डपाणिरसाधुषु ॥ १८ ॥ अयंतुसाक्षाद्भगवांस्त्र्यधीशःकूटस्थआत्माकलयाऽवतीर्णः। यस्मि-

मर्यादाकी रक्षा करनेवाला होगा, और अधर्मियोंको दण्डदेगा ॥ ४ ॥ लोकपालोंके देहोंको पालन पोषण, करेगा और कार्यके अनुसार समय २ पर जिससे दोनोंलोकोंका हितहो वह कार्यकरेगा ५॥ यहकरमें द्रव्यको ग्रहण करेगा और यथोचित समयों (दुर्भिक्ष, यज्ञआदिक) मेंउसका त्यागकरेगा और सम्पूर्ण प्राणियोंपर सूर्यकी सदृश समदर्शी होकर प्रकाशितहोगा ॥ ६ ॥ यहदयालु पृथुपृथ्वीकीवृत्तिधारण करके, सर्वसहन पृथ्वीकी सदृश आर्तजनोंके अपराध करुणापूर्वक सहन करेगा ॥७॥ जिसकाल इन्द्रवर्षा न करेंगे उससमय यहनरदेव इन्द्रकीसदृश वर्षाकरके दुःखित प्रजाकी रक्षाकरेगा ॥ ८ ॥ यहअपनी कृपादृष्टि और सुंदर मुखचन्द्रकी मंदमुसकानसे चन्द्रमाकी भांतिजगतको तृप्तकरेगा ॥ ९ ॥ इसपृथुके सम्पूर्णकार्य वरुणके कार्योंकी सदृश गुप्तहोंगे, इसके आनेजानेके मार्गकी तथा परिणामके पूर्वही किसी कार्यकी, और इसके गंभीर प्रयोजनकी किसीकोभी सूचना नहोगी, इसकाद्रव्य छिपाहुआ रहेगा तथायह अत्यंत महिमावाले गुणोंका धामहोगा ॥१०॥ वेनुरूप अग्निसे उत्पन्नहुये इसअग्नि सदृश पृथुका कोईभी तिरस्कार नकर सकेगा ॥ ११ ॥ सम्पूर्ण प्राणियोंके भीतर बाहरके कर्मोंको दूतोंद्वारा देखताहुआ इसभांति उदासीनसा रहेगाकि जैसे सम्पूर्णोंका अधिष्ठाता, देहधारियोंका आत्मभूतवायु उदासीनसा रहताहै ॥ १२ ॥ यहऐसा धर्म्मात्माहोगा कि दंडयोग्य अपने पुत्रकोभी दंडदेगा और दंडके अयोग्य शत्रुके पुत्रकोभी दंडनदेगा ॥ १३ ॥ इसपृथुका मानसोत्तर पर्वततक किजहांतक सूर्यभगवान तपतेहैं अटल राज्यहोगा ॥१४॥ यह अपने चरित्रोंसे लोगोंको आनंदित रक्खेगा इसहेतु अपना मनराजी रहने से लोगइसे राजाकहेंगे ॥१५॥ यहराजा दृढव्रत, सत्यसंकल्प ब्राह्मण तथावृद्धोंका सेवक, सबका शरणदाता, मानदेनेवाला और दीनवत्सलहोगा ॥ १६ ॥ पराईस्त्रीमें माताकीसी भक्तिवालातथा अपनीस्त्रीको अर्द्धभागिनी समझनेवाला, प्रजामें पिताकी समानस्नेह करनेवाला तथाब्रह्म वादियों का दासहोगा ॥ १७ ॥ देहधारियोंको अपनी आत्माके सदृशप्यारा समझेगा, सुहृदोंके आनंदका बढ़ावेगा, निःसंगियोंका प्रसंग करेगा और असाधुओंको दंडदेने वालाहोगा ॥ १८ ॥ यहवीर साक्षात् ब्रह्मा, विष्णु, महेशकी

अविद्यारचितंनिरर्थकंप्रद्रयन्तिनमात्मममपिप्रतीतम् ॥१९॥ अयंभुवोमण्डलमोदयाद्गोप्तैकवीरोनरदेवनाथः। आस्थायजैत्रंरथमात्तचापःपर्यस्यतेदक्षिणतोयथार्कः॥२०॥अस्मैनृपालाःकिलतत्रतत्रबलिंहरिष्यन्तिसलोकपालाः। मंस्यन्तएषांस्त्रिय आदिराजंचक्रायुधंतद्यशउद्धरन्त्यः॥२१॥अयंमहींगांदुदुहेऽधिराजःप्रजापतिर्वृत्तिकरःप्रजानाम्। योलीलयाऽद्रीन्स्वशराग्रकोट्याभिन्दन्समांगामकरोद्यथेन्द्रः॥२॥॥ २२ ॥ विस्फूर्जयन्नाजगवंधनुःस्वयंयदाचरत्क्ष्मामविषह्यमाजौ। तदानिलिल्युर्दिशिदिश्यसन्तोलांगूलमुद्यम्ययथामृगेन्द्रः॥ २३ ॥ एषोऽश्वमेधाञ्छतमाजहार सरस्वतीप्रादुरभावियत्र। अहार्षीद्यस्यहयंपुरंदरःशतक्रतुश्चरमेवर्तमाने ॥ २४॥ एषस्वसद्मोपवनेसमेत्यसनत्कुमारंभगवन्तमेकम्। आराध्यभक्त्याऽलभतामलंतज्ज्ञानंयतोब्रह्मपरंविदन्ति ॥ २५ ॥ तत्रतत्रगिरस्तास्ताइतिविश्रुतविक्रमः। श्रोष्यत्यात्माश्रितागाथाःपृथुःपृथुपराक्रमः ॥ २६ ॥दिशोविजित्याऽप्रतिरुद्धचक्रःस्वतेजसोत्पाटितलोकशल्यः। सुरासुरेन्द्रैरुपगीयमानमहानुभावोभवितापतिर्भुवः॥ २७॥

इतिश्रीमद्भा०चतु०मुनिप्रयुक्तसूतादिस्तोत्रवर्णनंनामषोडशोऽध्यायः ॥ १६ ॥

मैत्रेय उवाच ॥ एवंसभगवान्वैन्यः ख्यापितोगुणकर्मभिः। छन्दयामासतान्कामैः प्रतिपूज्याभिनन्द्यच ॥ १ ॥ ब्राह्मणप्रमुखान्वर्णान्भृत्यामात्यपुरोधसः। पौरान्जानपदान्श्रेणीः प्रकृतीःसमपूजयत् ॥ २ ॥ विदुर उवाच ॥ कस्माद्दधारगोरूपं धरित्रीबहुरूपिणी। यांदुदोहपृथुस्तत्र कोवत्सोदोहनंचकिम् ॥३॥ प्रकृत्याविषमादेवी कृतातेनसमाकथम्। तस्यमेध्यंहयंदेवः कस्यहेतोरपाहरत् ॥ ४ ॥ सनत्कुमारा

करासे उत्पन्न हुआ है, नानाप्रकारके अर्थवाले इस विश्वको अविद्या रचित देखेगा ॥ १९ ॥ यह महाराजा विजयी रथपर बैठकर हाथमे धनुष ले सम्पूर्ण भूमण्डलकी सूर्यकी समान प्रदक्षिणा देताहुआ एकाकी रक्षा करेगा ॥ २० ॥ राजा तथा लोकपाल इसे कर देवेंगे और स्त्रियां इस को विष्णु भगवान का अंश मान इसकी कीर्ति का वखान करेंगी ॥ २१ ॥ यह प्रजापति प्रजाको वृत्ति का देनेवाला गौ रूप पृथ्वी का दोहन करेगा, और सहजहीमे अपने धनुषके अग्र भागमे पहाडोंको तोड़कर सब भूमिको इन्द्रकी नाई समकरेगा ॥ २२ ॥ जब वह युद्धस्थलमें असह्य होकर कुपित सिंहकी समान घूमता हुआ अपने आजगव धनुष की टंकार करेगा, तब सम्पूर्ण दिशाओं के खल छिप जावेंगे ॥ २३ ॥ यह राजा पृथु जहांपर सरस्वती प्रगट हुई हैं वहां पर १०० अश्वमेध यज्ञ करेगा, सौवें यज्ञमें इसका घोडा इन्द्र चुराकर लेजायगा ॥ २४ ॥ यह अपने घर के उपवनमें सनत्कुमार भगवान को पाकर भक्तिपूर्वक उनका आराधन कर निर्मल ज्ञानको प्राप्त होगा। जिससे ब्रह्म पद की प्राप्ति होती है ॥२॥ यह पराक्रमी राजा पृथु जहां तहां अपने पराक्रम के आश्रय रूप वाक्यो को सुनता हुआ ॥ २६ ॥ अपने तेज से दिशाओंको जीतेगा इस राजा का चक्र कहींभी नरुकेगा यह मनुष्योंके दुःखोंको दूर करेगा सुर असुरोंसे गायेहुए अपने प्रभावको सुनेगा और सम्पूर्ण पृथ्वी मण्डल का पति होगा ॥ २७ ॥

इति श्री मद्भागवते महापुराणे० चतुर्थस्कंधे सरला भाषाटीकायां षोडशोऽध्यायः ॥ १६ ॥

मैत्रेयजी बोले कि—गायकोंने जब इसभांति राजापृथुकेगुणों तथा कर्मोंका गानकिया तब राजाने उनका सत्कार तथा पूजनकर उनको प्रसन्नकिया ॥ १ ॥ इसके अनन्तर ब्राह्मणआदिक सम्पूर्ण वर्ण, भृत्य मन्त्री, पुरोहित पुरवासी तथा देशके कारीगरों और प्रजा इनसबका सनमान किया ॥२॥ विदुरजी बोले कि बहुरूपिणी पृथ्वीने गऊकारूप क्यों धारण किया पृथुराजाने उसको दोहन किसभांति किया कौन वत्स तथा क्या पात्रथा ॥ ३ ॥ स्वभावहीसे ऊंची नीची पृथ्वीको

द्भगवतो ब्रह्मन्ब्रह्मविदुत्तमात्। लब्ध्वाज्ञानंसविज्ञानं राजर्षिःकांगतिंगतः ॥ ५ ॥ यच्चान्यदपिकृष्णस्य भवान्भगवतःप्रभोः। श्रवःसुश्रवसःपुण्यंपूर्वदेहकथाश्रयम् ॥ ६ ॥ भक्तायमेऽनुरक्ताय तदश्वाधोक्षजस्यच। वक्तुमर्हसियोऽदुह्यद्वैन्यरूपेण गामिमाम् ॥ ७ ॥ सूतउवाच ॥ चोदितोविदुरेणवं वासुदेवकथांप्रति। प्रशस्यतं प्रीतमना मैत्रेयःप्रत्यभाषत ॥ ८ ॥ मैत्रेयउवाच ॥ यदाभिषिक्तःपृथुरङ्गविप्रैरामन्त्रितो जनतायाश्चपालः। प्रजानिरन्नेक्षितिपृष्ठएत्य क्षुत्क्षामदेहाः पतिमभ्यवोचन् ॥ ९ ॥ वयंराजञ्जाठरेणाभितप्ता यथाऽग्निनाकोटरस्थेनवृक्षाः। त्वामद्ययाताःशरणंशरण्यं यःसाधितोवृत्तिकरःपतिर्नः ॥ १० ॥ तन्नोभवानीहतुरातवेऽन्नं क्षुधार्दितानांनरदेवदेव। यावन्ननंक्ष्यामहउज्झितोर्जा वार्तापतिस्त्वंकिललोकपालः ॥११ मैत्रेय उवाच॥ पृथुःप्रजानांकरुणं निशम्यपरिदेवितम्। दीर्घंदध्यौकुरुश्रेष्ठ निमित्तंसोऽन्वपद्यत ॥ १२ ॥ इतिव्यवसितोबुद्ध्या प्रगृहीतशरासनः। सन्दधेविशिखं भूमेःक्रुद्धस्त्रिपुरहायथा ॥ १३ ॥ प्रवेपमानाधरणी निशाम्योदायुधंचतम्। गौःसत्यपाद्रवद्भीता मृगीवमृगयुद्रुता॥१४॥तामन्वधावत्तद्वैन्यःकुपितोऽत्यरुणेक्षणः।शरं धनुषिसंधाय यत्रयत्रपलायते ॥१५॥ सादिशोविदिशोदेवी रोदसीचान्तरं तयोः। धावन्तीतत्रतत्रैनं ददर्शानूद्यतायुधम् ॥ १६ ॥ लोकेनाविन्दतत्राणं वैन्यान्मृत्योरिव प्रजाः। त्रस्तातदानिववृते हृदयेनविदूयता ॥१७॥ उवाचचमहाभागं धर्मज्ञाऽपन्न

राजाने किसभांति समाकिया, तथा यज्ञके घोड़को इन्द्रक्यों हरलेगया ॥ ४ ॥ हे ब्रह्मन् ब्रह्मवेत्ताओं मे श्रेष्ठ भगवान सनत्कुमारसे राजर्षि पृथु ज्ञानको प्राप्तहोकर किसगतिको प्राप्तहुआ ॥ ५ ॥ हेब्रह्मन् औरभी जो श्रीकृष्ण भगवानका पुण्यकारी यश पुण्यवान पृथुकी कथाके आश्रितहो वह ॥ ६ ॥ मुझ भगवद्भक्तमे आप वर्णन करो कि जिस पृथुराजाने वेनका पुत्रहोकर इसपृथ्वी का दोहनकिया ॥७॥ सूतजीने कहा कि—जब विदुरजीने श्रीकृष्ण भगवानकी कथाकेहेतु इसप्रकार मैत्रेयजीको प्रेरणाकी तो उन्होंने विदुरजीकी प्रशन्सा करके कहा ॥ ८ ॥ मैत्रेयजी बोले कि हे विदुर ! जब ब्राह्मणोंने राजा पृथुका अभिषेक किया और प्रजापालक बनाया तब सम्पूर्ण पृथ्वी अन्नहीन होगई और प्रजा क्षुधासे व्याकुलहो जीर्ण होगई तो सबोंने आकर अपने पति राजा पृथुसेकहा ॥ ९ ॥ कि हेराजन् ! हम जठराग्निसे इसभांति तप्तहोरहे हैं कि जैसे वृक्षके कोटर में अग्निलगनेसे उसके जीव जलतेहैं, हम तुम्हारेशरणहैं हमको वृत्तिदेनेवाला आपको ब्राह्मणोंने हमारा नाथ बनाया है ॥ १० ॥ हेनरदेव ! हम क्षुधार्त होरहे हैं आप हमारी रक्षाकेहेतु उपायकरो, उस कालतक हमें अन्नमिलजाय कि जिसकालतक हम मरेनहीं, हेलोकपालक ! तुम हमारी जीविका के पति और जगतपालकहो ॥ ११ ॥ मैत्रेयजीने कहा कि—हे विदुर ! जब पृथु राजाने इसभांति उनका बिलाप सुना तो बड़ीदेरतक बिचारकिया और दुर्भिक्ष के कारणको जानलिया ॥ १२ ॥ बुद्धिसे इसप्रकार निश्चयकरा कि भूमि सम्पूर्ण औषधियोंके बीजको निगलगई है यह शोच धनुष ग्रहणकर क्रुद्धितहो भूमिकेहेतु इसभांति तीक्ष्णशरका संधानकिया कि जिसभांति शिवजीने त्रिपुर के मारनेके हेतु शरसंधानाथा ॥ १३ ॥ पृथ्वी राजापृथुको अपने ऊपर आयुध उठाय देख कांपने लगी और गौकारूप धारणकर भयखाय इसप्रकारभगी कि जैसे शिकारी (बाधिक) को देखकर मृगी भागतीहै ॥१४॥ जिसके लालनेत्र होरहेहैं ऐसेपृथुने क्रुद्धितहो जहां २ पृथ्वी भागकरगई वहां २ धनुषमें शरको चढ़ाये उसके पीछे दौड़ागया ॥१५॥ वह देविपृथ्वी दिशा विदिशा स्वर्गलोक और पृथ्वीके अन्तरिक्ष जहां भागकरगई वहीं धनुषबाण धारणकिये राजाको आतेहुये देखा ॥ १६ ॥ जिसभांति प्रजाको मृत्युसे कोई रक्षाकरनेवाला नहीं होता उसभांति पृथ्वीको राजापृथुसे रक्षाकरने

वत्सल । आहिमामपिभूतानां पालनेऽवस्थितोभवान् ॥ १८ ॥ सत्वांजिघांससे क-स्माद्दीनामकृताकिल्बिषाम् । अहनिष्यत्कथंयोषां धर्मज्ञइतियोमतः ॥ १९ ॥ प्रहर-न्तिनवैस्त्रीषु कृतागःस्वपिजन्तवः । किमुतत्वद्विधा राजन्करुणादीनवत्सलाः २० मांविपाट्याऽजरांनावं यत्रविश्वंप्रतिष्ठितम् । आत्मानंचप्रजाश्चेमाः कथमम्भसिधा स्यसि ॥ २१ ॥ पृथुरुवाच ॥ वसुधेत्वांवधिष्यामि मच्छासनपराङ्मुखीम् । भागं बर्हिषियावृक्ते नतनोतिचनोवसु ॥२२॥ यवसंजग्ध्यनुदिनंनैव दोग्ध्यौधसंपयः । तस्यामेवंहिदुष्टायां दण्डोनात्रनशस्यते ॥ २३ ॥ त्वंखल्वोषधिबीजानिप्राक् सृष्टा-निस्वयंभुवा । नमुंचस्यात्मरुद्धानि मामवज्ञायमन्दधीः ॥ २४ ॥ अमूषांक्षुत्परीता-नामार्तानां परिदेवितम् । शमयिष्यामि मद्बाणैर्भिन्नायास्तवमेदसा ॥ २५ ॥ पुमा-न्योषिदुतक्लीब आत्मसंभावनोऽधमः । भूतेषुनिरनुक्रोशो नृपाणांतद्वधोऽवधः २६ त्वांस्तब्धांदुर्मदांनीत्वा मायागांतिलशःशरैः । आत्मयोगबलेनेमा धारयिष्याम्यहं प्रजाः ॥ २७ ॥ एवंमन्युमयींमूर्तिं कृतान्तामिवबिभ्रतम् । प्रणताप्रांजलिःप्राह मही संजातवेपथुः ॥ २८ ॥ धरोवाच ॥ नमःपरस्मैपुरुषायमायया विन्यस्तनानातन-वेगुणात्मने । नमःस्वरूपानुभवेननिर्धुतद्रव्यक्रियाकारकविभ्रमोर्मये ॥ २९ ॥ येना हमात्मायतनंविनिर्मिता धात्रायतोऽयंगुणसर्गसंग्रहः । सएवमांहन्तुमुदायुधः स्व राडुपस्थितोऽन्यंशरणंकमाश्रये ॥ ३० ॥ यएतदादावसृजच्चराचरं स्वमाययाऽऽ त्माश्रययाऽवितर्क्यया । तयैवसोऽयंकिलगोप्तुमुद्यतःकथंनुमांधर्मपराजिघांस-

वाला कोई न मिला तबव्याकुलचित्तसे दुःखितहोकर पीछेको लौटी॥१७॥और राजापृथुसे कहनेलगी, कि हेमहाभाग ! हेधर्मज्ञ ! हेशरणागत वत्सल! तुममेरी रक्षाकरो आप सम्पूर्ण प्राणियोंके पालने-वालेहो ॥ १८ ॥ मुझ दीन निरपराधिनी अबलाको आप धर्मज्ञ होकर कैसे मारोगे ? ॥१९॥ स्त्री अपराध भीकरें तोभी उसकोनहीं मारनाचाहिये फिर हेराजन् ! तुम सरीखे करुणावान दीनवत्सल पुरुष स्त्रियोंको क्यों मारतेहो॥२०॥फिर जिस मुझपर यह संपूर्ण सृष्टि स्थितहै ऐसी मुझ दृढ़ नौका को नाश करके प्रजा तथा अपनी आत्माको जलपर किसभांति धारणकरोगे ॥२१॥ राजा पृथुने कहा कि हेपृथ्वि ! तूनेमेरी अवज्ञाकी इसहेतु मैं तेरावध करूंगा क्योंकि यज्ञमें तो तू अपनाभाग लेलेतीहै और फिर धान्य इत्यादिक द्रव्योंका विस्तार नहीं करती ॥२२॥ जो गौ प्रतिदिन हरे२ तृणोंको चरै औरफिर दूध न दे तो उसको दण्ड मिलताहै इसभांति तुझभी दण्ड मिलना योग्य है ॥ २३ ॥ तुझ मन्दबुद्धिने मेरी अवज्ञाकरके ब्रह्माजी के पहले सजेहुये बीजोंको निगल लिया अब तू उनको नहीं त्यागती ॥ २४ ॥ इस क्षुधार्तप्रजाका तनको विदारकर तेरे मेदसे दुःख दूर करूंगा ॥ २५ ॥ पुरुष स्त्री नपुंसक चाहे कोईहो यदिवह अधम प्राणियोंपर कृपा न करे और अहमेव (अहंकार) रक्खे उसके वधकरनेसे राजाको दोष नहींहोता ॥२६॥तुझ गर्भित मदवालीको बाणोंसे तिल२ करके अपने आत्मयोगके बलसे सम्पूर्णप्रजाको अपनेमें धारण करूंगा ॥२७॥ जब पृथ्वीने राजाकी इसभांति कालके सदृश क्रोधमयी मूर्तिदेखी तो कांपतीहुई हाथजोड विनय पूर्वक बोली ॥ २८ ॥ पृथ्वीने कहा कि—मायासे गुणात्मक देहके धारण करनेवाले पुरुषरूप परमात्मा आपको नमस्कारहै, जिन्होंने अपनेरूपके अनुभवसे द्रव्याक्रिया और अध्यात्मिक देवताओं संबंधी अहंकार, तथा रागद्वेषादि ऊर्मियोंको छोड़दियाहै उन आत्माकोमैं दण्डवत करतीहूं ॥ २९ ॥ जिस ब्रह्माने प्राणियोंके रहनेके हेतु मुझ स्थापित कियाहै और जिस मुझपर चारप्रकारके प्राणी रहते है उसको स्वराट् चक्रवर्ती आज आयुध उठाकर मारनेको उपस्थितहुआहै मै आप बिना किसकी सरणजाऊं ॥ ३० ॥ जिस परमेश्वरने अपनी मायासे सृष्टिके चराचर प्राणियोंको उत्पन्न

ति ॥ ३१ ॥ नूनंबतेशस्यसमीहितं जनैस्तन्माययादुर्जययाऽकृतात्मभिः। नलक्ष्यते यस्त्वकरोदकारयद्योऽनेक एकः परतश्चईश्वरः ॥ ३२ ॥ सर्गादियोऽस्यानुरुणद्धि शक्तिभिर्द्रव्यक्रियाकारकचेतनात्मभिः। तस्मैसमुन्नद्धनिरुद्धशक्तये नमःपरस्मैपुरुषायवेधसे ॥ ३३ ॥ सवैभवानात्मविनिर्मितं जगद्भूतेन्द्रियांतःकरणात्मकंविभो। संस्थापयिष्यन्नजमां रसातलादभ्युज्जहाराम्भसआदिसूकरः ॥ ३४ ॥ अपामुपस्थे मयिनाव्यवस्थिताः प्रजाभवानद्यरिरक्षिषुःकिल। सवीरमूर्तिःसमभूद्धराधरो यो मांपयस्युग्रशरोजिघांससि ॥ ३५ ॥ नूनंजनैरीहितमीश्वराणामस्मद्विधैस्तद्गुणसर्गमायया। नज्ञायतेमोहितचित्तवर्त्मभिस्तेभ्यो नमोवीरयशस्करेभ्यः ॥ ३६ ॥

इतिश्रीमद्भा० चतुर्थ० पृथुविजयेधरित्रीनिग्रहो नामसप्तदशोऽध्यायः ॥ १७ ॥

मैत्रेय उवाच ॥ इत्थंपृथुमभिष्टूयरुषाप्रस्फुरिताधरम्। पुनराहावनिर्भीतासंस्तभ्यात्मानमात्मना ॥ १ ॥ संनियच्छाभिभोमन्युंनिबोधश्रावितचमे। सर्वतःसारमादत्तेयथामधुकरोबुधः ॥ २ ॥ अस्मिँल्लोकेऽथवामुष्मिन्मुनिभिस्तत्त्वदर्शिभिः। दृष्टायोगाःप्रयुक्ताश्चपुंसांश्रेयःप्रसिद्धये ॥ ३ ॥ तानातिष्ठतियःसम्यगुपायान्पूर्वदर्शितान्। अवरःश्रद्धयोपेतउपेयान्विन्दतेऽञ्जसा ॥ ४ ॥ ताननादृत्ययोविद्वानर्थानारभतेस्वयम्। तस्यव्यभिचरन्त्यर्थाआरब्धाश्चपुनःपुनः ॥ ५ ॥ पुरासृष्टाह्योषधयोब्रह्मणायाविशांपते। भुज्यमानामयादृष्टाअसद्भिरधृतव्रतैः ॥ ६ ॥ अपालिताऽनादृताच

कियाहै तथा जो उसीमायासे अभी सृष्टिकी रक्षाको उत्पन्न हुआ है सो धर्मपरायण आप मुझे कैसे मारोगे ॥ ३१ ॥ सत्यहै कि अज्ञान बुद्धि मनुष्य परमेश्वरकी अजयमायासे उसकी चेष्टाको नहीं जानसकता कि जिस एकमायासे स्वतन्त्र तथा अनेकरूपवाले परमेश्वरने यहसृष्टि उत्पन्नकी और ब्रह्माद्वारा सृष्टिमें प्राणियोंको उत्पन्न करवाया ॥ ३२ ॥ तथा जो पंचमहाभूत इन्द्री, चेतना, बुद्धि, और अहंकाररूपी अपनी शक्तियोंसे सर्गादिककी रचना स्थित औरसंहार करताहै ऐसीबड़ी शक्तिवाले वेधारूप परमपुरुष आपको नमस्कारहै ॥ ३३ ॥ हेप्रभु! आपने पंचमहाभूत, इन्द्रियें, और आत्मासे अपनीरचीहुई सृष्टिको भलीभांति स्थापितकरनेके निमित्त वाराहरूप धारणकर रसातलसे मेरा उद्धार कियाथा ॥ ३४ ॥ तथा जल के ऊपर मुझे स्थापितकर सृष्टि रक्षाकेलिये आज पृथुरूप धारणकियाहै सो मुझको स्थापित करनेवाले आप तीक्ष्ण बाण चढ़ाकर मारा चाहतेहो ॥ ३५ ॥ जिन भगवानके सेवकोंकीभी चेष्टा नहीं जाननेमेंआती उनभगवानकीचेष्टा फिरकैसेजानीजाय! इस हेतु परमेश्वरकी गुण सर्गरूप मायामें मोहितहुईमै उनजितेंद्रिय भगवानकी कीर्तिबढ़ानेवाले भक्तों को भी नमस्कार करतीहूं ॥ ३६ ॥

इति श्री भागवते महापुराणे सरलाभाषाटीकायां सप्तदशोऽध्यायः ॥ १७ ॥

मैत्रेयजी बोलेकि—भयभीत पृथ्वीने क्रोधसे फड़कतेहुये होठवाले राजापृथु की स्तुतिकरके स्थिरचित्तहोकर फिरकहा ॥ १ पृथ्वीने कहाकि हेराजन्! क्रोधको दूरकरो और जो मैंकहतीहूं वहसुनो, विवेकी मनुष्य वस्तुकाचारों ओरसे भौंरेकी सदृशसार २ ग्रहण करतेहैं ॥ २ ॥ इसलोक और परलोकमें तत्वदर्शी मुनियोंने मनुष्योंके सुखकेहेतु जोप्रयोग बतायेहैं ॥ ३ ॥ उन्ही मुनियोंके बतायेहुये प्रयोगोंका जोश्रद्धा पूर्वक भलीभांति अनुष्ठान करताहै वहमनुष्य उनउपायोंसे सहजहीमें पदार्थ उत्पन्न करसकताहै ॥ ४ ॥ और जोमूढ़ उनउपायोंका तिरस्कार करके अपनी बुद्धिसे दूसरे प्रकार से उसका प्रयोग करताहै, सोउसके उनउपायोंसे वारंवार प्रयोग करने परभी उसकी सिद्धि नहींहोती ॥ ५ ॥ हेविशांपते! प्रथम ब्रह्माजीने जोअन्न उत्पन्न कियाथा उसको मैनेअव्रत हीराजा

भवद्भिर्लोकपालकैः । चोरीभूतेऽथ लोके ऽहं यज्ञार्थे ऽग्रसमोषधीः ॥ ७ ॥ नूनं ता वीरुधः क्षीणा मयि कालेन भूयसा । तत्र योगेन दृष्टेन भवानादातुमर्हति ॥ ८ ॥ वत्सं कल्पय मे वीर येनाहं वत्सला तव । धोक्ष्ये क्षीरमयान्कामाननुरूपं च दोहनम् ॥ ९ ॥ दोग्धारं च महाबाहो भूतानां भूतभावन । अन्नमीप्सितमूर्जस्वद्भगवान्वाञ्छते यदि ॥ १० ॥ समां च कुरु मां राजन्देववृष्टं यथा पयः । अपर्तावपि भद्रं ते उपावर्तेत मे विभो ॥ ११ ॥ इति प्रियं हितं वाक्यं भुव आदाय भूपतिः । वत्सं कृत्वा मनुं पाणावदुहत्सकलौषधीः १२ तथाऽपरे च सर्वत्र सारमाददते बुधाः । ततोऽन्ये च यथाकामं दुदुहुः पृथुभाविताम् १३ ऋषयो दुदुहुर्देवीमिन्द्रियेष्वथ सत्तम । वत्सं बृहस्पतिं कृत्वा पयश्छन्दोमयं शुचि १४ कृत्वा वत्सं सुरगणा इन्द्रं सोममदूदुहन् । हिरण्मयेन पात्रेण वीर्यमोजो बलं पयः १५ दैतेयादानवा वत्सं प्रह्लादमसुरर्षभम् । विधायादूदुहन्क्षीरमयःपात्रे सुराऽऽसवम् ॥ १६ ॥ गन्धर्वाप्सरसोऽधुक्षन्पात्रे पद्ममये पयः । वत्सं विश्वावसुं कृत्वा गान्धर्वं मधु सौभगम् ॥ १७ ॥ वत्सेन पितरोऽर्यम्णा कव्यं क्षीरमधुक्षत । आमपात्रे महाभागाः श्रद्धया श्राद्धदेवताः ॥ १८ ॥ प्रकल्प्य वत्सं कपिलं सिद्धाः संकल्पनामयीम् । सिद्धिं नभसि विद्यां च ये च विद्याधरादयः ॥ १९ ॥ अन्ये च मायिनो मायामन्तर्धानाद्भुतात्मनाम् । मयं प्रकल्प्य वत्सं ते दुदुहुर्धारणामयीम् ॥ २० ॥ यक्षरक्षांसि भूतानि पिशाचाः पिशिताशनाः भूतेशवत्सा दुदुहुः कपाले क्षतजासवम् ॥ २१ ॥ तथाऽहयो दन्दशूकाः सर्पा नागाश्च तक्षकम् । विधाय वत्सं दुदुहुर्बिलपात्रे विषं पयः ॥ २२ ॥ पशवो यवसं क्षीरं वत्सं कृत्वा

वेनइत्यादिकके भोगमें आतादेखा॥६॥जबआपसे लोकपालक लोगोंनेतो मेराअनादरकियाऔर सम्पूर्ण मनुष्य प्रायःचोर होगये, तबयज्ञके हेतुमैंनेयह ओषधियें ग्रसलीं ॥ ७ ॥ वेवनस्पतियें बहुत काल रहनेपर मेरादेहमें क्षीणहोगईहैं, इसहेतु मुनियोंके बतायेहुये यतसे उसअन्नको मुझसेलेलो ॥ ८॥ हेवीर ! एकवत्स और दूसरा वेमाड़ी उचितपात्र कल्पित करोकि जिससे मैं आपपर प्रसन्न होकर क्षीरमय तुम्हारी सम्पूर्ण कामनायें पूर्णकरूं॥ ९ ॥ हेमहाबाहो! हेभूतभावन्! यदिआप प्राणियोंके मनवांछित बलदायी अन्नको चाहते होतोएक दुहनेवाला नियतकरो ॥ १० ॥ हेराजन् ! हेप्रभो ! आपमुझे बराबर कर दीजियेकि जिससे वर्षाऋतुके बीतजाने परभी इन्द्रका वर्षायाहुआ जलमेरे प्रत्येक स्थानपर सदाभरारहे ॥ ११ ॥ राजाने पृथ्वीके इसप्रकार प्रियहितकारी वाक्य सुनकर मनुको वत्सबना हाथमे दोहनाले सम्पूर्ण औषधियोंको दुहलिया ॥ १२ ॥ औरभी विवेकी जनोंने पृथुकी पृथ्वीका अपनी कामनानुसार दोहनकिया ॥ १३ ॥ हेविदुर ! ऋषियोंने इन्द्रियोंकोपात्र और बृहस्पतिको वत्सबना वेदमय दुग्धकोदुहा ॥ १४ ॥ देवताओंने इन्द्रको वत्सबना सुवर्णमय पात्रमें अमृत, वीर्य, और बलरूप दुग्धदुहा ॥ १५ ॥ दैत्य और दानवोंने असुरेश्वर प्रह्लादको वत्सबना लोहमय पात्रमें मदिरा आसव रूपदुग्धदुहा ॥ १६ ॥ गन्धर्व और अप्सराओंने विश्वावसुको वत्सकर कमलमय पात्रमें गानविद्या रूपदुग्धका वाणीकी मधुरता और सुंदरता सहितदुहा ॥ १७ ॥ श्राद्धके देवता पितृश्वरोंने अर्यमा पितृको वत्सबना अपक्व मृत्तिकामय पात्रमें कव्यरूप दुग्धकोदुहा॥ १८॥ सिद्धोंने कपिलदेवजीको वत्स बनाकर आकाशरूपी पात्रमें अणिमादिक सिद्धि रूप दूधका दोहन किया, और विद्याधरों ने आकाशचारी विद्यारूप दूधको दुहा ॥ १९ ॥ औरभी मायावी लोगों ने मय दैत्यको वत्साकर अंतर्ध्यानादिक अद्भुत माया तथा संकल्पमात्र से सिद्ध होनेंवाली मायारूप दूधका दोहन किया ॥ २० ॥ यक्ष, राक्षस, भूत, पिशाच जो मांसाहारी थे उन्होंने रुद्रका वत्स बनाकर, कपाल पात्रमें रुधिर रूपी मदिरा को दुहा ॥२१॥ तैसेही अहि, दन्दशूक, नाग, बिच्छू आदिक विषैल प्राणियोंनें,तक्षक को वत्साकर बिल रूप पात्रमें बिषरूप दूध का दोहन किया ॥२२॥

चगोवृषम् । अरण्यपात्रेचाधुक्षन्मृगेन्द्रेणचदंष्ट्रिणः ॥२३॥ क्रव्यादाःप्राणिनःक्रव्यं दुदुहुःस्वकलेवरे सुपर्णवत्साविहगाश्चरंचाऽचरमेवच ॥ २४ ॥वटवत्सावनस्पतयःपृथग्रसमयंपयः । गिरयोहिमवद्वत्सानानाधातून्स्वसानुषु ॥२५॥सर्वेस्वमुख्यवत्सेनस्वेस्वेपात्रेपृथक्पयः । सर्वकामदुघांपृथ्वींदुदुहुः पृथुभाविताम् ॥ २६ ॥ एवं पृथ्वादयःपृथ्वीमन्नादाःस्वन्नमात्मनः । दोहवत्सादिभेदेनक्षीरभेदंकुरूद्वह ॥ २७ ॥ ततोमहीपतिःप्रीतःसर्वकामदुघांपृथुः । दुहितृत्वेचकारेमांप्रेम्णादुहितृवत्सलः २८ चूर्णयन्स्वधनुष्कोट्यागिरिकूटानिराजराट् । भूमण्डलमिदंवैन्यःप्रायश्चक्रेसमंविभुः ॥ २९ ॥ अथास्मिन्भगवान्वैन्यःप्रजानांवृत्तिदःपिता । निवासान्कल्पयांचक्रे तत्रतत्रयथार्हतः ॥३०॥ ग्रामान्पुरःपत्तनानिदुर्गाणिविविधानिच । घोषान्व्रजान्सशिबिरानाकरान्खेटखर्वटान् ॥ ३१ ॥ प्राक्पृथोरिहनैवैषापुरग्रामादिकल्पना ।यथा सुखंवसंतिस्मतत्रतत्राकुतोभयाः ॥ ३२ ॥

इतिश्रीमद्भा०पध्रुविजयेपृथुनापृथिवीदोहनवर्णनंनामाऽष्टादशोऽध्यायः ॥ १८ ॥

मैत्रेयउवाच ॥ अथादीक्षतराजा तुहयमेधशतेनसः । ब्रह्मावर्तेमनोःक्षेत्रे यत्र प्राचीसरस्वती ॥ १ ॥ तदभिप्रेत्यभगवान्कर्मातिशयमात्मनः । शतक्रतुर्नममृषे पृथोर्यज्ञमहोत्सवम् ॥ २ ॥ यत्रयज्ञपतिःसाक्षाद्भगवान्हरिरीश्वरः । अन्वभूयतसर्वात्मा सर्वलोकगुरुःप्रभुः ॥३॥ अन्वितोब्रह्मशर्वाभ्यां लोकपालैःसहानुगैः । उपगीयमानोगन्धर्वैर्मुनिभिश्चाप्सरोगणैः ॥ ४ ॥ सिद्धविद्याधरादैत्या दानवागुह्यकादयः ।

पशुओं ने नंदिकेश्वर को बत्स बनाकर वन रूपी पात्र मे घास रूपी दूध का, डाढवाले मांसाहारी जीवों ने सिंह को बत्स बनाकर ॥ २३ ॥ शरीर रूप पात्र मे मांस रूप दूध का और पक्षियों नें गरुड को बत्स बनाकर सब पक्षि कीट आदि अचर फल रूप दूध का दोहन किया ॥ २४ ॥ वृक्षों ने बट को बत्स बनाकर अनेक प्रकार के रसमय दूध को दुहा पर्वतों ने हिमाचल को बत्स बनाकर ।शिखर रूपी पात्र में नाना भाति के धातु रूप दूध को दुहा ॥२५॥ एसेहा सभोंने अपने २ मुखियाको बत्स बनाकर, अपने २ पात्र मे कामना पूर्ण करनेबाला पृथु की आधीन की हुई पृथ्वी स पृथक २ दूध दुहा ॥ २६ ॥ हे विदुर ! इस भांति अन्न भक्षी पृथु आदिक सब लोगों न पात्र बत्स आदिक भेदसे अपने इच्छित पृथक् २ पदार्थों का दोहन किया ॥ २७ ॥ फिर राजा पृथुने प्रसन्नता पूर्वक सम्पूर्ण कामनाओं की पूर्ण करने वाली पृथ्वी का स्नेहसे अपनी प्यारी पुत्री बनाई जो पृथु बडा दुहितृ वत्सल था ॥२८॥ फिर महाराजाधिराज राजा पृथुनें अपने धनुष की कोटि से पहाडों के शिखरों को चूर्ण करके इस पृथ्वी को प्राय समान करदिया ॥ २९ ॥ फिर पिता की समान, प्रजाओ को वृत्ति देनें वाले राजा पृथुने इस भूमण्डल में जहा तहां निवास स्थान बनाए ॥ ३० ॥ गाव, हाट, पुर, गढ, घोषयों क रहनें के स्थान, गायों क रहनें के स्थान, शिविर, किसानों के गाव, सुवर्णादिको की खान पर्वतोंके नीचेक ग्राम आदिक नाना निवासस्थान कल्पित किए॥३१॥राजा पृथुसे पूर्व इस पृथ्वीपर ग्रामादिकों की रचना नहीं थी किंतु जहा मनुष्य आराम देखते थे वहीं अभय होकर रहतेथे ॥ ३२ ॥

इति श्री मद्भागवते महापुराण० चतुर्थस्कंधे सरला भाषाटीकाया अष्टादशोऽध्यायः ॥ १८ ॥

मैत्रेयजीने कहा–किफिर उसपृथुराजाने मनुक्षेत्र ब्रह्मावर्त्तमे जहासरस्वती नदीबहतीहै वहां १०० अश्वमेधयज्ञ करनेका संकल्पकिया ॥ १ ॥ भगवान् पृथुके इसकर्मको इन्द्र अपनेसे अधिकजान, उसके यज्ञके महोत्सवको न सहसका ॥ २ ॥ उसयज्ञमे सर्वात्मा, सम्पूर्ण लोकोंकेपति, यज्ञेश्वर साक्षात् हरिभगवान् प्रगट हुयथ ॥ ३ ॥ जिनकसंग ब्रह्मा, रुद्र, लोकपाल अपने सेवकों समेत आयेथे और गन्धर्व, अप्सरागण जिनकायश गारहेथे ॥ ४ ॥ सिद्ध, विद्याधर, दैत्य, दानव, यक्ष

सुनन्दनन्दप्रमुखाः पार्षदप्रवराहरेः ॥ ५ ॥ कपिलोनारदोदत्तो योगेशाःसनकादयः तमन्वीयुर्भागवता येचतत्सेवनोत्सुकाः ॥ ६ ॥ यत्रधर्मदुघाभूमिः सर्वकामदुघासती । दोग्धिस्माभीप्सितानर्थान्यजमानस्य भारत ॥ ७ ॥ ऊहुःसर्वरसान्नद्यः क्षीरदध्यन्नगोरसान् । तरवोभूरिवर्ष्माणः प्रासूयन्तमधुच्युतः ॥ ८ ॥ सिन्धवोरत्ननिकरान्गिरयोऽन्नं चतुर्विधम् । उपायनमुपाजह्रुः सर्वेलोकाःसपालकाः ९॥ इतिचाधोक्षजेशस्य पृथोस्तुपरमोदयम् । असूयन्भगवानिन्द्रः प्रतिघातमचीकरत् ॥ १० ॥ चरमेणाऽश्वमेधेन यजमानेयजुष्पतिम् । वैन्येयज्ञपशुं स्पर्द्धन्नपोवाहतिरोहितः ॥११॥ तमत्रिर्भगवानैक्षत्त्वरमाणं विहायसा । आमुक्तमिवपाखण्डं योऽधर्मेधर्मविभ्रमः ॥ १२ ॥ अत्रिणाचोदितोहन्तु पृथुपुत्रोमहारथः । अन्वधावतसंक्रुद्धस्तिष्ठ तिष्ठेतिचाब्रवीत् ॥ १३ ॥ तंतादृशाकृतिंवीक्ष्य मेनेधर्मंशरीरिणम् । जटिलं भस्मनाच्छन्नं तस्मैबाणंनमुंचति ॥ १४ ॥ वधान्निवृत्तंतंभूयो हन्तवेऽत्रिरचोदयत् जहियज्ञहनंतात महेन्द्रंविबुधाधमम् ॥ १५ ॥ एवंवैन्यसुतः प्रोक्तस्त्वरमाणंविहायसा । अन्वद्रवदभिक्रुद्धो रावणंगृध्रराडिव ॥ १६ ॥ सोऽश्वंरूपंच तद्धित्वा तस्मा अन्तर्हितःस्वराट् । वीरःस्वपशुमादाय पितुर्यज्ञमुपेयिवान् ॥ १७ ॥ तत्तस्य चाद्भुतंकर्म विचक्ष्यपरमर्षयः । नामधेयंददुस्तस्मै विजिताश्वइतिप्रभो ॥ १८ ॥ उपसृज्यतमस्तीव्रं जहाराश्वंपुनर्हरिः । चषालयूपतश्छन्नो हिरण्यरशनंविभुः ॥१९॥ अत्रिःसंदर्शयामास त्वरमाणंविहायसा । कपालखट्वांगधरं वीरोनैनमबाधत२०

तथा सुनंद, नदइत्यादिक भगवान्के श्रेष्ठपार्षद ॥ ५ ॥ कपिलदेव, नारद, दत्तात्रेय, सनकादिक, योगेश्वर, तथा और भी जो परमेश्वर के भक्त थ वहभी परमेश्वर के संग आए ॥ ६ ॥ हे विदुर ! जहांपर सम्पूर्ण इच्छाये पूर्ण करनेवाली पृथ्वी गो का रूप धारण करके यजमान की समस्त कामनाये पूरी करती हुई ॥ ७ ॥ सम्पूर्ण रसों को देनेवाली नदिये दूध, दही, अन्न, गोरस आदि रसों से वहने लगी और वृक्ष नाना भाति के शरीर धारण करके मधुकी सदृश मिष्ट परिपक्वफल देने लगे ॥ ८ ॥ समुद्र नें रत्नोंक समूह दिये और पर्वतों ने अपनी खानो मे चार प्रकार के भक्ष्य, भोज्य, लेह्य, चोस्य पदार्थ प्रगट किये ॥९॥ तथा लोकपालोंने भेटे दी अधोक्षज पृथुके परम उदयको इन्द्र न सहसका तो उसनें यज्ञ म बाधा डाली ॥ १० ॥ और जब पृथु सौवे अश्वमेध करके परमेश्वरकी आराधना करने लगे तब इन्द्र ने स्पर्धा करके. अंतर्ध्यान होकर यज्ञके पशुको हरलिया ॥ ११ ॥ अधर्म के विभ्रम, पाखण्ड के कवच को धारण किये इन्द्र को भगवान अत्रि नें आकाश मार्ग से जाते देखा ॥ १२ ॥ अत्रि ऋषि ने महाराज पृथुके पुत्र को इन्द्र के मारने के हेतु प्रेरणा की तो वह महारथी अति क्रोधित हो इन्द्र के पाछे दौडा और ठहर ठहर, इस भांति पुकारा ॥ १३ ॥ परन्तु पृथु पुत्रनें इन्द्र को जटा धारण किये और भस्म लगाए देख धर्म शरीर मान उसपर बाण प्रहार नहीं किया।१४। जब अत्रिनदेखा कि पृथुपुत्र इन्द्रके बधसे निवृत्त होगया--तो फिर प्रेरणाकी--कि हेपुत्र यह यज्ञ का नाश करनेवाला, देवताओं में अधम इन्द्रहै इसको मार ॥ १५ ॥ जब अत्रिऋषिने पृथुके पुत्र से इसभांति कहा तो वह आकाश मार्गसे शीघ्रतापूर्वक ऐसेदौड़ा कि जैसे रावणकेपीछे गिद्धराज जटायू दौड़ाथा ॥ १६ ॥ तबइन्द्र घोड़को छोड़ अपनेरूपको त्यागकर अंतर्ध्यान होगया, फिरवह वीर अपने पशुकोले यज्ञशालामे आया ॥ १७ ॥ हेविदुर ! बड़े २ ऋषियोंने इसक अद्भुत कर्मको देख अश्वजीत करलेआनेकेकारण उसका विजिताश्व नामरक्खा।१८॥फिरइन्द्रने बड़ा घोरअंधेकार फैलाकर घोड़ेका यज्ञस्तम्भसे खोल सोनेकी सांकल समेत उसका हरण किया ॥ १८ ॥ अत्रिने

अत्रिणाचोदितस्तस्मै संदधेविशिखंरुषा । सोऽश्वंरूपंचतत्हित्वा तस्थावन्तर्हितः स्वराट् ॥ २१ ॥ वीरश्चाश्वमुपादाय पितृयज्ञमथाव्रजत् । तदवद्यंहरेरूपं जगृहुर्ज्ञानदुर्बलाः ॥ २२ ॥ यानिरूपाणिजगृहे इन्द्रोहयजिहीर्षया । तानिपापस्यखण्डानि लिंगंखण्डमिहोच्यते ॥ २३ ॥ एवमिन्द्रेहरत्यश्वं वैन्ययज्ञजिघांसया । तद्गृहीतविसृष्टेषु पाखण्डेषुमतिर्नृणाम् ॥२४॥ धर्मइत्युपधर्मेषुनग्नरक्तपटादिषु । प्रायेणसज्जतेभ्रान्त्या पेशलेषुचवाग्मिषु ॥२५॥ तदभिज्ञाय भगवान्पृथुः पृथुपराक्रमः । इन्द्राय कुपितोबाणमादत्तोद्यतकार्मुकः ॥ २६ ॥ तमृत्विजः शक्रवधाभिसंधितं विचक्ष्यदुःप्रेक्ष्यमसह्यरंहसम् । निवारयामासुरहोमहामते नयुज्यतेऽत्रान्यवधःप्रचोदितात् ॥ २७ ॥ वयंमरुत्वन्तमिहार्थनाशनं ह्वयामहेत्वच्छ्रवसाहतत्विषम् । अयातयामोपहवैरनन्तरं प्रसह्यराजंजुहवामतेऽहितम् ॥ २८ ॥ इत्यामन्त्र्यक्रतुपतिं विदुरास्यर्त्विजोरुषा । स्रुग्घस्तांजुह्वतोऽभ्येत्य स्वयंभूःप्रत्यषेधत ॥ २९ ॥ नवध्योभवतामिन्द्रो यद्यज्ञोभगवत्तनुः । यंजिघांसथयज्ञेन यस्येष्टास्तनवः सुराः ॥ ३० ॥ तदिदं पश्यत महद्धर्मव्यतिकरं द्विजाः ॥ इन्द्रेणानुष्ठितं राज्ञः कर्मैतद्विजिघांसता ॥ ३१ ॥ पृथुकीर्तेः पृथोर्भूयात्तर्ह्येकोनशतक्रतुः अलंतेक्रतुभिः स्विष्टैर्यद्भवान्मोक्षधर्मवित् ॥ ३२ ॥ नैवात्मनेमहेन्द्राय रोषमाहर्तुमर्हसि । उभावपिहिभद्रं तउत्तमश्लोकविग्रहौ ॥ ३३ ॥ माऽस्मिन्महाराजकृथाःस्मचिन्तां नि'

आकाशमार्गसे शीघ्रतापूर्वक, जातेहुये इन्द्रको विजिताश्वको दिखाया परन्तु विजिताश्वने उस कपाल और खट्वांगधारणकिये देख इसपर बाण न चलाया॥२०॥परन्तु अत्रिनेफिर उसका प्रेरित किया तो उसनेक्रुधितहो इन्द्रपर शरसन्धाना किन्तु इन्द्र उसरूप औरघोड़ेको त्यागकर अन्तर्धान होगया ॥२१॥ वहवीर घोड़को लेकर यज्ञस्थानमें आया इन्द्रने जो पाखण्डरूप धारण कियाथा उसे अज्ञानियों ने धर्म समझकर ग्रहणकिया ॥२२॥घोडा चुराने की कामना से इन्द्र ने जो २ वेष धारण कियेथ वही२ पाप के चिह्नहुए॥२३॥पृथु के यज्ञ नाश की कामना से इन्द्रने जो रूप धारण करके घोडे का हरण कियाथा वह रूप पाखंडियों ने ग्रहण करलिया ॥२४॥ वहपाखण्ड पथ यहहै नग्न (जैन) रक्तपट (बौद्ध) और कापालिक इनको अज्ञानी धर्म मानकर इनमें फस जाते हैं क्यों कि यह बाहर से बड़ा सुंदर वाणी वाले दिखाई देते हैं ॥ २५ ॥ राजापृथुने यह वृत्तांतजान कुपितहो इन्द्र के वध केहेतु धनुष उठा हाथ में बाणलिया ॥ २६ ॥ उसअसह्य वेगवाले पृथुको, कि जिनके सन्मुख देखनाहो अतिकठिनहै, इन्द्रके मारनेका प्रयोजन जान ऋत्विजोंने निवारणकिया-कि हे महाबाहो ! यहांयज्ञमें पशुवधके अतिरिक्त दूसरे कावध आपको नहीं करना चाहिये ॥ २७ ॥ हेराजन् ! यदिइन्द्रके नाशकरने काहीआपकाविचारहै तौआपके यशसे कान्तिहीन अपराक्रमी इन्द्रको हममन्त्रोंद्वारा आह्वानकरके बुलावेंगे और फिरबलात्कार उसअग्निकुंडमें होमदेंगे ॥२८॥ हे विदुर ! वेऋत्विज यज्ञपति राजापृथुसे इसभांतिसलाहकरकेरोषपूर्वक स्रुवा हाथमेंले होमकरनेलगेकि इतनेमेंही ब्रह्माजीने आकर कहाकि॥२९॥तुमको इन्द्रका मारना योग्यनहीं है, क्योंकियहयज्ञ भगवान्की देहहै और इन्द्रभी भगवान्की देहहै उसीयज्ञद्वारा आराधन कियेजाते यहसब देवता यज्ञमूर्तिहैं ॥ ३० ॥ इसनिमित्त तुमको इन्द्रसे मित्रता करनी योग्यहै । हेब्राह्मणों! राजापृथुके यज्ञका विध्वंस चाहनेवाले इन्द्रने जोयहधर्म नाशक पाखंडमार्ग चलायाहै उसदेखो॥ ३१ ॥ आपके आराधन कियेहुये बहुतसे श्रेष्ठयज्ञ भलीभांति होचुके अबआप यज्ञकरके क्याकरोगे, आपतो मोक्षधर्मके वेत्ताहो ॥ ३२ ॥ हे राजन् ! आपका कल्याणहो—इन्द्रपर तुमको रोषनहीं करना चाहिये क्योंकि तुमदोनोंही भगवानके अंगहो ॥ ३३ ॥ हेमहाभाग! यज्ञके विफल चिंतामतकरो, जोमैंकहताहूं उसेआदर पूर्वकसुन—देखके

शामयाऽस्मत्त्वचआहतात्मा । यद्धयायतोदैवहतंनुकर्तुंमनोतिरुष्टंविशतेतमोऽन्धम् ॥ ३४ ॥ क्रतुर्विरमतामेषदेवेषुदुरवग्रहः । धर्मव्यतिकरोयत्रपाखण्डैरिन्द्रनिर्मितैः ॥ ३५ ॥ एभिरिंद्रोपसंसृष्टैःपाखण्डैर्हारिभिर्जनम् । ह्रियमाणंविचक्ष्वैनंयस्तेयज्ञध्रुगश्वमुट् ॥ ३६ ॥ भवान्परित्रातुमिहावतीर्णोधर्मंजनानांसमयानुरूपम् । वेनापचारादवलुप्तमद्यतद्देहतोविष्णुकलाऽसिवैन्य ॥ ३७ ॥ सत्वंविमृश्यास्यभवंप्रजापतेःसंकल्पनंविश्वसृजांपिपीपृहि । ऐंद्रींचमायामुपधर्ममातरंप्रचण्डपाखण्डपथंजहिप्रभो ॥ ३८ ॥ मैत्रेय उवाच ॥ इत्थंसलोकगुरुणासमादिष्टोविशांपतिः।तथाचकृत्वावात्सल्यंमघोनाऽपिचसंदधे ॥ ३९ ॥ कृतावभृथस्नानायपृथवेभूरिकर्मणे । वरान्ददुस्तेवरदायेतद्बर्हिषितर्पिताः ॥ ४० ॥ विप्राःसत्याशिषस्तुष्टाःश्रद्धयालब्धदक्षिणाः । आशिषोयुयुजुःक्षत्तरादिराजायसत्कृताः ॥ ४१ ॥त्वयाऽऽहूतामहाबाहोसर्वएवसमागताः । पूजितादानमानाभ्यांपितृदेवर्षिमानवाः ॥ ४२ ॥

इतिश्रीमद्भा०म०च०एकोनविंशोऽध्यायः ॥ १९ ॥

मैत्रेयउवाच ॥ भगवानपिवैकुण्ठःसाकंमघवताविभुः । यज्ञैर्यज्ञपतिस्तुष्टोयज्ञभुक्तमभाषत ॥ १ ॥ श्रीभगवानुवाच ॥ एषतेऽकार्षीद्भंगंहयमेधशतस्यह ।क्षमापयतआत्मानममुष्यक्षन्तुमर्हसि ॥२ ॥सुधियः साधवोलोकेनरदेवनरोत्तमाः।नाभिद्रुह्यंतिभूतेभ्योयर्हिनात्माकलेवरम् ॥ ३ ॥ पुरुषायदिमुह्यंतित्वादृशादेवमायया।श्रमएवपरंजातोदीर्घयावृद्धसेवया ॥ ४ ॥ अतःकायममंविद्वानविद्याकामकर्मभिः । आरब्धइतिनैवास्मिन्प्रतिबुद्धोऽनुषज्जते ॥ ५ ॥ असंसक्तःशरीरेस्मिन्नमुनोत्पादिते

बिगाड़नेवाले कार्यका जो ध्यान करताहै वह पुरुष क्रोधसे अन्धतम मोहको प्राप्तहोताहै ॥ ३४ ॥ देवताओंने जयदुराग्रह करलियाहै तो आपकोयज्ञबन्दकरदेना योग्यहै क्योंकि इसमेंइन्द्ररचित पाखंड से धर्मका नाश होताहै ॥ ३५ ॥ यज्ञके द्रोही घोड़ा हरनेवाले इन्द्रके रचित पाखण्डोंसे धर्म नाश होतेहुये तो देखिये ॥ ३६ ॥ हेराजन् ! वेनके अत्याचारसे लुप्तहुये धर्मको शास्त्रवत प्रवृत्तकर उसकी रक्षाके हेतु विष्णुकी कलासे अवतारधारणकर आपप्रगटहुयेहो॥३७॥ तुमसृष्टिके कल्याण का हेतु विचारकर प्रजापतियों का पालनकरो और ऐन्द्री मायारूप प्रचण्ड पाखण्डमार्गका नाशक करो ॥३८॥ मैत्रेयजीने कहा कि—लोकगुरु ब्रह्माजीने राजाको इसभांति समझाकर यज्ञका आग्रह छुड़ाया फिर राजाने प्रेमपूर्वक इन्द्रके साथ संधिकी ॥३९॥ भूरिकर्मा राजापृथुने जिससमय अवभृथनामक यज्ञांत स्नान किया तब यज्ञमें तृप्त होनेवालोंनें उसको बरदानदिये ॥ ४० ॥ हे विदुर ! श्रद्धापूर्वक दक्षिणा पायेहुये ब्राह्मणोंने राजापृथुसे सनमानपाकर उनको आशीर्वाद दिये ॥ ४१ ॥ और कहा कि—हे महाबाहो ! हम यज्ञमें आयेहुये पितृ, देवता ऋषि मनुष्योंका आपने बड़ाही आदर और दानमानसे सत्कारकिया ॥ ४२ ॥

इति श्रीमद्भागवतेमहापुराणे चतुर्थस्कंधेसरलाभाषाटीकायांएकोनविंशोऽध्यायः ॥ १९ ॥

मैत्रेयजीने कहा कि—यज्ञेश्वर यज्ञभोक्ता भगवान वैकुण्ठनाथनेभी इन्द्रको सँगले यज्ञोंसे प्रसन्न होकर राजा पृथुसे कहा ॥ १ ॥ श्रीभगवानने कहा कि—इस इन्द्रने आपके सौवें अश्वमेधयज्ञमें विघ्न कियाथा अब यह तुमसे क्षमा मांगताहै । इसहेतु आपको इसपर क्षमाकरनी योग्यहै ॥२॥ हेनरदेव! श्रेष्ठबुद्धिवाले उत्तममनुष्य संसारमें प्राणियोंसेद्रोह नहींकरते क्योंकि वहजानतेहैं कि देहआत्मा नहीं है ॥३॥ और फिर आप सरीकेपुरुष देवमायासे मोहको प्राप्त होजावैं तबतो बहुतकालतककीहुई वृद्धोंकीसेवा केवल श्रमही जानो॥४॥जो विवेकी पुरुष इसदेहको अविद्या जनित कामनाकृत कर्मोंसे बनाहुआ जानताहै वह इसमें कभीभी आसक्त नहींहोता ॥ ५ ॥ जो ज्ञानी पुरुषइस देहमेंही आ-

गृहे । अपत्येद्रविणेवाऽपिकःकुर्यान्ममतांबुधः ॥ ६ ॥ एकःशुद्धःस्वयंज्योतिर्निर्गुणोऽसौगुणाश्रयः । सर्वगोऽनावृतःसाक्षी निरात्मात्मात्मनःपरः ॥ ७ ॥ यएवंसन्तमात्मानमात्मस्थंवेदपूरुषः । नाज्यतेप्रकृतिस्थोऽपितद्गुणैःसमयिस्थितः ॥ ८ ॥ यःस्वधर्मेणमांनित्यंनिराशीःश्रद्धयान्वितः । भजतेशनकैस्तस्यमनोराजन्प्रसीदति ॥ ९ ॥ परित्यक्तगुणःसम्यग्दर्शनोविशदाशयः । शांतिमेसमवस्थानंब्रह्मकैवल्यमश्नुते ॥ १० ॥ उदासीनमिवाध्यक्षंद्रव्यज्ञानक्रियात्मनाम् । कूटस्थमिवमात्मानंयोवेदाप्नोतिशोभनम् ॥ ११॥भिन्नस्यलिंगस्यगुणप्रवाहोद्रव्याक्रियाकारकचेतनात्मनः दृष्टासुसंपत्सुविपत्सुसूरयोनविक्रियन्तेमयिबद्धसौहृदाः ॥ १२ ॥ समःसमानोत्तममध्यमाधमःसुखेचदुःखेचजितेन्द्रियाशयः।मयोपकॢप्ताखिललोकसंयुतोविधत्स्ववीराऽखिललोकरक्षणम् ॥ १३ ॥ श्रेयःप्रजापालनमेवराज्ञोयत्सांपरायेसुकृतात्षष्ठमंशम् । हर्ताऽन्यथाहृतपुण्यःप्रजानामरक्षिताकरहारोऽघमत्ति ॥ १४ ॥ एवंद्विजाग्र्यानुमतानुवृत्तधर्मप्रधानोऽन्यतमोविताऽस्याः । ह्रस्वेनकालेनगृहोपयातान्द्रष्टासिसिद्धाननुरक्तलोकः ॥ १५ ॥ वरंचमत्कञ्चनमानवेन्द्रवृणीष्वतेऽहंगुणशीलयन्त्रितः । नाहंमखैर्वैसुलभस्तपोभिर्योगेनवायत्समचित्तवर्ती ॥ १६ ॥ मैत्रेय उवाच ॥ सइत्थंलोकगुरुणाविष्वक्सेनेनविश्वजित् । अनुशासितआदेशंशिरसाजगृहेहरेः ॥ १७ ॥ स्पृशन्तंपादयोःप्रेम्णाव्रीडितंस्वेनकर्मणा । शतक्रतुंपरिष्वज्यविद्वेषंविस

सक्त नहींहै वह देह जनित पुत्र और धनमें कैसे मोहको प्राप्त होसक्ताहै ॥ ६ ॥ यह आत्मा शरीर से पृथक्है क्योंकि आत्मा एक स्वयंजोति निर्गुण,है और देह, बाल युवादि भेदोंसे नानाप्रकारकी मलीन सगुणहै आत्मा आवरण रहितहै और शरीर घर इत्यादिकसे घिराहुआहै आत्मा सर्वकासाक्षी है देह दृश्यहै आत्मा निरात्महै और शरीर स्वात्महै ॥ ७ ॥ जो मनुष्य अपनी देहमें आत्माको इसप्रकार स्थित जानता है वह मुझ ब्रह्ममें स्थित होनेके कारण शरीरमें रहनेपर भी उसके विकारोंमें लीन नहींहोता ॥ ८ ॥ हेराजा ! जो स्वधर्मसे श्रद्धापूर्वक नित्य मेरा भजनकरते हैं उनका मन धीरे धीरे प्रसन्न होजाताहै ॥९॥ फिर वह गुणोंको त्यागकरै ज्ञानीहो शांतिको प्राप्त होताहुआ मोक्षको प्राप्त होजाता है ॥१०॥ जो उदासीनकी नाईं द्रव्य,क्रिया ज्ञान आत्माके भीतर स्थित परमात्मा को जानते हैं, वह पुरुष निःसन्देह मोक्षको प्राप्तहोते हैं ॥११॥ इसनाशवान् भिन्नलिंग शरीरका संसारहै, द्रव्य,क्रिया, कारक और चेतनके चिदा भासात्मक दीखता है और जोज्ञानी पुरुष मुझसे स्नेहरखते हैं, वहसदा सम्पत्ति और विपत्तिको समान समझकर विकारको प्राप्तनहींहोते ॥१२॥ हे वीर ! सम, उत्तम, मध्यम और अधम सुख दुःख में समदर्शी होओ और इन्द्रियों तथा अंतःकरण को बश करके लोककी रचना करनेवाले मुझ ईश्वरनें तुम्हें सचिवादिका अधिकारी किया है उसको साथ रखकर सृष्टिकी रक्षा करो ॥ १३ ॥ राजा का प्रजा पालन सेही कल्याण है क्योंकि प्रजा रक्षक राजा परलोक में प्रजा के सुकृत के छठे अंस का भोक्ता होता है, और जो प्रजा पालन नकरकै उससे कर लेता है वह क्षीण पुण्य हो प्रजा के पापों को प्राप्त होता है ॥१४॥इस भांति श्रेष्ठ ब्राह्मणों की आज्ञा में प्रवृत्त होकर परम्पराके धर्मको प्रधान मान, अन्य धर्मों में आसक्त नहोकर इस पृथ्वी की रक्षा करोगे तो प्रजा तुमसे अत्यन्त प्रसन्न होगी फिर थोडेही काल में सनकादिकों का आप को दर्शनहोगा ॥ १५ ॥ भगवान ने कहा कि हे मानवेन्द्र ! मैं तुम्हारे गुण शील से बश होगया हूं मुझ से कुछ तो वरमांगो, मैं यज्ञ, योग, और तप से उतना प्रसन्न नहीं होता कि जितना समदर्शी पुरुषों से प्रसन्न होता हूं ॥ १६ ॥ मैत्रेयजी नें कहा कि जब लोक गुरु भगवान नें इसभांति आज्ञा कि तो विश्वजित पृथुनें उनकी आज्ञा अपनें मस्तकपर धारण की ॥ १७ ॥ और स्नेह पूर्वक

सर्जह ॥ १८ ॥ भगवानथविश्वात्मापृथुनोपहृतार्हणः । समुज्जिहानयाभक्त्यागृहीतचरणाम्बुजः ॥ १९ ॥ प्रस्थानाभिमुखोऽप्येनमनुग्रहविलम्बितः । पश्यन्पद्मपलाशाक्षोनप्रतस्थेसुहृत्सताम् ॥ २० ॥ सआदिराजोरचिताञ्जलिर्हरिंविलोकितुंनाशकदश्रुलोचनः । नकिंचनोवाचसवाष्पविक्लवोहृदोपगुह्यामुमधादवस्थितः ॥ २१ ॥ अथावमृज्याश्रुकलाविलोकयन्नतृप्तदृग्गोचरमाहपूरुषम् । पदास्पृशंतंक्षितिमंसउन्नते विन्यस्तहस्ताग्रमुरङ्गविद्विषः ॥ २२ ॥ पृथुरुवाच ॥ वरान्विभोत्वद्वरदेश्वराद्बुधः कथंवृणीतेगुणविक्रियात्मनाम् । येनारकाणामपिसन्तिदेहिनांतानीशकैवल्यपतेवृणेनच ॥ २३ ॥ नकामयेनाथतदप्यहं क्वचिन्नयत्रयुष्मच्चरणाम्बुजासवः । महत्तमान्तर्हृदयान्मुखच्युतो विधत्स्वकर्णायुतमेषमेवरः ॥ २४ ॥ सउत्तमश्लोकमहन्मुखच्युतो भवत्पदाम्भोजसुधाकणानिलः । स्मृतिंपुनर्विस्मृततत्त्ववर्त्मनांकुयोगिनांनोवितरत्यलंवरैः ॥ २५ ॥ यशःशिवंसुश्रवआर्यसंगमेयदृच्छयाचोपशृणोतितेऽसकृत् । कथंगुणज्ञोविरमेद्विनापशुं श्रीर्यत्प्रवव्रेगुणसंग्रहेच्छया २६ अथाभजेत्वाऽखिलपूरुषोत्तमं गुणालयंपद्मकरेवलालसः । अप्यावयोरेकपतिस्पृधोःकलिर्नस्यात्कृतत्वच्चरणैकतानयोः ॥ २७ ॥ जगज्जनन्यांजगदीशवैशसंस्यादेवयत्कर्मणिनःसमीहितम् । करोतिफल्ग्वप्युरुदीनवत्सलःस्वएवधिष्ण्येऽभिरतस्यकिंतया ॥ २८ ॥ भजन्त्यथत्वामतएवसाधवोव्युदस्तमायागुणविभ्रमोदयम् । भव

अपनें चरणों को स्पर्श करते अपनें कर्म्म से लज्जित ऐसे इन्द्र से राजा पृथु मिला और मनसे द्वेष का त्याग कर दिया ॥ १८॥ फिर विश्वात्मा भगवान का राजा पृथुनें पूजन किया और भक्तिपूर्वक उनके चरण कमलों को ग्रहण किया ॥ १९ ॥ भगवान नें जाने की इच्छा की परन्तु पृथुपर कृपा करके संतों के सुहृद कमल दलसे नेत्र वाले भगवान उसकी ओर देखकर ठहर गए ॥ २० ॥ आदि राजा पृथु नेत्रों में आंसू आजानें से भगवान को देख नसका और गदगद कंठ होजाने से बोलभी न सका तब उसने हाथ जोड भगवान को हृदय में धारण किया ॥ २१ ॥ फिर आंसू पोंछकर राजानें भगवान का दर्शन किया परन्तु दर्शन करते २ उसकी तृप्ति नहुई, तौभी चरणों से पृथ्वी को छुए हुए, गरुड़ के कांधेपर हाथ धरे हुए भगवान से पृथु ने कहा ॥ २२ ॥ पृथु बोले कि हे विभो ! वर दाताओं के ईश्वर ! आप से ब्रह्मादिक सम्बन्धी, नारकीय जीवों को मिलनें वाले वरदान, कोई कैसे मांग सकता है हे मोक्ष पति ! आप से मैं उन वरों को नहीं मांगता ॥ २३ ॥ हे नाथ ! मैं किसी भी वर को नहीं मांगता आपके चरण कमल की गंध जो श्रेष्ठ पुरुषों के हृदय और मुखसे श्रवी भूत हुई है उसके पान करनें अर्थात् आपका यश सुनने के हेतु मेरे दश हजार कान होजांय यही मुझ को वर दो ॥ २४ ॥ हे उत्तम श्लोक ! श्रेष्ठलोगों के मुख से निकली हुई तुम्हारे चरण कमल की सुगन्धि वायुमें मिलकर तत्वके पथमें पड़ेहुए अपक्व योगियों को आत्मज्ञान का स्मरण दिलाती है ॥ २५ ॥ हे सुश्रव ! गुणज्ञ मनुष्य सन्तों के संगमें आपकी सुखदाई कीर्त्तिको जो एकबारभी सुनलेताहै, तो फिर उससे कभी विराम नहींपाता परन्तु पशुओंकी बात न्यारी है श्रीलक्ष्मीजी भी अपनमें गुणोंका संग्रह करनेके हेतु आपके गुणोंका बर्णन करतीहैं ॥ २६ ॥ इसहेतु पुरुषोत्तम गुणोंके निवासरूप आपको मैं लक्ष्मीकी भांति उत्साहितहोकर भजताहूं यद्यपिहम दोनोंमें साथही सेवा होनेके कारण डाह उत्पन्न होकर कलह होना सम्भवहै परन्तु मेरा और लक्ष्मीका मन आप के चरणोंमें एकाग्ररहेगा इससे कलह उत्पन्न नहीं होसकता ॥ २७ ॥ हे ईश ! जगज्जननी लक्ष्मी के कर्ममें भागलेनेसे यदि उनसे मेरा विरोधभी होगा तौभी आप मेरी तुच्छसेवाको अधिक मानोगे क्योंकि आप दीनवत्सलहो, और अपनेही स्वरूपानन्दमें रमण करतेहो—इसहेतु आपको लक्ष्मी

त्पदानुस्मरणाद्दतेसतांनिमित्तमन्यद्भगवन्नविद्महे ॥ २९ ॥ मन्येगिरंतेजगतांविमोहिनींवरंवृणीष्वेतिभजन्तमात्थयत् । वाचानुतन्त्यायदितेजनोऽसितःकथंपुनःकर्म करोतिमोहितः ॥ ३०॥ त्वन्मायय‍ाऽद्धाजनईशखण्डितोयदन्यदाशास्तऋतात्मनोऽबुधः । यथाचरेद्बालहितंपितास्वयंतथात्वमेवार्हसिनःसमीहितुम् ॥ ३१ ॥ मैत्रेय उवाच ॥ इत्यादिराजेनस्तुतःसविश्वदृक्तमाहराजन्मयिभक्तिरस्तुते । दिष्ट्येदृशीधीर्मयितेकृतायय‍ामायांमदीयांतरतिस्मदुस्त्यजाम् ॥ ३२ ॥ तत्त्वंकुरुमयादिष्टमप्रमत्तःप्रजापते । मदादेशकरोलोकःसर्वत्राप्नोतिशोभनम् ॥ ३३ ॥ मैत्रेय उवाच॥ इतिवैन्यस्यराजर्षेःप्रतिनन्द्यार्थवद्वचः ।पूजितोऽनुगृहीत्वैनंगन्तुंचक्रेऽच्युतोमतिम् ॥ ३४ ॥ देवर्षिपितृगन्धर्वसिद्धचारणपन्नगाः । किन्नराप्सरसोमर्त्याःखगाभूतान्यनेकशः ॥ ३५ ॥ यज्ञेश्वरधियाराज्ञावाग्वित्ताञ्जलिभक्तितः । सभाजिताययुःसर्वे वैकुण्ठानुगतास्ततः ॥ ३६ ॥ भगवानपिराजर्षेःसोपाध्यायस्यचाच्युतः । हरन्निव मनोऽमुष्यस्वधामप्रत्यपद्यत ॥ ३७ ॥ अदृष्टायनमस्कृत्यनृपःसंदर्शितात्मने ।अव्यक्तायचदेवानांदेवायस्वपुरंययौ ॥ ३८ ॥

इतिश्रीमद्भा०च०श्रीविष्णुनापृथोर्यज्ञेनुशासनवर्णनंनामविंशोऽध्यायः ॥ २० ॥

मैत्रेयउवाच ॥ मौक्तिकैःकुसुमस्रग्भिर्दुकूलैः स्वर्णतोरणैः । महासुरभिभिर्धूपैर्मण्डितंतत्रतत्रवै ॥ १ ॥ चन्दनागुरुतोयार्द्ररथ्याचत्वरमार्गवत् । पुष्पाक्षतफलै·

का किसीभांति का पक्षनहीं है ॥ २८ हेभगवन् ! साधु पुरुष ज्ञान प्राप्त होनेके पीछे भी, मायाके गुणोंके कार्यरहित आपका भजनकिया करते हैं आपके चरणकमलके अतिरिक्त दूसरा कुछभी अभिप्राय इन महात्माओं का मुझे नहींदीखता ॥ २९ ॥ भक्तोंके बरदान के हेतु कहना यह आपकी बात जगतको मोह उत्पादन करानेवालीहै, आपकी गिराहूपी रस्सीमें सम्पूर्णलोक बँधेहुये हैं यदि ऐसा न होवै तो वह बारम्वार फलसे मोहित होकर किसभांति कर्मकरसते हैं ॥ ३० ॥ हे ईश ! आपकी मायाने मनुष्योंको आपके सत्यस्वरूपसे पृथक् कररक्खाहै, और वे अज्ञानी बनकर पुत्रादिकों के सुखकी इच्छा करतेहैं ऐसेही मुझेभी आप अपने बरदानकी भूलमें न डालकर मेरा इसभांति हित करिये कि जैसे पिता बिनाही प्रार्थनाके पुत्र का हित करता है ॥३१॥ मैत्रेयजी बोले कि—जब राजापृथुने इसभांति स्तुतिकी तोभगवानने कहा कि हे राजन् ! मुझमें तेरी भक्तिहोगी· तेरे मनमें ऐसाविचारहुआ, सो बहुत अच्छाहुआ इसीभक्तिसे तू अतिदुस्तर मायाकोतरेगा ३२॥ हेराजन् ! तू मेरी आज्ञानुसार चल, जो मनुष्य मेरी आज्ञाका पालन करताहै वह सबजगह सुखी रहताहै ॥ ३३ ॥ मैत्रेयजीने कहा कि—श्रीभगवानने राजर्षि पृथुराजाकी बड़ाई तथा सनमानकर वहांसे चलनेका विचारकिया ॥ ३४ ॥ देवता, ऋषि, पितृगण, गन्धर्व, सिद्ध, चारण, पन्नग, किन्नर, अप्सरा, मनुष्य,पक्षी, तथा औरभी नानाप्राणी—कि ॥३५॥ जो यज्ञमें आयेथे उनका राजा पृथुने भक्तिपूर्वक हाथजोड़ धन, वाणीसे सनमानकिया, वे सब वहांसे चलेगये फिर भगवान के पार्षदभी राजासे बिदाहो वैकुण्ठको गये ॥ ३६ ॥ भगवानभी राजा और ब्राह्मणोंके मनको हरकर अपने परमधाम को चलेगये ॥ ३७ ॥ जब आत्मस्वरूपकी शिक्षा देनेवाले, अव्यक्त देवताओं के देवता भगवान वहांसे अदृश्यहोगये तब पृथुराजाभी उनको दण्डवत्कर अपनेनगरमें आया ३८॥

इति श्रीमद्भागवते महापुराणे सरलाभाषाटीकायां विंशोऽध्यायः ॥ २० ॥

मैत्रेयजी बोले—किजिससमय पृथुराजा अपने नगरमेंगया उसकाल मोती, फूलमाला, वस्त्रऔर सोनेके तोरणोंसे नगर सुसज्जित कियागया और सुगंधित धूपकी सुगंधिकीगई ॥ १ ॥ गली, चौराहे, और मार्गके बीचमें चंदन और अगरके जलसे छिड़काव कियागया, फूल, अक्षत, दूब,

स्तांश्चैलाजैरर्चिभिरर्चितम् ॥ २ ॥ सवृन्दैःकदलीस्तम्भैः पूगपोतैःपरिष्कृतम् । तरुपल्लवमालाभिः सर्वतः समलंकृतम् ॥ ३ ॥ स्त्रियस्तंदीपबलिभिः संभृताशेष मङ्गलैः । अन्वीयुर्मृष्टकन्याश्च मृष्टकुण्डलमण्डिताः ॥ ४ ॥ शंखदुन्दुभिघोषेण ब्रह्मघोषेणचार्त्विजाम् । विवेशभवनंवीरः स्तूयमानोगतस्मयः ॥ ५ ॥ पूजितःपूजयामास तत्रतत्रमहायशाः । पौरांजानपदांस्तांस्तान्प्रीतः प्रियवरप्रदः ॥६॥ सएव मादीन्यनवद्यचेष्टितः कर्माणिभूयांसि महान्महत्तमः । कुर्वञ्छशासावनिमण्डलं यशः स्फीतंनिधायारुरुहेपरंपदम् ॥ ७ ॥ सूतउवाच ॥ श्रुत्वादिराजस्ययशोविजृम्भितं गुणैरशेषैर्गुणवत्सभाजितम् । क्षत्तामहाभागवतःसदस्पतेकौषारविंप्राह गृणन्तमर्चयन् ॥ ८ ॥ विदुरउवाच ॥ सोऽभिषिक्तःपृथुर्विप्रैर्लब्धाऽशेषसुरार्हणः बिभ्रत्सवैष्णवंतेजो बाह्वोर्याभ्यांदुदोहगाम् ॥ ९ ॥ कोन्वस्यकीर्तिनशृणोत्यभिज्ञो यद्विक्रमोच्छिष्टमशेषभूपाः । लोकाःसपालाउपजीवन्ति काममद्यापितन्मेवदकर्म शुद्धम् ॥ १० ॥ मैत्रेय उवाच । गङ्गायमुनयोर्नद्योरन्तरा क्षेत्रमावसन् । आरब्धानेवबुभुजे भोगान्पुण्यजिहासया ॥ ११ ॥ सर्वत्रास्खलितादेशः सप्तद्वीपैकदण्डधृक् । अन्यत्रब्राह्मणकुलादन्यत्राच्युतगोत्रतः ॥ १२ ॥ एकदासीन्महासत्रदीक्षा तत्रदिवौकसाम् । समाजोब्रह्मर्षीणांच राजर्षीणांचसत्तम ॥ १३ ॥ तस्मिन्नर्हत्सु सर्वेषु स्वार्चितेषुयथार्हतः । उत्थितःसदसोमध्ये ताराणामुडुराडिव ॥ १४ ॥ प्रांशुःपीनायतभुजो गौरः कंजारुणेक्षणः । सुनासःसुमुखःसौम्यः पीनांसःसुद्विज-

लाई और दीपकोंकी शोभाबनाईगई ॥ २ ॥ फलफूल समेत केलेके खंभे, तथाछोटे २ सुपारी के वृक्षखड़े कियेगये, औरभी नानावृक्षोंकेपत्ते और मालाओंकी शोभाचारों ओर बनाईगई ॥ ३ ॥ उस समय ब्राह्मणोंकी सुंदर कन्यायें उज्वल कुंडल पहिने दही, दीपक, फूल, फल इत्यादिक मांगलीक पदार्थ हाथमेंलिये राजाकी अगोनीको जातीथीं, ॥ ४ ॥ शंख और दुंदुभीका नादतथा ब्राह्मणोंके वेदनाद सुनतेहुये उससमृद्धि शाली, अभिमानरहित पृथुराजाने घरमें प्रवेशकिया ॥ ५ ॥ प्रतापशाली राजापृथु जहांतहां प्रजासे सनमानपा पीछेसे नगर और देशमें रहनेवाले लोगोंका सनमान किया, और उन्हेंप्रसन्नकर नानाभांतिके प्रियपदार्थ उन्हेंदिये॥६॥उत्तमकर्म करनेवाले राजापृथुने नानाकर्म कर पृथ्वीका पालनकिया और अपनेउज्ज्वल यशको पृथ्वीपर विस्तारित करताहुआ अंतमें मोक्षको प्राप्तहुआ॥७॥सूतजीबोले किहेशौनक!पृथुराजाकी गुणयुक्त कीर्तिको किजिसकाबखान गुणवानलोग करते हैं विदुरजीने मैत्रेयजीनेसे सुनकर उनकासनमान करकेकहा॥८॥विदुरजीबोलेकि जिसपृथुराजा को ब्राह्मणोंने राज्यअभिषेककिया,और देवताओंने उत्तम२ पदार्थदिये, तथा जिसने श्रीभगवानका तेज धारणकर अपनी भुजाओंसे पृथ्वीकोदुहा॥ ९ ॥ उसराजाकी कीर्तिको कौनविवेकी मनुष्य न सुनेगा किजिसके पृथ्वीके दोहन करनेसे सम्पूर्ण सृष्टि, लोकपाल तथा राजाओंको आजीविका प्राप्तहुई है ॥ १० ॥ मैत्रेयजीने कहाकि राजापृथुगंगा और यमुनाके बीचके क्षेत्रों में निवास करनेलगा और पुण्यक्षय की इच्छा से भोगों को भोगताहुआ राज्य करने लगा ॥ ११ ॥ सम्पूर्ण स्थानोंमें जिस की आज्ञा को कोई उल्लंघन न करसका ऐसा वह राजा पृथु ब्राह्मण तथा परमेश्वर के भक्तों को छोड़ सातो द्वीपों में एकही दंड देने बाला था, उस से अन्यत्र कोई दंड देने वाला नहींथा॥१२ हे विदुर ! एक समय उस राजा ने महासत्र यज्ञकी दीक्षा ली, उस समय वहांपर देवता,ब्रह्मर्षि और राजर्षियों का समागम हुआ ॥ १३ ॥ उस सभा में बड़े २ योग्य पुरुष थे उन सबों का जब पूजन, सत्कार होचुका तब तारागणों में जैसे चन्द्रमा उदय होताहै तैसे वह राजा यज्ञके बीच में खड़ा हुआ ॥१४॥ वह राजा ऊंचा, पुष्ट लम्बी भुजाओं वाला गौरवर्ण, कमलकी सदृशनेत्र

स्मितः ॥ १५ ॥ व्यूढवक्षावृहच्छ्रोणिर्वलिवल्गुदलोदरः । आवर्तनाभिरोजस्वी कांचनोरुरुदग्रपात् ॥ १६ ॥ सूक्ष्मवक्रासितस्निग्धमूर्धजः कम्बुकन्धरः । महाधने दुकूलाग्र्ये परिधायोपवीयच ॥ १७ ॥ व्यंजिताशेषगात्रश्रीर्नियमे न्यस्तभूषणः कृष्णाजिनधरःश्रीमान्कुशपाणिःकृतोचितः ॥ १८ ॥ शिशिरःस्निग्धताराक्षःसमैक्षतसमन्ततः । ऊचिवानिदमुर्वीशःसदःसंहर्षयन्निव ॥ १९ ॥चारुचित्रपदंश्लक्ष्णं मृष्टंगूढमविक्लवम् । सर्वेषामुपकारार्थंतदाअनुवदन्निव॥ २०॥राजोवाच॥सभ्याः शृणुतभद्रंवःसाधवोयइहागताः । सत्सुजिज्ञासुभिर्धर्ममावेद्यंस्वमनीषितम् ॥२१ ॥ अहंदण्डधरोराजाप्रजानामिहयोजितः । रक्षितावृत्तिदःस्वेषुसेतुषुस्थापितापृथक् ॥ २२ ॥ तस्यमेतदनुष्ठानाद्यानाहुर्ब्रह्मवादिनः। लोकाःस्युःकामसंदोहायस्यतुष्यतिदिष्टदृक् ॥ २३ ॥ यउद्धरेत्करंराजाप्रजाधर्मेष्वशिक्षयन् । प्रजानांशमलंभुङ्क्ते भगंचस्वंजहातिसः ॥ २४ ॥ तत्प्रजाभर्तृपिण्डार्थंस्वार्थमेवानसूयवः ।कुरुताधोक्षजाधियस्तर्हिमेऽनुग्रहःकृतः ॥ २५ ॥ यूयंतदनुमोदध्वंपितृदेवर्षयोमलाः । कर्तुःशास्तुरनुज्ञातुस्तुल्यंयत्प्रेत्यतत्फलम् ॥ २६॥अस्तियज्ञपतिर्नामकेषांचिदर्हसत्तमाः। इहामुत्रचलक्ष्यन्तेज्योत्स्नावत्यःक्वचिद्भुवः ॥ २७ ॥ मनोरुत्तानपादस्यध्रुवस्यापि महीपतेः । प्रियव्रतस्यराजर्षेरङ्गस्यास्मत्पितुःपितुः ॥ २८॥ ईदृशानामथान्येषामज

श्रेष्ठ नासिका,सुन्दर मुख,पुष्ट कंधे, सुंन्दर जिसके दांत तथा जिस की सुन्दर मुसकान है ॥१५॥ पुष्टवक्षःस्थल, बड़ा कटि प्रदेश, पीपल के पत्ते की सदृश त्रिवली से शोभित पेट, गंभीर टूंड़ी अति पराक्रमी, सुवर्ण की सदृश जंघा, तथा ऊंचे अग्रभाग वाले जिसके चरण हैं॥ १६ ॥ सूक्ष्म, काले टेढ़े, चिकने वाल, शंख सा कंठ बहुमूल्य के वस्त्र तथा सुंन्दर यज्ञोपवीत धारण किये हैं ॥ १७ ॥ जिसका सम्पूर्ण अंग शोभायमान है, नियम के हेतु आभूषणों को त्याग दिया है, काले मृगका चर्म जिसने धारण किया है, कुशाहाथ में हैं यज्ञके उचित कर्मों से निश्चित होकर बैठा है ॥ १८ ॥ जिसके शिशिर ऋतु के तारों की सदृश नेत्र हैं ऐसा वह राजा अपने नेत्रों से चारों ओर देख कर सभा का हर्ष बढ़ाता हुआ ॥ १९ ॥ श्रेष्ठ, नम्र, गंभीर और मीठी, वाणीसे बोला ॥ २० ॥ राजाने कहा कि—हे सभासदों ! हे साधुओं ! हे सज्जनों ! मैं तुम्हारे कल्याण के हेतु जो कहता हूं उसे सुनो, जो मनुष्य धर्म की जिज्ञासा करना चाहे वह अपने विचारोंको साधुओं के सामने प्रकाशित करे ॥ २१ ॥ अपराधी प्रजा को दंड देने, तथा प्रजाका पालन करने उनको जीविका देने, पृथक २ नियमों के रखने आदि को ब्रह्माने मुझे राजा नियत किया है ॥ २२ ॥ जिन देवताओं को ईश्वरके प्रसन्न होने पर जो सम्पूर्ण मनोरथ पूर्ण होने वाले स्थान प्राप्त होते हैं वही स्थान मुझे भी यथोचित रीत्यनुसार राज्य चलाने से प्राप्त हो सकते हैं—ऐसे मैं जानता हूं ॥ २३ ॥ जो राजा प्रजा को धर्मोपदेशन करके उनसे करलेता है वह प्रजाओं के पाप का भागी होता है और वह अपने ऐश्वर्य्य से भी भ्रष्ट होजाता है ॥ २४ ॥ इस हेतु हे प्रजाओं ! मेरे परलोक के कल्याण के निमित्त परमेश्वरी पूर्ण बुद्धि से धर्मानुसार अपने कर्तव्य कर्म को करो मैं तुम्हारा बड़ा अनुग्रह मानूंगा ॥ २६ ॥ हे स्वच्छ चित वाले पित्रीश्वर देवताओर ऋषियो! तुमभी मेरी इस वातका पक्ष करो—क्योंकि धर्म के सम्बन्ध में कर्ता को उपदेशक को सम्मति देने वाले को परलोक में समान फल मिलता है ॥ २६ ॥ सृष्टि में कितने ही नास्तिक और कितने हा आस्तिक हैं, और यह पक्ष सयुक्तिक निश्चय भी होता है, क्यो कि इस लोक तथा परलोक में किसी २ को अत्युत्तम देह तथा स्थान प्राप्त होता है यदि सृष्टि प्रेरक ईश्वरनहीं है तो इन का होना सम्भव ही नहीं ॥ २७ ॥ मनु, उत्तानपाद, ध्रुव, प्रियव्रत और राजा अंग

स्यचभयस्यच । प्रह्लादस्यबलेश्चापिकृत्यमस्तिगदाभृता ॥ २९ ॥ दौहित्रादीनृते मृत्योःशोच्यान्धर्मविमोहितान् । वर्गस्वर्गापवर्गाणांप्रायेणैकात्म्यहेतुना ॥ ३० ॥ यत्पादसेवाऽभिरुचिस्तपस्विनामशेषजन्मोपचितंमलंधियः । सद्यःक्षिणोत्यन्वह मेधतीसतीयथापदांगुष्ठविनिःसृतासरित् ॥ ३१ ॥ विनिर्धुताशेषमनोमलःपुमान् सङ्गविज्ञानविशेषवीर्यवान् । यदंघ्रिमूलेकृतकेतनःपुनर्नसंसृतिंक्लेशवहांप्रपद्यते ३२॥ तमेवयूयंभजतात्मवृत्तिभिर्मनोवचःकायगुणैःस्वकर्मभिः । अमायिनःकामदुघांघ्रि पङ्कजंयथाऽधिकारावसितार्थसिद्धयः ॥ ३३ ॥ असाविहानेकगुणोऽगुणोऽध्वरः पृथग्विधद्रव्यगुणक्रियोक्तिभिः । संपद्यतेऽर्थाशयलिङ्गनामभिर्विशुद्धविज्ञानघनः स्वरूपतः ॥ ३४ ॥ प्रधानकालाशयधर्मसंग्रहेशरीरएषप्रतिपद्यचेतनाम् । क्रियाफल त्वेनाविभुर्विभाव्यतेयथाऽनलोदारुषुतद्गुणात्मकः ॥ ३५ ॥ अहोममामीवितरन्त्य नुग्रहंहरिंगुरुंयज्ञभुजामधीश्वरम् । स्वधर्मयोगेनयजन्तिमामका निरंतरंक्षोणितलेदृढ व्रताः ॥ ३६ ॥ माजातुतेजःप्रभवेन्महर्द्धिभिस्तितिक्षयातपसाविद्ययाच । देदीप्य मानेऽजितदेवतानांकुलेस्वयंराजकुलाद्द्विजानाम् ॥ ३७ ॥ ब्रह्मण्यदेवःपुरुषःपुरा तनोनित्यंहरिर्यच्चरणाभिवंदनात् । अवापलक्ष्मीमनपायिनींयशोजगत्पवित्रंचमह- त्तमाग्रणीः ॥ ३८ ॥ यत्सेवयाऽशेषगुहाशयःस्वराट् विप्रप्रियस्तुष्यतिकाममीश्वरः

॥ २८ ॥ ब्रह्मा, शिव, प्रल्हाद, राजाबलि तथा दूसरे बड़े२पुरुषों ने इस आस्तिक पक्षको अंगीकार किया है अर्थात् कर्म जड़ होने से फल नहीं दे सकते इसलिये कर्मों का फल देने वाला परमेश्वर ही है ॥२९॥ यदि धर्म,अर्थ,काम,मोक्ष और स्वर्ग मिलने के कारणोंका विचार कियाजाय तो कर्म जड़ होने से फल नहीं देसकता और देवता पर तंत्र होने से—इस कारण सिद्ध होता है कि फल देने वाला एक परमेश्वर ही है और परमेश्वर को जो वेनादिक राजा नहीं मानतेथे वेशोच करने योग्य थे ॥ ३० ॥ भगवानके चरण कमल की सेवा सांसारिक तापों से तपे हुये मनुष्यों के मलको इस भांति दूर करदेती है कि जैसे गंगाजी मल को दूर करदेती हैं ॥ ३१ ॥ फिर मनके मल दूर होने से बैराग्य प्राप्त होकर आत्मज्ञान प्राप्त होता है कि जिस से मनुष्य भगवान के चरण कमल में प्राप्त होकर आवागमन से छुटजाता है ॥ ३२ ॥ इस कारण मनोरथ पूर्ण करने वाले भगवानकी निष्कपट होकर मन,वाणी और काया से आराधना करोगे, तो भजन के अधिकार के अनुसार तुमको सिद्धि अवश्य प्राप्त होगी क्यों कि परमेश्वर के चरण कमल सम्पूर्ण इच्छाओं के पूर्ण करने वाले हैं ॥ ३३ ॥ यद्यपि भगवान शुद्ध स्वरूप निर्गुण ज्ञान घनहैं तौ भी कर्ममार्गमें नानापदार्थों से होते यज्ञरूपभी वहीहैं अर्थात् यज्ञमें पृथक २ पदार्थ यव इत्यादिक वस्तुयें गुण, क्रिया, मन्त्र, संकल्प, पृथक २ ज्योतिष्टोमादि, तथा इन सबसे होते हुये कर्म यह सब भगवानही के रूप हैं ॥ ३४ ॥ यह विभु भगवान माया, काल, बासना, और अदृष्टसे बनीहुई देहमें चैतन्यताको प्राप्त करके क्रियाफलसे इसभांति प्रकाशित होतेहैं कि जैसे अग्नि एकहोनेसे काष्ठके लम्बे चौड़े आकार के अनुसार प्रतीत होताहै ॥३५॥ अहो! मेरे ऊपर बड़ा अनुग्रह है कि मेरी प्रजा नियम पूर्वक दृढ़ व्रत धारणकर देवगुरु श्रीभगवानकी धर्मानुसार सदैव भक्ति करता है ॥३६॥ श्रेष्ठ राजकुल में उत्पन्न हुआ हमारा कुल सहनशील तप और विद्यासे प्रकाशित तेजयुक्त ब्राह्मण वैष्णव, भक्त, और देवताओंपर अपना प्रभाव नहीं प्रगटकरै ॥ ३७ ॥ जिन ब्राह्मणों के चरणकमलकी सेवासे ब्रह्मण्यदेव, पुरुष, पुरातन, महात्माओं में अग्रवर्ती हरि भगवान अनपाइनी, लक्ष्मी और सृष्टिको पवित्र करनेवाले यशको प्राप्तहुयेहैं ॥ ३८ तथा जिनकी सेवामें अन्तर्यामी स्वयंज्योति ब्राह्मणोंके

तदेवतद्धर्मपरैर्विनीतैः सर्वात्मना ब्रह्मकुलं निषेव्यताम् ॥ ३९ ॥ पुमाँल्लभेतानतिवेल मात्मनः प्रसीदतोऽत्यन्तशमं स्वतः स्वयम्। यन्नित्यसंबन्धनिषेवया ततः परं किमत्रास्ति मुखं हविर्भुजाम् ॥ ४० ॥ अश्नात्यनन्तः खलु तत्त्वकोविदैः श्रद्धाहुतं यन्मुख इज्यनामभिः। नवै तथा चेतनया बहिष्कृते हुताशने पारमहंस्यपर्यगुः ॥ ४१ ॥ यद्ब्रह्म नित्यं विरजं सनातनं श्रद्धातपोमङ्गलमौनसंयमैः। समाधिना बिभ्रति हार्थदृष्टये यत्रेदमादर्श इवावभासते ॥ ४२ ॥ तेषामहं पादसरोजरेणुमार्या वहेयाधिकिरीटमायुः। यं नित्यदा बिभ्रत आशु पापं नश्यत्यमुं सर्वगुणा भजन्ति ॥ ४३ ॥ गुणायनं शीलधनं कृतज्ञं वृद्धाश्रयं संवृणतेऽनुसंपदः। प्रसीदतां ब्रह्मकुलं गवां च जनार्दनः सानुचरश्च मह्यम् ॥ ४४ ॥ मैत्रेय उवाच ॥ इति ब्रुवाणं नृपतिं पितृदेवद्विजातयः। तुष्टुवुर्हृष्टमनसः साधुवादेन साधवः ॥ ४५ ॥ पुत्रेण जयते लोकानिति सत्यवती श्रुतिः। ब्रह्मदण्डहतः पापो यद्वेनोऽत्यतरत्तमः ॥ ४६ ॥ हिरण्यकशिपुश्चापि भगवन्निन्दया तमः। विविक्षुरत्यगात् सूनोः प्रह्लादस्यानुभावतः ॥ ४७ ॥ वीरवर्य पितः पृथ्व्याः समाः संजीव शाश्वतीः। यस्येदृश्यच्युते भक्तिः सर्वलोकैकभर्तरि ॥ ४८ ॥ अहो वयं ह्यद्य पवित्रकीर्ते त्वयैव नाथेन मुकुन्दनाथाः। य उत्तमश्लोकतमस्य विष्णोर्ब्रह्मण्यदेवस्य कथां व्यनक्ति ॥ ४९ ॥ नात्यद्भुतमिदं नाथ तवाजीव्यानुशासनम्। प्रजानुरागो महतां प्रकृतिः करुणात्मनाम् ५०

प्रेमी श्रीभगवान अत्यन्त प्रसन्न होतेहैं उन ब्राह्मणोंके कुलकी धर्मानुसार नम्रतापूर्वक सेवामें तत्पर रहो ॥ ३९ ॥ कि जिनकी सदैव सेवा करने से अंतःकरण आपसे आप शुद्ध होजाता है और मनुष्य मोक्ष को प्राप्त होता है, उन ब्राह्मणों से अधिक और देवताओं का मुख क्या होसक्ता है ॥४०॥ ब्राह्मण को भगवान की साकार मूर्ति जानकर उसके मुख में देवताओं का नाम लेकर वेदवादी के हाथ से होमेहुए पवित्र पदार्थों को परमेश्वर जैसा स्वीकार करते हैं वैसा अग्नि में होमेहुए पदार्थ को नहीं स्वीकार करते ॥ ४१ ॥ जिस सनातन वेद में यह सृष्टि दर्पण की भांति प्रकाशती है उस वेद को जो ब्राह्मण लोग श्रद्धा, तप, सदाचार और जितेन्द्रियता से धारण करते हैं और सावधानी से उसके अर्थ का विचार करतेहैं॥४२॥उन ब्राह्मणोंके चरणोंकी धूलको मैं समस्त जीवनभर अपने मुकुट में धारणकरूं यही मेरी प्रार्थनाहै क्योंकि जो इस धूलको सदैव अपने मस्तकमें धारण करतेहैं उनके सम्पूर्ण पाप दूरहोकर उन्हें सम्पूर्ण गुण प्राप्त होते हैं॥४३॥ जो पुरुष गुणवान, शीलवान, कृतज्ञ और वृद्ध पुरुषोंका दासहै उसको सम्पूर्ण सम्पदायें आपही अंगीकार करतीहैं इसीहेतु मैं विनती करताहूं कि ब्राह्मण, गऊ, परमेश्वर तथा भगवद्भक्त यह सब मुझपर प्रसन्नरहें ४४ ॥ मैत्रेयजीने कहा—कि राजा पृथुने जब इसभांति कहा तब पितृगण देवता, ब्राह्मण, यह सब हर्षितमनहो राजाको धन्यवाद दे स्तुति करनेलगे ॥ ४५ ॥ लोगोंने कहा यह वेदवाणी कि पुत्रसे परलोक सुधरजाताहै सत्यहै जिसप्रकार ब्राह्मणों के शापरूपी दंडसे मराहुआ अपराधी वेन नरकसे पार होगया ॥४६॥ हिरण्यकश्यपु भी परमेश्वरकी निंदा के अपराधसे नकरमें पड़ताथा परन्तु पुत्र प्रह्लादके प्रभावसे नरकसे पार उतरा॥ ४७ ॥ हे वीरवर्य्य! हेपृथ्वीके पिता! भगवान आपको बहुतकालतक जीवितरक्खें क्योंकि आपकी जगत्पति परमेश्वरमें अत्यन्तही दृढ़ भक्ति है ॥४८॥ हेपुण्ययश! आप आज हमारे स्वामीहुये इससे हम जानतेहैं कि साक्षात् भगवानही हमारे स्वामी हैं कारण कि आप पवित्र यश भगवान के चरित्र सुनातेहो ॥ ४९ ॥ हेस्वमी! आप अपने आश्रयी मनुष्योंको उपदेशकरो इसमें कोई विचित्र बात नहीं है कारण कि प्रजापर स्नेह रखनाही करुणावान साधू मनुष्यों का स्वभाव है ॥ ५० ॥ हेनाथ! हम अपने प्रारब्ध कर्म्मों से नष्ट

अथतमस्तमसःपारस्त्वयोपासादितःप्रभो । भ्राम्यतांनष्टदृष्टीनांकर्मभिर्दैववंशितैः५१
नमोविवृद्धसत्वायपुरुषायमहीयसे । योब्रह्मक्षत्रमाविश्यविभर्तीदंस्वतेजसा ५२॥
इतिश्रीमद्भागवतेचतुर्थस्कन्धेएकविंशोऽध्यायः ॥ २१ ॥
मैत्रेयउवाच । जनेषुप्रगृणत्स्वेवं पृथुंपृथुलविक्रमम् । तत्रोपजग्मुर्मुनयश्चत्वारः सूर्यवर्चसः ॥ १ ॥ तांस्तुसिद्धेश्वरान्राजा व्योम्नोऽवतरतोऽर्चिषा । लोकानपापान्कुर्वत्या सानुगोऽचष्टलक्षितान् ॥ २ ॥ तद्दर्शनोद्गतान्प्राणान् प्रत्यादित्सुरिवोत्थितः । ससदस्यानुगोवैन्य इन्द्रियेशोगुणानिव ॥ ३ ॥ गौरवाद्यन्त्रितःसभ्यः प्रश्रयानतकन्धरः । विधिवत्पूजयांचक्रे गृहीताध्यर्हणासनान् ॥ ४ ॥ तत्पादशौचसलिलैर्मार्जितालकबन्धनः । तत्रशीलवतांवृत्तमाचरन् मानयन्निव ॥५॥ हाटकासनआसीनान् स्वधिष्ण्येष्विवपावकान् । श्रद्धासंयमसंयुक्तः प्रीतःप्राहभवाग्रजान् ॥ ६ ॥ पृथुरुवाच । अहोआचरितंकिंमे मङ्गलंमंगलायनाः । यस्यवोदर्शनंह्यासीद् दुर्दर्शानांचयोगिभिः ॥ ७ ॥ किंतस्यदुर्लभतरमिह लोकेपरत्रच । यस्यविप्राः प्रसीदन्ति शिवोविष्णुश्चसानुगः ॥८॥ नैवलक्षयतेलोको लोकान्पर्यटतोऽपियान् ॥ यथासर्वदृशंसर्व आत्मानंयेऽस्यहेतवः ॥९॥ अधनाअपितेधन्याः साधवोगृहमेधिनः । यद्गृहाह्यर्हवर्याम्बुतृणभूमीश्वरावराः ॥ १० ॥ व्यालालयद्रुमा वैतऽप्यरिक्ताखिलसंपदः । यद्गृहास्तीर्थपादीयपादतीर्थविवर्जिताः ॥ ११ ॥ स्वागतंवोद्विजश्रेष्ठा यद्व्रतानिमुमुक्षवः । चरन्तिश्रद्धयाधीरा बालाएववृहन्तिच ॥१२॥ कच्चि

दृष्टि होकर इस सृष्टिमें भटकते हैं आपने आज उस अज्ञान से हमको पारकिया ॥ ५१ ॥ ब्राह्मण और क्षत्रियों में व्याप्त होकर अपनी शक्तिसे उनका और सृष्टिका पालन करनेवाले सत्वगुणके वृद्धि करनेवाले जो पुरुषोत्तम भगवान हैं उनको हम नमस्कार करतेहैं ॥ ५२ ॥

इति श्री भागवते महापुराणे सरलाभाषाटीकायां एकविंशोऽध्यायः ॥ २१ ॥

मैत्रेयजीने कहा कि प्रभावशाली महाराजापृथुकी लोग इसभांति बड़ाई कररहेथे, कि-इतनेमेंही वहांपर सूर्यकी सदृश ऐश्वर्यवाले चारों सनकादिक मुनि आगये ॥१॥ उन सिद्धेश्वरोंको कि जिनके दर्शनमात्रसे पाप दूरहोतेहैं, आकाशसे उतरते राजा तथा राजाके सेवकोंने देखा और उनके तेजकी प्रभा से उन्हें पहिचानभी लिया ॥ २ ॥ उनके दर्शनसे गयेहुये प्राण मानों फिरलौटें इसप्रकार प्रसन्नहो राजापृथु सभासद और सेवकों सहित उठ खड़ाहुआ जैसे जीवात्मा गंधादि विषयोंके सन्मुख जाताहै ॥३॥ फिर नम्रता पूर्वक मस्तकको झुकाकर गौरवताके वशीभूतहो उन ऋषियों को आसन अर्घ्यादिदेकर विधिवत उनकी पूजा और सनमान किया ॥ ४ ॥ और उनके चरणोंके धोयेहुये जलको अपने मस्तकपर चढ़ाया सो वह पृथुका आचरण शीलवान मनुष्यों के आचरण को मान देनेवालाथा ॥ ५ ॥ अग्निके सदृश सुवर्णके आसनोंपर विराजमान महादेवजी के ज्येष्ठभ्राता सनकादिकोंसे राजाने श्रद्धासंयम संयुक्त प्रसन्नहोकर पूंछा ॥ ६ ॥ पृथुने कहा कि-हे मंगलायनो ! मैंने ऐसा क्या सुकर्म कियाहै कि जो योगियोंको भी दुर्लभ आपके दर्शन मुझेहुये ॥ ७ ॥ जिसपर ब्राह्मण और अपने भक्तोंके साथ हरिहर प्रसन्न होजायँ तो उसको इसलोक और परलोकमें कोई पदार्थ दुर्लभ नहींहै ॥ ८ ॥ जैसे सर्वदृष्टा आत्माको यह देहनही देखसकता वैसेही सृष्टिमें विचरतेहुये आपको यहलोक नहीं देखसकता ॥ ९ ॥ जिस गृहस्थोंके घरका जल, आसन भूमि भृत्य और गृहपतिको सन्तजन अंगीकारकरें वह चाहे दरिद्री क्यों नहों तोभी उसको भाग्यशालीही जानना चाहिये ॥१०॥ जिनके घर भक्तोंके तीर्थरूप चरणकमलोंसे वर्जितहैं वे घर समृद्धियुक्तहोनेपरभी सर्पोंके रहनेके बिलोंके सदृशहैं॥११॥हेद्विजोत्तमो! आपका शुभागमन हमको

कः कुशलंनाथ इन्द्रियार्थार्थवेदिनाम् । व्यसनावापएतस्मिन् पतितानांस्वकर्मभिः ॥ १३ ॥ भवत्सुकुशलप्रश्न आत्मारामेषुनेष्यते । कुशलाकुशलायत्र नसन्तिमतिवृत्तयः ॥ १४ ॥ तद्दहंकृतविश्रम्भः सुहृदोवस्तपस्विनाम् ॥ संपृच्छेभवएतस्मिन् क्षेमः केनांजसाभवेत् ॥ १५ ॥ व्यक्तमात्मवतामात्मा भगवानात्मभावनः । स्वाला मनुग्रहायेमांसिद्धरूपीचरत्यजः ॥ १६ ॥ मैत्रेयउवाच । पृथोस्तत्सूक्तमाकर्ण्य सारं सुष्ठुमितंमधु । स्मयमानइवप्रीत्या कुमारःप्रत्युवाचह ॥ १७ ॥ सनत्कुमारउवाच । साधुपृष्टंमहाराज सर्वभूतहितात्मना । भवताविदुषाचापि साधूनांमतिरीदृशी१८॥ संगमःखलुसाधूनामुभयेषांच संमतः । यत्संभाषणसंप्रश्नः सर्वेषांवितनोतिशम् । ॥ १९ ॥ अस्त्येवराजन्भवतो मधुद्विषःपादारविन्दस्यगुणानुवादने । रतिर्दुरापा विधुनोतिनैष्ठिकी काममकषायंमलमन्तरात्मनः ॥ २० ॥ शास्त्रेष्वियानेवसुनिश्चितो नृणांक्षेमस्यसध्र्यग्विमृशेषुहेतुः । असंगआत्मव्यतिरिक्त आत्मनिदृढारतिर्ब्रह्मणि निर्गुणेचया ॥२१॥ साश्रद्धयाभगवद्धर्मचर्यया जिज्ञासयाऽध्यात्मिकयोगनिष्ठया । योगेश्वरोपासनयाचनित्यंपुण्यश्रवःकथयापुण्ययाच ॥ २२ ॥ अर्थेन्द्रियारामसगोष्ठ्यतृष्णयातत्संमतानामपरिग्रहेणच । विविक्तरुच्यापरितोषआत्मन्विनाहरेर्गुण पीयूषपानात् ॥ २३ ॥ अहिंसयापारमहंस्यचर्ययास्मृत्यामुकुन्दाचरिताग्र्यसीधुना । यमैरकामैर्नियमैश्चाप्यनिंदयानिरीहयाद्वन्द्वतितिक्षयाच ॥ २४ ॥ हरेर्मुहु-

बहुत अच्छाहुआ क्योकि आपके नियमों को धैर्यवान पुरुष बालकपनहीसे मोक्षके हेतु धारणकरते हैं ॥ १२ ॥ हे समर्थो ! हम लोग विषय भोगों को ही स्वार्थ मानते हैं और इस दुःख मय संसार में अपने कर्मों करके हमसे पतितभी कुशल हैं ॥ १३ ॥ और आप सरीखे आत्माराम पुरुषो से कुशल पूँछना उचित नही क्योंकि आपके मनमें कुशल और अकुशल की वृत्तियांही नहीं हैं ॥ १४ ॥ आप तपस्वियो के सुहृद हो, इसी से मै आप पर विश्वास करके बूझता हूं कि इस संसार में विना परिश्रम किये क्षेम किस प्रकार से प्राप्त होती है ॥ १५ ॥ आत्मवेत्तापुरुषों में आत्मस्वरूप से प्रकाशित तथा आत्मस्वरूप को प्रकाशित करने वाले आप साक्षात परमेश्वर हो आपका यह सिद्धस्वरूप धारण करके लोकों में विचरना भक्तों पर कृपा करनेके हेतुहै १६॥ मैत्रेयजी ने कहा कि पृथुकी सुंदर, सारभरी, प्रियवाणी सुनकर सनत्कुमार प्रीति पूर्वक मुसका कर बोले ॥ १७ ॥ सनत्कुमारजी बोले कि—हे महाराज ! आपने सब जानकर भी प्राणियों के हित के हेतु जो यह प्रश्नकिया वह बहुत उत्तम किया—महात्माओं की बुद्धि सदैव परोपकार में प्रवृत्त रहती है ॥ १८ ॥ साधुओं का सत्संग दोनोंको सुख दायकहै क्योंकि उनके संभाषणऔर प्रश्नों से सम्पूर्ण सृष्टि का भला होना है ॥ १९ ॥ हे राजन् ! आपकी मोक्ष साधनके हेतु श्रीकृष्ण भगवान के चरणो में अति दुर्लभ दृढ प्रीति है उसी परमेश्वर की प्रीति से अंतःकरणके कषाय दूर होजाते हैं ॥ २० ॥ मनुष्यों के कल्याणके निमित्त शास्त्रों को भली भांति से विचार कर यह निश्चय किया है कि पदार्थों मे वैराग्य, और निर्गुणरूप वाले आत्मरूप भगवान परब्रह्म में दृढ प्रीति का होना ही मनुष्य के कल्याण का कारण है ॥ २१ ॥ श्रद्धा रखना भगवद्धर्म का आचरण करना आत्मस्वरूपकी जिज्ञासा करना, अध्यात्मविद्या योग में निष्ठा रखना, योगियों की उपासना करना, पवित्र यश भगवान की नित्य पवित्र कथा सुनना, यह प्रीति होनेके साधन हैं २२॥ इंद्रिया राम राजसी प्राणियो के साथ वार्ता करने में तृष्णा न रखना, इंद्री और काम का परिग्रह न करना, एकांत स्थान में रुचि रखना, परमेश्वर के चरितामृतही को पान करके संतोष रखना ॥ २३ ॥ जीवमात्रकी हिंसा न करना परमहंस वृत्ति धारण करना नियम से परमेश्वर के चरिता

सत्पुरकर्णपूरगुणाभिधानेनविजृम्भमाणया । भक्त्याह्यसङ्गःसदसत्यनात्मनिस्यान्निर्गुणेब्रह्मणिचाञ्जसारतिः ॥ २५ ॥ यदारतिर्ब्रह्मणिनैष्ठिकीपुमानाचार्यवान्ज्ञानविरागरंहसा । दहत्यवीर्यंहृदयंजीवकोशंपञ्चात्मकंयोनिमिवोत्थितोऽग्निः॥२६॥ दग्धाशयोमुक्तसमस्ततद्गुणोनैवात्मनोबहिरन्तर्विचष्टे। परात्मनोर्यद्व्यवधानंपुरस्तात्स्वप्नेयथापुरुषस्तद्विनाशे॥२७॥आत्मानमिन्द्रियार्थंचपरंयदुभयोरपि।सत्याशयउपाधौवैपुमान्पश्यतिनान्यदा ॥ २८ ॥ निमित्तेसतिसर्वत्रजलादावपिपूरुषः। आत्मनश्चपरस्यापिभिदांपश्यतिनान्यदा ॥ २९ ॥ इन्द्रियैर्विषयाकृष्टैराक्षिप्तंध्यायतांमनः । चेतनांहरतेबुद्धेःस्तम्बस्तोयमिवह्रदात् ॥ ३० ॥ भ्रश्यत्यनुस्मृतिश्चित्तंज्ञानभ्रंशःस्मृतिक्षये । तद्रोधंकवयःप्राहुरात्मापह्नवमात्मनः ॥ ३१ ॥ नातःपरतरोलोकेपुंसःस्वार्थव्यतिक्रमः । यदध्यन्यस्यप्रेयस्त्वमात्मनःस्वव्यतिक्रमात् ॥ ३२ ॥ अर्थेन्द्रियार्थाभिध्यानंसर्वार्थापह्नवोनृणाम् । भ्रंशितोज्ञानविज्ञानाद्येनाविशतिमुख्यताम् ॥ ३३ ॥ नकुर्यात्कर्हिचित्सङ्गंतमस्तीव्रंतितीरिषुः । धर्मार्थकाममोक्षाणांयदत्यन्तविघातकम् ॥३४॥तत्रापिमोक्षएवार्थआत्यंतिकतयेष्यते।त्रैवर्ग्योऽर्थोयतोनित्यंकृतांतभयसंयुतः ॥ ३५ ॥ परेऽवरेचयेभावागुणव्यतिकरादनु । नतेषांविद्यतेक्षेममीशविध्वंसिताशिषाम् ॥ ३६ ॥तत्त्वंनरेन्द्रजगतामथतस्थुषांचदेहेन्द्रियाऽसुधि

मृत का पान करना, काम त्याग कर यम नियम करना, और सुख दुःख इत्यादिक को सहन करना ॥ २४ ॥ भगवद्भक्तोंके कार्यों का परिपूर्ण करने वाले भगवान के चरित्रों को बारंवार बखान करना और अत्यन्त भक्ति में मन लगाना इन साधनो से मनुष्य की निर्गुण भगवानमे रति होती है ॥ २५ ॥ गुरु में निष्ठा रखने वाले मनुष्य का परमात्मा में सत्य स्नेह होता है, उसका ऌ काठ से उत्पन्न हुई अग्नि की समान ज्ञान तथा वैराग्यके बलसे पंचमहाभूत लिंग शरीर का नाश होजाता है ॥ २६ ॥ इस के नाश से हृदयकी सम्पूर्ण उपाधियों का नाश होजाता है उसके सबगुण दूर होजाते तथा उस से उत्पन्न दृश्य द्रष्टाका भेद अर्थात् आत्मा के सुख दुःख को वह ऐसे नहीं देखता कि जैसे स्वप्नावस्थाके पदार्थोको जाग्रत पुरुष नहीं देखता ॥ २७ ॥ द्रष्टा और दृश्यका भेद केवल अन्तःकरणसेही प्रतीतहोताहै, कारण कि जाग्रत और स्वप्नमें अंतःकरण होनेसे आप देखनेवाला और देखनेकी वस्तुये और उनका सम्बन्ध करनेवाला अहंकार देखने में आताहै परन्तु सुषुप्तिमें अन्तःकरण न होनेसे कुछभी नहीदीखता ॥ २८ ॥ जैसे जल औरकांच मेंही प्रतिबिंब देखपड़ताहै और इनके न होनेसे वह भेद देखनेमे नहींआता । आत्मा और ईश्वर मे भेद नहींहै ॥ २९ ॥ विषयोंमें व्याप्त इन्द्रियों को विषय, मनको इन्द्रियें और बुद्धिकी विचार शक्तिको मन खींच लेजाताहै जैसे तटपरका वृक्ष अपनी जड़से सरोवरके जलको खींचताहै ३० ॥ बुद्धिकी चैतन्यताके नाशसे स्मृतिका नाश होताहै और स्मृति नाशसे ज्ञाननाश तथा ज्ञाननाशसे आत्मा का नाश होताहै ऐसा विवेकी लोग कहतेहै ॥ ३१ ॥ पुरुषके स्वार्थकीहानि इससेअधिक और कोई नहींहै कि उसी आत्माका नाश होना कि जो सबको प्रिय लगताहै ॥ ३२ ॥ मनुष्यों के पुरुषार्थ नाशका हेतु अर्थ कामकी तृष्णाहीहै क्योंकि इस तृष्णासे ज्ञान और विज्ञान दोनोंही नष्ट होजाते हैं और इनका नाश होजानेसे वह स्थावर भावको प्राप्तहोजाताहै ॥ ३३ ॥ जो मनुष्य इस तीव्र संसारसे तरनेकी इच्छाकरै तो निःसंगरहे—क्योंकि इससगसे धर्म, अर्थ, काम और मोक्ष नाशको प्राप्तहोतेहैं ॥ ३४ ॥ इन चारोंमे मोक्षही श्रेष्ठ पुरुषार्थहै कारण कि शेष तीनो नित्यही काल के भयसे संयुक्त रहतेहैं ॥ ३५ ॥ वह काल स्वयं उत्पन्नहुये ब्रह्मातकके मनोरथोंको नाशकरदेता है और इसके भावगुण दूसरोंसे पृथक्हैं इसहेतु इससे कल्याण नहीं प्राप्तहोता ॥ ३६ ॥ हेनरेंद्र !

षणात्मभिरावृतानाम् । यःक्षेत्रवित्तपतयाहृदिविश्वगाविःप्रत्यक्चकास्तिभगवा स्तमवेहिसोऽस्मि ॥ ३७ ॥ यस्मिन्निदंसदसदात्मतयाविभातिमायाविवेकविधुतिःस्रजिवाऽहिबुद्धिः। तंनित्यमुक्तपरिशुद्धविबुद्धतत्त्वप्रत्यूढकर्मकलिलप्रकृतिंप्रपद्ये ॥ ३८ ॥ यत्पादपङ्कजपलाशविलासभक्त्याकर्माशयंग्रथितमुद्ग्रथयन्तिसन्तः। तद्वन्नरिक्तमतयोयतयोऽपिरुद्धस्रोतोगणास्तमरणंभजवासुदेवम् ॥ ३९ ॥ कृच्छ्रो महानिहभवार्णवमप्लवेशांषड्वर्गनक्रमसुखेनतितीरषन्ति । तत्त्वंहरेर्भगवतोभजनीयमङ्घ्रिंकृत्वोडुपंव्यसनमुत्तरदुस्तरार्णम् ॥ ४० ॥ मैत्रेय उवाच ॥ सएवंब्रह्मपुत्रेण कुमारेणात्ममेधसा । दर्शितात्मगतिःसम्यक्प्रशस्योवाचतंनृपः ॥४१ ॥राजोवाच कृतोमेऽनुग्रहःपूर्वंहरिणाऽऽर्तानुकम्पिना । तमापादयितुंब्रह्मन्भगवन्यूयमागताः ॥ ४२ ॥ निष्पादितश्चकार्त्स्न्येनभगवद्भिर्घृणालुभिः । साधूच्छिष्टंहिमेसर्वमात्मना सहकिंददे ॥ ४३ ॥ प्राणादाराःसुताब्रह्मन्गृहाश्चसपरिच्छदाः । राज्यंबलंमही कोशइतिसर्वंनिवेदितम् ॥ ४४ ॥ सैनापत्यंचराज्यंचदण्डनेतृत्वमेवच । सर्वलोकाधिपत्यंचवेदशास्त्रविदर्हति ॥ ४५ ॥ स्वमेवब्राह्मणोभुङ्क्तेस्वंवस्तेस्वंददातिच । तस्यैवानुग्रहेणान्नंभुञ्जतेक्षत्रियादयः ॥ ४६ ॥ यैरीदृशीभगवतोगतिरात्मवादएकान्ततोनिगमिभिःप्रतिपादितानः।तुष्यन्त्वदभ्रकरुणाःस्वकृतेननित्यंकोनामतत्प्रतिकरोतिविनोदपात्रम्॥४७॥मैत्रेयउवाच ॥ तआत्मयोगपतयआदिराजेनपूजिताः । शीलं

वेद, इन्द्रिय, बुद्धि और आत्मासे व्याप्त स्थावर जंगममें जोअन्तर्यामी रूपसे प्रत्यक्ष प्रकाशते और अन्तवर्त्तिसे जो प्रतीत होते हैं वह परब्रह्म भगवान मैंहीहूं ऐसा आत्माको जानो ॥ ३७ ॥ ज्ञान उत्पन्न होनेपर कार्य कारणरूप संसार किजिसकी मालामेंमाया सर्पसी प्रतीत होताहै इसको निवृत्त करनेवाले, सत्यकर्मोसे मलीनमाया के पराभव करनेवाले नित्यमुक्त, शुद्ध, ज्ञानस्वरूप परब्रह्म परमात्माकी शरणको प्राप्तहो ॥ ३८ ॥ जिन भगवानके चरणकमलके पत्ररूपी अंगुलियों की भक्तिसे मनुष्य उस हृदयकी अहंकाररूपी गांठ को काटता है कि जिसको बुद्धि प्रवर भी नहीं तोड़सकते, उन्हीं भगवान की शरण जाओ और उन्हीं का भजन करो ॥ ३९ ॥ इस संसार रूपी समुद्रको कि जिसमे छः (काम, क्रोध, लोभ, मोह, मद, मात्सर्य) ग्राह हैं, जो परमेश्वर रूपी नौकाके विना योगादिक साधनाओं से पार होना चाहते हैं उन्हें बहुत श्रम पड़ताहै इसहेतु हे राजन् ! तुम भगवान के चरणों की नाव बनाकर इस दुःख रूपी संसार सागर से पार उतरो ॥ ४० ॥ मैत्रेयजी नें कहा कि जब वेदवादी ब्रह्माजी के पुत्र सनत्कुमारों नें राजा पृथुको इस प्रकार ज्ञानोपदेश किया तो राजा उनकी अत्यन्त बड़ाईकर कहनेलगा कि ॥ ४१ ॥ राजा नें कहा कि हेभगवन्! शरणागत वत्सल भगवानने प्रथम मेरेऊपर दयाकरके जो कहाथा हेब्रह्मन्! उसके संपादन करनेको आप यहां आएहो ॥४२॥ हे कृपालो! आपने मुझको पुष्टकिया (सबकार्य पूर्णकिये) हे महात्मन् ! मैं आप को क्या गुरु दक्षिणा दूं क्यों कि मेरा राज्य देहादिक महात्माओं ही का है ॥ ४३ ॥ हे ब्रह्मन् ! स्त्री, पुत्र, प्राण, घर, घरकी सामग्री, राज्य, सेना, कोष यह सब महात्माओंही का है, परन्तु जिस भांति नौकर राजाही की वस्तु राजा को अर्पण करै इसी भांति मैंने यह सम्पूर्णराज्य आपके अर्पणकिया॥४४॥वेद तथा शास्त्रवेत्ता ब्राह्मणही सेनापति, न्यायाधीश तथा सम्पूर्ण के अधिपति होनेके योग्य हैं ॥ ४५ ॥ ब्राह्मण अपने ही भागको भोगता, देता, खाता तथा धारण करता है और क्षत्रियादिक तो ब्राह्मणों केही दियेहुए भागको भोगते हैं ॥ ४६ ॥ अध्यात्म विचार में एक वेद के ज्ञाता आप नें जो मुझे ब्रह्मज्ञान की शिक्षा दी है उसका बदला हाथ जोडनें के अतिरिक्त मैं और कुछ नहीं देसकता हे करुणानिधि ! परम कृपालु ! आप अपनें किये

तदीयैराशिषःसन्तःखेऽभूवन्मिषतांनृणाम् ॥४८॥ वैन्यस्तुधुर्योमहतांसंस्थित्याऽध्यात्मशिक्षया। आप्तकाममिवात्मानंमेनआत्मन्यवस्थितः॥४९॥कर्माणिचयथाकालंयथादेशंयथाबलम्। यथोचितंयथावित्तमकरोद्ब्रह्मसात्कृतम् ॥ ५० ॥ फलंब्रह्मणिविन्यस्यनिर्विषङ्गःसमाहितः। कर्माध्यक्षंचमन्वानआत्मानंप्रकृतेःपरम् ॥५१॥गृहेषुवर्तमानोऽपिससाम्राज्यश्रियाऽन्वितः। नासज्जतेन्द्रियार्थेषुनिरहंमतिरर्कवत् ५२ एवमध्यात्मयोगेनकर्माण्यनुसमाचरन्। पुत्रानुत्पादयामासपञ्चार्चिष्यात्मसंमतान् ॥ ५३ ॥ विजिताश्वंधूम्रकेशंहर्यक्षंद्रविणंवृकम्। सर्वेषांलोकपालानांदधारैकःपृथुर्गुणान् ॥ ५४ ॥ गोपीथायजगत्सृष्टेःकालेस्वेस्वेऽच्युतात्मकः। मनोवाग्वृत्तिभिःसौम्यैर्गुणैःसंरञ्जयन्प्रजाः ॥ ५५ ॥ राजेत्यधान्नामधेयंसोमराजइवापरः। सूर्यवद्विसृजन्गृह्णन्प्रतपंश्चभुवोवसु ॥ ५६ ॥ दुर्धर्षस्तेजसेवाग्निर्महेन्द्रइवदुर्जयः। तितिक्षयाधरित्रीवद्यौरिवाभीष्टदोनृणाम् ॥ ५७ ॥ वर्षतिस्मयथाकामंपर्जन्यइवतर्पयन्। समुद्रइवदुर्बोधःसत्त्वेनाचलराडिव ॥ ५८ ॥ धर्मराडिवशिक्षायामाश्चर्येहिमवानिव। कुबेरइवकोशाढ्योगुप्तार्थोवरुणोयथा ॥ ५९ ॥ मातरिश्वेवसर्वात्माबलेनसहसौजसा। अविषह्यतयादेवोभगवान्भूतराडिव ॥ ६० ॥ कन्दर्पइवसौन्दर्येमनस्वीमृगराडिव। वात्सल्येमनुवन्नृणांप्रभुत्वेभगवानजः ॥ ६१ ॥ बृहस्पतिर्ब्रह्मवादेआत्मवत्त्वेस्वयंहरिः। भक्त्यागोगुरुविप्रेषुविष्वक्सेनानुवर्तिषु ॥ ६२ ॥

हुए उपकार सेही मुझपर प्रसन्न होओ ॥४७॥ मैत्रेयजी बोले कि राजा पृथुने इस भांति उन मुनियों का बड़ा सनमान किया तब वह ब्रह्म वेत्ता सनत्कुमारादिक मुनि उस के स्वभाव की बड़ाई करतेहुए आकाश मार्ग से चलेगये ॥ ४८ ॥ ब्रह्म ज्ञान से उत्पन्न हुई चित्त की एकाग्रता से अपने स्वरूप में स्थित साधुओं में श्रेष्ठ वह राजा पृथु अपनें आत्मा को कृतार्थ सा मानने लगा ॥ ४९ ॥ वह राजा देश काल, बल, योग्यता और धनसे कियेहुए कर्मों को ब्रह्मार्पण करता था ॥ ५० ॥ उन कर्मोंके फलों को ब्रह्मार्पण करके, कर्मों की आसक्ति को त्याग अपनें आत्मा को सब कामों का साक्षी कर उसको मुख्य मान माया से परे माननें लगा ॥ ५१ ॥ उसके घर में सम्पूर्ण प्रकार की संपदायें वर्तमान थीं परन्तु वह निरहंकार होने से किसी भी विषय में लिप्त नहुआ ॥५२॥ इस भांति अंतःकरण में ज्ञान निष्ठारख लोक संग्रह के हेतु कर्म करते हुए उस पृथुने अर्चि नाम रानी में अपनें सदृश पांच पुत्र उत्पन्न किये ॥ ५३ ॥ विजताश्व, धूम्रकेश, हर्यक्ष, द्रविण, और वृक, यह राजा पृथु सब लोकपालों के गुणों को धारण करता था ॥ ५४ ॥ सृष्टि की रक्षा के हेतु परमेश्वर के अवतार रूप पृथुने मन, वाणी, वुद्धि, और श्रेष्ठ गुणों से प्रजाको प्रसन्न किया ॥ ५५ ॥ इसी हेतु पृथु को राजा की पदवीमिली सूर्यकी सदृश राजा सबपर आज्ञा करताथा और सब प्रजा से करले कर समयपर उस द्रव्य को त्याग करता था ॥ ५६ ॥ तेजमें वह अग्नि की सदृश था और इन्द्र की सदृश अजय था क्षमा में पृथ्वी की सदृश और मनोकामना पूर्ण करनें में स्वर्ग की सदृश था ॥ ५७ ॥ जिस भांति मेघ सम्पूर्ग सृष्टिको तृप्त करता है वैसेही यह राजा सबकी मनोकामना पूर्ण कर जगत को तृप्त करता था, वह समुद्र के सदृश गम्भीर और मेरु की सदृश धैर्य्यवान था ॥ ५८ ॥ वह उपदेश में धर्मराज, आश्चर्य में हिमालय, द्रव्य में कुवेर, और अर्थ गुप्त रखने में वरुणकी सदृश था ॥ ५९ ॥ सम्पूर्ण स्थानों में भ्रमण करने से वह बल, पराक्रम में पवन की सदृश, तथा असह्यता में रुद्र की सदृश था ॥ ६० ॥ रूप में कामदेव, साहस में सिंह, मनुष्य पर प्रीति करने में मनु और स्वामित्व में भगवान ब्रह्माजी के सदृशथा ॥ ६१ ॥ वेदवादमें बृहस्पति के सदृश, जितेन्द्रियता में विष्णुभगवान की सदृश और गौ, ब्राह्मण, गुरु, भक्तों की सेवा करने में तथा

ह्रियाप्रश्रयशीलाभ्यामात्मतुल्यःपरोद्यमे । कीर्त्यार्चैर्गीतयापुंभिस्त्रैलोक्यतेजसन ह । प्रविष्टःकर्णरन्ध्रेषुस्त्रीणांरामःसतामिव ॥ ६३ ॥

इतिश्रीमद्भा०च०पृथुचरितेनामद्वाविंशतितमोऽध्यायः ॥ २२ ॥

मैत्रेयउवाच ॥ दृष्ट्वात्मानंप्रवयसमेकदा वैन्यआत्मवान् । आत्मनावर्धिताशेषस्वानुसर्गःप्रजापतिः ॥ १ ॥ जगतस्तस्थुषश्चापि वृत्तिदोधर्मभृत्सताम् । निष्पादितेश्वरादेशो यदर्थमिहयाज्ञिवान् ॥ २ ॥ आत्मजेष्वात्मजांन्यस्य विरहाद्रुदतीमिव ॥ प्रजासुविमनस्स्वेकः सदारोऽगात्तपोवनम् ॥ ३ ॥ तत्राप्यदाभ्यनियमो वैखानससुसंमते । आरब्धउग्रतपसि यथास्वविजयेपुरा ॥ ४ ॥ कन्दमूलफलाहारः शुष्कपर्णाशनःक्वचित् । अब्भक्षःकतिचित्पक्षान वायुभक्षस्ततःपरम् ॥ ५ ॥ ग्रीष्मेपञ्चतपावीरो वर्षास्वासारषाण्मुनिः । आकण्ठमग्नःशिशिर उदकेस्थण्डिलेशयः ॥ ६ ॥ तितिक्षुर्यतवाग्दान्त ऊर्ध्वरेताजितानिलः । आरिराधयिषुःकृष्ण मचरत्तपउत्तमम् ॥ ७ ॥ तेनक्रमानुसिद्धेन ध्वस्तकर्मामलाशयः प्राणायामैःसंनिरुद्ध षड्वर्गश्छिन्नबन्धनः ॥ ८ ॥ सनत्कुमारोभगवान् यदाहाध्यात्मिकंपरम् । योगंतेनैवपुरुष मभजत्पुरुषर्षभः ॥ ९ ॥ भगवद्धर्मिणःसाधोः श्रद्धयायततःसदा । भक्तिर्भगवतिब्रह्मण्य नन्यविषयाऽभवत् ॥ १० ॥ तस्यानयाभगवतःपरिकर्मशुद्ध सत्वात्मनस्तदनुसंस्मरणानुपूर्त्या । ज्ञानंविरक्तिमद्भूञ्शिशितेन येन चिच्छेदसंशयपदंनिजजीवकोशम् ॥ ११ ॥ छिन्नान्यधीरधिगतात्मगतिर्निरी

लज्जा, नम्रता परस्वार्थ, और सुशीलता मे अपनी सदृश था अर्थात् इनमें किसी की उपमायोग्य नथा ॥ ६२ ॥ उसकी सत्पुरुषों से गाई हुई कीर्ति रामचन्द्र जी की कीर्ति की सदृश त्रिलोकी में व्याप्त होगई ॥ ६३ ॥

इति श्री मद्भागवते महापुराणे० चतुर्थस्कंधे सरला भाषाटीकायां द्वाविंशोऽध्यायः ॥ २२ ॥

मैत्रेयजी बोले कि—एकसमय आत्मज्ञानी राजापृथुने अपनी आत्माको वृद्धदेखा जिसमें अपनी आत्मासे सब संसारके पदार्थ बढ़ाये सो प्रजापतिहुये ॥ १ ॥ उस राजापृथुनें समस्त के स्थावर जंगम जीओं को धर्मकी वृत्तिदेने तथा देवताओं की आज्ञा सम्पादन करने हेतु जन्मलियाथा ॥ २ ॥ विरहसे रुदन करतीहुई पृथ्वीको अपने पुत्रोंको सौंपकर प्रजामें जिसका मन नहीं सो राजा पृथु अपनी स्त्री को साथले अकेला तप करनेके लिये तपोवनको चलदिया ॥ ३ ॥ पृथुराजाने जैसा कि पृथ्वीके जय करनेमें पराक्रम कियाथा वैसाही दृढ़ नियम धारणकर वानप्रस्थ लोगोंके माननीय उग्र तपकरने में प्रयत्नकिया ॥ ४ ॥ कुछ एकदिन उसने कन्दमूल, फल, फिर, कुछदिन सूखेपत्ते और कुछदिन केवल जलपानहीकिया अनन्तर वायुही भक्षणकरनेलगा॥५॥ ग्रीष्मऋतुमें पंचाग्नि तपता वर्षाऋतुमें उग्र वर्षाका सहन करता और शीतकालमें कण्ठ पर्यंत जलमे खडारहता और पृथ्वीपर सोताथा ॥ ६ ॥ उस सहनशील, मौनी इन्द्रियदमन, ऊर्ध्वरेता पृथुराजाने वायुकोभी जीतकर परमेश्वरके आराधनके हेतु उत्तम तपकिया॥७॥ क्रमसे कर्मनष्टहोजानेपर राजा का अन्तःकरण निर्मल होगया, प्राणायामके प्रभावसे उसके कामक्रोधादि वशीभूतहो सब बन्धन कटगये ॥ ८ ॥ सनत्कुमार भगवानके परमश्रेष्ठ योगके उपदेशानुसार पृथुराजा परमेश्वरकी आराधना करताथा ॥ ९ ॥ यत्नपूर्वक श्रद्धासे परमेश्वरकी भक्तिकरतेहुये पृथुराजाकी श्रीभगवानमें अनन्य भक्ति होगयी ॥ १० ॥ तथा भक्तिसे राजाका मन शुद्ध सत्वको प्राप्तहो वैराग्ययुक्त ज्ञानको प्राप्तहुआ, कि जिस भगवद्भक्तिसे तीव्रहुये ज्ञानने अनेक विषयोंके आश्रयभूत जीवकोश (देहात्मबुद्धि) की ग्रन्थिको काटदिया ॥११॥ देहही आत्माहै इसभ्रमके नष्टहोजानेपर वह निजस्वरूप

ह /ध्वजेऽच्छिन्नविद्यं वयुनेनयेन । तावन्नयोगगतिभिर्यतिरप्रमत्तो यावद्गदा ग्र०कथासुरतिंनकुर्यात् ॥ १२ ॥ एवंसवीरप्रवरःसं योज्यात्मानमात्मनि । ब्रह्मभूतोदृढंकाले तत्याजस्वंकलेवरम् ॥ १३ ॥ संपीड्यपायुंपार्ष्णिभ्यां वायुमुत्सारयन् शनैः । नाभ्यांकोष्ठेष्ववस्थाप्य हृदुरःकण्ठशीर्षणि ॥ १४ ॥ उत्सर्पयंस्तुतंमूर्ध्नि क्रमेणावेश्यनिःस्पृहः । वायुंवायौक्षितौकायं तेजस्तेजस्ययूयुजत् ॥ १५ ॥ खान्याकाशेद्रवंतोये यथास्थानंविभागशः । क्षितिमम्भसितत्तेज स्यदोवायौनभस्यमुम् ॥१६॥ इन्द्रियेषुमनस्तानि तन्मात्रेषुयथोद्भवम् । भूतादिनाऽमून्युत्कृष्य महत्यात्मनिसंदधे ॥ १७ ॥ तंसर्वगुणविन्यासं जीवेमायामयेन्यधात् । तंचानुशयमात्मस्थ मसावनुशयीपुमान् ॥ १८ ॥ ज्ञानवैराग्यवीर्येण स्वरूपस्थोऽजहात्प्रभुः । अर्चिर्नाममहाराज्ञी तत्पत्न्यनुगतावनम् । सुकुमार्यतदर्हाच यत्पद्भ्यांस्पर्शनंभुवः । ॥ १९ ॥ अतीवभर्तुर्व्रतधर्मनिष्ठया शुश्रूषयाचारषदेहयात्रया । नाविन्दतार्तिंपरिकर्शिताऽपिसाप्रेयस्करस्पर्शनमाननिर्वृतिः ॥ २० ॥ देहंविपन्नाखिलचेतनादिकं पत्युःपृथिव्यादयितस्यचात्मनः । आलक्ष्यकिंचिच्चविलप्यसासती चितामथारोपयदद्रिसानुनि ॥ २१ ॥ विधायकृत्यंह्रदिनीजलाप्लुता दत्त्वोदकंभर्तुरुदारकर्मणः। नत्वादिविस्थांस्त्रिदशांस्त्रिःपरीत्यविवेशवह्निंध्यायतीभर्तृपादौ ॥ २२॥ विलोक्यानुगतांसाध्वींपृथुंवीरवरंपतिम् । तुष्टुवुर्वरदादेवैर्देवपत्न्यःसहस्रशः ॥ २३ ॥कुर्वत्यः कुसुमासारंतस्मिन्मन्दरसानुनि । नदत्स्वमरतूर्येषुगृणन्तिस्मपरस्परम् ॥ २४ ॥

को प्राप्त हुआ फिर राजापृथुने उस ब्रह्मज्ञानके प्रयत्नकोभी त्यागदिया जबतक परमेश्वरके चरित्रों में प्रीति नहीं कीजाती तबतक योगी सिद्धिओं में भ्रमित होजाया करता है इसी हेतु पृथुराजा को भगवत्प्रीति होनेके कारण सिद्धियोंमें लोभ नहींहुआ ॥१२॥ इसभांति उसने अपने आत्माको परमेश्वरमें मिलाकर वह वीरोत्तमवीर पृथु साक्षात् ब्रह्मरूप होगया फिर कालान्तरमें उसने अपना शरीर छोड़दिया ॥ १३ ॥ एंडियों से गुदा दबाकर मूलाधारसे धीरे२ पवनको चढ़ा प्रथम नाभ में फिर हृदयमें फिर वक्षःस्थलमें फिर कंठमें फिर शिरमें चढ़ा ॥ १४ ॥ क्रमानुसार उस वायुको ब्रह्मरन्ध्रमें चढ़ाया, निष्काम राजापृथुने पवनको पवनमें शरीरके पार्थिवभाग को पृथ्वीमें तेजको तेजमें ॥ १५ ॥ छिद्रोंको आकाशमें, रसको जलमें इसीभांति पांचों तत्त्वोंको मिलादिया, । फिर पृथ्वीको जलमें जलको वायुमें वायुको आकाश में ॥१६॥ मनको इन्द्रियोंमें इन्द्रियोंको इन्द्रियों की मात्रामें आकाश और विषयोंको अहंकार में ,मिला अहंकार को महतत्त्व में मिलाया ॥ १७ ॥ उस सम्पूर्ण गुणों के स्थानरूप महतत्त्व को जीव के विषे लीन किया, फिर ज्ञान वैराग्यके बलसे परब्रह्म में स्थित हो माया को त्याग मोक्ष को प्राप्त हुआ ॥ १८ ॥ उसकी स्त्री अर्चि कि जो अत्यन्त सुकुमारी थी और जिसने पैरोंसे भी कभी पृथ्वी का स्पर्श नहीं कियाथा उसके साथ बनमें गईथी ॥१९॥ वहां वह अपनेपति पृथु के सदृश धर्म का आचरण करती हुई कंद,मूलफल खाती हुई पति की सेवा करती थी इस कारण वह बहुत जीर्ण होगईथी तौ भी अपने प्रियतम पति के करस्पर्श और प्यारके कारण दुःख, सुखका कुछ भी ध्यान नहीं करती थी ॥२०॥ उस सती अर्चीने अपनेपति पृथुराजाके देहको मरादेख कुछकरुणाकर पहाड़की चोटीपर चितालगाकर उसपर राजाके देहको रक्खा॥२१॥फिर आपभी नदीमें स्नान कर, पति को दाहांजलि दे, आकाश स्थित देवताओंको प्रणामकर, अग्नि की तीनपरिक्रमा दे, पतिके चरणोंका ध्यानकर अग्निमें प्रवेश किया ॥ २२ ॥ महावीर पृथुराजा के संग पतिव्रता आर्चिको सती हुई देख सहस्रों देवांगनायें देवताओं के संग उसकी बड़ाई करने लगीं ॥ २३ ॥ उस पर्वत की चोटी पर देवता फूल बर-

देव्य ऊचुः ॥ अहोइयंवधूर्धन्यायाचैवंभूभुजांपतिम् । सर्वात्मनापतिंभेजेयज्ञेशंश्रीर्वधूरिव ॥ २५ ॥ सैषानूनंव्रजत्यूर्ध्वमनुवैन्यंपतिंसती । पश्यतास्मानतीत्यार्चिर्दुर्विभाव्येनकर्मणा ॥ २६ ॥ तेषांदुरापंकिंत्वन्यन्मर्त्यानांभगवत्पदम् । भुविलोलायुषोयेवैनैष्कर्म्यंसाधयन्त्युत ॥ २७ ॥ सवञ्चितोवताऽऽत्मध्रुक्कृच्छ्रेणमहताभुविलब्ध्वापवर्ग्यंमानुष्यंविषयेषुविषज्जते ॥ २८॥ मैत्रेय उवाच ॥ स्तुवन्तीष्वमरस्त्रीषुपतिलोकंगतावधूः । यंवाआत्मविदांधुर्योवैन्यःप्रापाच्युताशयः ॥ २९ ॥ इत्थंभूतानुभावोऽसौपृथुःसभगवत्तमः । कीर्तितंतस्यचरितमुद्दामचरितस्यते ॥ ३० ॥ यइदंसुमहत्पुण्यंश्रद्धयाऽवहितःपठेत् । श्रावयेच्छृणुयाद्वाऽपिसपृथोःपदवीमियात् ३१ ब्राह्मणोब्रह्मवर्चस्वीराजन्योजगतीपतिः । वैश्यःपठन्विट्पतिःस्याच्छूद्रःसत्तमतामियात् ॥ ३२ ॥ त्रिःकृत्वइदमाकर्ण्यनरोनार्यथवाऽऽदृता । अप्रजःसुप्रजतमोनिर्धनोधनवत्तमः ॥ ३३ ॥ अस्पष्टकीर्तिःसुयशामूर्खोभवतिपण्डितः । इदंस्वस्त्ययनंपुंसाममङ्गल्यनिवारणम् ॥ ३४ ॥ धन्यंयशस्यमायुष्यंस्वर्ग्यंकलिमलापहम् ।धर्मार्थकाममोक्षाणांसम्यक्सिद्धिमभीप्सुभिः ॥ श्रद्धयैतदनुश्राव्यंचतुर्णांकारणंपरम् ३५ विजयाभिमुखोराजाश्रुत्वैतदभियातियान् । बलिंतस्मैहरन्त्यग्रेराजानःपृथवेयथा ॥ ३६ ॥ मुक्तान्यसङ्गोभगवत्यमलांभक्तिमुद्वहन् । वैन्यस्यचरितंपुण्यंशृणुयाच्छ्रावयेत्पठेत् ॥ ३७ ॥ वैचित्रवीर्याभिहितंमहन्माहात्म्यसूचकम् । अस्मिन्कृतमतिमर्त्यःपार्थिवींगतिमाप्नुयात् ॥ ३८ ॥ अनुदिनमिदमादरेणशृण्वन्पृथुचरितंप्रथयन्

साथ २ नगाड़े बजाते हुय उन्हीं की वार्ता करने लगे ॥ २४ ॥ देवांगनाओं ने कहा कि—यह आर्चि जगत् में बड़ी ही भाग्य शालिनी है क्योंकि लक्ष्मी जी जैसे विष्णुजी की सेवा करती हैं वैसेही इसने अपने पति राजापृथुकी सेवाकी ॥ २५ ॥ इस अर्चिको देखो कि अपने कर्मोंके प्रभाव से अपने पतिके पीछे ऊंचेलोकको जातीहै ॥ २६ ॥ जो मनुष्य पृथ्वीमें चंचल आयुको पाकर परब्रह्म पद प्राप्तहोनेके हेतु आत्मज्ञानकी सिद्धि करतेहैं उनको कोईभी पदार्थ दुर्लभ नहींहै ॥ २७ ॥ मोक्षदाता मनुष्य शरीरको पाकर जो मनुष्य विषयोंमें लिप्त होजातेहैं उनको ठगाहुआ आत्मद्रोही जानना चाहिये ॥ २८ ॥ मैत्रेयजीने कहा—कि देवताओंकी स्त्रियें इसभांति स्तुति कररहीथीं उससमय ब्रह्मज्ञानियोंमें मुख्यपरमेश्वरके परमभक्त राजापृथुने उसलोकमें गमनकियाथा उसीमें महारानी अर्चिभी प्राप्तहुई ॥ २९ ॥ अति पराक्रमी राजापृथु बड़ाही प्रभावशालीथा, उस उदारचित्त राजा पृथुका चरित्र मैंने तुमसे कहा ॥ ३० ॥ इस अति पवित्र चरित्र को जो मनुष्य एकाग्र चित्तहो सावधानीसे पढ़े वा सुनेगा तो वह पृथुके पदको प्राप्तहोगा ॥ ३१ ॥ इसके पढ़नेसे ब्राह्मण तो तेजस्वी क्षत्री, पृथ्वीपति, वैश्यधनाढ्य और शूद्र पवित्र होजावेगा ॥ ३२ ॥ जो स्त्री अथवा पुरुष इस चरित्र को सत्कार से पढ़े तो अपुत्र को श्रेष्ठ पुत्र अथवा निर्धनको धनमिले ॥ ३३ ॥ अप्रसिद्ध मनुष्य की संसारमें कीर्त्ति अधिक होवे, मूर्ख पंडितहोजाय यह मंगलमय चरित्र मनुष्योंका अति कल्याण कारीहै ॥ ३४ ॥ यह चरित्र धन, कीर्ति, आयु, स्वर्गका देनेवालाहै और कलियुगके पापोंको दूर करनेवालाहै जो मनुष्य धर्म, अर्थ, काम और मोक्षकी आकांक्षाकरे वह ॥ ३५ ॥ इस चरित्रका श्रद्धापूर्वक श्रवणकरे, यह चरित्र इन चारोंपदार्थों का मुख्य हेतुहै जो राजा युद्धमें जावे वह इस चरित्रको पढ़करजाय तो शत्रुलोग जिसभांति कि राजा पृथुको भेंटें मिलतीथीं उसीप्रकार भेंटदेवें ॥ ३६ ॥ इसलिये मनुष्यको चाहिये कि निःसंगहो परमेश्वरमें निष्काम भक्तिरख इसपवित्र पृथु चरित्र को सुने और सुनावे ॥ ३७ ॥ हे विचित्रवीर्यसुत ! भगवद्भक्त राजापृथुके इस चरित्रको जो मनुष्य सुनेगा वह पृथुकी गतिको प्राप्त होगा ॥ ३८ ॥ यह पृथुचरित्र जो मनुष्य निःसंगहो प्रतिदिन सुने

विमुक्तसङ्गः । भगवति भवसिंधुपोतपादे सचनिपुणां लभतेरतिं मनुष्यः ॥ ३९ ॥

इतिश्रीमद्भा०च०पृथुचरित्रसमाप्तिवर्णनंनामत्रयोविंशोऽध्यायः ॥ २३ ॥

मैत्रेय उवाच ॥ विजिताश्वोऽधिराजाऽऽसीत्पृथुपुत्रः पृथुश्रवाः यवीयोभ्योऽददा त्काष्ठाभ्रातृभ्योभ्रातृवत्सलः ॥ १ ॥ हर्यक्षायादिशत्प्राचींधूम्रकेशायदक्षिणाम् । प्रतीचींवृकसंज्ञायतुर्यांद्रविणसेविभुः ॥ २ ॥ अन्तर्धानगतिशक्राल्लब्ध्वाऽन्तर्धान संज्ञितः । अपत्यत्रयमाधत्तशिखण्डिन्यांसुसंमतम् ॥ ३ ॥ पावकःपवमानश्चशुचि रित्यग्नयःपुरा । वसिष्ठशापादुत्पन्नाःपुनर्योगगतिंगताः ॥ ४ ॥ अन्तर्धानोनभस्वत्यां हविर्धानमविन्दत । यइन्द्रमश्वहर्तारंविद्वानपिनजघ्निवान् ॥ ५ ॥ राज्ञांवृत्तिंकरा दानदण्डशुल्कादिदारुणाम् । मन्यमानोदीर्घसत्रव्याजेनविससर्जह ॥ ६ ॥ तत्रापि हंसंपुरुषंपरमात्मानमात्मदृक् । यजंस्तल्लोकतामापकुशलेनसमाधिना ॥ ७ ॥ हवि र्धानाद्धविर्धानीविदुरासूतषट्सुतान् । बर्हिषदंगयंशुक्लंकृष्णंसत्यंजितव्रतम् ॥ ८ ॥ बर्हिषत्सुमहाभागोहाविर्धानिःप्रजापतिः । क्रियाकाण्डेषुनिष्णातोयोगेषुचकुरू द्वह ॥ ९ ॥ यस्येदंदेवयजनमनुयज्ञंवितन्वतः प्राचीनाग्रैःकुशैरासीदास्तृतंवसुधा तलम् ॥ १० ॥ सामुद्रींदेवदेवोक्तामुपयेमेशतद्रुतिम् । यांवीक्ष्यचारुसर्वांगींकिशोरीं सुष्ठ्वलंकृताम् ॥ परिक्रमन्तीमुद्वाहेचकमेऽग्निःशुकीमिव ॥ ११ ॥ विबुधासुर गंधर्वमुनिसिद्धनरोरगाः । विजिताःसूर्ययादिक्षुक्वणयन्त्यैवनूपुरैः ॥ १२ ॥ प्राचीन

सुनावेगा तो वह उन भगवानकी भक्तिको कि जिनके चरण संसाररूपी समुद्रसे तरनेको नौकारूप हैं प्राप्त होकर मोक्षको प्राप्तहोगा ॥ ३९ ॥

इतिश्रीमद्भा०महापुराणे चतुर्थेऽस्कन्धेसरलाभा०टी०त्रियोविंशोऽध्यायः ॥ २३ ॥

मैत्रेयजी बोले—कि हे महाराज! पृथुके उपरांत उसका पुत्र बिजिताश्व चक्रवर्ती राजा हुआ उसनें स्नेह पूर्वक अपने छोटे भाइयों को चारोंओरका राज्य बांट दिया ॥ १ ॥ उसनें हर्यक्षको पूर्व धूम्रकेश को दक्षिण, वृक को पश्चिम, और द्रविणस को उत्तर की ओरका राज्य दिया ॥ २ ॥ यह विजिताश्व राजा पृथुके अश्वमेध यज्ञ में इन्द्रसे उसके हरे हुए घोड़े को लाया था तब इन्द्रनें इसे अंतर्धान होनेंकी विद्या दीथी तबसे इसका नाम अंतर्ध्यानी हुआ इस की शिखंडिनी रानी से पावक, पवमान तथा सुचि यह तीन श्रेष्ठ पुत्र उत्पन्नहुए ॥ ३ ॥ यह तीनों पहिले अग्नि थे वशिष्ठ के शाप के कारण विजिताश्व के घर उत्पन्न हुए थे फिर योग गति से अग्नी पदवी को प्राप्त हुए ॥ ४ ॥ अंतर्धान विद्या जाननेंवाले महाराजा विजिताश्व नें नभस्वती रानी में हविर्धान नामक पुत्र उत्पन्न किया वह ऐसा प्रतापशाली था कि अश्व चुरानें वाले इन्द्र को जानभी लिया तौभी न मारा ॥ ५ ॥ उस विजिताश्व राजानें कर, दंड इत्यादिकोंको प्राणियों को दुःखदेनें वाला जान बहुतकालतक यज्ञ करनें के मिष से वनमें वास किया ॥ ६ ॥ वहांभी आत्मज्ञानी विजिताश्व दुःखहारी भगवानकी एकाग्र चित्तसे आराधना करताथा वह ब्रह्मज्ञानी अंतमें भगवत् लोक को प्राप्त हुआ ॥ ७ ॥ हे बिदुर! हविर्धान की हविर्धानी स्त्री से छः पुत्र बर्हिषद, गय, शुक्ल, कृष्ण, सत्य, और जितव्रत हुए ॥ ८ ॥ हे कौरव कुल दीपक! राजा बर्हिषद बड़ाही प्रभावशाली हुआ और योग तथा कर्मकांड का बड़ाभारी ज्ञाताथा ॥ ९ ॥ इस राजानें सम्पूर्ण ही पृथ्वी पर यज्ञ किया पूर्व दिशा की सम्पूर्ण भूमि कुशाओं से छादी इसीसे इसका नाम प्राचीनबर्हि हुआ ॥ १० ॥ इस राजानें ब्रह्माजी की आज्ञानुसार समुद्रकी पुत्री शतद्रुति से विवाह किया वह कन्या अति सुंदर नावयौवना किशोर अवस्था, सुंदर आभूषणों युक्त विवाहमें अग्निकी परिक्रमा करते समय राजा प्राचीनबर्हि उसके ऊपर ऐसे आसक्त हुए कि जैसे अग्नि शुकी पर आसक्त हुएथे ॥ ११ ॥ इस नवोढा शतद्रुति नें अपनें

बर्हिषःपुत्राःशतद्रुत्यांदशाभवन् । तुल्यनामव्रताःसर्वेधर्मस्नाताःप्रचेतसः ॥ १३ ॥ पित्रादिष्टाःप्रजासर्गेतपसेऽर्णवमाविशन् । दशवर्षसहस्राणितपसाऽर्चंस्तपस्पतिम् ॥ १४ ॥ यदुक्तंपथिदृष्टेनगिरिशेनप्रसीदता । तद्ध्यायन्तोजपन्तश्चपूजयन्तश्चसंयताः ॥ १५ ॥ विदुर उवाच ॥ प्रचेतसांगिरित्रेणयथासीत्पथिसंगमः । यदुताहहरःप्रीतस्तन्नोब्रह्मन्वदार्थवत् ॥ १६ ॥ संगमःखलुविप्रर्षेशिवेनेहशरीरिणाम् । दुर्लभोमुनयोदध्युरसङ्गाद्यमभीप्सितम् ॥ १७ ॥ आत्मारामोऽपियस्त्वस्यलोककल्पस्यराधसे । शक्त्यायुक्तोविचरतिघोरयाभगवान्भवः ॥ १८ ॥ मैत्रेय उवाच ॥ प्रचेतस पितुर्वाक्यंशिरसाऽऽदायसाधवः । दिशंप्रतीचींप्रययुस्तपस्यादृतचेतसः ॥१९॥ ससमुद्रमुपविस्तीर्णमपश्यन्सुमहत्सरः । महन्मनइवस्वच्छंप्रसन्नसलिलाशयम् २० नीलरक्तोत्पलाम्भोजकल्हारेन्दीवराकरम् । हंससारसचक्राह्वकारण्डवनिकूजितम् ॥ २१ ॥ मत्तभ्रमरसौस्वर्यहृष्टरोमलतांघ्रिपम् । पद्मकोशरजोदिक्षुविक्षिपत्पवनोत्सवम् ॥ २२ ॥ तत्रगांधर्वमाकर्ण्यदिव्यमार्गमनोहरम् । विसिस्म्यूराजपुत्रास्ते मृदङ्गपणवाद्यनु ॥ २३ ॥ तर्ह्येवसरसस्तस्मान्निष्क्रामन्तंसहानुगम् । उपगीयमानममरप्रवरंविबुधानुगैः ॥ २४ ॥ तप्तहेमनिकायाभंशितिकण्ठंत्रिलोचनम् । प्रसादसुमुखंवीक्ष्यप्रणेमुर्जातकौतुकाः ॥ २५ ॥ सतान्प्रपन्नार्तिहरोभगवान्धर्मवत्सलः । धर्मज्ञाञ्छीलसंपन्नान्प्रीतःप्रीतानुवाचह ॥ २६ ॥ श्रीरुद्रउवाच ॥ यूयंवेदिषदःपुत्रा

नूपुरों की झनकार से सुर, असुर, गन्धर्व, मुनि, सिद्ध, मनुष्य तथा नाग लोकों के भी मनको जीत लिया ॥ १२ ॥ प्राचीनबर्हि की शतद्रुति रानी से दश पुत्र हुए जो प्रचेता, नाम से विख्यात थे यह सब समानही व्रत के धारण करने वाले धर्म निष्ठ और एकसेही थे ॥ १३ ॥ प्राचीनबर्हि राजा ने इनको प्रजा उत्पन्न करने की आज्ञा दी तो इन्हों ने समुद्र के जल में रहकर १०००० सहस्र वर्ष पर्यंत वहां तप किया ॥१४॥ तप के हेतु जातेसमय महादेवजी नें मार्ग में मिलकर स्नेह पूर्वक जिस मन्त्र-का उपदेश किया उसी के अनुसार उन्हों ने जितेन्द्रिय होकर भगवान का पूजन और आराधन किया ॥ १५ ॥ विदुरजी बोले कि हे ब्रह्मन् ! प्रचेता और शिवजी के प्रसंग का उपदेश अवश्य सार-गर्भितहोगा, इस सेनु वह उपदेश मुझसे कहिये॥१६॥हे विप्रर्षे! जिन महादेवजीका मुनिलोग केवल ध्यान मात्रही करते हैं साक्षात् उनका दर्शन नहीं पासकते फिर अन्य प्राणियों को तो उनका समागम होना अत्यन्त ही दुर्लभ है ॥१७॥ भगवान शिवजी स्वयंही आत्माराम हैं तौभी इस सृष्टि की रक्षा के लिये बिकराल अपनी शक्ति को संग लिये भ्रमण कियाकरते हैं ॥ १८ ॥ मैत्रेयजी बोले कि वे प्रचेता पिता की आज्ञा को मस्तकपर धारणकर तप करने के हेतु पश्चिम दिशा की ओर गये ॥१९॥ मार्गमें जातेहुए उन्होंने समुद्रकीसमान एकबड़ाभारी सरोवर देखा किजो महात्माओंके मनकी सदृश निर्मलजलसे भराथा, और मछली इत्यादिक जीवजन्तु जिसमें प्रसन्नतापूर्वक रहतेथे ॥२०॥ वहां नीलकमल लालकमल,अंभोज तथा कल्हारजातिके कमल अत्यन्त अधिकतासेथे और हंस,सारस, चकवा, और कारण्डवआदिक पक्षी क्रीड़ा कररहेथे॥२१॥मतवाले भौरोंके सुन्दर शब्दसे लताओं और वृक्षोंके केभी रोम खडे होतेथे चारोंओर कमलके किंजल्ककी उडती हुई वायुसे आनन्द आ-रहाथा ॥ २२ ॥ उस सरोवरमें मृदंग, ढोल आदिक बाजे बजनेथे तथा अद्भुत गान होताथा कि जिसे सुनकर राजपुत्रों को बड़ा आश्चर्य हुआ ॥ २३ ॥ उसीकालमें श्री शिवजी अपने पार्षदों समेत उस सरोवरसे बाहरनिकले और उन प्रचेताओंको श्री शिवजीके दर्शनहुये इन श्रेष्ठदेव शिवजीके समीप गन्धर्व गानकरते थे ॥ २४ ॥ स्वच्छ सुवर्ण के समान कांतिवाले, नीलकण्ठ त्रिनेत्र शिवजीको सामने खड़ेदेख कौतूहल पूर्वक उन प्रचेताओनेउनको दण्डवत्की ॥ २५ ॥

विदितंवश्चिकीर्षितम् । अनुग्रहायभद्रंवएवंमेदर्शनंकृतम् ॥ २७ ॥ यःपरंरंहसः साक्षात्त्रिगुणाज्जीवसंज्ञितात् । भगवन्तंवासुदेवंप्रपन्नःसप्रियोहिमे ॥ २८ ॥ स्वधर्मनिष्ठःशतजन्मभिःपुमान्विरिञ्चतामेतिततःपरंहिमाम् । अव्याकृतंभागवतोऽथ वैष्णवंपदंयथाहंविबुधाःकलात्यये ॥ २९ ॥ अथभागवतायूयंप्रियास्थभगवान्यथा। नमेभागवतानांचप्रेयानन्योऽस्तिकर्हिचित् ॥ ३० ॥ इदंविविक्तंजप्तव्यंपवित्रंमङ्गलं परम् । निःश्रेयसकरंचापिश्रूयतांतद्वदामिवः ॥ ३१ ॥ मैत्रेय उवाच ॥ इत्यनुक्रोशहृदयोभगवानाहताञ्छिवः । बद्धाञ्जलीन्राजपुत्रान्नारायणपरोवचः ॥ ३२ ॥ श्रीरुद्र उवाच ॥ जितंतआत्मविद्धुर्यस्वस्तयेस्वस्तिरस्तु मे । भवताराधसाराद्धं सर्वस्माआत्मनेनमः ॥ ३३ ॥ नमःपंकजनाभाय भूतसूक्ष्मेन्द्रियात्मने । वासुदेवायशान्ताय कूटस्थायस्वरोचिषे ॥ ३४ ॥ संकर्षणायसूक्ष्माय दुरन्तायान्तकायच । नमोविश्वप्रबोधाय प्रद्युम्नायान्तरात्मने ॥ ३५ ॥ नमोनमोऽनिरुद्धाय हृषीकेशेन्द्रियात्मने । नमः परमहंसाय पूर्णायनिभृतात्मने ॥ ३६ ॥ स्वर्गापवर्गद्वाराय नित्यंशुचिषदेनमः । नमोहिरण्यवीर्याय चातुर्होत्रायतन्तवे ॥३७॥ नमऊर्जइषेत्रय्याः पतयेयज्ञरेतसे । तृप्तिदायचजीवानां नमःसर्वरसात्मने ॥ ३८ ॥ सर्वसत्त्वात्मदेहाय विशेषायस्थवीयसे । नमस्त्रैलोक्यपालय सहओजोवलायच ॥ ३९ ॥ अर्थलिङ्गायनभसे नमोन्तर्बहिरात्मने । नमःपुण्यायलोकाय अमुष्मैभूरि-

धर्मवत्सल भगवान शिवजी धर्मज्ञाता प्रचेतासे प्रीतिपूर्वक प्रसन्न होकर बोले ॥२६॥ श्रीशिवजी बोले कि-तुम राजा प्राचीनवर्हिके पुत्रहो मैं तुम्हारे मनोरथको जानताहूं, तुम्हारा कल्याणहो तुम्हारे ऊपर अनुग्रह करनेके लियेही मैंने तुमको दर्शन दियाहै ॥ २७ ॥ क्योंकि जिसने त्रिगुण प्रकृति और पुरुषसेभी परे भगवान वासुदेव को ग्रहणकियाहै वह मुझको बड़ाप्याराहै ॥ २८ ॥ मनुष्यको १०० जन्मतक यदि स्वधर्ममें चेष्टारहै तो ब्रह्म पदवीको और उससे अधिक पुण्यहोवे तो मुझको प्राप्तहोताहै, परन्तु परमेश्वर विष्णु भगवानका भक्त तो मरनेके पश्चात्ही विष्णुपदको कि जिस पदको मैं तथा दूसर देवताभी वासनाके नाशहोनेपर प्राप्त होतेहैं प्राप्तहोताहै ॥ २९ ॥ तुम सब भगवद्भक्तहो इसलिये मुझको प्यारेहो भगवानके भक्तोंसे परे और कोई दूसरा मुझको प्यारानहीं है ॥ ३० ॥ इस निमित्त एकांतमे जपनेयोग्य अति पवित्र मंगलीक कल्याण कारक तथा मोक्षदाता स्तोत्र मै तुमसे कहताहूं उसे सुनो॥३१॥ मैत्रेयजीने कहा कि—इसप्रकार परमदयालु भगवद्भजन मे परायण, भगवान शिवजी हाथजोड़े सामनेखड़ेदेख उन राजकुमारोंको उपदेश करनेलगे ३२॥ श्रीरुद्रजी बोले-कि हे परमेश्वर आपकी कीर्त्ति बड़े २ आत्मवेत्ताओं को स्वरूपानन्ददायिनीहै वह आनन्द मुझेभी मिले, हेसर्वात्मा भगवान मैं आपको प्रणाम करताहूं ॥ ३३ ॥ पंचमहाभूत, इन्द्रियों के प्रेरक, शांत, निर्विकार स्वयंजोति भगवान वासुदेवको मेरा प्रणाम है ॥ ३४ ॥ संकर्षण, सूक्ष्म, दुरंत, अंतक, विश्वप्रबोधक, प्रद्युम्न, अंतरात्मा रूप आपको मेरा प्रणाम है ॥ ३५ ॥ हे अनिरुद्ध रूप आपको मे बारं बार प्रणाम करता हूं, सूर्य रूपसे सारी सृष्टिको प्रकाशित करने वाले, इन्द्रियोंके ईश तथा आत्मा रूप, परमहंस रूप, पूर्ण, विश्वरूपव्यापी, आपको मै प्रणामकरताहूं ॥ ३६ ॥ आप स्वर्ग अपवर्गके मोक्षद्वाररूप, नित्यही शुचि पवित्ररूप, हिरणवीर्य्यरूप, अग्निरूप आपको नमस्कारहै ॥३७॥ पितृ और देवताओंके अन्नदाता, वेदत्रयीके स्वामी और यज्ञ रूप वीर्य्य वाले चन्द्ररूप प्राणियोंके तृप्तरूप सम्पूर्ण रस मयजलरूप आपको मै नमस्कर करताहूं ॥३८॥ सम्पूर्ण जीवोंके देहरूप विशेष करके विराट्रूप, त्रिलोकीके पालनरूप ओजबल पवनरूप

वर्चसे ॥ ४० ॥ प्रवृत्तायनिवृत्ताय पितृदेवायकर्मणे । नमोधर्मविपाकाय मृत्यवे दुःखदायच ॥ ४१ ॥ नमस्तआशिषामीश मनवेकारणात्मने । नमोधर्मायबृहते कृष्णायाकुण्ठमेधसे ॥ पुरुषायपुराणाय सांख्ययोगेश्वरायच ॥ ४२ ॥ शक्तित्रय समेताय मीढुषेऽहंकृतात्मने । चेतआकूतिरूपाय नमोवाचोविभूतये ॥ ४३ ॥ द-र्शनंनोदिदृक्षूणां देहिभागवतार्चितम् । रूपंप्रियतमंस्वानां सर्वेन्द्रियगुणांजनम् ४४ स्निग्धप्रावृड्घनश्यामं सर्वसौन्दर्यसंग्रहम् । चार्वायतचतुर्बाहुसुजातरुचिराननम् ॥ ४५ ॥ पद्मकोशपलाशाक्षं सुन्दरभ्रुसुनासिकम् । सुद्विजंसुकपोलास्यं समकर्ण विभूषणम् ॥ ४६ ॥ प्रीतिप्रहसितापाङ्गमलकैरुपशोभितम् । लसत्पंकजकिंजल्कदु कूलं मृष्टकुण्डलम् ॥४७॥ स्फुरत्किरीटवलयहारनूपुरमेखलम् । शंखचक्रगदापद्म-मालामण्युत्तमर्द्धिमत् ॥ ४८ ॥ सिंहस्कंधत्विषो बिभ्रत्सौभगग्रीवकौस्तुभम् । श्रि-याऽनपायिन्याक्षिप्तनिकषाश्मोरसोल्लसत् ॥ ४९ ॥ पूररेचकसंविग्नवलिवल्गुद-लोदरम् । प्रतिसंक्रामयद्विश्वं नाभ्याऽऽवर्तगभीरया ॥ ५० ॥ श्यामश्रोण्यधिरो चिष्णुदुकूलस्वर्णमेखलम् । समचार्वंघ्रिजंघोरु निम्नजानुसुदर्शनम् ॥ ५१ ॥ पद्भ्यां शरत्पद्मपलाशरोचिषा नखद्युभिर्नोऽन्तरघंविधुन्वता । प्रदर्शयस्वीयमपास्तसा-ध्वसंपदं गुरोमार्गगुरुस्तमोजुषाम् ॥ ५२ ॥ एतद्रूपमनुध्येयमात्मशुद्धिमभीप्सतां

आपको मेरा प्रणाम है ॥ ३९ ॥ लिंग आकाश रूप, भीतर बाहर आत्मा रूप, पथ्य रूप, दोनो लोकोमे बड़ी कांति वाले स्वर्ग रूप आपको मेरा नमस्कारहै॥४०॥प्रवृत्ति और निवृत्ति मार्ग रूप पितृ और देवताओंके साक्षी रूप, मृत्यु रूपसे अधर्मका फल रूप दुःख देनवाले आपको मेरा नमस्कार है ॥ ४१ ॥ हे ईश ! सब कामोके फल देनवाले सब जाननेंवाले, आत्मा रूप, धर्म रूप, विराट्स्वरूप, अकुंठित बुद्धि वाले पुराण पुरुष, सांख्य तथा योगके ईश्वर कृष्ण रूप आपको नमस्कारहै ॥ ४२ ॥ तीनों शक्तियोंके धारण करनेवाले, अहंकारमय, शिव रूप आपको नमस्कार है ज्ञान, क्रिया रूप, नाना भांतिकी वाणी रचनेंवाले ब्रह्मा मूर्ति आपको नमस्कार है ॥ ४३ ॥ भक्तों को प्यारे, सम्पूर्ण इन्द्रिय गुणोंके अंजन रूप, वैष्णव लोगोंसे पूजे और अपने रूप का हमें दर्शन दो ॥ ४४ ॥ वर्षाकालके मेघकी सदृश श्याम वर्ण आपका अंग है कि जिसमें सम्पूर्ण सुंदरताओं का संग्रह है सुंदर लम्बायमान चारभुजा धारण किये सुंदरमुख से शोभित॥४५॥जिसके कमल की पखुरीसे सुन्दरनेत्र, सुंदर भ्रुकुटी, सुंदर नासिका सुंदरदांत, सुंदरकपोल जो कानके आभूषणों से सोभितहैं॥४६॥प्रेमसे कटाक्ष कि मानों प्रीति करके हंसते हैं अलकैं शोभायमान, कमलके किंजल्क की समान पीतवस्त्र पहिनें सुंदरकुण्डल धारणकिये ॥४७॥ देदीप्यमान मुकुट, हार, बाजू, नूपुर, क्षुद्र घंटिका जिनके शोभायमानहै और शंख, चक्र, गदा, पद्म, इनको धारणकिये हैं और बहुमूल्य मणियों की उत्तममाला पहिने हुए है॥४८॥जिनके सिंहकेसे कंधा, सुंदरकेश, सुंदरकंठ जिसमें कौस्तुभमणि प्रकाशमान है और अनपायिनी लक्ष्मीजी वक्षःस्थलमें इसप्रकार शोभायमानहैं कि जैसे कसौटीमें सोनेकी रेखा शोभायमान होती है ॥४९॥पीपल पल्लवका सदृश पेट, पूरक और रेचकसे चलायमान त्रिवलीसे शोभित, जलके भ्रमरकी सदृश गंभीर नाभि मानो उसीमेंसे निकलेहुये विश्वको प्रवेश करानेके हेतु रक्खीहो ऐसा ज्ञान होता है ॥५०॥ श्यामसुन्दर कटिपर पीताम्बर प्रकाशमान उसके ऊपर सुवर्णकी क्षुद्रघंटिका धारणकिये सुन्दर जंघा पिंडली और पूजने योग्य जिनके चरणकमल हैं ॥ ५१ ॥ जिनके चरण शरदऋतुके कमलकाभी तिरस्कार करनेवालेहै तथा जिनके नखों की कांति हृदयके अन्धकारको दूरकरतीहै हेगुरो!प्रभु! शरणागत भक्तोंको अभयकरनवाले अपनें चरण कमलों का दर्शनदो—अज्ञानी लोगोंको मार्गके दिखानेवाले गुरू आपहीहो ॥ ५२ ॥ आत्माकी

यद्भक्तियोगोऽभयदः स्वधर्ममनुतिष्ठताम् ॥ ५३ ॥ भवान्भक्तिमतालभ्यो दुर्लभः सर्वदेहिनाम्। स्वाराज्यस्याप्यभिमत एकान्तेनात्मविद्गतिः ॥ ५४ ॥ त्वं दुराराध्यमाराध्य सतामपिदुरापया। एकांतभक्त्याकोवांछेत्पादमूलंविनाबहिः ॥ ५५ ॥ यत्रनिर्विष्टमरणं कृतान्तोनाभिमन्यते। विश्वंविध्वंसयन्वीर्यशौर्यविस्फूर्जितभ्रुवा ॥ ५६॥ क्षणार्धेनापितुलये नस्वर्गंनापुनर्भवम्। भगवत्सङ्गिसङ्गस्य मर्त्यानांकिमुताशिषः ॥ ५७ ॥ अथानघांघ्रेस्तवकीर्तितीर्थयोरन्तर्बहिः स्नानविधूतपाप्मनाम्। भूतेष्वनुक्रोशसुसत्वशीलिनां स्यात्संगमोऽनुग्रहएषनस्तव ॥ ५८ ॥ नयस्यचित्तं बहिरर्थविभ्रमं तमोगुहायांचविशुद्धमाविशत्। यद्भक्तियोगानुगृहीतमंजसा मुनिर्विचष्टेननुतत्रतेगतिम् ॥ ५९ ॥ यत्रेदंव्यज्यतेविश्वं विश्वस्मिन्नवभातियत्। तत्त्वं ब्रह्मपरंज्योतिराकाशमिवविस्तृतम् ॥ ६० ॥ योमाययेदंपुरुरूपयाऽसृजद्बिभर्तिभूयः क्षपयत्यविक्रियः। यद्भेदबुद्धिःसदिवात्मदुस्थया तमात्मतन्त्रंभगवन्प्रतीमहि॥६१॥ क्रियाकलापैरिदमेवयोगिनः श्रद्धान्विताः साधुयजन्तिसिद्धये। भूतेन्द्रियान्तःकरणोपलक्षितं वेदेचतन्त्रेचतएवकोविदाः ॥ ६२ ॥ त्वमेकआद्यःपुरुषःसुप्तशक्तिस्तया रजःसत्त्वतमोविभिद्यते। महानहंखंमरुदग्निवार्धराः सुरर्षयोभूतगणाइदंयतः ६३ सृष्टंस्वशक्त्येदमनुप्रविष्टश्चतुर्विधं पुरमात्मांशकेन। अथोविदुस्तंपुरुषं सन्तमन्त

शुद्धि चाहनेवालोंके लिये यह ध्यानकरना योग्य है जो स्वधर्ममें स्थितहोकर इस ध्यानसे भक्ति योगका साधन करते हैं वह अभय होजातेहै ॥५३॥ आप भक्तोंका तो लभ्यहो परन्तु और समस्त देहधारियों को दुर्लभ हो आप स्वर्ग फल के देने वाले हो और एकांत में रहनेवाले भक्तों को आत्म गति आपही देते हो॥५५॥ जिसका मिलना महात्माओं कोभी दुःसाध्य है ऐसी एकांत की भक्ति से दुराराध्य आपका भजनकरके आपके चरणमूलको त्यागकर कौनसा मनुष्य स्वर्गादि सुखकी इच्छा करेगा॥५५॥जो काल अपने तेज और बलवीर्य के प्रभावसे अपनी भ्रुकुटिचढ़ानेहीसे सम्पूर्ण विश्वका नाश करसक्ताहै वह काल आपके भक्तोंके ऊपर दृष्टि उठाकरभी नहीं देखसकता, दण्ड देना तो बहुत कठिनहै ॥ ५ ॥ भक्तोंके आधे क्षणकी सतसंगति के सदृशमें स्वर्ग और मोक्षको भी नहीं मानता फिर मनुष्यों के यह राज्यादिक सुख तो अत्यंतही तुच्छहैं इनको कैसे मानूं ॥५७॥ आपके चरणकमल पापोंके नाश करनेवाले हैं उनके सेवनसे और गंगाजीके स्नानसे जिनके भीतर बाहरके सब पाप नष्ट होगये हैं, देहधारियों पर कृपा रखनेवाले सुन्दर शील स्वभाववाले आपके भक्तों का सदैव सत्संग हुआकरे यही आपका अनुग्रह चाहताहूं ॥ ५८ ॥ ऐसे भक्तोंकी सेवासे चित्तका भ्रम तथा तमोगुणमें प्रवेश न करनेसे मन शुद्ध होजाताहै तब चित्तमें भक्तिरूपी योग होनेसे आपकी तत्त्वगति दीख पड़ती है ॥५९॥ जिसके विषे यह विश्व प्रकाशितहै और विश्वके विषे आप प्रकाशमानमानहैं सो आकाशकी सदृश, स्वप्रकाशित परब्रह्म आपहीहो॥ ६० ॥ इसप्रकार भगवान जो बहुरूपसे अपनी माया द्वारा सृष्टिको सृजते और पालन करते हैं और निर्विकार होकर इसका नाश करते हैं तथा उसी मायासे भेद बुद्धिभी हुआ करताहै और आपकेविषे कुछभी अपना काम नहीं करसकती, ऐसे उन मायावाले आपको हम अखण्ड परब्रह्म जानतेहैं ॥ ६१ ॥ जो वेद, शास्त्र ज्ञाता आपके भूत, इन्द्रियों और अन्तःकरणसे जाननेमें आते साकाररूप का श्रद्धायुक्त नानाभांति की क्रियाओंसे अपनी सिद्धिके हेतु भलीभांति पूजन करताहै वही योगीराजहै और वही पंडितहै॥ ॥ ६२ ॥ आप आदि पुरुषहो, स्वयंशक्तिसे जब आपरजोगुण, तमोगुण और सत्वगुण रूपसे विभक्त करतेहो कि—जिससे महत्तत्त्व, अहंकार, आकाश, पवन, अग्नि, जल, पृथ्वी, सम्पूर्ण देवता, ऋषी, और भूतगण उत्पन्न होतेहैं ॥ ६३ ॥ तथा विश्वमें चारप्रकारके जीव जरायुज, अंडज,

मुंस्केदजोद्भिज्जैर्मधुसारघंयः ॥ ६४ ॥ सपथलोकानतिचण्डवेगो विकर्षसित्वंखलुका-
लयानः । भूतानिभूतैरनुमेयतत्त्वो घनावलीर्वायुरिवाऽविषह्यः ॥६५॥ प्रमत्तमुच्चै
रितिकृत्यचिन्तया प्रवृद्धलोभंविषयेषुलालसम् । त्वमप्रमत्तःसहसाभिपद्यसे क्षु-
ल्लेलिहानोऽहिरिवाखुमन्तकः ॥६६॥ कस्त्वत्पादाब्जंविजहातिपण्डितो यस्तेऽवमा
नव्ययमानकेतनः । विशङ्कयाऽस्मद्गुरुरर्चतिस्मयद्विनोपपत्तिंमनवश्चतुर्दश ॥६७
अथत्वमसिनोब्रह्मन्परमात्मन्विपश्चिताम् विश्वंरुद्रभयध्वस्तमकुतश्चिद्भयागतिः६८
इदंजपतभद्रंवो विशुद्धानृपनन्दनाः । स्वधर्ममनुतिष्ठन्तो भगवत्यर्पिताशयाः॥६९॥
तमेवात्मानमात्मस्थं सर्वभूतेष्ववस्थितम् । पूजयध्वंगृणन्तश्च ध्यायन्तश्चासकृद्ध-
रिम् ॥ ७० ॥ योगादेशमुपासाद्य धारयन्तोमुनिव्रताः । समाहितधियःसर्वे एतद-
भ्यसतादृताः ॥७१॥ इदमाहपुराऽस्माकं भगवान्विश्वसृक्पतिः । भृग्वादीनात्मजा
नांसिसृक्षुःसंसिसृक्षताम् ॥ ७२ ॥ तेवयंनोदिताःसर्वे प्रजासर्गेप्रजेश्वराः । अनेन
ध्वस्ततमसः सिसृक्ष्मोविविधाःप्रजाः॥७३॥अथेदंनित्यदायुक्तो जपन्नवहितःपुमा
न । अचिराच्छ्रेयआप्नोति वासुदेवपरायणः ॥ ७४ ॥ श्रेयसामिहसर्वेषां ज्ञानंनिः
श्रेयसंपरम् । सुखंतरतिदुष्पारं ज्ञाननौर्व्यसनार्णवम् ॥ ७५ ॥ यइमंश्रद्धयायुक्तो
मद्गीतंभगवत्स्तवम् । अधीयानोदुराराध्यं हरिमाराधयत्यसौ ॥ ७६ ॥ विन्दते
पुरुषोऽमुष्माद्यद्यदिच्छत्यसत्वरम् । मद्गीतगीतात्सुप्रीताच्छ्रेयसामेकवल्लभात्
॥ ७७ ॥ इदंयःकल्यउत्थायप्राञ्जलिःश्रद्धयाऽन्वितः । शृणुयाच्छ्रावयेन्मर्त्योमुच्यते

स्वेदज और उद्भिजको उत्पन्न करके उसमें जीवरूपसे प्रवेश करतेहैं ॥ ६४ ॥ तथा वही आप अत्यन्त तीव्र वेगवाले कालरूपसे सम्पूर्ण देहधारियों का ऐसे नाश करतेहो कि जैसे पवन बादलों को नष्ट कर देताहै,यह सर्वनाशी काल किसीकी दृष्टिमें नहीं आता॥६५॥ नानाचिंताओंसे असाव-धान तथा बढ़ेहुए लोभसे अप्रमत्त प्राणियोंको आप कालरूप होकर शीघ्रही ऐसे ग्रसतेहो कि जैसे भूखा सर्प मूसे को ग्रसताहै ॥ ६६ ॥ आपकी बिना भक्तिके जिनका शरीर दुर्बल होताजाय ऐसा कौन विवेकी मनुष्यहै कि जो आपके चरणकमलोंको त्यागेगा कि जिनका हमारे गुरू ब्रह्माजी तथा १४ मनुओंने कालके भयसे दृढ विश्वास करके भजन कियाहै ॥ ६७ ॥ हेब्रह्मन् ! हेपरमात्मन् ! यह सारी सृष्टि रुद्रके डरसे त्रसितहै उन त्रसितहुये देहधारियोंको आपही निर्भय शरणरूपहो॥६८ हेनृपनन्दनो ! शुद्ध बुद्धि होकर इस रुद्रगीतका पाठकरो तथा धर्मका अनुष्ठान करतेहुये परमेश्वर में मन लगाओ इसीसे तुम्हारा कल्याण होगा ॥ ६९ ॥ अपने रूपसे समस्त प्राणियोंमें स्थित भगवान विष्णुकी स्तुति, आराधना करो और उन्हींका पूजनकरो ॥ ७० ॥ मेरे योगकी आज्ञाको प्राप्तहो मौनव्रत धारणकर सावधान बुद्धिसे इसका अभ्यास करो॥७१॥भृगु आदिक ब्रह्माके पुत्र जब सृष्टि रचना चाहतेथे तब भगवान ब्रह्माजीने सृष्टि बढ़ानेके हेतु उनको यह मन्त्र बतायाथा ॥७२॥ ब्रह्माजीने जब हम सब प्रजापतियोंको सृष्टि रचनेकी आज्ञाकी तब हम सब इस मन्त्रके जपसे निष्कपट हो नानाभांतिकी रचना करनेलगे॥७३॥जोमनुष्य भगवानकी शरण लेकर एकाग्रमनसे सावधानहो प्रतिदिन इसमंत्रका जपकरेगा वह तत्कालही वासुदेव परायण होजायगा॥७४॥ इस सृष्टिमें उत्तम कल्याणका देनेवाला ज्ञानही है जिसज्ञानरूपीनौका मिलजाती है वह दुःखरूपी संसारसे शीघ्रहीपार होजाताहै ॥ ७५ ॥ जोमनुष्य श्रद्धासे मेरे इस भगवत्स्तोत्रका पाठकरेगा वह दुराराध्य भगवानको शीघ्रही प्राप्तहोगा ॥७६॥ जोकोई मेरे इस कहेहुए स्तोत्रका पाठकरता है, उसपर सबको आनंद देनेवाले हरिप्रसन्न होजाते हैं, तथावहमनुष्य जिसवस्तुकी इच्छा करता है वही उसकी कामना पूर्णहोती है ॥ ७७ ॥ जोमनुष्य प्रातःकाल उठहाथ जोड़मेरे इस स्तोत्रको श्रद्धायुक्त सुने सुनावेगा

कर्मबन्धनैः ॥ ७८ ॥ गीतंमयेदंनरदेवनन्दनाःपरस्यपुंसःपरमात्मनःस्तवम् । जपंत एकाग्रधियस्तपोमहच्चरध्वमन्तेततआप्स्यथेप्सितम् ॥ ७९ ॥

इतिश्रीमद्भा०चतु०रुद्रगीतंनामचतुर्विंशोऽध्यायः ॥ २४ ॥

मैत्रेय उवाच ॥ इतिसंदिश्यभगवान्बार्हिषदैरभिपूजितः। पश्यतांराजपुत्राणां तत्रैवांतरधीयहरः ॥ १ ॥ रुद्रगीतंभगवतःस्तोत्रंसर्वेप्रचेतसः। जपन्तस्तेतपस्तेपु र्वर्षाणामयुतंजले ॥ २ ॥ प्राचीनबर्हिषंक्षत्तःकर्मस्वासक्तमानसम्। नारदोऽध्यात्म तत्त्वज्ञःकृपालुःप्रत्यबोधयत् ॥ ३ ॥ श्रेयस्त्वंकतमद्राजन्कर्मणात्मनईहसे । दुःख हानिःसुखावाप्तिःश्रेयस्तन्नेहचेष्यते ॥ ४ ॥ राजोवाच ॥ नजानामिमहाभागपरं कर्मापविद्धधीः। ब्रूहिमेविमलंज्ञानंयेनमुच्येयकर्मभिः ॥ ५ ॥ गृहेषुकूटधर्मेषुपुत्र दाराधनार्थधीः। नपरंविन्दतेमूढोभ्राम्यन्संसारवर्त्मसु ॥ ६ ॥ नारद उवाच ॥ भो भोप्रजापतेराजन्पशून्पश्यत्वयाऽध्वरे। संज्ञापिताञ्जीवसंघान्निर्घृणेनसहस्रशः ॥७॥ एतेत्वांसंप्रतीक्षन्तेस्मरन्तोवैशसंतव। संपरेतमयःकूटैश्छिन्दन्त्युत्थितमन्यवः ८ ॥ अत्रतेकथयिष्येऽमुमितिहासंपुरातनम्। पुरञ्जनस्यचरितंनिबोधगदतोमम ॥ ९ ॥ आसीत्पुरंजनोनामराजाराजन्बृहच्छ्रवाः। तस्याविज्ञातनामाऽऽसीत्सखाऽविज्ञात चेष्टितः ॥ १० ॥ सोऽन्वेषमाणःशरणंबभ्रामपृथिवींप्रभुः। नानुरूपंयदाऽविंदद्भू त्सविमनाइव ॥ ११ ॥ नसाधुमेनेताःसर्वाभूतलेयावतीःपुरः। कामान्कामयमानोऽ सौतस्यतस्योपपत्तये ॥ १२ ॥ सएकदाहिमवतोदक्षिणेष्वथसानुषु । ददर्शनव-

वह सम्पूर्ण कर्मोंके बधनोंसे छूटजायगा॥७८॥हेराजकुमारो! मेरेइस कहेहुये भगवानके स्तोत्रका भजनकरो और एकमन होकर तपस्याकरो इसमे अंतमें तुम्हारी मनोकामना पूर्णहोगी ॥ ७९ ॥

इति श्रीभागवतेमहापुराणेचतुर्थस्कंधेसरलाभाषाटीकायांचतुर्विंशोऽध्यायः ॥ २४ ॥

मैत्रेयजीबोले—कि जब प्रचेतान से श्रीशिवजी ने इसभांति उपदेश किया तो प्रचेताओं ने उनकी,पूजाकी महादेवजीन उसे अंगीकारकिया और राजकुमारो के देखते२ वहां से अन्तर्ध्यानहोगये१॥ भगवान महादेवजीके कहेहुये स्तोत्रसे परमेश्वर का भजन करतेहुये उन प्रचेताओंने दशहजारबर्ष तक जल के भीतर खड़ेहोकर तप किया ॥ २ ॥ हेविदुर! राजा प्राचीनबर्हि कर्मोमे अत्यन्तही लिप्तथा इसलिये आत्मवेत्ता कृपालु नारदजीने उसको ज्ञानोपदेश दिया ॥ ३ ॥ नारदजीने कहा कि हेराजन्! आप कर्मकरके उनके द्वारा किस कल्याणकी आकांक्षारखते हो दुःखकी हानि और सुखकी प्राप्तितो इन कर्मोंसे होनहीं सकती ॥ ४ ॥ राजा प्राचीन बर्हिने कहाकि—हेमहाभाग! मेरी बुद्धि कर्मों से बंधी हुई है इस हेतु आप मुझसे विमलज्ञानका उपदेशकरें जिससे मैं कर्मोंसे छूटजाऊं५॥ कपटके धर्मवाले घरोंमें, पुत्र, स्त्री, धनमें जिनकी बुद्धि लिप्तहै वेमूढसंसारके मार्गमें भ्रमण किया करते हैं परन्तु मोक्षको नहींपाते ॥ ६ ॥ श्रीनारदजीने कहाकि—हेप्रजापति! हेराजन्! आपने कठोर हृदय होकर यज्ञमें जिनसहस्रों पशुओंका बध किया है उन्हें देखकर तुम्हें दयानही आई ॥ ७ ॥ वे समस्तजीव अपने दुःखका स्मरणकरतेहुए तेरी मृत्युकी चाहना करतेहैं जबतू मरेगा तब लोहमय अपने सींगोंसे तुझे छेदेंगे ॥ ८ ॥ मैंइसी संबंधमें एक प्राचीन इतिहास कहताहूं जिसमे पुरंजन राजाका चरित्रहै सोतुमको सुनाताहूं, सावधान होकरसुनो ॥ ९ ॥ हेराजन्! पुरंजन (जीव) नामक एक बड़ाप्रतापी राजाथा इसका अविज्ञात (ईश्वर) नामक एक सखाथा जोसम्पूर्ण चेष्टाओंको जानताथा ॥१०॥ वहराजा अपनी राजधानीके योग्य स्थानके ढूंढनेको समस्त भूमिमें फिरा परंतु योग्य स्थानकोई न मिला तब वहराजा मनमें अत्यन्त दुःखीहुआ ॥ ११ ॥ विषय भोगकी कामनावालेउस नरेशको सुखप्राप्तिके हेतु सम्पूर्ण भूमिमेंसे कोईनगरी योग्य न प्रतीतहुई (अतिरिक्त म-

भिर्न्नोर्मिः पुरंल्लक्षितलक्षणाम् ॥ १३ ॥ प्राकारोपवनाट्टालपरिखैरक्षतोरणैः । स्वर्णरौप्यायसैः शृङ्गैः सङ्कुलां सर्वतोगृहैः ॥१४॥ नीलस्फटिकवैदूर्यमुक्तामरकतारुणैः । कॢप्तहर्म्यस्थलीं दीप्तां श्रिया भोगवतीमिव ॥ १५॥ सभाचत्वररथ्याभिराक्रीडायतनापणैः । चैत्यध्वजपताकाभिर्युक्तां विद्रुमवेदिभिः ॥ १६ ॥ पुर्यास्तु बाह्योपवने दिव्यद्रुमलताकुले । नदद्विहङ्गालिकुलकोलाहलजलाशये ॥ १७ ॥ हिमनिर्झरविप्रुष्मत्कुसुमाकरवायुना । चलत्प्रवालविटपनलिनीतटसंपदि ॥१८॥ नानारण्यमृगव्रातैरनाबाधे मुनिव्रतैः । आहूतं मन्यते पान्थो यत्र कोकिलकूजितैः ॥ १९ ॥ यदृच्छयाऽऽगतां तत्र ददर्श प्रमदोत्तमाम् । भृत्यैर्दशभिरायान्तीमेकैकशतनायकैः ॥२०॥ पञ्चशीर्षाहिनागुप्तां प्रतीहारेण सर्वतः । अन्वेषमाणामृषभमप्रौढां कामरूपिणीम् ॥२१॥ सुनासां सुदतीं बालां सुकपोलां वराननाम् । समविन्यस्तकर्णाभ्यां बिभ्रतीं कुण्डलश्रियम् ॥२२॥ पिशङ्गनीवीं सुश्रोणीं श्यामां कनकमेखलाम् । पद्भ्यां क्वणद्भ्यां चलतीं नूपुरैर्देवतामिव ॥ २३ ॥ स्तनौ व्यञ्जितकैशोरौ समवृत्तौ निरन्तरौ । वस्त्रान्तेन निगूहन्तीं व्रीडया

नुष्यदेहके और किसी देहमें सम्पूर्ण सुखोंकी प्राप्तिनहीं होसकती)॥ १२ ॥ एकदिन वहराजा भ्रमण करताहुआ हिमालयके दक्षिण ओरकी चोटियोंमें आपहुंचा वहां उसने दोषरहित एक नवद्वारकी नगरी (मनुष्यदेह) कोदेखा (मनुष्य देहमे नोद्वारहैं—हिमालयके दक्षिण ओर कहनेका यह अभिप्रायहै कियह भरतखंड किजो कर्मभूमि कहलाताहै हिमालयके दक्षिण ओर है)॥ १३ ॥ यहनगरी महल, बागबगीचा, अटारियों तथा तोरणोंसे अतिशोभायमानथी और उसमें सोने चांदी तथा लोहेके शिखर वाले अनेक घरथे (महल आदिकी शोभा अंगोंपर है देहमें आंख:चक्षु वह घरके ठौरपरहैं राजस, तामसादि घरके शिखरोंके स्थानपर हैं)॥ १४॥ इसनगरीके मंदिर स्थान नीलमणि स्फटिक, वैडूर्य्य-मणि, मोती, मरकतमणि और माणिक्यरत्नोंसे बनेहुएथे (मंदिरके स्थानपर हृदय तथा मणियोंके स्थानमें नाडियां वा पृथक् २ विषयभोग) उस नगरीकी शोभा भोगवती नगरीसे कुछ न्यून नहीं थी ॥ १५ ॥ सभा, चौराहे, मार्ग, क्रीडास्थान, और विश्राम स्थानोंमे ध्वजा पताका तथा मूंगोंकी वेदियां शोभायमानथीं ॥ १६ ॥ पुरके बाहर एक सुंदर पुष्पवाटिका (विषयवर्ग) थी वह दिव्यवृक्ष तथा लताओं (चंदन माला इत्यादिक पदार्थ) युक्तथी उसमें भौरे और पक्षियोंका कोलाहल होरहाथा और उसीमे एक सुंदर जलाशयभी था ॥ १७ ॥ शीतल झरनोंके जल बिन्दुओंको उड़ाती तथा फूलोंको स्पर्शकरके आतीहुई सुंदर पवनसे चलायमान मूगोंके वृक्षोंकी शाखा और पल्लवोंकी शोभा सरोवरके तटपर व्याप्तहोरहीथी ॥ १८ ॥ नाना प्रकारके मृग मुनिव्रत अर्थात् अहिंसाका पालन करते थे इसीसे वहां किसी प्रकारका भय नहीं था और जो कोकिल शब्द करती थी उससे ऐसा प्रतीत होताथा कि मानो पथिकोंको वन बुलारहा है ॥ १९ ॥ उस उपवन के भीतर अपनीइच्छा से एक सुंदर स्त्री (बुद्धि) आनिकली उसके साथ दश दास (इन्द्रियां) भी थे और उन दासों के साथ शतशः स्त्रियें (अनंत वृत्तियें) थीं ॥ २० ॥ एक पांच मस्तक वाला सर्प (प्राण अपान उदान, समान, और व्यान, रूपसे पंच वृत्ति प्राण) इस सुन्दर स्त्रीकी रक्षा करता था यह युवा तथा काम रूपिणी स्त्री अपने पति की खोजमें फिररही थी ॥ २१ ॥ इस स्त्री की नासिका, दांत, कपोल और मुख अत्यन्त ही सुंदरथे (गंध, रस, आदिकका ज्ञान उसको भलीभांतिथा) उसके कर्णोंमें एकप्रकार के दोनों कुंडल अत्यन्त ही शोभा दे रहे थे ॥ २२ ॥ पीत वस्त्र तथा सुवर्णकी क्षुद्र घंटिका धारण किये थी सुंदर कटि पश्चात भाग और श्याम रङ्गथा शब्दायमान नूपुरके चरणों की चाल से देवबधू सी ज्ञात होती थीं ॥ २३ ॥ किशोर अवस्था के आने से आपस में मिले हुए

गजगामिनीम् ॥ २४ ॥ तामाहललितंवीरःसव्रीडस्मितशोभनाम् । स्निग्धेनापाङ्गपुङ्खेनस्पृष्टःप्रेमोद्भ्रमद्भ्रुवा॥२५॥कात्वंकञ्जपलाशाक्षिकस्यासीहकुतःसति । इमामुपपुरींभीरुर्किंचिकीर्षसिशंसमे ॥२६॥ कएतेऽनुपथायेतएकादशमहाभटाः।एताबाललनाःसुभ्रूःकोऽयंतेऽहिःपुरःसरः ॥ २७ ॥ त्वंह्रीर्भवान्यस्यथवाग्रमापतिंविचिन्वतीकिंमुनिवद्रहोवने । त्वदंघ्रिकामाप्तसमस्तकामंक्वपद्मकोशःपतितःकराग्रात् ॥ २८ ॥ नाऽऽसांवरोर्वन्यतमाभुविस्पृक्पुरीमिमांवीरवरेणसाकम् । अर्हस्यलंकर्तुमदभ्रकर्मणालोकंपरश्रीरिवयज्ञपुंसा ॥ २९ ॥ यदेषतेऽपाङ्गविखण्डितेन्द्रियंसव्रीडभावस्मितविभ्रमद्भ्रुवा । त्वयोपसृष्टोभगवान्मनोभवःप्रबाधतेऽथानुगृहाणशोभने ॥ ३० ॥ त्वदाननंसुभ्रुसुतारलोचनंव्यालम्बिनीलालकवृन्दसंवृतम् । उन्नीयमेदर्शयवल्गुवाचकंयद्व्रीडयानाभिमुखंशुचिस्मिते ॥ ३१ ॥ नारद उवाच॥ इत्थंपुरञ्जनंनारीयाचमानमधीरवत् । अभ्यनन्दतवीरहसन्तीवीरमोहिता ॥ ३२ ॥ नविदामवयंसम्यक्कर्तारंपुरुषर्षभ । आत्मनश्चपरस्यापिगोत्रंनामचयत्कृतम् ॥३३॥ इहाद्यसन्तमात्मानंनविदामततःपरम् । येनेयंनिर्मितावीरपुरीशरणमात्मनः ॥ ३४ ॥ एतेसखायःसख्योमेनरानार्यश्चमानद । सुप्तायांमयिजागर्तिनागोऽयंपालयन्पुरीम् ३५

एक से गोल स्तन प्रकट होरहे थे वह गजगामिनि लाजसे उनको अपने वस्त्रों से छिपातीथी २४॥ लज्जायुक्त मदमुसकान से शोभा देती थी इस स्त्री से स्नेह से, ऊपर की ओर घूमती हुई भ्रकुटि रूपी धनुष से निकले हुए प्रेम भरे और नेत्र की अनी रूप पुंख वाले कटाक्ष रूप बाणों से छिदकर वह राजा पुरंजन अति उत्तमता से पूछने लगा ॥ २५ ॥ कि हे कमलदल नेत्र ! तू कौन है और कहां से आई है हे सति ! तू किसकी है हे भीरु ! इस नगर के निकटवर्ती इस उद्यान मे तू क्या करना चाहती है सो मुझसे कहो ॥ २६ ॥ यह ग्यारह भट तेरे संग हैं वह कौन हैं (दश इन्द्रियां और ग्यारहवां मन) यह स्त्रियां कौन हैं और यह तेरे आगे चलने वाला सर्प कौन है ॥ २७ ॥ क्या तू लज्जा है जो धर्म पति को ढूंढती है क्या पार्वती है जो शिव को ढूंढती है क्या सरस्वती है जो अपने पति ब्रह्मा का खोज करती है क्या लक्ष्मी है जो विष्णु को ढूंढती है अथवा मुनीश्वरों की भांति एकांत वन को ढूंढती है मैं मानताहूं कि तेरा जो पति होगा उसके सम्पूर्ण मनोरथ तेरे चरण की कामना सेही प्राप्त हुए हैं। यदि तू लक्ष्मी है तो तेरे हाथ से कमल कहां गिरगया ॥ २८॥ हे सुमुखि ! तू इन स्त्रियों मे तो है नहीं कारण कि यह देवपत्नियां हैं और इनका पृथ्वीका स्पर्शकरना सम्भव नहीं इसी हेतु जैसे लक्ष्मी विष्णु भगवान के संग रहकर स्वर्ग को सुशोभित करती है ऐसेही मुझ महावीर, पराक्रमी के साथ तू रहकर इस पुरको शोभित-कर ॥२९॥हेसुन्दरि तेरीलाजभरी स्नेहपूर्वक मुसकानसे घूमतीहुई भ्रकुटिसे प्रेरित यह कामदेव,तेरी दृष्टिकी तीक्ष्णधारसे खंडित चित्त मुझे दुःख देताहै इसहेतु मुझपर दयाकर॥३०॥ हेमृदुहासिनि ! तेरा मुख कि जो श्रेष्ठ भृकुटी तथा सुन्दर पुतलियोंवाले नेत्रोंसे शोभित और लम्बे तथा कालेबालों से घिराहुआ और मधुर भाषणवालाहै कि जिसको लाजसे तू मेरे सामने नहीं करती उसे ऊँचा उठाकर मुझे दिखा ॥ ३१ ॥ नारदजीने कहा कि—वह स्त्री दीनकीभांति प्रार्थना करतेहुये राजा पुरंजनको ओर देखकर आपभी मोहित होगई फिर वह मुसकाकर आदर पूर्वक उसका कहना अंगीकार करके बोली कि ॥ ३२ ॥ हेपुरुषोंमें श्रेष्ठ ! जिसने हमको और आपको उत्पन्न कियाहै तथा हमारा और आपका नाम व गोत्र स्थित कियाहै उसको हम भलीभांति नहीं जानते ३३ ॥ हे वीर ! मुझे केवल इतनाही स्मरण है कि अभी मैं यहांहूं अब इससे अधिक बात मुझे ज्ञात नहीं मैं यहभी तो नहीं जानती कि मेरे रहनेका यह पुर किसने बनायाहै ॥ ३४ ॥ हेमहाराज ! यह

दिष्ट्याऽऽगतोसिभद्रंतेग्राम्यान्कामानभीप्ससे। उद्वहिष्यामितांस्तेऽहंस्वबन्धुभिररिंदम॥ ३६ ॥ इमांत्वमधितिष्ठस्वपुरींनवमुखींविभो। मयोपनीतान्गृह्णानःकामभोगाञ्छतंसमाः॥ ३७॥ कंनुत्वदन्यंरमयेह्यरतिज्ञमकोविदम्। असंपरायाभिमुखमश्वस्तनविदंपशुम्॥ ३८॥धर्मोह्यत्रार्थकामौचप्रजानन्दोऽमृतंयशः।लोकाविशोकाविरजायान्नकेवलिनोविदुः॥३९॥ पितृदेवर्षिमर्त्यानांभूतानामात्मनश्चह। क्षेम्यंवदन्तिशरणंभवेऽस्मिन्यद्गृहाश्रमः॥ ४०॥ कानामवीरविख्यातंवदान्यंप्रियदर्शनम्। नवृणीतप्रियंप्राप्तंमादृशीत्वादृशंपतिम्॥ ४१॥ कस्यामनस्तेभुविभोगिभोगयोःस्त्रियानसज्जेद्भुजयोर्महाभुज। योऽनाथवर्गाधिमलंघृणोद्धतस्मितावलोकेनचरत्यपोहितुम्॥ ४२॥ नारद उवाच॥ इतितौदंपतीतत्रसमुद्यसमयंमिथः। तांप्रविश्यपुरींराजन्मुमुदातेशतंसमाः॥ ४३॥ उपगीयमानोललितंतत्रतत्रचगायकैः। क्रीडन्परिवृतःस्त्रीभिर्ह्रदिनीमाविशच्छुचौ॥ ४४॥ सप्तोपरिकृताद्वारःपुरस्तस्यास्तुद्वेअधः। पृथग्विषयगत्यर्थंतस्यांयःकश्चनेश्वरः॥ ४५॥ पञ्चद्वारस्तुपौरस्त्यादक्षिणैकातथोत्तरा। पश्चिमेद्वेअमूषांतेनामानिनृपवर्णये॥ ४६॥ खद्योताविर्मुखीचप्राग्द्वारावेकत्रनिर्मिते। विभ्राजितंजनपदंयातिताभ्यांद्युमत्सखः॥ ४७॥ नलिनी

पुरुष तो मेरे सखा तथा स्त्रियां मेरी सहेलियांहैं जब मैं शयन करतीहूं तो यह सर्प जागकर मेरी पुरीकी रक्षा करताहै ॥ ३५ ॥ हे भद्र आप यहांआये अत्यन्तही अच्छाहुआ आपका कल्याण हो यदि आप संसारी विषय भोगोंकी कामना रखतेहो तो मैं बंधुओं सहित आपको प्राप्तहूंगी ॥ ३६ ॥ हेविभो ! इस नवद्वारकी पुरीमें आप स्थितहो और मुझसे प्राप्तहुये कामका १०० वर्ष तक भोगकरो ॥३७॥ आप के अतिरिक्त मैं किससे रमणकरूंगी ? कि और दूसरा न तो रतिमें चतुरहै और न परलोक तथा इसलोककी चिंता करताहै अर्थात् पशुतुल्यहै (नैष्ठिक ब्रह्मचारीस्त्री सम्बन्धीसुख नहींजानते,संन्यासी विषय सुखको छोड़बैठे, कामीलोगोंको परलोककी चिंतानहींरहती वैराग्यवानको इसलोककी चिन्ता नहींरहती और मूर्ख पशुतुल्यहैं) ३८॥ इस पुरीके गृहस्थाश्रममें धर्म,अर्थ,काम पुत्रादिकोंका सुख, मोक्ष, यश, तथा विशोक, व निर्मललोक यह सब मिलते हैं कि जिनको संन्यासी लोग भी नहींजानते ॥ ३९ ॥ इस संसारमें गृहस्थाश्रमही पितृ, देवता, मनुष्य, ऋषि प्राणीमात्र और अपनेआत्माका अति कल्याणकारक आश्रयहै॥४०॥हे बीर ! प्रख्यात, यश, उदार, रूपवान और प्यारे आप सदृशपतिको मेरी सदृश कौन स्त्री पतिरूपसे न बरेगी ॥ ४१ ॥ हेमहाबाहो ! आपजो कृपापूर्वक मंदमुसकानसे दीनलोगोंके दुःखदूर करने केहेतु विचरते फिरतेहो उन आपकी सर्पकी समानलम्बी भुजाओंमें किस स्त्रीका चित्त आसक्त न होगा॥ ४२ ॥ नारदजी बोलेकि हेमहाराज ! इसभांतिवे स्त्री पुरुष परस्परमें समयको काटकर इस नगरीमें प्रवेशकर सौ बर्षतक बड़े आनंदको प्राप्तहुये ॥ ४३ ॥ राजापुरंजनके सुन्दर यशको गायकलोग जहांतहां गातेथे (इस में जाग्रत् अवस्था संक्षेप से सूचित है)और वह बहुत सी स्त्रियों के संग क्रीड़ा करने के हेतु सरोवर में प्रवेश करता था (इस में सुषुप्ति अवस्था सूचित है) ॥ ४४ ॥ इस पुरमें पृथक २ देशो में जाने के हेतु सात द्वार ऊपर और दो द्वार नीचे हैं (मुख १ नासिका २ नेत्र २ कान २ गुदा १ और लिंग १ यह नौ छिद्र पृथक २ बिषय भोग के हेतु हैं)इनकी न्यारी २ गति है इनका ईश्वर कोई नहीं है ॥४५॥ इस पुरके पांच द्वार पूर्व को (नेत्र २ नासिका २ मुख १) एक दक्षिण की ओर तथा एक उत्तरकी ओर (दोनों कान) और दो पश्चिम की ओर हैं हेनृपति ! उनके नामों का मैं बरणन करता हूं ॥ ४६ ॥ खद्योता और आविर्मुखी नाम दो द्वार (नेत्र) पूर्व की ओर एक सूधपर बनाये गए हैं पुरंजन राजा इन द्वारों से बिभ्राजित नामक देश

नालिनीचप्राग्द्वारावेकत्रनिर्मिते । अवधूतसखस्ताभ्यांविषयंयातिसौरभम् ॥४८॥ मुख्यानामपुरस्ताद्द्वास्तयाऽऽपणबहूदनौ । विषयौयातिपुरराड्रसज्ञविपणान्वितः ४९. पितृहूर्नृपपुर्याद्वार्दक्षिणेनपुरंजनः। राष्ट्रंदक्षिणपञ्चालंयातिश्रुतधरान्वितः॥५०॥ देवहूर्नामपुर्याद्वाउत्तरेणपुरंजनः । राष्ट्रमुत्तरपञ्चालंयातिश्रुतधरान्वितः ॥ ५१ ॥ आसुरीनामपश्चाद्द्वास्तयायातिपुरंजनः । ग्रामकंनामविषयंदुर्मदेनसमन्वितः ५२ निर्ऋतिर्नामपश्चाद्द्वास्तयायातिपुरंजनः।वैशसंनामविषयंलुब्धकेनसमन्वितः ५३ अन्धावमीषांपौराणांनिर्वाक्पेशस्कृतावुभौ । अक्षण्वतामधिपतिस्ताभ्यांयातिकरोतिच ॥ ५४ ॥ सयर्ह्यन्तःपुरगतोविषूचीनसमन्वितः ।मोहंप्रसादंहर्षंवायातिजायात्मजोद्भवम् ॥ ५५ ॥ एवंकर्मसुसंयुक्तःकामात्मावञ्चितोऽबुधः । महिषीयद्यदीहेत तत्तदेवान्ववर्तत ॥ ५६ ॥ क्वचित्पिबन्त्यांपिबतिमदिरांमदविह्वलः। अश्नन्त्यांक्वचिदश्नातिजक्षन्त्यांसहजक्षति ॥ ५७ ॥ क्वचिद्गायतिगायन्त्यांरुदत्यांरुदतिक्वचित् । क्वचिद्धसन्त्यांहसति जल्पन्त्यामनुजल्पति ॥ ५८ ॥ क्वचिद्धावतिधावन्त्यां तिष्ठन्त्यामनुतिष्ठति । अनुशेतेशयानायामन्वास्ते क्वचिदासतीम् ॥ ५९ ॥

में (रूप) अपने मित्र द्युमान (चक्षु इन्द्रिय) के संग जाया करता है ॥ ४७ ॥ नलिनी और नालिनी नामक (नासिका) दो द्वार पूर्व की ओर हैं यह दोनों एकत्र निर्मित हैं इन द्वारों से राजा पुरंजन अवधूत (घ्राण) नामक सखा के संग सौरभ नामक (गन्ध) देश को जाया करता है ॥ ॥४८॥ उसी दिशा में मुख्यानाम पांचवा द्वार (मुख) है इस द्वार से पुरंजन राजा रसज्ञ (रसना) नाम मित्र के साथ आपण (भाषण) तथा बहूदन (अन्न) नाम देशों में जाया करता है ॥४९॥ इस पुरके दक्षिण की ओर पितृ (दायां कान) नाम द्वार है इस द्वार से पुरंजन राजा श्रुतिधर नाम (श्रोत्र इन्द्रिय) सखाके संग दक्षिण पांचाल नाम देश (प्रवृत्ति शास्त्र) में जाया करता है ॥५०॥ तथा इस पुर के उत्तर और देव हू (बांया कान) नामक द्वार है इस द्वार से पुरंजन राजा उत्तर पांचाल नाम देश (निवृत्ति शास्त्र) में श्रुतिधर नाम (श्रोत्र इन्द्रिया) सखाके संग जाया करता है ॥ ५१ ॥ इस पुर में पश्चिम दिशा की ओर आसुरी नामक (लिंग) द्वार है इस द्वार से पुरंजन राजा ग्रामक (मैथुन सुख) नाम देश में दुर्मद नाम (उपस्थ इन्द्रिय) सखाके संग जायाकरता है ॥५२॥ उसी दिशा में निर्ऋति (गुदा) नाम द्वार है इसद्वार से पुरंजनराजा वैशस (मलत्याग) नाम देशमें लुब्धक (पायु इन्द्रिय) नाम सखाके संग जायाकरताहै ॥५३॥ इन नौद्वारोंके अतिरिक्त पेशस्कृत (हाथ) और निर्वाक (पांव) नामक द्वार औरभी हैं परन्तु यह सदैवही बन्द रहतेहैं इन मेसे राजा पुरंजन निर्वाकनाम द्वारसे चलताहै और पेशस्कृत द्वारसे कामकरताहै ॥५४॥ यह पुरंजनराजा विषूचीन (मन) सखाको संगले जब अपने अंतःपुर (हृदय) में जाताहै तब स्त्री (बुद्धि) और पुत्रों (सम्पूर्ण इन्द्रियां) के विषयमें मोह (तमोगुणका काम) प्रसाद (सत्वगुणका कार्य) और हर्ष (रजोगुणके कार्य्य) को प्राप्तहोताहै॥५५॥ इसभांति कर्मोंमें आसक्त,कामात्मा,तथा अज्ञानी राजा पुरंजन (जीव) अपनीस्त्री (बुद्धि) की चेष्टा अनुसार वर्तने लगता है ॥५६॥ जब यह स्त्री मदिरा पानकरती है तब आपभी मदिरा पानकरताहै और उसके मदसे आपभी मत्तहोजाता है जब वह भोजन करती तब आपभी भोजनकरता जबवहचर्वणकरती तबउसकेसंग चर्वणकरताहै ॥५७॥ जब वहगाती तब आपभी गाता जब वहरोती तब आपभी रोता जब वह हँसती तब आपभी हँसता जब वहबोलती तब आपभी बोलताहै॥ ५८ ॥ जब वह दौड़ती तब आपभी दौड़ता जब वह ठहरजाती तब आप भी ठहरजाता जब वह सोती तब आपभी सोता जब वह बैठती तब आपभी उसके पीछे बैठजाता

क्वचिच्छृणोतिशृण्वत्यां पश्यन्त्यामनुपश्यति । क्वचिज्जिघ्रति जिघ्रन्त्यां स्पृशन्त्यांस्पृशतिक्वचित् ॥ ६० ॥ क्वचिच्चशोचतीं जायामनुशोचतिदीनवत् । अनुहृष्यतिहृष्यन्त्यां मुदितामनुमोदते ॥ ६१॥ विप्रलब्धोमहिष्यैवं सर्वप्रकृतिवञ्चितः नेच्छन्ननुकरोत्यज्ञः क्लैव्यात्क्रीडामृगोयथा ॥ ६२ ॥

इतिश्रीमद्भा०च० पंचविंशोऽध्यायः ॥ २५ ॥

नारदउवाच ॥ सएकदामहेष्वासो रथंपंचाश्वमाशुगम् । द्वीषंद्विचक्रमेकाक्षं त्रिवेणुंपंचबन्धुरम् ॥ १ ॥ एकरश्म्येकदमनमेकनीडंद्विकूबरम् । पंचप्रहरणंसप्तवरूथं पंचविक्रमम् ॥ २ ॥ हैमोपस्करमारुह्य स्वर्णवर्माऽक्षयेषुधिः । एकादशचमूनाथः पंचप्रस्थमगाद्वनम् ॥ ३ ॥ चचारमृगयांतत्र दृप्तआत्तेषुकार्मुकः ।विहाय जायामतदर्हां मृगव्यसनलालसः ॥४॥ आसुरींवृत्तिमाश्रित्य घोरात्मानिरनुग्रहः । न्यहनन्निशितैर्बाणैर्वनेषु वनगोचरान् ॥ ५ ॥ तीर्थेषुप्रतिदृष्टेषु राजामेध्यान्पशून्

है ॥ ५९ वह सुनती तब आपभी सुनता वह देखती तब आपभी देखता वह सूंघती तो आपभी सूंघना और वह जब छूनी तब आपभी छूता है ॥ ६० ॥ जब कभी वह शोकाकुल होती है तब आपभी दीन की भांति शोकातुर होता है वह प्रसन्न होती तब आपभी प्रसन्न होता जब वह हर्ष करती तब आपभी हर्ष करता है ॥ ६१ ॥ इस भांति स्त्री से वंचित होकर तथा अपनी प्रकृतियों को नाश कर वह मूढ़ राजा पुरंजन स्त्री के आधीन हो अपनी कांक्षा नहांनेपर भी क्रीड़ा मृग की सदृश स्त्री के अनुसार चलता है ॥ ६२ ॥

इति श्री भागवते महापुराणे० चतुर्थस्कंधे सरला भाषाटीकायां पंचविंशोऽध्यायः ॥ २५ ॥

नारदजी नें राजा प्राचीनबर्हि से कहा कि हे राजन् ! पुरंजन एक दिन सोने का कवच (रजोगुण) धारण कर सुवर्ण की सामग्री वाले रथ (स्वप्नावस्था सम्बन्धी शरीर) मे बैठ दृढ़ तरकस (असंख्य वासनाओं से भरा अहंकार) को संग ले पंचप्रस्थ नामक (पांच विषय) बन में गया इस रथ का बेग अत्यन्त तीव्र है (स्वप्न का शरीर जाग्रत्शरीर के सदृश बहुत देरतक नहीं रहता इसी हेतु बेग वाला कहा) उसमें पांच घोडे जोते जाते हैं (पांच ज्ञानेन्द्रिय) दो इसमें डंडि ये (अहंता ममता) हैं दो पहिये (पुण्य, पाप) एक धुरी (माया अर्थात् अज्ञान) तीन बांस (सत्व, रज, तम) तथा पांच रस्से बांधनेंके हेतु (पांच प्राण) हैं एक बागडोर (मन) एक सारथी (बुद्धि) है रथी के बैठने का स्थान एकही (हृदय) है दो धुरे (शोक और मोह) प्रक्षेप करनें योग्य पांच भांति की सामग्री (पांच विषय) हैं सात उसमें वरूथ (रस, रुधिर, मांस, मेद, हड्डी, मज्जा, और वीर्य्य) हैं पांच प्रकार की रथकी गति (पंच कर्मेन्द्रिय) हैं उस काल राजा पुरंजन ने सुवर्ण के आभूषण धारणकर कंचन का कवच (रजोगुण) अक्षय कवच अनंत बासनाओं से भरा हुआ अहंकार उपाधि) एक बड़ासा धनुष (अहंता) धारण किया और दश भृत्य (दशइन्द्रियां) और उनके एक प्रधान (मन) को संग ले पंचप्रस्थ नाम (पांच विषय) वन को चला ॥ १ । २ । ३ ॥ वह घमंडी राजा पुरंजन हाथमें धनुष (विषय भोग) बाण (रागद्वेषादिक) धारणकर त्यागनें के अयोग्य अपनी रानी (बुद्धि) को त्यागकर मृगी (विषयों) को मारने (भोगनें) की इच्छा से बन में जा शिकार करने लगा (विषय भोगने लगा) ॥ ४ ॥ क्रूर चित्त निर्दई राजा पुरंजन आसुरी वृत्ति धारणकर तीव्र शरों द्वारा बन के जीवों को बध करनें लगा ॥ ५ ॥ (आखेट की निंदा इसीकारण की जाती है कि राजा के हेतु आखेट का विधान शास्त्र में कहा है कि) शास्त्रों मे जो आखेट की विधि है वह इस प्रयोजन से नहीं है कि दूसरे धर्म कार्यों की सदृश इसके बिनाकिये काम नचले परतु स्वाभाविक स्नेह से जो हिंसा की जाती है उसके कम करने के हेतु है वह इस भांति से है कि जो पशु बध में अ-

वने । यावदर्थमलंलुब्धो हन्यादितिनियम्यते ॥ ६ ॥ यएवंकर्मनियतं विद्वान्कुर्वीतमानवः । कर्मणातेनराजेन्द्र ज्ञानेननसलिप्यते ॥७॥ अन्यथाकर्मकुर्वाणो मानारूढोनिबध्यते । गुणप्रवाहेपतितो नष्टप्रज्ञोव्रजत्यधः ॥ ८ ॥ तत्रानिर्भिन्नगात्राणां चित्रवाजैःशिलीमुखैः । विप्लवोऽभूद्दुःखितानां दुःसहःकरुणात्मनाम् ॥ ९॥ शशान् वराहान्महिषान् गवयान्रुरुशल्यकान् । मेध्यानन्यांश्चविविधान् विनिघ्नन्श्रममध्यगात् ॥ १० ॥ ततःक्षुत्तृट्परिश्रान्तो निवृत्तोगृहमेयिवान् । कृतस्नानोचिताहारः संविवेशगतक्लमः ॥ ११ ॥ आत्मानमर्हयांचक्रे धूपालेपस्रगादिभिः । साध्वलंकृतसर्वांगो महिष्यामादधेमनः ॥ १२ ॥ तृप्तोहृष्टःसुदृप्तश्च कन्दर्पाकृष्टमानसः । नव्यचष्टवरारोहां गृहिणींगृहमेधिनीम् ॥ १३ ॥ अन्तःपुरस्त्रियोऽपृच्छद्विमना इव वेदिषत् । अपिवःकुशलंरामाः सेश्वरीणांयथापुरा ॥ १४ ॥ नतथैतर्हिरोचन्ते गृहेषुगृहसंपदः । यदिनस्याद्गृहेमाता पत्नीवापतिदेवता ॥ व्यङ्गेरथइवप्राज्ञः कोना-

---

श्रीशुक उवाच । नाभिरपत्यकामोऽप्रजया मेरुदेव्या भगवन्तं यज्ञपुरुषमवहितात्माऽयजत ॥ १ ॥ तस्य ह वाव श्रद्धया विशुद्धभावेन यजतः प्रवर्ग्येषु प्रचरत्सु द्रव्यदेशकालमन्त्रर्त्विग्दक्षिणाविधानयोगोपपत्त्या दुरधिगमोऽपि भगवान् भागवतवात्सल्यतया सुप्रतीक आत्मानमपराजितं निजजनाभिप्रेतार्थविधित्सया गृहीतहृदयो हृदयंगमं मनोनयनानन्दनावयवाभिराममाविश्चकार ॥२॥ अथ ह तमाविष्कृतभुजयुगलद्वयं

ने ग्राम्य मनुष्योंके भीतर चातुर्य्यता युक्त भाषाके द्वारा इस अप्सरा पूर्व चित्तिको भलेप्रकार आदर तथा सन्मानकर मनाया, ॥ १८ ॥ उसकी वीरेंद्र और उसकी उत्तम विद्या, बुद्धि, वयस, रूप, श्री, उदारता, और शीलता अवलोकनकर पूर्वचित्तिका भी उसमे मन लगा दशकरोड़ वर्ष पर्य्यंत जम्बूद्वीपाधिपति इस पृथ्वीनाथके साथ पृथ्वी और स्वर्गका उत्तम ऐश्वर्य, भोगतीरही ॥ १९ ॥ कालवश उसके गर्भमें राजा आग्नीध्रसे नाभि, किम्पुरुष, हरिवर्ष, इलावृत, रम्यक, हिरणमय, कुरू भद्राश्व और केतुमाल यह नौपुत्र उत्पन्नहुये। पूर्वचित्तिने प्रत्येक साम्वत्सरमें एक २ सन्तति उत्पन्न करी, इसीप्रकार जब नौपुत्र उत्पन्नहुये, तब वह समस्तपुत्रोंका परित्यागकर भगवान ब्रह्माजीकी उपासनामें प्रवृत्तहुआ ॥ २० ॥ हेराजन् ! आग्नीध्रके नवपुत्र माताकी प्रकृतिसेही महाहृष्ट पुष्ट, और बलवान्हुए, इसहेतु आग्नीध्रने उनको पृथक् २ पृथ्वी के विभाग करदिये, वह उन विभागोंके अनुकूल निज२ नाममें जम्बूद्वीपके नौखण्डकर राज्यभोगनेलगे,॥२१॥आग्नीध्र राजा विषय भोगसे सन्तुष्ट नहींहुआ वह सर्वदा विषय करनेकोही बड़ा मानताथा, अतः वेदोक्त कर्म करने के प्रभावसे जहां पितर आनन्द भोगतेहैं तथा जहांपर पूर्वचित्ति अप्सराथी उसीलोकको राजा आग्नीध्र प्राप्तहुआ ॥२२॥जब राजाआग्नीध्र परलोकवासीहुये, तब उनके नौपुत्रोंने मेरुदेवी, प्रतिरूपा, उग्रदंष्ट्री, लता, रम्या, श्यामा, नारी, भद्रा और देववीति, आदि मेरूकी नव कन्याओं से विवाह क्रमशःकिया ॥२३॥

इति श्री भागवते महापुराणे० पंचमस्कंधे सरला भाषाटीकायां द्वितीयोऽध्यायः ॥ २ ॥

श्रीशुकदेवजी बोले कि—हे राजन् ! निस्सन्ताननाभि राजाने अपनी स्त्री मेरु देवी को संग ले पुत्रकी कामना कर यज्ञ पुरुष भगवान की पूजाकी ॥ १ ॥ वह राजा श्रद्धा पूर्वक शुद्ध भावसे प्रवर्ग नाम यज्ञ के कर्म करा रहा था, यद्यपि देश काल, द्रव्य, मंत्र, ऋत्विक दक्षिणा औरविधि इन उपायों से भी भगवान नहीं प्राप्त होते, तो भी अपने भक्तों के कार्य करने के हेतु जिन का चित्त भक्तों की ओर खिंचा हुआ है—ऐसे भगवान भक्तों पर दया करके सुंदर देह धारण कर चित्त तथा नेत्रों को अनन्द देने वाले अंगों से सुंदर, सुखदायी स्वतंत्र रूप को प्रगट किया ॥२॥

हिरण्मयं पुरुषविशेषं कपिशकौशेयाम्बरधरमुरसि विलसच्छ्रीवत्सललामं दरवर वनरुहवनमालाऽच्छूर्यमृतमणिगदादिभिरुपलक्षितं स्फुटकिरणप्रवरमणिमयमुकुट कुण्डलकटककटिसूत्रहारकेयूरनूपुराद्यङ्गभूषण विभूषितमृत्विक्सदस्यगृहपतयोऽधना।इवोत्तमधनमुपलभ्य सबहुमानमर्हणेनावनतशीर्षाणउपतस्थुः ३ ऋत्विजऊचुः।अर्हसि मुहुरर्हत्तमार्हणमस्माकमनुपथानां नमोनमइत्येतावत्सदुपशिक्षितं कोऽर्हतिपुमान् प्रकृतिगुणव्यतिकरमतिरनीश ईश्वरस्यपरस्यप्रकृतिपुरुषयोरर्वाक्तनाभिर्नामरूपाकृतिभी रूपनिरूपणम् ॥४॥सकलजननिकायवृजिननिरसनशिवतमप्रवरगुणगणैकदेशकथनादृते ॥५॥ परिजनानुरागविरचितशबलसंशब्दसलिलसितकिसलयतुलसिकादूर्वाङ्कुरैरपि संभृतया सपर्यया किल परम परितुष्यसि ॥ ६ ॥ अथानयाऽपिनभवत इज्ययोरुभारभरया समुचितमर्थमिहोपलभामहे ॥ ७ ॥ आत्मन एवानुसवनमंजसा व्यतिरेकेणवोभूयमानाशेषपुरुषार्थस्वरूपस्य किंतुनाथाशिष आशासानानामेतदभिसंराधनमात्रं भवितुमर्हति ॥ ८ ॥ तद्यथाबालिशानां स्वयमात्मनः श्रेयः परमविदुषां परम परमपुरुष प्रकर्षकरुणया स्वमहिमानं चापवर्गाख्यमुपकल्पयिष्यन् स्वयं नापचित एवेतरवदिहोपलक्षितः ॥९॥ अथायमेववरो ह्यर्हत्तमयर्हि बर्हिषि राजर्षेर्वरदर्षभो भवान्निजपुरुषेक्षणविषय आसीत् ॥ १० ॥ असङ्गनिशितज्ञानानलविधूताशेषमलानां भवत्स्वभावानामात्मारामाणांमुनीनामनवरतपरिगुणितगुणगणपरममङ्गलायनगुणगणकथनोऽसि ॥ ११ ॥ अथ कथंचित्

जिस में चार भुजा प्रगट हैं ऐसे, तेजमय, पुरुष श्रेष्ठ, पीताम्बर तथा श्रीवत्स का चिह्न धारण किये; शंख, चक्र, गदा, पद्म, वनमाला और कौस्तुभमणि से युक्त तथा जिन में किरणें प्रकाशित होरहा हैं ऐसे श्रेष्ठ मणियों के मुकुट, कुंडल, कोंधनी, हार, बाजूबंद और घुंघरू इत्यादिक आभूषण पहिने हुये प्रभु को, ऋत्विज सभासद और यजमान इनसबोंने देख इस भांति प्रसन्न हो कर प्रजा की पूजाकी कि जैसे निर्धनी धनको पाकर प्रसन्न होवे ॥ ३ ॥ ऋषिबोले कि—हे पूज्य तम ! हम दासों की पूजा आप बारम्बार ग्रहण करने के योग्य हो, आप के रूप का जाननाअति ही कठिन है इस हेतु आप्तओं ने हमको केवल " नमोनमः " इतना ही सिखाया है, जिस पुरुष की प्रपंच में ही बुद्धि है ऐसा कौन असमर्थ पुरुष प्रपंचांतर्गनाम, रूप तथा आकार से प्रकृति पुरुष से परेईश्वर, आप के रूपका निरूपण कर करता है ॥ ४ ॥ परन्तु समस्त मनुष्योंके दुखदूर करने वाले आप के श्रेष्ठ कल्याणदायी गुण गणों के एक देश का निरूपण कर सकता है, किंतु इसके अतिरिक्त कुछ नहीं कर सकता ॥ ५ ॥ हे नाथ ! साधू लोग स्नेह पूर्वक गद्गद वाणी से आपकी स्तुति करते हैं और फूल, अक्षत शुद्ध पल्लव तुलसीदल दूवकेअंकुर इत्यादिक द्रव्य संपादन करके आपकी पूजा करते हैं, हे परमेश्वर ! आप उसी पूजासे प्रसन्न होजाते हो ॥ ६ ॥और बिना स्नेह के तो बहुत पदार्थों वाले यज्ञ से भी आप का आराधन किया जाय तो उससे भी हम को इच्छित अभिप्राय सिद्ध होता नहीं, दृष्टि आता ॥ ७ ॥ हे स्वामी ! आप अनायासही प्रगट होने वाले तथा पुरुषार्थ रूप और आनन्द स्वरूप हो, किन्तु हम सकामों को आपका आराधनही करना योग्य है ॥ ८ ॥ हे परम पुरुष ! हम अज्ञानी अपने श्रेय को नहीं जानते; आपने दया करके अपनी महिमा अर्थात् मोक्ष और हमलोगों की कामना देने के हेतु बिना पूजा किये हुयेही, इतरलोक की भांति दर्शन दिये ॥ ९ ॥ हे पूज्यतम ! हमको यही बरहुआ कि जो राजा नाभि के यज्ञ में बरदेने वालों में उत्तम आप हमलोगों के दृष्टि गोचर हुये ॥ १० ॥ वैराग्य से उत्पन्न हुई ज्ञानानल से जिनके सम्पूर्ण मल भस्म होगये हैं ऐसे, तथा आपे कैसे स्वभाववाले, आत्मा-

स्खलनक्षुत्पतनजृम्भणदुरवस्थानादिषु विवशानानः स्मरणाय ज्वरमरणदशाया- मपि सकलकश्मलनिरसनानि तव गुणकृतनामधेयानि वचनगोचराणिभवन्तु १२॥ किंचायंराजर्षिरपत्यकामः प्रजांभवादृशीमाशासान ईश्वरमाशिषां स्वर्गापवर्गयो- रपि भगवन्तमुपधावति प्रजायामर्थप्रत्ययो धनदमिवाधनःफलीकरणम् ॥ १३ ॥ को वा इह तेऽपराजितोऽपराजितया माययाऽनवसितपदव्याऽनावृतमतिर्विषयविष रयानावृतप्रकृतिरनुपासितमहच्चरणः ॥१४॥ यदुहवावतवपुनरदभ्रकर्तरिह समा हूतस्तत्रार्थधियां मन्दानांनस्तद्यद्देवहेलनं देवदेवार्हसिसाम्येन सर्वान् प्रतिबोढुम- विदुषाम् ॥ १५ ॥ श्रीशुक उवाच ॥ इतिनिगदनाभिष्टूयमानोभगवाननिमिषर्षभो वर्षधराभिवादिताभिवन्दितचरणः सदयमिदमाह ॥ १६ ॥ श्रीभगवानुवाच ॥ अहो बताहमृषयो भवद्भिरवितथगीभिर्वरमसुलभमभियाचितो यदमुष्यात्मजो मयासदृशोभूयादिति ममाहमेवाभिरूपः कैवल्यादथापि ब्रह्मवादोनमृषा भवितुम- र्हति, ममैव हि मुखं यद्द्विजदेवकुलम् ॥ १७ ॥ ततआग्नीध्रीयेंऽशकलयावतरि- ष्याम्यात्मतुल्यमनुपलभमानः ॥ १८ ॥ श्रीशुक उवाच । इति निशामयन्त्यां मेरु- देव्याः पतिमभिधायान्तर्दधे भगवान् ॥१९॥ बर्हिषितस्मिन्नेव विष्णुदत्तभगवान् परमर्षिभिः प्रसादितोनाभेःप्रियचिकीर्षया तदवरोधायने मेरुदेव्यांधर्मान् दर्शयितु कामोवातरशनानां श्रमणानामृषीणामूर्ध्वमन्थिनां शुक्लयातनुवाऽवततार ॥ २० ॥

इतिश्रीमद्भा०पञ्चम०तृतीयोऽध्यायः ॥ ३ ॥

राम मुनिलोग भी आपके श्रेष्ठ मंगलकारी चरित्रों का वर्णन करते हैं परन्तु दर्शन उन्हें भी नहीं होता ॥ ११ ॥ हेप्रभो ! आपके दर्शनमात्रसेही हम कृतार्थ होगये परन्तु एक वर मांगते हैं कि अँगड़ाई, छींकलेने, जंभाई लेने, गिरने, दुःख की अवस्था, ज्वर, मरण और भूख इत्यादिक द- शाओंमें जब आपके स्मरण करनेमें परवश होजाय उस समय भी, दुःख दूर करने वाले आप के गुणा सहित नामों का उच्चारण होतारहे ॥ १२ ॥ हे स्वर्ग मोक्ष देनेवाले भगवान् ! यह राजर्षि नाभि आप सरीखे पुत्रकी कामना करके आपका आराधन कररहा है इसको पुत्रका मांगना ऐसा है कि जैसे कोई निर्धन कुबेर के समीप जाकर भूसी मांगे, किंतु यह तो अभी पुत्रही को पुरुषार्थ स- मझता है ॥ १३ ॥ यह कोई आश्चर्य की बात नहीं है, क्यों कि जिसने साधुओं के चरणों की सेवा नहीं की है वह ऐसा कौन है कि जो आप की अजित माया से नहारा हो अथवा विषय रूपी विषसे जिसकी प्रकृति न ठगीगईहो ॥ १४ ॥ हे बहुकार्योंके करनेवाले ! प्रजादिको पुरुषार्थ जान इस थोड़ेसे कार्यके हेतु हम अज्ञानियोंने आपको बुलायाहै, इससे हेदेव ! आप हमलोगोंके अपराध को क्षमा करिये ॥ १५ ॥ श्रीशुकदेवजी बोले कि—जब देवोत्तम भगवान्की ऋत्विजोंने इसभांति गद्यमय वाणीसे स्तुतिकी और उन्होंनाभिसे वंदित ऋत्विजोंने उनकी वन्दनाभीकी तब भगवानने दया सहित उनसे कहा॥१६॥श्री भगवानने बोले कि—हे ऋषियो ! सत्यवाणीवाले तुमने यह अति दुर्लभ वरमांगा कि—इस राजाके मेरी सदृश पुत्रहोवे, मेरी समान तो मैंहाहूं मैं अद्वितीयहूं तो भी ब्राह्मणोंका वचन झूठा न होना चाहिये क्योंकि ब्राह्मणोंका कुलही मेरा मुख है मेरी सदृश सृष्टिमें कोई नहींहै इसहेतु नाभिराजाके घरमेंही अशंकलासे अवतार लूंगा ॥ १८ ॥ श्रीशुकदेवजी बोले कि—श्रीभगवान नाभिराजासे मेरुदेवीके सुनते ऐसा कहकर अन्तर्ध्यान होगये ॥ १९ ॥ हे विष्णु- दत्त राजा परीक्षित ! जब नाभिराजा के यज्ञमें ऋषियोंने भगवानको इसभांति प्रसन्न किया तब नाभिराजाकी प्रसन्नताके हेतु उसकी रानी मेरुदेवीमें दिगम्बर, तपस्वी, ज्ञानी और नैष्टिक ब्रह्मचा- रियों को उपदेश देनेके लिये भगवानने शुद्ध, सत्वमूर्तिसे अवतार लिया ॥ २० ॥

इतिश्रीमद्भागवते महा० पंचम० सरलाभाषाटीकायां तृतीयोऽध्यायः ॥ ३ ॥

श्रीशुक उवाच ॥ अथहतमुत्पत्त्यैवाभिव्यज्यमानभगवल्लक्षणंसाम्योपशम वैराग्यैश्वर्यमहाविभूतिभिरनुदिनमेधमानानुभावंप्रकृतयःप्रजाब्राह्मणा देवताश्चाव नितलसमवनायातितरांजगृधुः ॥ १ ॥ तस्यहवाइत्थंवर्ष्मणावरीयसावृहच्छ्लोकनचौजसाबलेनश्रियायशसावीर्यशौर्याभ्यांचपिताऋषभइतीदंनामचकार ॥ २ ॥ तस्यहीन्द्रःस्पर्धमानोभगवान्वर्षेनववर्षतदवधार्य भगवानृषभदेवोयोगेश्वरः प्रहस्यात्मयोगमाययास्ववर्षमजनाभंनामाभ्यवर्षत् ॥ ३ ॥ नाभिस्तुयथाऽभिलषितं सुप्रजास्त्वमवरुध्यातिप्रमोदभर विह्वलोगद्गदाक्षरया गिरास्वैरंगृहीतनरलोक सधर्मंभगवन्तंपुराणपुरुषंमाया विलसितमतिर्वत्सताततेतिसानुरागमुपलालयन्परां निर्वृतिमुपगतः ॥ ४ ॥ विदितानुरागमापौरप्रकृतिजनपदोराजानाभिरात्मजंसमय सेतुरक्षायामभिषिच्यब्राह्मणेषूपनिधायसहमेरुदेव्या विशालायांप्रसन्ननिपुणेनतपसासमाधियोगेननरनारायणाख्यंभगवंतंवासुदेवमुपासीनः कालेनतन्महिमानमवाप ॥५॥ यस्यहपाण्डवेयश्लोकावुदाहरंति ॥ कोनुतत्कर्मराजर्षेर्नाभेरन्वाचरेत्पुमान् ॥ अपत्यतामगाद्यस्यहरिःशुद्धेनकर्मणा ॥ ६ ॥ ब्रह्मण्योऽन्यःकुतोनाभेर्विप्रामङ्गल पूजिताः ॥ यस्यबर्हिषियज्ञेशंदर्शयाम सुरोजसा ॥ ७ ॥ अथहभगवानृषभदेवः स्ववर्षंकर्मक्षेत्रमनुमन्यमानःप्रदर्शितगुरुकुलवासोलब्धवरैर्गुरुभिरनुज्ञातोगृहमेधिनांधर्माननुशिक्षमाणो जयन्त्यामिन्द्रदत्तायामुभयलक्षणं कर्मसमाम्नायाम्नातमभियुञ्जन्नात्मजानामात्मसमानानांशतंजनयामास ॥ ८ ॥ येषांखलुमहायोगीभरतो ज्येष्ठःश्रेष्ठगुणआसीद्येनेदंवर्षंभारतमितिव्यपदिशन्ति ॥ ९ ॥ तमनुकुशावर्तइला-

श्रीशुकदेवजी बोले कि—जन्मकालमेंही जिनमें श्रीभगवानके लक्षण प्रगटथे, और समभाव, उपशम, वैराग्य, ऐश्वर्य और महाविभूतियों से दिन प्रतिदिन जिनका प्रभाव उन्नत होरहाथा उनको भूमण्डलका पालन करनेके हेतु प्रजा मन्त्री, ब्राह्मण और देवता सभी चाहतेथे॥१॥ उनका शरीर तेज, बल, लक्ष्मी, कीर्ति प्रभाव और उत्साह से अतिउत्तम तथा यशस्वीथा इसीलिये उनके पिता नाभिने ऋषभनाम रक्खा॥२॥इन्द्रने ईर्षासे इनके खण्डमें वर्षा न की तब योगेश्वर भगवानने यह जान हसकर अपने अजनाभखण्डमें अपनी योगमायासे वर्षाकी ॥ ३ ॥ नाभिराजा जैसा पुत्र चाहताथा वैसाही मिला इसकारण आनन्दमें विह्वलहो, अपनी कामनासे जिन्होंने पुरुष देहधारणकियाहै ऐसे पुराण पुरुष भगवानको गद्गद् वाणीसे हेपुत्र! ऐसे प्यार करतेहुये बड़े आनन्दको प्राप्तहुआ ॥४॥ देशकेलोग, पुरकेलोग, प्रधान इनका पुत्रमें अनुराग जानकर उस समय में, मर्यादा की रक्षाके हेतुराजा नाभिने उसका राज्याभिषेक कर, ब्राह्मणोंकी गोदमेंधर, मेरुदेवीको सायले, बद्रिकाश्रम भेजा, समाधियोग से, नरनारायण की उपासना कर समयकोपा जीवनमुक्त होगया ॥ ५ ॥ हेराजन् ! उस राजाके विषयमें मनुष्य ऐसा कहा करते हैं। कि जिस आमात्रकेपुत्र नाभिराजा के घर, शुद्ध कर्मों से साक्षात् हरि भगवानने जन्मलिया उसके सदृश और दूसरा कौन पुरुष कर्म करसकता है ! ॥ ६ ॥ जिनको, ब्राह्मणों ने दक्षिणा से तृप्तहो यज्ञमें अपने मन्त्रबलसे परमेश्वर के दर्शन करादिये उन नाभिराजा से बढ़कर और दूसरा कौन ब्रह्मभक्त होसकता है ॥ ७ ॥ नाभिके उपरात, ऋषभदेवजीने अपने खंडको कर्मक्षेत्र मान, गुरुकुल में विद्यापढ गुरुको दक्षिणादे, उनसे आज्ञाले गृहस्थियों को गृहस्थके धर्म सिखलाते, श्रुतिस्मृति कथित कर्मकरते, इन्द्रकी दीहुई जयता नामक रानीमें अपनी समान सौपुत्र उत्पन्न किये ॥ ८ ॥ उनमे भरत सबसे ज्येष्ठ, बड़ायोगी तथा श्रेष्ठ गुणीथा, जिसके नामसे इस खंडका नाम भारतखंड हुआ ॥ ९ ॥ भरतजी के उपरांत कुशावर्त,

वर्तोब्रह्मावर्तोमलयः केतुर्भद्रसेनइन्द्रस्पृग्विदर्भःकीकटइतिनवनवतिप्रधानाः॥१०॥ कविर्हरिरन्तरिक्षः प्रबुद्धःपिप्पलायनः ॥ आविर्होत्रोऽथद्रुमिलश्चमसःकरभाजनः ॥ ११ ॥ इतिभागवतधर्मदर्शनानवमहाभागवतास्तेषांसुचरितंभगवन्महिमोपबृंहितंवसुदेवनारदसंवादमुपशमायनमुपरिष्टाद्वर्णयिष्यामः ॥१२॥ यवीयांसएकाशीतिर्जायन्तेयाःपितुरादेशकरामहाशालीनामहाश्रोत्रियायज्ञशीलाः कर्मविशुद्धाब्राह्मणावभूवुः ॥ १३ ॥ भगवानृषभसंज्ञआत्मतन्त्रःस्वयंनित्यनिवृत्तानर्थपरम्परःकेवलानन्दानुभव ईश्वरएवविपरीतवत्कर्माण्यारभमाणःकालेनानुगतंधर्ममाचरणेनोपशिक्षयन्नतद्विदांसमउपशांतो मैत्रः कारुणिकोधर्मार्थयशःप्रजानन्दामृतावरोधेन गृहेषुलोकंनियमयत् ॥ १४ ॥ यद्यच्छीर्षण्याचरितंतत्तदनुवर्ततेलोकः ॥ १५ ॥ यद्यपिस्वविदितंसकलधर्मब्राह्मंगुह्यंब्राह्मणैर्दर्शितमार्गेणसामादिभिरुपायैर्जनतामनुशशास ॥ १६ ॥ द्रव्यदेशकालवयःश्रद्धर्त्विग्विविधोद्देशोपचितैःसर्वैरपिक्रतुभिर्यथोपदेशंशतकृत्वइयाज ॥ १७ ॥ भगवतर्षभेणपरिरक्ष्यमाणएतस्मिन्वर्षे न कश्चनपुरुषोवाञ्छत्य विद्यमानमिवात्मनोऽ न्यस्मात्कथंचनकिमपिकर्हिचिदवेक्षते भर्तर्यनुसवनं विजृम्भितस्नेहातिशयमंतरेण ॥ १८ ॥ सकदाचिदटमानोभगवानृषभोब्रह्मावर्तगतो ब्रह्मर्षिप्रवरसभायांप्रजानां निशामयंतीनामात्मजानवहितात्मनः प्रश्रयप्रणयभरसुयन्त्रितानप्युपशिक्षयन्नितिहोवाच ॥ १९ ॥

इतिश्रीमद्भा०पञ्चम०ऋषभदेवानुचरितेचतुर्थोऽध्यायः ॥ ४ ॥

इलावर्त्त, ब्रह्मावर्त्त, मलय, केतु, भद्रसेन, इन्द्रस्पृक्, विदर्भ और कीकट यहपुत्र उत्पन्न हुये जो नव्वेपुत्रों से बड़ेथे ॥ १० ॥ कवि, हरि, अंतरिक्ष, प्रबुद्ध, पिप्पलायन, आविर्होत्र, द्रुमिल, चमस और कर भाजन यह नौभगवद्धर्म के दिखाने वाले और बड़े भगवद्भक्त हुये कि भगवत महिमा युक्त जिनका चरित्र वसुदेव नारदके संवादमें एकादश स्कंधमें कहा जायगा ॥ ११ ॥ इनसे छोटे ८१ पुत्र पिताके आज्ञा कारी, वेदवक्ता यज्ञकरने वालेथे वह नित्य नेमके शुद्धकर्मों से श्रेष्ठ ब्राह्मण होगये ॥ १२ ॥ भगवान ऋषभ देवजी स्वतंत्र नित्य अनर्थ की परंपरा से दूर, सुहृदरूप आनंद के अनुभवी कालसे प्राप्त धर्माचरणद्वारा अज्ञानियों को धर्म करना सिखाते थे, और अतिकृपालु, शांतरूप, करुणा युक्त ऋषभदेवजी धर्म, अर्थ, संतान, मोक्षके संग्रह के संग मनुष्यों को गृहोंमें प्रवृत्त करते थे ॥ १३ ॥ क्योंकि सृष्टिकी यह रीति है किजो बड़े पुरुष आचरण करते हैं उसी के अनुसार सबही वर्त्तते है ॥ १४ ॥ यद्यपि आप सब धर्मों युक्त वेदको जानते थे तौभी ब्राह्मणों से पूछकर उनकी आज्ञानुसार साम दाम दण्ड भेद उपायों से लोकपालन करते थे ॥ १५॥ द्रव्य, देश, काल, अवस्था, श्रद्धा, और ऋत्विज इत्यादि सब सामग्री की अधिकता वाले विधि पूर्वक सम्पूर्ण यज्ञ शतरवार किये ॥१६॥ जिस काल भगवान ऋषभदेवजी इस खंड की रक्षा करते थे उस समय पुरुष ऋषभदेवजी की प्रीति के अतिरिक्त और किसी से कुछ नहीं चाहते थे ॥ १७ ॥ वे ऋषभदेवजी एक काल घूमते हुए ब्रह्मावर्त्त देश में आये कि जहां ब्रह्मर्षियोंकी बड़ी सभा बैठीथी उसमें जाकर, प्रजाओंके सुनते अपने पुत्रोंको कि जो चित्त की नम्रता और शील के भारसे नम्र हो रहथे, शिक्षा के मिषसे सबोंको शिक्षा करनेके हेतु इसभांति कहनेलगे ॥ १८ ॥

इतिश्रीमद्भा० महा० पंचम० सरलाभाषाटीकायांचतुर्थोऽध्यायः ॥ ४ ॥

ऋषभ उवाच॥नायंदेहोदेहभाजांनृलोकेकष्टान्कामानर्हते विड्भुजांये । तपो दिव्यंपुत्रकायेनसत्त्वंशुद्धेद्यस्माद्ब्रह्मसौख्यंत्वनन्तम् ॥ १ ॥ महत्सेवांद्वारमाहुर्विमुक्तेस्तमोद्वारंयोषितांसङ्गिसङ्गम् । महान्तस्तेसमचित्ताःप्रशान्ताविमन्यवःसुहृदःसाधवोये ॥ २ ॥ येवामयीशेकृतसौहृदार्थाजनेषुदेहंभरवार्तिकेषु । गृहेषुजायात्मजरातिमत्सुनप्रीतियुक्तायावदर्थाश्चलोके ॥ ३ ॥ नूनंप्रमत्तःकुरुतेविकर्मयदिन्द्रियप्रीतयआपृणोति । नसाधुमन्येयतआत्मनोऽयमसन्नपिक्लेशदआसदेहः ॥४॥ पराभवस्तावदबोधजातोयावन्नजिज्ञासतआत्मतत्त्वम् । यावत्क्रियास्तावदिदंमनोवैकर्मात्मकंयेनशरीरबन्धः ॥ ५ ॥ एवंमनःकर्मवशंप्रयुङ्क्तेअविद्ययात्मन्युपधीयमाने । प्रीतिर्नयावन्मयिवासुदेवेनमुच्यतेदेहयोगेनतावत् ॥६॥ यदानपश्यत्ययथागुणेहांस्वार्थेप्रमत्तःसहसा विपश्चित । गतस्मृतिर्विन्दतितत्रतापानासाद्यमैथुन्यमगारमज्ञः ॥ ७ ॥ पुंसःस्त्रियामिथुनीभावमेतंतयोर्मिथोहृदयग्रन्थिमाहुः । अतोगृहक्षेत्रसुताप्तवित्तैर्जनस्यमोहोऽयमहंममेति ॥ ८ ॥ यदामनोहृदयग्रन्थिरस्यकर्मानुबद्धोदृढआश्लथेत । तदाजनःसंपरिवर्ततेऽस्मान्मुक्तःपरंयात्यतिहायहेतुम् ॥ ९ ॥ हंसेगुरौमयिभक्त्याऽनुवृत्त्यावितृष्णयाद्वन्द्वतितिक्षयाच । सर्वत्रजन्तोर्व्यसनावगत्याजिज्ञासयातपसेहानिवृत्त्या ॥ १० ॥ मत्कर्मभिर्मत्कथयाचनित्यंमद्देवसङ्गात्-

ऋषभदेवजी बोले कि—हेपुत्रो ! देहधारि जीवोंका यह शरीर दुःख देनेवाले विषयभोगों के योग्यनहींहै,क्योंकि यह विषय भोग तो विष्ठा भोगी बाराहादिकोंको भी मिलताहै इसहेतु यह देह दिव्य तपके लियेहै कि जिस तपसे हृदय शुद्ध होताहै और हृदयकी शुद्धिसे अनन्तब्रह्मका सुख होताहै ॥१॥ हरिभक्तोंका सेवा मुक्ति का द्वारहै और स्त्रीसंगी मनुष्योंकी संगति नरकका द्वारहै, महात्मा पुरुष वहीहैं कि जो समान चित्त, प्रशांत, अक्रोधी, सबके सुहृद और सदाचार करनेवालेहैं २ ॥ और जो मुझ परमेश्वरमें सुहृद्भाव रखकर उसी भावको पुरुषार्थ जानते हैं; तथा उन मनुष्यों में कि जिनके शरीर पालनकीही बातहै और धर्मके विपरीत व स्त्री पुत्रादिकों में जिनकी प्रीतिनहीं है और अपने देह निर्वाहके अतिरिक्त किसी वस्तुकी आकांक्षा नहीं करते ॥ ३ ॥ प्रमत्त मनुष्य इन्द्रियों की प्रीतिके लिये पाप करताहै कि जो पाप देहका क्लेशका देनेवाला है, इसीकारण पाप करनेको मैं भला नहीं मानता॥४॥जबतक यह मनुष्य आत्मतत्त्वको नहीं जानता, तबही तक उसके निकट अज्ञानकृत आत्मस्वरूपका तिरस्कार होताहै क्योंकि जबतक क्रिया रहती है तबतक यह मन कर्मोंमें लगारहताहै कि जिससे शरीरका बन्धन होताहै ॥ ५ ॥ इसप्रकार आत्मा मायासे जबतक घिरारहताहै तबतक मनपूर्वकर्मोंके बशमें रहताहै यहमनही मनुष्यको कर्मके बन्धनमें डालता है इसलिये पुरुष जबतक मुझ वासुदेवमें भक्ति नहीं करता तबतक इसशरीरकी मुक्तिनहींहोती६॥ जबतक इन्द्रियोंकी चेष्टाका आत्मासे कुछ सम्बन्ध नहीं है इसप्रकार ज्ञानी बनकर नहीं जानता, तब तक यह अज्ञानी अपने ज्ञानको भूलकर स्वार्थमें उन्मत्त होने से मैथुन सुखवाले घरको पा दुःखको प्राप्तहोताहै ॥७॥ पुरुषका स्त्रीके साथ जो भावहै उसको स्त्री पुरुषके हृदयकी गांठ कहते हैं, कि जिस मिथुनी भावसे मनुष्य अहंताको प्राप्तहो घर, क्षेत्र, पुत्र कुटुम्बी और धनमें मोहको प्राप्त होताहै ॥ ८ ॥ कर्मबन्धनसे बँधीहुई हृदयकी ग्रन्थि जब शिथिल होजाती है तब यह पुरुष मिथुन भावसे निवृत्त होकर अहंकार को छोड़, मुक्तहो परमपदको प्राप्त होताहै ॥ ९ ॥ अहंकार को छुड़ानेके हेतु २५ साधना कही हैं—हंसरूपी जो मैंहूं उसकी भक्ति गुरुकी सेवा, तृष्णा का त्याग, सुख दुःखका सहन, सर्वत्र प्राणियों के दुःखका देखना तत्त्व जिज्ञासा, तप, काम्यकर्मका त्याग ॥ १० ॥ हेपुत्रों ! मेरे अर्थ कर्म करना, मेरी कथा सुनना और कहना, मेरे भक्तोंका संग

गुणकीर्तनान्मे। निर्वैरसाम्योपशमेनपुत्राजिहासया देहगेहात्मबुद्धेः ॥११॥ अध्यात्मयोगेनविविक्तसेवयाप्राणेन्द्रियात्माभिजयेनसध्र्यक्। सच्छ्रद्धयाब्रह्मचर्येणशश्वदसंप्रमादेनयमेनवाचाम् ॥ १२ ॥ सर्वत्रमद्भावविचक्षणेनज्ञानेनविज्ञान विराजितेन। योगेनधृत्युद्यमसत्वयुक्तो लिंगंव्यपोहेत्कुशलोऽहमाख्यम् ॥ १३ ॥ कर्माशयं हृदयग्रन्थिबन्धमविद्ययाऽऽसादितमप्रमत्तः। अनेनयोगेनयथोपदेशंसम्यग्व्यपोह्योपरमेतयोगात् ॥ १४ ॥ पुत्रांश्चशिष्यांश्चनृपोगुरुर्वामल्लोककामोमदनुग्रहार्थः। इत्थंविमन्युरनुशिष्यादतज्ज्ञान्नयोजयेत्कर्मसुकर्ममूढान् ॥ १५ ॥ कंयोजयन्मनुजोऽर्थंलभेत निपातयन्नष्टदृशंहिगर्ते। एवंनराणांविषयस्पृहाच्च निपातयन्निरयेत्वन्धकूपे ॥ १६ ॥ लोकःस्वयंश्रेयसिनष्टदृष्टिर्योऽर्थान्समीहेतनिकाम कामः। अन्योऽन्यवैरःसुखलेशहेतो रनन्तदुःखंचनवेदमूढः ॥ १७ ॥ कस्तंस्वयंतदभिज्ञोविपश्चिद् विद्यायामन्तरेवर्तमानम्। दृष्ट्वापुनस्तंसघृणःकुबुद्धिंप्रयोजयेदुत्पथगंयथान्धम् ॥ १८ ॥ गुरुर्नसस्यात्स्वजनोनसस्यात्पितानसस्याज्जननीनसा स्यात्। दैवंनतत्स्यान्नपतिश्चसस्यान्नमोचयेद्यःसमुपेतमृत्युम् ॥ १९ ॥ इदंशरीरं ममदुर्विभाव्यंसत्वंहिमेहृदयंयत्रधर्मः। पृष्ठेकृतोमेयदधर्मआरादतोहिमामृषभंप्राहुरार्याः २०॥ तस्माद्भवंतोहृदयेनजाताःसर्वेमहीयांसममुंसनाभम्। अक्लिष्टबुद्ध्या भरतंभजध्वंशुश्रूषणंतद्भरणंप्रजानाम् ॥२१॥ भूतेषुवीरुद्भ्यउदुत्तमायेसरीसृपास्ते

मेरे गुणोंका कीर्तनकर निर्वैर समभाव, उपशम, देह गेहमे अहन्ता ममताका त्याग करना ११ ॥ ज्ञान शास्त्र का अभ्यास, एकान्तमें रहना, प्राण इन्द्री और मनको जीतना, श्रद्धा, ब्रह्मचर्य रखना प्रमादनकरना, और बाणीको जीतना सर्वत्र मेरी भावनाके अनुभव पर्यंत ज्ञान साधना और समाधि लगाना इन २५ साधनो से धीर्य, प्रयत्न विवेकयुक्त चतुर मनुष्य अहंकार को दूर करे ॥ १३ ॥ जिसमें कर्म रहते हैं ऐसे–अविद्या प्राप्त हृदय ग्रन्थि बन्धनको और समस्त उपाधियोंको मेरे बनायेहुये उपायमे दूरकर योगसे उपरामको प्राप्तहोवे ॥ १४ ॥ मेरे अनुग्रहको पुरुषार्थ जाननेवाला जो पिता, गुरू, राजा मेरे लोकके जानेकी इच्छाकरे तो वह अपने पुत्र,शिष्य प्रजाको क्रोधको छोड़ इसी रीतिपर शिक्षादे किन्तु कर्मके विषे मूढ बुद्धि मूर्खको कर्मोंमें न लगावे ॥ १५ ॥ जन्मसेही सकाम कर्म करनेवाले मनुष्योंको फिर सकामकर्ममेंही प्रवृत्त करना तो अंधे को कुएँमें गिरानेकी समानहै ऐसे काम करनेवालेको कोई पुरुषार्थ नहीं प्राप्त होसकता ॥ १६ ॥ यह लोक अपना श्रेय देखने मे आप तो अंधा है; क्योंकि यह लोभी तो दूसरेका धन चाहता है और इसीसे परस्पर बैर बाधता है फिरभी यह थोड़े सुखके हेतु प्रयत्न करता है वहां अत्यन्त दुःख आजाते है कि जिनको यह मूर्ख नहीं जानता ॥ १७ ॥ संसार के दुःखका जानने वाला ज्ञानवान पुरुष, अज्ञानके मार्ग में भटकते हुये मूढ मनुष्यको देखकर उसे संसार मार्ग में कभी न प्रवृत्त करेगा क्योंकि अज्ञानी मनुष्यको अज्ञानका मार्ग बताना ऐसा है कि जैसे उलटी राहपर चलनेवाले अंधेसे "इसीराह चलाजा" ऐसे कहनाहो ॥ १८ ॥ संसाररूपी मृत्युमें प्राप्तहुये मनुष्योंको जोइसलोक से नहीं छुड़ासकता उसे देवता, गुरु, स्वजन, पिता, माता, पति नहीं कहना चाहिये ॥ १९ ॥ इस मेरे शरीरमें किसी की तर्कना नहीं चलती क्योंकि मैंने इस शरीरको अपनी इच्छाही से प्रगट किया है मेराहृदय तत्वरूप है कि जिस तत्वमें धर्म रहता है, मैंने अधर्मको दूरही से पीछेकिया है इसीसे विद्वानलोग मुझेऋषभ कहते हैं ॥ २० ॥ हे पुत्रगण! तुमसब मेरेशुद्ध हृदय से उत्पन्न हुयेहो इसकारण मत्सरताको छोड़ सुबुद्धि से अपने बड़ेभाई भरत का सेवाकरो बस ऐसा करने से तुम्हारे सबही कर्तव्य कर्म सफल होजायेंगे ॥ २१ ॥ प्राणीयोंकी

श्रुतबोधनिष्ठाः । ततोमनुष्याः प्रमथास्ततोऽपिगन्धर्वसिद्धाविबुधानुगाये ॥ २२ ॥ देवासुरेभ्योमघवत्प्रधानादक्षादयोब्रह्मसुतास्तुतेषाम् । भवः परः सोथविरिञ्चवीर्यः समत्परोऽहंद्विजदेवदेवः २३॥नब्राह्मणैस्तुलयेभूतमन्यत्पश्यामिविप्राः किमतःपरंतु। यस्मिन्नृभिः प्रहुतंश्रद्धयाऽहमश्नामिकामंनतथाऽग्निहोत्रे॥२४॥ धृतातनूरुशतीमपुराणायेनेहसत्त्वंपरमंपवित्रम् । शमोदमः सत्यमनुग्रहश्च तपस्तितिक्षाऽनुभवश्चयत्र२५ मत्तोप्यनन्तात्परतः परस्मात्स्वर्गापवर्गाधिपतेर्नकिंचित् येषांकिमुस्याद्वितरेण ते षामकिंचनानांमयिभक्तिभाजाम्॥२६॥ सर्वाणिमद्धिष्ण्यतया भवद्भिश्चराणिभूतानिसुताध्रुवाणि । संभावितव्यानिपदेपदेवो विविक्तदृग्भिस्तदुहार्हणंमे ॥२७॥ मनोवचोदृक्करणेहितस्य साक्षात्कृतंमेपरिबर्हणंहि । विनापुमान्येन महाविमोहात्कृतान्तपाशान्न विमोक्तुमीशेत् ॥ २८ ॥ श्रीशुक उवाच ॥ एवमनुशास्यात्मजान्स्वयमनुशिष्टानपि लोकानुशासनार्थंमहानुभावः परमसुहृद्भगवानृषभापदेश उपशमशीलानामुपरतकर्मणां महामुनीनां भक्तिज्ञानवैराग्यलक्षणं पारमहंस्यधर्ममुपशिक्षमाणः स्वतनयशतज्येष्ठं परमभागवतं भगवज्जनपरायणं भरतं धरणिपालनायाभिषिच्य स्वयं भवन एवोर्वरितशरीरमात्रपरिग्रह उन्मत्त इव गगनपरिधानः प्रकीर्णकेश आत्मन्यारोपिताहवनीयो ब्रह्मावर्तात्प्रवव्राज ॥ २९ ॥ जडान्धमूकबधिरपिशाचोन्मादकवदवधूतवेषो ऽभिभाष्यमाणोऽपि जनानांगृहीतमौनव्रतस्तू-

सेवा करनाभी तुम्हारा धर्म है क्योंकि चेतन अचेतन प्राणियों में स्थावर श्रेष्ठ हैं उनमें जंगम अति उत्तम है उनमें ज्ञानयुक्त पशुश्रेष्ठ हैं उनमें मनुष्य, मनुष्यों से भूतप्रेतादि प्रमथगण प्रमथगणों से गंधर्व गन्धर्वों से सिद्ध, और सिद्धों से किन्नरादिक श्रेष्ठ हैं ॥ २२ ॥ किन्नरों से असुर, असुरों से सुर, सुरोंमें इन्द्रादि, इन्द्रादि में दक्षादि, दक्षादि से महादेव और उनसे ब्रह्माजी तथा ब्रह्माजी से मैं और मुझसे भी ब्राह्मण उत्तम हैं क्योंकि मैं उनका पूजन करताहूं ॥ २३ ॥ फिरवहां बैठेहुए ब्राह्मणों से पुकारकर बोले कि हे ब्राह्मणो ! ब्राह्मणों से बढ़कर और कोई प्राणी मुझे प्रिय नहीं है, मैं श्रद्धापूर्वक ब्राह्मणों के मुखमें होमहुये पदार्थोंका जितना स्वीकार करताहूं वैसा अग्नि में होमेहुये पदार्थका नहीं स्वीकार करता ॥ २४ ॥ जो ब्राह्मण मेरी वेदमूर्तिको धारण करते हैं तथा जिसमें अत्यंत पवित्र सत्वगुण, शम, दम, सत्यदया, तप, तितिक्षा और स्वरूपानुभव यह गुण हैं उनसे अधिक और किसेदेखूं ? ॥ २५ ॥ स्वर्ग, मोक्षके स्वामी और अनंत, परात्पर जोमैं हूं उनसे भी कुछलेनेकी वह इच्छा नहीं करते फिर राजादिकसे कब इच्छा करेंगे, वेनिष्किञ्चन मेरीभक्ति ही को करते हैं ॥ २६ ॥ हेपुत्रों ! सम्पूर्ण स्थावर जंगम प्राणीमेरे निवासरूप हैं इसमें पवित्र दृष्टिहो क्षण २ में तुम इनका सत्कारकरो प्राणियोंका सत्कार करनाही मेरामुख्य पूजन है ॥ २७ ॥ सब कर्ममेरे अर्पण करना यहीमन, बचन, दृष्टि और इन्द्रीकी चेष्टाका फल है बिनामेरे अर्पण किये महा मोहरूप काल पाशसे छूटनेको कोई समर्थ नहीं होता ॥ २८ ॥ श्रीशुकदेवजी बोलेकि-इसभांति महा यशस्वी और सबके सुहृद ऋषभ भगवान ने, यद्यपि अपने पुत्र सबभांति से ही चतुर थे, परन्तु मनुष्यों के उपदेश देनेके हेतु प्रशांत और कर्म बंधन से रहित महा मुनियोंको भक्ति, ज्ञान और वैराग्यके दिखाने वाले, परमहंस आश्रम के धर्मकी शिक्षादेने के हेतु, अपने सौ पुत्रोंमें जेठ परम भागवत, हरिभक्तों के सेवक भरतको पृथ्वी पालन के हेतु राज्याभिषेक कर तत्कालही संसारको छोड़दिया, और आत्मामें होमाग्निका आरोपकर, केशखोल, उन्मत्तकी भांति नग्नहो, केवल शरीरको संगले, ब्रह्मावर्तमें सन्यास धारणकर वहांसे चलनिकले ॥ २९ ॥ जड़, अंधा, गूंगा, बहरा, पिशाच, उन्मत्त की सदृश, अवधूत बेषबना, मनुष्यों के पुकारने परमौन बोलते, इसप्रकार भगवान ऋषभ

र्णीबभूव ॥ ३० ॥ तत्रतत्रपुरग्रामाकरखेटवाटखर्वटशिबिरव्रजघोषसार्थगिरिवना- श्रमादिष्वनुपथमवनिचरापसदैः परिभूयमानो मक्षिकाभिरिव वनगजस्तर्जनता- डनावमेहनष्ठीवनग्रावशकृद्रजः प्रक्षेपपूतिवातदुरुक्तैस्तदविगणयन्नेवासत्संस्था- न एतस्मिन्देहोपलक्षणे सदपदेश उभयानुभवस्वरूपेण स्वमहिमावस्थानेनास- मारोपिताहंममाभिमानत्वादविखण्डितमनाः पृथिवीमेकचरः परिबभ्राम ॥ ३१ ॥ अतिसुकुमारकरचरणोरःस्थलविपुलबाह्वंसगलवदनाद्यवयवविन्यासः प्रकृतिसुंद रस्वभावहासमुमुखो नवनलिनदलायमानशिशिरताराारुणायतनयनरुचिरःसदृश सुभगकपोलकर्णकण्ठनासो विगूढस्मितवदनमहोत्सवेन पुरवनितानां मनसि कुसु- मशरासनमुपदधानः परागवलम्बमानकुटिलजटिलकपिशकेशभूरिभारोऽवधूतम- लिननिजशरीरेण ग्रहगृहीतइवादृश्यत॥ ३२॥ यर्हिवावसभगवाल्लोकमिमं योगस्या- द्धा प्रतीप मिवाचक्षाणस्तत्प्रतिक्रियाकर्म बीभत्सितमिति व्रतमाजगरमास्थितः शयानएवाश्नाति पिबति खादत्यवमेहति हदतिस्म चेष्टमान उच्चरितआदिग्धो देशः ॥ ३३ ॥ तस्यहयःपुरीषसुरभिसौगन्ध्यवायुस्तं देशंदशयोजनं समन्ता- त्सुरभिंचकार ॥ ३४ ॥ एवंगोमृगकाकचर्यया व्रजंस्तिष्ठन्नासीनःशयानः काकमृ- गगोचरितःपिबतिखादत्यवमेहतिस्म ॥ ३५ ॥ इतिनानायोगचर्याचरणो भगवान्कै- वल्यपतिर्ऋषभोऽविरतपरममहानन्दानुभव आत्मनिसर्वेषां भूतानामात्मभूतेभगव ति वासुदेव आत्मनो ऽव्यवधानानतरोदरभावेन सिद्धसमस्तार्थपरिपूर्णो योगैश्व

देवजीने मौन व्रतको धारण किया ॥ ३० ॥ वह इसप्रकार से अकेले पुर, गांव, खान, खेतहरों के गांव, पुष्पवाटिका, सेनानिवासके डेरे, गोशाला, गोपस्थान, यात्राजनों के मिलनके स्थान, पर्वत, वन और ऋषियोंके आश्रममें, इसप्रकार मार्ग २ में नीच मनुष्य उन ऋषभ देवका अपमान करते थे अर्थात् कोई उनके ऊपर मूत्र करदेता, थूकदेता, पत्थर से मारता, विष्ठा डालता, धूलडालदेता, अधोवायुका पवन छोड़देता, कोई गालीदेता था तौभी यह उनका अपराध नहीं गिनतेथे कि जैसे मक्खियों का अपराध हाथी नहीं गिनता, क्योंकि आत्मा और अनात्मा के अनुभव के कारण आप अपनेही स्वरूप में रहते थे, इस देहरूप आकार में उनके देहाभिमान नहीं था, और मनसदा अ- खंडित रूप रहताथा; इसहेतु भूमिमें अकेले घूमाकरतेथे ॥ ३१ ॥ इनके हाथ, पांव तथा वक्षःस्थल अत्यंत सुकुमारथे भुजा, कंधा, गला और मुख यह बड़ेथे; सुंदर स्वभाव, आपही सिद्ध हंसनेसे मुखआति शोभित था- कमल दलसे अतिसुंदर नेत्रथे, सुंदर कपोल, कान, कंठ, नासिका यह सब समान सुशोभित थे; इनकी मंद मुसकान वाले मुख के विलासको देखकर नारियों को कामदेव उत्पन्न होताथा, उनकी चारोओरका कुटिल जटाआका भारआंगको लटक रहाथा अवधूतशरीर मलीन होनसे ऐसा प्रतीत होताथा कि मानोकोई भूतलगाहो इसप्रकार के दृष्टि आतेथे ॥ ३२ ॥ ऋषभदेव भगवान ने यह विचाराकि जबतक यह मनुष्य पीछा न छोड़ेंगे तबतक योग साधन न बनेगा, तब उन्होंने अजगर की वृत्तिधारण कर सोतेही सोते खाना, पीना, मल, मूत्रादिका त्याग करना प्रारंभ किया और विष्ठामें लोटकर सम्पूर्ण देहमें विष्ठाका लेपकर लिया ॥ ३३ ॥ उनकी विष्ठा की सुगंधित पवन से चारोंओर की दश दशयोजनकी भूमि सुगंधित होगई ॥ ३४ ॥ ऋषभदेवजी ने इसभांति गौ, मृग, और काकसा आचरण धारण किया अर्थात् चलते, खड़े रहते, बैठते और सोते तथा अपनी इच्छानुसारही मलमूत्र त्याग करते थे ॥ ३५ ॥ ऋषभ देवजी आपही मोक्षपति, अखंडित, परमानंद रूप साक्षात भगवान थे, तौभी मनुष्योंकी भाड़ न होजाय इसहेतु योगियोंको इसभांति करना चाहिये उन्हें दिखाने के कारणही ऐसा करते थे, समस्त प्राणियों के आत्मरूप

र्याणि वैहायसमनोजवान्तर्धानपरकायप्रवेशदूरग्रहणादीनि यदृच्छयोपगतानि नांजसानृपहृदयेना भ्यनन्दत् ॥ ३६ ॥

इतिश्रीमद्भा०पं०ऋषभदेवानुचरितेपंचमोऽध्यायः ॥ ५ ॥

राजोवाच ॥ ननूनंभगवआत्मारामाणां योगसमीरितज्ञानावभर्जितकर्मबीजानामैश्वर्याणि पुनःक्लेशदानिभवितुमर्हन्ति यदृच्छयोपगतानि॥१॥ऋषिरुवाच ॥ सत्यमुक्तंकिंत्विहएकेनमनसोऽद्धा विश्रम्भमनवस्थानस्यशठकिरातइवसंगच्छंते॥२॥तथाचोक्तम् ॥ नकुर्यात्कर्हिचित्सख्यंमनसिह्यनवस्थिते । यद्विश्रम्भाच्चिराच्चीर्णं चस्कन्दतपऐश्वरम् ॥३॥ नित्यंददातिकामस्य च्छिद्रंतमनुयेऽरयः । योगिनःकृतमैत्रस्य पत्युर्जायेवपुंश्चली॥४॥कामोमन्युर्मदोलोभः शोकमोहभयादयः । कर्मबन्धश्चयन्मूलः स्वीकुर्यात्कोनुतद्बुधः ॥ ५ ॥ अथैवमखिललोकपाललामोऽपि विलक्षणैर्जडवदवधूतवेषभाषाचरितैरविलक्षितभवत्प्रभावो योगिनां साम्परायविधिमनुशिक्षयन्स्वकलेवरं जिहासुरात्मन्यात्मानमसंव्यवहितमनर्थान्तरभावेनान्वीक्षमाण उपरतानुवृत्तिरुपरराम ॥ ६॥ तस्यहवाएवंमुक्तलिंगस्य भगवतऋषभस्य योगमायावासनया देहइमां जगतीमभिमानाभासेन चंक्रममाणः कोङ्कवेंककुटकान्दक्षिणकर्णाटकान्देशान्यदृच्छयोपगतः कुटकाचलोपवन आस्यकृताश्मकवल उन्मादइव मुक्तमूर्धजोऽसंवीतएवविचचार ॥ ७ ॥ अथसमीरवेगविधू-

और अपने स्वरूप भूत केवल परमात्मा से शरीरादिक के अनुसंधान रहित एकता पानेके कारण आपस्वयं सिद्ध, सम्पूर्ण फलोंसे पूर्ण और कृतार्थ थे, इससे आकाश गमन मनकी समान शरीर वेग, अंतर्धान, दूसरे की देहमें प्रवेश करना और दूसरी बातोंको दूरसे जानलेना इत्यादिक सिद्धियें आपसे आप प्राप्तहोगईं परन्तु हेराजन्! अपने मनसे उन्होंने उनका भी आदर न किया ॥३६॥

इति श्रीमद्भा०महा०पंचम०सरलाभाषाटीकायांपंचमोऽध्यायः ॥ ५ ॥

राजा परीक्षित बोले कि-हे भगवन्! आत्माराम मुनिने कि जिनके कर्मबीज, योग जनित ज्ञानसे भस्म होगये थे आपसे आप प्राप्त हुईं सिद्धियोंका "कि जो उनको अहंता ममताकी देनेवाली न होती," क्यों अनादर किया॥ १ ॥ श्री शुकदेवजी बोले कि-हे राजन्! यह तुमने सत्य कहा, परन्तु बुद्धिमानलोग इस मनका विश्वास इस प्रकार नहीं करते कि जिस प्रकार बधिक पकड़े हुये मृगका अथवा मृग बधिकका विश्वास नहीं करता ॥ २ ॥ इसीसे कहा है कि इस चञ्चलमनका विश्वास कदापि नकरे कि जिस विश्वास से महादेवजी का बहुत काल का संचय किया हुआ तप मोहिनी रूप के देखतेही क्षीण होगया था ॥ ३ ॥ जैसे व्यभिचारिणी स्त्री अपने जारोंको अवकाश देकर अपने पति को नष्ट करती है ऐसेही विश्वासकरने वाले योगीका मन भी उस योगीके शत्रु कामदेव तथा उस के अनुगामी दूसरे वैरी क्रोधादिकों को अवकाश देकर उसे भ्रष्ट कर देता है ॥ ४ ॥ जिस मनसे काम, क्रोध, मद, मोह, लोभ, शोक और भय आदि शत्रु तथा कर्म बंधन भी होते हैं ऐसे मनका कौन विवेकी पुरुष अपने बशमेंमानेगा ॥५॥ अखिल लोकपालों के शिरोमणि जड़की सदृश अवधूत बेष भाष, व आचरण से जिन का भगवत प्रभाव जानने में नहीं आता था ऐसे ऋषभदेवजी योगीराजों को देह छोडने का प्रकार सिखानें के हेतु उनको जब अपने शरीर त्यागन की इच्छा हुई तब अपनें में तथा परमात्मा में एक भाव बिचार देहाभिमान का त्याग किया ॥ ६ ॥ उनका स्थूल शरीर भी अन्य जीवन्मुक्तोंकी समान ईश्वर होनेके कारण योगमाया की वासना से अभिमाना भास रूपसे पृथ्वी पर भ्रमण करने लगा और आपही आप कोंक, बेंक, कुटक दक्षिणकर्णाटक देशों की ओर चलागया वहां भी कुटकाचल के उपवन में मुखमें पत्थरका टुकडा

तवेणुविकर्षणजातोग्रदावानलस्तद्वनमालेलिहानः सहतेनददाह ॥ ८ ॥ यस्यकिलानुचरितमुपाकर्ण्य कोंकवेंककुटकानां राजाऽर्हन्नामोपशिक्ष्यकलावधर्म उत्कृष्यमाणे भवितव्येन विमोहितः स्वधर्मपथमकुतोभयमपहाय कुपथपाषण्डमसमञ्जसं निजमनीषया मन्दः संप्रवर्तयिष्यते॥९॥ येनह वावकलौमनुजापसदा देवमायामोहिताः स्वविधिनियोगशौचचारित्र विहीना देवहेलनान्यपव्रतानिनिजानिजेच्छया गृह्णाना अस्नानानाचमनाशौचकेशोल्लुञ्चनादीनि कलिनाऽधर्मबहुलेनोपहतधियो ब्रह्मब्राह्मणयज्ञपुरुषलोकविदूषकाः प्रायेण भविष्यन्ति ॥ १० ॥ ते च ह्यर्वाक्तनया निजलोकयात्रयाऽन्धपरम्परयाश्वस्तास्तमस्यन्धे स्वयमेव प्रपतिष्यन्ति ॥ ११ ॥ अयमवतारो रजसोपप्लुतकैवल्योपशिक्षणार्थः ॥ तस्यानुगुणान्श्लोकान्गायन्ति ॥ १२ ॥ अहो भुवः सप्तसमुद्रवत्या द्वीपेषु वर्षेस्वधिपुण्यमेतत् ॥ गायन्ति यत्रत्यजना मुरारेः कर्माणि भद्राण्यवतारवन्ति ॥१३॥ अहो नु वंशो यशसाऽवदातः प्रैयव्रतो यत्र पुमान्पुराणः ॥ कृतावतारः पुरुषः स आद्यश्चचार धर्मं यदकर्महेतुम् ॥ १४ ॥ कोन्वस्य काष्ठामपरोनुगच्छेन्मनोरथेनाप्यभवस्य योगी ॥ यो योगमायाः स्पृहयत्युदस्ता ह्यसत्तया येन कृतप्रयत्नाः ॥ १५ ॥ इति ह स्म सकलवेदलोकदेवब्राह्मणगवां परमगुरोर्भगवत ऋषभाख्यस्य विशुद्धाचरितमीरितं पुंसां समस्तदुश्चरिताभिहरणं परममहामङ्गलायनमिदमनुश्रद्धयोपचितयाऽनुश्रृणोत्याश्रावयति वाऽवहितो भगवति तस्मिन्वासुदेव एकान्ततो भक्तिरनयोरपि समनुवर्तते ॥ १६ ॥ यस्यामेव कवय आत्मानमविरतं विविधवृजिनसं-

रखकर उन्मत्तकी भांति बाल खोले नंगे शरीर फिरताथा ॥७॥ फिर वायुके वेगसे परस्पर बांस रगड़ने के कारण जो प्रचंड दावानल उत्पन्न हुआ उस से बन के साथही ऋषभदेवजी का देह भी भस्महोगया ॥८॥ जब कलिकालमें पाप बढ़ेगा तब कोंक वेंक, और कुटक देश का अर्हन राजा इन ऋषभदेवजी के चरित्रों को सुन उसे आप सीख, पूर्वजन्मके संचितपापों से मोहित होकरअपने निजधर्म वेदमार्ग को छोड अपने विचारसेही पाखण्डरूप कुपथ को प्रवृत्त करेगा ॥ ९ ॥ इस मार्ग में चलनेवाले नीचपुरुष अज्ञानके वशहो शौच तथा सदाचारको छोडदेंगे और स्नान तथा आचमन न करना, मलीनता रखना, केश उखाडना, इत्यादिक खोटेकर्मों से कि जिनसे देवताओं का निरादर होता है उन नियमों को अपनी इच्छासे ग्रहण करेंगे और कलियुग से बुद्धि नष्ट होने के कारण वेद, ब्राह्मण हरि तथा साधुओं की निन्दा करेंगे ॥ १० ॥ यह मनुष्य वेद बाह्य पथ में विश्वास रखने के कारण आपही आप घोर नरक में पड़ेंगे ॥ ११ ॥ यह अवतार रजोगुण व्याप्त मनुष्यों को मोक्षमार्ग का उपदेश देने के लिये हुआ था, ऋषभदेव के चरित्रों को कितनेही लोग उत्तम श्लोकों से गाते हैं ॥ १२ ॥ उन. श्लोकोंका अर्थ यह है ससागरा पृथ्वी के द्वीप खण्डों में यही भारतखण्ड अधिक पुण्यरूप है क्योंकि इस भारतवर्ष के लोग भगवानके मंगलीक अवतारों का गान कियाकरते हैं ॥ १३ ॥ जहां प्रियव्रत के वंशका बड़ाही सुन्दर यश है कि—जिसमें पुराण पुरुषने अवतार धारणकर मोक्ष देनेवाले धर्म का आचरण किया ॥ १४ ॥ ऋषभ देवजीके मार्ग में चलनेका मनोरथ कोई दूसरा योगीभी कर सकताहै ? कारण कि दूसरे योगी अणिमादिक सिद्धियोंकी इच्छा करतेहैं और ऋषभदेवजीने तो उन्ह सिद्धियोंको दूरही से त्याग कर दिया ॥ १५ ॥ इसप्रकार सम्पूर्ण वेद, लोक देवता ब्राह्मण गौ इनके परमगुरु भगवतऋषभदेवजी के विशुद्ध चरित्र मनुष्योंके समस्त पाप नाश करनेवाले हैं जो मनुष्य इस मंगलमय चरित्रको श्रद्धापूर्वक सुने वा सुनावे तो श्रोता और वक्ताकी भगवान

सारपरितापोपतप्यमानमनुसवनं स्नापयन्तस्तथैव प्रया निर्वृत्या ह्यपवर्गमात्यन्तिकं परमपुरुषार्थमपि स्वयमासादितं नो एवाद्रियन्ते भगवदीयत्वेनैव परिसमाप्तसर्वार्थाः ॥ १७ ॥ राजन्पतिर्गुरुरलं भवतां यदूनां दैवं प्रियः कुलपतिः क्व च किंकरो वः ॥ अस्त्वेवमङ्ग भगवान्भजतां मुकुन्दो मुक्तिं ददाति कर्हिचित्स्म न भक्तियोगम् ॥ १८ ॥ नित्यानुभूतनिजलाभनिवृत्ततृष्णः श्रेयस्यतद्रचनया चिरसुप्तबुद्धेः लोकस्य यः करुणयाभयमात्मलोकमाख्यान्नमो भगवते ऋषभाय तस्मै ॥ १९ ॥

इति श्रीमद्भा० म० पं० ऋषभदेवानुचरितवर्णनं नाम षष्ठोऽध्यायः ॥ ६ ॥

श्रीशुक उवाच ॥ भरतस्तुमहाभागवतोयदाभगवताऽवनितलपरिपालनाय सञ्चिन्तितस्तदनुशासनपरःपञ्चजनीं विश्वरूपदुहितरमुपयेमे ॥ १ ॥ तस्यामुह वाआत्मजान्कार्त्स्न्येनानुरूपानात्मनःपञ्चजनयामासभूतादिरिवभूतसूक्ष्माणि २ ॥ सुमतिंराष्ट्रभृतंसुदर्शनमावरणंधूम्रकेतुमिति । अजनाभंनामैतद्वर्षंभारत मितियत आरभ्यव्यपदिशन्ति ॥ ३ ॥ सबहुविन्महीपतिःपितृपितामहवदुरुवत्सलतयास्वे स्वेकर्मणिवर्तमानाःप्रजाःस्वधर्ममनुवर्तमानःपर्यपालयत् ॥ ४ ॥ ईजेचभगवन्तंयज्ञ क्रतुरूपंक्रतुभिरुच्चावचैः श्रद्धयाहृताग्निहोत्रदर्शपूर्णमासचातुर्मास्यपशुसोमानां प्रकृतिविकृतिभिरनुसवनंचातुर्होत्रविधिना ॥ ५ ॥ संप्रचरत्सुनानायागेषु विरचिताङ्गक्रियेष्वपूर्वंयत्तत्क्रियाफलंधर्माख्यंपरेब्रह्मणियज्ञपुरुषेसर्वदेवता लिंगानांमन्त्राणामर्थनियामकतयासाक्षात्कर्तरिपरदेवतायांभगवतिवासुदेवएवभावयमानआत्म

वासुदेव में भक्तिहाते ॥१६॥ सदैव नानाभांतिके संसाररूप दुःखोंसे वारम्वार तपाये जाते चित्तको समयरपर जो भक्तिमें स्नानकरातेहैं और जो भक्तिकोही परमानन्द मानतेहैं वह भक्त परमपुरुषार्थ रूप मोक्षपरभी स्नेह नहीं रखते ॥ १७ ॥ हे राजन् ! भगवान तुम्हारे पांडवोंके और यादवोंके पालक, गुरु, देवता प्यारे और नियंताथे वरन किसी २ कालमें सेवक भावभी करतेथे, तो भी हे राजा ! सामान्य रीतिसे देखते हैं तो एसा ज्ञात होताहै कि—भगवान भजन करनेवालेको मुक्ति देतेहैं प्रेमयुक्त भक्तिको कभी नहींदेते, ॥ १८ ॥ नित्य अनुभव कियेहुये अपने रूपके लाभसेही कृतार्थहुए ऋषभदेवजीने देहादिक मनोरथोंसे बहुतसमयतक,सत्य कल्याणके न जाननेवाले मनुष्यों पर कृपाकरके आत्मतत्व का उपदेश किया एसे उन परमेश्वरको मैंनमस्कार करताहूं ॥ १९ ॥

इतिश्रीमद्भा० महा०पञ्चम० सरलाभाषाटीकायांषष्ठोऽध्यायः ॥ ६ ॥

श्रीशुकदेवजी बोले कि—हेराजन् ! महाभागवत भरतजीको जब भगवान् ऋषभदेवने पृथ्वी रक्षाके हेतु आज्ञाकी तब उनकी आज्ञाशिरोधार्यकर, विश्वरूपकी कन्या पंचजनीसे उन्होंने विवाह किया ॥ १ ॥ उस पंचजनीमें अपनी समान पांचपुत्र सुमति, राष्ट्रभृत, सुदर्शन, आवरण, और धूम्रकेतु इसभांति उत्पन्न किये कि जैसे अहंकारसे शब्द, रस,रूप स्पर्श,गन्ध यह पांच तन्मात्रा उत्पन्न होतीहैं इस अजनाभिखण्डमें जबसे भरतने राज्यकिया तबसे इसकानाम भारतवर्षहुआ ॥ ॥३॥उस सर्वज्ञ राजाने बड़ी कृपालुतासे अपनेर धर्ममें चलनेवाली प्रजाओंका अपने बाप दादोंके सदृश धर्मकाअनुसरण करके पालनकिया॥४॥समयरमें चातुर्होत्रकी विधिसे छोटे बड़े यज्ञकर यज्ञ रूप भगवानका श्रद्धासे पूजनकिया,अग्निहोत्रदर्श,पूर्णमास,चातुर्मास्य,पशुयाग,और सोमयाग इनकी प्रकृति औरविकृति दोनोंकी गईथीं॥५॥नानाप्रकारकी क्रियाओंसे कियेहुये यज्ञोंके अपूर्वफल धर्मको भरतजी यज्ञपुरुष,तथा वेदके मन्त्रोंमें बोधितकिये इन्द्रादिक देवताओंके नियन्ता परमदेव भगवान के अर्पण करदेतेथे ऐसा करनेसे जिसके रागद्वेषादिकमल निवृत्त होगये हैं ऐसे यजमान भरतजी

नैपुण्यमृदितकषायोहविःष्वध्वर्युभिर्गृह्यमाणेषुसयजमानोयज्ञभाजोदेवास्तान्पुरुषावयवेष्वभ्यध्यायत् ॥ ६ ॥ एवंकर्म विशुद्धया विशुद्धसत्वस्यान्तर्हृदयाकाशशरीरेब्रह्मणिभगवतिवासुदेवेमहापुरुषरूपोपलक्षणेश्रीवत्सकौस्तुभवनमालाऽरिदरगदादिभिरुपलक्षिते निजपुरुषहृल्लिखितेनात्मनिपुरुषरूपेण विरोचमानउच्चैस्तरांभक्तिरनुदिनमेधमानरयाअजायत ७॥ एवंवर्षायुतसहस्रपर्यंतावसितकर्मनिर्वाणावसरोऽधिभुज्यमानंस्वतनयेभ्यो रिक्थंपितृपैतामहंयथादायं विभज्यस्वयंसकलसम्पन्निकेतात्स्वनिकेतात्पुलहाश्रमं प्रवव्राज ॥ ८ ॥ यत्रहवावभगवान्हरिरद्यापितत्रत्यानांनिजजनानांवात्सल्येनसंनिधाप्यतइच्छारूपेण ॥९॥ यत्राश्रमपदान्युभयतोनाभिभिर्दृषच्चक्रैश्चक्रनदीनामसरित्प्रवरासर्वतः पवित्रीकरोति ॥ १०॥ तस्मिन्वावकिलसएकलः पुलहाश्रमोपवने विविधकुसुमकिसलयतुलसिकाऽम्बुभिः कन्दमूलफलोपहारैश्चसमीहमानोभगवतआराधनं विविक्तउपरतविषयाभिलाष उपभृतोपशमःपरांनिर्वृतिमाप ॥ ११ ॥ तयेत्थमविरतपुरुषपरिचर्ययाभगवतिप्रवर्धमानानुरागभरद्रुतहृदयशैथिल्यः प्रहर्षवेगेनात्मन्युद्भिद्यमानरोमपुलककुलकऔत्कण्ठ्यप्रवृत्तप्रणयबाष्पनिरुद्धावलोकनयनएवं निजरमणारुणचरणारविन्दानुध्यानपरिचितभक्तियोगेनपरिप्लुतपरमाह्लादगम्भीरहृदयहृदावगाढ धिषणस्तामपिक्रियमाणांभगवत्सपर्यांनसस्मार ॥ १२ ॥ इत्थंधृतभगवद्व्रतऐणेयाजिनवाससाऽनुसवनाभिषेकार्द्रकपिशकुटिलजटाकलापेनचविरोचमानः सूर्यर्चाभगवन्तंहिरण्मयंपुरुषमुज्जिहानेसूर्यमण्डलेऽभ्युपतिष्ठन्नेतदुहोवाच ॥ १३ ॥ परोरजः सवितु

जिससमय ब्राह्मण हाथमें हविलेतेथे, उससमय उस हविके भागके लेनेवाले देवताओंकोभी भगवान का अंगही विचारतेथे ॥ ६ ॥ इसप्रकार कर्मकी शुद्धिसे जिनका अंतःकरण शुद्ध होगया है ऐसे भारतजीके भक्तों के हृदयमें प्रगटहुये रूपसे मनमें स्थित भगवान्में दिनप्रतिदिन बढ़तीहुई उत्कट भक्ति उत्पन्नहुई भारतजीके मनमें हृदयगत आकाशके भीतर परमपुरुष भगवान शंख, चक्र आदि धारणकिये कौस्तुभ वनमाला आदिसे शोभायमान होकर दर्शनदेतेथे ॥ ७ ॥ इसप्रकार सहस्रोंवर्षों के उपरांत राज्यभोगका अन्तजान, आप अपने बाप दादोंके राज्यको कि जिसको भोगतेथे अपने पुत्रोंमें बांट संपत्ति युक्त घरको छोड़ तपके हेतु हरिक्षेत्रमेंगये ॥ ८ ॥ कि जिस आश्रममें भगवान हरि अबतक भक्तोंके प्रेमके निमित्त उनकी इच्छानुसार दर्शन देतेहैं ॥९॥ इस आश्रममें गंडकीनाम श्रेष्ठ नदीहै कि जिसकी शिलाओंके ऊपर और नीचे नाभिवाले चक्र उत्पन्न होतेहैं वे चक्र आश्रम के चारोंओरके देशोंको पवित्र करतेहैं ॥ १० ॥ इस हरिःक्षेत्रके उद्यानमें भरतजी अकेलेरहतेथे और नानाभांतिके कन्दमूल फलफूल जल आदि नैवेद्योंसे ईश्वरका यजन करतेथे ऐसे भरतजी विषयों से तृष्णा रहित तथा प्रशान्त हो और आनन्दको प्राप्तहुये ॥ ११ ॥ इसप्रकार नित्य भगवत् आराधन से ईश्वर में भक्ति बढ़कर हृदयद्रवी भूतहो शिथिल होजाता था, आनन्द के वेगसे शरीर में रोमांच होजाताथा और उत्कण्ठा से बारम्बार आतेहुये प्रेमके आंसुओं से दृष्टिलोप होगईथी, भक्तोंको भक्तिदेनेवाले परमेश्वरके चरणोंमें बढ़ेहुये भक्तियोगके कारण चारोंओर व्याप्त परमानन्दरूप गहरी नदीमें बुद्धि डूबजानेसे करनेवाली भगवत्पूजा का भी स्मरण नहीं रहताथा ॥ १२ ॥ इसभांति भगवत व्रतधारण करते मृगछालाको ओढ़े व त्रिकाल स्नानके हेतु भीगीहुई तथा उलझीहुई कुटिल जटाओंसे शोभित भरतजी प्रभातकालमें पृथ्वीसे निकलतेहुये सूर्य मंडलके सामने खड़ेहो उसमें वर्त्तमान भगवानकी उपासना करतेहुये यह मन्त्र पढ़तेथे॥ १३॥ परो-

जातवेदोदेवस्यभर्गोमनसेदंजनान ॥ सुरेतसाऽदःपुनराविश्यचष्टेहंसंगृध्राणंनृषद्रिङ्गिरामिमः ॥ १४ ॥

इतिश्रीमद्भा० म०पञ्चमस्कंधेसप्तमोऽध्यायः ॥ ७ ॥

श्रीशुक उवाच ॥ एकदातुमहानद्यांकृताभिषेकनैयमिकावश्यकोब्रह्माक्षरमभिगृणानोमुहूर्तत्रयमुदकान्तउपविवेश ॥ १ ॥ तत्रतदाराजन्हरिणी पिपासयाजलाशयाभ्याशमेकैवोपजगाम ॥ २ ॥ तयापेपीयमानउदकेतावदेवा विदूरेणनदतोमृगपतेरुन्नादोलोकभयंकरउदपतत् ॥ ३ ॥ तमुपश्रुत्यसामृगवधूःप्रकृतिविक्लवाचकितनिरीक्षणासुतरामपिहरिभयाभि निवेशव्यग्रहृदयापारिप्लवदृष्टिरगततृषाभयात्सहसैवोच्चक्राम ॥४॥ तस्याउत्पतन्त्याअन्तर्वत्न्याउरुभयावगलितोयोनिनिर्गतोगर्भः स्रोतसिनिपपात ॥ ५ ॥ तत्प्रसवोत्सर्पणभयखेदातुरास्वगणेनवियुज्यमानाकस्यांचिद्दर्यांकृष्णसारसतीनिपपाताथचममार ॥ ६ ॥ तंत्वेणकुणकंकृपणंस्रोतसाऽनूह्यमानमभिवीक्ष्यापविद्धंबंधुरिवानुकम्पयाराजर्षिर्भरतआदायमृतमातरमित्याश्रमपदमनयत् ॥ ७ ॥ तस्यहवाएणकुणकउच्चैरेतस्मिन्कृतनिजाभिमानस्याहरहस्तत्पोषणपालनलालनप्रीणनानुध्यानेनात्मनियमाः सहयमाःपुरुषपरिचर्यादयएकैकशः कतिपयेनाहर्गणेन वियुज्यमानाः किल सर्व एवोदवसन् ॥ ८ ॥ अहो बतायं हरिणकुणकः कृपण ईश्वररथचरणपरिभ्रमणरयेण स्वगणसुहृद्बन्धुभ्यः परिवर्जितः शरणं च मोपसादितो मामेव मातापितरौ भ्रातृज्ञातीन्यौथिकांश्चैवोपेयाय नान्यं कंचन वेद मय्यतिविस्रब्धश्चात एव मया मत्परायणस्य पोषण-

यजुःसावित्तुर्जातिवेदा इत्यादि प्रकृतिसे परे कर्मोंके फलको देनेवाले, बुद्धिको गति देनेवाले मनहीसे रचनेवाले इसजगतमें अन्तर्यामीरूपसे प्रकाशकर तृष्णावाले जीवोंको चैतन्यशक्तिसे पालनेवाले जो सूर्यनारायणकाआत्मरूप तेजहै उसकी हम शरणलेते हैं ॥ १४ ॥

इतिश्रीमद्भा० महा० पंचम०सरलाभाषाटीकायांसप्तमोऽध्यायः ॥ ७ ॥

श्रीशुकदेवजीबोले कि हेराजन् एक समय यह भरतजी दैहिक क्रिया से निश्चिन्त हो, गण्डकी नदी में स्नान, संध्या वन्दनादिक कर्म कर तीन मुहूर्त का नियम ले जलके तीर पर बैठे, ओंकार का जप कररहेथे ॥ १ ॥ कि उसी समय में एक हरिणी प्यास से व्याकुल हो अकेली नदी तटपर जलपाने को आई, वह जल पीती थी कि इतने में एक सिंह ने भयंकर गर्जना की ॥२॥ यह गर्जना सुन डरपोक स्वभाववाली हिरणी सिंह के भयसे हृदय में अति व्याकुलहो चकित दृष्टिसे इधरउधर देखने लगी ॥३॥ इससे उसने भयके मारे तृषा शान्ति होने के पहिलेही नदी के सन्मुख किनारे की ओर शीघ्रता से छलांगमारी ॥ ४ ॥ यह हिरिणी गर्भिणीथी, इससे, भयसे शीघ्रता पूर्वक छलांग मारने के कारण इसका गर्भ चलितहो योनिद्वार से निकल नदी के जल में गिर पड़ा ॥ ५ ॥ प्रसव का होना, नदी का फलांगना, भय से दुःखित, इन कारणों से क्लेशित अपने झुण्ड से छूटीहुई वह हिरणी किसी पर्वत की गुफा में आपड़ी और वहां आकर मरगई ॥ ६ ॥ इस अनाथ हिरणी के बालक को जल में बहता देख राजर्षिभरत कृपापूर्वक उसे उठाकर अपने आश्रम में ले आये ॥ ७ ॥ यह हरिणका बालक मेराही बच्चा है, ऐसा अभिमान बघनेसे उसको दूध, घास आदि खिला पिलाकर लालन, पलान, करने लगे, उसमें आसक्ति बंधजाने से उनके स्नान, ध्यान यमनियम, भगवत्सेवा इत्यादिक सबही एक एक करके छूटगये ॥८॥ भरतजीने मनमें विचारा कि यह इस निराश्रय मृगके बालक ने कालकी गतिसे अपने कुटुम्बियों से अलगहो ईश्वरकी कृपासे मेराही आश्रय ग्रहण किया है। इसकारण मुझीको माता पिता भाई और

पालनप्रीणनलालनमनसूयुनाऽनुष्ठेयं शरण्योपेक्षादोषविदुषा ॥ ९ ॥ नूनं ह्यार्याः साधव उपशमशीलाः कृपणसुहृद एवंविधार्थे स्वार्थानपि गुरुतरानुपेक्षन्ते ॥ ॥ १० ॥ इति कृतानुसङ्ग आसनशयनाटनस्थानाशनादिषु सह मृगजहुना स्नेहानुबद्धहृदय आसीत् ॥ ११ ॥ कुशकुसुमसमित्पलाशफलमूलोदकान्याहरिष्यमाणो वृकसालावृकादिभ्यो भयमाशंसमानोयदासह हरिणकुणकेन वनंसमाविशति ॥ १२ ॥ तदा पथिषु च मुग्धभावेन तत्र तत्र विषक्तमतिप्रणयभरहृदयः कार्पण्यात्स्कन्धेनोद्वहति एवमुत्सङ्ग उरसिचाऽऽधायोपलालयन्मुदं परमामवाप ॥ १३ ॥ क्रियायां निर्वर्त्यमानायामन्तरालेप्युत्थायोत्थाय यदैनमभिचक्षीत तर्हिवावस वर्षपतिःप्रकृतिस्थेनमनसा तस्माआशिष आशास्ते स्वस्ति स्ताद्वत्स तेसर्वतइति ॥१४॥ अन्यदा भृशमुद्विग्नमना नष्टद्रविण इव कृपणः सकरुणमतितर्षेण हरिणकुणकविरहविह्वलहृदयसंतापस्तमेवानुशोचन्किल कश्मलं महदभिरम्भितइतिहोवाच ॥ १५ ॥ अपिबतसवैकृपण एणबालको मृतहरिणीसुतो हाममानार्यस्य शठकिरातमतेरकृतसुकृतस्य कृतविस्रम्भ आत्मप्रत्ययेन तदविगणयन्सुजन इवागमिष्यति ॥ १६ ॥ अपिक्षेमणास्मिन्नाश्रमोपवने शष्पाणिचरन्तं देवगुप्तंद्रक्ष्यामि ॥ १७ ॥ अपिचनवृकः सालावृकोऽन्यतमोवा नैकचर एकचरो वाभक्षयति॥१८॥निम्लोचतिह भगवान्सकलजगत्क्षेमोदयस्त्रय्यात्माऽद्यापि ममन मृगवधून्यास आगच्छति ॥ १९ ॥ अपिस्विदकृतसुकृतमागत्य मां सुखयिष्यति

संगी जानता है। मेरे अतिरिक्त और दूसरेको यह नहीं जानता; यह मेरेऊपर अति विश्वास किये रहता है इसहेतु मुझको इसका लालन, पालन, तोषण और पोषण दोषदृष्टि (कि इसमें मेरे सब कर्म नष्ट होजांयगे) छोडकर करना योग्य है क्योंकि शरणागत का अनादर करने से जैसापाप होता है उसको मैं भलीभांति जानताहूं जोमनुष्य साधु, शांतस्वभाव, दीनबंधुहोते हैं वे ऐसे कार्य्यमें अपने बडेभारी स्वार्थ कोभी त्यागदेते हैं ॥१०॥ इसभांति आसक्त होनेसे भरतजीका हृदय मृगशिशुपर स्नेह से परिपूर्ण होगया इसकारण वह बैठते, सोते, फिरते, भोजन आदि करने के समयभी उस मृगके बच्चेको अपनेही संगरखते थे ॥ ११ ॥ जब कुश, फूल, समिध, फल, मूल, जल आदि लेनेको वनमेंजाते तबपीछे में कुत्ते, और भेडिये आदिके भयकी शंका से उसे अपने साथही लेजातेथे ॥ १२ ॥ जब वह बच्चा मार्गमें खड़ाहोजाता, तब भरतजी स्नेह से व्याकुलहो उसे थका हुआ जानकंधे आदिमें धरकर लेचलते थे और उसे कभी गोदमें कभी छातीमें धरकर प्यार करते थे ऐसे खिलातेहुये भरतजीउससे अत्यानंद पानेलगे॥१३॥पूजासे निवृत्त होनेपर अथवा बीचमेंही उठकर उसे देखने और प्रसन्न मनहो उसे आशीष देते कि हेपुत्र! तेरासब ओर से मंगलहो ॥१४॥ यह बच्चा जब इधर उधर चलाजाता और दिखाई न देता, तबद्रव्य खोयेहुये कृपणकी भांति उनका मन व्याकुल होजाता था और उस हरिणी के बच्चे के विरह से, संतप्तहो करुणा पूर्वक इसभांति कहते कि ॥ १५ ॥ हाय! मैं अत्यन्त अभद्र और अभागाहूं, मैं अतिमूर्ख और व्याधेकी नाई निठुर हूं, उस मृतक हरिणीके निराश्रय बच्चेका चित्त अत्यन्तही पवित्र था, इसीकारण से उसने मुझमें विश्वासकियाथा, वहक्या सुजनकी समान मेरे दोषोंको कुछ नगिन कर फिरमेरे निकट आवेगा ॥ १६ ॥ अहाक्या मैं उसे फिरदेख पाऊंगा कि वह देवताओं से रक्षित होकर नवीन दूबको भक्षण करताहुआ इस आश्रमके उपवन में घूमरहा है ॥ १७ ॥ क्याऐसा होगाकि भेडिया, कुत्ते, सिंहादि हिंसक जन्तुओंने उसको अबतक भक्षण न कियाहो ॥ १८ ॥ जिसके उदय से सम्पूर्ण लोकोंका मंगल होता है, वह वेदमूर्त्ति भगवान सूर्य्य यह देखोअस्ता चलको जारहे हैं परन्तु हरिणी जिसको

हरिणराजकुमारो विविधरुचिरदर्शनीयनिजमृगदारकविनोदैरसंतोषं स्वानामपनुदन् ॥ २० ॥ क्ष्वेलिकायांमांमृषासमाधिनाऽऽमीलितदृशं प्रेमसंरम्भेण चकितचकित आगत्य पृषदपरुषविषाणाग्रेणलुठति ॥ २१ ॥ आसादितहविषि बर्हिषिदूषिते मयोपालब्धो भीतभीतः सपद्युपरतरास ऋषिकुमारवदवहितकरण कलापआस्ते ॥ २२ ॥ किंवाअरेआचरितं तपस्तपस्विन्याऽनया यदियमवनिः सविनयकृष्णसारतनयतनुतरसुभग शिवतमाखरखुरपद पंक्तिभिर्द्रविण विधुरातुरस्य कृपणस्यमम द्रविणपदवीं सूचयन्त्यात्मानंचसर्वतः कृतकौतुकं द्विजानां स्वर्गापवर्ग कामानां देवयजनंकरोति ॥ २३ ॥ अपिस्विदसौ भगवानुडुपतिरेनं मृगपतिभयान्मृतमातरं मृगबालकं स्वाश्रमपरिभ्रष्टमनुकम्पया कृपणजन वत्सलः परिपाति ॥ २४ ॥ किंवात्मजविश्लेषज्वरदवदहन शिखाभिरुपतप्यमानहृदयस्थलनलिनीकंमामुपसृतमृगीतनयं शिशिरशांतानुरागगुणित निज वदन सलिलामृतमयगभस्तिभिःस्वधयतीतिच ॥ २५ ॥ एवमघटमानमनोरथाकुल हृदयोमृगदारकाभासेनस्वारब्धकर्मणायोगारम्भणतो विभ्रंशितः सयोगतापसो भगवदाराधनलक्षणाच्चकथमितरथाजात्यन्तरएणकुणकआसङ्गः साक्षान्निःश्रेयस प्रतिपक्षतया प्राक्परित्यक्तदुस्त्यजहृदयाभिजातस्यतस्यै वमन्तराय विहतयोगारम्भणस्यराजर्षेर्भरतस्यतावन्मृगार्भकपोषणपालनप्रीणनलालनानुषङ्गेणा विगणयतआत्मानमहिरिवाखुबिलंदुरतिक्रमःकालःकरालरभसआपद्यत ॥ २६ ॥ तदा

मेरेपास धरोहर की भांति रखगई है, वह अबतक भी नहीं आता है ॥ १९ ॥ अहा ! वह हरिण कुमार लौटकर अपनी स्वाभाविक विविध मनोहर दर्शनीय क्रीड़ओं से आत्मीय जनको सन्तोष उत्पन्न कराकर क्या इस अकृत पुण्यमंदभाग्यको सुखी करेगा ॥ २० ॥ क्योंकि क्रीड़ाके समय जबमें मिथ्या समाधिको लगाकर नेत्रोंको मूंदेरहताथा, तबवह प्रेममें भरकर चकितहो चारोंओर घूमकर जल बिन्दुकी समान कोमल सींगोंकी नोकसे मुझेस्पर्श करता था ॥ २१ ॥ और जबवह चाबचूनकर अपने मुखसे घृतमेंभांजे कुशोंको अशुद्धकर देताथा तबमें उसका तिरस्कार करताथा तब वह मेरे डरपाने से ऋषिकुमार की सदृश अपनी क्रीड़ा बंदकर निश्चलहोकर बैठजाताथा ॥ २२ ॥ अरे ! इस तपस्विनी पृथ्वी ने क्या तपकिया है ? कि जिस तपसे विनय सहित कृष्ण मृगके बालक की छोटी, सुंदर, सुखदायी और कोमल खुरीबाले पैरोंकी पंक्तियों से चारोंओर से शोभायमान होकर, मुझ मृगके बालक रूप धनसे रहित और दुःखितको उसके धनका मार्ग बतलाती है और आपभी स्वर्ग तथा मोक्षकी इच्छा रखने वाले ब्राह्मणोंकी यज्ञस्थान बनी है ॥२३॥ (चन्द्रमा में मृगाकार चिन्ह देखकर कहते हैं) दीनोंपर दयाकरने वाले यह चन्द्रमाजी मेरे आश्रम से बिछुड़े हुये मृतकमाताके पुत्रको कृपापूर्वक गोदमें लेकर सिंहके डरसे पालन करते होंगे ? ॥ २४ ॥ मैंकि जिसका हृदयरूपी स्थलकमलपुत्र बिछुड़ने के संतापरूप अग्निकी ज्वाला से संतप्त होरहा है, उसके निकट यह मृगीका पुत्रमीछे आकर अपने मुखके शीतल, शांत और प्रेमसे वृद्धि प्राप्तहुये अमृतकीकिरणोंकेसमान, बिंदुओं से हृदयको ठंडा करेगा ? ॥ २५ ॥ ऐसे अघट मान मनोरथों से उनका हृदय व्याकुल होगया, इस तपस्वी भरत राजाका योग व भगवत्पूजन, प्रारब्धनेही मृगशिशु के आभास से नष्टकिया नहींतो जिनभरत राजाने, जिनका त्याग कठिनतासे होवे ऐसे पुत्रोंको मोक्षमार्गका बैरीजान सहजहीं में त्यागकियाथा उनका चित्त दूसरे जातिके मृगछौनेपर आसक्त होवे ? इसभांति बाधा पड़ने से योगारंभ से नष्टहुये और मृगशावक के लालन, पालन में रहने से, अपने आत्माकी चिंतासे निश्चिन्त भरत राजाका प्रचंड वेगवाला तथा टालने

नीमपिपार्श्ववर्तिनमात्मज मिवानुशोचन्तमभिवीक्षमाणोमृगएवाभिनिवेशितमना विसृज्यलोकमिमंसह मृगेणकलेवरंमृतमनुनमृतजन्मानुस्मृतिरितरवन्मृगशरीरमवाप ॥ २७ ॥ तत्रापिहवाआत्मनोमृगत्वकारणंभगवदाराधनसमीहानुभावेनानुस्मृत्य भृशमनुतप्यमानआह ॥२८ ॥ अहोकष्टंभ्रष्टोऽहमात्मवतामनुपथाद्यद्विमुक्तसमस्त सङ्गस्य विविक्तपुण्यारण्यशरणस्यात्मवतआत्मनि सर्वेषामात्मनांभगवति वासुदेवेतदनुश्रवणमननसंकीर्तनाराधनानुस्मरणा भियोगेनाशून्यसकलयामेनकाले नसमावेशितं समाहितंकात्स्न्येंनमनस्तत्तुपुनर्ममाबुद्धस्यारान्मृगसुतमनुपरिसुस्राव ॥ २९ ॥ इत्येवंनिगूढनिर्वेदो विसृज्यमृगींमातरंपुनर्भगवत्क्षेत्रमुपशमशीलमुनिगणदयितंशालग्रामंपुलस्त्यपुलहाश्रमं कालंजरात्प्रत्याजगाम ॥ ३० ॥ तस्मिन्नपि कालंप्रतीक्षमाणःसङ्गाच्चभृशमुद्विग्नआत्मसहचरः शुष्कपर्ण तृणवीरुधावर्तमानो मृगत्व निमित्तावसानमेवगणयन्मृगशरीरं तीर्थोदकक्लिन्नमुत्ससर्ज ॥ ३१ ॥

इतिश्रीमद्भा०महा०पञ्चम०अष्टमोध्यायः ॥ ८ ॥

श्रीशुक उवाच ॥ अथकस्यचिद्द्विजवरस्याऽङ्गिरः प्रवरस्यशमदमतपःस्वाध्यायाध्ययनत्यागसंतोष तितिक्षाप्रश्रयविद्याऽनसूयात्मज्ञानानन्दयुक्तस्यात्मसदृशश्रुतशीलाचाररूपौदार्यगुणानवसोदर्या अङ्गजाबभूवुः मिथुनंचयवीयस्यांभार्यायाम् ॥ १ ॥ यस्तुतत्रपुमांस्तंपरमभागवतंराजर्षिप्रवरंभरतमुत्सृष्टमृगशरीरंचरमशरीरेणविप्रत्वंगतमाहुः ॥ २ ॥ तत्रापिस्वजनसङ्गाच्च भृशमुद्विजमानोभगवतः

पर न टलने वाला काल ऐसे आप्राप्त हुआ कि जैसे मूषक के बिलपर सर्प ॥ २६ ॥ उसकाल भी अपने निकट वर्ती मृगपुत्र का शोच पुत्रकी भांति करता था उसे देखने से भरत राजाका मन उसी में रहा, इससे शरीर तथा मृग के छूटने परभी उसको मृग जन्म ही लेना पड़ा परन्तु उस जन्म में भी भरतजी को पहिले जन्म का स्मरण बनारहा ॥ २७ ॥ उस मृग देहमे, भगवत आराधन के प्रभाव से अपने मृग होने के कारण को स्मरण कर बड़े ताप को प्राप्त हो अपने मन में कहने लगा कि ॥ २८ ॥ अहो ! बड़ा बुराहुआ मैं विवेकी जनों के मार्ग से भ्रष्ट हुआ सबको छोड़ अकेले पवित्र वन में योगमार्ग से सब प्राणियों के आत्मा परब्रह्म परमात्मा का भजन करताथा और उन भगवान् के श्रवण, कीर्तन, आराधन स्मरण में लगे रहने से मेरा कोई समय व्यर्थ नजाताथा, परन्तु यह सब मेरी मूढ़ता से मृग छौने के पाछे दूरही से निकल गया ॥२९॥ इस भांति अपने गूढ़ वैराग्य से अपनी मृगी माताको वहीं कालंजर पर्वतमें छोड़ हरि क्षेत्र में आया कि जिस क्षेत्र में बहुत से शांत मुनि लोग प्रेम पूर्वक रहते हैं और पुलह पुलस्त्य मुनि का वहां तपस्थान है और उस गांव का नाम शाल के वृक्ष होनेसे शालग्राम कहलाता है ॥ ३० ॥ इस आश्रम में रहकर कालकी बाट देखताथा और किसीका साथ नहोजाय इस डरसे वह अकेला फिरता हुआ सूखे पत्ते घास, लताओं का भोजन कर कालक्षेप करताथा मृग देह के अंत को गिनता हुआ कितने दिनों के उपरांत एक दिन गंडकी नदी के जलमें अपनी मृगदेह को छोड़ दिया ३१॥

इति श्रीम० महा० पंचम० सरला भाषाटीकायां अष्टमो० ॥ ८ ॥

श्री शुकदेवजी बोले—कि शम, दम, तप, स्वाध्याय, त्याग, संतोष, तितिक्षा, नम्रता, विद्या, अनुसूया, आत्मज्ञान में आनंद इन गुणों युक्त एक श्रेष्ठ अङ्गिरा वंशी ब्राह्मण की बड़ी स्त्री में अपने सदृश शील, आचार, रूप, गुण, और उदारता युक्त नौ पुत्र उत्पन्न हुए ॥ १ ॥ और दूसरी स्त्री में एक कन्या और एक पुत्र उत्पन्न हुआ इसमें जो पुत्र हुआथा वह परम भागवत राजर्षियों में श्रेष्ठ मृग देह छोड़े हुए भरतजी थे इस अन्त के शरीर में यह ब्राह्मण हुए ऐसा कहते हैं ॥ २ ॥ इस

कर्मबन्धविध्वंसनश्रवणस्मरणगुणविवरणचरणारविंदयुगलंमनसाविदधदात्मनः प्रतिघातमाशंकमानो भगवदनुग्रहेणानुस्मृतस्वपूर्वजन्मावलिरात्मानमुन्मत्तजडांधबधिरस्वरूपेणदर्शयामासलोकस्य ॥ ३ ॥ तस्यापिहवाआत्मजस्यविप्रःपुत्रस्नेहानुबद्धमनाआसमावर्तनात्संस्कारान्यथोपदेशंविदधानउपनीतस्यचपुनःशौचाचमनादीन्कर्म नियमाननभिप्रेतानपिसमशिक्षयत् अनुशिष्टेनहिभाव्यंपितुःपुत्रेणेति ॥ ४ ॥ सचापितदुह पितृसन्निधावेवासध्रीचीनमिवस्मकरोति छन्दांस्यध्यापयिष्यन्सह व्याहृतिभिःसप्रणवशिरस्त्रिपदींसावित्रीं ग्रैष्मवासंतिकान्मासानधीयानमप्यसमवेतरूपंग्राहयामास ॥ ५ ॥ एवंस्वतनुजआत्मन्यनुरागावेशितचित्तः शौचाध्ययनव्रत नियमगुर्वनलशुश्रूषणाद्यौपकुर्वाणककर्माण्यनभियुक्तान्यपिसमनुशिष्टेनभाव्यमित्यसदाग्रहःपुत्रमनुशास्यस्वयंतावदनधिगतमनोरथः कालेनाप्रमत्तेनस्वयंगृहएवप्रमत्तउपसंहृतः ॥ ६ ॥ अथयवीयसीद्विजसतीस्वगर्भजातंमिथुनं सपत्न्यामुपन्यस्यस्वयमनुसंस्थयापतिलोकमगात् ॥ ७ ॥ पितर्युपरतेभ्रातरएनमतत्प्रभावविदस्त्रय्यांविद्यायामेवपर्यवसितमतयोनपरविद्यायांजडमतिरितिभ्रातुरनुशासन निर्बंधान्न्यवृत्संत ॥ ८ ॥ सचप्राकृतैर्द्विपदपशुभिरुन्मत्तजडबधिरेत्यभिभाष्यमाणोयदातदनुरूपाणिप्रभाषतेकर्माणिचसकार्यमाणःपरेच्छयाकरोतिविष्टितोवेतनतोवायाच्ञयायदृच्छयावोपसादितमल्पंबहु मिष्टंकदन्नंवाऽभ्यवहरतिपरंनेंद्रियप्रीति निमित्तम् ॥ नित्यनिवृत्त निमित्तस्वसिद्धविशुद्धानुभवानन्दस्वात्म

ब्राह्मण जन्म में भी अपने स्वजनों के संग से बहुत डरता था और कर्म बन्धन काटनेवाले भगवान के चरणों मे ध्यानकरताहुआ उनका श्रवण, कीर्तन, स्मरण कियाकरता था और भगवत अनुग्रह से अपने पूर्व जन्म का स्मरण कर, किसी के साथ बन्धन होने के डरसे अपने को उन्मत्त, जड़ अंधा बहिरा सा दिखाताथा ॥ ३ ॥ उस के पिता ने पुत्र स्नेह से बंधकर समावर्तन पर्यंत शास्त्रवत् संस्कार करने का प्रारंभकिया और यज्ञोपवीत देकर शौच और आचमन आदि कर्मों के नियम यद्यपि जड़ भरत को प्रिय नहीं लगते थे तोभी पिता का पुत्र को नियम सिखाना अवश्य है ऐसे विचार आग्रह पूर्वक उसे सिखाने लगा ॥ ४ ॥ परन्तु किसी भांति पिता पढ़ाने का आग्रह छोड़ देवे इस कारण जड भरत पिता के सन्मुख ही नियमादि में और का और करने लगा उसका पिता वेदपढ़ाने के प्रारम्भ में व्याहृति ओंकार और शिर संगत गायत्री मंत्र पढ़ाने लगा किंतु चार महीने होगए तो भी गायत्री नआई ॥ ५ ॥ पवित्रता, वेदाध्ययन, व्रत, नियम अग्नि और गुरुसेवा इत्यादिक कर्म जड़भरत को प्रिय नथे तौभी पुत्रके स्नेह बन्धनसे वह ब्राह्मण जड़भरत को दुराग्रह से पढ़ातारहा किंतु मनोरथ को नप्राप्त हुआ ऐसे कुछ दिनों मे वह असावधान ब्राह्मण सावधान काल की झपट में आ गया ॥ ६ ॥ उस ब्राह्मण की छोटी स्त्री अपने दोनों कन्या पुत्रों को सपत्नी को सौंप आप पति के संग सती होगई पिता के मरने के उपरांत भाइयों ने कि जिन की कर्म विद्या मे बुद्धि लगी है और ब्रह्म विद्या को नहीं जानते भरतजी के प्रभाव को नजान उनको मूढ बुद्धि समझ विद्या पढ़ाने का आग्रह छोड़ दिया ॥ ७ ॥ पशु सदृश, अधम मनुष्य जब भरतजी को हे उन्मत्त ! हे जड़ ! अरे बहरे इस प्रकार कहते थे तब भरतजीभी उन्ही शब्दों से उनको उत्तर देते थे जब कोई उनसे कुछ कर्म कराता तब वह दूसरेकी इच्छासे करतेथे और मूल्य से, भिक्षासे तथा अकस्मात् जो थोड़ाया बहुत बुरा या भला जैसा अन्न मिलजाताथा उसी को केवल जीव निर्वाह के हेतु खाया करतथे किंतु इन्द्रियों की प्रसन्नता के हेतु कुछ भी नहीं खाते थे ॥ ८ ॥ विशुद्ध अनुभव रूप परमानन्द आत्मा की कि जिसका नकोई उत्पन्न करनेवाला और न प्रगट करने वाला है उसको प्राप्त होगईथी जिस

लाभाधिगमः सुखदुःखयोर्द्वन्द्वनिमित्तयोरसंभावितदेहाभिमानः ॥ ९ ॥ शीतोष्ण वातवर्षेषु वृष इवानावृताङ्गःपीनः संहननाङ्गःस्थण्डिलसंवेशनानुन्मर्दनामज्जनरजसा महामणिरिवानभिव्यक्तब्रह्मवर्चसः कुपटावृतकटिरुपवीतेनोरुमषिणा द्विजातिरिति ब्रह्मबन्धुरिति संज्ञया अतज्ज्ञजनावमतो विचचार ॥ १० ॥ यदा तु परत आहारं कर्मवेतनत ईहमानःस्वभ्रातृभिरपि केदारकर्मणि निरूपितस्तदपि करोति किं तु न समविषमन्यूनमधिकमिति वेद कणपिण्याकफलीकरणकुल्माषस्थालीपुरीषादीन्यप्यमृतवदभ्यवहरति ॥ ११ ॥ अथ कदाचित्कश्चिद्वृषलपतिर्भद्रकाल्यै पुरुषपशुमालभतापत्यकामः ॥१२ तस्य हदैवमुक्तस्य पशोःपदवीं तदनुचराःपरिधावंतोनिशीथसमयेतमसावृतायामनधिगतपशव आकस्मिकेन विधिनाकेदारान्वीरासनेनमृगवराहादिभ्यःसंरक्षमाणमङ्गिरःप्रवरसुतमपश्यन् ॥ १३ ॥ अथतएतमनवद्यलक्षणमवमृश्यभर्तृकर्मनिष्पत्तिंमन्यमानाबद्ध्वारशनयाचण्डिकागृहमुप निन्युर्मुदाविकसितवदनाः ॥ १४ ॥ अथपणयस्तंस्वविधिनाऽभिषिच्याऽहतेनवाससाऽऽच्छाद्यभूषणालेपस्रक्तिलकादिभिरुपस्कृतं भुक्तवन्तंधूपदीपमाल्यलाजकिसलयांकुरफलोपहारोपेतया वैशससंस्थयामहतागीतस्तुतिमृदङ्गपणवघोषेणचपुरुषपशुं भद्रकाल्यः पुरतउपवेशयामासुः ॥ १५ ॥ अथवृषलराजपणिःपुरुषपशोरसृगासवेनदेवींकालींयक्ष्यमाणस्तदभिमन्त्रितमसिमतिकरालनिशितमुपाददे ॥ १६ ॥ इति

से सनमान, अपमान, सुख दुःख में देहाभिमान नहीं होताथा ॥९॥ शीत, उष्ण, पवन, और वर्षा में बैलकी सदृश खुले अंग रहाकरना सब अंग पुष्ट और दृढ थे भूमिमें सोनेसे उबटन और स्नान न करनेसे लगीहुई मिट्टी के कारण, बिना स्वच्छ किए हुए मणिके तेज की सदृश उसका ब्रह्म तेज प्रगट नहीं होताथा फटासा वस्त्र कमर में बांधे रहता और मैलासा जनेऊ पहिने रहता इससे सब इसको ब्राह्मणों में अधम जातका ब्राह्मण कहा करते थे, इस प्रकार उन मूढों से अपमानित होकर भरत इधर उधर विचरा करता था ॥ १० ॥ इसभांति भटकतेहुये भरत ने जब दूसरों का काम करके खाद्य पदार्थ लेने का आरम्भ किया तब भाइयों ने खेतके कर्म में लगादिया तो वह वही करने लगा परन्तु यहां खोदने से नीचा होजायगा और यहां मिट्टी डालने से ऊंचा होजायगा यह विचार उसे नहीं था इससे खेत बिगडगया उसके भाई चावलों के कन, खल, तुष, घुने उडद, बटलोई के नीचे की जलन आदि जो खाने को देते उसेही अमृतकी सदृशमानकर खालेता ॥ ११ ॥ किसी समय चोरों के राजाने पुत्र होने की इच्छासे भद्रकाली देवी में मनुष्य का बलिदान करने की इच्छा की ॥ १२ ॥ उन्होंने एक पुरुष को पकड़ा वह दैवेच्छासे छूटगया उसको ढूंढने के लिये राजाके लोग रात्रीहीमें दौड़े परन्तु अँधेरेमें वह पुरुष तो न मिला अकस्मात् भगवदेच्छा से ब्राह्मण के बालक भरतजीपर " कि जो खडे हुये खेतों की रक्षा हिरण, सूकरादि पशुओंसे करते थे" उनकी दृष्टि पढी ॥ १३ ॥ वह जड़ भरतजी को निर्दोष लक्षण वाला जान, हमारे राजा का काम इससे सिद्धहोगा ऐसा मान, डोरीसे बांध प्रफुल्लित मुखहो देवीजीके मन्दिर में ले गये ॥ १४ ॥ उन चोरों ने भरतजी को अपनी रीत्यनुसार स्नानकराय नवीनकपड़े पहिनाय, आभूषण, चन्दन, माला तिलकआदि से अलंकृतकर भोजनकराय गान, स्तुति, करते बाजे बजाते हुये उस पुरुष पशु को भद्रकाली के सन्मुख स्थापन किया और जब धूप, दीप, फूल, चावल, फल और नैवेद्य आदि पशुबलिकी सब विधियें होचुकीं ॥ १५ ॥ तब चोरोंके राजा के पुरोहित ने भद्रकाली को पुरुष पशु के रक्तरूप आसवसे तृप्त करने के हेतु देवी के मन्त्रसे अभि-

तेषांवृषलानांरजस्तमःप्रकृतीनांधनमदरजउत्सिक्तमनसांभगवत्कलावीरकुलंकदर्थीकृत्योत्पथेनस्वैरं विहरतां हिंसाविहाराणांकर्मातिदारुणंयद्ब्रह्मभूतस्यसाक्षाद् ब्रह्मर्षिसुतस्य निर्वैरस्यसर्वभूतसुहृदः सूनायामप्यननुमतमालम्भनंतदुपलभ्यब्रह्म तेजसातिदुर्विषहेणदन्दह्यमानेनवपुषासहसोच्चचाटसैवदेवीभद्रकाली १७॥ भृशममर्षरोषावेशरभसविलसितभ्रुकुटि विटपकुटिलदंष्ट्रारुणेक्षणाटोपातिभयानकवदनाहन्तुकामेवेदंमहाऽट्टहासमतिसंरम्भेण विमुञ्चन्तीततउत्पत्यपापीयसां दुष्टानांतेनैवासिनाविवृक्णशीर्ष्णांगलात्स्रवन्तमसृगासवमत्युष्णंसहगणेन निपीयातिपानमदविह्वलोच्चैस्तरां स्वपार्षदैः सह जगौ ननर्त च विजहार च शिरः कन्दुकलीलया॥ १८॥ एवमेव खलु महदभिचारातिक्रमः कार्त्स्न्येनात्मने फलति॥ १९॥ न वा एतद्विष्णुदत्त महदद्भुतं यदसंभ्रमः स्वशिरश्छेदन आपतितेऽपि विमुक्तदेहाद्यात्मभावसुदृढहृदयग्रन्थीनां सर्वसत्त्वसुहृदात्मनां निर्वैराणां साक्षाद्भगवता अनिमिषारिवरायुधेनाप्रमत्तेन तैस्तैर्भावैः परिरक्ष्यमाणानां तत्पाद मूलमकुतश्चिद्भयमुपसृतानां भागवतपरमहंसानाम्॥ २०॥

इति श्रीमद्भागवते० म० पं० बलिप्रदानान्मुक्ति नाम नवमोऽध्यायः॥ ९॥

श्रीशुक उवाच॥ अथ सिन्धुसौवीरपते रहूगणस्य व्रजत इक्षुमत्यास्तटे तत्कुलपतिना शिबिकावाहपुरुषान्वेषणसमये दैवेनोपसादितः स द्विजवर उपलब्ध एष पीवा युवा संहननाङ्गो गोखरवद्धुरं वोढुमलमिति पूर्वविष्टिगृहीतैः

मंत्रित कर विकराल खड्ग उठाया॥ १६॥ इस भांति राजसी और तामसी प्रकृति वाले धन के मदरूप रजोगुण से पूरित, ईश्वरके अंश वाले ब्राह्मण वंशको तुच्छ समझकर कुमार्ग में चलने वाले और हिंसाही को क्रीडारूप मानने वाले यह शूद्रलोग—साक्षात् ब्रह्मभूत, ब्रह्मर्षि के पुत्र, निर्वैर, सब प्राणियों के सुहृदरूप महात्मा के " कि जो वधके अयोग्य था " वध करने का अतिघोर कर्म करने लगे, यह देख जड़ भरत के ब्रह्मतेज से भद्रकाली देवी का शरीर जलने लगा इस कारण वह प्रतिमा छोड़कर बाहर निकल आई॥ १७॥ उन सबका अपराध न सहकर तथा शरीरके जलने से देवीजीने प्रतिमासे उछल बड़ा वेग किया, उनके नेत्ररूपवृक्षकी डालरूपी भौंहें ऊँचे मस्तक में चढगई, कुटिल नेत्रों और कुटिल डाढोंसे मुख अत्यन्त विकराल होगया और मानो सम्पूर्ण संसारको नष्ट करने का विचार हो इस प्रकार बड़े रोष से अट्टहास शब्दकर पापी पुरोहित से खड्गछीन उनचोरों के शिरकाटडाले और उनके गलेसे निकलते हुये, उष्ण रुधिर रूप मदको अपने गणों सहित पानकर, उस पानके मदसे पार्षदोंके साथ उच्चस्वर से गाने और नाचने लगीं और उनके शिरोंको गेंद बनाकर खेलने लगीं॥ १८॥ इसलिये जोमनुष्य बड़े मनुष्योंका बुराचाहते हैं उनका सभी भांतिसे बुराहोता है॥ १९॥ हेविष्णुदत्त! भगवद्भक्त परम हंसोंको अपने शिरकटनेके कालमें भी व्याकुलता नहीं होती क्योंकि देहादिक जड़पदार्थोंको आत्मभाग मानने वाले हृदयकी ग्रन्थिको वेदूरकर देते हैं और सबजीवों के सुहृद, आत्मरूप, निर्वैर ईश्वर के निर्भय चरणारविंद के मूलमें रहने वाले इन मनुष्यों की, साक्षात् भगवान अपने सुदर्शन चक्र द्वारा पालना करते हैं॥ २०॥

इतिश्रीमद्भा० महा०पंचम•सरलाभाषाटीकायां नवमोऽध्यायः॥ ९॥

श्रीशुकदेवजी बोले कि—हेमहाराज! सिन्धु सौवीर देशका राजा रहूगण कपिलदेवजीके स्थान को जाताथा कि उसमार्गमें इक्षुमती नदीके किनारेपर पालकी लेजानेवालोंका नायक बेगारमें पुरुषों के पकड़नेका प्रबन्ध करताथा उसकाल दैवयोगसे उन्हें यह श्रेष्ठ ब्राह्मण भरतजी मिलगये। इन

सह गृहीतः प्रसभमतदर्ह उवाह शिबिकां स ह महानुभावः ॥ १ ॥ यदा हि द्विजवरस्येषुमात्रावलोकानुगतेर्न समाहिता पुरुषगतिस्तदा विषमगतां स्वशिबिकां रहूगण उपधार्य पुरुषानधिवहत आह ॥ हे वोढारः साध्वतिक्रमत किमिति विषममुह्यते यानमिति ॥ २ ॥ अथ त ईश्वरवचः सोपालम्भमुपाकर्ण्योपायतुरीयाच्छङ्कितमनसस्तं विज्ञापयाम्बभूवुः ॥ ३ ॥ न वयं नरदेव प्रमत्ता भवन्नियमानुपथाः साध्वेव वहामः ॥ अयमधुनैव नियुक्तोऽपि न द्रुतं व्रजति नानेन सह वोढुमु ह वयं पारयाम इति ॥ ४ ॥ सांसर्गिको दोष एव नूनमेकस्यापि सर्वेषां सांसर्गिकाणां भवितुमर्हतीति निश्चित्य निशम्य कृपणवचो राजा रहूगण उपासितवृद्धोऽपि निसर्गेण बलात्कृत ईषदुत्थितमन्युरविस्पष्टब्रह्मतेजसं जातवेदसमिव रजसाऽऽवृतमतिराह ॥ ५ ॥ अहो कष्टं भ्रातर्व्यक्तमुरु परिश्रान्तो दीर्घमध्वानमेक एव ऊहिवान् सुचिरं नातिपीवा न संहननाङ्गो जरसा चोपद्रुतो भवान्सखे नो एवापर एते संघट्टिन इति बहु विप्रलब्धोऽप्यविद्यया विहितद्रव्यगुणकर्माशयस्वचरमकलेवरेऽवस्तुनि संस्थानविशेषेऽहंममेत्यनध्यारोपितमिथ्याप्रत्ययोब्रह्मभूतस्तूष्णींशिबिकांपूर्ववदुवाह ॥ ६ ॥ अथपुनःस्वशिबिकायांविषमगतायांप्रकुपितउवाचरहूगणः किमिदमरेत्वंजीवन्मृतो मांकदर्थीकृत्यभर्तृशासनमतिचरसि,प्रमत्तस्यचतेकरोमि चिकित्सांदण्डपाणिरिवजनतायायथा प्रकृतिस्वां भजिष्यसइति ॥ ७ ॥ एवंबह्वबद्धमपिभाषमाणंनरदेवाभिमानंरजसातमसाऽ

को पुष्ट तथा युवादेख और यह विचारकर कि बैल गधेके सदृश बोझ लेजासकताहै दूसरे बेगारियोंके संग बलपूर्वक पकड़लिया, इसकामके अयोग्य भरतजीने दूसरे बेगारियोंके संग पालकी उठाई ॥ ॥ १ ॥ महानुभाव भरतजी जीओं के दबनेके भयसे जब बाण भर पृथ्वीको देखलेते तब आगे पांव धरते इससे इनकी गति औरों के समान न होने से पालकी विषम भावको प्राप्तहुई ऐसी टेढ़ी पालकीदेख राजाने कहारोंसे कहा कि—अरे कहारो ! अच्छी रीतिसे चलो पालकीको विषम क्यों लेचलतेहो ॥ २ ॥ कहार लोग राजाके तरजन सहित बचन सुनकर दण्डके भयसे शंकितहुए और विनयके साथ कहनेलगे ॥ ३ ॥ हेराजन् ! हमारा अपराध नहींहै.हम तो आपकी आज्ञानुसार बराबर चलरहे हैं परन्तु यह पुरुष जो अभी नयाहै शीघ्रता पूर्वक नहीं चलता इससे हमभी इसके संग नहीं चलसकते ॥ ४ ॥ इसप्रकार सेवकों से दीन बचनसुन राजा ने यह निश्चय किया कि—एकके दोष होनेसे वह दोष उसके सब सङ्गियोंपर आताहै । राजा रहूगण ने ज्ञानियोंकी सेवाकीथी तो भी राजस्वभावके कारण कुछ क्रोध आजानेसे उस क्रोधके आधीनहो जड़ भरतसे कि जिनका ब्रह्मतेज दबाहुई अग्निकी सदृश प्रगट न होताथा हंसीसे इसभांति कहने लगा कि ॥ ५ ॥ हेभैया ! बड़ा कष्टहै तू बहुत थकगया होगा? तू बड़ी दूरसे अकेला पालकी उठाये चला आता है तेरा आत्मा मोटा नहीं है तू दृढ़ नहीं है तुझे बुढ़ापे ने घेर लिया है । हे सखे ! यह तेरे संगी तेरी समान नहींहै इसभांति बारबार टेढ़ी बातें करके हंसीकी; तिसपरभी जड़ भरत जीने कि जो अपने शरीरको पंचमहाभूत, इन्द्रिय, कर्म और अन्तःकरण रूप मायाके पदार्थोंसे बनाहुआहै उसमें मैं और मेरा ऐसा देहाभिमान नहींथा और आप ब्रह्मभूतथे इससेभी कुछ न कहकर पूर्वकी समान पालकी उठाकर चलनेलगे ॥ ६ ॥ परन्तु फिर पालकी टेढ़ी चलनेलगी, तब राजा क्रोधितहोकर बोला कि अरे तू क्या जीताहुआहै मरेके समानहै तू मुझे कुछ न गिनकर मेरी आज्ञाका तिरस्कार करताहै इस तेरी असावधानतासे मैं तुझे शिक्षादूंगा कि—जैसे यमराज जीओंको शिक्षादेताहै—इससे तू सीधाहोजायगा॥७॥इसभांति राजा"कि जो रजोगुण और तमोगुणसे बढ़ेहुये

नुविद्धेनमदेनातिरस्कृताशेषभगवत्प्रिय निकेतंपण्डितमानिनंसभगवान् ब्राह्मणो ब्रह्मभूतःसर्वभूतसुहृदात्मायोगेश्वरचर्यायांनातिव्युत्पन्नमतिं स्मयमानइवविगत-स्मयइदमाह ॥ ८ ॥ ब्राह्मण उवाच ॥ त्वयोदितंव्यक्तमविप्रलब्धंभर्तुःसमेस्याद्य द्विवीरभारः ॥ गन्तुर्यदिस्यादधिगम्यमध्वापीवेतिराशौन विदांप्रवादः ॥ ९ ॥ स्थौल्यंकार्श्यंव्याधयआधयश्चक्षुत्तृड्भयंकलिरिच्छाजराच । निद्रारतिर्मन्युरहं मदःशुचोदेहेनजातस्यहिमेनसंति ॥ १० ॥ जीवन्मृतत्वंनियमेनराजन्नाद्यन्तवद्य द्विकृतस्यदृष्टम् । स्वस्वाम्यभावोध्रुवईड्ययत्रतर्ह्युच्यतेऽसौविधिकृत्ययोगः ११ ॥ विशेषबुद्धेर्विवरंमनाक्चपश्यामियन्नव्यवहारतोऽन्यत् । कईश्वरस्तत्रकिमीशित-व्यंतथापिराजन्करवामकिंते ॥ १२ ॥ उन्मत्तमत्तजडवत्स्वसंस्थांगतस्यमेवीर चिकित्सितेन । अर्थःकियान्भवताशिक्षितेनस्तब्धप्रमत्तस्यचापिष्टपेषः ॥ १३ ॥ श्रीशुक उवाच ॥ एतावदनुवादपरिभाषयाप्रत्युदीर्यमुनिवरउपशमशीलउपरता नात्म्यनिमित्तउपभोगेनकर्मारब्धंव्यपनयन्राजयानमपितथोवाह ॥ १४ ॥ सचापि पाण्डवेयसिंधुसौवीरपतिस्तत्त्व जिज्ञासायांसम्यक्श्रद्धयाऽधिकृताधिकारस्तद्‌ धृदयग्रन्थिविमोचनं द्विजवचआश्रुत्यबहुयोगग्रन्थसंमतंत्वरयाऽवरुह्य शिरसा पादमूलमुपसृतःक्षमापयन् विगतनृपदेवस्मयउवाच ॥ १५ ॥ कस्त्वं निगूढश्चरसि

अभिमान के कारण किसी भगवद्भक्तको नहीं गिनता और उनका निरस्कार करता और राजापन के अहंकारमें इसभांति बहुतबोलता, उससे ब्रह्मभूत सम्पूर्ण प्राणियों के सुहृद और आत्मारूप जड भरतजी हँसते हँसते कहनेलगे॥८॥जडभरतजी बोले कि–हेरहूगण ! आपने जो कहा वह सब सत्य है! इससे मेरीकुछभी हँसी नहीं है हेवीर!यदि भारहो और चलनेको मार्गहो तौ तो तूने मेरी हंसी की, परन्तु वह कुछभी नहींहै आपने कहा कि तेरा आत्मा मोटा नहींहै सो ऐसा तो केवल मूर्खही कहते हैं ज्ञानवान नहीं, कारण कि–पंचभूतोंका समूहरूप देहही पुष्ट होताहै आत्मा नहीं ॥ ९ ॥ स्थूलपन, पतालपन, व्याधि, भूख प्यास, भय, कलह,इच्छा जरा, निद्रा, रति क्रोध अहंकार मद शोक यह सब देहाभिमानियों के होते हैं इससे मेरे यहभी भाव नहीं है ॥ १० ॥ हे राजन् ! मैं अकेला ही जीताहुआ मृतक नहीं हूं बरन सब सृष्टिही जीती हुई मृतक की तुल्य है क्यों कि आदि अंत वाला विकृत पदार्थ देखने में आता है अर्थात् जगत जन्मता और मरता है, हे स्वामी ! यदि स्वामी भाव और सेवक भाव सच्चे हों तबतो आपकी आज्ञा करना और मेरा काम करना होसकता है परंतु यह तो असत्य है जैसे आपका राज्य नष्ट होजाय और मुझे मिलजाय तो सब विपरीत होजाय ॥११॥ राजा और सेवक आदि की भेद बुद्धि का अवकाश व्यवहार में भी देखने में आता है और व्यवहार दृष्टि छोड यदि यथार्थ में विचार कियाजाय तो उसमें राजा और सेवक भाव कुछभी नहीं है तेरे राजापन के अहंकारसे हम पालकी तो लियेहीचलते हैं और क्या करैं ॥ १२ ॥ मैं तो उन्मत्त और जडकी भांति अपने स्वरूप को प्राप्त हुआ हूं हे वीर ! मेरी दंड और शिक्षा से तुझे क्या मिलेगा मैं जीवन्मुक्त नहीं हूं तौभी मुझ उन्मत्त को शिक्षा देना व्यर्थ है कि जैसे पीसे हुए पदार्थ का पीसना ॥ ॥ १३ ॥ श्रीशुकदेवजी बोलेकि–शांतस्वभाव देहाभिमान करनेवाली अविद्या से छूटाहुआ जड़भरत किजो सुख दुःखोंको भोगकर अपने प्रारब्ध कर्मकोनाश करताथा राजा रहूगणकी कहीहुई वार्त्ता का इसभांति उत्तरदे पहिले की समान पालकी को लेकर चलनेलगा ॥ १४ ॥ हेराजा परीक्षित ! यह सिंधुसौ वीरदेशका राजा कि जिसको श्रद्धासे तत्व जिज्ञासामें अधिकार मिला है जड़भरतजी "किजो हृदय की गांठको खोलने वाले और योगके ग्रंथके अनुसरण करने वालेथे" के वचन सुन

द्विजानांविमर्षिसूत्रंकतमोऽवधूतः॥ कस्यासिकुत्रत्यइहापिकस्मात्क्षेमायनश्चेदसि नोतशुक्लः ॥ १६ ॥ नाहंविशङ्केसुरराजवज्रान्नत्र्यक्षशूलान्नयमस्यदण्डात्॥ नाग्न्यर्कसोमानिलवित्तपास्त्राच्छंके भृशंब्रह्मकुलावमानात्॥ ॥ १७ ॥ तद्ब्रूह्यसङ्गो जडवन्निगूढविज्ञानवीर्यो विचरस्यपारः । वचांसियोगग्रथितानिसाधोनन:क्षमंते मनसाऽपिभेत्तुम्॥ १८ ॥ अहंचयोगेश्वरमात्मतत्त्व विदांमुनीनांपरमंगुरुंवै । प्रष्टुं प्रवृत्तःकिमिहारणंतत्साक्षाद्धरिंज्ञानकलाऽवतीर्णम् ॥ १९ ॥ सवैभवांल्लोकनिरीक्षणार्थमव्यक्तलिंगोविचरत्यपिस्वित्। योगेश्वराणांगतिमंधबुद्धिःकथंविचक्षीतगृहानुबन्धः ॥ २० ॥ दृष्टःश्रमःकर्मतआत्मनोवैभर्तुर्गन्तुर्भवतश्चानुमन्ये । यथाऽसतोदानमनाद्यभावात्समूलइष्टो व्यवहारमार्गः ॥ स्थाल्यग्नितापात्पयसोऽभितापस्तत्तापतस्तण्डुलगर्भरंधिः । देहेंद्रियास्वाशयसन्निकर्षात्तत्संसृतिःपुरुषस्यानुरोधात्॥ २२ ॥ शास्ताऽनुगोप्तानृपतिःप्रजानांयःकिंकरोवैनपिनष्टिपिष्टम् । स्वधर्ममाराधनमच्युतस्ययदीहमानोविजहात्यघौघम्॥ २३ ॥ तन्मेभवान्नरदेवाभिमानमदेनतुच्छीकृतसत्तमस्य । कृषीष्टमैत्रीदृशमार्तबन्धोयथातरे सदवध्यानमंहः २४॥

तत्काल पालकी से उतर, राजमदको छोड़ उनके चरणों में माथारख क्षमा मांगताहुआ बोलाकि ॥ १५ ॥ हेमहाराज ! आपगुप्त होकर विचरने वाले कौनहो द्विजन्माओं में तुम कौनहो क्योंकितुम यज्ञोपवीत धारण कियेहो आप कौन से अवधूतहो किसके पुत्रहो यहां क्योंआयेहो ? क्या हमारे कल्याण के लिये कपिल देवजीतो नहींहो ? ॥ १६ ॥ मैं इन्द्रके वज्र से नहीं डरताहूं महादेव जीके त्रिशूल यमके दंड, अग्नि, सूर्य्य, चन्द्र, पवन, कुबेर इनके अस्त्रसे भी नहीं डरता परन्तु ब्राह्मण कुलके तिरस्कार से बहुत डरताहूं ॥ १७ ॥ इसकारण आपसे जोप्रश्न किया, उसका उत्तरदीजिये, यद्यपि आप अपने विज्ञान रूपका प्रभाव छिपाकर संगको छोड जड़कीनाई विचर रहेहो, तथापि मेरे समीप आपकी अनन्त महिमा का प्रकाश होरहा है। क्योंकि आपने जो समस्त योगभरे वचन कहे हैं, सो मैं मनसे भी उनका अर्थ जानने में समर्थ नहींहूं ॥ १८ ॥ आत्म तत्व के जानने वाले योगेश्वर तथा मुनियों के परमगुरु, ज्ञान देनेके लिये अवतार धारण करने वाले 'कपिल देवके पास' इस बातको पूंछने जाताहूं कि इस संसार में सत्य शरण कौन है ॥ १९ ॥ क्या आपही कपिल देवतो नहींहो कि अप्रगट रूपसे लोकोंके देखने को विचरतेहो ? मंदबुद्धि तथा गृहासक्त मनुष्य योगेश्वरों की गतिकैसे जानसकता है ? ॥ २० ॥ आपने कहाकि श्रम नहीं है—यहतो मुझे असत्य ज्ञातहोता है क्योंकि कर्मादि करने से अवश्यही श्रमहोता है इसहेतु आपको भी अवश्यही श्रमहोना चाहिये; आप व्यवहार मार्गको असत् कहतेहो परन्तु जैसे घड़ेमें जल सत्यही आता है झूठा नहीं ऐसेही वह भी सत्य है ॥ २१ ॥ आपने कहाकि—सुख दुःख इत्यादिक धर्म केवल देहके हैं आत्मा के नहीं—इसमें भी मुझे संशय है—कि जैसे चूल्हेपर धरीहुई बटलोई में आंच लगाने से उसका अन्तर्वर्त्ति दूध उष्णहोता है उससे चावल उष्ण होकर खीर पकती है इसीभांति पुरुष देहको ताप होने से इन्द्रियों को और इन्द्रियों से प्राणों को और प्राणों से मनको तापहोता है और मनके ताप से उसके सम्बंधी आत्माको तापहोता है ॥ २२ ॥ आपने कहाकि स्वामी सेवक भाव असत्य है सो राजा यदि भगवद्भक्त होकर योग्यता से अपना राज्यकार्य चलावे और प्रजाका पालन तथा शिक्षाकरेतो वह पिष्टपेषण कैसे कहा जायगा, वरन मैं जानताहूं किवह अपने स्वधर्म से पाप समूह का नाश करता है ॥ २३ ॥ आपने जोकहा वह मुझे प्रतिकूल ज्ञातहोता है, इस लिये हेदीनबंधु! मैं किजो राजमद से साधुओंका अपमान करने वालाहूं तिसपर कृपा दृष्टिकरो कि जिससे साधुओं

न विक्रिया विश्व सुहृत्सखस्य साम्येनवीताभिमतेस्तवापि । महद्विमानात्स्वकृताद्धिमादृङ्नंक्ष्यत्यदूरादपिशूलपाणिः ॥ २५ ॥

इतिश्रीमद्भा०प॒ञ्चम०रहूगणजडभरतसंवादोनामदशमोऽध्यायः॥ १० ॥

ब्राह्मण उवाच ॥ अकोविदःकोविदवादवादान्वदस्यथो नातिविदांवरिष्ठः । नसूरयोहिव्यवहारमेनं तत्त्वावमर्शेनसहामनन्ति ॥ १ ॥ तथैव राजन्नुरुगार्हमेधवितानविद्योरुविजृम्भितेषु। नवेदवादेषुहितत्त्ववादःप्रायेणशुद्धोनुचकास्तिसाधुः ॥ २ ॥ नतस्यतत्त्वग्रहणायसाक्षाद्वरीयसीरपिवाचःसमासन् । स्वप्ननिरुक्त्या गृहमेधिसौख्यं नयस्यहेयानुमितंस्वयंस्यात् ॥ ३ ॥ यावन्मनोरजसापूरुषस्य सत्त्वेनवातमसावाऽनुरुद्धम् । चेतोभिराकूतिभिरातनोति निरंकुशंकुशलंचेतरंवा॥४॥ सवासनात्माविषयोपरक्तो गुणप्रवाहोविकृतःषोडशात्मा। बिभ्रत्पृथङ्नामभिरूपभेदमन्तर्बहिष्ट्वंचपुरैस्तनोति ॥ ५ ॥ दुःखंसुखंव्यतिरिक्तंच तीव्रंकालोपपन्नंफलमाव्यनक्ति । आलिंगयमायारचितान्तरात्मा स्वदेहिनंसंसृतिचक्रकूटः ॥ ६ ॥ तावानयंव्यवहारःसदाविः क्षेत्रज्ञसाक्ष्योभवतिस्थूलसूक्ष्मः । तस्मान्मनोलिङ्गमदो वदन्ति गुणागुणत्वस्यपरावरस्य ॥ ७ ॥ गुणानुरक्तंव्यसनायजन्तोः क्षेमयनैर्गु-

---

के तिरस्कार करने रूपपाप से छूटजाऊं ॥ २४ ॥ विश्वके सुहृद, सखा और समताके हेतु देहाभिमान रहित हुये आपके यद्यपि कोई विकार नहीं है तौभी मेरीसमान मनुष्य तो शिवजी की समान सामर्थ्यवान होने परभी, अपने कियेहुये महात्माओं के तिरस्कार से शीघ्रही नाशहोते हैं ॥ २५॥

इति श्रीमद्भा०महा०पंचम०सरलभाषाटीकायांदशमोऽध्यायः ॥ १० ॥

जड़ भरतजी बोले कि-तू मूढ़ होकर भी विवेकियों कीसी बातें करताहै किन्तु ऐसा कहनेसे तू विद्वान नहीं कहा जासकता, क्योंकि विद्वानोंका कथनहै कि-जब यथार्थ रीतिसे विचारा जाय तब ज्ञात होताहै कि यह व्यवहार मिथ्याहै ॥ १ ॥ हेरहूगण ! लोक व्यवहारकी सदृश वेद कथित कर्म व्यवहारभी असत्यहै, गृह सम्बन्धी यज्ञके विस्तार सम्बन्धी विद्याओं के प्रतिपादक बहुतसे वेद वाक्योंमें तत्वज्ञानकी वार्ता प्रायःनहीं प्रगटहोती कारण कि तत्वज्ञानमें राग द्वेषादिक दोषनहीं रहते और कर्मकांडकी विद्यामें रहतेहैं सकामकर्मों से तत्वज्ञानकी प्राप्ति नहींहोती किंतु जो कर्म भगवत अर्पण कियाजाय तो वह तत्वज्ञान का हेतु होजाता है ॥२॥ स्वप्न सुखकी समान गृहस्थाश्रम का सुखभी दृश्य और अनित्य होनेसे त्यागने योग्यहै जिसने ऐसा अपने हृदयमें दृढ़ विश्वास नहींकिया उसको वेदांतके वाक्य" कि जो तत्वज्ञान के लिये अति श्रेष्ठहैं,,कभी यथार्थ ज्ञान नहीं देसकते ॥ ३ ॥ इस मनुष्यका मन जबतक रजोगुण, तमोगुण, और सतोगुणके वशीभूत रहता है तबतक ज्ञानेंद्री और कर्मेन्द्रीसे पाप पुण्यका विस्तार किया करताहै ॥ ४ ॥ यह मन, पाप पुण्यकी बासना केलिये विषयोंसे क्लेशित होकर इधर उधर घूमाकरताहै, पंचमहाभूत और इन्द्रियोंमें मुख्य तथा नानाभांतिके विकारवाला यह मनही देव, मनुष्य, पशु, पक्षी आदिक नाना देह और पृथक् २ नाम धारण करताहै और उन देहोंसेही ऊंची नीची पदवीको प्राप्तहोताहै ॥ ५ ॥ मनही सब भांतिके काल प्राप्त सुख दुःख और मोहका उत्पन्न करनेवालाहै यह मन जीव की मायारचित उपाधिहै इससे जीवको अपने भीतर झूठा अध्यास कराकर (मैं मनहूं) संसार चक्रमें ग्राम कंटककी नाईं छलकर भ्रमाताहै ॥ इसभांति यह जाग्रत तथा स्वप्नरूप सारीसृष्टि मन कीही कल्पनासे स्थितहुईहै और मनहीके प्रमाणमें प्रकाश करतीहै, मनसे उत्पन्नहुई सृष्टिका केवल दृष्टा होनेसे यथार्थरीतिसे आत्मा उसके संग कुछ दूसरा सबन्ध नहीं रखता, तौभी मिथ्या अध्यास से (मन मैंहूं ऊँचनीच आदिक धर्म अपने भीतर मानलेता है इसभांति आत्माको देहाभिमान

ण्यमथोमनःस्यात् । यथाप्रदीपोघृतवर्तिमश्नञ्छिखाः सधूमाभजतिह्यन्यदास्वम्॥ पदंतथागुणकर्मानुबद्धं वृत्तीर्मनःश्रयतेऽन्यत्रतत्त्वम् ॥ ८ ॥ एकादशासन्मनसोहि वृत्तय आकूतयःपंचधियोऽभिमानः । मात्राणिकर्माणिपुरंचतासांवदन्तिहैकादश वीरभूमीः ॥ ९ ॥ गन्धाकृतिस्पर्शरसश्रवांसि विसर्गरत्यर्त्यभिजल्पशिल्पाः ।एका दशंस्वीकरणंममेति शय्यामहंद्वादशमेकआहुः ॥ १० ॥ द्रव्यस्वभावाशयकर्म-कालैरेकादशामी मनसोविकाराः । सहस्रशःशतशःकोटिशश्च क्षेत्रज्ञतोनमिथोन स्वतःस्युः ॥ ११ ॥ क्षेत्रज्ञएतामनसोविभूतीर्जीवस्य मायारचितस्यनित्याः । आ-विर्हिताःक्वापितिरोहिताश्च शुद्धोविचष्टेह्यविशुद्धकर्तुः ॥१२ ॥ क्षेत्रज्ञआत्मापुरुषः पुराणः साक्षात्स्वयंज्योतिरजःपरेशः । नारायणोभगवान्वासुदेवः स्वमाययाऽत्म-न्यवधीयमानः ॥ १३ ॥ यथाऽनिलः स्थावरजंगमानामात्मस्वरूपेणनिविष्टईशेत् । एवंपरोभगवान्वासुदेवः क्षेत्रज्ञआत्मेदमनुप्रविष्टः ॥ १४ ॥ नयावदेतांतनुभृन्नरेन्द्र विधूयमायांवयुनोदयेन । विमुक्तसंगोजितषट्सपत्नो वेदात्मतत्त्वंभ्रमतीहतावत् ॥ १५ ॥ नयावदेतन्मनआत्मलिंगं संसारतापावपनंजनस्य । यच्छोकमोहामयराग

देनेवाला यद्यपि मनहीहै तौभी देहाभिमानसे छुटानेवाला यह मनहै ॥ ७ ॥ गुणोंसे अनुरक्त मन प्राणीको संसारिक सुख दुःखदेताहै तथा निर्गुण गुणोंसे (विषयोंसे अलग) वही मोक्षका देने-वाला होजाताहै जैसे दीपमेंसेघृत और बत्तीको जलातारहै तबतक उसमेंसे धूमयुक्त शिखा निकलती रहतीहै और जब घृत नहींरहता तबही दीपक बुझकर तेजरूप होजाताहै ॥ ८ ॥ इसीभांति जब-तक मन विषय और कर्म्मोंमें लगारहताहै तबतक उसमें ग्यारह वृत्तियां अर्थात् पांच क्रियारूप पांचज्ञानरूप और एक अभिमान रूप देखपड़तीहैं और जब विषय और कर्म्मोंसे मुक्त होजाताहै तब ब्रह्माकार होजाताहै ॥ ९ ॥ हेराजन् ! पांचविषय, पांचकर्म और एकपुर यह ग्यारह पदार्थ ग्यारह वृत्तियोंकी भूमिहैं स्पर्श, रूप,रस और गन्धही पांच विषयहैं और मलोत्सर्ग, मैथुन, गति भाषण और शिल्प यह पांच कर्म हैं॥१०॥ग्यारहवांपुर अभिमानहै वह मनकी वृत्तिकी भूमि शरीर है किसी २ का ऐसाभी मतहै कि—और अहंकार नामवाला मनकी एकबारहवीं वृत्तिभी यद्यपि मनकी ११ वृत्तियें कहीगई हैं तौभी वह वृत्तियां स्वभाव संस्कार अदृष्ट और काल, इन सबके का रण से उनके सैकड़ों, हजारों और करोड़ों भेद होजाते हैं यह वृत्तियां जीव के निर्विकार होने से उससे नहीं उत्पन्न होसकतीं और न आपसही में उत्पन्न होसकतीं हैं क्योंकि इससे अन्योन्याश्रय दोष आता है और वह आप से आप भी नहीं उत्पन्न होसकतीं क्यों कि इससे आत्माश्रय दोष आ ता है इस लिये किसी भांति से इन वृत्तियों के उत्पत्ति का निश्चय नहीं होसकता इस लिये यह वृत्तियां मिथ्या ही ज्ञात होतीं हैं ॥ ११ ॥ मनकी वृत्तियां इस भांति विषय और कर्मों के सम्बन्ध से उठा करतीं हैं उस सम्बन्ध के मिटनें से मन आत्माकार होजाता है किजो आत्मा अपने को मनके प्रवाह रूप से निरंतर प्रवृत्त होती हुई इन वृत्तियों को शुद्ध रहकर देखा करताहै जाग्रत और स्वप्नावस्था में इन वृत्तियों का प्रगट करने वाला और सुषुप्ति में छिपाने वाला यह क्षेत्रज्ञ आत्मा है ॥ १२ ॥ क्षेत्रज्ञ दो प्रकार का है एक जीव दूसरा ईश्वर जीव का निरूपण तो किया अब ईश्वर का स्वरूप कहते हैं सर्वव्यापी, जगत का कारण, पूर्ण अपरोक्ष, अजन्मा, ब्रह्मादिकों का ईश्वर, सम्पूर्ण जीवों के आश्रय भगवान वासुदेव अपनी माया से प्राणियों के नियंता है ॥१३॥ जिस भांति वायु समस्त स्थावर जङ्गम सब जीवों में प्राण रूप से व्याप्त होकर सबको अपने आधीन रखता है वैसही भग-वान वासुदेव इस सृष्टि में व्याप्त होकर इनको अपने आधीन रखते हैं ॥ १४ ॥ हे नरेन्द्र ! जब यह प्राणी निःसंग हो इन्द्री रूप वैरियों को जीत ज्ञान के उदय से समस्त माया को दूरकर अपने

लोभवैरानुबन्धं ममतां विधत्ते ॥ १६ ॥ भ्रातृव्यमेतं तदद्भ्रवीर्यमुपेक्षयाऽध्येधितमप्रमत्तः । गुरोर्हरेश्चरणोपासनास्त्रो जहि व्यलीकं स्वयमात्ममोषम् ॥ १७ ॥

इतिश्रीमद्भा०पं०नामएकादशोऽध्यायः ॥ ११ ॥

रहूगण उवाच ॥ नमोनमःकारणविग्रहाय स्वरूपतुच्छीकृतविग्रहाय । नमोऽवधूतद्विजबन्धुलिंगनिगूढनित्यानुभवायतुभ्यम् ॥ १ ॥ ज्वरामयार्तस्ययथाऽगदं सन्निदाघदग्धस्ययथाहिमाम्भः । कुदेहमानाहिविदष्टदृष्टेर्ब्रह्मन्वचस्तेऽमृतमौषधं मे ॥ २ ॥ तस्माद्भवन्तंममसंशयार्थं प्रक्ष्यामिपश्चादधुनासुबोधम् । अध्यात्मयोगग्रथितं तवोक्तमाख्याहि कौतूहलचेतसो मे ॥ ३ ॥ यदाहयोगेश्वरदृश्यमानं क्रियाफलंसद्व्यवहारमूलम् । नह्यञ्जसातत्त्वविमर्शनाय भवानमुष्मिन्भ्रमतेमनोमे ॥ ४ ॥ ब्राह्मणउवाच ॥ अयंजनोनामचलन्पृथिव्यांयः पार्थिवःपार्थिवकस्यहेतोः । तस्यापि चांघ्र्योरधिगुल्फजंघाजानूरुमध्योरशिरोधरांसाः ॥ ५ ॥ अंसेऽधिदार्वीशिबिकाचयस्यां सौवीरराजेत्यपदेशआस्ते । यस्मिन्भवान्रूढनिजाभिमानो राजाऽस्मिसिन्धुष्विति दुर्मदान्धः ॥ ६ ॥ शोच्यानिमांस्त्वमधिकष्टदीनान्विष्ट्या निगृह्-

---

रूप को जानता है तबही संसार से मुक्त होता है ॥ १५ ॥ यह मनही मनुष्यों के संसारिक दुःखों का मूल और यही शोक, मोह, रोग राग, लोभ, बैर और ममताका करने वाला है तथा स्वरूपकी उपाधि रूप है इस भांति जबतक मनुष्योंको विवेक नहीं होता तबतक संसार में भ्रमता है ॥ १६ ॥ हे राजन् ! इससे पराक्रम वाले तथा उपेक्षा से बढ़ेहुए अपने बैरी मिथ्याभूत मन का सावधान हो कर परब्रह्म गुरु के चरणों के उपासना रूप अस्त्र से नाशकर ॥ १७ ॥

इति श्रीमद्भा० म० पंचम० सरला भाषाटीकायां एकादशोऽध्यायः ॥ ११ ॥

राजा रहूगण बोलेकि—हेयोगेश्वर ! आपकिजो परब्रह्म रूप, परमानंद के प्रकाश से शरीरादिक को तुच्छ मानने वाले और साधारण ब्राह्मणों के वेषसे अपने स्वाधीन अनुभवको गुप्त रखने वालेहो मैं आपको बारंबार दंडवत करताहूं ॥ १ ॥ ज्वररोग से दुःखित मनुष्यको जिसभांति औषध अमृत रूप है और गर्मी से संतप्तको ठंडाजल—वैसेही इस नीचदेह के अभिमान रूप सर्पसे काटे हुये मुझअंधेको आपके बचन औषध तथा अमृत रूप हैं ॥ २ ॥ इसहेतु मैं अपने मनका संशयतो फिरपूछूंगा परन्तु अभीतो आप अपने ज्ञानयोग से गुंथेहुये बचनोंका फिरसे वर्णन कीजिये कि जिस से मेरीसमझ में ठीक २ आजाय मुझे उसके सुनने कीबड़ी अभिलाषा है ॥ ३ ॥ हे योगेश्वर ! भार इत्यादिक उठानेकी क्रिया और उससे उत्पन्न होनेवाला परिश्रम किजो साक्षात् देखपड़ता है और जोव्यवहार का कारण है उसको आप कहते हैं कि यथार्थ से बिचारकर देखाजाय तो कुछ नहीं है परन्तु इसबात से मेरे मनका संशय नहीं निवृत्त होता ॥ ४ ॥ जड़ भरतजी बोलेकि—हे राजन् ! यह जन पृथ्वीका विकार है यह किसी कारण से पृथ्वीपर चलता है जैसे कहार आदि, और जोनहीं चलते वह पत्थर आदि हैं परन्तु विचारकर देखने से इनमें कुछभी अंतर नहीं प्रतीत होता और पत्थरके जड़ होनेका हेतु कुछभी श्रम व भार इत्यादिक नहीं है फिरकहारको श्रम तथा भार इत्यादिक कुछ नहीं होना चाहिये जिसे श्रम होता है उसका जोवर्णन होसकता होतो हमश्रम होनेकी बातसत्य भी मानें परन्तु उसका होनाही असंभव है कारण कि अवयवों के अतिरिक्त अवयवीका वर्णनही नहीं होसकता, पहिले विचार करोकि कहारके शरीर में कितने अवयव हैं मिट्टीसे बनेहुये कहारके पावोंपरतो घुटुवे, घुटुवोंपर जंघा उरूपर घुटना और उसपर साथल और साथलपर कमर और उसपर छाती और छातीपर गर्दन और गर्दनपर कंधेहैं॥५॥कंधोंपर लकड़ीकी पालकी है और उसपर सिंधुदेशका राजाकि 'मैं सिंधुदेशका राजाहूं' ऐसा घमंड करके राजमद से मोहितहो ॥ ६ ॥ गरीब इनदीन मनुष्योंको बेगार में पकड़ता है इससे तू निर्दई है तिसपरभी कहता है कि

भिरनुग्रहोऽस्मि । जनस्यगोप्ताऽस्मिविकत्थमानोन शोभसेवृद्धसभासुधृष्टः ॥७॥ यदाक्षितावेवचराचरस्य विदामनिष्ठांप्रभवंचनित्यम् । तन्नामतोऽन्यद्व्यवहारमूलं निरूप्यतांसत्क्रिययाऽनुमेयम् ॥ ८ ॥ एवंनिरुक्तंक्षितिशब्दवृत्तमसन्निधानात्परमाणवोये । अविद्ययामनसाकल्पितास्ते येषांसमूहेनकृतोविशेषः ॥ ९ ॥ एवंकृशं स्थूलमणुर्बृहद्यद्सच्च सज्जीवमजीवमन्यत् । द्रव्यस्वभावाशयकालकर्मनाम्नाऽजयाऽवेहि कृतंद्वितीयम्॥१०॥ज्ञानंविशुद्धंपरमार्थमेकमनन्तरं त्वबहिर्ब्रह्मसत्यम्। प्रत्यक्प्रशान्तंभगवच्छब्दसंज्ञं यद्वासुदेवंकवयोवदन्ति ॥ ११ ॥ रहूगणैतत्तपसा नयातिन चेज्ययानिर्वपणाद्गृहाद्वा । नच्छन्दसानैवजलाऽग्निसूर्यैर्विना महत्पादरजोऽभिषेकम् ॥ १२ ॥ यत्रोत्तमश्लोकगुणानुवादः प्रस्तूयतेग्राम्यकथाविघातः निषेव्यमाणोऽनुदिनंमुमुक्षोर्मतिं सतींयच्छतिवासुदेवे ॥ १३ ॥ अहंपुराभरतोनाम राजाविमुक्तदृष्टश्रुतसंगबन्धः । आराधनंभगवतईहमानो मृगोऽभवंमृगसंगाद्धतार्थः ॥१४॥ सामांस्मृतिर्मृगदेहेऽपिवीर कृष्णार्चनप्रभवानोजहाति । अथोअहंजनसंगादसंगो विशंकमानोऽविवृतश्चरामि ॥१५॥ तस्मान्नरोऽसंगसुसंगजातज्ञानासिनेहैव विवृक्णमोहः।हरिंतदीहाकथनस्मृतिभ्यां लब्धस्मृतिर्यात्यतिपारमध्वनः॥१६॥

इतिश्रीमद्भा०महा०पं०नामद्वादशोऽध्यायः ॥ १२ ॥

मैं 'जनोंकी रक्षाकरने वालाहूं' इसीहेतु तुझे विद्वानोंकी सभामें शोभा नहीं मिलसकती ॥७॥ ऊपर के अंगोंका भार नीचे के अंगोंको लगाना है ऐसाभी नहीं होसकता क्योंकि अंगवाले एक पदार्थ का जैसे वर्णन नहीं होसकता वैसही अंगोंकाभी वर्णन नहीं होसकता, क्योंकि पृथ्वीही में चराचर लोकोंकी उत्पत्ति और नाशहोता है इसहेतु सब अवयव पृथ्वीके विकार हैं केवल उनके नामही पृथक् २ हैं इससे केवल नामके अतिरिक्त व्यवहारका कोईकारण कार्यकरनेके हेतुसत्य नहीं होसकता और जो है तोतूही कहो ॥ ८ ॥ इससे यह न जानना कि पृथ्वीसत्य है, यथार्थ में पृथ्वीभी झूठी है पृथ्वी अपने सूक्ष्म परमाणुओं में लयहोजाती है इससे परमाणु के अतिरिक्त पृथ्वी कोई पदार्थ नहीं है और परमाणु कि जिससे पृथ्वीरचनाकी कीगई है वह भी असत्य हैं; ॥ ९ ॥ ऐसेही कृश, स्थूल, छोटा, बड़ा कारण कार्य सचेतन और जड़ द्रव्य, स्वभाव, संस्कार, काल, और अदृष्ट यह सब माया कल्पित हैं ऐसातूजान, ॥ १० ॥ फिरसत्य क्या है ! ज्ञानमय एक परमेश्वरही सत्य है, जोविशुद्ध, परमार्थ रूप, एक, समदर्शी, सत्य, और प्रशांत है और जिसके बाहर भीतर कुछ नहीं है जिसे विवेकी जन वासुदेव भगवान कहते हैं ॥११॥ हेराजा रहूगण ! यह ज्ञानरूप वासुदेव नतोतप से न यज्ञसे, न अन्नादिक के बांटने से, न वेदाभ्यास से, न गृहस्थाश्रम से, औरनजल, अग्नि, सूर्यादिकी उपासना से मिलते हैं बरन इनकी प्राप्तिका उपाय केवल भगवद्भक्तों के चरण रजका सेवनही है ॥ १२ ॥ जोभगवद्भक्त निरंतरही विषय वार्तोकी नाश करनेवाली भगवत कथा कहा करते हैं, उस कथाको प्रतिदिन सुननेसे मुमुक्षु मनुष्यको भगवत्संबंधी श्रेष्ठज्ञान उत्पन्न होता है ॥ १३ ॥ विषय संगसेतो योगभ्रष्ट होता है इसका मैंने स्वयंअनुभव करलिया है मै प्रथम भरत नामराजा था मै सम्पूर्ण विषयोंको त्याग भगवत् भजन करता था परन्तु वहां हिरणके साथसे सब योगभ्रष्ट होगया और मैंने मृगजन्म पाया ॥ १४ ॥ हेराजन् ! मैने भगवतभक्तिकी थी उसके प्रभाव से मृगजन्म मेंभी पूर्वजन्मका स्मरण बनारहा, मनुष्योंका संगहोजाने के भयसे गुप्त और निसंग होकर भ्रमण करताहूं ॥ १५ ॥ विरागी तथा साधुओं के सत्संग से उत्पन्न हुये ज्ञानरूपी अग्निसे जोपुरुष मोहको नाश करदेता है उसको भगवत चरित्र के कहने और सुनने से स्वरूप ज्ञान होजाता है और उसीसे अंतकाल में भगवत्स्वरूप की प्राप्तिहोती है ॥ १६ ॥

इति श्रीभा०म०पंचम०सरलभाषाटीकायांद्वादशोऽध्यायः ॥ १२ ॥

ब्राह्मण उवाच ॥ दुरत्ययेऽध्वन्यजयानिवेशितो रजस्तमःसत्त्वविभक्तकर्मदृक् । स एष सार्थोऽर्थपरः परिभ्रमन्भवाटवीं याति न शर्म विन्दति ॥ १ ॥ यस्यामिमे षण्नरदेव दस्यवः सार्थं विलुम्पन्ति कुनायकं बलात् । गोमायवो यत्र हरन्ति सार्थिकं प्रमत्तमाविश्य यथोरणं वृकाः ॥ २ ॥ प्रभूतवीरुत्तृणगुल्मगह्वरे कठोरदंशैर्मशकैरुपद्रुतः । क्वचित्तु गन्धर्वपुरं प्रपश्यति क्वचित्क्वचिच्चाशुरयोल्मुकग्रहम् ॥ ३ ॥ निवासतोयद्रविणात्मबुद्धिस्ततस्ततो धावति भो अटव्याम् । क्वचिच्च वात्योत्थितपांसुधूम्रा दिशो न जानाति रजस्वलाक्षः ॥ ४ ॥ अदृश्यझिल्लीस्वनकर्णशूल उलूकवाग्भिर्व्यथितान्तरात्मा । अपुण्यवृक्षान्श्रयते क्षुधाऽर्दितो मरीचितोयान्यभिधावति क्वचित् ॥ ५ ॥ क्वचिद्वितोयाः सरितोऽभियाति परस्परं चालषते निरन्धः । आसाद्य दावं क्वचिदग्नितप्तो निर्विद्यते क्व च यक्षैर्हृतासुः ॥ ६ ॥ शूरैर्हृतस्वः क्व च निर्विण्णचेताः शोचन्विमुह्यन्नुपयाति कश्मलम् । क्वचिच्च गन्धर्वपुरं प्रविष्टः प्रमोदते निर्वृतवन्मुहूर्तम् ॥ ७ ॥ चलन्क्वचित् कण्टकशर्कराङ्घ्रिर्नगारुरुक्षुर्विमना इवास्ते । पदे पदेऽभ्यन्तरवह्निनाऽर्दितः कौटुम्बिकः क्रुध्यति वै जनाय ॥ ८ ॥ क्वाचिन्निगीर्णोऽजगराहिना जनो नावैति किंचिद्विपिनेऽपविद्धः । दष्टः स्म शेते क्व च दन्दशूकैरन्धोऽन्धकूपे पतितस्तमिस्रे ॥ ९ ॥ कर्हि स्म चित्क्षुद्र रसान्विचिन्वंस्तन्मक्षिकाभिर्व्यथितो विमानः । तत्रातिकृच्छ्रात्प्रतिलब्धमानो बला द्विलु

जड़ भरत बोले कि–दुस्तरमार्गमें मायासे गिरायाहुआ और रजोगुण, तमोगुण, व सत्वगुण से पृथक् २ विभागित कर्म्मोंको अपना कर्तव्य जानताहुआ यह जीव सुखकी इच्छासे संसाररूपी अटवीमें ऐसेभ्रमण करताहै कि जैसे बनिज करनेवाला बनजारा टांडाकादे घूमताहै, परन्तु सुखनहीं प्राप्तहोता॥ १॥ हेराजन् जिस संसाररूपी अटवीमें बुरे स्वामीवाले इस समूहको छः चोर बल पूर्वक लूटतेहैं जैसे भेड़िया घुसकर भेड़ीको और सियार अपनी स्वार्थ स्थित वस्तुको खींचलाताहै २ ॥ इस अटवीमें अनेकं वृक्ष लता, घास और गुच्छोंसे पूर्णगम्भीर स्थलमें भयावने डांस और मच्छरों का बड़ाभारी उपद्रवहै किसी स्थानपर यहसमूह गन्धर्वपुरको देखताहै और कहीं उल्मुकके आकार घरदेख उसे सुवर्णजान लेनेकी इच्छा करताहै ॥ ३ ॥ ठहरनेके स्थान, जल और धनके लोभवाली बुद्धिसे इस बनमें इधरउधर भागा करताहै किसी स्थानमें आंखोंमें धूल पड़जानेसे दिशाओंको नहीं देखता ॥ ४ ॥ ऐसी झिल्लोके कि जो देखनेमें नहीं आती, शब्दसे कानमें पीड़ा होतीहै, उल्लूके सब्दोंसे हृदयमें दुःख होताहै, क्षुधार्त होकर अपवित्र वृक्षका सेवन करताहै और कभी २ मृग तृष्णाके जलके पीनेके लिये दौड़ताहै, ॥ ५ ॥ कभी सूखी जलहीन नदियों का जल पीनेको दौड़ताहै कभी अन्नके पास न होनेसे दूसरोंसे मांगता कभी बनमें दावाग्निदेख उससे संतप्तहोकर भागताहै और कभी यक्षलोग प्राण लेलेतेहैं ॥ ६ ॥ कभी बलवान मनुष्य द्रव्यका हरण करते हैं इससे दुःखितहो शोच करतेहुये मोहको प्राप्तहो मूर्छित होजातेहैं किसीकाल गन्धर्वनगरमें प्रवेशकर आनन्दितहो थोड़ीदेरको आनन्द मानलेते हैं ॥ ७ ॥ कहीं मार्ग चलते पैरमें कांटे व कंकणलगते हैं इसकारण पहाड़पर चढ़नेकी कामनाको पूराहोते न देख खेदित होकर बैठजाताहै प्रतिक्षणमें भीतरी आगसे संतप्तहो यह कुटुम्बीमनुष्य दूसरों पर रोष करताहै ॥ ८ ॥ कभी अजगर सांपके लीलजानेसे, बनमें फेंकेहुये मृतककी सदृश कुछभी नहीं जानता, कभी हिंसक जीवों के काटनेसे अन्धाहोकर गहरे अन्धकूपमें पड़कर क्लेशित होता है ॥ ९ ॥ किसी स्थानपर शहदकी खोजमें जाता है और वहां उसकी मक्खियोंके काटनेसे अति पीड़ित होताहै इतने दुःख सहनकरनेपरभी

ष्पन्त्यथततोऽन्ये ॥ १० ॥ क्वचिच्चशीतातपवातवर्षप्रतिक्रियांकर्तुमनीश आस्ते । क्वचिन्मिथोविपणन्यच्चकिंचिद्विद्वेषमृच्छत्युतवित्तशाठ्यात् ॥ ११ ॥ क्वचित्क्वचित्क्षीणधनस्तुतस्मिन्शय्यासनस्था न विहारहीनः।याचन्परादप्रति लब्धकामःपारक्यदृष्टिर्लभतेऽवमानम् ॥ १२ ॥ अन्योऽन्यवित्तव्यतिषङ्गवृद्धवैरानुबन्धोविवहन्मिथश्च । अध्वन्यमुष्मिन्नुरुकृच्छ्रवित्तबाधोपसर्गैर्विहरन्विपन्नः १३॥ तांस्तान्विपन्नान्सहितत्रतत्रविहायजातंपरिगृह्यसार्थः । आवर्ततेऽद्यापिनकश्चिदत्र वीराध्वनःपारमुपैतियोगम् ॥ १४ ॥ मनस्विनो निर्जितदिग्गजेन्द्राममेतिसर्वेभुवि बद्धवैराः । मृधेशयीरन्नतुतद्व्रजंतियन्न्यस्तदण्डोगतवैरोऽभियाति ॥१५॥ प्रसज्जतिक्वापिलताभुजाश्रयस्तदाश्रयाव्यक्तपदद्विजस्पृहः । क्वचित्कदाचिद्धरिचक्रतस्त्रसन्सख्यं विधत्तेबककंकगृध्रैः ॥ १६ ॥ तैर्वञ्चितोहंसकुलंसमाविशन्नरोचयञ्छीलमुपैतिवानरान् । तज्जातिरासेनसुनिर्वृतेंद्रियःपरस्परोद्वीक्षणविस्मृतावधिः ॥ १७ ॥ द्रुमेषुरंस्यन्सुतदारवत्सलोव्यवायदीनोविवशःस्वबन्धने । क्वचित्प्रमादाद्गिरिकन्दरेपतन्वल्लींगृहीत्वागजभीतआस्थितः ॥ १८ ॥ अतःकथंचित्सविमुक्तआपदःपुनश्चसार्थंप्रविशत्यरिंदम । अध्वन्यमुष्मिन्नजयानिवेशितो भ्रमञ्जनोऽद्यापिनवेदकश्चन ॥ १९ ॥ रहूगणत्वमपिह्यध्वनोऽस्यसंन्यस्तदण्डःकृतभूतमैत्रः । असज्जितात्माहरिसेवया शितंज्ञानासिमादायतरातिपारम् ॥ २०॥राजोवाच ॥ अहोनृजन्माखिलजन्मशोभनं किंजन्मभिस्त्वपरैरप्यमुष्मिन् । नयद्धृषी-

यदि उसको शहद मिलजाय तो उसे दूसरेही बल पूर्वक लूटलेते हैं ॥ १० ॥ कभी शीत, उष्ण, पवन, और वर्षा से बचने का यत्न नहीं सूझ पड़ता तब ऐसेही बैठा रहता है कभी परस्परके व्योहारमें कोई द्रव्य नहीं देता तब बैरको करताहै ॥ ११ ॥ कभी क्षीणधनहो शय्या, आसन, विहारस्थानादि से हीन होजाताहै और जब किसी दूसरेसे कुछ मांगताहै और नहीं मिलता तब अपमानको प्राप्त होताहै ॥ १२ ॥ परस्पर धनके लेनेदेनेसे बैर बढ़ताहै और फिर उन्हींसे विवाहादिक संबन्धकर इससंसार मार्गमें धनके कष्टकीबाधा तथा अनेक दुःखोंको प्राप्तहो मरेहुएकी तुल्य होजाताहै ॥ १३ ॥ हेराजन् ! इस अटवीमें जो मरजाते हैं उनको वहीं छोड़ नये जन्मेहुये कोसाथ ले घूमा करतेहैं हेवीर ! इसमार्ग के पार जो योगहै उसको कोई नहीं प्राप्तहोता ॥१४॥ दिशाओं के जीत ने वाले शूरवीर मनुष्य भी यह भूमि मेरी है, मेरी है, इस भांति भूमि के हेतु शत्रुता कर संग्राममें मरजाते हैं परन्तु निर्वैरभाव से रहने वाले सन्यासी के पदको कोई नहीं पहुंचता१५॥ कभी बन लताओं की शाखा देखकर मोहित हो लता में बैठेहुए पक्षियों की मधुर वाणी को सुनना चाहता है कभी सिंहो के समूह से डर बगुला, गीध और काक इनके साथ मैत्री करताहै ॥ १६ ॥ जब यह बगुला आदि ठगलेते हैं तब यह जानकर कि इनके साथ तो कुछ लाभ नहीं झट हंसो के साथ मिलजाता है और जब उनका व्योहार अच्छा नहीं लगता तब बानरों से मित्रता करता है बानरों की क्रीड़ा से आनंदित हो अपने काल की अवधि को भूल जाता है ॥ १७ ॥ वृक्षों में रमण करने की कामना करता हुआ स्त्री पुत्रों में स्नेह करता है, मैथुन के हेतु दीन बनकर परवश हो आप बन्धन मे पड़ता है कभी प्रमाद से पर्वत की कंदरा मे जागिरता है और इस कंदरा के हाथियों से डर कर एक लताको पकड़कर लटक रहता है ॥ १८ ॥ यह इससे भी किसी प्रकार छूटगया तो फिर उसी समूह में जामिलता है इस बन में माया से पटका हुआ कोई मनुष्य भी पारको नहीं प्राप्त हुआ ॥ १९ ॥ हे रहूगण ! तूभी इसी समूह में मिलाहुआ है इससे दण्ड को त्यागकर प्राणियों से मित्रताकर विषयों की आसक्ति छोड़ तीक्ष्ण ज्ञान रूप असि लेकर इस मार्ग से पारहो ॥ २० ॥ राजा

केशयशःकृतात्मनां महात्मनांवःप्रचुरःसमागमः ॥ २१ ॥ नह्यद्भुतंत्वच्चरणाब्जरेणुभिर्हतांहसो भक्तिरधोक्षजेऽमला । मौहूर्तिकाद्यस्यसमागमाच्च मेदुस्तर्कमूलोऽपहतोऽविवेकः ॥ २२॥ नमोमहद्भ्योस्तुनमःशिशुभ्यो नमोयुवभ्योनमआवटुभ्यः येब्राह्मणागामवधूतलिंगाश्चरन्ति तेभ्यःशिवमस्तुराज्ञाम् ॥ २३ ॥ श्रीशुकउवाच ॥ इत्येवमुत्तरामातःसवैब्रह्मर्षिसुतः सिन्धुपतय आत्मसतत्त्वं विगणयतःपरानुभावः परमकारुणिकतयोपदिश्य रहूगणेन सकरुणमभिवन्दितचरण आपूर्णार्णवइवनिभृतकरणोर्म्याशयो धरणिमिमां विचचार ॥ २४ ॥ सौवीरपतिरपि सुजनसमवगतपरमात्मसतत्त्व आत्मन्यविद्याऽध्यारोपितांच्च देहात्ममतिं विससर्ज। एवंहि नृपभगवदाश्रिताश्रितानुभावः॥२५॥राजोवाच ॥ योहवाइहबहुविदा महाभागवत त्वयाऽभिहितः परोक्षेणवचसा जीवलोकभवाध्वा स ह्यार्यमनीषया कल्पित विषयो नांजसाऽव्युत्पन्नलोकसमधिगमः । अथतदेवैतद्दुरवगमं समवेतानुकल्पेन निर्दिश्यतामिति ॥ २६ ॥

इति श्रीमद्भा. महापु. पंचम० भवाटव्युपवर्णनं नाम त्रयोदशोऽध्यायः ॥१३॥

सहोवाच । यएषदेहात्ममानिनां सत्त्वादिगुणविशेषविकल्पितकुशलाकुशलसमवहार विनिर्मितविविधदेहावलिभिर्वियोगसंयोगाद्यनादिसंसारानुभवस्यद्वारभूतेनषडिंद्रियवर्गेणतस्मिन्दुर्गाध्ववदसुगमेऽध्वन्यापतितईश्वरस्यभगवतोविष्णोर्वशवर्तिन्यामायया जीवलोकोऽयंयथावणिक्सार्थोऽर्थपरःस्वदेहनिष्पादितकर्मा

रहूगण ने कहा। कि हे राजन् ! सब जन्मों में मनुष्य देहही श्रेष्ठ है क्योंकि जिन जन्मों में भगवत यशसे चित्त शुद्ध करने वाले आप सरीखे महात्माओं का सत्सङ्ग नहीं होता ऐसे देवादिक जन्मों से स्वर्ग में भी क्या करना है ॥ २१ ॥ सदैव आप के चरण रज की सेवा करने वाले जिस किसी के पाप छूटगये हैं उसको यदि ईश्वरकी शुद्धभक्ति प्राप्त होजाय तोकुछ अद्भुतवात नहीं है, क्योंकि आपके एक क्षणमात्र के सत्संगसे मेरा अज्ञान कि जो कुतर्कसे दृढ़ होगया था वह दूर होगया ॥ २२ ॥ ब्रह्मवेत्ता जानने में नहीं आते; इस लियेमें वृद्ध, युवा, और बाल सबको प्रणाम करताहूं, जो ब्रह्मवेत्ता अवधूत रूपसे भूमिपर भ्रमण करते हैं उनसे राजाओं का कल्याणहो ॥ २३ ॥ श्रीशुकदेवजी बोले हेउत्तरासुत ! राजा परीक्षित ! ब्रह्मवेत्ता जड़ भरतजीने अपने तिरस्कारी राजा रहूगणको करुणापूर्वक ब्रह्म विद्याका उपदेश किया और राजाने भी बड़ी आधीनताके साथ उनको दंडवतकी, फिरजड़ भरतजी कि जिनके अंतःकरण की लहरें स्थिर पूर्ण समुद्र का सदृश शांतथीं वह इस भूमि में भ्रमण करने लगे ॥ २४ ॥ जब रहूगण को जड़भरत जीकी शिक्षासे आत्मतत्व यथार्थरूप से समझ में आगया तब आत्मस्वरूप में मूढ़ता के हेतु आरोपण की हुई देहात्म बुद्धि का परित्याग किया हेराजन्! भगवद्भक्तों की शरण लेने का यही प्रभाव है ॥ २५ ॥ राजानेकहा—कि हेभगवन् ! जो तुमने यहां बनिजारे के रूपक में संसार का वर्णन किया उसको विवेकी लोगही जान सकते हैं । सो अल्पबुद्धि मनुष्य की समझ में नहीं आ सकता इससे इस संसारमार्ग में कौन चोर कौनसाह है सो मुझसे कहो ॥ २६ ॥

इतिश्री मद्भा० महा० पंचम० सरलाभाषाटीकायां त्रयोदशोऽध्यायः ॥ १३ ॥

श्रीशुकदेवजी बोले कि—देहात्ममानी जीवलोकके पृथक २ सत्त्व आदि गुणोंसे विभक्त शुभ अशुभ और मिश्र कर्मोंसे रचित भिन्न २ भांतिको नानाजन्मोंमें जन्म मरणादिक होने रूप अनादि संसारके अनुभव करनेमें द्वाररूप छः इन्द्रियोंसे ईश्वरके वशीभूत मायाके हेतु जंगलके सदृश इस संसाररूप विषयमार्गमें यह जीवलोक आपड़ाहै जैसे बनिज द्रव्य कमानेकी कामनासे परदेशमें जाता

नुभवःश्मशानवदशिवतमायांसंसाराटव्यांगतोनाद्यापि विफलबहुप्रतियोगेहस्त-
त्तापोपशमनींहरिगुरुचरणारविंद मधुकरानुपदवीमवरुन्धे । यस्यामुहवाएतेषडि-
न्द्रियनामानःकर्मणादस्यवएवते ॥ १ ॥ तद्यथापुरुषस्यधनंयत्किंचित्साक्षाद्धर्मौ
पयिकंबहुकृच्छ्राधिगतं साक्षात्परमपुरुषाराधनलक्षणोयोऽसौधर्मस्तंतुसांपराय
उदाहरन्ति । तद्धर्म्यंधनंदर्शनस्पर्शनश्रवणास्वादनावघ्राणसंकल्पव्यवसायगृह
ग्राम्योपभोगेनकुनाथस्या जितात्मनोयथासार्थस्यतथाऽजितात्मनोविलुम्पंति॥२॥
अथचयत्रकौटुम्बिकादारापत्यादयो नाम्नाकर्मणावृकसृगालाएवानिच्छतोऽपि क-
दर्यस्यकुटुम्बिनउरणकवत्संरक्ष्यमाणंमिषतोऽपिहरन्ति ॥ ३ ॥ यथाह्यनुवत्सरं
कृष्यमाणमप्यदग्धबीजंक्षेत्रं पुनरेवावपनकालेगुल्मतृणवीरुद्भिर्गह्वर मिवभवति
। एवमेवगृहाश्रमःकर्मक्षेत्रंयस्मिन्नहिकर्मा एयुत्सीदन्तियदयंकामकरण्डएषआव
सथः ॥ ४ ॥ तत्रगतोदंशमशकसमापसदैर्मनुजैः शलभशकुन्ततस्करमूषकादि
भिरुपरुध्यमानबहिःप्राणः क्वचित्परिवर्तमानोऽस्मिन्नध्वन्य विद्याकामकर्मभि
रुपरक्तमनसाऽनुपपन्नार्थंनरलोकंगन्धर्वनगरमुपपन्नमिति मिथ्यादृष्टिरनुपश्यति ॥
५ ॥ तत्रचक्वचिदातपोदकनिभान्विषयानुपधावति पानभोजनव्यवायादिव्यसन
लोलुपः ॥ ६ ॥ क्वचिच्चाशेषदोष निषदनंपुरीषविशेषंतद्वर्णगुणनिर्मितमतिः
सुवर्णमुपादित्सत्यग्निकामकातरइवोल्मुकपिशाचम् ॥ ७ ॥ अथकदाचिन्निवास

हुआ बनमें चलाजाय, ऐसे मरघटके सदृश अमंगल रूप संसार बनमें चलाजाता है और वहां अपने शरीरसे रचेहुयेकर्मका फल भोगता रहताहै। और प्रयत्न करताहै वहांभी बहुतसे प्रयत्न निष्फल होजाते हैं और कितने एकमें बहुतसी बाधाएें होती है तौभी भक्ति कि जो संसारीके तापकी शान्त करने वाला है और जो हरिरूप गुरुके चरणकमलों के भौरों के सदृश सेवक भक्तलोगों का मार्ग है उसे तौभी नहीं पाता इस बनमें छःइंद्रियां चोरका काम करती हैं ॥ १ ॥ क्योंकि बड़े दुःख से प्राप्त कियाहुआ मनुष्य का द्रव्य कि जो परलोक के हेतु भगवत आराधन करनेरूप धर्म में लगाने योग्य है उसका दर्शन, स्पर्शन, श्रवण, आस्वादन, सूंघना और नाना भांति के संकल्प विकल्पोंसे गृह सम्बन्धी तुच्छ आनन्दों का अनुभव करने से प्रयत्न कराकर, चोर लोग जिसभांति बुरे धनवान और असावधान मनुष्यका धन लूटतेहैं ऐसेही दुर्बुद्धि और अजितेंद्रिय मनुष्य का धन यह लूट लेती हैं ॥ २ ॥ इस संसाररूपी बन में स्त्री और पुत्रादि कुटुम्ब तो केवल कहनेहीमात्र हैं परन्तु वास्तव में यह भेड़िया और सियारही हैं क्योंकि अति लालची मनुष्य का संचय कियाहुआ द्रव्य वह ऐसे लेजाते हैं कि जैसे भेड़िया बकरी को ॥ ३ ॥ जिस खेत में प्रतिवर्ष हल चलायाजाय उस खेतकी पृथ्वी का बीज जलनहींजाता परन्तु वह खेत अन्न बोते समय गुल्म, तृण, लतासे अदृष्ट सा होजाता है, ऐसेही यह गृहस्थाश्रम भी विषयों का पिटारा है। वह अपने में रहेहुये कर्म नष्ट न होनेसे पहले क्षेत्रकी सदृशही है ॥ ४ ॥ सृष्टि में पड़ाहुआ मनुष्य डांस और मच्छरों की सदृश अधम मनुष्योंसे और टीडी, पक्षी, चूहा और चोरों से उपद्रव युक्त रहता है क्योंकि उसका धनरूपी प्राणतो बाहरही रहता है और यह मनुष्य इसमार्ग में कहां का कहां मारा २ फिरता है, यह संसार यद्यपि गन्धर्वलोक की सदृश केवल असत्यज्ञात होता है तौ भी मूढ़ता, विषयवासना और कर्म से रंगे हुए मनद्वारा असत्य विचारों से इसे सत्य मान लेता है ॥५॥ खाना, पीना और मैथुन इत्यादि विषयों में लिप्त हो किसी समय मृग तृष्णा के जलकी सदृश विषयों की ओर मानता है ॥ ६ ॥ यह संसारीजीव किसीकाल रजोगुण से बुद्धिघिर जाने के हेतु सुवर्ण कि जो अग्नि से उत्पन्न और सब दोषों का स्थानरूप है उसे लेने को ऐसे दौड़ता है कि जैसे अग्नि चाहने वाला मनुष्य उन्मुक पिशाच के लेने को दौडे ॥ ७ ॥

पानीयद्रविणाद्यनेकात्मोपजीवनाभि निवेशएतस्यांसंसाराटव्यामितस्ततःपरिधावति ॥ ८ ॥ क्वचिच्चवात्यौपम्यया प्रमदयारोहमारोपितस्तत्कालरजसारजनीभूताइवासाधुमर्यादो रजस्वलाक्षो दिग्देवताअतिरजस्वलमतिर्नविजानाति ॥९॥ क्वचित्सकृतद्‌वगतविषयवैतथ्यःस्वयंपराभिध्यानेन विभ्रंशितस्मृतिस्तयैवमरीचितोयप्रायांस्तानेवाभिधावति ॥ १० ॥ क्वचिदुलूकझिल्लीस्वनवदतिपरुषरभसाटोपंप्रत्यक्षंपरोक्षंवा रिपुराजकुलनिर्भर्त्सितेनातिव्यथितकर्णमूलहृदयः ॥ ११ ॥ सयदादुग्धपूर्वसुकृतस्तदाकारस्करकाकतुण्डाद्यपुण्यद्रुमलताविषोदपानवदुभयार्थशून्यद्रविणान्जीवन्मृतान्स्वयंजीवन्म्रियमाणउपधावति ॥ १२ ॥ एकदाऽसत्प्रसङ्गान्निकृतमतिर्व्युदकस्रोतःस्खलनवदुभयतोऽपिदुःखदंपाखण्डमभियाति ॥१३॥ यदातुपरबाधयाऽन्धआत्मनेनोपनमतितदाहि पितृपुत्रबर्हिष्मतःपितृपुत्रान्वासखलुभक्षयति ॥ १४ ॥ क्वचिदासाद्यगृहंदावयत्प्रियार्थविधुरमसुखोदर्कंशोकाग्निनादह्यमानो भृशंनिर्वेदमुपगच्छति ॥१५॥ क्वचित् कालविषमितराजकुलरक्षसाऽपहृतप्रियतमधनासुःप्रमृतकइवविगतजीवलक्षणआस्ते ॥१६॥कदाचिन्मनोरथोपगतपितृपितामहाद्यसत्सदिति स्वप्ननिर्वृतिलक्षणमनुभवति ॥१७॥ क्वचित् गृहाश्रमकर्मचोदनाऽतिभरगिरिमारुरुक्षमाणो लोकव्यसनकर्शितमनाः कण्टकशर्कराक्षेत्रं प्रविशन्निव सीदति ॥ १८ ॥ क्वचित्दुःसहेन कायाभ्यन्तरवह्निना गृहीतसारःस्वकुटुम्बाय क्रुध्यति ॥ १९ ॥ सएवपुनर्निद्राऽजगरगृहीतोऽन्धे तमसिमग्नः शू-

किसी काल निवास स्थान, जल और द्रव्य इत्यादिक अपने साधनों के हेतु इस संसाररूपी अटवी में चारों ओर दौड़ा करता है ॥ ८ ॥ किसी समय पवन की सदृश स्त्री की गोदीपर चढ़ता है उस समय रजोगुण करके काम से व्याप्त अपनी आंखोंसे पापपुण्य कर्म के साक्षी दिक् देवताओं को भी नहीं देखता ॥ ९ ॥ किसीकाल ऐसा सोचता है कि विषय व्यर्थ हैं तौभी देहाभिमान के कारण उन स्मृतियों को भूल मृग तृष्णा के जलकी सदृश उन्हीं विषयों के पीछे दौड़ा करता है ॥ १० ॥ कभी उल्लू और झिल्ली के सदृश राजकुल और बैरियों के प्रत्यक्ष अथवा परोक्ष कहेहुये अत्यन्तकठोर और अपमान से भरेहुये वचनों से इसके कान और हृदय पीड़ित होजाते हैं॥११॥ जब पहिले किये हुए पुण्यनष्ट होजाते हैं तब जीताहुआ मुर्दा आप दूसरे जीते हुये मुर्दोंके निकट कि "जिनका द्रव्य कारस्कर और काकतुण्ड इत्यादिक अपवित्रवृक्ष लता और कूपोंका सदृश इसलोक तथा परलोकके अभिप्रायसे रहितहैं" जाताहै॥१२॥कभी अधममनुष्यों के सङ्गसे वंचित होकर, सूखी नदियों में पड़ने के सदृश दोनो ओर से दुःखदायी पाखण्ड मार्ग में पड़जाताहै ॥ १३ जिस समय औरों को बाधा देकर भी अन्न नहीं प्राप्त होता तो पिता पुत्र का या पुत्र पिता का जिसके पास तृण मात्रभी जो कुछ लेना देखना है उन्हें दुःख देताहै ॥ १४ ॥ कभी घर कि जिसमें दावाग्निकी सदृश प्रिय वस्तु कुछभी नहीं है और अन्तमें जिसमें कष्ट है उसे पाकर शोकाग्निसे जलताहुआ बहुत पीडित होताहै ॥१५॥ कभी कालगति से विषमहुये राजकुल रूप राक्षस द्रव्यरूप प्यारे जीवका नाश करतेहैं तब सम्पूर्ण सुख नष्टहोजानेसे मृतककी सदृशहो बैठा रहताहै ॥ १६ ॥ किसीसमय कामनासे प्राप्तहुये पिता पितामह इत्यादिक असत्य पदार्थोंको सत्यमान स्वप्नके आनंदका अनुभव करताहै ॥ १७ ॥ कभी गृहस्थाश्रमके कर्मोंकी प्रेरणाके विस्तार रूप पहाड़पर चढ़नेकी कामना करताहै तब लोक सम्बन्धी विषयोंसे मनमें दुःखितहो कांटे और कंकड़वाली भूमिमें जानेके सदृश दुःखित होताहै ॥ १८ ॥ कभी प्रचण्ड असह्य जठराग्निसे निर्बल हो अपने कुटुम्बियोंपर क्रोध करताहै ॥ १९ ॥ जब निद्रारूपी अजगर लीलजाताहै तब घोर अंध-

न्यारण्य इवशेनेनान्यत् किंचन वेद शवइवापविद्धः ॥ २० ॥ कदाचिद्भग्नमानदंष्ट्रो दुर्जनदन्दशूकैरलब्धनिद्राक्षणो व्यथितहृदयेनानुक्षीयमाणविज्ञानोऽन्धकूपेऽन्धवत् पतति ॥ २१ ॥ कर्हिस्मचित्काममधुलवान् विचिन्वन् यदा परदारपरद्रव्याण्य वरुन्धानो राज्ञा स्वामिभिर्वा निहतः पतत्यपारे निरये ॥ २२ ॥ अथ चतस्मादुभयथाऽपिहि कर्मास्मिन्नात्मनः संसारावपनमुदाहरन्ति ॥ २३ ॥ मुक्तस्ततोयदिबन्धाद्देवदत्तउपाच्छिनत्ति तस्मादपिविष्णुमित्रइत्यनवस्थितिः २४ क्वचिच्चशीतवाताद्यनेकाधिदैविकभौतिकात्मीयानां दशानां प्रतिनिवारणे कल्पो दुरन्तचिन्तया विषण्णआस्ते ॥ २५ ॥ क्वचिन्मिथोव्यवहरन्यत्किंचिद्धनमन्येभ्योवा काकिणिकामात्रमप्यपहरन्यत्किंचिद्वा विद्वेषमेतिवित्तशाठ्यात् ॥ २६ ॥ अध्वन्यमुष्मिन्निम उपसर्गास्तथा सुखदुःखरागद्वेषभयाभिमानप्रमादोन्मादशोकमोहलोभमात्सर्येर्ष्याऽवमानक्षुत्पिपासाधिव्याधिजन्मजरामरणादयः ॥२७॥ क्वापिदेवमायया स्त्रिया भुजलतोपगूढः प्रस्कन्नविवेकविज्ञानो यद्विहारगृहारम्भाकुलहृदयस्तदाश्रयावसक्तसुतदुहितृकलत्रभाषितावलोकविचेष्टितापहृतहृदयआत्मानमजितात्माऽपारेऽन्धेतमसिप्रहिणोति।२८।कदाचिदीश्वरस्यभगवतो विष्णोश्चक्रात्परमाण्वादिद्विपरार्धापवर्गकालोपलक्षणात्परिवर्तितेन वयसा रंहसा हरत आब्रह्मतृणस्तम्बादीनां भूतानामनिमिषतो मिषतां वित्रस्तहृदयस्तमेवेश्वरं कालचक्रं निजायुधं साक्षाद्भगवन्तं यज्ञपुरुषमनादृत्य पाखण्डदेवताः कंकगृध्रबकवटप्राया

कारमें डूबकर ऐसा होजाताहै मानो सूने बनमें सोताहो और उसे दूसरी किसी बातका ज्ञान, बन में फेंकेहुये मृतककी भांति नहींरहता ॥२० ॥ कभी दुर्जनरूप हिंसकलोग जब मानरूपी डाढ़तोड़ डालतेहैं तो क्षणभरभी नींद नहींआती और चित्तमें पीड़ित होनेके कारण ज्ञान भ्रष्टहो अंधेकी नाईं गहरे गढ़ेमें गिरताहै॥ २१ ॥ कभी यह मनुष्य विषयरूप शहदकी बूंदकी सदृश तुच्छ विषयमें गोंकी खोजकरताहुआ दूसरेकी स्त्री औरपरद्रव्यको ओर दौड़ता है तब राजा अथवा उसके स्वामी उसे मारतेहैं और अन्तमें अपार दुःखवाले नरकमें गिरताहै ॥२२॥इसहेतु इस प्रवृत्तिमार्गवाले कर्म लौकिक और पारलौकिक संसारकी जन्मभूमि कहलाती हैं ॥ २३ ॥ यदि बन्धनसे छूटभीजाय तो भी उसके पाससे वह बस्तु दूसराही मनुष्य लेलेताहै और उस दूसरे मनुष्यसे तीसरा मनुष्य लेलेता है ऐसी दशा होती है ॥ २४ ॥ कभी शीत, उष्ण इत्यादिक नानाभांतिके दैहिक, दैविक, और भौतिक दुःखोंके दूरकरनेमें असमर्थ होनेसे दुःखितहो घोर चिन्तामें निमग्न होता है॥ २५ ॥ कभी परस्पर धनके व्यवहारों केवल २० कौड़ी अथवा इससेभी कुछ कम धन दूसरोंसे ठगलेताहै कि जिससे उनका बैरी बनताहै ॥ २६ ॥ इस संसाररूपी पथमें यह तथा औरभी दुःख, सुख, राग, द्वेष, भय, अभिमान, प्रमाद, उन्माद, शोक, मोह, लोभ, मात्सर्य, अपमान, भूंख, प्यास, आधि, व्याधि, जन्म, जरा, मरण आदिक नानाभांति के दुःख हैं ॥ २७ ॥ कभी ईश्वरकी मायारूप स्त्री अपने हाथरूप लतासे स्पर्श करती है तब विचार तथा विज्ञान नष्ट होजाने से स्त्रीके संग रमणके हेतु घरका प्रारम्भ करने के निमित्त व्याकुल होजाता है और गृह में उत्पन्न हुयेपुत्र कन्यादि की तोतली बाणी तथा चितवन की चेष्टा से मन हरणहो अजितेन्द्रिय मनुष्य अपनी आत्माको अपार अंधतम नर्क में डालता है ॥ २८ ॥ कभी ईश्वरका काल चक्र कि जोपरमाणु कालसे आरम्भ होता है और ब्रह्माजी के दोपरार्द्ध से पूराहोता है, और अवस्थाओं के फेरफार से ब्रह्मा से लेकर तृणपर्यन्त समस्त जीवोंको अपने बेगसे खींचकर लियेजाता है, उस से डरकर बचने के हेतु यज्ञ पुरुष भगवान "कि जिनका यह काल चक्र शस्त्र है" का तिरस्कार

आर्या रुमयपरिहृताः सांकेत्येनाभिधत्ते ॥ २९ ॥ यदापाखण्डिभिरात्मवंचितैस्तै रुरुवंचितो ब्रह्मकुलं समावसंस्तेषां शीलमुपनयनादिश्रौतस्मार्तकर्मानुष्ठानेनभग वतो यज्ञपुरुषस्य आराधनमेव तदरोचनच्छूद्रकुलं भजते निगमाचारेऽशुद्धितोऽय- स्य मिथुनीभावःकुटुम्बभरणं यथावानरजातेः ॥ ३० ॥ तत्रापिनिरवरोधःस्वैरेण विहरन्नतिकृपणबुद्धिरन्योन्यमुखनिरीक्षणादिना ग्राम्यकर्मणैवविस्मृतकालावधिः ॥ ३१ ॥ क्वचिद्द्रुमवदैहिकार्थेषुगृहेषु रंस्यन्यथावानरः सुतदारवत्सलो व्यवाय क्षणः ॥ ३२ ॥ एवमध्वन्यवरुन्धानो मृत्युगजभयात्तमसि गिरिकन्दरप्राये ॥३३॥ क्वचिच्छीतवाताद्यनेकदैविकभौतिकात्मीयानां दुःखानां प्रतिनिवारणेऽकल्पो दु रन्तविषयविषण्णआस्ते ॥३४॥ क्वचिन्मिथोव्यवहरन्यत्किंचिद्धनमुपयातिवित्त शाठ्येन ॥ ३५ ॥ क्वचित्क्षीणधनः शय्यासनाशनाद्युपभोगविहीनो यावदप्राप्त लब्धमनोरथोपगतादानेऽवसितमतिस्ततस्ततोऽवमानादीनि जनादभिलभते ॥३६ एवंवित्तव्यतिषंगविवृद्धवैरानुबन्धोऽपि पूर्ववासनयामिथउद्वहत्यथापवहति॥३७॥ एतस्मिन्संसाराध्वनि नानाक्लेशोपसर्गबाधित आपन्नविपन्नो यत्रयस्तमुहवावेतर- स्तत्रविसृज्य जातंजातमुपादाय शोचन्मुह्यन्बिभ्यद्विवदन्क्रन्दन्संहृष्यन्गायन्नह्य- मानः साधुवर्जितोनैवावर्ततेऽद्यापियतआरब्धएष नरलोकसार्थोयमध्वनःपारमुप- दिशन्ति ॥ ३८ ॥ यदिदंयोगानुशासनंनवा एतदवरुन्धतेयन्न्यस्तदण्डामुनय

करके काक, गिद्ध, बटेर, और बगुला इत्यादिक के सदृश पाखंड शास्त्रके अनुसार पाखंडी देवताओं का भजन करता है ॥ २९ ॥ पाखंडीलोग जिनको पहिले आपने ठगा है जब आपको ठगलेते हैं तब ब्राह्मणों के समीप जाता है और वहां श्रौत, स्मार्त तथा पुनःसंस्कार करके भगवत् आराधन रूप ब्राह्मणों कीरीति अच्छी न लगनी तब शूद्रोंमें जामिलता है कि जिनमें वेदानुसार व्यवहार न. करनेकी योग्यता होनेसे वानरकी शदस केवल मैथुन और कुटुंब पालन ही कियाकरता है ॥३०॥ यह कृपण बुद्धिपुरुष शूद्रोंमें मिलकर किसी बातका बिचार न कर मनमाना क्रीड़ा करता है और एक दूसरे के मुख देखने आदि पशुधर्म हीसे अपने मरण कालको भूलजाता है ॥ ३१ ॥ कभी वृक्षके सदृश इस सृष्टिके पदार्थों में रमण करनेके हेतु बानर की सदृश केवल मैथुनमेंही सुखमान स्त्री पुत्रादिकों पर स्नेह रखता है ॥ ३२ ॥ इसभांति जगत् रूप अटवी की राहमें सुख दुःखादिकों का अनुभव करता हुआ यह जीव पहाड़की कंदरा के सदृश मृत्युरूप हाथी के भयवाले रागादिक दुःखोंमें पड़ताहै॥३३॥कभी रोगादि दुःखोंमें पड़शीत, पवन इत्यादिक नाना भांतिके दैहिक,दैविक और भौतिक क्लेशों के दूर करने में अशक्तहो अपार विषयोंसे दुःखित होकर बैठरहताहै ॥३४॥ कभी आपसमें कुछधन व्यवहारकर ठगाईसे कुछ द्रव्यभी प्राप्तकरलेताहै॥३५॥किसीसमय द्रव्यनाश होने से,शय्या,आसन,अन्न इत्यादिक भोगकीवस्तुयें नहीं मिलतीं तब किसीदुष्प्राप वस्तुकीकामना करके उसके प्राप्त करनेका प्रयत्नकरताहै इससे इसका लोग चारोंओरसे तिरस्कारकरते हैं ॥३६॥ इस भांति धन के व्यवहार से एक दूसरे में शत्रुता बढजाती है तौभी प्रथमकी बासनाओं से आ- पस में विवाह करता है और व्यवहार भी छोड़देता है ॥ ३७ ॥ इस संसारमें नाना प्रकारके क्लेश और विघ्न दुःखित करते हैं कोई मनुष्य यदि दुःखी होवे या मरजावे तो उसको दूसरा मनुष्य छोड़ कर जन्मे हुए को संग लेकर चलाजाता है, और शोच, मोह तथा बिवाद करता और डरताहुआ चलाजाता है कभी विहार करता, कभी रोता और कभी गाता तथा हंसता हुआ जाता है परन्तु जहांसे वह प्राणी समूह चलाथा वहां साधुओं के अतिरिक्त और कोई पीछे नहीं आता ॥ ३८ ॥

उपशमशीला उपरतात्मानःसमवगच्छन्ति ॥ ३९ ॥ यद्पिदिग्गिभजयिनो य-
ज्विनोयेवैराजर्षयःकिंतुपरंमृधेशयीरन् । नस्यामेवममेयमितिकृतवैरानुबन्धायां
विसृज्यस्वयमुपसंहृताः ॥ ४० ॥ कर्मवल्लीमवलम्ब्यततआपदःकथञ्चिन्नरकाद्वि-
मुक्तः पुनरप्येवंसंसाराध्वनिवर्तमानो नरलोकसार्थमुपयाति एवमुपरिगतोऽपि४१
तस्येदमुपगायन्ति ॥ आर्षभस्येहराजर्षेर्मनसाऽपिमहात्मनः । नानुवर्त्माहतिनृपो
मक्षिकेवगरुत्मतः ॥ ४२ ॥ योदुस्त्यजान्दारसुतान्सुहृद्राज्यंहृदिस्पृशः । जहौयु-
वैवमलवदुत्तमश्लोकलालसः ॥ ४३ ॥ योदुस्त्यजान्क्षितिसुतस्वजनार्थदारान्प्रा
र्थ्यां श्रियंसुरवरैःसदयावलोकाम् । नैच्छन्नृपस्तदुचितंमहतां मधुद्विट्सेवाऽनुर-
क्तमनसामभवोऽपिफल्गुः ॥ ४४ ॥ यज्ञायधर्मपतयेविधिनैपुणाययोगाय सांख्य-
शिरसेप्रकृतीश्वराय । नारायणायहरयेनमइत्युदारं हास्यन्मृगत्वमपियःसमुदाज-
हार ॥ ४५ ॥ यइदंभागवतसभाजितावदातगुणकर्मणो राजर्षेर्भरतस्यानुचरितं
स्वस्त्ययनमायुष्यंधन्यंयशस्यं स्वर्ग्यापवर्ग्यंवाऽनुशृणोत्याख्यास्यति अभिनंदति
चसर्वाएवाशिषआत्मन आशास्तेनकांचनपरतइति ॥ ४६ ॥

इतिश्रीमद्भा०पं०नामचतुर्दशोऽध्यायः ॥ १४ ॥

क्यों कि जिस उपदेश को जीवों के अभय करनेवाले, प्रशांत, मनको वश रखनें वाले मुनिलोग स्वी
कार करते हैं उस योग सम्बन्धी उपदेश का कोई अनुसरण नहीं करता ॥ ३९ ॥ यद्यपि बड़े २
दिग्विजयी और यज्ञ कर्त्ता राजर्षि हुए वह सब संग्राम में मरकर सोगए हैं, इस भूमि में मोह बांध
नाना शत्रुता बांधी थी तौभी अन्त में सभी पृथ्वी को छोड़ चलेगए ४० कर्म रूपलताको पकड़ यदि किसी
भांति वह नरक के दुःखों से छूटजाय, तौभी पीछे संसार मार्ग में रहकर जीव लोक के संग में मिल
ता है यदि स्वर्ग में भी गया हो तोभी पीछे यहीं आमिलता है ॥ ४१ ॥ उन भरतजी के चरित्रों को
मनुष्य पाकोंमें इसभांति गाया करतेहैं कि जैसे मक्खी गरुड़के मार्गका मनसेभी अनुसरण नहीं
करसकती उसीभांति उन ऋषभदेवजीके पुत्र साधु भरतके मार्गका कौन ऐसा राजाहै जो मनसे
भी अनुसरण करसकताहै ? ॥ ४२ ॥ कि जिस भरतने भगवानमें मन लगजानेके हेतु युवावस्था
मेंही अति मनोहर तथा दुस्त्यज राज्य सुख और स्त्री पुत्रादिकों को मलकी सदृश त्यागदिया ४३॥
अति दुस्त्यज पृथ्वी, पुत्र, सुहृद, द्रव्य तथा स्त्रियोंको और अपनेको चाहनेवाली राज्यलक्ष्मी कि
जिसकी प्रार्थना श्रेष्ठ देवताभी करते हैं उसकोभी जिस भरतने न चाहा । भगवद्भक्त कि जिनका
मन भगवानकी सेवामें लगगयाहै वह मुक्तिकोभी तुच्छही मानतेहैं ॥ ४४ ॥ यज्ञरूप धर्मके पालक
धर्मके करनेवाले, ज्ञानरूप फलके देनेवाले अष्टांगयोग रूप अन्तर्यामी भगवानकोमैं दण्डवत् करताहूं
इसभांति उदार बचन कहते२ जिन भरतजीने अपनी मृगदेहकोभी छोड़दिया उन भरतकी बराबर
और कौन होसकताहै ॥ ४५ ॥ जिनके शुद्धगुणवाले कर्मोंकी प्रशंसा भगवद्भक्त करतेहैं ऐसे राजर्षि
भरतजीका चरित्र, कि कल्याणकारी, आयुवर्धक तथा धन कीर्त्ति और स्वर्ग, मोक्षका देनेवालाहै,
उसका जो कोई श्रवण करताहै अथवा कथन करताहै उसको सब ऋद्धियें स्वयं प्राप्त होजाती हैं
और वह कुछ इच्छा नहीं करता ॥ ४६ ॥

इतिश्रीमद्भा० महा०पंचम० सरलाभाषाटीकायांचतुर्दशोऽध्यायः ॥ १४ ॥

श्रीशुकउवाच॥ भरतस्यात्मजःसुमतिर्नामाभिहितोयमुहवावकेचित्पाखण्डिन ऋषभपदवीमनुवर्तमानं चानार्याअवेदसमाम्नातांदेवतांस्वमनीषयापापीयस्याक लौकल्पयिष्यन्ति॥१॥तस्माद्वृद्धसेनायां देवताजिन्नामपुत्रोऽभवत्॥२॥अथासुर्यांत-स्मथोदेवद्युम्नस्ततोधेनुमत्यांसुतः परमेष्ठीतस्यसुवर्चलायांप्रतीहउपजातः ॥ ३ ॥ यआत्मविद्यामाख्यायस्वयं संशुद्धोमहापुरुषमनुसस्मार ॥ ४ ॥ प्रतीहात्सुवर्चला यांप्रतिहर्त्रादयस्त्रय आसन्निज्याकोविदाःसूनवःप्रतिहर्तुः स्तुत्यामजभूमानावज-निषाताम् ॥ ५ ॥ भूम्नऋषिकुल्यायामुद्गीथस्ततः प्रस्तावोदेवकुल्यायांप्रस्तावा-न्नियुत्सायां हृदयजआसीद्विभुः । विभोरत्यांचपृथुषेणस्तस्मान्नक्त आकूत्यांजज्ञे नक्ताद्द्रुतिपुत्रोगयो राजर्षिप्रवरउदारश्रवाअजायत साक्षाद्भगवतोविष्णोर्जगद्रिर क्षिषयागृहीतसत्वस्य कलात्मवत्त्वादिलक्षणेनमहापुरुषतांप्राप्तः ॥ ६ ॥ सवैस्वध र्मेणप्रजापालनपोषणप्रीणनोपलालनानुशासनलक्षणेनेज्यादिना च भगवतिमहा पुरुषेपरावरे ब्रह्मणिसर्वात्मनार्पितपरमार्थलक्षणेन ब्रह्मविच्चरणानुसेवयापादित भगवद्भक्तियोगेन चाभीक्ष्णशःपरिभावितातिशुद्धमतिरुपरतानात्म्य आत्मनिस्व-यमुपलभ्यमानब्रह्मात्मानुभवोऽपि निरभिमानएवावनिमजूगुपत् ॥ ७ ॥ तस्येमां गाथांपाण्डवेय पुराविदउपगायन्ति ॥ ८ ॥ गयंनृपःकःप्रतियाति कर्मभिर्यज्वाऽभि मानीबहुविद्धर्मगोप्ता । समागतश्रीःसदसःपतिःसतां सत्सेवकोऽन्योभगवत्कला-मृते ॥ ९ ॥ यमभ्यषिंचन्परयामुदासतीः सत्याशिषोदक्षकन्याःसरिद्भिः । यस्य

श्रीशुकदेवजी बोले कि, उनभरत के सुमति नाम पुत्र उत्पन्न हुआ यह सुमति ऋषभदेवजी के मार्ग का अनुसरण करता था उस सुमति को पाखंडी लोग कलियुग में अपनी दुर्बुद्धि से, यद्यपि उस को वेद में कहीं देवता नहीं गिनाया, तोभी सुमति देवता अर्थात् बुद्ध का अवतार था ऐसे मानेगें। ॥ १ ॥ उस सुमति के वृद्ध सेना स्त्री में देवताजिन्नाम पुत्र उत्पन्न हुआ ॥ २ ॥ फिर देवताजित की आसुरी रानी में देवद्युम्न उत्पन्न हुआ और देवद्युम्न के धनमती स्त्री में परमेष्ठी और परमेष्ठी की सुवर्चला स्त्री में प्रतीह पुत्र हुआ ॥ ३ ॥ यह प्रतीह स्वयं शुद्ध था यह आत्म विद्या का आख्यान करके महा पुरुष हरिका स्मरण करता हुआ ॥ ४॥ प्रतीह से सुवर्चला स्त्री में प्रतिहर्ता, प्रस्तोता और उद्गाता यह तीनपुत्र उत्पन्न हुये किजो यज्ञकरनमें बड़े निपुण थे प्रतिहर्ता की स्तुति स्त्री में अज और भूमा यह दोपुत्र उत्पन्न हुये ॥५॥ भूमाकी ऋषिकुल्या में उद्गीथ नामपुत्र हुआ जिस से देव कुल्या में प्रस्ताव नामक पुत्रहुआ उस प्रस्ताव से नियुत्सा में विभुनामक पुत्रहुआ, विभुके रतिमें पृथुसेन, पृथुसेन के आकूतिमें नक्त, और नक्तके द्रुतिस्त्री से गयपुत्र हुआ किजो राजर्षियों में श्रेष्ठ, तथा उदार यशवाला और सृष्टिकी रक्षा करनेकी कामनासे जिसने सत्वगुण धारण किया है ऐसे विष्णु भगवान का अंशरूप था और जोआत्म भावके लक्षणों से महा पुरुषताको प्राप्त हुआ था ॥ ६ ॥ वहगय प्रजाकापालन, पोषण, प्रीणन, उपलालन, अनुशासन, आदि लक्षणों युक्तथा उस राजाकी बुद्धि इन राजधर्मों तथा यज्ञादिक धर्मों से कि जो उसने सर्वात्मामहापुरुष भगवान् में अर्पण कियेथे, तथा आत्मवेत्ता पुरुषों के चरणों की सेवासे प्राप्तहुई भगवत्भक्तियोग से, बारम्बार संस्कार पाने के हेतु अति शुद्ध होगईथी यद्यपि उसके देहाभिमान रहित अन्तःकरण में साक्षात भगवान का अनुभव होचुका था तौ भी उसने निरभिमान रहकर इस भूमिका पालन किया ॥ ७ ॥ हेराजन्! इति हासवेत्ता मनुष्य इसके चरित्रोंको यों गाया करते हैं ॥ ८ ॥ कौन राजा कर्म करके गयका अनुकर्ण करसकता है? किजो भगवत् अंशरूप राजा गय यज्ञों का करने वाला, बहुवेत्ता धर्मरक्षक, लक्ष्मीवान, सभापति और साधुओं का

प्रजानांदुदुहेधराशिषो निराशिषोगुणवत्सस्नुतोधाः ॥ १० ॥ छन्दांस्यकामस्यच यस्य कामान्दुदूहुराजह्रुरथोवलिंनृपाः । प्रत्यंचितायुधिधर्मेण धिप्रायदाशिषां षष्ठमंशंपरेत्य ॥ ११ ॥ यस्याध्वरेभगवानध्वरात्मा मघोनिमाद्यत्युरुसोमपीथे । श्रद्धाविशुद्धाचलभक्तियोगसमर्पितेज्याफलमाजहार ॥ १२ ॥ यत्प्रीणनाद्बर्हिषि देवतिर्यङ्मनुष्यवीरुत्तृणमाविरिंच्यात् । प्रीयेतसद्यःसहविश्वजीवः प्रीतःस्वयंप्रीतिमगाद्गयस्य ॥ १३ ॥ गयाद्गयन्त्यांचित्ररथःसुगतिरवरोधनइतित्रयः पुत्रा बभूवुश्चित्ररथादूर्णायांसम्राडजनिष्ट ॥ १४ ॥ ततउत्कलायांमरीचिर्मरीचेर्बिन्दुमत्यांबिन्दुमानुदपद्यत । तस्मात्सरघायांमधुनामाऽभवन्, मधोःसुमनसिवीरव्रतः, ततोभोजायांमन्थुप्रमन्थूजज्ञाते मन्थोःसत्यायांभौवनः,ततोदूषणायांत्वष्टाऽजनिष्ट त्वष्टुर्विरोचनायांविरजो, विरजस्यशतजित्प्रवरंपुत्रशतं कन्याचविषूच्यांकिलजातम् ॥ १५ ॥तत्रायंश्लोकः॥ प्रैयव्रतंवंशमिमंविरजश्चरमोद्भवः। अकरोदत्यलंकीर्त्या विष्णुःसुरगणंयथा ॥ १६ ॥

इतिश्रीमद्भा०म०पु०पञ्चदशोऽध्यायः ॥ १५ ॥

राजोवाच ॥ उक्तस्त्वयाभूमण्डलायामविशेषोयावदादित्यस्तपतियत्रचासौ ज्योतिषांगणैश्चन्द्रमावासहदृश्यते ॥ १ ॥तत्रापिप्रियव्रतरथचरणपरिखातैःसप्तभिः सप्तसिन्धवउपक्लृप्ताः । यतएतस्याःसप्तद्वीप विशेषविकल्पस्त्वयाभगवन्खलुसूचितए तदेवाखिलमहंमानतोलक्षणतश्चसर्वंविजिज्ञासामि ॥ २ ॥ भगवतो

सवरू है ! ॥ ९ ॥ कि जिसराजा गयके सत्य आशीर्वाद हैं और जिसका राज्याभिषेक दक्ष कन्याओं ने नदियों के जलसे परमानंद होकर किया था, यद्यपि उस राजा के मनमें किसी भांतिकी इच्छा नहीं थी तौभी उसके गुणरूपवछड़ेकेकारणपृथ्वी रूपगौ उसकी प्रजाकी समस्त इच्छायें पूर्णकरती थी ॥ १० ॥ वेद और उसके कर्म उसकी मन वाञ्छित कामना पूर्णकरते, तथा संग्राम के मध्यमें राजालोग वाणोंसे सत्कार पा उसको भेंटदेते थे, और ब्राह्मण लोग धर्म तथा दक्षिणा आदि से पूजापा परलोक में प्राप्त होनेवाले अपने पुण्यके फलमें से छठाअंश देतेथे ॥ ११ ॥ उसके यज्ञमें इन्द्र बहुत सोमपान करके मदको प्राप्त हुआ, श्रद्धासे शुद्ध और अविचल भक्ति से अर्पित उसके यज्ञ फलको यज्ञ स्वरूप भगवान ने स्वयं ग्रहण किया था ॥ १२ ॥ भगवान के प्रसन्न होने से यज्ञमें देवता, पशु, पक्षी, मनुष्य, लता, तृण, ब्रह्मा से लेकर सम्पूर्ण जीव प्रसन्न होते हैं वह ईश्वर राजा गयपर स्वयंही प्रसन्न हुये ॥ १३ ॥ उनगयके गयंती नाम स्त्रीमें चित्ररथ, सुगति और अवरोधन यह तीनपुत्र उत्पन्न हुये चित्ररथ से ऊर्णामें सम्राट् पुत्रउत्पन्न हुआ॥ १४ ॥ उस सम्राट् से उत्कला में मरीचि और मरीचि के बिंदुमती में बिंदुमान और बिंदुमान के सरघा में मधु और मधुके सुमनसनामस्त्री में वीरव्रत और वीरव्रतके भोजा में मंथु और प्रमंथु दोपुत्र उत्पन्नहुये मंथुके सत्यामें भौवन और भौवनके दूषणामें त्वष्टा और त्वष्टाके विरोचनामें विरज और विरजके विषूचा स्त्रीमें शतजित इत्यादिक सौपुत्र और एककन्या उत्पन्नहुई॥ १५ ॥जिसभांति विष्णु भगवान अपने यशसे देवताओं को शोभित करते हैं वैसेही अंतमें हुये विरज राजाने अपने यशसे प्रियव्रत राजाके वंशको शोभित किया ॥ १६ ॥

इति श्रीमद्भा०महा०पंचम०सरलाभाषाटीकायांपंचदशोऽध्यायः ॥ १५ ॥

राजा परीक्षित बोले कि–जहांतक सूर्य प्रकाश करताहै और ग्रहोंसहित चन्द्रमा देख पड़ता है वहांतक भूमण्डलका आपने वर्णनकिया ॥ १ ॥ कि जिसमें राजा प्रियव्रतके रथके पहियोंकी खाईसे सातसमुद्रहुये और इन समुद्रोंसे पृथ्वीके सातद्वीपोंकी रचनाहुईहै सो आपने संक्षेपसे कहा

गुणमयेस्थूलरूपआवेशितंमनोह्यगुणेऽपिसूक्ष्मतमआत्मज्योतिषि परेब्रह्मणिभगवतिवासुदेवाख्येक्षममावेशितुंतदुहैतद्गुरोऽर्हस्यनुवर्णयितुमिति ॥ ३ ॥ ऋषिरुवाच ॥ नवैमहाराजभगवतोमायागुणविभूतेःकाष्ठांमनसावचसावाऽधिगन्तुमलंविबुधायुषाऽपिपुरुषस्तस्मात्प्राधान्येनैवभूगोलकविशेषंनामरूपमानलक्षणतोव्याख्यास्यामः ॥४॥ योवाऽयंजम्बुद्वीपःकुवलयकमलकोशाभ्यंतरकोशोनियुतयोजनविशालःसमवर्तुलोयथापुष्करपत्रम् ॥ ५ ॥ यस्मिन्नववर्षाणिनवयोजनसहस्रायामान्यष्टभिर्मर्यादागिरिभिः सुविभक्तानिभवन्ति ॥ ६ ॥ एषांमध्येइलावृतंनामाभ्यंतरवर्षंयस्यनाभ्यामवस्थितः सर्वतःसौवर्णःकुलगिरिराजोमेरुर्द्वीपायामसमुन्नाहःकर्णिकाभूतःकुवलयकमलस्यमूर्धनिद्वात्रिंशत्सहस्रयोजनविततोमूलेषोडशसहस्रंतावताऽन्तर्भूम्यांप्रविष्टः ॥ ७ ॥ उत्तरोत्तरेणेलावृतंनीलःश्वेतःशृङ्गवानितित्रयोरम्यकहिरण्मयकुरूणांवर्षाणांमर्यादा गिरयःप्रागायताःउभयतःक्षारोदावधयोद्विसहस्रपृथवएकैकशः पूर्वस्मात्पूर्वस्मादुत्तरउत्तरोदशांशाधिकांशेन दैर्घ्यएवह्रसन्ति ॥८॥ एवंदक्षिणेनेलावृतंनिषधोहेमकूटोहिमालयइतिप्रागायतायथानीलादयोऽयुतयोजनोत्सेधाहरिवर्षकिंपुरुषभारतानांयथासङ्ख्यम् ॥९ ॥ तथैवेलावृतमपरेणपूर्वेणचमाल्यवद्गन्धमादनावानीलनिषधायतौ द्विसहस्रंपप्रथतुःकेतुमालभद्राश्वयोःसीमानंविदधाते ॥ १०॥ मंदरोमेरुमन्दरःसुपार्श्वःकुमुदइत्ययुतयोजनविस्तारोन्नाहामेरोश्चतुर्दिशमवष्टम्भगिरयउपक्लृप्ताः ॥११॥चतुर्ष्वेतेषुचूतजम्बूकदम्बन्य

अब विस्तारसे कहिये॥२॥भगवानके गुणमय स्थूलरूपमें जब मन प्रवेश करनेको समर्थ होजाताहै कि सूक्ष्मरूप निर्गुण आत्मज्योतिरूप ब्रह्मरूप भगवान वासुदेव जिनका नामहै, सो हेगुरो ! आप वर्णन करने योग्यहो ॥ ३ ॥ श्रीशुकदेवजी बोले कि हे महाभाग ! भगवानके मायागुणकी विभूति का कोई मनुष्य मन बचनसे पार पानाचाहै तो देवताओंके आयु कालतक भी यदि प्रयत्नकरे तोभी उसका पार नहीं पासकता इसलिये मुख्य विषय लेकर नाम, रूप, लक्षणसे इस भूगोलकी व्याख्या करूंगा ॥ ४ ॥ भूमण्डल रूप कमलकोशके बीचमें यह पहिला जम्बूद्वीप लाख योजन विस्तारवालाहै कि जो कमलपत्रका सदृश गोलहै ॥ ५ ॥ जम्बूद्वीपमें नौखण्ड नौनौहजार योजनके विस्तारकेहैं कि जिनकी मर्यादा आठ पर्वतोंसे विभक्त कीगईहै ॥ ६ ॥ इन आठोंके मध्यमें इलावृत खण्डहै इसके बीचमें सब पर्वतोंका राजा सुमेरुपर्वत लाखयोजनके विस्तारकाहै कि जो भूमण्डल रूप कमलकी कलीरूपहै यह मेरु ऊपर बत्तीसहजार योजन और जड़में सोलहहजार योजन मोटा है और सोलहीहजार योजन पृथ्वीके भीतरहै ॥ ७ ॥ इलावृतके उत्तर ओर नील, श्वेत और शृंगवान यह तीनपर्वतहैं जो रम्यक, हिरण्मय और कुरुखण्डकी मर्यादाहैं तथा पूर्वकी ओर फैलेहुएहैं इसके दोनोंओर खारे समुद्र दो २ हजार योजन चौड़े हैं इन पहाड़ों में पहिले २ पर्वतकी अपेक्षा पिछले २ पर्वत लंबाई में दशांशसे कुछ अधिक कमहैं॥८॥इसीभांति इलावृतके दक्षिण ओर निषध हेमकूट और हिमालय पर्वत हैं यहभी पूर्वकी ओर फैलहुये और विस्तारमें नील आदि पर्वतोंके समानहैं यह पर्वत दश दश हजार योजन ऊँचे तथा हरिवर्ष, किंपुरुष, और भारतखण्डकी मर्यादा हैं ॥ ९ ॥ इसीभांति इलावृतके पश्चिम ओर माल्यवान और पूर्वकी ओर गन्धमादन पर्वत है यह दोनों नील और निषद पर्वततक फैलेहुये तथा दो २ सहस्र योजन चौड़े और दश २ सहस्र योजन ऊँचेहैं यह केतुमाल भद्राश्वखण्डकी सीमा बनातेहैं ॥ १० ॥ मंदर, मेरुमन्दर, सुपार्श्व, कुमुद यह पर्वत दश २ हजार योजन विस्तारके हैं और मानो सुमेरु पर्वतके चारोंओर खम्भसे लगाये गयेहैं

प्रोघाश्चत्वारःपादपप्रवराः पर्वतकेतवइवाधिसहस्रयोजनोन्नाहास्तावद्विटपविततयःशतयोजनपरिणाहाः ॥१२॥ ह्रदाश्चत्वारःपयोमध्विक्षुरसमृष्टजलायदुपस्पर्शिनउपदेवगणायोगैश्वर्याणिस्वाभाविकानिभरतर्षभधारयन्ति ॥ १३ ॥ देवोद्यानानिचभवन्तिचत्वारिनन्दनंचैत्ररथंवैभ्राजकंसर्वतोभद्रमिति ॥ १४॥येष्वमरपरिवृढाःसहसुरललनाललामयूथपतयउपदेवगणैरुपगीयमानमहिमानःकिल विहरंति १५॥ मन्दरोत्सङ्गएकादशशतयोजनोत्तुङ्गदेवचूतशिरसो गिरिशिखरस्थूलानिफलान्यमृतकल्पानिपतन्ति ॥ १६ ॥ तेषांविशीर्यमाणानामतिमधुरसुरभिसुगन्धिबहुलारुणरसोदेनारुणोदानामनदी मंदरगिरिशिखरान्निपतंतीपूर्वेणेलावृतमुपप्लावयति ॥ १७ ॥ यदुपजोषणाद्भवान्याअनुचरीणांपुण्यजनवधूनामवयवस्पर्शसुगन्धवातोदशयोजनंसमंतादनुवासयति ॥ १८ ॥ एवंजम्बूफलानामत्युच्चनिपातविशीर्णानामनस्थिप्रायाणामिभकायनिभानांरसेनजम्बूनामनदी मेरुमन्दरशिखरादयुतयोजनादवनितलेनिपतंतीदक्षिणेनात्मानंयावदिलावृतमुपस्यन्दयति ॥ १९ ॥ तावदुभयोरपिरोधसोर्यामृत्तिकातद्रसेनानु विध्यमानावाय्वर्कसंयोग विपाकेनसदाऽमरलोकाभरणंजांबूनदंनामसुवर्णभवति ॥ २० ॥ यदुहवावविबुधादयःसहयुवतिभिर्मुकुटकटककटिसूत्राद्याभरणरूपेणखलुधारयंति ॥ २१ ॥ यस्तुमहाकदम्बःसुपार्श्वनिरूढोयास्तस्यकोटरेभ्यो विनिःसृताःपञ्चायामपरिणाहाः पञ्चमधुधाराःसुपार्श्व शिखरात्पतन्त्योऽपरेणात्मानमिलावृतमनुमोदयंति ॥ २२॥ याह्युपयुञ्जानानांमुखनिर्वासितोवायुःसमंताच्छतयोजनमनुवासयति ॥ २३ ॥ एवंकुमुदनिरू-

---

११ ॥ इन चारों पर्वतोंपर श्रेष्ठ चारवृक्ष क्रमानुसार आम, जामुन, कदम्बऔर वटकेहैं यह ११०० योजन ऊंचे पर्वतों के ध्वजाकी समान हैं और ११०० योजनही शाखाओं के विस्तार वाले तथा १०० योजनमोटे हैं ॥ १२ ॥ हेपरीक्षित! वहांदूध, शहद, ईखकेरस और मीठेजलके चार सरोवर हैं कि जिनके जलके पीनेवाले उपदेव लोग स्वाभाविक ऐश्वर्य्यों कोधारण करते हैं ॥ १३ ॥ इन पर्वतों पर क्रमानुसार नंदन, चैत्ररथ, वैभ्राजक, और सर्वतोभद्र यह चार देवताओं के उपवन हैं ॥१४॥ उन बागोंमें देवांगनाओं में श्रेष्ठ स्त्री यूथके स्वामी श्रेष्ठ देवता लोग विहार करते है, और गन्धर्व गण उनके यशका कीर्तन किया करते हैं ॥ १५ ॥ मंदराचल पर्वतपर जो ११०० योजन ऊंचा आमका वृक्ष है उससे पर्वत के शिखर की सदृश मोटे अमृत से मीठेफल गिराकरते हैं ॥ १६ ॥ यह फल नीचे गिरने से फटजाते हैं तब उससे अत्यंत मीठा, सुगंधित लालरस बहता है कि जिससे अरुणोदा नामनदी मंदर केशिखर से गिरकर इलावृत्त खंडके पूर्व ओर को बहती है ॥१७॥ जिस जलके सेवन से पार्वती की अनुचरी, यक्षोंकी वधुओं के अंग से पवन स्पर्शकर सुगंधितहो दश२ योजनतक चारोंदिशाओंको सुगंधित करतीहै॥१८॥ऐसेही अतिसूक्ष्म गुठली वाले हाथी के शरीरकी सदृश बड़े २ जामुन अति ऊँचेसे गिरकर फट जाते हैं उनके रससे जम्बूनाम नदी दश हजारयोजन ऊँचेमेरु मन्दरके शिखरसे गिरकर इलावृतके दक्षिण ओर बहतीहै॥१९॥दोनों किनारों की मिट्टी इस रससे मिल पवन और सूर्यके संयोगसे पक जातीहै कि जिससे जाम्बू नद नामसुवर्ण उत्पन्न होताहै ॥ २० ॥ कि जिस सुवर्णके आभूषण, कीट, मकुट, कुण्डल क्षुद्र घंटिका इत्यादिक देवतागण अपनी स्त्रियोंसमेत धारण करतेहैं ॥ २१ ॥ सुपार्श्व पर्वतवाले कदम्ब वृक्षके कोटरोंमें से पांच पांच बाहु मोटी पांच मधुकी धारा निकलतीहैं वह सुपार्श्वकी चोटी परसे गिर इलावृतके पश्चिमओरको आनन्दित करतीहैं ॥ २२ ॥ इन धाराओंके सेवन करनेवालोंके मुखकी सुगन्धिसे पवन सुगन्धितहो चारोंओरके सौसौ योजन दशोंको सुवासित करती है ॥ २३ ॥ इसीभांति कुमुद

द्योः शतवल्शोनामवटस्तस्यस्कन्धेभ्योनीचीनाःपयोदधि मधुघृतगुडान्नाद्यम्बर शय्यासनाभरणादयः सर्वएवकामदुघानदाः कुमुदाग्रात्पतंतस्तमुत्तरेणेलावृतमुप योजयन्ति ॥ २४ ॥ यानुपजुषाणानांनकदाचिदपिप्रजानांवलीपलितक्लमस्वेद दौर्गन्ध्यजराभयमृत्युशीतोष्णवैवर्ण्योपसर्गादयस्ताप विशेषाभवंति यावज्जावं सुखंनिरतिशयमेव ॥ २५ ॥ कुरङ्गकुररकुसुम्भवैकङ्कत्रिकूटशिशिरपतङ्गरुचकनि· षधशिनीवासकपिलशंखवैदूर्यजारुधिहंसर्षभनागकालञ्जरनारदादयोविंशतिगि रयोमेरोःकर्णिकायाइवकेसरभूतामूलदेशेपरितउपक्लृप्ताः ॥ २६ ॥ जठरदेवकूटौ मेरुंपूर्वेणाष्टादशयोजनसहस्रमुदगायतौद्विसहस्रंपृथुतुङ्गौभवतः । एवमपरेणपवन पारियात्रौदक्षिणेनकैलासकरवीरौप्रागायतौ । एवमुत्तरतस्त्रिशृङ्गमकरावष्टभिरेतैः परिसृतोऽग्निरिवपरितश्चकास्तिकाञ्चनगिरिः ॥ २७॥ मेरोर्मूर्धनिभगवतआत्म योनेर्मध्यत उपक्लृप्तांपुरीमयुतयोजनसाहस्रींसमचतुरस्रांशातकौम्भींवदंति २८ ॥ तामनुपरितो लोकपालानामष्टानां यथादिशंयथारूपं तुरीयमानेनपुरोऽ ष्टा वुपक्लृप्ताः ॥ २९ ॥

इतिश्रीमद्भा०पञ्चमस्कन्धेभुवनकोशवर्णनंनामषोडशोऽध्यायः ॥ १६ ॥

श्रीशुकउवाच ॥ तत्रभगवतःसाक्षाद्यज्ञलिंगस्य विष्णोर्विक्रमतो वामपादांगु ष्ठनखनिर्भिन्नोर्ध्वाण्डकटाहविवरेणान्तः प्रविष्टायाबाह्यजलधारा तच्चरणपंकजा- वनेजनारुणकिंजल्कोपरंजिताखिलजगदघमलापहोपस्पर्शनाऽमला साक्षाद्भगव· त्पदीत्यनुपलक्षितवचोऽभिधीयमानाऽतिमहता कालेन युगसहस्रोपलक्षणेन दिवो

नाम पर्वतसे शतवल्श नामक बटवृक्षकी शाखाओंमेसे अधोमुखहो दूध, दही, शहद, घी गुड़ अन्न इत्यादिक शय्या, आसन, आभरण आदिके नद बहतेहैं कि जो सबकी मनोकामना पूर्ण करतेहुये इलावृतके उत्तरकी ओर बहते हैं ॥ २४ ॥ जोइन नदोंका सेवन करते हैं उनके केश सफेद, खेद, पसीना, दुर्गंध, जरारोग, मृत्यु, शीत, गरमी, विवर्णता और विघ्न इत्यादिक कोई संताप नहीं होते और जबतक जीते हैं तबतक सर्वोत्तम सुखही बनारहता है ॥ २५ ॥ कुरंग, कुरर, कुसुंभ, वैकंक, त्रिकूट, शिशिर, पतंग, रुचक, निषध, शिनी, वास, कपिल, शंख, वैदूर्य, जारुधि, हंस, ऋषभ, नाग, कालंजर और नारद यह २० पर्वत सुमेरूपी कमल के केसर की समान मेरुके मूलभाग में चारों ओर बनायेगये हैं ॥ २६ ॥ मेरुपर्वत के पूर्वकी ओर जठर और देवकूट यह दोपहाड़ उत्तर की ओर अठारह सहस्र योजन लम्बे और दोसहस्र योजन चौड़े तथा ऊंचे हैं इसी भांति मेरुके पश्चिम ओर पवन और पार्य्यात्र पहाड़ दक्षिण की ओर लम्बे और दक्षिण की ओर कैलास और करवीर दोपहाड़ पूर्वकी ओर लम्बे और उत्तर की त्रिशृंग और मकर यह दोपहाड़ पश्चिम की ओर लम्बे हैं यह सुवर्ण का मेरुपर्वत इन आठ पर्वतों से आवृत्त अग्निकी सदृश चारो दिशाओं में प्रकाशित होरहा है ॥२७॥ मेरुके ऊपर मध्यमें १० हजार योजन बड़ी सुवर्ण मय ब्रह्माजी की पुरी है ऐसा कहते हैं ॥ २८ ॥ ब्रह्माजी की पुरीके निकटही निकट उसके चारो ओर आठो लोक पालोंकी पुरी अपनी २ दिशाओं के रूपके अनुसार ढाई २ सहस्र योजन की है ॥ २९ ॥

इति श्रीमद्भा० महा० पंचम० सरला भाषाटीकायां षोडशोऽध्यायः ॥ १६ ॥

श्रीशुकदेवजी बोले कि वामन भगवान ने बलि राजा के यज्ञ में विराट् रूप धर अपने दायें चरण से भूमिको दबाकर बायां चरण ऊंचा किया तब उस चरण के अंगूठे के नख से ब्रह्मांड का ऊपरी भाग फटगया उस छिद्र में से बाहर के ढके हुए जल की धारा जो भीतर आईथी वह सहस्र युग पर्यंत के समय से वैकुंठके ऊपर उतरी इस धारा से भगवान के चरण कमल धुलनें के कारण

मूर्द्धन्यवततार यत्तद्विष्णुपदमाहुः ॥ १ ॥ यत्रहवावधीरव्रतऔत्तानपादिः परमभागवतोऽस्मत्कुलदेवताचरणारविन्दोदकमिति यामनुसवनमुत्कृष्यमाणभगवद्भक्तियोगेन दृढंक्लिद्यमानान्तर्हृदय औत्कण्ठ्यविवशामीलितलोचनयुगलकुड्मलविगलितामलबाष्पकलयाऽभिव्यज्यमानरोमपुलककुलकोऽधुनापि परमादरेणशिरसाबिभर्ति ॥२॥ ततःसप्तऋषयस्तत्प्रभावाभिज्ञायां ननुतपसआत्यन्तिकी सिद्धिरेतावती भगवतिसर्वात्मनि वासुदेवऽनुपरतभक्तियोगलाभेनैवोपेक्षितान्यार्थात्मगतयो मुक्तिमिवागतांमुमुक्षवइव सबहुमानमद्यापिजटाजूटैरुद्वहन्ति ॥ ३ ॥ ततोऽनेकसहस्रकोटिविमानानीकसंकुलदेवयानेनावतरन्तीन्दुमण्डलमावार्य ब्रह्मसदनेनिपतति ॥ ४ ॥ तत्रचतुर्धाभिद्यमानाचतुर्भिर्नामभिश्चतुर्दिशमभिस्पंदन्ती नदनदीपतिमेवाभिनिविशति सीताऽलकनन्दाचक्षुर्भद्रेति ॥ ५ ॥ सीतातुब्रह्मसदनात् केसराचलादिगिरिशिखरेभ्योऽधोऽधःप्रस्रवन्तीगन्धमादनमूर्धसुपतित्वा अन्तरेणभद्राश्ववर्षंप्राच्यांदिशि क्षारसमुद्रमभिप्रविशति ॥ ६ ॥ एवंमाल्यवच्छिखरान्निष्पतन्ती ततोऽनुपरतवेगा केतुमालमभिचक्षुः प्रतीच्यांदिशिसरित्पतिंप्रविशति ॥ ७ ॥ भद्राचोत्तरतोमेरुशिरसोनिपतिता गिरिशिखराद्गिरिशिखरमतिहाय शृंगवतःशृंगादवस्यन्दमाना उत्तरांस्तुकुरूनभितउदीच्यांदिशिजलधिमभिप्रविशति॥८॥तथैवालकनन्दादक्षिणेन ब्रह्मसदनाद्बहूनिगिरिकूटान्यतिक्रम्य-

चरण सम्बन्धी अरुण केसर से वह धारा रंग गई थी उसी से उस धारा का स्पर्श सम्पूर्ण सृष्टि के पाप रूपी मलकानाश करने वाला हुआ और निर्मल थी पहले तो यह भगवत्पदी के नाम से कहने में आती थी परन्तु फिर पृथक २ प्रसंगो से जान्हवी, भागीरथी आदि नाम से प्रगट हुई ॥ १ ॥ यह धारा पहिले तो विष्णु पद कि जो स्वर्ग का मस्तक रूप है वहां आयी, जहां के रहने वाले भगवद्भक्त और दृढ़ प्रतिज्ञ ध्रुवजी उस गंगा को अपने कुलदेव भगवान के चरणों का जल जान अब तक भी सत्कार पूर्वक अपने माथे पर धारण करते हैं प्रति क्षण बढ़ी हुई भगवद्भक्ति के प्रभाव से ध्रुवजी का अंतःकरण द्रवीभूत होता जाता है और उत्कंठा से उनके दोनो नेत्र कमल मुंद आते हैं तब उनमें से निर्मल आंसू गिरते हैं कि जिस से वह पुलकायमान होते हैं ॥२॥ ध्रुवजी के उपरांत उनके नीचे रहनेवाले सप्तर्षि कि जो गंगाजी के ऐश्वर्य को जानते हैं और सर्वात्मारूप परब्रह्म की एकांत भक्ति प्राप्त होने से दूसरे समस्त पुरुषार्थों का और आत्मज्ञानका भी तिरस्कार करते हैं वह गंगाजी के मिलने से अपने तप का परम फल मिलना विचार जिस भांति मुमुक्षु अपनी आई हुई मुक्ती धारण करते हैं वैसेही वह अबतक सत्सकार पूर्वक अपनी जटाओं में गंगाजी को धारण किए हुए हैं ॥ ३ ॥ फिर उन सप्तर्षियों के आश्रम से नीचे उस आकाश पथ में होकर कि जहां हजारों करोड़ों विमानों के फिरने से भीड होरही है, चन्द्र लोक को प्लावित करती हुई गंगा ब्रह्म लोक में गिरती है ॥ ४ ॥ वहां चार प्रकार के भेदों को प्राप्त हो चार नामों से चारों दिशायों में बहकर समुद्र में प्रवेश करती है ॥ ५ ॥ इन चारों धाराओं के नाम सीता, अलकनन्दा, चक्षु और भद्रा हैं सीता तो ब्रह्म लोक से केसरादिक पर्वतों की चोटियों से धीरे २ उतर गंधमादन पर्वतकी चोटियों में पड भद्राश्व खण्ड के मध्यमें बहती हुई पूर्वीक्षार समुद्र में जामिली है ॥६॥ ऐसेही चक्षु नाम धारा माल्यवान की चोटी से पड़कर केतुमाल खण्ड में बहती हुई पश्चिमी समुद्र में जामिली है ॥७॥ भद्रा उत्तर की ओर सुमेरु के शिखर से गिर मुकुद पर्वत पर पड़ती है और वहां से नील श्वेत और शृंगवान पर्वतों पर क्रमानुसार होती हुई उत्तर कुरु में हो उत्तर के समुद्र में जामिलता है ॥८॥ ऐसेही

हेमकूटाद्धैमकूटान्यतिरभसतरंहसालुठंतीभारतमभिवर्षंदक्षिणस्यांदिशिजलधिमभिप्रविशतियस्यांस्नानार्थंचागच्छतःपुंसः पदेपदेऽश्वमेधराजसूयादीनांफलंनदुर्लभमिति॥९॥अन्येचनदानद्यश्च वर्षेवर्षेसंति बहुशोमेर्वादिगिरिदुहितरःशतशः१० तत्रापिभारतमेववर्षं कर्मक्षेत्रमन्यान्यष्टवर्षाणिस्वर्गिणां पुण्यशेषापभोगस्थानानि भौमानि स्वर्गपदानिव्यपदिशन्ति ॥११॥ एषुपुरुषाणामयुतपुरुषायुर्वर्षाणां देवकल्पानांनागायुतप्राणानां वज्रसंहननबलवयोमोदप्रमुदितमहासौरतमिथुनव्यवायापवर्गवर्षधृतैकगर्भकलत्राणांतत्रतु त्रेतायुगसमःकालोवर्तते ॥१२॥ यत्रहदेवपतयः स्वैःस्वैर्गणनायकैर्विहितमहाऽर्हणाः सर्वर्तुकुसुमस्तबकफलकिसलय श्रियानम्यमानविटपलताविटपिभिरुपशुम्भमानरुचिरकाननाश्रमायतनवर्षगिरिद्रोणीषु तथा चामलजलाशयेषुविकच विविधनववनरुहामोदमुदितराजहंसजलकुक्कुटकारण्डवसारसचक्रवाकादिभिर्मधुकरनिकराकृतिभिरुपकूजितेषु जलक्रीडादिभिर्विचित्रविनोदैः सुललितसुरसुन्दरीणां कामकलिलविलासहासलीलाऽवलोकाकृष्टमनोदृष्टयःस्वैरंविहरन्ति ॥ १३ ॥ नवस्वपिवर्षेषुभगवान्नारायणो महापुरुषःपुरुषाणां तदनुग्रहायात्मतत्त्वव्यूहेनात्मनाऽद्यापिसन्निधीयते ॥ १४ ॥ इलावृतेतुभगवान्भवएकएवपुमान्नह्यन्यस्तत्रापरो निर्विशतिभवान्याः शापनिमित्तज्ञो यत्प्रवेक्ष्यतःस्त्रीभावस्तत्पश्चाद्वक्ष्यामि ॥ १५ ॥ भवानीनाथैःस्त्रीगणार्बुदसहस्रैरवरुध्यमानो भगवतश्चतुर्मूर्तेर्महापुरुषस्यतुरीयांतामसींमूर्तिं प्रकृतिमात्मनः संकर्षणसंज्ञामात्मसमाधिरूपेणसन्निधाप्यैतदभिगृणन्भवउपधावति ॥ १६ ॥ श्रीभगवानुवाच॥

अलकनंदा दक्षिण की ओर हो ब्रह्मलोक से गिरबहुत पर्वतों के शिखरों को छोड़, हिमकूट पर्वत की शिखरों को अपने वेगसे लुढकाती हुई हिमकूट से भरतखंड में हातीहुई क्षिरसमुद्र में प्रवेश करती है ॥ ९ ॥ जोमनुष्य गंगामें स्नानको जाता है उसका एक २ पैगमें अश्वमेध और राजसूय यज्ञआदिकों का फल मिलना कुछ दुर्लभ नहीं है मेरुआदि पर्वतों से नेक नों और भी नदनदी निकल करखंड २ बही हैं ॥ १० ॥ इनखंडों में भरत खंडही कर्मक्षेत्र है और शेष आठखंड हैं वह स्वर्ग से गिरे हुओं के पुण्यभोग करने के स्थान हैं, इस से इनको भौमस्वर्ग कहते हैं ॥ ११ ॥ इन खण्डों में रहनेवाले पुरुषोंकी अवस्था १० सहस्रवर्षकीहै देवताओंके तुल्यहैं दशसहस्र हाथियों की सम उनका बलहै वज्रसा देहहै बल, अवस्था और आनन्द समेत स्त्री पुरुष संभोग किया करतेहैं अन्तमें जब एकवर्ष शेष रहताहै तब स्त्रीयें गर्भ धारण करतीहैं यहां त्रेतायुगके समान समय वर्त्तताहै ॥ १२ ॥ अपने मुख्य सेवकों समेत बड़े२ देवता लोग आश्रमोंमें पर्वतको कंदराओं में सुन्दर सरोवरोंमे जल, विहारारादि अपनी इच्छानुसार क्रीड़ाकरतेहैं सब ऋतुओंमें फल, फूल, और कोंपल इनकी अधिकता से झुकीहुई डालियें और लतावाले वृक्षो से शोभित बनवाले आश्रम शोभाय मान होरहे हैं, खिलेहुये कमलों की सुगन्धी से प्रसन्नहो राजहंस, कारंडव, सारस और चकवा आदिक नाना भांतिके पक्षी और भौंरे सरोवरों में शब्द करते हैं अति सुंदर देवांगनाओं का काम से क्षुभित विलास, हास और लीला पूर्वक देखना, इनसे यहां क्रीड़ा करनेवाले देवताओं के मन और दृष्टिका आकर्षण होरहा है ॥ १३ ॥ इननौ खंडोंमें भगवान अपने भक्तोंपर अनुग्रह करने के हेतु एक २ रूपसे विराजते हैं ॥ १४ ॥ इलावृत्त खंडमें तो भगवान महादेवजी एकही पुरुष हैं इसमें कोई पुरुष नहीं जाता और जोजाता है वह पार्वतीजी के शापसे स्त्री रूप होजाता है सोआगे कहेंगे ॥ १५ ॥ इलावृत्त खंडमें पार्वतीजीकी दासि सहस्रोंस्त्रियां महादेवजीकी सेवाकरती हैं और महादेवजी भगवान की भक्ति करते हैं, चतुर्मूर्ति भगवान की संकर्षण नाम तमोगुण मूर्त्तिका

ओं नमोभगवतेमहापुरुषायसर्वगुणसंख्यानायानन्तायाव्यक्तायनमइति ॥१७॥ भजे भजन्यारणपादपंकजं भगस्यकृत्स्नस्यपरंपरायणम्। भक्तेष्वलंभावितभूतभावनं भयापहंत्वाभवभावमीश्वरम् ॥ १८ ॥ नयस्यमायागुणचित्तवृत्तिभिर्निरीक्षतो ह्यण्वपिदृष्टिरज्यते। ईशेयथानोऽचितमन्युरंहसांकस्तं नमन्येतजिगीषुरात्मनः ॥१९ असद्दृशोयःप्रतिभातिमायया क्षीवेयमध्वासवताम्रलोचनः। ननागवध्वोऽर्हण ईशिरेह्रिया यत्पादयोःस्पर्शनधर्षितेन्द्रियाः ॥ २० ॥ यमाहुरस्यस्थितिजन्मसंयमं त्रिभिर्विहीनंयमनन्तमृषयः। नवेदसिद्धार्थमिवक्वचित्स्थितं भूमण्डलंमूर्धसहस्रधामसु ॥ २१ ॥ यस्याद्यआसीद्गुणविग्रहोमहान्विज्ञानधिष्ण्योभगवानजःकिल यत्संभवोऽहंत्रिवृता स्वतेजसा वैकारिकंतामसमैन्द्रियंसृजे ॥ २२ ॥ एतेवयंयस्य वशेमहात्मनःस्थिताः शकुन्ताइवसूत्रयन्त्रिताः। महानहं वैकृततामसेन्द्रियाः सृजामसर्वेयदनुग्रहादिदम् ॥ २३ ॥ यन्निर्मितां कर्ह्यपिकर्मपर्वणींमायां जनोऽयंगुणसर्गमोहितः। नवेदनिस्तारणयोगमंजसातस्मै नमस्तेविलयोदयात्मने ॥ २४ ॥

इति श्रीमद्भा० म० पंचमस्कंधे इलावृतखण्डे सप्तदशोऽध्यायः ॥ १७ ॥

श्रीशुक उवाच ॥ तथाचभद्रश्रवानामधर्मसुतस्तत्कुलपतयः पुरुषाभद्राश्ववर्षेसाक्षाद्भगवतोवासुदेवस्यप्रियांतनुंधर्ममयींहयशीर्षाभिधानांपरमेणसमाधिना सन्निधाप्येदमभिगृणन्तउपधावंति ॥ १ ॥ भद्रश्रवस ऊचुः ॥ ओंनमोभगवतेधर्मा

कि जिससे स्वयंआप उत्पन्न हुये हैं भगवान महादेवजी समाधि रूपकर इस मंत्रसे जाप करते हैं ॥ १६ ॥ महादेवजी बोलेकि—सम्पूर्ण गुणोंके प्रकाशक, अनंत अव्यक्त, महापुरुष भगवान आपको मै नमस्कार करताहूं ॥१७॥हेभजन योग्य भगवान ! सम्पूर्ण ऐश्वर्यादिकों के आश्रय, अपने भक्तों को दयालु रूपका दर्शन देनेवाले,भूतोंके पालक,अभक्तोंको संसारके देनेवाले ऐसे परमेश्वर आपका मैं भजन करताहूं ॥१८॥ सृष्टि को नियम में रखनेंके हेतु आप सदैव देखाकरतेहो तौभी आपकी दृष्टि, जिसभांति क्रोधका वेग जीतनेको असमर्थ हम लोगोंकी दृष्टि लुप्तहोजाती है ऐसे बिषयों और इन्द्रियों से कुछभी लुप्त नहीं होता,इस हेतु मुक्तिकी इच्छा वाले कौन पुरुष आपका भजन नकरे १९ दुष्ट दृष्टि वाले पुरुष को, आप उन्मत्त की सदृश भयंकर और मदिरा तथा आसवसे लाल नेत्र हो ऐसे माया से ज्ञात होते हो क्यों कि आपके चरण स्पर्श से कामातुर हुई नाग बधू लज्जा के वशीभूत हो आपका पूजन भी नहीं करसकतीं ॥ २०॥ वेद मंत्र आपको स्थित्यादिक से रहित और अनंत कहते हैं आप के सहस्र मस्तकों में से किसी एक मस्तकपर यह पृथ्वी मण्डल सरसों के सदृश रक्खा हुआ है, कि जिस की आप को सुधि भी नहीं है ॥२१॥ महत्तत्व कि जिसका आश्रय सत्व गुण है वह आपका गुण के सम्बन्धके कारण उत्पन्न हुआ प्रथम देह है इस शरीर में से ब्रह्माजी उत्पन्न हुए हैं और मै ब्रह्माजी से उत्पन्न हो त्रिगुणात्मक अहंकार के, देवता, पंचभूत, और इन्द्री वर्ग को सृजता हूं ॥ २२ ॥ हम सब, महतत्व, अहंकार, देवता, भूत इन्द्री जैसे पक्षी डोरी से बंध कर पराधीन रहते है ऐसे यह सब बंधकर आप के आधीन रह आपकी कृपा से समस्त सृष्टि को रचते है ॥ २३ ॥ संसार में आसक्त हुआ यह मनुष्य जिन की बनाई हुई और कर्मों को प्राप्त करनें वाली माया को सहज जानजाता है परन्तु उस के पार करने के यत्न को नहीं जानता उन आप को कि जो विश्व को रचनें वाले और प्रलय करने वाले हो मैं दंडवत करता हुं ॥ २४ ॥

इति श्रीमद्भा० महा० पंचम० सरला भाषाटीकायां सप्तदशोऽध्याय: ॥ १७ ॥

श्रीशुकदेवजी बोले कि भद्राश्व खंडमें धर्म का पुत्र भद्रश्रवा है उसके वंशज लोग भगवान की हयग्रीव मूर्ति को एकाग्रभाव से हृदय में स्थापित कर इस मंत्र का जप करते हैं ॥ १ ॥ भद्रश्रवा

धात्मविशोधनायनमइति ॥ २ ॥ अहोविचित्रंभगवद्विचेष्टितंघ्नंतंजनोऽयंहिमिषन्न पश्यति ध्यायन्नसद्यर्हिविकर्मसेवितुं निर्हृत्यपुत्रंपितरंजिजीविषति ॥ ३ ॥ वदंतिविश्वं कवयःस्मनश्वरंपश्यंतिचाध्यात्मंविदोविपश्चितः ।तथाऽपिमुह्यन्तितवाऽजमायया सुविस्मितंकृत्यमजंनतोऽस्मितम् ॥ ४ ॥ विश्वोद्भवस्थाननिरोधकर्मतेह्यकर्तुरङ्गी कृतमप्यपावृतः । युक्तंनचित्रंत्वयिकार्यकारणेसर्वात्मनिव्यतिरिक्तेचवस्तुतः॥ ५ ॥ वेदान्युगांतेतमसातिरस्कृतान्रसातलाद्योनृतुरंगविग्रहः । प्रत्याददेवैकवयेऽभिया चतेतस्मैनमस्तेऽवितथेहितायइति ॥ ६ ॥ हरिवर्षेचापिभगवान्नरहरिरूपेणास्ते तद्रूपग्रहणनिमित्तमुत्तरत्राभिधास्ये। तद्दयितंरूपंमहापुरुषगुणभाजनोमहाभागवतो दैत्यदानवकुलतीर्थीकरणशीलाचरितः प्रह्लादोऽव्यवधानानन्यभक्तियोगेनसहतद् वर्षपुरुषैरुपास्तेइदंचोदाहरति ॥७॥ ओंनमोभगवतेनरसिंहायनमस्तेजस्तेजसेआवि राविर्भववज्रनखवज्रदंष्ट्रकर्माशयान्रन्धयरन्धयतमोग्रसग्रसओंस्वाहाअभयमभय मात्मनिभूयिष्ठाःओंक्ष्रौम् ॥८॥स्वस्त्यस्तुविश्वस्यखलःप्रसीदतांध्यायन्तुभूतानि शिवंमिथोधिया । मनश्चभद्रंभजतादधोक्षजेआवेश्यतांनोमतिरप्यहैतुकी ॥ ९ ॥ माऽगारदारात्मजवित्तबन्धुषुसङ्गोयदिस्याद्भगवत्प्रियेषुनः । यःप्राणवृत्त्यापरितुष्ट आत्मवान्सिध्यत्यदूरान्नतथेन्द्रियप्रियः ॥ १० ॥ यत्सङ्गलब्धंनिजवीर्यवैभवंतीर्थं

बोले कि ! हृदय को शुद्ध करनेवाले धर्म रूप भगवान आपको हमारा नमस्कार है ॥२॥ भगवान की लीला बडीही विचित्र है कि जो अपने को मारने वाले काल को देखता हुआ भी नहीं देखता क्यों कि यह तुच्छ विषय सुख सेवन के हेतु सर्वत्र पाप काही ध्यान किया करता है, बालक या बूढ़ा जो मर जाता है उसका दाह कर उस के द्रव्य से आप जीवन की इच्छा करता है ॥ ३ ॥ विवेकी लोग तो शास्त्र से इस सृष्टि को नाशवान कहते हैं और योगी इसको समाधि में साक्षात् नाशवान देखते हैं हेअज! तौभी यह लोग आपकी मायासे मोहित होजाते हैं आपकी बड़ाही विचित्र लीला है इसहेतु शास्त्रादि श्रम को त्याग कर अजन्मा आपको मैं नस्कार करताहू ॥४॥ आप अकर्त्ता और आवरण रहित होनेपर भी सृष्टिकी उत्पत्ति स्थिति और प्रलयका कार्य करतेहो, क्योंकि मायाको धारण करके सर्वस्वरूप और सर्वकार्यके कर्त्ता आपमें यह कुछ विचित्र नहीहै ॥ ५ ॥ प्रलयकालमें तमरूप असुर वेदोंको हरकर लेगया, तब हयग्रीव मूर्ति धारणकर वेदोंको, स्तुति करतेहुये ब्रह्मा को दिया उन सत्यसंकल्प आपको नमस्कारहै ॥ ६ ॥ हरिवर्षखण्डमें भगवान नृसिंहरूप करके रहतेहैं कि जिसरूपके ग्रहण करनेका कारण आगे सातवें स्कन्धमें कहेंगे महापुरुषोंके गुणोंका पात्र महाभागवत दैत्य दानवकुलके पवित्र करनेवाले, शील आचरणवान प्रहलादजी एकाग्र चित्त हो अनन्य भक्तियोगसे उस खण्डके पुरुषों सहित अपने प्यारे नृसिंहरूप का उपासना करतेहुये इस मंत्रका जप करते हैं ॥७॥ तेजकेभी तेजरूप नृसिंह भगवानको मैं प्रणाम करताहूं हे वज्रसे नख तथा वज्रसी डाढ़ोंवाले! प्रगटहोओ२ कर्म वासनाओंको जलादो जलादो अज्ञानको नाशकर आत्मामें अभयरूपहो अभयरूपहो ओं स्वाहा ओं क्ष्रौं यह बीज मन्त्रहै ॥ ८ ॥ हेभगवन् ! विश्व का कल्याणहो, दुष्ट अपनी क्रूरताछोडें, प्राणी परस्पर मंगलका ध्यानकरें और मनसे उपशम इत्यादि का सेवनकरें और हमारी तथा सब मनुष्यों की बुद्धि निष्काम होकर भगवान में लगे ॥ ९ ॥ हमारा संग स्त्री, पुत्र, घर, द्रव्य और सुहृदोंमें न हो यदि हो तो भगवद्भक्तोंके साथहो क्योंकि केवल आहारसे संतोष रखनेवाला ज्ञानी जैसा तत्कालही सिद्ध होजाताहै वैसा इन्द्रियोंको तृप्त करनेवाला नहींहोता ॥ १० ॥ गङ्गा आदिक तीर्थ तो बारम्बार स्नान करनेवाले मनुष्योंके दैहिक

मुहुः संस्पृशतां हिमानसम् । हरत्यजोऽन्तःश्रुतिभिर्गतोऽङ्गजं को वै न सेवेत मुकुन्दविक्रमम् ॥ ११ ॥ यस्यास्ति भक्तिर्भगवत्यकिंचना सर्वैर्गुणैस्तत्र समासते सुराः । हरावभक्तस्य कुतो महद्गुणा मनोरथेनासति धावतो बहिः ॥ १२ ॥ हरिर्हि साक्षाद्भगवाञ्छरीरिणामात्मा झषाणामिव तोयमीप्सितम् । हित्वा महांस्तं यदि सज्जते गृहे तदा महत्त्वं वयसा दम्पतीनाम् ॥ १३ ॥ तस्माद्रजोरागविषादमन्युमानस्पृहाभयदैन्याधिमूलम् । हित्वा गृहं संसृतिचक्रवालं नृसिंहपादं भजताऽकुतोभयमिति ॥ १४ ॥ केतुमालेऽपि भगवान्कामदेवस्वरूपेण लक्ष्म्याः प्रियचिकीर्षया प्रजापतेर्दुहितॄणां पुत्राणां तद्वर्षपतीनां पुरुषायुषाऽहोरात्रपरिसंख्यानानां यासां गर्भा महापुरुषमहास्त्रतेजसोद्वेजितमनसां विध्वस्ता व्यसवः संवत्सरान्ते विनिपतन्ति ॥ १५ ॥ अतीव सुललितगतिविलासविलसितरुचिरहासलेशावलोकलीलया किंचिदुत्तम्भितसुंदरभ्रूमण्डलसुभगवदनारविंदश्रिया रमां रमयन्निन्द्रियाणि रमयते ॥ १६ ॥ तद्भगवतो मायामयं रूपं परमसमाधियोगेन रमा देवी संवत्सरस्य रात्रिषु प्रजापतेर्दुहितृभिरुपेताऽहस्सु च तद्भर्तृभिरुपास्ते इदं चोदाहरति ॥ १७ ॥ ओं ह्रां ह्रीं ह्रूं ओं नमो भगवते हृषीकेशाय सर्वगुणविशेषैर्विलक्षितात्मने आकूतीनां चित्तीनां चेतसां विशेषाणां चाधिपतये षोडशकलाय च्छन्दोमयायान्नमयायामृतमयाय सर्वमयाय सहसे ओजसे बलाय कांताय कामाय नमस्ते उभयत्र भूयात् ॥ १८ ॥ स्त्रियो व्रतैस्त्वा हृषिकेश्वरं स्वतो ह्याारा

मलको ही दूर करते हैं परन्तु भगवद्भक्तों से प्राप्त हुई भगवत्कथा" कि जिसका असाधारण प्रभाव है केवल श्रवण द्वारा प्राप्त होनेसे मनके मलको नाश करती है इससे हे मुकुन्द! तुम्हारे प्रतापको कौन नहीं सेवन करैगा ॥ ११ ॥ जिसकी ईश्वरमें निष्काम भक्ति है उसमें सर्व गुणयुक्त देवता नित्यही वास करते हैं और जो हरिभक्त नहीं हैं और मनोरथ बांधकर झूंठे बिषयोंकी ओर दौड़ता है उसमें गुण, कहांसे आवे ॥ १२ ॥ जैसे मत्स्योंका जलही प्यारा आत्मा है ऐसेही प्राणियों के भगवान प्यारे आत्मा हैं उन हरिको छोड़ लोक प्रसिद्ध मनुष्यभी घरमें आसक्त होजाय तो उसका महत्व स्त्री पुरुषोंका बड़प्पन जैसे अवस्थामात्र से गिना जाता है वैसाही है ॥ १३ ॥ इससे तृष्णा, राग, द्वेष क्रोध, अभिमान, इच्छा, और भयके देनेवाले जन्ममरणादिकके कारणरूप घरको छोड़ अभयदाई नृसिंहजीके चरणोंको भजो ॥ १४ ॥ केतुमाल खण्डमें भगवान लक्ष्मीजी तथा प्रजापति संवत्सर कन्या (रात्रिके अभिमानी देवता) और पुत्र (दिवसके अभिमानी, देवता) के प्रियके हेतु कामदेव स्वरूपसे विराजते हैं जितनी संख्या सौवर्षके अहोरात्रकी है उतनीही संख्या प्रजापति के पुत्र और कन्याओंकी (अर्थात् ३६००० हजार) है इन प्रजापतिकी कन्याओंकेगर्भ वर्षके अंत में भगवानके चक्रके तेजसे हत होकर निष्प्राण होजाते हैं इससे वहांकी संख्या अधिक नहीं होने पाती ॥ १५ ॥ अति ललित गति और विलाससे सुन्दर मन्दमुसकान सहित चितवनकी लीलाके हेतु कुछ एक ऊँचे भ्रुकुटी मंडलसे बढ़ी हुई मुखारविन्दकी शोभासे लक्ष्मीजीको रमण करातेहुये अपनी इन्द्रियों को तृप्त करते हैं ॥ १६ ॥ लक्ष्मीजी संवत्सरकी कन्या रात्रि और उनके भर्त्ता दिनोंके साथ के परम समाधि योगसे भगवान के मायामय रूपकी उपासना करतीं और इस मन्त्रको जपती हैं ॥ १७ ॥ ओं ह्रां ह्रीं ह्रूं इन्द्रियोंके ईश्वर, उत्तम पदार्थोंसे जिनका रूप लखा है ऐसे, ज्ञानेंद्री, कर्मेंद्री चित्त और इनके विषयोंके अधिपति, ग्यारह इन्द्री और पांच तन्मात्रा इन सोलह कलावाले, वेदानुसार कर्मसे उत्पन्न होनेके योग्य अन्नमय अमृतमय, सर्वमय ओज और बलके हेतु कांत कामदेव मूर्तिको नमस्कार है ॥ १८ ॥ आप जो इन्द्रियोंके ईश्वर हैं उनका आराधन कर जो स्त्रियाँ आपके

न्यलोकेपतिमाशासतेऽन्यम् । तासांनतेवैपरिपांत्यपत्यंप्रियंधनायूंषियतोऽस्वतं-त्राः ॥ १९ ॥ सवैपतिःस्यादकुतोभयःस्वयंसमंततःपातिभयातुरंजनम् । सएकएवेतरथामिथोभयंनैवात्मलाभादधिमन्यतेपरम् ॥ २० ॥ यातस्यतेपादसरोरुहार्हणं निकामयेत्साऽखिलकामलम्पटा । तदेवरासीप्सितमीप्सितोऽर्चितोयद्भग्नयाच्ञा भगवन्प्रतप्यते ॥ २१ ॥ मत्प्राप्तयेऽजेशसुरासुरादयस्तप्यन्तउग्रंतपऐन्द्रियेधियः । ऋतेभवत्पादपरायणान्नमांविन्दन्त्यहंत्वद्धृदयायतोऽजित ॥ २२॥ सत्वंममाप्यच्युत शीर्ष्णिवन्दितकराम्बुजंयत्त्वदधायिसात्वताम् । बिभर्षिमांलक्ष्मवरेण्यमाययाक ईश्वरस्येहितमूहितुंविभुरिति ॥ २३ ॥ रम्यकेचभगवतःप्रियतमंमात्स्यमवताररूपं तद्वर्षपुरुषस्यमनोःप्राक्प्रदर्शितम् । सइदानीमपिमहताभक्तियोगेनाराधयंतीदंचो दाहरति ॥ २४ ॥ ओं नमोभगवतेमुख्यतमायनमःसत्वायप्राणायौजसेसहसेबलाय महामत्स्यायनमइति ॥ २५ ॥ अन्तर्बहिश्चाखिललोकपालकैरदृष्टरूपोविचरस्युरुस्वनः । सईश्वरस्त्वंयइदंवशेनयन्नाम्नायथादारुमयींनरःस्त्रियम् ॥ २६ ॥ यंलोकपालाःकिलमत्सरज्वराहित्वायतन्तोऽपिपृथक्समेत्यच ।पातुंनशेकुर्द्विपदश्चतुष्पदः सरीसृपंस्थाणुयदत्रदृश्यते ॥ २७ ॥ भवान्युगान्तार्णवऊर्मिमालिनि क्षोणीमिमामोषधिवीरुधांनिधिम् । मयासहोरुक्रमतेऽजओजसातस्मैजगत्प्राणगणात्मनेनमइति

अतिरिक्त दूसरे पतिकी आशा करतीहैं, उन स्त्रियोंके पुत्र, धन, सुहृदोंकी रक्षा वह दूसरे पति नहीं करसकते; क्योंकि वह तो आप अपराधीहैं ॥ १९ ॥ पतितो वहीहै कि जो भयातुरकी चारोंओर से रक्षाकरै हेमहाराज ! ऐसे पतितो एक आपहीहो जिसका सुख दूसरे के आधीन है उसको स्वतन्त्रता नहींहै और जहां स्वतन्त्रता नहीं वहां भय है और आप तो अपने आत्मलाभसे दूसरे किसीको अधिक नहींमानते ॥ २० ॥ जो स्त्री आपके चरणारविंदके पूजनकी कामनाकर फलकी कामना नहींकरती उसे सब कामनायें प्राप्त होती है और जो फलके हेतु आपकी पूजा करतीहै तो आप उसको वही फल देतेहो किन्तु फल भोगनेके अनन्तर उस स्त्रीको दुःख प्राप्त होताहै २१ हेईश ! जिनकी बुद्धि इन्द्रियों के सुखमें लगी है ऐसे ब्रह्मादिक, सुर, असुर मेरीप्राप्ति के लिये उग्रतप करते हैं परन्तु आपके चरणारविंद की शरण विना वह मुझे नहीं पा सकते, क्योंकि मेरा हृदय तुम्हीं में लगाहुआ है ॥ २२ ॥ हेअच्युत ! जिसहस्त कमलको आप भक्तोंके माथेपर धरतेहो तथा जिसकी साधूस्तुति करते हैं और जो सबकामनाओं का देनेवाला है उसीहस्त कमलको मेरे शिर परभी धरो हेवरेन्द्र ! आप मुझको वक्षस्थल में धारण करते हो और मेराआप तिरस्कार भी नहीं करते तौभी भक्तोंकी अपेक्षा मुझपर आपकी कृपा बहुतही न्यूनज्ञात होती है, हेईश्वर ! आपकी चेष्टाको कोई नहीं जानसकता ॥ २३ ॥ रम्यक खंडमें भगवान अपने अतिप्यारे मत्स्यावतारके रूपसे विराजते हैं कि जोरूप उसखंड के प्रधान पुरुषको पहिले दिखाया गयाथा वेराजा मनुजी इस समय बड़े भक्तियोग से उस रूपका आराधन कर इस मंत्रको जपते हैं ॥ २४ ॥ सत्वगुण, प्रधान, प्राणरूप, और देह, ओज व इन्द्रियों के बलरूप मत्स्यमूर्त्ति भगवानको मैं नमस्कार करताहूं ॥ २५ ॥ जिनके स्वरूपको लोकपालों ने नहीं देखा और जिनका नाद वेदरूप है तथा जोबाहर भीतर विराजमान हैं और जैसे मनुष्य कठपुतलीको अपने आधीन रखते हैं वैसेही विधिनिषेध रूप वचनों से सम्पूर्ण सृष्टिको जोअपने वशमें रखता है, वे ईश्वर आपही हो ॥ २६ ॥ मत्सर रूप ज्वरवाले लोक पालोंने तुम्हें छोड़कर न्यारे २ वा मिलकर विश्वपालन का यत्नकिया, परन्तु दोपांव वाले (मनुष्य) चार पांववाले (पशुआदि) स्थावर, जंगम जो इस सृष्टिमें देखपड़ते हैं उनमें किसी कीभी वह रक्षा न करसके अर्थात् आपही सबके पालक और ईश्वरहो ॥ २७ ॥ जिसमें बड़ी २

॥ २८ ॥ हिरण्मयेऽपिभगवान्निवसतिकूर्मतनुंबिभ्राणस्तस्यतत्प्रियतमांतनुमर्य्यमा सहवर्षपुरुषैःपितृगणाधिपतिरुपधावति । मंत्रमिमंचानुजपति ॥ २९ ॥ ओंनमो भगवतेअकूपारायसर्वसत्त्वगुणविशेषणायनोपलक्षितस्थानायनमोवर्ष्मणेनमोभूम्ने नमोनमोऽवस्थानायनमस्ते ॥ ३० ॥ यद्रूपमेतन्निजमाययाऽर्पितमर्थस्वरूपंबहुरूप रूपितम् । संख्यानयस्यास्त्ययथोपलम्भनात्तस्मैनमस्तेऽव्यपदेशरूपिणे ॥ ३१ ॥ जरायुजंस्वेदजमण्डजोद्भिदंचराचरंदेवर्षिपितृभूतमैन्द्रियम् । द्यौःखंक्षितिःशैल सरित्समुद्रद्वीपग्रहर्क्षेत्यभिधेयएकः ॥ ३२ ॥ यस्मिन्नसंख्येयविशेषनामरूपाकृतौ कविभिःकल्पितेयम् । संख्याययातत्त्वदृशाऽपनीयतेतस्मैनमःसांख्यनिदर्शनायत इति ॥ ३३ ॥ उत्तरेषुचकुरुषुभगवान्यज्ञपुरुषःकृतवराहरूपआस्तेतंतुदेवी हैषाभूः सहकुरुभिरस्खलितभक्तियोगेनोपधावति । इमांचपरमामुपनिषदमावर्तयति ३४॥ ओंनमोभगवतेमंत्रतत्त्वलिंगाययज्ञक्रतवेमहाऽध्वरावयवायमहापुरुषायनमः कर्म शुक्लाय त्रियुगायनमस्ते ॥ ३५ ॥ यस्यस्वरूपंकवयोविपश्चितोगुणेषुदारुष्विवजात वेदसम् । मथ्नन्तिमथ्नामनसा दिदृक्षवोगूढांक्रियाऽर्थैर्नमईरितात्मने ॥ ३६ ॥ द्रव्य क्रियाहेत्वयनेशकर्तृभिर्मायागुणैर्वस्तु निरीक्षितात्मने । अन्वीक्षयाऽङ्गातिशयात्म

लहरें उठरही हैं ऐसे प्रलय कालके समुद्र में औषधि; लतादिक की निधिरूप इस भूमिको और मुझे भी ले आप बड़े वेगसे बिचरेथे उन जगतके प्राणरूप आपके मत्स्य रूपको नमस्कार है ॥ २८॥ हिरण्यमय खंडमें भगवान कच्छप मूर्त्ति धारण करके बिराजते हैं इस प्यारी मूर्त्तिको पित्रोंके राजा अर्य्यमा उसखंड के मनुष्योंके संग आराधनकर इस मंत्रको जपते हैं ॥ २९ ॥ सम्पूर्ण सतोगुण स्वरूप तथा अज्ञात स्थान वाले कच्छप मूर्त्ति आपको मैं नमस्कार करताहूं जिनका कालसे नाश नहीं होता तथा सर्वगत, सर्वाधार आपको बारंबार मैं नमस्कार करताहूं ॥ ३० ॥ अपनी मायाा से प्रकाशित और अनेकरूपों से निरूपणकी हुई यह पृथ्वी तथा सम्पूर्ण देखने योग्य पदार्थ आपकेही स्वरूप हैं आप से पृथक नहीं, और असत्य होने परभी देखनेके कारण इसकी संख्या मृगतृष्णाके जलकी सदश नहीं होसकती इस हेतु यह अपार संसार जिसका रूप है उन आपको मैं दण्डवत करताहूं ॥ ३१ ॥ जरायुज, अण्डज, स्वेदज, चर, अचर, देवता, ऋषि पि- तर, भूत, इन्द्री, स्वर्ग, आकाश, पृथ्वी, पर्वत, नदी, समुद्र द्वीप, ग्रह नक्षत्र यह सब नाम रूप- धारी एक आपही हो ॥ ३२ ॥ जिसमें अनन्त भेदवाले नाम, रूप और जातियां हैं ऐसे आपके रूपमें कपिल आदि ने चौबीस तत्त्व आदिकी संख्या कल्पना की हैं और जो संख्या तत्त्वज्ञान से मिटजाती है उस तत्त्वज्ञानरूप आपको मैं नमस्कार करता हूं ॥ ३३ ॥ उत्तरकुरुखण्ड में भग- वान यज्ञ पुरुष बाराहरूप धारण करके रहते हैं उन बाराहरूप को यह पृथ्वी वहांके लोगों के साहित अखण्डभक्ति क्रियायोग से भजती है और इन उपनिषद के वाक्यों का उच्चारण करती है ॥ ३४ ॥ मन्त्रों से तत्त्व करके जानेजाते यज्ञ रूप क्रतु रूप महायज्ञ रूप कर्मों से शुद्ध, तीनों गुण में प्रगट होनेवाले महापुरुष भगवान आपको मेरा नमस्कार है ॥ ३५ ॥ जिस के स्वरूप को निपुण कवि मंथनरूप साधन द्वारा, काठमें से अग्नि सदृश, विचार के साधन रूप मन द्वारा शरीर और इन्द्री आदि कार्य पदार्थोंमें से खोजते हैं और जो, कर्म और कर्म के फलों से अप्रकाशित आपको देखनेकी इच्छा करते हैं ऐसे मंथन में जिन्होंने अपना स्वरूप प्रगट किया उन परमेश्वर आपको मैं नमस्कार करती हूं ॥३६॥ देह, काल, विषय, इन्द्रिय व्यापार इन्द्रियों के देवता और अहंकार इन में माया के कार्यों से जिन का स्वरूप देखने मे आता है, और विचार यम नियमादिक से

बुद्धिभिर्निरस्तमायाकृतयेनमोनमः ॥ ३७ ॥ करोतिविश्वस्थितिसंयमोदयंयस्ये-प्सितंनेप्सितमीक्षितुर्गुणैः । मायायथाऽयोभ्रमतेतदाश्रयंग्राव्णोनमस्तेगुणकर्मसा-क्षिणे ॥ ३८ ॥ प्रमथ्यदैत्यंप्रतिवारणंमृधेयोमांरसायाजगदादिसूकरः। कृत्वाऽग्रदंष्ट्रे निरगादुदन्वतःक्रीडन्निवेभःप्रणताऽस्मितंविभुमिति ॥ ३९ ॥

इतिश्रीमद्भा०म०पञ्चम०भुवनकोशवर्णनंनामाष्टादशोऽध्यायः ॥ १८ ॥

श्रीशुकउवाच ॥ किंपुरुषेवर्षे भगवन्तमादिपुरुषं लक्ष्मणाग्रजंसीताऽभिरामं रामंतच्चरणसन्निकर्षाभिरतः परमभागवतोहनुमान्सह किंपुरुषैरविरतभक्तिरुपा-स्ते ॥१॥ आर्ष्टिषेणेनसह गन्धर्वैरनुगीयमानांपरमकल्याणींभर्तृभगवत्कथां समुप-शृणोतिस्वयंचेदंगायति ॥ २ ॥ ओंनमोभगवतउत्तमश्लोकायनमआर्यलक्षणशी-लव्रतायनम उपशिक्षितात्मन उपासितलोकायनमः साधुवादनिकषणायनमोब्रह्म-ण्यदेवाय महापुरुषाय महाराजायनमइति ॥ ३ ॥ यत्तद्विशुद्धानुभवमात्रमेकंस्व-तेजसाध्वस्तगुणव्यवस्थम् । प्रत्यक्प्रशान्तंसुधियोपलम्भनं ह्यनामरूपंनिरहंप्रपद्ये ॥ ४ ॥मर्त्यावतारस्त्विहमर्त्यशिक्षणं रक्षोवधायैवनकेवलंविभोः । कुतोऽन्यथास्या द्रमतःस्वआत्मनः सीताकृतानिव्यसनानीश्वरस्य ॥ ५ ॥ नवैसआत्मात्मवतांसु-हृत्तमः सक्तस्त्रिलोक्यांभगवान्वासुदेवः । नस्त्रीकृतंकश्मलमश्नुवीतनलक्ष्मणंचा-पिविहातुमर्हति ॥ ६ ॥ नजन्मनूनंमहतोनसौभगंनवाङ्नबुद्धिर्नाकृतिस्तोषहेतुः ।

निश्चयात्मक बुद्धि वाले जिन के रूपमें से माया के सम्बन्ध से उत्पन्न हुई आकृति को निकाल देते हैं ॥ ३७ ॥ आपके हेतु नहीं परन्तु प्राणियों के भोग के हेतु अपने इच्छित सृष्टि की उत्पत्ति, स्थिति और संहार माया अपने गुणों से करती है यद्यपि माया जड़ है तौभी जैसे चुम्बक के आसपास लोहा आप से फिरा करता है वैसेही आप के निकट होने से यह माया समस्त क्रियायें किया करती है इस हेतु माया के गुणों तथा प्राणियों के साक्षी आप को नमस्कार करती हूं ॥ ३८ ॥ जो आप सृष्टि के कारण रूप, वाराह मूर्ति धारण कर, पाताल से मुझे डाढ के अग्रभाग पर धर समुद्र से हाथी के सदृश निकले थे और हाथी के सदृश हिरण्याक्ष को सामनें आया देख खेलतेही खेलते मारडाला उनप्रभु आप को मैं प्रणाम करती हूं ॥ ३९ ॥

इति श्रीमद्भा० महा० पंचम० सरला भाषाटीकायां अष्टादशोऽध्यायः ॥ १८ ॥

श्रीशुकदेवजी बोलेकि—किंपुरुष खंडमें लक्ष्मण के बड़ेभाई सीतापति, आदि पुरुष भगवान रामचन्द्रजी का, उनके चरणों के निकट रहने वाले महाभागवत श्रीहनुमानजी वहांके निवासियों समेत अखंड भक्तियोग से भजन करते हैं ॥ १ ॥ आर्ष्टिषेण के संग गन्धर्वों से गाईजाती आनंद मय, अपने स्वामी भगवान रामचन्द्रजी की कथा सुनते हैं और आप इस मंत्रका जाप करते हैं ॥ २ ॥ उत्तम यश, उत्तम शील, व्रत, लक्षणवाले, उपशिक्षित आत्मा वाले, लोक का अनुकर्ण करने वाले, साधुता की प्रसिद्धि के कसौटी रूप स्थान, ब्रह्मण्य देव, महा पुरुष भगवान महाराज रामचन्द्रको बारंबार मेरा नमस्कार है ॥ ३ ॥ वेदांत प्रसिद्ध, विशुद्ध अनुभवरूप, प्रशांत, अपने तेजसे जाग्रदादिक अवस्था मिटानेवाले, दृश्यसे न्यारे, नाम, रूपरहित, सुंदरबुद्धि से जानने में आते और अहंकार रहित उस परब्रह्मको मैं प्रणाम करताहूं ॥ ४ ॥ रामचन्द्रजी का मनुष्य अवतार केवल असुरोंके वधके हेतु नहीं था बरन मनुष्योंको उपदेश देनेके हेतुभीथा कि स्त्री संगादि जनित दुःख दूरहोना महाकठिन है, नहीं तो अपने रूपमें रमण करने वाले सृष्टिके आत्मा भगवान को सीताजी के बिरहका दुःख कैसे होसकता है ॥ ५ ॥ धीरोंके आत्मा, सुहृदों में श्रेष्ठ भगवान रामचन्द्रजी त्रिलोकी में कहींभी आसक्त नहीं हुये थे इससे उनको स्त्री का दुःख न होना चाहिये और लक्ष्मण कोभी न छोड़ना चाहिये परन्तु यह सब लोकोप देशके हेतु हुआथा ॥ ६ ॥ बड़े

तैर्यद्विद्धानपिनोवनौकसश्चकार सख्येमतलक्ष्मणाग्रजः ॥ ७ ॥ सुरोऽसुरोवाऽप्यथवानरोऽनरः सर्वात्मनाय:सुकृतज्ञमुत्तमम्। भजेतरामंमनुजाकृतिंहरिंयउत्तरानानयत्कोसलान्दिवमिति ॥ ८ ॥ भारतेपिवर्षेभगवान्नरनारायणाख्य आकल्पान्तमुपचितधर्मज्ञानवैराग्यैश्वर्योपशमो परमात्मोपलम्भनमनुग्रहायात्मवतामनुकम्पयातपोऽव्यक्तगतिश्चरति ॥९॥ तंभगवान्नारदोवर्णाश्रमवतीभिर्भारतीभिः प्रजाभिर्भगवत्प्रोक्ताभ्यां सांख्ययोगाभ्यां भगवदनुभावोपवर्णनं सावर्णेरुपदेक्ष्यमाणः परमभक्तिभावेनोपसरतिइदंचाभिगृणाति ॥ १० ॥ ॐनमोभगवतेउपशमशीलायोपरतानात्म्याय नमोऽकिंचनवित्ताय ऋषिऋषभाय नरनारायणाय परमहंसपरमगुरवे आत्मारामाधिपतयेनमोनमइति ॥ ११ ॥ गायतिचेदम्। कर्ताऽस्यसर्गादिषुयोनबध्यतेनहन्यतेदेहगतोऽपि दैहिकैः। द्रष्टुर्नयस्यगुणैर्विदूष्यते तस्मैनमोऽसक्तविविक्तसाक्षिणे ॥ १२ ॥ इदंहियोगेश्वरयोगनैपुणं हिरण्यगर्भोभगवान्जगादयत्। यदन्तकालेत्वयिनिर्गुणेमनोभक्त्या दधीतोज्झितदुष्कलेवरः ॥ १३ ॥ यथैहिकामुष्मिककामलम्पटः सुतेषुदारेषुधनेषुचिन्तयन्। शंकेतविद्वान्कुकलेवरात्ययाद्यस्तस्य यत्नःश्रमएवकेवलम् ॥ १४ ॥ तन्नःप्रभोत्वंकुकलेवरार्पितां त्वन्माययाऽहंममतामधोक्षज। भिन्द्यामयेनाशुवयं सुदुर्भिदांविधेहियोगं त्वयिनःस्वभावमिति ॥ १५ ॥ भारतेप्यस्मिन्वर्षेसरिच्छैलाःसन्तिबहवो मलयोमङ्गलप्रस्थो मैनाकस्त्रिकूटऋषभः कूटकःकोल्लकःसह्यो देवगिरिर्ऋष्यमूकः श्रीशैलोवेंकटोमहेन्द्रो वारिधारोविन्ध्यःशुक्तिमानृक्षगिरिःपारियात्रो द्रोणश्चित्रकूटोगोवर्धनो रैवत-

कुलमें जन्महोने से, सुंदररूप,मधुरबचन, उत्तमबुद्धि अथवा श्रेष्ठ जातिसे भगवान प्रसन्न नहीं होते, क्योंकि इन सम्पूर्ण गुणोंसे रहित हम बनरोंकोभी रामचन्द्रजीने अपनासखा बनाया ॥७॥ सुर,असुर, बानर या नरजो चाहिए परन्तु उसे चाहिये कि भक्तोंके थोड़े भजनको बहुतमाननेवाले, सबअयोध्या वासियोंको स्वर्गमें लेजानेवाले, मनुष्यावतार श्रीरामचन्द्रजीका भजन सब प्रकारसे करें॥८॥ इसभरतखण्डमें नरनारायण भगवान अप्रगट रूपसे विराजते हैं दयाके हेतुबढ़ेहुये धर्म,ज्ञान,वैराग्य, ऐश्वर्य, उपशम इनसे परमात्माकी प्राप्तिको देनेवाले, भक्तोंपर अनुग्रहके लिये कल्पपर्यन्त तपकरते हैं॥९॥ भगवद्भक्त नारदजी भगवान के कहे सांख्य योगका सावर्णि मनुको उपदेश देतेहुये वर्णाश्रमधर्मवाली प्रजाके साथ बड़ीभक्तिसे नरनारायणके इसमंत्रका जपकरते हैं॥१०॥ प्रशांत,निरहंकार विरागी मनुष्योंके धनरूप, ऋषियोंमें श्रेष्ठ परमहंसोंके श्रेष्ठगुरु, और ज्ञानियोंके अधिपति नरनारायण भगवानको मैं बारम्बार प्रणाम करताहूं ॥ ११ ॥ इस मन्त्रका जप करते इसभांति स्तुति करते हैं जो स्वयं इस सृष्टिके आदिकर्त्ता होनेपरभी मैं कर्त्ताहूं, ऐसा अहंकार नहींरखते शरीर में रहनेपर भी क्षुधा तृषा इत्यादिक देहिक धर्मोंसे पराभव नहींपाते द्रष्टा होनेपरभी दृष्टिगुणोंसे दूषित नहींहोते उन आसक्ति रहित, विशुद्ध सबके साक्षी परमेश्वरको मैं प्रणाम करताहूं ॥ १२ ॥ हेयोगेश्वर! अंतकालके समय इसअधम शरीरका अहंकार छोड़ आपके निर्गुण स्वरूपका ध्यानकरना यही ब्रह्माजीकी कहीहुई योग सम्बन्धी विचक्षणताहै ॥१३॥ इसलोक और परलोकके कामों में लंपट, और स्त्री पुत्र धन इत्यादिककी चिन्ता करनेवाला मूढ मनुष्य जैसे अधम शरीरके मरनेसे डरताहै वैसेही जो विवेकी मनुष्य इस शरीरके मरनेसे डरताहै, तो उसकी विद्या इत्यादिक का उपाय केवल श्रमही है ॥ १४ ॥ अतएव हेप्रभु! हेअधोक्षज! आप हमको वह योगदेवें कि जिसके प्रभावसे हम इस अधम देहके आपकी मायासे कुत्सित अति दृढ़ अहन्ता और ममता को काटडालें ॥ १५ ॥ इस भारतखण्डमें नदी, पर्वत बहुतहैं मलय, मंगल प्रस्थ, मैनाक, त्रिकूट, ऋषभ, कूटक, कोल्लक, सह्य

का ककुभोनीलो गोकामुख इन्द्रकीलः कामगिरिरिति चान्ये च शतसहस्रशः शैला स्तेषांनितम्बप्रभवानदा नद्यश्च सन्त्यसंख्याताः ॥ १६ ॥ एतासामपोभारत्यःप्रजा नामभिरेवपुनन्तीनामात्मना चोपस्पृशन्ति ॥ १७ ॥ चन्द्रवशाताम्रपर्णीअवटोदा कृतमालावैहायसी कावेरीवेणी पयस्विनीशर्करावती तुंगभद्राकृष्णावेण्याभीमर- थी गोदावरी निर्विन्ध्यापयोष्णीतापीरेवासुरसानर्मदा चर्मण्वती सिंधुरन्धःशो- णश्चनदौमहानदीवेदस्मृती ऋषिकुल्यात्रिसामा कौशिकीमन्दाकिनी यमु सर- स्वतीदृषद्वतीगोमती सरयूरोधस्वतीसप्तवतीसुषोमा शतद्रुश्चन्द्रभागामरुद्वृधा वितस्तासिक्नीविश्वेतिमहानद्यः ॥ १८ ॥ अस्मिन्नेववर्षेपुरुषैर्लब्धजन्मभिः शुक्ल लोहितकृष्णवर्णेन स्वारब्धेनकर्मणादिव्यमानुषनारकगतयोबह्व्यआत्मन आनुपू र्व्येणसर्वाह्येवसर्वेषां विधियन्ते यथावर्णविधानमपवर्गश्चापिभवति ॥ १९ ॥ योऽ सौभगवतिसर्वभूतात्मन्यनात्म्येऽनिरुक्तेऽनिलयनेपरमात्मनि वासुदेवेऽनन्यनिमि- त्तभक्तियोगलक्षणो नानागतिनिमित्ताऽविद्याग्रन्थिरन्धनद्वारेण यदाहिमहापुरुष पुरुषप्रसङ्गः॥२०॥एतदेवाहिदेवागायन्ति॥ अहोअमीषांकिमकारिशोभनंप्रसन्न एषां स्विदुतस्वयंहरिः। यैर्जन्मलब्धंनृषुभारताजिरे मुकुन्दसेवौपयिकंस्पृहाहिनः२१॥ किंदुष्करैर्नःक्रतुभिस्तपोव्रतैर्दानादिभिर्वाद्युजयेनफल्गुना । नयत्रनारायणपाद- पंकजस्मृतिः प्रमुष्टाऽतिशयेन्द्रियोत्सवात् ॥ २२ ॥ कल्पायुषांस्थानजयात्पुनर्भ- वात्क्षणायुषां भारतभूजयोवरम् । क्षणेनमर्त्येनकृतंमनस्विनःसंन्यस्य संयान्त्यभ-

देवगिरि, ऋष्यमूक, श्रीशैल, वेंकटाचल, महेंद्र, वारिधार, विंध्याचल, शुक्तिमान, ऋक्षगिरि, पारियात्र द्रोण, चित्रकूट, गोवर्धन, रैवतक, कुकुभ, नील, गोकामुख, इन्द्रकील, कामगिरि, यह तो मुख्यहैं, और भी दूसरे सैकड़ों सहस्रोंपर्वतहैं और इनके तटोंसे निकलीहुई असंख्य नदी और नदहैं १६ केवल नाम लेनेसेही पवित्र करनेवाली इन नदियोंके जलका स्पर्श भरतखण्ड निवासी देहसेभी करतेहैं ॥ १७ ॥ चन्द्रवशा ताम्रपर्णी अवटोदा, कृतमाला, वैहायसी, कावेरी, वेणी, पयस्विनी, शर्करावती, तुंगभद्रा, कृष्णा, वेणी, भीमरथी, गोदावरी, निर्विन्ध्या, पयोष्णी, तापी, रेवा, सुरसा, नर्मदा चर्मण्वती, सिंधु, अंधव शोण यह दो नद, महानदी, वेदस्मृति, ऋषिकुल्या, त्रिसामा, कौशिकी, मंदाकिनी, यमुना, सरस्वती, दृषद्वती, गोमती, सरयू, रोधस्वती, सप्तवती, सुषोमा, शतद्रु, चन्द्र भागा, मरुद्वृधा, वितस्ता, असिक्नी, व विश्वा यह बड़ी नदियां है॥१८॥भरतखंड में जन्म पाकर अपने किये हुए सात्विक,राजस,और तामस कर्मों के अनुसार देवता, मनुष्य और नरक सम्बन्धी नाना जन्म पाते हैं किंतु वर्णाश्रम के धर्म इसी खंड में है,और मोक्ष के हेतु पृथक्२ साधन और उन साधनों से मोक्ष भी इसी खण्ड में होती है॥१९॥ नाना योनियों में जन्म देनेवाले देहाभिमान छुट जाने पर सब भूतों के आत्मा भगवान कि जो रागादिकों से रहित, वाणीसे अगोचर और स्वाश्रय परमात्मा है उनमें भक्ति होती है यह मोक्ष भगवद्भक्तों के समागम सेही होती है ॥२०॥ देवता गण कहते हैं कि इन भारत वासियों ने किस पुण्य का साधन किया हैं कि भगवान इनपर आपही आप प्रसन्न हुए हैं क्यों कि बिना भगवत् कृपा के, भगवत् भक्ति के योग्य, मनुष्य जन्म किसी२ को इस भरत खंड में मिलता है कि जिस मनुष्य जन्म की हम केवल कामनाही किया करते हैं २१ दुष्कर तप व्रत दान और यज्ञ से हमें यह तुच्छ स्वर्ग मिला है इस स्वर्गमें नारायण के चरणार विंद का स्मरण नहीं बनता, इन्द्रियों को अति उत्सव मिलनेके कारण स्मरण नष्टहोगयाहै ॥२२॥ इस स्वर्ग को पाकर हम सब कल्प पर्यन्त जीयेंगे परन्तु फिर जन्म लेना पडेगा इस हेतु थोडीआयु पावैं परन्तु भरत खण्ड में जन्म हो तो अति उत्तम हो क्यों कि इस में मनुष्य देह से क्षण मात्रमें

बंधं हरेः ॥ २३ ॥ न यत्र वैकुण्ठकथासुधापगा न साधवो भागवतास्तदाश्रयाः । न-
यत्र यज्ञेशमखा महोत्सवाः सुरेशलोकोऽपि न वै स सेव्यताम् ॥ २४ ॥ प्राप्ता नृजाति
त्विह ये च जन्तवो ज्ञानक्रियाद्रव्यकलापसंभृताम् । न वै यतेरन्नपुनर्भवाय ते भूयो वनौ
का इव यान्ति बन्धनम् ॥ २५ ॥ यैः श्रद्धया बर्हिषि भागशो हविर्निरुप्तमिष्टं विधिमन्त्र-
वस्तुतः । एकः पृथङ्नामभिराहुतो मुदा गृह्णाति पूर्णः स्वयमाशिषां प्रभुः ॥ २६ ॥ सत्यं
दिशत्यर्थितमर्थितो नृणां नैवार्थदो यत्पुनरर्थिता यतः । स्वयं विधत्ते भजतामनिच्छता
मिच्छापिधानं निजपादपल्लवम् ॥ २७ ॥ यद्यत्र नः स्वर्गसुखावशेषितं स्विष्टस्य सूक्तस्य
कृतस्य शोभनम् । तेनाजनाभे स्मृतिमज्जन्म नः स्याद्वर्षे हरिर्यद्भजतां शं तनोति ॥ २८ ॥
श्रीशुक उवाच ॥ जम्बूद्वीपस्य च राजन्नुपद्वीपानष्टौ हैक उपदिशन्ति सगरात्मजैरश्वा
न्वेषण इमां महीं परितो निखनद्भिरुपकल्पितान् ॥ २९ ॥ तद्यथा स्वर्णप्रस्थश्चन्द्रशुक्ल
आवर्तनो रमणको मन्दरहरिणः पाञ्चजन्यः सिंहलो लङ्केति ॥ ३० ॥ एवं तव भारतोत्तम
हैं कि राजाओं समेत समस्त प्राणियों को आज्ञा उपदेश और सबके पुण्य पाप के बिचार करनेवाले आपही एकहो ॥ ७ ॥ उन आपकी आज्ञा सृष्टि में नहीं चलनी क्यों कि चार अद्भुत सिद्धों ने आपकी आज्ञा भङ्ग करडाली ॥ ८ ॥ आपकी आज्ञानुसार हम अजामिल पातकी को नरक में लाते थे कि वहां चार सिद्धोंनें हमारे पाशको बल पूर्वक काट उस को हमसे छुटादिया॥९॥हे महाराज! आप हमारे हित के हेतु कहिये कि वह कौनथे हम उनके जाननें की इच्छा करते हैं नारायण इतना नाम लेतेही तू मतडर ऐस कहते हुए वह अजामिल के निकट आ पहुंचे ॥ १० ॥ श्रीशुकदेव जी बोलेकि दूतोंके इसभांति पूछनेपर प्रसन्नहो, दंड देनेवाले यमराजने भगवानके चरणारविंदका स्मरणकर इसभांति कहा ॥ ११ ॥ यमराज बोलेकि–हेदूतो! स्थावर और जंगम का अधीश्वर हमसे पृथक्‌ही है, मैंतो केवल जंगमोंका इनमें भी मनुष्योंका वहांभी केवल पापियों काही स्वामी हूं और वहभी मैं उन पूर्वोक्त भगवान के आधीनरह उनकी आज्ञानुसार चलताहूं कि जिनके कलारूप ब्रह्मा, विष्णु, महेश से इस सृष्टिका उत्पत्ति, पालन और संहार होता है तथा नथेहुये बैलकी सदृश समस्त लोक जिसके आधीन हैं उन सर्वेश्वर भगवान में ततुंओं में कपड़ेकी सदृश यह समस्त संसार प्रोत होरहा है ॥१२॥ जैसे वनिजारा एक डोरमें सब बैलोंकी नाथ बाँधकर उन्हें रखता है ऐसेही भगवान ने सबलोगों को ब्राह्मणादि नाथ से अपनी वेदवाणी में बांधरक्खा है, नाम और कर्मरूप बंधनों से बंधेहुये सबजगत भयके वशीभूतहो उनके आधीन रहकर कर्मकरते हैं ॥ १३ ॥ मैं (यम) इंद्र, निर्ऋति, वरूण, चन्द्रमा, अग्नि, शिव, पवन, सूर्य, ब्रह्मा, अदिति के पुत्र, विश्वेदेवता, वसु, साध्य, मरूद्गण, रूद्रगण और सिद्धलोक ॥ १४ ॥ तथा दूसरेभी भृगुआदि प्रजापति, और देवोंके अधीश्वर, कि जिनके रजोगुण तमोगुण का स्पर्शभी नहीं है और सत्वगुण ही जिनमें मुख्य है वेभी ईश्वरकी चेष्टको नहीं जानते तोफिर मायासे मोहित प्राणी क्या जानेंगे ॥ १५ ॥ रूप जैसे अपनेको देखनेवाली आंखको नहीं जानसकता वैसही जीवभी, भगवान को "किजो सब प्राणियों के अंतर्यामी हैं" इन्द्री, वाणी, मन, प्राण, और हृदय सेभी किसी भांति नहींजानसकता॥१६॥यह संसार के ईश्वर हमसे पृथक्‌हैं, इन स्वाधीन महात्मा, मायाके अधिपति भगवान के सुंदर पार्षद साथमें भ्रमण किया करते हैं उनके रूप, गुण तथा स्वभावभी बहुधा

भूतानिविष्णोःसुरपूजितानिदुर्दर्शलिंगानिमहाद्भुतानि। रक्षन्तितद्भक्तिमतःपरेभ्योमत्तश्चमर्त्यानथसर्वतश्च॥१८॥ धर्मंतुसाक्षाद्भगवत्प्रणीतंनवैविदुर्ऋषयोनापिदेवाः नसिद्धमुख्याअसुरा मनुष्याः कुतश्चविद्याधरचारणादयः॥ १९ ॥ स्वयंभूर्नारदः शम्भुःकुमारःकपिलोमनुः। प्रह्लादोजनकोभीष्मोबलिर्वैयासकिर्वयम्॥ २० ॥ द्वादशैतेविजानीमोधर्मंभागवतंभटाः। गुह्यंविशुद्धंदुर्बोधंयंज्ञात्वाऽमृतमश्नुते ॥२१॥ एतावानेवलोकेऽस्मिन्पुंसांधर्मःपरःस्मृतः।भक्तियोगोभगवतितन्नामग्रहणादिभिः ॥ २२ ॥ नामोच्चारणमाहात्म्यंहरेःपश्यतपुत्रकाः। अजामिलोऽपियेनैवमृत्युपाशादमुच्यत॥ २३ ॥ एतावताऽलमघनिर्हरणायपुंसांसंकीर्तनंभगवतोगुणकर्मनाम्नाम्। विक्रुश्यपुत्रमघवान्यदजामिलोऽपिनारायणेतिम्रियमाणइयायमुक्तिम् ॥२४॥ प्रायेणवेदतदिदंनमहाजनोऽयंदेव्याविमोहितमतिर्बतमाययाऽलम्। त्रय्यांजडीकृतमतिर्मधुपुष्पितायांवैतानिकेमहतिकर्मणियुज्यमानः ॥२५॥ एवंविमृश्यसुधियोभगवत्यनन्तेसर्वात्मनाविदधतेखलुभावयोगम्। तेमेनदण्डमर्हन्त्यथयद्यमीषांस्यात्पातकंतदपिहन्त्युरुगायवादः॥ २६ ॥ तेदेवसिद्धपरिगीतपवित्रगाथा येसाधवःसमदृशोभगवत्प्रपन्नाः। तान्नोपसीदतहरेर्गदयाऽभिगुप्तान्नैषांवयंनवयःप्रभवामदण्डे२७॥ तानानयध्वमसतोविमुखान्मुकुन्दपादारविन्दमकरंदरसादजस्रम्। निष्किंचनैःपरमहंसकुलैरसङ्गैर्जुष्टाद्गृहेनिरयवर्त्मनिबद्धतृष्णान्॥२८॥ जिह्वानवक्तिभगवद्गुणना

भगवान केही सदृश होते हैं॥१७॥जिनका दर्शन होना अतिकठिन है ऐसे तथा देवताओंसे पूजित, अतिअद्भुत,हरिदूत भगवद्भक्ति करनेवाले मनुष्योंको वैरियोंसे तथा मुझसे और अग्नि इत्यादिक के भयों से बचाते हैं ॥ १८ ॥ ऐसामत समझो कि इन्होंने अधर्मका पक्षकिया; क्योंकि भगवानके धर्मको बड़े२ सिद्ध, प्रधान२ऋषि और देवताभी नहीं जानते फिर मनुष्यादिक कहांसे जानें ॥१९॥ ब्रह्मा, नारद, महादेव, सनत्कुमार, कपिलदेव, स्वायंभुवमनु, प्रह्लाद, राजाजनक, भीष्म, बलि, शुकदेवजी और हम (यम) ॥ २० ॥ हदूतो ! यह द्वादशजन गोप्य, शुद्ध, दुर्बोध भगवद्धर्म को जानते हैं कि जिसधर्मके जाननेसे मोक्षप्राप्तहोती है॥२१॥इस सृष्टि में मनुष्योंका यही श्रेष्ठधर्म है कि भगवत् नाम ग्रहणादि से भगवानमें भक्ति उत्पन्नहो ॥२२॥ हेपुत्रो ! हरिनामका महात्म्यतो देखो, कि जिस भगवतनाम के उच्चारणसे अजामिलभी मृत्युकी फांसीसे छूटगया ॥ २३ ॥ पुरुषोंके पापनाश होनेके हेतु इतनाही बहुत है कि ईश्वरके गुणकर्म तथा नामका कीर्त्तन कियाकरे, क्योंकि अजामिल स्वयं महापातकी और मरणकाल में अचेतथा तथापि ' हेनारायण ! इसभांति पुत्रको बुलानेसे पापसे छूटकर मोक्षपागया ॥ २४ ॥ जिसभांति कि भौंरासुगन्धि के हेतु फूलों में व्याप्त रहता है ऐसेही इस मनुष्यकी बुद्धि मायासे मोहित होरही है इसकारण वह भगवत्धर्मको नहीं जानता, और कर्मविद्यामें उनकी बुद्धिलगी हुई है इससे वह बड़े कर्मों में श्रद्धायुक्त हैं और छोटे कर्मों में नहीं प्रवृतहोते ॥ २५ ॥ इस विवेक से विवेकी मनुष्यतो सब प्रकार भगवान की भक्तिकाही यत्नकरते हैं, यह मनुष्य मेरे दण्डके उचित नहीं है क्योंकि उनके लेशमात्रभी पापनहींहोता और यदि होवे भी तो भगवत् कीर्त्तनही उस पापको नाशकरदेता है ॥ २६ ॥ जो महात्मा समदर्शी होकर भगवानकी शरणलेते हैं उनके श्रेष्ठ चरित्रों को सुरतथा सिद्धलोग भी गान करते हैं, इस कारण भगवान की गदासे रक्षित मनुष्यों के समीप तुममतजाओ क्योंकि उनको हमकभी कालभी दण्डनहीं देसकता ॥ २७ ॥ जोमनुष्य, मुकुन्दके चरणारबिंदका मकरन्दरूपीरस कि जिसका स्वादजाननेवाले परमहंसलोग सदैव सेवन करते हैं, उसरससे विमुख और नरकके मार्गरूप घरमें तृष्णाबांधकर बैठेहुये दुष्टों को यहां लाओ ॥ २८ ॥ जिन मनुष्यों की जिह्वाने भगवान के

मर्चेयंचेतश्चनस्मरतितच्चरणारविंदम्। कृष्णायमोनमतियच्छिरएकदापितानानय च्चमसतोऽकृतविष्णुकृत्यान् ॥ २९ ॥ तत्क्षम्यतांसभगवान्पुरुषःपुराणोनारायणः स्वपुरुषैर्यदसत्कृतंनः। स्वानामहोनविदुषांरचितांजलीनां क्षांतिर्गरीयसिनमःपुरुषायभूम्ने ॥३० ॥ तस्मात्संकीर्तनंविष्णोर्जगन्मंगलमंहसाम्। महतामपिकौरव्यविद्ध्यैकांतिकनिष्कृतिम् ॥ ३१ ॥ शृण्वतांगृणतांवीर्याण्युद्दामानिहरेर्मुहुः। यथासुजातयाभक्त्याशुध्येन्नात्माव्रतादिभिः ३२ ॥ कृष्णांघ्रिपद्ममधुलिण्नपुनर्विसृष्टमायागुणेषुरमतेवृजिनावहेषु। अन्यस्तुकामहतआत्मरजः प्रमार्ष्टुमीहेतकर्मयतएवरजःपुनः स्यात् ॥ ३३ ॥ इत्थंस्वभर्तृगदितंभगवन्महित्वं संस्मृत्यविस्मितधियोयमकिंकरास्ते। नैवाच्युताश्रयजनं प्रतिशंकमाना द्रष्टुंचबिभ्यतिततः प्रभृतिस्मराजन् ॥ ॥ ३४ ॥ इतिहासमिमंगुह्यं भगवान्कुम्भसम्भवः। कथयामास मलयआसीनो हरिमर्चयन् ॥ ३५ ॥

इतिश्रीमद्भा०महा०षष्ठस्कन्धेभगवद्भक्तिवर्णनंनामतृतीयोऽध्यायः ॥ ३ ॥

राजोवाच ॥ देवासुरनृणांसर्गो नागानांमृगपक्षिणाम्। सामासिकस्त्वयाप्रोक्तो यस्तुस्वायंभुवेऽन्तरे ॥ १ ॥ तस्यैवव्यासमिच्छामि ज्ञातुंतेभगवन्यथा। अनुसर्गंयथाशक्त्या ससर्जभगवान्परः ॥ २ ॥ सूतउवाच ॥ इतिसंप्रश्नमाकर्ण्य राजर्षेर्बादरायणिः। प्रतिनन्द्यमहायोगी जगादमुनिसत्तमः ॥ ३ ॥ श्रीशुकउवाच ॥

गुणोंकागान नहीं किया, जिनके चित्त ने हरिके चरणों का स्मरणनहीं किया तथा जिसप्राणी ने श्रीकृष्णजीको प्रणामनहीं किया जिसने एक दिनभीभगवत् हेतु व्रतनहींधारण किया है ऐसे असाधुनर्क का प्राप्त होंगे ॥ २९ ॥ यमराजने इसभांति दूतोंको समझाकर भगवानसे क्षमामांगी, हमारे दूतों ने अजामिलको दुःखदेनेरूप जोअन्यायकिया है उसको हे पुराणपुरुष आपक्षमा करो, हम कि जो अज्ञानी हाथजोड़े आपके सामनेखड़े हैं, हे भगवान उनहमपर आप क्षमाकरें हे भगवान्! हमआपको नमस्कार करते हैं ॥ ३० ॥ श्रीशुकदेवजीबोले कि हे महाराज! हरिकेनामका कीर्त्तनही जगतका मङ्गलकारक, और बड़े २ पापोंका एक प्रायश्चित है ॥ ३१ ॥ परब्रह्म परमात्मा श्रेष्ठपराक्रमों को सदैव सुनने और कीर्त्तनकरनेसे उत्पन्नहुई दृढभक्ति से जैसा अन्तःकरण शुद्ध होता है, ऐसाव्रत इत्यादिक प्रायश्चित्तों से नहीं होता ॥ ३२ ॥ जिसने भगवानके चरणकमल के रसकास्वाद लेलिया है वह मनुष्यतो क्लेशकारक विषय सुखों में स्नेहनहीं करता और असाधु मनुष्य तो तृष्णाके वशीभूतहो, अपने पापों के नाशके हेतुभी पीछे कर्मरूपही प्रायश्चित करता है कि जिससे फिर पापक मूलरूपी विषयों में आसक्ति हुआकरती है ॥ ३३ ॥ हेराजा! इस भांति अपने स्वामी यमराजके कहेहुयेभगवत्महात्म्यको सुन, यमदूतोंने वह बात आश्चर्य्यजनक न मानकर सत्य मानी और तब से कदाचित भगवद्भक्त हमें मार नडालें इस भय से अब यह यमदूत भगवद्भक्तों के सन्मुख देखने मेभी भयखाते हैं ॥ ३४ ॥ साधु अगस्त्य मुनि नें मलयाचलमें बैठकर भगवत्पूजन करते समय मनुष्यों के विश्वास होनेके हेतु बारम्बार भगवत् चरणों का स्पर्श करते हुए यह अजामिल का गुप्त इतिहास कहा है ॥ ३५ ॥

इति श्रीमद्भा० महा० षष्ठस्कन्धे सरला भाषाटीकायां तृतीयोऽध्यायः ॥ ३ ॥

राजा परीक्षित ने कहा कि हे भगवन्! देवता, असुर, मनुष्य नाग और मृग पक्षियों का सर्ग स्वायंभुव मन्वंतर में आपनें संक्षेप से वर्णन किया ॥ १ ॥ उसी सर्गके जाननें की मेरी इच्छाहै कि भगवान ब्रह्माजी नें जिस शक्ति से जिस भांति सृष्टि रची॥२॥ सूतजी ने कहा कि हे उत्तम मुनियो महायोगी शुकदेवजी इस भांति राजा का प्रश्न सुन उनका आदर करके ॥ ३ ॥ शुकदेवजी बोले

यदाप्रचेतसःपुत्रा दशप्राचीनबर्हिषः । अन्तःसमुद्रादुन्मग्ना ददृशुर्गांद्रुमैर्वृताम् । ॥ ४ ॥ द्रुमेभ्यःक्रुध्यमानास्ते तपोदीपितमन्यवः । मुखतोवायुमग्निंच ससृजुस्तद्दिधक्षया ॥ ५ ॥ ताभ्यांनिर्दह्यमानांस्तानुपलभ्यकुरूद्वह । राजोवाच महान्सोमो मन्युंप्रशमयन्निव ॥ ६ ॥ नद्रुमेभ्योमहाभागादीनेभ्योद्रोग्धुमर्हथ । विवर्धयिषवो यूयंप्रजानांपतयःस्मृताः ॥ ७ ॥ अहोप्रजापतिपतिर्भगवान्हरिरव्ययः । वनस्पतीनो षधींश्चससर्जोर्जमिषंविभुः ॥८॥ अन्नंचराणामचराह्यपदःपादचारिणाम् । अहस्ता हस्तयुक्तानांद्विपदांचचतुष्पदः ॥ ९ ॥ यूयंचपित्राऽन्वादिष्टादेवदेवेनचानघाः । प्रजासर्गायहिःकथं वृक्षान्निर्दग्धुमर्हथ ॥ १० ॥ आतिष्ठतसतांमार्गंकोपंयच्छतदी पितम् । पित्रापितामहेनापिजुष्टंवःप्रपितामहैः ॥११॥ तोकानांपितरौबन्धूदृशःपक्ष्म स्त्रियाःपतिः । पतिःप्रजानांभिक्षूणांगृह्यज्ञानांबुधःसुहृत् ॥१२॥ अन्तर्देहेषुभूतानामा त्माऽऽस्तेहरिरीश्वरः । सर्वंतद्धिष्ण्यमीक्षध्वमेवं वस्तोषितोह्यसौ ॥ १३ ॥ यःस मुत्पतितंदेहआकाशान्मन्युमुल्बणम् । आत्मजिज्ञासयायच्छेत्सगुणानतिवर्तते १४॥ अलंदग्धैर्द्रुमैर्दीनैःखिलानांशिवमस्तुवः । वार्क्षीह्येषावराकन्या पत्नीत्वेप्रतिगृह्यताम् ॥ १५ ॥ इत्यामन्त्र्यवरारोहांकन्यामाप्सरसींनृप । सोमोराजाययौदत्त्वातेधर्मेणोप येमिरे ॥१६॥ तेभ्यस्तस्यांसमभवद्दक्षःप्राचेतसःकिल । यस्यप्रजाविसर्गेणलोका आपूरितास्त्रयः ॥ १७ ॥ यथाससर्जभूतानिदक्षोदुहितृवत्सलः । रेतसामनसाचै

कि जब राजा प्राचीनबर्हि के पुत्र प्रचेता समुद्र से बाहर निकले तब उन्हों ने पृथ्वी को वृक्षों से घिरा हुआ देखा ॥४॥ तप से प्रकाशित वे प्रचेता वृक्षोंपर क्रोध करतेहुए मुख से पवन अग्नि उनको भस्म करनकी इच्छा से त्याग नें लगे ॥ ५ ॥ हे राजा परीक्षित ? इनसे दह्यमान इन वृक्षों को देख बन-स्पतियों के राजा चन्द्रमा नें उन का रोष शांति करने के हेतु इस भांति कहा ॥६॥ हे महाभागो ! इनदीनवृक्षों पर आपको रोष नकरना चाहिये, क्योंकि आप प्रजा वृद्धि के हेतु प्रजापति नियतहुए हो ॥ ७ ॥ हे प्रजापतियों के पति ! सर्वव्यापक भगवान नें प्रजा के सुभीते के लिये इन बनस्पति औषधि और अन्न को उत्पन्न कियाहै ॥८॥ चरों का अचर अन्न है पैरसे चलने वालोंको बिनापांव के प्राणी अन्न हैं हाथ वालोंको बिना हाथ के जीव अन्न हैं और दो पांव वालोंको चार पांव वाले जीव अन्न हैं ॥९॥ हे अनघो ! तुम्हारे पिता तथा ब्रह्माजी नें आज्ञा की है कि तुम सृष्टि रचो फिर आप प्रजाओं के अन्न रूप वृक्षों को किस भांति जलाना चाहते हो ॥ १० ॥ तुम्हारे पिता, पितामह प्रपितामह जिस मार्गपर चले हैं उसी साधुओंके मार्ग में तुमभी चलो, और इस प्रचंड क्रोध को शान्तकरो॥११॥बालकों के रक्षक माता पिता,नेत्रोंकी पलकें,स्त्रीका पति, भिक्षुकोंका गृहस्थाश्रमी, अज्ञानियों का ज्ञानी तथा प्रजाओं का रक्षक राजा है ॥ १२ ॥ सब प्राणियों में अंतर्यामी रूप से बिराजमान भगवान सम्पूर्ण सृष्टि के भगवद्धाम रूप हैं इस भांति जानों ऐसे जानने सेही ईश्वर तुमपर प्रसन्न हुएहैं॥१३॥जो मनुष्य शरीर में अकस्मात् उत्पन्न हुए भयंकर क्रोध को आत्म बिचारसे शांत करताहै वह संसार के बंधन से छूटजाताहै ॥१४॥यह बहुत से बिचारे दीन वृक्ष जलगए और जो शेष बचे हैं उनका तथा तुम्हारा कल्याण हो आप इन वृक्षों की पालीहुई श्रेष्ठ कन्या को अपनी स्त्री बनाओ ॥१५॥ हे महाराज ! चन्द्रमा ने इसभांति समझाकर अप्सरा से उत्पन्न हुई उस सुंदरी कन्याको दे आप वहांसे चलागया,फिर प्रचेताओंने धर्मरीति से उसकन्याके संग बिवाहकिया१६ उस स्त्रीके प्रचेताओं से दक्षनाम पुत्र उत्पन्न हुआ उसकी सृष्टि रचनासे समस्त त्रिलोकी परिपूर्ण होगई ॥ १७ ॥ कन्याओंपर दयालु दक्षने वीर्य तथा मनसे जिसभांति जीवोंको उत्पन्न किया वह मैं

यतन्ममावहितः शृणु ॥ १८ ॥ मनसैवासृजत्पूर्वं प्रजापतिरिमाः प्रजाः । देव सुरम
नुष्यादीन्नभस्थलजलौकसः ॥ १९ ॥ तमबृंहितमालोक्यप्रजासर्गंप्रजापतिः विन्ध्य
पादानुपव्रज्यसोऽचरद्दुष्करंतपः ॥ २० ॥ तत्राघमर्षणंनामतीर्थंपापहरंपरम् । उ
पस्पृश्यानुसवनंतपसातोषयद्धरिम् ॥ २१ ॥ अस्तौषीद्धंसगुह्येनभगवन्तमधोक्षज
म् । तुभ्यंतदभिधास्यामिकस्यातुष्यद्यतोहरिः ॥ २२ ॥ प्रजापतिरुवाच ॥ नमःप
रायावितथानुभूतये गुणत्रयाभासनिमित्तबन्धवे।अदृष्टधाम्नेगुणतत्त्वबुद्धिभिर्निवृत्त
मानायदधेस्वयंभुवे ॥ २३ ॥ नयस्यसख्यंपुरुषोऽवैतिसख्युःसखावसन्संवसतःपु
रेऽस्मिन् । गुणोयथागुणिनोव्यक्तदृष्टेस्तस्मैमहेशायनमस्करामि ॥ २४ ॥ देहोऽस
वोऽक्षामनवोभूतमात्रानात्मानमन्यंचविदुःपरंयत् सर्वंपुमान्वेदगुणांश्चतज्ज्ञोनवेद
सर्वज्ञमनन्तमीडे ॥ २५ ॥ यदोपरामोमनसोनामरूपरूपस्यदृष्टस्मृतिसंप्रमोषात् ।
यईयतेकेवलयास्वसंस्थयाहंसायतस्मैशुचिसद्मनेनमः ॥ २६ ॥ मनीषिणोऽन्तर्हृ
दिसंनिवेशितंस्वशक्तिभिर्नवभिश्चत्रिवृद्भिः वह्निंयथादारुणिपांचदश्यंमनीषया
निष्कर्षन्तिगूढम् ॥ २७ ॥ सवैममाशेषविशेषमायानिषेधनिर्वाणसुखानुभूतिः । स
सर्वनामा सचविश्वरूपः प्रसीदतामनिरुक्तात्मशक्तिः ॥ २८ ॥ यद्यन्निरुक्तंवचसानि
रूपितं धियाक्षभिर्वामनसावोतयस्य। माभूत्स्वरूपंगुणरूपंहितत्सवैगुणापायविस

कहताहूं सोतुम सुनो॥ १८॥ प्रथमतो दक्षने मनहीसे जल, स्थल, और आकाश स्थित नानाभांति की प्रजा तथा सुर, असुर और मनुष्यादि उत्पन्न किये ॥ १९ ॥ परन्तु प्रजासृष्टि की वृद्धि न देख विंध्याचल के समीप के पर्वत में जादुश्वर तप करनेलगा ॥ २० ॥ वहां एक अघमर्षण तीर्थ है उसमें स्नान करके तपस्याकर परमेश्वरको प्रसन्न करनेलगा ॥ २१ ॥ और हंसगुह्य नामक स्तोत्र से भगवानकी स्तुति करनेलगा, हरिभगवान जिसभांति दक्षकी स्तुतिसे प्रसन्नहुये वह मैं कहताहूं आपसुनो ॥ २२ ॥ दक्षने स्तुतिकी कि—सत्य चैतन्य जीव तथा मायाके उत्पादक, प्रमाण रहित, स्वयंप्रकाश और शरीर आदिक को सत्य मानने वाले, जिनके रूपको प्राणी नहीं जानते, ऐसे सर्व श्रेष्ठ देवको मैं नमस्कार करताहूं ॥ २३ ॥ जैसे रूपादिक विषय अपने सखा चक्षुआदि इन्द्रियोंकी सख्यता और प्रकाशत्वको नहीं जानते, ऐसेही जीव इस देहमें रहन परभी अपनेसंग रहनेवाले, प्रपंचके द्रष्टा और मित्ररूप जिनभगवानकी मैत्रीको नहीं जानता उन भगवानको मैं प्रणाम करताहूं ॥ २४ ॥ शरीर, प्राण, इन्द्रियां अंतःकरण, पंचमहाभूत, और महाभूतों के विषय, यह समस्त आत्माको अर्थात् अपने अपने स्वरूपको और इन्द्रिय वर्गको और उनके रक्षक देवताओंको नहीं जानते यद्यपि जीव इनतीन तथा इनके मूल भूतगुणों कोभी जानता है, तौभी अपना स्वरूप किजो सर्वज्ञ और अनंत है, उसे नहीं जानता, उस रूपकी मैं स्तुति करताहूं ॥ २५ ॥ नाम और रूपको उत्पन्न करने वाला मन जब समाधि अवस्था में जगतके दर्शन और स्मृतिके नाशहोने से शांत होजाता है तबजो परब्रह्म केवल अपने रूपसेही ज्ञातहोते हैं उनशुद्ध भगवानको मैं प्रणाम करताहूं ॥ २६ ॥ याज्ञिक लोग सामधेनी नामक पन्द्रह मंत्रोंसे प्रकाश्य अलौकिक अग्निको, जैसे अरणि में से निकाल लेते हैं ऐसेही वेदवादी मनुष्य अपने गुह्य आत्माको विवेक से हृदय में स्थितकर प्रकृति, पुरुष, महत्तत्व, अहंकार, पंचविषय, तीनगुण, ग्यारह इन्द्रियें और पंचमहाभूतों से खीं, चलेते हैं ॥ २७ ॥ सबभांति की मायाका त्याग कियाजाय, तब निर्वाण सुखमें ज्ञातहोते सर्वनाम, सर्वरूप, और जिनकी शक्तिका निरूपण होना दुष्कर है वे परमेश्वर मुझपर प्रसन्न होवें ॥ २८ ॥ वाणीसे कहनेमें, बुद्धिसे निश्चय करनेमें, इन्द्रियों से ग्रहण करनेमें चित्तसे संकल्प करने में आता हुआ जोकुछ है वह सब परमेश्वरका स्वरूप नहीं है, बरन वह सबगुणों काही स्वरूप है परमेश्वर

गलक्षणः ॥ २९ ॥ यस्मिन्यतो येन च यस्य यस्मै यद्यो यथा कुरुते कार्यते च । परावरेषां परमं प्राक्प्रसिद्धं तद्ब्रह्म तद्धेतुरनन्यदेकम् ॥ ३० ॥ यच्छक्तयो वदतां वादिनां वै विवादसंवादभुवो भवन्ति । कुर्वन्ति चैषां मुहुरात्ममोहं तस्मै नमोऽनन्तगुणाय भूम्ने ॥ ३१ ॥ अस्तीति नास्तीति च वस्तुनिष्ठयोरेकस्थयोर्भिन्नविरुद्धधर्मयोः । अवेक्षितं किञ्चन योगसांख्ययोः समं परं ह्यनुकूलं बृहत्तत् ॥ ३२ ॥ योऽनुग्रहार्थं भजतां पादमूलमनामरूपो भगवाननन्तः । नामानि रूपाणि च जन्मकर्मभिर्भेजे स मह्यं परमः प्रसीदतु ॥ ३३ ॥ यः प्राकृतैर्ज्ञानपथैर्जनानां यथाशयं देहगतो विभाति । यथाऽनिलः पार्थिवमाश्रितो गुणं स ईश्वरो मे कुरुतां मनोरथम् ॥ ३४ ॥ श्रीशुक उवाच ॥ इति स्तुतः संस्तुवतः स तस्मिन्नघमर्षणे । आविरासीत्कुरुश्रेष्ठ भगवान्भक्तवत्सलः ॥ ३५ ॥ कृतपादः सुपर्णांसे प्रलम्बाष्टमहाभुजः । चक्रशङ्खासिचर्मेषुधनुःपाशगदाधरः ॥ ३६ ॥ पीतवासा घनश्यामः प्रसन्नवदनेक्षणः । वनमालानिवीताङ्गो लसच्छ्रीवत्सकौस्तुभः ॥ ३७ ॥ महाकिरीटकटकः स्फुरन्मकरकुण्डलः काञ्च्यङ्गुलीयवलयनूपुराङ्गदभूषितः ॥ ३८ ॥ त्रैलोक्यमोहनं रूपं बिभ्रत्त्रिभुवनेश्वरः । वृतो नारदनन्दाद्यैः पार्षदैः सुरयूथपैः ३९ ॥ स्तूयमानोऽनुगायद्भिः सिद्धगन्धर्वचारणैः । रूपं तन्महदाश्चर्यं विचक्ष्याऽगतसाध्व

तोगुणोंही के कारण प्रलय और उत्पत्ति से जानने में आते हैं यदि चैतन्य रूप अधिष्ठान होतो जगतकी उत्पत्ति तथा प्रलय होही नहीं सकती ॥ २९ ॥ जिसमें जगत व्याप्त है जिससे निकलता और जिस साधनसे उत्पन्न होता है तथा जिसका होता और जिसके हेतु होताहै वह सब ब्रह्महीहै और जोकरने में आता तथा जोकरता और क्रिया के हेतु किसी सेभी जोप्रेरित होता है वह सब ब्रह्मही है और वह ब्रह्म सबकाहेतु, सबसे प्रथमप्रसिद्ध तथाविश्वादिक और ब्रह्माकाएककारण है ॥ ॥ ३० ॥ विवादकरनेवाले मनुष्यों में जोकुछ विवाद है और एकमत है वह सब भगवतकीमाया मेंही कल्पित है किन्तु भगवानके रूपमें इनमें से कुछभी नहीं है वेदवादियोंके समझाने परभी विवादी मनुष्य अविद्या आदि शक्तियों से बारम्बार मोहित होजाते हैं ऐसे अनन्तगुणवाले भगवान को मैं प्रणाम करता हूं ॥३१॥सांख्यशास्त्र में भगवानको निरवयव और योगशास्त्रमें सावयव कहा है ऐसे परस्पर विवादकरते हैं, परन्तु भगवानके होनेमें कोई विवादनहीं करता, यह विवाद केवल विषयका अधिष्ठानहै,अधिष्ठाननहोनेसे अवयवोंकी कल्पना और निषेधनहीं होसकता,इससे जोस्वरूप कि इन दोनों विवादोंका आश्रयी, दोनोंके अनुकूलदोनोंसे पृथक और दोनोंके सदृशहै वही ब्रह्महै ३२ जो भगवान नाम रूपरहित होनेपरभी अपने भक्तोंको आनन्द देनेके हेतु पृथक २ नामरूपधारण करतेहैं वे भगवान मुझपर प्रसन्नहोवें ॥३३॥ पवनएकही है परन्तु जैसे पृथक २ पदार्थों के सम्बन्ध से नानागन्धवाला ज्ञातहोता है वैसेही परमेश्वर एकही है परन्तु नानाभांतिकी उपासनाओं से उनके रूपनानाभांति के ज्ञातहोते हैं वे परमेश्वर मेरीकामनाओं को पूर्णकरैं ॥ ३४ ॥ श्रीशुकदेव जीबोले कि–हेराजन ! दक्षने जबअघमर्षणतीर्थमें ध्यानकर इसभांतिस्तुतिकी तो भक्तवत्सलभगवान प्रगटहुये ॥ ३५ ॥ गरुडपर विराजमान लम्बीआठभुजाधारे, उनमें चक्र, शंख, गदा, खड्ग, ढाल, बाण, धनुष औरपाशलिये ॥ ३६ ॥ पीताम्बरधारणकिये, घनश्याम, प्रसन्नमुख, सुन्दरनेत्र, बनमाला पहिने श्रीवत्स और कौस्तुभमणि से शोभित ॥ ३७ ॥ सुन्दरकीट मुकुटतथा मकराकृत कुण्डलधारण किये, कांची, अँगूठी, कंकण, नूपुर और बाजूपहिने ॥ ३८ ॥ त्रिलोकीको मोहित करनेवाला रूपधारणकिये नारदसुनन्दनन्दआदि पार्षदोंयुक्त, देवताओंके यूथोंसे वेष्टित ॥ ३९ ॥ और सम्पूर्णलोकपाल, सिद्ध, चारण, गन्धर्व इनसेस्तुति कियेजाते भगवानके उसआश्चर्यजनकरूप

सः ॥४०॥ ननामदण्डवद्भूमौप्रह्वात्मा प्रजापतिः । नकिंचनोच्चारयितुमशकत्तीव्रयामुदा । आपूरितमनोद्वारैर्ह्रदिन्यइवनिर्झरैः ॥ ४१ ॥ स्तोत्रस्यफलमासान्नस्तंयंदेपुरुषोत्तमम । तंतथाऽवनतंभक्तंप्रजाकामंप्रजापतिम् । चित्तज्ञःसर्वभूतानामिदमाहजनार्दनः ॥ ४२ ॥ श्रीभगवानुवाच ॥ प्राचेतसमहाभाग संसिद्धस्तपसाभवान् । यच्छ्रद्धयामत्परयामयिभावंपरंगतः ॥४३॥ प्रीतोऽहंतेप्रजानाथयत्तेऽस्योद्बृंहणंतपः । ममैषकामोभूतानांयद्भूयासुर्विभूतयः ॥ ४४ ॥ ब्रह्माभवोभवन्तश्चमनवोविबुधेश्वराः विभूतयोममह्येताभूतानांभूतिहेतवः ॥ ४५ ॥ तपोमेहृदयंब्रह्मंस्तनुर्विद्याक्रियाकृतिः । अङ्गानिक्रतवोजाता धर्मआत्माऽसवःसुराः ॥ ४६ ॥ अहमेवासमेवाग्रेनान्यत्किंचांतरंबहिः संज्ञानमात्रमव्यक्तंप्रसुप्तमिवविश्वतः ॥ ४७ ॥ मय्यनन्तगुणेऽनन्तेगुणतोगुणविग्रहः । यदासीत्ततएवाद्यःस्वयम्भूःसमभूदजः ॥४८॥ सवैयदामहादेवोममवीर्योपबृंहितः । मेनेऽखिलमिवात्मानमुद्यतःसर्गकर्मणि ॥ ४९ ॥ अथमेऽभिहितोदेवस्तपोऽतप्यतदारुणम् । नवविश्वसृजोयुष्मान्येनादावसृजद्विभुः ॥ ५० ॥ एषापंचजनस्यांगदुहितावैप्रजापतेः असिक्नीनामपत्नीत्वेप्रजेशप्रतिगृह्यताम् ५१ मिथुनव्यवायधर्मस्त्वंप्रजासर्गमिमंपुनः मिथुनव्यवायधर्मिण्यांभूरिशोभावयिष्यसि ॥ ५२ ॥ त्वत्तोऽधस्तात्प्रजाःसर्वामिथुनीभूयमायया । मदीययाभविष्यन्तिहरिष्यन्तिचमेबलिम् ॥ ५३ ॥ श्रीशुकउवाच ॥ इत्युक्त्वामिषतस्तस्य भगवान्विश्वभावनः । स्वप्नोपलब्धार्थइव तत्रैवान्तर्दधेहरिः ॥ ५४ ॥

इतिश्रीमद्भा०महा०षष्ठ०दक्षोत्पत्तिवर्णनंनामचतुर्थोऽध्यायः ॥ ४ ॥

को देखदक्षको अत्यानन्दहुआ और पृथ्वीपर दण्डाकारगिर उनको साष्टांग दण्डवतकी ॥ ४० ॥ उसकालपूर्णतासे नदियोंकी सदृश, इन्द्रियोंके भरजाने के हेतु वह कुछभी न बोलसका ॥ ४१ ॥ इसभांति दण्डवतकरते, सृष्टिकी इच्छावाले अपने सेवक प्रजापतिदक्षसे सर्वान्तर्यामी भगवानने यह कहा ॥ ४२ ॥ भगवानबोले कि–हेप्रचेताओं के पुत्रमहाभाग ! तुमतपसे सिद्धहुये हो क्योंकि पूर्ण श्रद्धायुक्त मेरीदृढ़भक्तिकोप्राप्तहुये हो ॥ ४३ ॥ हेप्रजानाथ ! तुम्हारा तप सृष्टि बढ़ानेके हेतु है इसीहेतु में तुमपरप्रसन्नहुआ हूं यहमेरो आकांक्षा है कि सृष्टिकी वृद्धिहो ॥ ४४ ॥ ब्रह्मा, रुद्र, तुम प्रजापति और जो मनुष्य, देवताओंके ईश्वर हैं यह सब सृष्टि उत्पत्ति के हेतु मेरीही विभूतिरूपउत्पन्नहुये हैं ॥ ४५ ॥ जप और निगमके सङ्गकाध्यान मेराहृदय है मंत्रकाजप शरीररूप है क्रिया मेरी आकृति है यज्ञमेरा अंगरूप, धर्ममनरूप और देवता प्राणरूप हैं ॥४६ ॥ सृष्टिके पूर्व में मैंही था भीतरबाहर कुछभीनथा चैतन्यमात्रतथा सबओरसे सोताहुआ ऐसा मेराही स्वरूप उसकालमें था ॥ ४७ ॥ अनन्त तथा अनन्तगुणवाले मेरे स्वरूपमें जबब्रह्माण्ड उत्पन्नहुआ उसकाल ब्रह्माजी जो अयोनिज कहलाते हैं उत्पन्नहुये ॥ ४८ ॥ यह मेरी शक्तिसे उत्पन्नहुये ब्रह्माजीसृष्टिरचते हुये जब अपने आत्माको अशक्तसा माननेलगे ॥ ४९ ॥ तब मेरी आज्ञानुसार उन्होंने बड़ाघोर तप किया उसीतपके प्रभावसे प्रथमउन्होंने नौ प्रजापतियों को उत्पन्न किया ॥ ५० ॥ हेप्रजापति ! इस पंचजनकी कन्याअसिक्नी को अपनी स्त्रीबना ॥ ५१ ॥ मैथुनधर्मवाला तू इसस्त्री से सृष्टि को बहुत बढ़ावेगा ॥ ५२ ॥ अबसे होनेवाली समस्त प्रजामेरे प्रभावसे मैथुनधर्मसेही उत्पन्नहोगी और मेरी इच्छानुसार कार्यकर मुझे भेंट देगी ॥ ५३ ॥ श्रीशुकदेवजीबोलेकि–दक्षप्रजापति से इसभांति कहते२ त्रिलोकीपति भगवान स्वप्नमें देखेहुये पदार्थकी सदृश वहांसे अन्तर्ध्यानहोगये ५४

इतिश्री भद्गा० महा० षष्ठ० सरलाभाषाटीकायां चतुर्थोऽध्यायः ॥ ४ ॥

श्रीशुकउवाच ॥ तस्यांसपांचजन्यांवै विष्णुमायोपबृंहितः । हर्यश्वसंज्ञानयुतं पुत्रानजयनद्विभुः ॥ १ ॥ अपृथग्धर्मशीलास्ते सर्वेदाक्षायणानृप । पित्राप्रोक्ताः प्रजासर्गे प्रतीचींप्रययुर्दिशम् ॥ २ ॥ तत्रनारायणसरस्तीर्थं सिन्धुसमुद्रयोः । संगमोयत्रसुमहन्मुनिसिद्धनिषेवितम् ॥ ३ ॥ तदुपस्पर्शनादेव विनिर्धूतमलाशयाः । धर्मेपारमहंस्येच प्रोत्पन्नमतयोऽप्युत ॥ ४ ॥ तेपिरेतपएवोग्रं पित्रादेशेनयन्त्रिताः । प्रजाविवृद्धयेयत्तान् देवर्षिस्तान्ददर्शह ॥ ५ ॥ उवाचचाथहर्यश्वाः कथंस्रक्ष्यथवैप्रजाः । अदृष्ट्वान्तंभुवोयूयं बालिशाबतपालकाः ॥ ६ ॥ तथैकपुरुषंराष्ट्रं बिलंचादृष्टनिर्गमम् । बहुरूपांस्त्रियंचापि पुमांसंपुंश्चलीपतिम् ॥ ७ ॥ नदीमुभयतोवाहां पञ्चपञ्चाद्भुतंगृहम् । क्वचिद्धंसंचित्रकथं क्षौरपव्यंस्वयंभ्रमिम् ॥ ८ ॥ कथंस्वपितुरादेशमविद्वांसोविपश्चितः । अनुरूपमविज्ञाय अहोसर्गंकरिष्यथ ॥ ९ ॥ श्रीशुकउवाच ॥ तन्निशम्याथहर्यश्वा औत्पत्तिकमनीषया । वाचःकूटंतुदेवर्षेः स्वयंविममृशुर्धिया ॥ १० ॥ भूःक्षेत्रंजीवसंज्ञं यदनादिनिजबन्धनम् । अदृष्ट्वातस्यनिर्वाणं किमसत्कर्मभिर्भवेत् ॥ ११ ॥ एकएवेश्वरस्तुर्यो भगवान्स्वाश्रयःपरः । तमदृष्ट्वाऽभवंपुंसः किमसत्कर्मभिर्भवेत् ॥ १२ ॥ पुमान्नैवैतियद्गत्वा बिलस्वर्गंगतोयथा । प्रत्यग्धामाऽविदइह किमसत्कर्मभिर्भवेत् ॥ १३ ॥ नानारूपात्मनोबुद्धिः स्वैरिणीवगुणान्विता । तन्निष्ठामगतस्येह किमसत्कर्मभिर्भवेत् ॥ १४ ॥ तत्संगभ्रंशितैश्वर्यं संसरन्तंकुभार्यवत् । तद्गतीरबुधस्येह किमसत्कर्मभिर्भवेत् ॥१५॥

श्रीशुकदेवजीबोले कि–हरिकी मायायुक्तसमर्थदक्षने उस पंचजनकी कन्याअसिक्नीमें हर्यश्व नामकदशसहस्र पुत्र उत्पन्न किये ॥१ ॥ हेराजा ! एकही धर्म और शीलवाले यहदक्षके पुत्रसृष्टि सजनेके हेतु पितासे आज्ञा पा पश्चिमदिशामें गये ॥ २ ॥ उस दिशामें नारायण सरतीर्थ है जहां सिन्धु और समुद्रका संगम हुआ है और जो मुनियों तथा सिद्धों से सेवित है ॥ ३ ॥ उसतीर्थ में स्नानकरतेही उनके अन्तःकरणके मैल दूरहोगये, और उनके चित्तमें परमहंसधर्मका विचारउत्पन्न हुआ ॥ ४ ॥ पिताकी आज्ञानुसार घोरतपकरते तथा सृष्टि रचने के हेतु उद्योगकरते हुये उनहर्यश्वोंको नारदजीने दर्शन दिया ॥ ५ ॥ नारदजीने कहा कि हे हर्यश्वो! तुमप्रजापति होनेपरभी मूढ़ही हो, बिना पृथ्वीका अन्त देखे सृष्टिरचना किसभांति करोगे ? ॥ ६ ॥ तथा एक पुरुषकादेश और निकलने का मार्ग जिसमें नहीं देखपड़ता ऐसी गुफा, रूपवतीस्त्री, व्यभिचारिणी का पतिपुरुष ॥ ७ ॥ दोनोंओर बहनवालीनदी, पचीस वस्तुओं से अद्भुतघर, किसीकाल अद्भुतकथाकहताहुआ हंस, अपने आप फिरनवाला तथा छूरे व वज्रों से बनाहुआ तीक्ष्णचक्र ॥ ८ ॥ और अपने सर्वज्ञ पिताकी आज्ञा, बिना इन दशपदार्थोंके जाने तुम सृष्टिरचना किस भांति करोगे ॥ ९ ॥ शुकदेवजी बोले कि—हर्यश्व यह बात सुनकर, अपनी स्वयं सिद्ध विचारवाली बुद्धिसे इन नारदजीके गूढ़ार्थोंके विचारनेलगे ॥ १० ॥ कि अनादि तथा आत्माको जन्मानेवाला लिंगदेहही भूमि स्थानीय है, यह लिंगदेह जीवके बन्धनका कारण है, इस देहकानाश न देख झूठे कर्म करने से क्याहोताहै ॥ ११ ॥ अद्वितीय, ईश्वर, सर्वसाक्षी, स्वआधार, नित्यमुक्त पुरुषको बिना देखे तथा बिनाकर्मों के अर्पणकिये इन असत्कर्मोंसे क्याहोता॥ १२ ॥ जैसे पातालमें गया मनुष्य फिर नहीं लौटता, ऐसेही जिन स्वप्रकाश परब्रह्मको पहुँचकर मनुष्य फिर पीछे नहीआता उन ज्योतिरूप भगवानको न जानकर इन संसारिक असत्कर्मों से क्याहोता है ॥१३॥ नानाभांतिके रूप गुण वाली अपनी बुद्धिही व्यभिचारिणी स्त्री है उससे बिना भगवत्कर्मकी नेष्ठाके प्राप्तहुए और कर्मोंके करनेसे क्याहोता है ॥ १४ ॥ व्यभिचारिणी स्त्रीके पतिकी सदृश जीव व्यभिचारिणी बुद्धिके दिये

कृपुंश्चल्यर्थकरींमायां वेलाकूलान्तवेगिताम् । मत्तस्यतामविज्ञस्य किमसत्कर्मभिर्भवेत् ॥ १६ ॥ पञ्चविंशतितत्त्वानां पुरुषोऽद्भुतदर्पणम् । अध्यात्ममबुधस्येह किमसत्कर्मभिर्भवेत् ॥ १७ ॥ ऐश्वरंशास्त्रमुत्सृज्य बन्धमोक्षानुदर्शनम् । विविक्तपदमज्ञाय किमसत्कर्मभिर्भवेत् ॥ १८ ॥ कालचक्रंभ्रमिस्तीक्ष्णं सर्वंनिष्कर्षयज्जगत् । स्वतन्त्रमबुधस्येह किमसत्कर्मभिर्भवेत् ॥ १९ ॥ शास्त्रस्यपितुरादेशं योनवेदनिवर्तकम् । कथंतदनुरूपाय गुणविस्रम्भ्युपक्रमेत् ॥ २० ॥ इतिव्यवसितारा जन्हर्यश्वाएकचेतसः । प्रययुस्तंपरिक्रम्य पन्थानमनिवर्तनम् ॥ २१ ॥ स्वरब्रह्मणिनिर्भातहृषीकेशपदाम्बुजे । अखण्डंचित्तमावेश्य लोकाननुचरन्मुनिः ॥ २२ ॥ नाशंनिशम्यपुत्राणां नारदाच्छीलशालिनाम् । अन्वतप्यतकःशोचन् सुप्रजास्त्वंशुचांपदम् ॥ २३ ॥ सभूयःपाञ्चजन्यायामजेनपरिसान्त्वितः । पुत्रानजनयद्दक्षः शबलाश्वान्सहस्रशः ॥२४॥ तेचपित्रासमादिष्टाः प्रजासर्गेधृतव्रताः । नारायणसरोजग्मुर्यत्र सिद्धाःस्वपूर्वजाः॥२५॥तदुपस्पर्शनादेव विनिर्धूतमलाशयाः॥जपन्तोब्रह्मपरमंतेपुस्तत्रमहत्तपः॥२६॥अब्भक्षाःकतिचिन्मासान् कतिचिद्वायुभोजनाः॥आराधयन्मन्त्रमिममभ्यस्यन्त इडस्पतिम्॥२७॥ओंनमोनारायणाय पुरुषायमहात्मने। विशुद्धस-

हुए दुःख सुखको भोग उसके संगरह स्वाधीनता खोबैठाहै उसे जानेबिना बुद्धिकी मूढतासे उत्पन्न हुए असत्कर्मोंके करनेसे क्याहोताहै! ॥१५॥ यह मायारूप दोनोंओर बहनेवाली नदी है, क्योंकि मायाही उत्पत्ति और संहार यह दोनों कामकरती है, और अपनेमें व्याप्त प्राणियोंको तटपर पहुँचानेमें (तप, विद्या आदिकी प्राप्तिमें) अतिदुःख अर्थात् क्रोध अहंकारादिक घोर दुःख देती है इसीसे इसमायाके न जाननेवाले अचैतन्य मनुष्यके मायिक कर्मकरनेसे क्याहोना है ॥१६॥ कार्य कारणसे रचित इस देहका अधिष्ठाता अंतर्यामी भगवानही पचीस तत्त्वोंका आश्रयरूप भवन है ऐसे आत्माको न जानकर झूठकर्म करनेसे क्याहोता है॥ १७ ॥ जो भगवानका प्रतिपादक शास्त्र है वही हंसरूपहै क्योंकि हंसके दूध पानी पृथक् २ करनेकी सदृश यह शास्त्रभी जड़ तथा चैतन्य को पृथक् २ कर देताहै और बंध तथा मुक्ति सम्बन्धी उत्तमोत्तम बातें कहता है एसेशास्त्रका बिना अभ्यासकिये असत्कर्म करनेसे क्याहोताहै ! ॥ १८ ॥ अपने आप फिरनेवाला चक्रही कालचक्र है यह तीक्ष्ण तथा स्वाधीनहै और सब सृष्टिको अपनीओर खींचा करता है बिना इसकाल चक्र के जाने कर्मोंके करनेसे क्या होताहै ॥ १९ ॥ शास्त्ररूप पिता मनुष्यको निवृत्तिकेही लिये आज्ञा करता है उसआज्ञाको न माननेवाला मनुष्यप्रवृत्ति मार्ग में विश्वासकर सृष्टि में कैसे प्रवृत्तहो॥२०॥ श्रीशुकदेवजीने कहा कि-हे राजन् ! वे एकाग्र चित्तवाले हर्यश्व इसभांति निश्चयकर, नारदजी की परिक्रमाकर, मोक्षमार्ग कोगये ॥ २१ ॥ और नारदजीभी सर्वव्यापी भगवानके चरणों में अखण्डचित्त रखकर, लोकों में भ्रमणकरनेलगे ॥ २२ ॥ दक्षप्रजापति ने जबसुना कि नारदजीनेश्रेष्ठ शीलवान पुत्रों कानाशकरादिया तब " श्रेष्ठप्रजाशोकका स्थान है " ऐसे शोचताहुआ अत्यन्त पश्चात्ताप करनेलगा ॥ २३ ॥ तब ब्रह्माजीने आकर उन्हें धैर्य्य दिया, तदनन्तर प्रजापतिदक्षने अपनी स्त्री में फिर शबलाश्वनाम एक सहस्रपुत्र उत्पन्नकिये ॥२४॥ शबलाश्वको भी दक्षने सृष्टिरचना के हेतु आज्ञाकी तब वह नारायणसर में जहां कि उनके भाई सिद्ध हुये थे गये ॥ २५ ॥ नारायण सरमें स्नानकरतेही उनके मनके मैल नष्टहोगये फिरवह ओंकार मन्त्रका जपकर बड़ाभारी तपकरनेलगे ॥ २६ ॥ कितनेही महीनेतो वह केवलजलपान करके और कितनेही महीने पवनभक्षण करके रहे और इसमन्त्रसे भगवानका यजनकरने लगे ॥ २७ ॥ " ओंनमो नारायणायपुरुषाय म-

स्वधिष्ण्याय महाहंसायधीमहि ॥ २८ ॥ इतितानपिराजेन्द्र प्रतिसर्गधियोमुनिः । उपेत्यनारदःप्राह वाचःकूटानिपूर्ववत् ॥२९॥दाक्षायणाःसंशृणुत गदतोनिगमंमम। अन्विच्छतानुपदवीं भ्रातृणांभ्रातृवत्सलाः ॥ ३० ॥ भ्रातृणांप्रायणंभ्राता योऽनुतिष्ठति धर्मवित् ॥ सपुण्यबन्धुः पुरुषामरुद्भिःसहमोदते ॥ ३१ ॥ एतावदुक्त्वाप्रययौ नारदोऽमोघदर्शनः । तेऽपिचान्वगमन्मार्गं भ्रातृणामेवमारिष ॥ ३२ ॥ सध्रीचीनं प्रतीचीनंपरःस्यानुपथं गताः । माद्यापितेनिवर्तन्ते पश्चिमायामिनीरिव ॥ ३३ ॥ एतस्मिन्कालउत्पातान् बहूनपश्यन्प्रजापतिः । पूर्ववन्नारदकृतं पुत्रनाशमुपाशृणोत्। ॥ ३४ ॥ चुक्रोधनारदायासौ पुत्रशोकविमूर्च्छितः।देवर्षिमुपलभ्याह रोषाद्विस्फुरिताधरः ॥ ३५ ॥ दक्षउवाच । अहोअसाधोसाधूनां साधुलिंगेनमस्त्वया। असाध्वकार्यर्भकाणां भिक्षोर्मार्गःप्रदर्शितः ॥ ३६ ॥ ऋणैस्त्रिभिरमुक्तानाममीमांसितकर्मणाम्। विघातःश्रेयसःपाप लोकयोरुभयोःकृतः ॥ ३७ ॥ एवंत्वंनिरनुक्रोशो बालानांमतिभिद्धरेः । पार्षदमध्येचरसियशोहा निरपत्रपः ॥ ३८ ॥ ननुभागवता नित्यं भूतानुग्रहकातराः । ऋतेत्वांसौहृदघ्नंवै वैरंकरमवैरिणाम् ॥ ३९ ॥ नेत्थंपुंसां विरागःस्यात्त्वया केवलिनामृषा । मन्यसेयद्युपशमं स्नेहपाशनिकृन्तनम् ॥ ४० ॥ नानुभूयनजानाति पुमान्विषयतीक्ष्णताम् । निर्विद्यतस्वयंतस्मान्न तथाभिन्नधीपरैः ॥ ४१ ॥ यन्नस्त्वंकर्मसंधानां साधूनांगृहमेधिनाम् । कृतवानसिदुर्मर्ष विप्रियंतवम

ह्यस्मने विशुद्धसत्त्वधिष्ण्यायमहाहंसायधीमहि " अर्थ—महात्मापुरुष नारायणको प्रणामकरते हैं, और शुद्धसत्त्वगुणकेआश्रयरूप भगवानका सुमिरणकरते हैं ॥ २८ ॥ हेमहाराज ! इसभांति सृष्टि सृजनेकी इच्छा करते हुये उनसबलाश्वके समीप नारदजीने आकर पहिलकीभांति गूढ़वाक्यकहे परन्तु उनसे इतना और अधिककहा ॥ २९ ॥ हेदक्षसुतो ! मुझसे शिक्षासुनो तुम अपने भाइयों पर स्नेहकरनेवाले हो इसीसे तुमभी उन्हींके मार्गका अवलम्बनकरो ॥ ३० ॥ जोधर्म वेत्ता अपने भाइयोंके मार्ग का अवलम्बनकरते हैं वे अपने पुण्यकी सहायतासे मरुतदेव के साथ आनन्द कियाकरते हैं ॥ ३१ ॥ सर्वदनारदजी इतना कहकर वहांसे चलेआये और शबलाश्वों ने भी अपने बड़ेभाइयों के मार्गका अवलम्बन किया ॥ ३२ ॥ अति श्रेष्ठ, समानचित्त भगवानके मार्गका अवलम्बनकरनेवाले वे शवलाश्व गयीहुई रात्रिकी सदृश अवतकभी पीछे नहीं आते हैं ॥ ३३ ॥ इसकालमें बहुतसे उपद्रव होतेदेख, दक्षप्रजापतिने पूर्वकी समान नारदजीसे पुत्रों के नाशहोने की बातसुनी ॥ ३४ ॥ दक्षपुत्रों के शोक से अति दुःखित होगया और क्रोधसे ओंठ फड़कने लगे, तदनन्तरवह नारदजी से मिलक्रोधितहो कहनेलगा ॥ ३५ ॥ दक्षने कहा कि—अरे! असाधु तूसन्तोकासास्वरूपधारण किये है तूने हमारे पुत्रों के साथ बड़ा अनिष्ट किया, किस्वधर्म में प्रवृत्तहुये बालकों को भिखारियों का मार्ग दिखाया ॥ ३६ ॥ मेरे पुत्रों के दोनोंलोक सम्बन्धी कल्याणका तूने नाशकरदिया अभीतोवह तीनों ऋणों से उऋणभी नहीं हुये और न कर्मसम्बन्धीही विचारकिया ॥ ३७ ॥ इसभांति निर्दय और बच्चोंकी बुद्धिको फिरानेवाला तू भगवत्यशकानाश करनेवाला होकर, लज्जाछोड़ विष्णुदूतों के संग फिरता है ॥ ३८ ॥ स्नेहको भंगकरनेवाला और अशत्रुओं को शत्रु बनानेवाला एक तेरे अतिरिक्त दूसरे भगवद्भक्ततोजीवों के ऊपर दयाही करतेहोंगे ३९॥ यदि तू ऐसा मनमें विचारताहो कि स्नेहरूपी बन्धनको काटनेवाला एकउपशमही है तो तुझ ऐसे ज्ञानियों के रूप बनानेवाले खोटे पुरुष से मनुष्यों को कभी वैराग्य न होगा ॥ ४० ॥ विना विषयों के अनुभव किये हुये मनुष्य यह नहीं जानसकता कि विषय दुःखदायी हैं इसहेतु विषय भोगके उपरान्त जैसा वैराग्य प्राप्त होता है वैसा और दूसरीरीति से नहीं होता ॥ ४१ ॥ कर्मोंकी म-

र्षितम् ॥ ४२ ॥ तन्तुकृन्तनयन्नस्त्वममद्रममचरः पुनः । तस्माल्लोकेषुतेमूढ नभवेद्भ्रमतःपदम् ॥ ४३ ॥ श्रीशुकउवाच । प्रतिजग्राहतद्वाढं नारदःसाधुसंमतः । एतावान्साधुवादोहि तितिक्षेतेश्वरःस्वयम् ॥ ४४ ॥

इति श्रीमद्भा० महा० षष्ठस्कंधे दक्षनारदशापोनाम पंचमोऽध्यायः ॥५॥

श्रीशुकउवाच । ततः प्राचेतसोऽसिक्न्यामनुनीतः स्वयंभुवा । षष्टिंसंजनयामासदुहितॄःपितृवत्सलाः ॥ १ ॥ दशधर्मायकायेंद्रोद्विषट्त्रिणवदत्तवान् ।भूतांगिरःकृशाश्वेभ्योद्वेद्वेतार्क्ष्यायचापराः ॥ २ ॥ नामधेयान्यमूषांत्वंसापत्यानांचमेशृणु । यासांप्रसूतिप्रसवैर्लोकाआपूरितास्त्रयः ॥ ३ ॥ भानुर्लम्बाककुज्जामिर्विश्वासाध्यामरुत्वती । वसुर्मुहूर्त्तासंकल्पाधर्मपत्न्यःसुतांशृणु ॥ ४ ॥ भानोस्तुदेवऋषभइन्द्रसेनस्ततोनृप । विद्योतआसील्लम्बायास्ततश्चस्तनयित्नवः ॥ ५ ॥ ककुभःसंकटस्तस्यकीकटस्तनयोयतः । भुवोदुर्गाणिजामेयः स्वर्गोनन्दिस्ततोऽभवत् ॥ ६ ॥ विश्वेदेवास्तुविश्वा अप्रजास्तान्प्रचक्षते । साध्योगणस्तुसाध्याया अर्थसिद्धिस्तुतत्सुतः ॥ ७ ॥ मरुत्वांश्चजयन्तश्चमरुत्वत्यांबभूवतुः । जयन्तोवासुदेवांशउपेंद्रइतियंविदुः ॥ ८ ॥ मौहूर्त्तिकादेवगणामुहूर्त्तायाश्चजज्ञिरे । येवैफलंप्रयच्छन्ति भूतानांस्वस्वकालजम् ॥ ९ ॥ संकल्पायाश्चसंकल्पः कामःसंकल्पजःस्मृतः । वसवोऽष्टौवसोःपुत्रास्तेषांनामानिमेशृणु ॥ १० ॥ द्रोणःप्राणोध्रुवोऽर्कोऽग्निर्दोषोवसुर्विभावसुः । द्रोणस्याभिमतेःपत्न्या हर्षशोकभयादयः ॥ ११ ॥ प्राणस्योर्जस्वती

र्यादावाले हम साधु गृहस्थों का तूने बड़ाही अपराध किया है इसकातो सहन मैंने एकबार कर लिया ॥ ४२ ॥ परन्तु हे दुर्मुख ! सत्यानाशी तूने दूसरी बेरभी मेरा अपराध किया इससे तू अब सदैव लोकों में भ्रमण किया करेगा तुझे बैठने का स्थान न मिलेगा ॥ ४३ ॥ शुकदेवजी बोले कि इसदक्षके शापको सन्तो के माननीय नारदजीने स्वीकारकिया, यह सन्तोंही की रीति है कि आप शाप देने की सामर्थ्य नारदजी ने स्वयं शापको ग्रहण किया ॥ ४४ ॥

इति श्री मद्भा० महा० षष्ठस्कन्धे सरलाभाषाटीकायां पञ्चमोऽध्यायः ॥ ५ ॥

श्रीशुकदेव जी बोलेकि–फिर ब्रह्माजी की आज्ञानुसार दक्षने अपनी असिक्नी नाम स्त्रीमें साठ कन्यायें उत्पन्न कींजो अपने पितादक्ष में बड़ास्नेह रखती थीं ॥ १ ॥ उनमें से प्रजापति दक्षने १० कन्या धर्मको, १३ कश्यपजी को, २७ चन्द्रमाको, दो भूतोंको, दो अंगिराको, दो कृशाश्वको और चारतार्क्ष्य नाम कश्यपजी को ऐसेही साठ कन्यायें दीं ॥ २ ॥ अब कुटुम्ब सहित उनके नाम कहता हूं वह सुनो कि जिनकी परंपरा संतान से त्रिलोकी परिपूर्ण होगई ॥ ३ ॥ धर्मकी स्त्रियें भानु, लंबा, ककुभ, जामि, विश्वा, साध्या मरुत्वती, वसु, मुहूर्त्ता, और संकल्पा थीं अब इनकी पुत्रोत्पत्ति सुनो ॥ ४ ॥ हेराजा! भानुके देव ऋषभ तथा देव ऋषभके इन्द्रसेन और लंबाके विद्योत और विद्योत के स्तनयित्नु नामपुत्र उत्पन्न हुआ ॥ ५ ॥ ककुभके संकट, संकट के कीकट और कीकटके गढ़ (किलों)के अभिमानी देवता हुये–जामिके स्वर्ग, स्वर्गके नंदिपुत्र हुआ ॥ ६ ॥ विश्वाके विश्वेदेवता हुये इनके कोई संतान न थी–साध्याके साध्यगण उत्पन्न हुये उस साध्यगण के अर्थसिद्धि हुआ ॥ ७ ॥ मरुत्वती में मरुत्वान और जयंत हुये जयंत भगवत्कला हैं इससे उन्हें उपेन्द्र भी कहते हैं ॥ ८ ॥ मुहूर्ता के पुत्र मौहूर्तिक देवता गणहुये किजो प्राणियोंको अपने काल सम्बन्धी फलदिया करते हैं ॥ ९ ॥ संकल्पा के संकल्प और संकल्प के काम नामक पुत्र उत्पन्न हुआ–वसुके आठ वसुपुत्र हुये उनके नाम यह हैं ॥ १० ॥ द्रोण, प्राण, ध्रुव, अर्क, अग्नि, दोष, वसु और विभावसु, द्रोणके अभिमति स्त्रीमें हर्ष, शोक और भय इत्यादिक पुत्र उत्पन्न हुये ॥ ११ ॥ प्राण

भार्यासहआयु:पुरोजवः। ध्रुवस्यभार्याधरणिरसूतविविधा:पुरः ॥१२॥ अर्कस्य वासनाभार्यापुत्रास्तर्षादयःस्मृताः अग्नेर्भार्यावसोर्धारा पुत्राद्रविणकादयः ॥१३॥ स्कन्दश्चकृत्तिकापुत्रोयेविशाखादयस्ततः। दोषस्यशर्वरीपुत्रःशिशुमारोहरेःकला १४ ॥ वसोरांगिरसीपुत्रो विश्वकर्माकृतीपतिः। ततोमनुश्चाक्षुषोऽभूद्विश्वेसाध्या मनोःसुताः ॥ १५ ॥ विभावसोरसूतोषाव्युष्टंरोचिषमातपम्। पंचयमोऽथसूता नियेनजाग्रतिकर्मसु ॥ १६ ॥ सरूपाऽसूतभूतस्यभार्यारुद्रांश्चकोटिशः। रैवतोऽजो भवोभीमोवामउग्रोवृषाकपिः ॥ १७ ॥ अजैकपादहिर्बुध्न्योबहुरूपोमहानिति। रुद्रस्यपार्षदाश्चान्येप्रेतभूतविनायकाः ॥१८॥ प्रजापतेरंगिरसःस्वधा पत्नीपितॄनथ। अथर्वांगिरसंवेदं पुत्रत्वेचाकरोत्सती ॥ १९ ॥ कृशाश्वोऽर्चिषिभार्यायांधूम्रकेशम जीजनत्। धिषणायांवेदशिरोदेवलंवयुनंमनुम् ॥ २० ॥ तार्क्ष्यस्यविनिताकद्रूःपतंगीयामिनीइति। पतंगयसूतपतगान्यामिनीशलभानथ ॥ २१ ॥ सुपर्णाऽसूतगरुडं साक्षाद्यज्ञेशवाहनम्। सूर्यसूतमनूरुंचकद्रूर्नागाननेकशः ॥ २२ ॥ कृत्तिकादीनिनक्षत्राणीन्दोःपत्न्यस्तुभारत। दक्षशापात्सोऽनपत्यस्तासुयक्ष्मग्रहार्दितः ॥२३॥ पुनःप्रसाद्यतंसोमः कलालेभेक्षयेर्दिताः। शृणुनामानिलोकानां मातॄणांशंकराणिच ॥ ॥ २४ ॥ अथकश्यपपत्नीनां यत्प्रसूतमिदंजगत्। अदितिर्दितिर्दनुः काष्ठाअरिष्टा

के ऊर्जस्वती स्त्री से सह, आयु और पुरोजव पुत्र उत्पन्न हुये ध्रुवकी धरणी स्त्री में नाना भांतिके ग्रामाभिमानी देवता उत्पन्न हुये ॥ १२ ॥ अर्क के बासना स्त्री में तर्षादि पुत्र उत्पन्न हुये—अग्नि की वसुधारा नाम स्त्री में द्रविण इत्यादिक पुत्रहुये ॥ १३ ॥ और अग्निकी कृत्तिका स्त्री में स्कंद नामपुत्र उत्पन्न हुआ, तथा स्कंदके बिशाखा इत्यादिक पुत्र उत्पन्न हुये—दोषके शर्वरी नाम स्त्री में भगवत् अंश शिशुमार पुत्रहुआ ॥ १४ ॥ वसुके आंगिरसी स्त्रीमें विश्वकर्मा और विश्वकर्मा के चाक्षुष नाम पुत्र तथा मनुके विश्व और साध्यपुत्र उत्पन्न हुये ॥ १५ ॥ विभावसु की उषा स्त्री में व्युष्ट, रोचिष, और आतप यह तीनपुत्र उत्पन्न हुये आतप के दिन नामक पुत्र उत्पन्न हुआ कि जिसमें यह सबप्राणी अपने २ कामों में लगेरहते हैं ॥ १६ ॥ भूतकी पहली स्त्री सरूपा से रुद्र नाम करोडोंपुत्र प्रगटे, इनमें से यह एकादश रुद्ररैवत, अज, भव, भीम, वाम, उग्र, वृषाकपि ॥१७॥ अजैकपाद, अहिर्बुध्न्य, बहुरूप और महान् हैं, और रुद्रके पार्षद, भूत, प्रेत, पिशाच, विनायक आदि दूसरी स्त्री महामति से उत्पन्न हुये ॥१८॥ प्रजापति अंगिरा की स्वधा स्त्रीने पितरोंको तथा सतीनाम स्त्रीने अथर्वांगिरस नाम वेदको अपना पुत्रकिया ॥ १९ ॥ कृशाश्व की अर्चि स्त्री में धूम्रकेश, और धिषणा स्त्री में वेदशिरा, देवल, वयुन और मनु यह पुत्र उत्पन्नहुये ॥ २० ॥ कश्यप जी की विनता, कद्रू, पतंगी और यामिनी यह चारस्त्रियें थीं, पतंगीके पतंग नामक, और यामिनी के टीड्डा नामक पुत्र उत्पन्न हुये ॥ २१ ॥ विनता के एकतो हरिबाहन गरुड़ और दूसरा सूर्य सारथी अरुण नामक पुत्र उत्पन्न हुआ कद्रूके अनेक नागपुत्र हुये ॥ २२ ॥ हे राजन् ! कृत्तिका आदि सत्ताईसो नक्षत्र चन्द्रमाकी स्त्रियां हैं परन्तु दक्षके शापसे क्षयरोग होनेकेकारण सर्वेव दुःखित रहता है इसीहेतु उसके एक भी पुत्र न उत्पन्न हुआ दक्षने जब शापदिया तो पीछे चन्द्रमा ने बिनती की, तब दक्षने प्रसन्न होकर यह कहाकिजो तेरीकलायें कृष्णपक्षमें क्षीण होजाती हैं वह पीछे बढ़जायंगी, इसभांति कलातो पीछे मिलगईं परन्तु कोई पुत्र न हुआ अब जगत जननी कश्यप जीकी स्त्रियों के नाम कहताहूं उन्हें सुनोकि जिनसे सबसृष्टि उत्पन्न हुई है ॥ २३ ॥ २४ ॥ अदिति, दिति, दनु, काष्ठा, अरिष्टा, सुरसा, इला, मुनि, क्रोधवशा, ताम्रा, सुरभि, सरमा और तिमि यह क-

सुरसाइला ॥ २५ ॥ मुनिःक्रोधवशाताम्रासुरभिःसरमातिमिः । तिमेर्यादोगणाआ सन्श्वापदाःसरमासुताः ॥ २६ ॥ सुरभेर्महिषागावोयेचान्येद्विशफानृप । ताम्रा याःश्येनगृध्राद्यामुनेरप्सरसांगणाः ॥ २७ ॥ दन्दशूकादयःसर्पाराजन्क्रोधवशात्म जाः । इलायाभूरुहाःसर्वे यातुधानाश्चसौरसाः ॥ २८ ॥ अरिष्टायाश्चगन्धर्वाःकाष्ठा याद्विशफेतराः । सुतादनोरेकषष्टिस्तेषांप्राधानिकाञ्छृणु ॥२९॥ द्विमूर्धाशम्बरोऽरि ष्टोहयग्रीवोविभावसुः । अयोमुखःशंकुशिराःस्वर्भानुःकपिलोऽरुणः ॥ ३० ॥ पुलो माबृषपर्वाच एकचक्रोऽनुतापनः धूम्रकेशोविरूपाक्षो विप्रचित्तिश्चदुर्जयः ३१ ॥ स्वर्भानोःसुप्रभांकन्यमुवाहनमुचिःकिल ॥ बृषपर्वणस्तुशर्मिष्ठां ययातिर्नाहुषोबली ॥ ३२ ॥ वैश्वानरसुतायाश्चचतस्रश्चारुदर्शनाः । उपदानवीहयशिरापुलामाकाल कातथा ॥ ३३ ॥ उपदानवींहिरण्याक्षः क्रतुर्हयशिरांनृप । पुलोमांकालकांचद्वेवै श्वानरसुतेतुकः ॥ ३४ ॥ उपयेमेऽथभगवान्कश्यपोब्रह्मचोदितः । पौलोमाःकालके याश्च दानवायुद्धशालिनः ॥ ३५ ॥ तयोःषष्टिसहस्राणि यज्ञघ्नांस्तेपितुःपिता । ज घानस्वर्गतोराजन्नेकइन्द्रप्रियंकरः ॥ ३६ ॥ दितेःसुतोहिरण्याक्षो हिरण्यकशिपुस्त था । कन्याचसिंहिकानाम बभूवकुरुसत्तम ॥ ३७ ॥ विप्रचित्तिःसिंहिकायां शतं चैकमजीजनत् । राहुज्येष्ठंकेतुशतं ग्रहत्वंयउपागताः ॥ ३८ ॥ अथातःश्रूयतांवंशो योऽदितेरनुपूर्वशः । यत्रनारायणोदेवः स्वांशेनावतरद्विभुः ॥ ३९ ॥ विवस्वानर्य मापूषा त्वष्टाऽथसवितामगः । धाताविधातावरुणोमित्रःशक्रउरुक्रमः ॥ ४० ॥ वि वस्वतःश्राद्धदेवं संज्ञाऽसूयतवैमनुम् । मिथुनंचमहाभागा यमंदेवंयमींतथा । सै वेभूत्वाऽथवडवा नासत्यौसुषुवेभुवि ॥४१ ॥ छयाशनैश्चरंलेभेसावर्णिचमनुंततः

श्यपकी स्त्रियें थी। हे महाराज ! तिमिके यादोगण (जलजंतु) सरमा के श्वापद। सुरभि के गाय भैंस तथा और भी दोखुरवाले पुत्र उत्पन्न हुये ताम्रा के श्यन, गिद्ध, आदि, मुनिके अप्सरागण, क्रोधवश के सर्प आदि पेटसे चलने वाले पुत्र उत्पन्न हुये इलाके यह सब वृक्षादिक, सुरसा के राक्षस अरिष्टा के गन्धर्व, काष्ठाके एक खुरवाले जीव उत्पन्न हुये दनुके इकसठ पुत्रोंमें से मुख्य २ के नाम कहताहूं । द्विमूर्धा शंबर, अरिष्ठ, हयग्रीव, विभावसु अयोमुख, शंकुशिरा, स्वर्भानु, कपिल, अरुण । पुलोमा, वृषपर्वा, एक चक्र और अनुतापन धूम्रकेश, विरूपाक्ष, विप्रचित्ति और दुर्जय । स्वर्भानु के सुप्रभा नाम कन्याथी उसके संग नमुचिने विवाह किया और वृषपर्वाकी शर्मिष्ठा नाम कन्या से न हुषके पुत्र ययाति राजाने विवाह किया ॥ २५–३२ ॥ दनुके पुत्र वैश्वानर के अति सुंदरी चार कन्यायें उपदानवी, हयशिरा, पुलोमा और कालकाथी ॥३३॥ हे महाराज ! हिरण्याक्ष ने उपदानवी से क्रतुने हयशिरा से और कश्यपजी ने ब्रह्माजी की आज्ञानुसार पुलोमा और कालका से विवाह किया हे राजन् ! उनके पौलोम और कालकेय नामक साठ सहस्र असुर बड़े लड़ाके उत्पन्न हुये । यह यज्ञमें विघ्नकिया करते थे इसहेतु जब आपके पितामह अर्जुन स्वर्गमें गये तब इन्द्रकी आज्ञानुसार उन्होंने उन दैत्योंको मार इन्द्रका भय दूरकिया ॥ ३४ ॥ ३६ ॥ विप्रचित्ति ने सिंहिका के १०१ पुत्र, सबसे बड़ेराहु और केतु नाम पुत्र उत्पन्न किये किजो ग्रहहुये ॥३८॥ अब अदिति के वंशका कि जिसमें साक्षातभगवान ने अपनी कला से अवतारलिया है वर्णनकरत हूं वह क्रमानुसार सुनो ॥ ३९ आदिति के बारह आदित्यपुत्र, विवस्वान, अर्यमा, पूषा, त्वष्टा, सविता, भग, धाता, विधाता, वरुण, मित्र, शक्र और उरुक्रमहुये ॥ ४० ॥ विवस्वानकी संज्ञास्त्री में श्राद्धदेव नामक मनुपुत्र उत्पन्नहुआ और उसी महाभागा में यमपुत्र और यमुनाकन्या यह जोड़ा उत्पन्नहुआ, फिर वहां संज्ञा घोड़ी बनी कि जिससे पृथ्वीपर अश्विनीकुमार पुत्र उत्पन्नहुये ॥४१॥

कन्यांचतपतींयावै यत्रेसंवरणंपतिम् ॥ ४२ ॥ अर्यम्णोमातृकापत्नी तयोश्चर्षणयः सुताः यत्रवैमानुषीजातिर्ब्रह्मणाचोपकल्पिता ॥ ४३ ॥ पूषाऽनपत्यःपिष्टादो भग्नद न्तोभवत्पुरा । योऽसौदक्षायकुपितं जहासविवृतद्विजः ॥ ४४ ॥ त्वष्टुर्दैत्यानुजा भार्यारचनानामकन्यका । सन्निवेशस्तयोर्जज्ञेविश्वरूपश्चवीर्यवान् ॥ ४५ ॥ तंवव्रि रेसुरगणा दौहित्रंद्विषतामपि । विमतेनपरित्यक्ता गुरुणाऽङ्गिरसेनयत् ॥ ४६ ॥

इतिश्रीमद्भा०महा०षष्ठ०दक्षकन्यावंशवर्णनंनामषष्ठोऽध्यायः ॥ ६ ॥

राजोवाच । कस्यहेतोःपरित्यक्ता आचार्येणात्मनःसुराः । एतदाचक्ष्वभगवन् शिष्याणामक्रमंगुरौ ॥१॥ श्रीशुकउवाच । इन्द्रस्त्रिभुवनैश्वर्यमदोल्लंघितसत्पथः । मरुद्भिर्वसुभी रुद्रैरादित्यैर्ऋभुभिर्नृप ॥ २ ॥ विश्वेदेवैश्चसाध्यैश्च नासत्याभ्यांप- रिश्रितः । सिद्धचारणगन्धर्वैर्मुनिभिर्ब्रह्मवादिभिः ॥ ३ ॥ विद्याधराप्सरोभिश्च कि न्नरैःपतगोरगैः । निषेव्यमाणोमघवान् स्तूयमानश्चभारत ॥ ४ ॥ उपगीयमानो ल- लितमास्थानाध्यासनाश्रितः । पाण्डुरेणातपत्रेण चन्द्रमण्डलचारुणा ॥ ५ ॥ युक्त श्चान्यैः पारमेष्ठ्यैश्चामरव्यजनादिभिः विराजमानः पौलोम्यासहार्धासनयाभृशम् ॥ ६ ॥ सयदा परमाचार्यं देवानामात्मनश्चह । नाभ्यनन्दतसंप्राप्तं प्रत्युत्थानासना दिभिः ॥ ७ ॥ वाचस्पतिंमुनिवरं सुरासुरनमस्कृतम् । नोच्चचालासनादिन्द्रः पश्य न्नपिसभागतम् ॥ ८ ॥ ततोनिर्गत्यसहसा कविराङ्गिरसःप्रभुः ॥ आययौस्वगृहं तूष्णींविद्वाञ्छ्री मदविक्रियाम् ॥ ९ ॥ तर्ह्येवप्रतिबुध्येन्द्रो गुरुहेलनमात्मनः । गर्ह-

---

विवस्वानकी छायास्त्री में शनैश्चर और सावर्णि मनु यह दोपुत्र तथातपती नामपुत्री उत्पन्न हुईकि कि जो संवरणके संग व्याहीगई ॥ ४२ ॥ आर्यमाकी मातृका स्त्री में चर्षणी नामपुत्र प्रगटे, ब्रह्मा जीन इनकी मनुष्यजाति कल्पना की है ॥ ४३ ॥ ब्रह्मसमाज में दक्षपर कुपितहुये महादेवजीको पूषा दांत दिखा २ कर हँसाथा इससे शिवगणों ने उसके दांततोड़दिये थे तबसे वह पिष्टखाकर अपना कालक्षेप करता है इसके कोई सन्ताननहीं है ॥ ४४ ॥ दैत्योंकी छोटी भगनी रचना त्वष्टा की स्त्री था इसके सन्निवेश और विश्वरूपदोपुत्र उत्पन्नहुये ॥ ४५ ॥ यद्यपि वह अपने शत्रु दैत्यों का दौहित्रथा, तौभी जब गुरू बृहस्पतिजीने देवताओं को अवज्ञाकरनेसे छोड़दिया तब देवता ने आकर विश्वरूपसे प्रार्थनाकी और उसे अपना पुरोहित बनाने को वर्ण किया ॥ ४६ ॥

इति श्रीमद्भा० महा० षष्ठम० सरला भाषाटीकायां षष्ठोऽध्यायः ॥ ६ ॥

परीक्षित ने कहा कि–हे भगवन् ! बृहस्पतिजी ने देवताओं को क्यों छोड़दिया ? गुरू विना अपराध शिष्य को नहीं छोड़ता सो इन्होंने गुरूका क्या अपराध किया सो कहिये ॥ १ ॥ श्री शुकदेवजी बोले कि–महाराज ! इन्द्र तीनोलोकका ऐश्वर्य्य पा, साधुओंके मार्ग का उल्लंघन कर वर्तावा करने लगे, उस इन्द्रको मरुतगण, वसु देवता, रुद्र, आदित्य और ऋभु ॥ २ ॥ विश्वेदेवा, साध्यदेवता और अश्विनीकुमार घेरे हुये थे, सिद्ध, चारण,गन्धर्व, मुनि, विद्याधर इनसे सेवित था ॥ ३ ॥ हे राजन् ! अप्सरा किन्नर पतंग इन्द्रकी सेवा कररहे थे ॥ ४ ॥ हे भरत वंशियों में श्रेष्ठ इन्द्र के समीप सुंदर गान होरहा था और चन्द्र मंडल की सदृश श्वेत छत्र लगा हुआ था ॥५ ॥ और भी महाराजों के चामर, व्यजन इत्यादिक चिह्न प्रकाशित होरहे थे और अर्धे सिंहासन में इन्द्राणी विराजमान थीं ॥ ६ ॥ उसीकालमें देवताओंके श्रेष्ठ गुरू बृहस्पतिजी उस सभा में आये तो इन्द्र ने उनका आ.न आदिकसे सत्कार न किया ॥ ७ ऐसे महामुनि बृहस्पतिजीको कि जिन को सुर असुर नमते हैं, सभा में आया देख इन्द्र अपने आसनसे किंचित्मात्रभी न उठा ॥ ८ ॥ तब लक्ष्मी० मदका विकार जान-महाविद्वान बृहस्पतिजी चुपचाप तत्कालही वहां से चलेआये ९॥

यामासखदसि स्वयमात्मानमात्मन ॥१०॥ अहोबतममाऽसाधु कृतवेंद भ्रबुद्धिना । यन्मयैश्वर्यमत्तेन गुरुः सदसिकात्कृतः ॥११॥ कोगृध्येत्पण्डितोलक्ष्मीं त्रिविष्टपप तेरपि । ययाऽहमासुरंभावं नीतोऽद्यविबुधेश्वरः ॥ १२ ॥ येपारमेष्ठ्यं धिषणमधि तिष्ठन्नकंचन । प्रत्युत्तिष्ठेदिति ब्रूयुर्धर्मंतेनपरंविदुः ॥ १३ ॥ तेषांकुपथदेष्टॄणां पततां तमसिह्यधः । येश्रद्दध्युर्वचस्तेवै मज्जन्त्यश्मप्लवाइव ॥ १४॥ अथाहममराचार्य म गाधधिषणंद्विजम् । प्रसादयिष्येनिशठः शीर्ष्णातच्चरणंस्पृशन् ॥ १५ ॥ एवं चि- न्तयतस्तस्य मघोनोभगवान्गृहात् । बृहस्पतिर्गतोऽदृष्टां गतिमध्यात्ममायया ॥१६ गुरोर्नाधिगतःसंज्ञां परीक्षन्भगवान्स्वराट् । ध्यायन्धियासुरैर्युक्तः शर्मनालभतात्म नः ॥ १७ ॥ तच्छ्रुत्वैवासुराःसर्वे आश्रित्यौशनसंमतम् । देवान्प्रत्युद्यमंचक्रुर्दुर्मदा आततायिनः ॥ १८ ॥ तैर्विसृष्टेषुभिस्तीक्ष्णै र्निर्भिन्नांगोरुबाहवः । ब्रह्माणंशरणं जग्मुः सहेन्द्रानतकन्धराः ॥ १९ ॥ तांस्तथाऽभ्यर्दितान्वीक्ष्य भगवानात्मभूरजः। कृपयापरयादेव उवाचपरिसान्त्वयन् ॥ २० ॥ ब्रह्मोवाच ॥ अहोबतसुरश्रेष्ठा ह्यभ द्रंवःकृतंमहत् ॥ ब्रह्मिष्ठंब्राह्मणंदान्तमैश्वर्यान्नाभ्यनन्दत ॥ २१ ॥तस्यायमनयस्या सीत्परेभ्योवःपराभवः । प्रक्षीणेभ्यःस्ववैरिभ्यः समृद्धानांचयत्सुराः ॥ २२ ॥ मघ वन्द्विषतःपश्य प्रक्षीणान्गुर्वतिक्रमात् । संप्रत्युपचितान्भूयः काव्यमाराध्यभक्ति तः । आददीरन्निलयनं ममापिभृगुदेवताः ॥ २३ ॥ त्रिविष्टपंकिंगणयन्त्यभेद्यम न्त्राभृगूणामनुशिक्षितार्थाः । नविप्रगोविन्दगवीश्वराणां भवन्त्यभद्राणिनरेश्वरा

उसकाल इन्द्र गुरू का अपराध हुआ जान सभा के मध्य में स्वयंही अपने को धिक्कारने लगा ॥ १० ॥ हाय! मुझ मंदबुद्धि ने ऐश्वर्य के अहंकार से सभा के मध्य में गुरू का तिरस्कार किया यह बड़ा ही अन्याय किया ॥ ११ ॥ तीनलोक के अधिपतिकी राज्यलक्ष्मी को कौनविद्वान मनुष्य चाहे ? कि जिस लक्ष्मी से मैं सत्वगुणी देवताओं का स्वामी होकर भी आसुरी भावको प्राप्त हुआ ॥ १२ ॥ जो इस भांति कहते हैं कि राजा सिंहासन पर बैठ कर—किसी के सामने न उठे, वह परमधर्म को नहीं जानते ॥ १३ ॥ खोटे उपदेशोंके करनें वाले नीच नरक में गिरते हैं और उनके वचनों को जो श्रद्धायुक्त सुनता है वह पत्थर की नाव में बैठ कर आपही डूबता है ॥ १४ ॥ अतएव मैं मूढ़ता को छोड़, महाविद्वान देवताओं के गुरू बृहस्पतिजी के चरणों में शिर रखकर उनको प्रसन्न करूंगा॥१५॥जब इन्द्रने इसभांति विचार किया और बृहस्पतिजी के घर आये तो बृहस्पतिजी अपनी मायाके प्रभावसे घरमें सभा लोप होगये॥१६॥इन्द्रने यद्यपि बहुत से यत्न किये तथापि बृहस्पतिजी न मिले तबइन्द्र तथा देवताओंने बहुत शोच किया और बुद्धिसेभी विचारा परंतु उनको सुख न प्राप्त हुआ ॥ १७ ॥ जब यह बात असुरो ने सुनीतो वह मदोन्मतहो शुक्राचार्य से सम्मति ले शस्त्रधारणकर देवताओंपर चढ़दौड़े ॥ १८ ॥ असुरों के चलायेहुये तीव्र शरोंसे देवताओं के अंग छिन्नभिन्न होगये और वे रणसे भगनेलगे तब सबदेवता इन्द्रको संगले- कर ब्रह्माजीकी शरणमें गये ॥ १९ ॥ भगवानब्रह्माजी देवताओं को दुःखी देख अत्यन्त कृपायुक्त हो उन्हें धैर्यदेकर ॥ २० ॥ ब्रह्माजीबोले कि—हे देवताओ! तुमने वेदवादी जितेन्द्रिय बृहस्पति का तिरस्कार धनके मदसे किया यह अत्यन्तही बुराकिया ॥ २१ ॥ हे सुरो! तुमसर्व सम्पन्नथे और तुम्हारे बैरी असुर प्रचण्डथे, तौभी उनसे जो तुमहारे यह उसी अपराधका फलहै ॥२२॥ हेदेवताओ! प्रथमतुम्हारे शत्रु शुक्राचार्य के तिरस्कार करने से क्षीण होगये थे परन्तु फिर शु- क्राचार्य की भक्ति करने से वह उन्नति पागये, यह शुक्राचार्य के सेवक तो हमारे स्थानतकको ले सकते हैं ॥ २३ ॥ यह भृगुकुलके शिष्य गुप्त विचारवाले असुर वैकुण्ठको क्या पदार्थ गिने

णाम् ॥ २४ ॥ तद्विश्वरूपं भजताशु विप्रं तपस्विनं त्वाष्ट्रमथात्मवन्तम् । सभाजितोऽर्थान्स विधास्यते वो यदि क्षमिष्यध्वमुतास्य कर्म ॥ २५ ॥ श्रीशुक उवाच ॥ तएवमुदिता राजन् ब्रह्मणा विगतज्वराः । ऋषिं त्वाष्ट्रमुपव्रज्य परिष्वज्येदमब्रुवन् ॥२६॥ देवा ऊचुः ॥ वयं तेऽतिथयः प्राप्ता आश्रमं भद्रमस्तु ते । कामः सम्पाद्यतां तात पितॄणां समयोचितः ॥ २७ ॥ पुत्राणां हि परो धर्मः पितृशुश्रूषणं सताम् । अपि पुत्रवतां ब्रह्मन् किमुत ब्रह्मचारिणाम् ॥ २८ ॥ आचार्यो ब्रह्मणो मूर्तिः पिता मूर्तिः प्रजापतेः । भ्राता मरुत्पतेर्मूर्तिर्माता साक्षात्क्षितेस्तनुः ॥ २९ ॥ दयाया भगिनी मूर्तिर्धर्मस्यात्माऽतिथिः स्वयम् । अग्नेरभ्यागतो मूर्तिः सर्वभूतानि चात्मनः ॥ ३० ॥ तस्मात् पितॄणामार्तानामार्तिं परपराभवम् । तपसाऽपनयंस्तात संदेशं कर्तुमर्हसि ॥ ३१ ॥ वृणीमहे त्वोपाध्यायं ब्रह्मिष्ठं ब्राह्मणं गुरुम् । यथाऽञ्जसा विजेष्यामः सपत्नांस्तव तेजसा ॥ ३२ ॥ न गर्हयन्ति ह्यर्थेषु यविष्ठाङ्घ्र्यभिवादनम् । छन्दोभ्योऽन्यत्र न ब्रह्मन् वयो ज्यैष्ठ्यस्य कारणम् ॥ ३३ ॥ ऋषिरुवाच ॥ अभ्यर्थितः सुरगणैः पौरोहित्ये महातपाः । स विश्वरूपस्तानाह प्रसन्नः श्लक्ष्णया गिरा ॥ ३४ ॥ विश्वरूप उवाच ॥ विगर्हितं धर्मशीलैर्ब्रह्मवर्च उपव्ययम् । कथं नु मद्विधो नाथा लोकेशैरभियाचितम् । प्रत्याख्यास्यति तच्छिष्यः स एव स्वार्थ उच्यते ॥ ३५ ॥ अकिंचनानां हि धनं शिलोञ्छनं तेनेह निर्वर्तितसाधुसत्क्रियः । कथं विगर्ह्यं नु करोम्यधीश्वराः पौरोधसं हृष्यति येन दुर्मतिः ३६ ॥

जिनपर ब्राह्मण, गौ, भगवानकी कृपा होती है उनका किसी भांतिसे अकल्याण नहीं होता ॥२४॥ अतएव अबतुम त्वष्टाके पुत्र विश्वरूप कि जो तपस्वी और धैर्यमान हैं, उसका तत्कालही अनुसरणकरो, और जो तुम उनका आदर करोगे तथा वह असुरों का पक्षकरैं उसको तुम सहोगे तो तुम्हारी समस्त कामनायें पूर्ण होजायगी ॥ २५ ॥ श्रीशुकदेवजी बोले कि—हेराजन्! वे देवता ब्रह्माजीकी यहवार्ता सुन विश्वरूप ऋषिके समीपजा, उनका स्पर्शकर यह कहनेलगे ॥ १६ ॥ देवताओंने कहाकि तुम्हारा भलाहो हम आपके आश्रममें आज पाहुने बनकर आये हैं हेतात! हम तुमसे बड़े हैं हमारे हेतु जैसाचाहिये वैसाकामकरो॥२७॥ पुत्रोंका धर्म यही है कि पिता की सेवाकरैं और गृहस्थी होवें वहांपरभी जो ब्रह्मचारी होवे तो इससेबढ़कर और कोई दूसराधर्म नहीं है ॥२८॥ आचार्य्य ब्रह्माकी मूर्ति, पिता प्रजापतिकी मूर्ति, भाई इन्द्रकी मूर्ति, माता पृथ्वीकी मूर्ति ॥२९॥ भगनीदयाकी मूर्ति, अतिथिधर्मकी मूर्ति, अभ्यागत अग्निकीमूर्ति और समस्तजीव विष्णुजीकीमूर्तिहैं ३० अतएव हम दुःखित अतिथियोंका पराभव रूपी दुःख, किजो शत्रुओं से प्राप्तहुआ है अपने तपके प्रभाव से नाशकरो, हेतात! तुमहमारी आज्ञामानो ॥ ३१ ॥ हम, आप वेदवादी ब्राह्मको गुरुबनाया चाहते हैं कि—जिसयत्न द्वारा तुम्हारे मन्त्र बलके प्रभाव से शत्रुको सहजही में जीतलेवें ॥ ३२ ॥ हे ब्रह्मन्! अपने कार्य्य की सिद्धिके लियेयदि छोटेकोभी प्रणाम किया जायतो कोई निंदित कार्य नहीं है, वेद विद्याके विषय में अवस्था का बड़प्पन नहीं मानाजाता ॥ ३३ ॥ श्रीशुकदेवजी बोले कि—देवताओंने इसभांति उनसे पुरोहित होनेकी विनती की, तोमहा तपस्वी विश्वरूपने प्रसन्न होकर मधुर स्वरसे कहा ॥ ३४ ॥ विश्वरूप बोलेकि—पुरोहितपन यद्यपि धर्मात्माओं से अपमानित और ब्रह्मतेज नाशक है, तथापि हे नाथो! मैं आप लोकपालों के वचनका निषेध कैसे करूं क्योंकि मैं आपकी शिक्षाका पात्रहूं ॥ ३५ ॥ शिलं (खेतकी कनीको लेना) और उंछ (दूकान आदिका पड़ाहुआ अन्नलेना) यही निष्किंचिनों की जीविका है और इसी धनसे मैं महात्माओं का आदर करताहूं इससे हे अधीश्वरो! इस तिरस्कारित पुरोहित पनको कि जिससे बुद्धिकुंठित होती हैमैं

तथापिनप्रतिब्रूयां गुरुभिःप्रार्थितंकियत् । भवतांप्रार्थितंसर्वं प्राणैरर्थैश्चसाधये॥३७ ॥ श्रीशुकउवाच ॥ तेभ्यएवंप्रतिश्रुत्यविश्वरूपोमहातपाः पौरोहित्यंवृतश्चक्रे परमेणसमाधिना॥३८॥सुरद्विषांश्रियंगुप्तामौशनस्यापिविद्यया। आच्छिद्यादान्महेन्द्राय वैष्णव्याविद्ययाविभुः॥ ३९ ॥ ययागुप्तःसहस्राक्षो जिग्येऽसुरचमूर्विभुः । तांप्राह सम्हेन्द्राय विश्वरूपउदारधीः ॥ ४० ॥

इतिश्रीमद्भा०महा० षष्ठ०पौरोहित्यायवर्णनंनामसप्तमोऽध्यायः ॥ ७ ॥

राजोवाच ॥ ययागुप्तःसहस्राक्षः सवाहान्रिपुसैनिकान् । क्रीडन्निवविनिर्जित्य त्रिलोक्याबुभुजेश्रियम् ॥ भगवंस्तन्ममाख्याहि वर्मनारायणात्मकम् । यथाततायिनःशत्रून्येनगुप्तोजयन्मृधे ॥ २ ॥ श्रीशुकउवाच ॥ वृतःपुरोहितस्त्वाष्ट्रो महेन्द्रायानुपृच्छते । नारायणाख्यंवर्माह तदिहैकमनाःशृणु ॥ ३ ॥ विश्वरूपउवाच ॥ धौतांघ्रिपाणिराचम्य सपवित्रउदङ्मुखः । कृतस्वांगकरन्यासो मंत्राभ्यांवाग्यतःशुचिः ४ नारायणमयंवर्म सन्नह्येद्भयआगते । पादयोर्जानुनोरूर्वोरुदरे हृद्यथोरसि ॥ ५ ॥ मुखेशिरस्यानुपूर्व्यादोंकारादीनिविन्यसेत्। ओंनमोनारायणायेतिविपर्ययमथापिवा ॥६॥ करन्यासंततःकुर्याद्द्वादशाक्षरविद्यया। प्रणवादियकारांतमंगुल्यंगुष्ठपर्वसु ७॥ न्यसेद्धृदयओंकारंविकारमनुमूर्धनि । षकारंतुभ्रुवोर्मध्ये णकारंशिखयादिशेत् ८ ॥ वेकारंनेत्रयोर्युञ्ज्यान्नकारंसर्वसंधिषु । मकारमस्त्रमुद्दिश्य मन्त्रमूर्तिर्भवेद्बुधः ९ ॥

कैसेकरूं ॥ ३६ ॥ तोभी आपने बड़े होकर मुझसे प्रार्थना की है इससे मैं अवश्यही इसे स्वीकार करूंगा। मैं आपकी प्रार्थना कोप्राण तथा द्रव्यसे भी सिद्धकरने को प्रस्तुतहूं ॥ ३७ ॥ श्रीशुकदेवजी बोलेकि—बडे तपस्वी देवताओं से प्रार्थना कियेहुये विश्वरूप ने पुरोहित पनको स्वीकार कर उसका निर्वाह बड़े उद्यम से करनेलगे ॥ ३८ ॥ शुक्राचार्य की विद्यासे रक्षित असुरों की संपति विश्वरूप ने विष्णु कवच से इन्द्रकोदी ॥ ३९ ॥ जिस विद्याकी रक्षासे इन्द्रने दैत्यों की सेनाजीती वह विद्या उदार बुद्धि विश्वरूप ने इन्द्रकोदी ॥ ४० ॥

इति श्रीमद्भा०महा०षष्ठस्कं०सरलाभाषाटीकायांसप्तमोऽध्यायः ॥ ७ ॥

नारदउवाच ॥ हिरण्यकशिपूराजन्नजेयमजरामरम्। आत्मानमप्रतिद्वन्द्वमेकराजंव्यधित्सत ॥ १ ॥ सतेपेमन्दरद्रोण्यां तपःपरमदारुणम्। ऊर्ध्वबाहुर्नभोदृष्टिः पादांगुष्ठाश्रितावनिः ॥ २ ॥ जटादीधितिभीरेजे सम्वर्तार्कइवांशुभिः तस्मिंस्तपस्तप्यमानेदेवाः स्थानानिभेजिरे ॥ ३ ॥ तस्यमूर्ध्नःसमुद्भूतःसधूमोऽग्निस्तपोमयः तिर्यगूर्ध्वमधोलोकानतपद्विष्वगीरितः ॥ ४ ॥ चुक्षुभुर्नद्युदन्वंतः सद्वीपाद्रिश्चचाल भूः। निपेतुःसग्रहास्तारा जज्वलुश्चदिशोदश ॥ ५ ॥ तेनतप्तादिवंत्यक्त्वा ब्रह्मलोकं ययुःसुराः। धात्रेविज्ञापयामासुर्देवदेवजगत्पते ॥ ६ ॥ दैत्येंद्रतपसातप्तादिविस्था नुनशक्नुमः। तस्यचोपशमंभूमन्विधेहियदिमन्यसे। लोकानयावन्नश्यन्तिबलिहारास्तवाभिभूः ॥ ७ ॥ तस्यायंकिलसंकल्पश्चरतोदुश्चरंतपः श्रूयतांकिंनविदितं

सबही पदार्थ अनित्य और मिथ्या हैं ॥ ५८ ॥ यम यह इतिहास कहकर उस स्थान से चलेगये तदनन्तर सुयज्ञराजा के जातिवालो ने शोक छोड़कर उसके सब मृतककर्म किये॥५९॥अतएव तुम को भी अपने व दूसरे के निमित्त शोक करना उचितनहीं है। इस संसारमें अपनाही क्या है और परायाहीक्याहै? यहां कौन मनुष्य अपना और कौन दूसरेका है? "यहमेरा है" "यह दूसरेका है" यह केवल अज्ञानही है। जो प्राणी इसभांति के अज्ञानसे मोहित नहीं होते उनको अपने परायेका भेद भी नहीं होता, ॥ ६० ॥ नारदजीने कहाकि अपनी पुत्रवधू समेत दिति दैत्यपति के ऐसे वचनों को सुन पुत्रशोकको त्याग परमात्मा मे मन लगातीहुई ॥ ६१ ॥

इति श्रीमद्भा० महा० सप्तम० सरला भाषाटीकायां द्वितीयोऽध्यायः ॥ २ ॥

नारदजी बोलेकि–हे राजन्! हिरण्यकशिपु की इच्छाहुई कि मैं अजित, अजर अमर, और चक्रवर्ती अद्वितीय राजाहोऊं ॥ १ ॥ इस इच्छासे वह दोनों भुजाओंको उठाकर आकाश कीओर दृष्टि लगाय केवल पैरके अगूठे से पृथ्वी पर खड़ाहो मंदराचल की कंदरामें अत्यंत घोरतपस्या करने लगा ॥ २ ॥ प्रलय कालके सूर्य जैसे प्रचंड किरणोंद्वारा विराजित होतेहैं तैसेही यह दैत्य अपनी जटाकांति से विराजमान हुआ। स्वर्ग से भागेहुये देवतागण दैत्य राजको पर्वत की गुफामें तपस्या करते देख अपने २ स्थान में आये ॥ ३ ॥ कुछ कालके उपरांत तपके प्रभाव से हिरण्यकशिपु के शिरमें से एक प्रकार का धूमयुक्त अग्नि उठकर सब स्थानोमें फैलगया और ऊपर नीचे इधर उधर फैलकर सब लोकोंको जलाने लगा ॥ ४ ॥ उसतीव्र तपस्या के प्रभाव से नद, नदी और समुद्र क्षुभित होउठे; पर्वत, द्वीप और पृथ्वी चलायमान होगई; ग्रह और तारागण टूटनेलगे, और दशोदिशाएं प्रज्वलित होउठीं। यह उत्पात देखकर देवतागण संतप्तहो स्वर्ग लोकको छोड़ ब्रह्म लोकमें आये, और ब्रह्माजी से कहनेलगे कि–हे देव देव! हे जगत्पते! ॥ ५ ॥ ६ ॥ दैत्यराज हिरण्यकशिपु की तपस्या से संतप्त हुएहम अब स्वर्गमें नहीं रहसकते। हे भूमन्! यदि आपकी इच्छाहोतो जबतक आपके भक्तलोग भलीभांति से नष्ट न होवें उसके पहिलेही इसकी शांति का यत्नकरो ॥ ७ ॥ यद्यपि आपसे कुछछिपा नहीं है तौभी वह जिस अभिप्राय से घोरतप करताहै

स्तथाथापि निवेदितः ॥ ८ ॥ सृष्ट्वाचराचरमिदं तपोयोगसमाधिना । अध्यास्ते सर्वधिष्ण्येभ्यः परमेष्ठीनिजासनम् ॥९॥ तदहंवर्धमानेन तपोयोगसमाधिना। कालात्मनोश्चनित्यत्वात्साधयिष्ये तथात्मनः ॥ १० ॥ अन्यथेदं विधास्येऽहमयथापूर्वमोजसा । किमन्यैःकालनिर्धूतैः कल्पांतेवैष्णवादिभिः ॥ ११ ॥ इतिशुश्रुमनिर्बंधतपः परममास्थितः विधत्स्वानंतरंयुक्तंस्वयंत्रिभुवनेश्वर ॥१२॥तवासनंद्विजगवांपारमेष्ठ्यजगत्पते । भवायश्रेयसेभूत्यै क्षेमायविजयायच ॥ १३ ॥ इतिविज्ञापितोदेवैर्भगवानात्मभूर्नृप । परितोभृगुदक्षाद्यैर्ययौदैत्येश्वराश्रमम् ॥१४॥ नत्वदर्शप्रतिच्छन्नंवल्मीकतृणकीचकैः । पिपीलिकाभिराचीर्णं मेदस्त्वङ्मांसशोणितम् ॥१५॥ तपन्तंतपसालोकान् यथाऽभ्रापिहितरविम्। विलक्ष्यविस्मितः प्राहप्रहसन्हंसवाहनः १६ ब्रह्मोवाच ॥ उत्तिष्ठोत्तिष्ठभद्रंते तपःसिद्धोऽसिकाश्यपा वरदोऽहमनुप्राप्तो व्रियतामीप्सितोवरः ॥ १७ ॥ अद्राक्षमहमेतत्ते हृत्सारमहदद्भुतम् । दंशभक्षितदेहस्य प्राणाह्यस्थिषुशेरते ॥ १८ ॥ नैतत्पूर्वर्षयश्चक्रुर्नकरिष्यन्तिचापरे । निरम्बुर्धारयेत्प्राणान्कोवैदिव्यसमाःशतम् ॥ १९ ॥ व्यवसायेनतेऽनेन दुष्करेणमनस्विनाम्। तपोनिष्ठेनभवताजितोऽहंदितिनन्दन ॥२०॥ततस्तआशिषःसर्वाददाम्यसुरपुङ्गव । मर्त्यस्यतेह्यमर्त्यस्यदर्शनंनाफलंमम ॥ २१ ॥ नारदउवाच ॥ इत्युक्त्वाऽऽदिभवोदेवो

सोहम निवेदन करते हैं आप सुनिये ॥८॥ हे ब्रह्मन्! जैसे आप चराचर जगतको रचकर तप और योग निष्ठाद्वारा सर्वश्रेष्ठ आसन पर बैठेहो ॥ ९ ॥ काल और आत्मा नित्य है अतएव (एक जन्म में न होतो बहुत जन्मों में) बड़े भारीतप और योगकी निष्ठाद्वारा मैंभी उसी भांति स्वयं आप (ब्रह्मा) के श्रेष्ठ आसन का अधिकारी होऊं ॥ १० ॥ नहीं तो तपके प्रभाव से इस जगत केसमस्त नियमों को उलटादूंगा। इसके अतिरिक्त कल्पांत में नाश होनेवाले वैष्णवादि पदोंसे मुझेक्या प्रयोजन है? ॥ ११ ॥ उसदैत्य की ऐसी दृढ प्रतिज्ञा सुनी है । इसी कारण वह घोर तपस्या कररहा है । इस विषयमें जोउचितहो सोकरिये; क्योंकि आप स्वयही त्रिभुवन पतिहो ॥ १२ ॥ हे ब्रह्मन्! आपके पदच्युत होनेपर साधुओं का अत्यतही अनिष्ट होगा, क्योंकि ब्रह्म लोकही गौ ब्राह्मणों का प्रतिपालन तथा सर्वसुख और सब ऐश्वर्य व सब उत्कर्षों का आधार है ॥ १३ ॥ हे राजन्! देवताओं के इसभांति कहनेपर भगवान ब्रह्माजी—भृगु, और दक्ष आदि मुनियों सहित हिरण्यकशिपु के आश्रम में आये ॥ १४ ॥ वहांपर आयकर पहिलेतो उन्हों ने उसको न देखा क्योंकि वह वल्मीक (बांबी) तृण और कीचक (बांस) से ढकगया था और चींटेआदि बहुत से कीड़े उसकी त्वचा, माँस, मेद और रुधिरको चाटगये थे ॥ १५ ॥ कुछ एक देरके उपरात ब्रह्माजी ने तपद्वारा तीनो लोक को संतप्त करने वाले उस दैत्येंद्रको मेघों से ढकेहुये सूर्यकी समान देखा । तब ब्रह्माजी ने विस्मित चित्तसे हंसते २ कहा ॥ १६ ॥ कि—हे कश्यप नदन उठो-उठो—तुम्हारा कल्याण हो, तुम तपस्या से सिद्ध हुये; मैं वरदेने आया हू इच्छा वर मांगो ॥ १७ ॥ तुम्हारा अतिअद्भुत धीरज मैंने देखा चींटे तुम्हारा शरीर खागये ह, तुम्हारे प्राण केवल हड्डियों मेही रहगये हैं ॥ १८ ॥ हे वत्स ! पहिले के ऋषि भी कभी ऐसी तपस्या नहीं करसके, और न अब कोई कर सकेगा;—जल पर्य्यन्त छोड़कर कौन देवताओं के १०० वर्ष तक प्राण धारण कर सकता है ? ॥ १९ ॥ हे दिति नदन ! तुम्हारी सी कठोर तपस्या बड़े बड़े माहात्मा भी नहीं कर सकते, तुम्हारे इस तप से मैभी पराजित होगया हूं ॥ २० ॥ अतएव हे असुर-श्रेष्ठ ! यद्यपि तुम मृत्यु (मरण युक्त) हो तौभी मैं तुमको सब इच्छित वर दूगा । हे वत्स ! मैं अमरहूं मेरा दर्शन कभी निष्फल नहीं जाता ॥ २१ ॥ नारदजी बोले कि—इतना कहकर ब्रह्माजी अपने कमडलु से जल ले हिरण्यकशिपु

भक्षिताङ्गं पिपीलिकैः । कमण्डलुजलेनौक्षद्दिव्येनामोघराधसा ॥ २२ ॥ सतत्कीचकवल्मीकात्सह ओजोबलान्वितः ॥ सर्वावयवसंपन्नो वज्रसंहननो युवा ॥ उत्थितस्तप्तहेमाभो विभावसुरिवैधसः ॥ २३ ॥ सनिरीक्ष्याम्बरे देवं हंसवाहमवस्थितम् । ननाम शिरसा भूमौ तद्दर्शनमहोत्सवः ॥ २४ ॥ उत्थाय प्राञ्जलिः प्रह्व ईक्षमाणोदृशा विभुम् ॥ हर्षाश्रुपुलकोद्भेदो गिरागद्गदयाऽगृणात् ॥२५॥ हिरण्यकशिपुरुवाच ॥ कल्पान्ते कालसृष्टेन योऽन्धेन तमसावृतम् । अभिव्यनक्जगदिदं स्वयंज्योतिः स्वरोचिषा ॥ २६ ॥ आत्मना त्रिवृता चेदं सृजत्यवति लुम्पति । रजःसत्वतमोधाम्ने पराय महते नमः ॥ २७ ॥ नम आद्याय बीजाय ज्ञानविज्ञानमूर्तये । प्राणेन्द्रियमनोबुद्धिविकारैर्व्यक्तिमीयुषे ॥२८॥ त्वमीशिषे जगतस्तस्थुषश्च प्राणेन मुख्येन पतिः प्रजानाम् । चित्तस्य चित्तेर्मनइन्द्रियाणां पतिर्महान्भूतगुणाशयेशः ॥ २९ ॥ त्वं सप्ततन्तून्वितनोषि तन्वा त्रय्या चातुर्होत्रकविद्यया च । त्वमेक आत्मात्मवतामनादिरनन्तपारः कविरन्तरात्मा ॥३१॥ त्वमेव कालोऽनिमिषो जनानामायुर्लवाद्यावयवैः क्षिणोषि । कूटस्थ आत्मा परमेष्ठ्यजो महांस्त्वं जीवलोकस्य च जीव आत्मा ३१ ॥ त्वत्तः परं नापरमप्यनेजदेजच्च किंचिद्व्यतिरिक्तमस्ति। विद्याकलास्ते तनवश्च सर्वा हिरण्यगर्भोऽसि बृहत्त्रिपृष्ठः ॥ ३२ ॥ व्यक्तं विभो स्थूलमिदं शरीरं येनेन्द्रियप्राण

के चींटों से खाये हुये शरीर में छिड़कने लगे । उस जल के स्पर्श होते ही उस का शरीर वज्रकी समान दृढ़ होगया और जो जो स्थान चींटियोंने खालिये थे व सब स्थान पूर्ण होगये, जैसे काठों से अग्नि बाहर होता है वैसेही वह हिरण्यकशिपु बांसों के खोह से निकला, उस समय उसका शरीर तपाये हुये सोने की समान प्रकाश पाने लगा । उसने हंस पर चढे हुये ब्रह्माजी को आकाश मे उपस्थित देख, पृथ्वी पर गिर साष्टांग प्रणाम किया ॥ २२—२४ ॥ उनको देखकर हिरण्यकशिपु को अत्यानंद हुआ, अनन्तर वह उठकर, हाथजोड़, विनीत भाव से ब्रह्माजी की ओर एकटक दृष्टिसे देखने लगा उससमय उसके रोमांचहो आया और आनदाश्रुबहने लगे। वह गद्गदवाणी से कहनेलगा कि ॥२५॥ हे विश्वगुरु ! प्रलय कालके घोर अंधकारसे इस विश्वको जिन्होंने प्रकाशित किया है जो स्वयं ही प्रकाशमान हैं जो सत्व, रज, और तम इन तीनो गुणों के आश्रय से जगत की उत्पत्ति, पालन और संहार करते हैं उन त्रिगुण के आश्रय रूप परमेश्वर को मैं प्रणाम करता हू ॥ २६ ॥ २७ ॥ आपही इस जगत के कारण हो । आप आदि पुरुष हो ज्ञान विज्ञान आपहीकी मूर्त्ति है। प्राण इन्द्रिय और बुद्धि रूप विकारों से कार्य के आकारको प्राप्त हुये आप को मैं प्रणाम करता हू ॥ २८ ॥ हे प्रभो ! आप प्राण स्वरूप से इस सृष्टिके सब चर अचर के प्रतिपालक हो इस कारण आप प्रजाओंके पति और उनके चित्त, चेतना मन और इन्द्री सबके स्वामी हो, अतएव आपही महत् तथा आकाशादि भूत, शब्दादि विषय, और इन सब विषयोंके भोग करने वाले एक आपही ईश्वर हो ॥ २९ ॥ हे भगवन् ! आपकी वेदमयमूर्त्तियाग, यज्ञादिकी ज्ञान स्वरूपा है आप उसी पवित्र मूर्त्ति का आश्रय करके अग्निष्टोमादि नाना प्रकार के यज्ञोंका विस्तार करते हो । आप ही सब प्राणियों के आत्मा, अतर्यामी, सर्वज्ञ, अनत और अनादि हो ॥ ३० ॥ हे भगवन् ! आपही काल स्वरूप हो अतएव आपही निमेष शून्य हो क्षण, लवादि विभागों से सब सृष्टि की आयु क्षय करते हो । आप ज्ञान रूप परमेश्वर जन्म रहित और असीम हो आपही प्राणियों के जीवन देने वाले और आपही नियता हो ॥ ३१ ॥ कार्य, कारण, चर, अचर, कुछभी आपसे भिन्न नहीं है, वेद, उपवेद, और वेदांग आपकेही शरीर हैं आप ब्रह्मा हो, आप हिरण्य गर्भ हो, और प्रकृति के परे स्थितहो ॥ ३२ ॥ हे विभो ! सत्य तो

मनोगुणास्त्वम् । भुंक्षेस्थितोधामनिपारमेष्ठ्य अव्यक्तआत्मापुरुषःपुराणः ॥ ३३ ॥ अनन्ताव्यक्तरूपेण येनेदमखिलंततम् चिदचिच्छक्तियुक्ताय तस्मैभगवतेनमः ३४॥ यदिदास्यस्यभिमताम्वराम्मेवरदोत्तम । भूतेभ्यस्त्वद्विसृष्टेभ्यो मृत्युर्मोभून्ममप्रभो ॥ ३५ ॥ नान्तर्बहिर्दिवा नक्तमन्यस्मादपिचायुधैः । नभूमौनाम्बरेमृत्युर्नरैर्नमृगैरपि ॥ ३६ ॥ व्यसुभिर्वाऽसुमद्भिर्वा सुरासुरमहोरगैः । अप्रतिद्वन्द्वतांयुद्धे एकपत्यं चदेहिनाम् ॥ ३७ ॥ सर्वेषांलोकपालानां महिमानंयथात्मनः । तपोयोगप्रभावाणांय न्नरिष्यतिकर्हिचित् ॥ ३८ ॥

इतिश्रीमद्भा० महा० सप्त० तृतीयोऽध्यायः ॥ ३ ॥

नारद उवाच ॥ एवंवृतः शतधृतिर्हिरण्यकशिपोरथ ॥ प्रादात्तत्तपसाप्रीतो वरांस्तस्यसुदुर्लभान् ॥१॥ ब्रह्मोवाच ॥ तातेमे दुर्लभाः पुंसांयान् वृणीषे वरान् मम ॥ तथापिवितराम्यङ्गवरान् यद्यपिदुर्लभान् ॥२॥ ततोऽगामभगवानमोघानुग्रहोविभुः ॥ पूजितोऽसुरवर्येणस्तूयमानः प्रजेश्वरैः ॥ ३ ॥ एवं लब्धवरोदैत्योबिभ्रद्धेममयंवपुः ॥ भगवत्यकरोद्द्वेषंभ्रातुर्वधमनुस्मरन् ॥ ४ ॥ सविजित्यादिशः सर्वा लोकांश्च त्रीन्महासुरः ॥ देवासुरमनुष्येन्द्रान्गन्धर्वगरुडोरगान् ॥ ५ ॥ सिद्धचारणविद्याध्रानृषीन्पितृपतीन्मनून् ॥ यक्षरक्षःपिशाचेशान्प्रेतभूतपतीनथ ॥ ६ ॥ सर्वसत्त्वपतीञ्जित्वावशमानीय विश्वजित् ॥ अहारलोकपालानां स्थानानि सह तेजसा ॥ ७ ॥ देवोद्यानश्रियाजुष्टमध्यास्तेस्म त्रिविष्टपम् ॥ महेन्द्रभवनंसाक्षान्निर्मितं

यह है कि ब्रह्माण्डही आपका स्थूल शरीर है आप सदा इस शरीर द्वारा इन्द्रिय प्राण और मन के विषयोंका भोग करते रहतेहो अतएव आप उपाधि रहित, ब्रह्म, पुराण पुरुषहो ॥ ३३ ॥ हे अनन्त आप अव्यक्त रूप द्वारा इस समस्त विश्व में व्याप्त हो हे भगवन् ! आपका ऐश्वर्य अचिन्तनीयहै, आप विद्या और माया युक्त रहतेहो, आपको मेरा प्रणाम है ॥ ३४ ॥ हे वरदश्रेष्ठ ! आप यदि मुझे इच्छित वर देतेहो तो यह वर दो, कि आपके रचेहुए किसी प्राणीसे मेरी मृत्यु नहो ॥ ३५ ॥ बाहर भीतर, दिनमें रात्रमें, जो आपके रचेहुए नहीं है उनसेभी, अस्त्र द्वारा, भूमिमें आकाशमें मेरी मृत्यु नहो मनुष्य, पशु, प्राणी, अप्राणी, देव, दैत्य अथवा सर्प मुझको नमारसकें हे प्रभु ! समर में अजेय चक्रवर्ती और सब प्राणी और लोकपालों का स्वामी, सर्व महिमा युक्त होऊं आप ऐसा वर दो ॥ ३६ । ३७ ॥ तप वयोग के प्रभाव वाले पुरुषों की जो अणिमादिक सिद्धियां नाश नहीं होती वेही अणिमादिक ऐश्वर्य मुझभीदो ॥ ३८ ॥

इति श्रीमद्भा० महा० सप्तमस्कंधे सरला भाषाटीकायां तृतीयोऽध्यायः ॥ ३ ॥

नारदजी बोले कि—हिरण्यकशिपुकी उग्र तपस्या से भगवान ब्रह्माजी ने सन्तुष्ट होकर उस की प्रार्थना के अनुसार वे सब दुर्लभ वर उसदिये ॥ १ ॥ ब्रह्माजी बोले कि हे तात ! तूनेजो मुझ से वर मांगे वे वर मनुष्योंको अत्यन्तही दुर्लभहैं परन्तु हे दैत्येन्द्र ! यद्यपि वह सबवर दुर्लभहैं तथापि मैं तुझको देताहू ॥२॥ फिर नारदजीने कहा कि—ब्रह्मा इस भांति वरदान दे दैत्यराज और प्रजापतियों से पूजित हो ब्रह्मलोक को गये ॥ ३ ॥ हिरण्यकशिपु इस भांति से वरपाय कंचन का शरीर धारणकर भाई के मरण की वार्त्ता का स्मरण करताहुआ भगवान से द्वेष करनेलगा ॥ ४ ॥ उस महाअसुरनें दशोदिशायें तीनों लोक तथा देव, असुर राजा, गन्धर्व, गरुड़, सर्पगण, सिद्ध, चारण, विद्याधर, ऋषिगण, पितृपति, मनुष्य, यक्ष, राक्षस, पिशाचेश्वर, प्रेतपति, भूतपति, और दूसरेसब प्राणियों को जीत सबको अपनें वशमें करलिया इस भांति उस विश्वविजयी ने सम्पूर्ण लोकपालोंके तेजको और उनके स्थानों को छीनलिया ॥५—७॥ तदनंतर वह दैत्येन्द्र देवताओंके उद्यानों की

विश्वकर्मणा ॥ त्रैलोक्यलक्ष्म्यायतनमध्युवासाखिलर्द्धिमत् ॥ ८ ॥ यत्रविद्रुमसोपानामहामारकताभुवः ॥ यत्रस्फाटिककुड्यानि वैदूर्यस्तम्भपङ्क्तयः ॥९॥ यत्र चित्रवितानानिपद्मरागासनानिच । पयःफेननिभाः शय्यामुक्तादामपरिच्छदाः १० कूजद्भिर्नूपुरैर्देव्यः शब्दयन्त्यइतस्ततः । रत्नस्थलीषुपश्यन्तिसुदतीः सुन्दरं मुखम् ॥ ११ ॥ तस्मिन्महेन्द्रभवनेमहाबलोमहामना निर्जितलोकएकराट् ॥ रेमेऽभिवन्द्यांघ्रियुगः सुरादिभिः प्रतापितैरूर्जितचण्डशासनः ॥ १२ ॥ तमङ्गमत्तमधुनोरुगन्धिना विवृत्तताम्राक्षमशेषधिष्ण्यपाः ॥ उपासतोपायनपाणिभिर्विना त्रिभिस्तपोयोगबलौजसांपदम् ॥ १३ ॥ जगुर्महेन्द्रासनमोजसास्थितं विश्वावसुस्तुम्बुरुरस्मदादयः ॥ गन्धर्वसिद्धाऋषयोऽस्तुवन् मुहुर्विद्याधरा अप्सरसश्च पाण्डव ॥ १४ ॥ सएववर्णाश्रमिभिः क्रतुभिर्भूरिदक्षिणैः ॥ इज्यमानोहविर्भागानग्रहीत् स्वेनतेजसा ॥ १५ ॥ अकृष्टपच्या तस्यासीत्सप्तद्वीपवतीमही ॥ तथा कामदुघा द्यौस्तुनानाश्चर्यपदंनभः ॥ १६ ॥ रत्नाकराश्च रत्नौघांस्तत्पत्न्यश्चोहुरूर्मिभिः ॥ क्षारसिन्धुघृतक्षौद्रदधिक्षीरामृतोदकाः ॥ १७ ॥ शैलाद्रोणीभिराक्रीडं सर्वर्तुषु गुणान्द्रुमाः ॥ दधारलोकपालानामेक एवपृथग्गुणान् ॥ १८ ॥ सइत्थंनिर्जितककुबेकराड्विषयान्प्रियान् ॥ यथोपजोषंभुञ्जानो नातृप्यदजितेन्द्रियः ॥ १९ ॥ एवमै-

---

शोभावाले स्वर्ग में रहकर त्रिलोकी का राज्य करनेंलगा और साक्षात् विश्वकर्मा के बनायेहुए त्रिलोकीकी लक्ष्मी वाले अत्यन्त समृद्धिशाली इन्द्रभवन में निवास करनेंलगा। ॥ ८ ॥ उस स्थान की सब श्रेणिये विद्रुम की बनी हुई, सब भूमि मरकत मणि की, दीवारें स्फटिक की, और खम्भे वैदूर्य मणिकथे ॥९॥ वहां सब स्थान विचित्र चंदोवोंसे सजेहुए, सब आसन पद्मरागमणियों के बिछेहुए सेजों में दूध के फेन सा बिछोना बिछाहुआ और मोतियों की मालाये शोभायमान थीं ॥१०॥ वहां सुंदर दांतोंवाली देवांगनाएं नूपुरका शब्द करतीहुई उसके चारोंओर घूम २ कर उस रत्न भूमि में अपनें सुंदर मुखको देखती रहतीं ॥११॥ ऐसे इन्द्र भवनमें वह महाअभिमानी, अति उग्र आज्ञा वाला, महाबली असुर तीनों लोकों को जीतकर चक्रवर्ती राजाहो विहार करनेंलगा, देवता आदि उसके प्रताप से संतप्त हो उसके पैरों की वंदना करनेलगे ॥ १२ ॥ हे राजन्! दैत्यपति अधिक मद्य का सेवन कर निरंतर मत्त रहता और उसके ताम्र वर्ण दोनों नेत्र सदैव घूर्णित रहते वह तप और योग बलसे इतना बलवान और तेजस्वी होगयाथा कि ब्रह्मा, विष्णु और महेश के अतिरिक्त सबही लोकपाल अपनें २ हाथों में भेंट लेलेकर उसकी सेवा करतेथे ॥ १३ ॥ हे पांडव! बलात्कार से इन्द्रासनपर बैठेहुए हिरण्यकशिपु के सन्मुख विश्वावसु, तुंबरु, महर्षिगण, विद्याधर, अप्सरा, गन्धर्व, सिद्ध और मैं (नारद) उसकी स्तुति किया करतेथ ॥ १४ ॥ वर्णाश्रमी लोग बहुत दक्षिणा वाले यज्ञों से उसका पूजन करतेथे और वह अपनें असीम प्रभाव से यज्ञों के हवि भाग आपही ग्रहण करताथा ॥ १५ ॥ उसका इतना प्रभाव हुआ कि सातो द्वीप वाली पृथ्वी बिना जोतेही कामधेनु गौ की समान नाना प्रकार के पदार्थ देनेंलगी और आकाश मंडल नाना प्रकार के आश्चर्यों से परिपूर्ण होगया ॥ १६ ॥ लवण सागर, इक्षुसागर, क्षीर सागर आदिक सातों समुद्र और उनकी स्त्री नदियें अपनी तरङ्गों से अनेक रत्न बहा बहा उसको देनेंलगीं ॥ १७ ॥ सबपर्वत अपनी कंदराओं में उस दैत्यराज को क्रीडा करनें का स्थान देते और वृक्ष सब ऋतुओं में समभावसे फलफूलयुक्त होनेंलगे और वह हिरण्यकशिपु सब लोकपालों के पृथक २ गुणों को अकेला ही धारण करताथा ॥ १८ ॥ वह अजितेन्द्रिय दिग्विजयी दैत्यराज इस प्रकार प्रिय विषयों को

एवमैश्वर्यमत्तस्य दृप्तस्योच्छास्त्रवर्तिनः ॥ कालो महान्व्यतीयाय ब्रह्मशापमुपेयुषः ॥ २० ॥ तस्योग्रदण्डसंविग्नाः सर्वे लोकाः सपालकाः ॥ अन्यत्रालब्धशरणाः शरणं ययुरच्युतम् ॥२१॥ तस्यै नमोऽस्तु काष्ठायै यत्रात्मा हरिरीश्वरः। यद्गत्वा न निवर्तन्ते शान्ताः संन्यासिनोऽमलाः ॥२२॥ इति ते संयतात्मानः समाहितधियोऽमलाः । उपतस्थुर्हृषीकेशं विनिद्रा वायुभोजनाः॥२३॥ तेषामाविरभूद्वाणी अरूपा मेघनिःस्वना । सन्नादयन्ती ककुभः साधूनामभयंकरी ॥ २४ ॥ मा भैष्ट विबुधश्रेष्ठाः सर्वेषां भद्रमस्तु वः ॥ मद्दर्शनं हि भूतानां सर्वश्रेयोपपत्तये ॥ २५ ॥ ज्ञातमेतस्य दौरात्म्यं दैतेयापसदस्य च ॥ तस्य शान्तिं करिष्यामि कालं तावत्प्रतीक्षत ॥ २६ ॥ यदा देवेषु वेदेषु गोषु विप्रेषु साधुषु ॥ धर्मे मयि च विद्वेषः स वा आशु विनश्यति ॥ २७ ॥ निर्वैराय प्रशान्ताय स्वसुताय महात्मने ॥ प्रह्लादाय यदा द्रुह्येद्धनिष्येऽपि वरोर्जितम् ॥ २८ ॥ नारद उवाच ॥ इत्युक्ता लोकगुरुणा तत्प्रणम्य दिवौकसः । न्यवर्तन्त गतोद्वेगा मेनिरे चासुरं हतम् ॥ २९ ॥ तस्य दैत्यपतेः पुत्राश्चत्वारः परमाद्भुताः ॥ प्रह्लादोऽभून्महांस्तेषां गुणैर्महदुपासकः ॥ ३० ॥ ब्रह्मण्यः शीलसंपन्नः सत्यसंधो जितेन्द्रियः । आत्मवत्सर्वभूतानामेकः प्रियसुहृत्तमः ॥३१॥ दासवत्संनतार्याङ्घ्रिः पितृवद्दीनवत्सलः ॥ भ्रातृवत्सदृशे स्निग्धो गुरुष्वीश्वरभावनः ॥ विद्यार्थरूपजन्माढ्यो मानस्तम्भविवर्जितः ॥ ३२ ॥ नोद्विग्नचित्तो व्यसनेषु निःस्पृहः श्रुतेषु दृष्टेषु गुणेष्ववस्तुदृक् ॥ दान्तेन्द्रियप्राण

भली भांति भोगता हुआभी तृप्त नहो सका ॥ १९ ॥ इस प्रकार ऐश्वर्य के मद से मत्त हुआ शास्त्र मर्यादा के उल्लघन करनेंवाले और ब्राह्मणों के शाप से जन्म पायेहुए उस दैत्यको राज्य करते बहुत समय व्यतीत होगया ॥ २० ॥ लोकपाल और समस्त लोक उसके उग्र दण्ड से व्याकुल हो अन्यत्र रक्षा न पानेसे भगवान विष्णुजी के शरणागत हुए॥२१॥ उस दिशाको शत शत प्रणाम हैं कि जहां स्वयं आत्मा हरि विराजमान हैं और निर्मल शांत सन्यासी लोग जिसे प्राप्तहोकर फिर ससार में नहीं आते ॥ २२ ॥ उन भगवन विष्णुजी की लोकपाल गण केवल वायु भक्षण करके एकाग्र चित हो निद्रा को त्यागकर उपासना करने लगे ॥२३॥ एक दिन मेघ की समान गंभीर साधुओं को अभय दान देनेंवाली आकाशवाणी दिशाओंको प्रतिध्वनित करतीहुई उनदेवताओंके कर्णगोचर हुई ॥ २४ ॥ वह आकाशवाणी यहथी कि—"हे देवताओं! तुमडरोमत तुम्हारा कल्याण होगा; क्योंकि मेरादर्शन सब प्रकारके कल्याणों का देनेवालाहै ॥२५॥ मैं दुष्टदैत्य की अधमताको जानगया हूं । मैं उसकी शांतिका यत्नकरूगा, तुम समयको देखते रहो ॥२६॥ जोमनुष्य देवता, वेद, गौ, ब्राह्मण, साधु तथा धर्म्म से और मुझसे वैरकरता है वह शीघ्रही नष्ट होजाता है ॥ २७ ॥ यद्यपि हिरण्य कशिपु ब्रह्माके वरसे बढ़ा है; तौभी जिस समय वह प्रियपुत्र, निर्वैर, प्रशांत और महात्मा प्रह्लाद पर अत्याचार करेगा तभी मैं निश्चय उसको मारूंगा ॥ २८ ॥ नारदजी बोलेकि—हे राजन् ! जगद्गुरू भगवान विष्णुजी के इस प्रकार कहनेपर स्वर्गवासी देवतागण उद्वेग रहितहो अपने २ स्थानपर आये और उस असुरको माराहुआ विचारने लगे ॥ २९ ॥ इस दैत्यराज हिरण्य काशिपु के परम अद्भुत चारपुत्र थे । उनमें से प्रह्लादगुणों में सबसे अधिक, महात्मा लोगों के भक्त; जितेन्द्रिय सुशील, ब्राह्मणों के मानने वाले और अपनी प्रतिज्ञा के पूर्ण करने वाले थे । उनको अपने आत्मा की समान सबप्राणी अतिप्यारे और अतिमित्र थे, दासोंकी समानहो महात्माओंको प्रणाम करते तथा दरिद्र व दीन जनोंपर पिताकी समान स्नेह रखते थे। वह समान आयुवालों पर स्नेह रखते, और गुरूजनोंको ईश्वर जानते थे। वह विद्या, धन, रूप और कुलीनता युक्त थे परन्तु उसके कारण वह अहङ्कार अथवा अभिमान नहीं करते थे ॥ ३०—३२ ॥ उनका चित्त

शरीरधीः सदाप्रशांतकामोरहितासुरोऽसुरः ॥ ३३ ॥ यस्मिन्महद्गुणाराजन्गृह्य न्तेकविभिर्मुहुः । नतेऽधुनापिधीयंते यथाभगवतीश्वरे ॥ ३४ ॥ यंसाधुगाथा सदसिरिपवोपिसुरानृप । प्रतिमानंप्रकुर्वंति किमुतान्येभवादृशाः ॥ ३५ ॥ गुणैरलमसंख्येयैर्माहात्म्यंतस्यसूच्यते । वासुदेवेभगवति यस्यनैसर्गिकीरतिः ॥ ३६ ॥ न्यस्तक्रीडनकोबालो जडवत्तन्मनस्तया ॥ कृष्णग्रहगृहीतात्मानवेद जगदीदृशम् ॥ ३७ ॥ आसीनः पर्यटन्नश्नञ्छयानः प्रपिबन्ब्रुवन् ॥ नानुसं धत्त एतानि गोविन्दपरिरम्भितः ॥ ३८ ॥ क्वचिद्रुदतिवैकुण्ठ चिन्ताशबल- चेतनः ॥ क्वचिद्धसतितच्चिन्ताह्लादउद्गायति क्वचित् ॥ ३९ ॥ नदतिक्वचि- दुत्कण्ठोविलज्जो नृत्यति क्वचित् ॥ क्वचित्तद्भावनायुक्तस्तन्मयोऽनुचकार ह ॥ ४० ॥ क्वचिदुत्पुलकस्तूष्णीमास्ते संस्पर्शनिर्वृतः ॥ अस्पन्दप्रणयानन्दस- लिलामीलितेक्षणः ॥४१ ॥ सउत्तमश्लोकपदारविन्दयोर्निषेवयाऽकिञ्चनसङ्गल- ब्धया ॥ तन्वन्परांनिर्वृतिमात्मनो मुहुर्दुःसङ्गदीनान्यमनः शमंव्यधात् ॥ ४२ ॥ त- स्मिन्महाभागवतेमहाभागे महात्मनि ॥ हिरण्यकशिपूराजन्नकरोदघमात्मजे । ४३। युधिष्ठिरउवाच ॥ देवर्षएतदिच्छामो वेदितुतवसुव्रत । यदात्मजायशुद्धायपिता- दात्साधवेह्यघम् ॥ ४४ ॥ पुत्रान्विप्रतिकूलान्स्वान्पितरः पुत्रवत्सलाः । उपालभन्ते

आपत्ति पड़नेपर व्याकुल नहीं होता था, वह देखे और सुनेविषयोंको मिथ्या जानते थे अतएव उनकी कामना किसी विषयमें नथी। उनके मन, प्राण, शरीर और बुद्धि सदैव शांत और वशीभूत रहतेथे। उन्हों ने असुर कुलमें जन्मतो लियाथा परन्तु उनमें कुछभी असुर भाव नहींथा ॥३३॥ हे राजन्! उनमें रहेहुये बड़े २ गुणोंको पण्डितलोग वारंवार ग्रहण करते रहते हैं तथा भगवान विष्णुजी की समान उनके वे सबगुण अबतक तिरोहित नहीं हुये हैं ॥ ३४ ॥ देवतागण शत्रुहोने परभी अपनी सभामें साधुओं की बातका प्रसंग होनेपर उनका दृष्टांत देते रहते हैं। तबफिर आप की समान दूसरे मनुष्योंकी तो कुछबातही नहीं ॥ ३५ ॥ वासुदेव भगवान में जिसकी स्वाभाविक प्रीति है, उसके गुणोंकी गणना कौनकरसकता है? मैंने तो इन वचनोंद्वारा केवल उनके माहात्म्य को दिखाया है ॥३६॥ वे बालकपन मेंही खेलछोड़कर भगवान मे एक चित्तहो जड़वत् होजाते थे उनकामन कृष्णजीमें लगगया था अतएव वह "जगत इसप्रकारका है" यह भी न जानते थे ॥ ॥ ३७ ॥ भगवान के ध्यान में मग्नहोजाने से प्रह्लादजीको बैठते, उठते, चलते, भोजनपान क- रते, सोते तथा बातें करने के समयमें भी उनकर्मोंका ज्ञाननहीं रहताथा ॥ ३८ ॥ वे भगवान का ध्यान करते २ कभी रोते कभी हँसते, कभी गानकरते और कभी बड़ाभारी शब्द करते थे ॥ ॥ ३९ ॥ कभी तो निर्लज्ज होकर नाचते रहते, कभी भगवानकी भावना में चित्तलगाय तन्मयहो उनका अनुकरण (नकलउतारना) करने लगजाते थे ॥ ४० ॥ कभी भगवद्भाव के प्राप्त होने से रोमांचितहो आनेपर बैठ जाते, कभी २ भगवत् प्रेमसे उनके दोनोंनेत्र आनंदाश्रुओं से सजल होजाते तबवे अपने नेत्रकुछ एक बंद करलेतेथे॥४१॥हे राजन्! महात्मा प्राह्लाद, अकिंचन भग- वद्भक्त साधुओं के संगसे पुण्यश्लोक भगवान के चरणों की सेवाकर अपने मनको परम शांतिदे दुःसग, दरिद्री और दूसरे मनुष्यों के मनको भी शांतिदेते थे ॥ ४२ ॥ उस महाभाग, महात्मा, परमभागवत पुत्रसे भी वह हिरण्यकशिपु द्वेष करनेलगा ॥ ४३ ॥ युधिष्ठिरजी बोलेकि–हे देवर्षि! हे सुव्रत! हिरण्यकशिपु ने पिता होकर ऐसे निर्मल चित्तसाधु पुत्रपर अत्याचार किया था,–इस विषयको आपसे जानने की बड़ी इच्छाहै ॥ ४४ ॥ पुत्रपर प्रेम रखने वालेपिता, प्रतिकूल पुत्रको

शिक्षार्थे नैवायमपरोयथा ॥ ४५ ॥ किमुतानुवशान्साधूं स्त्वादृशांगुरुदेवतान् ॥ एतत्कौतूहलं ब्रह्मन्नस्माकं विधमप्रभो । पितुःपुत्राययद्वेषो मरणायप्रयोजितः ४६ ॥

इतिश्रीमद्भा० महा० सप्त० चतुर्थोऽध्यायः ॥ ४ ॥

नारदउवाच ॥ पौरोहित्याय भगवान्वृतःकाव्यःकिलासुरैः । शण्डामर्कौसुतौ तस्य दैत्यराजगृहांतिके ॥ १ ॥ तौराज्ञाप्रापितंबालं प्रह्लादंनयकोविदम् । पाठयामासतुःपाठ्यानन्यांश्चासुरबालकान् ॥ २ ॥ यत्तत्रगुरुणाप्रोक्तं शुश्रुवेऽनुपपाठच । न साधुमनसामेने स्वपरासद्ग्रहाश्रयम् ॥ ३ ॥ एकदाऽसुरराट्पुत्रमंकमारोप्यपांडव । पप्रच्छकथ्यतांवत्स मन्यतेसाधुयद्भवान् ॥ ४ ॥ प्रह्लादउवाच । तत्साधुमन्येऽसुरवर्यदेहिनांसदा समुद्विग्नधियामसद्ग्रहात् । हित्वाऽऽत्मपातं गृहमन्धकूपं वनगतो यद्धरिमाश्रयेत ॥ ५ ॥ नारदउवाच ॥ श्रुत्वापुत्रगिरोदैत्यःपरपक्षसमाहिताः जहासबुद्धिर्बालानां भिद्यतेपरबुद्धिभिः ॥६॥ सम्यग्विधार्यतांबालो गुरुगेहेद्विजातिभिः । विष्णुपक्षैःप्रतिच्छन्नैर्नभिद्येतास्यधीर्यथा ॥ ७ ॥ गृहमानीतमाहूय प्रह्लादं दैत्ययाजकाः । प्रशस्यश्लक्ष्णयावाचा समपृच्छन्तसामभिः ॥८॥ वत्सप्रह्लादभद्रं तेसत्यंकथयमामृषा । बालानतिकुतस्तुभ्यमेषबुद्धिविपर्ययः ॥ ९ ॥ बुद्धिभेदःपरकृतउताहोतेस्वतोऽभवत् । भण्यतांश्रोतुकामानां गुरूणांकुलनन्दन ॥ १० ॥ प्रह्लाद

भी शिक्षाही के निमित्त ताडना करते रहते हैं, परन्तु शत्रुकी समानतो उससे कुबर्ताव कभी नहीं करते ॥ ४५ ॥ फिर अनुकूल रहने वालेसाधू तथा पितृभक्त पुत्रोंपर हिंसाचरण करना संभव नहीं होसकता। हे ब्रह्मन्! पुत्रपर पिताका ऐसा मारात्मक द्वेषकभी नहीं सुनागया; यह सुनकर मुझको बड़ा कौतूहल उत्पन्न होता है । हे ऋषि! आपमेरे इस कौतूहल कोशांत करिएगा ॥४६॥

इति श्रीमद्भागवतेमहापुराणेसप्तमस्कन्धेसरलाभाषाटीकायांचतुर्थोऽध्यायः ॥ ४ ॥

नारदजी बोलेकि-हे राजन्! सब असुरों ने भगवान शुक्राचार्यको अपना पुरोहित किया था, इसीकारण इन आचार्य के षंड और अमर्क नामकदो पुत्रभी दैत्यराज हिरण्यकशिपु के घरके निकट बासकरते थे ॥ १ ॥ दैत्यराजने नीति जानने वाले प्रह्लादको उनके निकट पढ़नेको भेजा था । इससे वे प्रह्लादको तथा और दूसरे लडकों को पढ़ाते थे ॥२॥ गुरूजी जो २ उपदेश करते, प्रह्लाद यद्यपि वह सुनने और सुनकर वैसाही पाठ करते थे, परन्तु जिस २ शास्त्रको पढ़ने थ उसको "यह मैं, यह मेरा, यह पराया" इनशब्दो से परिपूर्ण देखभक्ति पूर्वक न पढ़ते तथा वे सब शास्त्र उनको अच्छे भी नही लगते थे ॥ ३ ॥ हे राजन्! एकदिन दैत्यराज ने अपने पुत्रको गोदमें लेकर पूछाकि-हे वत्स तुझकौन वस्तु उत्तम जानपड़ती है सो मुझसे कहो ॥ ४ ॥ तब प्रह्लाद ने कहा कि हे दैत्येश्वर! मनुष्यों की बुद्धि, 'मैं, मेरा' इत्यादि मिथ्या विषयों के अनुराग से सदैवही व्याकुल रहती है अतएव आत्माको नरकमें गिरनेका कारण अंधकूप की समानघर छोड़कर बनमें जाय भगवान हरिकी शरण लेने हीको मैं उत्तम जानता हू ॥ ५ ॥ नारदजी ने कहाकि-हिरण्यकशिपु पुत्रके मुखसे अपने शत्रु विष्णुजीपर भक्ति प्रकाशक बातेंसुन हंसकर कहने लगाकि-बालकों की बुद्धि इसी भांति दूसरों की बुद्धिसे नष्ट होजाती है इसलिये ॥ ६ ॥ इस बालक कोफिर गुरूके घर लेजाओ, पुरोहित जी इसकी यत्न पूर्वक रक्षाकरें जिससे कि कोई बैष्णव वेष बदल घरमें प्रवेश करके इसकी बुद्धिमें भेद उत्पन्न नहीं करसके ॥ ७ ॥ फिर प्रह्लादगुरू के घरमें गये, दैत्यराज पुरोहित ने प्रह्लादकी प्रशंसा करकेकहा कि ॥ ८ ॥ हे वत्सप्रह्लाद! तेरा कल्याणहो; सत्यकहु मिथ्यानकहना कि-ऐसी उलटी बुद्धि इन सब बालकों कीतो नहीं हुई फिर तेरी बुद्धि ऐसी क्यों होगई? ॥ ९ ॥ हे कुलनन्दन! तेरी यह बुद्धि किसी दूसरे ने फेरदी है या स्वयंही ऐसी होगई है?

वाच । स्वःपरश्चेत्यसद्ग्राहःपुंसांयन्मायया कृतः विमोहितधियांदृष्टस्तस्मैभगव तेनमः ॥११॥ सयदाऽनुव्रतःपुंसां पशुबुद्धिर्विभिद्यते । अन्यएषतथाऽन्योऽहमिति भेदगताऽसती ॥१२॥ सएषआत्मा स्वपरेत्यबुद्धिभिर्दुरत्ययानुक्रमणो निरूप्यते । मुह्यन्तियद्वर्त्मनिवेदवादिनो ब्रह्मादयोह्येषभिनत्तिमेमतिम् ॥१३॥ यथाभ्राम्यत्ययो ब्रह्मन्स्वयमाकर्षसन्निधौ तथामेभिद्यते चेतश्चक्रपाणेर्यदृच्छया ॥ १४ ॥ नारदउ वाच । एतावद्ब्राह्मणायोक्त्वा विरराममहामतिः। तंनिर्भर्त्स्याथकुपितःसुदीनोराज सेवकः ॥ १५ ॥ आनीयतामरे वेत्रमस्माकमयशस्करः । कुलाङ्गारस्यदुर्बुद्धेश्चतु र्थोऽस्योदितोदमः ॥ १६ ॥ दैत्येयचन्दनवने जातोऽयंकण्टकद्रुमः । यन्मूलोन्मूल परशोर्विष्णोर्नालायितोऽर्भकः ॥ १७ ॥ इतितंविविधोपायैः भीषयस्तर्जनादिभिः । प्रह्लादंग्राहयामास त्रिवर्गस्योपपादनम् ॥ १८ ॥ ततएनंगुरुर्ज्ञात्वा ज्ञातज्ञेय चतुष्टयम् । दैत्येंद्रंदर्शयामास मातृमृष्टमलंकृतम् ॥ १९ ॥ पादयोः पतितं बालंप्रतिनन्द्याशिषाऽसुरः ॥ परिष्वज्यचिरंदोर्भ्यां परमामापनिर्वृतिम् ॥ २० ॥ आ- रोप्याङ्कमवघ्रायमूर्धन्यश्रुकलाम्बुभिः ॥ आसिञ्चन्विकसद्वक्त्रमिदमाहयुधिष्ठि- र ॥ २१ ॥ हिरण्यकशिपुरुवाच ॥ प्रह्लादानूच्यतांतातस्वधीतं किंचिदुत्तमम् ॥ कालेनैतावताऽऽयुष्मन्यदशिक्षद्गुरोर्भवान् ॥ २२॥ प्रह्लाद उवाच ॥ श्रवणंकीर्तनं

हम जो तेरे गुरू हैं उनको इसबातके सुनने की इच्छा है; सो हमसे सत्य सत्य कह ॥ १० ॥ प्र- ह्लादजी बोलेकि-जिसकी मायासे मनुष्यों को "यह मेरा, यहपराया" इस प्रकारका मिथ्याज्ञान उत्पन्न होता है उस मायाके ईशको मैं नमस्कार करताहूं ॥ ११ ॥ वे जब मनुष्यों पर प्रसन्न होते हैं तब उन पुरुषोंकी पशुबुद्धिदूर होजाती है और वे आत्म ज्ञानको प्राप्तहोते हैं ॥ १२ ॥ अविवेकी मनुष्य परमात्माको "अपना व पराया" कहा करते हैं। परन्तु भगवान्को इसभांति अपना व पराया विचारना उनके पक्षमें असगत नहीं है क्योंकि उनके जानने में ब्रह्माआदि वेदवादी भी मोहित होजाते हैं । उन्ही भगवान ने मेरीबुद्धि में भेद करादिया ॥ १३ ॥ हे ब्राह्मणो ! यद्यपि वे निर्विकार हैं— किसी की बुद्धिमें भेदनही करते तथापि लोहा जैसे चुम्बकपत्थर के निकट आपही आप घूमाकरता है तैसेही भगवानकी इच्छानुसार मेराचित्त ऐसे भेदको प्राप्तहुआ है ॥ १४ ॥ नारदजी बोलेकि— महामति प्रह्लाद इतना कहकर चुपहोगये। तब यह सुनकर शिक्षक क्रोधाग्नि प्रज्वलितहो अत्यंत तिरस्कार पूर्वक कहने लगाकि ॥ १५ ॥ अरे ! बेंतलाओ; मेराअयश करनेवाले इस दुर्बुद्धि कुलाङ्गार को दैहिक दण्डही उचित है ॥ १६ ॥ दैत्य वंशरूपी चंदन वनमें यह बालक कंटक वृक्षरूपी उत्पन्न हुआ है, इस वनके काटने के विषय में हरिही कुठार स्वरूप हैं और यह उस कुठारका दण्डस्वरूप हुआ है ॥ १७ ॥ गुरूजी ने इसप्रकार से तिरस्कारादि द्वारा भय दिखाकर प्रह्लादको धर्म, अर्थ और काम संबंधी शास्त्र पढ़ाये ॥ १८ ॥ तदनंतर गुरूजी ने जब जानाकि-यह बालक सामदाम आदिचारों विषयोंको जानगया है तब उसको राजभवन में लेगये। वहां प्रह्लादकी माताने प्रह्लाद को उबटन आदिकर स्नानकराय आभूषण पहिनाये तब आचार्य जी उनको दैत्य पतिके निकट लेगये ॥ १९ ॥ पिताके सन्मुख खडेहोकर प्रह्लादजी प्रणाम के निमित्त चरणों परगिरे, दैत्यपति ने आशीर्वाद दे दोनो भुजाओं से मिलपरम सुखका अनुभव किया ॥ २० ॥ हे राजन् ! फिर दैत्यपतिने प्रह्लादको गोदमें ले मस्तक सूंघ, अश्रुजल से सींचत २ प्रह्लाद से हसकर कहाकि— ॥ २१ ॥ हे आयुष्मन् ! प्रह्लाद ! आजतक गुरुके घरमें रहकर जोकुछ तुमने पढ़ाहो,उसमें जो विषय तुमको अच्छा आताहो सामुझे सनाओ ॥ २२ ॥ प्रह्लादजी बोलेकि हे पिता ! भगवान्की

विष्णोः स्मरणंपादसेवनम् । अर्चनंवन्दनंदास्यं सख्यमात्मनिवेदनम् ॥ २३ ॥ इति पुंसार्पिताविष्णौ भक्तिश्चेन्नवलक्षणा । क्रियते भगवत्यद्धा तन्मन्येऽधीतमुत्तमम् ॥ २४ ॥ निशम्यैतत्सुतवचोहिरण्यकशिपुस्तदा । गुरुपुत्रमुवाचेदंरुषा प्रस्फुरिताधरः ॥ २५ ॥ ब्रह्मबन्धोकिमेतत्तेविपक्षं श्रयताऽसता । असारंग्राहितोबालो मामनादृत्यदुर्मते ॥ २६ ॥ सन्तिह्यसाधवोलोके दुर्मैत्राश्छद्मवेषिणः । तेषामुदेत्यघं कालेरोगः पातकिनामिव ॥ २७ ॥ गुरुपुत्र उवाच ॥ न मत्प्रणीतंनपरप्रणीतं सुतो वदत्येषतवेन्द्रशत्रो । नैसर्गिकीयं मतिरस्य राजन्नियच्छमन्युं कददाः स्म मा नः ॥ २८ ॥ नारद उवाच ॥ गुरुणैवंप्रतिप्रोक्तोभूयआहासुरः सुतम् । नचेद्गुरुमुखीयंतेकुतोऽभद्राऽसतीमतिः ॥ २९ ॥ प्रह्लाद उवाच ॥ मतिर्नकृष्णेपरतः स्वतो वामिथोभिपद्येत गृहव्रतानाम् । अदान्तगोभिर्विशतां तमिस्रं पुनः पुनश्चर्वितचर्वणानाम् ॥ ३० ॥ नतेविदुः स्वार्थगतिंहि विष्णुंदुराशयाये बहिरर्थमानिनः । अन्धा यथान्धैरुपनीयमाना वाचीशतन्त्यामुरुदाम्निबद्धाः ॥ ३१ ॥ नैषांमतिस्तावदुरुक्रमांघ्रिं स्पृशत्यनर्थापगमोयदर्थः । महीयसांपादरजोभिषेकं निष्किञ्चनानां नवृणीतयावत् ॥ ३२ ॥ इत्युक्त्वोपरतंपुत्रं हिरण्यकशिपूरुषा । अन्धीकृतात्मास्वोत्सङ्गान्निरस्यतमहीतले ॥ ३३ ॥ आहामर्षरुषाविष्टः कषायीभूतलोचनः । वध्यतामाश्व

कथाका श्रवण, कीर्त्तन, स्मरण, पादसेवन, अर्चन, वंदन, दास्यभाव, मित्रभाव, तथा आत्मनिवेदन इन नवलक्षणों वालीभक्ति से मनुष्य यदि कार्यकर भगवान विष्णुके समर्पण करेतो, मैं जानता हूं कि वही उत्तम शिक्षा है ॥ २३ । २४ ॥ हिरण्यकशिपु पुत्रकी यह वार्त्ता सुनतेही क्रोधके वेगसे कम्पिताधरहो गुरुपुत्र से कहनेलगा कि ॥ २५ ॥ रेदुर्मति ब्राह्मणाधम ! यह क्या ! मेरानिरादर करमेरे शत्रुका आश्रय ग्रहण करके इस बालकको ऐसी बुरीशिक्षा तूने क्योंदी ॥ २६ ॥ लोकमें अनेक असाधू कपट वेशधारण करके मित्रहोजाते हैं परन्तु पापीके रोगकी समान उनका विद्रूपादि अवसर आनेपर खुलजाता है ॥ २७ ॥ गुरूपुत्रने कहाकि हे इन्द्रशत्रो ! यह आपका पुत्रजोकुछ कहता है उसको नतो मैंने सिखाया है और न किसी दूसरेही ने सिखाया है । राजन् ! यह इस की स्वाभाविकही बुद्धि है; अतएव क्रोधको शांतकरो, मेरेऊपर व्यर्थदोष मतलगाओ ॥ २८ ॥ नारदजी बोलेकि गुरूपुत्रके इसभांति उत्तर देनेपर असुरराजने फिरपुत्र से पूछाकि रेदुर्विनीत ! तेरीऐसी विपरीत बुद्धि गुरूके उपदेश से नहीं हुईतो कहांसे आई ॥ २९ ॥ प्रह्लादजी बोलेकि ! हे तात ! गृहासक्त मनुष्यों की बुद्धि नतो आप न किसी दूसरे के उपदेश से तथा न परस्परकी बातोंसे किसी भांति भी भगवान में आसक्त नहीं होती है वे अजितेन्द्रिय होते हैं इस लिय फिरफिर संसार में आय २ कर चबाये हुयेका चबाते रहते हैं अर्थात् भोगे विषयोंको फिरफिर भोगते हैं ॥ ३० ॥ जिसका अन्तःकरण विषयों में आसक्त है वह भगवान विष्णुको नहीं जानसकता । जिस की आत्मा में पुरूषार्थ बुद्धि है भगवान केवल उसीको प्राप्तहोते हैं। जैसे एक अंधा मनुष्य दूसरे अंधे मनुष्यको राहनहीं दिखासकता वैसेही विषयासक्त मनुष्य विषयासक्त गुरूके समीप उपदेश पाकर भगवानको नहीं जानसकता ॥ ३१ ॥ बहुत से सूत्रोंसे बनीहुई ईश्वरकी वेदरूपी दीर्घरस्सी— कर्मजाल से उनको बांधती है, जबतक विषय अभिमानों से रहित अति प्रधान पुरुषों की चरण रजद्वारा वह अभिषिक्त नहीं होते तबतक भगवान के चरणोंका स्पर्श नहीं करसकते कि जिस स्पर्श से यह संसार रूप अनर्थ नाश होजाता है ॥ ३२ ॥ प्रह्लाद इसभांति कहकर चुपहोगये, हिरण्यकशिपु ने क्रोधान्धहो गोदमें से उन्हें पृथ्वीपर पटकदिया ॥ ३३ ॥ और क्रोधसे अधीरहो लाल

यंवध्योनिःसार्यतनैर्ऋताः॥३४॥अयंमेभ्रातृहासोऽयंहित्वास्वान्सुहृदोऽधमः।पितृव्यहन्तुर्यःपादौ विष्णोर्दासवदर्चति ॥ ३५ ॥ विष्णोर्वासाध्वसौकिंनु करिष्यत्यसमंजसः। सौहृदंदुस्त्यजंपित्रोरहाद्यःपंचहायनः ॥ ३६ ॥ परोऽप्यपत्यंहितकृद्यथौषधं स्वदेहजोप्यामयवत्सुतोऽहितः। छिंद्यात्तदंगंयदुतात्मनोऽहितं शेषंसुखंजीवितियद्विवर्जनात् ॥३७॥ सर्वैरुपायैर्हंतव्यः संभोजशयनासनैः सुहृल्लिंगधरःशत्रुर्मुनेर्दुष्टमिवेंद्रियम् ॥ ३८ ॥ नैर्ऋतास्तेसमादिष्टा भर्त्रावैशूलपाणयः। तिग्मदंष्ट्रकरालास्यास्ताम्रश्मश्रुशिरोरुहाः ॥ ३९ ॥ नदन्तोभैरवान्नादांछिंधिभिन्धीतिवादिनः। आसीनंचाहनञ्छूलैः प्रह्लादंसर्वमर्मसु ॥ ४० ॥ परेब्रह्मण्यनिर्देश्येभगवत्यखिलात्मनि। युक्तात्मन्यफलाआसन्नपुण्यस्येवसत्क्रियाः॥ ४१ ॥ प्रयासेऽपहतेतस्मिन्दैत्येन्द्रः परिशंकितः। चकारतद्वधोपायान्निर्बन्धेनयुधिष्ठिर ॥४२॥ दिग्गजैर्दन्दशूकैश्च अभिचारावपातनैः। मायाभिःसंनिरोधैश्च गरदानैरभोजनैः ॥ ४३ ॥ हिमवाय्वग्निसलिलैः पर्वताक्रमणैरपि । नशशाकयदाहन्तुमपापमसुरःसुतम्। चिंतांदीर्घतमांप्राप्तस्तत्कर्तुं नाभ्यपद्यत ॥४४॥ एषमेबह्वसाधूक्तो वधोपायाश्चनिर्मिताः। तैस्तैर्द्रोहैरसद्धर्मैर्मुक्तःस्वेनैवतेजसा॥४५॥ वर्तमानोऽविदूरेवैबालोप्यजड

नेत्रकर कहने लगाकि—हे असुरों ! इस मारने योग्यको शीघ्रही मारो, इसको यहां से शीघ्रदूर करदो ॥ ३४ ॥ यहीदुष्ट मेरे भाईका मारने वाला है क्योंकि यह अपने सुहृदों को छोड़कर, दास की समान अपने चचाके मारने वाले विष्णुके चरणों की पूजाकरता है ॥ ३५ ॥ कैसा आश्चर्य है ! यह दुष्ट विष्णुहीका क्या भलाकरेगा ? इस दुरात्माने पांचवर्षकीही अवस्था में दुस्त्यज माता पिताके स्नेहको छोड़दिया है ॥ ३६ ॥ औषधकी समान शत्रुभी यदि हितकारी हो तो उसको पुत्र कहाजासकताहै; परन्तु आत्मासे उत्पन्नहुआ अपना पुत्रभी यदि प्रतिकूल व्यौहारकरे तो रोगकी समान वह शत्रुहै। अपने अहितकर अंगको काटडालनाही ठीकहै, क्योंकि उसके त्याग देनेसे शेष अंग तो सुखसे जीवन धारण करसकताहै ॥ ३७ ॥ अतएव भोजन, शयन, आसन आदि कार्योंमें मारणोपाय द्वारा मुनिकी दुष्ट इन्द्रियकी समान इस मित्र वेशधारी शत्रुका वधकरो ॥ ३८ ॥ असुरलोग स्वामीकी ऐसी आज्ञापाय हाथ में शूलले भयकर नादकर 'मार, मार' ऐसे कहतेहुए वहां बैठेहुए प्रह्लादके मर्मस्थानोंमें शूलद्वारा प्रहार करनेलगे। उनकी दाढ़ें अत्यन्त तीक्ष्ण, मुख विकराल, मूंछें और बाल ताम्रवर्णके थे ॥ ३९ । ४० ॥ परन्तु प्रह्लादका चित्त भगवानमें लगाहुआथा इसकारण वे समस्तप्रहार मंदभागी मनुष्यके बडे उद्यमकीनाईं व्यर्थ होगये क्योंकि ईश्वरतो विकार रहित, शब्दादिद्वारा अनिर्देश्य, सर्वोत्कृष्ट ऐश्वर्ययुक्त और सबके नियन्ताहैं; उनमें जिसका चित्त लगारहताहै अन्य विषय उसका स्पर्श नहीं करसकते४१॥ हे युधिष्ठिर! दैत्योंके यह सबप्रयत्न निष्फलहोनेपर हिरण्यकशिपुको अत्यन्त शंका उत्पन्नहुई अत एव वह बडे ध्यानसे प्रह्लादके बधका उपाय सोचनलगा॥ ४२ ॥ मत्तहाथी, महासर्प अभिचार के प्रयोग, पहाड़की शिखाओंपर से गिराना, कूए गढे आदिमें बन्दकरना, विष प्रयोग, भोजन करनेको न देना ॥ ४३ ॥ वर्फ, वायु, अग्नि, जल और पर्वत आदिसे गिराना, ऐसे २ उपायों द्वारा जब असुर निष्पापपुत्रको न मारसका तो बड़ी चिन्ता करताहुआ पुनर्वार बधका उपाय न करसका ॥ ४४ ॥ और मनर में कहने लगा कि इसको बड़ेर कटुवाक्य कहे तथा इसके मारने के नाना उपायभी किये परन्तु यह अपने तेजके प्रभावसे उन सबसे छुटकारा पागया ॥ ४५ ॥ कैसा आश्चर्य है ! यह मेरेसमीप रहकरभी तथा पुत्रहोकर ऐसा निर्भय चित्त है, प्रभु शुनःशेफ

घोरयम् । नविस्मरतिमेनार्यैशुनःशेपइवप्रभुः ॥ ४६ ॥ अप्रमेयाऽनुभावोऽयमकुत श्चिद्भयोऽमरः । नूनमेतद्विरोधेनमृत्युर्मेभवितानवा॥४७॥इतितंचिंतयाकिंचिन्म्ला नश्रियमधोमुखम् । शण्डामर्कावौशनसौ विविक्तइतिहोचतुः ॥ ४८॥ जितत्वयै केनजगत्त्रयं भ्रुवोर्विजृम्भणत्रस्तसमस्तधिष्ण्यपम् । नतस्यचिन्त्यंतवनाथ चक्ष्महे नवैशिशूनां गुणदोषयोःपदम् ॥ ४८ ॥ इमंतुपाशैर्वरुणस्यबद्ध्वा निधेहिभीतोनप लायतेयथा । बुद्धिश्चपुंसोवयसार्यसेवया यावद्गुरुर्भार्गवआगमिष्यति ॥ ५० ॥ तथेतिगुरुपुत्रोक्तमनुज्ञायेदमब्रवीत् । धर्मोह्यस्योपदेष्टव्योराज्ञांयेगृहमेधिनाम् ५१ ॥ धर्ममर्थंचकामंच नितरांचानुपूर्वशः । प्रह्रादायोचतूराजन् प्रश्रतावनतायच ५२ ॥ यथात्रिवर्गंगुरुभिरात्मनेउपशिक्षितम् । नसाधुमेनेतच्छिक्षां द्वन्द्वारामोपवर्णिताम् ॥ ५३ ॥ यदाचार्यःपरावृत्तो गृहमेधीयकर्मसु । वयस्यैर्बालकैस्तत्र सोपहूतःकृतक्ष णैः ॥ ५४ ॥ अथतान्श्लक्ष्णयावाचा प्रत्याहूयमहाबुधः । उवाचविद्वांस्तन्निष्ठांकृ पयाप्रहसन्निव ॥५५॥ तेतुतद्गौरवात्सर्वे त्यक्तक्रीडापरिच्छदाः । बालानदूषित धियोद्वन्द्वारामेरितेहितैः ५६ ॥ पर्युपासतराजेन्द्र तन्नयस्तहृदयेक्षणाः। तानाहकरुणो मैत्रोमहाभागवतोऽसुरः ॥ ५७ ॥

इतिश्रीमद्भा० महा० सप्त० पंचमोऽध्यायः ॥ ५ ॥

जैसे पिताके कियेहुए अन्यायाचरणसे विस्मृत नहीं हुए यहभी उसीभांति मेरे अन्यायाचरण से विस्मृत नहीं हुआ ॥ ४६ ॥ परन्तु इसका प्रभाव अनूठा कुछभी इसको भय नहीं हुआ । यह अमर है , इसके साथ शत्रुताहोनेसे मेरीमृत्यु निश्चयही होगी, और दूसरेप्रकारसे मेरी मृत्यु न होगी ॥ ४७ ॥ इसभांति विचार करताहुआ हिरण्यकशिपु कुछ मलिनताहो नीचेको मुख करके बैठरहा । तब शुक्राचार्यके शंड और अमर्क नामक पुत्रोंने उससे एकान्तमें कहा—कि ॥ ४८ ॥ हे नाथ ! आपनेतो अकेलेही त्रिभुवनको जीतलियाहै, आपकी टेढ़ी भौंहके देखतेही सबलोकपाल भयमान होजाते हैं, इसतो आपकी चिंताका विषय कुछभी नहीं देखते, बालकों के व्यवहारपर गुण दोषका विचार नहीं होता ॥ ४९ ॥ जबतक शुक्राचार्य न आवें, तबतक इसको वरुणपाश से बांधरखिये; जिससे भयभीत होकर भाग न सके । अवस्था और साधुसेवासे मनुष्यों की बुद्धि सुधरजाती है । इस हेतु शुक्राचार्य के आनेकी राह देखिये ॥५०॥ हिरण्यकशिपु ने 'अच्छा' कह गुरुपुत्रकी बातको स्वीकार करके कहा कि आप इसको गृहस्थ राजाओंके धर्मका उपदेश दो ॥ ५१ ॥ हे राजन् ! इसके उपरांत शंडामर्क विनीत नम्रतायुक्त प्रह्लादको यथा क्रमसे धर्म, अर्थ और कामके विषय पढाने लगे ॥ ५२ ॥ प्रह्लादभी ध्यानपूर्वक अत्यन्त विनीत भावसे उस सबको सुननेलगे, परन्तु विषयानुरक्त गुरुके उपदेशसे उनका चित्त प्रसन्न न हुआ और न उस पर उनकी भक्तिही उत्पन्नहुई ॥ ५३ ॥ इसभांति कुछ दिनोंके व्यतीत होनेपर एकदिन जब गुरू सांसारिक कामोंके कारण पाठशालासे दूसरेस्थानको गये तब समान वयवाले बालकों ने खेलनेका अवसर पाय प्रह्लादको बुलाया ॥ ५४ ॥ महाज्ञानी प्रह्लादने मधुरवाक्यों द्वारा उनसे वार्तालाप किया और इस संसारका परिणाम उनको कृपापूर्वक हँसत२ समझाया ॥ ५५ ॥ उन बालकोंने उनकाप्रभाव समझ अपनाखेलना छोडदिया । हे राजेन्द्र ! बालकोंका चित्त अत्यन्त सरल किसी प्रकार के दोषसे दूषित नहीं होता । वे एकाग्रचित्तहो प्रह्लादकी बातें सुननेलगे , परमभागवत दयालु प्रह्लादजी भी उनको उपदेश देनेलगे ॥ ५६ । ५७ ॥

इतिश्री मद्भाग० महा० सप्तमस्कन्धे सरलाभाषाटीकायां पंचमोऽध्यायः ॥ ५ ॥

प्रह्लाद उवाच ॥ कौमारआचरेत्प्राज्ञोधर्मान् भागवतानिह ॥ दुर्लभंमानुषं जन्मतद- प्यध्रुवमर्थदम् ॥ १ ॥ यथाहिपुरुषस्येहविष्णोः पादोपसर्पणम् ॥ यदेषसर्वभूता- नांप्रियआत्मेश्वरःसुहृत् ॥ २ ॥ सुखमैन्द्रियकंदैत्यादेहयोगेन देहिनाम् ॥ सर्वत्रल- भ्यतेदैवाद्यथादुःखमयत्नतः ॥ ३ ॥ तत्प्रयासोनकर्तव्योयतआयुर्व्ययःपरम् । नतथा विन्दतेक्षेममुकुन्दचरणाम्बुजम् ॥ ४ ॥ ततोयतेतकुशलः क्षेमायभयमाश्रितः । शा- रीरंपौरुषंयावन्नविपद्येतपुष्कलम् ॥ ५ ॥ पुंसोवर्षशतंह्यायुस्तदर्धंचाजितात्मनः । निष्फलंयदसौरात्र्यांशेतेऽन्धंप्रापितस्तमः ॥ ६ ॥ मुग्धस्य बाल्ये कौमारे क्रीडतो यातिविंशतिः । जरयाग्रस्तदेहस्ययात्यकल्पस्यविंशतिः ॥ ७ ॥ दुरापूरेणकामेन मोहेनचबलीयसा । शेषंगृहेषुसक्तस्यप्रमत्तस्यापयातिहि ॥ ८ ॥ कोगृहेषुपुमान् सक्तमात्मानमजितेन्द्रियः । स्नेहपाशैर्दृढैर्बद्धमुत्सहेतविमोचितुम् ॥ ९ ॥ कोन्वर्थ- तृष्णांविसृजेत्प्राणेभ्योऽपियईप्सितः । यंक्रीणात्यसुभिःप्रेष्ठैस्तस्करःसेवको वणि- क् ॥ १० ॥ कथंप्रियायाअनुकम्पितायाः सङ्गंरहस्यंरुचिरांश्च मन्त्रान् । सुहृत्सुच स्नेहसितः शिशूनांकलाक्षराणामनुरक्तचित्तः ॥ ११ ॥ पुत्रान्स्मरंस्ताुदुहितॄर्हृदय्या भ्रातॄन्स्वसॄर्वापितरौचदीनौ । गृहान्मनोज्ञोरुपरिच्छदांश्च वृत्तीश्चकुल्याः पशुभृत्य- वर्गान् ॥ १२ ॥ त्यजेतकोशस्कृदिवेहमानः कर्माणिलोभादवितृप्तकामः । औप- स्थ्यजैह्व्यंबहुमन्यमानः कथंविरज्येतदुरन्तमोहः ॥ १३ ॥ कुटुम्बपोषाय वियन्नि-

प्रह्लादजी बोले कि हे मित्रो ! मनुष्य जन्म मिलना अत्यन्तही दुर्लभ है सह मनुष्य जन्म में बाल्या वस्थासेही बुद्धिमान मनुष्य को भागवत धर्म का अनुष्ठान करना उचित है क्योंकि हमलोगों के आयुकी भी कुछ स्थिरता नहीं है ॥ १ ॥ अतएव इसी जन्म में महापुरुष भगवान विष्णु के च- रणों की आराधना करना चाहिये क्यों कि वह सब प्राणियों के प्रिय आत्मा, ईश्वर और सुहृद हैं ॥ २ ॥ हे दैत्यों ! विषय सुख किसी देह के सम्बन्ध होने से प्रारब्ध वश दुःखकी समान स्वयंही प्राप्त होजाते हैं ॥ ३ ॥ उनके हेतु यत्न करना अनुचित है उनसे वृथाही आयु नष्ट होती है तथा भगवान के चरण कमल के सेवन से जो कल्याण प्राप्त होता है विषय भोग से उतना सुख कभीभी नहीं प्राप्त होसकता ॥ ४ ॥ इस लिये मनुष्य जन्म पाकर जितनें दिन शरीर मे बलरहे उतने दिन कल्याण की कामना अवश्य करना चाहिये ॥ ५ ॥ पुरुष की परमायु केवल सौ वर्षकी है परन्तु अ- जितेन्द्रिय मनुष्य की आयु इससे भी आधी है क्यों कि वह रात्रि को अंधकार में घिरकर निष्फल सोतारहता है ॥ ६ ॥ उस आधी परमायु में मे वीस वर्ष तो बालपन और कैशोर अवस्थाकी क्रीडा में व्यतीत होजाते हैं, फिर जरा ग्रस्त होकर अशक्त दशामें वीस वर्ष बीतजाते हैं ॥ ७ ॥ दुःखसे भरे हुए काम तथा प्रबल मोहसे गृहासक्त अवस्थामें असावधान रहतेहुए मनुष्यकी शेष आयु नष्ट होजा ती है ॥ ८ ॥ कौन अजितेन्द्रिय मनुष्य गृहासक्त हो दृढ स्नेह पाश को काट अपनें को मुक्त करस कता है ॥ ९ ॥ प्राणों सेभी प्यारे धन की लालसाको कौन परित्याग करसकता है चोर, सेवक और वणिक् प्राण हानिको स्वीकार करकेभी धन उत्पन्न करते हैं ॥ १० ॥ प्यारी स्त्री के साथ एकांत में निवास करनेसे उसकी मनोहर बातें सुनेसे बंधुओं के स्नेह बंधनसे तथा तोतली बातें करने वाले बालकों के संग से अनुरक्त चित्त मनुष्य इन सबका स्मरणकर किस भांति इन सबको छोड सकताहै ॥ ११ ॥ पुत्र, कलत्र, भ्राता, भगिनी, वृद्धपिता, माता, सुंदरघर, पिताकी सम्पत्ति, घर मे पलेहुए पशु, और सेवकों का स्मरण करके कौन मनुष्य इन सबको भूल सकता है ? ॥ १२ ॥ जैसे कोश स्कृत कीडा अपना वासस्थान बनाकर अपनें बाहर निकलने के निमित्त द्वार नहीं रखता तैसेही विषयासक्त मनुष्य अपूर्ण कामहो लोभ वश निरंतर कर्मों हीमें घिरारहता है उपस्थ और जिह्वा के

आयुर्नबुध्यतेऽर्थंविहतंप्रमत्तः । सर्वत्रतापत्रयदुःखितात्मानिर्विद्यतेनस्वकुटुम्बरामः ॥ १४ ॥ वित्तेषुनित्याभिनिविष्टचेता विद्वांश्चदोषंपरवित्तहर्तुः । प्रेत्येहचाथाप्यजितेन्द्रियस्तदशान्तकामोहरतेकुटुम्बी ॥ १५ ॥ विद्वानपीत्थंदनुजाः कुटुम्बंपुष्णन् स्वलोकायनकल्पतेवै । यःस्वीयपारक्यविभिन्नभावस्तमः प्रपद्येत यथा विमूढः ॥ १६ ॥ यतोनकश्चित्क्वचकुत्रचिद्वादीनःस्वमात्मानमलंसमर्थः । विमोचितुंकामदृशांविहारक्रीडामृगोयन्निगडोविसर्गः ॥ १७ ॥ ततोविदूरात्परिहृत्यदैत्यादैत्येषु सङ्गंविषयात्मकेषु । उपेतनारायणमादिदेवं समुक्तसङ्गैरिषितोऽपवर्गः ॥ १८ ॥ नह्यच्युतंप्रीणयतोबह्वायासोऽसुरात्मजाः।आत्मत्वात्सर्वभूतानांसिद्धत्वादिहसर्वतः ॥१९॥ परावरेषुभूतेषुब्रह्मान्तस्थावरादिषु । भौतिकेषुविकारेषुभूतेष्वथमहत्सुच ॥ २०॥गुणेषुगुणसाम्येचगुणव्यतिकरेतथा । एकएवपरोह्यात्माभगवानीश्वरोऽव्ययः ॥ २१ ॥ प्रत्यगात्मस्वरूपेणदृश्यरूपेणचस्वयम् ॥ व्याप्यव्यापकनिर्देश्यो ह्यनिर्देश्योऽविकल्पितः ॥ २२ ॥ केवलानुभवानन्दस्वरूपः परमेश्वरः । माययाऽन्तर्हितैश्वर्यईयतेगुणसर्गया ॥ २३ ॥ तस्मात्सर्वेषुभूतेषुदयांकुरुतसौहृदम् । आसुरंभावमुन्मुच्यययातुष्यत्यधोक्षजः ॥ २४ ॥ तुष्टेचतत्रकिमलभ्यमनन्तआद्येकिं तैर्गुणव्यतिकरादिहयेस्वसिद्धाः । धर्मादयः किमगुणेनचकाङ्क्षितेन सारंजुषांचरण-

---

सुखों कोही वह मनुष्य बहुत जानता है अतएव वह अपार मोह में फसकर कर किस प्रकार से वि रक्त होसकता है ॥ १२ ॥ गृहासक्त मनुष्य ऐसा प्रमत्त होता है कि कुटुम्ब के पोषण में अपनी आयु तथा पुरुषार्थ का नाशभी होताहुआ नहीं जानसकता तीनों तापों मे दुःखित होकरभी उनको कष्ट नहीं जानता केवल कुटुम्ब मेंही आसक्त रहता है ॥ १४ ॥ अजितेन्द्रिय कुटुम्ब युक्त मनुष्यका मन धन में इतना आसक्त होताहै कि वह यह जानकरभी कि "पराया धन हरने से परलोक में नरक और इस लोक में राजदण्ड आदि मिलता है" लोभ के बशीभूत हो दूसरे के धन को हरता है ॥ १५ ॥ हे दनुजो ! इस भांति से विद्वान मनुष्य भी गृहासक्त हो कुटुम्ब के पालन पोषण में लगेरह कर आत्मा का साक्षात्कार नहीं करसकते और मूर्ख मनुष्य की समान 'यह मेरा' 'यह पराया' ऐसी अहंता ममता में घिराहुआ पडारहता है ॥ १६ ॥ ऐसे गृहासक्त मनुष्य कभी भी अपनी आत्माको मुक्त नहीं करसकते क्यों कि वह स्त्रियों के क्रीडा मृग की समान और सतान उसके गलेमें बंधन फांसी के समान होते है ॥ १७ ॥ अतएव हे दैत्यों ! विषयासक्त दैत्यों का साथ छोड़ कर आदिदेव नारायण के शरणागत होओ वेही निःसंग मुनियों को मोक्ष के देनेवाले हैं ॥ १८ ॥ हे दैत्यपुत्रो ! भगवान विष्णुजी सब प्राणियों के आत्मा तथा समदर्शी हैं इस लिये उनसे प्रीति करना कुछ कठिन कार्य नहीं है ॥ १९ ॥ अचर से लेकर ब्रह्मातक छोटे और बड़े प्राणी तथा भौतिक विकार, आकाशादि महाभूत, सत्वआदि गुण तथा इन सबगुणों की प्रकृति और महातत्त्व आदिम वही ब्रह्मस्वरूप भगवान आत्म रूपसे विराजमान हैं ॥ २०-२१ ॥ तौभीगुण सृष्टिके करने वालीमाया से वह घिरेरहकर स्वयं अनिर्देश्य और अविकल्पित होकर भी दृष्टा और भोक्ता रूपसे व्यापक तथा भोग्य देहादि रूपसे व्याप्य हैं इसलिये निर्देश्य और विकल्पित प्रतीत होते हैं, केवल अनुभव रूप आनंदही उनका स्वरूप है ॥२२-२३॥ इसकारण तुम आसुरी भावको छोडकर सब प्राणियों पर दया तथा उनसे मैत्रीकरो, ऐसा करने सेही भगवान विष्णुजी संतुष्टहोंगे ॥ २४ ॥ उन आदि पुरुष, अनंत, भगवान के संतुष्ट होनेपर फिरकिस पदार्थका अभाव रहसकता है? गुण परिणाम के बशीभूत प्रारब्ध से जोस्वयं सिद्ध हैं उनधर्मोंही से क्या प्रयोजन? मोक्षही की क्या आवश्यकता? मैं सदैव उनके नामका गानकरता और उन्हीं के चरण कमलों के अमृतका

योऽनुगायतांनः ॥ २५ ॥ धर्मार्थकाम इति योऽभिहितस्त्रिवर्गईक्षात्रयीनयदमौविविधाचवार्ता । मन्येतदेतदखिलंनिगमस्यसत्यं स्वात्मार्पणंस्वसुहृदःपरमस्य पुंसः ॥२६॥ ज्ञानंतदेतदमलंदुरवापमाह नारायणोनरसखः किलनारदाय । एकान्तिनांभगवतस्तदकिञ्चनानां पादारविन्दरजसाप्लुतदेहिनांस्यात् ॥ २७ ॥ श्रुतमेतन्मयापूर्वंज्ञानं विज्ञानसंयुतम् । धर्मभागवतंशुद्धं नारदाद्देवदर्शनात् ॥ २८ ॥ दैत्यपुत्राऊचुः ॥ प्रह्लादत्वंवयञ्चापिनर्तेऽन्यविद्महेगुरुम् । एताभ्यांगुरुपुत्राभ्यांबालानामपिहीश्वरौ ॥ २९ ॥ बालस्यांतःपुरस्थस्य महत्सङ्गोदुरन्वयः । छिन्धिनःसंशय सौम्य स्याच्चेद्विश्रम्भकारणम् ॥ ३० ॥

इतिश्रीमद्भा०महा० सप्त० षष्ठोऽध्यायः ॥ ६ ॥

नारदउवाच ॥ एवंदैत्यसुतैःपृष्टो महाभागवतोऽसुरः । उवाचस्मयमानांस्तान्स्मरन्मदनुभाषितम् ॥ १ ॥ प्रह्लादउवाच ॥ पितरिप्रस्थितेऽस्माकं तपसेमन्दराचलम् । युद्धोद्यमपरंचक्रुर्विबुधादानवान्प्रति ॥ २ ॥ पिपीलिकैरहिरिवदिष्ट्यालोकोपतापनः । पापेनपापोऽभक्षीति वादिनोवासवादयः ॥ ३ ॥ तेषामतिबलोद्योगंनिशम्यासुरयूथपाः । वध्यमानाःसुरैर्भीताद्रुद्रुवुःसर्वतोदिशम् ४ ॥ कलत्रपुत्रमित्राप्तान्गृहान्पशुपरिच्छदान् । नावेक्षमाणास्त्वरिताःसर्वेप्राणपरीप्सवः॥५॥ व्यलुम्पन्राजशिबिरममराजयकाङ्क्षिणः इंद्रस्तुराजमहिषींमातरंममचाग्रहीत् ॥६॥ नीयमानांभयो

पानकरता रहता हूं ॥ २५ ॥ त्रिवर्ग नाममें उपरोक्त धर्म अर्थ काम तथा आत्म विद्या, कर्मविद्या, तर्कविद्या, दंडनीति, और विविध प्रकार की जीविका यह सबवेद प्रतिपाद्य विषय यदि अंतर्यामी, परम पुरुष अपनी आत्मा के अर्पण कियेजावें तवतो वह सत्य हैं नहीं तोवेभी असत्य हैं ॥२६॥ ऐसा न जानना किमैं तुमको नया उपदेश देताहूं पहिले भगवान ने इस निर्मल ज्ञानका उपदेश नारदजी को दियाथा भगवान के एकान्त भक्त निष्काम पुरुषोंकी चरण रजजिन प्राणियों के अभिषिक्त होनी है उन्हींको इसभांति का ज्ञानउत्पन्न होता है ॥ २७ ॥ पहिले मैंने उन्हीं देवदर्शन नारदजी से इस विज्ञान युक्तज्ञान तथाशुद्ध भागवत धर्मको सुनाथा ॥ २८ ॥ दैत्य बालक कहने लगेकि हे प्रह्लाद ! इनदो गुरूपुत्रों के अतिरिक्त और दूसरे गुरूको तुमभी नहीं जानते और न हमजानें, क्योंकि हमारी अति बाल्यावस्था से यह हमारे उपदेशक हैं ॥ २९ ॥ अंतःपुरमें रहते हुये महात्मा पुरुषों की सगति होना अत्यंत दुर्घट है हे सौम्य ! यदिविश्वास दिखाने वालाकोई कारण होतो उसके द्वारा हमारे इस संशयको दूरकरो ॥ ३० ॥

इति श्रीमद्भागवतेमहापुराणेसप्तमस्कंधेसरलाभाषाटीकायांषष्ठोऽध्यायः ॥ ६ ॥

नारदजी बोलेकि—हे राजन् ! दैत्यात्मजों के इसभांति पूँछनेपर महाभागवत प्रह्लाद कुछेक हंसकर मेरा कहाहुआ वाक्य स्मरण करके उनसे कहनेलगे कि ॥ १ ॥ हे वयस्यगण ! मेरेपिता हिरण्यकशिपुके तपस्यार्थ मदराचल में जानेपर इन्द्रादि देवता कहनेलगे कि—अहो ! जैसे चींटियां सर्पको खाजाती हैं तैसेही समस्त लोकोंको संताप देनेवाला पापी हिरण्यकशिपु अपनेही पापों से नष्टहोगया। इसभांति कहकर उन्हों ने दानवों के नष्ट करने के निमित्त अत्यंत युद्धका उद्योग कियाथा ॥ २ ॥ ३ ॥ उस समय असुर सेनापति देवताओं का बड़ाभारी उद्योग जान, देवताओं से निहत होहो भयभीतहो नाना दिशाओंको भागगये ॥ ४ ॥ सब अपने २ प्राणों की रक्षाके निमित्त इतने आतुर हुयेकि पुत्र, कलत्रधन, स्वजन, घर, पशु, और घरके पदार्थों की ओर देखने काभी अवसर न पाया ॥ ५ ॥ विजयी देवताओं ने दैत्यराज के घरको धूलमें मिलादिया। और इन्द्रने मेरीमाता दैत्यराज की स्त्रीको ग्रहण किया ॥ ६ ॥ इन्द्र, भयसे व्याकुल कुररी की नाईं

क्रन्दतीं कुररीमिव । यदृच्छयागतस्तत्र देवर्षिर्ददृशे पथि ॥ ७ ॥ प्राह नैनां सुरप तेनेतुमर्हस्यनागसम् । मुञ्चमुञ्च महाभाग सतीं परपरिग्रहम् ॥ ८ ॥ इन्द्र उवाच ॥ आस्तेऽस्या जठरे वीर्यमविषह्यं सुरद्विषः । आस्यतां यावत्प्रसवं मोक्ष्येऽर्थपदवीं गतः ॥ ९ ॥ नारद उवाच ॥ अयं निष्किल्बिषः साक्षान्महाभागवतो महान् । त्वया न प्राप्स्यते संस्थामनन्तानुचरो बली ॥ १० ॥ इत्युक्तस्तां विहायेन्द्रो देवर्षेर्मानयन्वचः । अनन्तप्रियभक्त्यैनां परिक्रम्य दिवं ययौ ॥ ११ ॥ ततो मे मातरमृषिः समानीय निजाश्रमम् । आश्वास्येहोष्यतां वत्से यावत्ते भर्तुरागमः ॥ १२ ॥ तथेत्यवात्सीद्देवर्षेरन्ति साप्यकुतोभया । यावद्दैत्यपतिर्घोरात्तपसो न न्यवर्तत ॥ १३ ॥ ऋषिं पर्यचरत्तत्र भक्त्या परमया सती । अन्तर्वत्नी स्वगर्भस्य क्षेमायेच्छाप्रसूतये ॥ १४ ॥ ऋषिः कारुणिकस्तस्याः प्रादादुभयमीश्वरः धर्मस्य तत्त्वं ज्ञानं च मामप्युद्दिश्य निर्मलम् ॥ १५ ॥ तत्तु कालस्य दीर्घत्वात्स्त्रीत्वान्मातुस्तिरोदधे ऋषिणाऽनुगृहीतं मां नाधुनाप्यजहात्स्मृतिः ॥ १६ ॥ भवतामपि भूयान्मे यदि श्रद्दधते वचः । वैशारदी धीः श्रद्धातः स्त्रीबालानां च मे यथा ॥ १७ ॥ जन्माद्याः षडिमे भावा दृष्टा देहस्य नात्मनः । फलानामिव वृक्षस्य कालेनेश्वरमूर्तिना १८ ॥ आत्मा नित्योऽव्ययः शुद्ध एकः क्षेत्रज्ञ आश्रयः अविक्रियः स्वदृग्घेतुर्व्यापकोऽसङ्ग्यनावृतः १९ ॥ एतैर्द्वादशभिर्विद्वानात्मनो लक्षणैः परैः । अहं ममेत्यसद्भावं देहादौ मोहजं त्यजेत् २० स्वर्णं यथा ग्रावसु हेमकारः क्षेत्रेषु योगैस्तदभिज्ञ आ

रोतीहुई मेरीमाताको लियेजाते थे कि उस समय मार्गमें नारदजी यदृच्छा से आय निकले और ॥ ७ कहने लगेकि—हे सुरपते ! इस निरपराधिनी स्त्रीका लेजाना तुमको उचित नहीं है हे महाभाग ! पतिव्रता परस्त्रीको 'छोड़ो छोड़ो' ॥८॥ तब इन्द्रने कहाकि इसके गर्भमें दैत्यराजका दुःसह वीर्य है अतएव जितने दिन पुत्र न होगा मेरे यहां यह रहेगी; पुत्रके उत्पन्न होतेही उसको मारकर इसको छोड़दूंगा॥९॥ नारदजी बोलेकि—हे देवराज! इसके गर्भका बालक निष्पाप, भगवद्भक्त, गुणशाली, भगवान का अनुचर और तेजस्वी है इसकारण तुम उसको नहीं मारसकते ॥ १० ॥ देवर्षि के कथनानुसार इन्द्रने मेरीमाताको छोड़दिया । और मैं भगवत प्रियहूं यह सुनकर वह मेरे ऊपर भक्ति प्रकाशकर मेरी माताकी परिक्रमाकर स्वर्गकोगये ॥ ११ ॥ तदनन्तर वे ऋषि मेरी माताको अपने आश्रममें लेआये और उसको सांत्वना देकर कहाकि—हे पुत्रि ! जबतक तुम्हारा स्वामी न आवे तबतक इस स्थानमें रहो ॥ १२ ॥ मेरीमाता उनकी बातोंको मानकर, जबतक दैत्य राज घोरतपस्या से निवृत्त न हुये तबतक निर्भय चित्तसे देवर्षि के समीप रही ॥ १३ ॥ वह गर्भवती सती अपने गर्भके कल्याण की इच्छासे और पतिआने के अनतर प्रसवकी कामना करके भक्तिपूर्वक ऋषिकी सेवा करने लगी ॥ १४ ॥ तब प्रभाव शाली दयालु ऋषिने मुझको भी बोध देकर माताको धर्मतत्व और विशुद्ध ज्ञानका उपदेश दिया ॥ १५ ॥ किंतु दीर्घ काल होजाने से स्त्री स्वभाव माताने उस उपदेशको भूलगई, परन्तु ऋषिकी कृपासे मैं अबतक उस ज्ञानको नहीं भूलाहूं ॥ १६ हे मित्रों! तुमयदि मेरी बातपर श्रद्धावान होगेतो श्रद्धावान होनेसे स्त्रियों और बालकोंकोभी मेरीसमान निर्मल बुद्धि उत्पन्न होसकती है॥ १७ ॥ हे भ्रातृगण ! महा समर्थकाल करके जैसे वृक्षमें उत्पत्ति, स्थिति, वृद्धि, परिणाम, क्षय और बिनाशरूप छह बिकार देखेजाते हैं वैसेही देहके भी छह बिकार हैं; परन्तु यह अवस्था आत्माकी नहीं है ॥ १८ ॥ क्योंकि आत्मा नित्य, अव्यय, शुद्ध, अद्वितीय, सर्वज्ञ, सर्वाश्रय, बिकाररहित, समदर्शी, ज्योतिर्मय, सर्वकारण, सगरहित और अनावृत है ॥ १९ ॥ इन द्वादश लक्षणों द्वारा विद्वान मनुष्य देहादि से मोहजनित "मै और-मेरा" इस मिथ्या बुद्धिको छोड़ देता है ॥२०॥ जैसे पत्थर से अग्नि संयोगादि नाना उपायों द्वारा

प्नुयात् । क्षेत्रेषुदेहेषु तथात्मयोगैरध्यात्मविद्ब्रह्मगतिंलभेत ॥ २१ ॥ अष्टौ प्रकृतयः प्रोक्तास्त्रयएवहितद्गुणाः ॥ विकाराः षोडशाचार्यैः पुमानेकः समन्वयात् ॥ २२ ॥ देहस्तुसर्वसंघातो जगत्तस्थुरितिद्विधा । अत्रैवमृग्यःपुरुषोनेति नेतीत्यतत्त्यजन्॥ २३ ॥अन्वयव्यतिरेकेणविवेकेनोशतात्मना। सर्गस्थानसमाम्नायैर्विमृशद्भिरसत्वरैः ॥ २४ ॥ बुद्धेर्जागरणंस्वप्नःसुषुप्तिरितिवृत्तयः। तायेनैवानुभूयन्तेसोऽध्यक्षःपुरुषःपरः ॥२५ ॥ एभिस्त्रिवर्णैःपर्यस्तैर्बुद्धिभेदैःक्रियोद्भवैः स्वरूपमात्मनो बुद्ध्येद्गन्धैर्वायु मिवान्वयात् ॥२६॥एतद्द्वारोहिसंसारोगुणकर्मनिबंधनः । अज्ञानमूलोऽपार्थोऽपिपुंसः स्वप्नइवेष्यते ॥ २७ ॥ तस्माद्भवद्भिःकर्तव्यंकर्मणांत्रिगुणात्मनाम् । बीजनिर्हरणंयोगःप्रवाहोपरमोधियः ॥ २८ तत्रोपायसहस्राणामयभगवतोदितः । यदीश्वरेभगवतियथायैरंजसारतिः ॥ २९ ॥ गुरुशुश्रूषयाभक्त्या सर्वलब्धार्पणेनच । सङ्गेनसाधुभक्तानामीश्वराराधनेनच ॥ ३० ॥ श्रद्धयातत्कथायांचकीर्तनैर्गुणकर्मणाम् । तत्पादाम्बुरुहध्यानात्तल्लिंगेक्षाऽर्हणादिभिः ३१ हरिःसर्वेषुभूतेषुभगवानास्तईश्वरः । इतिभूतानिमनसा कामैस्तैःसाधुमानयेत् ३२ एवंनिर्जितषड्वर्गैः क्रियतेभक्तिरीश्वरे । वासुदेवेभगवतियया संलभतेरतिम् ३३॥

जगुः सिद्धास्तुष्टुवुः पुरुषोत्तमम्॥ २ ॥ योऽसौग्राहः सवैसद्यः परमाश्चर्यरूपधृक्। मुक्तोदेवलशापेनहूहूर्गन्धर्वसत्तमः ॥ ३ ॥ प्रणम्यशिरसाऽधीशमुत्तमश्लोकमव्ययम्। अगायतयशोधामकीर्तन्यगुणसत्कथम्॥ ४ ॥ सोऽनुकम्पितईशेनपरिक्रम्य प्रणम्यतम्। लोकस्यपश्यतोलोकंस्वमगान्मुक्तकिल्बिषः ॥ ५ ॥ गजेन्द्रोभगवत्स्पर्शाद्विमुक्तोऽज्ञानबन्धनात्। प्राप्तोभगवतोरूपंपीतवासाश्चतुर्भुजः ॥ ६ ॥ सवै पूर्वमभूद्राजापाण्ड्योद्रविडसत्तमः। इन्द्रद्युम्नइतिख्यातोविष्णुव्रतपरायणः ॥ ७ ॥ सएकदाऽऽराधनकालआत्मवान्गृहीतमौनव्रतईश्वरंहरिम्। जटाधरस्तापसआप्लुतोऽच्युतंसमर्चयामासकुलाचलाश्रमः ॥ ८ ॥ यदृच्छयातत्रमहायशामुनिः समागमच्छिष्यगणैः परिश्रितः। तंवीक्ष्यतूष्णीमकृतार्हणादिकंरहस्युपासीनमृषिश्चुकोपह ॥ ९ ॥ तस्मादिमंशापमदादसाधुरयंदुरात्माऽकृतबुद्धिरद्य। विप्रावमन्ताविशतांतमोऽन्धंयथागजःस्तब्धमतिःसएव ॥ १० ॥ श्रीशुक उवाच ॥ एवंशप्त्वा गतोऽगस्त्योभगवान्नृपसानुगः। इन्द्रद्युम्नोऽपिराजर्षिर्दिष्टंतदुपधारयन् ॥ ११ ॥ आपन्नः कौञ्जरींयोनिमात्मस्मृतिविनाशिनीम्। हर्यर्चनानुभावेनयद्गजत्वेऽप्यनुस्मृतिः ॥ १२ ॥ एवंविमोक्ष्यगजयूथपमब्जनाभस्तेनापिपार्षदगतिंगमितेनयुक्तः। गन्धर्वसिद्धविबुधैरुपगीयमानकर्माऽद्भुतंस्वभवनं गरुडासनोऽगात्॥ १३ ॥ एतन्महाराजतवेरितोमयाकृष्णानुभावोगजराजमोक्षणम्। स्वर्ग्यंयशस्यंकलिकल्म

और गानेलगे तथा ऋषि, चारण और सिद्धलोग नारायणकी स्तुति करनेमें प्रवृत्तहोगये ॥ २ ॥ हेराजन्! हूहूनामक गन्धर्वने देवलऋषिके शापसे ग्राह योनिमें जन्म लियाथा ॥ ३ ॥ इससमय भगवानकी कृपासे शापसे मुक्तहो उसने अत्याश्चर्य रूप धारणकर नारायणको मस्तकद्वारा प्रणाम कर उनके गुणोंके गानेका आरम्भकिया ॥ ४ ॥ और निष्पापहो भगवानकी परिक्रमा और प्रणाम कर अपने स्थानको गया इस ओर राजानेभी भगवानके करस्पर्श होनेके कारण अज्ञानसे मुक्तहो, भगवानकी समान कांतिको प्राप्तहो पीतांबर और चतुर्भुजरूप धारणकिया ॥ ६ ॥ गजेंद्र पूर्व-जन्ममें इन्द्रद्युम्ननामक पांड्यदेशका राजाथा, उसकाल द्रविड़देशमें उसकी समान और कोई साधू न था ॥ ७ ॥ विष्णुजीका व्रत करनाही इन्द्रद्युम्नका एकमात्र साधन था; आत्मज्ञानी इन्द्रद्युम्न पर्वतको आश्रम बना जटाधारण कर, तपस्वी के वेशसे भगवानके भजनमें प्रवृत्तहुआ ॥ ८ ॥ उपा-सनाके समयमें स्नानकर मौनव्रत धारण कियेहुए भगवान नारायण का ध्यान कररहाथा कि उसी समयमे महायश अगस्त्य मुनि शिष्योंको साथलियेहुए इच्छानुसार उस स्थानपर आये। इन्द्रद्युम्न उनकी पूजानकर एकओर मौनभावसे बैठारहा। यह देखकर मुनिको क्रोध उत्पन्नहुआ ॥ ९ ॥ वे कुपित होकर राजाको शाप देनेलगे कि इस दुष्ट असाधूने शिक्षानहीं प्राप्तकी इसहीकारण आज इसने ब्राह्मणोंका निरादर किया। यह गजकी समान जड़बुद्धि है, मनुष्य गजहोकर अज्ञान में डूब जावे ॥ १० ॥ श्रीशुकदेवजी बोलेकि–हे राजन्! भगवान अगस्त्यजी इसप्रकार से शापदे शिष्यों समेत चलेगये। राजर्षि इन्द्रद्युम्न भी "दैवही इस घटनाका मूल है" यह विचार करता करता गजयोनिको प्राप्तहुआ ॥ ११ ॥ गजयोनि में आत्म स्मृति नाश होजाती है, किंतु राजाइन्द्र द्युम्नहरि की आराधना करता था, उसीके प्रभाव से वह गजहोकर भी पूर्वके वृत्तांतको न भूला ॥ १२ ॥ पद्मनाभ गरुड़ वाहन भगवान ने गजेन्द्रको इसप्रकार से मुक्तकर उसको अपना पार्षदबना उसके संग अपने स्थानको गये। गंधर्व, सिद्ध और देवतागण उनकी अद्भुत कीर्त्तिका गान करते २ पीछे २ चलने लगे ॥ १३ ॥ हे महाराज! मैंने तुमसे कृष्णजी के गजराज विमोक्षण रूप माहात्म्य का

पापंदुःस्वप्ननाशंकुरुवर्यशृण्वताम् ॥ १४ ॥ यथाऽनुकीर्तयन्त्येतच्छ्रेयस्कामाद्वि जातयः । शुचयः प्रातरुत्थायदुःस्वप्नाद्युपशान्तये ॥ १५ ॥ इदमाहहरिःप्रीतोगजे न्द्रंकुरुसत्तम । शृण्वतांसर्वदेवानांसर्वभूतमयोविभुः ॥ १६ ॥ श्रीभगवानुवाच ॥ येमांत्वांचसरश्चेदंगिरिकन्दरकाननम् ॥ वेत्रकीचकवेणूनां गुल्मानि सुरपादपान् ॥ १७ ॥ शृङ्गाणीमानिधिष्ण्यानिब्रह्मणोमेशिवस्यच । क्षीरोदंमेप्रियंधामश्वेतद्वीपं चभास्वरम् ॥१८॥ श्रीवत्संकौस्तुभंमालांगदांकौमोदकींमम । सुदर्शनंपाञ्चजन्यं सुपर्णंपतगेश्वरम् ॥ १९ ॥ शेषंचमत्कलांसूक्ष्मांश्रियंदेवींमदाश्रयाम् । ब्रह्माणंनारद मृषिंभवंप्रह्रादमेवच ॥ २० ॥ मत्स्यकूर्मवराहाद्यैरवतारैः कृतानिमे । कर्माण्यनन्त पुण्यानिसूर्यंसोमंहुताशनम् ॥ २१ ॥ प्रणवंसत्यमव्यक्तंगोविप्रान्धर्ममव्ययम् । दा क्षायणीर्धर्मपत्नीः सोमकश्यपयोरपि ॥ २२ ॥ गङ्गांसरस्वतींनन्दांकालिन्दींसितवा रणम् । ध्रुवंब्रह्मऋषीन्सप्तपुण्यश्लोकांश्चमानवान् ॥ २३ ॥ उत्थायापररात्रान्तेप्रय ताः सुसमाहिताः । स्मरन्तिममरूपाणिमुच्यन्तेह्येनसोऽखिलात् ॥ २४ ॥ येमांस्तु वन्त्यनेनाङ्गप्रतिबुध्यनिशात्यये । तेषांप्राणात्ययेचाहंददामिविमलांमतिम् ॥ २५ ॥ श्रीशुक उवाच ॥ इत्यादिश्यहृषीकेशः प्रध्मायजलजोत्तमम् । हर्षयन्विबुधानीक मारुरोहखगाधिपम् ॥ २६ ॥

इति श्रीमद्भागवतेमहापुराणे अष्टमस्कन्धे गजेन्द्रमोक्षणंनामचतुर्थोऽध्यायः ॥ ४ ॥

॥ श्रीशुक उवाच ॥ राजन्नुदितमेतत्तेहरेः कर्माघनाशनम् । गजेन्द्रमोक्षणं पु ण्यंरैवतन्त्वन्तरंशृणु ॥ १ ॥ पञ्चमोरैवतोनाममनुस्तामससोदरः । बलिविन्ध्याद

वर्णन किया । जोइस प्रभातको सुनेगे वह स्वर्ग व यशको पावेंगे उनके कलियुग के पाप व दु. स्वप्नके दोष नाश होजावेंगे ॥ १४ ॥ अतएव कल्याणकी इच्छा रखने वाले द्विजोंको प्रातःकालही उठकर पवित्रहो दु.स्वप्नकी शांतिके निमित्त इसका कीर्त्तन करना उचित है ॥ १५ ॥ हे कुरुश्रेष्ठ! सर्व भूतमय नारायण ने प्रसन्न होकर सब प्राणियों के सामने गजेन्द्र से यह कहाथा कि जोअंतिम रात्रिको जागकर सावधानहो यत्नपूर्वक—मुझको, तुझको, इस सरोवर, वन, और पर्वतको, कंदरा, बांस, झाड़ी, देववृक्ष, लताओंको,ब्रह्माके, शिवके और मेरे निवास भूतइन सब शिखरोंको, मेरेप्यारे निवास स्थान क्षीरसागरको, तेजोमय श्वेत द्वीपको, मेरे श्रीवत्स, कौस्तुभमाला, कौमोदकीगदा, सुदर्शन चक्र, और पांचजन्य शंखको, पन्नगराज, गरुड़को,अनंतको, मेरेसूक्ष्म अंशस्वरूप, मेरी आश्रिता लक्ष्मी देवीको, ब्रह्मा, नारद, और प्रह्लादको, मत्स्य, कूर्म और वराहादि अवतारो में जोसब पवित्र कार्य किये हैं उन कार्योंको, सूर्य, चन्द्र, अग्नि, ओंकार, सत्य, माया, गौ, ब्राह्मण, और भक्ति लक्षण धर्मको; चन्द्र और कश्यपकी धर्म पत्नीदक्ष नंदिनियोंको; गंगा, सरस्वता, नंदा और कालिंदीको,ऐरावत,ध्रुव,सप्त ब्रह्मर्षि, और पवित्रयशवाले दानवोंको स्मरण करेंगे वे सब पापों से छूटजायंगे । यह सब मेरेरूप हैं । हे गजराज ! जोरात्रि के अंतमें जगकरइन सबके द्वारा मेरी स्तुति करते हैं मरणके अंतमें मैं उन्हें सद्गति देताहूं ॥ १६—२५ ॥ श्रीशुकदेवजी बोलेकि—हे राजन् ! नारायण यह कह शंखोंमें श्रेष्ठ पांचजन्य शंखको बजाय देवताओंको आनंदित करते हुये गरुड़पर सवार हुये ॥ २६ ॥

इति श्रीमद्भागवतेमहापुराणेअष्टमस्कंधेसरलाभाषाटीकायांचतुर्थोऽध्यायः ॥ ४ ॥

श्रीशुकदेवजी बोले कि—हेराजन् ! मैंनेहरिके गजेन्द्र बिमोचनरूप परमपवित्र और पापनाशन कर्मों का तुमसे वर्णन किया । अब रैवतमन्वन्तरकी कथा सुनो ॥ १ ॥ पंचममनुका नामरैवत था

यस्तस्यसुताअर्जुनपूर्वकाः ॥२॥ विभुरिन्द्रः सुरगणाराजन्भूतरयादयः । हिरण्य रोमावेदशिरा ऊर्ध्वबाह्वादयोद्विजाः ॥ ३ ॥ पत्नीविकुण्ठाशुभ्रस्य वैकुण्ठैःसुरस त्तमैः । तयोःस्वकलयाजज्ञे वैकुण्ठोभगवान्स्वयम् ॥४ वैकुण्ठःकल्पितोयेन लोको लोकनमस्कृतः । रमयाप्रार्थ्यमानेन देव्यातत्प्रियकाम्यया ॥ ५ ॥ तस्यानुभावः कथितो गुणाश्चपरमोदयाः । भौमान् रेणून्सविममेयो विष्णोर्वर्णयेद्गुणान् ॥ ६ ॥ षष्ठश्चचक्षुषःपुत्रश्चाक्षुषोनामवैमनुः । पूरुःपुरुषसुद्युम्नप्रमुखाश्चाक्षुषात्मजाः ॥७॥ इन्द्रोमन्त्रद्रुमस्तत्र देवाआप्यादयोगणाः । मुनयस्तत्रवैराजन्हविष्मद्वीरकादयः ॥ तत्रापिदेवःसम्भूत्यां वैराजस्याभवत्सुतः । अजितोनामभगवानंशेनजगतःपतिः ॥ ९ ॥ पयोधिंयेननिर्मथ्यसुराणांसाधितासुधा । भ्रममाणोऽम्भसिधृतः कूर्मरूपे णमन्दरः ॥ १० ॥ राजोवाच ॥ यथाभगवताब्रह्मन् मथितःक्षीरसागरः । यदर्थं वायतश्चाद्रिं दधाराम्बुचरात्मना ॥ ११ ॥ यथाऽमृतंसुरैःप्राप्तं किञ्चान्यदभवत्त तः । एतद्भगवतःकर्म वदस्वपरमाद्भुतम् ॥ १२ ॥ त्वयासंकथ्यमानेन महिम्नासात्व तांपतेः । नातितृप्यतिमेचित्तं सुचिरंतापतापितम ॥ १३ ॥ सूतउवाच ॥ संपृष्टो भगवानेवं द्वैपायनसुतोद्विजाः । अभिनन्द्यहरेर्वीर्यं मभ्याचष्टुंप्रचक्रमे ॥ १४ ॥श्री शुकउवाच ॥ यदायुद्धेऽसुरैर्देवा बाध्यमानाःशितायुधैः । गतासवोनिपतिता नो त्तिष्ठेरन्स्मभूयशः ॥ १५ ॥ यदादुर्वाससःशापात् सेन्द्रालोकास्त्रयोनृप । निःश्री

वैवस्वतमनुके सहोदर भाई थे । अर्जुन, बलि और विन्ध्यादिनाम उनके कईएक पुत्रहुए ॥ २ ॥ इस मन्वन्तर में विभु इन्द्र, भूतरय आदिदेवता, और हिरण्यरोमा, वेदशिरा, ऊर्ध्वबाहु आदिऋषि हुए ॥ ३ ॥ स्वयंभगवान इस मन्वन्तर में शुभ्रके वीर्य से उनकी पत्नी वैकुण्ठाके गर्भसे वैकुण्ठवासी देवताओं सहित अपने अंशसे वैकुण्ठनामसे उत्पन्नहुए ॥ ४ ॥ लक्ष्मीदेवीकी कामनासे वैकुण्ठभगवानने उनके प्रिय करने के निमित्त वैकुण्ठलोकबनाया सबलोकों के रहनवाले उस वैकुण्ठको नमस्कार करते हैं॥५॥उन वैकुण्ठभगवानका महात्म्य और परमपवित्रगुणों काजो वर्णन किया है वह अति सामान्यहै; क्योंकि जो विष्णुजी के समस्तगुणोंका वर्णन करनेकी इच्छाकरता है वह पृथ्वीके रज कण गिनना चाहता है॥६॥छठे मनुकानाम चाक्षुष हुआजो चक्षुकेपुत्रथे । पुरु, पुरुष, सुद्युम्न आदि इनके पुत्रहुए ॥ ७ ॥ इस मन्वन्तर में मंत्रद्रुमइन्द्र; आप्यादि देवता, और हविस्मत्‌तथा वीरकआदि ऋषिहुए ॥ ८ ॥ चाक्षुष मन्वन्तरमें भगवानने वैराजकी भार्या सम्भूति के गर्भ में अपने अंशसे अजितनामसे अवतार लिया था ॥ ८ ॥ अजितने कच्छप मूर्ति धारणकरके जलमें घूमतेहुए मंदरपर्वतको धारणकर, समुद्रकोमथ उसमें से अमृत निकाल देवताओंको पिलाया १०॥ राजाने कहाकि—हेब्रह्मन् ! भगवान ने किसकेकारण, क्यांकर और कैसे क्षीर समुद्रकोमंथन करनेको कूर्मरूप धारणकर मन्दरपर्वतको धारणकिया॥११॥जैसे देवताओं ने अमृतप्राप्त किया और उसके प्राप्तकरने में जो घटनाएं हुईं उनसबका आप वर्णनकरो भगवानके यहकर्म अत्यन्तअद्भुत हैं॥१२॥ मेरा अन्तःकरण बहुत दिनोंके ताप से सन्तप्त होरहा है, इसही कारण भक्तप्रिय भगवानकी महिमा को आप जितनाहीकहते हैं, उससे कुछभी मेरा चित्त तृप्तनहीं होता ॥ १३ ॥ श्री सूतजीने कहाकि—हेऋषियों ! जबराजापरीक्षितने श्रीशुकदेवजी से ऐसे पूछा तब ऋषि शुकदेवजी हरिके पराक्रमकी प्रशंसा करके कहनेलगे कि ॥ १४ ॥ हे राजन् ! असुरलोग तीव्र अस्त्रधारण करके युद्ध क्षेत्रमें देवताओं का विनाशकरने लगे; इससे अनेकोंही देवताप्राण रहित होकर गिरपड़े; और फिर न उठसके ॥ १५ ॥ इसओर दुर्वासाके शापसे इन्द्रआदि तीनोलोक निर्धन होगये

कामाः सर्वेऽस्तत्र नेशुरिज्यादयः क्रियाः ॥ १६ ॥ निशाम्यैतत्सुरगणा महेन्द्रवरुणादयः। नाध्यगच्छन्स्वयं मन्त्रैर्मन्त्रयन्तो विनिश्चयम् ॥ १७ ॥ ततो ब्रह्मसभां जग्मुर्मेरोर्मूर्द्धनि सर्वशः। सर्वं विज्ञापयाञ्चक्रुः प्रणताः परमेष्ठिने ॥ १८ ॥ स विलोक्येन्द्रवाय्वादीन्निःसत्त्वान्विगतप्रभान्। लोकानमङ्गलप्रायानसुरानयथा विभुः ॥ १९ ॥ समाहितेन मनसा संस्मरन्पुरुषं परम्। उवाचोत्फुल्लवदनो देवान्स भगवान्परः ॥ २० ॥ अहं भवो यूयमथोऽसुरादयो मनुष्यतिर्यग्द्रुमघर्मजातयः। यस्यावतारांशकलाविसर्जिता व्रजाम सर्वे शरणं तमव्ययम् ॥ २१ ॥ न यस्य वध्यो न च रक्षणीयो नोपेक्षणीयाऽऽदरणीयपक्षः। अथापि सर्गस्थितिसंयमार्थं धत्ते रजःसत्त्वतमांसि काले ॥ २२ ॥ अयं च तस्य स्थितिपालनक्षणः सत्त्वं जुषाणस्य भवाय देहिनाम्। तस्माद्व्रजाम शरणं जगद्गुरुं स्वानां स नो धास्यति शं सुरप्रियः ॥ २३ ॥ श्रीशुक उवाच ॥ इत्याभाष्य सुरान्वेधाः सह देवैररिन्दम। अजितस्य पदं साक्षाज्जगाम तमसः परम् ॥ २४ ॥ तत्रादृष्टस्वरूपाय श्रुतपूर्वाय वै विभुः। स्तुतिमब्रूत दैवीभिर्गीर्भिस्त्ववहितेन्द्रियः ॥ २५ ॥ ब्रह्मोवाच ॥ अविक्रियं सत्यमनन्तमाद्यं गुहाशयं निष्कलमप्रतर्क्यम्। मनोऽग्रयानं वचसानिरुक्तं नमामहे देववरं वरेण्यम् ॥ २६ ॥ विपश्चितं प्राणमनोधियात्मनामर्थेन्द्रियाभासमनिद्रमव्रणम्। छायातपौ यत्र न गृध्रपक्षौ तमक्षरं खं त्रियुगं व्रजामहे ॥ २७ ॥ अजस्य चक्रं त्वजयेर्यमाणं मनोमयं पञ्चदशारमाशु। त्रिणा

तथा यज्ञादिकार्य भी बन्दहोगये ॥ १६ ॥ इन्द्र और वरुणादि देवता नानापरामर्शकरने परभी कोई उपाय स्थिर नकरसके ॥ १७ ॥ तब अन्त मे सबही सुमेरुके शृङ्गपर ब्रह्माजीकी सभामे उपस्थितहुए और ब्रह्माजी को प्रणामकर समस्त वृत्तान्त कहनेलगे ॥ १८ ॥ भगवान ब्रह्माजीने इन्द्रादिक देवनओं को निःसत्व और प्रभाहीन व लोकोंको अत्यन्त दुर्दशाग्रस्त तथा असुरों को बलवान देखकर स्थिर चित्तसे भगवानका ध्यान करतेर प्रफुल्लवदनहो देवताओं से कहा कि १९ ॥ २० ॥ मैं, महादेव, तुम और असुर तथा मनुष्य, पशु, पक्षी, वृक्ष और स्वदज सबही जिनके अवतारो के अंश के अंशसे उत्पन्न होते हैं आओ हम सबमिलकर उनके पास चलें ॥ २१ ॥ जिनके नतो कोई मारने योग्य है, न कोई रक्षाकरने के योग्य है, न कोई उपेक्षणीय है न आदरणीय है, तो भी जो कालक्रमसे उत्पत्ति, स्थिति और संहारके निमित्त रज सत्व और तमोगुण को धारणकरते है ॥ २२ ॥ उन्होंने प्राणियोंके कल्याणके अर्थ इस समय सत्वगुणका अवलम्बन किया है, यही उनका स्थिति और पालनका काल है। हमउनके अपनेही है, अतएव चलो, हम उनकी शरणलें। जगद्गुरु हमारे कल्याणका यत्नकरेंगे॥२३॥श्रीशुकदेवजीबोले कि—हेशत्रुदमन! ब्रह्माजी देवताओंसे यह बातकह उनको साथले तमोगुणसे परे स्थित परमधामक्षीर सागरमे गये और उस स्थानमे पहुंचकर सावधान मनसे वैदिकवाक्यों द्वारा अदृष्टस्वरूप भगवानकी स्तुतिकरनेलगे २५ ब्रह्माजी बोले कि—हेदेव! आपसर्वश्रेष्ठहो, आपको हम नमस्कार करते हैं आप आद्य,अनन्त,विकार रहित, सत्यस्वरूप और सर्वान्तर्यामीहो, आप उपाधिरहित, औरअचिन्त्यहो। मनकी अपेक्षाभी आपका वेग अधिकहै; वाक्यद्वारा आपका निश्चय नहीं कियाजासकता—आपको नमस्कारहै २६॥ अहो! जो प्राण, मन, बुद्धि, और अहङ्कारके ज्ञाता हैं जोइन्द्रिय और विषय रूपसे प्रकाश पाते है, जो स्वप्न द्रष्टाकी समान अज्ञान रहित हैं, जिनके देह नहीं है, जो अक्षय व आकाशवत् सर्वव्यापी हैं, जिनका जीवकी पक्षपातिनी अविद्या और विद्याके साथ सम्बन्ध नहीहै जो तीनो युगमें आविर्भूत होते रहतहैं, मैं उनकी शरणागतहूं ॥ २७ ॥ मायासे प्रेरित, मनोमय, दशइन्द्री व पञ्चप्राण

मिविद्युच्चलमष्टनेमि यन्नाभमाशु त्रिमृतं प्रपद्ये ॥ २८ ॥ यएकवर्णं तमसःपरंतद्लोकमव्यक्तमनन्तपारम्। आसांचकारोपसुपर्णमेनमुपासते योगरथेन धीराः ॥ ॥ २९ ॥ नयस्यकश्चाति तितर्तिमायां यया जनोमुह्यति वेद नार्थम्। तं निर्जितात्मात्मगुणं परेशं नमाम भूतेषु समं चरन्तम् ॥ ३० ॥ इमे वयं यत्प्रियवैव तन्वा सत्त्वेनसृष्टा बहिरन्तराविः। गतिं नसूक्ष्मामृषयश्च विद्महे कुतोऽसुराद्या इतरप्रधानाः ॥ ३१ ॥ पादौमहीयं स्वकृतैव यस्य चतुर्विधो यत्र हि भूतसर्गः। सवैमहापूरुष आत्मतन्त्रः प्रसीदतां ब्रह्ममहाविभूतिः ॥ ३२ ॥ अम्भस्तु यद्रेतउदारवीर्यं सिध्यन्ति जीवन्त्युत वर्धमानाः। लोकायतोऽथाखिललोकपालाः प्रसीदतां ब्रह्ममहाविभूतिः ॥ ३३ ॥ सोमंमनोयस्य समामनन्ति दिवौकसां वैबलमन्धआयुः। ईशोनगानां प्रजनः प्रजानां प्रसीदतां नःसमहाविभूतिः ॥ ३४ ॥ अग्निर्मुखंयस्य तुजातवेदा जातःक्रियाकाण्डनिमित्तजन्मा। अन्तःसमुद्रेऽनुपचन्स्वधातून्प्रसीदतां नः समहाविभूतिः ॥ ३५ ॥ यच्चक्षुरासीत्तरणिर्देवयानं त्रयीमयो ब्रह्मणएषधिष्ण्यम्। द्वारंच मुक्तेरमृतंचमृत्यु प्रसीदतां नःसमहाविभूतिः ॥ ३६ ॥ प्राणादभूद्यस्य चराचराणां प्राण सहोबलमोजश्चवायुः। अन्वास्मसम्राजमिवानुगावयं प्रसीदतां नःसमहाविभूतिः ॥ ३७ ॥ श्रोत्राद्दिशोयस्यहृदश्चखानि प्रजज्ञिरेखंपुरुषस्यनाभ्याः। प्राणेन्द्रियात्मासुशरीरकेत प्र-

---

वाला आरा, तीव्रगामी, तीननाभिवाला, बिजुलीकी समान चचलगति, व आठ (प्रकृति) चक्रवाला जो यह जीवका शरीरादि रूप चक्रहै उसके धुरीरूप सत्य जो आपहो उनकी शरणमें आया हू ॥ २८ ॥ जो जीवके पार्श्वमें स्थितहैं, और ज्ञानही जिनका एक मात्र स्वरूपहै जो प्रकृतिके दूरवर्त्ती अग्रस्य, अव्यक्त, अनन्त और अपारहैं धीर मनुष्य योगरूप साधनद्वारा जिनकी उपासना करतेहैं ॥ २९ ॥ मनुष्य जिनसे मोहित होकर आत्माके स्वरूपको नही जानसकते, जिन्होंने माया और मायाके गुण सबोंहीका जय करालियाहै; जो परमईश्वर और सर्वत्र समभावसे विचराकरतेहैं। मैं उनको नमस्कार करताहू ॥३०॥यह सब ऋषि और देवता व मै जिनके प्रिय देहरूप सत्वगुण से उत्पन्न हुयेहैं, उनकी सूक्ष्मगति बाहर और भीतर प्रकाश पाताहै; तौभी जब हम उस गतिको नहीं जानसकते तब असुरादि दूसरे जीव कैसे जानसकतेहैं? जो रज और तमोगुण द्वारा उत्पन्न हुयेहैं ॥ ३१ ॥ जिन्होंने इस पृथ्वीको कि जिसमें चारप्रकारके प्राणी वास करते हैं, उत्पन्नकिया, और पृथ्वीही जिनके दोनं चरण हैं—उन विराट्रूप महापुरुष, महाविभूतिशाली भगवानमें मेरी प्रीतिहोवे ॥ ३२ ॥ लोक और लोकपाल जिस जलसे उत्पन्न होतेहैं, जिस जल द्वारा वह वृद्धिपाते और जीतेहैं वह उदार शक्ति जल जिसका वीर्यहै वही महैश्वर्यशाली भगवान हमारे ऊपर प्रसन्नहोवें ॥ ३३ ॥ जो चन्द्रमा—देवताओंका अन्न, बल और परमायुहै; जो सब वृक्षोंका ईश्वर और जन्मदाताहै; वही चन्द्रमा जिनका मनहै वे महाविभूतिशाली ईश्वर मेरेऊपर प्रसन्नहोवें ॥३४॥ क्रियाकांडके निमित्त जो अग्नि उत्पन्न होतीहै, जिस अग्निसे वेदरूप धन उत्पन्न हुआहै, और जो अग्निजीवोंके उदरमें रहकर अन्नका परिपाक करती है वही अग्नि जिनका मुखहै वेही महाविभूतिशाली महेश मेरे ऊपर प्रसन्नहोवें ॥ ३५ जो सूर्य अर्चिरादि मार्गके देवता, वेदमय, ब्रह्माके उपासनाके स्थान और मुक्तिका द्वार व अमृत तथा मृत्युरूपी हैं वही सूर्य जिनके नेत्रहैं वे महायश परमेश्वर मेरेऊपर प्रसन्नहोवें ॥ ३६ ॥ जो वायु चराचरका प्राण बल, उत्साह और विक्रमहै और हम सेवककी समान राजारूप जिसवायुका अनुसरण करतेहैं वही वायु जिनके प्राणसे उत्पन्नहुआहै वे महाऐश्वर्यवाले प्रभु मेरे ऊपर प्रसन्नहोवें ॥ ३७ ॥ जिसके श्रोत्रसे दशों दिशायें हृदयसे देहगत छिद्र समूह, और नाभि से दशप्राण, इन्द्रिय, मन और देहका आश्रयीभूत आकाश उत्पन्न हुआ है

सीदतां नः स महाविभूतिः ॥ ३८ ॥ बलान्महेन्द्रस्त्रिदशाः प्रसादान्मन्योर्गिरीशो धि
षणाद्विरिंचः । खेभ्यश्छन्दांस्यृषयो मेढ्रतः कः प्रसीदतांनः समहाविभूतिः ॥ ३९ ॥ श्री
र्वक्षसः पितरश्छाययाऽऽसन्धर्मः स्तनादितरः पृष्ठतोऽभूत् । द्यौर्यस्य शीर्ष्णोऽप्सरसो
विहारात्प्रसीदतांनः समहाविभूतिः ॥ ४० ॥ विप्रोमुखंब्रह्मचयस्यगुह्यं राजन्यआ
सीद्भुजयोर्बलंच । ऊर्वोर्विडोजोंऽघ्रिरवेदशूद्रौ प्रसीदतांनःसमहाविभूतिः ॥ ४१ ॥
लोभोऽधरात्प्रीतिरुपर्यभूद्द्युतिर्नस्तः पशव्यःस्पर्शेनकामः । भ्रुवोर्यमःपक्ष्मभवस्तु
कालः प्रसीदतांनःसमहाविभूतिः ॥ ४२ ॥ द्रव्यंवयःकर्मगुणान्विशेषं यद्योगमाया
विहितान्वदन्ति । यद्दुर्विभाव्यं प्रबुधापबाधं प्रसीदतांनःसमहाविभूतिः ॥ ४३ ॥
नमोऽस्तुतस्माउपशान्तशक्तये स्वाराज्यलाभप्रतिपूरितात्मने । गुणेषुमायारचिते-
षु वृत्तिभिर्न सज्जमाननभस्वदूतये ॥ ४४ ॥ सत्वंनोदर्शयात्मानमस्मत्करणगोच-
रम् । प्रपन्नानांदिदृक्षूणां सस्मितंतेमुखाम्बुजम् ॥ ४५ ॥ तैस्तैःस्वेच्छाभूतैरूपैः काले
कालेस्वयंविभो । कर्मदुर्विषहंयन्नो भगवांस्तत्करोतिहि ॥ ४६ ॥ क्लेशभूर्यल्पसारा
णि कर्माणिविफलानिवा । देहिनांविषयार्तानां नतथैवार्पितंत्वयि ॥ ४७ ॥ नावमः
कर्मकल्पोऽपि विफलायेश्वरार्पितः । कल्पतेपुरुषस्यैव सह्यात्मादयितोहितः ।४८।
यथाहिस्कन्धशाखानां तरोर्मूलावसेचनम् । एवमाराधनंविष्णोः सर्वेषामात्मनश्च

वे महा विभूति शालीविभु हमारे ऊपर प्रसन्न होवें ॥ ३८ ॥ जिनके बलसे महेन्द्र, कृपासे देवता, क्रोध से महेश, बुद्धिसे ब्रह्मा, देहके छिद्रोंसे वेद, और ऋषि तथा उपस्थ से प्रजापति उत्पन्न हुये हैं—वे महाविभूतिशाली भगवान मेरे ऊपर प्रसन्न होवें ॥ ३९ ॥ जिनके वक्षःस्थल से लक्ष्मी, छाया से पितर, स्तन से धर्म, पीठसे अधर्म, शिरसे वैकुंठ, और विहार से अप्सरायें उत्पन्न हुई हैं वे महाकीर्तिवाले परमेश्वर मेरे ऊपर प्रसन्न होवें ॥ ४० ॥ जिनके मुखसे ब्राह्मण और रहस्यमय वेद, भुजासे क्षत्री, बल, जंघाओं से वैश्य और निपुणता, चरणों से शूद्र और सेवा उत्पन्न हुये हैं । वेमहा विभूतिशाली भगवान हमपर प्रसन्न होवें ॥ ४१ ॥ जिनके अधर से लोभ, ऊपर के होठसे प्रीति, नासिका से कांति, स्पर्श से पशुओं के शुभसाधक काम, दोनो भौंहों से यमराज और पलकों से काल उत्पन्न हुआ है—वे महाविभूतिशाली परमेश्वर मेरे ऊपर प्रसन्न होवें ॥ ४२ ॥ पण्डितलोगभी-पंचभूत, काल, कर्म, गुण और अनित्य संसार इन सबको दुर्विभाव्य (कठिनतासे जानने योग्य) जानकर खंडन करते हैं और ज्ञानीलोग यह सब प्रपंच जिनकी योगमायासे रचा हुआ कहते हैं वह महा ऐश्वर्य वाले परमेश्वर मेरे ऊपर प्रसन्न होवें ॥ ४३ ॥ प्रशांत, शक्तिमय, स्वरूपानंदके लाभसे परिपूर्ण स्वरूप, मायासे उत्पन्नहुये गुणोंमें अनासक्त, वायुकी समान क्रीड़ा करने वाले भगवान आपको प्रणाम है ॥ ४४ ॥ हे भगवन् ! जैसे हमदेख सकें वैसेही आप अपनी आत्मा व हंसते हुये मुखका दर्शन कराओ हम व्याकुल होकर आपके देखने की इच्छा कररहे हैं ॥ ४५ ॥ हेप्रभो ! हम जिन कामके करने में असमर्थ होते हैं आप समय २ में इच्छानुसार प्रसिद्ध मूर्ति धारणकर स्वयंही उन कर्मोंको पूराकरतेहो ॥ ४६ ॥ विषयासक्त प्राणीजोकर्म करते हैं उसमें कष्टतो अधिक है पर फल सामान्यही है, वरन कभी २ तो कुछभी फल नहीं उत्पन्न होता; किंतु जोकर्म आपमें समर्पित कियेजाते हैं वह पूर्वोक्त कर्म समूहकी समान निष्फल नहीं होते ॥ ४७ ॥ कर्मथोड़े होने परभी यदि ईश्वरको समर्पित कियेजाय, तोभ्रम सफलही होता है, क्योंकि ईश्वर पुरुष के आत्मा, प्रिय और हितकारी हैं ॥ ४८ ॥ जैसे वृक्षकी मूलको जलके सींचनेपर डाल और शाखा सबही तृप्तहोजाती हैं उसी प्रकार विष्णुजी की आराधना करने से समस्तप्राणी और आत्मा काभी

हि ॥४९॥ नमस्तुभ्यमनन्ताय दुर्वितर्क्यात्मकर्मणे । निर्गुणायगुणेशाय सत्वस्था यचसाम्प्रतम् ॥ ५० ॥

इति श्रीमद्भा०म० अष्टमस्कन्धेऽमृतमथने पंचमोऽध्यायः ॥ ५ ॥

श्रीशुक उवाच ॥ एवंस्तुतः सुरगणैर्भगवान्हरिरीश्वरः । तेषामाविरभूद्राजन्सहस्रार्कोदयद्युतिः ॥ १ ॥ तेनैवसहसासर्वेदेवाः प्रतिहतेक्षणाः । नापश्यन्खंदिशः क्षौणिमात्मानञ्चकुतोविभुम् ॥ २ ॥ विरिञ्चोभगवान्दृष्ट्वासहशर्वेणतांतनुम् । स्वच्छांमरकतश्यामांकञ्जगर्भारुणेक्षणाम् ॥ ३ ॥ तप्तहेमावदातेनलसत्कौशेयवाससा । प्रसन्नचारुसर्वाङ्गींसुमुखींसुन्दरभ्रुवम् ॥ ४ ॥ महामणिकिरीटेनकेयूराभ्यांच भूषिताम् । कर्णाभरणनिर्भातकपोलश्रीमुखाम्बुजाम् ॥ ५ काञ्चीकलापवलयहार नूपुरशोभिताम् । कौस्तुभाभरणांलक्ष्मींबिभ्रतींवनमालिनीम् ॥ ६॥ सुदर्शनादिभिः स्वास्त्रैर्मूर्तिमद्भिरुपासिताम् । तुष्टावदेवप्रवरः सशर्वः पुरुषंपरम् सर्वामरगणैः साकंसर्वाङ्गैरवनिंगतैः ॥ ७ ॥ ब्रह्मोवाच ॥ अजातजन्मस्थितिसंयमायागुणायनिर्वाणसुखार्णवाय । अणोरणिम्नेऽपरिगण्यधाम्नेमहानुभावायनमोनमस्ते ॥ ८ ॥ रूपंतवैतत्पुरुषर्षभेज्यंश्रेयोर्थिभिर्वैदिकतान्त्रिकेण । योगेनधातः सहनस्त्रिलोकान्पश्याम्यमुष्मिन्नुहविश्वमूर्तौ ॥ ९ ॥ त्वय्यग्रआसीत्त्वयिमध्यआसीत्त्वय्यन्तआसीदिदमात्मतन्त्रे । त्वमादिरन्तोजगतोऽस्यमध्यंघटस्यमृत्स्नेवपर परस्मात् ॥ १० ॥ त्व

आराधन होजाता है ॥ ४९ ॥ आप अनंतहो, आपके कर्म और स्वभावका तर्कद्वारा निर्णय नहीं होसकता । आप निर्गुण और सगुण ईश्वरहो । आपसत्व गुणकाही आश्रय कियेहो । हम आपको प्रणाम करते हैं ॥ ५० ॥

इति श्रीमद्भागवतेमहापुराणेअष्टमस्कंधेसरलाभाषाटीकायांपंचमोऽध्यायः ॥ ५ ॥

श्रीशुकदेवजी बोले कि—हेराजन् ! जब देवताओंने श्रीभगवानकी इसप्रकार स्तुतिकी तब भगवान् उनके सामने प्रगटहुए । सहस्र सूर्योंके उदयहोनेसे जैसा प्रकाश होता है उसकालउनका देह उसीप्रकारसे प्रकाश पानेलगा ॥ १ ॥ इससे उन देवताओंकी आखें मुंदगई वे आकाश दिशा पृथ्वी यहांतक कि अपनको भी न देखसके; फिर भला ईश्वरको कैसे देखतहे ॥ २ ॥ तदनन्तर भगवान ब्रह्माजी व महादेवजीने उनकी मरकतमणिकी समान श्यामल स्वच्छकांति देखपाई । कमल के गर्भकसे रक्त नेत्र ॥ ३ ॥ तप्तकांचनकी सदृश पीताम्बर धारणकिये सुंदर सुप्रसन्न अंगयुक्त अतिमनोहरमुख दो सुन्दर भौंहें ॥ ४ ॥ मस्तकपर अमूल्यमणि जटित किरीट दोनों कानोमे सुंदर कुण्डल, व उनकी कांतिसे प्रकाशित कपोल उससे शोभायमान मुख कमल ॥ ५ ॥ क्षुद्रघंटिका कंकण, हार,व नूपुर कौस्तुभमणि धारणकिये, बनमाला पहिने, लक्ष्मीजीको धारण किये ॥ ६ ॥ सुदर्शनादि अस्त्र मूर्तिमान होकर उस भगवत्मूर्तिकी स्तुति कररहेथे । ऐसी मनोहर मूर्ति देखकर ब्रह्माजी और शिवजी देवताओंके साथ साष्टांग दण्डवत्‌कर भगवानकी स्तुतिकरनेलगे ॥ ७ ॥ ब्रह्मा जी बोले कि—हेभगवन् ! यह आपकीकेवल श्रीमूर्तिका आविर्भावहै, आपतो निर्गुण,जन्म,स्थिति और विनाशरहितहो । इसहीकारण पण्डितलोग आपका अपारमोक्ष सुखका सागरस्वरूप कहते हैं । तौभी आप सूक्ष्मकेभी सूक्ष्महो, परिच्छेद रहित स्वरूप और महानुभाव आपको हम बारम्बार प्रणाम करते हैं ॥८॥ हेपुरुषोत्तम ! हेविधाता ! मंगलाभिलाषीमनुष्य तांत्रिक और वैदिकयागद्वारा आपके इसीरूपका पूजन करतेहैं । विश्व इसी मूर्तिमें विद्यमान होरहाहै अतएव मैं इसमें अपनेको व सह त्रिलोकको देखताहूं ॥ ९ ॥ आप स्वाधीनहो, यह जगत आदि कालमें आपके स्वरूपमेंथा मध्य कालमें उसीमेंहै और अन्तकालमेंभी उसीमें रहेगा । मिट्टीही जैसे घटका आदि मध्य और अंतहै

मायथात्माश्रयया स्वयेदं निर्माय विश्वं तदनुप्रविष्टः । पश्यन्ति युक्ता मनसा मनीषिणो
गुणव्यवायेऽप्यगुणं विपश्चितः ॥ ११ ॥ यथाऽग्निमेधस्यमृतं च गोषु भुव्यन्नमम्बूद्य
मने च वृत्तिम् । योगैर्मनुष्या अधियन्ति हि त्वां गुणेषु बुद्ध्या कवयो वदन्ति ॥ १२ ॥ तं
त्वां वयं नाथ समुज्जिहानं सरोजनाभाऽतिचिरेप्सितार्थम् । दृष्ट्वा गता निर्वृतिमद्य स
र्वे गजा दवार्ता इव गाङ्गमम्भः ॥ १३ ॥ स त्वं विधत्स्वाखिललोकपाला वयं यदर्थास्तव
पादमूलम् । समागतास्ते बहिरन्तरात्मन्किं वान्यविज्ञाप्यमशेषसाक्षिणः ॥ १४ ॥
अहं गिरित्रश्च सुरादयो ये दक्षादयोऽग्नेरिव केतवस्ते । किं वा विदामेश पृथग्विभाता
विधत्स्व शं नो द्विजदेवमन्त्रम् ॥ १५ ॥ श्रीशुक उवाच ॥ एवं विरिञ्च्यादिभिरीडित
स्तद्विज्ञाय तेषां हृदयं तथैव । जगाद जीमूतगभीरया गिरा बद्धाञ्जलीन्संवृतसर्वकारका
न् ॥ १६ ॥ एक एवेश्वरस्तस्मिन्सुरकार्ये सुरेश्वरः । विहर्तुकामस्तानाह समुद्रोन्म
थनादिभिः ॥ १७ ॥ श्रीभगवानुवाच ॥ हन्त ब्रह्मन्नहो शम्भो हे देवा मम भाषितम् ।
शृणुतावहिताः सर्वे श्रेयो वः स्याद्यथा सुराः ॥ १८ ॥ यात दानवदैतेयैस्तावत्सन्धि
र्विधीयताम् । कालेनानुगृहीतैस्तैर्यावद्वो भव आत्मनः ॥ १९ ॥ अरयोऽपि हि सन्धे
याः सति कार्यार्थगौरवे । अहिमूषकवद्देवा ह्यर्थस्य पदवीं गतैः ॥२० ॥ अमृतोत्पाद
ने यत्नः क्रियतामविलम्बितम् । यस्य पीतस्य वै जन्तुर्मृत्युग्रस्तोऽमरो भवेत् ॥ २१ ॥

उसीप्रकार आपभी इस जगतके आदि, मध्य, और अन्तहो कारण कि आप प्रधानसेभी परहो ।
॥ १० ॥ हेभगवन् ! आपके आश्रय और आपकेही आधीन जो मायाहै तिसके द्वारा विश्वको उ-
त्पन्न करके आप उसमें प्रवेश करतेहो । तत्वज्ञानी शास्त्रज्ञ यतिगण सृष्टि होनेके पीछेभी मनद्वारा
आपके निर्गुण स्वरूपको देखतरहतेहैं ॥ ११ ॥ जैसे काठसे अग्नि, गौ से घृत, पृथ्वीसे जल, और
अनाज, तथा व्यौपार आदिसे आजीविका मिलतीहै; पंडित लोग कहतेहैं कि—उसीभांति आप सब
गुणोंमें वर्त्तमानहो, वे बुद्धिरूप उपाय द्वारा आपको गुणोंसे प्राप्त करते रहतेहैं ॥ १२ ॥ हेनाथ ! आप
के दर्शनोंकी इच्छा हमें बहुत दिनोंसे लगरहीथी हेपद्मनाभ ! योगसेभी अगम्य आपको इससमय
हमने देखा । जैसे दावाग्नि से दग्धहुआहाथी गङ्गाजलको देखकर सुखी होजाताहै आजहम आप
को देखकर वैसेही तृप्तहुएहैं ॥१३॥ समस्तलोकपालों समेत हम जिस इच्छासे आपके चरणोंकी
शरण में आये हैं इससमय आप उसको पूर्णकरो । आप अन्तर्यामी और सबके साक्षीहो, आप
को और क्या जनावैं ? ॥ १४ ॥ जैसेअग्नि से शिखाउत्पन्नहोती है तैसेही मैं, महादेव, देवता
और दक्षआदि प्रजापतिगण सब पृथक् २ आपसेही प्रकाशपाते हैं, अतएव हमसब आपके क-
ल्याणको नहीं जानते इसकारण आपही स्वयं देवता और ब्राह्मणों के कल्याणका यत्नकरो ॥१५॥
श्रीशुकदेवजी बोले कि—हे राजन् ! ब्रह्मादि देवता इसप्रकार से स्तुतिकर हाथजोड खडे हो-
गये, अन्तर्यामी भगवान उनके यथार्थ संकल्पको जान मेघकीसमान गम्भीर स्वरसे कहनेलगे ॥
॥ १६ ॥ यद्यपि नारायण अकेलेही सुरकार्य को करसकते थे परन्तु समुद्र मन्थनादि क्रीडा क-
रने की अभिलाषा से देवताओं से ॥ १७ ॥ श्रीभगवान बोले कि—हे ब्रह्मन् ! हे शम्भो ! हेदेव-
ताओं ! हेगन्धर्वो ! जिससे तुम्हारा मङ्गल होगा वहीकहताहूं—सब सावधान चित्त होकर सुनो
॥ १८ ॥ दैत्य इससमय शुक्राचार्यकी अनुकूलता प्राप्त करके विजयी हुए हैं । जाओ जबतक
तुम अपनी उन्नति न करसको उतने दिनों के लिये दैत्यों से मित्रताकरो ॥ १९ ॥ कठिनकाम
निकालने के लिये सर्प और मूसे की समान शत्रुसे मित्रताकरलेना चाहिये ॥ २० ॥ अतएव दै-
त्य और दानवों के साथ मिलकर अमृत उत्पन्न करने की शीघ्र चेष्टा करो । जिसका पानकरने

क्षिप्त्वाक्षीरोदधौसर्वावीरुत्तृणलतौषधीः । मन्थानंमन्दरंकृत्वानेत्रंकृत्वातुवासुकि
म् ॥ २२ ॥ सहायेनमयादेवानिर्मन्थध्वमतन्द्रिताः । क्लेशभाजोभविष्यन्ति दै
त्यायूयंफलग्रहाः ॥२३॥यूयंतदनुमोदध्वंयदिच्छन्त्यसुराः सुराः । नसंरम्भेणसिध्य
न्तिसर्वेऽर्थाः सान्त्वयायथा ॥ २४ ॥ नभेतव्यंकालकूटाद्विषाज्जलधिसम्भवात् ।
लोभः कार्योनवोजातुरोषः कामस्तुवस्तुषु ॥ २५ ॥ श्रीशुकउवाच । इतिदेवान्समा
दिश्य भागवान्पुरुषोत्तमः । तेषामन्तर्दधे राजन्स्वच्छन्दगतिरीश्वरः ॥ २६ ॥
अथतस्मैभगवतेनमस्कृत्यपितामहः । भवश्चजग्मतु स्वं स्वं धामोपेयुर्बलिं सुराः
॥ २७॥ दृष्ट्वारीनप्यसंयत्ताञ्जातक्षोभान्स्वनायकान् । न्यषेधद्दैत्यराट्श्लोक्यःस
न्धिविग्रहकालवित् ॥ २८ ॥ तेवैरोचनिमासीनंगुप्तंचासुरयूथपैः । श्रियापरमया
जुष्टंजिताशेषमुपागमन् ॥ २९ ॥ महेन्द्रः श्लक्ष्णयावाचासान्त्वयित्वामहामतिः ।
अभ्यभाषततत्सर्वंशिक्षितंपुरुषोत्तमात् ॥ ३० ॥ तदरोचतदैत्यस्यतत्रान्येयेऽसु
राधिपाः । शम्बरोऽरिष्टनेमिश्चयेचत्रिपुरवासिनः ॥ ३१ ॥ ततोदेवाऽसुराः कृत्वा
संविदंकृतसौहृदाः । उद्यमंपरमंचक्रुरमृतार्थेपरन्तप ॥ ३२ ॥ ततस्तेमन्दरगिरिमो
जसोत्पाट्यदुर्मदाः । नदन्तउदधिंनिन्युः शक्ताः परिघबाहवः ॥ ३३ ॥ दूरभारोद्व
हश्रान्ताः शक्रवैरोचनादयः । अपारयन्तस्तंवोढुंविवशाविजहुः पथि ॥ ३४ ॥ नि
पतन्सगिरिस्तत्रबहूनमरदानवान् । चूर्णयामासमहताभारेणकनकाचलः ॥ ३५ ॥

से मृत्युग्रस्त प्राणीभी अमरहो जाते हैं ॥ २१ ॥ क्षीर सागर मे समस्त तृण, लता, औषधि डाल कर और मन्दर पर्वत को मन्थन दण्ड, वासुकि को रज्जुकर ॥ २२ ॥ मेरी सहायता से आलस्य को छोडकर समुद्र मथनेके कार्य मे प्रवृत्तहोओ, इस से दैत्यों का क्लेश और तुम को कल्याण प्राप्तहोगा ॥ २३ ॥ हे देवताओ ! इस समय दैत्य जो चाहे उसी को तुम स्वीकार करो। देखोमित्रताद्वारा जैसा काम सिद्ध होता है विग्रहद्वारा वैसा सिद्धनहीं होता ॥ २४ ॥ सागरसे जो काल कूट विष उत्पन्न होवे उससे भयभीत न होना और जो दूसरे पदार्थ होवें उन सबो का लोभ, इच्छा व इच्छाकी असिद्धि होने से क्रोध कदापि न करना ॥ २५ ॥ श्रीशुकदेवजी बोले कि—हे राजन् ! स्वच्छन्दगामी पुरुषोत्तम भगवान् इस प्रकार देवताओं को आज्ञा दे उन्हीं के सामने अन्तर्ध्यान होगये ॥ २६ ॥ अनन्तर ब्रह्मा और महादेवजी उनको नमस्कारकर अपने २ स्थानकोगये और देवता बलिके निकटआये ॥ २७ ॥ वे युद्धकी इच्छाकरके नहीं आये थे तोभी उनको देखतेही बलिके योद्धागण अस्त्र शस्त्र लाकर संग्रामके हेतु उद्यतहुये, किन्तु बलस्वामीने उनको निवारणकिया क्योंकि वह संधि और विग्रहके समयको भलीभांति जानताथा ॥ २८ ॥ सर्वजयी राजा बलि चारोंओर असुर सेनापतियोंसे रक्षित और सुन्दरी नारियोसे सेवित सिंहासनपर विराजमान देवतागण क्रमश उसके निकटआये ॥ २९ ॥ भगवान पुरुषोत्तमने जो२ उपदेश दियाथा महामति इन्द्रने मधुर वचनोंसे सांत्वना देकर उन सबोंका वर्णन बलिसे किया ॥ ॥ ३० ॥ उनके वाक्य बलि शम्बर अरिष्टनेमि और बडे२ असुरपतियोंको तथा त्रिपुरनिवासियोंको बहुत अच्छेलगे ॥ ३१ ॥ हेशत्रुसूदन ! फिर सुर और असुर मित्रता बांध परस्पर मित्रहो अमृत प्राप्त करनेके निमित्त उद्यतहुए ॥ ३२ ॥ देव और दानवोंकी भुजाएं परिघकी समान दीर्घथीं, वे सबही बलसे अहंकारी और अभिमानथे, बल पूर्वक मन्दर पर्वतका उखाडकर सिंहनाद करते २ उसको समुद्रकी ओर लेचले, ॥ ३३ ॥ किंतु बहुत दूरतक भार लेजानेके कारण इन्द्र, और बलि आदि सभाने श्रमित होकर मार्गमें पर्वतको छोडदिया ॥ ३४ ॥ मन्दराचलने वहां गिरकर अपने

तांस्तथा भग्नमनसो भग्नबाहूरुकन्धरान्। विज्ञाय भगवांस्तत्र बभूव गरुडध्वज ॥ ३६ ॥ गिरिपातविनिष्पिष्टान् विलोक्यामरदानवान्। ईक्षया जीवयामास निर्जरान्निर्व्रणान्यथा ॥ ३७ ॥ गिरिं चारोप्य गरुडे हस्तेनैकेन लीलया। आरुह्य प्रययावब्धिं सुरासुरगणैर्वृतः ॥ ३८ ॥ अवरोप्य गिरिं स्कन्धात् सुपर्णः पततां वरः। ययौ जलान्त उत्सृज्य हरिणा स विसर्जितः ॥ ३९ ॥

इति श्रीमद्भागवते महापुराणेऽष्टमस्कन्धे षष्ठोऽध्यायः ॥ ६ ॥

श्रीशुक उवाच। ते नागराजमामन्त्र्य फलभागेन वासुकिम्। परिवीय गिरौ तस्मिन्नेत्रमब्धिं मुदान्विताः ॥ १ ॥ आरेभिरे सुसंयत्ता अमृतार्थे कुरूद्वह। हरिः पुरस्ताज्जगृहे पूर्वं देवास्ततोऽभवन् ॥ २ ॥ तन्नैच्छन्दैत्यपतयो महापुरुषचेष्टितम्। न गृह्णीमो वयं पुच्छमहेरङ्गममङ्गलम् ॥ ३ ॥ स्वाध्यायश्रुतसंपन्नाः प्रख्याता जन्मकर्मभिः। इति तूष्णीं स्थितान्दैत्यान्विलोक्य पुरुषोत्तमः ॥ ४ ॥ स्मयमानो विसृज्याग्रं पुच्छं जग्राह सामरः। कृतस्थानविभागास्त एवं कश्यपनन्दनाः ॥ ५ ॥ ममन्थुः परमायत्ता अमृतार्थं पयोनिधिम्। मथ्यमानेऽर्णवे सोऽद्रिरनाधारो ह्यपोऽविशत् ॥ ६ ॥ ध्रियमाणोऽपि बलिभिर्गौरवात्पाण्डुनन्दन। ते सुनिर्विण्णमनसः परिम्लानमुखश्रियः। आसन्स्वपौरुषे नष्टे दैवेनातिबलीयसा ॥ ७ ॥ विलोक्य विघ्नेशविधिं तदेश्वरो दुरन्तवीर्योऽवितथाभिसन्धिः। कृत्वा वपुः काच्छपमद्भुतं महत्प्रविश्य तोयं

मारामारमें अनेक देवता दानवोंका चूर्ण करडाला ॥ ३५ ॥ भगवानने उनको भग्नबाहु, भग्नकन्ध और भग्नचित्त जानकर गरुडपर सवारहो उस स्थानपर प्रगटहुए, ॥ ३६ ॥ और देवता तथा दानवोंको पहाडके गिरनेसे पिसाहुआ देखा भगवानने अपने कटाक्षद्वारा उनको फिर जीवित किया वे पहिलेकी समान स्वस्थ और व्रणहीन होकर उठे ॥ ३७ ॥ अन्तमें नारायण सहजहीमें पहाडको एकहाथसे उठाय गरुडकी पीठपरधर समुद्रकी ओरको चले और असुर सुर उनको घेरकर चलने लगे। तदनन्तर पक्षिराज गरुडजी कंधेसे पहाडको उतार समुद्रके तटपर रख नारायणकी आज्ञासे वहांसे चलेगये ॥ ३८ । ३९ ॥

इतिश्रीमद्भागवतेमहापुराणअष्टमस्कन्धेसरलाभाषाटीकायांषष्ठोऽध्यायः ॥ ६ ॥

श्रीशुकदेवजी बोले कि—" सागर के मथने से जो अमृत उत्पन्न होगा तुमको भी उसका भाग देंगे " हेकुरुश्रेष्ठ देवता और दानवोंने इसप्रकार समझाकर नागराज वासुकि को रज्जू (नेती) बनाय उस पहाडमें लपेट दिया और सबही सावधान हो एकाग्र चित्तसे अमृतप्राप्ति के निमित्त समुद्र मथने में प्रवृत्तहुए। नारायण ने पहिले देवताओं के साथ वासुकि के मुखका भाग पकडा ॥ १–२ ॥ परन्तु दैत्यों ने भगवान के इसकार्य को स्वीकार न किया और कहनेलगे कि— " हम वेदाध्ययन करते हैं हमने शास्त्रकी भी शिक्षापाई है जन्मकर्मद्वारा हम सर्वत्र प्रसिद्ध हैं, अतएव हमसर्प की पूंछ न पकडेंगे, क्योंकि यह अमङ्गल है यह कहकर वे चुप खडे होगये। दैत्यों ने इसबातको सुनकर भगवान ने हँसकर देवताओं समेत सर्प के आगेका भाग छोडदिया और पिछलाभाग पकडलिया। इसप्रकार से भगवान के स्थानविभाग करदेने पर वे कश्यपनन्दन दानवगण बडे यत्नसे अमृतके निमित्त समुद्रको मथनलगे। हे पाण्डुनन्दन! समुद्र मथित होने लगा; किन्तु मन्दर पर्वतका कोई आधार न था, और यद्यपि असुर और सुर उसको बहुत बलपूर्वक धारण किये थे परन्तु तो भी वह अत्यन्त बोझ के कारण समुद्र के तल में चलागया। बलवान दैवको इसप्रकार से पौरुष नाश करते देख सुर असुर गण अधीर होगये, उनके

गिरिमुज्जहार ॥ ८ ॥ तमुत्थितंवीक्ष्यकुलाचलंपुनः समुद्यतानिर्मथितुंसुरासुराः दधारपृष्ठेनस लक्षयोजनप्रस्तारिणा द्वीपइवापरोमहान् ॥ ९ ॥ सुरासुरेन्द्रैर्भुजवीर्यवेपितंपरिभ्रमन्तं गिरिमङ्गपृष्ठतः । बिभ्रत्तदावर्तनमादिकच्छपो मेनेऽङ्गकण्डूयनमप्रमेयः ॥ १० ॥ तथाऽसुरानाविशदासुरेण रूपेणतेषांबलवीर्यमीरयन् । उद्दीपयन्देवगणांश्चविष्णुर्दैवेन नागेन्द्रमबोधरूपः ॥ ११ ॥ उपर्यगेन्द्रंगिरिराडिवान्य आक्रम्यहस्तेनसहस्रबाहुः । तस्थौदिविब्रह्मभवेन्द्रमुख्यैरभिष्टुवद्भिः सुमनोभिवृष्टः ।१२ उपर्यधश्चात्मनिगोत्रनेत्रयोः परेणतेप्राविशतासमेधिताः । ममन्थुरब्धिंतरसा मदोत्कटा महाद्रिणाक्षोभितनक्रचक्रम् ॥ १३ ॥ अहीन्द्रसाहस्रकठोरदृङ्मुखश्वासाग्निधूमाहतवर्चसोऽसुराः । पौलोमकालेयबलील्वलादयो दवाग्निदग्धाःसरलाइवाभवन् ॥ १४ ॥ देवांश्च तच्छ्वासशिखाहतप्रभान्धूम्राम्बरस्रग्वरकंचुकाननान् । समभ्यवर्षन्भगवद्वशाघना ववुःसमुद्रोर्म्युपगूढवायवः ॥१५॥ मथ्यमानेतथासिन्धो देवासुरवरूथपैः । यदासुधानजायेत निर्ममन्थाजितःस्वयम् ॥ १६ ॥ मेघश्यामः कनकपरिधिः कर्णविद्योतविद्युन्मूर्ध्निभ्राजद्विलुलितकचःस्रग्धरोरक्तनेत्रः । जैत्रैर्दोर्भिर्जगदभयदैर्दन्दशूकंगृहीत्वा मथ्नन्मथ्नाप्रतिगिरिरिवाशोभताथोधृताद्रिः१७

मुखकी कांति मलीन होगई । अनन्तशक्ति और सत्य संकल्प भगवान ने विघ्नेश्वर का कियाहुआ विघ्नजान अद्भुत महत् कच्छप शरीर धारणकर जल में पैठ पहाड़को उठाया । पहाड़ को उठता देख सुरासुर गण फिर उसके मथने में प्रवृत्तहुए । कूर्मरूपी भगवान ने एक द्वीप की समानलाख योजन के विस्तारवाली पीठमें उस पहाड़को धारण किया ॥ ३—९ ॥ हेराजन्! बलवान देवता और असुरों के पराक्रम से चलायमान, व घूमतेहुए पहाड़के पीठ में घिसने से कच्छप भगवान को खुजलीके सुखका अनुभव होनेलगा ॥ १० ॥ अनन्तर उन्होंने असुराकार से असुरोंके देहमें और देवाकार से देवताओं के देह में, प्रवेशकर उनके बल, पराक्रम को बढा और गुप्तरूप से सर्पके भीतर प्रवेशकर उसके बलवीर्य को बढाया ॥ ११ ॥ तथासहस्र बाहु द्वारा गिरिराज मन्दिर के ऊपरीभागको धारणकर आकाशमण्डल में दूसरे गिरिराज की समान शोभा पानेलगे । ब्रह्मा, इन्द्र और शिवआदि देवता उनकी स्तुति कर २ के फूल बरसानेलगे ॥ १२ ॥ भगवान विष्णुजी के, ऊपर, नीचे, पर्वत, वासुकि नाग, दैत्य तथा देवताओं में उस २ रूप से प्रवेश करने पर भगवान के बलसे बढे हुए बडे पराक्रमी देवासुरगण इसप्रकार से समुद्रको मथने लगेकि जल में विहारकरनेवाले मकर, ग्राह आदि हिंसक जीव जन्तु व्याकुल होगये ॥ १३ ॥ फिर नागराजके सहस्र कठोर नेत्रों से, मुख के श्वास से धूँमयुक्त अग्नि निकली। कि जिससे पौलोम, कालेय, और इल्वल आदि असुर दावाग्नि से जलेहुए देवदारु वृक्षके समान प्रभारहित होगए ॥ १४ ॥ श्वासकी अग्नि शिखासे देवताओं की भी प्रभामलीन होगई, और वस्त्र, माला, कवच, तथा मुखमण्डल धूम्र वरण के होगये; परन्तु भगवान के वशवर्त्ती मेघ उनके ऊपर जल बरसाने लगे और वायु समुद्रकी तरङ्गो से मिल शीतलहोकर चलने लगा; अतएव असुरोंकी समान वह प्रभारहित न हुए ॥ १५ ॥ इस प्रकार देवता और दैत्येश्वर समुद्र का मन्थनकररहे थे, किन्तु जब अमृत उत्पन्न नहीं हुआ, तब स्वयं भगवान उसको मथनेलगे ॥ १६ ॥ उसकाल घनश्याम, पीताम्बर धारण किये, कानों में कुण्डल पहिन, बिखरेहुए केशों से देदीप्यमान, माला धारणकिये, अरुणनेत्र, पर्वतको धारे, जगतको अभयदेनेवाले भगवान अपनी भुजाओं से सर्प को पकड़कर पर्वत से समुद्र का मन्थन करतेहुए ऐसे शोभित होनेलगे मानो पर्वत के समीप दू-

निर्मथ्यमानादुदधेरभूद्विषं महोल्बणंहालहलाह्वमग्रतः । संभ्रान्तमीनोन्मकराहिक
च्छपात्तिमिद्विपग्राहतिमिङ्गिलाकुलात् ॥ १८ ॥ तदुग्रवेगंदिशिदिश्युपर्य
धो विसर्पदुत्सर्पदसह्यमप्रति । भीताःप्रजादुद्रुवुरङ्गसेश्वरा अरक्ष्यमाणाःशरणंस
दाशिवम् ॥ १९ ॥ विलोक्यतंदेववरंत्रिलोक्या भवायदेव्याऽभिमतंमुनीनाम् ।
आसीनमद्रावपवर्गहेतोस्तपो जुषाणंस्तुतिभिःप्रणेमुः ॥ २० ॥ प्रजापतयऊचुः ॥
देवदेवमहादेव भूतात्मन्भूतभावन । त्राहिनःशरणापन्नांस्त्रैलोक्यदहनाद्विषात् ॥
॥ २१ ॥ त्वमेकःसर्वजगत ईश्वरोबन्धमोक्षयोः । तंत्वामर्चन्तिकुशलाः प्रपन्नार्ति
हरंगुरुम् ॥ २२ ॥ गुणमय्यास्वशक्त्याऽस्य सर्गस्थित्यप्ययान्विभो । धत्सेयदा
स्वदृग्भूमन्ब्रह्मविष्णुशिवाभिधाम् ॥ २३ ॥ त्वंब्रह्मपरमंगुह्यं सदसद्भावभावनः ।
नानाशक्तिभिराभातस्त्वमात्माजगदीश्वरः ॥ २४ ॥ त्वंशब्दयोनिर्जगदादिरात्मा
प्राणेन्द्रियद्रव्यगुणस्वभावः । कालःक्रतुःसत्यमृतञ्चधर्मस्त्वय्यक्षरंयत्त्रिवृदामन
न्ति ॥ २५ ॥ अग्निर्मुखंतेऽखिलदेवतात्मा क्षितिंविदुर्लोकभवांघ्रिपंकजम् । कालं
गतिंतेऽखिलदेवतात्मनो दिशश्चकर्णौरसनंजलेशम् ॥ २६ ॥ नाभिर्नभस्तेश्वसनं
नभस्वान्सूर्यश्च चक्षूंषिजलंस्मरेतः । परावरात्माश्रयणंतवात्मा सोमोमनोद्यौर्भगव
ञ्छिरस्ते ॥ २७ ॥ कुक्षिःसमुद्रागिरयोऽस्थिसंघा रोमाणिसर्वौषधिवीरुधस्ते ।

सरा पर्वतही विद्यमान है ॥ १७ ॥ हे राजन् ! समुद्र के इसप्रकार मथने पर मछली, मगर, सर्प और कछुए चंचल व तिमि, हस्ती, ग्राह, और तिमिङ्गिलकुल व्याकुल हो उठे । तब उस समुद्र से सबसे पहिले हलाहल नामक विष उत्पन्न हुआ ॥ १८ ॥ वह उग्र वेगवाला भयङ्कर विष ऊपर नीचे और सब दिशाओंमें फैलनेलगा; अतएव उसके दारुण असह्य हो उठने पर प्रजा और प्रजापतिगण अत्यन्त भयभीत हो सदाशिवकी शरण में गये क्योंकि उनके अतिरिक्त और कोई उन्हें नहीं बचासकता था ॥ १९ ॥ त्रिलोकी के मङ्गल के निमित्त, पार्वती के सङ्ग कैलाश पर्वत में विराजमान, मुनियों के निमित्त उन्हीं के मनोगत तपस्याका आचरण करते हैं; सबों ने शिवजीको इसप्रकार से विराजमान देख उनका प्रणामकर उनकीस्तुति का प्रारम्भ किया ॥ २० ॥ प्रजापति बोले कि—हे देव देव ! हे महादेव ! हे भूतात्मन् ! हे भूतभावन् ! हम सबआपकी शरण में आये हैं; आप हमारी त्रिलोकी के जलानेवाले विष से रक्षाकरो ॥ ॥ २१ ॥ आप सब जगत के बन्धन और मुक्ति के कर्त्ता, गुरु और दुःखित मनुष्योंके दुःखको दूर करने वाले हो । इसी कारण ज्ञानी लोग आपकी पूजा करते हैं ॥ २२ ॥ हे भूमन् ! हेविभो ! आपका ज्ञान स्वतः सिद्ध है । आप अपनी गुणशक्ति द्वारा इसजगतकी उत्पत्ति, स्थिति और संहार की इच्छा से ब्रह्मा, विष्णु और शिवनाम धारण करते हो ॥२३॥ आप परम गोपनीय ब्रह्महो आपहीसे देवता, पशु, पक्षी आदि समस्त पदार्थ प्रकाशपाते हैं । आप जगदीश्वर और आत्माहो आप नानाशक्तियों द्वारा जगतरूप से परिणत (बदलना) होते हो ॥ २४ ॥ आप वेदके कारण जगत के आदि और आत्मा हो । आपके गुणोंसेही प्राण, इन्द्रिय और शरीर उत्पन्न होता है । वही आप राजसादि तीनों प्रकार के अहङ्कार स्वभाव, काल, संकल्प और सत्य तथा ऋतनामक धर्म हो । आपही त्रिगुणात्मक प्रधान पदार्थों के आश्रय हो ॥ २५ ॥ हे लोक प्रभव ! सर्वदेव मय अग्नि आपका मुख, पृथ्वी आपकी चरणकमल, काल आपकी गति, दिशाएं आपके कर्ण, वरुण आपकी जिह्वा ॥ २६ ॥ आकाश आपकी नाभि, वायु आपका श्वास, सूर्य आपका नेत्र और जल आपका वीर्य है । आप सबके आत्मा, ऊँच नीच, जीवात्मागणके

छन्दांसि साक्षात्तव सप्त धातवस्त्रयीमयात्मन्हृदयं सर्वधर्मः ॥ २८ ॥ मुखानि पञ्चोपनिषदस्तवेश यैस्त्रिंशदष्टोत्तरमन्त्रवर्गः । यत्तच्छिवाख्यं परमार्थतत्त्वं देव स्वयं ज्योतिरवस्थितिस्ते ॥ २९ ॥ छाया त्वधर्मोर्मिषु यैर्विसर्गो नेत्रत्रयं सत्त्वरजस्तमांसि । सांख्यात्मनः शास्त्रकृतस्तवेक्षा छन्दोमयो देव ऋषिः पुराणः ॥ ३० ॥ न ते गिरित्राखिललोकपालविरिञ्चवैकुण्ठसुरेन्द्रगम्यम् । ज्योतिः परं यत्र रजस्तमश्च सत्त्वं न यद्ब्रह्म निरस्तभेदम् ॥ ३१ ॥ कामाध्वरत्रिपुरकालगराद्यनेकभूतद्रुहः क्षपयतः स्तुतये न तत्ते । यस्त्वन्तकाल इदमात्मकृतं स्वनेत्रवह्निस्फुलिङ्गशिखया भसितं न वेद ॥ ३२ ॥ ये त्वात्मरामगुरुभिर्हृदि चिन्तिताङ्घ्रिद्वन्द्वं चरन्तमुमया तपसाऽभितप्तम् । कत्थन्त उग्रपरुषं निरतं श्मशाने ते नूनमूतिमविदंस्तव हातलज्जाः ॥ ३३ ॥ तत्तस्य ते सदसतोः परतः परस्य नाञ्जः स्वरूपगमने प्रभवन्ति भूम्नः । ब्रह्मादयः किमुत संस्तवने वयं तु तत्सर्गसर्गविषया अपि शक्तिमात्रम् ॥ ३४ ॥ एतत्परं प्रपश्यामो न परं ते महेश्वर । मृडनाय हि लोकस्य व्यक्तिस्तेऽव्यक्तकर्मणः ॥ ३५ ॥ श्रीशुक उवाच ॥ तद्वीक्ष्य व्यसनं तासां कृपया भृशपीडितः । सर्वभूतसुहृद्देव इदमाह सतीं प्रियाम् ॥ ३६ ॥ शिव उवाच ॥ अहो बत भवान्येतत् प्रजानां पश्य वैशसम् । क्षीरोदमथनोद्भूतात् कालकूटादुपस्थितम् ॥ ३७ ॥ आसां प्राणपरीप्सूनां विधेयमभयं हि मे । एतावान्हि प्रभोरर्थो

अा॰अयहो हेभगवन् चन्द्रमा आपका मन, स्वर्ग आपका मस्तक, ॥ २७ ॥ वेदत्रयी आपकी मूर्ति समुद्र समूह आपकी कुक्षि पर्वत आपकी अस्थि, समस्त औषधि लता आपके रोम साक्षात् वेद आपकी सप्तधातु, और धर्म आपका हृदयहै ॥२८॥ हेईश्वर! पंचउपनिषद् अर्थात् सत्पुरुष, अघोर, सद्योजात, वामदेव और ईशान यही पंचमन्त्र आपके मुखहैं । इन्हीं मुखोंसे १३८ मंत्रोंकी उत्पत्ति हुईहै । साक्षात् ज्योतिस्वरूप प्रसिद्ध शिवनामक परमार्थ तत्त्वआपकी शांति अवस्थाहै ॥ २९ ॥ अधर्मकी लहरें (लोभ, दंभ आदि) आपकी छाया; और सत्व, रज तम आपके तीनों नेत्रहैं । शास्त्रके कर्ताहो सांख्य आपकी आत्मा और वेद आपकी दृष्टि, है ॥ ३० ॥ हेगिरीश ! आपकी परमज्योति—समस्त लोकपाल, ब्रह्मा, विष्णु और इन्द्र किसीको भी ज्ञात नहीं है वह आपकी परमजोति भेदरहित ब्रह्महै उसमें सत्व, रज और तमका कुछभी सद्भाव नहींहै ॥ ३१ ॥ आपने काम, यज्ञ, त्रिपुर और कालकूट आदिक अनेक हिंसक पदार्थों व जीवोंका संहार कियाहै, परन्तु उससे आपकी प्रशंसानहीं है क्योंकि आपका रचाहुआ यह विश्व प्रलयकालमें आपके नेत्र सम्बन्धी अग्निकी चिनगारीसे ऐस दग्ध होजाताहै कि आप उसको जानभी नहींसकते ॥ ३२ ॥ विश्वके कल्याण चाहनेवाले साधु लोग आपके चरणोंका ध्यान किया करतेहैं तो भी आप तपस्या द्वारा तापित होतेहो, अतएव जो आपको भगवती पार्वतीके साथ वास करते देखकर कामी और श्मशानमें घूमतेहुये देखकर क्रूर व हिंसक बिचारते हैं वे निर्लज्जहैं ॥ ३३ ॥ क्या वे आपकी लीला जानसकतेहैं? आप सदसत्‌रूपी श्रेष्ठ और अति महत्‌हो । ब्रह्मा दि देवता भी आपके स्वरूपको नहीं जानसकते फिर वे सब आपकी स्तुतिकैसे करसक्तेहैं ? हम तो उनकी सृष्टिमें एक तुच्छ प्राणीहैं अतएव हममें स्तुति करनेकी सामर्थ्य कहांहै ? तो भी यथा शक्ति स्तुति करतेहैं ॥३४॥हेमहेश्वर!हमने यद्यपि आपकेऔर दूसरे रूपको नहीं देखा तौभी इसी रूपको देखकर कृतार्थ होगये।आपके सब कर्म अव्यक्तहैं; केवल लोककी रक्षाके निमित्तही आप का यह रूप प्रकाशमान रहताहै ॥ ३५ ॥ श्रीशुकदेवजी बोले कि—हेराजन् ! सब प्राणियोंके सुहृद् रूप भगवान शंकर प्रजागणकी इस आपत्तिको देखकर करुणासे अति पीड़ितहो प्रियतमा-सतीसे कहनेलगे—कि ॥ ३६ ॥ भवानि ! देखो, क्षीरसागरके मथनेसे उत्पन्नहुये कालकूटद्वारा

र्थो महीनमस्पिफकनम् ॥ ३८ ॥ प्राणैः स्वैः प्राणिनः पान्ति साधवः क्षणभङ्गुरैः । ब द्धवैरेषु भूतेषु मोहितेष्वात्ममायया ॥ ३९॥ पुंसः कृपयतो भद्रे सर्वात्मा प्रीयते हरिः । प्रीते हरौ भगवति प्रीयेऽहं सचराचरः । तस्मादिदं गरं भुञ्जे प्रजानां स्वस्तिरस्तु मे ॥ ४० ॥ श्रीशुक उवाच ॥ एवमामन्त्र्य भगवान् भवानीं विश्वभावनः । तद्विषं जग्धुमारेभे प्र भावज्ञाऽन्वमोदत ॥ ४१ ॥ ततः करतलीकृत्य व्यापि हालाहलं विषम् । अभक्षयन्म हादेव कृपया भूतभावनः ॥ ४२ ॥ तस्यापि दर्शयामास स्ववीर्यं जलकल्मष. । य च्चकार गले नीलं तच्च साधोर्विभूषणम् ॥ ४३ ॥ तप्यन्ते लोकतापेन साधवः प्राय- शो जनाः । परमाराधनं तद्धि पुरुषस्याखिलात्मनः ॥ ४४ ॥ निशम्य कर्म तच्छम्भो र्देवदेवस्य मीढुषः । प्रजा दाक्षायणी ब्रह्मा वैकुण्ठश्च शशंसिरे ॥ ४५ ॥ प्रस्कन्नं पिब त पाणेर्यत्किंचिज्जगृहुः स्म तत् । वृश्चिकाहिविषौषध्यो दन्दशूकाश्च येऽपरे ॥४६ ॥

इतिश्रीमद्भा० म० अष्टम० अमृतमथने सप्तमोऽध्यायः ॥ ७ ॥

श्रीशुक उवाच । पीते गरे वृषाङ्केण प्रीतास्तेऽमरदानवाः । ममन्थुस्तरसा सिन्धुं हविर्धानी ततोऽभवत् ॥ १ ॥ तामग्निहोत्रीमृषयो जगृहुर्ब्रह्मवादिनः । यज्ञस्य देव यानस्य मेध्याय हविषे नृप ॥ २ ॥ तत उच्चैःश्रवा नाम हयोऽभूच्चन्द्रपाण्डुरः । तस्मि न्बलिः स्पृहां चक्रे नेन्द्र ईश्वरशिक्षया ॥ ३ ॥ तत ऐरावतो नाम वारणेन्द्रो विनिर्गत ।

प्रजागणको कैसा दुःख उपस्थित हुआहै । यह प्रजा अपने प्राणोंकी रक्षा चाहती है, इनको अभय- दान देना मेराकर्तव्यहै । दीनपुरुषोंकी सहायता करनाही शक्तिवानका कार्य है ३७।३८ इसहीकारण साधुलोग जीवनको क्षणभंगुर जान प्राणियोंकी रक्षाकरतेहैं। प्राणी दैवीमायासे मोहितहो एकदूसरे का हिंसा करते रहतेहैं ॥ ३९ ॥ जो मनुष्य उनपर कृपा प्रकाश करताहै सर्वात्मा हरि उसपर प्रसन्न होतेहैं । भगवान हरिके संतुष्ट होनेसे सबही प्राणी उसपर संतुष्ट होजाते हैं, अतएव मैं प्रजा के कल्याणके निमित्त इस विषका पान करूंगा, ॥ ४० ॥ श्रीशुकदेवजी बोले कि—विश्वभावन भगवान महादेवजीने पार्वतीजीसे यह कह उस हलाहलके पीनेका आरम्भ किया । पार्वतीजी उनका प्रभाव जानतीथीं अतएव उन्होंनेभी स्वीकार करलिया ॥ ४१ ॥ भूतभावन महादेवजी दुःखदायी सबमें व्याप्तहुए उस हलाहलको हथेलीपर रख भक्षण करगए, ॥ ४२ ॥ जलसे उत्पन्नहुए उस विषने महादेवजीपरभी अपना पराक्रम प्रकाश किया उससे उनका कण्ठ नीला होगया, परन्तु वह नीलवर्ण उनके कण्ठका भूषण स्वरूपहुआ ॥ ४३ ॥ साधुजन मनुष्योंके दुःखसे दुःखित होते रहते हैं; दूसरेके दुःखमे कृपाका प्रकाश करनाही भगवानकी श्रेष्ठ आराधनाहै ॥ ४४ ॥ दयामय महादेवजीके इसकामको देखकर पार्वतीजी, प्रजा, ब्रह्माजी और विष्णुजी उनकी प्रशंसाकरनेलगे। ॥४५॥ महादेवजीके विषपीनेके समय कुछ थोडासा उनके हाथसे टपकगयाथा, उसे सांप, बिच्छूआदि विषैले जानवरों नेव विषैली औषधियोंने ग्रहण किया ॥ ४६ ॥

इतिश्रीमद्भागवतेमहापुराणेअष्टमस्कन्धसरलाभाषाटीकायांसप्तमोऽध्याय ॥ ७ ॥

श्रीशुकदेवजी बोलेकि—हे राजन् ! वृषभवाहन महादेवजी के विषपान करने के उपरांत देव और दानव प्रसन्नहो फिर बल पूर्वक सागरको मथने लगे । उस मथन से कामधेनु प्रगटहुई ॥ १ ॥ ब्रह्मवादी ऋषियों ने, ब्रह्मलोक के मार्गको प्राप्त कराने वाले यज्ञसबधी पवित्र घृतके निमित्त उस अग्निहोत्रीको ग्रहणकिया ।२॥ अनंतर चन्द्रमाकी सदृश श्वेतवर्ण का उच्चैश्रवा नाम घोडा उत्पन्न हुआ, राजा बलिने उस घोडकी अभिलाषा की, भगवान के निवारण करने से इन्द्रने उसको ग्रहण करनेकी इच्छा न की ॥ ३ ॥ अनंतर ऐरावत नाम गजपति समुद्रसे उत्पन्न हुआ, कि जिसने अपने

दन्तैश्चतुर्भिः श्वेताद्रेर्हरन्भगवतो महिम् ॥४॥ कौस्तुभाख्यमभूद्रत्नं पद्मरागो महोदधेः। तस्मिन्हरिः स्पृहां चक्रे वक्षोऽलंकरणे मणौ ॥ ५ ॥ ततोऽभवत्पारिजातः सुरलोकविभूषणम्। पूरयत्यर्थिनो योऽर्थैः शश्वद्भुवि यथा भवान् ॥ ६ ॥ ततश्चाप्सरसो जाता निष्ककण्ठ्यः सुवाससः। रमण्यः स्वर्गिणां वल्गुगतिलीलावलोकनैः ७। ततश्चाविरभूत्साक्षाच्छ्री रमा भगवत्परा। रंजयन्ती दिशः कान्त्या विद्युत्सौदामनी यथा ॥ ८॥ तस्यां चक्रुः स्पृहां सर्वे ससुरासुरमानवाः। रूपौदार्यवयोवर्णमहिमाक्षिप्तचेतसः ॥ ९ ॥ तस्या आसनमानिन्ये महेन्द्रो महदद्भुतम्। मूर्तिमत्यः सरिच्छ्रेष्ठा हेमकुम्भैर्जलं शुचि ॥ १० ॥ आभिषेचनिका भूमिराहरत्सकलौषधीः। गावः पंच पवित्राणि वसन्तो मधुमाधवौ ॥ ११ ॥ ऋषयः कल्पयांचक्रुरभिषेकं यथाविधि ॥ जगुर्भद्राणि गन्धर्वा नट्यश्च ननृतुर्जगुः ॥ १२ ॥ मेघा मृदंगपणवमुरजानकगोमुखान्। व्यनादयंछंखवेणुवीणास्तुमुलनिस्वनान् ॥ १३ ॥ ततोऽभिषिषिचुर्देवीं श्रियं पद्मकरां सतीम्। दिगिभाः पूर्णकलशैः सूक्तवाक्यैर्द्विजेरितैः ॥ १४ ॥ समुद्रः पीतकौशेयवाससी समुपाहरत्। वरुणः स्रजं वैजयन्तीं मधुनामत्तषट्पदाम् ॥ १५ ॥ भूषणानि विचित्राणि विश्वकर्मा प्रजापतिः। हारं सरस्वती पद्ममजो नागाश्च कुंडले ॥ १६ ॥ ततः कृतस्वस्त्ययनोत्पलस्रजं नदद्द्विरेफां परिगृह्य पाणिना। चचालवक्त्र सुकपोलकुण्डलं सव्रीडहासं दधती सुशोभनम् ॥ १७॥ स्तनद्वयं चातिकृशोदरी स

श्वेतवर्ण व शिखर की समान चारदातों से कैलाश की शोभा छीनली थी ॥ ४ ॥ हे महाराज ! अनंतर ऐरावत आदि आठ दिग्गज व अभ्रमू आदि आठ हथिनिएं उत्पन्न हुई। क्षीरसागर से कौस्तुभ नामक मणि उत्पन्न हुई; नारायण ने वक्षःस्थल मे धारण करने के निमित्त उसकी इच्छा की ॥ ५ ॥ तदुपरांत स्वर्गका भूषण स्वरूप कल्पवृक्ष उत्पन्न हुआ। हे राजन् ! पृथ्वीपर आप जैसे याचकों की इच्छा पूर्णकरतेहो, उसी भांति कल्प वृक्ष स्वर्गमें निरंतर याचकों की इच्छापूर्ण करता है ॥ ६ ॥ फिर कंठमें पदक धारण कियेहुये, सुंदर वस्त्र पहिने अप्सरा उत्पन्न हुई, जो अपनी मनोहर गति विभ्रम और विलोकन से स्वर्ग वासियोंको आसक्ति उत्पन्न करातीहैं ॥७॥ अंतमें अपने अंगकी प्रभासे दिशाओं को प्रकाशित करती हुई हरिपरायण साक्षात् लक्ष्मी इसी सुदामा पर्वत से उत्पन्न हुई बिजली की समान समुद्रसे उत्पन्न हुई ॥ ८ ॥ उनके रूप, उदारता वय, वर्ण, आदिकी महिमा से चित्त मोहितहो जानेके कारण सुर, असुर और मनुष्य सबही उनकी चाहना करनेलगे ॥ ९ ॥ इन्द्रने उनको अति अद्भुत आसन लाकर दिया और मूर्तिमान नदियोंने सोनेके कलशों में पवित्र जल ला २ कर अर्पण किया ॥ १० ॥ इसी प्रकार से पृथ्वी–अभिषेक के योग्य समस्त औषधियें; गौयें—पंचगव्य; और बसंत ऋतुने चैत्र वैशाख के फल फूल लाकर अर्पण किये ॥ ११ ॥ अनंतर ऋषियों ने यथारीति से अभिषेक कार्य संपादन किया। गंधर्व मंगल पाठ करनेलगे, नटियें नाचने में प्रवृत्त हुई ॥ १२ ॥ और सब देव—मृदंग, पणव, मुरज, नकारे, गोमुख, शंख, वेणु और वीणा आदि बाजे बजाने लगे ॥ १३ ॥ दिग्गजो नें सोने के कलशों से, कमल हाथमें लियेहुये लक्ष्मीका अभिषेक किया, विप्रवेद मंत्रका पाठ करने लगे ॥ १४ ॥ समुद्र ने पहिन ने का पीतवस्त्र; वरुण, जिसपर भौंरेगुंज रहे हैं एसी वैजयन्ती माला; प्रजापति विश्वकर्माने नानाप्रकारके आभूषण, सरस्वतीने हार, ब्रह्माने कमल और नागोंने दो कुंडल लाकर लक्ष्मीजीको दिये ॥ १५–१६ ॥ तदुपरांत मांगलिक वेषसे सजकर कमलादेवी कोमल हाथमें एक सुन्दर मालालेकर उसको घुमानेंलगीं। भौंरे उस मालापर बैठकर बारम्बार गुणगान करनेलगे। लक्ष्मीजीके कानोंके कुण्डल कपोलोंपर झूमतेहुए, अत्यन्त शोभायमान होरहेथे, और

मं निरन्तरंचन्दनकुंकुमोक्षितम् ।ततस्ततो नूपुरवल्गुसिंजितैर्विसर्पती हेमलतेवसा बभौ ॥१८॥ विलोकयन्तीनिरवद्यमात्मनः पदं ध्रुवंचाव्यभिचारिसद्गुणम् । गन्ध र्वयक्षासुरसिद्धचारणत्रैविष्टपेयादिषु नान्वविन्दत ॥ १९ ॥ नूनंतपोयस्यनमन्युनि र्जयोज्ञानं क्वचित्तच्चनसंगवर्जितम् । कश्चिन्महांस्तस्यन कामनिर्जयः सईश्वरः किंपरतोव्यपाश्रयः ॥ २० ॥ धर्मःक्वचित्तत्रनभूतसौहृदं त्यागःक्वचित्तत्रनमुक्ति कारणम् । वीर्यंनपुंसोऽस्त्यजवेगनिष्कृतं नहिद्वितीयोगुणसङ्गवर्जितः ॥ २१ ॥ क्व चिच्चिरायुर्नहिशीलमंगलं क्वचित्तदप्यस्तिनवेद्यमायुषः । यत्रोभयंकुत्रच सोऽप्य मंगलः सुमंगल:कश्चनकांक्षतेहिमाम् ॥ २२ ॥ एवंविमृश्याव्यभिचारिसद्गुणैर्वरं निजैकाश्रयतयागुणाश्रयम् । वव्रेवरंसर्वगुणैरपेक्षितं रमामुकुन्दंनिरपेक्षमीप्सितम् । ॥ २३ ॥ तस्यांसदेशउशतींनवकंजमालां माद्यन्मधुव्रतवरूथगिरोपघुष्टाम् । तस्थौ निधायनिकटेतदुरःस्वधाम सव्रीडहासविकसन्नयनेनयाता ॥ २४ ॥ तस्याः श्रिय स्त्रिजगतो जनकोजनन्या वक्षोनिवासमकरोत्परमंविभूतेः । श्रीः स्वाः प्रजाः सक रुणेननिरीक्षणेनयत्र स्थितैधयत साधिपतींस्त्रिलोकान् ॥ २५ ॥ शंखतूर्यमृदंगानां वादित्राणांपृथुस्वनः । देवानुगानांसस्त्रीणां नृत्यतांगायतामभूत् ॥२६॥ ब्रह्मरुद्रा ङ्गिरोमुख्याः सर्वेविश्वसृजोविभुम् । ईडिरेऽवितथैर्मन्त्रैस्तल्लिंगैः पुष्पवर्षिणः ।२७

लज्जायुक्त हास्यसे उनका मुख अत्यन्त सुन्दर होरहाथा ॥ १७ ॥ उनके केसर लगेहुए दोनोंकुच परस्पर समान, और मध्यभाग पतलाथा । उनके चरणोंसे नूपुरका मनोहर शब्द होरहाथा । उस-समय लक्ष्मीजी सुवर्णकी बेलके समान शोभायमान होकर भ्रमण कररहीथीं ॥ १८ ॥ कि-जिससे जानपड़ताथा कि अपने अविचल सद्गुण युक्त दूषणरहित आश्रयको ढूंढ़तीहैं किंतु उन्होंने गधर्व सिद्ध, असुर, यक्ष, चारण और त्रिलोकवासी दूसरे प्राणियोंमें भी अपने योग्य आश्रय न देखा ॥ ॥ १९ ॥ उन्होंने देखा कि जो तपस्वीहैं वे क्रोध नहीं जीतसकते, जो ज्ञानी हैं वे निःसंग नहीं होसकते, जिनमें महत्वहै वे काम नहीं जीतसकते, जो दूसरेकी अपेक्षा करतेहैं वे क्या ईश्वरहैं २० जो धार्मिकहैं प्राणियोंके साथ उनका प्रेमहोताहै, कोई दान करतेहैं वे अपनी मुक्तिके लिये नहीं जो बलीहैं वे कालको नहीं रोकसकते, कोई गुणोंका संग छोड़देतेहैं किंतु किसी सहचर के साथ भ्रमण नहीं करते ॥ २१ ॥ जिसकी दीर्घआयु है उसमें शील और मंगल नहीं है, और जिसके शील व मंगल दोनोंही हैं—उनकी आयुकी स्थिरता नहीं है, जिसके शील व मंगल व दीर्घ परमायु सबही हैं, वह स्वयं अमंगल और निर्दोष है, वह मुझे नहीं चाहता ॥ २२ ॥ भगवती लक्ष्मी ने इसप्रकार विचार करके भगवान नारायण कोहीवर रूपसे वरण किया। क्योंकि उन्होंने देखा कि हरिनित्य सत्व गुणशाली हैं, वे दूसरे की अपेक्षा नहीं करते, प्राकृतिक गुण उनके समीप आनेका साहस नहीं करते; अतएव वह सर्वोत्तम हैं । उनके निरपेक्ष होने परभी अणिमादि गुण समूह उनका आश्रय किये है ॥२३॥ यह विचारकर लक्ष्मीजी ने नारायण के गलमें मदोन्मत्त भौंरों से गूंजती हुई मनोहर कमलों की माला अर्पणकी और चुपचाप मौनभाव से खडी रहकर, लज्जा व हास्य सहित प्रफुल्लित नेत्रहो उनके वक्षःस्थल में स्थान प्राप्त करने की प्रतीक्षा की ॥ २४ ॥ हे महाराज ! भगवान ने उन जगज्जननी त्रिलोकी की विभूति रूप लक्ष्मीजीको अपना वक्षःस्थल रूप अविचल पददिया कि—जहांपर स्थिरभाव से अवस्थितिकर लक्ष्मीजी ने अपने करुणायुक्त कटाक्ष से प्रजाओंको व त्रिलोकी को तथा लोकपतियों को बढ़ाया ॥ २५ ॥ उस काल स्त्रियों समेत देवताओं के अनुचर नाचने गाने लगे तथा शंख, तूर्य, और मृदंग आदि बाजोंका शब्द पृथक् २ सुनाई देनेलगा ॥ २६ ॥ ब्रह्मा, रुद्र और अंगिरा आदि सब प्रजापति पुष्प बरसाय विष्णु

याविलोकितादेवाः सप्रजापतयःप्रजाः । शीलादिगुणसम्पन्ना लेभिरेनिर्वृतिंपरा
म् ॥ २८ ॥ निःसत्वालोलुपा राजन्निरुद्योगा गतत्रपाः । यदाचोपेक्षितालक्ष्म्या ब
भूवुर्दैत्यदानवाः ॥ २९ ॥ अथासीद्वारुणी देवी कन्याकमललोचना । असुराजगृ
हुस्तां वैहरेरनुमतेनते ॥ ३० ॥ अथोदधेर्मथ्यमानात्काश्यपैरमृतार्थिभिः । उदति
ष्ठन्महाराज पुरुषःपरमाद्भुतः ॥ ३१ ॥ दीर्घपीवरदोर्दण्डः कम्बुग्रीवोऽरुणेक्षणः ॥
श्यामलस्तरुणःस्रग्वी सर्वाभरणभूषितः ॥ ३२ ॥ पीतवासामहोरस्कः सुमृष्टमणि
कुण्डलः । स्निग्धकुंचितकेशान्तः सुभगःसिंहविक्रमः ॥ ३३ ॥ अमृतापूर्णकलशं
बिभ्रद्वलयभूषितः । सवैभगवतः साक्षाद्विष्णोरंशांशसंभवः ॥३४॥धन्वन्तरिरिति
ख्यात आयुर्वेददृगिज्यभाक् । तमालोक्यासुराःसर्वे कलशंचामृताभृतम् ॥ ३५ ॥
लिप्सन्तःसर्ववस्तूनि कलशंतरसाऽहरन् । नीयमानेऽसुरैस्तस्मिन्कलशेऽमृतभाज
ने ॥ ३६ ॥ विषण्णमनसोदेवा हरिंशरणमाययुः । इतितद्दैन्यमालोक्य भगवान्भृ
त्यकामकृत् । माखिद्यतमिथोऽर्थंवः साधयिष्येस्वमायया ॥ ३७ ॥ मिथःकलिरभू
त्तेषां तदर्थतर्षचेतसाम् । अहंपूर्वमहंपूर्वं नत्वंनत्वमितिप्रभो ॥ ३८ ॥देवाःस्वंभा
गमर्हन्तिये तुल्यायासहेतवः । सत्रयागइवैतस्मिन्नेष धर्मःसनातनः ॥ ३९ ॥ इति
स्वान्प्रत्यषेधन्वै दैतेयाजातमत्सराः । दुर्बलाःप्रबलान्राजन् गृहीतकलशान्मुहुः
॥ ४० ॥ एतस्मिन्नन्तरेविष्णुः सर्वोपायविदीश्वरः । योषिद्रूपमनिर्देश्यं दधारपरमा

प्रतिपादक यथार्थ मंत्रोंसे विष्णुजी की स्तुति करनेलगे ॥ २७ ॥ लक्ष्मीजी के करुणा कटाक्ष से देवता, प्रजापति, और प्रजागण शीलादि सद्गुण युक्त होकर परम आनंदित हुए ॥ २८ ॥ हे राजन् ! जब लक्ष्मीजी ने दानव और दैत्यों की उपेक्षा की, तबवे निःसत्व, उद्योग रहित और निर्लज्ज होगये ॥ २९ ॥ फिर समुद्रमें से एक कमल लोचना कन्या उत्पन्न हुई उसका नाम वा-रुणी था, भगवान की आज्ञा से असुरों ने उसको ग्रहण किया ॥ ३० ॥ हे महाराज ! इसके उपरांत वह दैत्य दानव अमृत की इच्छाकर फिर समुद्र मथनेलगे । इसबार एक परम सुंदर पुरुष अमृत से भराहुआ कलश लियेहुए बाहर निकला ॥ ३१ ॥ उसकी दोनो भुजाएं दीर्घ व स्थूल; ग्रीवा—शंख की समान; वर्ण—श्याम; वयस—योवन; और वक्षःस्थल विशालथा । वह माला, पीत-वस्त्र, नाना आभूषण औरसुंदरमणि कुंडल धारण कियेथा ॥ ३२ ॥ उसके केशचिकने और घूंघर वाले थे । वह स्त्रियोंकी समान लोभनीय और सिंहकी समान पराक्रमी था ॥ ३३ ॥ उसके हाथ में कंकण की अपूर्व शोभाहोरहीथी वह साक्षात् विष्णुके अंशसे उत्पन्न हुआथा ॥ ३४ ॥ धन्व-न्तरिके नामसे प्रसिद्ध है । वह आयुर्वेद शास्त्रके पारदर्शी और यज्ञके भागके भोगीहुए । धन्वन्तरिके हाथ में अमृत का कलस देखकर असुरों ने बलपूर्वक उसे छीन लिया ! जिस समय दैत्य अमृत का घट छीनकर लेजाने लगे ॥ ३५ ॥ ३६ ॥ यह देखकर देवता व्याकुल चित्त हो भगवान की शरण में गये । भक्तों की इच्छा पूर्ण करने वाले भगवानने देवताओं को इसप्रकारसे कातर देख कर कहा कि—"तुम खेद मत करो, मैं अपनी माया द्वारा दैत्यों में परस्पर विवाद उत्पन्न कराकर तुम्हारा कार्य पूर्ण करूंगा ॥ ३७ ॥ हे राजन् !" उन लोभी दैत्यों में अमृत के कलश में अधिकार करनेके निमित्त "मैं पहिले" "मैं पहिले" "तू नहीं" इस प्रकारका कलह उत्पन्न होगया ॥ ३८ ॥ उनमेंसे जो दुर्बल थे वे कहने लगे कि—देवताओंने भी समान परिश्रम किया है अतएव यज्ञके भागकी समान उनकाभी अंश मिलना चाहिये, यही सनातन धर्म है ॥ ३९ ॥ हे राजन् ! दुर्बल दैत्य मात्सर्य पूर्ण हो, जिन प्रबल दैत्योंने अमृत का कलश लिया था उन्हें बारंबार निवारण करने लगे ॥ ४० ॥ इतने में सब उपायों के जानने वाले भगवानने अद्भुत स्त्रीका रूप धारण

द्भुतम् ॥ ४१ ॥ प्रेक्षणीयोत्पलश्यामं सर्वावयवसुन्दरम् । समानकर्णाभरणं सुक-
पोलोन्नसाननम् ॥ ४२ ॥ नवयौवननिर्वृत्तस्तनभारकृशोदरम् । मुखामोदानुरक्ता-
लिझंकारोद्विग्नलोचनम् ॥ ४३ ॥ बिभ्रत्सुकेशभारेण मालामुत्फुल्लमल्लिकाम् ।
सुग्रीवकण्ठाभरणं सुभुजाङ्गदभूषितम् ॥ ४४ ॥ विरजाम्बरसंवीतनितम्बद्वीप-
शोभया । काञ्च्या प्रविलसद्वल्गुचलच्चरणनूपुरम् ॥ ४५ ॥ सव्रीडस्मितविक्षिप्त
भ्रूविलासावलोकनैः । दैत्ययूथपचेतःसु काममुद्दीपयन्मुहुः ॥ ४६ ॥

इति श्रीमद्भागवते महापुराणेऽष्टमस्कन्धे अष्टमोऽध्यायः ॥ ८ ॥

॥ श्रीशुक उवाच ॥ तेऽन्योन्यतोऽसुराः पात्रं हरन्तस्त्यक्तसौहृदाः । क्षिपन्तो
दस्युधर्माण आयान्तीं ददृशुः स्त्रियम् ॥ १ ॥ अहो रूपमहो धाम अहो अस्या नवं वयः ।
इति ते तामभिद्रुत्य पप्रच्छुर्जातहृच्छयाः ॥ २ ॥ का त्वं कञ्जपलाशाक्षि कुतो वा किं चि
कीर्षसि । कस्यासि वद वामोरु मथ्नन्तीव मनांसि नः ॥ ३ ॥ न वयं त्वामरैर्दैत्यैः सि
द्धगन्धर्वचारणैः । नास्पृष्टपूर्वां जानीमो लोकेशैश्च कुतो नृभिः ॥ ४ ॥ नूनं त्वं विधिना
सुभ्रूः प्रेषितासि शरीरिणाम् । सर्वेन्द्रियमनःप्रीतिं विधातुं सघृणेन किम् ॥ ५ ॥ सा
त्वं नः स्पर्धमानानामेकवस्तुनि मानिनि ॥ ज्ञातीनां बद्धवैराणां शं विधत्स्व सुमध्यमे
॥ ६ ॥ वयं कश्यपदायादा भ्रातरः कृतपौरुषाः । विभजस्व यथान्यायं नैव भेदो यथा

किया ॥ ४१ ॥ स्त्रीका वर्ण कमल की समान श्याम और दर्शनीय था उसके सब अंग सुंदर
दोनों कान परस्पर समान और कुंडलों से विभूषित, दोनों कपोल मनोहर और नासिका ऊंची थी
॥ ४२ ॥ उस नवीन यौवना के दोनों स्तन समान व गोल उठे हुए, और स्तनोंके भारसे उदर
कृश होरहा था मुख की सुगंधी से मोहित हो भौंर गूंज रहे थे ; इसकारण दोनो चंचल नेत्र
नृत्य कर रहे थे ॥ ४३ ॥ मनोहर केश पाश, खिल हुए मल्लिका के फूलों से वेष्टित, सुंदर कंठमें
आभूषण शोभायमान, और विचित्र हाथोंमें कंकण विभूषित थे ॥ ४४ ॥ द्वीप की सदृश शोभायमान
मोटे नितंबपर निर्मल वस्त्र शोभा पा रहाथा, कटिमें मेखला धारण किये, सुंदर बजते हुए नूपुर पहिने
थी ॥४५॥ वह लज्जायुक्त मधुर हास्यसे भौंहोंको विचलितकर मनमोहन दृष्टिसे बारबार दैत्यपतियों
के अंतःकरणको कामबाणसे छेदने लगी ॥ ४६ ॥

श्रीमद्भागवते महापुराणे अष्टमस्कन्धे सरला भाषाटीकायां अष्टमोऽध्यायः ॥ ८ ॥

श्रीशुकदेवजी बोले कि—हे राजन्! वे दानव सुहृदता छोड चोरोंके धर्मका अवलंबनकर एक
दूसरे से अमृत का कलश छीन रहेथे, इतने में उन्हों ने एक स्त्री आतीहुई देखी और उसके रूप
से मोहितहो विचारने लगे कि ॥ १ ॥ अहो ! इसका कैसारूप है ! कैसी कांति और कैसा नवीन
यौवन है ! यहबातें करते २ उसके निकट जायकर वे सब दैत्य पूछने लगे कि—॥ २ ॥ हे पद्म
पलाश लोचने ! तुम कौनहो ? कहां से आईहो ! तुम्हारा क्या अभिप्राय है ! हे वामोरु ! तुम
किस की स्त्रीहो ! कहो २ हमारा मन व्याकुल होरहा है ॥ ३ ॥ हम निश्चयही जानते हैं
कि मनुष्यों की तो बात दूररही, देव, दानव, सिद्ध, गन्धर्व चारण और लोकपालों नेभी इसस-
मयतक तुम्हारा स्पर्श नहींकिया है ॥ ४ ॥ हे सुभ्रु ! करुणामय विधाता ने क्या प्राणियों के इन्द्रि-
यवर्ग और चित्त में प्रीति उत्पन्न करने के निमित्त तुम्हें भेजा है ? अथवा तुम अपनीही इच्छाहो?
हम निश्चयही जानते है कि विधाने तुमको हमारे पास भेजा है ॥ ५ ॥ अतएव तुम हमारा कल्याण
करो । हे भामिनि ! हमसब भाई होकर एक पदार्थ के लिये बैर बांधकर उस के लेने की इच्छा
से परस्पर में शत्रुहोगये हैं ॥ ६ ॥ हम सब कश्यपजी के पुत्र परस्पर भाई हैं; हम सबने समान
पौरुष कियाहै । अब जिसप्रकार हम में आपस में विवाद न हो तुम उसी प्रकार न्यायानुसार हम

भजेम् ॥ ७ ॥ इत्युपामन्त्रितोदैत्यैर्मायायोषिद्वपुर्हरिः । प्रहस्यरुचिरापाङ्गैर्निरीक्षन्निदमब्रवीत् ॥ ८॥ श्रीभगवानुवाच ॥ कथंकश्यपदायादाः पुंश्चल्यांमयिसंगताः । विश्वासंपण्डितोजातुकामिनीषुनयातिहि ॥ ९ ॥ सालावृकाणांस्त्रीणांचस्वैरिणीनांसुरद्विषः । सख्यान्याहुरनित्यानिनूत्नंनूत्नंविचिन्वताम् ॥१० ॥ श्रीशुक उवाच ॥ इतितेक्ष्वेलितैस्तस्याआश्वस्तमनसोऽसुराः । जहसुर्भावगम्भीरंददुश्चामृतभाजनम् ॥ ११ ॥ ततोगृहीत्वाऽमृतभाजनंहरिर्बभाषईषत्स्मितशोभयागिरा । यद्यभ्युपेतक्वचसाध्वसाधुवाकृतंमयावोविभजेसुधामिमाम् ॥ १२ ॥ इत्यभिव्याहृतंतस्याआकर्ण्यासुरपुङ्गवाः । अप्रमाणविदस्तस्यास्तत्तथेत्यन्वमंसत ॥ १३ ॥ अथोपोष्यकृतस्नानाहुत्वाचहविषाऽनलम् । दत्त्वागोविप्रभूतेभ्यः कृतस्वस्त्ययनाद्विजैः ॥ १४ ॥ यथोपजोषंवासांसिपरिधायाऽहतानिते । कुशेषुप्राविशन्सर्वेप्रागग्रेष्वभिभूषिताः ॥ १५ ॥ प्राङ्मुखेषूपविष्टेषुसुरेषुदितिजेषुच । धूपामोदितशालायांजुष्टायांमाल्यदीपकैः ॥ १६ ॥ तस्यांनरेन्द्रकरभोरुरुशद्दुकूलश्रोणीतटालसगतिर्मदविह्वलाक्षी । सा कूजती कनकनूपुरसिञ्जितेनकुम्भस्तनी कलशपाणिरथाविवेश ॥ १७ ॥ तां श्रीसखीं कनककुण्डलचारुकर्णनासाकपोलवदनां परदेवताख्याम् । संवीक्ष्यसंमुमुहुरुत्स्मितवीक्षणेनदेवासुराविगलितस्तनपट्टिकान्ताम् ॥ १८ ॥ असुराणांसुधादानंसर्पाणामिवदुर्नयम् । मत्वा जातिनृशंसानां न तां व्यभजदच्युतः ॥ १९ ॥ कल्पयित्वापृथक्पङ्क्तीरुभयेषांजगत्पतिः । तांश्चोपवेशयामासस्वेषुस्वे

सबका भागकर के दे दो ॥ ७ ॥ दैत्यों के ऐसे कहनेपर, माया मोहिनीरूपी हरि, हास्ययुक्त मनोहर कटाक्ष से देखकर बोले कि ॥ ८ ॥ हे कश्यप नन्दनगण ! तुम मुझ व्यभिचारिणी का विश्वास कैसे करते हो ? पण्डितलोग स्त्री का विश्वास नहीं करते ॥ ८ ॥ हे दैत्यों ! कुत्ते और व्यभिचारिणी स्त्री नित्य नवीन खोजती हैं अतएव उनकी मित्रता व्यर्थ है ॥ १० ॥ श्री शुकदेवजी बोले कि—हे राजन् ! मोहिनी के परम सुन्दर वचनों से असुरों के चित्त में विश्वास आगया, तब उस समय किसी गम्भीर अभिप्राय से हँसकर उन्होंने अमृतका कलश उसे दे दिया ॥ ११ ॥ हरि ने अमृतका पात्र ले हँसतेहुए कहा कि—जो मैं करूं वह चाहे अच्छा हो या बुरा, यदि वह तुम्हें स्वीकार होतो अमृतका भाग करसकती हूं ॥ १२ ॥ प्रधान २ असुरों ने मोहिनी की इस बातको सुन स्वीकार करके कहाकि जो तुम करोगी वही होगा ॥ १३ ॥ अनन्तर उन्होंने व्रत, स्नानकर, अग्निमें हवनकर, ब्राह्मणों से स्वस्तिवाचन करवाय वे समस्त देव, दानव गौ ब्राह्मणों को नमस्कारकर अपने २ यथायोग्य नवीन वस्त्रों को पहिन, पूर्वकी ओर मुखवाले कुश आसनों पर बैठगये ॥ १५ ॥ हे राजेन्द्र ! धूपसे सुगन्धित, और फूल व दीपक से सुशोभित, शाला में देव व दानवगण पूर्वकी ओर मुख करके बैठगये ॥ १६ ॥ तदनन्तर वह मोहिनी कि जिसकेमद से विह्वल नेत्र और सुन्दर हथली है, मनोहर रेशमी वस्त्र पहिन, नितम्बके भार से मन्द २ गति से नूपुरों को बजातीहुई उस शालामें अमृतकाकलश हाथ में लेकर आई ॥ १७ ॥ कानों में सुन्दर सुवर्ण के कुण्डल पहिने, सुन्दर कपोल, मनोमय मुख, ऊँची नासिका, परदेवतानाम लक्ष्मी की सखी कि जिसके स्तनों पर का वस्त्र बारम्बार गिरापडताथा, उसे देख सुर और असुरों को मोह उत्पन्न होआया ॥ १८ ॥ अनन्तर मोहिनीरूपधारी भगवानने सर्पों को दूध देने की समान असुरों को अमृत देना अनुचित है क्योंकि यह स्वभाव सेही क्रूर हैं । यह विचारकर उन्होंने उनको अमृत न दिया ॥ १९ ॥ जगत्पति भगवानने देवता और असुरों की दो पंक्तियें बनाई और अ-

पुंक्षु किंतु ॥ २० ॥ दैत्यान्गृहीतकलशो वञ्चयन्नुपसंचरैः । दूरस्थान्पाययामास जरामृत्युहरां सुधाम् ॥ २१ ॥ ते पालयन्तः समयमसुराः स्वकृतं नृप । तूष्णीमासन्कृतस्नेहाः स्त्रीविवादजुगुप्सया ॥२२॥ तस्यां कृतातिप्रणयाः प्रणयापायकातराः । बहुमानेन चाबद्धा नोचुः किंचन विप्रियम् ॥ २३ ॥ देवलिङ्गप्रतिच्छन्नः स्वर्भानुर्देवसंसदि प्रविष्टः सोममपिबच्चन्द्रार्काभ्यां च सूचितः ॥२४॥ चक्रेण क्षुरधारेण जहार पिबतः शिरः । हरिस्तस्य कबन्धस्तु सुधयाऽप्लावितोऽपतत् ॥२५॥ शिरस्त्वमरतां नीतमजो ग्रहमचीक्लृपत । यस्तु पर्वणि चन्द्रार्कावभिधावति वैरधीः ॥ २६ ॥ पीतप्रायेऽमृते देवैर्भगवाँल्लोकभावनः । पश्यतामसुरेन्द्राणां स्वं रूपं जगृहे हरिः ॥ २७॥ एवं सुराऽसुरगणाः समदेशकालहेत्वर्थकर्ममतयोऽपि फलविकल्पाः । तत्राऽमृतं सुरगणाः फलमञ्जसाऽऽपुर्यत्पादपङ्कजरजः श्रयणान्न दैत्याः ॥२८॥ यद्युज्यतेऽसुवसुकर्ममनोवचोभिर्देहात्मजादिषु नृभिस्तदसत्पृथक्त्वात् । तैरेव सद्भवति यत्क्रियतेऽपृथक्त्वात्सर्वस्य तद्भवति मूलनिषेचनं यत् ॥ २९ ॥

इति श्रीमद्भा० अष्ट० अमृतमथने नवमोऽध्यायः ॥ ९ ॥

॥ श्रीशुक उवाच ॥ इति दानवदैतेया नाविन्दन्नमृतं नृप । युक्ताः कर्मणि यत्ताश्च वासुदेवपराङ्मुखाः ॥ १ ॥ साधयित्वाऽमृतं राजन्पाययित्वा स्वकान्सुरान् ॥

पनी २ पंक्तियों मे उन सबको बिठलाया ॥ २० ॥ अनन्तर कलश हाथमें ले सुन्दर २ वाक्योंद्वारा दैत्यों को ठगकर दूर बैठहुए देवताओं को जरा मृत्युहारी अमृत पिलाने लगी ॥ २१ ॥ हेराजन् ! असुर अपनी प्रतिज्ञा का पालन करतेहुए चुपचाप बैठे रहे, स्त्री के साथ विवाद करने की उनकी इच्छा न थी क्योंकि पहिले उससे प्रेम कर चुके थे ॥ २२ ॥ और स्नेह सभी बद्धमूल होगये थे अतएव पीछे स्नेह टूटजावे इस भयसे डरकर उन्हों ने कोई बुरी बात मोहिनी आस नहीं कही ॥ २३ ॥ हे राजन् ! राहु, देव चिन्ह धारणकर गुप्तभावसे देवसभा में प्रवेशकर अमृत पीताथा, इतने में चन्द्रमा और सूर्य ने यह भगवान से सूचनाकी ॥ २४ ॥ तब हरि भगवान ने अमृतपीने के समयही छुरे की सी धारवाले चक्रसे उसका मस्तक काटडाला, शिर के अतिरिक्त उसकी देहमे अमृत नहीं पहुंचायाथा इससे वह धड़तो गिरगया ॥ २५ ॥ किन्तु मस्तक अमृत के स्पर्श होनेसे अमर हुआ । ब्रह्माजी ने सूर्यादि की समान उसको भी ग्रह किया । बैर बुद्धिसे यह ग्रह अबतकभी पर्व २ में चन्द्रमा सूर्य की ओर दौड़ता रहता है ॥ २६ ॥ हेराजन् ! जब देवताओं ने सब अमृतपी लिया तब उसीसमय लोक भावन भगवान ने असुरों के सामनेही अपने चतुर्भुजरूप का ग्रहण किया ॥ २७ ॥ समुद्र मथने के कार्य में देवता और असुर दोनोंही के देश, काल, हेतु, अर्थ, कर्म और बुद्धि विचार एक थे परन्तु फल पृथक् २ हुआ । देवताओं ने भगवान के चरणकमलों का आश्रय कियाथा इससे उनको अमृत प्राप्तहुआ, असुरों ने ऐसा नहीं कियाथा अतएव वे इस अमृत से विमुख रहे ॥ २८ ॥ मनुष्य भेद दृष्टि रखकर प्राण, धन, कर्म, मन और वाक्यद्वारा देह और पुत्रादि के निमित्त जो कार्य करते हैं, वह भेदाश्रय होने के कारण, मूलछोड़कर शाखा सींचने की समान व्यर्थ होता है । किन्तु यदि सबका एक ईश्वररूप जानकर उन सबका अनुष्ठान करें तो उससे कल्याण प्राप्त होता है; वृक्षकी जड़ में जल डालनेसे सब शाखा प्रशाखा सिंचजाती हैं ॥ २९ ॥

इतिश्रीमद्भा० म० अष्टमस्कन्धे सरलभाषाटीकायां नवमोऽध्यायः ॥ ९ ॥

श्रीशुकदेवजी बोले कि—हेराजन् ! दैत्य और दानवोंने बड़े यत्न और परिश्रमसे अमृत निकाला परन्तु भगवानसे विमुख रहनेके कारण उसका पान न करसके ॥ १ ॥ भगवान् सबलोगों

ख: ॥ १९ ॥ द्विमूर्धाकालनाभोऽथ प्रहेतिर्हेतिरिल्वलः । शकुनिर्भूतसंतापो वज्रदंष्ट्रोविरोचनः ॥ २० ॥ हयग्रीवःशंकुसिराः कपिलोमेघदुन्दुभिः । तारकश्चक्रदृक्शुम्भो निशुंभोजम्भउत्कलः ॥ २१ ॥ अरिष्टोऽरिष्टनेमिश्च मयश्चत्रिपुराधिपः । अन्येपौलामकालेया निवातकवचादयः ॥ २२ ॥ अलब्धभागाःसोमस्य केवलंक्लेशभागिनः । सर्वएतेरणमुखे बहुशोनिर्जितामराः ॥ २३ ॥ सिंहनादान्विमुंचंतः शंखान्दध्मुर्महास्वनान् । दृष्ट्वासपत्नानुत्सिक्तान् बलभित्कुपितोभृशम् ॥२४॥ ऐरावतंदिक्करिणमारूढःशुशुभेस्वराट् । यथास्रवत्प्रस्रवण मुदयाद्रिमहर्पतिः ॥२५॥ तस्यासन्सर्वतोदेवा नानावाहध्वजायुधाः । लोकपालाःसहगणैर्वाय्वग्निवरुणादयः ॥ २६ ॥ तेऽन्योन्यमभिसंसृत्य क्षिपन्तोमर्मभिर्मिथः । आह्वयन्तोविशंतोग्रेयुयुधुर्द्वन्द्वयोधिनः ॥ २७ ॥ युयोधबलिरिन्द्रेण तारकेणगुहोऽस्यत ॥ वरुणोहेतिनाऽयुध्यन् मित्रोराजन्प्रहेतिना ॥ २८ ॥ यमस्तुकालनाभेन विश्वकर्मामयेनवै । शम्बरोयुयुधेत्वष्ट्रा सवित्रातुविरोचनः ॥ २९ ॥ अपराजितेननमुचिरश्विनौवृषपर्वणा । सूर्योबलिसुतैर्देवोबाणज्येष्ठैःशतेनच॥३०॥राहुणाचतथासोमः पुलोम्नायुयुधेऽनिलः निशुम्भशुम्भयोर्देवी भद्रकालीतरस्विनी॥३१॥ वृषाकपिस्तुजम्भेन महिषेणविभावसुः । इल्वलःसह वातापिर्ब्रह्मपुत्रैररिंदम ॥ ३२ ॥ कामदेवेनदुर्मर्ष उत्कलोमातृभिःसह । बृहस्पतिश्चोशनसा नरकेणशनैश्चरः ॥ ३३ ॥ मरुतोनिवातकवचैः कालेयैर्वसवोऽमराः । विश्वेदेवास्तुपौलोमै रुद्राःक्रोधवशैःसह ॥ ३४॥ तएवमाजावसुराःसुरेन्द्राः द्वन्द्वेनसंहत्यचयुध्यमानाः । अन्योन्यमासाद्य निजघ्नुराजसा जि-

---

अयोमुख, द्विमूर्द्ध, कालनाभ, प्रहेति, हेति, इल्वल शकुनि, भूतसंतापन वज्रदंष्ट्र, विरोचन हयग्रीव शंकुशिरा, कपिल, मेघदुन्दुभि, तारक, चक्रजित शुंभ, निशुंभ, जम्भ, उत्कल, ॥१९—२१॥ अरिष्ट, रिष्टनेमि, त्रिपुराधिपति मय और पौलोम, कालेय, तथा निवात कवचादि औरभी दूसरे सेनापतिगण रथोंपर सवारहो २ राजा बलिके आसपास खड़ेथे इन सबके हाथोंसे देवता कई २ बार परास्तहुएथे । इससमय यह अमृतका अंश न पाकर केवल क्लेश भागीहुए । वे बड़े क्रोध से सिंहनाद करतेहुये बड़े घोरशब्दवाले शखोंको बजानेलगे । दैत्योंको इसप्रकारसे अहंकार युक्त देख इन्द्र अतिकुपित ऐरावत नामक मदस्रावी गजेंद्रपरचढ़े उसकाल वे इन्द्र ऐसे शोभायमानथे कि मानों सूर्य झरने झरतेहुये उदयाचलपर चढ़े हैं ॥ २२—२५ । पवन, अग्नि, और वरुणादि लोकपाल देवता नानाप्रकारके वाहनोंपरचढ़ विचित्र ध्वज पताका और अस्त्र शस्त्रले अपने संगियों समेत इन्द्रको चारोंओरसे घेरेहुएथे॥२६॥वे देवदानवगण एक दूसरेके समीपआ एक दूसरेका नाम लेले बुलाबुला तिरस्कार करर घोरयुद्धमें प्रवृत्तहुए॥२७॥इन्द्र बलिके साथ,कार्तिकेय तारककेसाथ, वरुण हेतिके साथ; मित्र प्रहेतिके साथ;यम—कालनाभिकेसाथ, विश्वकर्मा—मयके साथ, त्वष्टा—शंबर के साथ, सविता—विरोचनके साथ, अपराजित नमुचिके साथ अश्विनाकुमार-वृषपर्वाके साथ, अकेले सूर्य-बाण आदि सौ बलिपुत्रोंके साथ,चन्द्रमा राहुकेसाथ,वायु पुलोमके साथ, वेगवती भद्रकालीदेवी शुंभ और निशुंभके साथ वृषाकपि—जम्भके साथ, विभावसु—महिषके साथ, ब्रह्माजीके पुत्र इल्वल और वातापिके साथ, बृहस्पतिजी शुक्राचार्यके साथ, शनि नरकके साथ, मरुद्गण, निवात कवच आदिके साथ; वसुगण—कालिकेयके साथ विश्वेदेवागण—पौलोमगण के साथ और रुद्रगण-क्रोध वश आदिके साथ युद्ध करनेमें प्रवृत्तहुए २८—३४ । असुर और देवेंद्रगण इसप्रकारसे द्वन्द्वयुद्ध करनेमें प्रवृत्तहो एक दूसरे को पकड़; जयकी इच्छाकर तीक्ष्णबाण खड्ग और तोमर द्वारा परा-

गीर्षचस्तीक्ष्णशरासितोमरैः ॥ ३५ ॥ भुशुण्डिभिश्चक्रगदर्ष्टिपट्टिशैः शक्त्युल्मुकैः प्रासपरश्वधैरपि। निस्त्रिंशभल्लैः परिघैः समुद्गरैः सभिन्दिपालैश्च शिरांसि चिच्छिदुः ॥ ३६ ॥ गजास्तुरंगाः सरथाः पदातयः सारोहवाहा विविधा विखण्डिताः। निकृत्तबाहूरुशिरोधराङ्घ्रयश्छिन्नध्वजेष्वासतनुत्रभूषणाः ॥ ३७ ॥ तेषां पदाघातरथाङ्गचूर्णितादायोधनादुल्बण उत्थितस्तदा। रेणुर्दिशः खं द्युमणिं च छादयन्न्यवर्तताऽसृक्स्रुतिभिः परिप्लुतात् ॥ ३८ ॥ शिरोभिरुद्धूतकिरीटकुण्डलैः संरम्भदृग्भिः परिदष्टदच्छदैः। महाभुजैः साभरणैः सहायुधैः सा प्रास्तृता भूः करभोरुभिर्बभौ ॥ ३९ ॥ कबन्धास्तत्र चोत्पेतुः पश्यन्तः स्वशिरोऽक्षिभिः। उद्यतायुधदोर्दण्डैराधावन्तो भटान्मृधे ॥ ४० ॥ बलिर्महेन्द्रं दशभिस्त्रिभिरैरावतं शरैः। चतुर्भिश्चतुरो वाहानेकेनारोहमार्च्छयत् ॥ ४१ ॥ स तानापततः शक्रस्तावद्भिः शीघ्रविक्रमः। चिच्छेद निशितैर्भल्लैरसम्प्राप्तान्हसन्निव ॥ ४२ ॥ तस्य कर्मोत्तमं वीक्ष्य दुर्मर्षः शक्तिमाददे। तां ज्वलन्तीं महोल्काभां हस्तस्थामच्छिनद्धरिः ॥ ४३ ॥ ततः शूलं ततः प्रासं ततस्तोमरमृष्टयः। यद्यच्छस्त्रं समादद्यात्सर्वं तदच्छिनद्विभुः ॥ ४४ ॥ ससर्जाथासुरीं मायामन्तर्धानगतोऽसुरः। ततः प्रादुरभूच्छैलः सुरानीकोपरि प्रभो ॥ ४५ ॥ ततो निपेतुस्तरवो दह्यमाना दवाग्निना। शिलाः सटङ्कशिखराश्चूर्णयन्त्यो द्विषद्बलम् ॥ ४६ ॥

कमकर एक दूसरेपर प्रहार करनेलगे॥३५॥तथा भुशुण्डि,चक्र, गदा, ऋष्टि, पट्टिश,शक्ति, उल्मुक प्रास, परशु, निस्त्रिंश भल्ल परिघ मुद्गर और भिंदिपाल द्वारा एक दूसरेका मस्तक छेदनेलगा ॥ ॥ ३६ ॥ गज, घोड़े, रथ और पैदल तथा अन्यान्य वाहन और उनके सवारोंमेंसे किसीकी भुजा किसी का घुटना , किसी २ को ग्रीवा व पैर छिन्न भिन्न हो २ कर कटनेलगे इस भांति नानाप्रकारसे खण्डित हो २ कर कटनेलगे और उनके ध्वज, धनुकवच, और सब आभूषण शरीर से छूटपडे ॥ ३७ ॥ हेराजन्! रणक्षेत्रमें देव, दानवोंके पादप्रहार व रथके पहियोंके आघातसे युद्धक्षेत्रकी जो धूलिउठी उससे दिशाएं गगनमंडल व सूर्य ढकगया परन्तु थोडीही देरमें रुधिरधारा से भीग जाने के कारण उस धूलिका उड़ना बन्दहोगया ॥ ३८ ॥ बहुत से योद्धाओं के कटेहुए मस्तकों से युद्धक्षेत्र परिपूर्ण होगया; उन छिन्नशिरों के कुंडल गिरगये; आंखे उस अवस्था में भी क्रोध से लाल, और होंठदांतों से दबेहुए थे । नाना आभूषणों से भूषित विशाल भुजाएं कटकर भी अस्त्र धारण किये हैं; तथा हथेलीके बाहिरी भाग व जांघेंछिन्न हो २ कर रणभूमि अत्यंत विकटरूपमें शोभायमान होनेलगी॥३९॥ उस रणभूमि में असंख्य कबंध उठनेलगे; वे पृथ्वीपर गिरेहुए अपने २ शिरोंको देख अस्त्र शस्त्र उठाय युद्ध स्थलमें सैनिकों के साथ दौड़नेलगे ॥ ४० ॥ अन्तमें बलिने दशबाण इन्द्रके, तीनबाण ऐरावत हाथीके, चारबाण चार वाहनों के और एक बाण महावत के लगाया ॥ ४१ ॥ इन्द्रने हंसते २ शीघ्रता पूर्वक हाथ में उतनेही तीक्ष्णभल्ल ले मार्गमें आतेहुए उन बाणोंको काट गिराया॥ ४२ ॥ उनके इस प्रशंसनीय कार्यको देखकर बलिको ईर्षा उत्पन्न हुई तब उसने एक प्रचंड शक्ति ग्रहणकी। अग्निकी ज्वाला के समान प्रकाशित शक्ति उसके हाथमें रहतेहुए देवराज इन्द्रने उसकोभी काटडाला ॥ ४३ ॥ असुरराज बलिने इसके उपरांत एक २ करके शूल, प्रास, तोमर और ऋष्टि ग्रहणकी, किंतु प्रभावशाली इन्द्रने उन सब शस्त्रोंको काटडाला ॥ ४४ ॥ तदनंतर असुर राजबलि अंतर्धान होकर आसुरी मायाको फैलानेलगा। हे राजन्! तब पहिलेतो देव सेनाके ऊपर एक पर्वत प्रगट हुआ ॥ ४५ ॥ फिर असंख्य वृक्ष दावानलसे जलेहुए गिरनेलगे और टांकीके समान तीक्ष्णाग्र शिलाएं

महोरगाःसमुत्पेतुर्दंदशूकाः सवृश्चिकाः। सिंहव्याघ्रवराहाश्च मर्दयन्तो महागजा-न ॥ ४७ ॥ यातुधान्यश्च शतशः शूलहस्ताविवाससः। छिन्धिभिन्धीति वादिन्य-स्तथारक्षोगणाःप्रभो ॥ ४८ ॥ ततो महाघनाव्योम्नि गम्भीरपरुषस्वनाः। अंगारा-न्मुमुचुर्वातैराहताः स्तनयित्नवः ॥४९॥ सृष्टोदैत्येन सुमहान्वह्निः श्वसनसारथिः। सांवर्तकइवात्युग्रो विबुधध्वजिनीमधाक् ॥५०॥ ततःसमुद्रउद्वेलः सर्वतःप्रत्यदृश्य-त। प्रचण्डवातैरुद्धूततरंगावर्तभीषणः ॥५१॥ एवं दैत्यैर्महामायैरलक्ष्यगतिभीष-णैः। सृज्यमानासुमायासु विषेदुःसुरसैनिकाः ॥ ५२ ॥ नतत्प्रतिविधियत्र विदुरि-न्द्रादयोनृप। ध्यातःप्रादुरभूत्तत्र भगवान्विश्वभावनः ॥ ५३ ॥ ततःसुपर्णांसकृतां-घ्रिपल्लवः पिशंगवासानवकंजलोचनः। अदृश्यताष्टायुधबाहुरुल्लसच्छ्रीकौस्तुभा-नर्घ्यकिरीटकुण्डलः ॥ ५४ ॥ तस्मिन्प्रविष्टेऽसुरकूटकर्मजामाया विनेशुर्महिनाम-हीयसः। स्वप्नोयथाहिप्रतिबोधआगते हरिस्मृतिःसर्वविपद्विमोक्षणम् ॥ ५५ ॥ दृ-ष्ट्वामृधे गरुडवाहमिभारियाह आविध्यशूलमहिनोदथ कालनेमिः। तल्लीलयागरु-डमूर्ध्नि पतद्गृहीत्वा तेनाहनन्नृप सवाहमरिंत्र्यधीशः ॥५६॥ मालीसुमाल्यतिबलौ-युधिपेततुर्यच्चक्रेण कृत्तशिरसावथ माल्यवांस्तम्। आहत्यतिग्मगदयाऽहनदण्ड-जेन्द्रं तावच्छिरोऽच्छिनदरेर्नदतोऽरिणाऽऽद्यः ॥ ५७ ॥

इति श्रीमद्भा० महा० अष्टमस्कन्धे दशमोऽध्यायः ॥ १० ॥

गिरागिरकर देवताओं को चूर्ण करने लगीं ॥ ४६ ॥ इसके उपरांत बड़े २ अजगर सर्प, बिच्छु और विषैले प्राणी तथा सिंह, व्याघ्र और शूकर आदि उत्पन्न हुए। यह बड़े २ हाथियोंका स-त्यानाश करनलगे ॥ ४७ ॥ हे नरनाथ ! अनंतर सैकड़ों नंगी राक्षसियें और राक्षस हाथ में शूललिये "काटो भेदो" इसप्रकार से शब्द करते हुए देवताओं की सेनापर दौड़े ॥ ४८ ॥ फिर बड़े २ घोर शब्द करते हुए मेघ आकाश में छाय वायुकी प्रेरणा से कड़कड़ाने और अंगार ब-र्षाय २ प्रचंड वेगसे इधर उधर भ्रमण करने लगे ॥ ४९ ॥ फिर दैत्यराज बलिने बड़ी भारी प्रलयकाल कीसी अग्नि उत्पन्नकी वह वायुने चलायमानहोकर देव सेनाको भस्मकरने लगी॥५०॥ प्रचंड वायुसे उत्पन्न हुई तरंगों के भंवर से समुद्र उबल २ कर सब दिशाओं का ग्रास करने में तत्पर हुआ ॥ ५१ ॥ अदृश्य गतिवाले महा मायावी दैत्योंने रणस्थलमें जब इसप्रकारका माया उत्पन्न की तबसब देव सेना अत्यंत व्याकुल होगई ॥ ५२ ॥ जब इन्द्रादिक देवता इसकी शांति का कोईयत्न न करसके तब भगवानका ध्यान करनेलगे। ध्यान करतेही विश्वभावन भगवान उस स्थानपर प्रगटहुए ॥ ५३ ॥ सबने देखाकि–पीताम्बर धारी भगवान कमल लोचनहरि, गरुड़ की पीठपर चरण कमल धरेहुए हैं उनके हाथोंमें आठ प्रकार के अस्त्र, वक्षःस्थलमें लक्ष्मी, कौस्तुभ मणि, मस्तक में अमूल्य किरीट और कानोंमें कुंडल प्रकाश पारहे हैं ॥ ५४ ॥ हे राजन् ! जैसे जागरण होनेपर स्वप्नावस्था दूर होजाती है तैसेही पूजनीय हरिके युद्ध क्षेत्रमें आतेही दैत्योंके कूट कपट से रचीहुई माया सहसा प्रभारहित होगई। क्योंकि भगवानका स्मरण करतेही सब दुःख दूर होजाते हैं ॥ ५५ ॥ अनंतर सिंहपर सवार हुए कालनेमि ने भगवान हरिको युद्धक्षेत्रमें आया देख शूल घुमाकर गरुड पर प्रहारकिया। गरुडके माथेके ऊपर गिरतेहुए उस शूलको त्रिलोकी नाथने सहजहीमें पकड़लिया और उसीसे वाहन समेत शत्रुको मारगिराया॥५६॥हरिके चक्र प्रहार से माली और सुमाली छिन्न मस्तकहो रणभूमि में गिरपड़े। तदुपरांत माल्यवान्‌ वहांपर आय तीक्ष्णगदा पन्नगेश्वर गरुड़पर चला बड़ीघोर गर्जना करनेलगा, तब भगवान नारायण ने चक्र से उस काभीसिर काटडाला ॥ ५७ ॥

इतिश्रीमद्भागवतेमहापुराणेअष्टमस्कंधेसरलभाषाटीकायांदशमोऽध्यायः ॥ १० ॥

॥ श्रीशुक उवाच ॥ अथोसुराः प्रत्युपलब्धचेतसः परस्यपुंसः परयानुकम्पया । जघ्नुर्भृशंशक्रसमीरणादयस्तांस्तान्रणेयैरभिसंहताःपुरा ॥१॥ वैरोचनायसंरब्धोभगवान्पाकशासनः । उदयच्छद्यदावज्रंप्रजाहाहेतिचुक्रुशुः ॥ २ ॥ वज्रपाणिस्तमाहेदंतिरस्कृत्यपुरःस्थितम् । मनस्विनंसुसंपन्नंविचरन्तंमहामृधे ॥ ३ ॥ नटवन्मूढमायाभिर्मायेशान्नोजिगीषसि । जित्वा बालान्निबद्धाक्षान्नटो हरति तद्धनम् ॥ ४ आरुरुक्षन्तिमायाभिरुत्सिसृप्सन्तियेदिवम् । तान्दस्यून्विधुनोम्यज्ञान्पूर्वस्माचपदादधः ॥ ५ ॥ सोऽहंदुर्मायिनस्तेऽद्यवज्रेणशतपर्वणा । शिरोहरिष्येमन्दात्मन्घटस्वज्ञातिभिः सह ॥ ६ ॥ बलिरुवाच ॥ संग्रामेवर्तमानानांकालचोदितकर्मणाम् । कीर्तिर्जयोऽजयोमृत्युः सर्वेषांस्युरनुक्रमात् ॥ ७ ॥ तदिदंकालरशनं जगत्पश्यन्तिसूरयः । नहृष्यन्तिनशोचन्ति तत्रयूयमपण्डिताः ॥ ८ ॥ नवयंमन्यमानानामात्मानं तत्रसाधनम् । गिरोवःसाधुशोच्यानां गृह्णीमोमर्मताडनाः ॥ ९ ॥ श्रीशुकउवाच । इत्याक्षिप्यविभुंवीरो नाराचैर्वीरमर्दनः । आकर्णपूर्णैरहनदाक्षेपैराहतं पुनः॥१०॥ एवंनिराकृतोदेवो वैरिणातथ्यवादिना । नामृष्यत्तदधिक्षेपं तोत्राहतइव द्विपः॥११॥प्राहरत्कुलिशंतस्मा अमोघंपरमर्दनम् । सयानोऽपतद्भूमौ छिन्नपक्षइवा चलः ॥१२॥ सखायंपतितंदृष्ट्वा जम्भोबलिसखःसुहृत् । अभ्ययात्सौहृदं सख्युर्ह-

---

श्रीशुकदेवजी बोले कि—हे राजन् ! इन्द्र और पवनादि देवता भगवानकी परम दयासे चेतना प्राप्त कर प्रथम जिन्होंने रणक्षेत्र में उनको मारा था उनपर वे प्रहार करने लगे ॥ १ ॥ जब सुरपति ने क्रोधितहो विरोचन नन्दन बलिपर वज्र उठाया तब प्रजा हाहाकारशब्द करने लगी ॥ ॥ २ ॥ वज्रधारी इन्द्र रणभूमि में घूमतेहुए उदारचित्त, सामने खड़, राजाबलि का तिरस्कार कर के कहने लगे कि ॥ ३ ॥ हेमूढ ! मैं मायाका अधीश्वर हू, तू कपटी प्राणियों की समान माया द्वारा मेरे जीतने की ऐसे इच्छा करता है ! जैसे कपटी (बाजीगर) बालकोंकी आंखे बन्द करके उनको वशीभूत कर उनका द्रव्य हरलेता है ॥ ४ ॥ जो मायाद्वारा स्वर्ग में चढ़ना चाहता है, या जो स्वर्ग को उल्लंघनकर मुक्तिपाने की कामना करता है वह मूर्ख व डाकू है वह प्रथम जिस पद पर होता है उससे भी नीचे " मैं " उसे गिराता हूं ॥ ५ ॥ तू मूर्ख दुष्ट मायावी है, सौधारवाले वज्रसे मैं तेरे शिरको काटूंगा । इससमय अपने जातिवालों समेत अपनी आत्मरक्षाका यत्नकर ॥ ॥ ६ ॥ राजाबलिने कहाकि—अरे ! इन्द्र ! इतना गर्व क्यों करता है ! मनुष्यकाल से प्रेरित हो कर संग्राम में प्रवृत्त होते हैं । कीर्ति, जय, पराजय और मृत्यु क्रमशः योद्धाओंको प्राप्त होतांही रहती है ॥ ७ ॥ इसीकारण वीरलोग जगतको कालके वशीभूत कहते हैं इस निमित्त उनको ज-यपराजय से उत्पन्न हुआ हर्ष शोक कुछभी नहीं होता । तू इस विषयको कुछभी नहीं समझता ॥ ॥ ८ ॥ यद्यपि तेरे वाक्य मेरे मर्मस्थानका छेदन करते हैं किन्तु तू कीर्त्ति और जयआदि में अ-पने आत्मा कोही कर्त्ता मानता है अतएव तू साधुओं के शोक करने योग्य है इसही कारण मैं ते-रे वचनों का स्वीकारनहीं करता ॥ ९ ॥ श्री शुकदेवजी बोले कि—हेनृपेन्द्र ! महावीरबलिने इन्द्र का इसप्रकार तिरस्कारकर उसपर कानतक खींचेहुए नाराचका प्रहारकिया ॥ १० ॥ सत्यवक्ता शत्रुका इसप्रकार से तिरस्कार नसह अंकुशसे ताड़ित कियेहुए हाथी की समान इन्द्र ने क्रोधित हो शत्रुओंके नाश करनेवाले वज्रका उसपर प्रहारकिया । उसके लगतेही बलि, परकटेहुए पर्वत की समान पृथ्वीपर विमानसहित आगिरा ॥ ११—१२ ॥ हेराजन् ! राजाबलिका एक मित्र और हितकारी जम्भनामक असुरथा । वह मित्रको गिरताहुआ देख उसकी मृतअवस्था में भी सुहृदता

तस्यापि समाचरन् ॥ १३ ॥ स सिंहवाहमासाद्य गदामुद्यम्य वेगवान्। जघानैरावतं कुम्भे गजं च सुमहाबलः ॥ १४ ॥ गदाप्रहारव्यथितो भूशं विह्वलितो गजः। जानुभ्यामपतद्भूमौ कश्मलं परमं ययौ ॥ १५ ॥ ततो रथो मातलिना हरिभिर्दशशतैर्वृतः। आनीतो द्विपमुत्सृज्य रथमारुरुहे विभुः ॥ १६ ॥ तस्य तत्पूजयन्कर्म यन्तुर्दानवसत्तमः। शूलेन ज्वलता तं तु स्मयमानोऽहनन्मृधे ॥ १७ ॥ सेहे रुजं सुदुर्मर्षां सत्त्वमालम्ब्य मातलिः। इन्द्रो जम्भस्य संक्रुद्धो वज्रेणापाहरच्छिरः ॥ १८ ॥ जम्भं श्रुत्वा हतं तस्य ज्ञातयो नारदादृषेः। नमुचिश्च बलः पाकस्तत्रापेतुस्त्वरान्विताः ॥ १९ ॥ वचोभिः परुषैरिन्द्रमर्दयन्तोऽस्य मर्मसु। शरैरवाकिरन्मेघा धाराभिरिव पर्वतम् ॥ २० ॥ हरीन्दशशतान्याजौ हर्यश्वस्य बलः शरैः। तावद्भिरर्दयामास युगपल्लघुहस्तवान् ॥ २१ ॥ शताभ्यां मातलिं पाको रथं सावयवं पृथक्। सकृत्सन्धानमोक्षेण तदद्भुतमभूद्रणे ॥ २२ ॥ नमुचिः पञ्चदशभिः स्वर्णपुङ्खैर्महेषुभिः। आहत्य व्यनदत्संख्ये सतोय इव तोयदः ॥ २३ ॥ सर्वतः शरकूटेन शक्रं सरथसारथिम्। छादयामासुरसुराः प्रावृट्सूर्यमिवाम्बुदाः ॥ २४ ॥ अलक्षयन्तस्तमतीव विह्वला विचुक्रुशुर्देवगणाः सहानुगाः। अनायकाः शत्रुबलेन निर्जिता वणिक्पथा भिन्ननवो यथार्णवे ॥ २५ ॥ ततस्तुराषाडिषुबद्धपञ्जराद्विनिर्गतः साश्वरथध्वजाग्रणीः। बभौ दिशः खं पृथिवीं च रोचयन् स्वतेजसा सूर्य इव क्षपात्यये ॥ २६ ॥ निरीक्ष्य पृतनां देवः परैरभ्यर्दितां रणे। उदयच्छद्रिपुं हन्तुं वज्रं वज्रधरो रुषा ॥ २७ ॥ स तेनैवाष्ट

का आचरणकरता हुआ इन्द्रके सम्मुख आया ॥ १३ ॥ वह महाकाय महाबलवान दैत्य सिंहपर चढ़ाहुआ इन्द्र के समीप आ बड़ वेग से गदाको उठाय इन्द्र व ऐरावत के कन्धे की संधियों में प्रहारकरनेलगा ॥ १४ ॥ गजराजगदाके प्रहारसे विह्वलहो दोनों घुटने नवाकर पृथ्वीपर बैठगया ॥ ॥ १५ ॥ अनन्तर मातलि सहस्र घोड़ोंसे जुताहुआ एकरथ लेआया, इन्द्र हाथीको छोड़कर उस रथपर सवारहुए ॥ १६ ॥ दानवश्रेष्ठ जम्भने मातलि के उसकार्य की प्रशंसा करके देदीप्यमान शूलका उसपर प्रहार किया ॥ १७ ॥ मातलिबलपूर्वक घोर दुःख सहकर रहगया। तब इन्द्रने कुपित होकर वज्रसे जम्भका भी शिरकाटडाला ॥ १८ ॥ नारदजी के मुखसे जम्भकी मृत्युकासम्बाद सुनकर नमुचि, बल, और पाकआदि उसकी जातिवाले असुर शीघ्रतापूर्वक युद्धक्षेत्रमें आये ॥ १९ ॥ और कठोरवाक्यों से इन्द्रका तिरस्कारकरके, मेघ जैसे पर्वतपर वर्षा करते हैं, उसीप्रकार वे दैत्यबाणोंकी वर्षा इन्द्रपर करनेलगे ॥ २० ॥ शीघ्रतासे बाणचलानेवाले बलनामक दैत्यने इन्द्र के सहस्र घोड़ों को सहस्रबाणों से एकही समयमें छेद दिया ॥ २१ ॥ पाकदैत्य ने एकही साथ धनुषमें दोसौबाण चढ़ाकर रथकी पृथक् २ सन्धियोंमें मारे और मातलिनामसारथीको भी पीड़ित किया, अतएव रणभूमि में यह एक अद्भुतकार्य हुआ ॥ २२ ॥ नमुचिभी युद्धस्थल में सुवर्ण के फलवाले बड़े २ पचास बाणोंसे इन्द्रपर प्रहारकर जलयुक्त मेघकी समान गरजने लगा। ॥ २३ ॥ जैसे वर्षाकालके मेघ सूर्यको ढकलेते हैं तैसेही असुरोंने सब ओरसे बाण चला रथ और सारथी समेत इन्द्रको ढकदिया॥२४॥देवता और देवताओं के अनुचर शत्रु सेनाके मध्य में इन्द्रको नहीं देखकर अत्यन्त व्याकुलहुए और नावके समुद्रमें टूटजानेपर बनियोंकी समान विह्वल होकर पुकारनेलगे॥२५॥फिरते देखते२ सहस्र लोचन इन्द्र—अश्व, रथ और सारथी समेत बाणोंके पंजरसे बाहरनिकले,और रात बीत जानेपर सूर्यकी समान अपने तेज द्वारा दिशा आकाश और पृथ्वीको विकसितकर प्रकाश पानलगे ॥२६॥ हे राजन् ! युद्ध भूमि में शत्रुओं को सेना नाश करते देख वज्रधारी इन्द्रने उनके मारनेके निमित्त आठ धार वाल वज्रको उठाया॥२७॥ और देखते वाले

धारेण शिरसी बलपाकयोः । ज्ञातीनांपश्यतांराजन् जहारजनयन्भयम् ॥ २८ ॥ नमुचिस्तद्वधंदृष्ट्वा शोकामर्षरुषान्वितः । जिघांसुरिंद्रंनृपते चकारपरमोद्यमम् ॥ २९ ॥ अश्मसारमयंशूलं घण्टावद्धेमभूषणम् । प्रगृह्याभ्यद्रवत्क्रुद्धो हतोऽसीति वितर्जयन् । प्राहिणोद्देवराजाय निनदन्मृगराडिव ॥ ३० ॥ तदापतद्गगनतलेमहाजवं विचिच्छिदेहरिरिषुभिःसहस्रधा । तमाहनन्नृपकुलिशेनकंधरे रुषान्वितस्त्रिदशपतिःशिरोऽहरन् ॥ ३१ ॥ नतस्यहित्वचमपिवज्रऊर्जितोबिभेदयः सुरपतिनौजसेरितः । तदद्भुतंपरमतिवीर्यवृत्रभित्तिरस्कृतो नमुचिशिरोधरत्वचा ॥ ३२ ॥ तस्मादिन्द्रोऽबिभेच्छत्रोर्वज्रः प्रतिहतोयतः । किमिदंदैवयोगेन भूतंलोकविमोहनम् ॥ ३३ ॥ येनमेपूर्वमद्रीणां पक्षच्छेदःप्रजात्यये । कृतोनिविशतांभारैः पतत्त्रैः पततांभुवि ॥ ३४ ॥ तपःसारमयंत्वाष्ट्रं वृत्रोयेनविपाटितः । अन्येचापिबलोपेताः सर्वास्त्रैरक्षतत्वचः ॥ ३५ ॥ सोऽयंप्रतिहतोवज्रो मयामुक्तोऽसुरेऽल्पके । नाहं तदाददेदण्डं ब्रह्मतेजोऽप्यकारणम् ॥ ३६ ॥ इतिशक्रंविषीदन्तमाहवागशरीरिणी । नायंशुष्कैरथोनार्द्रैर्वधमर्हतिदानवः ॥ ३७ ॥ मयाऽस्मैयद्वरोदत्तो मृत्युर्नैवार्द्रशुष्कयोः अतोऽन्यश्चिन्तनीयस्ते उपायोमघवन्रिपोः ॥ ३८ ॥ तांदैवींगिरमाकर्ण्यमघवान्सुसमाहितः । ध्यायन्फेनमथापश्यदुपायमुभयात्मकम् ॥ ३९ ॥ नशुष्केणनचार्द्रेण जहारनमुचेःशिरः । तंतुष्टुवुर्मुनिगणा माल्यैश्चावाकिरन्विभुम् ॥ ४० ॥ गंधर्वमुख्यौजगतुर्विश्वावसुपरावसू । देवदुन्दुभयोनेदुर्नर्तक्योननृतुर्मुदा ॥ ४१ ॥ अन्येऽ

असुरों के सामने सबको भय उत्पन्न कराते हुए उसी से बल और पाकके शिर को काट डाला ॥ २८ ॥ उनको मराहुआ देख नमुचि शोक और क्रोध से उन्मत्त होगया और इन्द्र के मारने के निमित्त यथा शक्ति चेष्टा करने लगा ॥ २९ ॥ उस दैत्य ने दारुण क्रोध से पत्थरके समान कठिन घंटा बंधाहुआ सोनेके भूषणों से अलंकृत लोहमय शूल ग्रहण कर "मारा है" यह कहकर सिंहके समान गर्जता हुआ इन्द्रके सन्मुख दौड़ा और उनपर उस शूलका प्रहार किया ॥ ३० ॥ महाशशाली उस शूलके आकाश मंडलमें उठतेही इन्द्रने बाणों द्वारा उसके सहस्रों खण्डकरडाले हेराजन् ! अन्तमें इन्द्रने कोपितहो उसका शिर काटनेके लिये उसपर वज्र चलाया ॥ ३१ ॥ परन्तु देवराज के बल पूर्वक प्रहार करनेपर भी वह प्रभावशाली वज्र नमुचिकी त्वचातक न काटसका हेराजन् ! जिस वज्रने प्रचण्ड दानव वृत्रासुरके मस्तकको काटडालाथा आज वहनमुचिके गलेकी त्वचासे अपमानितहुआ ॥ ३२ ॥ इससे इन्द्रको भय उत्पन्नहुआ, नमुचिके अगमें वज्रको व्यर्थ होतादेख वे विचारने लगे कि—दैवयोगसे मनुष्योंकी बुद्धिको मोहनेवाली यह क्या घटनाहुई ॥ ३३ जो पर्वत अपने परोंसे उड़ पृथ्वीपर गिरकर प्राणियोंका नाश करतेथे मैंने जिस वज्रसे उन पर्वतों के पर काटडालेथे ॥ ३४ ॥ विश्वकर्माने अपनी तपस्याका सार भाग ले जिस वज्रको बनायाथा, जिस वज्रसे वृत्रके प्राण नाशकियेथे और जिस वज्रसे बडे२ दैत्योंको कि जिनकी अन्यान्य अस्त्रों से त्वचातक न कटतीथी मारा, आज वही वज्र एक क्षुद्र असुरसे अपमानित हुआ, । इसको अबनहीं धारण करूंगा यह तो एक साधारण लकड़ीमात्र है, यह यद्यपि ब्रह्मतेज है किंतु अभिप्राय को पूर्ण नहीं करसकता । ३५—३६ । इन्द्र इसप्रकारसे दुःख कररहेथे कि उसी समयमें आकाश वाणीने उनसे कहा कि—यह असुर सूखे व गीले पदार्थसे कदापि न मरेगा मैंने इसको वरदियाहै; कि तू सूखे व गीले पदार्थसे न मरेगा ! इन्द्र ! इसके मारनेका और कोई उपाय सोचो ३७—३८ इस दैवी वाणीको सुन इन्द्रने सावधान चित्तसे ध्यान करके देखा कि समुद्रका फेन दानोंहोंमेहै यह न तो सूखा है न गीला । अतएव उसी फेनद्वारा उन्होंने नमुचिका मस्तक काटडाला मुनिलोग इंद्र पर फूल बर्षाय २ उनकी स्तुति करनेलगे । ३९—४० । विश्वावसु और परावसु दो गन्धर्व गानेलगे

न्त्वेवंप्रतिद्वन्द्वान्वाय्वग्निवरुणादयः । सूदयामासुरसुरान्मृगान्केसरिणोयथा ४२ ब्रह्मणाप्रेषितोदेवान्देवर्षिर्नारदोनृप । वारयामासविबुधान्दृष्ट्वादानवसंक्षयम् ४३ नारदउवाच ॥ भवद्भिरमृतंप्राप्तं नारायणभुजाश्रयैः । श्रियासमेधिताःसर्वउपारम तविग्रहात् ॥४४॥ श्रीशुकउवाच॥ संयम्यमन्युसंरम्भं मानयन्तोमुनेर्वचः । उपगीय मानानुचरैर्ययुः सर्वेत्रिविष्टपम् ॥ ४५ ॥ येऽवशिष्टारणे तस्मिन्नारदानुमतेनते । बलिंविपन्नमादाय अस्तंगिरिमुपागमन् ॥ ४६ ॥ तत्राऽविनष्टावयवान्विद्यमानशिरो धरान् । उशनाजीवयामास संजीविन्यास्वविद्यया ४७ बलिश्चोशनसास्पृष्टःप्रत्या पन्नेन्द्रियस्मृतिः । पराजितोऽपिनाखिद्यल्लोकतत्त्वविचक्षणः॥ ४८ ॥

इतिश्रीमद्भा० महा०अष्टमस्कन्धेएकादशोऽध्यायः ॥ ११ ॥

श्रीबादरायणिरुवाच॥ वृषध्वजोनिशम्येदं योषिद्रूपेणदानवान् । मोहयित्वाऽसुर गणान्हरिः सोममपाययत् ॥ १ ॥ वृषमारुह्यगिरिशः सर्वभूतगणैर्वृतः । सहदेव्या ययौद्रष्टुं यत्रास्तेमधुसूदनः ॥ २ ॥ सभाजितोभगवता सादरंसोमयाभवः । भूप विष्टउवाचेदं प्रतिपूज्यस्मयन्हरिम् ॥ ३ ॥ श्रीमहादेवउवाच ॥ देवदेवजगद्व्यापिन् जगदीशजगन्मय । सर्वेषामपिभावानां त्वमात्माहेतुरीश्वरः ॥ ४ ॥ आद्यन्तावस्ययन्मध्य मिदमन्यदहंबहिः । यतोऽव्ययस्यनैतानि तत्सत्यंब्रह्मचिद्भवान् ॥५॥ तवैवचरणांभोजं श्रेयस्कामा निराशिषः । विसृज्योभयतःसंगं मुनयःसमुपासते

देव दुन्दुभि बजानेलगे, और नृत्य करनेवाले नाचनेलगे ॥ ४१ ॥ सिंह जैसे मृगयूथ का संहार करताहै, वैसेही वायु, अग्नि और वरुण आदि दूसरे देवता गणभी अपने शत्रु असुरों का संहार करनेलगे ॥ ४२ ॥ हेराजन् ! ब्रह्माजीने नारदजी को देवताओं के निकट भेजा नारदजीने दैत्योंका विनाश होतादेख देवताओं को युद्धसे निवारण किया और कहा कि ॥ ४३ ॥ नारायणके भुजबल का आश्रयकर तुमने अमृत प्राप्त कियाहै और लक्ष्मीकी कृपाकटाक्षसे वृद्धि पाईहै अतएव युद्ध मतकरो ॥ ४४ ॥ श्रीशुकदेवजी बोले कि—हेराजन् ! देवतागण मुनिके वचनको मान क्रोध वेग को रोक स्वर्गको गये, अनुचर गुण गातेहुए उनके पीछेचले ॥ ४५ ॥ जो दानव कि युद्धक्षेत्रमें शेष रहेथे वे नारदजीकी आज्ञासे मृत बलिको लेकर अस्ताचलमें गये ॥ ४६ ॥ वहां उन मृतक दैत्यों मेंसे जिनके अंग और शिर नहीं नष्टहुएथे शुक्राचार्यने उस स्थानमें अपनी संजीवनी विद्यासे उन्हें फिर जीवित किया ॥ ४७ ॥ शुक्राचार्यके कर स्पर्शसे राजा बलिकी सब इन्द्रियें और स्मृतिशक्ति चैतन्य होगई । यद्यपि बलि परास्त होगयाथा किंतु वह जगतके सारको भलीभांतिसे जानाथा इससे उसने कुछभी खेद न किया ॥ ४८ ॥

इति श्रीमद्भागवतमहापुराणेअष्टमस्कंधेसरलाभाषाटीकायांएकादशोऽध्यायः ॥ ११ ॥

श्रीशुकदेवजी बोलेकि-हेराजन् ! नारायणने मोहिनी रूपसे दैत्योंको मोहितकर देवताओंको अमृत पिलाया है—इस बातको सुनकर महादेवजी नंदिकेश्वरपर सवारहो उमाको साथले सब भूतगणों सहित जिस स्थानपर नारायण थे वहां उनके देखनेको आये ॥ १—२ ॥ नारायणने आदर पूर्वक हर और पार्वतीजी का सन्मान किया, और महादेवजी नेभी उनकी पूजाकर, आसन पर बैठ असमूर होनेके उपरांत उनसे यह कहाकि ॥ ३ ॥ हे देव देव ! हे जगद्व्यापिन ! हे जगन्मय ! हे जगदीश ! आप सब पदार्थों के आत्मा, कारण और ईश्वरहो ॥ ४ ॥ जिस सत्य और चित्स्वरूप से इस विश्वका आदि, मध्य और अंतहोता है, किंतु जिसका स्वयं आदि, मध्य और अंत नहीं है, ओदृश्य, दृष्टा, भोग्य और भोक्ता है आप वही सत्यरूप चित्स्वरूप ब्रह्महो ॥ ५ ॥ सुख से विरक्त, मंगल चाहने वाले मुनिलोग इस लोक और परलोक की आसक्ति छोड़ आपकेही

॥६॥ त्वंब्रह्मपूर्णममृतं विगुणंविशोकमानन्दमात्रमविकारमनन्यदन्यत् । विश्वस्य-
हेतुरुदयस्थितिसंयमानामात्मेश्वरश्च तदपेक्षतयाऽनपेक्षः ॥ ७ ॥ एकस्त्वमेवसद
सद्द्वयमद्वयंचस्वर्णं कृताकृतमिवेहनवस्तुभेदः । अज्ञानतस्त्वयिजनैर्विहितोविक
ल्पो यस्माद्गुणव्यतिकरोनिरुपाधिकस्य ॥ ८ ॥ त्वांब्रह्मकेचिदवयन्त्युतधर्ममेक
एकेपरंसदसतोः पुरुषंपरेशम् । अन्येऽवयन्तिनवशक्तियुतंपरंत्वां केचिन्महापुरुष
मव्ययमात्मतन्त्रम् ॥९ ॥ नाहंपरायुर्ऋषयोनमरीचिमुख्या जानन्तियद्विरचितंखलु
सत्त्वसर्गाः । यन्माययामुषितचेतसईश दैत्यमर्त्यादयः किमुतशश्वदभद्रवृत्ताः ।
॥ १० ॥ सत्वंसमीहितमदःस्थितिजन्मनाशं भूतेहितंचजगतोभवबन्धमोक्षौ । वा
युर्यथाविशतिखंचचराचराख्यं सर्वंतदात्मकतयाऽवगमोऽवरुन्त्से ॥ ११ ॥ अव-
तारामयादृष्टा रममाणस्यतेगुणैः । सोऽहंतद्द्रष्टुमिच्छामि यत्तेयोषिद्वपुर्धृतम् १२
येनसंमोहितादैत्याः पायिताश्चामृतंसुराः । तद्दिदृक्षवआयाताः परंकौतूहलंहिनः ।
॥ १३ ॥ श्रीशुकउवाच । एवमभ्यर्थितो विष्णुर्भगवाञ्छूलपाणिना । प्रहस्यभावगं
भीरं गिरिशंप्रत्यभाषत ॥ १४ ॥ श्री भगवानुवाच । कौतूहलायदैत्यानां योषिद्वेषो
मयाकृतः । पश्यतासुरकार्याणि गतेपीयूषभाजने ॥ १५ ॥ तत्तेऽहंदर्शयिष्यामि

चरण कमलकी पूजा करते रहते है ॥ ६ ॥ आप पूर्ण, सुख स्वरूप, नित्य, आनंदमय, अगुण, निर्विकार और शोकहीन ब्रह्महो । आपसे अतिरिक्त कुछभी नहीं है, और आपही सर्वातिरिक्त हो; आपही विश्वकी उत्पत्ति, स्थिति और प्रलयके कारण तथा आत्मा के ईश्वरहो । विश्वको आपकी अपेक्षा रहना है परन्तु आपको किसी की अपेक्षा नहीं है ॥ ७ ॥ जैसे एक सुवर्ण, कुंडलादि अलंकारों से बदलकरदो होजाता है तैसही परमकारणरूपी एकमात्र आपभी कार्य कारणरूपसे परिणत होकर भिन्न होते रहतेहो वास्तव में आपमें किसीप्रकारका पदार्थनहीं है । आप यद्यपि उपाधि रहितहो किन्तु गुणों के साथ आपका सम्बन्ध है, इसही कारण मूर्ख मनुष्य आप में भेदकल्पना करते रहते हैं ॥ ८ ॥ कोई (वेदांतिक) आपको ब्रह्म; कोई (मीमांसक) आपको धर्म, कोई (सांख्यवाले) प्रकृति पुरुषसे भिन्न परमपुरुष परमेश्वर; कोई २ (पंचरात्रवाले) नवशक्तियुक्त पर पुरुष, और कोई २ (योगशास्त्रवाले) आपको स्वधीन, अविनाशी महापुरुष मानते हैं ॥ ९ ॥ ब्रह्मा व मरीचिआदि ऋषिगण और मैं यद्यपि ये सबसत्व गुणसे उत्पन्नहुए हैं तो भी आपकी माया से मोहित चित्त होजाने के कारण इनसब आपकी सृष्टिको नहीं जानसकते, फिर रज और तम से उत्पन्न दैत्यगण और मनुष्यादि जीवगण आपको कैसे जानसकते है ! ॥१०॥ आप प्राणियों की चेष्टा, इस विश्वकी उत्पत्ति, स्थिति और नाश और संसार के बन्धनमोक्ष सब कोही जानते हो जैसे वायु सब चराचर प्राणियोंमें और आकाश में व्याप्त रहता है, आपभी वैसही आत्मस्वरूप से समस्त चराचरमें व्याप्तहो, आप ज्ञानस्वरूप और सबके आत्मा हो ॥११॥ आपने गुणों समेत क्रीड़ा करते २ जिन २ अवतारों को स्वीकारकिया है उन सबको देखा है अतएव आपने जो स्त्रीरूपधारण किया था उसके भी देखनकी मेरी इच्छा है ॥ १२ ॥ जिसरूप से दैत्योंको मोहितकर देवताओं को अमृत पिलायाथा उसरूपके देखनेकी इच्छा से मैं आयाहूं, उसके देखनेके निमित्त अत्यन्त कौतूहल उत्पन्न होरहा है ॥ १३ ॥ श्रीशुकदेवजी बोले कि—हे-राजन् ! महादेवजीके ऐसी प्रार्थनाकरने पर भगवान विष्णुने गम्भीर भाव से हँसकर उनसे कहा कि ॥ १४ ॥ अमृतका कलश हरजाने पर मैंने देखा कि—स्त्री का रूप धारणकरने परही देवताओं का कार्य सिद्ध होगा, अतएव दैत्यों को मोहित करनेके निमित्त मैंने स्त्रीरूप धारण किया था ॥

दिदृक्षोःसुरसत्तम । कामिनोबहुमन्यन्ते संकल्पप्रभवोदयम् ॥१६॥ श्रीशुकउवाच इतिब्रुवाणो भगवांस्तत्रैवान्तरधीयत । सर्वतश्चारयंश्चक्षुर्भव आस्तेसहोमया ॥ ॥ १७ ॥ ततोददर्शोपवने वरस्त्रियं विचित्रपुष्पारुणपल्लवद्रुमे । विक्रीडतींकन्दुकलीलया लसद्दुकूलपर्यस्तनितम्बमेखलाम् ॥ १८ ॥ आवर्तनोद्वर्तनकम्पितस्तनप्रकृष्टहारोरुभरैःपदेपदे । प्रभज्यमानामिवमध्यतश्चलत्पदप्रवालंनयतींततस्ततः ॥ ॥ १९ ॥ दिक्षुभ्रमत्कन्दुकचापलैर्भृशं प्रोद्विग्नतारायतलोललोचनाम् । स्वकर्णविभ्राजितकुण्डलोल्लसत्कपोलनीलालकमण्डिताननाम् ॥ २० ॥ श्लथद्दुकूलंकबरीं च विच्युतां सन्नह्यतीं वामकरेणवल्गुना । विनिघ्नतीमन्यकरेणकन्दुकं विमोहयंतीं जगदात्ममायया ॥ २१ ॥ तांवीक्ष्यदेवइति कन्दुकलीलयेषद्व्रीडास्फुटस्मितविसृष्टकटाक्षमुष्टः । स्त्रीप्रेक्षणप्रतिसमीक्षणविह्वलात्मा नात्मानमन्तिकउमांस्वगणांश्चवेद ॥ २२ ॥ तस्याःकराग्रात्सतुकन्दुकोयदा गतोविदूरंतमनुव्रजत्स्त्रियाः । वासःससूत्रंलघुमारुतोऽहरद्भवस्यदेवस्यकिलानुपश्यतः ॥ २३ ॥ एवंतांरुचिरापांगीं दर्शनीयांमनोरमाम् ॥ दृष्ट्वातस्यांमनश्चक्रे विषज्जन्त्यांभवःकिल ॥ २४ ॥ तयाऽपहृतविज्ञानस्तत्कृतस्मरविह्वलः । भवान्याअपिपश्यन्त्या गतह्रीस्तत्पदंययौ ॥ २५ ॥ सातमायान्तमालोक्य विवस्त्राव्रीडिताभृशम् । निलीयमानावृक्षेषु हस

॥ १५ ॥ हेदेव देव ! आपके देखने की इच्छा है तो मैं आपको दिखाऊँगा । बहुरूप कामका बढ़ाने अला है इसही से कामीजन उसका अतिमान करते हैं ॥ १६ ॥ श्रीशुकदेवजी बोले कि—हे नरनाथ ! भगवान ऐसाकह वहां से अन्तर्ध्यान होगये । महादेवजी ने पार्वतीजी के समीप बैठेहुए चारोंओर को दृष्टि डालते १ थोडीदेरके उपरांत देखा कि॥१७॥ विचित्रफूल और वृक्षों से शोभित उपवन में एक परमसुन्दरी स्त्री गेंद खेलरही है जिसके रेशमीवस्त्र से वेष्टित नितम्बपर कटिमेखला शोभायमान होरही है ॥ १८ ॥ गेंद के उछालने और पकड़ने के निमित्त स्त्री का शरीर भ्रमित होरहा है इससे उसके दोनों स्तन कम्पायमान होरहे हैं । दोनों स्तन, हार, और उरुदेश के भारसे उसके चलने में प्रत्येक पगपर ऐसा ज्ञात होता है कि मानों उसकी क्षीण कमर टूट जायगी वह सुन्दरी इस प्रकार से चलतीहुई एक स्थानसे दूसरे स्थानपर अपने चरणकमल धररही है ॥ १९ ॥ गेंद नानादिशाओं में भ्रमण कररही है इसकारण उसके विशाल नेत्रों के तारे चंचलहोरहे हैं सुन्दर दोनों कानों में सुवर्ण के कुण्डल शोभायमान होरहे हैं, उन कुण्डलों से कपोलोंकी शोभा और भी बढ़रही है उनकपोलों और काली अलकों से मुख अत्यन्त मनोमय होरहा है ॥ ॥ २० ॥ रेशमी वस्त्र और कबरी (जूड़ा) ढीली हुई जाती है, मोहिनी मनोहर बाएं हाथ सेउस रेशमी वस्त्र और कबरी को धारण कियेहुए और दूसरे हाथ से गेंदको उछालतीहुई अपनी माया द्वारा जगत् को मोहितकर रही थी ॥ २१ ॥ मोहिनी लज्जायुक्त मृदुहास्यसे कटाक्ष क्षेपकर रही थी; महादेवजी उसे देख उसके उन कटाक्षों से हत बुद्धि होगये । वह अनिमिष नेत्रों से उस स्त्री को देखने लगे, स्त्री भी उनकी ओर देखनेलगी । इससे श्रीशिवजी इतने व्याकुल होगये कि अपने समीप में बैठे हुई उमा और भूतगण को भी भूलगये ॥ २२ ॥ अनन्तर कामिनी की गेंद एकवार हाथ से दूर चलीगई मोहिनी उसके पकड़ने के निमित्त दौड़ी, तो वायु ने उसका वस्त्र कटिमेखला, सहित हरलिया । महेश्वर एकटक दृष्टि से देखनेलगे ॥ २३ ॥ सुन्दर मनोरमा सुन्दरी के तिरछे नेत्रों को देखकर महादेवजीका ज्ञान जातारहा, और उनका मन उसपर आसक्त होगया ॥ २४ ॥ दारुण कामदेव से पीड़ितहो वे भवानी के सम्मुखही, लज्जाको छोड़ मोहिनीके समीपगये ॥ २५ ॥ वह स्त्री विवस्त्रा थी, इससे वह महादेवजी को आते देख अत्यन्त लज्जित

लीनाव्यतिष्ठत ॥ २६ ॥ तामन्वगच्छद्भगवान् भवः प्रमुषितेन्द्रियः । कामस्य च वशंनीतः करेणुमिवयूथपः ॥ २७ ॥ सोऽनुव्रज्यातिवेगेन गृहीत्वाऽनिच्छतींस्त्रियम् । केशबन्धउपानीय बाहुभ्यांपरिषस्वजे ॥ २८ ॥ सोपगूढाभगवता करिणाकरिणीयथा । इतस्ततःप्रसर्पन्ती विप्रकीर्णशिरोरुहा ॥ २९ ॥ आत्मानंमोचयित्वाऽङ्ग सुरर्षभभुजान्तरात् । प्राद्रवत्सापृथुश्रोणी मायादेवविनिर्मिता ॥ ३० ॥ तस्याऽसौ पदवींरुद्रो विष्णोरद्भुतकर्मणः । प्रत्यपद्यतकामेन वैरिणेवविनिर्जितः ॥ ३१ ॥ तस्यानुधावतोरेतश्चस्कन्दामोघरेतसः । शुष्मिणोयूथपस्येव वासितामनुधावतः ॥ ३२ ॥ यत्रयत्रापतन्मह्यां रेतस्तस्यमहात्मनः । तानिरूप्यस्यहेम्नश्च क्षेत्राण्यासन्महीपते ॥ ३३ ॥ सरित्सरःसुशैलेषु वनेषूपवनेषुच । यत्रक्वचासन्नृषयस्तत्र सन्निहितोहरः ॥ ३४ ॥ स्कन्नेरेतसिसोऽपश्य दात्मानंदेवमायया । जडीकृतंनृपश्रेष्ठ संन्यवर्ततकश्मलात् ॥ ३५ ॥ अथावगतमाहात्म्य आत्मनोजगदात्मनः । अपरिज्ञेयवीर्यस्य नमेनेतदुहाद्भुतम् ॥ ३६ ॥ तमविक्लवमव्रीड मालक्ष्यमधुसूदनः उवाचपरमप्रीतो बिभ्रत्स्वांपौरुषींतनुम् ॥ ३७ ॥ श्रीभगवानुवाच ॥ दिष्ट्यात्वंविबुधश्रेष्ठ स्वांनिष्ठामात्मनास्थितः । यन्मेस्त्रीरूपयास्वैरं मोहितोप्यङ्गमायया ॥ ३८ ॥ कोनुमेऽतितरेन्मायां विषक्तस्त्वदृतेपुमान् तांस्तान्विसृजतीं भावान्दुस्तरामकृतात्मभिः ॥ ३९ ॥ सेयंगुणमयीमाया नत्वामभिभविष्यति । मयासमेताकालेन काल

हुई तौभी हँसते २ वृक्षों की ओट में हातीहुई भागी ॥ २६ ॥ भगवान महादेवजीकी इन्द्रियें उन्मत्तहो उठीं और वे कामदेवके वशीभूत हो, जैसे हाथी हथिनी के पीछे दौड़ता है ऐसेहीवह उस स्त्री के पीछे दौड़ने लगे ॥ २७ ॥ बहुत शीघ्रतापूर्वक दौड़कर वे अन्त में उसस्त्री के समीप पहुंचगये और उसकी इच्छा न होते हुए भी उसके केश पाश पकड़ अपने निकट खींच दोनों भुजाओंसे उसका आलिंगन किया ॥ २८ ॥ हाथी जैसे हथिनी से आलिंगन करता है भगवान भूतनाथके उसीप्रकारसे आलिंगन करनेपर वह स्त्री इधर उधर विचलितहोनेलगी, इसस उसके केश खुलगये॥२९॥हेराजन्!अनंतर महादेवजीकी भुजाओंसे आनेको छुड़ाकर वह भगवानकी रचीहुई विशाल नितंबिनी माया वहांसे भागी ॥ ३० ॥ श्रीशिवजीभी उन अद्भुत चरित्रवाले भगवानके पीछे दौड़े उसकाल ऐसा ज्ञात होताथा कि मानो पूर्व वैरी कामदेवने महादेवजी को जीतलियाहै ३१ ॥ पीछे दौड़ते २ ऋतुमती हथिनी के पीछे दौड़ते हुए हाथीके समान उन अमोघ वीर्य महादेवजी का वीर्य स्खलित होनेलगा ॥ ३२ ॥ हेराजन्! महात्मा रुद्रका वीर्य जिस २ स्थानपर गिरा उसी २ स्थानमें सोने और चांदीकी खानें होगई ॥ ३३ ॥ नदी, सरोवर, पर्वत, वन, उपवन, और जिन स्थानोंमें ऋषि वास करतेथे उन सब स्थानोंमें महादेवजी मोहिनीके पीछे२ गये ॥ ३४ ॥ वीर्यपात होजानेपर महादेवजीने जाना कि–मुझे दैवी मायाने जड़ीभूत करादियाहै यह विचारकर महादेवजी मोहसे निवृत्तहुए ॥ ३५ ॥ उन्हें जगदात्मा, अमोघ पराक्रमवाले नारायण की महिमा विदितथी अतएव अपनेको मायासे जड़ीभूत होना कुछ विचित्र बात न मानी ॥ ३६ ॥ हेराजन्! महादेवजी को स्वस्थचित्त और लज्जारहित देख अति प्रसन्नहो अपना पुरुष रूप धारणकर भगवानने उनसे कहा कि—३७ ॥ हेदेवश्रेष्ठ! आप मेरी स्त्री रूपिणी माया से अपनी इच्छानुसार मोहित होगयेथे इससमय जो आप अपनी स्थितिमें आगये यह बहुतही अच्छाहुआ ॥ ३८ ॥ आपके अतिरिक्त और कौन दूसरा पुरुष एकबार वशीभूतहो, नाना हाव भाव प्रगट करती अजितेंद्रिय पुरुष जिसे नहीं जीतसकत ऐसी मेरी मायाको एकहीबार में कौन परित्याग करसकताहै, ॥ ३९ ॥ हे तात! सृष्टि आदिकी कारणरूप कालरूप मेरे प्रभावसे घटते बढ़ते रजोगुण आदि अंशसे मेरे वश

रूपेणमागराः ॥ ४० ॥ श्रीशुकउवाच ॥ एवंभगवता राजन्श्रीवत्साङ्केनसत्कृतः । आमन्त्र्यतंपरिक्रम्य सगणःस्वालयंययौ ॥४१॥ आत्मांशभूतांतांमायां भवानींभग वान्भवः । शंसतामृषिमुख्यानां प्रीत्याचष्टाथभारत ॥ ४२ ॥ अपिव्यपश्यस्त्वमज स्यमायांपरस्यपुंसःपरदेवतायाः । अहंकलानामृषभोऽपिमुह्ये ययाऽवशोऽन्येकिमु तास्वतन्त्राः ॥ ४३ ॥ यंमामपृच्छस्त्वमुपेत्य योगात्समासहस्रान्तउपारतंवै । सए षसाक्षात्पुरुषः पुराणोनयत्रकालोविशतेनवेदः ॥ ४४ ॥ श्रीशुकउवाच ॥ इतितेऽ भिहितस्तात विक्रमःशार्ङ्गधन्वनः । सिन्धोर्निर्मथनेयेन धृतःपृष्ठेमहाचलः॥४५॥एत न्मुहुःकीर्तयतोऽनुशृण्वतोनरिष्यते जातुसमुद्यमःक्वचित् । यदुत्तमश्लोकगुणानु वर्णनं समस्तसंसारपरिश्रमापहम् ॥ ४६ ॥ असद्विषयमङ्घ्रिंभावगम्यं प्रपन्नानमृ तममरवर्यानाशयत्सिन्धुमथ्यम् । कपटयुवतिवेषोमोहयन्यःसुरारींस्तमहमुपसृता नांकामपूरंनतोऽस्मि ॥ ४७ ॥

इतिश्रीमद्भा०महा० अष्ट० द्वादशोऽध्यायः ॥ १२ ॥

॥ श्रीशुक उवाच ॥ मनुर्विवस्वतः पुत्रः श्राद्धदेवइतिश्रुतः । सप्तमोवर्तमानो यस्तदपत्यानिमेशृणु ॥ १ ॥ इक्ष्वाकुर्नभगश्चैवधृष्टः शर्यातिरेवच । नरिष्यन्तोऽथ नाभागः सप्तमोदिष्टउच्यते ॥ २ ॥ तरूषश्चपृषध्रश्चदशमोवसुमान्स्मृतः । मनोर्वै वस्वतस्यैतेदशपुत्राः परंतप ॥ ३ ॥ आदित्यावसवोरुद्राविश्वेदेवामरुद्गणाः । अश्विनावृभवोराजन्निन्द्रस्तेषांपुरंदरः ॥ ४ ॥ कश्यपोऽत्रिर्वसिष्ठश्चविश्वामित्रोऽथ

मे रहनेवाली वह मेरी गुणमयी माया कभी आपका पराभव नहीं करसकेगी ॥ ४० ॥ श्रीशुकदेव जी बोले कि—हेराजन् ! श्रीनारायणके इसप्रकारसे प्रशंसा व सनमान करनेपर शिवजी उनकी परिक्रमा कर प्रमथगणोंके साथ अपने धामको गये ॥४१॥ हे भारत ! फिर महेश्वर, आत्माकी अंशभूता उसी मायाके विषयमें ऋषियोंके सामने पार्वतीजीसे कहनेलगे कि—॥ ४२ ॥ हप्रिये ! परमपुरुष जन्मरहित भगवानकी मायाको तो देखा ? मैं सब मायाओंका भी अधीश्वर होकर उस मायासे मोहित होगया, अतएव जिसका चित्त परवशहै वह यदि मोहितहोजाय तो उसमें सन्देहही क्याहै ? ॥ ४३ ॥ मैं जब सहस्रवर्षवाले योगसे निवृत्तहुआ उससमय तुमने जिस पुरुषकी बात मुझसे पूँछीथी यही साक्षात् वह पुरुषहै काल व वेदभी इनकी महिमाका वर्णन नहीं करसकता॥४४॥ श्रीशुकदेवजी बोले कि—हेराजन् ! जिन भगवानने समुद्र मथनकाल में पीठपर महापर्वत धारण कियाथा मैंने सबबल पराक्रम उनका वर्णनकिया॥४५॥जो वारम्बार इसको कहैंगे व सुनेंगे उनकी कामना कभी निष्फल न होगी, क्योंकि भगवानके गुणोंका कहनाही संसारके क्लेशोंका नाशकरने वालाहै॥४६॥अभक्तोंको अप्राप्त भक्तिसे देवताओंने जिनके चरणोंका आश्रय लियाथा उन्हीं भग वानने सुन्दर मोहिनीरूप धारणकर दैत्योंको मोहितकर देवोंको समुद्र से उत्पन्नहुआ अमृत पिलाया उन्हीं भगवानको मैं नमस्कार करताहू । वह अपने शरणागतोंकी अभिलाषा पूर्ण करते हैं ॥४७॥

इतिश्रीमद्भागवतेमहापुराणअष्टमस्कन्धेसरलाभाषाटीकायांद्वादशोऽध्यायः ॥१२॥

श्री शुकदेवजी बोले कि—हे राजन् ! सूर्य के पुत्र मनु जो श्राद्धदेव के नाम से प्रसिद्ध हैं इससमय वर्तमान हैं, य सातवें मनु हैं ; इनके सन्तानआदि काविवरण सुनो ॥ १ ॥ इक्ष्वाकु, नभग, धृष्ट, शर्याति, नरिष्यन्त, नाभाग, दिष्ट, तरुष, पृषध्र और वसुमान यह दशजन वैवस्वत,मनुके पुत्र हुए ॥ २—३ ॥ इस मन्वन्तर में आदित्य, वसु, रुद्र, विश्वेदेवा, मरुद्गण, अश्विनीकुमार और ऋभुगण देवता; और पुरन्दर इस समय इनसब देवताओं के इन्द्र हैं ॥४॥

गौतमः । जमदग्निर्भरद्वाजइतिसप्तर्षयः स्मृताः ॥ ५ ॥ अत्रापिभगवज्जन्मकश्यपाददितेरभूत् । आदित्यानामवरजोविष्णुर्वामनरूपधृक् ॥६॥ संक्षेपतोमयोक्तानिसप्तमन्वन्तराणिते । भविष्याण्यथवक्ष्यामिविष्णोःशक्त्यान्वितानिच ॥ ७ ॥ विवस्वतश्चद्वेजायेविश्वकर्मसुतेउभे । संज्ञाछायाचराजेन्द्रयेप्रागभिहितेतव ॥ ८ ॥ तृतीयांवडवामेकेतासांसंज्ञासुतास्त्रयः । यमोयमीश्राद्धदेवश्छायायाश्चसुताञ्छृणु ॥ ९ ॥ सावर्णिस्तपतीकन्याभार्यासंवरणस्ययाः । शनैश्चरस्तृतीयोऽभूदश्विनौवडवात्मजौ ॥ १० ॥ अष्टमेऽन्तरआयातेसावर्णिर्भवितामनुः निर्मोकविरजस्काद्याःसावर्णितनयानृप ॥ ११ ॥ तत्रदेवाःसुतपसो विरजाअमृतप्रभाः । तेषांविरोचनसुतोबलिरिन्द्रोभविष्यति ॥ १२ ॥ दत्त्वेमांयाचमानाय विष्णवेयःपदत्रयम् राद्धमिन्द्रपदंहित्वाततः सिद्धिमवाप्स्यति ॥ १३ ॥ योऽसौभगवताबद्धः प्रीतेनसुतलेपुनः । निवेशितोऽधिकेस्वर्गादधुनास्तेस्वराडिव ॥ १४ ॥ गालवोदीप्तिमान्रामोद्रोणपुत्रःकृपस्तथा । ऋष्यशृङ्गः पिताऽस्माकंभगवान्बादरायणः ॥१५॥ इमेसप्तर्षयस्तत्रभविष्यन्तिस्वयोगतः । इदानीमासतेराजन्स्वे स्वआश्रममण्डले ॥ १६ ॥ देवगुह्यात्सरस्वत्यांसार्वभौमइतिप्रभुः । स्थानंपुरंदराद्धृत्वाबलयेदास्यतीश्वरः ॥१७॥ नवमोदक्षसावर्णिर्मनुर्वरुणसम्भवः भूतकेतुर्दीप्तिकेत्वादयास्तत्सुतानृप ॥ १८ ॥ परामरीचिगर्भाद्या देवाइन्द्रोऽद्भुतःस्मृत । द्युतिमत्प्रमुखास्तत्रभविष्यन्त्यृषयस्त

कश्यप, अत्रि, वसिष्ठ, विश्वामित्र, गौतम, जमदग्नि और भरद्वाज इस मन्वन्तर में यह सप्तर्षि हैं ॥५॥ इसमन्वन्तर में भी कश्यपके वीर्य से अदिति के गर्भ मे भगवानका वामनरूपमें जन्महुआ। वामन सब आदित्यों में छोटे हैं ॥ ६ ॥ मैंने संक्षेप से तुमसे सात मन्वन्तरों का वर्णन किया अब भगवान विष्णुजीकी शक्तिसे व्याप्त भविष्यत् मन्वन्तरों का वर्णन करता हूं ॥ ७ संज्ञा और छाया नामक विश्वकर्मा की यह दो पुत्रियें सूर्यकी भार्याथीं, हेराजेंद्र ! इनका वर्णन पहिलेहीकरचुका हूं ॥ ॥ ८ ॥ कोई २ कहते हैं कि सूर्यकी एक तीसरी स्त्री का नाम वड़वाथा, किन्तु मैं जानता हू कि वड़वासंज्ञाकाही नामांतर है। संज्ञाके तीनपुत्र यम, यमुना और श्राद्धदेव हुए। अब छायाकी सन्तानों के नाम सुनो ॥ ९ ॥ उसके सावर्णि नामसे एकपुत्र और तपतीनाम से एककन्या हुई, तपती राजा सम्वरणकी स्त्री हुई थी। शनिश्चरयाका तीसरापुत्रथा। सूर्य के वड़वानामकी जो स्त्री थी उसके गर्भ से अश्विनीकुमार उत्पन्न हुए ॥ १० ॥ हेराजन् ! आठवें मन्वन्तर में सावर्णिमनु होंगे, निर्मोक और विरजस्क आदि सावर्णिमनु के पुत्र होंगे ॥११ ॥ इस मन्वंतर के देवताओं के नाम सुतपा, विरजा और अमृतप्रभा होंगे विरोचन नदन बलि उनके इन्द्र होंगे ॥ १२ ॥ भगवान के तीन पग पृथ्वी मांगनें से बलि नें यह पृथ्वी उनको दान करदीथी बलि आठवें मन्वंतर में प्राप्त हुए इन्द्र पद छोड़कर मोक्ष को प्राप्त होगा ॥ १३ ॥ भगवानने प्रसन्न होकर इस बलि को इस समय पाताल में बांध रक्खा है वह स्वर्ग सेभी श्रेष्ठ पाताल पुरी में इन्द्र की समान वासकरताहै १४ गालव, दीप्तिमान, परशुराम, अश्वत्थामा, कृपाचार्य, ऋष्यशृंग, और मेरेपिता भगवान बादरायण वेदव्यास जी यह सातजन अष्टम मन्वंतर में ऋषिहोंगे यह इससमय अपनें२ आश्रममें योगका अवलंबनकर निवासकररहे हैं ॥१५।१६॥ हे राजन् ! उससावर्णि मन्वंतरमें भगवान देव गुह्यके वीर्य स सरस्वतीके गर्भ में सार्वभौमके नामसे अवतीर्णहोंगे जो पुरंदरसे बलपूर्वक स्वर्ग राज्य छीनकर बलिको देवेंगे ॥ १७॥ वरुण का पुत्र दक्ष सावर्णी नामक नवमा मनु होगा, भूतकेतु और दीप्तिकेतु आदि उसके दो पुत्र होंगे ॥१८॥ इस मन्वन्तर में पारा और मरीचिगर्भ आदि देवता होंगे, अद्भुत नाम इन्द्र और द्युति-

तः ॥ १९ ॥ आयुष्मतोऽम्बुधारायामृषभोभगवत्कला । भवितायेनसंराप्तां त्रिलोकींभोक्ष्यतेऽद्भुतः ॥ २० ॥ दशमोब्रह्मसावर्णिरुपश्लोकसुतोमहान् । तत्सुताभूरिषेणाद्या हविष्मत्प्रमुखाद्विजाः ॥ २१ ॥ हविष्मान्सुकृतिःसत्योजयोमूर्तिस्तदाद्विजाः सुवासनविरुद्धाद्यादेवाःशंभुःसुरेश्वरः ॥ २२ ॥ विष्वक्सेनोविषूच्यांतुशंभोःसख्यं करिष्यति । जातःस्वांशेनभगवान्गृहे विश्वसृजोविभुः ॥ २३ ॥ मनुर्वैधर्मसावर्णिरेकादशमआत्मवान् । अनागतास्तत्सुताश्चसत्यधर्मादयोदश ॥ २४ ॥ विहंगमाः कामगमा निर्वाणरुचयःसुराः । इन्द्रश्चवैधृतिस्तेषामृषयश्चारुणादयः ॥ २५ ॥ आर्यकस्यसुतस्तत्रधर्मसेतुरितिस्मृतः । वैधृतायांहरेरंशस्त्रिलोकींधारयिष्यति २६। भवितारुद्रसावर्णी राजन्द्वादशमोमनुः । देववानुपदेवश्च देवश्रेष्ठादयःसुताः२७ ऋतधामाचतत्रेन्द्रो देवाश्चहरितादयः । ऋषयश्चतपोमूर्तिस्तपस्व्याग्नीध्रकादयः ॥ २८ ॥ स्वधामाख्योहरेरंशः साधयिष्यतितन्मनोः अन्तरंसत्यसहसःसूनृतायाः सुतोविभुः ॥ २९ ॥ मनुस्त्रयोदशोभाव्यो देवसावर्णिरात्मवान् । चित्रसेनविचित्राद्या देवसावर्णिदेहजाः ॥ ३० ॥ देवाःसुकर्मसुत्रामसंज्ञा इन्द्रोदिवस्पतिः निर्मोकतत्त्वदर्शाद्या भविष्यन्त्यृषयस्तदा ॥ ३१ ॥ देवहोत्रस्यतनयउपहर्तादिवस्पतेः । योगेश्वरोहरेरंशो बृहत्यांसंभविष्यति ॥ ३२ ॥ मनुर्वाइन्द्रसावर्णिश्चतुर्दशमएष्यति ॥ उरुगम्भीरबुद्ध्याद्या इन्द्रसावर्णिवीर्यजाः ॥३३॥ पवित्राश्चाक्षुषादेवाःशुचिरिंद्रोभविष्यति अग्निर्बाहुःशुचिःशुद्धो मागधाद्यास्तपस्विनः ॥ ३४ ॥ सत्रायणस्य तनयो बृहद्भानुस्तदाहरिः । वितानायां महाराज क्रियातन्तून्वितायिता ॥

मान आदि ऋषि होंगे ॥ १९ ॥ उस मन्वतरमें आयुष्मान् के वीर्य से अम्बुधाराके गर्भ में ऋषभ नाम से भगवान अवतीर्ण होंगे ऋषभ अद्भुत नामकइन्द्र को सर्वसम्पत्ति युक्त त्रिभुवनका भोगकरावेंगे ॥ २०॥ उपश्लोक के पुत्र ब्रह्म सावर्णि नाम दशमे मनु होंग, भूरिषेण आदि मनु के पुत्र होंगे उस मन्वतर में हविष्मत, सुकृत, सत्य, जय और मूर्ति आदि सप्तर्षि होंगे सुवासन और विरुद्ध देवता तथा शम्भु उनके इन्द्र होंगे ॥२१–२२॥उस मन्वतर में भगवान नारायण विश्वस्रष्टा के घरमें विसूची क गर्भ से विष्वक्सेन नाम से जन्म ग्रहणकर शम्भु नाम इन्द्र के साथमित्रता करेंगे ।२३। धर्म सावर्णि एकादश मनुहोंगे उनके सत्यधर्म आदि दशपुत्र होंगे ॥ २४ ॥ उस मन्वन्तरमें विहंगम, कामगम निर्वाण और रुचि यह देवता तथा वैधृति उनके इन्द्र और अरुणादि ऋषि होंगे । ॥ २५ ॥ इस मन्वन्तरमें आर्यक के वीर्यसे वैधृताके गर्भमें भगवानके अंशसे धर्मसेतु जन्म ग्रहण कर त्रिलोकी का पालन करेंगे ॥ २६ ॥ रुद्र सावर्णि बारहवें मनुहोंगे और उनके देववान उपदेव और देव श्रेष्ठ आदि पुत्र होंगे ॥ २७ ॥ इस मन्वंतर में ऋतधामा इन्द्र हरितादि देवता, और तपोमूर्ति, तपस्वी और आग्नीध्रक् आदि ऋषि होंगें ॥ २८ ॥ हरि का अंश, सत्यसहा नामक विप्रके वीर्य से सूनृता क गर्भ में उत्पन्न हो सुधामा नाम से विख्यात होगा, उनसे वह मन्वन्तर अत्यंत प्रसिद्ध होगा ॥ २९ ॥ देव सावर्णि तेरहवे मनु होंगे, चित्रसेन और विचित्र आदि देव सावर्णि के पुत्र होंगें ॥ ३० ॥ इस मन्वंतर में सुकर्मा और सुत्रामा नामक देवता दिवस्पति इन्द्र और निर्मोक तथा तत्त्वदर्शी आदि ऋषि होंगें ॥ ३१ ॥ उस समय देवहोत्र क बृहती नाम स्त्री से योगेश्वर नामक भगवान का अंशावतार होगा वह उस समय के दिवस्पति नामक इन्द्र के सहायक होंगे ॥ ३२ ॥ इन्द्र सावर्णी चौदहवें मनुहोंगे और उरु, गम्भीर बुद्धिआदि उनके पुत्रहोंगे ॥ ३३ ॥ उस मन्वंतर में पवित्र चाक्षुष नामक देवता, शुचिइन्द्र और अग्निबाहु, शुचि, शुद्ध तथा मागधादि ऋषि होंगे ॥ ३४ ॥ नारायण इस मन्वंतर में सत्रायण के वीर्य से विनता के गर्भमें बृहद्भानु के

॥ ३५ ॥ राजंश्चतुर्दशैतानि त्रिकालानुगतानि ते । प्रोक्तान्येभिर्मितः कल्पो युगसा हस्रपर्ययः ॥ ३६ ॥

इतिश्रीमद्भा० महा०अष्टम०त्रयोदशोऽध्यायः ॥ १३ ॥

॥ राजोवाच ॥ मन्वन्तरेषुभगवन् यथामन्वादयस्त्विमे । यस्मिन्कर्मणियेयेन नियुक्तास्तद्वदस्वमे ॥ १ ॥ ऋषिरुवाच॥ मनवोमनुपुत्राश्चमुनयश्चमहीपते । इन्द्राः सुरगणाश्चैवसर्वेपुरुषशासनाः ॥ २ ॥ यज्ञादयोयाः कथिताः पौरुष्यस्तनवोनृप । मन्वादयोजगद्यात्रांनयन्त्याभिःप्रचोदिताः ॥ ३ ॥ चतुर्युगान्तेकालेनग्रस्ताञ्छ्रुतिगणान्यथा । तपसाऋषयोऽपश्यन्यतोधर्मःसनातनः ॥ ४ ॥ ततोधर्मंचतुष्पादंमनवोहरिणोदिताः । युक्ताः संचारयन्त्यद्धास्वेस्वेकालेमहींनृप ॥ ५ ॥ पालयन्तिप्रजापालायावदन्तंविभागशः । यज्ञभागभुजोदेवायेचतत्रान्विताश्चतैः ॥ ६ ॥ इन्द्रो भगवतादत्तांत्रैलोक्यश्रियमूर्जिताम् । भुञ्जानः पातिलोकांस्त्रीन्कामंलोकेप्रवर्षति ॥ ७ ॥ ज्ञानंचानुयुगंब्रूते हरिःसिद्धस्वरूपधृक् । ऋषिरूपधरःकर्मयोगंयोगेशरूप धृक् ॥ ८ ॥ सर्गंप्रजेशरूपेण दस्यून्हन्यात्स्वराड्वपुः कालरूपेणसर्वेषामभावाय पृथग्गुणः ९ ॥ स्तूयमानोजनैरेभिर्माययानामरूपया । विमोहितात्मभिर्नानादर्शनै र्नचदृश्यते ॥ १० ॥ एतत्कल्पविकल्पस्य प्रमाणपरिकीर्तितम् । यत्रमन्वन्तराण्याहु श्चतुर्दशपुराविदः ॥ ११ ॥

इतिश्रीमद्भा० महा०अष्टमस्कन्धेचतुर्दशोऽध्यायः ॥ १४ ॥

नामसे अवतीर्ण होंगे जोसमस्त क्रियाकांड का विस्तार करेंगे ॥ ३५ ॥ हे राजन्! भूत, वर्तमान और भविष्य इनतीनों कालके चौदह मनुओं का वृत्तांत तुमसे कहा । यह चौदहमनु सहस्र युग भोग करेंगे और सहस्र युगका एक कल्पहोता है ॥ ३६ ॥

इतिश्री मद्भागवतेमहापुराणेअष्टमस्कंधेसरलाभाषाटीकायांत्रयोदशोऽध्यायः ॥ १३ ॥

राजा परीक्षित् बोलेकि–हे भगवन्! मन्वंतरोंमें यहमनु इत्यादि जिस प्रकार से भिन २ कार्यों में प्रवृत्त होते हैं आप वह सब मुझसे कहिये ॥ १ ॥ श्रीशुकदेवजी बोलेकि–हे राजन्! मनु, मनुपुत्र, इन्द्र और देवता येसब भगवान के अंशावतार की आज्ञामें रहते हैं ॥ २ ॥ यज्ञादि ईश्वरावतारों की और मनुआदिकी कथायेंकहीहैं वेसबही भगवान की आज्ञानुसार जगतका कार्य किया करते हैं ॥ ३ ॥ चारयुग के अंतमें कालके प्रभाव से जबसब श्रुतियें लोप होजाती हैं तब ऋषिलोग अपने तपोबल से फिर उन्हें प्रगट करते हैं । उन सबसे फिर सनातन धर्मकी उत्पत्ति होती है ॥ ४ ॥ इसके उपरांत मनुगण नारायण की आज्ञानुसार तत्पर होकर अपने २ समय में पृथ्वीपर चतुष्पाद् धर्मका प्रचार करते हैं ॥ ५ ॥ मनुके पुत्र पौत्रादि तथा स्वर्ग और पृथ्वी आदिके कर्मोंमें निवासियों के साथ यज्ञभोजी देवतागण युगके अंततक पृथ्वीका पालन करते हैं ॥ ६ ॥ देवराज इन्द्र भगवान के दियेहुए त्रैलोक्य का भोगकर तीनोंलोक का पालन और पृथ्वीपर वर्षा करते हैं ॥ ७ ॥ भगवान युग युगमें सनकादि सिद्धरूप धारणकर ज्ञानका याज्ञवल्क्यादि ऋषि रूप धारणकर कर्मोंका, और दत्तात्रेयादि योगेश्वर रूप धारणकर योगका उपदेश करते हैं ॥ ८ ॥ भगवान्–मरीच्यादि रूपसे प्रजा उत्पन्न, करते राजरूपसे चोरोंका वध करते और काल रूपसे शीत उष्ण आदि नाना प्रकारके गुणधारण कर सबका संहार करते रहते हैं ॥ ९ ॥ नाम और रूपमयी मायासे मोहित यह मनुष्य नानाशास्त्रों से भगवानकी स्तुति करते रहते हैं किंतु उनको नहीं पाते ॥ १० ॥ हे राजन्! कल्प और विकल्प के प्रमाण से यह मैंने कहा, प्राचीन विद्वानों ने इसके मध्यमें चौदह मन्वन्तरों की कल्पना की है ॥ ११ ॥

इतिश्री मद्भागवतेमहापुराणेअष्टमस्कंधेसरलाभाषाटीकायांचतुर्दशोऽध्यायः ॥ १४ ॥

॥ राजोवाच ॥ बलेः पदत्रयंभूमेः कस्माद्धरिरयाचत । भूतेश्वरः कृपणवल्लब्धार्थोऽपिबबंधतम् ॥ १ ॥ एतद्वेदितुमिच्छामोमहत्कौतूहलंहिनः । याच्ञेश्वरस्यपूर्णस्यबन्धनंचाप्यनागसः ॥ २ ॥ श्रीशुक उवाच ॥ पराजितश्रीरसुभिश्चहापितोहीन्द्रेणराजन्भृगुभिः सजीवितः । सर्वात्मनातानभजद्भृगून्बलिः शिष्योमहात्माऽर्थनिवेदनेन ॥ ३ ॥ तंब्राह्मणाभृगवः प्रीयमाणाअयाजयन्विश्वजितात्रिणाकम् । जिगीषमाणंविधिनाऽभिषिच्यमहाभिषेकेणमहानुभावाः ॥ ४ ॥ ततोरथः काञ्चनपट्टनद्धोहयाश्चहर्यश्वतुरङ्गवर्णाः । ध्वजश्चसिंहेनविराजमानोहुताशनादासहविर्भिरिष्टात् ॥ ५ ॥ धनुश्चदिव्यंपुरटोपनद्धंतूणावरिक्तौकवचंचदिव्यम् । पितामहस्तस्यददौचमालामम्लानपुष्पांजलजंचशुक्रः ॥ ६ ॥ एवंसविप्रार्जितयोधनार्थस्तैःकल्पितस्वस्त्ययनोऽथविप्रान् । प्रदक्षिणीकृत्यकृतप्रणामः प्रह्लादमामन्त्र्यनमश्चकार ॥ ७ ॥ अथारुह्यरथंदिव्यंभृगुदत्तंमहारथः । सुस्रग्धरोऽथसन्नह्यधन्वीखड्गीधृतेषुधिः ॥ ८ ॥ हेमाङ्गदलसद्बाहुः स्फुरन्मकरकुण्डलः । रराजरथमारूढोधिष्ण्यस्थइवहव्यवाट् ॥ ९ ॥ तुल्यैश्वर्यबलश्रीभिः स्वयूथैर्दैत्ययूथपैः । पिबद्भिरिवखंदृग्भिर्दहद्भिः परिधीनिव ॥ १० ॥ वृतोविकर्षन्महतीमासुरींध्वजिनींविभुः । ययाविन्द्रपुरींस्वृद्धांकम्पयन्निवरोदसी ॥ ११ ॥ रम्यामुपवनोद्यानैः श्रीमद्भिर्नन्दनादिभिः । कूजद्विहङ्गमिथुनैर्गायन्मत्तमधुव्रतैः ॥ १२ ॥ प्रवालफलपुष्पोरुभारशाखाम

राजा परीक्षित ने कहाकि—हे ब्रह्मन् ! भगवानने, ईश्वरहोकरभी किसकारण दीनजनोंकी समान बलिसे तीनपग पृथ्वी मांगीथी ? मांगीहुई पृथ्वी पाकरभी किसकारण से भगवान ने बलिको बांधाथा ? यह वृत्तांत जाननेकी मेरी इच्छा है । पूर्णब्रह्म ईश्वरका भिक्षा मांगना और निर्दोषबलि का बांधना इन दोनों विषयों के जाननेके निमित्त मुझे बड़ा कौतूहल होरहा है ॥ २ ॥ शुकदेव जी बोले कि—हेराजन् ! इन्द्रने बलिकी लक्ष्मी और प्राणहरलिये थे परन्तु शुक्राचार्यकी कृपासे वह फिर जीवितहोगये; इसहीकारण बलि भृगुकुलका शिष्यहोकर धनदेकर मन, वाक्य और काय से शुक्राचार्यकी उपासना करता था ॥ ३ ॥ महा प्रभावशाली भृगुवंशियों ने स्वर्ग के जीतनेकी इच्छावाले राजाबलिको महाभिषेकद्वारा अभिषिक्तकर विश्वजित यज्ञ द्वारा एक महायाग कराया ॥ ॥ ४ ॥ उस यज्ञ की अग्नि में घृतहोमने पर, उस से सुवर्ण के पट्टसे बँधाहुआ एकरथ, इन्द्र के घोड़ों की सदृश हरित वर्णके कई एक घोड़े, सिंहशोभित, ध्वज, स्वर्ण निर्मित्त धनुष, अक्षय बाणोंयुक्त दोतरकश, और दिव्य कवच उत्पन्नहुआ । बलिको जब यह सब सामग्री प्राप्तहुई तब प्रह्लादने एक न कुम्हलानेवाली फूलोंकीमाला और शुक्राचार्य ने एक शंखदिया ॥ ५—६ ॥ ब्राह्मणों ने इसप्रकार युद्धकी सामग्री से सजाय स्वस्तिवाचनकिया तदनन्तर बलिने उनकी परिक्रमा और प्रणामकर अपने पितामह प्रह्लादको प्रणामकर उनसे आज्ञा ले ॥ ७ ॥ गलेमें मालापहिन, भृगुवंशियों के दिये हुए दिव्यरथपरचढ़, कवचपहिन और धनुष व खड्गधारणकर पीठपर तरकस को धारणकिया ॥ ८ ॥ सुवर्ण के बनेहुए बाजूबन्द दोनों भुजाओं में शोभापानेलगे और मकराकृत कुण्डलों का प्रकाश चारोंओर को फैलनेलगा । इस प्रकारसे दैत्यराज सुसज्जितहो रथपर बैठ, घड़े में रक्खीहुई अग्निकी समान, शोभा पानेलगा ॥ ९ ॥ अपने समान ऐश्वर्य, बल, श्री युक्त; मानों दृष्टियों से आकाश को पीजायगे और दिशाओं को जलादेंगे ऐसे अपने दैत्य सेनापतियों को साथले भारी असुरों की सेना सहित आकाश और भूमिको कँपाता हुआ सर्वसंपत्ति युक्त उसनें इन्द्रपुरी पर आक्रमण किया ॥ १० ॥ ११ ॥ नंदनादि सुंदर उपवन द्वारा इन्द्रपुरीकी शोभा अत्यन्त रमणीय होरही थी उस उपवन और कितनेंही उद्यानों में

रहुमैः । हंससारसचक्राह्वकारण्डवकुलाकुलाः नलिन्योयत्रक्रीडन्तिप्रमदाः सुरसे
विताः ॥ १३ ॥ आकाशगङ्गयादेव्यावृतांपरिखभूतया । प्राकारेणाग्निवर्णेनसाट्टाले
नोन्नतेनच ॥ १४ ॥ रुक्मपट्टकपाटैश्चद्वारैः स्फटिकगोपुरैः । जुष्टांविभक्तप्रपथांवि
श्वकर्मविनिर्मिताम् ॥ १५ ॥ सभाचत्वररथ्याढ्यांविमानैर्न्यर्बुदैर्युताम् । शृङ्गाटकै
र्मणिमयैर्वज्रविद्रुमवेदिभिः १६ ॥ यत्रनित्यवयोरूपाः श्यामाविरजवाससः । भ्राज
न्तेरूपवन्नार्योह्यर्चिर्भिरिववह्नयः ॥ १७ ॥ सुरस्त्रीकेशविभ्रष्टनवसौगन्धिकस्रजा
म् । यत्रामोदमुपादायमार्गआवातिमारुतः ॥ १८ ॥ हेमजालाक्षनिर्गच्छद्धूमेनागुरु
गन्धिना । पाण्डुरेणप्रतिच्छन्नमार्गेयान्तिसुरप्रियाः ॥१९॥ मुक्तावितानैर्मणिहेमके
तुभिर्नानापताकावलभीभिरावृताम् । शिखण्डिपारावतभृङ्गनादितांवैमानिकस्त्रीक
लगीतमङ्गलाम् ॥ २० ॥ मृदङ्गशङ्खानकदुन्दुभिस्वनैःसतालवीणामुरजर्ष्टिवेणु
भिः । नृत्यैः सवाद्यैरुपदेवगीतकैर्मनोरमांस्वप्रभयाजितप्रभाम् ॥ २१ ॥ यांनव्रज
न्त्यधर्मिष्ठाः खलाभूतद्रुहः शठाः । मानिनः कामिनोलुब्धाएभिर्हीनाव्रजन्तियत् ।
॥ २२ ॥ तांदेवधानींसवरूथिनीपतिर्बहिः समन्ताद्रुरुधेपृतन्यया । आचार्यदत्तंजल
जंमहास्वनंदध्मौप्रयुञ्जन् भयमिन्द्रयोषिताम् ॥२३॥ मघवांस्तमभिप्रेत्यबलेः पर
ममुद्यमम् । सर्वदेवगणोपेतो गुरुमेतदुवाचह ॥ २४ ॥ भगवन्नुद्यमोभूयान् बले
र्नः पूर्ववैरिणः । अविषह्यमिमं मन्ये केनासीत् तेजसोर्जितः ॥ २५ ॥ नैनकश्चित्

पक्षियों के जोडे शब्द कररहे हैं भौंरे गुंज रहे हैं ॥ फल फूल और अंकुर के भार से कल्प वृक्षों की शाखाएं झुकरहीं हैं उस स्थान में हंस, सारस, चक्रवाक और कारण्डव पक्षियों युक्त अनेकों सरोवर हैं देवता और देवाङ्गनाएं उस सरोवर में जल क्रीडा कररही हैं ॥१३ ॥ आकाश गङ्गा खाईके समान इन्द्रपुरी को घेरेहुए है उसके चारोंओर ऊंचा दीवारों वाला कोट बनाहुआ है और उन दीवारो के ऊपर युद्धस्थान बनेहुए हैं ॥ १४ ॥ नगर के सब किवाडें सुवर्ण के और द्वार स्फटिकमणि के बनेहुए हैं विश्वकर्मा के बनायेहुए सुंदर चौराहे परस्पर में भली भांति से विभक्त हैं उस इन्द्रपुरी मे कहीं२ सुंदर बैठने के स्थान, आंगन, गलियें, करोडों विमान, चौराहे तथा वज्र व विद्रुमकी बनी हुई वेदियां शोभायमान होरही है ॥१५।१६॥ वहांकी सुन्दर स्त्रियें कि जिनका यौवन और सुकुमारपना निरंतर समभाव से स्थिर रहता है, सुंदर स्वच्छ वस्त्र पहिनेहुए अपनी प्रभा द्वारा अग्नि की समान प्रकाशित होरहीं हैं ॥ १७ ॥ वायु, इन्द्रपुरी की देवांगनाओं के केश से छूटेहुए फूलों की सुगंधि को ग्रहणकर मार्ग में मन्द २ चलरहा है ॥१८॥ स्वर्णमय झरोखों में से पीतवर्ण के सुगंधित अगर का धुआं निकलकर सब स्थानों में व्याप्त होरहाहै सुर सुंदरियें उस स्थानमें होती हुई जारही हैं ॥ १९॥ वह पुरी मोतियों की माला युक्त चंदनोंसे, मणिमय और स्वर्णमय ध्वजाओं से और नाना प्रकार की पताकाओं से शोभित तथा विमानों के अग्रभाग से व्याप्त है, मोर, कबूतर और भौंरे पुरीमें शब्द कररहे हैं, स्त्रियें विमानों में बैठीहुई सुंदर स्वर से गान करतीहुई मंगलाचरण कर रही हैं ॥ २० ॥ मृदङ्ग, शंख, पटह और दुंदुभी के शब्द से, ताल, वीणा, मुरज और ऋष्टि वंशी आदिकी ध्वनि तथा गंधर्वों के नृत्य, वाद्य और गीत से इन्द्रपुरी अत्यन्त रमणीय होरही है वह ऐसी प्रकाशित होरही है कि जिससे साक्षात् प्रकाश के अधिष्ठात्री देवता (सूर्यादिक) भी परास्त हो रहे हैं ॥ २१ ॥ अधर्मी, दुष्ट, प्राणि हिंसक; अभिमानी, कामी व लोभी उस पुरी में प्रवेश नहींकर सकते अधर्म, दुष्टता, प्राणि हिंसा, शठता, अभिमान और लोभ आदि दोषों से जिसका अन्तःकरण दूषित नहीं है केवल वही वहां आसकते हैं ॥२२ ॥ दैत्य सेनापति बलि ने देवताओंकी पूर्वोक्त राजधानी इन्द्रपुरी को चारोंओर से घेर बाहिरीभाग में स्थितिकर गुरुके दियेहुए उग्र शब्द वाले

कुतोऽपि प्रतिव्योढुमधीश्वरः। पिबन्निवमुखेनेदं लिहन्निवदिशोदश। दहन्निव दिशोदृग्भिः संवर्ताग्निरिवोत्थितः॥ २६॥ ब्रूहिकारणमेतस्य दुर्धर्षत्वस्यमद्रिपो ओजःसहोबलंतेजो यतएतत्समुद्यमः॥२७॥ गुरुरुवाच॥ जानामिमघवन्शत्रोरु न्नतेरस्यकारणम्। शिष्यायोपभृतंतेजो भृगुभिर्ब्रह्मवादिभिः॥ २८॥ भवद्विधोभ वान्वापि वर्जयित्वेश्वरंहरिम्। नास्यशक्तःपुरःस्थातुं कृतांतस्ययथाजनाः २९॥ तस्मान्निलयमुत्सृज्य यूयंसर्वेत्रिविष्टपम्। यातकालंप्रतीक्षन्तो यतःशत्रोर्विपर्ययः॥ ॥ ३०॥ एषविप्रबलोदर्कःसंप्रत्यूर्जितविक्रमः। एषामेवापमानेन सानुबन्धोविनं क्ष्यति॥ ३१॥ एवंसुमन्त्रितार्थास्ते गुरुणार्थानुदर्शिना। हित्वात्रिविष्टपंजग्मुर्गी र्वाणाःकामरूपिणः॥ ३२॥ देवेष्वथनिलीनेषुबलिर्वैरोचनःपुरीम्। देवधानीमधिष्ठा यवशंनिन्येजगत्त्रयम्॥ ३३॥ तंविश्वजयिनंशिष्यं भृगवःशिष्यवत्सलाः। शतेन हयमेधानामनुव्रतमयाजयन्॥ ३४॥ ततस्तदनुभावेन भुवनत्रयविश्रुताम्। कीर्तिं दिक्षुवितन्वानः सरेजेउडुराडिव॥ ३५॥ बुभुजेचश्रियंस्वृद्धां द्विजदेवोपलम्भि ताम्। कृतकृत्यमिवात्मानं मन्यमानोमहामनाः॥ ३६॥

इतिश्रीमद्भा० महा० अष्ट० पंचदशोऽध्यायः॥ १५॥

शङ्ख को बजाया देवाङ्गनाओं के अंतःकरण उस शब्दसे व्याकुल होउठे॥ २३॥ हे राजन्! इन्द्र बलिके उस परमउद्यम को देख समस्त देवताओं के सग बृहस्पतिजी के निकट आय कहनें लगे कि॥ २४॥ हे भगवन्! देखते हैं कि हमारे पूर्व वैरी बलि का उद्यम अत्यंत प्रचण्ड है, जानपड ता है कि इसका सहन हम नहीं करसकते परन्तु इसका तेज किस कारण से इतना बढउठा है २५ हे गुरो! मुझे ऐसा प्रतीत होता है कि इसको कोईभी नहीं दूर करसकता क्यों कि यह तो ऐसा जानपडता है कि मानो मुख से जगतको पीजायगा जिह्वा से दशो दिशाओं को चाटजायगा, और नेत्रों से दिशाओं को भस्म करदेगा यह तो प्रलयाग्नि की समान प्रचण्ड होरहा है॥ २६॥ जिस कारण से हमारे शत्रु इतनें बलवान होगए हैं और जिससे इनका यह इन्द्रियबल, देहबल, पराक्रम और यह उद्यम बढगया है वह कारण कहिये॥ २७॥ बृहस्पतिजी बोले कि हे पुरंदर! जिसका रण से तुम्हारा वैरी इतना प्रतापशाली होगया वह कारण मैं जानता हूं ब्रह्मवेत्ता भृगुवंशियोंने स्नेह के कारण इसको तेजस्वी करादिया है॥ २८॥ हरि के अतिरिक्त तुम अथवा तुम्हारी समान प्रभा वशाली कोई पुरुष महाबलबलि को नहीं जीतसकता ब्रह्मतेजसे इसका बल बढगया है अतएव इस को कोईभी नहीं जीतसकता मनुष्य जैसे कालके सन्मुख नहीं ठहर सकता उसी प्रकार इसके स- न्मुख खडेहोनें की किसीकीभी शक्ति नहीं है इस समय यही उपाय हैं कि तुम सब स्वर्ग छोड कर गुप्त होजाओ और जबतक शत्रु का नाश नहोवे तबतक गुप्तरहो इस समय इसका पराक्रम बढा हुआ है और ब्रह्मतेज के कारण इसका बल क्रमशः बढताही रहेगा परन्तु अन्त में ब्राह्मणोंही के अपमान से वह मनुष्य स्वयही वंश सहित नाश होजावेगा॥ २९॥ ३१॥ कार्य के जाननें वाले बृहस्पतिजीने जब ऐसी सम्मतिदी तब सब कामरूपी देवगण स्वर्ग छोडकर छिपगये॥ ३२॥ उनके छिपजानेपर राजाबलि ने इन्द्रपुरी पर अधिकार कर तीनों जगतको वशीभूत करलिया॥ ॥ ३३॥ शिष्यवत्सल भृगुवंशी ब्राह्मणों ने विश्वजीतने और अचलराज्य स्थिर रखने के लिये राजाबलि को सौ अश्वमेध यज्ञकराये॥ ३४॥ अति उदार चित्त राजाबलि उनसौ अश्वमेध के प्रभावसे दशोंदिशाओं में कीर्त्ति विस्तारकर चन्द्रमाकी समान प्रकाशपाने लगा॥३५॥ और अ- पने अपने को कृतार्थ सा मान सम्पत्ति और लक्ष्मी का संभोग करने में प्रवृत्तहुआ॥ ३६॥

इतिश्री मद्भा० म० अष्टमस्कन्धे सरलाभाषाटीकायां पंचदशोऽध्यायः॥ १५॥

श्रीशुकउवाच॥ एवंपुत्रेषुनष्टेषुदेवमाताऽदितिस्तदा। हृतेत्रिविष्टपेदैत्यैःपर्यतप्यदनाथवत्॥ १॥ एकदाकश्यपस्तस्या आश्रमंभगवानगात्। निरुत्सवंनिरानन्दंसमाधेर्विरतश्चिरात्॥ २॥ सपत्नींदीनवदनांकृतासनपरिग्रहः। सभाजितोयथान्यायमिदमाहकुरूद्वह॥ ३॥ अप्यभद्रंनविप्राणांभद्रेलोकेऽधुनागतम्। नधर्मस्यनलोकस्य मृत्योश्छन्दानुवर्तिनः ॥४॥ अपिवाकुशलंकिंचिद्गृहेषुगृहमेधिनि। धर्मस्यार्थस्यकामस्य यत्रयोगोह्ययोगिनाम् ५॥ अपिवाऽतिथयोऽभ्येत्य कुटुम्बासक्तयात्वया। गृहादपूजितायाताः प्रत्युत्थानेनवाक्वचित्॥ ६॥ गृहेषुयेष्वतिथयोनार्चिताःसलिलैरपि। यदिनिर्यान्तितेनूनं फेरुराजगृहोपमाः॥ ७॥ अप्यग्नयस्तुवेलायां नहुताहविषासति। त्वयोद्विग्नधियाभद्रे प्रोषितेमयिकर्हिचित्॥ ८॥ यत्पूजयाकामदुघान्यातिलोकान्गृहान्वितः। ब्राह्मणोऽग्निश्चवैविष्णोः सर्वदेवात्मनोमुखम्९ अपिसर्वेकुशलिनस्तव पुत्रामनस्विनि। लक्षयेऽस्वस्थमात्मानं भवत्यालक्षणैरहम्॥ १०॥ अदितिरुवाच॥. भद्रंद्विजगवांब्रह्मन्धर्मस्यास्यजनस्यच। त्रिवर्गस्यपरंक्षेत्रं गृहमेधिन्गृहाइमे॥ ११॥ अग्नयोऽतिथयोभृत्या भिक्षवोयेचलिप्सवः। सर्वंभगवतोब्रह्मन्ननुध्यानान्नरिष्यति॥ १२॥ कोनुमेभगवन्कामो नसंपद्येतमानसः। यस्याभवान्प्रजाध्यक्ष एवंधर्मान्प्रभाषते॥१३॥ तवैवमारीचमनःशरीरजाःप्रजाइमाः सत्त्वरजस्तमोजुषः।समोभवांस्तास्वसुरादिषुप्रभो तथापिभक्तंभजतेमहेश्वरः १४ तस्मादीशभजन्त्यामे श्रेयश्चिंतयसुव्रत। हृतश्रियोहृतस्थानान्सपत्नैःपाहिनःप्रभो।

श्री शुकदेवजी बोले कि हे राजन्! देवताओं के इस प्रकार से छिपजानें और स्वर्गका राज्य दैत्यों से अपहृत होनेंपर आदिति अनाथ की समान विलाप करनेंलगी ॥१॥ इतने में उसके पति प्रजापति कश्यपजी बहुत दिनकी समाधि से विरतहो उसके निरुत्सव, आनंद रहित आश्रम में आये, कश्यपजी वहांपर आय अदिति से पूजितहो स्त्री को मलीन मुख देख कहनेंलगे ॥ २।३ ॥ हे भद्रे! ब्राह्मणों का, धर्मका व मृत्यु के वशीभूत मनुष्यों का कुछ अकल्याण तो नहींहुआ ॥ ४ ॥ हे सति! हे गृहिणि! गृहस्थी, योगी नहोकर भी, जिस गृहस्थाश्रम में वासकर योग फल प्राप्त करते हैं उस घर में धर्म, अर्थ और कामका तो कुछ अमंगल नहींहुआ ॥ ५ ॥ तेरे कुटुम्ब सेवा में व्यग्र रहनें से, किसी दिन क्या घर में आयेहुए अतिथि की तू पूजा नकरसकी और वह बिना सत्कार पाये तो नचलागया ॥ ६ ॥ अतिथिगण जिस घर में जलद्वारा भी पूजित नहो लौटजाते है वह घर सियारके घर (भाठी) की समान है ॥ ७ ॥ हे भद्रे! मैं प्रवास (परदेस) मेंथा इस कारण तेरा मन बडाही व्याकुल रहा अतएव क्या किसी दिन अग्नि में हवन करना भूलगई॥८॥ गृहस्थ मनुष्य अग्नि की पूजा करके समस्त मनोंरथों को प्राप्त होते हैं ब्राह्मण और अग्नि सर्वात्मा भगवान विष्णु के मुख स्वरूप हैं ॥९॥ हे मनस्विनी! तेरे पुत्रोंका तो कल्याण है तेरे लक्षणोंसे मैं जानता हूं कि तेरा अंत:करण दु:खी है ॥ १० ॥ अदिति नें कहा कि हे ब्रह्मन्! गौ, द्विज, धर्म और लोक सबही का मंगल है मेरा यह घरभी धर्म, अर्थ, और कामको उत्पन्न करता है ॥ ११ ॥ मैं जो आपका ध्यान करती हूं उसके प्रभाव से अग्नि, अतिथि, भृत्य भिक्षुक और याचक लोग जो जिस कामना से आते हैं वह सब तृप्त होतेरहते हैं ॥ १२ ॥ आप प्रजापति हो और मुझको धर्म का उपदेश करतेरहते हो अतएव मेरी कौन इच्छा पूर्ण नहोगी ॥१३॥ सत्त्व, रज, और तमोगुण सेवी यह सब प्रजा आपकेही मन और देह से उत्पन्न हुई हैं अतएव आपको सुर असुर सबही समान हैं परन्तु तौभी भगवद्भक्त आपको बहुत प्यारे हैं ॥ १४ ॥ हे नाथ! मैं भक्तियुक्त आप का सेवा करता हू मेरे कल्याण का यत्नकरो। सपत्नी के पुत्रदैत्यों ने हमारी लक्ष्मी और स्थान

॥ १५ ॥ परैर्विवासिताऽसाऽहं मग्नाव्यसनसागरे । ऐश्वर्यंश्रीर्यशः स्थानंहृतानिप्रबलैर्मम ॥ १६ ॥ यथातानिपुनःसाधो प्रपद्येरन्ममात्मजाः । तथाविधेहिकल्याणंधियाकल्याणकृत्तम ॥ १७ ॥ श्रीशुकउवाच ॥ एवमभ्यर्थितोऽदित्या कस्तामाहस्मयन्निव । अहोमायाबलंविष्णोः स्नेहबद्धमिदंजगत् १८ क्वदेहोभौतिकोनात्मा क्वचात्माप्रकृतेःपरः । कस्यकेपतिपुत्राद्या मोहएवहिकारणम् ॥ १९ ॥ उपतिष्ठस्वपुरुषं भगवन्तंजनार्दनम् । सर्वभूतगुहावासं वासुदेवंजगद्गुरुम् २० ॥ सविधास्यतितेकामान्हरिर्दीनानुकम्पनः । अमोघाभगवद्भक्तिर्नेतरेतिमतिर्मम २१ अदितिरुवाच । केनाहंविधिनाब्रह्मन्नुपस्थास्येजगत्पतिम् । यथामेसत्यसंकल्पो विदध्यात्समनोरथम् २२ ॥ आदिशत्वंद्विजश्रेष्ठ विधिंतदुपधावनम् । आशुतुष्यतिमेदेवः सीदन्त्याःसहपुत्रकैः ॥ २३ ॥ कश्यप उवाच ॥ एतन्मेभगवान्पृष्टः प्रजाकामस्यपद्मजः । यदाहतेप्रवक्ष्यामिव्रतंकेशवतोषणम् ॥ २४ ॥ फाल्गुनस्यामले पक्षेद्वादशाहंपयोव्रतः । अर्चयेदरविन्दाक्षंभक्त्यापरमयान्वितः ॥ २५ ॥ सिनीवाल्यांमृदाऽऽलिप्य स्नायात्क्रोडविदीर्णया । यदिलभ्येतवैस्रोतस्येतंमन्त्रमुदीरयेत् ॥ २६ ॥ त्वंदेव्यादिवराहेणरसायाःस्थानमिच्छता । उद्धृतासिनमस्तुभ्यंपाप्मानंमेप्रणाशय ॥ २७ ॥ निर्वर्तितात्मनियमोदेवमर्चेत्समाहितः । अर्चायांस्थण्डिलेसूर्ये जलेवह्नौगुरावपि ॥ २८ ॥ नमस्तुभ्यंभगवतेपुरुषायमहीयसे । सर्वभूतनिवासायवासुदेवायसाक्षिणे

हरलिया है मेरी रक्षाकरो ॥ १५ ॥ शत्रुओं ने मुझे निकाल दिया है, मैं दुःख सागर में डूबीहुई हूं प्रबल दैत्यों ने मेरा ऐश्वर्य, श्री, यश और अधिकार हरलिया है ॥ १६ ॥ मेरेपुत्र जिसप्रकार से अपने अधिकारको फिरपावें आप बुद्धि बलसे वही यत्नकरें ॥ १७ ॥ शुकदेवजी बोलेकि—हे महीपत ! अदिति के इसप्रकार से कहनेपर प्रजापति कश्यप विस्मित होकर कहनेलगे कि—अहो ! विष्णु मायाकी कैसी अद्भुतशक्ति है ! यह जगत स्नेह में बंधाहुआहै ॥ १८ ॥ कहांतो पांचभौतिक यह जड़देह और कहां प्रकृति से परे यह आत्मा ? हे भद्रे ! कौन किसका पुत्र और कौन किसका पति है ! मोहही इस बुद्धिका कारण है ॥ १९ ॥ आदि पुरुष जनार्दन भगवानकी उपासना करो । वह अंतर्यामी और जगद्गुरु वही भगवान तेरा कल्याण करेंगे ॥ २० ॥ दीनोंपर वह बड़ीही कृपाकरते हैं, भगवान की सेवा निष्फल नहीं होती इसके अतिरिक्त और कोई यत्न नहीं है ॥ २१ ॥ अदितिने पूछाकि—हे ब्रह्मन् ! मैं किस उपाय से उन जगद् गुरुकी उपासना करूं ! जिससे वह मेरी इच्छाको पूर्णकरें । मैं पुत्रोंसमेत दुःखी होरही हूं ॥ २२ ॥ जिस यत्नसे उपासना करनेपर वह सत्य प्रतिज्ञ देव मेरेऊपर प्रसन्न होवें वह उपाय मुझसे कहियेगा ॥ २३ ॥ कश्यपजी ने कहाकि—हे देवि ! मैने पुत्रकी इच्छाकर भगवान ब्रह्माजी से प्रश्न किया तब ब्रह्माजी ने जो व्रत मुझसे कहाथा वह मैं तुमसे कहता हूं ॥ २४ ॥ फागुन मासमें शुक्लपक्ष के बारह दिन पयोव्रत धारणकर भक्तियुक्त कमल लोचन भगवान की पूजाकरना चाहिये ॥ २५ ॥ यदि प्राप्त होवेतो चतुर्दशी युक्त अमावस्या में शूकर की खोदीहुई मिट्टीका शरीरमें लेपनकर नदी के जलमें स्नानकरे और स्नान करके इस मंत्रको पढ़े कि ॥ २६ ॥ हे देवि ! निवासस्थानकी रक्षाकर आदि वराहने तुझको रसातल से उद्धार कियाथा; तुझको नमस्कार है; मेरेसब पापोंका नाशकर ॥ २७ ॥ व्रतधारण करने वालेको नित्य नैमित्तिक क्रिया करके एकाग्र चित्तहो प्रतिमा में, वेदी में, सूर्य में, जलमें, अग्निमें अथवा गुरुमें भगवान की पूजाकरना चाहिये ॥ २८ ॥ पूजाके समय इन नौमंत्रों कोपढ भगवान का आवाहनादि करे वह नौमंत्र यह हैं । हे भगवान् ! आप आराध्य, परमपुरुष; साक्षी और सर्व प्राणियों का निवास स्थानहो तथा आप सबके अंतःकरण में प्रकाश पातेहो;—

॥ २९ ॥ नमोऽव्यक्तायसूक्ष्मायप्रधानपुरुषायच । चतुर्विंशद्गुणज्ञायगुणसंख्यानहेतवे ॥ ३० ॥ नमोद्विशीर्ष्णेत्रिपदे चतुःशृङ्गायतन्तवे । सप्तहस्ताययज्ञाय त्रयीविद्यात्मनेनमः ॥ ३१ ॥ नमःशिवायरुद्राय नमःशक्तिधरायच । सर्वविद्याधिपतये भूतानांपतयेनमः ॥ ३२ ॥ नमोहिरण्यगर्भाय प्राणायजगदात्मने । योगैश्वर्यशरीराय नमस्तेयोगहेतवे ॥ ३३ ॥ नमस्तेआदिदेवाय साक्षिभूतायतेनमः । नारायणायऋषये नरायहरयेनमः ॥ ३४ ॥ नमोमरकतश्याम वपुषेऽधिगतश्रिये । केशवायनमस्तुभ्यं नमस्तेपीतवाससे ॥ ३५ ॥ त्वंसर्ववरदःपुंसां वरेण्यवरदर्षभः । अतस्तेश्रेयसेधीराः पादरेणुमुपासते ॥ ३६ ॥ अन्ववर्तन्तयंदेवाः श्रीश्चतत्पादपद्मयोः । स्पृहयन्तइवामोदं भगवान्मेप्रसीदताम् ॥ ३७ ॥ एतैर्मन्त्रैर्हृषीकेश मावाहनपुरस्कृतम् । अर्चयेच्छ्रद्धयायुक्तः पाद्योपस्पर्शनादिभिः ॥ ३८ ॥ अर्चित्वागन्धमाल्याद्यैः पयसास्नपयेद्विभुम् । वस्त्रोपवीताभरण पाद्योपस्पर्शनैस्ततः । गन्धधूपादिभिश्चार्चेद्द्वादशाक्षरविद्यया ॥ ३९ ॥ शृतंपयसिनैवेद्यं शाल्यन्नंविभवेसति ससर्पिःसगुडंदत्त्वा जुहुयान्मूलविद्यया ॥ ४० ॥ निवेदितंतद्भक्ताय दद्याद्भुञ्जीतवास्वयम् । दत्त्वाचमनमर्चित्वा ताम्बूलंचनिवेदयेत् ॥ ४१ ॥ जपेदष्टोत्तरशतं स्तुवीतस्तुतिभिःप्रभुम् । कृत्वाप्रदक्षिणंभूमौप्रणमेद्दण्डवन्मुदा ॥४२॥ कृत्वाशिरसितच्छेषां देवमुद्वासयेत्ततः । द्व्यवरान्भोजयेद्विप्रान् पायसेनयथोचितम् ॥४३॥ भुंजीततैरनुज्ञातः शेषंसेष्टःसभाजितैः । ब्रह्मचार्यथतद्रात्र्यां श्वोभूतेप्रथमेऽहनि ॥

आपको नमस्कार है ॥ २९ ॥ आप अव्यक्त, सूक्ष्म, चौबीस तत्वों के जानने वाले; सांख्ययोग के प्रवर्तकहो आपको नमस्कार है ॥ ३० ॥ आप यज्ञके फलके देनेवालेहो, यज्ञरूपी आपके दो मस्तक, तीनचरण, चारसींग और सातहाथ हैं, वेदत्रयी आपकी आत्मा है आपको नमस्कार है ॥ ३१ ॥ आप रुद्र और शिवरूपी, शक्तिधर; सर्व विद्याके अधिपति और सब प्राणियों के स्वामी हो आपको नमस्कार है ॥ ३२ ॥ आप यज्ञरूपी, प्राण, जगतके आत्मा और योगके कारणहो, योगका ऐश्वर्य आपका शरीर है आपको नमस्कार है ॥ ३३ ॥ आप आदिदेव, सबके साक्षिस्वरूप, नारायण ऋषि, नर और हरिहो; आपको नमस्कार है ॥ ३४ ॥ आप केशवहो; आपका शरीर मरकत की समान श्याम वर्णका है; आप लक्ष्मीको धारण करने वाले, पीतांबर धारीहो आपको नमस्कार है ॥ ३५ ॥ हे वरेण्य ! हे वरदश्रेष्ठ ! आप पूजनीय और वरदेने वालोंमें श्रेष्ठहो । पण्डितलोग कल्याण के निमित्त आपके चरण रेणुकी उपासना करते हैं ॥ ३६ ॥ अहा ! देवता और लक्ष्मीजी भी जिनके चरण कमलोंकी सुगंधिको चाहते हैं वह भगवान वासुदेव मेरेऊपर प्रसन्न होवें ॥ ३७ ॥ हे साध्वि ! इन नवमन्त्रों से भगवानका आवाहन कर श्रद्धायुक्त पाद्यादि से पूजन करना चाहिये ॥ ३८ ॥ भगवानकी चन्दन पुष्प आदिसे पूजाकर दुग्ध से स्नान करावे तदनंतर द्वादशाक्षर मन्त्र पढकर वस्त्र, यज्ञोपवीत, आभूषण, पाद्य, आचमन और धूपादि से उनकी पूजामें प्रवृत्त होवे ॥३९॥ द्रव्य होनेपर-दुग्धमें अन्नपका उसमें घी और गुड़मिला भगवानको नैवेद्य का भोगलगावे और द्वादशाक्षर मंत्रसे अग्निमें हवनकरे॥४०॥वह नैवेद्यका द्रव्यचाहे भगवद्भक्तको दे चाहे स्वयंखावे।पूजाके उपरांत भगवानको आचमनकराय ताम्बूलअर्पणकरे॥४१॥तदनंतर एकसौ आठबार मन्त्रजप, स्तोत्रों से भगवान की स्तुतिकर, परिक्रमादे आनंदयुक्त पृथ्वीपर दंडवत प्रणाम करे॥४२॥अंत में प्रसादका पदार्थ ग्रहण कर भगवान का विसर्जन करे । अंत में कमसे कम दो ब्राह्मणोंको खीरकाभोजनकरावे॥४३॥और ब्राह्मणोंकीआज्ञानुसार बंधु बांधवोंसहित शेषभागका स्वयं

॥ ४४ ॥ स्नातःशुचिर्यथोक्तेन विधिनासुसमाहितः। पयसास्नापयित्वार्चेद्यावद् व्रतसमापनम् ॥ ४५ ॥ पयोभक्षोव्रतमिदं चरेद्विष्णवर्चनादृतः। पूर्ववज्जुहुयादग्निं ब्राह्मणांश्चापिभोजयेत् ॥ ४६ ॥ एवंत्वहरहःकुर्याद् द्वादशाहंपयोव्रतः। हरेराराधनंहोमं मर्हणंद्विजतर्पणम् ॥ ४७ ॥ प्रतिपद्दिनमारभ्य यावच्छुक्लत्रयोदशी। ब्रह्मचर्यमधःस्वप्नं स्नानंत्रिषवणंचरेत् ॥ ४८ ॥ वर्जयेदसदालापं भोगानुच्चावचांस्तथा। अहिंस्रःसर्वभूतानां वासुदेवपरायणः ॥ ४९ ॥त्रयोदश्यामथोविष्णोः स्नपनंपञ्चकैर्विभोः। कारयेच्छास्त्रदृष्टेन विधिनाविधिकोविदैः ॥ ५० ॥ पूजांच महतींकुर्याद्वित्तशाठ्यविवर्जितः। चरुंनिरूप्यपयसि शिपिविष्टायविष्णवे ॥५१॥ शृतेनतेनपुरुषं यजेतसुसमाहितः। नैवेद्यंचातिगुणवद्दद्यात्पुरुषतुष्टिदम् ॥ ५२ ॥ आचार्यंज्ञानसंपन्नं वस्त्राभरणधेनुभिः। तोषयेदृत्विजश्चैव तद्विद्धयाराधनंहरेः ॥ ॥ ५३ ॥ भोजयेत्तान्गुणवता सदन्नेनशुचिस्मिते ॥ अन्यांश्चब्राह्मणाञ्छक्त्या ये चतत्रसमागताः ॥ ५४ ॥ दक्षिणांगुरवेदद्यादृत्विग्भ्यश्चयथाऽर्हतः। अन्नाद्येनाश्वपाकांश्च प्रीणयेत्समुपागतान् ॥ ५५ ॥ भुक्तवत्सुचसर्वेषु दीनान्धकृपणेषुच। विष्णोस्तत्प्रीणनंविद्वान् भुंजीतसहबन्धुभिः ॥ ५६ ॥ नृत्यवादित्रगीतैश्च स्तुतिभिःस्वस्तिवाचकैः। कारयेत्तत्कथाभिश्च पूजांभगवतोऽन्वहम् ॥ ५७ ॥ एतत्पयोव्रतंनाम पुरुषाराधनंपरम्। पितामहेनाभिहितं मयातेसमुदाहृतम् ॥ ५८ ॥ त्वं

भोजन करे। अनंतर ब्रह्मचारी हो उस रात्रिको बितावे। प्रातःकाल होतेही पहिले दिनकी समान स्नान कर पवित्र और समाधिस्थ हो भगवानको स्नान कराय पूजा करे; जितने दिन व्रत शेषन होवे उतने दिनों दूधद्वारा भगवान को स्नान कराय, स्वयं दुग्ध पान से जीवन धारण कर, विष्णु पूजा में श्रद्धान्वित हो इस महाव्रत का आचरण करे। हे देवि! प्रथम जैसे कहा है उसी प्रकार नियमानुसार से अग्नि में होम करना और ब्राह्मणोंको भोजन कराना चाहिये ॥ ४४–४६ ॥ इस प्रकार से भगवान की आराधना, होम, पूजा और ब्राह्मण भोजन कराय; बारह दिवस अर्थात प्रतिपदा से शुक्ल द्वादशी तक पयोव्रत का आचरण किया जाता है इन बारह दिनों तक ब्रह्मचर्य आचरणों का धारण करना, खाट पर न सोना, पृथ्वी पर सोना; और त्रिसंध्या स्नान करना चाहिये ॥ ४७–४८ ॥ मिथ्या भाषण और ऊंच नीच भोगों का छोड़ देना चाहिये अहिंसक और वासुदेव परायण हो त्रयोदशी के दिन भगवानको पञ्चामृतसे स्नान कराय, शास्त्रज्ञ ब्राह्मणों द्वारा शास्त्रोक्त विधानसे विष्णुजीको स्नानकरावे। लोभ और मूर्खता छोड़कर पूजनकरना चाहिये। सुन्दर दूधको पकाय भगवान विष्णुको अर्पणकर एकाग्रमनसे पूर्वोक्त मन्त्रोंद्वारा परम पुरुषकी पूजाकरनी चाहिये जिससे भगवान प्रसन्नहोवें उस प्रकार की सुन्दर गुणयुक्त नैवेद्यका भी निवेदनकरना चाहिये ॥ ४९—५२ ॥ ज्ञानी आचार्य और ऋत्विजों को अलङ्कारादिदानसे संतुष्टकरे हे सति! उनके सन्तुष्ट होने सेही भगवान की आराधना होजाती है ॥ ५३ ॥ औरभी दूसरे ब्राह्मण जो उस स्थान में आवें उनको भी यथाशक्ति उत्तम पदार्थोंका भोजन करावे ५४॥ गुरु और ऋत्विजों को यथायोग्य दक्षिणादेवे, अन्त में सबआये हुये मनुष्यों को अन्नादि देकर सन्तुष्ट करे ॥ ५५ ॥ प्रीतिपूर्वक दीन, दरिद्र और अन्धे सबकोही भोजनकराय स्वयं बन्धुओंके साथ भोजनकरे इससे भगवान प्रसन्न होते हैं ॥ ५६ ॥ व्रतकालमें प्रतिदिन नाचना, बजाना, गाना, स्तुति, स्वस्तिवाचन और भगवत् कथा से भगवान की पूजाकरे ॥ ५७ ॥ इसही का नाम पयोव्रत है। इसके द्वारा भगवानकी भलीप्रकार से सेवा हो सकती है मैंने ब्रह्माजीसे इस

ध्यानेनमहाभागे सम्यक्चीर्णेनकेशवम् । आत्मनाशुद्धभावेन नियतात्माभजाऽव्यय म् ॥ ५९ ॥ अयंवैसर्वयज्ञाख्यः सर्वव्रतमितिस्मृतम् । तपःसारमिदंभद्रे दानंचेश्व रतर्पणम् ॥ ६० ॥ तएवनियमाःसाक्षात् तएवचयमोत्तमाः । तपोदानव्रतंयज्ञो येन तुष्यत्यधोक्षजः ॥ ६१ ॥ तस्मादेतद्व्रतंभद्रे प्रयताश्रद्धयाऽऽचर । भगवान्परितुष्ट स्ते वरानाशुविधास्यति ॥ ६२ ॥

इतिश्रीमद्भागवते महा० अष्टमस्कन्धेऽदितिपयोव्रतं नामषोडशोऽध्यायः ॥१६॥

श्रीशुकउवाच॥इत्युक्तासाऽदितीराजन्स्वभर्त्राकश्यपेनवै । अन्वतिष्ठत्व्रतमि दंद्वादशाहमतन्द्रिता ॥ १ ॥ चिन्तयन्त्येकयाबुद्ध्यामहापुरुषमीश्वरम् । प्रगृह्येन्द्रि यदुष्टाश्वान् मनसाबुद्धिसारथिः ॥ २ ॥ मनश्चैकाग्रंयाबुद्ध्याभगवत्यखिलात्मनि । वासुदेवेसमाधायचचारहपयोव्रतम् ॥ ३ ॥ तस्याः प्रादुरभूत्तातभगवानादिपूरुषः । पीतवासाश्चतुर्बाहुः शङ्खचक्रगदाधरः ॥ ४ ॥ तंनेत्रगोचरंवीक्ष्यसहसोत्थायसा दरम् । ननामभुविकायेनदण्डवत्प्रीतिविह्वला ॥ ५ ॥ सोत्थायबद्धाञ्जलिरीडितुं स्थितानोत्सेहआनन्दजलाकुलेक्षणा । बभूवतूष्णींपुलकाकुलाकृतिस्तद्दर्शनात्युत्स वगात्रवेपथुः ॥ ६ ॥ प्रीत्याशनैर्गद्गदयागिराहरिंतुष्टावसादेव्यदितिः कुरूद्वह । उद्वीक्षतीसापिबतीवचक्षुषारमापतिंयज्ञपतिंजगत्पतिम् ॥७॥ अदितिरुवाच ॥ यज्ञे शयज्ञपुरुषाच्युततीर्थपादतीर्थश्रवःश्रवणमङ्गलनामधेय । आपन्नलोकवृजिनोपश मोदयाद्यशंनःकृधीशभगवन्नसिदीननाथः॥८॥विश्वायविश्वभवनस्थितिसंयमायस्वै

व्रत को सुनाथा, इस समय मैंने वही तुझसे कहा॥५८॥तू इसव्रतको भलीप्रकार से धारणकर भजने योग्य भगवान विष्णु का भजन कर॥५९॥इसीका नाम सर्वयज्ञहै यही सर्वव्रत, यही तपस्याकासार, यही महतदान, और यही ईश्वरकी तृप्तिसाधन है ॥ ६० ॥ हेभद्रे ! जिससे श्रीभगवान सन्तुष्टहोवें वही यथार्थ नियम, वही यथार्थ संयम, वही तपस्या, दान, व्रत और वही यथार्थ यज्ञ है ॥६१॥ अतएव हे सति ! तू एकाग्रचित्त से सावधानता पूर्वक श्रद्धायुक्तहो इसव्रतका आचरणकर इसीसे भगवान संतुष्टहो शीघ्र तुझे इच्छितवर देवेंगे ॥ ६२ ॥

इतिश्री मद्भा० महापुराणे अष्टमस्कन्धे सरलाभाषाटीकायांषोडशोऽध्यायः ॥ १६ ॥

श्रीशुकदेवजी बोलेकि—हे राजन् ! अदितिने महर्षि कश्यपजी के निकटसे इसप्रकारका उपदेशपा, आलस्य छोड़ बारह दिनतक इस व्रतका आचरण (अनुष्ठान) किया ॥ १ ॥ वह अपने बुद्धिरूप सारथी से इन्द्रिय रूपीदुष्ट घोड़ोंका दमनकर एकाग्र मनसे सर्वात्मा भगवान के ध्यानमें प्रवृत्त हुई ॥ २ ॥ और भगवान नारायण में चित्तलगाय रात्रिदिन पयोव्रतका आचरण करनेलगी ॥ ३ ॥ अदितिके इसप्रकार से व्रताचरण करनेपर पीताम्बरधारी चतुर्भुज भगवान हरि—शंख, चक्र, गदा धारणकर उसके सामने प्रगट हुए ॥ ४ ॥ अदितिने उनको देख, शीघ्रता पूर्वक सावधानी से उठ, स्नेह से विह्वलहो पृथ्वीपर गिरसाष्टांग दंडवत की ॥ ५ ॥ तदनन्तर उठ, हाथ जोड़कर खड़ी रहगई उसको स्तुति करनेकी शक्ति नरही वह चुपखड़ी रही; क्योंकि उसके दोनो नेत्र आनंदाश्रु से पूर्ण और शरीर पुलकित होगया । नारायण के दर्शनों से जोआनन्द उत्पन्न हुआ उस आनंद से उसकी देह कम्पायमान होगई ॥ ६ ॥ हे कुरुश्रेष्ठ ! अदितिमानो नेत्रों से पीजायगी ऐसे प्रीति पूर्वक उन रमापति, यज्ञपतिको देखते देखते अंतमें गद्गद वचनोंसे धीरे २ स्तुति करने लगी ॥ ७ ॥ अदिति बोलीकि—हे यज्ञेश्वर ! हे यज्ञपुरुष ! हे तीर्थपाद ! हे तीर्थश्रवे ! हे आद्य ! मेरे कल्याण का यत्नकरो आपका नाम सुनने सेही मंगल होता है । हे भगवान ! आप दीनबंधु हो; आप शरणागत मनुष्यों के पापोंके नाश करने वालेहो ॥ ८ ॥ आप परम पुरुषहो, यह विश्व

रंगृहीतपुरुशक्तिगुणायभूम्ने । स्वस्थायशश्वदुपबृंहितपूर्णबोधव्या पादितात्मतम से हरयेनमस्ते ॥९॥ आयुःपरंवपुरमीष्टमतुल्यलक्ष्मीर्द्यौर्भूरसाःसकलयोगगुणास्त्रिवर्गः । ज्ञानंचकेवलमनन्तभवन्तितुष्टात्त्वत्तोनृणांकिमुसपत्नजयादिराशीः ॥ १०॥ श्रीशुकउवाच॥ अदित्यैवस्तुतोराजन्भगवान्पुष्करेक्षणः । क्षेत्रज्ञःसर्वभूतानामितिहोवाचभारत ॥ ११ ॥ श्रीभगवानुवाच ॥ देवमातर्भवत्यामे विज्ञातंचिरकांक्षितम् यत्सपत्नैर्हृतश्रीणां च्यावितानांस्वधामतः ॥१२॥ तान्विनिर्जित्यसमरे दुर्मदानसुरर्षभान् । प्रतिलब्धजयश्रीभिः पुत्रैरिच्छस्युपासितुम् ॥ १३ ॥ इन्द्रज्येष्ठैःस्वतनयैर्हतानांयुधिविद्विषाम् । स्त्रियोरुदन्तीरासाद्यद्रष्टुमिच्छसिदुःखिताः ॥ १४॥ आत्मजान्सुसमृद्धांस्त्वं प्रत्याहृतयशःश्रियः । नाकपृष्ठमधिष्ठाय क्रीडतोद्रष्टुमिच्छसि॥ १५ ॥ प्रायोऽधुनाऽतेऽसुरयूथनाथा अपारणीयाइतिदेविमेमतिः । यत्तेऽनुकूलेश्वरविप्रगुप्ता नविक्रमस्तत्रसुखंददाति ॥ १६ ॥ अथाप्युपायोममदेविचिन्त्यः संतोषितस्यव्रतचर्ययाते ममार्चनंनार्हतिगन्तुमन्यथा श्रद्धानुरूपंफलहेतुकत्वात् ॥ १७ ॥ त्वयार्चितश्चाहमपत्यगुप्तये पयोव्रतेनानुगुणंसमीडितः । स्वांशेनपुत्रत्वमुपेत्यते सुतान्गोप्ताऽस्मिमारीचतपस्यधिष्ठितः ॥ १८ ॥ उपधावपतिंभद्रे प्रजापतिमकल्मषम् । मांचभावयती पत्यावेवंरूपमवस्थितम् ॥ १९ ॥ नैतत्परस्मा आख्येयंपृष्टयाऽपिकथंचन। सर्वंसम्पद्यतेदेवि देवगुह्यंसुसंवृतम् २०॥ श्रीशुकउवाच॥एतावदुक्त्वा

आपही का स्वरूप है । विश्वकी उत्पत्ति, स्थिति और प्रलय आपसेही होती रहती है । आप अपनी इच्छानुसार मायागुण ग्रहणकरते हो किंतुस्वरूपका परित्याग नहीं करते। जो पूर्णज्ञान नित्य वृद्धिपाता रहता है आप उसकेही द्वारा मायारूपी अन्धकारको अपने से दूर उड़ा देते हो, आप का नमस्कार है ॥ ९ ॥ हे अनन्त ! आपके सन्तुष्ट होनेपर ब्रह्माकी समानदीर्घआयु, सुन्दरदेह, अतुलऐश्वर्य, स्वर्ग,पृथ्वी,पाताल और अणिमादिकयोग सिद्धियें प्राप्त होसकती हैं, फिर शत्रुआदिका जीतनातो साधारणबात है वह क्यों न सिद्ध होवे ॥ १० ॥ शुकदेवजी बोले कि-हेराजन् ! अदिति के इस प्रकारसे स्तुति करनेपर पद्मलोचन भगवान बोले कि ॥ ११ ॥ हेदेवजननि ! दैत्यों ने देवताओं की सौभाग्य व श्री छीनली और तुम्हारे सन्तानों को उनके अधिकारों से विमुखकर दिया । तुम अनेक दिनों से जो इच्छा कररही हो उसको मैं भलीभाति जानता हूं ॥ १२ ॥ तुम्हारी यह इच्छा है कि तुम्हारे पुत्रगण युद्धक्षेत्र में श्रेष्ठ दैत्यों को जीतकर फिर जयश्री को प्राप्त होवें और तुम उनकेसाथ एकत्र निवासकरो ॥ १३ ॥ तुम्हारे पुत्रगण इन दुष्ट दैत्योंको जीतें और उनकी स्त्रियां दुखित होकर रोवें और तुम खड़ी देखो; जिससे तुम्हारे पुत्रगणवह्,दैत्योंके हाथसे फिर अपनी गई हुई संपदाको पाकर स्वर्गधाममें क्रीडाकरें यही तुम्हारी इच्छा है ॥ १४ ॥ ॥ १५ ॥ किन्तु हेदेवि ! मैं जानता हू कि इससमय तुमदैत्य सेनापतियों को पराजित नहीं कर सकतीं । समर्थ ब्राह्मणलोग उनकी रक्षाकररहे हैं, अतएव पराक्रमद्वारा कल्याणकी आशानहीं है ॥ १६ ॥ हेदेवि! तुम्हारे व्रताचरणसे मैं सन्तुष्ट हुआ हू, अतएव उस विषय की मैं अवश्य चिन्ता करूगा । मेरी पूजा निष्फल न होगी, उससे श्रद्धाके अनुसार फलप्राप्त होगा ॥ १७ ॥ तुमने पुत्रोंकी रक्षाके निमित्त व्रतद्वारा मेरी यथाविधि पूजाकी है । मैं कश्यपजी के तपमें स्थितहो अपने अंशसे तुम्हारा पुत्रहोकर तुम्हारी सन्तानों का पालन करूंगा ॥ १८ ॥ तुम इससमय अपने निष्पापपति प्रजापति कश्यपजी के निकटजाओ और उन्हींकी सेवाकरो । और सेवाके समय विचारना कि जैसा मैं यहां स्थित हू वैसाही तुम्हारे पति में भी हूं ॥ १९ ॥ और तुम यह बार्त्ता

भगवांस्तत्रैवान्तरधीयत । अदितिर्दुर्लभं लब्ध्वा हरेर्जन्मात्मनि प्रभोः २१ उपाधा वत्पतिं भक्त्या परयाकृतकृत्यवत् । सवैसमाधियोगेन कश्यपस्तदबुध्यत ॥ २२ ॥ प्रविष्टमात्मनि हरेरंशं ह्यवितथेक्षणः । सोऽदित्यांवीर्यमाधत्त तपसाचिरसंभृतम् ॥ समाहितमना राजन्दारुण्यग्निंयथाऽनिलः ॥ २३ ॥ अदितेर्धिष्ठितगर्भं भगवन्तंस नातनम् । हिरण्यगर्भोविज्ञाय समीडगुह्यनामभिः ॥ २४ ॥ ब्रह्मोवाच । जयोरुगाय भगवन्नुरुक्रम नमोस्तुते । नमोब्रह्मण्यदेवाय त्रिगुणायनमोनमः॥ २५॥ नमस्ते पृश्निगर्भाय वेदगर्भाय वेधसे । त्रिनाभायत्रिपृष्ठाय शिपिविष्टायविष्णवे ॥ २६ ॥ त्वमादिरन्तोभुवनस्य मध्यमनन्तशक्तिं पुरुषंयमाहुः । कालोभवानाक्षिपतीश वि श्वंस्रोतो यथाऽन्तःपतितंगभीरम् ॥ २७ ॥ त्वंवैप्रजानां स्थिरजंगमानां प्रजापतीना मसिसंभविष्णु । दिवौकसां देवदिवश्च्युतानां परायणंनौरिवमज्जतोऽप्सु ॥२८॥

इति श्रीमद्भा० महा० अष्टमस्कन्धे सप्तदशोऽध्याय ॥ १७ ॥

श्रीशुकउवाच । इत्थंविरिञ्चस्तुतकर्मवीर्यः प्रादुर्बभूवामृतभूरदित्याम् । चतुर्भुजःशंखगदाब्जचक्रः पिशंगवासा नलिनायतेक्षणः ॥ १ ॥ श्यामावदातोझषराजकुण्डलत्विषोल्लसच्छ्रीवदनाम्बुजः पुमान् । श्रीवत्सवक्षाः बलयांगदोल्लसत्किरी-

---

किसी से भी न कहना, यह देवताओं की गुप्तबात है, देवताओं का रहस्य छिपानाही गुप्तरहेगा, उसके द्वारा उत्तमहि भलाप्रकार से सिद्धि प्राप्तहोगी ॥ २० ॥ श्रीशुकदेवजी ने कहाकि हेराजन्! भगवान यहबात कह वहांसे अन्तर्ध्यान होगये । अदिति अपने गर्भ में प्रभु भगवानको दुर्लभजन्म पाकर परम कृतार्थ हो दृढभक्ति से पति की सेवा करने लगी । दिव्यदृष्टि वाले उसके स्वामी महर्षिकश्यपजी ने समाधियोगसे देखाकि भगवान का अंश मेरे शरीर में प्रविष्टहुआ जैसे वायु काठ घिसने के द्वारा बनजलानेवाली अग्नि उत्पन्न करता है उसी प्रकारसे प्रजापति कश्यपजी ने मन स्थिरकर, बहुतकालसे कठोर तपस्या द्वाराजो वीर्य इकट्ठाकियाथा, अदिति के गर्भमें उसवीर्य को प्रवेशकिया ॥ २१—२३ ॥ सनातन भगवान ने अदिति के गर्भ में प्रवेशकिया है यह जानकर ब्रह्माजी गुह्यनामोंद्वारा उनकी स्तुति करनेलगे ॥ २४ ॥ ब्रह्माजीने कहा कि हे उरुगाय भगवन्! आपकी जयहो; आपको नमस्कार है । आप ब्रह्मण्यदेव हो नमस्कार है, हेत्रिगुण! आपको नमस्कार है ॥ २५ ॥ प्रथमजन्म में इस अदिति का नाम पृश्निथा, आपने इसके गर्भमें जन्मलिया था । सब वेद आपके गर्भ में स्थिति करते हैं, हे विधाता! तीनो लोक आपकी नाभि में हैं, आप त्रिलोकी के ऊपर विराजमानहो; आपको नमस्कार है ॥ २६ ॥ आप जगतके आदि, मध्य और अन्तहो, पण्डितलोग आपको अनन्त शक्तिशाली, परमपुरुष कहकरगान किया करते हैं जैसे चार गम्भीर तरङ्ग जलमें गिरेहुए तृणादि को खींचता है उसीप्रकार कालरूपी आप इस विश्वको प्रलयकाल में आकर्षण करते हो ॥ २७ ॥ स्थावर, जङ्गम, प्रजा, प्रजापतिगण आपसेही उत्पन्न होते हैं । हेदेव! जैसे जलमें डूबेहुए मनुष्यों की नौकाही आश्रय है, आप उसी प्रकार से स्वर्गसे भ्रष्टहुए देवताओं के एकमात्र आश्रय हो ॥ २८ ॥

इति श्रीमद्भा० म० अष्टमस्कन्धे सरलाभाषाटीकायां सप्तदशोऽध्यायः ॥ १७ ॥

श्रीशुकदेवजी बोले कि—हे राजन्! जब ब्रह्माजी ने इस प्रकारसे भगवानके कर्म और प्रभावों का वर्णन किया, तब जन्म मृत्यु रहित, चतुर्भुज, शंख, चक्र, गदा, पद्म और पीताम्बर धारण किये, कमल सदृश दीर्घ लोचन, भगवान अदिति के गर्भमें प्रगट हुए ॥ १ ॥ श्रीहरि का वर्ण श्याम और उज्ज्वल; मुखारविंद मकरा कृत कुण्डलोंकी प्रभासे प्रकाशित, कंकण, बाजूबंद, किरीट

त्काञ्चीगुणचारुनूपुरः ॥ २ ॥ मधुव्रतव्रातविघुष्टयास्वया विराजितःश्रीवनमालया हरिः । प्रजापतेर्वेश्मतमः स्वरोचिषाविनाशयन् कण्ठनिविष्टकौस्तुभः ॥ ३ ॥ दिशः प्रसेदुःसलिलाशयास्तदा प्रजाःप्रहृष्टाऋतवोगुणान्विताः । द्यौरन्तरिक्षंक्षितिरग्निजिह्वा गावोद्विजाःसञ्जहृषुर्नगाश्च ॥ ४ ॥ श्रोणायांश्रवणद्वादश्यां मुहूर्तेऽभिजितिप्रभुः । सर्वे नक्षत्रताराद्याश्चक्रुस्तज्जन्म दक्षिणम् ॥ ५ ॥ द्वादश्यां सवितातिष्ठन् मध्यंदिनगतो नृप । विजयानामसाप्रोक्ता यस्यांजन्मविदुर्हरेः ॥६॥ शंखदुन्दुभयो नेदुर्मृदंगपणवानकाः । चित्रवादित्रतूर्याणां निर्घोषस्तुमुलोऽभवत् ॥ ७ ॥ प्रीताश्चाप्सरसोऽनृत्यन्गंधर्वप्रवराजगुः । तुष्टुवुर्मुनयोदेवा मनवःपितरोऽग्नयः ॥ ८ ॥ सिद्धविद्याधरगणाः सकिंपुरुषकिन्नराः । चारणायक्षरक्षांसि सुपर्णाभुजगोत्तमाः ॥ ॥ ९ ॥ गायन्तोऽतिप्रशंसन्तो नृत्यन्तोविबुधानुगाः । अदित्याआश्रमपदं कुसुमैः समवाकिरन् ॥ १० ॥ दृष्ट्वाऽदितिस्तंनिजगर्भसंभवं परंपुमांसंमुदमापविस्मिता गृहीतदेहंनिजयोगमायया प्रजापतिश्चाह जयेतिविस्मितः ॥ ११ ॥ यत्तद्वपुर्भातिविभूषणायुधैरव्यक्तचिद्व्यक्तमधारयद्धरिः।बभूवतेनैवसवामनोवटुः संपश्यतोर्दिव्यगतिर्यथानटः ॥ १२ ॥ तंवटुंवामनंदृष्ट्वा मोदमानामहर्षयः। कर्माणिकारयामासुः पुरस्कृत्यप्रजापतिम् ॥ १३ ॥ तस्योपनीयमानस्य सावित्रींसविताऽब्रवीत् ॥ बृहस्पतिर्ब्रह्मसूत्रं मेखलांकश्यपोऽददात् ॥ १४ ॥ ददौकृष्णाजिनंभूमिर्दण्डं सोमो वनस्पतिः । कौपीनाच्छादनंमाता द्यौश्छत्रंजगतःपतेः ॥ १५ ॥ कमण्डलुंवेदगर्भः

कटिमेखला और नूपुर श्रीअंगमें शोभायमान थे ॥ २ ॥ कंठ में सुंदर वनमाला कि जिसके भीतर भौंरे गूंज रहे थे पहिने हुए थे । ग्रीवा में कौस्तुभ मणि शोभायमान थी । भगवान ने इस प्रकार से प्रगट होकर अपने प्रकाश से कश्यपजी के घरका अंधकार दूर करदिया ॥ ३ ॥ उनके जन्म समय में सब दिशाएँ व सरोवर प्रसन्न होगये; प्रजाए अत्यानंद करने लगीं, सब ऋतुओंने अपने २ गुण प्रकाश किये और स्वर्ग, आकाश, पृथ्वी, देवता, गौ, द्विज और पर्वत ये सब अत्यंत हर्षित हुए ॥ ४ ॥ भगवानने भादों मासकी शुक्लाद्वादशी को अभिजित् मुहूर्त में जन्म लिया । उस दिन चन्द्रमा श्रवण नक्षत्र में स्थित था । अश्विनी आदि समस्त नक्षत्र और बृहस्पति शुक्रादि ग्रह भी अनुकूल थे ॥ ५ ॥ हे महाराज ! द्वादशी के दिन मध्याह्न समयमें भगवानका जन्म हुआ इसही कारण उस द्वादशीको विजया द्वादशी कहते हैं ॥ ६ ॥ भगवान वामन देवके उत्पन्न होतेही शंख, दुंदुभी, भेरी, मृदंग, पणव, और दूसरे भी बहुत से बाजे तुमुल शब्द से बजने लगे ॥ ७ ॥ अप्सराएँ आनंदित होकर नाचने; गंधर्वगण गाने और मुनिगण स्तुति करने लगे । देव, मनु, पितर, अग्नि, सिद्ध, किंपुरुष, विद्याधर, चारण, किन्नर, पिशाच, यक्ष, रक्ष, गरुड़, सर्प और देवोंके अनुचर गाते और नाचते २ कश्यपजी के आश्रम में फूल बरसाने लगे ॥ ८–१० ॥ अदिति परम पुरुषको अपनी योग माया से देह धारणकर गर्भसे जन्म ग्रहण करते देख अत्यंत विस्मित और संतुष्ट हुई । कश्यपजी भी विस्मितहो "जय" शब्दका उच्चारण करने लगे ॥ ११ ॥ अव्यक्त, ज्ञान स्वरूप भगवान की लीलाअद्भुत है ! उन्हों ने जिस प्रकार, आभूषण और अस्त्र द्वारा स्पष्ट प्रकाशमान देह धारण की थी, देखते २ नटकी समान, उसी देह द्वारा वामन ब्राह्मण कुमारकी मूर्ति ग्रहण करली ॥ १२ ॥ महर्षिगण उस ब्राह्मण कुमारको वामन मूर्त्तिदेख प्रसन्न हुए और कश्यपजी को ले उनका जातकर्म आदि कार्य करने लगे ॥ १३ ॥ उन वामनजी के यज्ञो पवीत कालमें सूर्य देवने स्वयं उन्हें गायत्रीका उपदेश दिया बृहस्पति ने उन्हें ब्रह्मसूत्र और कश्यपजी ने मेखला पहिनाई ॥ १४ ॥ उन वामनरूपी जगत् पतिको भूमिने कृष्ण मृगचर्म, वनस्पतियोंकेस्वामी चन्द्रमाने दंड,

कुशान्सप्तर्षयोददुः । अक्षमालांमहाराज सरस्वत्यव्ययात्मनः ॥ १६ ॥ तस्माइत्यु
पनीताय यक्षराट् पात्रिकामदात् । भिक्षांभगवती साक्षादुमाऽदादम्बिकासती १७
सब्रह्मवर्चसेनैवं सभांसंभावितोबटुः । ब्रह्मर्षिगणसंजुष्टामत्यरोचत मारिषः॥१८॥
समिद्धमाहितंवन्हिं कृत्वापरिसमूहनम् । परिस्तीर्यसमभ्यर्च्य समिद्भिरजुहोद्द्वि
जः ॥ १९ ॥ श्रुत्वाऽश्वमेधैर्यजमानमूर्जितंबलिं भृगूणामुपकल्पितैस्ततः । जगाम
तत्राखिलसारसंभृतो भारेणगांसन्नमयन्पदेपदे ॥२०॥ तंनर्मदायास्तटउत्तरेबलेर्ये
ऋत्विजस्तेभृगुकच्छसंज्ञके। प्रवर्तयन्तोभृगवःक्रतूत्तमं व्यचक्षतारादुदितंयथारवि
म् ॥ २१ ॥ तेऋत्विजोयजमानः सदस्याहतत्विषोवामनतेजसानृप । सूर्यःकिला
यात्युतवाविभावसुः सनत्कुमारोऽथदिदृक्षयाक्रतोः ॥ २२ ॥ इत्थंसशिष्येषुभृगु-
ष्वनेकधा वितर्क्यमाणोभगवान्सवामनः । सदण्डछत्रंसजलंकमण्डलुं विवेश
बिभ्रद्धयमेधवाटम् ॥ २३ ॥ मौञ्ज्यामेखलयावीत मुपवीताजिनोत्तरम् । जटिलंवा
मनंविप्रं मायामाणवकंहरिम् ॥ २४ ॥ प्रविष्टंवीक्ष्यभृगवः सशिष्यास्तेसहाग्नि
भिः । प्रत्यगृह्णन्समुत्थाय संक्षिप्तास्तस्यतेजसा ॥ २५ ॥ यजमानःप्रमुदितो द-
र्शनीयंमनोरमम् । रूपानुरूपावयवं तस्माआसनमाहरत् ॥ २६ ॥ स्वागतेनाभिन
न्द्याथ पादौभगवतोबलिः । अवनिज्यार्चयामास मुक्तसङ्गमनोरमम् ॥ २७ ॥ त-
त्पादशौचंजनकल्मषापहं सधर्मविन्मूर्ध्न्यदधात्सुमङ्गलम् । यद्देवदेवो गिरिशश्चंद्र
मौलिर्दधारमूर्ध्नापरयाचभक्त्या ॥ २८ ॥ बलिरुवाच ॥ स्वागतंतेनमस्तुभ्य ब्रह्म

मातानें कौपीन, स्वर्गने छत्र; ॥ १५ ॥ ब्रह्माजी ने कमंडलु, सप्तर्षियोंने कुश और सरस्वतीजी ने अक्षमालादी ॥ १६ ॥ वामनजी के यज्ञोपवीत होनेपर यक्षराज ने उनको भिक्षाका पात्र, और माता अन्नपूर्णा ने भिक्षादी ॥ १७ ॥ वे सर्वश्रेष्ठ ब्राह्मण कुमार इस प्रकार ब्रह्मोपयोगीका समस्त सामग्रियोंकोपाकर, अपने ब्रह्मतेज द्वारा ब्रह्मर्षियों से सेवित सभामें शोभा पानेलगे ॥ १८ ॥ फिर वामनजी ने प्रज्वलित हुई स्थापित अग्निका चारों ओर संमार्जन कर कुश बिछाय पूजनकर उसमें समिध से होमकिया ॥ १९ ॥ उसी समय में वामनजी ने सुनाकि—भृगुवंशियों ने महाबल दैत्य पति बलिको अश्वमेध यज्ञमें दीक्षित किया है । यह सुनतेही वह वहां से चले । वह समस्त बलसे परिपूर्ण थे अतएव उनके गमन कालमें पग पगपर पृथ्वी कांपने लगी ॥२०॥ हे राजन् ! नर्मदा नदीके उत्तर तटपर भृगु कच्छ (भंडौच) नामक क्षेत्र में भृगुवंशी ब्राह्मण राजा बलिका श्रेष्ठ यज्ञकरा रहथे, वामन रूपी नारायण उसी स्थानपर गये । उनको देखकर ब्राह्मणोंने जाना कि-मानोस्वयं सूर्य उदय हुए हैं ॥ २१ ॥ वे सब ब्राह्मण राजाबलि और समस्त सभापति वामनजी के तेजसे प्रभारहित होगये और विचारने लगेकि—सूर्य क्या यज्ञ देखने के निमित्त आते हैं ! क्या अग्निआते हैं ? या सनत्कुमार आरहे हैं ? ॥ २२ ॥ शिष्यों समेत भृगुवंशी ब्राह्मण इसप्रकार से तर्क बितर्क कररहे थे, कि— इतने में भगवान वामनजी-दंड, छत्र और जलसे भराहुआ कमंडलु धारणकिये अश्वमेध मंडपमें आये ॥ २३ ॥ मायारूपी भगवान वामन कमरमें मूंजकी मेखला पहिने, उपवीत और मृगचर्म रूप उत्तरीय धारणकिये, जटाबांधे हुएथे और उनका शरीर बहुतही छोटा था । उनको देखतेही सब भृगुवंशी उनके तेजसे ज्ञान रहित होगये और शिष्यों तथा अग्नियों के साथ उठकर उनका सनमान करनेलगे ॥ २४-२५ ॥ यजमान राजा बलिभी उनके रूपके अनुरूप छोटे २ अंग और अतिसुंदर स्वरूपको देखकर सुंदर आसन लाया ॥२६॥ और उनका सादर अभिनंदन कर, दोनों चरण पखार, पूजाकर राजाबलि ने वामनजी के पाप नाशक चरणोदक को माथेपर चढ़ाया हे राजन् ! वह चरणोदक साधारण नहीं है, उस चरणोदक को चन्द्रशेखर महादेवजी ने आदर पूर्वक भक्तियुक्त मस्तक पर धारण किया है ॥ २७-२८ ॥ बलिने कहाकि—हे

न्किंकरवामते। ब्रह्मर्षीणांतपःसाक्षान्मन्येत्वार्यवपुर्धरम् ॥२९॥ अद्यनःपितरस्तृप्ता अद्यनःपावितंकुलम्। अद्यस्विष्टःक्रतुरयं यन्भवानागतोगृहान् ॥ ३० ॥ अद्याग्नयोमेसुहुता यथाविधिद्विजात्मज त्वच्चरणावनेजनैः। हतांहसोवार्भिरियंचभूरहोतथापुनीता तनुभिःपदैस्तव ॥ ३१ ॥ यद्यद्वटोवांछसितत्प्रतीच्छमे त्वामर्थिनंविप्रसुतानुतर्कये। गांकांचनंगुणवद्धाममृष्टं तथान्नपेयमुतवाविप्रकन्याम्। ग्रामांसमृद्धांस्तुरगान्गजान्वा रथांस्तथाऽर्हत्तमसंप्रतीच्छ ॥ ३२ ॥

इतिश्रीमद्भा०महा० अष्ट० अष्टादशोऽध्यायः ॥ १८ ॥

श्रीशुकउवाच॥ इतिवैरोचनेर्वाक्यं धर्मयुक्तंससूनृतम्। निशम्यभगवान्प्रीतः प्रतिनन्द्येदमब्रवीत् १ श्रीभगवानुवाच॥वचस्तवैतज्जनदेवसूनृतंकुलोचितंधर्मयुतंयशस्करम्। यस्यप्रमाणंभृगवः सांपरायेपितामहःकुलवृद्धःप्रशांतः॥२॥ नह्येतस्मिन्कुलेकश्चिन्निःसत्त्वःकृपणःपुमान्। प्रत्याख्याताप्रतिश्रुत्य योवाऽदाताद्विजातये ३ ॥ नसन्तितीर्थेयुधिचार्थिनाऽर्थिताः पराङ्मुखाये त्वमनस्विनोनृपाः। युष्मत्कुलेयद्यशसाऽमलेन प्रह्लादउद्भातियथोडुपःखे ॥ यतोजातोहिरण्याक्षश्चरन्नेकइमांमहीम्। प्रतिवीरंदिग्विजये नाविन्दतगदायुधः ॥ ५ ॥ यंविनिर्जित्यकृच्छ्रेणविष्णुःक्ष्मोद्धार आगतम्। नात्मानंजयिनंमेने तद्वीर्यंभूर्यनुस्मरन्॥ ६ ॥ निशम्यतद्वधंभ्राताहिरण्यकशिपुःपुरा। हन्तुंभ्रातृहणंक्रुद्धो जगामनिलयंहरेः॥७॥तमायांतंसमालोक्य शूलपाणिंकृतांतवत्। चिंतयामासकालज्ञोविष्णुर्मायाविनांवरः ॥ ८ ॥ यतोयतोऽहंतत्रा

महाराज! आपको प्रणामहै आप सुखसेतो आयेहो? कोई कष्टतो नहीं हुआ? आप आज्ञाकरिये, मैं आपका कौनसा कार्यकरूं? हे प्रभो? जानपडता है कि-आप ब्रह्मर्षियों की मूर्तिमानी तपस्याहो ॥ २९ ॥ आपके आनेमें मेरे पितर तृप्तहोगये; आज मेराकुल पवित्र हुआ, आज यह यज्ञभली प्रकारसे पूर्णहुआ क्योंकि आज आप हमारे यहांपधारे ॥ ३० ॥ हे विप्रनंदन! आज अग्नि में होम भी मेराभलीप्रकार हुआ; आपके चरणोंके जलसे मेरेपाप नष्टहोगये और आपके छोटे २ चरणों से आज यह भूमिभी पवित्रहोगई॥३१॥आपकी जोइच्छाहो सोकहिये, मै उसेपूरी करूंगा, अनुमान होता है कि—आपकुछ मागने आयेहो। पृथ्वी, सुवर्ण, श्रेष्ठनिवासस्थान, मिष्टान्न, कन्या, गांव, घोडा, हाथी व रथ इनमें से जोआपकी इच्छाहो सोमांगो—मै वही आपको दूंगा ॥ ३२ ॥

इतिश्री मद्भागवतेमहापुराणेअष्टमस्कंधेभाषाटीकायांअष्टादशोऽध्यायः ॥ १८ ॥

श्रीशुकदेवजी बोलेकि—हे राजन्! बलिके ऐसे धर्मयुक्त सत्य वाक्योंको सुनकर भगवान सन्तुष्ट हुए और उनकी प्रशंसा करके कहने लगे ॥ १ ॥ कि-हे राजन्! आपके पारलौकिक धर्ममें कुल वृद्ध, शांत पितामह प्रह्लाद तुम्हारे उदाहरण हैं। अतएव हे नरदेव! जोतुमने सत्य वाक्य कहे यह धर्मयुक्त यशके बढ़ाने वाले और तुम्हारे कुलके योग्य हैं ॥ २ ॥ इसकुलमें इससमयतक कोई पुरुष ऐसा सत्वहीन व कृपण नहींहुआ कि जिसने ब्राह्मणको दानदेना अङ्गीकारकर फिर न दिया हो ॥ ३ ॥ तुम्हारे कुलमें जो सब मनुष्य उत्पन्नहुए हैं वे दान के समय में अथवा युद्धके समय में याचकके याचना करनेपर कभी विमुख नहींहुए। प्रह्लादकी निर्मल कीर्तिका विस्तारकर,आकाश में चन्द्रमाकी समान, प्रकाशित होरहे हैं ॥ ४ ॥ तुम्हारे इसी वंश में हिरण्याक्षने जन्मग्रहणकर गदाहाथ में ले अकेलेही दिशाओं कोजीत पृथ्वी मण्डल में भ्रमण कियाथा परन्तु कहीं भी उस को योद्धा न मिला ॥ ५ ॥ विष्णुजीके पृथ्वी उद्धारकरने के समय हिरण्याक्ष उनके निकटआया। नारायण ने बहुत कष्टसे उसको जीतकर, उसके पराक्रमका स्मरणकर अपने को विजयी नहींमाना था ॥ ६ ॥ हिरण्याक्षकाभाई हिरण्यकशिपु, अपने भाई के नाश होनेकी वार्ता सुन क्रोधितहो, भाई के मारनेवाले को मारने के निमित्त विष्णुजीके स्थानपर गया ॥ ७ ॥ मायावियों में श्रेष्ठ, समयके

सौमृत्युःप्राणभृतामिव अतोऽहमस्यहृदयं प्रवेक्ष्यामिपराग्दृशः ॥ ९ ॥ एवंसनिश्चित्य रिपोःशरीरमाधावतो निर्विविशेऽसुरेंद्र । श्वासानिलांतर्हितसूक्ष्मदेहस्तत्प्राणरन्ध्रेणविविग्नचेताः ॥ १० ॥ सतन्निकेतंपरिमृश्यशून्यमपश्यमानःकुपितोननाद । क्ष्मांद्यांदिशःखंविवरान्समुद्रान्विष्णुं विचिन्वन्नददर्शवीरः ॥ ११ ॥ अपश्यन्निति होवाचमयाऽन्विष्टमिदंजगत् । भ्रातृहामेगतोनूनं यतोनावर्ततेपुमान् ॥ १२ ॥ वैरानुबन्धएतावानामृत्योरिहदेहिनाम् । अज्ञानप्रभवोमन्युरहंमानोपबृंहितः १३ ॥ पिताप्रह्लादपुत्रस्ते तद्विद्वान्द्विजवत्सल । स्वमायुर्द्विजलिंगेभ्यो देवेभ्योऽदात्सयाचितः ॥ १४ ॥ भवानाचरितान्धर्मान्आस्थितोगृहमेधिभिः । ब्राह्मणैःपूर्वजैःशूरैरन्यैश्चोद्दामकीर्तिभिः ॥ १५ ॥ तस्मात्त्वत्तोमहीमीषद्वृणेऽहंवरदर्षभात् । पदानित्रीणिदैत्येंद्रसंमितानिपदाममम १६॥नान्यत्तेकामयेराजन्वदान्याज्जगदीश्वरात् । नैनःप्राप्नोतिवैविद्वान्यावदर्थपरिग्रहः ॥१७ ॥ बलिरुवाच ॥ अहोब्राह्मणदायाद्वाचस्ते वृद्धसंमताः । त्वंबालोबालिशमतिःस्वार्थंप्रत्यबुधोयथा ॥१८॥ मांवचोभिःसमाराध्यलोकानामेकमीश्वरम् । पदत्रयंवृणीतेयोऽबुद्धिमान्द्वीपदाशुषम् ॥ १९ ॥ नपुमान्मामुपव्रज्यभूयोयाचितुमर्हति । तस्माद्वृत्तिकरींभूमिं वटोकामंप्रतीच्छमे २० ॥ भगवानुवाच ॥ यावन्तोविषयाःप्रेष्ठा स्त्रिलोक्यामजितेंद्रियम् । नशक्नुवन्ति

जाननेवाले विष्णुजी त्रिशूलहाथ में लिये कालकी समान हिरण्यकशिपको आता देख मनमें विचारनेलगे कि ॥८॥ मै जहां २ जाऊंगा, प्राणियों की मृत्युकी समान यह असुर वहां २ मेरे पीछे २ आवैगा । अतएव मैं इसके हृदय में प्रवेशकरू ॥ ९ ॥ भगवान इसप्रकार से विचार उसके हृदय के भीतर थर २ कांपतेहुए छोटासा स्वरूपवना दौड़तेहुए उसशत्रुके शरीर में श्वास लेने के साथ प्राणके छिद्रद्वारा घुसगये ॥ १० हिरण्यकशिपु विष्णुजीको नहीं देख उनके शून्यभवन के चारोओर घूमकर सिंहनाद करनेलगा फिर उसने उनके खोजने के निमित्त पृथ्वी, स्वर्ग, दिग्मण्डल, आकाश और समुद्र में भ्रमण किया, परन्त कहीं भी नारायण को न पाया ॥ ११ ॥ तब वह कहनेलगा कि मैने इस समस्त जगतको ढूंढा, किन्तु मेरे भाई का मारनेवाला कहीं न मिला इससे निश्चयही जानपड़ता है कि मनुष्य जिसस्थान से फिर लौटकर नहीं आता मेरे भाईका मारनेवालाभी उसी स्थानमें चलागया ॥ १२ ॥ हे महाराज ! इससंसारमें प्राणियों की शत्रुता मृत्युपर्यंत इसी प्रकारसे प्रबलरहती है क्योंकि क्रोध अज्ञान से उत्पन्न होकर अहंकार से बढ़ता रहता है॥१३॥प्रह्लादकापुत्र विरोचन तुम्हारा पिता द्विज वत्सलथा; देवताओंने ब्राह्मणों को वश बनाय उनसे आयु मांगीतो विरोचनने जानबूझकरभी उन्हें अपनीपरमायुदेदी॥१४॥गृहमेधी ब्राह्मणगण, प्राचीन वीरगण औरभी दूसरेमनुष्य जिस धर्मका अनुष्ठानकरते आये हैं तुमभी उन्हीं सबका आचरणकरते हो॥१५॥अतएव हे दैत्येन्द्र! मैं तुमसे अपनेपैरोंकी तीनपैग पृथ्वीको मांगताहूं १६॥ तुम दाता और जगतके ईश्वरहो परन्तु तुमसे मैं और कुछ नहीं चाहता । जितनेकी आवश्यकता होवे, विद्वान मनुष्य यदि उतनाही मांगे तो पापकाभागी नहीं होता ॥ १७ ॥ राजाबलिने कहा कि—हे विप्रतनया आपके वाक्य वृद्धकीसमान हैं, परन्तु आप बालकहो; इस कारण आपकी बुद्धि मूर्खों की सी है क्योंकि आप अपने स्वर्थ को नहीं जानते ॥ १८ ॥ मैं त्रिलोकीका स्वामीहूं मैं एकद्वीपतक दे सकताहू ; किन्तु आप ऐसे अबोध हो कि मुझे वचनों से सन्तुष्टकर केवलतीन पैग पृथ्वी चाहते हो ॥ १८ ॥ मनुष्य मुझको प्रसन्न करके दूसरे मनुष्य से प्रार्थना करने योग्य नहीं रहता । अतएव जितनी भूमि से भलीप्रकार आपकी संसार यात्राका निर्वाह होसके आप मुझसे उतनीही पृथ्वी मांगो ॥२०॥ श्रीभगवान बोले कि—हे राजन् ! त्रिलोकी के मध्यमें जितने

तैसर्वैः प्रतिपूरयितुंनृप ॥ २१ ॥ त्रिभिःक्रमैरसंतुष्टो द्वीपेनापिनपूर्यते । नववर्षसमेतेनसप्तद्वीपवरेच्छया ॥ २२ ॥ सप्तद्वीपाधिपतयो नृपावैण्यगयादयः । अर्थैःकामैर्गतान्तं तृष्णायाइतिनःश्रुतम् ॥ २३ ॥ यदृच्छयोपपन्नेन संतुष्टोवर्ततेसुखम् । नासंतुष्टस्त्रिभिर्लोकैरजितात्मोपसादितैः ॥ २४ ॥ पुंसोऽयंसंसृतेर्हेतुरसन्तोषोऽर्थकामयोः । यदृच्छयोपपन्नेनसंतोषोमुक्तयेस्मृतः ॥ २५ ॥ यदृच्छालाभतुष्टस्य तेजोविप्रस्यवर्धते । तत्प्रशाम्यत्यसंतोषादम्भसेवाशुशुक्षणिः ॥ २६ ॥ तस्मात्त्रीणिपदान्यहंवृणेत्वद्वरदर्षभात् । एतावतैवसिद्धोऽहं वित्तंयावत्प्रयोजनम् ॥ २७ ॥ श्रीशुकउवाच ॥ इत्युक्तःसहसन्प्राहवांछतःप्रतिगृह्यताम् । वामनायमहीं दातुं जग्राहजलभाजनम् २८ ॥ विष्णवेक्ष्मांप्रदास्यन्तमुशनाअसुरेश्वरम् । जानंश्चिकीर्षितंविष्णोःशिष्यंप्राहविदांवरः ॥ २९ ॥ शुक्राचार्यउवाच ॥ एषवैरोचनेसाक्षाद्भगवान्विष्णुरव्ययः । कश्यपाददितेर्जातोदेवानांकार्यसाधकः ॥ ३० ॥ प्रतिश्रुतंत्वयैतस्मैयदनर्थमजानता । नसाधुमन्येदैत्यानांमहानुपगतोऽनयः ॥ ३१ ॥ एषतेस्थानमैश्वर्यंश्रियंतेजोयशःश्रुतम् । दास्यत्याच्छिद्यशक्राय मायामाणवकोहरिः ॥ ३२ ॥ त्रिभिःक्रमैरिमाँल्लोकान्विश्वकायःक्रमिष्यति । सर्वस्वंविष्णवेदत्त्वा मूढवर्तिष्यसेकथम् ॥ ३३ ॥ क्रमतोगांपदैकेनद्वितीयेनदिवंविभोः । खंचकायेनमहता तार्तीयस्यकुतोगतिः ॥ ३४ ॥ निष्ठांतेनरकेमन्ये ह्यप्रदातुः प्रतिश्रुतम् । प्रतिश्रुतस्ययोऽनीशःप्रति

प्रियपदार्थ हैं उनसबको पाकरभी अजितेन्द्रिय मनुष्य अपनेको सन्तुष्ट नहीं करसकता ॥२१॥ जो मनुष्य तीनपग भूमिसे सन्तुष्ट नहोगा वह द्वीपसे कैसे सन्तुष्टहोजायगा क्योंकि द्वीप मिलनेपर उस नौ खण्डोंसमेत पृथ्वी के पानेकी कामनाहोगी॥२२॥ऐसाभी सुनाहै कि पृथु और गयआदि राजलोग सातद्वीपों के स्वामीहो और समस्त कामका भोगकरके भी विषयभोगों की तृष्णाकापार न पासके ॥२३॥सन्तुष्ट मनुष्य यदृच्छा से प्राप्तहुए पदार्थका भोगकर सुखसे वासकरताहै; किंतु अजितेन्द्रिय मनुष्य त्रिलोकी को भी पाकर सुखी नहीं होता ॥२४॥ पण्डितों ने कहा है कि—मनुष्य के अर्थ व काम में संतोषका न होना यही जन्ममरणका हेतु है; और यदृच्छा से प्राप्तहुए पदार्थपर सन्तोषकरनाही उसके तेज के बढ़नेका कारण है ॥ २५ ॥ और जो सन्तोष नहीं रखता उसका तेज, जल से शांत हुए अग्निके समान, शांत होजाता है ॥ २६ ॥ इसवरदश्रेष्ठ ! मैं तुमसे तीन पग भूमिकीही इच्छा करता हूं, मैं इसहीको पाकर अपने को धन्यमानूंगा ॥ २७ ॥ श्रीशुकदेवजी बोले कि—वामनजीकी इसबातको सुन,राजाबलि ने हँसकर " यहां लो " कह भूमिकादानदेने के निमित्त जलका पात्र ग्रहणकिया ॥ २८ ॥ किंतु सर्वज्ञ दैत्यगुरु शुक्राचार्य विष्णुजीके अभिप्राय को जान (शिष्यबलिको भूमिदानकरते देख) कहने लगे कि ॥ २९ ॥ हे बलि ! यह साक्षात् भगवान विष्णु हैं; देवताओं का कार्य पूरा करने के निमित्त कश्यपजी के वीर्य से अदिति के गर्भद्वारा प्रगटहुएहैं ॥ ३० ॥ तुम इसबड़ी आपत्ति को नहीं जानसके; अतएव इन्हें दानदेना स्वीकार करलिया; मैं जानता हूं कि दैत्यों के ऊपर बड़ीभारी विपत् आ उपस्थित हुई ॥ ३१ ॥ यह कोई साधारण बटु नहीं है ! यह माया वामन रूपी श्रीभगवान हैं तुम्हारा स्थान, ऐश्वर्य, श्री, यश, तेज और विद्याका हरणकर इन्द्र को देवेंगे ॥ ३२ ॥ विश्वही इनकी देह है यह तीन पग से तीनोंलोक पर आक्रमण करेंगे तुम्हारा सर्वस्व नष्ट होजायगा हे मूढ ! विष्णु को सर्वस्व दान करके तू क्या लेवेगा ॥ ३३ ॥ यह वामन एक पग से पृथ्वी, द्वितीय पैंग से स्वर्ग व आकाश नाप लेवेंगे तीसरे पग की क्या गति होगी ॥ ३४ ॥ तूने दान देना अंगीकार कियाहै, किंतु उसको देनहीं स-

पारयितुंभवान् । ३५ । नतद्दानंप्रशंसन्तियेनवृत्तिर्विपद्यते । दानंयज्ञस्तपःकर्मलोके वृत्तिमतोयतः ॥३६॥ धर्माययशसेऽर्थायकामायस्वजनायच । पंचधाविभजन्वित्त मिहामुत्रचमोदते ॥ ३७ ॥ अत्रापिबह्वृचैर्गीतं शृणुमेऽसुरसत्तम । सत्यमोमितियत् प्रोक्तंयन्नेत्याहानृतंहितत् ॥ ३८ ॥ सत्यपुष्पफलंविद्यादात्मवृक्षस्यगीयते । वृक्षेऽ जीवतितन्नस्यादनृतंमूलमात्मनः ॥३९॥तद्यथावृक्षउन्मूलः शुष्यत्युद्वर्ततेऽचिरात् । एवंनष्टानृतःसद्य आत्माशुष्येन्नसंशयः॥४०॥पराग्रिक्तमपूर्णंवा अक्षरंयत्तदोमिति । यत्किंचिदोमिति ब्रूयात्तेनरिच्येतवैपुमान् ॥४१॥भिक्षवेसर्वमोंकुर्वन्नालंकामेनचात्मने। अथैतत्पूर्णमभ्यात्मं यच्चनेत्यनृतंवचः । सर्वंनेत्यनृतंब्रूयात्स दुष्कीर्तिःश्वसन्मृतः ॥४२॥स्त्रीषुनर्मविवाहेच वृत्त्यर्थेप्राणसंकटे ॥ गोब्राह्मणार्थेहिंसायां नानृतंस्याज्जु गुप्सितम् ॥ ४३ ॥

इतिश्रीमद्भा० महा० अष्ट० एकोनविंशोऽध्यायः ॥ १९ ॥

श्रीशुकउवाच ॥ बलिरेवंगृहपतिः कुलाचार्येणभाषितः । तूष्णींभूत्वा क्षणंरा जन्नुवाचावहितोगुरुम् ॥ १ ॥ बलिरुवाच ॥ सत्यंभगवताप्रोक्तं धर्मोऽयंगृहमे धिनाम् । अर्थंकामंयशोवृत्तिं योनबाधेतकर्हिचित् ॥२॥ सचाहंवित्तलोभेन प्रत्या

कता अतएव प्रतिज्ञा पूर्ण नहोनें के कारण नरक में पडेगा ॥ ३५ ॥ वृत्ति युक्त मनुष्यही लोकमें दान, यज्ञ, तपस्या और पूर्तादि (कुआं बावडी आदि बनाना) कर्म करसकते हैं, जिस दान से अपनी जीविका नष्ट होजाय वह दान प्रशंसा के योग्य नहीं होता ॥ ३६ ॥ जो मनुष्य सम्पत्ति के पांच भाग करके धर्म, यश, अर्थ, काम और स्वजनों के कार्य में व्यय करता है, वह इस लोक और परलोक दोनोंही में सुखी रहता है ॥ ३७ ॥ हे देवेन्द्र ! इसी सम्बन्ध में जो श्रुति में कहा है वहभी मुझ से सुनों जो स्वीकार करके उसका पालन करताहै व सत्य, और जो स्वीकार करके उसका पा लन नहीं करता वह असत्य कहलाता है ॥ ३८ ॥ श्रुति में कहा है कि सत्य, देह रूप वृक्षका फल फूल है, वृक्षक जीवित नरहनें से वह फल फूल अवश्यही नष्ट होजाता है मिथ्या से देहकी रक्षा होती है, क्योंकि मिथ्याही देहका मूल है ॥ ३९ ॥ जैसे जड उखाडडालनें से वृक्ष शीघ्रही गिरकर सूख जाता है, ऐसेही जिस मनुष्य का मिथ्या नाश होजाता है उसकी देह निश्चयही सूख जाती है ॥४०॥ पुरुष जो कुछ 'हो दान करूगा' यह कहे उसमें उसका अधिकार नहीं रहता, अतएव "हां दूंगा" यह शब्दही अपूर्ण है क्यो कि समस्त सम्पत्ति दे देनें परभी याचक की आशा नहीं पूर्ण होती और इससे देनेवाले का धन लेकर दूर जानाहोता है ॥ ४१ ॥ भिक्षुक जो कुछ प्रार्थना करे जो मनुष्य उसको सबही देना स्वीकार करले तो वह स्वयं भोग नहीं करसकता, अतएव नदूंगा यही शब्द पूर्ण है, क्यों कि इससे दूसरे विषय अपनी ओर को खिचते है किंतु 'नहीं' 'नदूंगा' यह मिथ्या वचन नकहना चाहिये, क्यों कि जो सर्वदा इसी बचन को कहते हैं वे अकीर्ति भागी और जीवित मृतकी समान हैं ॥ ४२ ॥ स्त्री वशीकरण काल में हास्य परिहास में निवाह में वरके गुण कहनें में जीविकावृत्ति की रक्षा के निमित्त, प्राण संकट में, गौ ब्राह्मण के हित साधन के निमित्त और किसीकी प्राण हिंसा उपस्थित होनेंपर असत्य बोलनें में दोष नहीं है ॥ ४३ ॥

इति श्रीमद्भ० म० पु० अष्टमस्कं सरलाभाषाटीकायां एकोनविंशोऽध्यायः ॥ १९ ॥

श्रीशुकदेवजीबोले कि–हे राजन् ! गृह पति बलि शुक्राचार्य कीबात सुनकर कुछ समय तक चुपरहगये फिरगुरु से कहने लगे कि ॥ १ ॥ हे गुरुदेव ! आप सत्यही कहतेहो ; गृहस्थियोंका धर्मयहीहै किजिससे अर्थ, यश, काम और वृत्तिका नाश न होवे वही कर्म करे ॥ २ ॥ किंतु मैं

वञ्चयिष्ये कथं द्विजम्। प्रतिश्रुत्य ददामीति प्राह्रादिः कितवो यथा ॥ ३ ॥ न ह्यसत्यात्परोऽधर्म इति होवाच भूरियम्। सर्वं सोढुमलं मन्ये ऋतेऽलीकपरं नरम् ॥ ४ ॥ नाहं बिभेमि निरयान्नाधन्यादसुखार्णवात्। न स्थानच्यवनान्मृत्योर्यथा विप्रप्रलम्भनात् ॥ ५ ॥ यद्यद्धास्यति लोकेऽस्मिन् संपरेतं धनादिकम्। तस्य त्यागे निमित्तं किं विप्रस्तुष्येन्न तेन चेत् ॥ ६ ॥ श्रेयः कुर्वन्ति भूतानां साधवो दुस्त्यजासुभिः। दध्यङ्शिबिप्रभृतयः को विकल्पो धरादिषु ॥ ७ ॥ यैरियं बुभुजे ब्रह्मन् दैत्येन्द्रैरनिवर्तिभिः। तेषां कालोऽग्रसील्लोकान् न यशोऽधिगतं भुवि ॥ ८ ॥ सुलभा युधि विप्रर्षे ह्यनिवृत्तास्तनुत्यजः। न तथा तीर्थ आयाते श्रद्धया ये धनत्यजः ॥ ९ ॥ मनस्विनः कारुणिकस्य शोभनं यदर्थिकामोपनयेन दुर्गतिः। कुतः पुनर्ब्रह्मविदां भवादृशां ततो वटोरस्य ददामि वाञ्छितम् ॥ १० ॥ यजन्ति यज्ञं क्रतुभिर्यमादृता भवन्त आम्नायविधानकोविदाः। स एव विष्णुर्वरदोऽस्तु वा परो दास्याम्यमुष्मै क्षितिमीप्सितां मुने ॥ ११ ॥ यद्यप्यसावधर्मेण मां बध्नीयादनागसम्। तथाप्येनं न हिंसिष्ये भीतं ब्रह्मतनुं रिपुम् ॥ १२ ॥ एष वा उत्तमश्लोको न जिहासति यद्यशः। हत्वा मैनां हरेद्युद्धे शयीत निहतो मया ॥ १३ ॥ श्रीशुक उवाच ॥ एवमश्रद्धितं शिष्यमनादेशकरं गुरुः। शशाप दैवप्रहितः सत्यसन्धं मनस्विनम् ॥ १४ ॥ दृढं पण्डितमान्यज्ञः स्तब्धोऽस्यस्मदुपेक्षया। मच्छासनातिगो यस्त्वमचिराद्भ्रश्यसे श्रियः ॥ १५ ॥ एवं शप्तः स्वगुरुणा सत्यान्न चलितो म

प्रह्लादकापौत्रहू मैंने दानदेना स्वीकार किया है अब धन केलोभसे साधारण कपटीकी समानाकिस प्रकार से ब्राह्मणको " न दूंगा " ऐसा कहू ॥३॥ ? मिथ्या की समान और कोई अ र्म नहीं है । पृथ्वीने कहाहै कि—मिथ्या वादी मनुष्य के अति रिक्तमें सबही केभारका सहनकर सकता हू ॥ ४ ॥ ब्राह्मणको धोखादेनेमे मुझको जितनाभय लगता है—नरक, दारिद्रता, स्थानच्युत, व मृत्यु से भी उतना भय नहीं लगता ॥ ५ ॥ पुरुषका परलोक जानेपर इसलोक के पृथ्वी आदिजो २ पदार्थहैंवे अवश्य छोडना पडगे उन २ पदार्थों द्वारा जबतक ब्राह्मणको संतोष न उत्पन्नहोवे तब तक उसदानक करनेसे फलही क्याहै ? ॥ ५ ॥ दधीचि और शिबि आदि साधूजनोने दुस्त्यज प्राण देकर भी प्राणियो काहित साधन कियाहै ; फिरपृथ्वी कादान करक देनेमें क्या संशयहै ? ॥ ७ ॥ हे ब्रह्मन् ! युद्धसे नहटनेवाले जिन दैत्य पतियों ने इस पृथ्वी का भोगकिया है उनके भोग को यद्यपि करालकाल नें नष्ट करदियाहै तोभी उन्होंनें पृथ्वीपरजो यशप्राप्त किया है वह अबतक नाश नहीं हुआहै ॥ ८ ॥ हे विप्रर्षे ! युद्धमें पीछे न हटकर देह त्याग देनेवाले मनुष्य अनेक पाये जाते हैं परन्तु सत्पात्रक उपस्थितहोने पर उसकी इच्छानुसार, श्रद्धासे दान देनेंवाले मनुष्य बहुत ही दुर्लभहै ॥९॥ साधारण याचककी अभिलाषा पूर्णकरनेस जो दरिद्रता होजाय तो वह दयाशील, उदारचित्तवालेका गौरव बढानेवाली होतीहै,फिर यदि आपकी समान ब्रह्मज्ञ ब्राह्मणोंको दानकरनेमें दरिद्रताहोजाय तो उसमें कहनाही क्या है ! यह ब्राह्मणकुमार जो कुछ मांगताहै मैं इसको वही दूंगा॥१०॥आपलोग वेदानुसार विधानसे यज्ञ और क्रतुद्वारा जिनका यजनकरते हैं, हे मुने ! यह चाहें वही बरदेनेवाले विष्णुहो,वाकोई दूसराहो मैंतो इनको मांगीहुई पृथ्वीदूगा॥११॥मुझ निरपराधी का यदि यह अधर्मपूर्वक बधनभी करेंगे, तोभी मैं भीतस्वभाव ब्राह्मण रूपधारी इसब्राह्मणको मैंने मारूगा॥१२॥यह पवित्र यशवाले भगवान यदि अपनेयशके त्यागनकाइच्छा न करते तो मुझको युद्ध में मारकर इसपृथ्वीको ग्रहणकरते अथवा मुझसे निहतहोकर पृथ्वीपर सोते ॥१३॥श्री शुकदेवजीबाले कि—हेराजन् ! जबराजाबलिने गुरु पर श्रद्धान रखकर इसप्रकार से उनका कहना न माना तब दैवकी प्रेरणा से गुरुने उस सत्यप्रतिज्ञ राजाबलि का शापदेकर कहा कि ॥ १४ ॥ तू मूर्ख है

दाद् । वामनायददावेना मर्चित्वोदकपूर्वकम् ॥ १६ ॥ विन्ध्यावलिस्तदाऽऽगत्य पत्नीजालकमालिनी । आनिन्येकलशंहैम मवनेजन्यपांभृतम् ॥ १७ ॥ यजमानः स्वयंतस्य श्रीमत्पादयुगंमुदा । अवनिज्यावहन्मूर्ध्नि तदपोविश्वपावनीः ॥ १८ ॥ तदासुरेन्द्रंदिविदेवतागणा गन्धर्वविद्याधरसिद्धचारणाः । तत्कर्मसर्वेऽपिगृणन्त आर्जवं प्रसूनवर्षैर्ववृषुर्मुदाऽन्विताः ॥ १९ ॥ नेदुर्मुहुर्दुन्दुभयः सहस्रशो गंधर्वकिम्पूरुषकिन्नराजगुः । मनस्विनानेनकृतंसुदुष्करं विद्वानदाद्यद्रिपवेजगत्त्रयम् ॥ २० तद्वामनंरूपमवर्धताद्भुतं हरेरनन्तस्यगुणत्रयात्मकम् । भूःखंदिशोद्यौर्विवराःपयोधयस्तिर्यङ्नृदेवाऋषयोयदासत ॥ २१ ॥ कायेबलिस्तस्यमहाविभूतेः सहर्त्विगाचार्यसदस्यएतत् । ददर्शविश्वंत्रिगुणंगुणात्मके भूतेन्द्रियार्थाशयजीवयुक्तम् ॥ २२ ॥ रसामचष्टाङ्घ्रितलेऽथपादयोर्महींमहीध्रान्पुरुषस्यजंघयोः । पतत्त्रिणोजानुनिविश्वमूर्ते रूर्वोर्गणंमारुतमिन्द्रसेनः ॥ २३ ॥ संध्यांविभोर्वाससिगुह्यऐक्षत् प्रजापतीञ्जघनेआत्ममुख्यान् । नाभ्यांनभःकुक्षिषुसप्तसिंधूनुरुक्रमस्योरसिचर्क्षमालाम् ॥ २४ ॥ हृद्यङ्गधर्मंस्तनयोर्मुरारेर्ऋतंचसत्यंचमनस्यथेन्दुम् । श्रियंचवक्षस्यरविन्दहस्तांकंठेचसामानिसमस्तरेफान् ॥ २५ ॥ इन्द्रप्रधानानमरान्भुजेषु तत्कर्णयोःककुभोद्यौश्चमूर्ध्नि । केशेषुमेघाञ्छ्वसनंनासिकायामक्ष्णोश्चसूर्यंवदनेचवह्निम् ॥ २६ ॥ वाण्यांचछन्दांसिरसेजलेशं भ्रुवोर्निषेधंचविधिंचपक्ष्मसु । अहश्चरात्रिंचपरस्यपुंसो

और पांडित्य का तुझे बडाभारी अभिमान है । मेरी उपेक्षाकरके तूने मेरी आज्ञा टालदी । बहुत शीघ्र तूभी भ्रष्टहोगा ॥ १५ ॥ अपने गुरुके इसप्रकार शापदेनेपरभी महात्मा बलिसत्य से विचलित न हुए; वामनजीकी पूजाकर जलस्पर्श पूर्वक उनको भूमिका दानदेनेलगे ॥ १६ ॥ उससमय बलिकी भार्या विन्ध्यावली मोतियों की माला और आभूषणों से विभूषितहो, चारण धोने के योग्य जलसे भराहुआ सोनेका कलस स्वामीके निकट लायी ॥ १७ ॥ यजमान बलिने परम आनन्दित होकर स्वयं वामनजी के दोनों चरणों को धो उस विश्व पावन जलको मस्तकपर धारण किया ॥ ॥ १८ ॥ उस समय स्वर्ग में देवता, गन्धर्व, सिद्ध और चारणगण सबही आनन्दित होकर उस बडे कार्यकी प्रशंसा कर २ फूल बरसाने लगे ॥ १९ ॥ सहस्र२ दुन्दुभी बारम्बार बजनेलगीं और " इस उदारचित्त बलि राजाने बडाही दुष्कर कर्म किया " यह कह २ कर गन्धर्व, किन्नर,और किंपुरुषगण उत्तम स्वरसे गान करनेलगे ॥ २० ॥ देखते २ भगवान वामनजी अत्याश्चर्यरूपसे बढने लगे । तीनोंरूप उसगुणके अन्तर्गतथे; अतएव पृथ्वी, आकाश, दिशाएं, स्वर्ग, विवर, समुद्र, पशु, पक्षी, नर, देव और ऋषिगण सब उसहीरूप में समारहेथे ॥ २१ ॥ बलि और उसके ऋत्विग, आचार्य और सभासदों ने महाविभूतिशाली उन हरिके गुणात्मक देहमें इस त्रिगुणात्मक विश्व और भूत,इन्द्रिय,विषय,चित्त और जीवको देखा॥२२॥राजा बलिने उन परम पुरुष विश्वमूर्ति भगवान के पैरों नीचे रसातल चरणों में पृथ्वी, दोनों जांघों में पर्वत घुटनों में पक्षी और साथलोंमें पवन गण को देखा॥२३॥ उनके वस्त्रोंमें संध्या गुह्यमें प्रजापति,जघनमें आप (बलि)और समस्त असुर लोग, नाभि में आकाश,कोख में सातो समुद्र,वक्षःस्थलमें नक्षत्र ॥२४॥ हृदय में धर्म, दोनों स्तनोंमें ऋत और सत्य, मनमें चन्द्रमा, उरमें हाथ में कमल लियेहुए लक्ष्मी कंठमें सामवेद और शब्द ॥ २५ ॥ चारोंभुजाओं में समस्त इन्द्र आदि देवता, दोनों कानोंमें दिशाएं, मस्तक में स्वर्ग, केशों में मेघ, नासिकामें वायु, दोनों नत्रों में सूर्य, मुख में अग्नि ॥ २६ ॥ वचनमें वेद जिह्वा में वरुण, दोनों भौंहों के मध्यभागमें निषेध, और विधि, पलकों में दिन और रात्रि, ललाटमें क्रोध

मन्युंललाटेऽधरएवलोभम् ॥ २७ ॥ स्पर्शेचकामंनृपरेतसाम्भः पृष्ठेत्वधर्मंक्रमणे षुयज्ञम् । छायासुमृत्युंहसितेचमायांतनूरुहेष्वोषधिजातयश्च ॥ २८ ॥ नदीश्चना डीषुशिलानखेषुबुद्धावजंदेवगणानृषींश्च । प्राणेषुगात्रेस्थिरजङ्गमानिसर्वाणिभूता निददर्शवीरः ॥ २९ ॥ सर्वात्मनीदंभुवनंनिरीक्ष्यसर्वेऽसुराः कश्मलमापुरङ्ग । सुद र्शनंचक्रमसह्यतेजोधनुश्चशार्ङ्गंस्तनयित्नुघोषम् ॥ ३० ॥ पर्जन्यघोषोजलजः पा ञ्चजन्यः कौमोदकीविष्णुगदातरस्विनी । विद्याधरोऽसिः शतचन्द्रयुक्तस्तूणो त्तमावक्षयसायकौच ॥ ३१ ॥ सुनन्दमुख्याउपतस्थुरीशंपार्षदमुख्याः सहलोक पालाः । स्फुरत्किरीटाङ्गदमीनकुण्डलः श्रीवत्सरत्नोत्तममेखलाम्बरैः ॥ ३२ ॥ मधु व्रतस्रग्वनमालयावृतोरराजराजन्भगवानुरुक्रमः क्षितिंपदैकेनबलेर्विचक्रमेनभः श रीरेणदिशश्चबाहुभिः ॥ ३३ ॥ पदंद्वितीयंक्रमतस्त्रिविष्टपंनवैतृतीयायतदीयमण्व पि । उरुक्रमस्याङ्घ्रिरुपर्युपर्यथोमहर्जनाभ्यांतपसः परंगतः ॥ ३४ ॥

इति श्रीमद्भा० म० अष्टम० विश्वरूपदर्शनं नाम विंशतितमोऽध्यायः ॥ २० ॥

॥ श्रीशुक उवाच ॥ सत्यंसमीक्ष्याब्जभवोनखेन्दुभिर्हतस्वधामद्युतिरावृतोऽ भ्यगात् । मरीचिमिश्राऋषयोबृहद्व्रताः सनन्दनाद्यानरदेवयोगिनः ॥ १ ॥ वेदोप वेदानियमान्वितायमास्तर्केतिहासाङ्गपुराणसंहिताः । येचापरेयोगसमीरदीपितज्ञा नाग्निनारन्धितकर्मकल्मषाः । ववन्दिरेयत्स्मरणानुभावतः स्वायंभुवंधामगता अ

अधर में लोभ, ॥ २७ ॥ स्पर्श में काम, शुक्र में जल, पाठ में अधर्म, पादन्यास में यज्ञ, छायामें मृत्यु, हास्यमें माया और रोममें औषधियें देखीं ॥ २८ ॥ तदुपरांत उस वीरने भगवान की नाड़ियों में नदी, नखोंमें शिला, बुद्धिमें ब्रह्मा, प्राणोंमें देवता और ऋषिगण तथा शरीरमें स्थावर जंगम समस्त प्राणियोंको देखा ॥ २९ ॥ हेमहाराज ! असुर, सर्वात्मा भगवान वामनजी की देह में इस त्रिभुवन को देखकर विस्मित होगये । असह्य तेजवाला सुदर्शनचक्र, मेघकी समान गंभीर शब्दवाला शृंग निर्मित धनुष ॥ ३० ॥ पांचजन्य शंख, कौमादकी गदा, विद्याधर नामक शतचंद्र शोभित खड्ग और अक्षयबाण युक्त दो तरकस ॥ ३१ ॥ तथा सुनन्द आदि पार्षद वहांआ उपस्थितहुए । अतुल पराक्रमी हरि—प्रकाशित किरीट बाजूबंद मकराकृत कुण्डल सुन्दरशोभित, श्रीवत्सका चिह्न कौस्तुभमणि, मेखला, वस्त्र ॥ ३२ ॥ और भौरोंसे सेवित वनमाला धारण किये हुए शोभा पानेलगे । भगवानने एक पगसे पृथ्वी शरीरसे आकाश और भुजाओंसे दिशाओंको नापलिया ॥ ३३ ॥ फिर जब द्वितीय पग फैलाया तब स्वर्ग उसके निमित्त कुछ थोड़ासा हुआ परंतु तृतीय पगमें कुछभी शेष न रहा । दूसराही पग क्रमशः जनलोक और तपलोकको नापकर सत्यलोक तक चलागया ॥ ३४ ॥

इतिश्रीमद्भागवते महा० अष्टमस्कन्धेसरलाभाषाटीकायांविंशोऽध्यायः ॥ २० ॥

श्रीशुकदेवजी बोले कि—हेराजन् ! भगवान वामनजीके उस चरणको सत्यलोक में उपस्थित हुआ देख ब्रह्माजी, मरीचि, सनंदनादिकऋषियोंके साथ भगवानके चरणके निकट आये । भगवान के पदनखरूपी चन्द्रमाकी किरण से उनके निजस्थानकी प्रभा फीकी होगई और स्वयंभी आच्छादित होगये ॥ १ ॥ वेद, उपवेद, नियम, यम, तर्क, इतिहास, वेदांग, पुराण और संहिता इन सबोंने वहां आकर विष्णुजी को नमस्कार किया । योगरूप वायुके संयोग से उज्ज्वल ज्ञानाग्नि द्वारा जिन मनुष्यों के कर्मफल भस्म होगये, और जो लोक कर्मों द्वारा नहीं प्राप्तहोता सबकर्म- फिके प्रभाव सेही उन्होने उस ब्रह्मलोक को पाया है वे भी वहां उपस्थित हो हरिकी वन्दना क-

कर्मकम् ॥ २ ॥ अथाङ्घ्रये प्रोन्नमिताय विष्णोरुपाहरत्पद्मभवोऽर्हणोदकम् ॥ समर्च्य भक्त्याऽभ्यगृणाच्छुचिश्रवा यन्नाभिपङ्केरुहसम्भवः स्वयम् ॥ ३ ॥ धातुः कमण्डलु जलंतदुरुक्रमस्य पादावनेजनपवित्रतया नरेन्द्र । स्वर्धुन्यभून्नभसि सा पतती निमार्ष्टि लोकत्रयंभगवतोविशदेवकीर्तिः ॥ ४ ॥ ब्रह्मादयोलोकनाथाः स्वनाथायसमादृताः । सानुगा बलिमाजह्रुः संक्षिप्तात्मविभूतये ॥ ५ ॥ तोयैःसमर्हणैःस्रग्भिर्दिव्यगन्धानुलेपनैः । धूपैर्दीपैः सुरभिभिर्लाजाक्षतफलाङ्कुरैः ॥ ६ ॥ स्तवनैर्जयशब्दैश्च तद्वीर्यमहिमाङ्कितैः । नृत्यवादित्रगीतैश्च शंखदुन्दुभिनिःस्वनैः ॥ ७ ॥ जाम्बवानृक्षराजस्तु भेरीशब्दैर्मनोजवः । विजयंदिक्षुसर्वासु महोत्सवमघोषयत् ॥ ८ ॥ महीं सर्वांहृतांदृष्ट्वा त्रिपदव्याजयाच्ञया । ऊचुःस्वभर्तुरसुरा दीक्षितस्यात्यमर्षिताः ॥ ९ नवायंब्रह्मबन्धुर्विष्णुर्मायाविनांवरः । द्विजरूपप्रतिच्छन्नो देवकार्यंचिकीर्षति ॥ ॥ १० ॥ अनेनयाचमानेन शत्रुणावटुरूपिणा सर्वस्वंनोहृतंभर्तुर्न्यस्तदण्डस्यबर्हिषि ॥ ११ ॥ सत्यव्रतस्यसततं दीक्षितस्यविशेषतः।नानृतंभाषितुंशक्यं ब्रह्मण्यस्य दयावतः ॥ १२ ॥ तस्मादस्यवधोधर्मो भर्तुःशुश्रूषणंचनः । इत्यायुधानिजगृहुर्बलेरनुचराऽसुराः ॥ १३ ॥ तेसर्वेवामनंहन्तुं शूलपट्टिशपाणयः । अनिच्छतोबलेराजन् प्राद्रवञ्जातमन्यवः ॥ १४ ॥ तानभिद्रवतोदृष्ट्वा दितिजानीकपान्नृप । प्रहस्यानुचराविष्णोः प्रत्यषेधन्नुदायुधाः ॥ १५ ॥ नन्दःसुनन्दोऽथजयो विजयःप्रबलोबलः । कुमुदः कुमुदाक्षश्च विष्वक्सेनःपतत्रिराट् ॥ १६ ॥ जयन्तःश्रुतदेवश्च

रनेलगे ॥ २ ॥ तदुपरान्त ब्रह्माजी विष्णु भगवान के उन्नत हुए चरणकमलको धो, पूजाकर उन की भक्तिपूर्वक स्तुति करनेलगे । कमलयोनि ब्रह्माजीने उन्हीं विष्णुजीकी कमलनाभि से जन्मग्रहणकियाथा ॥ ३ ॥ ब्रह्माजीके कमण्डलुका जल, भगवानके चरण धोने के कारण पवित्र होकर स्वर्ग में नदीरूपहो आकाश गंगा के नाम से प्रसिद्ध हुआ । वह जल अवतक भगवान की निर्मल कीर्ति की समान आकाश से गिरकर त्रिभुवनको पवित्रकरता है ॥४॥ क्रमशः विष्णुभगवानने अपना विस्तार छोटाकर फिर पूर्ववत वामनरूप धारण करलिया । तब ब्रह्मा आदि लोकनाथ अपने अनुचरों समेत उपस्थितहो अपने स्वामी वामनरूपी विष्णु भगवानको शीतलजल, सुन्दरमाला, सुगन्धित चन्दन धूप,दीप,नैवेद्य,अक्षत,सुगंधि और फलफूलआदि पूजाकीभेटें अर्पणकर स्तुतिकरने लगे ॥५–६॥ फिरभगवानके पराक्रम और महिमाका वर्णनकर जयशब्द उच्चारण करनेलगे और नानाप्रकारके बाजे बजाय२ नाचने तथा गानेलगे । शंख और दुन्दुभी की ध्वनि होने लगी॥७॥ ऋक्षराज जाम्बवानने भेरीके शब्द से दिशाओं २ में विजय के महोत्सव की डौंडी पीटदी ॥ ८ ॥ तीन पग भूमि लेने के छलसे यज्ञ में दीक्षित राजाबलिकी समस्त सम्पत्ति हरीहुई देख असुरलोग महाक्रोध से कहनेलगे कि ॥ ९ ॥ अरे यह ब्राह्मण नहीं है यह बड़ाभारी मायावी विष्णु है; गुप्त-ब्राह्मणरूपसे देवताओं का कार्य सिद्ध किया चाहता है ॥ १० ॥ इस वैरी ने ब्राह्मण कुमार का रूप धारणकर भिक्षुकहो हमारे स्वामीका कि जिसने यज्ञमें दण्डका त्याग करादिया है सर्वस्व हर लियाहै ॥ ११ ॥ हमारे स्वामी निरन्तरही सत्य बोलते हैं कभी भी मिथ्यानहीं बोलते; यह ब्राह्मणों के हितैषी और दयालुहैं॥१२॥ अतएव इसवामनरूपी शत्रुका मारनाही हमारा धर्महै;इससे स्वामी की सेवाभी आनीजायगी । यह कहकर असुर अनुचरों ने वामनजीके वधके निमित्त शूल पट्टिश आदि अस्त्रशस्त्र उठाये और बलिकी इच्छा न होनेपरभी महाक्रोध से वामनजीकी ओर दौड़े ॥१३ ॥ १४ ॥ उनको दौड़ते हुए आते देख विष्णुजीके अनुचर हँसकर अपने १ अस्त्र उठा उनको निवारण करनेलगे ॥ १५ ॥ किन्तु उनको कुछभी निवृत्त न होते देख, नन्द, सुनन्द, जय, वि-

पुष्पदन्तोऽथ सात्वताः। सर्वे नागायुतप्राणाश्चमूं ते जघ्नुरासुरीम्॥ १७॥ हन्यमाना न्स्वकान्दृष्ट्वा पुरुषानुचरैर्बलिः। वारयामास संरब्धान् काव्यशापमनुस्मरन्॥ १८॥ हेविप्रचित्तेहेराहो हेनेमेश्रूयतांवचः। मायुध्यतनिवर्तध्वं नः कालोऽयमर्थकृत्॥ ॥ १९॥ यःप्रभुःसर्वभूतानां सुखदुःखोपपत्तये। तंनातिवर्तितुंदैत्याः पौरुषैरीश्वरः पुमान्॥ २०॥ योनोभवायप्रागासीदभवायदिवौकसाम्। सएवभगवानद्य वर्तते तद्विपर्ययम्॥ २१॥ बलेनसचिवैर्बुद्ध्या दुर्गैर्मन्त्रौषधादिभिः। सामादिभिरुपा यैश्च कालंनात्येतिवैजनः॥ २२॥ भवद्भिर्निर्जिताह्येते बहुशोऽनुचराहरेः। दैवेन र्द्धास्तएवाद्य युधिजित्वानदन्तिनः॥ २३॥ एतान्वयंविजेष्यामो यदिदैवंप्रसीद ति। तस्मात्कालंप्रतीक्षध्वंयो नोऽर्थत्वायकल्पते॥ २४॥ श्रीशुकउवाच॥ पत्यु र्निगदितंश्रुत्वा दैत्यदानवयूथपाः। रसांनिर्विविशूराजन् विष्णुपार्षदताडिताः॥ ॥ २५॥ अथतार्क्ष्यसुतोज्ञात्वा विराट्प्रभुचिकीर्षितम्। बबन्धवारुणैःपाशैर्बलिंसु त्येऽहनिक्रतौ॥ २६॥ हाहाकारोमहानासीद्रोदस्योःसर्वतोदिशम्। निगृह्यमाणेऽसु रपतौ विष्णुनाप्रभविष्णुना॥ २७॥ तंबद्धंवारुणैःपाशैर्भगवानाहवामनः। नष्टश्रि यंस्थिरप्रज्ञमुदारयशसंनृप॥ २८॥ पदानित्रीणिदत्तानि भूमेर्मह्यंत्वयाऽसुर। द्वा भ्यांक्रान्तामहीसर्वा तृतीयमुपकल्पय॥ २९॥ यावत्तपत्यसौगोभिर्यावदिन्दुःस होडुभिः। यावद्वर्षतिपर्जन्यस्तावतीभूरियंतव॥ ३०॥ पदैकेनमयाक्रान्तो भूर्लो कःखंदिशस्तनोः। स्वर्लोकस्तुद्वितीयेन पश्यतस्तेस्वमात्मना॥ ३१॥ प्रतिश्रुतम

जय, प्रबल, बल, कुमुद, कुमुदाक्ष, विष्वक्सेन, गरुड, ॥ १६॥ जयन्त, श्रुतदेव, पुष्पदन्त आदि सब दशहजार हाथियोंका बल धारणकिये असुरसेनाका संहारकरने लगे, ॥ १७॥ अपनी सेनाकोनष्टहोते देख, बलिने शुक्राचार्यके शापका स्मरणकर क्रोधित दैत्योंको निवारण किया, और कहाकि॥ १८॥ हेविप्रचित्ते! हेराहो! हे नेमि! मेरीबात सुनो—युद्ध न करो, शांत होओ, यह काल इससमय हमारे अनुकूल नहीं है ॥ १९॥ जो सब प्राणियों को सुख दु:खके देनेवाले हैं, पराक्रम द्वाराकोई भी उन पर आक्रमण नहीं करसकता ॥ २०॥ प्रथम जो भगवान हमारे मङ्गलदाता और देवताओंको अ- मंगलदाता हुएथे, वेही इससमय इसके विपरीत कार्यमें प्रवृत्तहुएहैं ॥ २१॥ बल, मंत्री, बुद्धि, दुर्ग, मंत्र, औषधि, अथवा समादि किसी उपायसे भी मनुष्य कालको नहीं जीतसकता २२ ॥ प्रथम तुमने हरिके इन्हीं अनुचरोंको बहुतबार जीताथा, किंतु इससमय यह दैवके प्रभावसे बढ़गयेहैं इसही कारण यह हमको समरमें जीतकर महागर्जन कररहे हैं ॥ २३ ॥ दैव जब हमारे अनुकूल होगा तबहम इन्हें फिर जीत सकेंगे इससे जबतककाल अपने अनुकूलहोवे तबतक उसकाल की राहदेखो ॥ २४ ॥ श्रीशुकदेवजी बोले कि हेराजन्! बलिकी बात सुन दैत्य सेनापति, विष्णुजीके पार्षदों के भयसे रसातलमें प्रवेश करनेको उद्यतहुए ॥ २५ ॥ फिर गरुडजीने हरिके अभिप्रायको जान यज्ञीय सोमलतापानके दिन वरुण पाशसे बलिको बांधलिया ॥ २६ ॥ बलिके बांधतेही आकाश और पृथ्वी सब दिशाओंमें घोर हाहाकार शब्द होनेलगा ॥ २७ ॥ श्रीभगवानने वरुण पाशसे बँधे हुए, श्रीभ्रष्ट, दृढसंकल्प, महाकीर्तिवाले बलिसे कहा कि—॥ २८ ॥ हेअसुरवर! तूनेमुझे तीन पग पृथ्वी दानकीहै, मैंने दोपगोंसे समस्त पृथ्वी नापली तीसरे पगकी भूमि कहा है सोदे ॥ २९ ॥ यह सूर्य जहांतक अपनी किरणोंसे प्रकाश पहुँचताहै, जहांतक चन्द्रमा नक्षत्रोंके साथ प्रकाश फैलता है और जहांतक सब मेघजल बरसाते हैं वहांतक तेरी भूमि है ॥ ३० ॥ मैंने एक पगसे तेरा समस्त भूमण्डल शरीर द्वारा आकाश और दिशाएं तथा दूसरे पगसे तेरे स्वर्गलोक को नापलिया

[illegible]कुरुते निरयेवासकल्पते । [illegible] ॥ ३२ ॥ [illegible] कामनोरथस्तस्य [illegible] स्वर्गः [illegible] । [illegible] ॥ ३३ ॥ विप्रलब्धोददामीति त्वयाहंचाढ्यमानिना । तद्व्यलीकफलंभुङ्क्ष्व निरयंकतिचित्समाः ॥ ३४ ॥

इति श्रीमद्भा० महा० अष्टमस्कन्धे [illegible]ऽध्यायः ॥ २१ ॥

श्रीशुकउवाच ॥ एवंविप्रकृतोराजन् बलिर्भगवताऽसुरः । भिद्यमानोऽप्यभिन्नात्मा प्रत्याहाविक्लवंवचः ॥ १ ॥ बलिरुवाच ॥ यद्युत्तमश्लोक भवान्ममेरितं वचोऽव्यलीकंसुरवर्यमन्यसे । करोम्यृतंतन्नभवेत्प्रलम्भनं पदंतृतीयंकुरुशीर्ष्णिमे निजम् ॥ २ ॥ बिभेमिनाहंनिरयात्पदच्युतो नपाशबन्धाद्व्यसनाद्दुरत्ययात् । नैवार्थकृच्छ्राद्भवतोविनिग्रहादसाधुवादाद्भृशमुद्विजेयथा ॥ ३ ॥ पुंसांश्लाघ्यतमंमन्ये दण्डमर्हत्तमार्पितम् । यंनमातापिताभ्राता सुहृदश्चादिशन्तिहि ॥ ४ ॥ त्वंनूनमसुराणांनः परोक्षःपरमोगुरुः । योनोऽनेकमदान्धानां विभ्रंशंचक्षुरादिशत् ॥ ५ ॥ यस्मिन्वैरानुबन्धेन व्यूढेनविबुधेतराः । बहवोलेभिरेसिद्धिं यामुहैकान्तयोगिनः ॥ ६ ॥ तेनाहंनिगृहीतोऽस्मि भवताभूरिकर्मणा । बद्धश्चवारुणैःपाशैर्नातिव्रीडेनचव्यथे ॥ ७ ॥ पितामहोमेभवदीयसंमतः प्रह्रादआविष्कृतसाधुवादः । भवद्विपक्षेणविचित्रवैशसं संप्रापितस्त्वत्परमःस्वपित्रा ॥ ८ ॥ किमात्मनाऽनेनजहा

है ॥३१॥ इस प्रकार से मैंने तेरा सर्वस्व लेलिया तौभी तू दान दीहुई पृथ्वीको नहीं देसका, अत-एव तेरा नरकमें निवास करना उचितहै । इसकारण गुरु शुक्की आज्ञा लेकर नरक में जा ३२ ॥ जो ब्राह्मणोंसे प्रतिज्ञाकर फिर उनको कहाहुआ दान नहीं देसकता उसकी सब कामनाएं निष्फल होजातीहैं स्वर्गजाना तो उसका दूररहा वरन वह नरकको जाताहै ॥३३॥ तूने अपनेको धनवान जान मुझसे "दूंगा" ऐसाकहा, और अब नहींदेता । अतएव इस ठगाई और मिथ्या वार्त्ताकाफल रूप जो नरकहै उसको कुछ दिनतक भोगकर ॥ ३४ ॥

इतिश्रीमद्भागवतेमहापुराणेअष्टमस्कन्धेसरलाभाषाटीकायांएकविंशोऽध्यायः २१॥

श्रीशुकदेवजी बोले कि–हेराजन् ! भगवान वामनजीने, बलिका इसप्रकारसे अपकार किया कि वह सत्यसे चलायमान होवे परन्तु उसका चित्त विचलित न हुआ । बलिने धैर्ययुक्त यह वचन कहा कि ॥ १ ॥ हे पवित्र कीर्त्ते ! हे देवश्रेष्ठ ! मैंने जो बात कहीहै क्या आप उसे मिथ्या जानते हो मैं उस बातको सत्य करूंगा, वह बात कपटकी नहीं है । आप तीसरे पगको मेरे शिर पर रक्खो ॥ २ ॥ साधूसे झूंठ बोलने में मुझको जितना भयहै उतनाभय नरक, पाशबन्धन दुःख धनका कष्ट व अपने तिरस्कार होनेकाभी नहींहै ॥३॥ महत्पुरुष जो दंड देते हैं वह दण्ड मनुष्यों को अत्यन्त सराहनीय है क्योंकि माता, पिता, भाई, बन्धु और सुहृद ऐसा दण्ड नहीं देसकते ॥ ४ ॥ यद्यपि आप असुरोंके शत्रु स्वरूपसे वर्तमानहो परन्तु यथार्थमें आप हमारेगुरुहो । मैं अत्यंत अभिमानसे अंधा होगयाथा, आपने मेरी मत्तताका नाशकर ज्ञाननेत्र दिये॥५॥योगीराज जिस सिद्धि को प्राप्त करतेहैं, उसी सिद्धिको अनेकों असुर आपसे शत्रुताकरके प्राप्त करते हैं॥६॥इससमय अ-नेकोंकर्म करनेवाले आपने मेरा तिरस्कार किया और वरुण पाशसे बांधा परन्तु इससें मुझ कुछभी लज्जा व दुःख नहींहै क्योंकि हेप्रभो! मुझपरजोदंडहुआहै वहदण्डनहीं किन्तु अनुग्रहहै ॥७॥मैंतुम्हारे इस अपार अनुग्रहके योग्य नहींहूं । आपने अपने परमभक्त और प्यारे प्रह्लादका पौत्र जानकर मुझपर यह अनुग्रह कियाहै मेरे उन पितामह की साधुता प्रकाशित होरही है उनको आपका भक्त जान

तिपोऽन्ततः किं रिक्थहारैः स्वजनाख्यदस्युभिः । किं जायया संसृतिहेतुभूतया म
र्त्यस्य गेहैः किमिहायुषो व्ययः ॥ ९ ॥ इत्थं स निश्चित्य पितामहो महानगाधबोधो भ
वतः पादपद्मम् । ध्रुवं प्रपेदे ह्यकुतोभयं जनाद्भीतः स्वपक्षक्षपणस्य सत्तम ॥ १० ॥
अथाहमप्यात्मरिपोस्तवान्तिकं दैवेन नीतः प्रसभं त्याजितश्रीः । इदं कृतान्तान्तिकव
र्तिजीवितं ययाऽध्रुवं स्तब्धमतिर्न बुध्यते ॥ ११ ॥ श्रीशुकउवाच ॥ तस्येत्थं भाषमा
णस्य प्रह्रादो भगवत्प्रियः । आजगाम कुरुश्रेष्ठ राकापतिरिवोत्थितः ॥ १२ ॥ तमि
न्द्रसेनः स्वपितामहं श्रिया विराजमानं नलिनायतेक्षणम् । प्रांशुं पिशङ्गाम्बरमञ्जनत्वि
षं प्रलम्बबाहुं सुभगर्षभमैक्षत ॥ १३ ॥ तस्मै बलिर्वारुणपाशयन्त्रितः समर्हणं नोपजहार
पूर्ववत् । ननाम मूर्ध्नाऽश्रुविलोललोचनः सव्रीडनीचीनमुखो बभूव ह ॥ १४ ॥ स तत्र
हासीनमुदीक्ष्य सत्पतिं सुनन्दनन्दाद्यनुगैरुपासितम् । उपेत्य भूमौ शिरसा महामना
ननाम मूर्ध्ना पुलकाश्रुविक्लवः ॥ १५ ॥ प्रह्राद उवाच ॥ त्वयैव दत्तं पदमैन्द्रमूर्जितं
हृतं तदेवाद्य तथैव शोभनम् । मन्ये महानस्य कृतो ह्यनुग्रहो विभ्रंशितो यच्छ्रिय आत्म-
मोहनात् ॥ १६ ॥ यया हि विद्वानपि मुह्यते यतस्तत्को विचष्टे गतिमात्मनो यथा । त
स्मै नमस्ते जगदीश्वराय वै नारायणायाखिललोकसाक्षिणे ॥ १७ ॥ श्रीशुकउवाच ॥

उनके पिता व आपके शत्रु हिरण्यकशिपुने उन्हें नानाप्रकारसे दुःख दिया तौभी उन्होंने यही विचारा कि— ॥ ८ ॥ देहसे क्या अभिप्रायहै ? आयुके शेष होजानेपर देह आपनेको अवश्यही छोड़जायगी स्वजनोंको लेकर क्याकरूं ? उनका नाम तो स्वजनहै परन्तु यथार्थ में वे ठग हैं वे धनका हरण करते रहतेहैं । स्त्रीही को लेकर क्या करें, ? स्त्री तो संसारका कारणहै । घरहीसे क्या प्रयोजन ! घरमें रहनेसे तो केवल आयुका क्षय होताहै॥९॥और पितामह अगाध बुद्धि प्रह्लाद ने इसहीप्रकारसे विचार करके आपके चरणोंमें शरणलीथी । यद्यपि आप उनके आत्मीयजनों के संहार कारकथे तौभी वे स्वजनोंसे भयभीतहो आपहीकी शरणमें गये, ॥ १० ॥ हे प्रभो ! आप के उन चरणों का आश्रय लेनेसे फिर कोई पतित व भ्रष्ट नहींहोता, और कहींसे उसको भयभी नहीं रहता आप निश्चयही मेरे शत्रुहो परन्तु दैवने हठात् मेरी सम्पत्ति का हरणकर मुझको आप के निकट उपस्थित किया । इससे मेरा मंगलही हुआ क्योंकि धनसे जड़ बुद्धिहुए पुरुष कालके समीपवर्ती इस जीवनको अनिश्चित नहीं जानते ॥११॥श्रीशुकदेवजीबोले कि—हे कुरुश्रेष्ठ ! बलि इस प्रकार कहरहाथा कि उसी समय वहांपर प्रह्लादजी आये । उनके आतेही ऐसाजान पड़ा कि मानो पृथ्वीपर पूर्णचन्द्र उदयहुआ है॥१२॥कमलकी समान विशालनेत्र, पीताम्बर धारणकिये, श्यामवर्ण, लम्बाशरीर और लम्बीभुजावाले व सौभाग्यशाली मनुष्यों में श्रेष्ठ श्री युक्त अपने पितामह प्रह्लादको इन्द्रके अहङ्कार नाशी राजाबलिने देखा ॥ १३ ॥ किन्तु पाशमें बँधे होने के कारण प्रथमकी समान पूजा न करसका केवल मस्तक झुकाकर प्रणाम करलिया ॥ उसके दोनों नेत्रों में अश्रु आगये और वह नीचे को शिर करके रहगया ॥ १४ ॥ साधुओंके पतिहरि बलि के निकट बैठेहुए हैं सुनन्द और नन्दआदि पार्षद उनकी सेवा कररहे हैं यह देखकर उदारचित्त प्रह्लाद ने मनमें विचाराकि पौत्रपर भगवानका अनुग्रह हुआ है । प्रह्लाद यह जानकर पुलकित होगये और भगवानके निकट जा नेत्रों के जल से व्याकुलहो पृथ्वी पर मस्तक झुकाय प्रणामकर कहनेलगे कि ॥ १५ ॥ हे भगवन् ! आपनेही बलिको सम्पत्ति युक्त इन्द्र पद दियाथा, इससमय आपने उसका हरणकरलिया । ज्ञात होता है कि आपने इसे श्रीरहितकर इसपर विशेष कृपा की है श्री—आत्मविस्मृति उत्पन्न करती है ॥ १६ ॥ जिसश्री से विद्वान और संयमी मनुष्य मोहित होजाते हैं, उस श्रीके रहते हुये कौनमनुष्य भलीप्रकार से आत्मतत्वको जानसकता है ? आ-

तस्यानुशृण्वतोराजन् प्रह्लादस्यकृताञ्जलेः। हिरण्यगर्भोभगवानुवाचमधुसूदनम् ॥ १८ ॥ बद्धंवीक्ष्यपतिंसाध्वी तत्पत्नीभयविह्वला। प्राञ्जलिःप्रणतोपेन्द्रं बभाषेऽवाङ्मुखीनृप ॥ १९ ॥ विन्ध्यावलिरुवाच ॥ क्रीडार्थमात्मनइदंत्रिजगत्कृतं तेस्वाम्यंतुतत्रकुधियोऽपरईशकुर्युः । कर्तुःप्रभोस्तवकिमस्यतआवहन्ति त्यक्तह्रियस्त्वदवरोपितकर्तृवादः ॥ २० ॥ ब्रह्मोवाच ॥ भूतभावनभूतेश देवदेवजगन्मय। मुञ्चैनंहृतसर्वस्वं नायमर्हतिनिग्रहम् ॥ २१ ॥ कृत्स्नातेऽनेनदत्ता भूर्लोकाःकर्मार्जिताश्चये । निवेदितंचसर्वस्व मात्माऽविक्लवयाधिया ॥ २२ ॥ यत्पादयोरशठधीः सलिलंप्रदाय दूर्वाङ्कुरैरपिविधायसतींसपर्याम्। अप्युत्तमांगतिमसौभजतेत्रिलो कीं दाश्वानविक्लवमनाःकथमार्तिमृच्छेत् ॥ २३ ॥ श्रीभगवानुवाच ॥ ब्रह्मन्यमनु गृह्णामि तद्विशोविधुनोम्यहम् । यन्मदःपुरुषःस्तब्धो लोकंमांचावमन्यते ॥२४॥ यदाकदाचिज्जीवात्मा संसरन्निजकर्मभिः । नानायोनिष्वनीशोऽयं पौरुषींगति माव्रजेत् ॥ २५ ॥ जन्मकर्मवयोरूपविद्यैश्वर्यधनादिभिः । यद्यस्यनभवेत्स्तम्भस्त त्रायंमदनुग्रहः ॥ २६ ॥ मानस्तम्भनिमित्तानां जन्मादीनांसमन्ततः । सर्वश्रेयःप्र तीपानां हन्तमुह्येन्नमत्परः ॥ २७ ॥ एषदानवदैत्यानामग्रणीःकीर्तिवर्धनः । अजै षीदजयांमायां सीदन्नपिनमुह्यति ॥ २८ ॥ क्षीणरिक्थश्च्युतःस्थानात् क्षिप्तोबद्ध

पने इसपर दयाप्रकाशकी है । आपजगदीश्वर नारायण, सर्वलोक के साक्षी हो आपको नमस्कार है ॥ १७ ॥ श्रीशुकदेवजी बोले कि—हे राजन् ! ब्रह्माजी हाथजोड़े खड़े हुए महात्मा प्रह्लाद के सामने कुछ भगवानसे कहना चाहते थे इतनेहीमें देखा कि बलिकी स्त्री विन्ध्यावली भी भगवानसे कुछ निवेदन करने आई है, अतएव उसके सम्मानार्थ ब्रह्माजीकुछ कालके निमित्त चुप होगये॥१८॥साध्वी विन्ध्यावली पति को पाशसे बँधाहुआ देख भयभीतहो वामनजीको प्रणामकर और हाथजोड़नीचे को मुखकरके कहनेलगी कि ॥१९॥ हे ईश्वर ! आपने अपनी क्रीड़ाके निमित्त इस त्रिलोकी की रचनाकी है; आपके अतिरिक्त जो अपनेहीको कर्त्ता जानते हैं वे मूढ हैं।आपही इस जगतके उत्पन्न करने वाले, पालनेवाले व संहारनेवालेहो । और दूसरेपुरुषों को "हमस्वतंत्रहैं" ऐसी बात करने का अधिकार भी आपहीने दिया है अतएव मनुष्य आपको क्या देने की इच्छा करें ? क्या उनको लज्जानहीं है ? ॥२०॥ ब्रह्माजी बोले कि हे भूतनाथ ! हे देवदेव ! हे जगन्मय ! आपने बलिका सर्वस्व हरलियाहै अब इसको छोड़दो । बलि अपमान योग्य नहींहै ॥ २१ ॥ बलि ने अकातर चित्तसे आपको सब पृथ्वी दानकरदी, सब कर्मभी कि जिनसे उसने लोकोंको पाया था, आपहीके अर्पण करदिये सर्वस्व देनेके अनन्तर जो शरीररहगया वहभी आपहीको देदिया॥ ॥ २२ ॥ जिन आपके चरणोंमें निष्कपट होकर जो केवल जलमात्र अर्पण करे और केवल दूबके अंकुरसे आपकी पूजाकरे तो वहभी श्रेष्ठगतिको प्राप्त होताहै फिर—इस मनुष्यने तो दृढ़ता पूर्वक त्रिलोकी का राज्य देदिया तो फिर क्या यह दुःख भोगे ? इसको छोड़दो ॥ २३ ॥ श्रीभगवान् बोले कि हेब्रह्मन् ! मैं जिसपर दया करताहूं उसके धनको हर लेताहूं धनसे मत्तता उत्पन्न होती है; और मत्तता होतेही मनुष्य लोकका और मेरा निरादर करतेहैं ॥ २४ ॥ जीवात्मा अपने कर्म के कारण पराधीनहो क्रम कीटादि नाना योनियोंमें भ्रमणकर अन्तमें जब नर योनिमें प्राप्त होता है ॥ २५ ॥ तब यदि जन्म, कर्म, रूप, विद्या, ऐश्वर्य और धनादिसे गर्वित न होवे तब जानना चाहिये कि इसपर मेरी दयाहै ॥ २६ ॥ जन्मादिही अभिमान रूप अनम्रताके कारण और येही समस्त मंगलोंके प्रतिकूलहैं । मेरा भक्त इन सब बातोंसे मोहित नहीं होता ॥ २७ ॥ इस दैत्य कुलमें सर्व श्रेष्ठ और कीर्तिवर्धक राजा बलिने अजयामायाको जीतलिया कष्ट पाकरके भी बलि

क्षिप्तोबद्धश्चशत्रुभिः। ज्ञातिभिश्चपरित्यक्तो यातनामनुयापितः ॥ २९ ॥ गुरुणाभर्त्सितःश प्तोजहौसत्यंनसुव्रतः । छलैरुक्तोमयाधर्मो नायंत्यजतिसत्यवाक् ॥ ३० ॥ एषमे प्रापितःस्थानं दुष्प्रापममरैरपि । सावर्णेरन्तरस्यायं भवितेन्द्रोमदाश्रयः ॥ ३१ ॥ तावत्सुतलमध्यास्तां विश्वकर्मविनिर्मितम् । यन्नाधयोव्याधयश्च क्लमस्तन्द्रापराभवः । नोपसर्गानिवसतां संभवन्तिममेक्षया ॥ ३२ ॥ इन्द्रसेनमहाराज याहिभो भद्रमस्तुते । सुतलंस्वर्गिभिःप्रार्थ्यं ज्ञातिभिःपरिवारितः ॥ ३३ ॥ नत्वामभिभवि ष्यन्ति लोकेशाःकिमुतापरे । त्वच्छासनातिगान्दैत्यांश्चक्रमेसूदयिष्यति ॥ ३४ ॥ रक्षिष्येसर्वतोऽहंत्वां सानुगंसपरिच्छदम् । सदासन्निहितंवीर तत्रमांद्रक्ष्यतेभवान् ॥ ३५ ॥ तत्रदानवदैत्यानां सङ्गात्तेभावआसुरः । दृष्ट्वामदनुभावंवै सद्यःकुण्ठो विनङ्क्ष्यति ॥ ३६ ॥

इतिश्री भ० महा० अष्टमस्कंधे बलिवामनसम्वादोनामद्वाविंशोऽध्यायः ॥२२॥

श्रीशुक उवाच इत्युक्तवन्तंपुरुषपुरातनंमहानुभावोऽखिलसाधुसंमतः । ब द्धाञ्जलिर्बाष्पकलाकुलेक्षणो भक्त्युत्कलो गद्गदयागिराऽब्रवीत् ॥ १ ॥ बलिरु वाच ॥ अहोप्रणामायकृतः समुद्यमः प्रपन्नभक्तार्थविधौसमाहितः । यल्लोकपालै स्त्वदनुग्रहोऽमरैरलब्धपूर्वोऽपसदेऽसुरेऽर्पितः ॥ २॥ श्रीशुक उवाच ॥ इत्युक्त्वा हरिमानम्यब्रह्माणंसभवंततः । विवेशसुतलंप्रीतोबलिर्मुक्तः सहासुरैः ॥ ३ ॥ एव

मोहित न हुआ ॥ २८ ॥ द्रव्यगया, पदसे गिराया गया शत्रुओंके हाथमे बांधागया, जातिवालोंने छोड़दिया दुःखपाया ॥ २९ ॥ गुरुने तिरस्कार किया, शापदिया तौभी इस सत्यव्रत बलिने सत्य-धर्मको न छोडा । मैंने कपट पूर्वक इसके धर्मको डिगाया परतु यह अपने धर्ममे दृढ़रहा ॥ ३० ॥ अतएव मैंने इसको देवताओं को भी जो दुर्लभहै सो पददिया यह बलि सावर्णि मन्वन्तरमे इन्द्र होगा ॥ ३१ ॥ जबतक वह मन्वन्तर न आवे तबतक यह विश्वकर्माके बनायेहुये सुतललोकमें वासकरे। वहांपर मेरीदृष्टि रहनेसे आधि,व्याधि,क्लम तन्द्रा,पराभव और भौतिक उत्पात होनेकीवहां सम्भावना नहींहै ।३२ । तदुपरांत हरिने बलिसे कहा कि तुम अपने जातिवालोंको साथले सुतललोक को,कि जिसकी अभिलाषा देवतातक करतेहैं जाओ तुम्हारा कल्याण होवे ॥ ३३ ॥ अधिक क्या लोक पाल भी तुम्हें परास्त न करसकेंगे । जो दैत्य तुम्हारी आज्ञा न मानेंगे उनका शिर मेरे चक्र से काटा जावेगा ॥ ३४ ॥ मैं तेरे सब अनुचरोंको और घरकी सामग्रीकी भलीप्रकारसे रक्षाकरूं गा । हेवीर ! मैं सत्य कहताहूं तुम देखोगे कि मै सदा तेरे द्वारापर उपस्थित रहूंगा ॥ ३५ ॥ दानव और दैत्योंके साथ रहनेके कारण जो तुम्हारा यह आसुरी स्वभाव उत्पन्नहुआहै वह सब स्वभाव मुझे देख २ कर मेरे प्रभावसे नाश होजायगा ॥ ३६ ॥

इतिश्री मद्भा० महापुराणे अष्टमस्कन्धे सरलाभाषाटीकायांद्वाविंशोऽध्यायः ॥ २२ ॥

श्री शुकदेवजी बोले कि—हेराजन् ! पुराणपुरुष भगवानके इस प्रकार से कहनेपर साधुओंके प्रशंसनीय महानुभाव बलि, भक्तिवशसे व्यग्रहो हाथजोड़, आनन्दाश्रु बहातेहुए गद्गदवाणी से भगवानसे कहने लगे ॥ १ ॥ राजाबलिने कहाकि—अहो ! प्रणाम करने के निमित्त जो उद्यम कियाजाता है केवलवही उद्यम आपके भक्तों का कार्य सिद्ध करता है । आपकी जो दया प्रथम लोकपाल व देवताओं को भी नहीं प्राप्त हुई थी वह दया केवल प्रणाम करने सही मुझ नीच अ-सुर को प्राप्त हुई है ॥ २ ॥ श्री शुकदेवजीबोले कि—बंधनसे छूटाहुआ राजाबलि यहकह ब्रह्मा, महेश और विष्णुजी को प्रणामकर आनन्दितहो असुरों को साथ ले सुतललोकको गया ॥ ३ ॥

मिन्द्रायभगवान्प्रत्यानीयत्रिविष्टपम्। पूरयित्वाऽदितेः काममशासत्सकलं जगत् ॥ ४ ॥ लब्धप्रसादंनिर्मुक्तंपौत्रंवंशधरंबलिम् । निशाम्यभक्तिप्रवणः प्रह्लादइदमब्रवीत् ॥ ५ ॥ प्रह्लाद उवाच ॥ नेमंविरिञ्चोलभतेप्रसादंनश्रीर्नशर्वः किमुतापरेते । यन्नोऽसुराणामसिदुर्गपालोविश्वाभिवन्द्यैरभिवन्दिताङ्घ्रिः ॥ ६ ॥ यत्पादपद्ममकरन्दनिषेवणेनब्रह्मादयःशरणदाश्नुवतेविभूतीः । कस्माद्वयंकुसृतयः खलयोनयस्ते दाक्षिण्यदृष्टिपदवींभवतः प्रणीताः ॥ ७ ॥ चित्रंतवेहितमहोऽमितयोगमायालीलाविसृष्टभुवनस्यविशारदस्य । सर्वात्मनः समदृशोऽविषमः स्वभावोभक्तप्रियोयदसिकल्पतरुस्वभावः ॥ ८ ॥ श्रीभगवानुवाच ॥ वत्सप्रह्लादभद्रंतेप्रयाहिसुतलालयम् । मोदमानः स्वपौत्रेणज्ञातीनांसुखमावह ॥ ९ ॥ नित्यंद्रष्टासिमांतत्रगदापाणिमवस्थितम्।मद्दर्शनमहाह्लादध्वस्तकर्मनिबन्धन ।१०। श्रीशुक उवाच। आज्ञांभगवतो राजन्प्रह्लादोबलिनासह । बाढमित्यमलप्रज्ञो मूर्ध्न्याधायकृताञ्जलिः ॥ ११ ॥ परिक्रम्यादिपुरुषं सर्वासुरचमूपतिः । प्रणतस्तदनुज्ञातः प्रविवेशमहाबिलम् ॥१२॥ अथाहोशनसं राजन्हरिर्नारायणोऽन्तिके। आसीनमृत्विजांमध्ये सदसिब्रह्मवादिनाम् ॥ १३ ॥ ब्रह्मन्सन्तनुशिष्यस्य कर्मच्छिद्रंवितन्वतः । यत्तत्कर्मसुवैषम्यं ब्रह्मदृष्टंसमंभवेत् ॥ १४ ॥ शुकउवाच । कुतस्तत्कर्मवैषम्यं यस्यकर्मेश्वरोभवान् । यज्ञेशोयज्ञपुरुषः सर्वभावेनपूजितः ॥ १५ ॥ मन्त्रतस्तन्त्रतश्छिद्रं देशकालार्हवस्तुतः

श्रीभगवान इसप्रकारसे इन्द्रको स्वर्गका राज्यदे, अदितिकी कामना पूर्णकर त्रिभुवनका पालन करनेलगे ॥ ४ ॥ बलिवर प्राप्तकर बन्धन से छूटगया यह देख भक्त चूणामणि प्रह्लाद ने कहा ॥ ॥ ५ ॥ कि हे मधुसूदन ! यह जगत जिनको प्रणाम करता है वे ब्रह्मादिक देवताभी आपको प्रणाम करते हैं वह आप जगत के वन्दनीय होकरभी असुरों के गढके रक्षकहुए । दूसरे की बात दूररही यह वर क्या ब्रह्मा, क्या लक्ष्मी और क्या महेश्वर किसीने भी नहीं पाया ॥ ६ ॥ हेभक्तवत्सल ! ब्रह्माआदि जिनके चरणकमलों के मधुका पानकर विभूतिओं का भोगकरते हैं उनआपकी कृपाकटाक्ष हमारे ऊपर कैसे हुई क्योंकि हमतो दुराचारी और क्रूरयोनि से उत्पन्न हुए हैं ॥ ॥ ७ ॥ आप सर्वज्ञ हो, आपही अपरिमय योगमायाकी लीलाद्वारा जगतको उत्पन्न करतेहो अतएव आप सब के आत्मा और समदर्शीहो । कल्पवृक्षकी समान आप सबकीहा इच्छा पूर्ण करते हो । तौभी आप भक्तोंके पक्षपातीहो आपका यह विषमस्वभाव अत्यन्तविचित्र है॥८॥श्रीभगवान बोले कि—हेवत्स ! हेप्रह्लाद ! तुम सुतललोकको जाओ तुम्हारा कल्याण होवे । अपने पौत्रके साथ आनन्दसे समय व्यतीतकर जातिवालोंको सुखदो ॥९॥ देखोगे कि मैं सुतलमें गदा हाथमें लिये बैठाहूं । मुझको देखकर जो आनन्द होगा उससे तुम्हारा अज्ञान दग्ध होजावेगा ॥ १० ॥ श्रीशुकदेवजी बोले कि—हेराजन् ! समस्त असुरोंके सेनापति निर्मल बुद्धिवाले प्रह्लादने बलिके साथ हाथजोड जोड" जो आज्ञा,, कह भगवान की आज्ञा स्वीकारकी । और परिक्रमा व प्रणाम कर सुतललोकको गये । ११—१२ । हेराजन् ! उससमय शुक्राचार्य ब्रह्मवेत्ताओंकी सभामें पुरोहितोंके बीच भगवानके निकट बैठथे । बलिके पाताल जानेपर भगवानने शुक्राचार्यसे कहा कि— ॥ १३ ॥ हेब्रह्मन् ! यज्ञ करनेवाले शिष्यके यज्ञमें कुछ न्यूनता रहीहो आप उसे पूरीकरो कर्ममें जो कुछ न्यूनता रहजाय,व० ब्राह्मणोंहीकी दृष्टिसे परिपूर्ण होजाती है ॥ १४॥ शुक्राचार्यजीने कहा कि हेभगवन् आप यज्ञेश्वर यज्ञपुरुष और ईश्वरहो । जिसनेआपको समस्तसामग्री देकर आपकी पूजाकीहै उसके कर्ममें न्यूनता कैसे रहसकतीहै ॥ १५ ॥ मन्त्र, तन्त्र, देशकाल, पात्र व दक्षिणा

सर्वंकरोति निश्छिद्रं नामसंकीर्तनंतव ॥ १६ ॥ तथाऽपिवदतो भूमन्करिष्याम्यनुशासनम् । एतच्छ्रेयःपरंपुंसां यत्तवाज्ञाऽनुपालनम् ॥ १७ ॥ श्रीशुकउवाच । अभिनन्द्य हरेराज्ञामुशना भगवानिति । यज्ञच्छिद्रंसमाधत्त बलेर्विप्रर्षिभिःसह ॥ १८ ॥ एवंबलेर्महीं राजन्भिक्षित्वा वामनोहरिः । ददौभ्रात्रेमहेन्द्राय त्रिदिवंयत्परैर्हृतम् १९ प्रजापतिपतिर्ब्रह्मा देवर्षिपितृभूमिपैः । दक्षभृग्वङ्गिरोमुख्यैः कुमारेणभवेनच ॥२०॥ कश्यपस्यादितेः प्रीत्यै सर्वभूतभवायच । लोकानां लोकपालानामकरोद्वामनं पतिम् ॥ २१ ॥ वेदानांसर्वदेवानां धर्मस्ययशसः श्रियः । मङ्गलानांव्रतानांच कल्पंस्वर्गापवर्गयोः ॥ २२ ॥ उपेन्द्रंकल्पयांचक्रे पतिंसर्वविभूतये । तदासर्वाणिभूतानि भृशंमुमुदिरेनृप ॥ २३ ॥ ततस्त्विन्द्रःपुरस्कृत्य देवयानेनवामनम् । लोकपालैर्दिवंनिन्ये ब्रह्मणाचानुमोदितः ॥२४ ॥ प्राप्यत्रिभुवनंचेन्द्र उपेन्द्रभुजपालितः । श्रिया परमयाजुष्टो मुमुदेगतसाध्वसः ॥ २५ ॥ ब्रह्माशर्वः कुमारश्च भृग्वाद्यामुनयोनृप । पितरः सर्वभूतानि सिद्धावैमानिकाश्चये ॥ २६ ॥ सुमहत्कर्म तद्विष्णोर्गायन्तः परमाद्भुतम् । धिष्ण्यानिस्वानिते जग्मुरदितिंचशशंसिरे ॥ २७ ॥ सर्वमेतन्मयाख्यातंभवतःकुलनन्दन । उरुक्रमस्यचरितं श्रोतॄणामघमोचनम् ॥ २८ ॥ पारंमहिम्नउरुविक्रमतोगृणानो यः पार्थिवानिविममेसरजांसिमर्त्यः । किंजायमानउतजातउपैतिमर्त्यः इत्याहमन्त्रदृगृषिः पुरुषस्ययस्य ॥ २९ ॥ यइदंदेवदेवस्य हरेरद्भुतकर्मणः । अ

आदिमें जो कुछ न्यूनता रहजातीहै वह आपके गुणोंके कीर्तनसे परिपूर्ण होजातीहै॥१६ ॥ तोभी हेभूमन् ! आप जो आज्ञा करतेहो उसका मैं पालन करूंगा । आपकी आज्ञाका पालन करनाही मनुष्योंका परममङ्गलहै ॥ १७ ॥ श्रीशुकदेवजी बोले कि हेराजन् ! शुक्राचार्यने भगवानकी आज्ञा मान, बलिके यज्ञकी जो न्यूनता रहीथी, विप्रर्षियोंके साथ उस न्यूनताको पूर्ण किया ॥ १८ ॥ हे-महाराज ! वामनरूपी हरिने बलिसे इसप्रकार पृथ्वीले अपने भ्राता इन्द्रको अर्पणकी ॥ १९ ॥ फिर प्रजापतियोंके पति ब्रह्मा, महादेव, देवता, ऋषि, पितर, मनुष्य, और दक्ष, भृगु, अंगिरा आदि प्रजापति तथा सनत्कुमार सबहो एकचित्तहो कश्यप और अदिति के आनन्ददन तथा सब प्राणियोंके कल्याणके निमित्त वामनजीको लोक और लोकपालोंका अधिपति बनाया ॥२०॥ २१ ॥ समस्त प्राणियों की समृद्धि बढानेके निमित्त पालन करनेमें चतुर वामनजीको वेद, देवता, धर्म, कीर्ति, लक्ष्मी, मंगल, व्रत तथा स्वर्ग व मोक्षके पालन कार्य में नियुक्त किया । हेराजन् ! उससमय समस्त प्राणी अत्यन्त प्रसन्न हुए । २२—२३ ॥ फिर इन्द्र ब्रह्माजीकी अनुमतिले लोकपालों युक्त विमानमें बैठ वामनजी को आगेकर स्वर्गमें लगये ॥ २४ ॥ इन्द्र, त्रिभुवन प्राप्तकर वामनजीकी भुजाओंके बलसे रक्षित होनेलगे, वह श्रेष्ठ समृद्धिके स्वामीहो निर्भयतासे आनन्दका अनुभव करनेलगे ॥ २५ ॥ हेराजन् ! ब्रह्मा शिव सनत्कुमार, भृगु आदि मुनिगण, पितर, सिद्ध और वैमानिक गण आदि समस्त प्राणी ॥ २६ ॥ भगवानके अद्भुत चरित्रका गान करते २ अपने २ स्थानको गये और अदितिकी प्रशंसा करनेलगे, ॥ २७ ॥ हेकुलनन्दन ! मैने तुमसे भगवान के समस्त चरित्रोंका वर्णन किया इसके सुननेसे सुननेवालों के पाप नष्ट होजातेहै २८ ॥ जो मनुष्य पराक्रमशाली परमेश्वरकी समस्त महिमा के वर्णन करनेकी इच्छा करताहै वह मानो पृथ्वीके रजकण गिनना चाहताहै । मंत्र और मन्त्र वेत्ता मनुष्योंने कहाहै कि जन्मेहुए मनुष्योंमें से भगवानकी महिमा को कोई नहीं जानसकता २९ ॥ जो मनुष्य अद्भुत कर्मवाले भगवानके इन

वतारानुचरितं शृण्वन्यातिपरांगतिम् ॥ ३० ॥ क्रियमाणेकर्मणीदं दैवेपित्र्येऽथ-मानुषे । यत्रयत्रानुकीर्त्येत तत्तेषां सुकृतं विदुः ॥ ३१ ॥

इति श्रीमद्भा० म० अष्टमस्कंधे वामनावतारचरिते त्रयोविंशतितमोऽध्यायः ॥ २३ ॥

राजोवाच । भगवञ्छ्रोतुमिच्छामि हरेरद्भुतकर्मणः । अवतारकथामाद्यां मायामत्स्यविडम्बनम् ॥ १ ॥ यदर्थमदधाद्रूपं मात्स्यंलोकजुगुप्सितम् । तमःप्रकृतिदुर्मर्षं कर्मग्रस्तइवेश्वरः ॥२॥ एतन्नोभगवन्सर्वं यथावद्वक्तुमर्हसि । उत्तमश्लोकचरितं सर्वलोकसुखावहम् ॥ ३ ॥ सूतउवाच॥ इत्युक्तोविष्णुरातेन भगवान्बादरायणिः । उवाच चरितं विष्णोर्मत्स्यरूपेण यत्कृतम् ॥ ४ ॥ श्रीशुकउवाच । गोविप्रसुरसाधूनां छन्दसामपिचेश्वरः । रक्षामिच्छंस्तनूर्धत्ते धर्मस्यार्थस्यचैवहि ॥ ५ ॥ उच्चावचेषुभूतेषु चरन्वायुरिवेश्वरः । नोच्चावचत्वंभजते निर्गुणत्वाद्धियोगुणैः ॥ ६ ॥ आसीदतीतकल्पान्ते ब्राह्मोनैमित्तिकोलयः । समुद्रोपप्लुतास्तत्र लोकाभूरादयोनृप ॥ ७ ॥ कालेनागतनिद्रस्य धातुःशिशयिषोर्बली । मुखतोनिःसृतान्वेदान्हयग्रीवोऽन्तिकेऽहरत् ॥ ८ ॥ ज्ञात्वातद्दानवेन्द्रस्य हयग्रीवस्यचेष्टितम् । दधारसफरीरूपं भगवान्हरिरीश्वरः॥९॥तत्रराजऋषिःकश्चिन्नाम्ना सत्यव्रतोमहान् । नारायणपरोऽतप्यत् तपःससलिलाशनः ॥ १० ॥ योऽसावस्मिन्महाकल्पे तनयःसविवस्वतः श्राद्धदेवइतिख्यातो मनुत्वेहरिणाऽर्पितः ॥ ११ ॥ एकदाकृतमालायां कुर्वतोजलतर्पणम् । तस्यांजल्युदकेकाचिच्छफर्येकाऽभ्यपद्यत ॥ १२ ॥ सत्यव्रतोऽञ्जलिगतांसहतोयेनभारत । उत्ससर्जनदीतोये शफरींद्रविडेश्वरः ॥ १३ ॥ तमाहसाऽति

चरित्रोंको सुनेगा वह श्रेष्ठगतिको प्राप्त होवेगा ॥ ३० ॥ देवता पितर अथवा मानुषिक कर्म करने के समय यदि इन चरित्रोंका कीर्तन किया जाय तो सब कर्म भलीप्रकारसे सिद्धहोवें ॥ ३१ ॥

इतिश्रीमद्भागवतेमहापुराणेअष्टमऽस्कन्धेसरलाभाषाटीकायांत्रयोविंशोऽध्यायः ॥ २३ ॥

राजा परीक्षितने कहाकि-हे ब्रह्मन् ! अद्भुत कर्मा भगवान ने माया से जोप्रथम मत्स्यावतार की लीला की है उस लीला के सुनने की मेरी इच्छा है ॥ १ ॥ मत्स्यरूप जगत में निंदित, तमोगुण रूप और असह्य है फिर भगवान ने कर्म ग्रस्तजीव के समान किस कारण उस मत्स्यरूपको धारण कियाथा ॥ २ ॥ आप उसका यथार्थ वर्णन करें । पवित्र कीर्ति भगवान के चरित्र सबही मनुष्यों को सुखदेते हैं ॥ ३ ॥ सूतजी बोलेकि-विष्णुभक्त राजा परीक्षित के इस प्रकार से कहने पर भगवान मत्स्य रूपने जो २ किया था, शुकदेव जी उन सबका वर्णन करने लगे ॥ ४ ॥ श्री शुकदेव जी बोलेकि--हे राजन् ! गौ, ब्राह्मण, देवता, साधू, धर्म और अर्थ कीरक्षा करने केनिमित्त भगवान समय २ पर अवतार ग्रहण किया करत हैं ॥ ५ ॥ वे बुद्धिके गुणों से वायुकी समान ऊंच और नीच प्राणियों में भ्रमण करत हैं परन्तु वे स्वयं निर्गुण हैं इससे वे ऊंच नीच नहीं होते ॥ ६ ॥ हे राजन् ! बीतेहुए कल्पके अंतमें ब्रह्माजी के निद्राआने रूपसे नैमित्तिक प्रलय हुआ उसमें भूरादि समस्तलोक समुद्रमें डूबगये ॥ ७ ॥ कालवश विधाता के निद्रित होनपर सबवेद उनके मुखसे बाहरहो निकट गिरपड़े, हयग्रीव दैत्य उन सब वेदोंको हरलेगया ॥ ८ ॥ भगवान विष्णु जीने हयग्रीव क उस कर्मको जानकर तत्काल मत्स्यरूप धारण किया ॥ ९ ॥ उस समय सत्यव्रत नामक कोई एक नारायण परायण राजर्षि जलमें बैठाहुआ तपस्या कररहाथा ॥ १० ॥ वही सत्यव्रत इस कल्पमें विवस्वान(सूर्य)का पुत्रश्राद्ध देव नामसे विख्यात हुआ और भगवानने इसको मनुकी पदवी दी ॥ ११ ॥ सत्यव्रत एक दिन कृतमाला नदीमें जलसे तर्पण कररहाथा कि इतने हीमें उसकी अंजलि के जलमें एक मछली चलीआई ॥ १२ ॥ हे भरत नंदन ! द्राविडेश्वर सत्यव्रतने उस अंजली में आईहुई मछली को जलहीमें डालदिया ॥ १३ ॥ तब मछली ने उस परम

कृपणं महाकारुणिकंनृपम् । यादोभ्योज्ञातिघातिभ्यो दीनांमांदीनवत्सल । कथं विसृजसेराजन् भीतामस्मिन्सरिज्जले ॥ १४ ॥ तमात्मनोऽनुग्रहार्थं प्रीत्यामत्स्य वपुर्धरम् । अजानन्रक्षणार्थाय शफर्याःसमनोदधे ॥ १५ ॥ तस्यादीनतरंवाक्य मा श्रुत्यसमहीपतिः । कलशाप्सुनिधायैनां दयालुर्निन्यआश्रमम् ॥ १६ ॥ सातुतत्रै कराघेण वर्धमानाकमण्डलौ । अलब्ध्वात्मावकाशंवा इदमाहमहीपतिम् ॥ १७ ॥ नाहंकमण्डलावस्मिन् कृच्छ्रंवस्तुमिहोत्सहे । कल्पयौकःसुविपुलं यत्राहंनिवसे सुखम् ॥ १८ ॥ सएनांततआदाय न्यधादौदंचनोदके । तत्रक्षिप्तामुहूर्त्तेन हस्तत्र यमवर्धत ॥ १९ ॥ नमएतदलंराजन् सुखंवस्तुमुदञ्चनम् । पृथुदेहिपदंमह्यं यत्त्वा ऽहंशरणंगता ॥ २० ॥ ततआदायसाराज्ञा क्षिप्ताराजन्सरोवरे । तदावृत्यात्मना सोयं महामीनोऽन्ववर्धत ॥ २१ ॥ नैतन्मेस्वस्तयेराजन् नुदकंसलिलौकसः । निधेहिरक्षायोगेन ह्रदेमामविदासिनी ॥ २२ ॥ इत्युक्तःसोऽनयन्मत्स्यं तत्रतत्राविदा सिनि । जलाशयेऽसंमितंतं समुद्रेप्राक्षिपज्झषम् ॥ २३ ॥ क्षिप्यमाणस्तमाहेद मिहमांमकरादयः । अदन्त्यतिबलावीर मांनेहोत्स्रष्टुमर्हसि ॥ २४ ॥ एवंविमोहित स्तेन वदतावल्गुभारतीम् । तमाहकोभवानस्मान् मत्स्यरूपेणमोहयन् ॥ २५ ॥ नैवंवीर्योजलचरो दृष्टोऽस्माभिःश्रुतोऽपिच । योभवान्योजनशतमह्नाऽभिव्यानशेस रः ॥ २६ ॥ नूनंत्वंभगवान्साक्षाद्धरिर्नारायणोऽव्ययः । अनुग्रहायभूतानां धत्से रूपजलौकसाम् ॥२७॥ नमस्तेपुरुषश्रेष्ठस्थित्युत्पत्त्यप्ययेश्वर । भक्तानांनःप्रपन्ना

दयालु राजासे करुणायुक्त होकर कहाकि—हे दीनवत्सल! मैं दुर्बल हूं मैं अपनी जातिके घातकी मत्स्य और ग्राह आदिकों से भयपाती हू आप मुझेक्यों त्यागतेहो ॥ १४ ॥ हे राजन्! सत्यव्रत पर कृपा प्रकाश करने के निमित्तही नारायण ने मत्स्य देह धारण कीथी; किंतु सत्यव्रत इसे नहीं जानताथा तोभी राजाने अनुग्रह करके उस मछली की रक्षाकरने का विचार किया ॥ १५ ॥ दयालुराजा उसके अतिदीन वचनोंको सुन कमंडलु के जलमें रख उसको अपने स्थानको लाया ॥१६॥ मछली एक रात्रिमेंही उस कमंडलु में बढ़उठी और अपने रहनेका स्थान उसमें न देख राजास बोली कि ॥ १७ ॥ हेराजन्! मैं इस कमंडलु में सुखसे बास नहीं करसकता। जहांपर मैं सुखसे बासकरसकूं वह स्थान मेरे निमित्त नियतकरो ॥ १८ ॥ राजाने उसको कलश में से निकालकर मटके के जलमें रक्खा। वह वहांभी एक मुहूर्त में तीनहाथ बढगई तबफिर कहने लगी ॥१९॥ कि हे राजन्! मैं इस मटके के जलमें भी सुखसे नहीं रहसकती अतएव मुझको कोई बड़ा स्थानदो, क्योंकि मैं आपके शरणागत हूं ॥ २० ॥ हे राजन्! उस महीपति सत्यव्रतने उसे मटकेसे निकाल सरोवर में रक्खा तब उस सरोवर के जलकोभी ढककर वह एक बड़ाभारी मत्स्य बनगई, और कहाकि ॥ २१ ॥ हे राजन्! हमजल निवासी हैं परन्तु इस सरोवर के जलसे मैं तृप्त नहीं होता। आपने मेरीरक्षा करने का भारलिया है; अतएव जहां जलका शेष न होवे उस कुंडमें मुझेलेचलो ॥ २२ ॥ मछली की इस बातको सुनकर राजा सत्य व्रतने उसेले एक २ करके समस्त अक्षय जलोंके जलाशयों में डाला परन्तु वह एक २ करके समस्तही जलाशयों में बढ़गया। अतमें राजा उस मत्स्यको सागर के जलमें डालनेको लेगया ॥ २३ ॥ ज्योंही राजा मत्स्यको डालने लगा त्योंही मत्स्यने कहाकि—हे वीर! अधिक बलवाले जलचर यहांमुझे खाजायेंगे; अतएव इस सागर के जलमें आपमुझे न डालो ॥ २४ ॥ मधुरभाषी मत्स्यकी बातोंसे मोहितहो राजा सत्य व्रतने उससे कहाकि—आप कौनहो जोमत्स्य रूपसे मुझे मोहित कररहेहो ॥ २५ ॥ मैंनेतो ऐसा पराक्रमी जलचर न देखा न सुना, आप एकही दिनमें सौ योजन तालावमें फैलगये ॥ २६ ॥ आप निश्चयही साक्षात् भगवान हरिहो, प्राणियों के कल्याण करने केनिमित्तही आपने जलचर रूप धारण किया है

नां मुख्योह्यात्मगतिर्विभो ॥ २८ ॥ सर्वेलीलाऽवतारास्ते भूतानांभूतिहेतवः । ज्ञा तुमिच्छाम्यदोरूपं यदर्थंभवताधृतम् ॥२९॥ नतेऽरविन्दाक्षपदोपसर्पणं मृषाभवेत् सर्वसुहृत्प्रियात्मनः । यथेतरेषांपृथगात्मनांसतामदीदृशोयद्वपुरद्भुतंहिनः ॥ ३० ॥ श्रीशुकउवाच ॥ इतिब्रुवाणंनृपतिंजगत्पतिः सत्यव्रतंमत्स्यवपुर्युगक्षये । विहर्तुकामः प्रलयार्णवेऽब्रवीच्चिकीर्षुरेकान्तजनप्रियःप्रियम् ॥ ३१ ॥ श्रीभगवानुवाच ॥ सप्तमेऽद्यतनादूर्ध्वं मह्न्येतदरिन्दम । निमंक्ष्यत्यप्ययाम्भोधौ त्रैलोक्यंभूर्भुवादिकम् ॥ ३२ ॥ त्रिलोक्यांलीयमानायां संवर्ताम्भसिवैतदा । उपस्थास्यतिनौःकाचिद्विशालात्वांमयेरिता ॥ ३३ ॥ त्वंतावदोषधीःसर्वा बीजान्युच्चावचानिच । सप्तर्षिभिःपरिवृतः सर्वसत्त्वोपबृंहितः ॥ ३४ ॥ आरुह्यबृहतींनावं विचरिष्यस्यविक्लवः । एकार्णवेनिरालोके ऋषीणामेववर्चसा ॥ ३५ ॥ दोधूयमानांतांनावं समीरेणबलीयसा । उपस्थितस्यमेशृंगे निबध्नीहिमहाहिना ॥ ३६ ॥ अहंत्वामृषिभिःसाकं सहनावमुदन्वति । विकर्षन्विचरिष्यामि यावद्ब्राह्मीनिशाप्रभो ॥३७॥ मदीयंमहिमानंच परंब्रह्मेतिशब्दितम् । वेत्स्यस्यनुगृहीतमे संप्रश्नैर्विवृतंहृदि ३८॥ इत्थमादिश्यराजानं हरिरन्तरधीयत । सोऽन्ववैक्षततंकालं यंहृषीकेशआदिशत् ॥ ३९ ॥ आस्तीर्यदर्भान्प्राक्कूलान्राजर्षिःप्रागुदङ्मुखः । निषसादहरेःपादौ चिन्तयन्मत्स्यरूपिणः ॥ ४० ॥ ततःसमुद्रउद्वेलः सर्वतःप्लावयन्महीम् । वर्धमानो

॥ २७ ॥ हे पुरुष श्रेष्ठ ! आपको नमस्कार है ! हे विभो ! आप जगतकी उत्पत्ति, स्थिति और प्रलयके करने वालेहो; और हमारी समान विपद में फंसेहुए भक्तों के मुख्य आत्मा और आश्रय हो ॥ २८ ॥ आप क्रीड़ा के निमित्त जो २ अवतार धारण करते हो वे समस्तही प्राणियों के कल्याण के देनेवाले हैं जिसकारणसे यह आपने मत्स्यरूप धारण किया है उसके जानने की मेरी इच्छा है ॥ २९ ॥ हे पद्मपलाशलोचन ! आप सबके बन्धु और प्रियआत्माहो; अहंकारी देहधारी के जो दूसरेजनों की चरणसेवा करते हैं और वह निष्फल जाती है वैसे आपके चरणों की सेवा निष्फल नहीं जाती । आपने यह अद्भुत देह दिखाकर मुझे विस्मितकर दिया है ॥ ३० ॥ शुकदेवजी बोले कि—हेराजन् ! राजा सत्यव्रत के इस प्रकार से पूछनेपर, युगके अन्त में प्रलयसागर में क्रीडा करने के निमित्त मत्स्यरूपधारी भक्तों के प्रिय जगदीश्वर ने उससे अपने अभिप्रायको प्रकट किया ॥ ३१ ॥ श्रीभगवान बोले कि—हे शत्रुतापन ! आज से सातवें दिन यह समस्त त्रिलोकी जलमें डूब जायगी ॥ ३२ ॥ मैं उसी समय एक नौका भेजूंगा; वह बृहत् नौका तुम्हारे समीप आवेगी ॥ ३३ ॥ तुम समस्त औषधियां, छोटे और बडे बीज तथा समस्त प्राणियों को ले सप्तर्षियों समेत उस बड़ी नौका में चढकर ऋषियों के ब्रह्मतेज के बलसे उस अंधियारे प्रलय सागर में विचरते रहना ॥ ३४—३५ ॥ जब प्रचण्ड वायु वेग से नौका डिगमगावेगी उस समय मैं उपस्थित हूंगा । तुम महासर्प वासुकि द्वारा उसनौकाको मेरे सींगमें बांध देना ॥ ३६ ॥ मैं ऋषियों और तुम्हारे साथ नौका को खींचकर ब्रह्माजी की सम्पूर्ण रात्रितक समुद्र में विचरण करूंगा ॥ ३७ ॥ " परब्रह्म " इस नाम से मेरी महिमा है उसके विषय में तू मुझसे प्रश्न करेगा उसका मैं उत्तर दूंगा कि जिससे मेरी महिमा तेरे हृदय में व्याप्तहोजायगी ॥३८॥ राजा से इस प्रकार कह भगवान अन्तर्धान होगये । नारायण जितने दिनकी आज्ञाकर गये थे राजा सत्यव्रत उन दिनों की राह देखने लगा ॥ ३९ ॥ वह कुशका अग्रभागपूर्वकी ओर कर उसपर बैठ मत्स्यरूपीभगवान हरिके चरणकमलों का चिंतवन करनेलगा ॥ ४० ॥ तदुपरान्त उसने देखा कि—

महामेघैर्वर्षद्भिः समन्ततः ॥ ४१ ॥ ध्यायन्भगवदादेशं ददृशेनावमागताम् । तामारुरोह विप्रेन्द्रैरादायौषधिवीरुधः ॥ ४२ ॥ तमूचुर्मुनयःप्रीता राजन्ध्यायस्वकेशवम् । सवैनःसंकटादस्मादविता शंविधास्यति ॥ ४३ ॥ सोऽनुध्यातस्ततोराज्ञा प्रादुरासीन्महार्णवे । एकशृङ्गधरोमत्स्यो हैमोनियुतयोजनः ॥ ४४ ॥ निबध्यनावं तच्छृङ्गे यथोक्तोहरिणापुरा । वरत्रेणाहिनातुष्टस्तुष्टाव मधुसूदनम् ॥४५॥ राजोवाच । अनाद्यविद्योपहतात्मसंविदस्तन्मूलसंसारपरिश्रमातुराः । यदृच्छयेहोपसृतायमाप्नुयुर्विमुक्तिदोनःपरमोगुरुर्भवान् ॥ ४६ ॥ जनोऽबुधोऽयंनिजकर्मबन्धनः सुखेच्छयाकर्मसमीहतेऽसुखम् । यत्सेवयातांविधुनोत्यसन्मतिं ग्रन्थिसभिन्द्याद्धृदयंसनोगुरुः ॥४७॥ यत्सेवयाऽग्नेरिवरुद्ररोदन पुमान्विजह्यान्मलमात्मनस्तमः । भजेतवर्णंनिजमेषसोऽव्ययो भूयात्सईशःपरमोगुरोर्गुरुः ॥ ४८ ॥ नयत्प्रसादायुतभागलेश मन्येचदेवागुरवोजनाःस्वयम् । कर्तुंसमेताःप्रभवन्तिपुंसस्तमीश्वरंत्वांशरणंप्रपद्ये ॥ ४९ ॥ अचक्षुरन्धस्ययथाग्रणीः कृतस्तथाजनस्याविदुषोऽबुधोगुरुः त्वमर्कदृक्सर्वदृशांसमीक्षणो वृतोगुरुर्नःस्वगतिंबुभुत्सताम् ॥ ५० ॥ जनोजनस्यादिशतेऽसतींमतिं ययाप्रपद्येतदुरत्ययंतमः । त्वंत्वव्ययंज्ञानममोघमंजसा प्रपद्यतेयेनजनोनिजपदम् ॥ ५१ ॥ त्वंसर्वलोकस्यसुहृत्प्रियेश्वरो ह्यात्मागुरुर्ज्ञानमभी

मेघों के निरन्तर बरसने से समुद्र तीरपरकी भूमि को छोड़कर पृथ्वीको चारोंओर से डुबोनेलगा है ॥ ४१ ॥ भगवान ने जो कुछ कहाथा सत्यव्रत ने वही चिन्ता करते २ देखा कि एकनाव उस के निकट आ उपस्थित हुई । राजा समस्त औषधि और लताके बीजों समेत उस नौकापर बैठा ॥ ४२ ॥ मुनियों ने प्रसन्नहोकर कहा कि—हेराजन्! भगवानकी चिन्ताकरो वही हमारे इस संकटको दूर करेंगे,और हमारे कल्याणका साधन करेंगे ॥ ४३ ॥ फिर राजाके ध्यान करनेपर, महासागरके बीचमें एक शृङ्गधारी दशसहस्रयोजन के विस्तारवाला सुवर्णका मत्स्य प्रगटहुआ ॥ ॥ ४४ ॥ राजाने सन्तुष्ट होकर नारायणकी आज्ञानुसार उस मत्स्यके शृंग में वासुकि रूपरज्जू द्वारा नौका बांधदी और भगवान की स्तुति करने लगा ॥ ४५ ॥ राजाने कहा कि—अनादिकाल की अविद्या से जिनका आत्मज्ञान ढकाहुआहै और अविद्या मूलकसंसार परिश्रममेंभी कातरहै उसी इससंसार में जिसको जिनकी कृपाप्राप्त होती है वे साक्षात् मुक्ति देनेवाले आप परमगुरु होकर मेरे हृदयकी ग्रन्थिका छेदनकरो ॥४६॥यह मूर्ख मनुष्य अपने पूर्वजन्मके कर्मों में बँधकर सुखकी अभिलाषा से बड़े २ दुःख भुगतकर कर्म करते रहते हैं उस सुखकी कामनारूप दुर्बुद्धि जिनकी सेवा से दूरहोजाती है वेही भगवान आप मेरे परमगुरु होकर मेरी मोह ग्रन्थिका छेदनकरो ॥४७॥ सोना और रूपा जैसे अग्निके स्पर्शसे मलत्यागकर अपने वर्णको प्राप्त करते हैं उसीप्रकार जिस की सेवा करनेसे मनुष्य आत्माके मल स्वरूप अज्ञानको छोड़कर स्वस्वरूप को प्राप्त होताहै, वेही भगवान आप हमारे गुरुहो, क्योंकि आप गुरुओंकेभी परमगुरुहो, ॥ ४८ ॥ अन्यान्य देवता, और गुरुजन सब एकत्रित होकर मनुष्यको जिनके वरके दशसहस्रवें भागका लेशमात्रभी नहीं देसकते, आप वही ईश्वरहो आपकी मैं शरणहूं ॥ ४९ ॥ अंधेको मार्ग दिखानेवाले अंधेकी समान मूर्खको मूर्ख गुरु मिलनेसे उसे कष्ट होताहै । किन्तु आपका ज्ञान सूर्यके प्रकाशकी समान स्वतःहीं प्रकाशमानहै अतएव आप समस्त इन्द्रियोंके प्रकाशकहो मुझे आत्म गतिके जाननेकी इच्छाहै अतएव मैं आपको गुरु करताहूं ॥ ५० मनुष्य मनुष्यको जो उपदेश देताहै वह दूषितहै क्योंकि-शिष्य उससे अंधकारहीमें प्रवेश करताहै किंतु आप अक्षय ज्ञानका उपदेश करतेहो मनुष्य उस ज्ञानसे निश्चयही निजपद को प्राप्त होता है ॥ ५१ ॥ आप सबमनुष्योंके मित्र, प्रिय, आत्मा

ष्टसिद्धिः । तथापिलोकोनभवन्तमन्धधीर्जानातिसन्तंहृदिबद्धकामः ॥ ५२ ॥ तं त्वामहंदेववरंवरेण्यं प्रपद्यईशंप्रतिबोधनाय । छिन्ध्यर्थदीपैर्भगवन्वचोभिर्ग्रन्थीन् हृदय्यान्विवृणुस्वमोकः ॥ ५३ ॥ श्रीशुकउवाच ॥ इत्युक्तवन्तंनृपतिं भगवानादिपूरुषः । मत्स्यरूपीमहाम्भोधौ विहरंस्तत्त्वमब्रवीत् ॥ ५४ ॥ पुराणसंहितांदिव्यां सांख्ययोगक्रियावतीम् । सत्यव्रतस्यराजर्षे रात्मगुह्यमशेषतः ॥ ५५ ॥ अश्रौषीदृषिभिःसाक मात्मतत्त्वमसंशयम् । नाव्यासीनोभगवता प्रोक्तंब्रह्मसनातनम्॥५६ अतीतप्रलयापाय उत्थितायसवेधसे । हत्वासुरंहयग्रीवं वेदान्प्रत्याहरद्धरिः॥५७॥ सतुसत्यव्रतोराजा ज्ञानविज्ञानसंयुतः । विष्णोःप्रसादात्कल्पेऽस्मिन्नासीद्वैवस्वतोमनुः ॥ ५८ ॥ सत्यव्रतस्यराजर्षेर्मायामत्स्यस्यशार्ङ्गिणः । संवादंमहदाख्यानं श्रुत्वामुच्येतकिल्बिषात् ॥ ५९ ॥ अवतारोहरेर्योऽयं कीर्तयेदन्वहंनरः । संकल्पास्तस्यसिध्यन्ति सयातिपरमांगतिम् ॥ ६० ॥ प्रलयपयसिधातुःसुप्तशक्तेर्मुखेभ्यः श्रुतिगणमपनीतंप्रत्युपादत्तहत्वा । दितिजमकथयद्योब्रह्मसत्यव्रतानां तमहमखिलहेतुंजिह्ममीनंनतोऽस्मि ॥ ६१ ॥

इतिश्रीमद्भागवते महापुराणेऽष्टादशसाहस्र्यां संहितायामष्टमस्कन्धे
मत्स्यावतारचरितानुवर्णनंनामचतुर्विंशोऽध्यायः ॥ २४ ॥
अष्टमस्कन्धोयं समाप्तः ॥

ईश्वर, गुरू, ज्ञान और अभीष्ट सिद्धिके देनेवालेहो, आप हृदयमें बास करतेहो परन्तु अन्ध बुद्धि और तृष्णासे बंधाहुआ यह लोक आपको नहीं जानता ॥ ५२ ॥ मैं ज्ञान प्राप्ति के निमित्तही श्रेष्ठ देवता ईश्वर आपकी शरण आयाहूं । हेभगवन् ! परमार्थ प्रकाशक वाक्य द्वारा हृदयमें उत्पन्नहुई अहंकारादि ग्रन्थियों का छेदन करके निजरूपको प्रकाशित करो ॥ ५३ ॥ श्रीशुकदेवजी बोले कि राजर्षिके ऐसे कहनेपर भगवान महासागरके जलमें मत्स्यरूपसे विहार करते २ उन्हें तत्वका उपदेश देनेलगे ॥ ५४ ॥ उन्होंने सांख्य योग और क्रियायुक्त दिव्य मत्स्य पुराण संहिता, तथा व्याख्या और आत्मज्ञानका भी नानाप्रकारसे उपदेश किया ५५ ॥ राजाने ऋषियों समेत नौका पर बैठ भगवान के मुखसे संशयहीन आत्मतत्व और सनातन वेदको सुना ॥ ५६ ॥ फिर बीते हुएप्रलयके अन्तमें ब्रह्माजीके उठनेपर दानवारि हरिने हयग्रीवको मार उससे वेद लेलिये॥५७॥वह राजा सत्यव्रत विष्णुजीकी कृपासे ज्ञान विज्ञान युक्तहो इस कल्पमें वैवस्वत मनु हुआहै ॥ ५८ ॥ जो मनुष्य राजा सत्यव्रत और मत्स्यरूपी भगवानका चरित्र सुनेंगे वह समस्त पापोंसे मुक्त हो जावेंगे ॥ ५९ ॥ जो मनुष्य प्रतिदिन भगवानके इस अवतार का कीर्त्तन करेगा उसके समस्त मनोरथ सिद्ध होंगे और वह अन्तमें परमगतिको प्राप्त होगा, ॥ ६० ॥ ब्रह्माजीकी शक्ति निद्रित होनेपर प्रलयकाल में जिस दानवने उनके मुखसे वेद हरेथे उस दानव को जिसने मार वेदों का उद्धारकर सत्यव्रत और ऋषियोंको सनातन वेदका उपदेश कियाथा; मैं उन्हीं अखिल कारण माया मत्स्यरूपी भगवान को नमस्कार करताहूं ॥ ६१ ॥

इति श्रीमद्भागवतेमहापुराणेअष्टमस्कन्धेश्रीमदनवद्यविद्वद्वरसारस्वतकुलोद्भवपण्डितजगन्नाथतनूज पं०कन्हैयालालशर्मानिर्मितायांसरलाभाषाटीकायांचतुर्विंशोऽध्यायः ॥ २४ ॥
अष्टमस्कंधोयं समाप्तः ॥

श्रीमद्भागवत भाषाटीका सहित.

नवमस्कन्ध.

ऽतपयज्जटिलं स्थण्डिलेशयम्। भरतः प्राप्तमाकर्ण्य पौरामात्यपुरोहितैः ॥ ३५॥ पादुके शिरसिन्यस्य राममप्रत्युद्यतोऽग्रजम्। नन्दिग्रामात्स्वशिबिरात् गीतवादित्र निःस्वनैः॥ ३६ ॥ ब्रह्मघोषेण च मुहुः पठद्भिर्ब्रह्मवादिभिः। स्वर्णकक्षपताकाभिर्हैमैश्चित्रध्वजैरथैः॥ ३७ ॥ सदश्वैस्स्वमसन्नाहैर्भटैः पुरटवर्मभिः। श्रेणीभिर्वारमुख्याभिर्भृत्यश्चैवपदानुगैः ॥ ३८ ॥ पारमेष्ठ्यान्युपादाय पण्यान्युच्चावचानिच। पादयोन्यपतत्प्रेम्णा प्रक्लिन्नहृदयेक्षणः ३९॥ पादुके न्यस्य पुरतः प्राञ्जलिर्बाष्पलोचनः। तमाश्लिष्य चिरं दोर्भ्यां स्नापयन्नेत्रजैर्जलैः ॥४०॥ रामो लक्ष्मणसीताभ्यां विप्रेभ्यो येऽर्हसत्तमाः तेभ्यः स्वयं नमश्चक्रे प्रजाभिश्च नमस्कृतः ॥ ४१ ॥ धुन्वन्त उत्तरासङ्गान्पतिं वीक्ष्य चिरागतम्। उत्तराः कोशला माल्यैः किरन्तो ननृतुर्मुदा ॥ ४२ ॥ पादुके भरतोऽगृह्णाच्चामरव्यजनोत्तमे। विभीषणः ससुग्रीवः श्वेतच्छत्रं मरुत्सुत ॥ ४३ ॥ धनुर्निषङ्गाञ्छत्रुघ्नः सीता तीर्थकमण्डलुम्। अबिभ्रदङ्गदः खड्गं हैमं चर्मर्क्षराण्नृप ॥४४॥ पुष्पकस्थोऽन्वितः स्त्रीभिः स्तूयमानश्च वन्दिभिः। विरेजे भगवान्राजन्ग्रहैश्चन्द्र इवोदितः ॥४५॥ भ्रातृभिर्नन्दितः सोऽपि सोत्सवां प्राविशत्पुरीम्। प्रविश्य राजभवनं गुरुपत्नीः स्वमातरम् ॥ ४६॥ गुरून्वयस्यावरजान्पूजितः प्रत्यपूजयत्। वैदेही लक्ष्मणश्चैव यथावत्समुपेयतुः ॥४७॥ पुत्रान्स्वमातरस्तास्तु प्राणांस्तन्व इवोत्थिता। आरो

यवका भक्षण करता है ॥ ३४ ॥ इसकारण महाकारुणिक रामचन्द्रजी भरत के निमित्त महासन्ताप करनेलगे। भरत रामचन्द्रजी की खड़ाऊओं को मस्तकपर रख नगरनिवासी, मन्त्री और पुरोहितोंके साथ बड़े भाई की अगमानी के लिये अपने स्थान नन्दिग्राम से गाते बजाते बाहर निकले ॥ ३५—३६ ॥ और ब्रह्मवेत्ता मुनिगण उच्चस्वरस वेदगानकरते २ चले। सुनहली पताकाएं, स्वर्णमय विचित्र ध्वजाओं से भूषित उत्तम घोड़ोंयुक्त और सुवर्ण की सामग्रीवालेरथ सुवर्ण के अस्त्र व वस्त्र धारणकिये योद्धागण, वेश्याये और बहुत से सेवक उनके संग २ चले। महात्मा भरत—राजाओं के योग्य छत्र, चामरादि और नानाप्रकार के बहुमूल्य रत्नादि लेकर चले और रामचन्द्रजी के सन्मुख पहुंचतेही समस्त पदार्थ उनके अर्पणकर आप उनके चरणोंमें गिरपड़े प्रेमाश्रुकीधारा से भरतका हृदय और नेत्र द्रवीभूत होगये ॥ ३७—३९ ॥ पहिले तो उन्होंने हाथजोड़ दोनों पादुकाएं उनके सन्मुख रखदीं फिर आंखो में आंसूभर नेत्रों के जलसे स्नान करातेहुए बड़ी देरतक बाहुद्वारा आलिंगन कियेरहे ॥ ४० ॥ इसके उपरात रामचन्द्र लक्ष्मण और सीताने ब्राह्मणों और कुलवृद्ध मनुष्यो को नमस्कार किया। तदुपरान्त प्रजाने उनको नमस्कार किया ॥ ४१ ॥ उत्तर कोशलके समस्त निवासी बहुत दिनो में अपने राजाको आया देख आनन्दसागरमे मग्नहोगये और अपने उत्तरीयवस्त्रों को कम्पाय २ फूलोंकीमाला बरसाय २ आनन्द से नृत्य करनलगे ॥ ४२ ॥ भरतने दोनों पादुका, विभीषण और सुग्रीव ने चमर, हनुमानजीने श्वेतछत्र और सीताजीने तीर्थ के जल से भराहुआ कमण्डलु धारणकिया। हेनृप! शत्रुघ्न धनुष और तूण, अंगद खड्ग और ऋक्षराज जाम्बवान स्वर्णमय तलवार लेकर संगर चले ॥४३॥ ॥ ४४ ॥ उस समय देवांगनाएं पुष्पकपर बैठेहुए रामचन्द्रजी की प्रशंसा और स्तुति करनेलगीं उसकाल तारों के बीच उदयहुए चन्द्रमाकी समान उनकी शोभा होरहीथी ॥ ४५ ॥ इसके पश्चात् भ्राता से सन्मानितहो रामचन्द्रजीने प्रसन्नतापूर्वक पुरी में प्रवेश किया। रामचन्द्रजी ने राजभवन में प्रवेश करके माता, सौतेलीमाता, और दूसरी गुरुजी, मित्र तथा अपने से छोटे सबका यथायोग्य सत्कार व पूजा आदिकी। उनसबलोगोंनभी यथायोग्य पूजन सम्भाषण और आशीर्वाद किया। पश्चात् सीताजी और लक्ष्मणजी भी इन सबसे यथायोग्य मिले ॥४६—४७ ॥ प्राणपाने

स्याहेऽभिविशन्त्योवाष्पौघैर्विजहुःशुचः ॥४८॥ जटानिर्मुच्यविधिवत्कुलवृद्धैःसमं गुरुः । अभ्यषिञ्चद्यथैवेन्द्रंचतुःसिन्धुजलादिभिः ॥ ४९ ॥ एवंकृतशिरःस्नानःसुवासाःस्रग्व्यलंकृतः । स्वलंकृतैःसुवासोभिर्भ्रातृभिर्भार्ययाबभौ॥५० ॥अग्रहीदासनंभ्रात्राप्रणिपत्यप्रसादितः । प्रजाःस्वधर्मनिरतावर्णाश्रमगुणान्विताः ॥ जुगोपपितृवद्रामोमेनिरेपितरंचतम् ॥ ५१ ॥ त्रेतायांवर्तमानायांकालःकृतसमोऽभवत् । रामेराजनिधर्मज्ञेसर्वभूतसुखावहे ॥५२ ॥ वनानिनद्योगिरयोवर्षाणिद्वीपसिन्धवः। सर्वेकामदुघाआसन्प्रजानांभरतर्षभ ।५३।नाधिव्याधिजराग्लानिदुःखशोकभयक्लमाः। मृत्युश्चानिच्छतांनासीद्रामेराजन्यधोक्षजे॥५४॥एकपत्नीव्रतधरोराजर्षिचरितःशुचिः । स्वधर्मंगृहमेधीयंशिक्षयन्स्वयमाचरन् ॥ ५५ ॥ प्रेम्णानुवृत्त्याशीलेनप्रश्रयावनतासती । धियाह्रियाचभावज्ञाभर्तुःसीताहरन्मनः ॥ ५६ ॥

इतिश्रीमद्भा०म०नवम०श्रीरामचरितेदशमोऽध्यायः ॥ १० ॥

श्रीशुकउवाच ॥ भगवानात्मनात्मानं रामउत्तमकल्पकैः । सर्वदेवमयंदेवमीजआचार्यवान्मखैः ॥१॥ होत्रेऽददाद्दिशंप्राचीं ब्रह्मणेदक्षिणांप्रभुः । अध्वर्यवेप्रतीचींचउदीचीं सामगायसः ॥ २ ॥ आचार्यायददौशेषां यावतीभूस्तदन्तरा । मन्यमानइदं कृत्स्नं ब्राह्मणोऽर्हतिनिःस्पृहः ॥ ३ ॥ इत्ययं तदलंकारवासोभ्यामवशेषितः । तथाराज्ञ्यपिवैदेही सौमंगल्यावशेषिता ॥ ४ ॥ तेतुब्रह्मण्यदेवस्य वात्सल्यंवीक्ष्य

से जैसे देह उठखड़ी होती है वैसेही अपने २ पुत्रों को पातेही माताए सहसा उठखडी हुई और उनको गोदमें ले आनन्दाश्रु बहातेहुए अपने२ शोक सन्ताप को त्यागकिया ॥४८॥ अनन्तर वशिष्ठ मुनिने रामचन्द्रजीकी जटाए खुलवाय, कुलवृद्ध मनुष्योंके सायमिल चार सागरोंके जलद्वारा इन्द्रकी समान उनका अभिषेक किया ॥४९॥ रामचन्द्रजीने इसप्रकार शिरसे स्नानकर सुन्दरवस्त्र पहिने । फिर माला औरअलंकारोंसे अलंकृतहो वस्त्र आभूषणोंसविभूषित भाइयों और स्त्रियोंके साथ विराजमानहुए ॥ ५० ॥ तदनन्तर भरत ने प्रणाम करके प्रसन्नकिया तब रामचन्द्र राज्यासनपर बैठे और स्वधर्म निरत तथा वर्णाश्रम के गुणोंयुक्त प्रजाका पितृवत् पालन करनेलगे ॥ ५१ ॥ प्रजागणभी उन्हें पिताकी समान जानने लगे । सर्व प्राणियों को सुख देने वाले धर्मज्ञ रामचन्द्रजी के राजाहोनेपर त्रेतायुगभी सत्ययुगकी समान होगया ॥ ५२ ॥ हे भरतर्षभ ! समुद्र, नद, नदी, गिरि, वन, द्वीप, वर्ष सबही प्रजाओं को इच्छित फलदेते थे ॥५३ ॥ अधोक्षज रामचन्द्रजी के राज्यकाल में आधि, व्याधि, जरा, शोक, दुःख, भय, ग्लानि अथवा क्लान्ति कुछभी न रही ॥५४॥ इच्छा न करनेपर मृत्यु किसीपर आक्रमण न करसकतीथी।रामचन्द्रजी पवित्र और एकपत्नीव्रतके धारणकरनेवाले हो राजर्षियों के धर्मका आचरण करतेहुए गृहस्थियोंको धर्मका उपदेश देते स्वयं उसका आचरण करनेलगे ॥५५॥ अभिप्राय को जाननेवाली श्रीसीताजी विनययुक्तहो प्रेम, सेवा, शीलता, भय और लज्जा द्वारा उनके चित्तको हरण करती थीं ॥ ५६ ॥

इतिश्री मद्भा० म० नवम० सरलाभाषाटीकायां दशमोऽध्यायः ॥ १० ॥

श्रीशुकदेवजी बोले कि हे राजन् ! तदनंतर भगवान रामचन्द्रजी आचार्य युक्त हो उत्तमोत्तम याग(यज्ञ)कर सर्वदेवमय परमदेव अपनीही पूजा में तत्परहुए॥१॥ यज्ञके अंत में होताको पूर्वदिशा ब्रह्माको दक्षिण दिशा, अध्वर्यु को पश्चिम दिशा और उद्गाताको उत्तर दिशा दानकी ॥ २ ॥ उन दिशाओं के बीचमें जितनी भूमिथी वह सब ब्राह्मणोंही के पाने योग्य विचार निःस्पृह हो आचार्य को देदी इसप्रकार से रामचन्द्रजी के केवल वस्त्र और आभूषण शेष रहगए राजरानी जानकीजी केभी केवल आभूषण शेष रहगए ॥ ३—४ ॥ परन्तु ब्रह्मण्यदेव श्रीरामचन्द्रजीकी ऐसी वात्सल्य

संस्तुतम् । प्रीताःक्लिन्नधियस्तस्मै प्रत्यर्प्येदंबभाषिरे ॥ ५ ॥ अप्रत्तनस्त्वयाकिन्नु भगवन्भुवनेश्वर । यन्नोऽन्तर्हृदयंविश्य तमोहंसिस्वरोचिषा ॥ ६ ॥ नमोब्रह्मण्यदेवाय रामायाकुण्ठमेधसे । उत्तमश्लोकधुर्याय न्यस्तदण्डार्पिताङ्घ्रये ॥ ७ ॥ कदाचिल्लोकजिज्ञासुर्गूढोराध्यामलक्षितः । चरन्वाचोऽशृणोद्रामो भार्यामुद्दिश्यकस्यचित् ॥ ८ ॥ नाहंबिभर्मित्वां दुष्टामसतीं परवेश्मगाम् । स्त्रीलोभीबिभृयात्सीतां रामोनाहंभजेपुनः ॥९॥ इतिलोकाद्बहुमुखाद्दुराराध्यादसंविदः । पत्याभीतेनसा त्यक्ता प्राप्ताप्राचेतसाश्रमम् ॥ १० ॥ अन्तर्वत्न्यागतेकाले यमौसासुषुवेसुतौ । कुशोलवइतिख्यातौ तयोश्चक्रेक्रियामुनिः ॥ ११ ॥ अंगदश्चित्रकेतुश्च लक्ष्मणस्यात्मजौस्मृतौ । तक्षःपुष्कलइत्यास्तां भरतस्यमहीपते ॥ १२ ॥ सुबाहुःश्रुतसेनश्च शत्रुघ्नस्यबभूवतुः । गन्धर्वान्कोटिशोजघ्ने भरतोविजयेदिशाम् ॥ १३ ॥ तदीयंधनमानीय सर्वंराज्ञेन्यवेदयत् । शत्रुघ्नश्चमधोःपुत्रं लवणंनामराक्षसम् ॥ १४ ॥ हत्वामधुवनेचक्रे मथुरांनामवैपुरीम् । मुनौनिक्षिप्यतनयौ सीताभर्त्राविवासिता ॥१५॥ ध्यायन्तीरामचरणौ विवरंप्रविवेशह ॥ तच्छ्रुत्वाभगवान्रामो रुन्धन्नपिधियाशुचः ॥ ॥ १६ ॥ स्मरंस्तस्यागुणांस्तांस्तान्नाशक्नोद्रोद्धुमीश्वरः । स्त्रीपुंप्रसंगएतादृक्सर्वत्रासमावहः ॥१७॥ अपीश्वराणांकिमुत ग्राम्यस्यगृहचेतसः । ततऊर्ध्वंब्रह्मचर्यं

ता देखकर वे सब ब्राह्मण अत्यन्त प्रसन्न हुए और स्तुतिकर वे समस्त वस्तु लौटायकर कहनें लगे कि ॥ ५ ॥ हे भगवन ! हे भुवनेश्वर ! आपनें जब हमारे हृदय में प्रवेशकर अपनी प्रभा द्वारा हमारे अज्ञान के अंधकार का नाश किया है तब आपनें हमको क्या नहीं दिया ॥ ६ ॥ हमने तो आपसे सब पालिया हे पवित्र कीर्ते ? राम आप ब्राह्मणों के हितकारी और अकुंठ बुद्धिवाले हो आपको हम नमस्कार करते हैं आप अग्रगण्य हो मुनिगण भी अपने २ चित्त में आपके चरणयुगल की चिंता करते है ॥ ७ ॥ तदनंतर रामचन्द्रजी नें एक समय राज्य का वृत्तांत जाननें के निमित्त गुप्तरूप से वेष बदलकर नगर में भ्रमण करतें २ यह सुना ॥ ८ ॥ एक मनुष्य अपनी स्त्रीसे इस प्रकार कहरहा है कि मैं तेरा भरण पोषण नकरूंगा तू दुष्टा और व्यभिचारिणी है दूसरे के घर में रहती है रामचन्द्र स्त्रियों का लालची है इसही कारण सीता का पालन करता है मैं राम नहीं हूं अब तुझको ग्रहण नकरूंगा ॥ ९ ॥ इस बातके सुनतेही अबाध्य अज्ञान बहुमुख लोक से भयभीत हो रामचन्द्रजी ने सीताजी को छोडदिया स्वामी से छोड़े जानेपर जनकनंदिनी गर्भावस्था में थी यह महर्षि वाल्मीकि के आश्रम में गईं ॥ १० ॥ और उसी स्थानमें समय पूर्ण होनेंपर उनके दो पुत्र साथही उत्पन्न हुए वह दोनों पुत्र कुश और लव इन दोनों नामों से विख्यात हुए महर्षि वाल्मीकि जीनें उनके जातकर्मादि समस्त संस्कार किये॥११॥ इधर अयोध्या में लक्ष्मण के दो पुत्र उत्पन्न हुए उनका नाम अंगद और चित्रकेतु हुआ भरत केभी दो पुत्र तक्ष और पुष्कल हुए ॥ १२ ॥ सुबाहु और शत्रुसेन नामक दोपुत्र शत्रुघ्न के हुए । उस समय भरतने दिग्विजय करनेके निमित्त जाकर करोड़ों २ गंधर्वोंको मारा ॥ १३ ॥ और उनका सब धन लाकर राजाको दिया । शत्रुघ्न मधुके पुत्र लवणासुर को मारकर मधुवन में मथुरापुरी बसाई ॥१४॥ जनक पुत्री श्रीसीताजीने स्वामी से निकाले जानेपर वनमेंजो दोपुत्र उत्पन्न किये, कुछ दिनके उपरांत उन्होने उनको वाल्मीकि मुनिके हाथमें समर्पण कर आप अपने पति श्रीरामचन्द्रजी के चरणोंका ध्यान करते २ पृथ्वी के विवर में प्रवेश करगई ॥१५॥ रामचन्द्र जीने यह सुनकर अपनी बुद्धि केवल से शोक दूर करनेका यत्नतो किया परन्तु प्यारी के उन सबगुणों का स्मरणकर स्वयं ईश्वर होकरभी भली भांतिसे शोकदूर न करसके ॥ १६ ॥ स्त्री पुरुषों का प्रेम सर्वत्रही ऐसे भयका देनेवाला है । जब स्त्री के प्रेममें भगवानको एसा त्रासहुआ तब गृहासक्त मनुष्यों की क्या बातकहूं ॥ १७ ॥ तदुपरांत

धारयञ्जुहोत्प्रभुः । त्रयोदशाब्दसाहस्रमग्निहोत्रमखण्डितम् ॥ १८ ॥ स्मरतां
हृदिविन्यस्यविद्धंदण्डककण्टकैः । स्वपादपल्लवंरामआत्मज्योतिरगात्ततः १९ ॥
नेदंयशोरघुपतेःसुरयाच्ञयात्तलीलातनोरधिकसाम्यविमुक्तधाम्नः । रक्षोवधोजल
धिबन्धनमस्त्रपूगैःकिंतस्यशत्रुहननेकपयःसहायाः ॥ २० ॥ यस्यामलंनृपसदस्सु
यशोऽधुनापिगायन्त्यघघ्नमृषयोदिगिभेन्द्रपट्टम् । तंनाकपालवसुपालकिरीटजुष्ट
पादाम्बुजंरघुपतिंशरणंप्रपद्ये ॥२१॥ सयैःस्पृष्टोऽभिदृष्टोवासंविष्टोऽनुगतोऽपिवा ।
कोशलास्तेययुःस्थानंयत्रगच्छन्तियोगिनः ॥ २२ ॥ पुरुषोरामचरितंश्रवणैरुपधा
रयन् । आनृशंस्यपरोराजन्कर्मबन्धैर्विमुच्यते ॥ २३ ॥ राजोवाच ॥ कथंसभगवा
न्रामोभ्रातॄन्वास्वयमात्मनः । तस्मिन्वातेऽन्ववर्तन्तप्रजाःपौराश्चईश्वरे ॥२४ ॥ श्री
शुक उवाच ॥ अथादिशद्दिग्विजयेभ्रातॄंस्त्रिभुवनेश्वरः । आत्मानंदर्शयन्स्वानां
पुरीमैक्षतसानुगः ॥ २५ ॥ आसिक्तमार्गांगन्धोदैःकरिणांमदसीकरैः ।स्वामिनंप्राप्त
मालोक्यमत्तांवासुतरामिव ॥२६॥ प्रासादगोपुरसभाचैत्यदेवगृहादिषु । विन्यस्त
हेमकलशैःपताकाभिश्चमण्डिताम् ॥ २७ ॥ पूगैःसवृन्तैरम्भाभिःपट्टिकाभिःसुवास
साम् । आदर्शैरंशुकैःस्रग्भिःकृतकौतुकतोरणाम् ॥ २८ ॥ तमुपेयुस्तत्रतत्रपौराअ-
र्हणपाणयः । आशिषोयुयुजुर्देवपाहीमांप्राक्त्वयोद्धृताम् ॥ २९ ॥ ततःप्रजावीक्ष्य

रामचन्द्र जीने अखंडित ब्रह्मचर्य धारण करके एक हजार तीनसौ वर्षतक समस्त अग्निहोत्र किये ॥ १८ ॥ इनके उपरांत दंडकारण्य के कांटों से बिंधेहुए अपने चरण कमलोंको भक्तों के हृदय में स्थापितकर अपने धामको सिधारे ॥ १९ ॥ हे राजन् ! रामचन्द्रजी के समुद्र बंधन और राक्षसों के वध इत्यादि के कार्यको अद्भुत कहकर कविगण वर्णन करते हैं तौभी वह उनका यश नहीं है । क्योंकि जिनका अतुल्य अमोघ पराक्रम है, शत्रु के वधमें क्या कपिगण उनकी सहायता करसकते हैं ॥ २० ॥ उन भगवान ने देवताओंकी प्रार्थना से लीला के निमित्त अवतार धारण कियाथा । ऋषिगण—जिनकी पाप नाशिनी और दिग्गजों के आवरण वस्त्र स्वरूप दिगंत व्यापिनी निर्मल कीर्तिका अबतक राज सभामें गान करते हैं और देवतागण व राजागण किरीट द्वारा जिनके चरणों की सेवा करते हैं, उन्हीं रामचन्द्रजी की शरणागतहूं ॥ २१ ॥ जिन्होंने रामचन्द्रजीका स्पर्श अथवा दर्शन कियाथा जिन्हों ने उनकी सेवाकी थी वह समस्त कोशल वासीगण योगियों के गम्य स्थान को प्राप्तहुए हैं ॥ २२ ॥ हे राजन् ! जो श्रीरामचन्द्रजी के इस उपाख्यानको सुनेंगे, वह सदाचारी हो कर्म के बंधनों से निश्चयही छूटजावेंगे ॥ २३ ॥ राजा परीक्षित ने कहा कि—भगवान रामचन्द्र स्वयं किसप्रकार से आचरण करते थे? वह अपने अंशस्वरूप तीनों भाइयोंपर कैसा व्यवहार करते थे ? और साक्षात् परमेश्वर रामचन्द्रजीपर वे सब भाई और प्रजाकेलोग कैसा व्यवहार करते थे ? ॥ २४ ॥ श्रीशुकदेवजी बोले कि–त्रिभुवनके ईश्वर रामचन्द्रजी ने सिंहासनपर बैठने के उपरांत भाइयों को दिग्विजयार्थ आज्ञाकी और जातिवालोंपर आत्मीयता प्रकाशकर संगियों समेत स्वयं नगरी के देखभाल में प्रवृत्तहुए ॥ २५ ॥ उनके राज्याभिषेक काल में अयोध्यापुरीका मार्ग निरन्तर सुगन्धित जल व हाथियों के मद से सिंचा रहथा । वह पुरी अपने स्वामीको प्राप्तहो भलीप्रकार से समृद्धियुक्त होगई ॥ २६ ॥ वहां के महल, गोपुर, देवमन्दिर, द्वार, और सभाआदिकों में हेम सुवर्ण के कलश चढ़े रहते और वे स्थान पताकाओंसे शोभायमान रहते थे ॥ २७ ॥ गुच्छायुक्त सुपारियों और केलों के वृक्षशोभा देरहे हैं, सुन्दरवस्त्र तनेहुए हैं, कांच, माला, वितान और तोरणद्वारा सज्जित स्थान २ में मंगलाचार होरहा है ॥ २८ ॥ जिस २ स्थान में रामचन्द्रजी जाते थे उसी २ स्थानमें पुरवासीलोग हाथोंमें भेंट ले

पतिं चिरागतं दिदृक्षयोत्सृष्टगृहाः स्त्रियो नराः । आरुह्य हर्म्याण्यरविंदलोचनमतृप्तनेत्राः कुसुमैरवाकिरन् ॥ ३० ॥ अथ प्रविष्टः स्वगृहं जुष्टं स्वैः पूर्वराजभिः । अनन्ताखिलकोशाढ्यमनर्घ्योरुपरिच्छदम् ॥ ३१ ॥ विद्रुमोदुम्बरद्वारैर्वैदूर्यस्तम्भपंक्तिभिः स्थलैर्मारकतैः स्वच्छैर्भ्राजत्स्फटिकभित्तिभिः ॥ ३२ ॥ चित्रस्रग्भिः पट्टिकाभिर्वासोमणिगणांशुकैः । मुक्ताफलैश्चिदुल्लासैः कान्तकामोपपत्तिभिः ॥ ३३ ॥ धूपदीपैः सुरभिभिर्मण्डितं पुष्पमण्डनैः । स्त्रीपुम्भिः सुरसंकाशैर्जुष्टं भूषणभूषणैः ॥ ३४ ॥ तस्मिन्स भगवान्रामः स्निग्धया प्रिययेष्टया । रेमे स्वारामधीराणामृषभः सीतया किल ॥ ३५ ॥ बुभुजे च यथाकालं कामान्धर्ममपीडयन् । वर्षपूगान्बहून्नॄणामभिध्याताङ्घ्रिपल्लवः ३६

इतिश्रीमद्भा० म० नवम० श्रीरामोपाख्याने एकादशोऽध्यायः ॥ ११ ॥

श्रीशुक उवाच ॥ कुशस्य चातिथिस्तस्मान्निषधस्तत्सुतो नभः । पुण्डरीकोऽथ तत्पुत्रः क्षेमधन्वाऽभवत्ततः ॥ १ ॥ देवानीकस्ततोऽनीहः पारियात्रोऽथ तत्सुतः । ततो बलःस्थलस्तस्माद्वज्रनाभोऽर्कसम्भवः ॥ २ ॥ खगणस्तत्सुतस्तस्माद्विधृतिश्चाभवत्सुतः । ततो हिरण्यनाभोऽभूद्योगाचार्यस्तु जैमिनेः ॥ ३ ॥ शिष्यः कौशल्य आध्यात्मं याज्ञवल्क्योऽध्यगाद्यतः । योगं महोदयमृषिर्हृदयग्रंथिभेदकम् ॥ ४ ॥ पुष्यो हिरण्यनाभस्य ध्रुवसंधिस्ततोऽभवत् । सुदर्शनोऽथाग्निवर्णः शीघ्रस्तस्य मरुः सुतः ॥ ५ ॥ योऽसावास्ते योगसिद्धः कलापग्राममाश्रितः । कलेरन्ते सूर्यवंशं नष्टं भावयिता

उपस्थितहोते और यह कहकर आशीर्वाद देते कि—" हे देव! आप अपनी इस पहिलेकी उद्धार की हुई पृथ्वी की रक्षाकरो ॥ २९ ॥ जब रामचन्द्रजी कहीं बाहरसे अपनी नगरी में आते तब अपनेराजाका आना सुनकर उनके देखने के निमित्त स्त्री पुरुष सबही अपने २ घर छोडकर महलों छतोंपर चढजाते थे और अतृप्त लोचन कमलनयन भगवान रामचन्द्रजी का दर्शनकर उनपर फूल बरसाते थे ॥ ३० ॥ रामचन्द्रजी के आत्मीय प्रथम राजाओं ने जिन राजभवनका भोग कियाथा वह रामचन्द्रजी के जाने के समय अनन्तरत्नादिकके कोषों से परिपूर्ण और महामूल्यकी सामग्रियों से सज्जितरहते थे ॥ ३१ ॥ वह भवन विद्रुममयद्वारकी देहली, वैदूर्य के खम्भे, अतिस्वच्छ और मरकत मयगृहके आंगन, स्फटिकमय दीवार, ॥ ३२ ॥ विचित्र पुष्पमाला, श्रेष्ठपदिन्नुएं वस्त्र, रत्नसमूह के किरणजाल (झरोखे) चैतन्यकी समान स्वच्छ मुक्ताफल, स्त्रियों के भोगयोग्य द्रव्य, ॥ ३३ ॥ और सुगंधित धूप, दीप से अलकृत थे । और वहां फूलों से भूषित, अलङ्कार के अलङ्कार स्वरूप देवताओंकी सदृश स्त्री पुरुष निवासकरते थे॥३४॥आत्माराम व धीर पुरुषोंमें श्रेष्ठ रामचन्द्रजी वहांपर अपनी प्यारी समेत क्रीड़ा करते थे॥३५॥ उन्होंने धर्म पूर्वक बहुत वर्षोंतक इच्छित भोगकिया, वहांपर सदैव समस्त मनुष्य उनके चरण कमलोंका ध्यान कियाकरतेथे॥३६॥

इतिश्री मद्भागवतेमहापुराणेनवमस्कंधेसरलाभाषाटीकायांएकादशोऽध्यायः ॥ ११ ॥

श्रीशुकदेवजी बोलेकि-हेराजन्! श्रीरामके पुत्र कुशका पुत्र अतिथि हुआ; अतिथि का पुत्र निषध हुआ । उसका पुत्रनभ; नभका पुत्र पुण्डरीक; पुण्डरीक का पुत्र क्षेमधन्वा ॥ १ ॥क्षेमधन्वाका पुत्र देवानीक और उसका अनीह अनीहका पुत्र पारिजात पारिजातका पुत्र बलस्थल हुआ। बलस्थलका पुत्र वज्रनाभ सूर्यके अंशसे उत्पन्न हुआथा॥२॥ वज्रनाभका पुत्र खगण और खगणका पुत्र विधृतहुआ।उसविधृतिसे हिरण्यनाभकी उत्पत्तिहुई।हिरण्यनाभ जैमिनके शिष्य औरयोगाचार्यथे ३॥जिसके द्वारासिद्धियें प्राप्तहोतीं और हृदयकी ग्रंथियें नाशहोती हैं याज्ञवल्क्यऋषिने इनके निकट उसीअध्यात्म योगका अभ्यास कियाथा॥४॥उसहिरण्यनाभकापुत्रपुष्प,पुष्पकापुत्र ध्रुवसंधि,ध्रुवसंधिका पुत्र सुदर्शन,सुदर्शनका अग्निवर्ण, उसकापुत्रशीघ्र, शीघ्रकापुत्रमरुहुआ॥५॥यहयोग सिद्धहो कलाप-

पुनः ॥ ६ ॥ तस्मात्प्रसुश्रुतस्तस्य सन्धिस्तस्याप्यमर्षणः । महस्वांस्तत्सुतस्तस्मा द्विश्वसाह्वोऽन्वजायत ॥ ७ ॥ ततः प्रसेनजित्तस्मात्तक्षको भविता पुनः । ततो बृहद्बलो यस्तु पित्रा ते समरे हतः ॥ ८ ॥ एते हीक्ष्वाकुभूपाला अतीताः शृण्वनागतान् । बृहद्बलस्य भविता पुत्रो नाम बृहद्रणः ॥ ९ ॥ उरुक्रियस्ततस्तस्य वत्सवृद्धो भविष्यति। प्रतिव्योमस्ततो भानुर्दिवाको वाहिनीपतिः ॥ १० ॥ सहदेवस्ततो वीरो बृहदश्वोऽथ भानुमान् । प्रतीकाश्वो भानुमतः सुप्रतीकोऽथ तत्सुतः ॥ ११ ॥ भविता मरुदेवोऽथ सुनक्षत्रोऽथ पुष्करः । तस्यान्तरिक्षस्तत्पुत्रः सुतपास्तदमित्रजित् ॥१२॥ बृहद्राजस्तु तस्यापि बर्हिस्तस्मात्कृतञ्जयः । रणञ्जयस्तस्य सुतः संजयो भविता ततः ॥ १३ ॥ तस्माच्छाक्योऽथ शुद्धोदो लाङ्गलस्तत्सुतः स्मृतः । ततः प्रसेनजित्तस्मात्क्षुद्रको भविता ततः ॥ १४ ॥ रणको भविता तस्मात्सुरथस्तनयस्ततः । सुमित्रो नाम निष्ठान्त एते बार्हद्बलान्वयाः ॥ १५ ॥ इक्ष्वाकूणामयं वंशः सुमित्रान्तो भविष्यति । यतस्तं प्राप्य राजानं संस्थां प्राप्स्यति वै कलौ ॥ १६ ॥

इति श्रीमद्भा० म० नवम० श्रीरामचरितवर्णनं नाम द्वादशोऽध्यायः ॥१२॥

श्रीशुक उवाच ॥ निमिरिक्ष्वाकुतनयो वसिष्ठमवृतर्त्विजम् । आरभ्य सत्रं सोऽप्याह शक्रेण प्राग्वृतोऽस्मि भोः ॥ १ ॥ तं निर्वर्त्यागमिष्यामि तावन्मां प्रतिपालय । तूष्णीमासीद् गृहपतिः सोऽपीन्द्रस्याकरोन्मखम् ॥ २ ॥ निमिश्चलमिदं विद्वान्सत्रमा

ग्राममें निवास करता है। वह कलियुगके अन्तमें सूर्यवंशको विनष्ट होता देखकर पुत्रोत्पत्ति द्वारा फिर उस वंशका प्रवर्त्तित करेगा॥६॥मरुके प्रसुश्रुत,का पुत्र प्रसुश्रुत संधि,संधिका अमर्षण अमर्षणका पुत्र महस्वान् महस्वान्का विश्वसाह्व ॥ ७ ॥ उसका पुत्र प्रसेनजित और उससे तक्षक उत्पन्न हुआ। तक्षकका पुत्र बृहद्बल हुआ यह समरमें तुम्हारे पिता अभिमन्युके हाथसे मारा गया था ॥ ८ ॥ यह इक्ष्वाकु वंशियोंका अंतिम राजा हुआ। अब जो होंगे उनके नाम कहता हूं सुनो। बृहद्बलका बृहद्रण नामक पुत्र राजा होगा ॥ ९ ॥ उसका पुत्र उरुक्रिय उसका वत्स वृद्ध होगा। वत्स वृद्धका पुत्र प्रतिव्योम प्रतिव्योमका पुत्र भानु भानुसे सेनापति दिवाकरका जन्म होगा॥१०॥उसका पुत्र सहदेव, सहदेवका पुत्र बृहदश्व बृहदश्वका पुत्र भानुमान होगा। उस भानुमानका पुत्र प्रतीकाश्व उससे सुप्रतीक उत्पन्न होगा ॥११॥ तदनन्तर मरुदेव, उसके पश्चात् सुनक्षत्र तदनन्तर उसके पुष्कर जन्मग्रहण करेगा। पुष्करका पुत्र अन्तरीक्ष अन्तरीक्षका पुत्र सुतपा, उसका पुत्र अमित्रजित होगा ॥ १२ ॥ अमित्रजित का पुत्र बृहद्राज, बृहद्राजका पुत्र बर्हि बर्हिका पुत्र कृतंजय, कृतंजय का पुत्र रणंजय, रणंजयसे संजय उत्पन्न होगा ॥ १३ ॥ संजय का पुत्र शाक्य, उसका पुत्र शुद्दोद, शुद्दोद का पुत्र लांगल होगा। लांगलसे प्रसेनजित, उससे क्षुद्रक ॥ १४॥ क्षुद्रकसे रणक, रणकसे सुरथ और सुरथके सुमित्र उत्पन्न होगा। यह बृहद्बलका वंश है ॥ १५ ॥ इक्ष्वाकु वंशक सुमित्रसे अन्त होजायगा। सुमित्र राजा के उपरान्त कलियुगमें इस वंशका ध्वंस होजावेगा॥१६

इति श्रीमद्भागवते महापुराणे नवम स्कंधे सरला भाषाटीकायां द्वादशोऽध्यायः ॥ १२ ॥

श्रीशुकदेवजी बोले कि—इक्ष्वाकुके पुत्र निमिने यज्ञका आरम्भ कर महर्षि वशिष्ठको ऋत्विक कर्ममें वरण किया, परन्तु मुनिने कहा कि पहिले इन्द्रने मुझे वरण किया है बिना इन्द्रका यज्ञ समाप्त किये तुम्हारे यज्ञका कार्य नहीं करसक्ता। इसकारण जब तक इन्द्र का यज्ञ न होजावे तब तक और ठहरो। इस बातको सुनकर निमि चुप होगया और वशिष्ठजी भी इन्द्रका यज्ञ करनेको चले गये ॥ १ ॥ २ ॥ जितेन्द्रिय निमि जीवनकी अस्थिरता जानता था अत एव गुरुके न आते२ उस

रमतात्मवान् । ऋत्विग्भिरपरैस्तावदागमद्यावतागुरुः ॥ ३ ॥ शिष्यव्यतिक्रमंवी क्ष्यनिर्वर्त्यगुरुरागतः । अशपत्पततादेहोनिमेः पण्डितमानिनः ॥ ४ ॥ निमिः प्रतिद दौशापंगुरवेऽधर्मवर्तिने । तवापिपतताद्देहोलोभाद्धर्ममजानतः ॥ ५ ॥ इत्युत्ससर्जस्वदेहंनिमिरध्यात्मकोविदः । मित्रावरुणयोर्जज्ञेउर्वश्यांप्रपितामहः ॥ ६ ॥ गन्धवस्तुषुतद्देहंनिधायमुनिसत्तमाः । समाप्तेसत्रयागेऽथदेवानूचुः समागतान् ॥ ७॥ राज्ञोजीवतुदेहोऽयंप्रसन्नाः प्रभवोयदि । तथेत्युक्तेनिमिः प्राहमाभून्मेदेहबन्धनम् ॥ ८ ॥ यस्ययोगंनवाञ्छन्तिवियोगभयकातराः । भजन्तिचरणाम्भोजंमुनयोहरिमेधसः ॥ ९ ॥ देहंनावरुरुत्सेहंदुःखशोकभयावहम् । सर्वत्रास्ययतोमृत्युर्मत्स्यानामुदकेयथा ॥ १० ॥ देवाऊचुः ॥ विदेहउष्यतांकामंलोचनेषुशरीरिणाम् । उन्मेषणनिमेषाभ्यांलक्षितोऽध्यात्मसंस्थितः ॥११॥अराजकभयंनृणांमन्यमानामहर्षयः । देहंममन्थुः स्मनिमेः कुमारः समजायत ॥ १२ ॥ जन्मनाजनकः सोऽभूद्वैदेहस्तु विदेहजः । मिथिलोमथनाज्जातोमिथिलायेननिर्मिता ॥ १३ ॥ तस्मादुदावसुस्तस्यपुत्रोऽभून्नन्दिवर्धनः । ततः सुकेतुस्तस्यापिदेवरातोमहीपते ॥ १४ ॥ तस्माद्बृहद्रथस्तस्यमहावीर्यः सुधृत्पिता । सुधृतेर्धृष्टकेतुर्वैहर्यश्वोऽथमरुस्ततः ॥ १५ ॥ मरोः प्रतीपकस्तस्माज्जातः कृतिरथोयतः । देवमीढस्तस्यसुतोविश्रुतोऽथमहाधृ

ने दूसरे ऋत्विक् द्वारा यज्ञका आरम्भ करदिया ॥ ३ ॥ अनन्तर वशिष्ठजी इन्द्रकायज्ञ समाप्त करके आये और शिष्यके इस अन्याय कार्यको देखकर यह शाप दियाकि—इस पण्डिताभिमान निमिका देह शीघ्रहीपात होजावे ॥ ४ ॥ कुलगुरुके इसप्रकार से अधर्मवर्त्ती होनेपर निमिनेभी उनको यह शाप दिया कि—तुमने लोभके वशीभूतहो धर्मपर दृष्टि न की; अतएव तुम्हारीभी देह पतित होजावे ॥ ५ ॥ यह कहकर अध्यात्मज्ञानी निमि ने अपनी देह छोडदी । उसी समय वसिष्ठऋषि कामी शरीर पात होगया; मित्रावरुण के वीर्य से उर्वशी के गर्भ में वसिष्ठजी फिर उत्पन्न हुए ॥ ६ ॥ ऋत्विकमुनियों ने सुगन्धित पदार्थों के बीचमें निमिकी देह स्थापितकर यज्ञसमाप्त किया । यज्ञके समाप्त होनेपर देवता आये तब उन्होंने देवताओं से प्रार्थनाकी॥७॥ कि आप यदि प्रसन्न और शक्तिवान होतो इस निमिराजाकी देहको सजीवकरदो, इसपर देवताओं ने ' तथास्तु ' कहा तब निमि सुगन्धित पदार्थोंके बीचमें से बोला कि—मैं देहका बन्धन नहीं चाहता ॥ ८ ॥ हरिभक्त मुनिलोग वियोग के भयसे कातरहो कभी भी देह के सम्बन्धकी इच्छानहीं करते,—मुक्ति के निमित्त केवल भगवान केही चरणकमलोंका भजन कियाकरते हैं ॥ ९ ॥ मनुष्यकी देह दुःख, सुख और भयका निवासस्थान है; मैं अब उसके धारण करनेकी इच्छा नहीं करता; क्योंकि जलमें मछली के समान सर्वत्र देधारहाको मृत्युकी सम्भावना रहती है ॥ १० ॥ देवताओं ने कहा कि—तब देहरहित होकरभी सब प्राणियों के नेत्रों में तुमअपनी इच्छानुसार वास करोगे । उस अध्यात्म निमिके रहनका चिह्न नेत्रोंके खोलने मूंदने के द्वारा जानाजाता है ॥ ११ ॥ श्रीशुकदेवजीने कहाकि—इसके उपरांत मुनियों ने विचारकिया कि—राज्य के अराजक होनेसे प्रजाको सर्वदात्रास रहेगा । अतएव सबने राजकुमारकी इच्छाकरके उस निमिकी देहके मन्थन करनेका आरम्भ किया; इससे उनकी मृतदेहसे एकपुत्र उत्पन्नहुआ ॥ १२ ॥ इस निमिपुत्रका इसप्रकार से जन्म होने के कारण " जनक " नाम हुआ, पिता की विदेहावस्था में जन्म ग्रहण करने से ' वैदेह ' और मथन से उत्पन्न होनेके कारण मिथिल, नामसे विख्यातहुआ । उसने मिथिलापुरी बसाई॥१३॥जनकका पुत्र उदावसु, उदावसुका नन्दिवर्धन, नंदिवर्धनका सुकेतु, सुकेतुका देवरात ॥ १४ ॥ देवरातका बृहद्रथ बृहद्रथका महावीर्य महावीर्यका सुधृति, सुधृतिका धृष्टकेतु, धृष्टकेतुका हर्यश्व, हर्यश्व का मरु, ॥१५॥ मरुका प्रतीपक' प्रतीपक का कृतरथ, उस का देवमीढि देवमीढिका

नि० ॥ १६ ॥ कृतिरातस्ततस्तस्मान्महारोमाऽथतत्सुतः। स्वर्णरोमासुतस्तस्यह्र स्वरोमाव्यजायत ॥ १७ ॥ ततः सीरध्वजोजज्ञेयज्ञार्थंकर्षतोमहीम्। सीतासीराग्रतोजातातस्मात्सीरध्वजः स्मृतः ॥ १८ ॥ कुशध्वजस्तस्यपुत्रस्ततोधर्मध्वजोनृपः। धर्मध्वजस्यद्वौपुत्रौकृतध्वजमितध्वजौ ॥ १९ ॥ कृतध्वजात्केशिध्वजः खाण्डिक्यस्तुमितध्वजात्। कृतध्वजसुतो राजन्नात्मविद्याविशारदः॥ २० ॥ खाण्डिक्यः कर्मतत्त्वज्ञोभीतः केशिध्वजाद्द्रुतः। भानुमांस्तस्यपुत्रोऽभूच्छतद्युम्नस्तुतत्सुतः ॥ २१ ॥ शुचिस्तत्तनयस्तस्मात्सनद्वाजस्ततोऽभवत्। ऊर्ध्वकेतुः सनद्वाजादजोऽथपुरुजित्सुतः ॥ २२ ॥ अरिष्टनेमिस्तस्यापिश्रुतायुस्तत्सुपार्श्वकः। ततश्चित्ररथोयस्यक्षेमधिर्मिथिलाधिपः ॥ २३ ॥ तस्मात्समरथस्तस्यसुतः सत्यरथस्ततः। आसीदुपगुरुस्तस्मादुपगुप्तोऽग्निसंभवः ॥ २४ ॥ वस्वनन्तोऽथतत्पुत्रोयुयुधोयत्सुभाषणः। श्रुतस्ततोजयस्तस्माद्विजयोऽस्मादृतः सुतः ॥ २५ ॥ शुनकस्तत्सुतोयज्ञेवीतहव्योधृतिस्ततः। बहुलाश्वोधृतेस्तस्यकृतिरस्यमहावशी ॥ २६ ॥ एतेवैमैथिलाराजन्नात्मविद्याविशारदाः। योगेश्वरप्रसादेनद्वन्द्वैर्मुक्तागृहेष्वपि ॥ २७ ॥

इतिश्रीमद्भा०म०नवम०निमिवंशानुवर्णनंनामत्रयोदशोऽध्यायः ॥ १३ ॥

श्रीशुक उवाच ॥ अथातः श्रूयतांराजन्वंशःसोमस्यपावन। यस्मिन्नैलादयोभूपाः कीर्त्यन्तेपुण्यकीर्तयः ॥ १ ॥ सहस्रशिरसःपुंसोनाभिह्रदसरोरुहात्। जातस्यासीत्सुतोधातुरत्रिःपितृसमोगुणैः ॥ २ ॥ तस्यदृग्भ्योऽभवत्पुत्र सोमोऽमृतमयःकिल।

विश्रुत, विश्रुतका महाधृति॥१६॥महाधृतिका कृतिरात, कृतिरातका महारोमा, महारोमाका स्वर्णरोमा, स्वर्णरोमाका ह्रस्वरोमा॥१७॥और ह्रस्वरोमाका शीरध्वजहुआ। शीरध्वजकीकन्या सीताहुई। शीरध्वज राजायज्ञके निमित्त भूमिको जोतरहाथा; उसीसमय हलके अग्र सीताजीका जन्महुआ। इसप्रकार हलके शीर से उसका कीर्त्ति सूचक शीरध्वजनामहुआ॥१८॥शीरध्वजका पुत्र कुशध्वज और उसकाधर्मध्वजहुआ। धर्मध्वजके दोपुत्र कृतध्वजऔर मितध्वजहुए॥१९॥उनमेंसे कृतध्वजके केशिध्वज और मितध्वज, मितध्वजसे खाण्डिक्य उत्पन्नहुआ। हे राजन्! केशिध्वज ब्रह्मविद्यामें निपुणथा॥२०॥कर्मके तत्वका जाननेवाला खाण्डिक्य केशिध्वज के भयसे भागगया। केशिध्वजका पुत्र भानुमान,उसकापुत्र शतद्युम्न,॥२१॥शतद्युम्नका पुत्र शुचिहुआ। इस शुचिसे सनद्वाज उत्पन्न हुआ।सनद्वाजका पुत्र ऊर्ध्वकेतु, ऊर्ध्वकेतुकापुत्र अज और उसके पुरुजित ॥२२॥पुरुजितका पुत्र अरिष्टनेमि, अरिष्टनेमिका पुत्र श्रुतायु, श्रुतायुका पुत्र सुपार्श्वक हुआ। सुपार्श्वक से चित्ररथ उत्पन्न हुआ। उसका पुत्र क्षेमधि, ॥ २३ ॥ क्षेमधिका पुत्र समरथ, समरथका पुत्र सत्यरथ, सत्यरथ का पुत्र उपगुरु, और उसके वीर्यसे अग्निके अंश उपगुप्तने जन्म ग्रहणकिया ॥२४॥ उपगुप्तका पुत्र वस्वनंत, वस्वनंतका युयुधान, युयुधानका पुत्र सुभाषण, सुषणका पुत्र श्रुत; श्रुतका पुत्र जय, जयका पुत्र विजय हुआ। विजय से ऋत उत्पन्न हुआ ॥ २५ ॥ ऋतका पुत्र शुनक, शुनकका पुत्र वीतहव्य; वीतहव्यका पुत्र धृति, धृतिका पुत्र बहुलाश्व, उसका पुत्र जितेन्द्रिय कृतिहुआ ॥२६॥ हे राजन्! यह सब मिथिला देशीय राजा हुए हैं यह सब आत्म विद्यामें पण्डित और योगश्वरों के प्रसाद से घरमें वास करते हुएभी सुख दुःख आदि सांसारिक बंधनों से मुक्त थ ॥ २७ ॥

इतिश्री मद्भागवतेमहापुराणेनवमस्कंधसरलाभाषाटीकायांत्रयोदशोऽध्यायः ॥ १३ ॥

श्रीशुकदेवजीबोले कि—हेराजन्! अब पवित्रकरनेवाले सोमवंशका वर्णनकरताहूं-सुनो! इस वंशमेंही पुरूरवाआदिराजा उत्पन्नहुएथे॥१॥हेमहाराज! सहस्रशीर्षा परमपुरुषभगवानके नाभिकमल से ब्रह्माउत्पन्न हुए; उनके पुत्र अत्रिहुए। वह गुणों में पिताही के तुल्यथे ॥ २ ॥ उन अत्रि के

विप्रौषध्युडुगणानांब्रह्मणाकल्पितःपतिः ॥ ३ ॥ सोऽयजद्राजसूयेनविजित्यभुवन त्रयम्। पत्नींबृहस्पतेर्दर्पात्तारांनामाहरद्बलात् ॥ ४ ॥ यदासदेवगुरुणायाचितोऽभीक्ष्णशोमदात्। नात्यजत्तत्कृतेजज्ञेसुरदानवविग्रहः ॥ ५ ॥ शुक्रोबृहस्पतेर्द्वेषादग्रहीत्सासुरोडुपम्। हरोगुरुसुतंस्नेहात्सर्वभूतगणावृतः ॥ ६ ॥ सर्वदेवगणोपेतो महेन्द्रोगुरुमन्वयात्। सुरासुरविनाशोऽभूत्समरस्तारकामयः ॥ ७ ॥ निवेदितोऽथाङ्गिरसासोमंनिर्भर्त्स्यविश्वकृत। तारांस्वभर्त्रेप्रायच्छदन्तर्वत्नीमवैत्पतिः ॥ ८ ॥ त्यजत्यजाशुदुष्प्रज्ञेमत्क्षेत्रादाहितंपरैः। नाहंत्वांभस्मसात्कुर्यां स्त्रियंसांतानिकः सति ॥ ९ ॥ तत्याजव्रीडितातारा कुमारंकनकप्रभम्। स्पृहामाङ्गिरसश्चक्रेकुमारे सोमएवच ॥ १० ॥ ममायंनतवेत्युच्चैस्तस्मिन्विवदमानयोः। पप्रच्छुर्ऋषयोदेवा नैवोचेव्रीडितातुसा ॥ ११ ॥ कुमारोमातरंप्राहकुपितोऽलीकलज्जया। किंनवोच- स्यसद्वृत्तेआत्मावद्यंवदाऽशुमे ॥ १२ ॥ ब्रह्मातांरहआहूयसमप्राक्षीच्चसान्त्व यन्। सोमस्येत्याहशनकैःसोमस्तंतावदग्रहीत् ॥ १३ ॥ तस्यात्मयोनिरकृतबुधइत्य- भिधांनृप। बुद्ध्यागम्भीरया येनपुत्रेणापोडुराण्मुदम् ॥ १४॥ ततःपुरूरवाजज्ञे इला यांयउदाहृतः। तस्यरूपगुणौदार्यशीलद्रविणविक्रमान् ॥ १५ ॥ श्रुत्वोर्वशीन्द्रभ-

---

नेत्र से अमृतमय सोमनामक पुत्रउत्पन्नहुआ। भगवान ब्रह्माने उस सोमको विप्र, औषधि, और नक्षत्र सबका आधिपत्यदिया ॥ ३ ॥ उसने त्रिभुवन को जीतकर राजसूय यज्ञ किया। एकसमय उस सोमने अहंकारपूर्वक बलात्कार से बृहस्पतिकी पत्नी ताराका हरणकरलियाथा ॥ ४॥ देवगुरु बृहस्पतिजीने अनेकबार सोमसे अपनी पत्नीके पानेकी प्रार्थनाकी किंतु मदसंमतवाले सोमने गुरुपत्नी को परित्याग करनेकी इच्छानकी। उससे सुर और असुरों में महाभयानक युद्ध उपस्थितहोगया ५ बृहस्पतिजी के ऊपर शुक्राचार्य का द्वेषभावथा, इसकारण वह अपनेशिष्य असुरों समेत चन्द्रमाके पक्ष में हुए। इस ओर भगवान महादेवजी अपने पार्षदों समेत निजगुरुपुत्र बृहस्पति की ओरहुए ॥६॥ इन्द्रभी अपने सब देवताओं समेत अपनेगुरुबृहस्पतिजी के पक्षमें हुए। इसके पश्चात् ताराके निमित्त सुर असुर विनाशक महायुद्धहुआ ॥ ७ ॥ हेराजन्! कुछ दिनों के उपरांत अंगिराने यहसबवृत्तांत ब्रह्माजी से कहा। इस से ब्रह्माने आकर चन्द्रमा का बहुत तिरस्कार किया। ब्रह्माजीके कहनेसे चंद्र माने बृहस्पतिजी को तारादेदी ॥८॥ बृहस्पतिजी ने अपनी स्त्रीकोगर्भवती जानकर कहाकि—रेदुर्बुद्ध तूने मेरे क्षेत्र में दूसरे का वीर्य धारण कियाहै, शीघ्र इसका त्यागकर। अरे असति! तू स्त्रीजाति और मैं संतानकी कामनावालाहूं इस से मैं तुझे भस्म न करूंगा ॥ ९ ॥ पतिकी इसबातके सुनतेही ताराने लज्जितहो तत्कालही गर्भ से सुवर्णकीसी कांतिवालेकुमारका परित्यागकरदिया। हेराजन्! अत्यन्तसुन्दर कुमारको देखतेही उसपर बृहस्पति औरचन्द्रमा दोनोंही का चित्तचलायमानहुआ ॥ १० ॥ दोनों में परस्पर इस बातका विवादहोनेलगा कि, यह बालक मेरा है तेरा नहीं, इस विवाद को देखकर ऋषियों और देवताओं ने तारा से पूछाकि 'यह किसकापुत्र है' परन्तुतारा ने लज्जित होकर कुछभी उत्तर न दिया ॥ ११ ॥ अनन्तर उस बालक ने कुपित होकर माता से कहा कि अरे दुष्टा! तू क्यों नहीं बोलती, शीघ्र मुझ से अपने दोषकोकह ॥ १२ ॥ अनन्तर ब्रह्माजीने ताराको एकांत में बुलाय सांत्वनादेकर पूछा तबतारा ने धीरे२कहा कि 'सोमका है'। तबचन्द्रमा उस पुत्रको लेगये ॥ १३ ॥ लोककर्ता ब्रह्माजीने उस बालककी गंभीर बुद्धिको देखकर उसका नाम 'बुध' रक्खा। हेराजन्! नक्षत्रपतिचन्द्रमा को उस पुत्रसे अतिआनन्दप्राप्तहुआ ॥ १४ ॥ पहिलेही कह आये हैं कि इसी बुधके वीर्य से इलाके गर्भ में पुरूरवाकाजन्महुआ। वह अत्यन्तही

वने गीयमानान्सुरर्षिणा । तदन्तिकमुपेयाय देवीस्मरशरार्दिता ॥ १६ ॥ मित्राव रुणयोः शापादापन्ना नरलोकताम् । निशम्यपुरुषश्रेष्ठं कन्दर्पमिवरूपिणम् ॥१७॥ धृतिं विष्टभ्यललना उपतस्थेतदन्तिके । सतां विलोक्य नृपतिर्हर्षेणोत्फुल्ललोचनः उवाचश्लक्ष्णयावाचा देवींहृष्टतनूरुहः ॥१८॥ राजोवाच । स्वागतंतेवरारोहे आस्यतांकरवामकिम् । संरमस्वमयासाकं रतिर्नौशाश्वतीःसमाः ॥ १९ ॥ उर्वश्युवाच । कस्यास्त्वयिनसज्जेत मनोदृष्टिश्चसुन्दर । यदङ्गान्तरमासाद्य च्यवतेहरिरंसया ॥ २० ॥ एतावुरणकौराजन् न्यासौरक्षस्वमानद । संरंस्येभवतासाकं श्लाघ्यः स्त्रीणांवरःस्मृतः ॥ २१ ॥ घृतंमेवीरभक्ष्यं स्यान्नेक्षेत्वाऽन्यत्रमैथुनात् । विवाससंतत्तथेति प्रतिपेदेमहामनाः ॥ २२ ॥ अहोरूपमहोभावो नरलोकविमोहनम् ॥ कोनसेवेतमनुजो देवींत्वांस्वयमागताम् ॥ २३ ॥ तयासपुरुषश्रेष्ठो रमयन्त्यायथार्हतः । रेमेसुरविहारेषु कामंचैत्ररथादिषु ॥२४॥ रममाणस्तयादेव्या पद्मकिंजल्कगन्धया । तन्मुखामोदमुषितो मुमुदेऽहर्गणान्बहून् ॥ २५ ॥ अपश्यन्नुर्वशीमिन्द्रो गन्धर्वान्समनोदयत् । उर्वशीरहितं मह्यमास्थानं नातिशोभते ॥ २६ ॥ तउपेत्य महारात्रे तमसिप्रत्युपस्थिते । उर्वश्याउरणौ जह्रुर्न्यस्तौराजनिजायया ॥ २७ ॥ निशम्याक्रन्दितंदेवी पुत्रयोर्नीयमानयोः । हताऽस्म्यहंकुनाथेन नपुंसावीरमानिना ॥

विख्यातथा देवर्षि नारदनें स्वर्ग में उसके रूप, गुण, उदारता, शीलता, धन और विक्रमका गान किया कि जिससे उर्वशी यह सुनकर काम पीड़ित हो उस राजा के निकट आई ॥ १५ ॥ १६ ॥ मित्रावरुण के शाप से उर्वशी मनुष्य भावको प्राप्त हुईथी तब उस पुरुश्रेष्ठ पुरूरवा को कामदेव की समान रूपवान सुनकर अधीर भावसे उसके निकट स्वयंहीआ उपस्थितहुई॥१७॥हेराजन्! उर्वशी को देखतेही पुरुरवा के भी नेत्र आनंद से खिलउठे राजा नें पुलकित होकर मधुर वचनों से कहा। ॥ १८ ॥ कि हे वरारोहे ! आने में कोई क्लेश तो नहीं हुआ ? बैठो, बतलाओ मैं क्या करूं मेरेसाथ विहार करो मैं चाहता हूं कि हमारे तुम्हारे बीच मे बहुत दिनों तक सुखसे विहार होवे ॥ १९ ॥ उर्वशी ने कहा कि हे सुंदर ! तुम्हारे ऊपर किसका मन व नेत्र आसक्त नहोवे क्योंकि ऐसा नहीं है कि जो आपको देखकर विहार की इच्छा किसीकी बलवती न हो ॥ २० ॥ हे मानद ! जब आप इन दोनों भेड़ीके बच्चों की भली भांति रक्षा करोगे तो मैं तुम्हारे साथ विहार करूंगी जो उत्तम पुरुष है वही स्त्रियोंको प्रियहोता है ॥ २१ ॥ हे वीर ! मैं केवल घृतका भक्षण करूंगी और मैथुन कालके अतिरिक्त तुम्हें वस्त्ररहित नहीं देखूंगी यह यदितुमको स्वीकारहोतो मैं तुम्हारेसाथ विहार करूं पुरुरवा उसकी सुंदरता, मधुरता से मोहित होगया था अतएव उसने जो २ कुछ कहा उस सबको अंगीकारकरके उसनेकहा॥२२॥कि हे सुंदरि ! तुम्हारे आश्चर्य रूप और अद्भुत भाव को देखकर मनुष्य मोहितहोजाते हैं तुम स्वर्गगामिनी देवी होकरभी स्वयंही आईहो,कौनमनुष्य तुम्हारी सेवा नकरेगा ॥२३॥ यहकहकर श्रेष्ठपुरुष पुरुरवा उर्वशी के साथ देवताओंके क्रीड़ास्थल चैत्ररथ आदि स्थानोंमें विहारकरनेलगा॥२४॥कमलके केसरसी सुगंधिवाली उसअप्सराके संग विहारकरता हुआ वह राजा उसके मुखकी सुगंधिसे ऐसालोभितहोगया कि उसको आमोद प्रमोदमें बहुतसे दिन बीतगए ॥२५॥ इधर देवराज इंद्रने उर्वशीको न देख मेरी सभा उर्वशी बिना शोभाको नहीं प्राप्त होती यहकहकर उर्वशीको लानेके निमित्त गन्धर्वोंको भेजा ॥ २६ ॥ आधीरात्रिके समय जब घोर अन्धकारसे सम्पूर्ण जगतमें अंधेराहोरहाथा तब वह गंधर्व मर्त्यलोकमें आए और पुरूरवाके निकट उर्वशीने जो दोभेड़के बच्चे धरोहरके रूपसे रक्खेथे उनको हरलिया॥२७॥ उर्वशी उनदोनों भेड़ों को पुत्ररूपसे जानतीथी, गन्धर्वगण जब उनको लेजानेलगे तब वह बड़े करुणस्वरसे चिल्लानेलगी

॥२८॥ यद्विश्रम्भादहंनष्टा हृतापत्याचदस्युभिः । यःशेतेनिशिसंत्रस्तो यथानारी दिवापुमान् ॥ २९ ॥ इतिवाक्सायकैर्विद्धः प्रतोत्रैरिवकुञ्जरः । निशिनिस्त्रिंशमा- दाय विवस्त्रोऽभ्यद्रवद्रुषा ॥ ३० ॥ तेविसृज्योरणौतत्र व्यद्योतन्तस्मविद्युतः । आ- दायमेषावायांतंनग्नमैक्षतसापतिम् ॥ ३१ ॥ ऐलोऽपिशयनेजायामपश्यन्विमना इव । तच्चित्तोविह्वलःशोचन्बभ्रामोन्मत्तवन्महीम् ॥ ३२॥ सतांवीक्ष्यकुरुक्षेत्रेसर- स्वत्यांचतत्सखीः । पञ्चप्रहृष्टवदनाःप्राहसूक्तंपुरूरवाः ॥ ३३ ॥ अहोजायेतिष्ठ तिष्ठघोरेनत्यक्तुमर्हसि । मांत्वमद्याप्यनिर्वृत्यवचांसिकृणवावहै ॥ ३४ ॥ सुदेहोऽयं पतत्यत्रदेविदूरंहृतस्त्वया । खादन्त्येनंवृकागृध्रास्त्वत्प्रसादस्यनास्पदम् ॥ ३५ ॥ उर्वश्युवाच ॥ मामृथाःपुरुषोसित्वंमास्मत्वाऽद्युर्वृकाइमे । क्वापिसख्यंनवैस्त्रीणां वृकाणांहृदयंयथा ॥ ३६ ॥ स्त्रियोह्यकरुणाःक्रूरादुर्मर्षाःप्रियसाहसाः । घ्नन्त्यल्पा र्थेऽपिविश्रब्धंपतिंभ्रातरमप्युत ॥ ३७ ॥ विधायालीकविश्रम्भमज्ञेषुत्यक्तसौहृदाः । नवंनवमभीप्सन्त्यःपुंश्चल्यःस्वैरवृत्तयः ॥३८॥ संवत्सरांतेहिभवानेकरात्रंमयेश्वर । वत्स्यत्यपत्यानिचते भविष्यंत्यपराणिभोः ॥ ३९ ॥ अन्तर्वत्नीमुपालक्ष्यदेवींसप्रय यौपुरम् । पुनस्तत्रगतोऽब्दांतेउर्वशींवीरमातरम् ॥ ४० ॥ उपलभ्यमुदायुक्तःसमु

उर्वशी उसको सुनकर कहने लगी कि—हाय ! मैं इस दुष्ट स्वामी के हाथमें पड़कर मरगई। यह नपुंसक अपने आपको वीर कहकर अभिमान करताहै ॥ २८ ॥ इसपर विश्वास करके मै नष्ट होगई, मेरी संतानों को चोरोंने हरलिया । अहो ! यह ता दिनको पुरुष रहता है, परन्तु रात्रि को स्त्रीकी समान भीत होकर सोरहा ॥ २९ ॥ जैसे हाथी अंकुशसे विद्ध होता है वैसेही राजा उर्वशी के ऐसे वाक्य शरोंसे विद्धहो नगनही हाथमें खड्ग ले गन्धर्वोंके पीछे दौड़ा ॥ ३० ॥ उस को देखतेही गन्धर्वोंने तत्कालही उन दोनों मेषोंको छोडदिया और वह बिजली रूपहो चमकने लगे। राजा मेंढके बच्चोंको लेकरलौटा आताथा, किन्तु उससमय राजाको नंगा देखकर प्रतिज्ञा भंग होनेसे उर्वशी चलीगई ॥ ३१ ॥ पुरूरवा उर्वशीको शय्यामें न देखकर बड़ा दुःखित होगया उसका चित्त उर्वशीमें आसक्तथा। कातर होकर शोक तु हो उन्मत्तकीसमान पृथ्वीपर भ्रमण करने लगा॥ ३२ ॥ कुछ दिनके उपरांत कुरुक्षेत्रमें सरस्वतीके तटपर उस अप्सराको उसकी पांच सखियों सगेत देखपाया पुरूरवाने प्रसन्नचित्तहो सुन्दरीसे कहा, ॥ ३३ ॥ हे प्यारी ! खडीहो २ अहा निर्दय स्त्री मुझे सुखदिए बिना छोडदेना तुझे उचित नहींहै । आओ यहांपर बैठकर मुझसे बातेंकरो ॥ ३४ ॥ हेदेवि ! मेरे इस सुंदर शरीरको तूने खींचकर बाहर करादिया, देखो—यह इस स्थानमें गिरताहै और बिना तेरी कृपाके इस देहको गीध और भेड़िय खाजायगे ॥ ३५ ॥ उर्वशी ने कहा कि—हेराजन् ! मरे मतजाओ।तुम पुरुषहो धैर्यको धारण करो इन्द्रियोंको वशमें रक्खो । हे राजन्! कहींस्त्रियोंकी मित्रता नहीं निभती,क्योंकि उनका स्वभाव भेडियेकी समान होताहै॥३६॥ स्त्रियें स्वभावसेही अकरुण,क्रोधिन और असहनशील होतीहैं प्यारेके निमित्त अधर्मादिका साहस करती रहतीहैं और थोडेसे विषयमेंभी अपने विश्वास योग्य पति अथवा भाईकोमारडालती हैं ॥३७॥ जो व्यभिचारिणी और अपने इच्छानुसार कार्य करनेवाली स्त्री होतीहै वह सुहृदता को एकबारही छोड़ देतीहैं केवल नवीनही नवीन पतियोंपर उनकी अभिलाषा रहती है ॥ ३८ ॥ हेस्वामिन् ! सालके अन्तमें केवल एकदिन कोही मुझसे क्रीड़ा करसकोगे उससेही तुम्हारे कईएक संताने उत्पन्नहोंगी ॥ ३९ ॥ हेराजन् ! यह कहकर वह सगर्भास्त्री अपने नगरमें चलीगई । एकवर्षके उपरांत वह फिर उसीस्थानपर आई । पुररवा वीर प्रसविनी उर्वशीको देखकर परम आनंदित हुआ और उस

धासतयानिशाम् । अथैनमुर्वशीप्राहकृपणंविरहातुरम् ॥ ४१ ॥ गंधर्वानुपधावेमांस्तुभ्यंदास्यन्तिमामिति । तस्यसंस्तुवतस्तुष्टाअग्निस्थालींददुर्नृप ॥ उर्वशींमन्यमानस्तांसोऽबुध्यतचरन्वने ॥ ४२ ॥ स्थालींन्यस्यवनेगत्वागृहानाध्यायतोनिशि । त्रेतायांसंप्रवृत्तायांमनसित्रय्यवर्तत ॥ ४३ ॥ स्थालीस्थानंगतोऽश्वत्थंशमीगर्भं विलक्ष्यसः । तेनद्वेअरणीकृत्वाउर्वशीलोककाम्यया ॥ ४४ ॥ उर्वशींमन्त्रतोध्यायन्नधरारणिमुत्तराम् । आत्मानमुभयोर्मध्येयत्तत्प्रजननंप्रभुः ॥४५॥तस्यनिर्मन्थनाज्जातोजातवेदाविभावसुः । त्रय्यासविद्ययाराज्ञापुत्रत्वेकल्पितस्त्रिवृत् ॥ ४६ ॥ तेनायजतयज्ञेशंभगवंतमधोक्षजम् । उर्वशीलोकमन्विच्छन्सर्वदेवमयंहरिम् ॥ ४७ ॥ एकएवपुरावेदःप्रणवःसर्ववाङ्मयः । देवोनारायणोनान्यएकोऽग्निर्वर्णएवच ४८ पुरूरवसएवासीत् त्रयीत्रेतामुखेनृप। अग्निनाप्रजयाराजालोकंगांधर्वमेयिवान् ४९

इतिश्रीमद्भा०म०नवम०ऐलोपाख्यानेचतुर्दशोऽध्यायः ॥ १४ ॥

श्रीशुक उवाच ॥ ऐलस्यचोर्वशीगर्भात्षडासन्नात्मजानृप। आयुः श्रुतायुश्च सत्यायूरयोऽथविजयोजयः ॥ १ ॥ श्रुतायोर्वसुमान्पुत्रः सत्यायोश्चश्रुतंजयः । रयस्यसुतएकश्चजयस्यतनयोऽमितः ॥ २ ॥ भीमस्तुविजयस्याथकाञ्चनोहोत्रकस्ततः । तस्यजह्नुः सुतोगङ्गांगण्डूषीकृत्ययोऽपिबत् । जह्नोस्तु पूरुस्तत्पुत्रोबला

के साथ एकरात्रि वासकिया । जाते समय उर्वशीने राजाको विरहातुर देखकर कहाकि ॥४०॥ ॥ ४१ ॥ हेराजन् ! गन्धर्वोंको प्रसन्नकरो तो वह मुझको तुम्हें ददेंगे । हेमहाराज ! उर्वशीकी इस बातको सुनकर पुरूरवा ने गन्धर्वों की स्तुतिकी । इससे उन्होंने सन्तुष्टहोकर राजाको एक अग्निस्थालीदी । कामान्धराजा अग्निस्थालीको ही उर्वशीजानकर वनमें भ्रमण करनेलगा । फिर जानलिया कि यह उर्वशी नहीं है ॥४२॥ तब उस स्थालीको वनमें रखकर घर चलागया, और वहां भी रातको नित्यही उसकी चिन्ता कियाकरता; इससे त्रेतायुगके आरम्भमें उसके हृदयसे कर्मबोधक वेदत्रयी उत्पन्नहुई ॥ ४३ ॥ फिरवह उस स्थानपर कि जहां स्थाली रक्खीथी आया, वहां पर आकर उसने देखा कि—शमीवृक्षके गर्भसे एक पीपलका वृक्ष उत्पन्नहुआ है । अतएव इस के बीचमें अग्नि है—यह विचारकर उर्वशी के लोक प्राप्तकी कामना से राजाने पीपलकी दो अरणी बनाई, और अग्नि मथने लगा ॥ ४४ ॥ मन्त्रानुसार राजा नीचे की अरणी को उर्वशी और ऊपरकी अरणी को अपना स्वरूपजान, इन दोनों के बीचमें जो काष्ठ खण्डथा उसको पुत्ररूप से ध्यान करने लगा ॥ ४५ ॥ पुरूरवाके अरणि मन्थनद्वारा जातवेद अग्नि उत्पन्नहुआ । इस अग्नि को कि जो वेदोक्त संस्कार से आहवनीय, गार्हपत्य और दक्षिणाग्निरूप उत्पन्नहुआ उसे पुरूरवा ने अपना पुत्रस्थिर किया ॥ ४६ ॥ और उर्वशी के लोककी कामना करके उससे सर्वदेवमय यज्ञेश्वर भगवान हरिका यज्ञ किया ॥ ४७ ॥ हेराजन् ! पहिले सत्ययुग में सर्ववाणी का बीजरूप एक ओंकारही वेदरूप था; नारायणही एकमात्र देवता, अग्निभी एकही और वर्णभी एकहीथा ॥ ॥ ४८ ॥ हेराजन् ! त्रेतायुग के प्रथममें पुरूरवा से तीन वेद उत्पन्नहुए । वह राजा अग्निरूप प्रजाद्वारा गन्धर्वलोक को प्राप्तहुआ ॥ ४९ ॥

इतिश्रीमद्भागवतेमहापुराणेनवमस्कन्धेसरलाभाषाटीकायांचतुर्दशोऽध्यायः ॥ १४॥

श्रीशुकदेवजीबोलेकि–उर्वशीके गर्भसे पुरूरवा के छहपुत्र आयु, श्रुतायु, सत्यायु, रय, विजय और जय उत्पन्नहुए ॥१॥ इनमें से श्रुतायुका पुत्र वसुमान; सत्यायुका पुत्र श्रुतञ्जय; रयका पुत्र एक; जयका पुत्र अमित ॥ २ ॥ विजयका पुत्र भीमहुआ । भीमका पुत्र काञ्चन; काञ्चनका पुत्र होत्रक हुआ । जिस जह्नुने एकही चुल्लूसे गंगाजीको पानकर लियाथा वह इसी होत्रकसे उत्पन्न

कस्यात्मजोऽजकः ॥ ३ ॥ ततः कुशः कुशस्यापिकुशाम्बुर्मूर्तयोवसुः । कुशनाभ श्चत्वारोगाधिरासीत्कुशाम्बुजः ॥ ४ ॥ तस्यसत्यवतींकन्यामृचीकोऽयाचतद्विजः । वरंविसदृशंमत्वागाधिर्भार्गवमब्रवीत् ॥ ५ ॥ एकतः श्यामकर्णानांहयानां चन्द्रवर्चसाम् । सहस्रंदीयतांशुल्कंकन्यायाः कुशिकावयम् ॥ ६ ॥ इत्युक्तस्तन्मतं ज्ञात्वागतः सवरुणान्तिकम् । आनीयदत्त्वातानश्वानुपयेमेवराननाम् ॥ ७ ॥ सऋ षिः प्रार्थितः पत्न्याश्वश्र्वाचापत्यकाम्यया । श्रपयित्वोभयैर्मन्त्रैश्चरुंस्नातुंगतोमुनिः ॥ ८ ॥ तावत्सत्यवतीमात्रास्वचरुंयाचितासती । श्रेष्ठंमत्वातयायच्छन्मात्रेमातुर दत्स्वयम् ॥ ९ ॥ तद्विज्ञायमुनिः प्राहपत्नींकष्टमकारषीः । घोरोदण्डधरः पुत्रोभ्राताते ब्रह्मवित्तमः ॥ १० ॥ प्रसादितः सत्यवत्यामैवंभूदितिभार्गवः । अथतर्हिभवे त्पौत्रोजमदग्निस्ततोऽभवत् ॥ ११ ॥ साचाभूत्सुमहापुण्याकौशिकीलोकपावनी । रेणोः सुतांरेणुकांवैजमदग्निरुवाहयाम् ॥ १२ ॥ तस्यांवैभार्गवऋषेः सुतावसुम दादयः । यवीयाञ्जज्ञएतेषांरामइत्यभिविश्रुतः ॥ १३ ॥ यमाहुर्वासुदेवांशंहैहया नांकुलान्तकम् । त्रिःसप्तकृत्वोयइमांचक्रेनिःक्षत्रियांमहीम् ॥ १४ ॥ दुष्टंक्षत्रंभुवोभा रमब्रह्मण्यमनीनशत् । रजस्तमोवृतमहन्फल्गुन्यपिकृतेंऽहसि ॥ १५ ॥ राजोवाच ॥ किंतदंहोभगवतोराजन्यैरजितात्मभिः । कृतंयेनकुलंनष्टं क्षत्रियाणामभीक्ष्णशः ॥

हुआथा । इस जह्नु का पुत्र पुरू, उसका पुत्र बलाक, बलाकका पुत्र अजक, ॥ ३ ॥ अजकका पुत्र कुश, कुशके कुशाम्बु, मूर्तय.वसु और कुशनाभ यह चार पुत्र उत्पन्न हुए। उनमें से कुशम्बु के गाधि उत्पन्न हुआ ॥ ४.॥ उस गाधिके सत्यवती नामक एक कन्या हुई । द्विजवर ऋचीक ने गाधिसे उस कन्याको मांगाथा परन्तु राजाने उनको अयोग्यवर जानकर उनसे कहाकि ॥ ५ ॥ हे ब्रह्मन् ! चन्द्रमा की समान ज्योतिवाले और एक ओर के श्यामकर्ण वाले सहस्र अश्वमेरी कन्या का शुल्कदो, क्योंकि हम कुशिक वंशी हैं ॥ ६ ॥ इस बातको सुन ऋषिराजाका अभिप्राय जान वरुणके समीप गये, और वहां से वैसेही अश्व लाय राजाको दे उस कन्यासे व्याहकिया ॥ ७ ॥ कुछ कालके उपरांत ऋचीक की स्त्री सत्यवती और सत्यवती की माने पुत्रकी.कामना से चरु करने की प्रार्थना की । इससे पत्नीके निमित्त ब्रह्ममंत्र से और सासके निमित्त क्षात्रमंत्रसे दोचरु पकाकर ऋषिस्नान करनेको चलेगये ॥ ८ ॥ अपने चरूसे कन्या का चरु श्रेष्ठजान सत्यवतीकी माताने सत्यवतीका चरूमांगा; सत्यवती नेभी माताको अपना चरूदेदिया और स्वयं माताके चरू का भोजन किया ॥ ९ ॥ अनंतर मुनिने लौटकर उस वृत्तांतको जाना और पत्नीसे संबोधन करके कहाकि–तूनेअति बुराकर्म किया, चरूके बदलने से तेरेबड़ा भयानक क्षत्रिय प्रकृतिका और तेरी माताके श्रेष्ठ ब्रह्मज्ञ पुत्र होगा .॥ १० ॥ यह सुनकर सत्यवती अत्यंत भयभीत हुई और नाना प्रकार की विनयों से मुनिको.प्रसन्न करके कहाकि–हे भगवन् ! ऐसा न होवे । ऋषि प्रसन्न होकर बोलेकि–पुत्र नहीं तोतेरा पौत्र भयानक होगा । तदनंतर सत्यवती के जमदग्नि नामक पुत्र उत्पन्न हुआ ॥ ११ ॥ इसके उपरांत सत्यवती लोक पावनी महापुण्या कौशिकीनामक नदीहुई । जमदग्नि ने रेणुकी कन्या रेणुका से व्याह किया ॥ १२ ॥ उसके गर्भसे उन जमदग्नि के वीर्य से वसुमान आदि संतान उत्पन्न हुए । इनके छोटेभाईका नाम 'राम' था ॥ १३ ॥ इन्होंनेहैहय वंशका नाश किया, पण्डितजन इनको भगवानका अंश कहते हैं । उन्होंने पृथ्वीको २१ बार क्षत्रिय रहित किया था ॥ १४ ॥ पहिले क्षत्रिय जातिरज और तमोगुण से परिपूर्णहो अहंकार युक्त वेदके विरुद्ध चारीहो भूमंडल के भार स्वरूप होरहेथे, अतएव उनके सूक्ष्म अपराध के करने परभी परशुराम जी ने उनके प्राणोंका नाश कियाथा ॥ १५ ॥ राजा परीक्षित ने पूछाकि–हे ब्रह्मन् ! अजितेन्द्रिय

१६ ॥ श्रीशुक उवाच ॥ हैहयानामधिपतिरर्जुनः क्षत्रियर्षभः । दत्तं नारायणस्यांश माराध्य परिकर्मभिः ॥ १७ ॥ बाहून्दशशतं लेभे दुर्धर्षत्वमरातिषु । अव्याहतेन्द्रियौजः श्रीतेजोवीर्ययशोबलम् ॥ १८ ॥ योगेश्वरत्वमैश्वर्यं गुणा यत्राणिमादयः । चचाराव्याहतगतिर्लोकेषु पवनो यथा ॥१९॥ स्त्रीरत्नैरावृतः क्रीडन्रेवाम्भसि मदोत्कटः । वैजयन्तीं स्रजं बिभ्रद्रोध सरितं भुजैः ॥२०॥ विप्लावितं स्वशिबिरं प्रतिस्रोतः सरिज्जलैः । नामृष्यत्तस्य तद्वीर्यं वीरमानी दशाननः ॥ २१ ॥ गृहीतो लीलया स्त्रीणां समक्षं कृतकिल्बिषः । माहिष्मत्यां सन्निरुद्धो मुक्तो येन कपिर्यथा ॥ २२॥ स एकदा तु मृगयां विचरन्विपिने वने । यदृच्छयाऽऽश्रमपदं जमदग्नेरुपाविशत् ॥ २३ ॥ तस्मै स नरदेवाय मुनिरर्हणमाहरत् । ससैन्यामात्यवाहाय हविष्मत्या तपोधनः ॥ २४ ॥ स वीरस्तत्र तद्दृष्ट्वा आत्मैश्वर्यातिशायनम् । तन्नाद्रियताग्निहोत्र्यां साभिलाषः सहैहयः ॥२५॥ हविर्धानीमृषेर्दर्पान्नरान्हर्तुमचोदयत् । ते च माहिष्मतीं निन्युः सवत्सां क्रन्दतीं बलात् ॥ २६ ॥ अथ राजनि निर्याते राम आश्रम आगतः । श्रुत्वा तत्तस्य दौरात्म्यं चुक्रोधाहिरिवाहतः ॥ २७ ॥ घोरमादाय परशुं सतूणं चर्म कार्मुकम् । अन्वधावत दुर्धर्षो मृगेन्द्र इव यूथपम् ॥ २८ ॥ तमापतन्तं भृगुवर्यमोजसा धनुर्धरं बाणपरश्वधायुधम् । ऐणेयचर्माम्बरमर्कधामभिर्युतं जटाभिर्ददृशे पुरीं विशन् ॥ २९॥ अचोदयद्धस्तिरथाश्व

क्षत्रियों ने भगवान परशुरामका क्या अपराध कियाथा कि जिससे उन्हों ने वारंवार क्षत्रिय कुलका नाश किया ॥ १६ ॥ श्रीशुकदेवजी बोलेकि-हैहयवंशी क्षत्रियों के अधिपति व क्षत्रियों में उत्तम कार्त्तवीर्य्यार्जुनने परिचर्याद्वारा नारायणके अंशके अंश भगवान दत्तात्रेयकी आराधनाकरके १७॥ सहस्रबाहु और बड़ाभारी पराक्रम इन्द्रियशक्ति, सामर्थ्य, लक्ष्मी, प्रभाव, पराक्रम, बल ॥ १८॥ और योगेश्वरत्व प्राप्तकियाथा। और जिसमें अणिमादि गुण विराजमानहैं उसऐश्वर्य कोभीप्राप्तकियाथा। इसकारण वह अखंड गतिसे पवनकीसमान समस्तलोकों मे विचरणकिया करताथा ॥१९॥ एक समय उस मदमत्त अर्जुन ने वैजयन्ती माला धारणकर बहुतसी स्त्रियोंके साथ नर्मादा के जलमें क्रीड़ा करतेहुए बाहुद्वारा उसनदीकाजल रोकलिया॥२०॥उसी समय रावणने दिग्विजयके निमित्त ठैहरहो माहिष्मती पुरीके निकट डेराडाला। कार्त्तवीर्य्यार्जुनके जल रोकलेने से नदीका प्रवाह उलटाहो तटको डुबोनेलगा । प्रतिकूल बाहिनी नदी के जलसे उसका डेरा डूबगया ॥ २१ ॥ अभिमानी रावणने अर्जुनके उस कार्यका सहनकर तत्कालही उसपर आक्रमण किया। कार्तवीर्य ने स्त्रियोंके सामनेही बानरकी समान सहजहींसे उसको पकड़ माहिष्मती नगरीमे बंद कररक्खा, अंतमें कुछ दिनोंके उपरांत तिरस्कार करके छोड़दिया॥ २२ ॥ वह एकदिन आखेटके निमित्त बाहरहो एकांत बनमें भ्रमण करता २ जमदग्नि मुनिके आश्रममें गया ॥ २३ ॥ जमदग्नि मुनिने कामधेनु द्वारा मंत्री, सेना और घुड़सवारों समेत राजाका सत्कार किया ॥ २४ ॥ मुनिकी उस कामधेनु को अपने ऐश्वर्यकी अपेक्षा श्रेष्ठ देख अर्जुनने उस गायके लेनेकी इच्छाकी ॥२५॥ इसकारण आतिथ्य सत्कारसे प्रसन्न न हुआ। अहंकार वश अपने मनुष्योंको उसने ऋषिकी कामधेनुके हरण करनेकी आज्ञादी; इससे वह रोतीहुई बछड़े समेत गायको बलपूर्वक माहिष्मती नगरी को लेगये ॥ २६ ॥ अनन्तर राजा के चलेजाने पर मुनिपुत्र परशुरामजी आश्रममें आए। अर्जुन की अधम वार्त्ताको सुन वह आहत सर्पकी समान क्रोधितहुए ॥ २७ और घोर परशु, तूण धनुष और ढाललेकर सिंह जैसे हाथियोंके यूथपतिके पीछे दौड़ताहै वैसही वह राजाके पीछे दौड़े ॥२८॥ कार्तवीर्यने नगरीमें प्रवेश करते २ देखा कि—भृगु श्रेष्ठ परशुराम मृगचर्म पहिने, धनुष, बाण और परशु धारण किये बड़े वेगसे आरहेहैं, और सूर्यकी समान प्रकाशित उनकी जटाएं इधर उधर

परिघासिबाणर्ष्टिशतघ्निशक्तिभिः । अक्षौहिणीःसप्तदशातिभीषणास्ताराम
एकोभगवानसूदयत् ॥ ३० ॥ यतोयतोऽसौप्रहरत्परश्वधोमनोऽनिलौजाःपरचक्रसू-
दनः । ततस्ततश्छिन्नभुजोरुकन्धरानिपेतुरुर्व्यांहतसूतवाहनाः॥ ३१ ॥ दृष्ट्वास्वसै-
न्यंरुधिरौघकर्दमेरणाजिरेरामकुठारसायकैः । विवृक्णवर्मध्वजचापविग्रहंनिपाति-
तंहैहयआपतद्रुषा ॥३२॥अथार्जुनःपञ्चशतेषुबाहुभिर्धनुःषुबाणान्युगपत्ससन्दधे ।
रामायरामोऽस्त्रभृतांसमग्रणीस्तान्येकधन्वेषुभिराच्छिनत्समम् ॥ ३३ ॥ पुनःस्व
हस्तैरचलान्मृधेऽङ्घ्रिपानुत्क्षिप्यवेगादभिधावतोयुधि । भुजान्कुठारेणकठोरनेमिना
चिच्छेदरामःप्रसभंत्वहेरिव ॥ ३४ ॥ कृत्तबाहोःशिरस्तस्यगिरेःशृङ्गमिवाहरत् ।
हतेपितरितत्पुत्राअयुतंदुद्रुवुर्भयात् ॥३५॥ अग्निहोत्रीमुपावर्त्यसवत्सांपरवीरहा ।
समुपेत्याश्रमंपित्रेपरिक्लिष्टांसमर्पयत्॥३६॥स्वकर्मतत्कृतंरामःपित्रेभ्रातृभ्यएवच ।
वर्णयामासतच्छ्रुत्वाजमदग्निरभाषत ॥ ३७ ॥ रामराममहाबाहोभवान्पापमकार
षीत् । अवधीन्नरदेवंयत्सर्वदेवमयंवृथा ॥ ३८ ॥ वयंहिब्राह्मणास्ताातक्षमयाऽर्हण
तांगताः । ययालोकगुरुर्देवःपारमेष्ठ्यमियात्पदम् ॥ ३९ ॥ क्षमयारोचतेलक्ष्मी-
र्ब्राह्मीसौरीयथाप्रभा । क्षमिणामाशुभगवांस्तुष्यतेहरिरीश्वरः ॥ ४० ॥ राज्ञोमूर्धाऽ
भिषिक्तस्यवधोब्रह्मवधाद्गुरुः । तीर्थसंसेवयाचांहोजह्यङ्गाच्युतचेतनः ॥ ४१ ॥
इतिश्रीमद्भा०म०नवम०पञ्चदशोऽध्यायः ॥ १५ ॥

चिग्घर रहीहैं ॥ २९ ॥ यह देखनेही अर्जुनने गदा, असि बाण, ऋष्टि शतघ्नी और शक्ति शस्त्रधारी
हाथी, घोड़े रथ और पैदलोंवाली सत्रह अक्षौहिणी सेनाको भेजदिया, किंतु भगवान परशुरामजी
ने अकेलेही उन सबका तत्कालही नाश करदिया ॥ ३० ॥ मन और वायुकी समान वेगवान
शत्रु सैन्य नाशक वह राम जहां २ परशुका प्रहार करनेलगे; उसी २ स्थानके योद्धागण छिन्नबाहु
छिन्नउरु और छिन्नकंधेहो पृथ्वीपर गिरने लगे और उनके अश्व, सारथी सबही निहत होगये ।
॥ ३१ ॥ हैहयपति अर्जुनने देखा कि—रणभूमिमें रुधिरकी धारासे कीचहोरहीहै और परशुराम
के कुठार व बाणके प्रहारसे अपने सैनिकों के अस्त्र शस्त्र और शरीर छिन्न भिन्न होगये हैं और
प्रायः सबही सेनाका नाश होगयाहै यह देखकर वह अति क्रोधितहो स्वयही समरक्षेत्रमें आया ३२
अनन्तर अर्जुनने परशुरामजीको देख अपनी सब भुजाओं से एकबारही पांचसौ धनुष ग्रहणकर
पांचसौ बाणछोड़े । अस्त्रधारियों में शिरोमणि परशुरामजीने केवल अपने एक धनुष के बाणोंसही
अर्जुनके सब धनुषों को काटदिया ॥ ३३ ॥ अनन्तर सहस्रार्जुन अपनी भुजाओं से बड़े २ पर्वत
वृक्षों को उखाड़ बड़ेवेग से समरमें परशुरामजीकीओर दौड़ा । परशुरामजी ने कठोरधारवाले कु-
ल्हाड़े से, सर्पके फणकीसमान सब भुजाओंको काटकर ॥ ३४ ॥ उस छिन्नबाहु अर्जुनका शिर
भी पर्वत के शिखरकी समान काटगिराया । हे राजन् ! पिताके मरतेही उसके दश सहस्रपुत्रभय
से भागगये ॥ ३५ ॥ शत्रुओं के मारनेवाले परशुरामजी ने बछडे समेत उस कामधेनुको ले
आश्रम में आय क्लेशितगायको पिताके हाथ में अर्पणकिया ॥३६॥ परशुरामजी ने आकर अपने
कियेहुए कर्मको पिता व भाइयों से कहा, उस वृत्तांतको सुनकर जमदग्नि ने कहा ॥३७॥ कि—हे
राम! हेराम ! हेमहाबाहो! तुमनेयह पाप किया । कि सर्व देवमय राजाको मारडाला ॥ ३८ ॥ हे
तात ! हम ब्राह्मणक्षमा सेही पूजितहुए हैं । इस क्षमागुण द्वाराही ब्रह्माजी लोकगुरुहोकर श्रेष्ठपदको
प्राप्तहुए हैं ॥ ३९ ॥ हेवत्स ! क्षमाही से सूर्य की प्रभाके समान ब्रह्मश्री शोभापाती है और क्षमा
वान मनुष्योंके ऊपरही भगवान ईश्वर सन्तुष्टरहते हैं॥४०॥हेपुत्र ! अभिषिक्त क्षत्रियराजाकामारना
ब्रह्महत्यासे भी भारी है । अतएव तुम भगवान में चित्तलगाय तीर्थ सेवाद्वारा पापमोचनकरो ॥४१॥
इतिश्री मद्भा० म० नवम० सरलभाषाटीकायां पञ्चदशोऽध्यायः ॥ १५ ॥

श्रीशुक उवाच ॥ पित्रोपशिक्षितोरामस्तथेतिकुरुनन्दन । संवत्सरंतीर्थयात्रां चरित्वाऽऽश्रममाव्रजत् ॥ १ ॥ कदाचिद्रेणुकायातागङ्गायांपद्ममालिनम् । गन्धर्व राजंक्रीडन्तमप्सरोभिरपश्यत ॥ २ विलोकयन्तीक्रीडन्तमुदकार्थंनदींगता । होम वेलांनसस्मार किंचिच्चित्ररथस्पृहा ॥३॥ कालात्ययंतंविलोक्यमुनःशापविशंकि‍ता । आगत्यकलशंतस्थौपुरोधायकृतांजलिः ॥ ४ ॥ व्यभिचारंमुनिर्ज्ञात्वापत्न्याः प्रकुपितोऽब्रवीत् । घ्नतैनांपुत्रकाःपापामित्युक्तास्तेनचक्रिरे ॥ ५ ॥ रामःसंचोदितः पित्राभ्रातॄन्मात्रासहावधीत् । प्रभावज्ञोमुनेःसम्यक्समाधेस्तपसश्चसः ॥ ६ ॥वरेण च्छन्दयामासप्रीतःसत्यवतीसुतः । वव्रेहतानांरामोऽपिजीवितंचास्मृतिंवधे ॥ ७ ॥ उत्तस्थुस्तेकुशलिनोनिद्रापायइवाञ्जसा । पितुर्विद्वांस्तपोवीर्यंरामश्चक्रेसुहृद्वधम् ॥ ८ ॥ येऽर्जुनस्यसुताराजन्स्मरन्तःस्वपितुर्वधम् । रामवीर्यपराभूतालेभिरेशर्मनक्व- चित् ॥ ९ ॥ एकदाऽऽश्रमतोरामेसभ्रातरिवनंगते । वैरंसिषाधयिषवोलब्धच्छिद्रा उपागमन् ॥१०॥ दृष्ट्वाग्न्यगार आसीनमावेशितधियं मुनिम् । भगवत्युत्तमश्लोके जघ्नुस्तेपापनिश्चयाः ॥ ११ ॥ याच्यमानाःकृपणया राममात्राऽतिदारुणाः । प्रसह्य शिरउत्कृत्य निन्युस्तेक्षत्रबन्धवः ॥१२॥ रेणुकादुःखशोकार्ता निघ्नन्त्यात्मानमात्म- ना । रामरामेतितातेतिविचुक्रोशोच्चकैः सती ॥ १३ ॥ तदुपश्रुत्यदूरस्था हाराम-

श्रीशुकदेवजीबोले कि—हे कुरुनन्दन ! पिताके उपदेशानुसार परशुरामजी 'जो आज्ञा' ऐ-साकहकर एक सालतक तीर्थपर्यटन करते रहे । फिर आश्रम में लौटआये ॥ १ ॥ हेराजन् ! एक समय रेणुका जल लेनेको श्रीगङ्गाजीपरगई वहां गन्धर्वराज चित्ररथको पद्ममाला धारण कियेहुए अप्सराओं के साथ क्रीड़ा करतेदेखा ॥ २ ॥ रेणुकानदीमें जल लेने गईथी वहां क्रीडासक्त गन्धर्व राजको देख उसपर कुछ इच्छावती होकर खडी रहगई । इधर होमके समयका स्मरण नहीं रहा॥ ॥ ३ ॥ फिर उसने बिचारा कि समय बहुत व्यतीत होगया । तब मुनि के शापसे डरतीहुई वहां पर आय कलशे को आगेरख वह हाथजोड़कर खड़ी होगई ॥ ४ ॥ इधर स्त्री के व्यभिचार को जान मुनिने क्रोधित होकर कहाकि—हेपुत्रों ! इस दुष्टास्त्री को मारडालो । परन्तु पुत्रों ने उनकी आज्ञा न मानी ॥ ५ ॥ परशुरामजी ने पिताकी आज्ञासे माता और भाइयों को मारडाला । वे पिता की समाधि और तपस्या के प्रभावको भलीप्रकार जानते थे ॥ ६ ॥ जमदग्नि मुनिने प्रसन्नहोकर परशुरामजीसे बर मांगने को कहा । उनसे परशुरामजीने यह बरमांगा कि यह मरेहुए मनुष्य फिर जीवितहोजांय और इनको जो मैंने मारा है उसका स्मरण कदापिनहो ॥ ७ ॥ हेराजन् ! बर देने के उपरांत वे सब मरेहुए मनुष्य स्वस्थहो सोतहुए मनुष्यकी समान शीघ्रही उठबैठे । परशुराम जी पिताके तपके प्रभाव को भलीभांति से जानते थे इसही से उन्होने सुहृदों का बध कियाथा ॥ ॥ ८ ॥ हेराजन् ! सहस्रार्जुन के जो पुत्रथे वे परशुरामजी के पराक्रमसे पराजितहो अपने पिताके बध वृत्तांतका स्मरण करतेहुए कभी सुखी नहीं रहते थे ॥९॥ एकसमय परशुरामजी भाइयोंसमेत आश्रम से बनको गयेथे कि उसी समय सब सहस्रार्जुनके पुत्र पिताके बधका बदला लेनेका स-मय विचार वहांपर आये ॥ १० ॥ और अग्निशाला में भगवान में ध्यानलगाये जमदग्निमुनिको बैठादेख उन दुष्टों ने उनको मारडाला ॥ ११ ॥ परशुरामजी की माता ने कातरभावसे पतिकीप्राण रक्षाके निमित्त बहुतकुछ प्रार्थनाकी, परन्तुतौभी वे निष्ठुर अधमक्षत्रिय बलपूर्वक उनकाशिरकाटकर लेगये ॥१२॥सतीरेणुका अपने दुःख के शोकसे पीड़ितहो अपनेहीआप हाथोंसे छातीमाथा कूटकर 'हाराम!'हाराम' ! 'हातात! हातात! कह ऊंचेस्वर से रोनेलगी॥१३॥दूरसे 'हाराम ! ' इसशब्दको

स्यार्तं वत्सवनम् । त्वरयाऽऽश्रममासाद्य ददृशेपितरंहतम् ॥ १४ ॥ तद्दुःखरोषाम-र्षार्तिशोकवेगविमोहितः । हातातसाधोधर्मिष्ठ त्यक्त्वाऽस्मान्स्वर्गतोभवान् ॥ १५ ॥ विलप्यैवंपितुर्देहं निधायभ्रातृषुस्वयम् प्रगृह्यपरशुंरामः क्षत्रान्तायमनोदधे ॥ १६ ॥ गत्वामाहिष्मतींरामो ब्रह्मघ्नविहतश्रियम् । तेषांसशीर्षभीराजन्मध्ये चक्रेमहागिरिम् ॥ १७ ॥ तद्रक्तेननदीं घोरामब्रह्मण्यभयावहाम् । हेतुंकृत्वापितृवधं क्षत्रेऽमंगलकारिणि ॥ १८ ॥ त्रिःसप्तकृत्वःपृथिवींकृत्वा निःक्षत्रियांप्रभुः । स्यमन्तपंचके चक्रेशोणितोदान्ह्रदान्नव ॥ १९ ॥ पितुःकायेनसंधाय शिरआदायबर्हिषि । सर्वदेवमयं देवमात्मानमयजन्मखैः ॥ २० ॥ ददौप्राचींदिशंहोत्रे ब्रह्मणेदक्षिणांदिशम् । अध्वर्यवेप्रतीचींवैउद्गात्रे उत्तरां दिशम् ॥ २१ ॥ अन्येभ्योऽवान्तरदिशः कश्यपायच मध्यतः । आर्यावर्तमुपद्रष्ट्रे सदस्येभ्यस्ततःपरम् ॥ २२ ॥ ततश्चावभृथस्नानविधूताशेषकिल्बिषः । सरस्वत्यांब्रह्मनद्यां रेजेऽब्भ्रइवांशुमान् ॥ २३ ॥ स्वदेहंजमदग्निस्तु लब्ध्वासंज्ञानलक्षणम् । ऋषीणांमण्डल सोऽभूत्सप्तमोरामपूजितः ॥ २४ ॥ जामदग्न्योऽपिभगवान्रामः कमललोचनः । आगामिन्यन्तरे राजन्वर्तयिष्यतिवैबृहत् । ॥ २५ ॥ आस्तेऽद्यापिमहेन्द्राद्रौ न्यस्तदण्डःप्रशान्तधीः । उपगीयमानचरितः सिद्धगन्धर्वचारणैः ॥ २६ ॥ एवंभृगुषुविश्वात्मा भगवान्हरिरीश्वरः । अवतीर्यपरंभारं भुवोऽहन्बहुशोनृपान् ॥ २७ ॥ गाधेरभून्महातेजाः समिद्धइवपावकः । तपसाक्षात्रमुत्सृज्य योलेभेब्रह्मवर्चसम् ॥ २८ ॥ विश्वामित्रस्यचैवासन्पुत्रा एकशतंनृप । म

सुनकर सबभाइयोंनेशीघ्रतापूर्वक आश्रम में आकर देखा कि पिता मारेगये ॥ १४ ॥ वे दुःखक्रोध से अधीर होकर मूर्छित होगये । "हातात ! हासाधो ! हा धर्मिष्ठ ! हमको छोड़कर आप स्वर्गको चलेगये" ॥ १५ ॥ इस भांति नानाप्रकार से विलापकर परशुरामजी पिताकीमृत देहको भाइयों के समीपरख आप क्षत्रियवंश के नाशकरने में तत्परहुए ॥ १६ ॥ हेराजन् ! परशुरामजी ने ब्रह्महत्या से श्रीहीन माहिष्मती पुरी में आकर मध्यस्थल में सहस्रार्जुन के पुत्रों के मस्तकों द्वारा एकबड़ा पर्वत बनादिया ॥ १७ ॥ अनन्तर परशुरामजी ने उन के रुधिर से एकबड़ीनदी बहाई; वह नदी ब्रह्मद्वेषियों का अत्यन्तही भयानक है । तदनन्तर उन्होंने पितृवधके कारण अन्यायवर्त्ती क्षत्रियों को मारमार इक्कीसवेर पृथ्वी निःक्षत्रिकी । इसप्रकार युद्धक्षेत्र में नौ रुधिर के कुण्डबनाये ॥ १८ । १९ ॥ परशुरामजी नेमरेहुए पिताके मस्तकको उनके धड़मे मिलाय,कुशों के ऊपररख नानाप्रकारकेयज्ञों द्वारा सर्वदेवमय भगवान की पूजाकी ॥ २० ॥ उस यज्ञ में होता को पूर्वदिशा, ब्रह्माको दक्षिण दिशा, अध्वर्युको पश्चिमदिशा, उद्गाताको उत्तरदिशा ॥ २१ ॥ अन्यान्य ऋत्विजों को दिशाओं के कोण, कश्यपजी को मध्यस्थल और उपद्रष्टा को आर्यावर्त्त देश दक्षिणामें दिया,इस के उपरांत सभासदों को भी यथायोग्य भूमि दक्षिणामें दी ॥ २२ ॥ तदनन्तर ब्रह्मनदी सरस्वती में अवभृथ स्नानकर समस्त पापोंको धोय स्वच्छ सूर्यकी समान विराजमानहुए ॥ २३ ॥ इधर जमदग्निमुनि राम से पूजितहो स्मृतिरूप चिह्नवाला शरीरपाकर सप्तर्षिमण्डल में सातवेंऋषि हुए ॥ २४ ॥ हेराजन् ! कमललोचन भगवान परशुरामजी भी आगामी मन्वन्तर में सप्तर्षि होंगे ॥ २५ ॥ वह क्षत्रियों के मारने का आग्रह छोड़ शांतचित्तहो अबतक महेंद्रपर्वत में विराजमानहैं । सिद्ध,चारण और गंधर्व गण सदैव उनके विचित्र चरित्रोंका गानकरतेरहते हैं ॥ २६ ॥ इसप्रकार से विश्वात्माभगवान हरि ने भृगुकुल में अवतार ले बहुतबार क्षत्रियों का बधकर भूमि के भारका हरण कियाथा ॥ २७ ॥ हे राजन् ! गाधिसे प्रदीप्तअग्नि के समान महातेजस्वी विश्वामित्रउत्पन्नहुए । उन्होंने तप के प्रभाव से क्षत्रियत्व को छोड़कर ब्रह्मतेज प्राप्त कियाथा ॥ २८ ॥ इन विश्वामित्र के सौपुत्रउत्पन्न

ध्यमस्तुमधुच्छन्दा मधुच्छन्दस एव ते ॥ २९ ॥ पुत्रंकृत्वाशुनःशेपं देवरातंचभार्गवम्। आजीगर्तंसुतानाह ज्येष्ठएषप्रकल्प्यताम् ॥३०॥ योवैहरिश्चन्द्रमखे विक्रीतः पुरुषःपशुः। स्तुत्वादेवान्प्रजेशादीन्मुमुचे पाशबन्धनात् ॥ ३१ ॥ योरातोदेवयजने देवैर्गाधिषुतापसः। देवरातइतिख्यातः शुनःशेपःसभार्गवः ॥३२॥ येमधुच्छन्दसोज्येष्ठाः कुशलंमेनिरेनतत्। अशपत्तान्मुनिःक्रुद्धो म्लेच्छाभवतदुर्जनाः ॥ ३३ ॥ सहोवाचमधुच्छन्दाः सार्धंपञ्चाशताततः॥ यन्नोभवान्सजानीते तस्मिंस्तिष्ठामहे वयम् ॥ ३४ ॥ ज्येष्ठंमन्त्रदृशं चक्रुस्त्वामन्वंचो वयंस्महि। विश्वामित्रःसुतानाह वीरवन्तोभविष्यथ। येमानंमेऽनुगृह्णन्तो वीरवन्तमकर्तमाम् ॥ ३५॥ एषवःकुशिकावीरो देवरातस्तमन्वित। अन्येचाष्टकहारीतजयक्रतुमदादयः ॥ ३६ ॥ एवंकौशिकगोत्रंतु वैश्वामित्रैःपृथग्विधम्। प्रवरान्तरमापन्नं तद्धिचैवंप्रकल्पितम् ॥ ३७ ॥

इति श्रीमद्भागवते महापुराणे नवमस्कन्धे षोडशोऽध्यायः ॥ १६ ॥

श्रीशुकउवाच॥ यःपुरूरवसःपुत्र आयुस्तस्याभवन्सुताः। नहुषःक्षत्रवृद्धश्च रजीरम्भश्चवीर्यवान् ॥१॥अनेनाइतिराजेन्द्र शृणुक्षत्रवृधोऽन्वयम्। क्षत्रवृद्धसुतस्यासन्सुहोत्रस्यात्मजास्त्रयः ॥२॥ काश्यःकुशोगृत्समदइति गृत्समदादभूत्। शुनकः शौनकोयस्य बह्वृचप्रवरोमुनिः॥३॥काश्यस्यकाशिस्तत्पुत्रो राष्ट्रोदीर्घतमःपिता। धन्वन्तरिर्दैर्घतमआयुर्वेदप्रवर्तकः ॥ ४॥ यज्ञभुग्वासुदेवांशःस्मृतमात्रार्तिनाशनः

हुए उनमें से एक बांचवालेकानाम मधुच्छंदाथा इससे सब मधुच्छन्दा केहीनामसे विख्यातहुए ॥ २९ ॥ महातपा विश्वामित्र ने भृगुवंशीय अजीगर्त्त के पुत्र शुनःशेफ को देवरातनामकपुत्रकरअपने दूसरे पुत्रों से कहाथा कि तुम इस को ज्येष्ठभाईजानो ॥ ३० ॥ पिताका बेचाहुआ पुरुष, पशु,शुनःशेफ हरिश्चन्द्र के यज्ञमें प्रजापति आदि देवताओं की स्तुति कर बन्धन से छूटगयाथा' ॥ ३१ ॥ अतएव वह भृगुवंशियों में होकरभी देवताओं के दियेजाने के कारण गाधिवंश में 'देवरात'के नाम से विख्यातहुआ ॥ ३२ ॥ विश्वामित्रमुनि के जो मधुच्छन्दानामक ज्येष्ठपुत्रथे उन्होंने शुनःशेफको ज्येष्ठबनाने में अपना अमंगलसमझा, अतएव मुनिने क्रोधितहो उनको शाप दिया कि "तुम सब अत्यन्त दुष्टहो अतएव तुम दुर्जन म्लेच्छहोओ" ॥३३॥ इस के उपरांत मध्यम मधुच्छन्दाके पचास छोटे भाई पिता के निकटआकर कहनेलगे कि-आप हमारे पिताहो आपहमसे ऊंचा नीचा जो कहेंगे उसी को हम स्वीकारकरेंगे ॥ ३४ ॥ यह कहकर उन्होंने मन्त्रदर्शी शुनःशेफ को अपना ज्येष्ठकिया और सबने कहा कि-हम तुमसे छोटे हैं। विश्वामित्र ने प्रसन्नहोकर उनपुत्रों से कहा कि-हे वत्सो ! तुमने मेरामानरख मुझको पुत्रवान किया अतएव तुमभी पुत्रवान होओगे ॥ ३५॥ हे कुशिकगण ! यह देवरात कौशिकही गोत्र है, क्योंकि यह मेरा पुत्रहुआ है; अतएव तुम इस की सेवाकरो। विश्वामित्रके और भी अष्टक, हारीत, जय, क्रतुमान आदि अनेक पुत्रहुए ॥३६॥ इसप्रकारसे विश्वामित्रजी के पुत्रों द्वारा कौशिकगोत्र नानाप्रकारकाहुआ। देवरात के ज्येष्ठ करने से दूसरे प्रवर प्राप्तहुए ॥ ३७ ॥

इति श्री मद्भागवते महापुराणे नवम स्कंधे सरला भाषाटीकायां षोडशोऽध्यायः ॥ १६ ॥

श्रीशुकदेवजी बोले कि—हेराजेन्द्र ! पुरूरवाके आयु नामक जो पुत्रहुआ उसके नहुष,क्षत्रवृद्ध, रजिरंभ और अनेना यह पांच पुत्रहुए इनमेंसे क्षत्रवृद्धका वंशसुनो। क्षत्रवृद्धका पुत्र सुहोत्र हुआ। उसके तीन पुत्रहुए, ॥ १—२ ॥ जो काश्य, कुश और गृत्समद के नामसे कहेजातेथे। उनमेंसे गृत्समदसे शुनकने जन्म ग्रहण किया। उसका पुत्र शौनक हुआ जो ऋग्वेदियोंमें उत्तम कहेजातेहैं ॥ ३ ॥ काश्यका पुत्र काशि काशिका पुत्र राष्ट्र और उसके दीर्घतमा हुआ। दीर्घतमाके पुत्र धन्वन्तरीजीहुए कि जिन्होंने वैद्यकशास्त्र प्रवृत्त किया ॥ ४ ॥ ये भगवानके अवतार

तत्पुत्रः केतुमानस्य जज्ञे भीमरथस्ततः ॥ ५ ॥ दिवोदासो द्युमांस्तस्मात्प्रतर्दन इति स्मृतः । स एव शत्रुजिद्वत्स ऋतध्वज इतीरितः ॥ तथा कुवलयाश्वेति प्रोक्तोऽलर्कादयस्ततः ॥ ६ ॥ षष्टिवर्षसहस्राणि षष्टिवर्षशतानि च । नालर्कादपरो राजन्मेदिनीं बुभुजे युवा ॥ ७ ॥ अलर्कात्संततिस्तस्मात्सुनीतोऽथ सुकेतनः । धर्मकेतुः सुतस्तस्मात्सत्यकेतुरजायत ॥ ८ ॥ धृष्टकेतुः सुतस्तस्मात्सुकुमारः क्षितीश्वरः । वीतिहोत्रस्य भर्गोऽतो भार्गभूमिरभून्नृपः ॥ ९ ॥ इतीमे काशयो भूपाः क्षत्रवृद्धान्वयायिनः । रम्भस्य रभसः पुत्रो गम्भीरश्चाक्रियस्ततः ॥ १० ॥ तस्य क्षेत्रं ब्रह्म जज्ञे शृणु वंशमनेनसः । शुद्धस्ततः शुचिस्तस्मात्त्रिककुद्धर्मसारथिः ॥ ११ ॥ ततः शांतरयो जज्ञे कृतकृत्यः स आत्मवान् । रजेः पञ्चशतान्यासन्पुत्राणाममितौजसाम् ॥ १२ ॥ देवैरभ्यर्थितो दैत्यान्हत्वेन्द्रायाददाद्दिवम् । इन्द्रस्तस्मै पुनर्दत्त्वा गृहीत्वा चरणौ रजेः ॥ १३ ॥ आत्मानमर्पयामास प्रह्लादाद्यरिशङ्कितः । पितर्युपरते पुत्रा याचमानाय नो ददुः ॥ १४ ॥ त्रिविष्टपं महेन्द्राय यज्ञभागान्समाददुः । गुरुणा हूयमानेऽग्नौ बलभित्तनयान्रजेः ॥ १५ ॥ अवधीद्भ्रंशितान्मार्गान्न कश्चिदवशेषितः । कुशात्प्रतिः क्षात्रवृद्धात्संजयस्तत्सुतो जयः ॥ १६ ॥ ततः कृतः कृतस्यापि जज्ञे हर्यबलो नृपः । सहदेवस्ततो हीनो जयसेनस्तु तत्सुतः ॥ १७ ॥ संकृतिस्तस्य च जयः क्षत्रधर्मा महारथः । क्षत्रवृद्धान्वया भूपाः शृणु वंशं च नाहुषात् ॥ १८ ॥ इति श्रीमद्भा० म० नवम० चन्द्रवंशानुवर्णनं सप्तदशोऽध्यायः ॥ १७ ॥

केवल स्मरण करनेसेही रोगीकी पीडाको दूर करनेवाले और यज्ञके भागके भोक्ताहुए धन्वन्तरी के पुत्र केतुमान, केतुमानके भीमरथ ॥ ५ ॥ भीमरथके दिवोदास, दिवोदासके द्युमान हुआ । वह प्रतर्दन शत्रुजित, वत्स, ऋतध्वज और कुवलयाश्व इन नामों से विख्यातथा, उस द्युमानके अलर्क आदि अनेक संतानें हुई ॥ ६ ॥ उसने छियासठ सहस्रवर्ष पृथ्वीका पालन कियाथा, हे राजन् ! अलर्कके अतिरिक्त किसी युवाने इतने दिन राज्यका भोग नहीं किया, ॥ ७ ॥ उस अलर्कका पुत्र संतति, संततिकापुत्र सुनीथ, सुनीथका निकेतन, उसका धर्मकेतु धर्मकेतुका पुत्र सत्यकेतु हुआ ॥ ८ ॥ सत्यकेतुका पुत्र धृष्टकेतुहुआ, उससे राजा सुकुमारने जन्मग्रहण किया । उसका पुत्र वीतिहोत्र उसका भर्ग, भर्गकापुत्र भार्गभूमि हुआ, ॥ ९ ॥ हे परीक्षित ! यह सब काशिवंशीय राजा क्षत्रवृद्ध के वंशसे उत्पन्न हुएथे । रम्भकापुत्र रभस रभसका, गम्भीर, गम्भीरसे अक्रिय उत्पन्न हुआ ॥ १० ॥ अक्रियके क्षेत्रमें ब्राह्मण उत्पन्नहुए । हेराजन् ! अब अनेनाके वंशका वर्णन करताहूं उसे सुनो । अनेनाका पुत्र शुद्ध, शुद्धका शुचि, उससे त्रिककुद उत्पन्नहुआ त्रिककुद का धर्म सारथी उसका पुत्र शांतरयहुआ जो कृतकृत्य और आत्मज्ञानीहुआ हेराजन्! रजिके बड बलवान पांचसौ पुत्र उत्पन्नहुए ॥ १२ ॥ एकदिन रजिने देवताओंकी प्रार्थनासे दैत्यों का नाश करके इन्द्रको स्वर्ग पुरीदी । तब इन्द्रने रजिके चरणोंपर गिर ॥ १३ ॥ उस पुरीको उनके हाथोंदे प्रहलादि रिपुओं के भयसे अपना शरीर भी रजिके अर्पण करदिया परन्तु रजिके मरजाने पर इन्द्रने जब उनके पुत्रोंसे स्वर्गको मांगा तब उन्होंने न दिया और आप स्वर्गाधिपहो यज्ञका भागतक लेनेलगे ॥ १४ ॥ अतएव देवगुरु बृहस्पतिने रजिके पुत्रोंकी बुद्धि भ्रष्ट करनेको अभिचार विधान द्वारा होमका आरम्भकिया॥१५॥इससे वह थोड़ेही विलम्बमें नीतिमार्ग से भ्रष्टहो गये तदनन्तर इन्द्रने थोड़ेही श्रमसे उन सबको मारडाला एकजनभी शेष न रहा क्षत्रवृद्धकापौत्र कुश, कुशकापुत्र प्रति, प्रतिकासंजय और उसकाजयहुआ ॥ १६ ॥ जयकापुत्रकृत उसके हर्यबलहुआ हर्यबलका पुत्र सहदेव उसकाहीन, हीनका जयसेन जयसेनका ॥ १७ ॥ पुत्र संकृति उसका पुत्र जय, जयके क्षत्रधर्मा उसके महारथहुआ यह सब राजाक्षत्रवृद्धके वंशवाले हैं अब इसके पश्चात् नहुष वंशका वृत्तांत सुनो ॥ १८ ॥ इति श्रीमद्भा० महा० नवम० सरल भाषाटीकायां सप्तदशोऽध्यायः ॥ १७ ॥

श्रीशुक उवाच ॥ यतिर्ययातिःसंयातिरायतिर्वियतिकृतिः। षडिमे नहुषस्यासन्निन्द्रियाणीवदेहिनः ॥ १ ॥ राज्यंनैच्छद्यतिःपित्रादत्तंतत्परिणामवित्। यत्र प्रविष्टःपुरुषआत्मानंनावबुध्यते ॥२॥ पितरिभ्रंशितेस्थानादिन्द्राण्याधर्षणाद्विजैः। प्रापितेऽजगरत्वंवैययातिरभवन्नृपः ॥ ३ ॥ चतसृष्वादिशद्दिक्षुभ्रातॄन्भ्रातायवीयसः। कृतदारोजुगोपोर्वींकाव्यस्यवृषपर्वणः ॥ ४ ॥ राजोवाच ॥ ब्रह्मर्षिर्भगवान्काव्यः क्षत्रबन्धुश्चनाहुषः। राजन्यविप्रयोःकस्माद्विवाहःप्रतिलोमकः ॥ ५ ॥ श्रीशुकउवाच ॥ एकदादानवेन्द्रस्यशर्मिष्ठानामकन्यका। सखीसहस्रसंयुक्तागुरुपुत्र्याचभामिनी ॥ ६ ॥ देवयान्यापुरोद्यानपुष्पितद्रुमसंकुले। व्यचरत्कलगीतालिनलिनीपुलिनेऽबला ॥ ७ ॥ ताजलाशयमासाद्यकन्याःकमललोचनाः। तीरेन्यस्यदुकूलानिविजह्रुःसिञ्चतीर्मिथः ॥ ८ ॥ वीक्ष्यव्रजंतंगिरिशंसहदेव्यावृषास्थितम्। सहसोत्तीर्यवासांसिपर्यधुर्व्रीडिताःस्त्रियः ॥ ९ ॥ शर्मिष्ठाऽजानतीवासोगुरुपुत्र्याःसमव्ययत्। स्वीयंमत्वाप्रकुपितादेवयानीदमब्रवीत् ॥ १० ॥ अहोनिरीक्ष्यतामस्यादास्याः कर्मह्यसाम्प्रतम्। अस्मद्धार्यंधृतवतीशुनीवहविरध्वरे ॥ ११ ॥ यैरिदंतपसासृष्टंमुखं पुंसःपरस्ययो। धार्यतेयैरिहज्योतिःशिवःपन्थाप्रदर्शितः ॥ १२ ॥ यान्वंदन्त्युपतिष्ठतेलोकनाथासुरेश्वराः। भगवानपिविश्वात्मापावनःश्रीनिकेतनः ॥ १३ ॥ वयं तत्रापिभृगवःशिष्योऽस्यानःपितासुरः। अस्मद्धार्यंधृतवतीशूद्रोवेदमिवासती १४

श्रीशुकदेवजी बोले कि—प्राणियों की छहइन्द्रियों की समान नहुष राजाके यति, ययाति, शर्याति, आयति, वियति और कृति यह छः पुत्रहुए ॥ १ ॥ इनमें से यति राज्य के परिणाम को अनर्थरूप जानताथा इसकारण पिताके राज्य देनेपरभी उसने ग्रहण करनेकी इच्छा न की। क्योंकि उसको निश्चयथा कि—राज्यासक्त मनुष्यको आत्मस्वरूपका बोध नहींहोता ॥ २ ॥ इन्द्राणीका अपराध करनेसे जब अगस्त्यआदि ऋषियोंने नहुषको स्वर्गसे गिराय अजगररूप किया तब ययाति राजा हुआ ॥ ३ ॥ उसने चारो छोटेभाइयोंको चारोंओर राज्य करनेकी आज्ञादी। और आप शुक्राचार्य व वृषपर्वाकी कन्या से विवाहकर पृथ्वीका पालन करनेलगा ॥ ४ ॥ राजा परीक्षितने पूछा कि—हेब्रह्मन्! भगवान शुक्राचार्य तौ ब्रह्मर्षि और नहुष पुत्र ययाति क्षत्रीथा फिर किसप्रकार ब्राह्मण क्षत्री का प्रतिलोम विवाह हुआ ? ॥ ५ ॥ श्रीशुकदेवजी बोले कि एक-दिन दानवेंद्र वृषपर्वाकी कन्या शर्मिष्ठा सहस्र सखियों और गुरुकन्या ॥ ६ ॥ देवयानीके साथ नगरके उपवनमें भ्रमण कररहीथी। उद्यानमें असंख्य वृक्ष फूल रहेथे। वहां कमलोंकी सुगन्धि से तालाबके तटपर भौंरे गूंज रहेथे ॥ ७ ॥ वह सब कमलनयना स्त्रियें किनारेपर वस्त्र रख तालाब में कूद एक दूसरेपर जल डाल २ परस्पर क्रीड़ा करनेलगीं ॥ ८ ॥ उसीसमय दैवात् महादेवजी पार्वतीके साथ बैलपर सवारहुए, उसओर को आए। उन्हें देखतेही सब कन्याओं ने अत्यंत लज्जितहो शीघ्रतापूर्वक किनारेपर आय अपने २ वस्त्र पहिन लिये ॥ ९ ॥ शीघ्रतासे न जानने के कारण गुरुकन्याके वस्त्रोंको अपना विचार शर्मिष्ठाने पहिनलिया। यह देख देवयानीने कुपित होकर कहा ॥ १० ॥ कि अहो! इस दासीका अन्याय करी तो देखो? जैसे कुत्ती यज्ञमें हवि-ष्यान्न खाजाय उसीप्रकार इस दासीने मेरा पहिनाहुआ वस्त्र पहिनलिया, ॥ ११ ॥ जो तपस्या द्वारा जगत्को उत्पन्न करतेहैं जो भगवानके मुखसे उत्पन्न होनेके कारण सर्व श्रेष्ठहैं जो ब्रह्मको धारण करते हैं जिन्होंने मंगलमय वेद मार्ग प्रकाशित कियाहै. ॥ १२ ॥ और समस्त लोकपाल सुरेश्वरगण और भगवान विश्वात्मा भी ॥ १३ ॥ जिनकी वंदना और उपासना करतेहैं वह मैं ब्राह्मण जाति तिसपर भी भृगुऋषियों में उत्पन्नहुईहूं। इसका पिता मेरा शिष्यहै, इसकी ढिठाई तो देखो! शूद्रजातिके वेद धारणकी समान इसने मेरे, वस्त्र पहिन लिये ॥ १४ ॥ हे राजन्!

एवंक्षिपंतींशर्मिष्ठागुरुपुत्रीमभाषत । रुषाश्वसन्त्युरङ्गीवधर्षितादष्टदच्छदा ॥१५॥ आत्मवृत्तमविज्ञाय कत्थसेबहुभिक्षुकि । किंनप्रतीक्षसेऽस्माकं गृहान्बलिभुजो यथा ॥ १६ ॥ एवंविधैःसुपरुषैःक्षिप्त्वाऽऽचार्यसुतांसतीम् । शर्मिष्ठाप्राक्षिपत्कूपे वासश्चादाय मन्युना ॥ १७ ॥ तस्यांगतायांस्वगृहंययातिर्मृगयांचरन् । प्राप्तोयदृच्छयाकूपे जलार्थीतांददर्शह ॥ १८ ॥ दत्त्वास्वमुत्तरंवासस्तस्यैराजाविवाससे । गृहीत्वापाणिनापाणिं मुज्जहारदयापरः ॥ १९ ॥ तंवीरमाहौशनसीप्रेमनिर्भरया गिरा । राजंस्त्वयागृहीतोमेपाणिःपरपुरंजय ॥ २० ॥ हस्तग्राहोऽपरोमाऽभूद्गृहीतायास्त्वयाहिमे । एषईशकृतोवीरसंबन्धोनात्रपौरुषः ॥ २१ ॥ यदिदंकूपमग्नाया भवतोदर्शनंमम । नब्राह्मणोमेभविताहस्तग्राहोमहाभुजः ॥ कचस्यबार्हस्पत्यस्य शापाद्यमशपंपुरा ॥ २२ ॥ ययातिरनभिप्रेतं दैवोपहृतमात्मनः । मनस्तुतद्गतंबुद्ध्वा प्रतिजग्राहतद्वचः ॥ २३ ॥ गतेराजनिसावीरे तत्रस्मरुदतीपितुः ॥ न्यवेदयत्ततःसर्वमुक्तंशर्मिष्ठया कृतम् ॥ २४ ॥ दुर्मनाभगवान्काव्यःपौरोहित्यं विगर्हयन् । स्तुवन्वृत्तिंचकापोतीं दुहित्रासययौपुरात् ॥ २५ ॥ वृषपर्वातमाज्ञाय प्रत्यनीकविवक्षितम् । गुरुंप्रसादयन्मूर्ध्ना पादयोपतितःपथि ॥२६॥ क्षणार्धमन्युर्भगवा ञ्छिष्यंव्याचष्टभार्गवः । कामोऽस्याःक्रियतांराजन्नैनांत्यक्तुमिहोत्सहे ॥२७ ॥ तथेत्यवस्थितेप्राह देवयानीमनोगतम् । पित्रादत्तायतोयास्ये सानुगायातुसामनु ॥

गुरुपुत्री देवयानी के इसप्रकारसे तिरस्कार करनेपर शर्मिष्ठा क्रोधित होकर दबीहुई सर्पिणीके समान बड़े २ श्वास छोड़कर क्रोधित होकर होठोंको दांतों से पीस २ कर कहन लगी कि—अरे भिक्षुकि ! अपने आचरणको न जानकर तू इतनी बड़ाई मारतीहै कौवेकीसमान त् क्या हमारे घरकेटुकड़ोंकी चाहना नहीं करती? ॥१६॥ इसप्रकार उसने नाना कटुवचनोंके प्रयोगसे गुरुकन्या का तिरस्कार कर क्रोधितहो उसके सब वस्त्र खींच उसे कुएमें डालदिया, ॥ १७ ॥ शर्मिष्ठाके अपने घरचलेजाने पर ययाति राजा आखेट करता २ दैवेच्छासे उस स्थानपर आ उपस्थित हुआ और जलकी इच्छाकर उस कुएके समीप आ देवयानी को उस स्थानमें देखा ॥ १५ ॥ राजाने दयालु होकर उस नग्ना देवयानीको अपना उत्तरीय वस्त्र पहिनने को दिया, फिर अपने हाथसे उसका हाथ पकड़ कुएसे निकाललिया ॥ १९ ॥ देवयानी कुएसे निकल प्रेमयुक्त वचनों से ययातिसे कहनेलगी कि—हेराजन् ! हेपरपुरंजय ! आपने मेरा पाणिग्रहण किया मैं, आपकी गृहिणीहुई, मैं प्रार्थनाकरतीहूं कि आपजिसका पाणिग्रहणकरचुके उसका दूसरेकेसाथ पाणिग्रहण न होना चाहिये । हेवीर!यह मेरा और आपका समागम केवल दैवकृत हुआ यह मनुष्य कृत नहीं है॥२०।२१॥हेमहाबाहो ! मैंने प्रथम बृहस्पतिके पुत्र कचको शापदियाथा, इसँसे उन्होंनेभी मुझको शापदिया कि तुझे ब्राह्मण पति न मिलेगा इसकारण ब्राह्मण मेरापति न होगा,॥२२॥राजाययातिने इसबात को शास्त्र विरुद्ध समझा परन्तु तौभी इस दैव घटनाको उपस्थित हुआ और देवयानीमें चित्तको आसक्तहुआजान उसकीबातोंको स्वीकारकिया,॥२३॥अनन्तरराजाके चलेजानेपर देवयानी ने रोते २ पिताके घर में आय शर्मिष्ठाकी सब बातोंको कहा ॥ २४ ॥ भगवान शुक्राचार्य जी दुःखितहो पुरोहितके कामकी निंदा और उंच्छ वृत्तिकी प्रशंसा करतेहुए कन्या समेत नगर से बाहरहुए ॥ २५ ॥ इस वृत्तांतको वृषपर्वाने सुनकर विचारा कि—शुक्राचार्यजीने यह अभिप्राय सोचाहै कि—देवताओं से मिलकर असुरोंको हरादेवें, यह विचार वृषपर्वा मार्गमें आय उनके चरणोंमें गिर उनके क्रोधको शांति करने लगा॥ २६ ॥ भगवान शुक्रका क्रोध तो एक आधेक्षण काथा उन्होंने शिष्यसे कहा कि—हेराजन् ! मेरी कन्या की जो इच्छाहो वह पूर्णकरो मैं इसको छोड नहींसकता॥२७॥यह सुन गुरुकन्याकी इच्छा जाननेको वृषपर्वा खड़ाहोगया देवयानीने अपनी

॥ २८ ॥ स्वानांतत्संकटंवीक्ष्य तदर्थस्यचगौरवम् ॥ देवयानींपर्यचरत्स्त्रीसहस्रेण दासवत् ॥ २९ ॥ नाहुषायसुतांदत्त्वा सहशर्मिष्ठयोशना । तमाह राजञ्छर्मिष्ठामाधास्तल्पे नकर्हिचित् ॥ ३० ॥ विलोक्यौशनसींराजञ्छर्मिष्ठा सुप्रजांक्वचित् । तमेववव्रेरहसिसख्याः पतिमृतौसती ॥ ३१ ॥ राजपुत्र्यार्थितोऽपत्येधर्मं चावेक्ष्यधर्मवित् । स्मरञ्छुक्रवचःकाले दिष्टमेवाभ्यपद्यत ॥३२॥ यदुंचतुर्वसुंचैव देवयानीव्यजायत । द्रुह्युंचानुंचपूरुंच शर्मिष्ठावार्षपर्वणी ॥ ३३ ॥ गर्भसंभवमासुर्या भर्तुर्विज्ञायमानिनी । देवयानीपितुर्गेहं ययौक्रोधविमूर्छिता ॥ ३४ ॥ प्रियामनुगतःकामी वचोभिरुपमन्त्रयन् । नप्रसादयितुंशेके पादसंवाहनादिभिः ॥ ३५ ॥ शुक्रस्तमाहकुपितः स्त्रीकामानृतपूरुष । त्वांजराविशतां मन्दविरूपकरणीनृणाम् ॥ ३६ ॥ ययातिरुवाच । अतृप्तोऽस्म्यद्यकामानां ब्रह्मन्दुहितरिस्मते । व्यत्यस्यतांयथाकामं वयसायोऽभिधास्यति ॥ ३७ ॥ इतिलब्धव्यवस्थानः पुत्रंज्येष्ठमवोचत । यदोतातप्रतीच्छेमां जरांदेहिनिजंवयः ॥ ३८ ॥ मातामहकृतांवत्सन तृप्तोविषयेष्वहम् । वयसाभवदीयेन रंस्ये कतिपयाःसमाः ॥३९॥ यदुरुवाच। नोत्सहेजरसास्थातुमन्तरा प्राप्तयातव । अविदित्वासुखंग्राम्यं वैतृष्ण्यंनैतिपूरुषः ॥४०॥ तुर्वसुश्चोदितः पित्रा

इच्छाको प्रगट करके कहाकि-मैं पिताकी दीहुई जहांपर आकर रहूं वहां तुम्हारी कन्या शर्मिष्ठा सखियों समेत रहकर मेरी सेवाकरे ॥ २८ ॥ आचार्य के चले जानेपर अपने पर सङ्कट पड़ेगा, गुरुके यहां रहने से बहुत से कार्य सिद्ध होंगे, यह विचारकर वृषपर्वा ने देवयानीको सखियों समेत शर्मिष्ठादी। पिताकी दीहुई शर्मिष्ठा सहस्र सखियों समेत दासीकी समान देवयानी को सेवा में प्रवृत्त हुई ॥ २९ ॥ अनंतर शुक्राचार्य ने शर्मिष्ठा समेत देवयानीको ययाति के हाथमें देकर ययाति से कहदियाकि हे राजन्! तुम शर्मिष्ठाको कभीसग शय्यामें न सुलाना ॥ ३० ॥ हे राजन्! शर्मिष्ठाने देखाकि देवयानी ने स्वामीके सहवास से परम सुंदर पुत्र उत्पन्न किया है, अतएव उसने भी ऋतुकाल में एकांत में अपनीसखी के पति ययाति राजा से पुत्रोत्पादनके निमित्त प्रार्थना की ॥ ३१ ॥ 'राजपुत्री पुत्र उत्पन्न करने के निमित्त प्रार्थना करती है और यह धर्म संगतभी है'—धर्मज्ञ राजाने यह विचारकर शुक्राचार्य के वचनका स्मरण रहते हुएभी दैव से प्राप्त हुएज्ञान से शर्मिष्ठा के संग संगम करना स्वीकार किया ॥ ३२ ॥ देवयानी ने यदु और तुर्वसुको व शर्मिष्ठा ने द्रुह्यु, अनु और पुरुको उत्पन्न किया ॥ ३३ ॥ हे राजन्! अपने स्वामी से असुर पुत्रीके पुत्र उत्पन्न हुए हैं—यह विचारकर वह मानवती देवयानी क्रोधितहो अपने पिता के घर चलीगई ॥ ३४ ॥ ययाति अत्यंत कामीथा, प्यारीको क्रोधित देख विनयके वाक्यों से प्रसन्न करता २ उसके पीछे २ गया, किंतु पैरआदि पकड़ करभी उसको प्रसन्न न करसका ॥ ३५ ॥ यह वृत्तांत सुन शुक्रने क्रोधित होकर कहाकि—रेस्त्रीकाम! तू अत्यंतही असत्यभाषी है, रेमद! मनुष्योंको कुरूप करने वाला बुढ़ापा तुझे प्राप्त होजावे ॥ ३६ ॥ ययाति ने कहाकि—हे ब्रह्मन्! आपकी पुत्रीके साथ संभोग करके मैं अबतक तृप्त नहीं होसका। शुक्रने कहाकि—जोतेरा बुढ़ापा ग्रहण करसके तू उसकी युवावस्था लेसकता है ॥ ३७ ॥ हे राजन्! ययातिने इस प्रकार से बुढ़ापा बदलनेका यह उपाय अपने ज्येष्ठ पुत्र यदुसे कहाकि—हे तात! यदु! तुममेरी जरा ग्रहण करके अपनी युवावस्था मुझेदो ॥ ३८ ॥ हे वत्स! तुम्हारे नाना ने मुझको बुढ़ाकर दिया है किंतु मैं अबतक विषय भोगसे तृप्त नहीं हुआ,—इच्छा है कितुम्हारे यौवन से मैं कुछदिनों विहार करूं ॥ ३९ ॥ यदुने कहाकि—हे पिता! आपकी जरावस्था लेकरमैं नहीं रहना चहता क्योंकि विषय सुखोंको बिना भली भांतिजाने मनुष्यकी विषय तृष्णा नहीं मिटती ॥ ४० ॥ श्रीशुकदेवजी बोलेकि—हे भारत!

द्रुह्युश्चानुश्च भारत । प्रत्याचख्युरधर्मज्ञा ह्यनित्येनित्यबुद्धयः ॥ ४१ ॥ अपृच्छत्तनयं पूरुं वयसोनं गुणाधिकम् । नत्वमग्रजवद्वत्समां प्रत्याख्यातुमर्हसि ॥ ४२ ॥ पूरुरुवाच । कोनुलोकेमनुष्येन्द्र पितुरात्मकृतःपुमान् । प्रतिकर्तुंक्षमोयस्य प्रसादाद्विन्दतेपरम् । ॥ ४३ ॥ उत्तमश्चिन्तितं कुर्यात्प्रोक्तकारीतुमध्यमः । अधमोऽश्रद्धया कुर्यादकर्तोच्चरितं पितुः ॥४४ ॥ इतिप्रमुदितः पूरुः प्रत्यगृह्णाज्जरांपितुः । सोऽपि तद्वयसा कामान्यथावज्जुजुषेनृप ॥४५॥ सप्तद्वीपपतिः सम्यक्पितृवत्पालयन्प्रजाः यथोपजोषंविषयाञ्जुजुषेऽव्याहतेन्द्रियः ॥ ४६ ॥ देवयान्यप्यनुदिनंमनोवाग्देहवस्तुभिः । प्रेयसःपरमांप्रीतिमुवाहप्रेयसीरहः ॥ ४७ ॥ अयजद्यज्ञपुरुषंक्रतुभिर्भूरिदक्षिणैः । सर्वदेवमयंदेवंसर्ववेदमयंहरिम् ॥ ४८ ॥ यस्मिन्निदंविरचितंव्योम्नीव जलदावलिः । नानेवभातिनाभातिस्वप्नमायामनोरथः ॥४९॥ तमेवहृदिविन्यस्य वासुदेवंगुहाशयम् । नारायणमणीयांसंनिराशीरयजत्प्रभुम् ॥ ५० ॥ एवंवर्षसहस्राणिमनःषष्ठैर्मनःसुखम् । विदधानोऽपिनातृप्यत्सार्वभौमःकदिन्द्रियैः ॥ ५१ ॥

इतिश्रीमद्भा०म०नवम०अष्टादशोऽध्यायः ॥ १८ ॥

श्रीशुकउवाच ॥ सइत्थमाचरन्कामान्स्त्रैणोपह्नवमात्मनः । बुद्ध्वाप्रियायैनिर्विण्णागाथामेतामगायत ॥ १॥ शृणुभार्गव्यमूंगाथांमद्विधाचरितांभुवि । धीरायस्यानुशोचन्तिवनेग्रामनिवासिनः॥ २ ॥बस्तएकोवनेकश्चिद्विचिन्वन्प्रियमात्मनः ।

इसी प्रकार से पिताकी आज्ञाको तुर्वसु, द्रुह्यु और अनुने भी अस्वीकार किया; उनको धर्मका ज्ञान न था । वह अनित्य पदार्थ कोभी नित्य जानते थे ॥ ४१ ॥ अनंतर ययाति ने अवस्था मे छोटे और गुणोंमें बड़े पुरुसे कहाकि हे वत्स ! बड़े भाइयों की समान मेरी प्रार्थनाका अस्वीकार करना तुझे उचित नहीं है ॥ ४२ ॥ पुरुने कहाकि—हे नरनाथ ! जिसकी कृपासे परमपद प्राप्त होता है और जिससे देह उत्पन्न होती है, उस पिताका इस लोकमें कौन प्रत्युपकार करसकता है ॥४३॥ तौभी जोपुत्र पिताकी इच्छाको पूर्णकर वही श्रेष्ठ कहलाता है जोकहा हुआ कार्य पूराकरे वह मध्यम जोबिना श्रद्धाकरे वह अधम पुत्र है और जोपिता की आज्ञा पाकर भी काम नहीं करता वह पुत्र नहीं है केवल पिताकी विष्ठामात्र है ॥ ४४ ॥ हे राजन् ! यह कह पुरुने प्रसन्नता पूर्वक पिता की जरा ग्रहणकी और राजा भी पुत्रके यौवन द्वारा यथोचित विषय भोग करनेलगा ॥ ४५ ॥ हे महाराज ! ययाति राजा सातों द्वीपोंका अधिपति था वह भली प्रकार से पुत्रवत् प्रजाका पालन कर इन्द्रियों की शक्ति रहते हुए इच्छानुसार विषयोंका भोग करनेलगा ॥ ४६ ॥ इधर देवयानी भी मन, वाक्य, देह और अन्यान्य वस्तुओं द्वारा एकांत में रातदिन प्रियतमको प्रसन्न रखनेलगी ॥ ४७ ॥ ययाति राजाने अनेक दक्षिणावाले बहुत से यज्ञकर सर्व देवमय सर्व वेद स्वरूप यज्ञ पुरुष भगवान की अर्चना की ॥ ४८ ॥ आकाश में मेघकी समान जिससे यह जगत विरचितहो स्वप्न माया और कल्पनाकी समान कभी प्रकाशित और कभी लीनहोताहै, राजाने निष्कामहो उन अंतर्यामी भगवानको हृदयमें स्थापनकर उन्हींका यजन किया ॥४९॥ सर्वभूमि पति ययाति इस प्रकार मनआदि छह चपल इन्द्रियों से हजारवर्षतक विषय भोगकरके भी तृप्त न होसका॥५०॥

इतिश्री मद्भागवतेमहापुराणेनवमस्कन्धेसरलाभाषाटीकायांअष्टादशोऽध्यायः ॥ १८ ॥

श्रीशुकदेवजीबोले कि—ययाति राजाने इसप्रकारसे स्त्री प्रियहो विषय भोग करते २ अपने सर्वनाशको समझा, अतएव वैराग्ययुक्तहो अपनी प्यारी के निकटआय इस इतिहासको वर्णन करने लगा ॥ १ ॥ कि—हे भृगुनन्दिनि ! जिनग्रामवासियों के आचरणको देखकर वनवासी धीर जन शोककरते हैं उनका चरित्र इसप्रकारसे वर्णित है सोसुनो ॥ २ ॥ एक बकरे ने वनमें अ-

इच्छन्तीं कूपे पतितां स्वकर्मवशगामजाम् ॥ ३ ॥ तस्या उद्धरणोपायं बस्तः कामी विचिन्तयन्। व्यधत्त तीर्थमुद्धृत्य विषाणाग्रेण रोधसी ॥ ४॥ सोत्तीर्य कूपात् सुश्रोणी तमेव चकमे किल। तया वृतं समुद्वीक्ष्य बह्व्योऽजाः कान्तकामिनीः ५॥ पीवानं श्मश्रुलं प्रेष्ठं मीढ्वांसं याभकोविदम् ॥ स एकोऽजवृषस्तासां बह्वीनां रतिवर्द्धनः। रेमे कामग्रहग्रस्त आत्मानं नावबुध्यत ॥ ६ ॥ तमेव प्रेष्ठतमया रममाणमजाऽन्यया। विलोक्य कूपसंविग्ना नामृष्यद् बस्तकर्म तत् ॥ ७ ॥ तं दुर्हृदं सुहृद्रूपं कामिनं क्षणसौहृदम्। इन्द्रियारामसुत्सृज्य स्वामिनं दुःखिता ययौ ॥ ८ ॥ सोऽपि चानुगतः स्त्रैणः कृपणस्तां प्रसादितुम्। कुर्वन्निडविडाकारं नाशक्नोत् पथि सन्धितुम् ॥ ९ ॥ तस्यास्तत्र द्विजः कश्चिदजास्वाम्यच्छिनद्रुषा। लम्बन्तं वृषणं भूयः सन्दधेऽर्थाय योगवित् ॥ १० ॥ सम्बद्धवृषणः सोऽपि ह्यजया कूपलब्धया। कालं बहुतिथं भद्रे कामैर्नाद्यापि तुष्यति ॥ ११॥ तथाऽहं कृपणः सुभ्रु भवत्याः प्रेमयन्त्रितः। आत्मानं नाभिजानामि मोहितस्तव मायया ॥ १२ ॥ यत्पृथिव्यां व्रीहियवं हिरण्यं पशवः स्त्रियः। न दुह्यन्ति मनःप्रीतिं पुंसः कामहतस्य ते ॥ १३ ॥ न जातु कामः कामानामुपभोगेन शाम्यति। हविषा कृष्णवर्त्मेव भूय एवाभिवर्धते ॥ १४ ॥ यदा न कुरुते भावं सर्वभूतेष्वमङ्गलम्। समदृष्टेस्तदा पुंसः सर्वाः सुखमया दिशः ॥ १५ ॥ या दुस्त्यजा दुर्मतिभिर्जीर्यतो या न जीर्यते। तां तृष्णां दुःखनिवहां शर्मकामो द्रुतं त्यजेत् ॥ १६ ॥ मात्रा स्वस्रा दुहित्रा वा नाविविक्तासनो भवेत्। बलवा

पने इच्छितपदार्थ को ढूंढते २ निजदोषसे कुएमें गिरीहुई एक बकरी को देखा ॥३ ॥वह बकरा अत्यन्त कामी था। उस बकरी के निकालने का उपायशोच उसकुएकी मुन्डेरकी मिट्टी अपने सींगों से खोद उसने निकलनेकामार्ग बनादिया ॥४ ॥ उस सुन्दर कटिवाली बकरीने कुएसे निकलते ही बकरेपर इच्छा प्रगटकी। जब उस बकरीने बकरे से बरणकिया तब दूसरी औरभी बहुतसी बकरियों ने उस मोटे बहुत डाढ़ी मूछवाले, वीर्यवान मैथुनके जाननेवाले.उस छागकी इच्छाकी ॥ ॥ ५ ॥ वह अकेला बकरा पुरुष अनेक बकरियों में फँस कामातुरहो विहार करनेलगा। वह विहार करताहुआ अपने स्वरूपको भी भूलगया ॥ ६ ॥ परन्तु जो बकरी कुएमें गिरगईथी वहउस बकरेका दूसरी प्यारी बकरियोंके साथ रमणकरता देख उसका सहन न करसकी ॥७॥ वहउस मित्रवेषी, यथार्थ में शत्रु, क्षणमात्र के प्रेम रखनेवाले, इन्द्रिय सुखसेवी बकरेको छोड़कर दुःखित चित्तस रक्षकके निकटगई ॥ ८ ॥ स्त्रीलम्पट बकराभी "बों २" शब्द करताहुआ उस बकरी के पीछे २ चला, किन्तु मार्ग में उसको पकड़ न सका ॥ ९ ॥ उस बकरी के रक्षक ब्राह्मण ने क्रोधितहो उस बकरे के लटकतेहुए दोनोंअण्डकोषकाटदिये; किन्तु उपायके जाननेवाले ब्राह्मणने कार्य पूर्णहोने के निमित्त उन अण्डोंको फिर जोडदिया ॥ १० ॥ हेभद्रे! उस बकरे ने इस प्रकार से रतिशक्तियुक्तहो कुएसे प्राप्तहुई उस बकरी के साथ बहुत दिनोंतक विषय भोगकिया किंतु कामसेवा से उसको सन्तोष नहीं उत्पन्न हुआ ॥११॥ हेशुभ्रू! उस बकरे के समान मैं भी तुम्हारे प्रेममें बँधकर अत्यन्तदीन होरहाहूं। तुम्हारी माया से मोहितहोकर मैं अपनेकाभी नहीं जानसकता ॥ १२ ॥ पृथ्वीपर जितना अन्न, यव, सुवर्ण, पशु और स्त्री हैं वे सब कामातुर पुरुष के चित्तको तृप्तनहीं करसकते ॥ १३ ॥ विषयभोगसे काम कदापि नहींशांत होता, वरन घृतद्वारा अग्निकी समान वे विषयभोग बढ़तेहीरहते हैं ॥ १४ ॥ जब मनुष्य रागद्वेषादि की विषमता को छोड़कर सर्वत्र समदर्शी होता है तब उसको सब दिशायेंही सुखकारी होजाती हैं ॥ १५ ॥ जिसका परित्याग करना दुष्ट मनुष्योंको असाध्य है और स्वयंजीर्ण होकर भी जीर्ण नहीं होती उस दुःखदायी तृष्णाको सुख चाहनेवाला मनुष्य शीघ्रहीछोड़देवे ॥ १६ ॥ बहिन अथवा कन्याके साथ

निन्द्रियग्रामो विद्वांसमपिकर्षति ॥ १७ ॥ पूर्णंवर्षसहस्रंमेविषयान्सेवतोऽसकृत् । तथाऽपिचानुसवनंतृष्णातेषूपजायते॥१८॥ तस्मादेतामहंत्यक्त्वाब्रह्मण्याधायमानसम् । निर्द्वन्द्वोनिरहङ्कारश्चरिष्यामिमृगैःसह ॥ १९ ॥ दृष्टंश्रुतमसद्बुद्ध्वानानुध्यायेन्नसंदिशेत् । संसृतिंचात्मनाशंचतत्रविद्वान्सआत्मदृक् ॥ २० ॥ इत्युक्त्वानाहुषो जायांतदीयंपूरवेवयः । दत्त्वास्वजरसंतस्मादाददेविगतस्पृहः ॥ २१ ॥ दिशिद-क्षिणपूर्वस्यांद्रुह्युंदक्षिणतोयदुम् । प्रतीच्यांतुर्वसुंचक्रउदीच्यामनुमीश्वरम् ॥ २२ ॥ भूमण्डलस्यसर्वस्यपूरुमर्हत्तमंविशाम् । अभिषिच्याग्रजांस्तस्यवशेस्थाप्यवनंय-यौ ॥ २३ ॥ आसेवितंवर्षपूगान्षड्वर्गंविषयेषुसः । क्षणेनमुमुचेनीडंजातपक्षइव द्विजः ॥ २४ ॥ सतत्रनिर्मुक्तसमस्तसङ्गआत्मानुभूत्या विधुतत्रिलिङ्गः । परेऽमलेब्रह्मणि वासुदेवेलेभेगतिंभागवतींप्रतीतः ॥ २५ ॥ श्रुत्वागाथांदेवयानीमेनेप्रस्तोभमात्मनः स्त्रीपुंसोःस्नेहवैक्लव्यात्परिहासमिवेरितम् ॥ २६ ॥ सासन्निवासंसुहृदांप्रपायामिव गच्छताम् । विज्ञायेश्वरतन्त्राणांमायाविरचितंप्रभोः ॥ २७ ॥ सर्वत्रसङ्गमुत्सृज्यस्वप्नौ-पम्येनभार्गवी । कृष्णेमनःसमावेश्यव्यधुनोल्लिङ्गमात्मन ॥ २८ ॥ नमस्तुभ्यंभगवतेवा-सुदेवायवेधसे । सर्वभूताधिवासायशान्तायबृहतेनमः ॥ २९ ॥

इतिश्रीमद्भा०म०नवम०एकोनविंशोऽध्याय ॥ १९ ॥

भी एकान्त में निवासकरना उचितनहीं; क्योंकि इन्द्रियें अत्यन्त बलवान होती हैं, वे विद्वान पु-रुष को भी खींच लती हैं ॥ १७ ॥ धीरे २ विषय सेवा करते २ मेरे सहस्रवर्ष पूरे हुए तौभी रातदिन उन सम्पूर्ण वस्तुओंपर तृष्णाही उत्पन्नहोती रहती है ॥ १८ ॥ अतएव इस समय मैं तृष्णाको छोड़कर परब्रह्म में मन लगाऊंगा और सुख दुःख आदिसे निर्द्वंद्व और निरहंकारहो मृगों के साथ भ्रमण करूंगा ॥ १९ ॥ हे प्रिये ! जो कुछ देखने व सुनने में आता है उस सबको अ-सत्यजानकर उसका नतो ध्यानकरे न सेवनकरे इनके ध्यान और सेवनसे स्वरूपका अज्ञान और जन्ममरणरूप संसृति होती है इसप्रकार जो जानता है उसे आत्मज्ञान होता है ॥२०॥ हेराजन् ! ययातिराजाने उससे इस प्रकार कह छोटेपुत्र पुरुको उसकी युवावस्था लौटाय इच्छारहितहो उसके निकट से अपनी जराग्रहणकी ॥ २१ ॥ उसने अग्निकोण द्रुह्युको दक्षिणदिशा यदुको, पश्चिम दिशा तुर्वसु को और उत्तरदिशा अनुको दी ॥ २२ ॥ और समस्त भूमण्डलका राज्यश्रेष्ठक्षत्री प्यारे कनिष्ठपुत्र पुरुको दिया और सब भाइयों को पुरु के आधीन में कर आप बनको गया ॥२३॥ हेराजन् ! ययाति ने बहुत दिनोंतक शब्दादि विषय समूहसे छहो इन्द्रियों द्वारा सुख सम्भोग तो कियाथा परन्तु उसने उनकी इसप्रकार से अपेक्षा न की कि जैसे पंख उत्पन्न होने से पक्षी का घा सला छोड़ देता है उसनेभी इसीप्रकार विषय सुखोंकी अपेक्षा न कर इन्द्रियसुखोंको छोड़दिया ॥ ॥ २४ ॥ वह निःसंगहोगया; उसके आत्मानुभवद्वारा त्रिगुणात्मक उपाधि दूरहोगई इसप्रकार से उस राजा ने निर्मल परब्रह्म वासुदेवकी भागवतीगतिको प्राप्तकिया ॥ २५ ॥ स्त्रीपुरुष सम्बन्धी स्नेहके कारण इसगाथाको सुन देवयानी ने हँसी समझी परन्तु पीछे अभिप्रायको जानकर आत्म-ज्ञानको प्राप्तहुई ॥ २६ ॥ भृगुपुत्री देवयानी ने पौसरेपर इकट्ठेहुए मनुष्यों की समान ईश्वराधीन सुहृदों के सङ्गको प्रभुकीमायासे रचाहुआजाना और स्वप्नकी समान सबको जान उनका सङ्ग छाड़ भगवान में मनलगाय अपनी उपाधि छोड़दी ॥ २७—२८ ॥ हे भगवन् ! आप विधाता, वासुदेव, सर्वप्राणियों के निवासभूमि, परमशांत और अतिबृहतहो आपका नमस्कार है ॥ २९ ॥

इतिश्रीमद्भागवतेमहापुराणेनवमस्कन्धेसरलाभाषाटीकायांएकोनविंशोऽध्यायः ॥ १९ ॥

श्रीशुकउवाच । पूरोर्वंशंप्रवक्ष्यामि यत्रजातोऽसिभारत । यत्रराजर्षयोवंश्या ब्रह्मवंश्याश्च जज्ञिरे॥१॥जन्मेजयोह्यभूत्पूरोः प्रचिन्वांस्तत्सुतस्ततः । प्रवीरोऽथनमस्युर्वै तस्माच्चारुपदोऽभवत् ॥ २ ॥ तस्यसुद्युरभूत् पुत्रस्तस्माद्बहुगवस्ततः । संयातिस्तस्याहंयाति रौद्राश्वस्तत्सुतःस्मृतः ॥ ३ ॥ ऋतेयुस्तस्यकक्षेयुः स्थण्डिलेयुः कृतेयुकः । जलेयुः संततेयुश्च धर्मसत्यव्रतेयवः ॥ ४ ॥ दशैतेऽप्सरसः पुत्रावनेयुश्चावमःस्मृतः । घृताच्यामिन्द्रियाणीव मुख्यस्यजगदात्मनः ॥ ५ ॥ ऋतेयोरन्तिभारोऽभूत् त्रयस्तस्यात्मजानृप । सुमतिर्ध्रुवोऽप्रतिरथः कण्वोऽप्रतिरथात्मजः ।६। तस्य मेधातिथिस्तस्मात्प्रस्कण्वाद्या द्विजातयः । पुत्रोऽभूत्सुमतेरेभ्यो दुष्यन्तस्तत्सुतोमतः ॥७॥ दुष्यन्तोमृगयांयातः कण्वाश्रमपदंगतः । तत्रासीनांस्वप्रभया मंडयन्तींरमामिव ॥ ८ ॥ विलोक्यसद्योमुमुहे देवमायामिवस्त्रियम् । बभाषेतांवरारोहांभटैःकतिपयैर्वृतः ॥९॥ तद्दर्शनप्रमुदितःसन्निवृत्तपरिश्रमः।पप्रच्छकामसंतप्तः प्रहसञ्श्लक्ष्णयागिरा ॥ १० ॥ कात्वंकमलपत्राक्षिकस्यासिहृदयंगमे । किंवाचिकीर्षितंत्वत्र भवत्यानिर्जनेवने ॥ ११ ॥ व्यक्तंराजन्यतनयांवेद्म्यहंत्वांसुमध्यमे । नहिचेतःपौरवाणामधर्मेरमतेक्वचित् ॥ १२ ॥ शकुन्तलोवाच ॥ विश्वामित्रात्मजैवाहंत्यक्तामेनकयावने । वेदैतद्भगवान्कण्वोवीरकिंकरवामते ॥ १३ ॥ आस्यतांह्यरविंदाक्षगृह्यतामर्हणंचनः । भुज्यतांसन्तिनीवाराउष्यतांयदिरोचते ॥ १४ ॥ दु-

श्रीशुकदेवजी बोले कि—हेभारत ! अब पुरुके वंशका वर्णन करताहूं सो सुनो उसी वंशमें तुमने जन्म ग्रहण कियाहै । अनेकराजर्षि और ब्रह्मर्षि पुरुवंशमें उत्पन्नहुए॥१॥पुरुसे जनमेजय का जन्महुआ । उसका पुत्र प्रचिन्वान् उससे प्रवीरने जन्मग्रहण किया । प्रवीरका पुत्र नमस्यु उससे चारुपद हुआ ॥ २ ॥ चारुपदसे सुद्यु सुद्युसे बहुगव बहुगवसे संयाति संयातिसे अहंयाति, अहंयातिसे रौद्राश्व उत्पन्नहुआ ॥ ३ ॥ रौद्राश्वने घृताची अप्सराके गर्भसे दशपुत्र ऋतेयु, कक्षेयु, स्थंडिलेयु, कृतेयु, जलेयु, सन्ततेयु, धर्मेयु, सत्येयु, व्रतेयु और वनेयु उत्पन्नकिये वनेयु, सबसे छोटाथा । हेराजन् ! इन्द्रियें जगदात्मा प्राणके वशीभूत रहतीहैं उसीप्रकार वे दशपुत्रभी रौद्राश्व के वशीभूतथे ॥ ४—५ ॥ ऋतेयु का पुत्र रंतिभार हुआ, । रंतिभार के सुमति, ध्रुव और अप्रतिरथ यह तीनपुत्र उत्पन्नहुए अप्रतिरथ के कण्व हुआ ॥ ६ ॥ कण्व का पुत्र मेधातिथि हुआ । इस मेधातिथि से प्रस्कण्व आदि द्विजगण उत्पन्नहुए । हे राजन् ! रंतिभारका बड़ा पुत्र सुमति, सुमतिका पुत्र रेभि, रेभिका पुत्र दुष्यन्तहुआ ॥ ७ ॥ राजा दुष्यन्त एकदिन मृगया करते २ वनमें प्रवेशकर महर्षि कण्वके आश्रममें उपस्थित हुये, वहां एक स्त्री बैठीहुई साक्षात् लक्ष्मीके समान अपने शरीरकी प्रभासे आश्रमको प्रकाशित कररहीथी ॥८॥ देवमायाकी समान उस स्त्रीको देखतेही राजा मोहितहो उसकी ओर देख अत्यन्त आनन्दित और श्रम शून्य होगया फिर कुछएक सेनाके साथ उस सुन्दरीके निकट आय उससे वार्त्ता करनेलगा ॥ ९ ॥ उसने काम पीड़ितहो मधुर बचनोंसे हसते २ कहा कि— ॥ १० ॥ हेकमलनयने ! तुम कौनहो ? हेहृदयहारिणि ! तुम किसकी पुत्रीहो ? तुम निर्जन वनमें क्या करतीहो, ? ॥ ११ ॥ हेसुमध्यमे ! पुरु वंशियोंका चित्त अधर्ममें कभीभी रत नहींहोता मेरा हृदय तुममें आसक्तहै, इसकारण मैं भलीप्रकार जानताहूं कि तुम क्षत्रिय तनयाहो ॥ १२ ॥ शकुन्तलाने कहा कि-हेराजन् ! मैं विश्वामित्रकी कन्या हूं मेनिका मेरी माता है मेनिका वनमें मुझे डालगईथी भगवान कण्व इस विषय को जानते हैं हे वीर ! मैं क्या करूं ॥१३॥ आप आज्ञा करो हे कमललोचन ! आप बैठो मेरी पूजाको ग्रहण करो यहांपर सुंदर चावल हैं इच्छा हो तो भोजनकरो यदि अभिलाषा हो तो यहांरहो

ष्यन्त उवाच ॥ उपपन्नमिदं सुभ्रु जातायाः कुशिकान्वये । स्वयं हि वृणते राज्ञां कन्यकाः सदृशं वरम् ॥ १५ ॥ ओमित्युक्ते यथाधर्ममुपयेमे शकुन्तलाम् । गांधर्वविधिना राजा देशकालविधानवित् ॥ १६ ॥ अमोघवीर्यो राजर्षिर्महिष्यां वीर्यमादधे । श्वोभूते स्वपुरं यातः कालेनासूत सा सुतम् ॥ १७ ॥ कण्वः कुमारस्य वने चक्रे समुचिताः क्रियाः । बद्ध्वा मृगेन्द्रांस्तरसा क्रीडति स्म स बालकः ॥ १८ ॥ तं दुरत्ययविक्रान्तमादाय प्रमदोत्तमा । हरेरंशांशसंभूतं भर्तुरंतिकमागमत् ॥ १९ ॥ यदा न जगृहे राजा भार्यापुत्रावनिन्दितौ । शृण्वतां सर्वभूतानां खे वागाहाशरीरिणी ॥२०॥ माता भस्त्रा पितुः पुत्रो येन जातः स एव सः । भरस्व पुत्रं दुष्यन्त माऽवमंस्थाः शकुन्तलाम् ॥ २१ ॥ रेतोधाः पुत्रो नयति नरदेव यमक्षयात् । त्वं चास्य धाता गर्भस्य सत्यमाह शकुन्तला ॥ २२ ॥ पितर्युपरते सोऽपि चक्रवर्ती महायशाः । महिमा गीयते तस्य हरेरंशभुवो भुवि ॥ २३ ॥ चक्रं दक्षिणहस्तेऽस्य पद्मकोशोऽस्य पादयोः । ईजे महाभिषेकेण सोऽभिषिक्तोऽधिराड्विभुः ॥ २४ ॥ पञ्चपञ्चाशता मेध्यैर्गङ्गायामनु वाजिभिः । मामतेयं पुरोधाय यमुनायामनु प्रभुः ॥२५॥ अष्टसप्ततिमेध्याश्वान्बबन्ध प्रददद्वसु । भरतस्य हि दौष्यन्तेरग्निः साचीगुणे चितः ॥ सहस्रं बद्वशो यस्मिन्ब्राह्मणा गा विभेजिरे ॥ २६ ॥ त्रयस्त्रिंशच्छतं ह्यश्वान्बद्ध्वा विस्मापयन्नृपान् । दौष्यन्तिरत्यगान्मायां देवानां गुरुमाययौ ॥ २७ ॥ मृगाञ्छुक्लदतः कृष्णान्हिरण्येन परीवृतान् । अदात्कर्मणि मष्णारे नियु

॥१४॥ दुष्यंत नें कहा कि हे सुभ्रु! तुमने कुशिक वंश में जन्म ग्रहण किया है सो तुम्हारा यह आचरण बहुत ही उचित है क्यों कि राजकन्यायें अपने सदृश वरको आपही वरा करती हैं ॥ १५ ॥ शकुन्तला ने यह कहकर स्वीकार किया देशकाल के विधान के जाननेवाले राजा नें गंधर्व विधि के अनुसार उसका पाणिग्रहण किया ॥ १६ ॥ अमोघवीर्य राजर्षि दुष्यन्त नें उस स्त्री में वीर्य धारण किया तदनन्तर दूसरे दिन वह अपने नगर को चलागया यथासमय में शकुन्तला नेभी एक पुत्र रत्न उत्पन्न किया ॥ १७ ॥ महर्षि कण्वने वनमेंही कुमारका जातकर्मादि संस्कार किया। हे राजन्! वह बालक बलपूर्वक सिंहों को पकडकर उनसे खेलाकरता था ॥ १८ ॥ शकुंतला आनंदित हो भगवान के अंशके अंश से उत्पन्न हुए अत्यत पराक्रमी पुत्रको लेकर स्वामी के निकट गई ॥ १९ ॥ किंतु जब राजा ने निर्दोष पुत्र और स्त्री को ग्रहण न किया तब यह आकाश वाणीहुई कि जिसको सबने सुना ॥ २० ॥ हे दुष्यंत! माता तो एक चमड़े के पात्रकी समान है परन्तु पुत्र पिताकाही होता है; क्योंकि आत्माही पुत्ररूप से उत्पन्न होता है; अतएव आप पुत्रको ग्रहणकर पालनकरो शकुंतलाका तिरस्कार मनकरो ॥ २० ॥ हे नरदेव! अपने वीर्य से उत्पन्न हुआ पुत्रपिताको यमभवनसे तारदेताहै। तुमने यह गर्भाधान कियाथा, शकुंतला यह सत्य कहती है ॥ २२ ॥ फिर राजा दुष्यंत नें उस स्त्री पुत्रको ग्रहण किया पिता के देह त्याग करनेपर महायशस्वी पुत्र भरत चक्रवर्ती राजा हुआ भरत भगवान हरिके अंश से उत्पन्न हुए उनकी महिमा समस्त पृथ्वीपर गाईजाती है ॥ २३ ॥ उसके दाहिनें हाथ में चक्र और दानों पैरों में पद्म कोश के चिन्ह विराजमान थे उस राजा भरतनें महा अभिषेक से अभिषिक्तहो ॥२४॥ गङ्गाजी के किनारे ५५ अश्वमेध यज्ञ किए उस राजानें ममताकेपुत्र भरद्वाजको पुरोहित कर ब्राह्मणोंको इच्छित दान दे यमुना के किनारे ७८ अश्वमेधीय घोडे बांधथे हे राजन्! भरतने इस प्रशस्तगुणवाले देश में अग्निचयन किया कि जिसमें सहस्रों ब्राह्मणों को एक २ बद्व (१३०८४) गौयें दान दीथीं ॥ २५ । २६ ॥ हे महाराज! भरत ने इस प्रकार १३३ घोडे बांधकर राजाओं को आश्चर्यान्वितकर देवताओं केभी प्रभावको हरादिया ।२७। उसनें मष्णारनामक किसी यज्ञ कर्म में श्वेत

तानिचतुर्दश ॥२८॥ भरतस्यमहत्कर्मनपूर्वेनापरेनृपाः । नैवापुर्नैवप्राप्स्यन्तिबाहुभ्यांत्रिदिवंयथा ॥ २९ ॥ किरातहूणान्यवनानन्ध्रान्कङ्कान्खशाञ्छकान् । अब्रह्मण्यान्नृपांश्चाहन्म्लेच्छान्दिग्विजयेऽखिलान् ॥ ३० ॥ जित्वापुराऽसुरादेवान्येरसौकांसिभेजिरे । देवस्त्रियोरसांनीताःप्राणिभिःपुनराहरत् ॥ ३१ ॥ सर्वकामान्दुदुहतुःप्रजानांतस्यरोदसी । समास्त्रिणवसाहस्रीर्दिक्षुचक्रमवर्तयत् ॥ ३२ ॥ ससम्राड्लोकपालाख्यमैश्वर्यमधिराट्श्रियम् । चक्रंचास्खलितंप्राणान्मृषेत्युपरराम ह ॥ ३३ ॥ तस्यासन्नृपवैदर्भ्यःपत्न्यस्तिस्रःसुसंमताः । जघ्नुस्त्यागभयात्पुत्रान्नानुरूपाइतीरिते ॥ ३४ ॥ तस्यैवंवितथेवंशेतदर्थंयजतःसुतम् । मरुत्स्तोमेनमरुतोभरद्वाजमुपाददुः ॥ ३५ ॥ अन्तर्वत्न्यांभ्रातृपत्न्यांमैथुनायबृहस्पतिः । प्रवृत्तोवारितोगर्भंशप्त्वावीर्यमवासृजत् ॥ ३६ ॥ तंत्यक्तुकामांममतांभर्तृत्यागविशङ्किताम् । नामनिर्वचनंतस्यश्लोकमेनंसुराजगुः ॥३७॥ मूढेभरद्वाजमिमंभरद्वाजंबृहस्पते । यातौयदुक्त्वापितरौभरद्वाजस्ततस्त्वयम् ॥३८॥ चोद्यमानासुरैरेवंमत्वावितथमात्मजम् । व्यसृजन्मरुतोऽबिभ्रन्दत्तोऽयंवितथेऽन्वये ॥ ३९ ॥

इतिश्रीमद्भा०म०नवम०विंशोऽध्यायः ॥ २० ॥

वानवाले चौदहलक्ष श्रेष्ठ हाथियों को सुवर्ण के अलङ्कारोंसे अलंकृत कर दान कियाथा॥२८॥ महात्मा भरत नें जोर कर्म कियेथे जैसे बाहुसे स्वर्ग नहीं प्राप्तहोसकता वैसेही पहिले और पिछले राजाओं को भी वे कर्म दुष्प्राप्य हैं ॥ २९ ॥ उसनें दिग्विजय काल में किरात, हूण, यवन, आंध्र, कङ्क, खश शक और दूसर अधर्मी राजा और समस्त म्लेच्छ जाति को नष्टकर दियाथा ॥३० ॥ पहिले जिन दैत्यों ने देवताओं को जीतलियाथा और हारेहुए देवताओं की स्त्रियोंको लेकर रसातलम जारहे थे, महात्मा भरत उनसब दैत्यों को मार फिर उन देवांगनाओं को लेआये ॥ ३१ ॥ हे राजन् ! महात्मा भरत के राज्य काल में स्वर्ग और पृथ्वी सब प्रजाओं की इच्छा पूर्ण करतेथे उस राजानें सत्ताईस सहस्र वर्षतक राजासन पर बैठ अखंड पृथ्वी का राज्य कियाथा ॥ ३२ ॥ राज्य भोग करने के कुछ काल के उपरांत चक्रवर्ती भरत लोकपालोंसे अधिक ऐश्वर्य अधिराज सम्पत्ति, विकट सेना और आत्मा प्राण सबही को मिथ्या विचार विषय तृष्णासे निवृत्त हुआ ॥ ३३ ॥ हे राजन् ! उस के विदर्भ देशाय अतिप्यारी तीन पत्नियें थीं उनमेंसे एक स्त्री के पुत्र होनेपर राजा उसको देखकर कहताथा कि "यह पुत्र मेरी समान नहीं है" राजा भरत के इस प्रकार से कहनेपर व्यभिचारकी शङ्का से हमें छोड़ न दें इस भयसे वह स्त्रियां अपने २ पुत्रोंको मार डालतीथीं ॥ ३४ ॥ इस प्रकार वंश के नाश होनेपर महाराज भरतनें अपनी समान पुत्र पाने की इच्छा से मरुत्स्तोम नामक यज्ञ किया उस से मरुद् देवतागणने प्रसन्न होकर उनके हाथमें भरद्वाजनामक पुत्र समर्पण किया ॥३५॥ गर्भवती भाई की स्त्री से बृहस्पति जब मैथुन करनेंको प्रवृत्तहुए तब गर्भ में रहेहुए बालकनें उनको निवारण किया बृहस्पतिनें बालक को शाप दे वीर्यत्याग किया ॥ ३६ ॥ स्वामी व्यभिचारिणी कहकर छोड़ देगा इस भयसे भीतहो ममतानें जब उस पुत्रके त्यागनेकी इच्छा की तब देवताओंनें ममता के विवादको श्लोकके रूपमें रचकर एक श्लोक गाया कि ॥ ३७ ॥ मूढे! इस द्वाजक (एकके क्षेत्र में दूसरे के वीर्य से उत्पन्न हुआ पुत्र) का भरण पोषणकर' 'तूही इसका पालन कर' इस प्रकार स आपसमें वार्त्ताकर (बृहस्पति और ममता) चलेगए, उस पुत्रका नाम भरद्वाज हुआ ॥ ३८ ॥ हे राजन् ! देवताओं नेभी ममताको समझाया परन्तु ममतानें व्यभिचार से उत्पन्न हुए पुत्रको निरर्थक जान उस पुत्रको त्याग दिया तब मरुद्गणों में उसका प्रतिपालन किया अब भरत का वंश नष्ट होनेंलगा उसी समय उन्होंने राजाको वह भरद्वाज नामक पुत्र दिया ॥ ३९ ॥

इति श्रीमद्भागवते महापुराणे नवमस्कंधे सरला भाषाटीकायां विंशोऽध्यायः ॥ २० ॥

श्रीशुक उवाच ॥ वितथस्यसुतोमन्युर्बृहत्क्षत्रोजयस्ततः । महावीर्योनरोगर्गः संकृतिस्तुनरात्मजः ॥१॥ गुरुश्चरन्तिदेवश्चसंकृतेः पाण्डुनन्दन । रन्तिदेवस्यहि यशइहामुत्रचगीयते ॥ २ ॥ वियद्वित्तस्यददतोलब्धंलब्धंबुभुक्षतः । निष्किञ्चनस्यधीरस्यसकुटुम्बस्यसीदतः ॥ ३ ॥ व्यतीयुरष्टचत्वारिंशदहान्यपिबतः किल । घृतपायससंयावंतोयंप्रातरुपस्थितम् ॥ ४ ॥ कृच्छ्रप्राप्तकुटुम्बस्यक्षुत्तृड्भ्यांजातवेपथोः । अतिथिर्ब्राह्मणः कालेभोक्तुकामस्यचागमत् ॥५॥ तस्मैसंव्यभजत्सोऽन्नमादृत्यश्रद्धयान्वितः । हरिंसर्वत्रसंपश्यन्सभुक्त्वाप्रययौद्विजः ॥ ६ ॥ अथान्योभोक्ष्यमाणस्यविभक्तस्यमहीपते । विभक्तंव्यभजत्तस्मैवृषलायहरिंस्मरन् ॥ ७ ॥ यातेशूद्रे तमन्योऽगादतिथिः श्वभिरावृतः । राजन्मे दीयतामन्नं सगणाय बुभुक्षिते ॥ ८ ॥ स आदृत्यावशिष्टंयद्बहुमानपुरस्कृतम् । तच्चदत्त्वानमश्चक्रेश्वभ्यः श्वपतये विभुः ॥ ९ ॥ पानीयमात्रमुच्छेषंतच्चैकपरितर्पणम् । पास्यतः पुल्कसोऽभ्यागादपोदेह्यशुभस्यमे ॥ १० ॥ तस्यतांकरुणांवाचंनिशम्यविपुलश्रमाम् । कृपयाभृशसंतप्तइदमाहामृतवचः ॥ ११ ॥ नकामयेऽहंगतिमीश्वरात्परामष्टर्द्धियुक्तामपुनर्भवं वा । आर्तिंप्रपद्येऽखिलदेहभाजामन्तःस्थितोयेनभवन्त्यदुःखाः ॥ १२ ॥ क्षुत्तृट्श्रमोगात्रपरिभ्रमश्चदैन्यंक्लमः शोकविषादमोहाः । सर्वेनिवृत्ताः कृपणस्यजन्तोर्जिजी

श्रीशुकदेवजी बोले कि—हेपांडुनन्दन ! वितथ (भरद्वाज) का पुत्र मन्यु हुआ । मन्युसे बृहत्क्षत्र, जय, महावीर्य, नर, और गर्ग यह पांच पुत्र उत्पन्नहुए । नरका पुत्र संकृति हुआ ॥ १ ॥ संकृतिका पुत्र गुरु और रंतिदेव हुआ । हेराजन् ! रतिदेवकी महिमा इस लोक और परलोक में सदैव गाई जाती है ॥ २ ॥ वह राजा दैवेच्छासे प्राप्तहुए धनसे अपना निर्वाह करताथा और जो कुछ पास होता उसे तत्कालही दान करदेताथा । एकसमय वह राजा समस्त धन दान कर अत्यंत निर्धनहो परिवार समेत क्षुधासे अत्यन्त कातरहो गया ॥ ३ ॥ बिना जलपिये उसे ४८ दिनबीतगए । परिवार भूख और प्याससे कांपने व अति कष्ट पानेलगा । उनचासवें दिन प्रातःकालही घृत, खीर, लपसी और प्रातःकाल में जल में उपस्थित हुआ ॥ ४ ॥ राजाके भोजन करने के समयही एकजन ब्राह्मण अतिथि आ उपस्थितहुआ ॥ ५ ॥ राजा ने श्रद्धायुक्त सर्वत्र हरिको व्याप्त जान अपने भोजनमेंसे उसको भोजन कराया, वह ब्राह्मण भोजन करके चलागया ॥ ६ ॥ तदनन्तर उस बचेहुए अन्नको परिवार वालोंको बांट स्वयं भोजन करने जाताथा कि उसीसमय एक जन शूद्र वहां आ उपस्थितहुआ । रंति देवने भगवानका स्मरणकर उस बचेहुए शेष भोजनको उसे देदिया॥७॥भोजनके उपरांत शूद्र अतिथिके जानेपर एक मनुष्य कुत्तोंको लियेहुए वहांपर आयकर कहनेलगा कि—हेराजन् ! मैं और मेरे सब कुत्ते भूखेहैं मुझको भोजन दो ॥ ८ ॥ राजाने उस मनुष्य का बहुत सन्मान किया और बचेहुए भोजनको कुत्तों को और उस मनुष्य कोदे उनको नमस्कार किया ॥९॥ एक जनकी तृष्णा दूरहोसके केवल इतनाही जल शेष रहगयाथा, राजा उसीके पीनेका उद्योग करताथा कि इतनहीमें वहांपर एक चांडाल आय करुणायुक्त वचनोंसे कहनेलगा, कि—महाराज ! मैं अत्यन्त प्यासा होरहाहूं मुझ अपवित्र मनुष्यको कुछ थोड़ासा जलदो उस मनुष्यके इस सकरुण बचन और बहुत श्रमके वर्णनको सुनकर रंतिदेवको अत्यन्त दया उत्पन्न होआई । उन्होंने अत्यन्त दुःखितहो अमृतमय वाक्यों से कहा कि—॥१०।११॥मैं परमेश्वरके निकटमे अणिमादि अष्टसिद्धि युक्त मुक्ति नहीं चाहता, मेरी यही प्रार्थना है कि—सब प्राणियो के भीतर रहकर सबका दुःख मैं भोगा करूं जिससे सब सुखी होजायं, सब प्राणियों का दुःख दूरहोवे इससे मैं अपना दुःख दूरहोना समझताहूं १२॥ यह दीन

विषादो जीवजलार्पणान्मे ॥ १३ ॥ एवंप्रभाष्यपानीयंम्रियमाणः पिपासया। पुल्कसायाददाद्धीरोनिसर्गकरुणोनृपः ॥ १४ ॥ तस्यत्रिभुवनाधीशाः फलदाः फलमिच्छताम्। आत्मानंदर्शयांचक्रुर्मायाविष्णुविनिर्मिताः ॥ १५ ॥ सवैतेभ्योनमस्कृत्यनिःसङ्गोविगतस्पृहः। वासुदेवेभगवतिभक्त्याचक्रेमनः परम् ॥ १६ ॥ ईश्वरालम्बनंचित्तंकुर्वतोऽनन्यराधसः। मायागुणमयीराजन्स्वप्नवत्प्रत्यलीयत ॥ १७ ॥ तत्प्रसङ्गानुभावेनरन्तिदेवानुवर्तिनः। अभवन् योगिनः सर्वेनारायणपरायणाः ॥ १८ ॥ गर्गाच्छिनिस्ततोगार्ग्यः क्षत्राद्ब्रह्मह्यवर्तत। दुरितक्षयोमहावीर्यात्तस्यत्रय्यारुणिः कविः ॥ १९ ॥ पुष्करारुणिरित्यत्रयेब्राह्मणगतिंगताः। बृहत्क्षत्रस्यपुत्रोऽभूद्धस्तीयद्धस्तिनापुरम् ॥ २० ॥ अजमीढोद्विमीढश्चपुरुमीढश्चहस्तिनः। अजमीढस्यवंश्याः स्युः प्रियमेधादयोद्विजाः ॥२१॥ अजमीढाद्बृहदिषुस्तस्यपुत्रोबृहद्धनुः। बृहत्कायस्ततस्तस्यपुत्रआसीज्जयद्रथः ॥ २२ ॥ तत्सुतोविशदस्तस्यसेनजित्समजायत। रुचिराश्वोदृढहनुः काश्योवत्सश्चतत्सुताः ॥ २३ ॥ रुचिराश्वसुतः पारः पृथुसेनस्तदात्मजः। पारस्यतनयोनीपस्तस्यपुत्रशतंत्वभूत् ॥ २४ ॥ सकृत्व्यांशुककन्यायांब्रह्मदत्तमजीजनत्। सयोगीगविभार्यायांविष्वक्सेनमधात्सुतम् ॥ २५ ॥ जैगीषव्योपदेशेनयोगतन्त्रंचकारह। उदक्स्वनस्ततस्तस्माद्भल्लादोबार्हदीषवाः ॥२६॥

जीवन धारण करनेके निमित्त इच्छा करताहै; इसके जीवन रक्षाके निमित्त जलार्पण करनेसेही मेरी भूख; प्यास, थकावट शरीर का घूमना, कातरता दुःख, शोक, विषाद और मोह यह सबही निवृत्त होजायँगे ॥ १३ ॥ इसप्रकार कह स्वभावसेही दयालु महाराज रंतिदेवने स्वयं प्यासको रोक उस चांडालको पानी पीनेको दिया ॥ १४ ॥ फल चाहनेवालोंको फल देनेवाले विष्णु निर्मित त्रैलोक्यके स्वामी ब्रह्मादि देवता महाराज रंतिदेवके धैर्यकी परीक्षाके निमित्त प्रथम मायासे ब्रह्मादि रूप धारणकरके आयेथे, परन्तु उनके धैर्यको देख अपने २ यथार्थ रूपको उन्होंने धारण किया, ॥ १५ ॥ महाराज ! रंतिदेवने उन सब देवताओं को प्रणामकर निःसंग और निःस्पृहहो भगवान में ध्यान लगालिया ॥ १६ ॥ उनसे राजाने कुछ भी न चाहा— । हेराजन् ! अनन्य भक्त राजा न अपना चित्त केवल भगवानहीमें लगादियाथा, इससे उसकी गुणमयी माया स्वप्नकीसमान विलाय गई ॥ १७ ॥ उसके अनुगामी भक्त लोग उसीके प्रभावसे नारायण परायण योगी हुएथे ॥१८॥ गर्गसे शिनि उत्पन्न हुआ। शिनिका पुत्र गार्ग्यहुआ। क्षत्रियसे उत्पन्न होकरभी यह ब्राह्मण हुए थे। महावीर्यसे दुरक्षय उत्पन्न हुआ, दुरिक्षयके तीन पुत्र त्रय्यारुणि, कवि ॥१९ ॥ और पुष्करारुणि हुए। यह तीनोंजन ब्राह्मणत्वको प्राप्तहुए। बृहत्क्षत्र का पुत्र हस्तीहुआ जिसने हस्तिनापुर बसाया॥२०॥ हस्तीके तीनपुत्र अजमीढ,द्विमीढ और पुरुमीढ हुए। अजमीढके वंशमें प्रियमेधादि द्विजगण उत्पन्नहुए ॥ २१ ॥ अजमीढसे बृहदिषुनामकएकऔरभी पुत्र उत्पन्न हुआ; उसका पुत्र बृहद्धनु हुआ। बृहद्धनुका पुत्र बृहत्काय, बृहत्कायका जयद्रथ, ॥ २२ ॥ जयद्रथका विषद, विषदका पुत्रस्येनजित हुआ। स्येनजित के पुत्र रुचिराश्व, दृढ हनु, काश्य और वत्सहुए ॥ २३ ॥ रुचिराश्वका पुत्र पार, पारका पुत्र पृथुसेनथा। पारके नीप नामक और भी एक पुत्रथा उसके सौपुत्रहुए ॥ २४ ॥ इस नीपनही शुककी कन्या कृत्वीके गर्भ में ब्रह्मदत्तको उत्पन्न किया, वह ब्रह्मदत्त योगीथा। उसने अपनी स्त्री सरस्वती देवी के गर्भसे विष्वक्सेन नामक एक पुत्र उत्पन्न किया ॥ २५ ॥ विष्वक्सेन ने जैगीषव्य के उपदेशसे योग शास्त्रका ग्रन्थबनाया। उस विष्वक्सेन से उदक्स्वन और उससे भल्लाद उत्पन्न हुआ। यही बृहदिषु के वंशसे उत्पन्न हुएथे ॥ २६ ॥

यवीनरोद्विमीढस्यकृतिमांस्तत्सुतः स्मृतः । नाम्नासत्यधृतिर्यस्यदृढनेमिः सुपार्श्वकृत् ॥ २७ ॥ सुपार्श्वात्सुमतिस्तस्यपुत्रः सन्नतिमांस्ततः । कृतिर्हिरण्यनाभाद्योयोगंप्राप्यजगौस्मषट् ॥ २८ ॥ संहिताः प्राच्यसाम्नांवैनीपोह्युग्रायुधस्ततः । तस्यक्षेम्यःसुवीरोऽथसुवीरस्यरिपुंजयः ॥ २९ ॥ ततोबहुरथोनामपुरुमीढोऽप्रजोऽभवत् । नलिन्यामजमीढस्यनीलः शान्तिः सुतस्ततः ॥ ३० ॥ शान्तेः सुशान्तिस्तत्पुत्रः पुरुजोऽर्कस्ततोऽभवत् । भर्म्याश्वस्तनयस्तस्यपञ्चासन्मुद्गलादयः ॥ ३१ ॥ यवीनरोबृहदिषुः काम्पिल्यः संजयः सुताः । भर्म्याश्वः प्राहपुत्रामेपञ्चानांरक्षणाय हि ॥ ३२ ॥ विषयाणामलमिमेइतिपञ्चालसंज्ञिताः । मुद्गलाद्ब्रह्मनिर्वृत्तंगोत्रंमौद्गल्यसंज्ञितम् ॥ ३३ ॥ मिथुनंमुद्गलाद्भार्म्याद्दिवोदासः पुमानभूत् । अहल्याकन्यकायस्यांशतानन्दस्तुगौतमात् ॥ ३४ ॥ तस्यसत्यधृतिः पुत्रोधनुर्वेदविशारदः । शरद्वांस्तत्सुतोयस्मादुर्वशीदर्शनात्किल ॥ ३५ ॥ शरस्तम्बेपतद्रेतो मिथुनंतदभूच्छुभम् । तद्दृष्ट्वाकृपयाऽगृह्णाच्छन्तनुर्मृगयांचरन् । कृपः कुमारः कन्याचद्रोणपत्न्यभवत्कृपी ॥ ३६ ॥

इति श्रीमद्भागवते महा० न० एकविंशोऽध्यायः ॥ २१ ॥

श्रीशुकउवाच । मित्रायुश्च दिवोदासाच्च्यवनस्तत्सुतोनृप । सुदास सहदेवोऽथ सोमकोजन्तुजन्मकृत् ॥ १ ॥ तस्यपुत्रशतंतेषां यवीयान्पृषतःसुतः ॥ द्रुपदोद्रौपदीतस्य धृष्टद्युम्नादयःसुताः ॥ २ ॥ धृष्टद्युम्नाद्धृष्टकेतुर्भार्म्याः पंचालकाइमे ॥

द्विमीढका पुत्र यवीनर, यवीनरका पुत्र कृतिमान हुआ। कृतिमानका पुत्र सत्यधृति, सत्यधृतिका पुत्र दृढनेमि, दृढनेमिका सुपार्श्व ॥ २७ ॥ सुपार्श्वका सुमति, सुमतिका सन्नतिमान्, सन्नतिमान्का कृती हुआ जिसने हिरण्यनाभसे योग प्राप्तकर अपने शिष्योंको प्राच्यसामकी छह संहिताएं पढ़ाईं ॥ २८ ॥ उस कृतीसे उग्रायुध की उत्पत्ति हुई। उसका पुत्र क्षेम्य, क्षेम्यका पुत्र सुवीर, सुवीरका पुत्र रिपुंजय हुआ ॥ २९ ॥ रिपुंजयका बहुरथ हुआ, पुरुमीढ निःसंतान था। अजमीढ के जो नलिनीनाम भार्या, उसके गर्भसे नीलनामक एकसंतान उत्पन्नहुई। उसकापुत्र शांतिहुआ॥३०॥ शांतिका पुत्र सुशांति, सुशांतिका पुत्र पुरुज, पुरुजका अर्क, अर्कका पुत्र भर्म्याश्व हुआ। उसके मुद्गल, यवनीर, बृहद्विश, कांपिल्य और संजय यह पांचपुत्र उत्पन्न हुए भर्म्याश्वने एकवार कहा था कि मेरे पांचपुत्र पांचदेशोंकी रक्षाकरने में समर्थ हैं ॥ ३१–३२ ॥ इसी कारण यह पंचाल नामसे प्रसिद्ध हुए। मुद्गल से ब्राह्मण जातिका मौद्गल्यगोत्र उत्पन्न हुआ ॥ ३३ ॥ भर्म्याश्व के पुत्र मुद्गल के एक मिथुन उत्पन्न हुआ। पुत्रका नाम दिवोदास और कन्याका नाम अहल्याथा। उस गौतमकी पत्नी अहल्या से शतानदने जन्म ग्रहण किया ॥ ३४ ॥ शतानदका पुत्र सत्यधृति हुआ धनुर्वेदका बड़ाभारी पंडितथा। उसका पुत्र शरद्वान हुआ। उर्वशी के देखने से शरद्वान का वीर्य कास मे गिरगया था उससे एक मिथुन संतान उत्पन्न हुई शांतनुराजा मृगयाको गयाथा कहीं उसने इनदोनों बच्चोंको देखपायातो कृपालुहो उनदोनों बालकोंको लेआया। उनमेंसे पुत्रका नाम कृप और कन्याका नाम कृपी हुआ। कृपी द्रोणाचार्यको ब्याही गईथी ॥ ३६ ॥

इतिश्री मद्भागवतमहापुराणेनवमस्कंधसरलाभाषाटीकायांएकविंशोऽध्यायः ॥ २१ ॥

श्रीशुकदेवजी बोलाकि–दिवोदासका पुत्र मित्रायु, मित्रायुका च्यवन, च्यवनका पुत्र सुदास, सुदासका पुत्र सहदेव, सहदेवका पुत्र सोमक हुआ। सोमक के सौपुत्र उत्पन्न हुएथे उनमें से जंतुजेठा और पृषत छोटाथा। उस पृषत से सर्व सम्पद युक्त राजा द्रुपद ने जन्म ग्रहण किया। उस द्रुपद से द्रौपदी और धृष्टद्युम्न आदिका जन्म हुआ ॥ १–२ ॥ धृष्टद्युम्नका पुत्र धृष्टकेतु था

योऽजमीढसुताख्य ऋक्षःसंवरणस्ततः ॥ ३ ॥ तपत्यांसूर्यकन्यायां कुरुक्षेत्रपतिः कुरुः। परिक्षित्सुधनुर्जह्नुर्निषधाश्वः कुरोः सुताः ॥ ४ ॥ सुहोत्रोऽभूत्सुधनुषश्च्यवनोथततः कृती । वसुस्तस्योपरिचरोबृहद्रथमुखास्ततः ॥ ५ ॥ कुशाम्बमत्स्यप्रत्यग्रचेदिपाद्याश्चचेदिपाः । बृहद्रथात्कुशाग्रोऽभूदृषभस्तस्यतत्सुत. ॥ ६ ॥ जज्ञेसत्यहितोऽपत्यंपुष्पवांस्तत्सुतोजहुः । अन्यस्यां चापि भार्यायांशकले द्वे बृहद्रथात् ॥ ७॥ तेमात्राबहिरुत्सृष्टेजरयाचाभिसंधिते । जीवजीवेतिक्रीडन्त्याजरासन्धोऽभवत्सुतः ॥ ८ ॥ ततश्चसहदेवोऽभूत्सोमापिर्यच्छ्रुतश्रवा। परीक्षिदनपत्योऽभूत्सुरथो नामजाह्नव. ॥ ९ ॥ ततोविदूरथस्तस्मात्सार्वभौमस्ततोऽभवत् । जयसेनस्तत्तनयोराधिकोऽतोऽयुतोह्यभूत् ॥ १० ॥ ततश्चक्रोधनस्तस्माद्देवातिथिरमुष्यच । ऋक्ष्यस्तस्यदिलीपोऽभूत्प्रतीपस्तस्यचात्मजः ॥ ११ ॥ देवापिः शंतनुस्तस्यबाह्लीक इति चात्मजाः । पितृराज्यंपरित्यज्यदेवापिस्तुवनंगतः ॥ १२ ॥ अभवच्छन्तनूराजा प्राङ्महाभिषसंज्ञितः । यंयंकराभ्यांस्पृशतिजीर्णंयौवनमेतिसः ॥ १३ ॥ शान्तिमाप्नोतिचैवाग्र्यांकर्मणातेनशन्तनुः । समाद्वादशतद्राज्येनववर्षयदाविभुः ॥ १४ ॥ शन्तनुर्ब्राह्मणैरुक्त परिवेत्तात्वमग्रभुक् । राज्यंदेह्यग्रजायाशुपुरराष्ट्रविवृद्धये ॥१५॥ एवमुक्तोद्विजैर्ज्येष्ठंछन्दयामाससोऽब्रवीत् । तन्मन्त्रिप्रहितैर्विप्रैर्वेदाद्विभ्रंशितोगि

यह भर्म्याश्ववंशी पांचाल राजाथे। अजामीढ के ऋक्षनामक जोएक और दूसरा पुत्रथा उसका पुत्र सम्बरण हुआ ॥ ३ ॥ उस सम्बरण के वीर्यसे सूर्यतनया तपना के गर्भसे कुरुक्षेत्रपति कुरुने जन्म ग्रहण किया । उस कुरुके चारपुत्र परीक्षित, सुधनु, जह्नु और निषधाश्व उत्पन्नहुए॥ ४ ॥ सुधनु कापुत्र सुहोत्र, सुहोत्रका पुत्र च्यवन,च्यवनका कृती, कृतीका उपरिचर वसुनामक पुत्र उत्पन्नहुआ। वसुके बृहद्रथ ॥ ५ ॥ कुशाम्ब, मत्स्य, प्रत्यग्र और चेदिप इत्यादि पुत्र उत्पन्न हुए। यह सबही चेदि देशके राजाथे बृहद्रथ से कुशाग्रका जन्महुआ । कुशाग्रका पुत्र ऋषभहुआ ॥ ६ ॥ ऋषभका सत्यहित,सत्यहितका पुत्र पुष्पवान और उसका जहु हुआ । हेराजन् बृहद्रथकी दूसरी स्त्रीसे एक एक खण्ड करके देहके दोभाग उत्पन्नहुए ॥ ७ ॥ उसकी माताने उसको ऐसा देख बाहर फेंक दिया । परन्तु जराराक्षसीने उसे देखकर ' जीवितहो जीवितहो ' यह कहकर क्रीडा करते २उन दोनों खण्डों को मिलादिया । इससे उस बालक के सब अङ्ग मिलगये और उसका नाम जरासंध हुआ ॥८॥ जरासन्धका पुत्र सहदेव, सहदेवका सोमापि और उसका श्रुतश्रवा पुत्र उत्पन्नहुआ। कुरुपुत्र परीक्षित निःसन्तानथा । जन्हुके सुरथहुआ ॥ ९ ॥ सुरथ से विदूरथका जन्महुआ । विदूरथकापुत्र सार्वभौम, सार्वभौम का जयसेन और जयसेनका पुत्र राधिकहुआ, उससे अयुतकी उत्पत्ति हुई॥१०॥ अयुतकापुत्र अक्रोधन,उसका देवातिथिहुआ देवातिथि का पुत्र ऋक्ष, ऋक्षका दिलीपहुआ । दिलीपकापुत्र प्रतीपथा ॥११॥ प्रतीपके तीनपुत्र देवापि, शन्तनु और बाह्लीकहुए । उनमें से बड़ा देवापि पिताका राज्यछोड़ बनको चलागया ॥ १२ ॥ तो शन्तनुराजाहुआ । पूर्वजन्ममें इनका नाम महाभिष था । यह हाथों द्वारा जिसवृद्ध पुरुषका स्पर्श करते, वह मनुष्य युवा होजाता ॥ १३ ॥ और बड़ाही शांत होजाता; इसीही कर्मसे इनका नाम शंतनु हुआ । किसी समय शंतनु राजाके राज्यमें बारह बरस वृष्टि न हुई ॥ १४ ॥ तब राजाने व्याकुलहो ब्राह्मणों से पूछा तब ब्राह्मणो ने उत्तर दियाकि—महाराज ! बड़भाई के होतेहुए आपके राज्य करने से आप दोषीहुएहो नगरके सुख वृद्धिके निमित्त बडेभाईको बुलायकर शीघ्रही राज्यदो ॥ १५ ॥ ब्राह्मणों की आज्ञानुसार शांतनने बड़ेभाई से राज्य करने का अनुरोध किया । किंतु इससे पहिले शांतनु के मंत्रियों ने कुछेक ब्राह्मण देवापि के निकट भेजे थे, उन्हों ने पाखण्ड मतके उपदेश से देवापि

रा ॥ १६ ॥ वेदवादातिवादान्वैतदादेवोववर्षह । देवापिर्योगमास्थायकलापग्राम
माश्रितः ॥ १७ ॥ सोमवंशेकलौनष्टेकृतादौस्थापयिष्यति । बाह्लीकात्सोमदत्तो
ऽभूद्भूरिर्भूरिश्रवास्ततः॥१८॥शलश्चशन्तनोरासीद्गङ्गायांभीष्मआत्मवान् । सर्व
धर्मविदांश्रेष्ठोमहाभागवतःकविः ॥ १९ ॥ वीरयूथाग्रणीर्येनरामोऽपियुधितोषितः
शन्तनोर्दासकन्यायांजज्ञेचित्राङ्गदःसुतः॥२०॥विचित्रवीर्यश्चावरजोनाम्नाचित्राङ्गदो
हतः । यस्यांपराशरात्साक्षादवतीर्णोहरेःकला: ॥२१॥ वेदगुप्तोमुनिःकृष्णोयतोऽहमि
दमध्यगाम्।हित्वास्वशिष्यान्पैलादीन्भगवान्बादरायणः॥ २२॥ मह्यंपुत्रायशान्ताय
परंगुह्यमिदंजगौ । विचित्रवीर्योऽथोवाहकाशिराजसुतेबलात् ॥ २३ ॥ स्वयंवरा
दुपानीतेअम्बिकाम्बालिकेउभे । तयोरासक्तहृदयोगृहीतोयक्ष्मणामृतः ॥ २४ ॥
क्षेत्रेऽप्रजस्यवैभ्रातुर्मात्रोक्तोबादरायणः । धृतराष्ट्रंचपाण्डुंचविदुरंचाप्यजीजनत् ॥
२५ ॥ गान्धार्यांधृतराष्ट्रस्यजज्ञेपुत्रशतंनृप । तत्रदुर्योधनोज्येष्ठोदुःशलाचापिकन्य
का ॥ २६ ॥ शापान्मैथुनरुद्धस्यपाण्डोःकुन्त्यांमहारथाः । जाताधर्मानिलेन्द्रेभ्यो
युधिष्ठिरमुखास्त्रयः ॥२७॥ नकुलः सहदेवश्चमाद्र्यांनासत्यदस्रयोः । द्रौपद्यांपञ्च
पञ्चभ्यःपुत्रास्तेपितरोऽभवन्॥ २८ ॥ युधिष्ठिरात्प्रतिविन्ध्यःश्रुतसेनोवृकोदरात् ॥
अर्जुनाच्छ्रुतकीर्तिस्तुशतानीकस्तुनाकुलिः ॥ २९ ॥ सहदेवसुतोराजन्श्रुतकर्मा

को वेदमार्ग से भ्रष्ट करके नास्तिक बनादिया ॥ १६ ॥ अतएव वेद निंदासे पतित होकर देवापि राज्यके योग्य न रहा; इस कारण शन्तनु केभी राज्य करने में कोई दोष न रहा। फिरयथा समय में वर्षा होनेलगी। तबसे देवापि योगका अवलंबनकर कलाप ग्राममें अबतक निवास करता है ॥ १७॥ कलियुग के अंतमें चन्द्र वंशके नाश होनेपर सत्ययुग के प्रथम में वह उस वंशका स्थापन करेगा। बाल्हीक से सोमदत्त की उत्पत्ति हुई । सोदत्त के तीनपुत्र भूरि, भूरिश्रवा ॥ १८ ॥ और शल हुए। शांतनु के वीर्य और गंगाके गर्भसे आत्मज्ञ भीष्मने जन्म लिया था । महात्मा भीष्म सब धर्मज्ञों से श्रेष्ठ, महाभागवत, विद्वान और वीरों में शिरोमणि हुए। उन्हों ने संग्राम करके परशुराम जी कोभी संतुष्ट करादिया था । शन्तनु के वीर्यसे धीमर से पालीहुई सत्यवती में चित्रांगद और विचित्र वीर्य नामक दोपुत्र उत्पन्न हुए । चित्रांगदतो चित्रांगद नामक एक गंधर्व से युद्धमें मारागया। सत्यवती के क्वांरे पनेमें पराशर ऋषिसे साक्षात् हरिके अंश वेद रक्षक भगवान व्यास जी उत्पन्न हुएथे । मैं उन्हींका पुत्रहूं और उन्हीं से इस भागवत शास्त्रको पढ़ा है । मैं उनका सगुणावलंबी पुत्रथा इसही कारण उन भगवान व्यासजीने पैलआदि शिष्योंको छोड़कर मुझहीसे परम गुप्त भागवत शास्त्र कहाथा । ऊपर कहेहुये विचित्र वीर्यने काशिराज की दोकन्या अम्बिका और अम्बालिका से पाणिग्रहण कियाथा। इन दोनों कन्याओंको भीष्मने बलपूर्वक स्वयम्बरसे हरण कियाथा । दोनों स्त्रियोंमें आसक्त होजानेसे विचित्र वीर्य थोड़ेही कालमें यक्ष्मा रोगमें ग्रस्त होकर काल कवलित हुआ। १९--२४ । उसके संतान न हुई । उनके भाई भगवान व्यासजीने माता की आज्ञासे उनके क्षेत्रमें धृतराष्ट्र, पांडु और विदुर इन तीन पुत्रोंको उत्पन्नकिया २५॥हेराजन्! धृतराष्ट्र के वीर्यसे गांधारी के गर्भसे १०० पुत्र और दुःशाला नामक एक पुत्री उत्पन्न हुई, उन सबमें दुर्योधन बड़ाथा ॥ २६ ॥ पाण्डु शापके वशसे मैथुन न करसक्ताथा । उसकी पत्नी कुंती के गर्भसे धर्म, वायु, और इन्द्रसे युधिष्ठिरादि तीन महारथ पुत्रोंने जन्म ग्रहण किया ॥२७॥ और उसकी माद्री नाम जोस्त्री थी, उससे दोनों अश्विनी कुमारों के नकल और सहदेव दोपुत्र उत्पन्न हुए । उनपाचों पाण्डवों की स्त्री द्रौपदी थी । युधिष्ठरादि पांच पाण्डवों से उसके पांचपुत्र उत्पन्न हुए जो तुम्हार चाचा थे ॥ २८ ॥ युधिष्ठिर से प्रतिविन्ध्य, भीमसे श्रुतसेन, अर्जुन से श्रुतकीर्ति,

तथापरे। युधिष्ठिरात्तु पौरव्यां देवकोथघटोत्कचः ३० भीमसेनाद्धिडिम्बायां काल्यां सर्वगतस्ततः। सहदेवात्सुहोत्रं तु विजयाऽसूत पार्वती॥ ३१ ॥ करेणुमत्यां नकुलो निरमित्रं तथार्जुनः। इरावन्तमुलूप्यां वै सुतायां बभ्रुवाहनम्॥ मणिपूरपतेः सोऽपि तत्पुत्रः पुत्रिकासुतः॥ ३२॥ तवतातः सुभद्रायामभिमन्युरजायत। सर्वातिरथजिद्वीर उत्तरायां ततो भवान्॥ ३३॥ परिक्षीणेषु कुरुषु द्रौणेर्ब्रह्मास्त्रतेजसा। त्वं च कृष्णानुभावेन सजीवो मोचितोऽन्तकात्॥ ३४॥ तवेमे तनयास्तात जनमेजयपूर्वकाः। श्रुतसेनो भीमसेन उग्रसेनश्च वीर्यवान्॥ ३५॥ जनमेजयस्त्वां विदित्वा तक्षकान्निधनं गतम्। सर्पान्वै सर्पयागाग्नौ स होष्यति रुषाऽन्वितः॥ ३६॥ कावषेयं पुरोधाय तुरं तुरगमेधयाट्। समन्तात्पृथिवीं सर्वां जित्वा यक्ष्यति चाध्वरैः॥ ३७॥ तस्य पुत्रः शतानीको याज्ञवल्क्यात्त्रयीं पठन्। अस्त्रज्ञानं क्रियाज्ञानं शौनकात्परमेष्यति॥ ३८॥ सहस्रानीकस्तत्पुत्रस्ततश्चैवाश्वमेधजः। असीमकृष्णस्तस्यापि नेमिचक्रस्तु तत्सुतः॥ ३९॥ गजाह्वये हृते नद्या कौशाम्ब्यां साधु वत्स्यति। उक्तस्ततश्चित्ररथस्तस्मात्कविरथः सुतः॥ ४०॥ तस्माच्च वृष्टिमांस्तस्य सुषेणोऽथ महीपतिः। सुनीथस्तस्य भविता नृचक्षुर्यत्सुखीनलः॥ ४१॥ परिप्लवसुतस्तस्मान्मेधावी सुनयात्मजः। नृपंजयस्ततो दूर्वस्तिमिस्तस्माज्जनिष्यति॥ ४२॥ तिमेर्बृहद्रथस्तस्माच्छतानीकः सुदासजः। शतानीकाद्दुर्दमनस्तस्यापत्यं महीनरः॥ ४३॥ दण्डपाणिर्निमिस्तस्य क्षेमको भविता नृपः। ब्रह्मक्षत्रस्य वै प्रोक्तो वंशो देवर्षिसत्कृतः॥ ४४॥ क्षेमकं प्राप्य राजानं सं-

नकुल से शतानीक हुआ।२९। और सहदेव से श्रुतकर्मा उत्पन्न हुआ हे राजन्! उन पांच पाण्डवों की दूसरी स्त्रियों से औरभा कई पुत्र उत्पन्न हुए थे युधिष्ठिर के पौरवी नाम स्त्री से देवक भीमसेन की हिडम्बी नाम स्त्री से घटोत्कच, और काली के गर्भ से सर्वगत, सहदेव के पर्वतनंदिनी विजया के गर्भ से सुहोत्र हुआ॥३०।३१॥ नकुलके करेणुमती स्त्री से नरमित्र अर्जुन के वीर्यसे उलूपी उलूपीसे इरावान, मणिपुरकी राजपुत्री से बभ्रुवाहन और सुभद्रा के गर्भ से तुम्हारे पिता अभिमन्यु उत्पन्नहुए बभ्रुवाहन मणिपुर के राजाकी पुत्री का पुत्रथा इस कारण उसही का पुत्र होकर रहा अभिमन्यु सब अतिरथियोंको जीतनेवाला और महावीरथा उसके वीर्यसे उत्तराके गर्भ में तुम्हाराजन्म हुआ॥३२॥ ३३॥ हे राजन्! अश्वत्थामा के ब्रह्मास्त्रके तेजसे कुरुवंश क्षीण हुआजाताथा और तुमभी उस से नष्ट होगयेथे केवल भगवान श्रीकृष्णजी के प्रभाव से तुम मृत्युसे बचे॥३४॥ हे तात! तुम्हारे इस समय जनमेजय,श्रुतसेन भीमसेन और उग्रसेन यह चार पुत्र हैं॥ ३५॥ जनमेजय तक्षक से तुम्हारी मृत्यु को हुआजान रोषवश सर्प यज्ञ का आरम्भ कर यज्ञाग्नि में सब सर्पोंको होमेंगा।३६। तुम्हारा वह पुत्र पृथ्वी को जीतकर अश्वमेध यज्ञ के करने में प्रवृत्त होगा और कावषेय नामक ऋषि को पुरोहित कर और भी अन्यान्य यज्ञ करेगा॥ ३७॥ हे राजन्! इस जनमेजय के शतानीक नामक एक पुत्र उत्पन्न होगा वह याज्ञवल्क्य मुनि से वेद पाठकर क्रिया ज्ञान शौनक से आत्मज्ञान, और कृपाचार्य से अस्त्र ज्ञान प्राप्त करेगा॥ ३८॥ शतानीक का पुत्र सहस्रानीक, सहस्रानीक का अश्वमेधज, अश्वमेधज का असीमकृष्ण और उसका पुत्र नेमिचक्रहोगा॥ ३९॥ हस्तिनापुर के नदी द्वारा नाश होजानेपर वह कौशाम्बीनगर में सुख से बास करेगा नेमिचक्र का पुत्र उक्त, उसका चित्ररथ, और उससे कविरथ उत्पन्न होगा॥ ४०॥ कविरथ के वृष्टिमान उससे सुषेण, सुषेण से सुनीथ महीपति उत्पन्न होगा सुनीथ का नृचक्षु उसका सुखीनल होगा॥ ४१॥ सुखीनल का पुत्र परिप्लव, परिप्लव का पुत्र सुनय उसकापुत्रमेधावी, मेधावीकापुत्रनृपञ्जय, उसका दूर्वपुत्रहोगा। उसका पुत्रतिमि॥४२॥तिमिकाबृहद्रथ,बृहद्रथकासुदास, सुदासकाशतानीक,शतानीकका दुर्दमन,दुर्दमनका महीनर॥४३॥महीनरकादण्डपाणि,दण्डपाणिका निमि, निमिकेवीर्य से क्षेमकउत्पन्नहोगा।ब्राह्मणऔर क्षत्रियों के उत्पन्नकरनेवाले देवर्षिआदतकावंश कलियुग में क्षेमकराजातक रहेगा। हेराजन्! मगधवंश

स्थांप्राप्स्यतिवैकली । अथमागधराजानोभवितारोवदामिते ॥ ४५ ॥ भावितास्सह देवस्यमार्जारिर्यच्छ्रुतश्रवाः । ततोऽयुतायुस्तस्यापि निरमित्रोऽथतत्सुतः ॥ ४६ ॥ सुनक्षत्रः सुनक्षत्राद्बृहत्सेनोऽथकर्मजित् । ततः सुतंजयाद्विप्रः शुचिस्तस्यभविष्य ति ॥ ४७ ॥ क्षेमोऽथसुव्रतस्तस्माद्धर्मसूत्रःशमस्ततः । द्युमत्सेनोऽथसुमतिः सुब लोजनिताततः ॥ ४८ ॥ सुनीथः सत्यजिदथविश्वजिद्यद्रिपुंजयः । बार्हद्रथाश्चभू पालाभाव्याःसाहस्रवत्सरम् ॥ ४९ ॥

इतिश्रीमद्भा०म०नवम०द्वाविंशोऽध्यायः ॥ २२

श्रीशुक उवाच ॥ अनोः सभानरश्चक्षुः परोक्षश्चसुतास्त्रयः । सभानरात्कालन रः सृंजयस्तत्सुतस्ततः ॥१॥ जनमेजयस्तस्यपुत्रोमहाशालोमहामनाः । उशीनरस्ति तिक्षुश्चमहामनसआत्मजौ ॥ २ ॥ शिबिर्वनः शमिर्दक्षश्चत्वारउशीनरात्मजाः वृषाद र्भः सुवीरश्चमद्रः कैकेयआत्मजाः ॥३॥ शिबेश्चत्वारएवासंस्तितिक्षोश्चरुशद्रथः । ततोहेमोऽथसुतपाबलिः सुतपसोऽभवत् ॥ ४ ॥ अङ्गवङ्गकलिङ्गाद्याः सुह्मपुण्ड्रान्ध्र संज्ञिताः । जज्ञिरेदीर्घतमसो बलेःक्षेत्रेमहीक्षितः ॥ ५ ॥ चक्रुःस्वनाम्नाविषयान्ष डिमान्प्राच्यकांश्चते । खनपानोऽङ्गतोजज्ञेतस्माद्दिविरथस्ततः ॥ ६ ॥ सुतोधर्मरथो यस्यजज्ञेचित्ररथोऽप्रजाः रोमपादइतिख्यातस्तस्मैदशरथः सखा ॥ ७ ॥ शान्तां स्वकन्यांप्रायच्छदृष्यशृङ्गउवाहताम् । देवेऽवर्षतियंरामाआनिन्युर्हरिणीसुतम् ॥८॥ नाट्यसङ्गीतवादित्रैर्विभ्रमालिङ्गनार्हणैः । सतुराज्ञोऽनपत्यस्यनिरूप्येष्टिंमरुत्वतः ॥९ प्रजामदाद्दशरथोयेनलेभेऽप्रजाःप्रजाः । चतुरङ्गोरोमपादात्पृथुलाक्षस्तुतत्सुतः ॥१०॥ बृहद्रथोबृहत्कर्माबृहद्भानुश्चतत्सुताः । आद्याद्बृहन्मनास्तस्माज्जयद्रथउदाहृतः ११॥

में जाराजाहोंगे उनकावर्णनकरताहूं ॥४४।४५॥ जरासंधनन्दन सहदेवकापुत्रमार्जारिहुआ उसमार्जारिसे श्रुतश्रवा जन्मग्रहणकरेगा। उसकापुत्र अयुतायु,उसकानिरमित्र॥४६॥ निरमित्र। सुनक्षत्र,सुनक्षत्रका पुत्रबृहत्सेन, बृहत्सेनकाकर्मजित,कर्मजितकासृंजय,सृंजयका विप्र,उसका शुचि ॥ ४७ ॥शुचिका क्षेम,क्षेमकासुव्रत,सुव्रतकाधर्मसूत्र,धर्मसूत्रका शम, शमकाद्युमत्सेन, द्युमत्सेनकासुमति उससे सुबल उत्पन्नहोगा ॥ ४८ ॥ सुबलकापुत्रसुनीथ, सुनीथकासत्यजित, सत्यजितका विश्वजित और उस से रिपुंजय उत्पन्नहोगा। बृहद्रथवंशीराजागणऔरभीमहस्रवर्ष राज्यकरेंगे ॥ ४९ ॥

इतिश्रीमद्भा०महा०नवम०सरलाभाषाटीकायांद्वाविंशोऽध्यायः ॥ २२ ॥

श्रीशुकदेवजी बोले कि हे राजन् ! अनुके तीन पुत्र सभानर, चक्षु और परोक्ष हुए सभानर का पुत्र कालनर, कालनरका सृंजय हुआ सृंजय से ॥१॥ जनमेजय ने जन्म ग्रहण किया जनमेजय का पुत्र महाशाल और महाशालका महामनाहुआ महामनाके दोपुत्र उशीनर और तितिक्षुहुए।२। उशीनर के चार पुत्र शिबि, वन, शमि और दक्ष थे शिबि से वृषादर्भ, सुवीर, मद्र, केकय यहचार पुत्र उत्पन्न हुए ॥ ३॥ तितिक्षु का पुत्र रुशद्रथ, उसकाहेम, उसका सुतपा सुतपा का पुत्र बलिहुआ ॥४॥ उस बलि के क्षेत्र में दीर्घतमा ऋषि से अंग, बङ्ग, कलिंग, सुह्म, पुंड्र, और अंध्र नामक राजा उत्पन्न हुए ५ ॥ उन्होंने पूर्व दिशामें अपने २ नामके छहराज्य स्थापित किये । अंगसे खानपान उत्पन्न हुआ था । उसका पुत्र दिविरथ, दिविरथका ॥ ६ ॥ पुत्र धर्मरथ और उसका चित्ररथ हुआ । चित्ररथके संतान नहीं हुई । वह रोमपादके नामसे विख्यात हुआ । उसके मित्र दशरथने ॥ ७ ॥ उसको शांतानामक अपनी कन्या, कन्याकी समान रखनेको देदीथी । हरिणी तनय ऋष्य शृंग मुनिने उस कन्याका पाणिग्रहण किया । रोमपाद राजा के राज्यमें कुछ कालतक देवताओंने जल न बरसाया तब राजाकी आज्ञासे वेश्याओंने तपोवनमें जा नृत्य, गीत, विभ्रम, विलास और आलिंगन आदिसे मोहित कर उन ऋषियों को लआई, । ऋष्यशृंग के आतेही वहां जल बरसा पानन्तर उस मुनिने निःसन्तान राजाके निमित्त इन्द्र यागकराया ८।९ ।जिसने निःसतान दशरथके चारपुत्र उत्पन्नहुए रोमपादसे चतुरंग उसकापुत्र पृथुलाक्षहुआ १० पृथुलाक्षसे बृहद्रथ,बृहत्कर्मा और

विजयस्तस्यसंभूत्यांततोधृतिरजायत । ततोधृतव्रतस्तस्य सत्कर्माऽधिरथस्ततः ॥१२॥ योऽसौगङ्गातटेक्रीडन्मञ्जूषाऽन्तर्गतंशिशुम् । कुन्त्यापविद्धंकानीनमनपत्यो ऽकरोत्सुतम् ॥ १३ ॥ वृषसेनः सुतस्तस्यकर्णस्यजगतीपते । द्रुह्योश्चतनयोबभ्रुः सेतुस्तस्यात्मजस्ततः ॥ १४ ॥ आरब्धस्तस्यगान्धारस्तस्यधर्मस्सुतोधृतः । धृतस्यदुर्मनास्तस्मात्प्रचेताः प्राचेतसंशतम् ॥ १५ ॥ म्लेच्छाधिपतयोऽभूवन्नुदीचींदिशमाश्रिताः । तुर्वसोश्चसुतोवह्निर्वह्नेर्भर्गोऽथभानुमान् ॥१६॥ त्रिभानुस्तत्सुतोऽस्यापिकरंधम उदारधीः ।मरुतस्तत्सुतोऽपुत्रः पुत्रंपौरवमन्वभूत् ॥१७॥ दुष्यन्तः सपुनर्भेजेस्ववंशंराज्यकामुकः।ययातेर्ज्येष्ठपुत्रस्ययदोर्वंशंनरर्षभ ॥ १८ ॥ वर्णयामिमहापुण्यंसर्वपापहरंनृणाम् यदोर्वंशंनरः श्रुत्वासर्वपापैः प्रमुच्यते ॥ १९ ॥ यत्रावतीर्णो भगवान्परमात्मानराकृतिः । यदोः सहस्रजित्क्रोष्टानलोरिपुरितिस्मृताः ॥ २० ॥ चत्वारः सूनवस्तत्रशतजित्प्रथमात्मजः । महाहयोवेणुहयोहैहयश्चेतितत्सुताः ॥२१॥ धर्मस्तुहैहयसुतोनेत्रःकुन्तेःपितातत । सोहंजिरभवत्कुन्तेर्महिष्मान्भद्रसेनकः ।२२ दुर्मदोभद्रसेनस्यधनकः कृतवीर्यसूः । कृताग्निः कृतवर्माच कृतौजा धनकात्मजा ॥ २३ ॥ अर्जुनः कृतवीर्यस्यसप्तद्वीपेश्वरोऽभवत् । दत्तात्रेयाद्धरेरंशात्प्राप्तयोगमहागुणः ॥२४॥ ननूनंकार्तवीर्यस्यगतिंयास्यन्तिपार्थिवाः । यज्ञदानतपोयोगश्रुतवीर्यजयादिभि ॥ २५ ॥ पञ्चाशीतिसहस्राणिह्यव्याहतबलः समाः । अनष्टवित्तस्मरणोबुभुजेऽक्षय्यषड्वसु ॥ २६ ॥ तस्यपुत्रसहस्रेषुपञ्चैवोर्वरितामृधे । जयध्वजः शूरसेनोवृषभोमधुरूर्जितः ॥ २७ ॥ जयध्वजात्तालजंघस्तस्यपुत्रशतंत्वभूत् । क्ष

बृहद्भानु यह तीन पुत्र उत्पन्न हुए । बृहद्रथने बृहन्मनाने जन्मग्रहण किया उसका पुत्र जयद्रथ हुआ ॥ ११ ॥ जयद्रथका पुत्र विजय हुआ । उसकी संभूती नाम स्त्रीसे धृतिने जन्मग्रहण किया धृतिकापुत्र धृतव्रत उसकापुत्रसत्कर्मा हुआ, सत्कर्मासे अधिरत उत्पन्नहुआ॥१२॥इसधिरथने गंगाके तटपर क्रीडाकरतेहुए कुन्तीके छोडेहुए मंजूषा(पिटारी)मेंकि जिसमें कुन्तीन सुतरखकर बहादियाथा, पाया, आप निःसंतानथा इसकारण उसे अपना सुत करके रक्खा । हेराजन्! उसबालककानाम कर्णहुआ ॥१३॥उसका पुत्र वृषसेनहुआ ययातिका पुत्र द्रुह्युका बभ्रु, उसका सेतु, सेतुकापुत्र आरब्ध उसकागांधार, उसकाधर्म, धर्मकाधृत पुत्रहुआ । धृतका दुर्मना, उसका प्रचेता और प्रचेताके सौ पुत्र उत्पन्नहुए॥१५॥ उन्होंने उत्तरदिशामें रहकर म्लेच्छोंका आधिपत्य ग्रहणकिया । तुर्वसुका पुत्र वह्नि उसका भर्ग उसका भानुमानहुआ ॥ १६ ॥ भानुमानका पुत्र त्रिभानु उसका उदारमति करंधम करन्धमका पुत्र मरुतहुआ यह मरुत अपुत्रथा ॥ १७ ॥ इसकारण पुरुवंशीय दुष्यन्तकोही इसने पुत्रमाना। यहदुष्यन्त फिरराज्याभिलाषाहो अपनेवंश में प्रविष्टहुआ।हेनरवर! अब इसके उपरांत ययातिके बडेपुत्र यदुके वंशका वर्णनकरताहूं। सोसुनो।१८॥वह पवित्रवंश मनुष्यों के पापोंकानाशकरने वाला है ।जिसवंश में भगवानने मनुजरूपधारणकियाथा उसयदुवंशका वर्णनसुननेसे मनुष्योंकसबपाप दूरहोजाते हैं । सहस्रजित,क्रोष्टु,नल,और रिपुनामक ये यदुकेचारपुत्रथे ॥ १९।२०॥सहस्रजितकापुत्र शतजितहुआ ।उसकेतीनपुत्रमहाहय, वेणुहय और हैहयहुए॥ २१॥ हैहयकापुत्र धर्म, उसकानेत्र,नेत्रका कुन्ति,कुन्तिकासोहंजि, । उसका पुत्रमहिष्मान;महिष्मानकापुत्रभद्रसेनहुआ ॥२२ ॥भद्रसेनकेदोपुत्र दुर्मद औरधनकहुए।धनकके चारपुत्र कृतवीर्य,कृताग्नि,कृतवर्मा और कृतौजाहुए २३॥कृतवीर्यकापुत्र अर्जुन सातोद्वीपोंकाराजाहोकर भगवान के अंश दत्तात्रेयजी के संग से योगगुणकोप्राप्तहुआ ॥२४॥ दूसरा और कोई राजायज्ञ,दान तप,योग,वेदाध्ययन,शौर्य,वीर्य और जयादि में उसमहात्माकीसमानता नहींकरसकता ॥२५॥उसराजानेअपने अखण्डपराक्रमसे ८५०००वर्ष अक्षयहो छहइन्द्रियों के विषय भोग किये।उस से उसकास्मरण व पराक्रम कभीनष्टनहींहुआ॥२६॥उस अर्जुन के सहस्रपुत्रहुए जिन मेंसे केवल पांचही जयध्वज,शूरसेन, वृषभ,मधु और ऊर्जितयुद्धमें शेषबचेथे ॥२७॥ उनमेंजयध्वजका

श्चयतालजंघाख्यमौर्वतेजोपसंहृतम् ॥२८॥ तेषांज्येष्ठोवीतिहोत्रोवृष्णिः पुत्रोमधोः स्मृतः । तस्यपुत्रशतंत्वासीद्वृष्णिज्येष्ठंयतः कुलम् ॥ २९ ॥ माधवावृष्णयोराजन्यादवाश्चेतिसंज्ञिताः । यदुपुत्रस्यचक्रोष्टोः पुत्रोवृजिनवांस्ततः ॥ ३० ॥ श्वाहिस्ततोरुशेकुर्वैतस्यचित्ररथस्ततः । शशबिन्दुर्महायोगीमहाभोजोमहानभूत् ।३१। चतुर्दशमहारत्नश्चक्रवर्त्यपराजितः । तस्यपत्नीसहस्राणांदशानांसुमहायशाः ३२॥ दशलक्षसहस्राणिपुत्राणांतास्वजीजनत् । तेषांतुषट्प्रधानानां पृथुश्रवस आत्मजः ॥ ३३॥ धर्मोनामोशनातस्यहयमेधशतस्ययाट् । तत्सुतोरुक्मकवचस्तस्यपञ्चात्मजाः शृणु । पुरुजिद्रुक्मरुक्मेषुपृथुज्यामघसंज्ञिताः ॥ ३४ ॥ ज्यामघस्त्वप्रजोऽप्यन्यांभार्यांशैब्यापतिर्भयात् । नाविन्दच्छत्रुभवनाद्भोज्यांकन्यामहारषीत् ॥ ३५॥ रथस्थांतांनिरीक्ष्याह शैब्यापतिममर्षिता । केयं कुहकमत्स्थानं रथमारोपितेतिवै ॥ ३६ ॥ स्नुषातवेत्यभिहितेस्मयन्तीपतिमब्रवीत् । अहंवन्ध्याऽसपत्नीचस्नुषामेयुज्यतेकथम् ॥ ३७ ॥ जनयिष्यसियंराज्ञितस्येयमुपयुज्यते । अन्वमोदन्तद्विश्वेदेवाः पितरएवच ॥ ३८ ॥ शैब्यागर्भमधात्कालेकुमारंसुषुवेशुभम् । सविदर्भ इति प्रोक्तउपयेमेस्नुषां सतीम् ॥ ३९ ॥

इति श्रीमद्भागवते महापुराणे नवमस्कन्धे यदुवंशानुवर्णने त्रयोविंशोऽध्यायः ।२३।

श्रीशुक उवाच तस्यांविदर्भोऽजनयत्पुत्रौनाम्नाकुशक्रथौ । तृतीयंरोमपादंच विदर्भकुलनन्दनम् ॥ १ ॥ रोमपादसुतोबभ्रुर्बभ्रोःकृतिरजायत । उशिकस्तत्सुतस्तस्माच्चेदिश्चैद्यादयोनृप ॥ २ ॥ क्रथस्यकुन्तिःपुत्रोऽभूद्वृष्टिस्तस्याथनिर्वृतिः । ततो दशार्होनाम्नाऽभूत्तस्यव्योमःसुतस्ततः ॥ ३ ॥ जीमूतोविकृतिस्तस्ययस्यभीमरथः

पुत्रतालजंघहुआ इसके सौपुत्रथे । तालजंघनामक सबक्षत्रियों को सगरनेमारडालाथा॥२८॥तालजंघके सौ पुत्रों में से वीतिहोत्र जेठाथा । वृष्णिमधुका पुत्रथा उसमधु के सौपुत्रउत्पन्नहुए उननें से वृष्णिसबसे जेठाथा॥२८॥ हेराजन्! यदु, मधु और वृष्णि के कारण यह वंश यादव, माधव और वृष्णि के नाम से विख्यातहुआ । यदुकापुत्र जो क्रोष्टुथा उसके वृजिनवानपुत्रहुआ ॥ ३०॥ वृजिनवानकापुत्रस्वाहित, उसका रुशेकु, इसकापुत्र चित्ररथ, उसकापुत्र महायोगी शशबिंदुहुआ ॥ ३१ ॥ इसकेपास बड़े २ चौदहरत्नथे यह किसीसेनहीं हारनेवाला चक्रवर्ती राजाहुआ इसके दशसहस्र स्त्रियेंथी ॥३२॥ प्रत्येकसे एक२ लक्षपुत्र उत्पन्नहुए इससे उसके एक अरबपुत्र हुए । उनसबपुत्रों में से पृथुश्रवा,पृथुकीर्ति,पृथुयशाआदि छःजनप्रधानथे॥३३॥उनमेंसे पृथुश्रवाकापुत्रधर्म,उसकापुत्र उशनाहुआ।उशनाने सौअश्वमेधयज्ञकिये। उशनाकापुत्ररुचकथा रुचकके पांचपुत्र॥३४॥पुरुजित,रुक्म,रुक्मेषु,पृथु और ज्यामघहुए । इनमें से ज्यामघकी शैब्यानामकभार्याथी । ज्यामघ निःसन्तानथा तौभी स्त्री के भयसे उसने दूसरी स्त्री का ग्रहणनहीं किया ॥३५॥ वह एकसमयशत्रुके घरसे भोज्यानामक एककन्याका हरण करके लियेहुएआरहा, उसकन्याको रथपरबैठीहुई देख शैब्याक्रोधितहो पति से कहनेलगीकि ॥ ३६॥ यहक्या ? किसे रथपर बैठायेहुएलारहा है? ज्यामघने कहाकि यह तेरेपुत्रकी बहूहै । ज्यामघकी इसबातको सुनकर शैव्याविस्मितहो कहनेलगी ॥३७॥ कि मैंतो बन्ध्याहू और मेरे सपत्नी भी नहीं है फिरयह मेरे पुत्रकी बहू कैसे होसकती है ? ज्यामघ ने कहाकि हेराज्ञि ! तेरे जोपुत्र उत्पन्न होगा उसीकी यह स्त्री होगी ॥३८॥ हे राजन् ! देवता और पितर ज्यामघकी इसबातको सुनकर अत्यन्त प्रसन्नहुए । तदनन्तर शैव्या ने गर्भधारण कर नियतसमय में उसने एकपुत्रउत्पन्नकिया । उस कुमारकानाम विदर्भहुआ,इसने अपने पिताकी लाईहुई साध्वीसे विवाहकिया॥३९॥

इतिश्रीमद्भागवतेमहापुराणेनवमस्कन्धेसरलाभाषाटीकायांत्रयोविंशोऽध्यायः ॥ २३ ॥

श्री शुकदेवजी बोलेकि—हेराजन्! विदर्भ ने उसस्त्री से कुश और क्रथनामकदोपुत्र उत्पन्नकिये विदर्भका कुलनन्दनरोमपाद तीसरापुत्रहुआ ॥१॥ रोमपादकापुत्र बभ्रु, बभ्रुसे कृति उत्पन्नहुआ । कृतिकापुत्र उशिक,उशिकसे चेदि और दमघोषआदि उत्पन्नहुए ॥२॥ हे राजन् ! विदर्भकेपुत्रक्रथ

सुतः । ततोनवरथःपुत्रोजातोदशरथस्ततः ॥ ४ ॥ करम्भिःशकुनेःपुत्रोदेवरातस्त-
दात्मजः । देवक्षत्रस्ततस्तस्यमधुःकुरुवशादनुः ॥ ५ ॥ पुरुहोत्रस्त्वनोःपुत्रस्तस्या
युःसात्वतस्ततः । भजमानोभजिर्दिव्योवृष्णिर्देवावृधोऽन्धकः ॥ ६ ॥ सात्वतस्य
सुताःसप्तमहाभोजश्चमारिष । भजमानस्यनिम्लोचिःकिंकिणोधृष्टिरेवच ॥ ७ ॥
एकस्यामात्मजाःपत्न्यामन्यस्यांचत्रयःसुताः । शताजिच्चसहस्राजिदयुताजिदि
तिप्रभो ॥ ८ ॥ बभ्रुर्देवावृधसुतस्तयोःश्लोकौपठन्त्यमू । यथैवशृणुमोदूरात्संपश्या
मस्तथाऽन्तिकात् ॥ ९ ॥बभ्रुःश्रेष्ठोमनुष्याणांदेवैर्देवावृधःसमः। पुरुषाःपञ्चषष्टि-
श्चषट्सहस्राणिचाष्टच ॥ १० ॥ येऽमृतत्वमनुप्राप्ताबभ्रोर्देवावृधादपि ।महाभोजो-
पिधर्मात्माभोजाआसंस्तदन्वये ॥ ११ ॥ वृष्णेःसुमित्रःपुत्रोऽभूद्युधाजिच्चपरंतप ।
शिनिस्तस्यानमित्रश्चनिघ्नोऽभूदनामित्रतः ॥ १२ ॥ सत्राजितःप्रसेनश्चनिम्नस्या
प्यासतुःसुतौ । अनमित्रसुतोयोऽन्यःशिनिस्तस्याथसत्यकः ॥ १३ ॥युयुधानःसात्य
किर्वैजयस्तस्यकुणिस्ततः । युगन्धरोऽनमित्रस्यवृष्णिःपुत्रोपरस्ततः ॥१४॥ श्वफ-
ल्कश्चित्ररथश्चगांदिन्यांचश्वफल्कतः । अक्रूरप्रमुखाआसन्पुत्राद्वादशविश्रुताः १५
आसङ्गःसारमेयश्चमृदुरोमृदुविद्गिरिः । धर्मवृद्धःसुकर्माचक्षेत्रोपेक्षोऽरिमर्दनः १६
शत्रुघ्नोगन्धमादश्चप्रतिबाहुश्चद्वादश । तेषांस्वसासुचीराख्याद्वावक्रूरसुतावपि
॥ १७ ॥ देववानुपदेवश्चतथाचित्ररथात्मजाः । पृथुर्विदूरथाद्याश्चबहवोवृष्णिनन्द
नाः ॥ १८ ॥ कुकुरोभजमानश्चशुचिःकम्बलबर्हिषः । कुकुरस्यसुतोवह्निर्विलोमा
तनयस्ततः ॥ १९ ॥ कपोतरोमातस्यानुःसखायस्यचतुम्बुरुः । अन्धकाद्दुन्दु
भिस्तस्य दरिद्योत पुनर्वसुः ॥ २० ॥ तस्याहुकश्चाहुकीच कन्याचैवाहुकात्मजौ ।

का कुन्ति उसका धृष्टि उसका निर्वृति, निर्वृतिकापुत्र दशार्ह, दशार्हकापुत्र व्योम ॥३॥ व्योमकापुत्र
जीमूत, जीमूतकापुत्र विकृति, विकृतिकापुत्रभीमरथ, भीमरथकापुत्रनवरथहुआ । नवरथकापुत्रद-
शरथ ॥४॥ उसका शकुनि, शकुनिकाकरम्भि, उसका देवरात, देवरातकादेवक्षत्र, उसकापुत्रमधु,
मधुसे कुरुवंश उत्पन्नहुआ कुरुवंशकापुत्रअनु ॥५॥ उसकापुरुहोत्र, पुरुहोत्रकापुत्रआयु और उस
से सात्वतकी उत्पत्तिहुई । हेआर्य ! सात्वतके सातपुत्र भजमान, भजि, दिव्य, वृष्णि, देवावृध,अ
न्धक ॥६॥ उत्पन्नहुए । भजमान के दो स्त्रियें थीं । एकस्त्री से निम्लोचि, किंकण और धृष्टि ॥
॥७॥यह तीनपुत्र और दूसरी पत्नी से शताजित् ,सहस्राजित और अयुताजित यहतीनपुत्रहुए॥८॥
देवावृधका पुत्र बभ्रुथा।इन देवावृध और बभ्रुके प्रसंगमें दोश्लोक कहेजातेहैं सो यहहैं देवावृध और
बभ्रुको जैसा दूरसे हमनेसुनाथा निकटसे वैसाहीदेखा॥९॥बभ्रु मनुष्योंमें श्रेष्ठ और देवावृध देवताओं
की समानहैं।६०७३ मनुष्य बभ्रु और देवावृधके उपदेशसे मोक्षको प्राप्तहुए सात्वतकापुत्र महाभोज
अत्यन्तही धर्मात्माथा उसकेवंशमें भोजगणोंकी उत्पत्तिहुई १०-११।हेपरंतप ! सात्वतकेपुत्र वृष्णि
के सुमित्र और युधाजित दोपुत्रथे । युधाजितकापुत्रशिनि और अनमित्रथा।अनमित्रकेपुत्र निम्नके १२
सत्राजित और प्रसेन यह दोपुत्रहुए।हेराजन् !अनमित्रके शिनिनामक एकऔरभी पुत्रथा उसका पुत्र
सत्यकहुआ॥१३॥उस सत्यककापुत्र युयुधान,उसकापुत्र जय, जयकापुत्रकुणि कुणिसे युगन्धरका
जन्महुआ।अनमित्रके वृष्णिनामसे और एक पुत्रथा॥१४॥उसकापुत्र श्वफल्कहुआ।उससे गांदिनी
के गर्भसे अक्रूर और दूसरे १२ विख्यात पुत्र उत्पन्नहुए १५॥वेआसंग, सारमेय मृदुर,मृदुविद, गिरि,
धर्मवृद्ध, सुकर्मा, क्षेत्रोपेक्ष, अरिमर्दन॥१६॥शत्रुघ्न,गंधमाद और प्रतिबाहु इननामोंसे प्रसिद्धथे इन
के सुचारा नामक एक बहिनभी हुईथी। अक्रूरके देववान और उपदेव नामक दोपुत्र उत्पन्नहुए ।
चित्ररथके पृथु विदूरथ आदि बहुतसे पुत्रउत्पन्नहुएथे वे सबही वृष्णिवंशीथे १७—१८। अन्धकके
कुकुर, भजमान शुचि, कम्बल बर्हिष यह चारपुत्र उत्पन्नहुये, । उनमेंसे कुकुरका सुत वह्नि,वह्निका
विलोमा॥१९॥विलोमाका कपोतरोमा उसकासुत अनुहुआ तुंबुर उस अनुका सखाथा ।अनुकासुत
अन्धक उसकादुन्दुभिथा । दुंदुभिकासुत दरिद्योत उसका पुनर्वसु॥२०॥पुनर्वसुकासुतआहुक और

देवकश्चोग्रसेनश्च चत्वारो देवकात्मजाः ॥ २१ ॥ देववानुपदेवश्च सुदेवो देववर्धनः । तेषां स्वसारः सप्तासन्धृतदेवादयो नृप ॥ २२ ॥ शान्तिदेवोपदेवा च श्रीदेवा देवरक्षिता । सहदेवा देवकी च वसुदेव उवाह ताः ॥ २३ ॥ कंसः सुनामा न्यग्रोधः कंकः शंकुः सुहूस्तथा । राष्ट्रपालोऽथ सृष्टिश्च तुष्टिमानौग्रसेनयः ॥ २४ ॥ कंसा कंसवती कंका शूरभूरा राष्ट्रपालिका । उग्रसेनदुहितरो वसुदेवानुजस्त्रियः ॥ २५ ॥ शूरो विदूरथादासीद्भजमानः सुतस्ततः । शिनिस्तस्मात्स्वयंभोजो हृदीकस्तत्सुतो मतः ॥ २६ ॥ देववाहुः शतधनुः कृतवर्मेति तत्सुताः । देवमीढस्य शूरस्य मारिषा नाम पत्न्यभूत् । ॥ २७ ॥ तस्यां स जनयामास दश पुत्रानकल्मषान् । वसुदेवं देवभागं देवश्रवसमानकम् ॥ २८ ॥ सृंजयं श्यामकं कंकं शमीकं वत्सकं वृकम् । देवदुन्दुभयो नेदुरानका यस्य जन्मनि ॥ २९ ॥ वसुदेवं हरेः स्थानं वदन्त्यानकदुन्दुभिम् । पृथा च श्रुतदेवा च श्रुतकीर्तिः श्रुतश्रवाः ॥ ३० ॥ राजाधिदेवी चैतेषां भगिन्यः पंच कन्यकाः । कुन्तेः सख्युः पिता शूरो ह्यपुत्रस्य पृथामदात् ॥ ३१ ॥ साऽऽप दुर्वाससो विद्यां देवहूतीं प्रतोषितात् । तस्या वीर्यपरीक्षार्थमाजुहाव रविं शुचिम् ॥ ३२ ॥ तदैवापागतं देवं वीक्ष्य विस्मितमानसा । प्रत्ययार्थं प्रयुक्ता मे याहि देव क्षमस्व मे ॥ ३३ ॥ अमोघं दर्शनं देवि आधत्से त्वयि चात्मजम् । योनिर्यथा न दुष्येत कर्ताऽहं ते सुमध्यमे ॥ ३४ ॥ इति तस्यां स आधाय गर्भं सूर्यो दिवं गतः । सद्यः कुमारः संजज्ञे द्वितीय इव भास्करः ॥ ३५ ॥ तं साऽत्यजन्नदीतोये कृच्छ्राल्लोकस्य बिभ्यती । प्रपितामहस्तामुवाह पाण्डुर्वै सत्यविक्रमः ॥ ३६ ॥ श्रुतदेवां तु कारूषो वृद्धशर्मा समग्रहीत् । यस्यामभूद्दन्तवक्र ऋषिशप्तो दितेः सुतः ॥ ३७ ॥ कैकयो धृष्टकेतुश्च श्रुतकीर्तिमविन्दत । सन्तर्दनादयस्तस्यां पञ्चासन्कैकयाः

आहुकोंहुई आहुककेदोसुत देवक और उग्रसेनहुये।देवकके चारपुत्र॥२१॥देववान, उपदेव, सुदेव और देववर्धन यह हेराजन्! उनके धृतदेवा, आदि सातबहिनेथीं॥२२॥श्रीदेवा, शान्तिदेवा, उपदेवा, श्रीदेवा, देवरक्षिता, सहदेवा और देवकी इन नामोंसे प्रसिद्धथीं. इन सातों कन्याओंसे वसुदेवनेही विवाहकिया। ॥ २३ ॥ हेराजन्! उग्रसेनके कंस, सुनाम, न्यग्रोध कंक, शंकु, सुहू, राष्ट्रपाल, सृष्टि और तुष्टिमान उत्पन्नहुये ॥२४॥ इनके अतिरिक्त कंसा कंसवती, कंका, शूरभू और राष्ट्रपालिका यह पांच कन्यायें थीं। यह वसुदेवके भाई देवभागादिकी स्त्रियेंहुई॥ २५ ॥ चित्ररथकेसुत विदूरथसे शूरने जन्मग्रहण किया। उसकासुत भजमान उसका शिनिहुआ। शिनिकासुत भोज उसका हृदिकहुआ॥ २६ ॥ उससे देववाहु, शतधनु और कृतवर्मा यह तीनसुत उत्पन्नहुये देवमीढकासुत शूरहुआ उसके मारिषानामक एकस्त्रीथी॥२७॥शूरनेमारिषा के गर्भमे वसुदेव, देवभाग, देवश्रव आनक सृंजय, श्यामक, कंक, शमीक और वत्सक वृक नामक दश निष्पाप सुत उत्पन्न किये वसुदेवके जन्मसमयमें देवताओंने स्वर्गमें दुंदुभी आदि बाजे बजायेथे ।२८–२९। इसहीकारण उनहरिके प्रादुर्भाव आश्रयरूप वसुदेवको आनक दुंदुभी कहते हैं। इनके पृथा, श्रुतदेवा, श्रुतकीर्ति, श्रुतश्रवा॥३०॥ओर राजाधिदेवी पांचबहिने थीं। शूरने अपने मित्र कुन्तिराजको अपुत्रक देख अपनीपुत्री उसको देदीथी ॥३१॥ इस पृथाने दुर्वासा ऋषिको संतुष्ट करके उनसे "देवहूति" नामक विद्या प्राप्तकी थी फिर उसने उस विद्याकी परीक्षा के निमित्त पवित्रहो सूर्य देवका आह्वानकिया॥३२॥ आह्वान करतेही सूर्य देव तत्कालहीवहांपर आ उपस्थित हुए। उनको देखतेही उसे अत्यंत विस्मय उत्पन्न हुआ। कुंती (पृथा) ने विनयपूर्वक उनसे कहाकि—हेदेव! मैंने केवल परीक्षाही के निमित्त इस विद्याका प्रयोग कियाथा। इस समय आपजावो मेराअपराध क्षमाकरो ॥ ३३ ॥ सूर्यने कहाकि देवताका दर्शन व्यर्थ नहीं होता; मैं तुम्हारे गर्भाधानाके जिससे योनिन बिगडे ऐसा करदूंगा ॥ ३४ ॥ इस प्रकार से कह सूर्य गर्भाधान कर वहां से चलेगये। उनके जातेही तत्काल दूसरे सूर्यकी समान कुंतीके एक पुत्र उत्पन्न हुआ ॥ ३५ ॥ पृथाने लोकभय से भयभीतहो उस पुत्र को नदीके जलमें डालदिया फिरतुम्हारे प्रपितामह सत्य विक्रम पाण्डुने पृथाका पाणिग्रहण किया ॥ ३६ ॥ श्रुतदेवा से कारूषवंशी वृद्धशर्मा ने विवाह

सुताः॥३८॥राजाधिदेव्यामावंत्यौजयसेनोऽजनिष्ट ह।दमघोषश्चेदिराजःश्रुतश्रवसमग्रहीत्॥३९॥शिशुपालःसुतस्तस्याःकथितस्तस्यसंभवः।देवभागस्यकंसायांचित्रकेतुबृहद्बलौ॥४०॥कंसवत्यांदेवश्रवसःसुवीरइषुमांस्तथा।कङ्कायामानकाज्जातःसत्याजित्पुरुजित्तथा॥४१॥संजयाराष्ट्रपाल्यांचवृषदुर्मर्षणादिकान्।हरिकेशहिरण्याक्षौशूरभूम्यांचश्यामकः॥४२॥मिश्रकेश्यामप्सरसिवृकादीन्वत्सकस्तथा।तक्षपुष्करशालादीन्दुर्वाक्ष्यांवृकआददे॥४३॥सुमित्राऽर्जुनपालादीञ्छमीकात्तुसुदामिनी।कङ्कश्चकर्णिकायांवैऋतधामजयावपि॥४४॥पौरवीरोहिणीभद्रामदिरारोचनाइला।देवकीप्रमुखाआसन्पत्न्यआनकदुन्दुभेः॥४५॥बलंगदंसारणंचदुर्मदंविपुलंध्रुवम्।वसुदेवस्तुरोहिण्यांकृतादीनुदपादयत्॥४६॥सुभद्रोभद्रबाहुश्चदुर्मदोभद्रएवच।पौरव्यास्तनयाह्येतेभूताद्याद्वादशाभवन्॥४७॥नन्दोपनन्दकृतकशूराद्यामदिरात्मजाः।कौशल्याकेशिनंत्वेकमसूतकुलनन्दनम्॥४८॥रोचनायामतोजाताहस्तहेमाङ्गदादयः॥इलायामुरुवल्कादीन्यदुमुख्यानजीजनत्॥४९॥विपृष्ठोधृतदेवायामेकआनकदुन्दुभेः।शांतिदेवात्मजाराजञ्छ्रमप्रतिश्रुतादयः॥५०॥राजानःकल्पवर्षाद्याउपदेवासुतादश।वसुहंससुवंशाद्याःश्रीदेवायास्तुषट्सुताः॥५१॥देवरक्षितयालब्धानवचात्रगदादयः।वसुदेवःसुतानष्टावादधेसहदेवया॥५२॥पुरुविश्रुतमुख्यांस्तुसाक्षाद्धर्मोवसूनिव।वसुदेवस्तुदेवक्यामष्टपुत्रानजीजनत्॥५३॥कीर्तिमंतंसुषेणंचभद्रसेनमुदारधीः।ऋजुंसमर्दनंभद्रंसंकर्षणमहीश्वरम्॥ ५४ ॥अष्टमस्तुतयोरासीत्स्वयमेवहरिःकिल।सुभद्राचमहाभागातवराजन्पितामही॥५५॥यदायदेहधर्मस्यक्षयोवृद्धि-

---

किया। उसके गर्भमें दितिके पुत्र दंतवक्रने ऋषिके शापवश जन्म ग्रहण किया ॥ ३७ ॥ कैकेयवंशी धृष्टकेतुने श्रुतकीर्तिका पाणिग्रहण कियाथा; उसके सन्तर्दन आदि पांचपुत्र उत्पन्न हुएथे ॥ ३८॥ जयसेन ने राजाधिदेवीका पाणिग्रहणकर उसके गर्भमें विन्द और अनुविंद नामक दोपुत्र उत्पन्न किये। चेदिराज दमघोष ने श्रुतश्रवाका पाणिग्रहण किया ॥ ३९ ॥ उसका पुत्र शिशुपाल हुआ इसकी उत्पत्तिका वर्णनकर आये हैं। देवभाग के वीर्यसे कंसाके गर्भमें चित्रकेतु और बृहद्बल॥४०॥ देवश्रवा के वीर्यसे कंसवती के गर्भमें सुवीर और इषुमान, कङ्कके वीर्यसे कंकाके गर्भमें बक, सत्यजित और पुरुजित् ॥ ४१ ॥ सृञ्जयके वीर्यसे राष्ट्रपाला के गर्भमें वृष दुर्मर्षण आदि; श्यामक के वीर्यसे शूरभूमि के गर्भमें हरिकेश और हिरण्याक्ष ॥ ४२ ॥ वत्सक के वीर्यसे मिश्रकेशी अप्सरा के गर्भमें वृकादि, वृकके वीर्यसे दुर्वाक्षी के गर्भमें तक्ष और पुष्करशाल आदि ॥ ४३ ॥ समीक के वीर्यसे सुदामनी के गर्भमें सुमित्र, अर्जुनपाल आदि, और आनकके वीर्यसे कर्णिका के गर्भमें ऋतधामा और जय उत्पन्न हुए ॥ ४४ ॥ पौरवी,रोहिणी, भद्रा, मदिरा, रोचना, इला और देवकी आदि वसुदेवकी औरभी स्त्रियेंथीं ॥ ४५ ॥ उनमें से रोहिणी के गर्भसे बलदेव, गद, सारण, दुर्मद, विपुल, ध्रुव और कृतादि पुत्र उत्पन्न हुए ॥ ४६ ॥ पौरवीसे सुभद्र, भद्रबाहु, दुर्मद, भद्र और भूत आदि वारह पुत्र उत्पन्न हुए ॥ ४७ ॥ मदिराके गर्भमे नंद, उपनंद, कृतक, और शूरआदि उत्पन्न हुए। भद्राने कुलनंदन केशिनामक एकपुत्र उत्पन्न किया ॥४८ ॥ रोचना के गर्भसे हस्त, हेमांगद आदिपुत्र उत्पन्न हुए। वसुदेव के इलाके गर्भसे उरुवल्क आदि श्रेष्ठयदु उत्पन्न हुए ॥४९॥ धृतदेवा के गर्भसे विपृष्ठने जन्म ग्रहण किया। शांतिदेवा के गर्भसे श्रम, प्रतिश्रुत आदि पुत्र उत्पन्न हुए ॥ ५०॥ उपदेवा के गर्भसे राजन्य, कल्प,वर्षआदि दशपुत्र, श्रीदेवाके गर्भसे वसु,हंस, सुवंश आदि छहपुत्र उत्पन्न हुए ॥ ५१ ॥ और देवरक्षिता के गर्भसे गदआदि नौपुत्र उत्पन्न हुए। जैसे साक्षात् धर्मने वसुओंका उत्पन्न कियाथा उसी प्रकार से वसुदेव ने सहदेवाके गर्भसे प्रवर श्रुतमुख्य, आदि आठपुत्र किये ॥५२॥ देवकी सेभी वसुदेव के आठपुत्र कीर्तिमान, सुषेण, भद्रसेन, ऋजु, संमर्दनभद्र, शेषनाग के अवतार संकर्षण और आठवें गर्भमें साक्षात् भगवान हरिउत्पन्न हुए। तुम्हारी पितामही महाभागा सुभद्रा भी उन्हीं से उत्पन्न हुई ॥ ५३-५५ ॥ जिस २

अपाप्मनः।तदातुभगवानीशआत्मानंसृजतेहरिः॥५६॥नह्यस्यजन्मनोहेतुःकर्मणोवा
महीपते।आत्ममायांविनेशस्यपरस्यद्रष्टुरात्मनः॥५७॥यन्मायाचेष्टितंपुंसःस्थित्युत्प-
त्त्यप्ययायहि।अनुग्रहस्तन्निवृत्तेरात्मलाभायचेष्यते॥ ५८॥अक्षौहिणीनांपतिभिरसु
रैर्नृपलाञ्छनैः।भुवआक्रम्यमाणायाअभारायकृतोद्यमः॥ ५९कर्माण्यपरिमेयाणिमन-
साऽपिसुरेश्वरैः।सहसंकर्षणश्चक्रेभगवान्मधुसूदनः॥ ६०॥कलौजनिष्यमाणानांदुः
खशोकतमोनुदम्।अनुग्रहायभक्तानांसुपुण्यंव्यतनोद्यशः॥६१॥यस्मिन्सत्कर्णपीयूषे
यशस्तीर्थवरेसकृत्।श्रोत्रांजलिरुपस्पृश्यधुनुतेकर्मवासनाम्॥ ६२ ॥भोजवृष्ण्यन्ध
कमधुशूरसेनदशार्हकैः।श्लाघनीयेहितःशश्वत्कुरुसृञ्जयपाण्डुभिः॥६३॥स्निग्धस्मि
तेक्षितोदारैर्वाक्यैर्विक्रमलीलया।नृलोकंरमयामासमूर्त्यासर्वांगरम्यया॥६४॥यस्या
ननंमकरकुण्डलचारुकर्णभ्राजत्कपोलसुभगंसविलासहासम्। नित्योत्सवंनततृपुर्दृ
शिभिःपिबन्त्योनार्योनराश्चमुदिताःकुपितानिमेश्च॥ ६५ ॥जातोगतःपितृगृहाद्व्रज
मेधितार्थोहत्वारिपून्सुतशतानिकृतोरुदारः।उत्पाद्यतेषुपुरुषःक्रतुभिः समीजेआत्मा
नमात्मनिगमप्रथयञ्जनेषु॥६६॥पृथ्व्याःसवैगुरुभरंक्षपयन्कुरूणामन्तःसमुत्थकलि
नायुधिभूपचम्वः। दृष्ट्याविधूयविजयेजयमुद्विघोष्यप्रोच्योद्धवायचपरंसमगात्स्व
धाम ॥ ६७ ॥ इतिश्रीमद्भा०म०नवम०चतुर्विंशोऽध्यायः॥ २४ ॥

समय धर्मका नाश और अधर्म की वृद्धिहोती है उसी २ समय में भगवान हरि अपनेको उत्पन्न करते है ॥ ५६ ॥ हे राजन् ! नहींतो जोमाया के नियंता, संगरहित, सर्वसाक्षी, और सर्वगत हैं उन भगवानको अपनी मायाके अतिरिक्त दूसरा कोईभी जन्म व कर्मका कारण नहीं है ॥५७॥ उनकी मायाकी चेष्टा प्राणियों के पक्षमें अनुग्रह स्वरूप है क्योंकि वही सृष्टि, स्थिति और प्रलय का कारण हैं-उसीके द्वारा सृष्टिआदि की निवृत्ति होनेसे वह जीवके पक्षमें मोक्षकाभी कारण होती है ॥ ५८ ॥ हे राजन् ! अनेक अक्षौहिणी वाले नृपति चिह्नधारी असुरोंक पृथ्वीपर आक्रमण करने से पृथ्वी बड़ेभार से दुःखित होरही थी; उसी भारदूर करने के निमित्त भगवानका इस कारणसे अवतार हुआथा ॥ ५९ ॥ क्योंकि जोसब कर्म देवताओं केभी मनद्वारा तर्कना करने से नहीं उ-ठसकने, भगवान हरिने संकर्षण के साथ उन सबकर्मोंको किया ॥ ६० ॥ हे राजन्! भगवान सर्व शक्तिमान हैं, यद्यपि वह केवल संकल्पसेही पृथ्वीका भार हरण करसकते थे, तौभी कलियुग में जोभक्त उत्पन्न होंग उनके ऊपर अनुग्रह प्रकाशकर दुःख और तमोगुण के नाशक पवित्र यशका विस्तारकिया ॥ ६१ ॥ वे यश साधुओं के कर्णामृत और श्रेष्ठतीर्थ स्वरूप हैं; केवल एकवार श्रो-त्ररूप अंजली द्वारापान करनेसे पुरुष कर्म वासनाओंके छोड़ने में भली प्रकार से समर्थ होसकता है ॥६२अतएव भोज, वृष्णि, अन्धक, मधु, शूरसेन; दशार्ह; कुरु, सृंजय और पांडुवंशीय मनुष्य सदैव ही उनके चरित्रोंकी प्रशंसा किया करतेहैं॥६३॥उन भगवानने स्निग्ध हास्ययुक्त दृष्टि उदार वचन पराक्रम और सर्वांग सुंदर मूर्त्तिद्वारा सब मनुष्योंको आनन्दित किया॥ ६४॥ मकराकृत कुण्डलोंसे दोनों कानों और दोनों कपोलोंकी कैसी शोभा होतीथी ! विलासयुक्त हास्य उस मुखमें होरहाथा। इसीकारण उस उत्सववाले मुखको दृष्टि द्वारापान करके स्त्री पुरुष तृप्त नहीं होतेथे । यद्यपि उनके भुवन मोहनरूपको देखकर वे अत्यन्त प्रसन्न होते परंतु दर्शनोंमें विघ्न करनेवाली पलकोंपर बार-बार क्रोधित होते॥६५॥हेराजन्! श्रीकृष्ण निजरूपसे जन्मग्रहणकर फिर मनुष्याकारहो पिताके घरसे व्रजमें आये और वहां शत्रुओंका नाशकर व्रजवासियोंकी इच्छापूर्णकी।तदनंतर बहुतसी स्त्रियोंको ग्रहणकर उनसबमें सौ२ पुत्र उत्पन्न किये और लोकमें अपनेकियेहुए वेदमार्गका विस्तारकर अनेक यज्ञोंद्वारा अपनीही पूजाकी॥६६॥कौरवोंके मध्यमें खड़ेहो युद्धकाकारणकर युद्धमेंदृष्टिद्वारा राजाओंकी सेनाका नाशकर पृथ्वीके बड़े बोझको दूरकर अर्जुनको जिताय उद्धवको तत्वज्ञानका उपदेशदे भगवान अपने धामको गये॥ ६७ ॥ इतिश्रीमद्भागवतेमहापुराणेनवमस्कन्धे सारस्वतवंशज श्रीमत्पण्डितवर जगन्नाथात्मज पण्डित कन्हैयालाल निर्मित सरलाभाषाटीकायांचतुर्विंशोऽध्यायः ॥ २४ ॥

* श्रानकशावह र ा नम *

दशमस्कन्ध.

मुरादाबाद निवासी सारस्वतवंशोदभव
पण्डित जगन्नाथात्मज

पण्डित-कन्हैयालालउपाध्याय·

द्वारा अनवादित

ओर भागवत् प्रकाश कार्यालयद्वारा प्रकाशित ।

मनजर तत्त्वप्रभाकर प्रेस द्वार मुद्रित ।

मुरादाबाद·

सवत् १९ ८ सन् १९०१ ई०

॥ श्रीहरिः ॥

॥ मङ्गलाचरणं ॥

* जुगल छवि आज अनूपबनी *

* खंजननयन मयन मदगंजन, अंजनरेखभनी *

श्रीमद्भागवत भाषाटीका सहित

दशमस्कन्ध पूर्वार्द्ध ।

श्रीगणेशाय नमः ॥ राजोवाच ॥ कथितोवंशविस्तारोभवतासोमसूर्ययोः । राज्ञांचोभयवंश्यानांचरितंपरमाद्भुतम् ॥ १ ॥ यदोश्चधर्मशीलस्य नितरांमुनिसत्तम । तत्रांशेनावतीर्णस्यविष्णोर्वीर्याणिशंसनः ॥ २ ॥ अवतीर्ययदोर्वंशेभगवान्भूतभावनः । कृतवान्यानिविश्वात्मातानिनोवदविस्तरात् ॥ ३ ॥ निवृत्ततर्षैरुपगीयमानाद्भवौषधाच्छ्रोत्रमनोऽभिरामात् । कउत्तमश्लोकगुणानुवादात्पुमान्विरज्येत

राजा परीक्षित नें श्रीशुकदेवजी से कहा कि चन्द्र और सूर्य वंश का विस्तारित वर्णन आपने किया दोनों वंश वाले राजाओंके अद्भुत चरित्रों का वर्णन ॥ १ ॥ तथा धर्म शील यदुके वंशकाभी वर्णन किया अब उसी वंश में अंश से उत्पन्नहुए भगवान विष्णु के पराक्रम की कथा कहो ॥ २ ॥ भूत भवान भगवान् नें यदु वंशमें अवतार के जो २ अद्भुत कर्म कियेथे, आप उन सबको विस्तार सहित मुझसे कहो ॥ ३ ॥ मुक्त मनुष्यभी उन उत्तम श्लोक भगवान के गुणों का कीर्तन करते हैं, मुमुक्षुलोगों का संसारसे छूटनेंका यही एक उपायहै, क्योंकि संसार रूपी रोगकी औषधि तथा कान

विनापशुघ्नात् ॥ ४ ॥ पितामहामेसमरेऽमरञ्जयैर्देवव्रताद्यातिरथैस्तिमिङ्गिलैः । दुरत्ययंकौरवसैन्यसागरंकृत्वाऽतरन्वत्सपदंस्मयत्प्लवाः ॥ ५ ॥ द्रौण्यस्त्रविप्लुष्टमिदंमदङ्गंसंतानबीजंकुरुपाण्डवानाम् । जुगोपकुक्षिंगतआत्तचक्रोमातुश्चमेयः शरणंगतायाः ॥ ६ ॥ वीर्याणितस्याखिलदेहभाजामन्तर्बहिः पूरुषकालरूपैः । प्रयच्छतोमृत्युमुतामृतंचमायामनुष्यस्यवदस्वविद्वन् ॥ ७ ॥ रोहिण्यास्तनयः प्रोक्तोरामः संकर्षणस्त्वया । देवक्यागर्भसंबन्धः कुतोदेहान्तरंविना ॥ ८ ॥ कस्मान्मुकुन्दोभगवान्पितुर्गेहाद्व्रजंगतः । क्ववासंज्ञातिभिः सार्धंकृतवान्सात्वतांपतिः ॥ ९ ॥ व्रजेवसन्किमकरोन्मधुपुर्यांचकेशवः । भ्रातरं चावधीत्कंसं मातुरद्धाऽतदर्हणम् ॥ १० ॥ देहंमानुषमाश्रित्यकतिवर्षाणिवृष्णिभिः । यदुपुर्यांसहावात्सीत्पत्न्यः कत्यभवन्प्रभोः ॥ ११ ॥ एतदन्यच्चसर्वंमेमुनेकृष्णविचेष्टितम् । वक्तुमर्हसिसर्वज्ञ श्रद्दधानायविस्तृतम् ॥ १२ ॥ नैषाऽतिदुःसहाक्षुन्मांत्यक्तोदमपिबाधते । पिबन्तंत्वन्मुखाम्भोजच्युतंहरिकथामृतम् ॥ १३ ॥ सूत उवाच ॥ एवंनिशम्यभृगुनन्दनसाधुवादंवैयासकिः सभगवानथविष्णुरातम् । प्रत्यर्च्यकृष्णचरितंकलिकल्मषघ्नंव्याहर्तुमारभतभागवतप्रधानः ॥ १४ ॥ श्रीशुक उवाच ॥ सम्यग्व्यवसिताबुद्धिस्तवराजर्षिसत्तम । वासुदेवकथायांतेयज्जातानैष्ठिकीरतिः ॥ १५ ॥ वासुदेवकथाप्रश्नः पुरुषांस्त्रीन्पुनातिहि । वक्तारंपृच्छकंश्रोतॄंस्तत्पादसलिलं यथा ॥ १६ ॥

और मनको सुखकर होनें से यही विषयी मनुष्योंका एक मात्र विषय है पशुघाती मनुष्य के अतिरिक्त और कौन मनुष्य उस से विरक्त होसकता है ।४। देवताओं के जीतनेंवाले अतिरथी भीष्मादि रूप मत्स्यों से परिपूर्ण कौरव सैन्य रूपी सागरका पारहोना अत्यंत कठिन था परन्तु हमारे पितामह भगवान के दोनों चरण की नावकर गौके खुर की समान सहजहीं में उस सागरसे पारहुए थे ॥ ५ ॥ कुरु पांडव संतति की बीज रूप मेरे इस देहके अश्वत्थामा की अस्त्राग्नि द्वारा दग्ध होनेपर जिन भगवान नें चक्र धारण कर शरण में आई मेरी माताके गर्भमें प्रवेशकर रक्षा कीथी ॥ ६ ॥ जो कालस्वरूप से सम्पूर्ण प्राणियों के भीतर औरबाहर स्थित हैं मोक्ष और संसारको देतेहैं उन मायामय भगवान के सम्पूर्ण पराक्रम मुझसे कहो ॥ ७ ॥ आपनें कहा कि बलदेवजी रोहिणी के सुतहैं फिर कहते हो कि देवकी के सुतहैं सो दूसरी देह बिना धारण किये देवकी के गर्भमें प्रवेश करना कैसे सम्भव होसकता है ॥ ८ ॥ भगवान श्रीकृष्णजी किस कारण पिता के घरसे व्रजमेंगए सात्वतपति भगवान् नें ज्ञातिवालों के साथ कहांपर बास किया ॥ ९ ॥ केशव ने व्रज और मथुरा में निवासकर कौन २ कार्य किये थे माता के भाई नमारने योग्य कंस को सम्बन्ध होनेंपर भी अपनें हाथ से क्यों मारा ॥ १० ॥ मनुष्य देह धारणकर भगवान कितनें समय तक वृष्णिगणों के साथ मथुरामें रहे उनके कितनी स्त्रियां थीं ॥ ११ ॥ हे मुने ! हे सर्वज्ञ ! इनको तथा और भी दूसरे कृष्ण चरित्रों को कहो उनके सुननेकी मेरी इच्छा है ॥१२॥ आपके मुख से जो हरिकथा रूप अमृत निकलता है मैं उसको भली भांति पान करता हूं इसी से यद्यपि मैंनें जल का पान करना तक छोड़दिया है तौभी क्षुधामुझको दुःख नहीं देसकती ॥ १३ ॥ सूतजी ने कहा कि—हे शौनक ! परम भागवत, व्यासजी के पुत्र शुकदेवजीनेराजा परीक्षित की इस उत्तम बातको सुनकर उनकी प्रशंसाकर, कलिके पाप नाशक श्रीकृष्णजी के चरित्रोंका कहना आरंभ किया ॥१४॥ शुकदेवजी नें कहाकि—हे उत्तम राजर्षि ! तुम्हारी बुद्धिने अतिउत्तम निश्चय किया है किजो ऐसे विषयों में प्रवृत्त हुई है इसही कारण श्रीकृष्णजी की कथामें तुम्हारी नैष्ठिकी भक्ति उत्पन्न हुई ॥ १५ ॥ विष्णुजीका चरणोदक अर्थात् गंगा जैसे नहाने वालोंकी तीन पीढियोंको पवित्र करती है

भूमिर्दृप्तनृपव्याजदैत्यानीकशतायुतैः । आक्रान्ताभूरिभारेणब्रह्माणंशरणंययौ ॥१७॥ गौर्भूत्वाऽश्रुमुखीखिन्नाक्रन्दन्तीकरुणंविभोः । उपस्थिताऽन्तिकेतस्मैव्यसनंस्वमवोचत ॥ १८ ॥ ब्रह्मातदुपधार्याऽथसहदेवैस्तयासह । जगामसत्रिनयनस्तीरंक्षीरपयोनिधेः ॥१९॥तत्रगत्वाजगन्नाथंदेवदेवंवृषाकपिम् । पुरुषंपुरुषसूक्तेनउपतस्थेसमाहितः ॥२० ॥ गिरंसमाधौगगनेसमीरितांनिशम्यवेधास्त्रिदशानुवाचह । गांपौरुषींमेशृणुताऽमराः पुनर्विधीयतामाशुतथैवमाचिरम् ॥ २१ ॥ पुरैवपुंसाऽवधृतोधराज्वरोभवद्भिरंशैर्यदुषूपजन्यताम् । सयावदुर्व्याभरमीश्वरेश्वरः स्वकालशक्त्याक्षपयंश्चरेद्भुवि ॥ २२ ॥ वसुदेवगृहेसाक्षाद्भगवान्पुरुषःपरः । जनिष्यतेतत्प्रियार्थंसंभवन्तुसुरस्त्रियः ॥ २३ ॥ वासुदेवकलानंतःसहस्रवदनःस्वराट् । अग्रतोभवितादेवोहरेःप्रियचिकीर्षया ॥ २४ ॥ विष्णोर्मायाभगवतीययासंमोहितंजगत् । आदिष्टाप्रभुणांशेनकार्यार्थेसंभविष्यति ॥ २५ ॥ श्रीशुक उवाच ॥ इत्यादिश्याऽमरगणान्प्रजापतिपतिर्विभुः । आश्वास्यचमहींगीर्भिःस्वधामपरमंययौ ॥ २६ ॥ शूरसेनोयदुपतिर्मथुरामावसन्पुरीम् । माथुराञ्छूरसेनांश्चविषयांबुभुजेपुरा ॥२७॥ राजधानीततःसाऽभूत्सर्वयादवभूभुजाम् ।मथुराभगवान्यत्रनित्यंसंनिहितोहरिः॥ २८ ॥ तस्यांतुकर्हिचिच्छौरिर्वसुदेवःकृतोद्वहः। देवक्यासूर्ययासार्धंप्रयाणेरथमारुहत् ॥ २९ ॥ उग्रसेनसुतःकंसःस्वसुःप्रियचिकीर्षया । रश्मीन्हयानांजग्राहरौक्मै

तैसेही भगवान श्रीकृष्णजी विषयक प्रश्नवक्ता प्रश्नकर्त्ता और श्रोता—इनतीन मनुष्योंको पवित्र करता है ॥ १६ ॥ हे महाराज ! अहंकारी राजवेशधारी—दैत्योंकी असंख्य सेनारूप पृथ्वी के भारसे दुःखित होकर पृथ्वीने ब्रह्माजी की शरणली ॥ १७ ॥ उस दुःखित पृथ्वीने गऊरूप धारण कर, आंसूबहातीहुई करुण स्वरसे रोती २ ब्रह्माजी के समीप जाय अपने अभिप्रायको प्रगटकिया ॥ १८ ॥ ब्रह्माजी उसके वृत्तांतको सुन महादेव तथा और देवताओंको साथले पृथ्वी समेत क्षीर सागरके तटपर गये ॥ १९ ॥ उस स्थानमें पंहुचकर एकाग्र चित्तहो वेदमन्त्रों से नारायण की स्तुति करने लगे, उन्हीं मंत्रोंसे जगन्नाथ देव देव नारायण की आराधना करनेलगे ॥ २० ॥ कुछ कालके उपरांत ब्रह्माजी ने आकाशवाणी सुनकर देवताओं से कहाकि—हे देवताओ ! भगवान ने जोकुछ कहा है उसको सुनकर उसी के अनुसार कार्यकरो—विलंब नहो ॥ २१ ॥ निवेदन करने के पहिलेही से भगवानको पृथ्वी की विपद विदित है । तुमअपने २ अंशसे यदुवंशियों में जन्म ग्रहणकरो, भगवान् हारकुछही समयके उपरांत अपनी कालशक्ति द्वारा पृथ्वीका भार उतार कर भूतल में विहार करेंगे ॥ २२ ॥ परम पुरुष भगवान शीघ्रही वसुदेव के घरमें जन्म लेवेंगे। उनके प्रियकरने के निमित्त देवांगनाए पृथ्वीपर उत्पन्नहों ॥ २३ ॥ भगवानके अंश, सहस्रवदन विराट् शेषनागजी भगवानके प्रियकरने के निमित्त पहिले जन्म लेवेंगे ॥ २४ ॥ जोभगवती विष्णु माया जगतको मोहित करती है वह भगवान की आज्ञासे कार्य सिद्धि करन के निमित्त यशोदाके गर्भसे अंशसे उत्पन्नहोगी ॥ २५ ॥ श्रीशुकदेवजी ने कहाकि—हे राजन् ! देवताओंको यह आज्ञा कर, नाना मधुर बचनोंसे पृथ्वीको समझाय ब्रह्माजी अपने स्थानकोगये ॥ २६ ॥ पहिले यदुपति शूरसेन मथुरानगरी में बासकर माथुर तथा शूरसेन देशोंका भोगकरते थे ॥ २७ ॥ इसही कारण तभीसे मथुरा यदुपतियों की राजधानी हुई । भगवान श्रीकृष्णजी सदैव वहां विराजमान रहते हैं ॥ २८ ॥ एक समय उस नगरीमें शूरवंशी वसुदेवजी व्याह करके अपनेघर आने के निमित्त अपनी नव बिवाहिता स्त्री देवकी के साथ रथपर सवार हुये ॥ २९ ॥ उग्रसेनके पुत्र कंसने देवकीके प्रिय करनेको, सैकड़ों सोनेके रथोंको साथले, स्वयं बहिनके रथपर बैठ घोड़ों

रथशतैर्वृतः ॥ ३० ॥ चतुःशतंपारिबर्हंगजानांहेममालिनाम् । अश्वानामयुतंसार्धं
रथानांचत्रिषट्शतम् ॥ ३१ ॥ दासीनांसुकुमारीणांद्वेशतेसमलंकृते । दुहित्रेदेवकः
प्रादाद्यानेदुहितृवत्सलः ॥ ३२ ॥ शंखतूर्यमृदंगाश्चनेदुर्दुंदुभयःसमम् । प्रयाण
प्रक्रमेतावद्वरवध्वोःसुमंगलम् ॥ ३३ ॥ पथिप्रग्रहिणंकंसमाभाष्याऽऽहाऽशरीरवा-
क् । अस्यास्त्वामष्टमोगर्भोहंतायांवहसेऽबुध ॥ ३४ ॥ इत्युक्तःसखलःपापोभोजा-
नांकुलपांसनः । भगिनींहन्तुमारब्धःखड्गपाणिःकचेऽग्रहीत् ॥ ३५ ॥ तंजुगुप्सित
कर्माणंनृशंसंनिरपत्रपम् । वसुदेवोमहाभागउवाचपरिसांत्वयन् ॥ ३६ ॥ वसुदेव
उवाच ॥ श्लाघनीयगुणःशूरैर्भवान्भोजयशस्करः । सकथंभगिनींहन्यात्स्त्रियमुद्वा
हपर्वणि ॥ ३७ ॥ मृत्युर्जन्मवतांवीरदेहेनसहजायते । अद्यवाऽब्दशतांतेवामृत्युर्वै
प्राणिनांध्रुवः ॥ ३८ ॥ देहेपञ्चत्वमापन्ने देहीकर्मानुगोऽवशः । देहांतरमनुप्राप्य
प्राक्तनंत्यजतेवपुः ॥ ३९ ॥ व्रजंस्तिष्ठन्पदैकेनयथैवैकेनगच्छति । यथातृणजलूकैवं
देहीकर्मगतिंगतः ॥४०॥ स्वप्नेयथापश्यतिदेहमीदृशंमनोरथेनाऽभिनिविष्टचेतनः ।
दृष्टश्रुताभ्यांमनसाऽनुचिन्तयन्प्रपद्यतेतत्किमपिह्यपस्मृतिः ॥ ४१ ॥ यतोयतोधाव
तिदैवचोदितंमनोविकारात्मकमापपञ्चसु । गुणेषुमायारचितेषुदेह्यसौप्रपद्यमानः
सहतेनजायते ॥ ४२ ॥ ज्योतिर्यथैवोदकपार्थिवेष्वदःसमीरवेगानुगतंविभाव्यते ।
एवंस्वमायारचितेष्वसौपुमान्गुणेषुरागानुगतोविमुह्यति ॥ ४३ ॥तस्मान्नकस्यचि

की बाग पकडी ॥ ३० ॥ पुत्री को चाहनेवाले देवकने पुत्री को अम्बारियों समेत सुवर्ण मालाधारी ४०० हाथी १५००० घोडे १८०० रथ, तथा नाना प्रकार के आभूषणों से विभूषित २०० सुंदर दासियें दहेज में दीं । ३१ । ३२ । हे वत्स ! वर और वहूके जानें के समय में दुंदुभी, शंख तुरही और मृदंग सब माङ्गलिक शब्द करनेलगे ॥ ३३ ॥ उसी समय मार्गके मध्य में आकाशवाणी नें कंसको पुकारकर कहा कि रे अबोध ! तू जिसको लियेजाता है, उसके आठवें गर्भ से उत्पन्न हुई संतान तेरा प्राण वध करेगी ॥ ३४ ॥ भोजवंशियों के कुल के कलंकी उस पापी कंस नें इस बात को सुन तलवार ले बहिन के मारनेंपर तत्परहो उसके केश पकड़ लिये ॥ ३५ ॥ महाभाग वसुदेव नें उस निर्लज्ज कंसकी निठुरता को देख उसको समझाकर कहा कि ॥ ३६ ॥ हे कंस ! तुम्हारे गुणों की प्रशंसा शूरगण करतेरहते हैं तुम भोज वंशियों के यशको बढ़ानेवाले हो सो विवाह के उत्सवमें इस स्त्री जाति बहन को मारना कैसे चाहतेहो ॥ ३७ ॥ हे वीर ! प्राणियों की मृत्यु प्राणियों के साथही जन्म ग्रहण करती है आजहो चाहे सौ वर्ष के उपरांत हो प्राणियों की मृत्यु निश्चय ही होगी ॥ ३८ ॥ इस देह के नाश होनेसे कर्मानुवर्ती जीव दूसरी देह के पानेंपर पहिले शरीरको छोड़ता है जैसे मनुष्य चलनें के समय एक पाव भूमिपर रखकर फिर दूसरा पैर भूमि से हटाता है जैसे जोंक आगेके तिनकेको पकड़कर पहिले के पकड़ेहुये तिनके को छोडती है, वैसेही कर्ममार्गी जीव भी देहोंको प्राप्त होता रहताहै ॥ ४० ॥ जागनेकी अवस्थामें देखने व सुननेके कारण जो संस्कार (विचार) मनमें उत्पन्न होते हैं एकाग्रचित्तसे उन देखे व सुनेहुए विषयोंको विचारनेसे वैसेही विषय जाग्रदवस्थाके मनुष्य जैसे स्वप्नमें देखा करते हैं वैसेही जीवकर्म वशहो स्मृति रहित देहको प्राप्त होकर पूर्व शरीरका परित्याग करताहै ॥ ४१ ॥ देहके पञ्चत्व प्राप्त होनेके समय नाना विकारात्मक मन फलाभिमुख कर्मोंसे प्रेरितहो, माया द्वारा नाना देहरूपसे विरचित पंचभूत वर्णोंके मध्यमें जिस २ रूपको प्राप्त होताहै—उसी२रूपका जीवजन्म लेता रहताहै ॥ ४२ ॥ चंद्रादिज्योतिः पदार्थ, जैसे तैल घृत जलादि पार्थिव व पदार्थोंमें प्रतिबिंबित होकर वायुसे कम्पायमान प्रतीत होतेहैं, तैसेही जीव इस अविद्या रचित गुणोंका अनुगत (साथी) हो उन्हींसे मोहितहोताहै ॥

द्रोहमाचरेत्सतथाविधः। आत्मनःक्षेममन्विच्छन्द्रोग्धुर्वैपरतोभयम् ॥ ४४ ॥ एषातवानुजाबालाकृपणापुत्रिकोपमा । हन्तुंनार्हसी कल्याणीमिमांत्वंदीनव-त्सलः ॥ ४५ ॥ श्रीशुक उवाच । एवंससामभिर्भेदैर्बोध्यमानोऽपिदारुणः । नन्यवर्ततकौरव्य पुरुषादाननुव्रतः ॥ ४६ ॥ निर्बन्धंतस्यतंज्ञात्वाविचिन्त्या-नकदुन्दुभिः । प्राप्तंकालंप्रतिव्योढुमिदंतत्रान्वपद्यत ॥ ४७ ॥ मृत्युर्बुद्धिमता-ऽपोह्यो यावद्बुद्धिबलोदयम् । यद्यसौननिवर्तेत नापराधोऽस्तिदेहिनः ॥ ४८ ॥ प्रदायमृत्यवेपुत्रान्मोचयेकृपणामिमाम् । सुतामेयदिजायेरन्मृत्युर्वानम्रियेतचेत् ॥ ॥ ४९ ॥ विपर्ययोवाकिंन स्याद्गतिर्धातुर्दुरत्यया । उपस्थितोनिवर्तेतनिवृ-त्तः पुनरापतेत् ॥ ५० ॥ अग्नेर्यथादारुवियोगयोगयोरदृष्टतोऽन्यन्ननिमित्तमस्ति । एवंहिजन्तोरपिदुर्विभाव्यः शरीरसंयोगवियोगहेतुः ॥ ५१ ॥ एवंविमृश्यतंपापंया-वदात्मनिदर्शनम् । पूजयामासवैशौरिर्बहुमानपुरःसरम् ॥ ५२ ॥ प्रसन्नवदनाम्भो-जोनृशंसंनिरपत्रम् । मनसादूयमानेनविहसन्निदमब्रवीत् ॥ ५३ ॥ वसुदेव उवाच॥ नह्यस्यास्तेभयंसौम्ययद्वैसाऽऽहाशरीरवाक् । पुत्रान्समर्पयिष्येऽस्यायतस्तेभय-मुत्थितम् ॥ ५४ ॥ श्रीशुक उवाच ॥ स्वसुर्वधान्निववृतेकंसस्तद्वाक्यसारवित् ।

॥ ४३ ॥ ऐसी स्थितिवाले प्राणी यदि अपने कल्याणकी इच्छाकरें तो कभी किसीकी हिंसा न करें। क्योंकि जो दूसरेकी हिंसा करते हैं तो दूसरोंसे उनकी भी हिंसा होनेकी संभावनाहै तथा परलोकमें यमराजसे भी दुःख मिलनेकी सम्भावनाहै, ॥ ४४ ॥ तुम्हारी यह छोटी बहिनहै तथा यह बालिका; दीन और कातरहै भयसे यह काठकी पुतलीके समान अचेत होगईहै। तुम दीनोंपर दया करनेवालेहो, अतएव इस कल्याणरूप बालिकाको मारना तुम्हें उचित नहीं है॥४५॥ शुकदेव जीने कहा कि—हेकौरव्य ! कंस अति निठुर और दैत्योंके परामर्शका माननेवालाथा, अतएव वसुदेवके इसभांतिसे मित्रताकरने और भयदिखाकर समझाने परभी वह निवृत्त न हुआ,॥ ४६ ॥ वसुदेव उसके अभिप्रायको जानकर किसप्रकार आयेहुए कालका यत्नकरूं इसप्रकार चिंताकर यह मनमें ठहराने लगे ॥ ४७ ॥—कि बुद्धिमान मनुष्यको अपनी बुद्धि और बलके अनुसार मृत्युको निवारण करना चाहिये। यदि उससे भी निवारण न करसके तो फिर प्राणीका अपराध नहीं है ॥ ॥ ४८ ॥ मैं कालरूपी इस कंसको सब पुत्रोंके देनेका वचन देकर इस दीन स्त्रीकी रक्षाकरूं, । फिर जब मेरे पुत्र उत्पन्न होगा तब जो होनाहोगा सो होरहेगा, इससमय तो देवकी बचजायगी ॥ ४९ ॥ कदाचित् मेरे पुत्र उत्पन्न होनेके पहिलेही कंसकी मृत्यु होजावे । और यदि कंस न भी मरेगा तो मेरा पुत्रभी तो इसको मारसकताहै क्या विधाताकी आकाशवाणी मिथ्याहोसकतीहै ? " पुत्रदूंगा,, यह स्वीकार करलेनेसे आईहुई मृत्यु निवृत्त होसकतीहै; कालके प्रभावसे यदि फिर इसकी मृत्यु होजावे तो ऐसा होनेसे मेरा कोई अपराध नहीं है, ॥ ५० ॥ अग्निके काठक संयोग वियोगका अदृष्टही एक कारणहै अर्थात् गांवमें गृहस्थके घर आग लगकर जलाते २ वह कभी निकटके घर आदिकोंको छोड़कर दूरके घरोंको जलाती है, उसका कारण जैसे भाग्यके अतिरिक्त और कुछभी नहींहै ऐसेही प्राणियोंकी जन्ममृत्युभी भाग्याधीनहै ॥ ५१ ॥ अपने ज्ञानानुसार वसु-देवने इसभांति विचारकर मानपूर्वक पापीकंसका सत्कार किया ॥ ५२ ॥ तथा प्रफुल्लित मुखसे हंसते २ दुःखित मनसे उस दुष्ट कंससे फिर कहा ॥५३॥ हे सौम्य ! आकाश वाणी ने जो कहा है उसका विचार व भय तुम मतकरो, क्योंकि इसके पुत्रोंहीसे तो तुमको, भयहै सो वह पुत्र जो होंगे सब तुम्हारे अर्पण करूंगा ॥ ५४ ॥ श्रीशुकदेवजीने कहा कि—वसुदेवके वचनोंको अभि-

वसुदेवोऽपितंप्रीतः प्रशस्यप्राविशद्गृहम् ॥ ५५ ॥ अथकालउपावृत्तेदेवकीसर्वदे
वता। पुत्रान्प्रसुषुवेचाष्टौकन्यांचैवानुवत्सरम् ॥ ५६ ॥ कीर्तिमन्तंप्रथमजंकंसाया
नकदुन्दुभिः। अर्पयामासकृच्छ्रेणसोऽनृतादतिविह्वलः ॥ ५७ ॥ किंदुःसहंनुसा
धूनांविदुषांकिमपेक्षितम्। किमकार्यंकदर्याणांदुस्त्यजंकिंधृतात्मनाम् ॥ ५८ ॥ दृ
ष्ट्वासमत्वंतच्छौरेः सत्येचैवव्यवस्थितिम्। कंसस्तुष्टमनाराजन्प्रहसन्निदमब्रवी
त् ॥ ५९ ॥ प्रतियातुकुमारोऽयंनह्यस्मादस्तिमेभयम्। अष्टमाद्युवयोर्गर्भान्मृत्युर्मे
विहितःकिल ॥ ६० ॥ तथेतिसुतमादायययावानकदुन्दुभिः। नाभ्यनन्दततद्वा
क्यमसतोविजितात्मनः ॥ ६१ ॥ नन्दाद्यायेव्रजेगोपायाश्चामीषांचयोषितः। वृष्ण
योवसुदेवाद्यादेवक्याद्यायदुस्त्रियः ॥ ६२ ॥ सर्वेवैदेवताप्रायाउभयोरपिभारत।
ज्ञातयोबन्धुसुहृदोयेचकंसमनुव्रताः ॥ ६३ ॥ एतत्कंसायभगवाञ्छशंसाभ्येत्यनार
दः। भूमेर्भारायमाणानांदैत्यानांचवधोद्यमम् ॥ ६४ ॥ ऋषेर्विनिर्गमेकंसोयदून्म
त्वासुरानिति। देवक्यागर्भसंभूतंविष्णुंचस्ववधंप्रति ॥६५॥ देवकींवसुदेवंचनिगृ
ह्यनिगडैर्गृहे। जातंजातमहन्पुत्रंतयोरजनशङ्कया ॥ ६६ ॥ मातरंपितरंभ्रातॄन्सर्वां
श्चसुहृदस्तथा। घ्नन्तिह्यसुतृपोलुब्धाराजानः प्रायशोभुवि ॥ ६७ ॥ आत्मानमि
हसंजातंजानन्प्राग्विष्णुनाहतम्। महासुरंकालनेमिंयदुभिः सव्यरुध्यत ॥ ६८ ॥
उग्रसेनंचपितरंयदुभोजान्धकाधिपम्। स्वयंनिगृह्यबुभुजेशूरसेनान्महाबलः ॥६९॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीकृष्णावतारोपक्रमे प्रथमोऽध्यायः

प्रिय कमझकर कंस बहिनके मारनेसे निवृत्त हुआ, । और वसुदेवभी प्रीतिपूर्वक हसते २ अपने घरकोगये ॥५५॥ अनन्तर समयानुसार सर्व देवमयी देवकीने प्रतिवर्ष एक२ पुत्र करके आठपुत्र और एककन्या उत्पन्नकी ॥५६॥ वसुदेवने असत्य भाषाके डरसे विह्वलहो कष्टपूर्वक कीर्तिमान नामक प्रथमपुत्रको कंसके हाथमेंदिया॥५७॥सत्यप्रतिज्ञ साधूगण क्या नहीं सहसक्ते विद्वान्मनुष्य कौनसी वस्तुकी अपेक्षारखताहै ? दुष्ट मनुष्यको कौनसा कुकार्यहै भगवद्भक्त क्या नहीं छोड़सकते ॥५८॥ हेराजन् ! वसुदेवकी ऐसीसाधुता और सत्यनिष्ठताको देखकर कंस प्रसन्नहो हसते२ कहने लगा कि॥५९॥तुम इसपुत्रको लेजाओ इससे मुझेभयनहीं है तुम्हारे आठवेंपुत्रसेही मेरीमृत्यु निश्चित हुई है॥६०॥वसुदेव(एसाहीकरूंगा)कहकर चलेगये परन्तु कंसकी इन बातोंपर उन्हें विश्वासनहुआ क्योंकि कंस मिथ्यावादी और अजितेन्द्रियथा॥६१॥हेराजन्!नारदने कंससे कहदियाथा कि व्रजवासी नंद आदिगोप, उनसबगोपों की स्त्रियें, वसुदेव आदि सबवृष्णिवंशी,देवकी आदि यदु स्त्रियें,वसुदेव और नन्दकुल के ज्ञातिवाले बन्धु तथ सुहृद, और जो कंस के आधीन हैं वह सबही देवता के समान हैं । नारदजीने यहभी कंस से कहदियाथा कि–देवतागण पृथ्वीके भारभूत असुरों के मारने का उद्योगकररहे हैं ॥ ६२ । ६४ ॥ नारदजी के चलेजाने पर कंस ने इस बात को विचार करा कि"यदुवंशी देवता हैं और विष्णुजी मेरे मारने के निमित्त देवकी के गर्भ से अवतारलेंगे" वसुदेव और देवकी को बेडीपहनाय अपने घर में रखछोड़ा।उनके जो पुत्रउत्पन्नहोनेलगे उन्हें कंस अपनी मृत्यु कारण विष्णुमानकर एक २को मारनेलगा ॥ ६५ । ६६॥पृथ्वीमण्डल में हिंसकराजा अपने २ प्राणपोषण के निमित्त माता,पिता, भ्राता और बन्धुओं का बधकरते हैं ॥ ६७॥ पहिले मैनेजबइस पृथ्वी पर कालनेमि नामक असुररूपसे जन्मग्रहण कियाथा तब विष्णु ने मेरावध कियाथा, –यह जानकरके कंस यदुवंशियों के साथ विरोध करनेलगा ॥ ६८ ॥ यदुभोज, और अन्धकगणों के स्वामी अपने पिता उग्रसेन को बद्ध (कैद) कर के महाबली कंस शूरसेन आदिराज्यों का भोग करने लगा ॥ ६९ ॥

इतिश्रीमद्भा०महापुराणेदशमस्कन्धेसरलभाषाटीकायांप्रथमोऽध्यायः ॥ १ ॥

श्रीशुक उवाच ॥ प्रलम्बबकचाणूरतृणावर्त्तमहाशनैः मुष्टिकारिष्टद्विविदपूतनाकेशिधेनुकैः ॥ १ ॥ अन्यैश्चासुरभूपालैर्बाणभौमादिभिर्युतः । यदूनां कदनं चक्रे बली मागधसंश्रयः ॥ २ ॥ ते पीडिता निविविशुः कुरुपञ्चालकेकयान् । शाल्वान्विदर्भान्निषधान्विदेहान्कोसलानपि ॥ ३ ॥ एके तमनुरुन्धाना ज्ञातयः पर्युपासते । हतेषु षट्सु बालेषु देवक्या औग्रसेनिना ॥ ४ ॥ सप्तमो वैष्णवं धाम यमनन्तं प्रचक्षते । गर्भो बभूव देवक्या हर्षशोकविवर्धनः ॥ ५ ॥ भगवानपि विश्वात्मा विदित्वा कंसजं भयम् । यदूनां निजनाथानां योगमायां समादिशत् ॥ ६ ॥ गच्छ देवि व्रजं भद्रे गोपगोभिरलंकृतम् । रोहिणी वसुदेवस्य भार्याऽऽस्ते नन्दगोकुले । अन्याश्च कंससंविग्ना विवरेषु वसन्ति हि ॥ ७ ॥ देवक्या जठरे गर्भं शेषाख्यं धाम मामकम् । तत्संनिकृष्य रोहिण्या उदरे संनिवेशय । ॥ ८ ॥ अथाऽऽहमंशभागेन देवक्याः पुत्रतां शुभे । प्राप्स्यामि त्वं यशोदायां नन्दपत्न्यां भविष्यसि ॥ ९ ॥ अर्चिष्यन्ति मनुष्यास्त्वां सर्वकामवरेश्वरीम् । धूपोपहारबलिभिः सर्वकामवरप्रदाम् ॥ १० ॥ नामधेयानि कुर्वन्ति स्थानानि च नरा भुवि । दुर्गेति भद्रकालीति विजया वैष्णवीति च ॥ ११ ॥ कुमुदा चण्डिका कृष्णा माधवी कन्यकेति च । माया नारायणीशानी शारदेत्यम्बिकेति च ॥ १२ ॥ गर्भसंकर्षणात्तं वै प्राहुः संकर्षणं भुवि । रामेति लोकरमणाद्बलं बलवदुच्छ्रयात् ॥ १३ ॥ संदिष्टैवं भगवता तथेत्योमिति तद्वचः । प्रतिगृह्य परिक्रम्य गां गता तत्तथाऽकरोत् ॥ १४ ॥ गर्भे प्रणीते

श्रीशुकदेव जी बोले कि—हेराजन् ! बलके अहंकारी कंसने मगधवासियोंका आश्रय ग्रहण कर प्रलम्ब, बक, चाणूर, तृणावर्त्त, अघ; मुष्टिक, अरिष्ट, द्विविद पूतना, केशी, धेनुक, बाण, भौम और दूसरे असुर राजाओं के साथ मिलकर यदुवंशियोंके नाश करनेका आरम्भ किया १—२। वह घोर अत्याचारसे पीडित होकर कुरु, पांचाल, केकय, शाल्व, विदर्भ, निषध, विदेह तथा कौशल देशोंको भागगये, ॥ ३ ॥ केवल कुछ एक जातिवाले कंसका अनुसरण कर उसकी सेवामें लगेरहे। कंससे छ.सतानोंके नाश होनेपर देवकी को हर्ष और शोक उत्पन्न करनेवाला सातवां गर्भ उत्पन्न हुआ। वह गर्भ विष्णुजीका अंशथा। लोक उसको अनन्त नामसे पुकारतेहैं ४—५। दुष्ट कंसके ऐसे अत्याचारोंको विश्वात्मा भगवानने जाना कि मेरे आश्रयी यदुवंशी कंसके डरसे भयभीतहोरहे हैं। तब उन्होंने योगमायाको आज्ञादी कि ॥६॥ हे देवि! हेभद्रे! गोप और गोपगणोंसे अलंकृत व्रजधाममें जाओ वहां नन्द गोकुलमें वसुदेवकी स्त्री रोहिणी निवासकरती हैं। वसुदेवकी और दूसरी स्त्रियेंभी कंसके भयसे व्याकुलहोकर गुप्तस्थानोंमें छिपी हैं ॥ ७ ॥ अनंत नामक मेरेअंशने देवकीके गर्भमें प्रवेशकिया है। तुम उसगर्भको खैंचकर रोहिणीके उदरमें स्थापनकरो ॥ ८ ॥ हे शुभे! इसके उपरांत मैं पूर्णरूप से देवकीका पुत्रहोकर उत्पन्न हूंगा और तुम नन्दकी स्त्री यशोदाके गर्भ में जन्म ग्रहणकरो ॥ ९ ॥ मनुष्यगण तुमको सर्वकाम तथा सबवरों के देनेवाली और अधीश्वरी कहकर नानाभेंटे देवेंगे तथा बलिद्वारा तुम्हारी पूजा करेंगे ॥ १० ॥ पृथ्वीपर तुम अनेकनामोंसे विख्यात होगी जैसे;-दुर्गा, भद्रकाली, विजया, वैष्णवी ॥ ११ ॥ कुमुदा, चण्डिका, कृष्णा, माधवी, कन्यका, माया, नारायणी, ईशानी, शारदा और अम्बिका ॥ १२ ॥ गर्भ के संकर्षण (खींचना) करनेसे पृथ्वीपर उसगर्भ से उत्पन्नहुई संतानको 'संकर्षण' नाम से पुकारेंगे। इसके अतिरिक्त वह मनुष्योंके मनको रमाने के कारण 'राम' तथा बलकी अधिकता से 'बलभद्र' नामसेभी प्रसिद्धहोंगे ॥ १३ ॥ भगवान् की इसभांति आज्ञापाय, "यही करूंगी" कहकर माया उनकी आज्ञाको धारणकर तथा उनकी परिक्रमा कर पृथ्वीपर आय उसीभांति करतीहुई ॥

देवक्या रोहिणीं योगनिद्रया । अहो विस्रंसितो गर्भ इति पौरा विचुक्रुशुः ॥ १५ ॥ भगवानपि विश्वात्मा भक्तानामभयंकरः । आविवेशांशभागेन मन आनकदुन्दुभेः ॥ ॥ १६ ॥ स बिभ्रत्पौरुषं धाम भ्राजमानो यथा रविः । दुरासदोऽतिदुर्धर्षो भूतानां संबभूव ह ॥ १७ ॥ ततो जगन्मङ्गलमच्युतांशं समाहितं शूरसुतेन देवी । दधार सर्वात्मकमात्मभूतं काष्ठा यथाऽऽनन्दकरं मनस्तः ॥ १८ ॥ सा देवकी सर्वजगन्निवासनिवासभूता नितरां न रेजे । भोजेन्द्रगेहेऽग्निशिखेव रुद्धा सरस्वती ज्ञानखले यथा सती ॥ १९ ॥ तां वीक्ष्य कंसः प्रभया जितान्तरां विरोचयन्तीं भवनं शुचिस्मिताम् । आहैष मे प्राणहरो हरिर्गुहां ध्रुवं श्रितो यन्न पुरेयमीदृशी ॥ २० ॥ किमद्य तस्मिन्करणीयमाशु मे यदर्थतन्त्रो न विहन्ति विक्रमम् । स्त्रियाः स्वसुर्गुरुमत्या वधोऽयं यशः श्रियं हन्त्यनुकालमायुः ॥ २१ ॥ स एव जीवन्खलु संपरेतो वर्तेत योऽत्यन्तनृशंसितेन । देहे मृते तं मनुजाः शपन्ति गन्ता तमोऽन्धं तनुमानिनो ध्रुवम् ॥२२॥ इति घोरतमाद्भावात्संनिवृत्तः स्वयं प्रभुः । आस्ते प्रतीक्षंस्तज्जन्म हरेर्वैरानुबन्धकृत् ॥२३॥ आसीनः संविशंस्तिष्ठन्भुञ्जानः पर्यटन्महीम् । चिन्तयानो हृषीकेशमपश्यत्तन्मयं जगत् ॥ २४ ॥ ब्रह्मा भवश्च तत्रैत्य मुनिभिर्नारदादिभिः देवैः सानुचरैः साकं गीर्भिर्वृषणमैडयन् ॥२५॥

॥ १४ ॥ योगमायाने जब देवकीका गर्भ लेकर रोहिणीके गर्भमें स्थापित किया तब पुरवासीलोग 'हाय देवकीका गर्भ नष्टहोगया' कहकर रोनेलगे ; परन्तु कोई इसभेदको न जानसके ॥१५॥ इस ओर भक्तोंका अभयदान देनेवाले भगवान्‌भी पूर्णरूपसे वसुदेवके मनमें प्रविष्टहुये ॥ १६ ॥ वसुदेवजीके मनमें श्रीमूर्तिके धारणहोतेही वह सूर्यकी समान प्रकाशितहोगये और समस्तप्राणियों के दुरासद (सहनयोग नहीं) और बड़ेही दुर्द्धर्ष होउठे ॥ १७ ॥ फिर जैसे पूर्वदिशा चन्द्रमा की किरणोंको धारण करती है वैसेही शुद्ध, प्रकाशित सती देवकीने वसुदेवजीके अर्पण कियेहुए भगवानके अंशको अपने मनद्वारा धारण किया ॥ १८ ॥ हे राजन् ! भगवान् सर्वात्मा हैं; अत एव पहिलेहीसे देवकी के आत्मामें वर्तमानथे । जिसमें समस्तजगत बासकरता है देवकी उनका निवासस्थान होकर स्वयं अति आनन्दितहुई परन्तु सब मनुष्योंको आनंदित न कर सकी क्योंकि जैसे घड़े के भीतर दीपककी सुन्दर शिखा तथा ज्ञान छुपानेवाले मनुष्योंके हृदय मे जैसे सुन्दर कथायेंरुकी रहती हैं वैसेही वह कंस के घर में बन्दी (कैद) थी ॥१९॥ एक दिन कंस उससती देवकी के प्रकाशद्वारा उसघरको प्रकाशित देखकहनेलगा—" निश्चयही जानाजाता है कि मेरेप्राणों का नाश करनेवाला विष्णु इसके गर्भ में प्रकटहुआ है । क्योंकि मेराघरपहिले कभी देवकी से ऐसा प्रकाशित नहींहुआ॥२०॥ इससमय विष्णु पर मुझे क्याकरना चाहिये ? मनुष्यको स्वार्थीहोकरभी कभी स्त्री वध द्वारा अपने अपने पराक्रमका नाश नहीं करनाचाहिये । देवकीके मारनेसे स्त्री वध भगिनी बध, और गर्भिणीका बध करनाहोगा, इससे यश, लक्ष्मी, और परमायु दिन२ नाशहोती रहेगी ॥ २१ ॥ जो मनुष्य केवल हिंसाही करके जीवन धारण करताहै वह जीताहुआ भी मराहै वह पापी जितनदिन जीवन रहताहै उतनेदिन सबके निंदाका पात्रहो जीवन धारण करताहै और मरनेके उपरांत निश्चयही नरकमें जाताहै॥ २२ ॥ प्रभावशाली कंस इस घोर चिंताके कारण स्त्री बधसे निवृत्तहो भगवान् पर बैरभाव रख उनके जन्मकी राह देखनेलगा ॥ २३ ॥ दिनरातमें वह किसी घड़ीभी शांति न पाता, खड़े होने, बैठने, भोजन, पान चलने; सोनेमें सबहीकाल सर्वमय भगवान्‌का ध्यानकर जगत्‌को तन्मय देखनेलगा ॥ २४ ॥ हे राजन् ! उसी समयमें ब्रह्मा और महादेव, नारदादि मुनि तथा अनुचर देवताओं को साथले देवकीके समीप आय वाक्यों द्वारा

देवाऊचुः । सत्यव्रतंसत्यपरंत्रिसत्यं सत्यस्ययोनिंनिहितंचसत्ये । सत्यस्यसत्यमृतसत्यनेत्रं सत्यात्मकंत्वांशरणंप्रपन्नाः ॥ २६ ॥ एकायनोऽसौद्विफलस्त्रिमूलश्चतूरसः पंचविधःषडात्मा । सप्तत्वगष्टविटपोनवाक्षो दशच्छदीद्विखगोह्यादिवृक्षः ।२७। त्वमेकएवास्यसतःप्रसूतिस्त्वं सन्निधानंत्वमनुग्रहश्च । त्वन्मायया संवृतचेतसस्त्वां पश्यन्तिनानानविपश्चितोये ॥ २८ ॥ बिभर्षिरूपाण्यवबोधआत्मा क्षेमाय लोकस्य चराचरस्य । सत्त्वोपपन्नानिसुखावहानि सतामभद्राणिमुहुःखलानाम् ॥ २९ ॥ त्वय्यम्बुजाक्षाखिलसत्त्वधाम्नि समाधिनावेशितचेतसैके । त्वत्पादपोतेनमहत्कृतेन कुर्वन्तिगोवत्सपदंभवाब्धिम् ॥३०॥ स्वयंसमुत्तीर्यसुदुस्तरंद्युमन्भवार्णवं भीममदभ्रसौहृदाः । भवत्पदाम्भोरुहनावमत्रतेनिधाययाताःसदनुग्रहोभवान् ॥ ३१ ॥ येऽन्येऽरविन्दाक्ष विमुक्तमानिनस्त्वय्यस्तभावादविशुद्धबुद्धयः । आरुह्यकृच्छ्रेणपरं पदंततः पतन्त्यधोऽनादृतयुष्मदंघ्रयः ॥ ३२ ॥ तथानतेमाधवतावकाः क्वचिद्भ्रश्यन्तिमार्गात्त्वयिबद्धसौहृदाः।त्वयाऽभिगुप्ताविचरन्तिनिर्भया विनायकानीकपमूर्धसुप्रभो ॥ ३३ ॥ सत्त्वंविशुद्धंश्रयतेभवान्स्थितौ शरीरिणांश्रेयउपायनंवपुः । वेद

भगवान की स्तुति करनेलगे ॥ २५ ॥ कि—हेभगवन्! आप सत्यव्रतहो सत्यही आपका संकल्प है, सत्यही आपकी प्राप्तिका साधनहै आप तीनोंकालमे सत्य. सत्यके कारण, और सत्यहीमें अवस्थितहो, आप सत्यके सत्यहो । आप ऋत और सत्य इन दोनोंके प्रवर्त्तकहो । अतएव आप सत्यमयहैं इसभांति सब प्रकारसेही आप सत्यात्मक हुएहो,—हम सत्यरूपी आपके शरणागत हुये हैं ॥ २६ ॥ यह देहरूप आदि वृक्ष कि—जिसमें एकप्रकृति इसका आश्रयहै, सुख दुःख इसके दोफलहैं, सत्व, रज और तम यह तीनोंगुण इसके मूलहैं. धर्म, अर्थ, काम और मोक्ष इसके चार रसहैं, पञ्च इन्द्रियां ज्ञान, शोक, मोह,जरा,मृत्यु, भूख और प्यास यह इसके छह स्वभावहैं, रस, रक्त, मांस, मेद, हड्डी. मज्जा और शुक्र—यह सात इसकी त्वचाहैं, पांच इन्द्रिय तथा मन, बुद्धि अहंकार यह आठ इसकी शाखाहैं, नवद्वार इसके नव छिद्र और दशप्राण इसके पत्ते हैं जीवात्मा और परमात्मा दोपक्षी इसमें वास करतेहैं ॥ २७ ॥ केवल एक आपही कार्य स्वरूप इस वृक्ष के उत्पत्ति स्थान, लयस्थान और पालन कर्ताहो । जिनका ज्ञान आपकी मायामें ढकाहै वे आप के रूपको नानाभांतिसे देखते रहते हैं परन्तु विद्वान मनुष्य उस भांति नहीं देखते॥२८॥ हेभगवन् ज्ञान स्वरूप आप समस्त प्राणियोंके कल्याणके निमित्त वारम्वार सत्वगुणमय अनेक रूप धारण करतेहो, यह सब रूप साधुओं के सुख देनेवाले और दुष्टोंके नाश करनेवाले होते हैं, । अतएव आपकी ऐसी प्रशंसा करना हमें अनुचित नहीं है ॥ २९ ॥ हेकमललोचन! आप निर्मल सत्वगुण के भण्डारहो । निर्मल सत्व निष्ठ विवेकी मनुष्य समाधियोग से चित्तको एकाग्रकर आपमें लगाय,बडे महात्माओं से कीहुई आपकी चरणरूपी नौकाका आश्रय ग्रहणकर भवसागरको गऊखुर के जल की समान तुच्छमानते रहतेहैं ॥ ३० ॥ भक्तों पर आप कृपाकरते रहतेहो तथा वेआपको ही अधिक प्यार करतेहैं; वे दूसरों के भयदायी भवसागर को पार होने के निमित्त स्वयं पारहो कर आपकी चरणरूपी नौका को इसी स्थान पर रखगये हैं ॥ ३१ ॥ हेअम्बुजनयन ! आप के भक्तों के अतिरिक्त और दूसरे जो अपने को मुक्तकहकर अभिमानकरते हैं; वे बडे दुःखसे श्रेष्ठ पदको प्राप्तकरते हैं और अन्त में उस से पतित होतेहैं; क्योंकि आप में उनकी भक्ति नहींहै इस ही लिये उनकी बुद्धिभी शुद्ध नहीं है तथा वे आप के श्रीचरणों का निरादर करते रहते हैं ॥ ३२ ॥ हे केशव ! जो मनुष्य आप के भक्त हैं तथा आपही में सुहृदताका बन्धन रखते हैं;—उन की इस भांति दुर्गति नहींहोती; आपसे सुरक्षितहोकर वह विघ्नकारियों के मस्तकों पर निर्भयहो घूमा करते हैं ॥ ३३ ॥ आप सृष्टिपालनके निमित्त धर्मफल उत्पन्नकरनेवाली सत्वमूर्तिको धारण करते

क्रियायोगतपःसमाधिभिस्तवार्हणं येनजनःसमीहते ॥ ३४ ॥ सत्त्वंनचेद्धातरिदं निजं भवेद्विज्ञानमज्ञानभिदापमार्जनम् । गुणप्रकाशैरनुमीयते भवान्प्रकाशते यस्य चयेनवागुणः ॥ ३५ ॥ ननामरूपे गुणजन्मकर्मभिर्निरूपितव्ये तवतस्यसाक्षिणः । मनोवचोभ्यामनुमेयवर्त्मनो देवक्रियायांप्रतियन्त्यथापिहि ॥ ३६ ॥ शृण्वन्गृणन्संस्मरयंश्च चिन्तयन्नामानिरूपाणिच मङ्गलानिते क्रियासुयस्त्वच्चरणारविन्दयोराविष्टचेता नभवायकल्पते ॥ ३७ ॥ दिष्ट्याहरेऽस्याभवतःपदोभुवो भारोऽपनीतस्तवजन्मनेशितुः । दिष्ट्याऽङ्कितांत्वत्पदकैः सुशोभनैर्द्रक्ष्यामगांद्यांच तवानुकम्पिताम् ।३८। नतेऽभवस्येशभवस्यकारणं विनाविनोदंबततर्कयामहे ॥ भवोनिरोधःस्थितिरप्यविद्ययाकृता यतस्त्वय्यभयाश्रयात्मनि ॥ ३९ ॥ मत्स्याश्वकच्छपनृसिंहवराहहंसराजन्यविप्रविबुधेषुकृतावतारः । त्वंपासिनस्त्रिभुवनंचयथाऽधुनेश भारंभुवोहरयदूत्तम वन्दनंते ॥ ४० ॥ दिष्ट्याऽम्बतेकुक्षिगतःपरः पुमानंशेन साक्षाद्भगवान्भवायनः । माभूद्भयंभोजपतेर्मुमूर्षोर्गोप्ता यदूनांभवितातवात्मजः ॥ ४१ ॥ श्रीशुकउवाच ।इत्यभिष्टूयपुरुषं यद्रूपमनिदंयथा । ब्रह्मेशानौपुरोधाय देवाःप्रतिययुर्दिवम् ।४२
इति श्रीमद्भा.महा.दशम.गर्भगतविष्णोर्ब्रह्मादिकृत स्तुतिर्नाम द्वितीयोऽध्यायः॥२॥

हो कि जिस मूर्तिके द्वारा ब्रह्मचारी वेदाध्ययन से, गृहस्थी कर्मयोग से, वानप्रस्थतपसे, सन्यासी समाधि से, आप का पूजनकरते हैं ॥ ३४ ॥ आप शरीर का आश्रय न करें तो पूजाके अभाव से कर्मफल सिद्धनहोवें । हे विधातः! यदि सत्व आपकी देह नहोता तो अज्ञान और भेद का नाश करनेवाला विज्ञानभी नहीं उत्पन्न होता, क्योंकि जो गुणप्रकाश पाते रहते हैं उनसब गुणोंकेआप साक्षीहो, इसप्रकार गुणों के प्रकाश से आप के स्वरूप का अनुमान होता है। परन्तु आपका स्वरूप नेत्रों से प्रत्यक्ष नहीं देखपड़ता ॥३५॥ उनसाक्षी स्वरूप आप के मार्ग का केवलअनुमान हीहोता है क्योंकि आप के नाम और रूप जोकिमन और वचनके अगोचर हैं -गुण, जन्म और कर्म से निरूपण नहींकियेजासक्ते । तथापि हेदेव ! भक्तजन उपासनादिक क्रिया मे आपकोप्रत्यक्ष देखते हैं यह वार्ता प्रसिद्ध है ॥ ३६ ॥ जो आपके मङ्गलकारी नाम और रूप का श्रवण और उच्चारणकरते हैं—दूसरे को सुनाते हैं, ध्यानकरते हैं तथाआपके दोनों चरणकमलों को मनमेंधारण किये रहतेहैं उनका फिरसंसार में दूसरीबार आनानहींहोता ॥ ३७ ॥ अहा! क्यासुखका विषय है! आप ईश्वरहो आपके जन्म लेने मे आपके चरण अंकित इस पृथ्वीकाभारदूरहोगा । अहो ! क्या मङ्गलका विषय है आप कृपापूर्वक अनेक चरणों के ध्वज, वज्र, अंकुशादि चिन्होंद्वारा पृथ्वीतथा सुरलोकको पवित्रकरेंगे;—यह-हम देखेंगे ॥ ३८ ॥ हे ईश ! आप असंसारी हो अतएव आप के जन्मकाकारण लीलाकरने के अतिरिक्त और कुछ नहीं अनुमान कियाजासकता । जीवात्माओंका जो उत्पत्ति स्थिति और संहार होता रहता है, वह सब आपकी अविद्याही से होता है ! वास्तवमें जीवात्माकाभी जन्मआदि कुछनहीं है ॥ ३९ ॥ आपने मत्स्य, कच्छप, वराह, नृसिंह, हंस, क्षत्रिय, विप्र और देवताओं में अवतार लेकर संसारका और हमारा जैसे पोषण कियाहै—हेयदुश्रेष्ठ! वैसेही इससमय पृथ्वी के भारीबोझको दूरकरो हम सब आपको प्रणाम करते हैं ॥ ४० ॥ हेदेवकि ! यह अच्छाहुआ कि—परम पुरुष भगवान् हमारे कल्याण के निमित्त पूर्णरूप से तुम्हारे गर्भ में प्रविष्टहुये हैं अब कंसका भय न करना; उसको मरनेकी इच्छाहुई है; तुम्हारा यह पुत्र यदुवंशियों का रक्षाकारी होगा ॥ ४१ ॥ हेराजन् ! जिसकारूप किसी के दृष्टिगोचर न होवे उन भगवान्‌की इसभांति स्तुतिकर देवतागण—ब्रह्मा और महादेवजी को ले अपने २ स्थानको गये॥४२

इतिश्रीमद्भा०महा०दशम०सरलाभाषाटीकायांद्वितीयोऽध्यायः ॥ २ ॥

श्रीशुक उवाच॥ अथसर्वगुणोपेतः कालः परमशोभनः यर्ह्येवाजनजन्मर्क्षंशा न्तर्क्षग्रहतारकम् ॥ १ ॥ दिशःप्रसेदुर्गगनं निर्मलोडुगणोदयम्। महीमङ्गलभूयिष्ठ पुरग्रामव्रजाकरा ॥ २ ॥ नद्यःप्रसन्नसलिलाह्रदाजलरुहश्रियः । द्विजालिकुलस न्नादस्तवकावनराजयः ॥ ३ ॥ ववौवायुःसुखस्पर्शःपुण्यगन्धवहःशुचिः । अग्नय श्चद्विजातीनांशान्तास्तत्रसमिन्धत ॥ ४॥ मनांस्यासन्प्रसन्नानिसाधूनामसुरद्रुहाम् जायमानेऽजनेतस्मिन्नेदुर्दुन्दुभयोदिवि ॥ ५ ॥ जगुःकिन्नरगन्धर्वास्तुष्टुवुःसिद्धचा रणाः। विद्याधर्यश्चननृतुरप्सरोभिःसमंतदा ॥ ६ ॥ मुमुचुर्मुनयोदेवाःसुमनसोऽसि मुदान्विताः। मंदंमंदंजलधराजगर्जुरनुसागरम् ॥ ७ ॥ निशीथेतमउद्भूतेजायमाने जनार्दने। देवक्यांदेवरूपिण्यांविष्णुःसर्वगुहाशयः ॥ आविरासीद्यथाप्राच्यांदि शीन्दुरिवपुष्कलः ॥ ८ ॥ तमद्भुतंबालकमम्बुजेक्षणंचतुर्भुजंशङ्खगदाद्युदायुधम् । श्रीवत्सलक्ष्मंगलशोभिकौस्तुभंपीताम्बरंसान्द्रपयोदसौभगम् ॥ ९ ॥ महार्हवैदूर्य किरीटकुण्डलत्विषापरिष्वक्तसहस्रकुन्तलम् । उद्दामकाञ्च्यङ्गदकंकणादिभिर्विरो चमानंवसुदेवऐक्षत ॥ १० ॥ सविस्मयोत्फुल्लविलोचनोहरिंसुतंविलोक्यानकदुंदु- भिस्तदा । कृष्णावतारोत्सवसंभ्रमोऽस्पृशन्मुदाद्विजेभ्योऽयुतमाप्लुतोगवाम् ११ अथैनमस्तौदवधार्यपूरुषपरंनताङ्गःकृतधीःकृताञ्जलिः । स्वरोचिषाभारतसूतिका गृहंविरोचयन्तंगतभीःप्रभाववित् ॥ १२ ॥ वसुदेव उवाच ॥ विदितोऽसिभवा-

---

श्रीशुकदेवजीबोले कि—हे राजन्! फिर जिसकालमें, समय सर्वगुणसम्पन्न और अत्यन्त रमणीयहोउठा—रोहिणी नक्षत्र उदय और उसके साथ अश्विनी आदि नक्षत्र और सब ग्रहगण उसके अनुकूल हुए ॥१॥ दिशाएँ निर्मल होगई, जब आकाशमें तारागण भलीभांतिसे प्रकाश पाने लगे, पृथ्वीके नगर गांव, ब्रज और खान आदिमें बहुत मंगल होनेलगे, ॥ २ ॥ नदियोंकी धाराने निर्मलभाव धारण किया, सरोवर कमलोंसे सुशोभित हुए जङ्गली वृक्षोंकी कलियां खिलउठीं और जलमें भौंरे आनन्दसे गान करनेलगे ॥ ३ ॥ वायु पवित्र सुगन्धित तथा मद २ चलनेलगी, जब ब्राह्मणोंकी अग्नि शांति भावसे जलनेलगी ॥४॥ असुरोंके शत्रु साधुओं का मन प्रसन्न हुआ—विष्णु का जन्मसमय उपस्थित देखकर किन्नर और गन्धर्वगण गाने सिद्ध और चारणगण स्तुति करने तथा विद्याधरी सब अप्सराओं समेत एकत्रित होकर नाचनेलगीं, ॥ ५—६ ॥ जब मुनि और देवता प्रसन्नहो फूल बरसाने लगे, उसीसमय बादलसे ढके हुए चन्द्रमाकी समान भगवान प्रगट हुए। उससमय समुद्रके साथ साथ बादल मदमंद गर्जना करनेलगे ॥७॥ पूर्व ओरसे पूर्णिमाके चन्द्रमाकी समान देवरूपिणी देवकीके गर्भसे सर्वांतर्यामि भगवान् विष्णुजी उत्पन्न हुए, ॥ ८ ॥ वसुदेवने देखा कि—यहबालक बड़ाही अद्भुतहै। उसके नेत्र कमलदलके समान दीर्घ, चतुर्भुजरूप धारणकिये तथा भुजाओंमें शंख चक्र आदि अस्त्रलियेहैं।वक्षःस्थलमें श्रीवत्सकाचिह्न शोभायमानहै; गलेमें कौस्तुभमणि धारणाकिये पीतवस्त्रपहिनें और रंग बादलोंकेसमान श्याममन हरनेवालाहै॥९॥ अनेक केश घूंघरवालेहैं और अनमोल वैदूर्य किरीट और कुंडलकी प्रभासे झलक रहे हैं अति श्रेष्ठ मेखला बाजूबन्द और कंकण आदि आभूषणों द्वारा शरीर शोभाको प्राप्त होरहे है ॥ १० ॥ वसुदेवजी ने विस्मितहो प्रफुल्लितनेत्रों से पुत्ररूपी हरि को देखकर मनहीमन में ब्राह्मणोंको दश सहस्र गऊदानकी। उस काल वह बन्धनावस्थामें थे अतएव यथार्थ में दान कैसे होसकताथा! कृष्णउनके पुत्ररूप से उत्पन्न हुएहैं,—इसी आनन्द में वसुदेवजी प्रफुल्लितहोरहेथे ॥११॥ हे भारत! अनन्तर उनको परमपुरुष रूप से स्थिरकर महात्मा वसुदेव पृथ्वीपर गिर, शुद्धभावसे हाथ जोड़

न्साक्षात्पुरुषः प्रकृतेः परः । केवलानुभवानन्दस्वरूपः सर्वबुद्धिदृक् ॥ १३ ॥ स एव स्वप्रकृत्येदं सृष्ट्वाग्रे त्रिगुणात्मकम् । तदनुत्वंह्यप्रविष्टः प्रविष्टइवभाव्यसे ॥ १४ ॥ यथेमेऽविकृता भावास्तथातेविकृतैः सह । नानावीर्याः पृथग्भूताविराजंजनयन्ति हि ॥ १५ ॥ सन्निपत्यसमुत्पाद्यदृश्यन्तेऽनुगताइव । प्रागेवविद्यमानत्वान्नतेषामिह संभवः ॥१६ ॥ एवंभवान्बुद्ध्यनुमेयलक्षणैर्ग्राह्यैर्गुणैः सन्नपितद्गुणाग्रहः । अनावृतत्वाद्बहिरन्तरंनतेसर्वस्यसर्वात्मनआत्मवस्तुनः ॥ १७ ॥ यआत्मनोदृश्यगुणेषुसन्निति व्यवस्यतेस्वव्यतिरेकतोऽबुधः । विनाऽनुवादंनचतन्मनीषितंसम्यग्यतस्त्यक्तमुपाददत्पुमान् ॥ १८ ॥ त्वत्तोऽस्यजन्मस्थितिसंयमान्विभोवदन्त्यनीहादगुणादविक्रियात् । त्वयीश्वरेब्रह्मणिनोविरुध्यतेत्वदाश्रयत्वादुपचर्यतेगुणैः ॥ १९ ॥ सत्वंत्रिलोकस्थितयेस्वमायया बिभर्षिशुक्लंखलुवर्णमात्मनः । सर्गायरक्तंरजसोपबृंहितंकृष्णंचवर्णंतमसाजनात्यये ॥ २० ॥ त्वमस्यलोकस्यविभोरिरक्षिषुर्गृहेऽवतीर्णोऽसिममाखिलेश्वर । राजन्यसंज्ञासुरकोटियूथपैर्निर्व्यूह्यमानानिहनिष्यसेचमूः ॥ २१ ॥ अयंत्वसभ्यस्तवजन्मनौगृहेश्रुत्वाऽग्रजांस्तेन्यवधीत्सुरेश्वर । सतेऽवता

प्रभाव से निर्भयहो उनकी स्तुति करनेलगे ॥ १२ ॥ वसुदेवजी ने कहाकि— अहो ! मैं आपको जानताहूं आप प्रकृति से परे परमपुरुषहो,मेरा कैसा सौभाग्य है ! कि आज आपने मुझको साक्षात् दर्शन दिये । भगवान ! आप निरवच्छिन्न, अनुभव और आनन्दस्वरूप तथा सर्वजनों की बुद्धि के साक्षीहो ॥ १३ ॥ आप अपनी मायाद्वारा इस त्रिगुणात्मक विश्वको रचकर पश्चात् इस के भीतर नहीं प्रवेशकरते;-केवल प्रविष्ट के समान लक्ष्य में आतेहो ॥ १४ ॥ सप्तमहदादि तत्व, सोलहविकारों समेत मिलकर इस ब्रह्मांड को उत्पन्नकरते है, पृथक् २ होकर वह सब सृष्टिको नहीं उत्पन्न करसकते ॥ १५ ॥ब्रह्मांड उत्पन्न करने के पीछे उस में प्रविष्टहुए से जानने मे आतेहो किंतुयथार्थ में प्रविष्टनहींहोते, क्योंकि वे सबतत्व कारणरूप से प्रथमही वर्तमानथे ॥ १६ ॥ इस भांति रूपादि ज्ञानद्वारा जिसके स्वरूपका अनुमान कियाजाता है, आप उनसब विषयों में वर्तमान रहने परभी उनके साथ आप का प्रत्यक्षनहीं होता । आप सर्वस्वरूप, सर्वात्मा, सर्वव्यापक, परमार्थ वस्तुहो अतएव अपरिच्छिन्नहो;इसही कारण आप के स्वरूप में बाहर भीतर का भेद नहीं है ॥ १७ ॥ हे प्रभो! आप अन्तर्यामित्व रूप से सब में प्रवेश करकेभी जब यथार्थ रूपसे नहीं जानपड़ते तब देवकीके गर्भ में आपने कैसे प्रवेशकिया? अतएव आपकेवल आनन्द और अनुभवस्वरूपहो;आपको जो मैंने जाना यही मेरा परमसौभाग्य है।जो मनुष्य आत्माके दृश्यगुण देहादि को आत्माको पृथक् रूप से वर्तमान पदार्थ जानता है वह मूर्ख है क्योंकि विचारकर देखाजाय तो कथनमात्र बिनादेहादिक सब झूठेही हैं अतएव झूठे देहादि को जो सत्यमाने वह मूर्खहै ॥ १८ ॥ हे प्रभो ! तत्ववेत्ता गण कहते हैं कि-आपही से इस विश्वकी उत्पत्ति और लय होती रहती है अतएव आप निर्गुण,और निर्विकारहो; अथवाआपही ईश्वरऔर ब्रह्महो; आपमें इन दोनोंका विरोध नहीं होसकता। आप गुणों के आश्रयहो; सब गुणोंसे सृष्ट्यादि आपहीमें आरोपित होती रहती हैं ॥१९॥ आपअपनी मायाद्वारा त्रिलोकीके पालनार्थ अपने सत्वगुणसे शुक्लवर्ण उत्पत्ति के निमित्त रजोगुणसे बढ़ाहुवा रक्तवर्ण और नाशके निमित्त तमोगुणके योगसे कृष्णवर्ण स्वीकारकरते रहतेहो ॥२०॥ हे अखिलेश्वर ! हे विभो ! आपने इससमस्त लोककी रक्षाके निमित्त कृष्णवर्ण धारणकर मेरेघरमें अवतार लिया है । राजन्य नामधारी करोड़ों असुर सेनापतियोंके साथ जोसेना इधर उधर घूमती फिरती है, आप उन सबका नाश करेंगे ॥ २१ ॥ हे सुरेश्वर ! दुष्ट कंसने मेरेघर आपका जन्म होना सुनकर आपके बड़ेभ-

रंपुरवैः समर्पितंश्रुत्वाऽद्यनैवाभिसरत्युदायुधः ॥ २२ ॥ श्रीशुक उवाच ॥ अथैन मात्मजंवीक्ष्यमहापुरुषलक्षणम् । देवकीतमुपाधावत्कंसाद्भीताशुचिस्मिता॥२३॥ देवक्युवाच ॥ रूपंयत्तत्प्राहुरव्यक्तमाद्यंब्रह्मज्योतिर्निर्गुणंनिर्विकारम् । सत्तामात्रं निर्विशेषंनिरीहंसत्वंसाक्षाद्विष्णुरध्यात्मदीपः ॥ २४ ॥ नष्टेलोकेद्विपरार्धावसाने महाभूतेष्वादिभूतंगतेषु । व्यक्तेऽव्यक्तंकालवेगेनयातेभवानेकः शिष्यतेऽशेषसंज्ञः ॥ २५ ॥ योऽयंकालस्तस्यतेऽव्यक्तबन्धोचेष्टामाहुश्चेष्टतेयेनविश्वम् । निमेषादिर्वत्सरान्तोमहीयांस्तंत्वेशानंक्षेमधामप्रपद्ये ॥ २६ ॥ मर्त्योमृत्युव्यालभीतः पलायन्लोकान्सर्वान्निर्भयंनाध्यगच्छत् ॥त्वत्पादाब्जंप्राप्ययदृच्छयाद्यस्वस्थः शेतेमृत्युरस्मादपैति ॥२७॥ सत्वंघोरादुग्रसेनात्मजान्नस्त्राहित्रस्तान्भृत्यवित्रासहाऽसि।रूपंचेदंपौरुषंध्यानधिष्ण्यंमाप्रत्यक्षंमांसदृशांकृषीष्ठाः ॥ २८ ॥ जन्मतेमय्यसौपापोमाविद्यान्मधुसूदन । समुद्विजेभवद्धेतोः कंसादहमधीरधीः ॥ २९ ॥ उपसंहरविश्वात्मन्नदोरूपमलौकिकम् । शंखचक्रगदापद्मश्रियाजुष्टंचतुर्भुजम् ॥ ३० ॥ विश्वंयदेतत्स्वतनौनिशान्तेयथावकाशंपुरुषः परोभवान् । बिभर्तिसोऽयंममगर्भगोऽभूदहोनृलोकस्यविडम्बनंहितत् ॥३१ ॥ श्रीभगवानुवाच ॥ त्वमेवपूर्वसर्गेऽभूः पृश्निः स्वायंभुवेसति । तदाऽयंसुतपानामप्रजापतिरकल्मषः ॥ ३२ ॥ युवांवैब्रह्मणादिष्टौप्र

दुर्योंका वधकिया है। प्रहरीगण आपका जन्म समाचार उसको देंगे वह समाचार पातेही शस्त्र उठाय इस समय आताही होगा ॥ २२ ॥ श्रीशुकदेवजी बोलेकि—हे राजन्! तदनंतर कंससे डरीहुई देवकी ने पुत्रके लक्षण भगवान केसे देख विस्मित चित्तसे उनकी स्तुति करनेका आरंभ किया ॥२३॥ देवकी न कहाकि—हे भगवन्! वेद जिसे एक आदि कारण अव्यक्त, बृहत, चेतन, निर्गुण, निर्विकार, सत्तामात्र, निर्विरोध, और निरीहवस्तु कहता रहता है आप साक्षात् वही विष्णुहो आप आत्माके दीपकहो, अतएव बुद्ध्यादि इन्द्रिय समूहों के प्रकाशकहो ॥ २४ ॥ ब्रह्माके द्विपरार्द्धके अंतमें कालके वगस लोकों के नाश होनेपर जब सब महाभूत आदिभूतमें और आदिभूत प्रकृति में प्रवेश करते हैं तब केवल आपही शेष रहतहो ॥ २५ ॥ उस समय अशेषात्म॰ प्रधान में आपकी बुद्धिहोती है तब आप चिंता करतेहो—कि यह प्रधान मुझमें लीन होगया है इसको फिर प्रकाशितकरू, निमेषादि से वर्षतक इसी द्विपरार्द्ध रूप कालमें इस विश्वका परिवर्तन होता है, हे प्रकृति प्रवर्तक! यही आपकी लीला कहीजाती है; आप अभय के स्थान रूपहो अतएव मैं आपके शरणागतहूं ॥ २६ ॥ मृत्युलोक वासी मनुष्य मृत्युरूप सांपसे भयभीत होकर समस्त लोकों में भागता फिरता है परन्तु उसको कहीं भी निर्भय स्थान नहीं मिलता। जोकोई एक अनिर्वचनीय भाग्योदय केवल से आपके चरण कमलों को प्राप्तकर शांतचित्त से सोता है; मृत्यु उसके समीप से भागजाती है, वह आप हमारीभी रक्षाकरो ॥ २७ ॥ आप भक्तों के भयको दूर करने वालेहो; हम उग्रसेन के पुत्रदुष्ट कंससे भयभीत हैं, कृपाकरके हमारी रक्षाकरो। आप अपन इस ध्यानयोग्य ईश्वर रूपको चर्म चक्षुओं के दृष्टिगोचर न करें ॥ २८ ॥ हे मधुसूदन! मेरे गर्भमें आपका जन्म हुआ है, पापी कस यह न जानने पावे। मेराचित्त बड़ाही चंचल है; अतएव आपके कारणही कंस से भयभीतहूं ॥ २९ ॥ हे विश्वात्मन्! आप इस शंख, चक्र, गदा, पद्मयुक्त चतुर्भुज रूपको अंतर्ध्यान करें ॥ ३० ॥ प्रलय कालमें आप जब अपनी देह में इस विश्व ब्रह्माण्डको धारण करतेहो तब विश्वकी किसी वस्तुकाभी उस स्थानपर संकोच नहीं होता; वही आप मेरे गर्भ में उत्पन्न हुये है मनुष्यों के लिये यह एक प्रकार की विडंबना मात्र है ॥ ३१ ॥ श्रीभगवान् बोले कि—हेसति! पूर्वजन्मके स्वायम्भुव मन्वन्तर में तुम्हारानाम पृश्निथा उससमयमें

प्रजासर्गेयदाततः । सन्नियम्येन्द्रियग्रामंतेपाथेपरमंतपः ॥ ३३ ॥ वर्षवातातपहिमघर्मकालगुणाननु । सहमानौश्वासरोधविनिर्धूतमनोमलौ ॥ ३४ ॥ शीर्णपर्णानिलाहारावुपशान्तेनचेतसा । मत्तः कामानभीप्सन्तौमदाराधनमीहतुः ॥ ३५ ॥ एवंवांतप्यतोस्तीव्रंतपः परमदुष्करम् । दिव्यवर्षसहस्राणिद्वादशेयुर्मदात्मनोः ॥ ३६ ॥ तदावांपरितुष्टोहममुनावपुषाऽनघे । तपसाश्रद्धयानित्यंभक्त्याचहृदिभावितः ॥३७॥ प्रादुरासंवरदराड्युवयोः कामदित्सया । व्रियतांवरइत्युक्तेमादृशोवांवृतः सुतः ॥ ३८ ॥ अजुष्टग्राम्यविषयावनपत्यौचदम्पती । नवव्राथेऽपवर्गंमेमोहितौदेवमायया ॥ ३९ ॥ गतेमयियुवांलब्ध्वावरंमत्सदृशंसुतम् । ग्राम्यान्भोगानभुञ्जाथांयुवांप्राप्तमनोरथौ ॥ ४० ॥ अदृष्ट्वाऽन्यतमंलोकेशीलौदार्यगुणैः समम् । अहंसुतोवामभवंपृश्निगर्भइतिश्रुतः ॥ ४१ ॥ तयोर्वांपुनरेवाहमदित्यामासकश्यपात् । उपेन्द्रइतिविख्यातोवामनत्वाच्चवामनः ॥ ४२ ॥ तृतीयेऽस्मिन्भवेऽहंवैतेनैववपुषाऽथवाम् । जातोभूयस्तयोरेवसत्यंमेव्याहृतंसति ॥४३॥ एतद्वांदर्शितंरूपंप्राग्जन्मस्मरणायमे । नान्यथामद्भवंज्ञानंमर्त्यलिङ्गेनजायते ॥ ४४ ॥ युवांमांपुत्रभावेनब्रह्मभावेनचासकृत् । चिन्तयन्तौकृतस्नेहौयास्येथेमद्गतिंपराम् ॥ ४५ ॥ (यदिकंसाद्बिभेषित्वंतर्हिमांगोकुलंनय । मन्मायामानयाशुत्वं यशोदागर्भसंभवाम् ॥ १ ॥) श्रीशुक उवाच । इत्युक्त्वासीद्धरिस्तूष्णीं भगवानात्ममायया । पित्रोःसंपश्यतोःसद्यो बभूव

यह निष्पाप वसुदेव सुतपा नामके प्रजापतिथे ॥ ३२ ॥ ब्रह्माजीने तुम दोनोंको प्रजा उत्पन्न करने की आज्ञादी तुम इन्द्रियों को वशमें कर तपस्या करनेमें प्रवृत्तहुए ॥ ३३ ॥ वर्षा, वायु, धूप, जाड़ा, गर्मी आदि इन सब कालोंके गुणोंका सहन किया तुम प्राणायाम द्वारा मनके मलको स्वच्छकर । गिरेहुए पत्ते और वायुका भक्षण करतेहुए मुझसे इच्छित वर पानेकी इच्छाकर शांत चित्तसे मेरा ध्यान करनेलगे ॥ ३५ ॥ हेभद्रे ! मुझमें चित्तलगाय तुम दोनों इसप्रकारसे परमदुष्कर तपस्यामें प्रवृत्तहुए कि बारहसहस्र दिव्य वर्ष बीतगए ॥ ३६ ॥ हे पापरहित ! तब तपस्या श्रद्धा और नित्य भक्ति योग द्वारा चिन्तित होकर वरदेनेवालोंमें श्रेष्ठ मैं तुम्हारे ऊपर प्रसन्न हुआ ॥ ३७ ॥ तथा वरदेनेकी इच्छासे शरीर धारणकर तुम्हारे समीप आयकर कहनेलगा कि वरमांगो । यह सुनकर तुमने मेरी समान पुत्रकी प्रार्थनाकीथी ॥ ३८ ॥ तुम दोनों स्त्री पुरुषोंने ग्राम्य सुख नहीं भोगे तथा तुम्हारे पुत्रभी नहीं हुएथे अतएव तुमने हमसे मुक्ति न मांगी मेरी मायाने तुमको मोहित कर दियाथा ॥ ३९ ॥ मेरे चलेजानेपर तुम मेरी समान पुत्र होनेका वरपाय सफल मनोरथहो उपभोगोंमें प्रवृत्तहुए ॥ ४० ॥ मैंने सृष्टिमें शील, उदारता और गुणमें अपनी समान दूसरे मनुष्य को न देखकर तुम्हारे यहां अवतार लिया पृश्नि पुत्रके नामसे विख्यात हुआ, ॥ ४१ ॥ मनमें विचारो कि दूसरे जन्ममें भी मैं तुम्हारा पुत्रहुआथा, इससमय मैंने कश्यपके वीर्यसे अदितिके गर्भ में जन्मग्रहण किया—इन्द्रसे छोटाथा इससे उपेंद्र और आकृतिमें छोटाथा इससे 'वामन, नामसे विख्यात हुआ ॥ ४२ ॥ इस जन्ममें भी वही मैं उस शरीरको धारणकर फिर तुम्हारेही गर्भमें उत्पन्न हुआ । हेसति ! इसमें जो मैंने कहा वह सब सत्यहै, ॥ ४३ ॥ पहिले मैंने इसही रूपसे जन्म ग्रहण कियाथा यह स्मरणादि लानेके निमित्तही मैंने तुमको यहरूप दिखाया ऐसा न होनेसे मनुष्यरूप देखकर तुम कदापि न पहिंचानसकते॥४४॥पुत्र भावसेहो चाहे ब्रह्मभावसे हो तुम मेरा सदैव ध्यानकर तथा मुझपर स्नेहरख श्रेष्ठपदको प्राप्तहोगे॥४५॥श्रीशुकदेवजी बोले कि—भगवान् यहबात कहकर चुपहुए और अपनीमायाके योगसे उसीसमय माता पिताके सामनेही बालक रूप होगये ॥४६॥ तदनन्तर जो तुम कंससे डरतेहो तो मुझे गोकुल में लेचलो और यशोदाकी कन्या कि—जो मेरी मायारूपहै उसे यहां लेआओ,, भगवान् की ऐसी आज्ञासे वसुदेवजीने पुत्रको लेकर

प्राकृतः शिशुः ॥ ४६ ॥ ततश्चशौरिर्भगवत्प्रचोदितः सुतंसमादायससूतिकागृहात् । यदाबहिर्गन्तुमियेष तर्ह्यजायायोगमायाऽजनि नन्दजायया ॥ ४७ ॥ तया हृतप्रत्ययसर्ववृत्तिषु द्वाःस्थेषु पौरेष्वपि शायितेष्वथ । द्वारस्तुसर्वाःपिहितादुरत्ययाबृहत्कपाटायसकीलशृंखलैः ॥ ४८ ॥ ताः कृष्णवाहेवसुदेवआगते स्वयंव्यवर्यन्तयथातमोरवेः । ववर्षपर्जन्यउपांशुगर्जितः शेषोन्वगाद्वारिनिवारयन्फणैः ॥ ॥ ४९ ॥ मघोनिवर्षत्यसकृद्यमानुजागम्भीरतोयौघजवोर्मिफेनिला । भयानकावर्तशताकुलानदीमार्गंददौ सिन्धुरिवश्रियःपतेः ॥ ५० ॥ नन्दव्रजं शौरिरुपेत्यतत्रतान्गोपान्प्रसुप्तानुपलभ्यनिद्रया ॥ सुतंयशोदाशयनेनिधाय तत्सुतामुपादायपुनर्गृहानगात् ॥ ५१ ॥ देवक्याःशयनेन्यस्यवसुदेवोऽथदारिकाम् । प्रतिमुच्यपदोर्लोहमास्तेपूर्ववदावृतः ॥ ५२ ॥ यशोदानन्दपत्नी च जातंपरमबुध्यत । नतल्लिङ्गंपरिश्रान्ता निद्रयाऽपगतस्मृतिः ॥ ५३ ॥

इतिश्रीमद्भा० म० दशम० तृतीयोऽध्यायः ॥ ३ ॥

श्रीशुक उवाच । बहिरन्तःपुरद्वारः सर्वाःपूर्ववदावृताः । ततोबालध्वनिंश्रुत्वा गृहपालाःसमुत्थिताः ॥ १ ॥ तेतुतूर्णमुपव्रज्य देवक्यागर्भजन्मतत् । आचख्युर्भोजराजाय यदुद्विग्नःप्रतीक्षते ॥ २ ॥ सतल्पात्तूर्णमुत्थाय कालोऽयमितिविह्वलः । सूतीगृहमगात्तूर्णं प्रस्खलन्मुक्तमूर्धजः ॥ ३ ॥ तमाहभ्रातरंदेवी कृपणाकरुणंसती । स्नुषेयंतवकल्याण स्त्रियंमाहन्तुमर्हसि ॥ ४ ॥ बहवोहिंसिताभ्रातः शिशवःपावको

सूतिका गृहसे बाहर निकलने की इच्छाकी इस ओर योगमाया ने जन्मरहितहोकर भी यशोदा के घर में जन्मग्रहण किया ॥ ४७ ॥ उसी माया के प्रभाव से सबद्वारपाल और पुरजन अचेतहोकर निद्राके वशहोगये । सबद्वारों के बड़े किवाड़का लोहेकी कीलोंकी स कलों द्वारा बंदहोने से खुलना अत्यन्त कठिनथा ॥ ४८ ॥ परन्तु वसुदेवजी कृष्णजीको ले ज्योंही समीप पहुँचे वैसेही सूर्योदयसे अन्धकारकी समान वहसब आपही आप खुल गये ।बादल गरज २ करबर्षनेलगे शेषनाग फणद्वारा जल निवारण करते २ वसुदेवजी के पीछे २ चले ॥ ४९ ॥ लगातार वर्षने से यमुना, गम्भीर जल राशिके वेगकीतरंगों से फेनयुक्ततथा सहस्रों भँवरोंसे परिपूर्ण होगई । परन्तुजैसे समुद्र ने रामचन्द्रजीका मार्ग दियाथावैसेही यमुना ने वसुदेवजीको मार्ग दिया ॥ ५० ॥ वसुदेवजी श्रीकृष्णजी को ले कर नन्दके ब्रजमें आये । वहां आयकर देखाकि-समस्तगोपगण एकसाथही निद्राके वशीभूत हो गये हैं । यह देख पुत्रको यशोदाकी शय्या में लिटाय और उसकी कन्याको ले फिरघरको लौटे॥ ५१ ॥ तदनन्तरदेवकी की शय्या में उस कन्या को रखकर, दोनों पैरोंमें फिर लोहे की बेड़ियें पहिलेकी समान बन्धनावस्था में होगये ॥ ५२ ॥ नन्दपत्नी यशोदा ने केवलइतनाही जानपायाथा कि कुछ उत्पन्नहुआ है ।वह श्रमित और माया के वशसे स्मृति रहित होगईथीं;अतएव जिससमय सन्तानउत्पन्नहुईथी उससमय यह निश्चयनकरसकीं किपुत्रउत्पन्नहुआ है याकन्या ॥ ५३ ॥

इतिश्रीमद्भागवतेमहापुराणेदशमस्कन्धेसरलाभाषाटीकायांतृतीयोऽध्यायः ॥ ३ ॥

श्रीशुकदेवजी बोलेकि—हे राजन् ! वसुदेवजी के लौट आनेपर बाहिरी द्वार, भीतरद्वार और नगर द्वार—सबही पहिले की समान बंद होगये।तदनंतर बालकका रोनासुन द्वारपालों ने उठकर शीघ्रता पूर्वक कंसके यहांजाय देवकी के आठवें पुत्र होनेकी वार्त्ताकही; राजा उसही के निमित्त व्याकुल होकर उसकी राह देखताथा ॥ १ ॥ २ ॥ यही मेराकाल है; ऐसा विचार विह्वलहो वह शीघ्रतासे शय्यापर से उठा तथा खुलेहुये केश, ठोकर खाता हुआ सूतिका गृहमें आया ॥ ३ ॥ उसको देखकर सती देवकी ने दुःखितहो निष्ठुर भाई से कहाकि—हे कल्याण ! यह तुम्हारी भानजी है,

पमाः। त्वयादैवनिसृष्टेन पुत्रिकैकाप्रदीयताम् ॥ ५ ॥ नन्वहंतेह्यवरजा दीनाहत-सुताप्रभो। दातुमर्हसिमन्दाया अंगेमांचरमांप्रजाम् ॥ ६ ॥ श्रीशुक उवाच। उप-गुह्यात्मजामेवंरुदत्यादीनदीनवत्। याचितस्तां विनिर्भर्त्स्यहस्तादाचिच्छिदेखलः ॥ ७ ॥ तांगृहीत्वा चरणयोर्जातमात्रां स्वसुःसुताम्। अपोथयच्छिलापृष्ठे स्वार्थो-न्मूलितसौहृदः ॥ ८ ॥ सातद्धस्तात्समुत्पत्य सद्योदेव्यम्बरंगता। अदृश्यतानुजा विष्णोः सायुधाऽष्टमहाभुजा ॥ ९ ॥ दिव्यस्रगम्बरालेपरत्नाभरणभूषिता। धनुः शूलेषुचर्मासिशंखचक्रगदाधरा ॥ १० ॥ सिद्धचारणगन्धर्वैरप्सरःकिन्नरोरगैः। उ पाहृतोरुबलिभिः स्तूयमानेदमब्रवीत् ॥ ११ ॥ किंमयाहतयामन्द जातःखलुतवा-न्तकृत्। यत्रक्वचापूर्वशत्रुर्मा हिंसीःकृपणान्वृथा ॥१२॥ इतिप्रभाष्यतंदेवी मायाभ गवतीभुवि। बहुनामनिकेतेषु बहुनामाबभूवह ॥ १३ ॥ तयाऽभिहितमाकर्ण्य कंसः परमविस्मितः। देवकींवसुदेवंच विमुच्यप्रश्रितोऽब्रवीत् ॥ १४ ॥ अहोभगिन्यहो-भाम मयावांबतपाप्मना। पुरुषादइवापत्यं बहवोहिंसिताःसुताः ॥ १५ ॥ सत्वहं त्यक्तकारुण्यस्त्यक्तज्ञातिसुहृत्खलः। काँल्लोकान्वैगमिष्यामि ब्रह्महेवमृतःश्वसन् ॥ १६ ॥ दैवमप्यनृतंवक्ति नमर्त्याएवकेवलम्। यद्विश्रम्भादहंपापः स्वसुर्निहतवा-ञ्छिशून् ॥ १७ ॥ माशोचतंमहाभागा वात्मजान्स्वकृतंभुजः। जन्तवोनसदैकत्र दैवाधीनाःतदाऽऽसते ॥ १८ ॥ भुविभौमानिभूतानि यथायान्त्यपयान्तिच। नाय

स्त्री का मारना तुम्हें उचितनहीं ॥ ४ ॥ हेभाई! कालसे प्रेरितहो अग्निकी समान तुमने मेरेकई बच्चोंको मारा है, एक सन्तानतो मुझे भिक्षा में दो ॥ ५ ॥ मैं तुम्हारी छोटी बहिनहू, दूसरे पुत्रों के मरने से मैं बड़ीही कातर होरहीहू हे प्रभो! इसअभागिनी को अन्तिमसन्तान दानकरनाउ-चित है ॥ ६ ॥ शुकदेवजी बोले कि-हेराजन्! देवकी उस कन्याको छाती से लगायकर अत्यंत कातराकी समान रोरोकर प्रार्थनाकरने लगी, तौभी दुष्टकसने उसका निरादर करके उस के हाथ से कन्या को छीनलिया ॥ ७ ॥ तथा उस तत्काल की उत्पन्नहुई बहिनकी कन्याके पैर पकड़ उसे शिलापर फेंकमारा। महाराज! ज्योंहीं दुष्टकंस ने विष्णुकी छोटी बहिनको पत्थरपर पटका ॥ ८ ॥ त्योंही वह कंसके हाथ से छूटआकाश में उडगई, और देवी रूपहा दीखने लगी। देवी के आठ भुजायेंथी-वह उनआठों भुजाओं में धनुष, शूल, बाण, तलवार, ढाल, चक्र, खड्ग और गदा धारण कियेथी देह दिव्यमाला बसन, चन्दन, और रत्नोंके आभूषणोंसे विभूषितथी ९-१० ।सिद्ध चारण, गन्धर्व, अप्सरा, किन्नर और उरगगण पूजाके पदार्थों द्वारा पूजा करके स्तुति कररहेथे देवीने कहा कि-११ ॥ रेदुष्ट! मरे मारनेसे तुझे क्या मिलेगा? तेरे पूर्वजन्मका शत्रु तेरे प्राणका लेनेवाला होकर कहीं दूसरेही स्थानमें जन्माहै अतएव दूसरे निर्दोष बालकोंको व्यर्थही मारता है ॥ १२ ॥ भगवती मायादेवी कंससे यह बात कहकरें काशी आदि नाना स्थानों में अनेक नामो से विख्यात हुई ॥ १३ ॥ कस उस मायाकी बात सुनकर विस्मित होगया, तथा देवकी और ब-सुदेवको बंधन से छोड़ नम्रभाव से कहनेलगा कि ॥ १४ ॥ हे बहिन! हे बहनोई! तुम हमारे आत्मीयहो; किंतुराक्षस जैसे बच्चोंका बधकरता है, वैसेही मुझ पापात्माने तुम्हारी कितनीही संतानों का नाशकिया है ॥ १५ ॥ मैं निर्दय, जाति और सबंधियों का त्याग करने बाला, दुष्ट, ब्रह्मघाती की सदृश जीताहुआ भी मराहुसोमैं कौनसे लोकको जाऊंगा ॥ १६ ॥ केवल मनुष्यही नहीं किन्तु देवता भी असत्य बोलते हैं। देवताओं की बातपर विश्वास करकेही मैने बहिनके लड़कोंको मारा ॥ १७ ॥ हे महाभाग! पुत्रों के निमित्त दुःख न करना, उन्हों ने अपने २ कर्म फलोंका भोग किया है समस्त प्राणी दैवकेही बशमें हैं; वे सदैव एकत्र नहीं रहसकते ॥ १८ ॥ जैसे पृथ्वीपर

मात्मातथैवतु विपर्येतियथैवभूः ॥ १९ ॥ यथाऽनेवंविदोभेदो यतआत्मविपर्ययः । देहयोगवियोगौच संसृतिर्ननिवर्तते ॥ २० ॥ तस्माद्भद्रेस्वतनयान्मया व्यापादितानपि । माऽनुशोचयतःसर्वः स्वकृतंविन्दतेऽवशः ॥२१॥ यावद्धतोस्मि हन्तास्मीत्यात्मानं मन्यतेस्वदृक् । तावत्तदभिमान्यज्ञो बाध्यबाधकतामियात् ॥ २२ ॥ क्षमध्वंममदौरात्म्यं साधवोदीनवत्सलाः ।इत्युक्त्वाऽश्रुमुखःपादौश्यालःस्वस्रोरथाग्रहीत् ॥ २३ ॥ मोचयामास निगडाद्विश्रब्धःकन्यकागिरा । देवकींवसुदेवंच दर्शयन्नात्मसौहृदम् ॥ २४ ॥ भ्रातुःसमनुतप्तस्य क्षान्तरोषाचदेवकी । व्यसृजद्वसुदेवश्च प्रहस्यतमुवाचह॥२५॥एवमेतन्महाभाग यथावदसिदेहिनाम् ।अज्ञानप्रभवाहंधीः स्वपरेतिभिदायतः ॥२६॥ शोकहर्षभयद्वेषलोभमोहमदान्विताः । मिथोघ्नन्तंनपश्यन्ति भावैर्भावंपृथग्दृशः ॥ २७ ॥ श्रीशुक उवाच । कंसएवंप्रसन्नाभ्यां विशुद्धंप्रतिभाषितः । देवकीवसुदेवाभ्यामनुज्ञातोऽविशद्गृहम् ॥ २८ ॥ तस्यांरात्र्यांव्यतीतायां कंसआहूयमन्त्रिणः । तेभ्यआचष्टतत्सर्वं यदुक्तंयोगनिद्रया ॥२९॥ आकर्ण्यभर्तुर्गदितं तमूचुर्देवशत्रवः ।देवान्प्रतिकृतामर्षा दैतयानातिकोविदाः ॥३०॥ एवंचत्तर्हिभोजेन्द्र पुरग्रामव्रजादिषु । अनिर्दशान्निर्दशांश्च हनिष्यामोऽद्यवैशिशून् ॥ ३१ ॥ किमुद्यमैःकरिष्यन्ति देवाःसमरभीरवः । नित्यमुद्विग्नमनसो ज्याघोषै

पार्थिव पदार्थ घटआदि उत्पन्न होते और टूटजाते हैं किंतु मिट्टीवनीही रहती है तैसेही देहादि भी उत्पन्न होते और नाश होते हैं- आत्मा उसही अवस्था में रहता है—देहके विकार होने से आत्मा का विकार नहीं होता । जोभली भांतिसे इसको नहीं जानता, उन्हीं की देहमें आत्म बुद्धि उत्पन्न होती रहती है, और उसही बुद्धिके कारण भेदज्ञान भी उत्पन्न होता है, उसही भेदज्ञान से पुत्रादि के देहके साथ संयोग और वियोग होता है । और उस देहके साथ संयोग वियोग होने से सुख दुःख होता रहता है, विनाज्ञान के उदय हुये संसार से निवृत्ति नहीं होती॥ १९ । २० ॥ हेभद्रे! यद्यपि मैंने तुम्हारे पुत्रोंको मारा है तथापि उनके निमित्त दुःख न करो । कोई स्वाधीन नहीं है, सभी को अपने २ कर्मों का भोगकरना पड़ता है ॥ २१ ॥ " मैंनेमारा " तथा " मुझकोमारा " ऐसा जबतक माने तबतक यह देहाभिमानी अज्ञानी मनुष्य प्रायश्चित्त का अधिकारी है ॥ २२॥ तुम दोनों जन साधु तथा बन्धुवत्सलहो, अतएव मेरी दुष्टता को क्षमाकरो । कंस यहबात कहकर नेत्रों से जल डालतेर बहिन और बहनोई के चरणों में गिरपड़ा ॥ २३ ॥ उसने मायारूपी कन्या की बातपर विश्वासकर देवकी और वसुदेव को बन्धन से छोड़ उनपर अपनी सुहृदता प्रकाशकी ॥ २४ ॥ भ्राताको संताप करते देखकर देवकी ने उसपर से क्रोध त्यागदिया । वसुदेवजी भी क्रोध छोड़कर हँसते२ कहनेलगे कि—॥ २५ ॥ प्राणियों के पक्ष में जोकुछ कहा वह निश्चयहीइसी भांति है । अहंबुद्धि अविद्याही से उत्पन्नहोती है; उसी अहंबुद्धि से यह ' मेरा' यह 'पराया ' इस भांति का ज्ञान उत्पन्न होता है॥ २६ ॥ भेददर्शी प्राणी देहके निमित्त शोक, हर्ष,भय, द्वेष, लोभ, मोह, तथा अहंकारसे परिपूर्णहो परस्परकी देह का विनाशकरते रहते हैं किंतु सर्वात्मा जगदीश्वर कि जो उनके समस्तकार्यों को देखते रहते हैं, वह उनको एकबारभी नहीं देखते ॥ २७ ॥ श्रीशुकदेवजी बोले कि वसुदेव और देवकी को प्रसन्न होकर यह कहनेपर कंस उनकी आज्ञाले अपने घर परगया ॥ २८ ॥ तदनन्तर उस रात्रिके प्रभातमें होतेही कंस ने मंत्रियों को बुलाया, तथा कन्यारूपिणी माया ने जो २ कुछ कहाथा वहसब उनसे कहसुनाया ॥ २९ ॥ देवताओंपर क्रोधकरनेवाले मूर्ख,देवशत्रु, दानवगणों ने कंस की बात सुनकर कहा कि—॥ ३० ॥ हे भोजेन्द्र ! यदि यही है तो ऐसाहोने से सबबालकों को कि जिनकी आयु दशदिनकी होगई है तथा दश दिन नहीं बीते—उन सबको पुर, नगर और व्रजआदि में जायजाकर नाश करडालें ॥ ३१ ॥ देवतातो समरमें डरपोक

धनुषस्तव ॥३२॥ अस्यतस्ते शरव्रातैर्हन्यमानाः समन्ततः । जिजीविषव उत्सृज्य प
लायनपरा ययुः ॥ ३३ ॥ केचित्प्राञ्जलयो दीना न्यस्तशस्त्रा दिवौकसः । मुक्तकच्छ
शिखाः केचिद्भीताः स्म इति वादिनः ॥ ३४ ॥ नत्वं विस्मृतशस्त्रास्त्रान्विरथान्भयसं-
वृतान् । हंस्यन्यासक्तविमुखान्भग्नचापानयुध्यतः ॥३५॥ किंक्षेमशूरैर्विबुधैरसंयु
गविकत्थनैः रहोजुषा किंहरिणा शंभुना वा वनौकसा । किमिन्द्रेणाल्पवीर्येण ब्रह्मणा
वा तपस्यता ॥ ३६ ॥ तथापि देवाः सापत्न्यान्नोपेक्ष्या इति मन्महे । ततस्तन्मूलखन-
ने नियुङ्क्ष्वास्माननुव्रतान् ॥ ३७ ॥ यथाऽऽमयोऽङ्गे समुपेक्षितो नृभिर्न शक्यते रू-
ढपदश्चिकित्सितुम् । यथेन्द्रियग्राम उपेक्षितस्तथा रिपुर्महान्बद्धबलो न चाल्यते ।
॥ ३८ मूलं हि विष्णुर्देवानां यत्र धर्मः सनातनः । तस्य च ब्रह्मगोविप्रास्तपो यज्ञाः सद
क्षिणाः ॥ ३९ ॥ तस्मात्सर्वात्मना राजन्ब्राह्मणान्ब्रह्मवादिनः ॥ तपस्विनो यज्ञशी-
लान्गाश्च हन्मो हविर्दुघाः ॥ ४० ॥ विप्रा गावश्च वेदाश्च तपः सत्यं दमः शमः । श्रद्धा
दया तितिक्षा च क्रतवश्च हरेस्तनूः ॥ ४१ ॥ स हि सर्वसुराध्यक्षो ह्यसुरद्विड्गुहाश-
यः । तन्मूला देवताः सर्वाः सेश्वराः सचतुर्मुखाः । अयं वै तद्वधोपायो यदृषीणां वि-
हिंसनम् ॥ ४२ ॥ श्रीशुक उवाच । एवं दुर्मन्त्रिभिः कंसः सह संमन्त्र्य दुर्मतिः । ब्रह्म
हिंसां हितं मेने कालपाशावृतोऽसुरः ॥ ४३ ॥ संदिश्य साधुलोकस्य कदनं कदनप्रि

ही हैं आपके धनुषशब्द से उनके चित्त सदैव व्याकुल होतेरहते हैं; अतएव वहयुद्धका उद्यम करके
क्याकरेंगे ? ॥ ३२ ॥ आप के बाणों से बींधने तथा मारने को तत्पर होने पर वह प्राणों के भयसे
चारोंओरको भागगयेथे॥३३॥किसी देवताने डरकर, अस्त्र शस्त्र छोड़, हाथजोड़आप से दया की
प्रार्थनाकीथी, कोई२ तो कांछ और शिखाको खोलकर कहतेथे–किंहम भयभीत होरहे हैं॥ ३४ ॥
आपने फिर उनको नहीं मारा क्योंकि वह अपनेर अस्त्र शस्त्र भूलगयेथे तथा विमुख होगयेथे । उन
के रथनहींथा, उनकाधनुष टूटगयाथा, युद्ध करनेकी उनका इच्छानथी॥३५॥जिस स्थानमें डरनहीं
होता देवता उसी स्थानमें वीरता को प्रकाश करते हैं । वह युद्धके अतिरिक्त और सबही स्थानों
पर अपनी वीरता की बड़ाई करने में नहीं चूकते उनका क्या भयहै?नारायण तो एकांतही में
वास करता है वह क्या करसकता है ? शिव बनवासी है उससे होही क्या सकता है ? और
ब्रह्मा तो तपस्वी है इन्द्र का पराक्रम अतिही साधारण है ॥ ३६ ॥ तब फिर उनके मध्यमें कौन
है ? देखो, प्राण पण से चेष्टा करने परभी देवता गण कुछ नहीं कर सकते, तौभी वे हमारे शत्रु
हैं–उनकी उपेक्षा करना उचित नहीं । अतएव उनके समूल नष्ट करनेके निमित्त हमको नियुक्त
करो ॥ ३७ ॥ देहसे उत्पन्न हुआ रोग रोगी से उपेक्षित होनेपर जड़ बांध कर जैसे असाध्य
होजाता है; जैसे इन्द्रियों से उपेक्षित होने पर उनका वशीभूत करना असाध्य होजाता है–तैसेही
प्रबल शत्रुके दृढ़ होनेपर उसका उखाड़ना असाध्य होजाताहै, ॥ ३८ ॥ जिस स्थानमें सनातन
धर्महै उसी स्थानमें विष्णुभी निवास करतेहैं । और विष्णुही देवताओंमें प्रधान हैं । और वेद ब्रा-
ह्मण, गौ, तपस्या, यज्ञ तथा दक्षिणा यही धर्मकी जड़हैं ॥३९॥ अतएव हेराजन् ! सब प्रयत्नों
से ब्रह्मवेत्ता तपस्वी,यज्ञशील ब्राह्मणोंको तथा घृत उत्पन्न करनेवाली सब गौओंके मारनेका आरम्भ
करो ॥ ४० ॥ देवता, तपस्या, सत्य, दम, शम, श्रद्धा, दया, क्षमा और नानाप्रकार के यज्ञ यह
सब विष्णुकी मूर्त्तिहैं॥४१॥ विष्णुही सब देवताओंका अधीश्वरहै, असुर द्वेषी तथा अन्तर्यामी विष्णु
ही महादेव और ब्रह्मा आदिसमस्त देवताओंका आदि कारणहैं; । अतएव ऋषियों का वध होने
सेही विष्णुका वध होसकताहै ॥.४२ ॥ दुष्टकंस, दुष्टमंत्रियोंके साथ परामर्शकर ब्रह्महत्या करने

यान्। कामरूपधरादिक्षु दानवा गृहमाविशत् ॥ ४४ ॥ तेवैरजःप्रकृतयस्तमसामूढचेतसः। सतां विद्वेषमाचेरुरारादागतमृत्यवः ॥४५॥ आयुःश्रियंयशोधर्मं लोकानाशिषएवच। हन्तिश्रेयांसिसर्वाणि पुंसोमहदतिक्रमः ॥ ४६ ॥

इति श्रीमद्भा०महा०दशमस्कन्धे पूर्वार्धे कंसोद्यमनिरूपणं नाम चतुर्थोऽध्यायः॥४॥

श्रीशुक उवाच ॥ नन्दस्त्वात्मजउत्पन्नेजाताह्लादोमहामनाः। आहूयविप्रान्वेदज्ञान्स्नातः शुचिरलंकृतः ॥ १ ॥ वाचयित्वास्वस्त्ययनंजातकर्मात्मजस्य वै। कारयामासविधिवत्पितृदेवार्चनंतथा ॥ २ ॥ धेनूनांनियुतेप्रादाद्विप्रेभ्यः समलंकृते। तिलाद्रीन्सप्तरत्नौघशातकौम्भाम्बरावृतान् ॥ ३ ॥ कालेनस्नानशौचाभ्यांसंस्कारैस्तपसेज्यया। शुद्ध्यन्तिदानैः सन्तुष्ट्याद्रव्याण्यात्मात्मविद्यया ॥ ४ ॥ सौमङ्गल्यगिरोविप्राः सूतमागधवन्दिनः। गायकाश्चजगुर्नेदुर्भेर्योदुन्दुभयोमुहुः ॥५॥ व्रजः सम्मृष्टसंसिक्तद्वाराजिरगृहान्तरः। चित्रध्वजपताकास्रक्चैलपल्लवतोरणैः ॥६॥ गावोवृषावत्सतराहरिद्रातैलरूषिताः। विचित्रधातुबर्हस्रग्वस्त्रकाञ्चनमालिनः॥७॥ महार्हवस्त्राभरणकञ्चुकोष्णीषभूषिताः।गोपाःसमाययू राजन्नानोपायनपाणयः॥८ गोप्यश्चाकर्ण्यमुदितायशोदायाः सुतोद्भवम्। आत्मानंभूषयाञ्चक्रुर्वस्त्राकल्पाञ्जनादिभिः॥९॥नवकुंकुमकिञ्जल्कमुखपङ्कजभूतयः।बलिभिस्त्वरितंजग्मुः पृथुश्रोण्यश्चलत्कुचाः ॥१०॥ गोप्यःसुमृष्टमणिकुण्डलनिष्ककण्ठ्यश्चित्राम्बराःपथिशिखाच्युत

कोंही श्रेष्ठजान तथा वधप्रिय कामरूपधारी दैत्योंको साधुओंके मरनेके निमित्त आज्ञादे घरमें गया ॥४३-४४॥ उन दुष्ट असुरोंके अंतःकरण तमोगुणसे ढकेहुएथे उन्होंने साधुओंसे शत्रुता करनी आरम्भकी। मृत्यु उनके निकट आगईथी ॥ ४५ ॥ हे परीक्षित्! महात्माओंके निरादरसे मनुष्योंकी आयु, लक्ष्मी, यश, धर्म, स्वर्गादि, लोक, कल्याण, और समस्त इष्ट नष्ट होजाते हैं ॥ ४६ ॥

इतिश्रीमद्भा० महा० दशम० सरलाभाषाटीकायांचतुर्थोऽध्यायः ॥ ४ ॥

श्रीशुकदेवजी बोलेकि-हे राजन्! पुत्रका उत्पन्नहोना देख, उदार मनवाले नंदजीने आनंदित हो वेद जानने वाले ब्राह्मणोंको बुलाया तथा स्नानकर पवित्रहो उन सब ब्राह्मणों द्वारा स्वस्त्ययन कराय यथा विधिसे पुत्रका जातकर्म करके पितृपूजा और देवपूजा कराई ॥ १—२ ॥ उन्होंने ब्राह्मणोंको सजीहुई दोलक्ष गौंऍ, रत्न समूह तथा सुनहरे वस्त्रों से घिरेहुये सात पर्वतों के तिल दानकिये ॥ ३ ॥ धनआदि पदार्थ जैसे काल, स्नान, शौच, संस्कार, तपस्या, यज्ञ, दान और संतुष्टि द्वारा शुद्ध होते हैं वैसेही आत्म ज्ञान द्वारा आत्मा भी शुद्ध होता रहता है ॥ ४ ॥ नंदजी के व्रजमें उस आनंदके दिन वंशका कीर्तन करनेवाले बंदी, सूत और मागधगण स्वस्तिवाचन करनेलगे, गायकोंने गाना आरंभकिया। चारों ओर से भेरी और दुदुभी बजनेलगीं ॥ ५ ॥ सम्पूर्ण व्रजकेघर विचित्र ध्वजा, पताका, माला, तोरण और बंदन वारसे सुशोभित होगये, घरोंके द्वार, आंगन, और भीतर के भाग स्वच्छहो तथा धोये जाकर अपूर्व शोभाको बढाने लगे ॥ ६ ॥ गाऐं, बैल और बछडे सभी तेल और हल्दी से रंगगये तथा उनको विचित्र धातु व मोरछल लगाई, झूलें ओढाई और सोनेकी माला पहिनाई ॥ ७ ॥ गोपगण बडे मोलके वस्त्र, आभूषण, अंगरखा और पाग पहिन कर हाथमें नाना भेंटेंले नंदजी के घरमें जानेलगे ॥ ८ ॥ यशोदा के पुत्रहुआ है यह सुनकर सब गोपियें आनंदित हुईं तथा वस्त्र, आभूषण और अंजनादि द्वारा अपनेको विभूषित करने लगीं ॥९॥ बडे बडे नितम्बों वाली तथा जिनके त्रिवली शोभायमान होरही हैं ऐसी गोपियों के कमल मुख नए केसरके चरचने से अति शोभायमान हुये। वह भेंटें आदि लेकर शीघ्रता पूर्वक नंदजी के घर में गमन करने लगीं। शीघ्रता से चलने के कारण उनके बडे २ स्तन कंपायमान होतेथे ॥१०॥

माल्यवर्षाः । नन्दालयं सवलया व्रजतीर्विरेजुर्व्यालोलकुण्डलपयोधरहारशोभाः ११ ता आशिषः प्रयुञ्जानाश्चिरं पाहीति बालके । हरिद्राचूर्णतैलाद्भिः सिञ्चन्त्योजनमुज्जगुः १२ ॥ अवाद्यन्त विचित्राणि वादित्राणि महोत्सवे । कृष्णे विश्वेश्वरेऽनन्ते नन्दस्य व्रजमागते ॥ १३ ॥ गोपाः परस्परं हृष्टा दधिक्षीरघृताम्बुभिः । आसिञ्चन्तो विलिम्पन्तो नवनीतैश्च चिक्षिपुः ॥ १४ ॥ नन्दो महामनास्तेभ्यो वासोऽलंकारगोधनम् । सूतमागधवन्दिभ्यो येऽन्ये विद्योपजीविनः ॥ १५ ॥ तैस्तैः कामैरदीनात्मा यथोचितमपूजयत् । विष्णोराराधनार्थाय स्वपुत्रस्योदयाय च ॥ १६ ॥ रोहिणी च महाभागा नन्दगोपाभिनन्दिता । व्यचरद्दिव्यवासःस्रक्कण्ठाभरणभूषिता ॥ १७ ॥ तत आरभ्य नन्दस्य व्रजः सर्वसमृद्धिमान् । हरेर्निवासात्मगुणै रमाक्रीडमभून्नृप ॥ १८ ॥ गोपान्गोकुलरक्षायां निरूप्य मथुरां गतः । नन्दः कंसस्य वार्षिक्यं करं दातुं कुरूद्वह ॥ १९ ॥ वसुदेव उपश्रुत्य भ्रातरं नन्दमागतम् । ज्ञात्वा दत्तकरं राज्ञे ययौ तदवमोचनम् ॥ २० ॥ तं दृष्ट्वा सहसोत्थाय देहः प्राणमिवागतम् । प्रीतः प्रियतमं दोर्भ्यां सस्वजे प्रेमविह्वलः २१ पूजितः सुखमासीनः पृष्ट्वाऽनामयमादृतः । प्रसक्तधीः स्वात्मजयोरिदमाह विशांपते ॥ २२ ॥ दिष्ट्या भ्रातः प्रवयस इदानीमप्रजस्य ते । प्रजाशाया निवृत्तस्य प्रजा यत्समपद्यत ॥ ॥ २३ ॥ दिष्ट्या संसारचक्रेऽस्मिन्वर्तमानः पुनर्भवः ॥ उपलब्धो भवानद्य दुर्लभ

वह सुंदर वस्त्र पहिने हुई हैं उनके कानोंमें कुण्डल प्रकाशित होरहे हैं तथा गलेमें सुंदर२ चन्द्रहार शोभायमान होरहे हैं । सोनेके अनेक आभूषणों से आभूषित होकर वह सब गोपियें जब नंदके घरको जानेलगीं तबमार्ग में उनके खुलेहुये केशों से फूल झड़ने तथा कुंडल, स्तन और हार हिलने लगे, इससे उनकी और भी शोभा बढ़गई थी ॥ ११ ॥ वह चिरंजीव कहकर बालकको आशीर्वाद दे मनुष्यों के शरीर में हलदीका चूर्ण, तैल और जल डालने और उच्चस्वर से मधुरगान करनेलगीं ॥ १२ ॥ नंदजी के घरमें श्रीकृष्णजी के उत्पन्न होने से उस महोत्सव में नाना प्रकार के बाजे बजने लगे ॥ १३ ॥ सबगोप आनद से पुलकितहो दही, दूध, घी और जल द्वारा एक दूसरेको भिगोने तथा एकदूसरेके मक्खनलगायकर एकदूसरे के ऊपर फेंकनेलगे ॥ १४ ॥ नंदजी ने उनको प्रसाद की भांति नाना प्रकार के वस्त्र, अलंकार और गौ प्रदान कीं । पौराणिक, मागध, बंदी, तथा और भी दूसरे विद्योपजीवी मनुष्य जोवहां उपस्थितथे उन्होंने जो२चाहा नंदजीने वहीरदानदकर उनका यथोचित सत्कारकिया ॥ १५—१६ ॥ महाभागा रोहिणीजीने विष्णुजीकी पूजाकर तथा अपने पुत्रके कल्याण की कामना कर सुंदर वस्त्र आभूषण पहिन भगवानका ध्यान करती हुई यथाशक्ति दानकिया । यह देखकर नंद और गोपोंका अत्यंत आनद हुआ ॥ १७ ॥ उस समय नदरायका व्रज सर्व संपत्तियुक्त विष्णुजी के निवास स्थानके कारण विशेष गुणों से विभूषितहो लक्ष्मीकी विहार भूमिहोगया ॥ १८ ॥ तदनंतर नंदराय गोपोंको गोकुलकी रक्षाके निमित्त नियुक्तकर आप कंसको वार्षिक राज करदने के निमित्त मथुरा में गये ॥ १९ ॥ वसुदेवजी उनके आनेकी वार्त्तासुन तथा 'राजाको करदेन आये हैं' यह जान उनके आश्रम में गय ॥ २० ॥ नदराय मित्रको आता देखकर अति आनंदित हुये तथा जैसे देह प्राणकोपायकर उठ बैठती है तैसेही शीघ्रता से उठ प्रीति और प्रेमसे विह्वलहो दोनो बाहों द्वारा प्यारे वसुदेवजी से मिले ॥ २१ ॥ हे राजन् ! वसुदेवजी ने पूजा पाय आसन पर बैठ श्रमको दूरकिया तथा आदर पूर्वक कुशल प्रश्न करके कहाकि ॥ २२ ॥ हे भ्राता ! तुम वृद्धहोगये थे, इस समय तक तुम्हारे पुत्र नहीं हुआ था; पुत्रकी आशा भी तुमने छोड़दीथी; अब तुम्हारे पुत्रहुआ यह परम भाग्यकी बात है ॥ २३ ॥ अच्छा हुआ कि तुम्हारा फिर पुनर्जन्म हुआ, क्योंकि तुमने संसारचक्रमें स्थित होकर अब दुर्लभ प्रिय दर्शन पुत्रप्राप्त किया है

प्रियदर्शनम् ॥ २४॥ नैकत्रप्रियसंवासः सुहृदां चित्रकर्मणाम् । ओघेनव्यूह्यमानानां प्लवानांस्रोतसोयथा ॥ २५॥ कच्चित्पशव्यंनिरुजं भूर्यम्बुतृणवीरुधम् । बृहद्वनंत-द्धुनायत्रास्ते त्वंसुहृद्वृतः॥२६॥ भ्रातर्मम सुतःकच्चिन्मात्रासह भवद्व्रजे । तातं भवन्तंमन्वानोभवद्भ्यामुपलालितः ॥ २७ ॥ पुंसस्त्रिवर्गोविहितः सुहृदोह्यनुभा वितः । नतेषुक्लिश्यमानेषुत्रिवर्गोऽर्थायकल्पते ॥ २८ ॥ नन्द उवाच ॥ अहोतेदे वकीपुत्राः कंसेनबहवोहताः । एकाऽवशिष्टाऽवरजाकन्यासाऽपिदिवंगता ॥२९॥ नूनंह्यदृष्टनिष्ठोऽयमदृष्टपरमोजनः । अदृष्टमात्मनस्तत्त्वंयोवेदनसमुह्यति ॥ ३० ॥ वसुदेव उवाच ॥ करोवैवार्षिकोदत्तोराज्ञेदृष्टावयंचवः । नेहस्थेयंबहुतिथसन्त्यु त्पाताश्चगोकुले ॥ ३१ ॥ श्रीशुक उवाच ॥ इति नन्दादयोगोपाः प्रोक्तास्तेशौरि णाययुः । अनोभिरनडुद्युक्तैस्तमनुज्ञाप्यगोकुलम् ॥ ३२ ॥

इति श्रीमद्भा०म०दशमस्कन्धे पूर्वार्धे नन्दवसुदेवसंगमो नाम पञ्चमोऽध्यायः

श्रीशुक उवाच॥नन्दः पथिवचः शौरेर्नमृषेतिविचिन्तयन् । हरिंजगामशरण मुत्पातागमशङ्कितः ॥ १ ॥ कंसेनप्रहिताघोरापूतनाबालघातिनी । शिशूंश्चचा रनिघ्नन्तीपुरग्रामव्रजादिषु ॥ २ ॥ नयत्रश्रवणादीनिरक्षोघ्नानिस्वकर्मसु । कुर्व न्तिसात्वतांभर्तुर्यातुधान्यश्चतत्रहि ॥ ३ ॥ साखेचर्येकदोपेत्यपूतनानन्दगोकुलम् ।

॥ २४ ॥ प्रत्येक प्राणियों के कर्म पृथक् २ हैं, अतएव जलके वेगसे बहते हुये तृण काष्ठादि की समान सबप्रिय जनोंका निवास एकत्र नहीं रहसकता ॥ २५ ॥ तुम बंधुजनोंसे घिरकर पशु चराने योग्य वृहत बनमें बास करतेहो उस बनमें कोई दुर्घटना तो उपस्थित नहीं हुई ? वहां बहुत सा जल, तृण, वृक्ष और लतादितो हैं ॥ २६ ॥ हमारा एक पुत्र अपनी माता समेत तुम्हारे ब्रजमें रहता है, तुम उसका पालन करते रहतेहो, वह तुम्हींको पिता कहकर जानता है, वह सुख से तो जीता है ॥ २७ ॥ पुरुष के धर्म, अर्थ, और काम जो अपने संबंधियों के उपयोगी होंतो वही सफल कहेजाते हैं और यदिवे संबंधी दुःखपावेंतो वह धर्मादिक किसी कामके नहीं ॥ २८ ॥नंद जीने कहाकि—अहो! कंसने देवकी के गर्भसे उत्पन्न हुये तुम्हारे अनेक बालकोंका नाशकिया है, अंतमें केवल एक छोटी कन्या शेषरहीथी वह भी स्वर्गको चलीगई ॥ २९ ॥ प्रारब्धहीसे मनुष्यों का शेषहोता रहता है, और प्रारब्धही मनुष्योंका सर्वस्व है। जोप्रारब्धकोही सुख दुःखका कारण जानते हैं वे कुछभी दुःखित नहीं होते ॥ ३० ॥ वसुदेवजी बोलेकि—तुमने वार्षिक करतो ददिया और हमारे साथ साक्षात् भी होगया। अब बहुत दिनों इस स्थानपर रहना उचित नहीं, क्योंकि गोकुल में अनेक उत्पात होंगे अतएव शीघ्रही जावो ॥ ३१ ॥ वसुदेवजी की इस बातको सुनकर नंदादि गोपोंने उनसे विदाले बैलोंके जुतेहुये गाड़ोंपर सवारहो गोकुलकी ओर प्रस्थान किया॥३२॥

इतिश्रीमद्भा० महा० दशम०सरलाभाषाटीकायांपंचमोऽध्यायः ॥ ५ ॥

दो० । कहब छठे अध्यायमें दुष्टनकी संहार । ताहूको निजगति दई करुणासिंधु खरार १ ॥

श्रीशुकदेवजी बोले कि—हेराजन् ! नन्दजीने जाते २ मार्गमें विचारा कि—वसुदेव मिथ्या नहीं कहेंगे तो फिर क्या यथार्थही ब्रजमें उत्पात होंगे? उत्पात होनेके भयसे भगवान्के शरणागत हुए ॥ १ ॥ और यथार्थमेंही उससमय कामचारिणी बालक घातिनी, दुष्टा पूतना—कंससे प्रेरित हो बच्चोंके मारनेके निमित्त नगर, गांव और ब्रजादिमें घूमतीथी ॥ २ ॥ नन्दजी शंका करते हुए जातेथे कि उसीसमयमें यह देववाणी हुई कि—जिसस्थान के निवासी अपने २ कार्यमें भक्तपति भगवान् के राक्षस नाशक नामोंको नहीं सुनते उसी स्थान में राक्षसों का प्रादुर्भाव होसकता है, किन्तु जिसस्थान में वह साक्षात् बास करते हैं उसस्थान में क्या शंका ! ॥ ३ ॥ हेमहाराज ! कामचारिणी आकाश गामिनी पूतना उसीसमयमें नन्द

योषित्वामायया ऽऽत्मानंप्राविशत्कामचारिणी ॥ ४ ॥ तांकेशबन्धव्यतिषक्तमल्लिकांबृहन्नितम्बस्तनकृच्छ्रमध्यमाम् । सुवाससंकम्पितकर्णभूषणत्विषोल्लसत्कुन्तलमण्डिताननाम् ॥ ५ ॥ वल्गुस्मितापाङ्गविसर्गवीक्षितैर्मनो हरन्तींवनितांव्रजौकसाम् । अमंसताम्भोजकरेणरूपिणींगोप्यः श्रियंद्रष्टुमिवागतांपतिम् ॥ ६ ॥ बालग्रहस्तत्र विचिन्वतीशिशून्यदृच्छयानन्दगृहेऽसदन्तकम् । बालंप्रतिच्छन्ननिजोरुतेजसंददर्शतल्पेऽग्निमिवाहितंभसि ॥ ७ ॥ विबुध्यतांबालकमारिकाग्रहंचराचरात्मासनिमीलितेक्षणः । अनन्तमारोपयदङ्कमन्तकंयथोरगंसुप्तमबुद्धिरज्जुधीः ॥ ८ ॥ तांतीक्ष्णचित्तामतिवामचेष्टितांवीक्ष्यान्तराकोशपरिच्छदासिवत् । वरस्त्रियंतत्प्रभयाचधर्षिते निरीक्षमाणेजननीह्यतिष्ठताम् ॥ ९ ॥ तस्मिन्स्तनंदुर्जरवीर्यमुल्बणंघोरांकमादायशिशोर्ददावथ । गाढंकराभ्यांभगवान्प्रपीड्यतत्प्राणैःसमरोषसमन्वितोऽपिबत् ॥ १० ॥ सामुञ्चमुञ्चालमितिप्रभाषिणीनिष्पीड्यमानाखिलजीवमर्मणि । विवृत्यनेत्रेचरणौभुजौमुहुःप्रस्विन्नगात्राक्षिपतीरुरोदह ॥ ११ ॥ तस्याःस्वनेनातिगभीररंहसासाद्रिर्मही द्यौश्चचचालसग्रहा । रसादिशश्चप्रतिनेदिरेजनाःपेतुःक्षितौ

गोकुल के समीप आय मायाद्वारा सुन्दर स्त्रीका वेष बनाय उसमें प्रवेश करतीहुई ॥ ४ ॥ स्त्रीके केश पाश चमेलीके फूलोंसे गुथेहुएथे।मध्यदेशके एकओर तो विशाल नितंब तथा दूसरीओर स्तनों के भारसे कमर लचक रहीथी बहुत सुन्दर वस्त्र धारण कियेथी । कानोंके आभूषणोंकी शोभा तथा प्रकाशित कुंडलोंकी कांतिद्वारा गण्डस्थल देदीप्यमान हो उठेथे ॥५॥ उसके हाथमें एक कमलथा वह स्त्री मनोहर हास्य तथा कटाक्ष युक्त देखने द्वारा ब्रजवासियोंके मनका हरण करतीथी । गोपियोंने उसको देखकर विचारा जान पडताहै कि भगवान् के श्रीकृष्ण रूपसे गोकुलमें अवतीर्ण होनेपर लक्ष्मी अपने पतिके निमित्त शरीर धारण करके आईहै । अतएव किसीने उसको कहीं भी जानेसे निषेध न किया ॥ ६ ॥ हेराजन् ! नारीरूपिणी पूतना बालकोंके ग्रह स्वरूप है । उस कामचारिणीने बालकको ढूढ़तीहुई इच्छानुसार नन्दके घरमें घूमते २ शय्याके ऊपर बालक को देखपाया । उस बालकको कि जो असाधुओं का नाश करनेवाला तथा जिसने राखसे ढकीहुई आग के समान अपने असीम तेजको गुप्त कररक्खाथा ॥ ७ ॥ उस खेचरी पूतनाने न जानपाया, अतएव उनको देखकर उसको भय न हुआ । चराचरके आत्मा हरि भगवान ने देखा कि—यह स्त्री नहींहै किंतु बालकोंका नाश करनेवाली राक्षसीहै, इसनिमित्त उसके नाश करनेकी इच्छासे उन्होंने अपने दोनों नेत्र बन्दकरलिये । जैसे कोई मनुष्य अज्ञानके वशीभूतहो रस्सी के भ्रमसे कालसर्प को गोदमें लेलवे वैसेही पूतना ने दुष्टों के नाश करनेवाले उन भगवानको गोदमें लेलिया ॥ ८ ॥ म्यानके भीतर छिपीहुई तलवारकी समान पूतना का हृदय तो अत्यन्त तीक्ष्णथा किंतु बाहिरी बर्तावसे माताके बर्तावकी समान अत्यन्त स्नेहमग्न थी । उसकी आकृति भी श्रेष्ठ स्त्रियोंकी आकृति के समान देखी जातीथी । अतएव श्रीकृष्णजीकी दोनों माता घरके बीचमें उसको देखकर केवल उसकी ओर देखतीही रहीं निवारण न करसकीं ॥ ९ ॥ अनन्तर दुष्टा पूतनाने उस स्थानसे पुत्रको गोदमेंले घोर विषयुक्त प्राणनाशक स्तन उसके मुहमें देदिया भगवान् हरि क्रोधितहो दोनों हाथों द्वारा स्तनोंको भलीभांतिसे दबाय उसके प्राण समेत पीगए ॥ ॥ १० ॥ समस्त मर्म स्थानोंमें कष्ट उपस्थित होनेपर वह राक्षसी छोड़ २ बसकर कहतीहुई चिल्लाने लगी । उसके सब शरीरमें पसीना निकलआया और आंखें फटगईं । अति दुःखसे वह बारम्बार हाथ पैर पटककर रोनेलगी ॥ ११ ॥ उसके चिल्लानेके घोरशब्दसे पर्वतों समेत पृथ्वी और ग्रहगणों समेत आकाश विचलित होगया रसातल और दिशायें प्रतिध्वनित होनेलगीं तथा

वज्रनिपातशङ्कया ॥ १२ ॥ निशाचरीत्थं व्यथितस्तनाव्यसुर्व्यादायकेशांश्चरणौभुजावपि । प्रसार्यगोष्ठेनिजरूपमास्थितावज्राहतोवृत्रइवापतन्नृप ॥ १३ ॥ पतमानोऽपितद्देहस्त्रिगव्यूत्यन्तरद्रुमान् । चूर्णयामासराजेन्द्रमहदासीत्तदद्भुतम् ॥ १४ ॥ ईषामात्रोग्रदंष्ट्रास्यं गिरिकन्दरनासिकम् । गण्डशैलस्तनंरौद्रंप्रकीर्णारुणमूर्धजम् ॥ १५ ॥ अन्धकूपगभीराक्षंपुलिनारोहभीषणम् । बद्धसेतुभुजोर्वङ्घ्रिशून्यतोयह्रदोदरम् ॥ १६ ॥ संतत्रसुःस्मतद्वीक्ष्यगोपागोप्यःकलेवरम् । पूर्वंतुतन्निःस्वनितभिन्नहृत्कर्णमस्तकाः ॥ १७ ॥ बालंचतस्याउरसिक्रीडन्तमकुतोभयम् । गोप्यस्तूर्णंसमभ्येत्यजगृहुर्जातसंभ्रमाः ॥ १८ ॥ यशोदारोहिणीभ्यांताःसमंबालस्यसर्वतः । रक्षांविदधिरेसम्यग्गोपुच्छभ्रमणादिभिः ॥ १९ ॥ गोमूत्रेणस्नापयित्वापुनर्गोरजसार्भकम् । रक्षांचक्रुश्चशकृताद्वादशाङ्गेषुनामभिः ॥ २० ॥ गोप्यःसंस्पृष्टसलिलाअङ्गेषुकरयोःपृथक् । न्यस्यात्मन्यथबालस्यबीजन्यासमकुर्वत ॥ २१ ॥ अव्यादजोऽङ्घ्रिमणिमांस्तवजान्वथोरूयज्ञोऽच्युतःकटितटंजठरंहयास्यः । हृत्केशवस्त्वदुरईशइनस्तुकण्ठंविष्णुर्भुजंमुखमुरुक्रमईश्वरःकम् ॥ २२ ॥ चक्र्यग्रतः सहगदोहरिरस्तुपश्चात्त्वत्पार्श्वयोर्धनुरसीमधुहाऽजनश्च । कोणेषुशंखउरुगायउपर्युपेन्द्रस्तार्क्ष्यःक्षितौहलधरःपुरुषःसमन्तात् ॥ २३ ॥ इन्द्रियाणिहृषीकेशःप्राणान्नारायणोऽवतु । श्वेतद्वीपपतिश्चित्तंमनोयोगेश्वरोऽवतु ॥ २४ ॥ पृश्निगर्भस्तुतेबुद्धिमात्मानंभगवा

सब अंगों ने वज्रपात होने से मनमें विचार किया कि अब पृथ्वी पर से गिरने का आरंभ होता ही है ॥ १२ ॥ हे राजन्! स्तनों में इस भांति की पीड़ा होने से राक्षसी अपना निजरूप धारण कर हत जीवाहो केश, दोनों पांव और दोनों भुजायें फैलाय, वज्रसे मारेहुये वृत्रासुर की समान व्रजमें गिरपड़ी ॥ १३ ॥ हे राजन्! उसकी देहके गिरने से छे कोस तकके वृक्ष आदिकों का चूर्ण होगया। सबही उसको देखकर अत्यत विस्मित और आश्चर्यान्वितहोगये ॥ १४ ॥ उसकी दाढें हलके फलकी समान तीक्ष्ण और नासिका के छेद पर्वतकी कंदराके समान गभीर थे तथा दोनोस्तन पहाड की चोंटीके समान बडे थे बाल लालवर्णके और बिखरे हुयेथे॥१५॥ दोनो आंखें अंधे कुएकी समान गहरी, नदीके तटके समान भयकर नितब, बंधेहुये पुलके समान दोनों भुजायें और साथलें तथा पेट सूखेहुये जलरहित तालाब की समान था ॥ १६ ॥ इस राक्षसी के भयकर शब्दसे गोप और गोपियों के हृदय, कान और मस्तक विदीर्ण होगये थे; इस समय वह उसके इस देहको देखकर अत्यत भयभीत और स्तभित होगये ॥ १७ ॥ परन्तु बालक निर्भयता से उस की छातीपर खेल करता था। सब गोपियों ने व्याकुलहो शीघ्रता पूर्वक वहांपर आय बालक को छातीसे उठालिया ॥ १८ ॥ रोहिणी और यशोदा के साथ वह सबबाला बालकके ऊपर गोपुच्छ घुमाय २ सब प्रकार से रक्षाका विधान करने लगीं ॥ १९ ॥ पहिलेतो गोमूत्र फिर गोधूलि द्वारा बालकको स्नान कराय ललाट आदि द्वादश अगों मेंकेशवादि द्वादश नाम लिखदिये ॥ २० ॥ इस के उपरांत आचमनकर पहिलेतो अपने सब अंगो में तथा दोनो हाथों में पृथक पृथक् अजादि एकादश बीजन्यासकर फिरबालक केभी अङ्गादि में उसी प्रकार से किया और कहाकि ॥२१॥अजतेरे पैरोंको; मणिमान तेरे घुटनोंकी; यज्ञतेरे साथलोंकी,अच्युतकमरकी,हयग्रीव पेटकी;केशव हृदय की; ईशवक्षःस्थलकी; सूर्यकण्ठकी; विष्णुभुजाकी; उरुक्रमसुखकी; तथाईश्वरतेरे मस्तककी; रक्षा करें ॥ २२ ॥ चक्रधारी मुरारि तेरेअग्रभाग में;गदाधारी हरि तेरे पिछलेभागमें; धनुर्धारीमधुसूदन तथाअसिधारी अज तेरी दोनों भुजाओं के पार्श्वों में; शंखधारी विष्णुसब दिशाओं में; उपेंद्रऊपरी भाग में तार्क्ष्य अधोभाग में;तथाहलधर भगवान् चारोंओर स्थितरहें ॥ २३ ॥ इस भांति बाहिरी भागकी रक्षाका विधानकर फिर भीतरी रक्षाका विधानकरनेलगीं—हृषीकेश तेरी सब इन्द्रियों की;

ष्वरः । क्रीडंतंपातुगोविंदःशयानंपातुमाधवः ॥ २५ ॥ व्रजन्तमव्याद्वैकुण्ठआसीनं त्वांश्रियःपतिः । भुञ्जानंयज्ञभुक्पातुसर्वग्रहभयंकरः ॥ २६॥ डाकिन्योयातुधान्य श्चकूष्माण्डायेऽर्भकग्रहाः । भूतप्रेतपिशाचाश्चयक्षरक्षोविनायकाः ॥ २७ ॥कोटरा रेवतीज्येष्ठापूतनामातृकादयः । उन्मादायेह्यपस्मारादेहप्राणेन्द्रियद्रुहः ॥ २८ ॥स्व प्नदृष्टामहोत्पातावृद्धाबालग्रहाश्चये । सर्वेनश्यंतुतविष्णोर्नामग्रहणभीरवः ॥ २९ ॥ श्रीशुकउवाच ॥ इतिप्रणयबद्धाभिर्गोपीभिःकृतरक्षणम् । पाययित्वास्तनंमातासंन्य वेशयदात्मजम् ॥ ३०॥ तावन्नन्दादयोगोपामथुरायाव्रजंगताः विलोक्यपूतनादेहं बभूवुरतिविस्मिताः ॥ ३१ ॥ नूनंबतर्षिःसंजातोयोगेशोवासमाससः । सएवदृष्टो ह्युत्पातोयदाहानकदुंदुभिः ॥ ३२ ॥ कलेवरंपरशुभिश्छित्त्वातत्तेव्रजौकसः । दूरे क्षिप्त्वाऽवयवशोन्यदहन्काष्ठवेष्टितम् ॥३३॥दह्यमानस्यदेहस्यधूमश्चागुरुसौरभः उत्थितःकृष्णनिर्भुक्तसपद्याहतपाप्मनः ॥ ३४ ॥ पूतनालोकबालघ्नीराक्षसीरुधि राशना । जिघांसयापिहरयेस्तनंदत्त्वाऽऽपसद्गतिम् ॥ ३५ ॥किंपुनःश्रद्धयाभक्त्या कृष्णायपरमात्मने । यच्छन्प्रियतमंकिंनुरक्तास्तन्मातरोयथा ॥ ३६ ॥ पद्भ्यांभक्त हृदिस्थाभ्यांवंद्याभ्यांलोकवन्दितैः । अंगंयस्याःसमाक्रम्यभगवानपिबत्स्तनम्॥३७ यातुधान्यपिसास्वर्गमवापजननीगतिम् । कृष्णभुक्तस्तनक्षीराःकिमुगावोनुमातरः ॥ ॥ ३८ ॥ पयांसियासामपिबत्पुत्रस्नेहस्नुतान्यलम् । भगवान्देवकीपुत्रःकैवल्याद्य खिलप्रदः॥३९॥तासामविरतंकृष्णेकुर्वतीनांसुतेक्षणम् । नपुनःकल्पतेराजन्संसारो

त्वाः शान्तिकार्हेचित् । गर्गोयदाहभगवान्वभाषितैषतत् ॥ ५७ ॥ इति नन्दाद योगोपाः कृष्णरामकथांमुदा । कुर्वन्तोरममाणाश्चनाविन्दन्भववेदनाम् ॥ ५८ ॥ एवंविहारैः कौमारैः कौमारजहतुर्व्रजे । निलायनैः सेतुबन्धैर्मर्कटोत्प्लवनादिभिः॥५९॥

इति श्रीमद्भा० महा० दशमस्कन्धे एकादशोऽध्यायः ॥११॥

श्रीशुक उवाच ॥ क्वचिद्वनाशायमनोदधद्व्रजात्प्रातः समुत्थायवयस्यवत्सपान् । प्रबोधयञ्छृङ्गरवेणचारुणाविनिर्गतोवत्सपुरः सरोहरिः ॥ १ ॥ तेनैवसाकंपृथुकाः सहस्रशः स्निग्धाः सुशिग्वेत्रविषाणवेणवः । स्वान्स्वान्सहस्रोपरिसंख्ययाऽन्वितान्वत्सान्पुरस्कृत्यविनिर्ययुर्मुदा ॥ २ ॥ कृष्णवत्सैरसंख्यातैर्यूथीकृत्यस्ववत्सकान् । चारयन्तोऽर्भलीलाभिर्विजह्रुस्तत्रतत्रह ॥ ३ ॥ फलप्रवालस्तबकसुमनः पिच्छधातुभिः । काचगुञ्जामणिस्वर्णभूषिताअप्यभूषयन् ॥ ४॥ मुष्णन्तोऽन्योन्यशिक्यादीञ्ज्ञातानाराच्चचिक्षिपुः । तत्रत्याश्चपुनर्दूराद्धसन्तश्चपुनर्ददुः ॥ ५ ॥ यदिदूरंगतः कृष्णोवनशोभेक्षणायतम् । अहंपूर्वमहंपूर्वमितिसंस्पृश्यरेमिरे॥६॥केचिद्वेणून्वादयन्तोध्मान्तः शृङ्गाणिकेचन । केचिद्भृङ्गैःप्रगायन्तःकूजन्तःकोकिलैःपरे॥७॥विच्छायाभिः प्रधावन्तोगच्छन्तःसाधुहंसकैः।बकैरुपविशन्तश्चनृत्यन्तश्चकलापिभिः ॥८॥ विकर्षन्तः कीशबालानारोहन्तश्चतैर्द्रुमान् । विकुर्वन्तश्चतैः साकंप्लवन्तश्चपलाशिषु॥९॥ साकंभेकैर्विलंघंतः सरित्प्रस्रवसंप्लुताः । विहसन्तः प्रतिच्छायाः श

॥ ५६ ॥ अहो ! वदवेत्ताओं का वाक्य कभी मिथ्यानहीं होता; महर्षि गर्ग जोकुछ कहगये हैं—ठीक वैसाही होताहै॥५७॥नन्द आदि गोपगण इसप्रकार से आनन्द प्रकाशकर, रामकृष्णकेचरित्रकहते हुए समय बितानेलगे संसार के कष्ट उनको दुःख न दसके ॥ ५८ ॥ इस प्रकार छिपना पुलिन बांधना वानरकी समान कूदना इत्यादि कुमारअवस्था के खेलों से इन दोनों भाइयों ने कुमार अवस्था बिताई ॥ ५९ ॥

इतिश्री मद्भागवतेमहापुराणेदशमस्कंधेसरलाभाषाटीकायांएकादशोऽध्यायः ॥ ११ ॥

श्रीशुकदेवजी बोले कि—हेराजा ! एकदिन श्रीकृष्णजी वनमें भोजन करनेकी इच्छाकर प्रातःकालही उठे तथा गोपालकोंके लडकोंको जगाय सुन्दर शृगध्वनि करते २ बछडों को आगेकर ब्रजसे बाहरहुये ॥ १ ॥ सहस्र सहस्र स्नेहयुक्त बालक सुंदर छींके, लकडी; सींग और वेणु हाथोंमें ले अपने २ सहस्रों बछडोंको आगेकर ब्रजसे निकले ॥ २ ॥ सबने श्रीकृष्णजीके असंख्य बछडों के साथ अपनें बछडों का यूथ बांधलिया तथा चराते २ उन्हीं वनोंमें बालक्रीडा करके खेलने लगे ॥ ३ ॥ वह काच, मोती मणि और सोनेसे सजे हुयेथे तौ भी वनसे फूल; फल कोमल गुच्छा मोर पिच्छ और धातुओंसे अपनेको अलंकृत करनेलगे ॥ ४ ॥ एक दूसरे के छींके आदि चुराने लगे और जैसेही उनमेंसे कोई पदार्थ निकलते तैसेही दूर फेंकदेनेलगे फिर जो बालक उस स्थान पर खडे होते वे उस पदार्थको लाकर देनेलगे ॥ ५ ॥ कृष्णजी वनकी शोभा देखनेको दूर चले जाते तो वह सब मैं आगे मैं आगे ऐसा कहकर उनको छूछूकर खेलनेलगे ॥ ६ ॥ कोई २ बंशी बजानेलगा कोई २ सींग कोई भौरोंके साथ गाने और कोई कोयलके साथ टहूका देनलगा ७ ॥ कोई २ उड़तेहुए पक्षियोंकी छायाके साथ दौडनेलगा; कोई हसोंके साथ अच्छीतरहसे चलनेलगा कोई २ बकपांतिके साथ बैठगए किसी २ ने मोरोंके साथ नाचना आरम्भ किया ॥ ८ ॥ कोई २ बालक वृक्षकी शाखापर चढेहुये बन्दरोंके बच्चोंकी पूछ पकड़कर खैंचनेलगे किसी किसीने उनके साथही पेड़पर चढ़कर एक डालसे दूसरी डालपर फांदना आरम्भ किया ॥ ९ ॥ कोई २ उनके साथ दांत आदि दिखा मुह टेढा करनेलगे कोई मेढ़कोंके साथ बोलते कोई २ नदीमें नहाने कोई

पन्तश्च प्रतिस्वनान् ॥ १० ॥ इत्थं सतां ब्रह्मसुखानुभूत्या दास्यं गतानां परदैवतेन । मायाश्रितानां नरदारकेण साकं विजह्रुः कृतपुण्यपुञ्जाः ॥ ११ ॥ यत्पादपांसुर्बहुजन्मकृच्छ्रतो धृतात्मभिर्योगिभिरप्यगम्यः । स एव यद्दृग्विषयः स्वयं स्थितः किं वर्ण्यते दिष्टमतो व्रजौकसाम् ॥ १२ ॥ अथाघनामाऽभ्यपतन्महासुरस्तेषां सुखक्रीडनवीक्षणाक्षमः । नित्यं यदन्तर्निजजीवितेप्सुभिः पीतामृतैरप्यमरैः प्रतीक्ष्यते ॥ १३ ॥ दृष्ट्वाऽर्भकान्कृष्णमुखानघासुरः कंसानुशिष्टः स बकीबकानुजः । अयं तु मे सोदरनाशकृत्तयोर्द्वयोर्ममैनं सबलं हनिष्ये ॥ १४ ॥ एते यदा मत्सुहृदोस्तिलापः कृतास्तदा नष्टसमा व्रजौकसः । प्राणे गते वर्ष्मसु का ऽनु चिन्ता प्रजासवः प्राणभृतो हि ये ते ॥ १५ ॥ इति व्यवस्याजगरं बृहद्वपुः स योजनायाममहाद्रिपीवरम् । धृत्वाऽद्भुतं व्यात्तगुहाननं तदा पथि व्यशेत ग्रसनाशया खलः ॥ १६ ॥ धराधरोष्ठो जलदोत्तरोष्ठो दर्याननान्तो गिरिशृङ्गदंष्ट्रः । ध्वान्तान्तरास्यो वितताध्वजिह्वः परुषानिलश्वासदवेक्षणोष्णः ॥ १७ ॥ दृष्ट्वा तं तादृशं सर्वे मत्वा वृन्दावनश्रियम् । व्यात्ताजगरतुण्डेन ह्युत्प्रेक्षन्ते स्म लीलया ॥ १८ ॥ अहो मित्राणि गदत सत्त्वकूटं पुरः स्थितम् । अस्मत्संग्रसनव्यात्तव्यालतुण्डायते न वा ॥ १९ ॥ सत्यमर्ककरारक्तमुत्तराहनुवद्घनम् । अधराहनुवद्रोधस्तत्प्रति

कोई अपनी छायाको देखकर हसने और प्रतिध्वनिको सुनकर गाली देनेलगे ॥ १० ॥ हे राजन् ! जो भगवान् हरि विद्वानोंके ब्रह्म सुख और अनुभव रूपहैं भक्तोंके परमदैवत रूप हैं और मायासे मोहित मनुष्योंके नर बालकरूपहैं उन्हीं भगवान् हरिके साथ वे गोप बालक इसभांति विहारकरने लगे निश्चयही उन्होंने पुण्योंके समूहका सञ्चयकियाहै॥ ११॥जितेंद्रिय योगीगण बहुतजन्म कष्टकरके भी जिनकी चरणरजको नहीं पासकते वे भगवान् जिनके दृष्टिगोचर होकर निवास करते हैं उन व्रजवासियों के सौभाग्य को और क्याकहूं ? ॥१२॥हेराजन् ! तदनन्तर बालकोंकी ऐसे सुखकी क्रीडा करतेहुए देख उसकासहन न कर उसीसमय अघ नामक एकभयकर असुर उसीस्थानपर आ पहुचा अघासुर बडाही प्रचण्ड राक्षसथा । देवतागण अमृत पानकर अमर होकरभी अपने२ प्राणोंके बचानेकी इच्छासे निरंतरही अघका छिद्र ढूढाकरतेथे ॥ १३ ॥ वह अघासुर पूतना और बकका छोटा भाईथा । कंसका पठायाहुआ आकर कृष्ण आदि बालकोंको देखकर विचारने लगा कि" इसी बालकने मेरे भाई और बहिनका नाश कियाहै अतएव आजमैं दल समेत इसकोमारूंगा ॥ १४ ॥ ये सब जब मेरे सुहोदरोंके तिलांजलि रूप होजायगे । तब सब व्रजवासीही नाश होजायेंगे । क्योंकि यह उनके प्राण स्वरूपहैं प्राण बाहर होनेसे देह फिर किसकाम की रहसकतीहैं ॥ ॥ १५ ॥ दुष्ट असुरने इसभांति निश्चयकर एक योजन लम्बा पर्वतके समान मोटा बड़े अजगरका रूप धारणकिया तथा गुफाकी समान मुखको फैलाय निगललेनेकी इच्छासे मार्गमें सोरहा १६ ॥ उसका नीचेका ओष्ठ पृथ्वीको और ऊपरका ओष्ट बादलोंका स्पर्श करताथा दोनों गलफेर दोदरों की समान फटेहुयेथे एक २ दांत पहाड़की चोटीके सदृश देख पड़ताथा । मुखका भीतरी भाग घोर अधकारकी समान जिह्वा मार्गकी समान विस्तारित श्वास प्रचण्ड वायुके समान और दोनों आंखें दावाग्निकी समान प्रज्वलित प्रतीत होतीथीं ॥ १७ ॥ उसको देखकर बालकोंको वृन्दावन की सम्पत्तिका भ्रमहुआ सब बालक खेलते २ उस अजगरके फैलाहुये मुंहकी अपेक्षा (निरादर) करके कहनेलगे कि— ॥ १८ ॥ हेवयस्यगण ! देखो हमारे सामने यह कुछ प्राणीके आकारका देख पडताहै यह हमारे निगलनेके निमित्त सर्पकासा मुख फैलायेहै कि नहीं ? सो कहो ॥ १९ ॥ यह देखो सूर्यकी किरणोंके स्पर्शसे लाल बादल उसके ऊपरके ओष्ठकी समान तथा उस बादल

च्छाययारुणम् ॥ २० ॥ प्रतिस्पर्धेतेसृक्किभ्यांसव्यासव्येनगोद्‌रे । तुङ्गशृङ्गालयो प्येतास्तद्दंष्ट्राभिश्चपश्यत ॥ २१ ॥ आस्तृतायाममार्गोऽयंरसनांप्रतिगर्जति । एषा मन्तर्गतध्वान्तमेतदप्यन्तराननम् ॥ २२ ॥ दावोष्णखरवातोयंश्वासवद्भातिपश्यत । तद्दग्धसत्त्वदुर्गन्धोऽप्यन्तरामिषगन्धवत् ॥ २३ ॥ अस्मान्किमत्रग्रसिता निविष्टा नयंतथाचेद्बकवद्विनङ्क्ष्यति । क्षणादनेनेतिबकार्युशन्मुखंवीक्ष्योद्धसन्तः करताड नैर्ययुः ॥ २४ ॥ इत्थंमिथोऽतथ्यमतज्ज्ञभाषितंश्रुत्वाविचिन्त्येत्यमृषामृषायते । र क्षोविदित्वाखिलभूतहृत्स्थितः स्वानांनिरोद्धुंभगवान्मनोदधे ॥ २५ ॥ तावत्प्रविष्टा स्त्वसुरोदरान्तरंपरंनगीर्णाः शिशवः सवत्साः । प्रतीक्षमाणेनबकारिवेशनहतस्व कान्तस्मरणेन रक्षसा ॥२६॥ तान्वीक्ष्यकृष्णःसकलाभयप्रदो ह्यनन्यनाथान्स्वकरा दवच्युतान् । दीनांश्चमृत्योर्जठराग्निघासान्घृणार्दितो दिष्टकृतेनविस्मितः ॥२७॥ कृत्यंकिमत्रास्यखलस्यजीवनं नवाअमीषांचसतांविहिंसनम् । द्वयंकथंस्यादिति सं विचिन्त्य तज्ज्ञात्वाऽविशत्तुण्डमशेषदृग्घरिः ॥ २८ ॥ तदाघनच्छदादेवा भयाद्धा हेतिचुक्रुशुः । जहृषुर्येचकंसाद्याः कौणपास्त्वघबान्धवाः ॥ २९ ॥ तच्छ्रुत्वा भगवा न्कृष्णस्त्वव्ययः सार्भवत्सकम् । चूर्णीचिकीर्षोरात्मानं तरसाववृधेगले ॥ ३० ॥त तोऽतिकायस्यनिरुद्धमार्गिणो ह्युद्गीर्णदृष्टेर्भ्रमतस्त्वितस्ततः । पूर्णोऽन्तरङ्गेपवनो

की छायासे लालहुई पृथ्वी उसके निचले होंठकी समान होरहीहै ॥ २० ॥ बांयें और दक्षिण दो पहाड़की कन्दरायें गलफरेकी समान देखपड़तीहैं और यह सब पहाड़की चोटियें उसकी डाढ़ोंकी समान प्रतीत होतीहैं ॥ २१ ॥ यह विशाल मार्ग जीभके समान और यह सब पहाड़की चोटियों के भीतरका अंधेरा उसके मुखके भीतरी भागकी सदृश जान पड़ताहै ॥ २२ ॥ दावाग्निसे तपी हुई अति उष्ण वायु उसके श्वासकी सदृश ज्ञातहोतीहै तथा दावाग्निसे जलेहुये प्राणियोंकी दुर्गंध सर्पकी देहके भीतरी मांसकी गन्धके समान प्रतीत होतीहै, ॥ २३ ॥ यह क्या हमको निगल जायगा ? हमारा नाशतो कभी न होगा । यदि यह सर्पहीहै तो ऐसा होनसे बकासुरकी समान कृष्णके हाथसे अभी अभी माराजावेगा । यह कहकर बालकगण बकारि भगवान् श्रीकृष्णजीके सुन्दर मुखको देखते २ हँसतेहुए ताली बजाय अघासुरके उदरमें प्रवेश करगये ॥ २४ ॥ बालक गणोंने अनजान होकर यह बातें कहीं श्रीकृष्णजी यह सुनकर चिंता करने लगे कि—यह यथार्थ में सर्प सर्पदेहधारी असुरहै परन्तु हमारे मित्रोंको यह असत्य जानपड़ताहै,, सब प्राणियोंके अंत- र्यामी भगवान्ने यह यथार्थ निश्चयकर उनके निवारण करनेकी इच्छाकी ॥ २५ ॥ इतनेमेंही सब बालक अपने २ बछड़ोंको ले असुरके पेटमें प्रवेश करगये, परन्तु राक्षसने अपना मुंह बन्द न किया, क्योंकि वह अपने आत्मीयजनोंका स्मरणकर श्रीकृष्ण भगवान् के प्रवेश करनेकी राह देखरहाथा॥२६॥सबके अभयदाता श्रीकृष्णजी उन दीनबालकोंको अपनसे बिछुड़ाहुआ तथा मृत्यु की जठराग्निमें भस्म होताहुआ देख इसको दैवी घटनाजान अत्यन्त विस्मितहुये॥२७॥अनन्तर उन्होंने विचारा कि-यहांपर क्या करना चाहिये? कि जिससे यह दुष्ट असुरभी मरे और बालकों के प्राणभी न नाश होवें । अनन्तर शोच विचारकर समदर्शी भगवान् सर्पके मुंहमें प्रवेश करगये ॥२८॥देवतागण जो आकाशमें स्थितथे वह भगवान्को अघासुरके मुंहमें प्रवेश करतेदेख अत्यन्त चीत्कार और विलाप करनेलगे और अघासुरके बांधव कंस आदि राक्षसों के आनन्द की सीमा न रही॥२९॥अव्यय भगवान् श्रीकृष्णजीने उनका हाहाकारसुन, उससर्पके गलदेशमें बालक और बछड़ों समेत अपनेदेहको बढ़ाया । इससे असुरका गलाघुटकर उसके दोनोंनेत्र निकलपड़े ॥३०॥ वह व्याकुलहोकर इधरउधर चक्कर खाने लगा । थोड़ीही देर में वायु उसकी देहमें रुकजानेसे भर

निरुद्धो मूर्द्धन्विनिष्पाट्यविनिर्गतोबहिः ॥३१॥ तेनैवसर्वेषुबहिर्गतेषुप्राणेषु वत्सान्सुहृदःपरेतान्। दृष्ट्यास्वयोत्थाप्य तदन्वितः पुनर्वक्त्रान्मुकुन्दो भगवान्विनिर्ययौ ॥ ३२ ॥ पीनाहिभोगोत्थितमद्भुतं महज्ज्योतिःस्वधाम्ना ज्वलयद्दिशोदश। प्रतीक्ष्य खेऽवस्थितमीशनिर्गमं विवेशतस्मिन्मिषतां दिवौकसाम् ॥ ३३ ॥ ततोऽतिहृष्टाः स्वकृतोऽकृतार्हणं पुष्पैःसुराअप्सरसश्च नर्तनैः। गीतैःसुगावाद्यधराश्चवाद्यकैः स्तवैश्च विप्राजयनिःस्वनैर्गणाः ॥ ३४ ॥ तदद्भुतस्तोत्रसुवाद्यगीतिकाजयादिनैकोत्सवमंगलस्वनान्। श्रुत्वास्वधाम्नोऽन्त्यज आगतोऽचिराद्दृष्ट्वा महीशस्य जगाम विस्मयम् ॥ ३५ ॥ राजन्नाजगरंचर्म शुष्कं वृन्दावनेऽद्भुतम् ॥ व्रजौकसांबहुतिथं च भूवाक्रीडगह्वरम् ॥ ३६ ॥ एतत्कौमारजंकर्म हरेरात्माहिमोक्षणम्। मृत्योःपौगण्डकेबाला दृष्ट्वोचुर्विस्मिताव्रजे ॥ ३७ ॥ नैतद्विचित्रंमनुजार्भमायिनः परावराणांपरमस्यवेधसः। अघोऽपियत्स्पर्शनधौतपातकः प्रापात्मसाम्यंत्वसतांसुदुर्लभम् ।३८। सकृद्यदंगप्रतिमान्तराहिता मनोमयीभागवतीं ददौगतिम्। सएव नित्यात्मसुखानुभूत्यभिव्युदस्तमायोऽन्तर्गतो हिकिंपुनः ॥ ३९ ॥ सूतउवाच। इत्थंद्विजायादवदेवदत्तः श्रुत्वास्वरातुश्चरितंविचित्रम्॥ प्रपच्छभूयोऽपितदेवपुण्यं वैयासकिंयन्निगृहीतचेताः॥४०॥राजोवाच। ब्रह्मन्कालान्तरकृतं तत्कालीनंकथंभवेत्। यत्कौ

गई और ब्रह्मरन्ध्र फोड़कर बाहर निकली ॥ ३१ ॥ उस वायु के साथही सब इंद्रियां बाहर निकल पड़ीं, तब श्रीकृष्णजी, अमृत बरसाय मरेहुए बछड़ों और अपने साथियों को फिर से जिलाय उन के साथ बाहर निकले ॥ ३२॥ उस सर्प के स्थूलदेहवाली शुद्ध,सत्वमय,अद्भुत,महत् ज्योति अपने तेज से दशों दिशाओं को प्रकाशित करती हुई, भगवान् के निकलने की राहदेखतीहुई आकाश में रुकीथी–, श्रीकृष्णजी के बाहर निकलतेही–वह ज्योति देवताओं के सामने श्रीकृष्णजी में प्रवेश करगई ॥ ३३ ॥ तदनन्तर देवतागण फूल बरसाने, अप्सरायें नाचने, गन्धर्वगण गाने, औरविद्याधर गण बाजे बजाने लगे। ब्राह्मणगण स्तुति और चारणगण जयध्वनि से अपने कार्यसाधक श्रीकृष्णजी की पूजा में प्रवृत्तहुए। नानाप्रकार की उत्सवयुक्त अद्भुत स्तुतियें, सुन्दरबाजे, गानेऔर जयआदि के मङ्गलकारी शब्द सुनकर पितामह ब्रह्माजी शीघ्र वहां पर आय भगवान् की महिमा को देख विस्मित होगये ॥ ३५ ॥ हेराजन्! वृन्दावन में अजगर का अद्भुत चमड़ा सूखकर बहुत दिनोंतक ब्रजवासियों के खेलन की गुफाहुआथा ॥ ३६ ॥ हरि ने पांचवर्ष की वय में अघासुर रूपी मृत्युके हाथ से सबका बचायाथा, परन्तु जिन ब्रजबालकों ने वह कर्म देखाथा, उन्होंने भगवान् का छठवर्ष की आयु में ब्रज में कहाथा कि–" आजही यह घटनाहुई है' ॥ ३७॥ असाधु मनुष्य किसी भांति से भी भगवान् के रूप को नहीं पासकता किंतु अघासुर केवल भगवान् के अंग स्पर्श सेही सब पापोंस छूट उनकी समान रूप को प्राप्तहुआ;माया से मनुष्य बालक रूप,श्रेष्ठ नीच सब पदार्थों में उत्तम भगवान् के ऐसे कार्यों में कुछ आश्चर्य नहीं है- ॥३८॥ जिनकीकेवल श्रीमूर्ति की मनोहर आभा ने हृदय में बलपूर्वक प्रतिष्ठितहो प्रह्लादादि परमभक्तों को भागवती गतिदीथी, उन्हीं नित्य, आत्मसुख के अनुभव से माया के निवासकर्ता भगवान् ने स्वयंही उस असुरके भीतर प्रवेश कियाथा तब क्या वह मुक्त न होते ? ॥ ३९ ॥ सूतजी ने कहा कि—हे द्विजो! यदुकुल देवता से पालेहुए राजा परीक्षित ने श्रीकृष्णजी के ऐसे२विचित्र चरित्र सुन श्रीशुकदेवजी से इस पवित्र चरित्र कहने का प्रश्न किया; भगवद्चरित्रों को सुनकर उनकामन भगवान् के वशीभूत होगयाथा ॥ ४० ॥ राजा ने कहा कि–हेमुने! जो कार्य पाहिले किया है वह

मारेहरिकृतंजगुः पौगण्डकेऽर्भकाः ॥४१॥ तद्ब्रूहिमेमहायोगिन्परं कौतूहलंगुरो। नूनमेतद्धरेरेव मायाभवतिनान्यथा ॥ ४२ ॥ वयंधन्यतमालोके गुरोऽपिक्षत्रबन्धवः प्रपिबामोमुहुस्त्वत्तः पुण्यंकृष्णकथामृतम् ॥ ४३ ॥ सूतउवाच ॥ इत्थंस्मपृष्टःसतु बादरायणिस्तत्स्मारितानन्तहृताखिलेन्द्रियः। कृच्छ्रात्पुनर्लब्धबहिर्दृशिः शनैः प्रत्याह तं भागवतोत्तमोत्तमम् ॥ ४४ ॥

इति श्रीमद्भा० महा० दशमस्कंधे द्वादशोऽध्यायः ॥ १२ ॥

श्रीशुक उवाच ॥ साधुपृष्टंमहाभाग त्वयाभागवतोत्तम ॥ यन्नूतनयसीशस्य शृण्वन्नपिकथांमुहुः ॥१॥ सतामयंसारभृतां निसर्गो यदर्थवाणीश्रुतिचेतसामपि। प्रतिक्षणंनव्यवदच्युतस्य यत्स्त्रियाविटानामिवसाधुवार्ता ॥२॥ शृणुष्वावहितोराजन्नपि गुह्यंवदामिते। ब्रूयुःस्निग्धस्यशिष्यस्य गुरवोगुह्यमप्युत ॥ ३ ॥ तथाऽघवदनान्मृत्योरक्षित्वा वत्सपालकान्। सरित्पुलिनमानीय भगवानिदमब्रवीत् ॥ ४ ॥ अहोऽतिरम्यंपुलिनंवयस्याःस्वकेलिसंपन्मृदुलाच्छबालुकम् ॥ स्फुटत्सरोगन्धहृतालिपत्रिकध्वनिप्रतिध्वानलसद्द्रुमाकुलम् ॥ ५ ॥ अत्र भोक्तव्यमस्माभिर्दिवारूढं क्षुधार्दिताः। वत्साःसमीपेऽपःपीत्वा चरन्तुशनकैस्तृणम् ॥ ६ ॥ तथेतिपाययित्वाऽर्भा वत्सानारुध्य शाद्वले ॥ मुक्त्वाशिक्यानिबुभुजुः समंभगवतामुदा ॥७॥

वर्तमान का कैसे होसकता है? भगवान् ने जो काम पांचवर्ष की आयु में कियाथा बालकों ने उस कर्म को छहवर्ष की आयु में क्यों तत्कालका हुआकहा ? ॥ ४१ ॥ हे महायोगिन् आप इसप्रश्न का उत्तरदो। हे गुरो! मुझे अत्यन्त कुतूहल उत्पन्न हुआ है, निश्चयही यह भगवान् की माया है ॥ ४२ ॥ मैं नीचक्षत्री जाति तोहूं परन्तु संसार में सर्वापेक्षा धन्यहूं क्योंकि आपके मुख से पवित्र कृष्ण-कथामृत—का पान करताहूं ॥ ४३ ॥ सूतजी ने कहा कि—हे भागवतश्रेष्ठ शौनक ! इस प्रकार राजा परीक्षितके प्रश्न करने पर भगवान् का स्मरणआतेही पहिले तो शुकदेवजी की सब इंद्रियां भगवान् में लीन होगईं, तौभी उन्हों ने कष्टपूर्वक फिर बाहिरी दृष्टि प्राप्त करके धीरे २ उनको उत्तरदेना आरम्भ किया ॥ ४४ ॥

इतिश्रीमद्भा०महा०दशम०सरलाभाषाटीकायांद्वादशोऽध्याय ॥ १२ ॥

शुकदेवजीने कहा कि—हेमहाभाग! भागवत श्रेष्ठ! तुमने अतिउत्तम विषयको पूछाहै। तुम ईश्वरकी कथामृत का बारम्बार पान करके प्रश्नों द्वारा उसको नई करतेहो ॥ १ ॥ सारग्राही महात्माओंकी वाणी कान और चित्त यह सब परमेश्वरही की कथामेंलगे रहतेहैं तौभी जैसे स्त्री लंपट मनुष्यों का स्वभाव स्त्रियोंकी वार्त्ताको क्षण २ में नवीन करताहै तैसेही महात्माओंका भी स्वभाव भगवान्की वार्त्ताको क्षण २ में नवीन करताहै, ॥ २ ॥ हेराजन्! एकाग्र चित्त होकर सुनो अति गूढ रहस्य तुमसे कहताहूं, गुरुगण प्रिय शिष्यको गुप्त विषयकाभी उपदेश करते हैं। ॥३॥ श्रीकृष्णजी अघके मुखरूपी मृत्युसे गोपबालकोंकी रक्षा करने के उपरांत सबको यमुनातट पर लायकर कहनेलगे कि—४ ॥ अहो, वयस्यगण! यह रेती अति रमणीयहै हमारे खेलने की सब सामग्रियें यहांपर प्रस्तुतहैं, यहांकी बालू अति कोमलहै खिलेहुये कमलोंकी गन्धसे खिंचकर भौंरे आदि जलमें होतेहुये शब्द कररहेहैं, रेतीके ऊपर शब्दों की प्रतिध्वनिसे शोभायमान वृक्ष चारोंओर व्याप्त होरहेहैं ॥ ५ ॥ आओ! हम सब इसीस्थानपर भोजन करें समय व्यतीत जाने से भूख के मारे दुःखित होरहेहैं। बछड़े भी पानी पीकर समीपही धीरे २ घास चराकरेंगे ६ बालकोंने 'अच्छा, कहकर बछड़ोंको जलपिलाय हरीघासके जंगलमें छोड़दिया, तथा सब अपने २

कृष्णस्य विष्वक्पुरुराजिमण्डलैरभ्याननाः फुल्लदृशोव्रजार्भकाः । सहोपविष्टा विपिने विरेजुश्छदा यथाम्भोरुहकर्णिकायाः ॥ ८ ॥ केचित्पुष्पैर्दलैः केचित्पल्लवैरंकुरैः फलैः । शिग्भिस्त्वग्भिर्दृषद्भिश्च बुभुजुः कृतभाजनाः ॥ ९ ॥ सर्वेमिथोदर्शयन्तः स्वस्वभोज्यरुचिंपृथक् । हसन्तो हासयन्तश्चाभ्यवजह्रुः सहेश्वराः ॥ १० ॥ बिभ्रद्वेणुं जठरपटयोः शृंगवेत्रेच कक्षेवामे पाणौमसृणकवलं तत्फलान्यंगुलीषु ॥ तिष्ठन्मध्ये स्वपरिसुहृदोहासयन्नर्मभिः स्वैः स्वर्गेलोके मिषति बुभुजेयज्ञभुग्बालकेलिः ॥ ११ ॥ भारतैवंवत्सपेषु भुंजानेष्वच्युतात्मसु । वत्सास्त्वन्तर्वने दूरं विविशुस्तृणलोभिताः ॥ १२ ॥ तान्दृष्ट्वाभयसंत्रस्तानूचे कृष्णोऽस्य भीभयम् । मित्राण्याशान्माविरमतेहानेष्ये वत्सकानहम् ॥ १३ ॥ इत्युक्त्वाऽद्रिदरीकुञ्जगह्वरेष्वात्मवत्सकान् । विचिन्वन्भगवान्कृष्णः सपाणिकवलोययौ ॥ १४ ॥ अम्भोजन्मजनिस्तदन्तरगतो मायाभैकस्येशितुर्द्रष्टुंमञ्जु महित्वमन्यदपितद्वत्सानितो वत्सपान् । नीत्वाऽन्यत्र कुरूद्वहान्तरदधात्खेऽवस्थितोयःपुरादृष्ट्वाऽघासुरमोक्षणम् प्रभवतःप्राप्तः परंविस्मयम् ॥ १५ ॥ ततोवत्सानदृष्ट्वैत्यपुलिनेऽपिच वत्सपान् । उभावपिवनेकृष्णो विचिकाय समन्ततः ॥ १६ ॥ क्वाप्यदृष्ट्वाऽन्तर्विपिने वत्सान्पालांश्चविश्ववित् । सर्वं विधिकृतंकृष्णः सहसाऽवजगामह ॥ १७ ॥ ततःकृष्णोमुदंकर्तुं तन्मातॄणांचकस्यच

छींकोंको निकाल आनन्द सहित भगवान् के साथ भोजन करनेलगे ॥ ७ ॥ प्रफुल्लित नेत्रवाले ब्रजबालक वन में श्रीकृष्णजी के चारोंओर मंडल बनाय उन के सन्मुख मुख करके बैठ गये वह बालक कमलकर्णिकाके पत्तों की सदृश शोभा पाने लगे ॥ ८ ॥ किसी २ ने फूल किसी २ ने पत्ते, किसी २ ने अंकुर, किसी २ ने फल, किसी २ ने कोंपल, किसी २ ने छींके, किसी २ ने छाल, किसी २ ने पत्थरों के बासन बनायकर भोजनकरना आरम्भ किया ॥ ९ ॥ सब अपने २ पृथक् २भोजन के पदार्थों का स्वाद दिखाते,हँसते हँसातेहुएभगवान के साथ भोजन करनेलगे ॥१०॥ श्रीकृष्ण भगवान् भी यज्ञभोजी होकर बालकों की समान केलि करनेलगे तथा पेट में बँधेहुए वस्त्र के बीचमें बेणु, बाईं कांख में सींग, बाएं हाथ में बेंत, सबअंगुलियों में खाने योग्य नानाप्रकारके फल तथा दहिने हाथ में दहीभातकाग्रासले,मध्यभागमेंकर्णिका की समान स्थित,अपने हँसी के वचनों से अपने चारों ओर बैठेहुए बन्धुओंको हँसाते भोजन करने लगे ॥ ११ ॥ स्वर्गवासी और मृत्युबासी सबही इस कार्य को देखकर आश्चर्य करने लगे, वत्सपालक ब्रजबालक भगवान के साथ एकात्माहो इस भांति भोजन करतेथे कि-इतने में बछड़े घास के लोभ से चरतेहुए वन में बहुत दूर तक चलेगये ॥ १२ ॥ इस से बालकों को भयहुआ; श्रीकृष्णजी जगत् के भयके भी भय देनेवाले हैं । उन्हों नें मित्रों० को व्याकुल देखकर कहा कि-' भोजन को मतछोड़ो, मैं तुम्हारे सबके बछड़ोंको लिये आताहू ॥ १३ ॥ यह कहकर वह हाथमें खाने का ग्रासले पहाड़, गुफा, कुंज,और घने जंगलों में साथियों के बछड़ों को ढूंढते २ फिरनेलगे पद्मयोनि ब्रह्माजी आकाश में स्थितहोकर कृष्णजी के, अघासुरसे बालकों के बचने आदि के चरित्र देखकर अत्यन्त विस्मितहुए । माया बालकरूपी भगवानकी दूसरी महिमा को देखने की इच्छा से यहां से बालकों और बछड़ों को हर दूसरे स्थान में लेजाय अन्तर्ध्यान होगये ॥ १५ ॥ अनन्तर श्रीकृष्णजी वहां बछड़ों को कहीं न देखपाये फिर रेती में लौट आये । उस स्थान में भी बालकों को न देखवह उनको खोजने लगे ॥ १६ ॥ किंतु कहीं भी बछड़े और बालकों को न देख सहसा जानलिया कि-यह करतूत ब्रह्माहीकी है ॥ १७ ॥ तब भगवान श्रीकृष्णजीने बालकों

उभयायितमात्मानं चक्रे विश्वकृदीश्वरः ॥ १८ ॥ यावद्वत्सपवत्सकाल्पकवपुर्याव-त्कराङ्घ्र्यादिकं यावद्यष्टिविषाणवेणुदलशिग्यावद्विभूषाम्बरम् । यावच्छीलगुणाभिधाकृतिवयो यावद्विहारादिकं सर्वं विष्णुमयं गिरोऽङ्गवदजः सर्वस्वरूपो बभौ ॥१९॥ स्वयमात्माऽऽत्मगोवत्सान्प्रतिवार्यात्मवत्सपैः । क्रीडन्नात्मविहारैश्च सर्वात्मा प्राविशद्व्रजम् ॥२०॥ तत्तद्वत्सान्पृथङ्नीत्वा तत्तद्गोष्ठे निवेश्य सः । तत्तदात्माऽभवद्राजंस्तत्तत्सद्म प्रविष्टवान् ॥२१॥ तन्मातरो वेणुरवत्वरोत्थिता उत्थाप्य दोर्भिः परिरभ्य निर्भरम् ॥ स्नेहस्नुतस्तन्यपयःसुधासवं मत्वा परं ब्रह्म सुतानपाययन् ॥ २२ ॥ ततो नृपोन्मर्दनमज्जलेपनालङ्काररक्षातिलकाशनादिभिः । संलालितः स्वाचरितैः प्रहर्षयन्सायं गतो यामयमेन माधवः ॥२३॥ गावस्ततो गोष्ठमुपेत्य सत्वरं हुङ्कारघोषैः परिहूतसङ्गतान् । स्वकान्स्वकान्वत्सतरानपाययन्मुहुर्लिहन्त्यः स्रवदौधसं पयः । ॥ २४ ॥ गोगोपीनां मातृताऽस्मिन्सर्वा स्नेहर्द्धिकां विना । पुरोवदास्वपि हरेस्तोकता मायया विना ॥ २५ ॥ व्रजौकसां स्वतोकेषु स्नेहवल्ल्याब्दमन्वहम् । शनैर्निःसीम ववृधे यथा कृष्णे त्वपूर्ववत् ॥ २६ ॥ इत्थमात्माऽऽत्मनाऽऽत्मानं वत्सपालमिषेण सः।

की माताओं तथा ब्रह्मा को संतोष उत्पन्नकरने के निमित्त, विश्वकर्ता ने स्वयंही बछड़ों औरबाल-कों की मूर्ति धारणकी । उनके ऐसा करने का यह अभिप्रायथा कि—यदि बछड़ों को लाये देता हू तो ऐसा होन से ब्रह्मा का मोहनहोगा तथा यदिस्वयंही बालकनहीं बनता तो उनकी मातायें शोकितहोगी । इसही कारण हरि ने दोनों रूप धारण किये ॥ १८ ॥ जितने बालक और बछड़े जैसा उनकाछोटाशरीर, जैसे जिसके हाथ पाव; जैसी जिसकी लाठी, सींग, वेणु और छींके, जिस के जिस प्रकार के वस्त्र आभूषण, जिसका जैसा शील, गुण नाम आकृति और वय, तथा जिसके जैसे आहार विहारादिथे, भगवान् ने उसहीप्रकार सबप्रकार से प्रकाशितहो " सर्व जगत विष्णुमय इस वाक्यको सार्थक किया, ॥ १९ ॥ भगवान्ने आपही इसरूपसे सर्वात्माहो ब्रजमें प्रवेशकिया । वह स्वयंही हांकनेवालेहो आत्मस्वरूप बछड़ोंको हांकते हांकते आपही खेलते खिलाते चले ॥ २० ॥ हेराजन् ! वह ब्रजमें प्रवेशकर विशेष २ बछड़ों को पृथक् २ गोष्ठमेंकर विशेष २ बालकोंके घरों गये, ॥ २१ ॥ बालकोंकी मातायेंभी वेणु का शब्द सुन शीघ्रता पूर्वक उठीं तथा अपना २ पुत्र जान भगवान् को दोनों भुजाओंसे भलाभांति आलिंगन कर उठालिया और स्नेह वशहो टपकतेहुये स्तनोंका दूध जो अमृतके सदृश सुस्वादु और आसव की समान मादकथा पिलाया ॥ २२ ॥ हेराजन् ! श्रीकृष्णजी बालकोंके समयानुसार खेलते, तथा उन्हींके अनुसार सायंकालको घरमें आय सुन्दर आचरणों द्वारा माताओंका आन-न्दित करते वह उनका मर्दन (उबटन लगाना) स्नान, चन्दन आदि लगाने वस्त्र आभूषण प-हिनाने तथा तिलक लगाने व भोजन कराने आदिसे और उनकी रक्षाका विधानकर लालन पालन करनेलगीं ॥ २३ ॥ तदनन्तर गायेंभी शीघ्रतासे गोष्ठमें आय हुंकारकर अपने बछड़ोंको चाटने और टपकतेहुये दूधका पान करानेलगीं ॥ २४ ॥ पहिले भी श्रीकृष्णजी पर गायों और गोपियों का मातृभावथा, परन्तु इससमय स्नेह अधिक बढ़गया, तथा इनमें भगवान्की बाल भावना तो पूर्ववत रही परन्तु यह मेरी माताहै और मैं इसका पुत्रहू ऐसा मोह न रहा ॥ २५ ॥ पहिले श्री कृष्णजी पर ब्रजवासियोंका जैसा अधिक स्नेहथा तैसा स्नेह इससमय एक बरषतक अपने पुत्रों में बढ़ा श्रीकृष्णजी इसभांतिसे वत्सपालहो बछड़े और उनके पालकगणोंका रूप धारणकर अपने आपको पालन करते २ बन और गोष्ठमें क्रीडाकरने लगे ॥ २६ ॥ इसप्रकार श्रीकृष्णचन्द्रने वत्स

पालयन्वत्सपोवर्षं चिक्रीडेवनगोष्ठयोः ॥ २७ ॥ एकदाचारयन्वत्सान्सरामोवनमा
विशत्। पञ्चषासुत्रियामासुहायनापूरणीष्वजः ॥ २८ ॥ ततोऽविदूराच्चरतोगावो
वत्सानुपव्रजम्। गोवर्धनाद्रिशिरसिचरन्त्योददृशुस्तृणम् ॥ २९ ॥ दृष्ट्वाऽथत
त्स्नेहवशोऽस्मृतात्मासगोव्रजोऽत्यात्मपदुर्गमार्गः। द्विपात्ककुद्ग्रीवउदास्यपुच्छो
ऽगाद्धुंकृतैरास्रुपयाजवेन ॥ ३० ॥ समेत्यगावोऽधोवत्सान्वत्सवत्योऽप्यपाययन्।
गिलन्त्यइवचाङ्गानिलिहन्त्यः स्वौधसंपयः ॥ ३१ ॥ गोपास्तद्रोधनायासमौघ्यल
ज्जोरुमन्युना। दुर्गाध्वकृच्छ्रतोऽभ्येत्यगोवत्सैर्ददृशुः सुतान् ॥ ३२ ॥ तदीक्षणोत्प्रे
मरसाप्लुताशयाजातानुरागागतमन्यवोऽर्भकान्। उदुह्यदोर्भिः परिरभ्यमूर्धनिघ्रा
णैरवापुः परमांमुदंते ॥ ३३ ॥ ततः प्रवयसोगोपास्तोकाश्लेषसुनिर्वृताः। कृच्छ्रा
च्छनैरपगतास्तदनुस्मृत्युदश्रवः ॥ ३४ ॥ व्रजस्यरामः प्रेमर्धेर्वीक्ष्यौत्कण्ठ्यमनुक्ष
णम्। मुक्तस्तनेष्वपत्येष्वप्यहेतुविदचिन्तयत् ॥ ३५ ॥ किमेतदद्भुतमिववासुदेवेऽ
खिलात्मनि। व्रजस्यसात्मनस्तोकेष्वपूर्वंप्रेमवर्धते ॥ ३६ ॥ केयंवाकुतआयातादैवी
वानार्युतासुरी। प्रायोमायाऽस्तुमेभर्तुर्नान्यामेऽपिविमोहिनी ॥ ३७ ॥ इति संचि
न्त्यदाशार्होवत्सान्सवयसानपि। सर्वानाचष्टवैकुण्ठंचक्षुषावयुनेनसः ॥ ३८ ॥ नै
तेसुरेशाऋषयोनचैतेत्वमेवभासीशभिदाश्रयेऽपि। सर्वंपृथक्त्वंनिगमात्कथंवद

पालक होकर वत्स और बालकोंके बहानेसे अपनेही रूपको आपही पालन करते एकवर्ष पर्यंत और व्रजमें क्रीडाकी ॥ २७ ॥ हेराजन्! एकवर्ष पूर्ण होनेमें पांच व छहदिन शेष रहेथे कि उस समय कृष्णजी रामके साथ बछड़े चराते २ वनमें गये, ॥ २८ ॥ बहुत दूर गोवर्द्धन पहाड़ की चोटियोंपर सब गायें चररहीथीं। उन्होंने उस स्थानसे देखपाया कि व्रजके निकट सर्व बछडे चरतेहैं ॥ २९ ॥ यह देखकर अपनेको भी भूलगई। इसप्रकार समस्त गौएँ स्नेहसे खिंचकर हुंकार छोड़तीहुई रक्षकोंके लौटानेपर भी न लौटीं, तथा विषम मार्गसे कूदती फांदतीं शीघ्रतापूर्वक व्रजके निकट पहुंचीं। उनके शीघ्रतापूर्वक दौडनेसे जान पड़ताथा कि यह दोही पांवोंसे दौड़ती हैं सबही अपनी गर्दन लाठपर लगाय पूछको ऊंची उठाय दौड़ आई। गौओंका दूध चारोंओरको झररहाथा ॥ ३० ॥ यद्यपि उनके दूसरे बारभी बछड़े उत्पन्न होगयेथे तौभी गोवर्द्धनके नीचे बछड़ों से मिल, ग्रास करनेकी समान उनके अंग और अपने, दूधसे झरतेहुए स्तनों को पिर्‍ लगीं॥ ३१॥ सबगोपों ने उनगायोंके रोकनका प्रयत्न किया परन्तु न रोकसके, इससे लज्जित और क्रोधित हुए। दुर्गम मार्गोंमें चलनेसे वह अत्यन्त श्रमितहोगये, इससमय बछड़ोंके साथअपने२पुत्रोंको देखकर उनको प्रेमरस उत्पन्नहोआया ॥३२॥ इससे उनकागन भरआया और अनुराग उत्पन्नहोने से क्रोध दूरहोगया उन्होंने बालकोंको गोदमेंले दोनों हाथोंसे आलिंगन किया और उनके मस्तक सूंघ परमानन्दका अनुभवकरने लगे॥३३॥वृद्धगोपों ने बालकों से मिलकर अत्यन्त संतोष प्राप्तकिया; यद्यपि उन्होंने अतिकष्ट से धीरे २ आलिंगन त्याग किया परन्तु बालकों के स्मरण से उनके नेत्रों में जल भरआया ॥ ३४ ॥ जिन बच्चों ने स्तनपान करना छोड़ दिया है उनके ऊपरभी व्रजवासियों का प्रेम बढते देखकर बलरामजी इसकारण स्थिर न करसके। इसकारण वह अत्यन्त चिंता करने लगे ॥ ३५ ॥ कि-यह क्या आश्चर्य है। पहिले कृष्णपर व्रजवासियों की जैसी प्रीतिथी इस समय अपने २ पुत्रों पर वैसी प्रीति क्यों बढ़ी है ? ॥ ३६ ॥ मेरामनभी उनके स्नेह से क्यों स्नेहार्द्र होता है ? यह क्या माया है ? यह मायाकहांसे आई ? यह क्या दैवी, मानुषी वा आसुरी माया है ? निश्चयजानपड़ता है कि यह मेरेही प्रभुकी माया है; क्योंकि यहमाया मुझेभी मोहित करती है- ॥ ३७ ॥ बलरामजी ने ऐसी चिंताकरके ज्ञानमय नेत्र खोलकर देखा कि—सबबछड़े और बालक श्रीकृष्णही स्वरूप हैं ॥ ३८ ॥ तदुपरांत श्रीकृष्णजी से पूछा कि—हेतातकृष्ण ! मैं

स्युक्तेनवृत्तं प्रभुणा बलोऽवैत् ॥ ३९ ॥ तावदेत्यात्मभूरात्ममानेन त्रुट्यनेहसा । पुरो वदब्दं क्रीडन्तं ददृशे सकलं हरिम् ॥ ४० ॥ यावन्तो गोकुले बालाः सवत्साः सर्व एव हि । मायाशये शयाना मे नाद्यापि पुनरुत्थिताः ॥ ४१ ॥ इत एतेऽत्र कुत्रत्या मन्मायामोहितेतरे । तावन्त एव तत्राब्दं क्रीडन्तो विष्णुना समम् ॥ ४२ ॥ एवमेतेषु भेदेषु चिरं ध्यात्वा स आत्मभूः । सत्याः के कतरे नेति ज्ञातुं नेष्टे कथंचन ॥ ४३ ॥ एवं संमोहयन्विष्णुं विमोहं विश्वमोहनम् । स्वयैव माययाऽजोऽपि स्वयमेव विमोहितः ॥ ४४ ॥ तम्यां तमोवन्नैहारं खद्योतार्चिरिवाहनि । महतीतरमायैश्यं निहन्त्यात्मनि युंजतः ॥ ४५ ॥ तावत्सर्वे वत्सपालाः पश्यतोऽजस्य तत्क्षणात् । व्यदृश्यन्त घनश्यामाः पीतकौशेयवाससः ॥ ४६ ॥ चतुर्भुजाः शंखचक्रगदाराजीवपाणयः ॥ किरीटिनः कुण्डलिनो हारिणो वनमालिनः ॥ ४७ ॥ श्रीवत्सांगददोरत्नकम्बुकङ्कणपाणयः । नूपुरैः कटकैर्भाताः कटिसूत्राङ्गुलीयकैः ॥ ४८ ॥ आंघ्रिमस्तकमापूर्णास्तुलसीनवदामभिः । कोमलैः सर्वगात्रेषु भूरिपुण्यवदर्पितैः ॥ ४९ ॥ चन्द्रिकाविशदस्मेरैः सारुणापांगवीक्षितैः । स्वकार्थानामिव रजःसत्त्वाभ्यां स्रष्टृपालकाः ॥ ५० ॥ आत्मादिस्तम्बपर्यन्तैर्मूर्तिमद्भिश्चराचरैः । नृत्यगीताद्यनेकार्हैः पृथक्पृथगुपासिताः ॥ ५१ ॥ अणिमाद्य-

पहिले से जानताहूं कि-यहसबबछड़े ऋषिगणतथा यह सब बत्सपाल देवताओं के अंश हैं; किंतु इस समय अब वह रूप नहीं देखता। इस समय देखताहूं कि इन सब में पृथक २ आपही वर्तमान हो, इसका क्याकारण है आप कहिये। बलदेवजी के इस भांति पूछनेपर श्रीकृष्णजी ने सबकथा बलदेवजी से कही॥३९॥हेमहीपते! इसप्रकारसे श्रीकृष्णजी उन मायारचित बालकों और बछड़ों के साथ क्रीडाकरनलगे। धीरे२ एकबरस बीतगया। हेराजन्! वह ब्रह्माका एक त्रुटि काल है। ब्रह्माजीने भी उस त्रुटिकालके बीतनेपर आकरदेखा कि कृष्णजी पहिलेकासमान अपनेसाथियों के साथ क्रीडाकररहे हैं॥ ४०॥ ब्रह्माजी कृष्णजीका प्रेम समेत क्रीडाकरते देख मन २ में तर्क वितर्क करनेलगे कि-गोकुलमें जितने बालक और बछड़े थे सबही मेरीमाया मय शय्यामें सोते हैं, अबतक वह नहीं उठे,॥४१॥तब फिर वही सब इसस्थानपर कहांसे आये? जानपड़ताहै कि उन सबने एकवर्षतक कृष्णजीके साथ ऐसेही क्रीडा की है॥४२॥बड़े देरतक भी इसप्रकारसे विचारकरने पर ब्रह्माजीको सत्यासत्यका ज्ञान न हुआ॥४३॥ब्रह्माजी इसभांतिसे मोहरहित विश्वमोहन विष्णुजी को मोहनेगये थे परन्तु वहां स्वयंही अपनीही मायासे मोहितहोगये ॥ ४४ ॥ जैसे कुहरेसे उत्पन्न हुआ अन्धकार अँधेरी रातमें पृथक् २ आवरण नहीं करसकता, रातही के अन्धकारमें लीनहोजाताहै, तथा जैसे जुगनू दिनमें स्वयं पृथक प्रकाश नहीं करसकता तैसेही जो मनुष्य बड़े मनुष्यों पर मायाका प्रयोग करता है तो उसकी नीचमाया उसहीकी सामर्थ्य नाश करती रहती है ४५॥ हे महाराज! इसके अतिरिक्त और एक आश्चर्य जनक घटना सुनो कि ब्रह्माजी यह सबघटना देख रहेथे इतनेहीमें सहसा उन्होंने देखा कि—क्या बालक, क्या, बछड़े, क्या छड़ी सींग आदि सबही मेघकी समान श्यामवर्ण के हैं, सबही पीताम्बर धारण कियेहुए॥४६॥सबही चतुर्भुज,सबही के हाथमें शंख,चक्र,गदा,पद्म,सबही के मस्तकमें किरीट,सबहीके कानोंमें कुंडल सबहीके गलोंमेंहार बनमाला शोभायमान हैं ॥ ४७ ॥ सबहीकी भुजाओंमें श्रीवत्स की प्रभासे प्रकाशित बाजूबंद सबही के हाथ में रत्नों के बनेहुए शंखकी समान कंकण, तथा सबही नूपुर, मेखला, कटक, और मुँदरी धारण कियेहुए शोभायमान हैं॥४८॥ पुण्यवान मनुष्योंने जो कोमल नवीन तुलसीदल अर्पण किये हैं उससे शिरसे पावतक परिपूर्ण होरहे हैं॥ ४९ ॥ चन्द्रिकाकी समान निर्मल मन्द मुसकानोंसे अपने भक्तोंकी कामनाओंका मानो सत्वगुणसे पालनकरते और अरुणवर्णकी कटाक्ष दृष्टिद्वारा रजोगुणसे सृजतेहुए ज्ञातहोते हैं ॥ ५० ॥ ब्रह्मासे लेकर तृणतक समस्त चराचर जीव

महिमभिरजाद्याभिर्विभूतिभिः । चतुर्विंशतिभिस्तत्त्वैः परीतामहदादिभिः ॥५२॥ कालस्वभाव संस्कारकामकर्मगुणादिभिः । स्वमहिध्वस्तमहिभिर्मूर्तिमद्भिरुपासिताः ॥ ५३ ॥ सत्यज्ञानानन्तानन्दमात्रैकरसमूर्तयः । अस्पृष्टभूरिमाहात्म्या अपि ह्युपनिषद्दृशाम् ॥ ५४ ॥ एवं सकृद्ददर्शाजः परब्रह्मात्मनोऽखिलान् ॥ यस्य भासा सर्वमिदं विभाति सचराचरम् ॥५५॥ ततोऽतिकुतुकोद्वृत्तस्तिमितैकादशेन्द्रियः । तद्धाम्नाऽभूदजस्तूष्णीं पूर्देव्यन्तीव पुत्रिका ॥ ५६ ॥ इतीरेशेऽतर्क्ये निजमहिमनि स्वप्रमितिके परत्राजातोऽतन्निरसनमुखब्रह्मकमितौ । अनीशेऽपि द्रष्टुं किमिदमिति वा मुह्यति सति चच्छादाजो ज्ञात्वा सपदि परमोऽजाजवनिकाम् ॥ ५७॥ ततोऽर्वाक्प्रतिलब्धाक्षः कः परेतवदुत्थितः । कृच्छ्रादुन्मील्य वै दृष्टीराचष्टेदं सहात्मना ॥ ५८ ॥ सपद्येवाभितः पश्यन्दिशोऽपश्यत्पुरः स्थितम् । वृन्दावनं जनाजीव्यद्रुमाकीर्णं समाप्रियम् ॥ ५९ ॥ यत्र नैसर्गदुर्वैराः सहासन्नृमृगादयः । मित्राणीवाजितावासद्रुतरुट्तर्षकादिकम् ॥६०॥ तत्रोद्वहत्पशुपवंशशिशुत्वनाट्यं ब्रह्माद्वयं परमनन्तमगाधबोधम् । वत्सान्सखीनिवपुरः परितो विचिन्वदेकंसपाणिकवलं परमेष्ठ्यचष्ट ॥ ॥६१॥ दृष्ट्वात्वरेणनिजधोरणतोऽवतीर्यपृथ्व्यांवपुः कनकदण्डमिवाभिपात्य । स्पृष्ट्वाचतुर्मुकुटकोटिभिरङ्घ्रियुग्मंनत्वा मुदश्रुसुजलैरकृताभिषेकम् ॥ ६२ ॥ उत्थायो

मूर्तिमानहो नृत्य गीतादि नाना पूजाके साधनों द्वारा सबही पृथक २ उपासना करते हैं ॥ ५१ ॥ सबही अणिमादि महिमा माया आदि शक्ति और चौबीस तत्वोंद्वारा व्याप्त होरहे हैं ॥ ५२ ॥ काल, स्वभाव, संस्कार, काम, कर्म और गुणादिक पदार्थ मूर्तिमानहो प्रत्येककी सेवा करते हैं, इन सबकी स्वाधीनता परब्रह्मके सामनेनष्ट होगई है ॥ ५३ ॥ सबही सत्य, ज्ञानानन्दरूप, अनंत मूर्ति, भेदरहित, तथा सर्वदा एकरूप हैं अतएव आत्मज्ञानही जिसके नेत्रहैं ऐसे महात्माभी उनके माहात्म्यका स्पर्श नहीं करसकते ॥ ५४ ॥ हे राजन्! जिन परब्रह्मकी ज्योतिसे यह चराचर विश्व प्रकाशित होताहै, ब्रह्माजीने इसभांतिसे एक समयमेंही उन सबको परब्रह्ममय देखा ॥५५॥ ब्रह्माजी यह देखकर कौतुकसे विस्मितहोगये उनमूर्त्तियों के तेजसे उनकी इन्द्रियें जड़ होगई, और वह कठपुतली की समान खड़े रहगये कि जिससे यह जानपड़ा कि ब्रजके अधिष्ठाता देवता के समीप एक सोने की चौमुखी प्रतिमा विराजमान है ॥ ५६ ॥ जो ब्रह्मा वाणी के अधीश्वर, अतर्क असाधारण महिमा युक्त, स्वप्रकाश, सुख स्वरूप जन्मरहित और प्रकृति से परे तथा ब्रह्मसे भिन्न जो स्वयंही प्रकाशित हैं वह ब्रह्मा "यह क्या,, ऐसे कहकर अचेत होगए, और दर्शन करनेकी शक्ति न रही । श्रीकृष्णजी ने यह जानकर अपनी अद्भुत माया को खींचलिया ॥ ५७ ॥ अनन्तर ब्रह्माजीको बहिर्दृष्टि प्राप्तहुई । मराहुआ मनुष्य जैसे कुछ एक उठताहै तैसे उन्होंने बड़े कष्टसे उठकर आंखें खोल अपने साथ इसजगतको देखा यह देखकर चारोंओरको दृष्टि डालनेलगे।इतनमें प्राणियोंको आहार देनेवाले नानावृक्षों से युक्त चारोंओर से इच्छित पदार्थोंसे परिपूर्ण वृन्दावन उन्होंने देखा ॥ ५९ ॥ जिनका स्वभावसेही बैरभावहै यह सब प्राणी वृन्दावनमें मित्रभावसे एकत्र वास करतेथे । और श्रीकृष्णजी के वास करनेसे क्रोध लोभ आदि वहांसे दूर होगयेथे ॥ ६० ॥ ब्रह्माजीने देखा कि—उस वृन्दावनमें अद्वय पर अनंत अगाध बोध एक ब्रह्म बालक भावका नाटक करतेहुए श्रीकृष्णजी हाथमें खानेकी सामग्रीका कवलले पहिलेकी समान इधर उधर घूमकर बछड़ों और बालकोंको ढूंढरहे हैं ॥ ६१ ॥ यह देखकर ब्रह्माजी अपने वाहन परसे उतरे, और पृथ्वीपर सोनेके दण्डकी समान गिरकर चारों मुकुटों के अग्रभागसे दोनों चरणोंको प्रणामकर आनन्दाश्रुरूप सुन्दर जलसे उन्हें भिगानेलगे ॥ ६२ ॥ श्री

त्थायकृष्णस्य चिरस्यपादयोःपतन् । आस्तेमहित्वंप्रागदृष्टं स्मृत्वास्मृत्वापुनःपुनः ॥ ॥ ६३ ॥ शनैरथोत्थायविमृज्यलोचने मुकुन्दमुद्वीक्ष्यविनम्रकन्धरः ॥ कृताञ्जलिः प्रश्रयवान्समाहितः सवेपथुर्गद्गदयैलतेलया ॥ ६४ ॥

इति श्रीमद्भा० महा० दशमस्कंधे त्रयोदशोऽध्यायः ॥ १३ ॥

ब्रह्मोवाच ॥ नौमीड्यतेऽभ्रवपुषेतडिदम्बरायगुञ्जावतंसपरिपिच्छलसन्मुखाय । वन्यस्रजेकवलवेत्रविषाणवेणुलक्ष्मश्रियेमृदुपदेपशुपाङ्गजाय ॥ १ ॥ अस्यापि देववपुषोमदनुग्रहस्यस्वेच्छामयस्यनतुभूतमयस्यकोऽपि । नेशेमहित्ववसितुंमनसान्तरेणसाक्षात्तवैवकिमुतात्मसुखानुभूतेः ॥ २ ॥ ज्ञानेप्रयासमुदपास्यनमन्तएव जीवन्तिसन्मुखरितांभवदीयवार्ताम् । स्थानेस्थिताः श्रुतिगतांतनुवाङ्मनोभिर्येप्रायशोऽजितजितोऽप्यसितैस्त्रिलोक्याम् ॥ ३ ॥ श्रेयः सृतिंभक्तिमुदस्यतेविभोक्लिश्यन्तियेकेवलबोधलब्धये । तेषामसौक्लेशलएवशिष्यतेनान्यद्यथास्थूलतुषावघातिनाम् ॥ ४ ॥ पुरेहभूमन्बहवोऽपियोगिनस्त्वदर्पितेहानिजकर्मलब्धया । विबुध्य भक्त्यैवकथोपनीतयाप्रपेदिरेऽञ्जोऽच्युतेतेगतिंपराम् ॥ ५ ॥ तथापिभूमन्महिमाऽगुणस्यतेविबोद्धुमर्हत्यमलान्तरात्मभिः । अविक्रियात्स्वानुभवादरूपतोह्यनन्यबो

कृष्णजीका पहिली देखीहुई महिमा जितनी बार याद आनेलगी उतनीही बार उठ २ कर चरणों में गिरने लगे ॥ ६३ ॥ इसप्रकार ब्रह्माने बहुत देरतक यह कार्यकिया । तदुपरांत धीरे २ उठकर दोनों आंखें पोंछ तथा श्रीकृष्णजीको देख माथा नीचाकर, हाथजोड़ विनीत भावसे एकाग्रचित्तहो कांपतेहुये शरीरसे गद्गद् वाक्यों द्वारा स्तुति करनेलगे ॥ ६४ ॥

इतिश्रीमद्भा० महा०दशम० सरलाभाषाटीकायांत्रयोदशोऽध्याय: ॥ १३ ॥

ब्रह्माजीने कहाकि—हेस्तुति करने के योग्य ! मैं आपकी प्रसन्नताके निमित्त आपहीकी स्तुति करता हू । आपके नवीन बादलकी सदृश श्यामशरीर मे बिजली की समान पीताम्बर शोभायमान होरहा है, गुञ्जाकेबनेहुये कानों के आभूषण तथा मोरपंखों से आपके मुख मण्डलकी कांति बढ़रही है । गल में वनमाला शोभित है । खानेकी सामग्री के कवल, छडी, सींग और वंशी इन सबचिन्हों से आपकी अपूर्व शोभाहोरही है । हेनन्दनन्दन ! आपके दोनों चरण अत्यन्त कोमल हैं ॥ १ ॥ हेदेव ! आपकी यह देहभक्तों को अतिप्यारी है इस देहसे मेरे ऊपरभी कृपाप्रकाशित होती है, यह आपकी मूर्त्तिशुद्ध सत्त्वगुण से उत्पन्न हुई पचभूतोंसे बनीहुई नहींहै अतएव दमन कियेहुये मन द्वारा भी कोई इस स्वरूप के माहात्म्य को नहीं जानसकता हेप्रभो ! जब इस गुणमय रूपकाही महिमा नहीं जानीजाती तब आपके साक्षात् आत्म सुखानुभव स्वरूपकी महिमाको कौन जानसकताहै? हेहरि! यद्यपि आपकी महिमा जानने योग्य नहींहै तोभी इस ससारके बंधनसे छूटनेकी असंभावना नहीं देखीजाती क्योंकि जो ज्ञान लाभके निमित्त थोडासा भी परिश्रम करके अपने स्थानपर स्थितहो महात्माओंके कहेहुए कानमें गये आपके चरित्र सुनकर वाक्य और मन द्वारा उसका आदर करतेहुये केवल जीवन धारण करतेहैं हेअजित ! त्रिलोकीमें वही आपको जीतसकतेहैं उनके पक्षमें आप दुर्लभ नहींहो । जो थोडेसे अन्नको छोड़कर बहुतसा भूसा कूटताहै उसको जैसे कोई फल नहीं प्राप्तहोता, उसीभांति आपकी कल्याणकारी भक्तिको छोड़ जो केवल ज्ञानही प्राप्त करनेका यत्न करतेहैं उनको क्लेशही प्राप्त होताहै । हेअपरिच्छन्न ! हेअच्युत ! इस पृथ्वीमें पहिले बहुतसोंने योगी होकरभी ज्ञान न प्राप्त करसकनेपर आपकी चेष्टाका ध्यान करते हुये अपने २ कर्मोंको अर्पणकर आपकी कथाका निरंतर श्रवणकिया उससे आपपर जो उनकी भक्ति उत्पन्न हुई उस भक्ति योगसेही उन्होंने आत्माको जानकर आपके श्रेष्ठपदको प्राप्त किया अतएव भक्ति द्वाराही ज्ञान उत्पन्न होता रहताहै॥२–५॥ हेभूमन् ! क्या सगुण क्या निर्गुण तुम

स्यात्मतयानचान्यथा ॥ ६ ॥ गुणात्मनस्तेऽपिगुणान्विमातुंहितावतीर्णस्यकईशिरेऽस्य । कालेनयैर्वाविमिताःसुकल्पैर्भूपांसवः खेमिहिकाद्युभासः॥ ७ ॥ तत्तेऽनुकम्पांसुसमीक्षमाणोभुञ्जानएवात्मकृतंविपाकम् । हृद्वाग्वपुर्भिर्विदधन्नमस्तेजीवेतयोमुक्तिपदेसदायभाक् ॥ ८ ॥ पश्येशमेऽनार्यमनन्तआद्येपरात्मनित्वय्यपिमायिमायिनि । मायांवितत्येक्षितुमात्मवैभवं ह्यहंकियानैच्छमिवार्चिरग्नौ ॥ ९ ॥ अतःक्षमस्वाच्युतमेरजोभुवोह्यजानतस्त्वत्पृथगीशमानिनः । अजावलेपान्धतमोऽन्धचक्षुषएषोऽनुकम्प्योमयिनाथवानिति ॥ १० ॥ क्वाहंतमोमहदहंखचराग्निवार्भूसंवेष्टिताण्डघटसप्तवितस्तिकायः । क्वेदृग्विधाऽविगणिताण्डपराऽणुचर्यावाताध्वरोमविवरस्यचतेमहित्वम् ॥ ११ ॥ उत्क्षेपणंगर्भगतस्यपादयोः किंकल्पतेमातुरधोक्षजागसे । किमस्तिनास्तिव्यपदेशभूषितंतवास्तिकुक्षेः कियदप्यनन्तः ॥ १२ ॥ जगत्त्रयान्तोदधिसंप्लवोदेनारायणस्योदरनाभिनालात् । विनिर्गतोऽजस्त्वितिवाङ्नवैमृषाकिन्त्वीश्वरत्वन्नविनिर्गतोऽस्मि ॥ १३ ॥ नारायणस्त्वंनहिसर्वदेहिनामात्माऽस्यधीशाऽखिललोकसाक्षी । नारायणोऽङ्गंनरभूजलायनात्तच्चापिसत्यंनतवैवमाया

दोनोंप्रकारसेहीनहीं जानेजासकते तौभी जिसने इन्द्रियोंको विषयोंमेंसे खींचकर अन्तःकरणमें रोक रक्खाहै वह जितेंद्रिय पुरुष अन्तःकरणके साक्षात्कारसे निर्विकारता विषयमात्र और स्वप्रकाशता रूपसे ही तुम्हारी महिमाहो कुछ एकजानसकतेहैं। निपुण मनुष्य चाहे तो बहुत जन्मोंमें पृथ्वीके-परमाणु आकाशके हिमकण और गगनमण्डलके नक्षत्रादिकी किरणोंके परमाणुओंकी गिनती कर-सकताहै परन्तु इस विश्वके मंगलकारी गुणोंके अधिष्ठाता भगवान् श्रीकृष्णजीके गुणोंकी गणना का कोई भी वर्णन नहीं करसकता । अतएव जो आदरपूर्वक तुम्हारी कृपाकी अभिलाषा कर, अपने कर्मफलोंका भोग करताहुआ अन्तःकरण, वाक्य और देहद्वारा तुमको नमस्कारकर जीवित रहताहै वही मोक्षरूपी धनकर अधिकारी होसकताहै । हेराजन् ! ब्रह्माजी इसप्रकारसे स्तुतिकरके अपने अपराध के क्षमा करानके निमित्त अपने अपराध को कहने लगे कि—हेईश्वर ! मेरी दु-र्जनता तो देखो । आप अनन्त, आदि, परमात्मा तथा माया जीवियों को भी मोहनेवालेहो, मैं इतना मूर्खहूं कि आपसेभी माया विस्तारकरके अपने ऐश्वर्य दिखानेकी इच्छाकीथी जैसे अग्नि के सामने ज्वाला कुछ नहीं है वैसेही मैं भी आप के निकट कुछ नहीं हूं ॥ ६—९ ॥ हे भग-वन् ! मेरे ऊपर दयाकरो, मेरी उत्पत्ति रजोगुण से है अतएव न जानकर " मैंहीजगतकर्त्ता हूं " इस अहंकार से मेरी दोनों आंखें अन्धी होगईथीं; इसी से जानताथा कि आपसे भिन्न दूसरा भी ईश्वर है । हे अच्युत ! इस समय मुझको अपना दासजानकर मेरा अपराध क्षमाकरो॥ १०॥ अपने परिमाण से सातबालिश्त का प्रकृति, अहंकार, आकाश, वायु, अग्नि, जल, पृथ्वी से बना हुआ यह ब्रह्मांड यद्यपि मेरी देह है परन्तु आप के प्रत्येक रोमकूप में ऐसे असंख्य ब्रह्मांड निरन्तर आते जाते हैं । इस कारण मैं किस प्रकार से आपकी महिमाजानसकूंगा ॥ ११ ॥ हे अज ! गर्भ में रहाहुआ बालक जो दोनों पैरों से मारता है, माताक्या उसकाअपराध ग्रहणकरती है ? स्थूल और सूक्ष्म, कार्य कारण के नाम से कहेहुए इन समस्त पदार्थोंमेंक्याकोई आप के उदर से बाहर है ॥ १२ ॥ प्रलयकालके परस्पर मिलेहुए समुद्रके जलमें स्थितनारायण के उदर के नाभि देश से ब्रह्मा उत्पन्नहुए, यह वाक्य यद्यपि सत्य है; तथापि हे ईश्वर ! क्या मैं आप से उत्पन्न नहीं हुआ ? आप सबप्राणियों के आत्मा और समस्तलोकों के साक्षीहो ॥ १३ ॥ तो फिर क्या आप नारायण नहींहो ? जीवसमूह जिस से उत्पन्नहुएहों और नरसे उत्पन्न चौबीस तत्त्व और जल जिसका आश्रयहोने से नारायण नाम के द्वारा विख्यात है वह भी आपही का

॥ १४ ॥ तच्चेज्जलस्थंतवसज्जगद्वपुः किंमेनदृष्टंभगवंस्तदैव । किंवासुदृष्टंहृदिमे तदैवकिंनोसपद्येवपुनर्व्यदर्शि ॥१५॥ अत्रैवमायाधमनाऽवतारेह्यस्यप्रपञ्चस्यबहिः स्फुटस्य । कृत्स्नस्यचान्तर्जठरेजनन्यामायात्वमेवप्रकटीकृतंते॥१६॥यस्यकुक्षाविदं सर्वंसात्मंभातियथातथा ।-तत्त्वय्यपीहतत्सर्वंकिमिदंमाययाविना ॥ १७॥ अद्यैवत्व हतेऽस्यकिंममनतेमायात्वमादर्शितमेकोऽसिप्रथमंततोव्रजसुहृद्वत्साः समस्ताअपि तावन्तोऽसिचतुर्भुजास्तदखिलैः साकंमयोपासितास्तावंत्यैवजगन्त्य भूस्तदमितं ब्रह्माद्वयंशिष्यते ॥ १८ ॥ अजानतांत्वत्पदवीमनात्मन्यात्मात्मनाभासिवितत्यमा याम् ।सृष्टाविवाहंजगतोविधानइवत्वमेषोऽन्तइवात्रिनेत्रः १९॥सुरेष्वृषिष्वीशतथैवनृ ष्वपितिर्यक्षु यादस्स्वपितेऽजनस्य । जन्मासतांदुर्मदनिग्रहाय प्रभोविधातःसद नुग्रहायच ॥२०॥ कोवेत्तिभूमन्भगवन्परात्मन्योगेश्वरोतीर्भवतस्त्रिलोक्याम् । क्व वाकथंवाकतिवाकदेति विस्तारयन्क्रीडसि योगमायाम् ॥ २१ ॥ तस्मादिदं जगद शेषमसत्स्वरूपं स्वप्नाभमस्तधिषणं पुरुदुःखदुःखम् । त्वय्येवनित्यसुखबोधतनाव नन्तेमायात उद्यदपियत्सदिवावभाति ॥ २२ ॥ एकस्त्वमात्मापुरुषःपुराणः सत्यः स्वयंज्योतिरनन्तआद्यः । नित्योऽक्षरोऽजस्रसुखोनिरञ्जनः पूर्णोऽद्वयोमुक्तउपाधि-

---

अंश है ।,सबही आपकी माया है ॥ १४ ॥ हे देव ! जगतकी आश्रयभूत यह देह जल के बीच में स्थितथी यदि यह बात सत्य है । तो कमलनाल के मार्ग से जल में प्रवेशकर सौ वर्ष तक खोज करने परभी आपको क्यों न देखपाया ? और अन्तःकरण मे भी क्यों न देखपाया ? परंतु तपस्या करनेपरही—मेरे दृष्टिगोचर क्योंहुए ? ॥ १५ ॥ हे माया विनाशक ! यहसब प्रपंचबाहर भली भांति प्रकाशमानतो होरहा है तौभी उदर मे माता को यह समस्त दिखाकर आपनेअवतार मेंही अपनी माया दिखाई ॥ १६ ॥ जैसे यह विश्व आपके साथ आप के उदर में प्रकाश पाता है वैसेही बाहरभी ठीक उसी भांति से प्रकाशित होता है; तब यहसबही आपकी माया के कार्य के अतिरिक्त और क्या होसकता है ? ॥ १७ ॥ इस समयही आपने मुझे दिखाया कि आप के अतिरिक्त सब विश्वही माया है । आप प्रथम एक थे; तदुपरांत व्रजबालक और बछडों का रूप धारण किया ! फिर देखा कि सबही चतुर्भुज रूप से वर्तमान हैं और मैं समस्ततत्त्वों समेत उन सब मूर्तियों की उपासनाकरताहू । तदुपरांत उतनेही ब्रह्माण्डरूप बनगये । इस समय वही आप परिच्छेद रहित, अद्वैत परब्रह्मरूप से विराजमानहो ॥ १८ ॥ हे प्रभो ! आपही प्रकृति में स्थित हुए आत्माहो । जो मनुष्य आप के स्वरूपको नहीं जानता, उस के पक्ष में आपकीमाया स्वयंही प्रकाशपाती है; जैसे जगत की उत्पत्ति में मुझ ब्रह्माण्डरूप से और पालन में स्वयंही विष्णुरूपसे और संहार में रुद्ररूप से भासतेहो ॥ १९ ॥ हे प्रभो ! विधाता ! ईश्वर ! आप अजन्माहो, तौ भी देवता, ऋषि, मनुष्य, पशु, पक्षी तथाजलचरों में जो आपका जन्म होता है वह केवल दुष्टों का नाशऔर भक्तों पर कृपा करने के निमित्तही होता है ॥ २० ॥ हे भूमन् ! हे भगवन् ! हे परमात्मन् ! हे योगेश्वर ! त्रिलोकी में कौनपुरुष कहांपर है, किसप्रकार से है और किस काल में है यह केवल आपकी लीलाही से विदित होसकता है ॥ २१ ॥ आप योगमाया का विस्तारकरके क्रीडाकरतेहो अतएवयह असतस्वरूप स्वप्नकी समान, प्रतिभासरहित, अशेषसंसार—आप के नित्यसुख, चैतन्यमय अनन्त स्वरूप में माया से उत्पन्न होने और लय होने के कारण नित्य सुख चैतन्य रूप सा प्रतीत होता है ॥ २२ ॥ एक आपही सत्यहो ! क्योंकि आप आत्मा और पुरुष होने के कारण सृष्ट्यादि कार्यों के पहिलेही से वर्तमानऔर आदिहो—आपही नित्य, अनन्त, और अद्वयहो, आपकासुख निरवच्छिन्न है । आप का क्षय, विनाशनहीं है, आप स्वयंही

तोऽमृतः ॥२३॥ एवंविधं त्वां सकलात्मनामपि स्वात्मानमात्मात्मतया विचक्षते। गुर्वर्कलब्धोपनिषत्सुचक्षुषा ये ते तरन्तीव भवानृताम्बुधिम् ॥ २४ ॥ आत्मानमेवात्मतयाऽविजानतां तेनैव जातं निखिलं प्रपञ्चितम् ॥ ज्ञानेन भूयोऽपि च तत्प्रलीयते रज्ज्वामहेर्भोगभवाभवौ यथा ॥ २५ ॥ अज्ञानसंज्ञौ भवबन्धमोक्षौ द्वौ नाम नान्यौ स्त ऋतज्ञभावात्। अजस्रचित्यात्मनि केवले परे विचार्यमाणे तरणाविवाहनी ॥२६॥ त्वामात्मानं परं मत्वा परमात्मानमेव च। आत्मा पुनर्बहिर्मृग्य अहोऽज्ञजनताऽज्ञता॥२७॥ अन्तर्भवेऽनन्त भवन्तमेव ह्यतत्त्यजन्तो मृगयन्ति सन्तः असन्तमप्यन्त्यहिमन्तरेण सन्तं गुणं तं किमु यन्ति सन्तः ॥ २८ ॥ अथापि ते देव पदाम्बुजद्वयप्रसादलेशानुगृहीत एव हि। जानाति तत्त्वं भगवन्महिम्नो न चान्य एकोऽपि चिरं विचिन्वन् ॥ २९ ॥ तदस्तु मे नाथ स भूरिभागो भवेऽत्र वाऽन्यत्र तु वा तिरश्चाम्। येनाहमेकोऽपि भवज्जनानां भूत्वा निषेवे तव पादपल्लवम् ॥ ३० ॥ अहोऽतिधन्या व्रजगोरमण्यः स्तन्यामृतं पीतमतीव ते मुदा। यासां विभो वत्सतरात्मजात्मना यत्तृप्तयेऽद्यापि न चालमध्वराः ॥३१॥ अहो भाग्यमहो भाग्यं नन्दगोपव्रजौकसाम्। यन्मित्रं परमानन्दं पूर्णं ब्रह्म सनातनम् ॥ ३२ ॥ एषां तु भाग्यमहिमाऽच्युत तावदास्तामेकादशैव हि वयं बत भूरिभागाः। एतद्धृषीकचषकैरसकृत्पिबामः शर्वादयोऽङ्घ्र्युदजमध्वमृतासवं ते ॥ ३३ ॥ तद्भूरिभा

प्रकाशवान्, निर्मल और उपाधि रहित हैं ॥ २३ ॥ जो इसप्रकार से समस्त प्राणियों के आत्म स्वरूप आपको मुख्य आत्मस्वरूप से देखते रहते हैं,वे सूर्यरूपी गुरु से प्राप्तहुए ज्ञाननेत्रों केद्वारा संसाररूप मिथ्यासागर से पारहोजाते हैं ॥ २४ ॥ जैसे रस्सी से महासर्प की उत्पत्ति और अस्वीकारता होती रहती है, वैसेही जो आत्माको आत्मा कहकर नहीं जानते, उन के सामनेही उसी अज्ञान से यहसब प्रपंच प्रकट प्रकाशित होते हैं और ज्ञानके उत्पन्न होतेही वे सब नाश होजाते हैं ॥ २५ ॥ भवबन्धन और मोक्ष यह दोनों नामही अज्ञानकल्पित हैं,यह दोनों सत्य ज्ञानस्वरूप आत्मा से भिन्न नहीं हैं। सूर्य में जैसे रात्रि दिन कुछ नहीं हैं, शुद्ध, चैतन्य ब्रह्म मे भी वैसेही बन्धन और मोक्षभी कुछ नहीं है ॥ २६ ॥ यह मूर्खों की मूर्खता है—कि आप जो आत्मा हो उन आप को वह आत्मा से पृथक् तथा देहादिकोही आत्मा जानते हैं। आत्मा का क्या बाहर खोजकियाजाता है ॥ २७ ॥ हे अनन्त ! सबसाधू जड़पदार्थों को छोडकर देहके भीतरही आत्मा का अनुसन्धान करते हैं। निकटसर्प नहीं है तौभी सर्प को अस्वीकार न कर कौनमनुष्य उसको रस्सी जानसकता है ? ॥ २८ ॥ हेभगवन् ! ज्ञानद्वारा मोक्षतो प्राप्तहोसकती है तौभी हे देव ! जो तुम्हारे चरणकमलों की प्राप्तिके अंशमात्रभी अनुग्रहीत हुए हैं वेही आपकी महिमा के तत्त्व को जानसकते हैं; इस के अतिरिक्त और चाहे कोई होवे, विना मिथ्या परित्यागकिये चाहेबहुत काल तक विचार किया करे तौभी नहीं जानसकता ॥ २९ ॥ अतएव हेनाथ ! इसही जन्म में हूं चाहे पशु पक्षियों आदि किसी दूसरे जन्म में हूं परन्तु आप के भक्तों का एक सेवक होकर उन के चरणों की सेवा करसकूं यह मुझे सौभाग्य प्राप्तहो ॥ ३० ॥ अहो ! व्रजनारियें और व्रजगायें बड़ीही भाग्यशाली हैं। हेविभो ! आपने एक वर्षतक पुत्ररूप से आनन्दित होकर उनके स्तन्यामृतका पान कियाहै समस्त यज्ञभी अबतक आपकी तृप्ति नहीं कर सके ॥ ३१ ॥ अहो ! नन्दगोपआदिक व्रजवासीगण कैसे भाग्यशालीहैं कि परमानन्द स्वरूप पूर्ण सनातन ब्रह्म उनके आत्मीय हैं ॥ ३२ ॥ हेअच्युत ! दश इन्द्रिय, मन, बुद्धि, अहंकारके अधिष्ठाता हम तेरह देव और हम सबों में मुख्य शिवजीभी भाग्यशाली हैं क्योंकि इन व्रजवासियोंके इन्द्रियमय प्यालोंसे आपके चरणारविंद के मकरन्द रूप मधुर आसवका बारम्बार पान करतेहैं ॥

त्यमिहजन्मकिमप्यटव्यांयद्गोकुलेऽपिकतमांघ्रिरजोभिषेकम्। यज्जीवितंतुनि खिलंभगवान् मुकुन्दस्त्वद्यापियत्पदरजः श्रुतिमृग्यमेव ॥ ३४ ॥ एषांघोषनिवासिनामुतभवान् किंदेवरातेतिनश्चेतोविश्वफलात् फलं त्वदपरंकुत्राप्ययन्मुह्यति ॥ सद्वेषादिवपूतनापिसकुला त्वामेवदेवाऽऽपिता यद्धामार्थसुहृत्प्रियात्मतनयप्राणाशयास्त्वत्कृते ॥ ३५ ॥ तावद्रागादयःस्तेनास्तावत्कारागृहं गृहम्। तावन्मोहोऽङ्घ्रिनिगडो यावत्कृष्णनतेजनाः ॥ ३६ ॥ प्रपंचंनिष्प्रपंचोऽपि विडम्बयसिभूतले। प्रपन्नजनताऽऽनन्दसन्दोहंप्रथितुंप्रभो ॥ ३७ ॥ जानन्तएवजानन्तु किंबहूक्त्यानमेप्रभो मनसोवपुषोवाचो वैभवंतवगोचरः ॥ ३८ ॥ अनुजानीहिमांकृष्ण सर्वंत्वंवेत्सिसर्वदृक्। त्वमेवजगतांनाथो जगदेतत्तवार्पितम् ॥ ३९ ॥ श्रीकृष्ण वृष्णिकुलपुष्करजोषदायिन्क्ष्मानिर्जरद्विजपशूदधिवृद्धिकारिन्। उद्धर्मशार्वरहर क्षितिराक्षसध्रुगाकल्पमार्कमर्हन्भगवन्नमस्ते ॥ ४० ॥ श्रीशुक उवाच। इत्यभिष्टूयभूमानं त्रिःपरिक्रम्यपादयोः। नत्वाऽभीष्टंजगद्धाता स्वधामप्रत्यपद्यत॥४१॥ततोऽनुज्ञाप्यभगवान्स्वभुवं प्रागवस्थितान्। वत्सान्पुलिनमानिन्ये यथापूर्वसखंस्वकम् ॥ ४२ ॥ एकस्मिन्नपियातेऽब्दे प्राणेशंचान्तरात्मनः ॥ कृष्णमायाहता राजन्क्षणार्धंमेनिरेऽर्भकाः ॥ ॥ ४३ ॥ किं किंनविस्मरन्तीह मायामोहितचेतसः ॥ यन्मोहितं जगत्सर्वमभीक्ष्णं

॥३३॥ इसजीव लोकमें उसमेंसे व्रजमें और व्रजमेंसे गोकुलमें जिसका जन्महो वहीबडा भाग्यशाली है क्योंकि गोकुलमें जन्म होनेसे किसी न किसी गोकुलवासीके चरणकी रज शरीरमें पहुंचीसकती है। जिन परमात्माकी चरणरजको वेदभी ढूंढतेहैं वह श्रीकृष्ण भगवान् जिनके अखिल जीवन रूपहैं उन व्रजवासियोंकी चरणरज मिलना बडाही कठिन कार्य है ॥ ३४ ॥ हेदेव ! आपके भक्तों का अनुकरण मात्र करके जब पूतना, बकासुर, और अघासुर आदि राक्षसगण अपने आत्मीयजनों समेत आपको प्राप्तहुए तब आप इन व्रजवासियोंको सर्वफलके देनेवाले अपनेसेभी श्रेष्ठ और कौनसा फल देंगे, मेरा चित्त सबकुछ विचार करके भी इसका निश्चय नहीं करसकता क्योंकि आप व्रजवासियोंके गृह, धन बन्धु, प्रियजन, पुत्र, प्राण और अभिलाषाके एक मात्र कारणहो अतएव उनकोभी पूतनाही की समान लाभमिले तो वह पूरा नहीं होसकता ॥३५॥ हे श्रीकृष्णजी जबतक आपकी मनुष्यसे पूर्ण भक्ति नहीं होसकती तबतक रागादि चोररूपी घर कारागृहरूपी और मोह पैरको बेडा रूप रहताहै ॥ ३६॥ हेविभो ! आप निष्प्रपञ्च होकरभी दुःखित शरणागत मनुष्योंके आनन्द देनेके कारण पृथ्वीपर प्रपञ्चका अनुकरण करतेहो, ॥ ३७ ॥ हे विभो ! जो जानतेहों वे जानें परन्तु आपका वैभव मेरे शरीर मन, वाक्य का विषय नहीं है आज्ञा करिये मैं जाऊँ ॥ ३८ ॥ आप सर्वदर्शीहो अतएव कुछ जानतेहो। आप जगतके अधीश्वरहो अतएव ममता का विषय यह जगत और शरीर आपको अर्पण करताहूं ॥ ३९ ॥ हेकृष्ण ! हेवृष्णिकुल कमल के प्रकाश करनेवाले सूर्य ! हेपृथिवी, देव, द्विज और पशु और सागर के बढानेवाले चन्द्रमा ! हेपाखण्ड धर्मरूपी रात्रिके अन्धकार को नाश करनेवाले ! हेसूर्य आदि पूज्य देवताओंके पूज्य ! कल्प पर्यंत आपको मेरा प्रणामहै ॥ ४० ॥ श्रीशुकदेवजी बोले कि हेराजन् ! जगत् स्रष्टा ब्रह्माजी भगवान की इसभांति स्तुति और तीन परिक्रमा व चरणोंको प्रणामकर अपने लोकको सिधारे ४१ अनन्तर भगवान् श्रीकृष्णजी, ब्रह्माजी की आज्ञा के पूर्ववत् स्थितहो सबबछड़ों का यमुनातटपर ले आये; रेती भी पहिल की समानसखाओं से परिपूर्ण होगई ॥ ४२ ॥ हेराजन् ! अपने प्राणेश्वर श्रीकृष्णजी के बिना यद्यपि बालकों को एक क्षण वर्ष से भी अधिक ज्ञातहोताथा तौभी उन्होंने माया से मोहितहो एक वर्ष के बीतजाने को आधा क्षण जाना ॥ ४३ ॥ जिस मायासे मोहित

विस्मृतात्मकम् ॥ ४४ ॥ ऊचुश्च सुहृदः कृष्णं स्वागतंतेऽतिरंहसा । नैकोऽप्यभोजि
कवल एहीतःसाधुभुज्यताम् ॥ ४५ ॥ ततो हसन्हृषीकेशोऽभ्यवहृत्य सहार्भकैः ॥
दर्शयंश्चर्माजगरं न्यवर्ततवनाद्व्रजम्॥४६॥बर्हप्रसूननवधातुविचित्रितांगः प्रोद्दाम-
वेणुदलशृंगरवोत्सवाढ्यः । वत्सान्गृणन्ननुगगीतपवित्रकीर्तिर्गोपीदृगुत्सवदृशिःप्र
विवेशगोष्ठम् ॥ ४७ ॥ अद्यानेनमहाव्यालो यशोदानन्दसूनुना। हतोऽविता वयंचा
स्मादिति बालाव्रजेजगुः ॥ ४८ ॥ राजोवाच । ब्रह्मन्परोद्भवेकृष्णे इयान्प्रेमाकथंभ
वेत् । योऽभूतपूर्वस्तोकेषु स्वोद्भवेष्वपि कथ्यताम् ॥ ४९ ॥ श्रीशुक उवाच । सर्वे
षामपिभूतानां नृपस्वात्मैववल्लभः । इतरेऽपत्यवित्ताद्यास्तद्वल्लभतयैवहि॥५०॥
तद्राजेन्द्रयथास्नेहः स्वस्वकात्मनिदेहिनाम् । नतथा ममतालम्बिपुत्रवित्तगृहादि-
षु ॥ ५१ ॥ देहात्मवादिनांपुंसामपि राजन्यसत्तम । यथादेहःप्रियतमस्तथा नह्यनु
येचतम् ॥ ५२ ॥ देहोऽपि ममताभाक्चेत्तर्ह्यसौ नात्मवत्प्रियः । यज्जीर्यत्यपि देहेऽ
स्मिन्जीविताशा बलीयसी ॥ ५३॥ तस्मात्प्रियतमःस्वात्मा सर्वेषामपि देहिनाम् ॥
तदर्थमेवसकलं जगदेतच्चराचरम् ॥५४॥कृष्णमेनमवेहि त्वमात्मानमखिलात्मनाम्
जगद्धितायसोऽप्यत्रदेहीवाभातिमायया ॥ ५५ ॥ वस्तुतोजानतामत्रकृष्णंस्थास्नु
चरिष्णुच । भगवद्रूपमखिलंनान्यद्वस्त्विहकिंचन ॥ ५६ ॥ सर्वेषामपिवस्तूनांभा
वार्थोभवतिस्थितः । तस्यापिभगवान्कृष्णःकिमतद्वस्तुरूप्यताम् ॥ ५७ ॥ समा

होने पर संसार क्षण २ में आत्मा को भूलजाता है-संसार में उसी माया से जिनके चित्त मोहित
होजाते हैं वेक्या नहीं भूलसकते ॥ ४४ ॥ व्रजबालकों ने श्रीकृष्णजी से कहा कि—हे सखे ! तुम
बहुतही शीघ्र आगये हमने एक ग्रासतक भक्षणनकरपाया। इस ओर आओ, भोजन करो, विलम्ब
न करो ॥ ४५ ॥ श्रीकृष्णजी हँसे और बालकों के साथ भोजन कर अजगर का चमड़ा देखतेर
व्रजधाम मे आने लग ॥ ४६ ॥ धीरे २ श्रीकृष्णजी ने व्रज में प्रवेश किया । मोरपख फूल और
नवीन धातुओं से उनका श्रीअंग चित्रितथा। वह उच्चस्वर से वंशीबजाय और सींग के शब्द से
आनन्दयुक्तहो आदर पूर्वक बछड़ों को बुलाते थे। उनकी श्रीमूर्ति गोपियों के कमलरूपी नेत्रों
को प्रफुल्लितकरतीथी ॥ ४७ ॥ हेराजन् ! बालकों ने व्रजमें आकर कहा कि—यशोदा और
नन्दके इसपुत्र ने आज अजगर को मारा, हमने इस से रक्षापाई है ॥ ४८ ॥ राजा परीक्षित् ने
कहा कि—हे ब्रह्मन् ! श्रीकृष्णजी तो दूसरे के पुत्रथे । अपने अपने पुत्रों पर व्रजवासियों
का जो स्नेहथा उसकी अपेक्षा श्रीकृष्णजी पर उनका अधिकस्नेह क्यों हुआ ? आप इस बातको
कहिये ॥ ४९ ॥ श्रीशुकदेवजी बोले कि-हेराजन् ! आत्माही सबप्राणियों को प्रिय है; पुत्र सम्पत्ति
आदि समस्तपदार्थ आत्माही के प्रियहोने से प्रिय हैं ॥ ५० ॥ अतएव हे राजेन्द्र ! अपनी २
आत्मा के ऊपर प्राणियों को जितना स्नेह है, ममताश्रयी धन, पुत्र और घरपर उतनानहीं है ५१
हे क्षत्रियश्रेष्ठ ! जो देहकोही आत्मा कहते हैं उनकोभी देह जितनी प्रिय है कि देह के अनुवर्ती
पुत्रादि उतने नहीं हैं ॥ ५२ ॥ देह, ममता का भाजनतो है, परन्तु आत्मा की समान प्रिय नहीं
है । देखो-देह यद्यपि जीर्ण भी होजावे तौभी जीवनकी आशा प्रबलरहती है ॥ ५३ ॥ अतएव
अपना आत्माही सबप्राणियों को प्रिय है, और यह चराचर जगत्‌भी आत्माही के कारण प्रिय है
॥५४॥ और श्रीकृष्णजी सबआत्माओंके आत्मा हैं। वे जगत् के कल्याण के निमित्त महायोग से
इस पृथ्वी पर प्राणियों की समान प्रकाशपाते हैं ॥ ५५ ॥ जो श्रीकृष्णजी को सबजगत्काकारण
रूप जानते हैं उनके सामने समस्त चराचर भगवत्‌रूप हैं उन से भिन्न और कोई पदार्थहीनहीं
है ॥ ५६ ॥ समस्तपदार्थों के परमार्थ कारण से स्थितरूप कृष्णजी उन कारणों केभी कारण हैं

श्रितायेपदपल्लवप्लवंमहत्पदंपुण्ययशोमुरारेः । भवाम्बुधिर्वत्सपदंपरंपदं पदंपदं यद्विपदांनतेषाम्॥५८॥ एतत्तेसर्वमाख्यातंयत्पृष्टोऽहमिहत्वया । यत्कौमारेहरिकृतं पौगण्डेपरिकीर्तितम् ॥ ५९ ॥ एतत्सुहृद्भिश्चरितमुरारेरघार्दनंशाद्वलजेमनंच । व्यक्तेतरद्रूपमजोर्वभिष्टवंशृण्वन्गृणन्नेतिनरोऽखिलार्थान् ॥ ६० ॥ एवंविहारैः कौमारैः कौमारं जहतुर्व्रजे । निलायनैः सेतुबन्धैर्मर्कटोत्प्लवनादिभिः ॥ ६१ ॥

इति श्रीमद्भा० महा० दशमस्कन्धे चतुर्दशोऽध्यायः ॥ १४ ॥

श्रीशुक उवाच ॥ ततश्चपौगण्डवयः श्रितौव्रजेबभूवतुस्तौपशुपालसंमतौ । गाश्चारयन्तौसखिभिः समंपदैर्वृन्दावनंपुण्यमतीवचक्रतुः ॥ १ ॥ तन्माधवोवेणुमुदीरयन्वृतोगोपैर्गृणद्भिः स्वयशोबलान्वितः । पशून्पुरस्कृत्यपशव्यमाविशद्विहर्तुकामः कुसुमाकरंवनम् ॥ २ ॥ तन्मञ्जुघोषालिमृगद्विजाकुलं महन्मनः स्वच्छपयः सरस्वता । वातेनजुष्टंशतपत्रगन्धिनानिरीक्ष्यरन्तुंभगवान्मनोदधे ॥ ३ ॥ सतत्रतत्रारुणपल्लवश्रियाफलप्रसूनोरुभरेणपादयोः । स्पृशच्छिखान्वीक्ष्यवनस्पतीन्मुदास्मयन्निवाहाग्रजमादिपूरुषः ॥ ४ ॥ श्रीभगवानुवाच ॥ अहोअमीदेववरामरार्चितपादाम्बुजंतेसुमनःफलार्हणम् । नमन्त्युपादायशिखाभिरात्मनस्तमोऽपहत्यैतरुजन्मयत्कृतम् ॥ ५ ॥ एतेऽलिनस्तवयशोऽखिललोकतीर्थंगायन्तआदिपुरुषानु

लीन्ध्रकृतच्छाया नृणां श्रीरिव भूरभूत् ॥ ११ ॥ क्षेत्राणि सस्यसंपद्भिः कर्षकाणां मु
दं ददुः । धनिनामुपतापं वै दैवाधीनमजानताम् ॥ १२ ॥ जलस्थलौकसः सर्वे नव
वारिनिषेवया । अबिभ्रद्रुचिररूपं यथा हरिनिषेवया ॥ १३ ॥ सरिद्भिः सङ्गतः सिन्धु
श्चुक्षुभे श्वसनोर्मिमान् । अपक्वयोगिनश्चित्तं कामाक्तं गुणयुग्यथा ॥ १४ ॥ गिर-
यो वर्षधाराभिर्हन्यमाना न विव्यथुः । अभिभूयमाना व्यसनैर्यथाऽधोक्षजचेतसः ।

उस को सुनकर विस्मितहुए और मन में विचारने लगे कि कोई श्रेष्ठ देवता लीलाकरने के निमित्त व्रज में अवतीर्णहुए हैं ॥ २ ॥ कुछ दिन के उपरांत वर्षा आई । वर्षामें सबप्राणियों को उत्पत्ति होती है और दिशाएं उज्ज्वल व आकाश क्षुभित रहता है ॥ ३ ॥ वर्षा के आने से आकाश—श्यामघटा और बिजली व गर्जना से परिपूरित तथा मेघों से आच्छन्नहो अव्यक्त ज्योति सगुणब्रह्म की समान प्रकाश पानेलगा ॥ ४ ॥ राजा जैसे समय पर द्रव्यले पीछे समय पर देता है वैसेही सूर्यनारायणभी आठमास तक पृथ्वी का जल रूप धन अपनी किरणों द्वारा लेकर समय पर देने लगे ॥ ५ ॥ जैसे कृपालु मनुष्य दुःखित मनुष्यको देखकर दयावशहो उसकी प्रसन्नता के लिये जीवनतक त्यागदेते हैं वैसेही प्रचण्डवायुसे चलायमान बिजली से शोभित महा मेघ समूह-जगत के कल्याण के निमित्त जल बरसाने लगे ॥ ६ ॥ जैसे काम्यतपस्वीका का शरीर उसी तपस्या के फलको प्राप्तहो पुष्ट होता रहताहै वैसेही ग्रीष्मसे कृशहुई पृथ्वी वर्षाद्वारा सिंचकर पुष्टि प्राप्तकी ॥ ७ ॥ जैसे कलियुगमें पापके बलसे पाखण्डीहो प्रकाश पाते रहते हैं किंतु वेदवक्ता ब्राह्मण प्रभा रहित होजाते हैं ऐसेही वर्षासमय में रात्रिको मेघोंसे नक्षत्र व ग्रह ढकगये और जुगनू प्रकाश पानेलगे ॥ ८ ॥ जैसे नित्य कर्मके उपरांत आचार्यका शब्द सुनकर उसके शिष्य ब्राह्मणगण अध्ययन करने लगते हैं—वैसेही, वर्षाके पहिले जो मेढक मौनभावसे सोरहेथे, मेघध्वनि सुनकर वह शब्द करनेलगे ॥ ९ ॥ क्षुद्रनदियें—अजितेन्द्रिय पुरुषके देह, धन और सम्पत्तिके समान उलटे मार्गसे चलनेलगीं ॥ १० ॥ पृथ्वी किसी स्थानपर तृणद्वारा हरीहोकर किसी स्थानमें छत्राक (बरसातीपेड) द्वारा छायायुक्त होकर राजाओं की सेना सम्पत्तिके समान शोभा पानेलगी ॥ ११ ॥ सबखेत अन्नरूपी सम्पत्तिद्वारा किसानोंको आनन्द उपजाने लगे,—और लाभहोना दैवाधीन है ऐसे न जान अनेक व्यापारी दुःखीहुए ॥ १२ ॥ भगवानकी सेवाकरके मनुष्य जैसे सौंदर्यता प्राप्त करते हैं वैसेही समस्त जल थल वासियों ने नवीन जलसे अभिषिक्तहो मनोहररूप धारण किया ॥ १३ ॥ पवनसे तरंगें लेताहुआ समुद्र नदियोंसे मिलकर ऐसे क्षुभित होनेलगा कि जैसे अपक्व योगीका चित्त कामवासना और विषयोंसे युक्तहो क्षुभित होजाताहै ॥ १४ ॥ जिसका चित्त भगवान् में लगाहुआहै वह विषय वासनाओंसे घिरकरभी जैसे व्यथित नहीं होता वैसेही

॥१५॥ मार्गा बभूवुः संदिग्धास्तृणैश्छन्ना ह्यसंस्कृताः । नाभ्यस्यमानाः श्रुतयो द्विजैः कालहताइव ॥ १६ ॥ लोकबन्धुषु मेघेषु विद्युतश्चलसौहृदाः । स्थैर्यं न चक्रुः कामिन्यः पुरुषेषु गुणिष्विव ॥ १७ ॥ धनुर्वियति माहेन्द्रं निर्गुणं च गुणिन्यभात् । व्यक्ते गुणव्यतिकरेऽगुणवान्पुरुषो यथा ॥ १८ ॥ न रराजोडुपश्छन्नः स्वज्योत्स्ना राजितैर्घनैः । अहंमत्या भासितया स्वभासा पुरुषो यथा ॥ १९ ॥ मेघागमोत्सवा हृष्टाः प्रत्यनन्दञ्छिखण्डिनः । गृहेषु तप्ता निर्विण्णा यथाऽच्युतजनागमे ॥ २० ॥ पीत्वाऽपः पादपाः पद्भिरासन्नानात्ममूर्तयः । प्राक्क्षामास्तपसा श्रान्ता यथा कामानुसेवया ॥ २१ ॥ सरस्स्वशान्तरोधस्सु न्यूषुरङ्गानि सारसाः । गृहेष्वशान्तकृत्येषु ग्राम्याइव दुराशयाः ॥ २२ ॥ जलौघैर्निरभिद्यन्त सेतवो वर्षतीश्वरे । पाखण्डिनामसद्वादैर्वेदमार्गाः कलौ यथा ॥ २३ ॥ व्यमुञ्चन्वायुभिर्नुन्ना भूतेभ्योऽथामृतं घनाः । यथाऽऽशिषो विशाम्पतयः काले काले द्विजेरिताः ॥ २४ ॥ एवं वनं तद्वर्षिष्ठं पक्वखर्जूरजम्बुमत् । गोगोपालैर्वृतो रन्तुं सबलः प्राविशद्धरिः ॥ २५ ॥ धेनवो मन्दगामिन्य ऊधोभारेण भूयसा । ययुर्भगवताऽऽहूता द्रुतं प्रीत्या स्नुतस्तनीः ॥ २६ ॥ वनौकसः प्रमुदिता वनराजीर्मधुच्युतः । जलधारा गिरेर्नादादासन्ना ददृशे गुहाः ॥ २७ ॥ क्वचिद्वनस्पति

पर्वतभी मूसलाधार वर्षा होनेपरभी दुःखित नहीं है ॥ १५ ॥ जैसे ब्राह्मणोंके अभ्यास न करने और समय बीत जानेसे सब श्रुतियें लोपहोजाती हैं वैसेही मनुष्योंके न आन जाने और तृण ढक जानेसे समस्त मार्गभी लोप होगये ॥ १६ ॥ जैसे व्यभिचारिणी स्त्री गुणवान पुरुषोंमें स्थिरता नहीं करतीं वैसेही लोकोपकारी बादलोंमें बिजली स्थिर नहींहोती ॥१७॥ गुणयुक्त प्रपंचमें निगुण पुरुषकी समान, गर्जित शब्दसे पूरित आकाशमें गुण (रस्सी) शून्य इन्द्र धनुष शोभापानेलगा ॥ १८ ॥ जैसे जीव अपनी चैतन्यताके द्वाराही प्रकाशमानहो अहंकारसे ढककर प्रकाश नहीं पासकता वैसेही चन्द्रमा अपनी चन्द्रिकासे प्रकाशितहोकरभी बादलोंसे ढककर प्रकाश नहीं पाता ॥ १९ ॥ घरमें बासकरने से जिनका अंतःकरण दुःखित होरहा है वह हरिभक्त विरागी पुरुष को जैसे घर में आताहुआ देखकर संतुष्ट होता है—वैसेही मोर बादलोंको आया देख अति प्रसन्नहो आनन्द प्रकाश करने लगे ॥ २० ॥ घोर तपस्या करने से जिन ऋषियों के शरीरकृश होरहे हैं वह जैसे तपस्या सिद्ध होने पर तपका श्रम दूर करने के निमित्त नानाप्रकार के उपभोगों को भोगकर नानारूप के शरीर धारणकरते हैं, ग्रीष्म से तपेहुए सबवृक्षभी वैसेही मूलद्वारा जलपानकर नानाप्रकारकी देह धारणकरतेहुए शोभाको प्राप्तहुए ॥ २१ ॥ हे राजन्! गृहस्थाश्रम में भयानक कर्मोंका अभावनहीं है तौभी नीचमनुष्य जैसे उस में रहना अच्छाजानते हैं वैसेही सारसपक्षीभी कीच और कांटों से व्याप्त तालाबों में बासकरने लगे ॥ २२ ॥ जैसे कलि में पाखण्डियों के कुतर्क से वेदमार्ग नष्टहोजाताहै, वैसेही इंद्र के वर्षाकरने से जल के वेगद्वारा सब फल नष्टहोगये ॥ २३ ॥ जैसे राजागण पुरोहितों की आज्ञानुसार समय २ पर नानाकाम्य पदार्थोंका दान करते हैं वैसेही जलयुक्त मेघ पवन से चलायमानहो प्राणियों के ऊपर अमृत बरसाने लगे ॥ २४ ॥ वन उपवन आदि इस प्रकार से समृद्धिशाली होगये और खजूर व यमुना के फल पक उठे। भगवान् श्रीकृष्णजी बलरामजी को साथले गौ और गोपगणों से घिर क्रीड़ा करनेके निमित्त वहां गये ॥ २५ ॥ गौएं थनों में दूधहोने के बोझ से बोझिलहो धीरे २ चलतीथीं; परन्तु भगवान के बुलाने से प्रीतिवशहो शीघ्रतापूर्वक चलने लगीं। चलने के समय उनके थनों से दूध टपकने लगा ॥ २६ ॥ भगवान् ने वनके चारो ओर दृष्टि डालकर देखा कि,—सबही वनवासीआनन्दित होरहे हैं, वृक्ष मधु बरसाते हैं, और पहाड़ों से जल की धारा गिररही है—तथा सबगुफाएं उस

क्रोडे गुहायां चाभिवर्षति । निर्विश्य भगवान्रेमे कन्दमूलफलाशनः ॥२८॥ दध्यो-दनं समानीतं शिलायां सलिलान्तिके । संभोजनीयैर्बुभुजे गोपैः संकर्षणान्वितः ॥ ॥ २९॥ शाद्वलोपरि संविश्य चर्वतोमीलितेक्षणान् । तृप्तान्वृषान्वत्सतरान्गाश्च स्वोधोभरश्रमाः ॥ ३०॥ प्रावृट्श्रियंचतांवीक्ष्य सर्वभूतसुखावहाम् । भगवान्पूजयांचक्रे आत्मशक्त्युपबृंहिताम् ॥ ३१ ॥ एवंनिवसतोस्तस्मिन्रामकेशवयोर्व्रजे ॥ शरत्समभवद्व्यभ्रा स्वच्छाम्ब्वपरुषानिला ॥ ३२ ॥ शरदानीरजोत्पत्त्या नीराणिप्रकृतिंययुः । भ्रष्टानामिवचेतांसि पुनर्योगनिषेवया ॥ ३३ ॥ व्योम्नोऽब्दंभूतशाबल्यं भुवःपंकमपांमलम् । शरज्जहाराश्रमिणां कृष्णेभक्तिर्यथाऽशुभम् ॥ ३४ ॥ सर्वस्वं-जलदाहित्वा विरेजुःशुभ्रवर्चसः । यथात्यक्तैषणाःशान्ता मुनयोमुक्तकिल्बिषाः ॥ ॥ ३५ ॥ गिरयोमुमुचुस्तोयं क्वचिन्नमुमुचुःशिवम् । यथाज्ञानामृतंकाले ज्ञानिनो-ददतेनवा ॥ ३६ ॥ नैवाविदन्क्षीयमाणं जलंगाधजलेचराः । यथायुरन्वहंक्षय्यं न-रामूढाःकुटुम्बिनः ॥ ३७ ॥ गाधवारिचरास्तापमविन्दञ्छरदर्कजम् । यथादरिद्रः कृपणः कुटुम्ब्यविजितेन्द्रियः ॥ ३८ ॥ शनैःशनैर्जहुःपंकं स्थलान्यामंचवीरुधः । यथाहंममतांधीराः शरीरादिष्वनात्मसु ॥ ३९ ॥ निश्चलाम्बुरभूत्तूष्णीं समुद्रःश-रदागमे । आत्मन्युपरते सम्यङ् मुनिर्व्युपरतागमः ॥४०॥ केदारेभ्यस्त्वपोऽगृह्णन्क

जल के गिरने के शब्द से परिपूरित होरही हैं ॥ २७ ॥ हे महाराज!वनमें वृष्टि होने से श्रीकृष्ण जी कभी वृक्षों के तले कभी गुफा में प्रवेश कर बलरामजी के साथ कन्द, मूल और फलखाकर क्रीड़ाकरने लगे ॥ २८ ॥ भोजन के निमित्त लाएहुये दही और अन्नका, बलदेवजी के साथ जल के निकटवालीशिलापर बैठ, साथ भोजन करनेवाले गोपों के संग भक्षण करते ॥ २९ ॥ वनमें थायनके भार से श्रमितहुई गौएं, बैल और बछड़े चाराचरके परितृप्तहो नई घासपर बैठ,आंखें मूंद कर पागुर करते थे ॥ ३० ॥ भगवान उन सबको और सबको सब समयमें सुख देनेवाली वर्षा लक्ष्मी को देखकर आनंदित हुए और अपनी शक्ति से बढ़ी हुई वर्षाकी लक्ष्मी की प्रशंसा करने लग ॥ ३१ ॥ इसप्रकार से खेल कूदमें आसक्त रहकर राम और कृष्णजी इसप्रकार से व्रजमें दिन बिताने लगे । क्रमसे वर्षा ऋतुगई और शरद ऋतु आई । तब फिर आकाश में मेघन दिखाई दिया, जल निर्मल होगया और वायु ने अपनी प्रचण्डता छोड़दी ॥ ३२ ॥ जैसे भ्रष्ट योगियों के चित्त फिर योग के सेवन से स्वच्छ होजाते हैं वैसेही शरद ऋतुमें कमल उत्पन्न होने से जल निर्मल होगया ॥ ३३ ॥ जैसे श्रीकृष्णजी की भक्ति करनेसे आश्रमी मनुष्य अमंगलों से छूट जाता है; वैसेही शरत्ने—आकाशके मेघ, वर्षा की अधिकता से प्राणियों का एकत्रवास; पृथ्वीकीकीच और जलकी मलीनता को दूर करादिया ॥३४॥ जैसे पापों से छूटे हुए मुनिगणसब वासनाओंको छोड़ शांतहोकर शोभा पाते हैं वैसेही मेघ अपना सर्वस्व छोड़ श्वेत वर्ण धारणकर शोभायमानहुए!॥३५॥जैसेज्ञानी पुरुष यथोचित समयमें ज्ञानामृत किसीको देते हैं किसीकोनहीं,वर्षाके व्यतीत होजानेसे पहाड़भी उसीप्रकार कहीं निर्मल जल छोड़नेलगे कहीं नहीं,॥३६॥जैसे मूर्खकुटुम्बी मनुष्य परमायुके प्रतिदिन क्षय होनेको नहीं जानसकते,वैसेही थोड़ेही जलमें विहार करनेवाले जल-चर गण उस जलका नित्य कम होते नहीं जानसकते ॥ ३७ ॥ दीन दरिद्री, अजितेंद्रिय,कुटुम्बी के समान थोड़ेही जलमें विहार करनेवाले जलचरगण शरत्काल के सूर्यके तापसे संतप्त होनलगे ॥ ३८ ॥ जैसे धीर मनुष्य आत्माके अतिरिक्त देहादिसे ममता छोड़देतेहैं वैसेही भूमि, कीच और लताओंने अपक्वता त्यागदी ॥ ३९ ॥ सबप्रकारकी क्रियाओंसे निवृत्त होकर मुनि जैसे वेदपाठ भी परित्याग करदेतेहैं, शरत्कालके आनेसे जल निश्चल होकर समुद्रने वैसेही शांतिभाव धारण

ंका दृढसेतुभिः । यथा प्राणैः स्रवज्ज्ञानं तन्निरोधेन योगिनः ॥ ४१ ॥ शरदर्कांशुजां-स्तापान्भूतानामुडुपोऽहरत् । देहाभिमानजं बोधो मुकुन्दो व्रजयोषिताम् ॥ ४२ ॥ खमशोभत निर्मेघं शरद्विमलतारकम् । सत्त्वयुक्तं यथा चित्तं शब्दब्रह्मार्थदर्शनम् ॥ ॥ ४३ ॥ अखण्डमण्डलो व्योम्नि रराजोडुगणैः शशी । यथा यदुपतिः कृष्णो वृष्णि-चक्रावृतो भुवि ॥ ४४ ॥ आश्लिष्य समशीतोष्णं प्रसूनवनमारुतम् । जनास्तापं जहु-र्गोप्यो न कृष्णहृतचेतसः ॥ ४५ ॥ गावो मृगाः खगा नार्यः पुष्पिण्यः शरदाऽभवन् । अन्वीयमानाः स्ववृषैः फलैरीशक्रिया इव ॥ ४६ ॥ उदहृष्यन्वारिजानि सूर्योत्थाने कुमुद्विना । राज्ञा तु निर्भया लोका यथा दस्यून्विना नृप ॥ ४७ ॥ पुरग्रामेष्वाग्रयणैरे-न्द्रियैश्च महोत्सवैः । बभौ भूः पक्वसस्याढ्या कलाभ्यां नितरां हरेः ॥ ४८ ॥ वणि-ङ्मुनिनृपस्नाता निर्गम्यार्थान्प्रपेदिरे ॥ वर्षरुद्धा यथा सिद्धाः स्वपिण्डान्काल आगते ॥ ४९ ॥

इति श्रीमद्भा० महा० दशमस्कन्धे विंशोऽध्याय ॥ २० ॥

श्रीशुक उवाच ॥ इत्थं शरत्स्वच्छजलं पद्माकरसुगन्धिना । न्यविशद्वायुना वा तं सगोगोपालकोऽच्युतः ॥ १ ॥ कुसुमितवनराजिशुष्मिभृङ्गद्विजकुलघुष्टसरः स रिन्महीध्रम् । मधुपतिरवगाह्य चारयन्गाः सहपशुपालबलश्चुकूज वेणुम् ॥२॥ त

किया ॥ ४० ॥ जैसे योगी लोग इन्द्रियमार्गको रोक उस मार्गसे जातेहुये प्राणको रोक रखतेहैं वैसेही किसानोंने मेंड बांधकर खेतोंके भीतरका जल रोकदिया ॥ ४१ ॥ जैसे विद्यासे देहाभिमान का और भगवान् श्रीकृष्णजी के दर्शनसे गोपियोंका ताप नाश होताहै वैसेही रात्रिका चन्द्रमा शरत्काल के सूर्यके तापसे.सतप्तहुए प्राणियोंका ताप हरनेलगा ॥ ४२ ॥ जैसे सत्वगुणावलम्बी का चित्त वेदमार्गको देखकर शोभा पाताहै उसीभांति आकाश, शरत्के आनेसे निर्मलहो तारोंको प्रकाशितकर रात्रिके समय शोभायमानहुआ, ॥४३॥ जैसे श्रीकृष्णजी यदुकुलसे परिवृतहो अपना चक्र धारणकर शोभापावैं, उसीप्रकार चन्द्रमा आकाशमें तारागणों से घिर अखण्ड मण्डल द्वारा प्रकाशित होनेलगा ॥ ४४ ॥ जैसे श्रीकृष्णजीका आलिंगनकर गोपियोंका संताप दूरहोजाता वै-सेही फूलेहुए बनकी सुगन्धित, समशीतोष्ण वायुका सेवनकर मनुष्योंने अपना संताप दूरकिया ॥ ४५ ॥ जैसे भगवदाराधन की क्रियायें आराधन करनेवालेकी इच्छा बिना भी सफल होजाती हैं वैसेही इच्छा न होनेपरभी शरत्कालमें स्वप्रियोंके क्रमपूर्वक अनुगमन करनेसे गायें मृगी, पक्षि-णी और स्त्रियें गर्भिणी होगईं ॥ ४६ ॥ हेराजन् ! जैसे राजाके उदयहोनसे चोरके अतिरिक्त सब मनुष्योंको प्रसन्नता होतीहै वैसेही सूर्यके उदय होनेसे कुमुदके अतिरिक्त और जलसे.उत्पन्नहुए फूल खिलउठे ॥ ४७ ॥ ग्राम और नगरोंमें नवीन अन्नके भोजनके निमित्त वैदिक तथा इन्द्रियों के सुखकारक लौकिक महोत्सव होनेलगे । हरिके दो अंशोंद्वारा पृथ्वी अत्यन्त शोभाको प्राप्तहुई ॥४८॥ ऋषि मन्त्र और योगादिके प्रभावसे सिद्धपुरुष आयु द्वारा रुककर समय आनेपर जैसे योगादि से प्राप्तहुये, देवादि शरीरोंको प्राप्त होते हैं, वैसेही बनिये मुनि, राजा और ब्रह्मचारी जो वर्षा के कारण अपने २ स्थानोंमें रुके हुएथे इससमय बाहर हो २ कर अपने २ कार्योंमें लगे ४९॥

इतिश्रीमद्भा० महा० दशम० सरलाभाषाटीकायांविंशोऽध्यायः ॥ २० ॥

श्रीशुकदेवजी बोलेकि—हे राजन् ! शरद्के आनेसे बनका जल स्वच्छ होगया और वायु कमलों के संसर्ग से सुगंधित होकर चलनेलगी; भगवान् ने गाय तथा गोपाल गणोंको साथले उस बनमें प्रवेशकिया ॥ १ ॥ फूलेहुये वृक्षोंकी श्रेणी के ऊपर मतवाले भौंरे और पक्षी बैठेहुए शब्द करतेथे, उनके शब्द से बनके सरोवर, नदी और पर्वत सभी प्रतिध्वनित होरहे थे। भगवान् ने उस बनमें

तद्व्रजस्त्रिय आश्रुत्य वेणुगीतं स्मरोदयम्। काश्चित्परोक्षं कृष्णस्य स्वसखीभ्योऽन्ववर्णयन् ॥ ३ ॥ तद्वर्णयितुमारब्धाः स्मरन्त्यः कृष्णचेष्टितम्। नाशकन्स्मरवेगेन विक्षिप्तमनसो नृप ॥ ४ ॥ बर्हापीडं नटवरवपुः कर्णयोः कर्णिकारं बिभ्रद्वासः कनककपिशं वैजयन्तीं च मालाम्। रन्ध्रान्वेणोरधरसुधया पूरयन्गोपवृन्दैर्वृन्दारण्यं स्वपदरमणं प्राविशद्गीतकीर्तिः ॥ ५ ॥ इति वेणुरवं राजन्सर्वभूतमनोहरम्। श्रुत्वा व्रजस्त्रियः सर्वा वर्णयन्त्योऽभिरेभिरे ॥ ६ ॥ गोप्य ऊचुः ॥ अक्षण्वतां फलमिदं न परं विदामः सख्यः पशूननुविवेशयतोर्वयस्यैः। वक्त्रं व्रजेशसुतयोरनुवेणुजुष्टं यैर्वा निपीतमनुरक्तकटाक्षमोक्षम् ॥ ७ ॥ चूतप्रवालबर्हस्तबकोत्पलाब्जमालाऽनुपृक्तपरिधानविचित्रवेषौ। मध्ये विरेजतुरलं पशुपालगोष्ठ्यां रङ्गे यथा नटवरौ क्वच गायमानौ ॥ ८ ॥ गोप्यः किमाचरदयं कुशलं स्म वेणुर्दामोदराधरसुधामपि गोपिकानाम्। भुङ्क्ते स्वयं यदवशिष्टरसं ह्रदिन्यो हृष्यत्त्वचोऽश्रु मुमुचुस्तरवो यथाऽऽर्याः ॥ ९ ॥ वृन्दावनं सखि भुवो वितनोति कीर्तिं यद्देवकीसुतपदाम्बुजलब्धलक्ष्मि। गोविन्दवेणुमनु मत्तमयूरनृत्यं प्रेक्ष्याद्रिसान्वपरतान्यसमस्तसत्त्वम् ॥ १० ॥ धन्याः स्म मूढमतयोऽपि हरिण्य एता या

प्रवेशकर बलराम जी और अन्य बालकों के साथ गौ चराते २ वंशी बजाई ॥ २ ॥ श्रीकृष्णजी के उस वेणुगीत को सुनकर गोपियों के मनमें कामदेव उत्पन्न हुआ; उनमें से कोई २ एकांत में अपनी सखियों के निकट उनके गुणका वर्णन करनेलगीं ॥ ३ ॥ परन्तु वर्णन करतेही उनके चरित्रोंका स्मरण होने से कामदेव के वेग के कारण उनका चित्त चंचल होउठा अतएव उनका मनोरथ फलीभूत न हुआ ॥ ४ ॥ वे मनमें विचारने लगीं कि नटवर श्रीनन्द नंदनने अधरामृतसे वंशीके छिद्रोंको पूर्णकर श्रीवृन्दावन में प्रवेश किया। उनके मस्तक में मोरपंखका बनाहुआ मुकुट, दोनो कानों में कनेर के फूल शरीर में सुवर्ण के रंगकासा पीतांबर और गलेमें वैजयंती माला शोभायमान होरही थी। वृन्दावन उनके पदचिह्नों से चिह्नितहो शोभा उत्पन्न करने वाला होउठा ॥ ५ ॥ हे राजन्! सब प्राणियों को प्यारी बांसुरी की ध्वनि सुनकर समस्त ब्रजनारियें इस प्रकार से वर्णन करते २ क्षण २ में परमानंद मूर्त्ति भगवान् का आलिंगन करने लगीं ॥ ६ ॥ गोपियों ने कहाकि हे सखियों! इस समय ब्रजेश्वर राम कृष्णदोनों भ्राताओं ने अपने साथियों के साथ पशुओं को ले बनमें प्रवेश किया है। उनके मुखमें बांसुरी लगी रहती है और वह मधुर कटाक्ष चलाया करते हैं जिन्हों ने इनदोनों मुखार विंदों के मकरंद का पानकिया है उन्हीं के नेत्र सफल हैं और दूसरे के नहीं ॥ ७ ॥ यह सुनकर दूसरी ब्रजनारी ने कहाकि—अहो! गोपोंका कैसा बड़ा पुण्य है! कि उनकी सभाके बीचमें राम और कृष्ण मोर और पीतवस्त्र से विचित्र वेश धारणकर अत्यंत शोभा से विराजते हैं। उनके बहनील और पीतवस्त्र आमकी कोंपल, मोरपिच्छ, उत्पल और कमलोंकी माला धारण करने से और भी शोभायमान होरहे हैं ॥ ८ ॥ दूसरी गोपीने कहाकि-हे गोपियो! इस वंशी ने ऐसा क्या पुण्य कियाथा! देखो—श्रीकृष्णजी के जो अधरामृत केवल गोपिकाओंही के भोगके योग्य हैं इनका रसमात्र शेष रखकर अकेलेही सबका भोग करती है। जिसके जलसे इसकी पुष्टिहुई थी वह सब नदियें इसके अपूर्व सौभाग्यको देखकर खिलेहुये कमलों के रूप से रोमांचित होरही हैं। और वृक्ष अपने वंशमें पुण्यात्माको जन्मादेख रसके मिषसे ऐसे आंसूबहा-रहे हैं कि जैसे कुलवृद्ध आगे वंशमें भगवद्भक्तको देख पुलकित आनंदाश्रु गिरातेहों ॥ ९ ॥ किसी २ स्त्री ने कहाकि—हे सखि! देखो, देखो,! श्रीवृन्दावन श्रीकृष्णजी के चरण कमलों के संसर्ग से कैसी शोभापाता है! श्रीकृष्णजी की मुरली ध्वनिको सुनकर मोर मतवाले होकर नाचरहे हैं। उनके नृत्यको देखकर वनके दूसरे समस्त प्राणी सब कामनाएं छोड़कर इकट्ठे हो हो पर्वतकी तराईमें दौड़रहे हैं। सुखमय वृन्दावन पृथ्वीकी कीर्तिका विस्तार करता है ॥ १० ॥ और २ स्त्रियों ने

नन्दनन्दनमुपात्तविचित्रवेषम् । आकर्ण्यवेणुरणितंसहकृष्णसाराः पूजांदधुर्विरचि-
तांप्रणयावलोकैः ॥ ११ ॥ कृष्णंनिरीक्ष्यवनितोत्सवरूपवेषं श्रुत्वाच तत्क्वणितवे-
णुविचित्रगीतम् । देव्योविमानगतयः स्मरनुन्नसारा भ्रश्यत्प्रसूनकबरामुमुहुर्विनी-
व्यः ॥ १२ ॥ गावश्च कृष्णमुखनिर्गतवेणुगीतपीयूषमुत्तभितकर्णपुटैःपिबन्त्यः । शा
वाःस्नुतस्तनपयःकवलाःस्म तस्थुर्गोविन्दमात्मनि दृशाऽश्रुकलाःस्पृशन्त्यः॥१३॥
प्रायोबताम्बविहगा मुनयो वनेऽस्मिन्कृष्णेक्षितं तदुदितंकलवेणुगीतम् । आरुह्यये
द्रुमभुजान्रुचिरप्रवालाञ्छृण्वन्त्यमीलितदृशो विगतान्यवाचः ॥ १४ ॥ नद्यस्तदा
तदुपधार्य मुकुन्दगीतमावर्तलक्षितमनोभवभग्नवेगाः । आलिङ्गनस्थगितमूर्मिभुजै
र्मुरारेर्गृह्णन्ति पादयुगलंकमलोपहाराः ॥ १५ ॥ दृष्ट्वाऽऽतपेव्रजपशून्सहरामगो
पैःसंचारयन्तमनुवेणुमुदीरयन्तम् । प्रेमप्रवृद्धउदितःकुसुमावलीभिःसख्युर्व्यधात्स्व
वपुषाम्बुद आतपत्रम् ॥ १६ ॥ पूर्णाःपुलिन्द्य उरुगायपदाब्जरागश्रीकुंकुमेनदयिता
स्तनमण्डितेन। तद्दर्शनस्मररुजस्तृणरूषितेन लिम्पन्त्यआननकुचेषु जहुस्तदाधिम्
॥१७॥ हन्तायमद्रिरबला हरिदासवर्योयद्रामकृष्णचरणस्पर्शप्रमोदः । मानंतनोति
सहगोगणयोस्तयोर्यत्पानीयसूयवसकन्दरकन्दमूलैः ॥ १८ ॥ गागोपकैरनुवनं न

कहाकि—हे सखि ! हरिणियें पशुयोनि में उत्पन्न तोहुई हैं परन्तु यह भी मुरली की ध्वनि सुनकर हिरणों के समेत एकत्र होकर विचित्र वेशधारी श्रीकृष्णजी की ओर प्रेमकी दृष्टिसे देखकर सन्मान करती हैं ॥ ११ ॥ दूसरी गोपी ने कहाकि—हे गोपीगण ! श्रीकृष्णजी के रूप व चरित्रको देखकर किस स्त्रीको आनंद उत्पन्न न होगा ? उनको देख तथा उनकी वंशीकी ध्वनि सुनकर देवनारियें भी प्रियतम की गोद में शयन करते हुये कामदेव के वेगसे व्याकुलहो उठती हैं । उस समय उनके बालों के जूड़े से फूल गिरने लगते हैं और कमर बंधन ढीला पड़जाता है ॥ १२ ॥ सबगायें कान उठायेहुये, श्रीकृष्णजी के मुखसे निकले गीतामृतका पानकर मनमें नेत्रोंद्वारा उनका आलिंगनकर आंसू भरेहुये नेत्रों से देखती हुईखड़ी रहती हैं। दूधको पीतेहुये बछड़े भी यदिकान उठाकर उस गीतामृतका पानकरते हैं तो स्तनों से निकले हुये दूधका ग्रास उनके मुहहीमें रहजाता है और नेत्र भी एक प्रकार का अश्रुधारा से परिपूर्ण होजाते हैं ॥ १३ ॥ हे सखि ! इस वनमें जो पक्षी हैं वह मुनियोंसे धन्य हैं, क्योंकि जैसे मुनिगण भगवान्का दर्शन करते हैं वैसेही यह भी मनोहर पत्तोंयुक्त वृक्षोंपर बैठकर दूसरी बातोंको छोड़, आंखें बंदकिये श्रीकृष्णजी के सुंदर वेणुगीतको सुनाकरते हैं ॥ १४ ॥ सचेतनों की बातदूर रही; श्रीकृष्णजी के गीत सुनकर सब नदियें भी भंवर पड़ने के मिषसे कामका वेग प्रकाश करती है। कामके वेगसे उनका वेग न्यून होजाता है। वह तरङ्गरूप भुजाओं से कमलों को भेटमें ले, आलिंगन के साथ आच्छादन करती हुई श्रीकृष्णजी के चरणोंको धारण करती हैं ॥ १५ ॥ बलराम और गोपालों समेत अपने सखाको वंशी बजाते २ ब्रजके पशुओंको धूपमें चराते देख मेघ मस्तकों के ऊपर उदयहोते हैं और प्रेमके वशीभूतहो पुष्पकी समान नन्ही २ बूंदें बरसाय अपनी देहों से उनकी छत्ररचना करते है ॥१६॥ भीलनियों कोभी धन्य है; क्योंकि जोकेसर स्त्रियों के स्तन में लगा रहनके कारण श्रीकृष्णजी के चरण कमलों में लगता रहता है वह श्रीकृष्णजी के वनमें बारंबार भ्रमण करने के कारण चरणों से छूटकर तृणमें लगता है उसी केसरको देखकर कामदेव से व्याकुलहो भीलनियें उसीको शरीर और कुचोंमें मलकर कामदेव की व्यथाको नाश करती हैं ॥ १७ ॥ हे सखियो ! देखो यह गोवर्धन पर्वत श्रीकृष्णजी के भक्तों में श्रेष्ठ है क्योंकि राम कृष्णको देखकर यह आनंदितहो अन्न, सुंदरतृण, गुफा, कंद, मूल द्वारा उन श्रीकृष्णजी की पूजाकरता है ॥ १८ ॥ हे सखीगण ! देखो

चलोऽव्दारवेणुस्वनैः कलपदैस्तनुभृत्सु सख्यः । अस्पन्दनं गतिमतां पुलकस्तरूणां नि योगपाशकृतलक्षणयोर्विचित्रम् ॥ १९ ॥ एवंविधा भगवतो या वृन्दावनचारिणः । व र्णयन्त्यो मिथो गोप्यः क्रीडास्तन्मयतां ययुः ॥ २० ॥

इति श्रीमद्भा० महा० दशमस्कन्धे एकविंशतितमोऽध्यायः ॥२१॥

श्रीशुक उवाच ॥ हेमन्ते प्रथमे मासि नन्दव्रजकुमारिकाः । चेरुर्हविष्यं भुञ्जा नाः कात्यायन्यर्चनव्रतम् ॥ १ ॥ आप्लुत्याम्भसि कालिन्द्या जलान्ते चोदितेऽरुणे । कृत्वाप्रतिकृतिं देवीमानर्चुर्नृप सैकतीम् ॥ २ ॥ गन्धैर्माल्यैः सुरभिभिर्बलिभिर्धूपदी पकैः । उच्चावचैश्चोपहारैः प्रवालफलतण्डुलैः ॥ ३ ॥ कात्यायनि महामाये महायो गिन्यधीश्वरि । नन्दगोपसुतं देवि पतिं मे कुरु ते नमः । इति मन्त्रं जपन्त्यस्ताः पूजां च क्रुः कुमारिकाः ॥ ४ ॥ एवं मासं व्रतं चेरुः कुमार्यः कृष्णचेतसः । भद्रकालीं समा नर्चुर्भूयान्नन्दसुतः पतिः ॥ ५ ॥ उषस्युत्थाय गोत्रैः स्वैरन्योन्याबद्धबाहवः । कृष्ण मुच्चैर्जगुर्यान्त्यः कालिन्द्यां स्नातुमन्वहम् ॥ ६ ॥ नद्यां कदाचिदागत्य तीरे निक्षिप्य पूर्ववत् । वासांसि कृष्णं गायन्त्यो विजह्रुः सलिले मुदा ॥ ७ ॥ भगवांस्तदभिप्रेत्य कृष्णो योगेश्वरेश्वरः । वयस्यैरावृतस्तत्र गतस्तत्कर्मसिद्धये ॥ ८ ॥ तासां वासांस्यु पादाय नीपमारुह्य सत्वरः । हसद्भिः प्रहसन्बालैः परिहासमुवाच ह ॥ ९ ॥ अत्रा गत्याबलाः कामं स्वं स्वं वासः प्रगृह्यताम् सत्यं ब्रवाणि नो नर्म यद्यूयं व्रतकर्शिताः ॥ ॥ १० ॥ न मयोदितपूर्वं वा अनृतं तदिमे विदुः । एकैकशः प्रतीच्छध्वं सहैवोत

क्या आश्चर्य का विषय है ! कि राम, कृष्ण पैरके बांधनेवाली रस्सियें और पाश लेकर गोपाल गणों के साथ गायोंको एक वनस दूसरे वनमें लेजाते है, इनके मधुर वेणुनादको सुनकर जीवधारि निश्चल और वृक्षआदि पुलकित होजाते हैं ॥ १९ ॥ भगवान् ने वृन्दावन में घूम २ कर जो २ क्रीड़ा कीथी गोपियें उन सबका इस प्रकार से वर्णन कर २ तन्मयताको प्राप्त हुईं ॥ २० ॥

इतिश्री मद्भागवतेमहापुराणेदशमस्कंधेसरलाभाषाटीकायांएकविंशोऽध्यायः ॥ २१ ॥

श्रीशुकदेवजी बोले कि—हेराजन् ! हेमन्तकाल के प्रथम मास में नन्द व्रजकी कुमारियोंने हविष्यान्नभोजन कर कात्यायनी देवी के पूजनका व्रतधारण किया ॥ १ ॥ हेराजन् ! सबकुमारियें अरुणोदय होतेही कालिंदी के जल में स्नानकर जल के निकट बालूकी देवी की मूर्ति बनाय सुगंधि गंध, माला, नैवेद्य, धूप, दीप, श्रेष्ठ २ सामग्रियों और ताम्बूल द्वारा पूजाकरतीं ॥ २ । ३ ॥ और यह मन्त्र पढ़तीं कि—हेकात्यायनि ! हेदेवि !.नन्दगोपके पुत्र को हमारा स्वामी करदेः आप को हम नमस्कार करती हैं ॥ ४ ॥ "कृष्णही हमारे पति होवें" इस इच्छासे श्रीकृष्णजीमें चित्तसमर्पण कर कुमारियों ने इस प्रकार से एक महीने तक व्रतका आचरण कर भद्रकाली की पूजाकी ॥५॥ वह प्रतिदिन प्रातःकाल उठ, एक दूसरे का हाथ पकड कालिंदी में स्नानकरने को जाते समय अपने २ नामों सहित कृष्णजी का गुण गातीरहतीं ॥ ६ ॥ एक दिन उन सब व्रजकुमारियों ने नदी में आयकर और दिनों की समान किनारे पर अपने २ वस्त्रधर कृष्णजी के गुणों का गान किया व आनन्द पूर्वक जलक्रीडाकरने का आरम्भकिया ॥७॥ योगेश्वरों के ईश्वर भगवान कृष्णजी उनकी कामना को जान, उनके कर्मों का फल देने के निमित्त, साथियों को साथले उस स्थानपर आये और उन के सबवस्त्रों को हरणकर कदम्ब के वृक्षपर चढ़ हँसनेवाले बालकों के साथ हँसते हँसते परिहास करके कहने लगे कि—॥ ८ । ९ ॥ हे अबलागण ! तुमइस स्थान परआय प्रसन्नता पूर्वक अपने २ वस्त्रों को लो; मैं सत्यकहताहूं–परिहास नहीं करता क्योंकि तुम व्रतकरके अत्यंत दुबली होरहीहो ॥ १० ॥ यहसब बालक जानते हैं कि मैं मिथ्या नहीं कहता । हेसुमध्यमा !

सुमध्यमाः ॥ ११ ॥ तस्य तत्क्ष्वेलितं दृष्ट्वा गोप्यः प्रेमपरिप्लुताः । व्रीडिताः प्रेक्ष्य चान्योऽन्यं जातहासा न निर्ययुः ॥ १२ ॥ एवं ब्रुवति गोविन्दे नर्मणाऽऽक्षिप्तचेतसः । आकण्ठमग्नाः शीतोदे वेपमानास्तमब्रुवन् ॥ १३ ॥ माऽनयं भोः कृथास्त्वां तु नन्दगोपसुतं प्रियम् । जानीमोऽङ्ग व्रजश्लाघ्यं देहि वासांसि वेपिताः ॥ १४ ॥ श्यामसुन्दर ते दास्यः करवाम तवोदितम् । देहि वासांसि धर्मज्ञ नो चेद्राज्ञे ब्रुवामहे ॥ १५ ॥ श्रीभगवानुवाच । भवत्यो यदि मे दास्यो मयोक्तं वा करिष्यथ । अत्रागत्य स्ववासांसि प्रतीच्छन्तु शुचिस्मिताः ॥ १६ ॥ ततो जलाशयात्सर्वा दारिकाः शीतवेपिताः । पाणिभ्यां योनिमाच्छाद्य प्रोत्तेरुः शीतकर्शिताः ॥ १७ ॥ भगवानाहता वीक्ष्य शुद्धभावप्रसादितः । स्कन्धे निधाय वासांसि प्रीतः प्रोवाच सस्मितम् ॥ १८ ॥ यूयं विवस्त्रा यदपो धृतव्रता व्यगाहतैतत्तदु देवहेलनम् । बद्ध्वाञ्जलिं मूर्ध्न्यपनुत्तयेंऽहसः कृत्वा नमोऽधोवसनं प्रगृह्यताम् ॥ १९ ॥ इत्यच्युतेनाभिहितं व्रजाबला मत्वा विवस्त्राऽऽप्लवनं व्रतच्युतिम् । तत्पूर्तिकामास्तदशेषकर्मणां साक्षात्कृतं नेमुरवद्यमृग्यतः ॥ २० ॥ तास्तथावनता दृष्ट्वा भगवान्देवकीसुतः । वासांसि ताभ्यः प्रायच्छत्करुणस्तेन तोषितः ॥ २१ ॥ दृढं प्रलब्धास्त्रपया च हापिताः प्रस्तोभिताः क्रीडनवच्च कारिताः । वस्त्राणि चैवापहृतान्यथाप्यमुं ता नाभ्यसूयन्प्रियसङ्गनिर्वृताः ॥ २२ ॥ परिधाय स्ववासांसि प्रेष्ठसङ्गमसज्जिताः । गृहीतचित्ता नो चेलुस्तस्मिँल्लज्जायितेक्षणाः ॥ २३ ॥ ता-

---

एक २ आवो चाहे सब एकत्रित होकर आवो, आकर अपने वस्त्र लेजावो ॥ ११ ॥ उनके इस परिहास करने को देखकर गोपियें विह्वल और लज्जित हो परस्पर एक दूसरे को देखकर हंसनेलगीं—जलसे तीरमें न आसकीं ॥ १२ ॥ गोपियों का चित्त क्रीड़ामें आसक्त था, ठंडे जल में कण्ठतक डूबे रहनेसे उनका शरीर कांपनेलगा । श्रीकृष्णजीके वारम्बार ऐसा कहनेपर वह कांपते कांपते कहनेलगीं कि— ॥ १३ ॥ हे कृष्ण ! अन्याय न करो आप नन्दगोप के पुत्र हो तमको हम भलीभांति जानती हैं । हम जानती हैं कि व्रजमें तुम सबसे श्रेष्ठहो । हमारे वस्त्र देदो हम कांप रहीहैं ॥ १४ ॥ हे श्यामसुन्दर ! हम तुम्हारी दासीहैं । आप जो आज्ञाकरें वहीकरें । हे धर्मज्ञ हमारे वस्त्र देदो नहींतो हम राजासे जाकर कह देंगी ॥ १५ ॥ श्रीभगवान्‌ने कहा कि—हे सुवासिनी गण ! यदि तुम हमारी दासीहो और मेरी आज्ञाका प्रतिपालनभी करना चाहती हो तो मैं आज्ञा करताहूं कि—इसस्थानपर आकर अपने वस्त्र लेवो ॥ १६ ॥ ऐसा न करने से मैं वस्त्र न दूंगा, वृद्ध राजा हमारा क्या करेगा ? स्त्रियें शीतसे कष्ट पारहीथीं, वह अन्तमें दोनों हाथोंसे अंगको ढककर शीतसे कांपते २ जलसे तीरपर आईं ॥ १७ ॥ भगवान् उनको विशुद्ध भावसे खड़ाहुआ और उनके आक्षत अंगको देखकर प्रसन्नहुए और सब वस्त्रों को कन्धेपर रख हंसते२ बोले कि— ॥ १८ ॥ तुमने व्रतका आचरण करतेहुये नंगी होकर जलमें स्नान कियाहै । इससे निश्चयही देवता का अपराध हुआहै । अतएव इस पापको दूर करनेके निमित्त मस्तकपर हाथजोड़ मस्तक नवाय नमस्कार कर वस्त्रलो, ॥ १९ ॥ हे राजन् ! व्रजांगनाओंने, भगवान् का यह वचन सुन, निश्चयही व्रत भंग होगा जान उसकी परिपूर्णताकी कामनाकर उस व्रतके तथा और नानाप्रकारके कर्मोंके फल स्वरूप उन श्रीकृष्णजीको प्रणाम किया उन्होंने विचार किया कि यही पापोंके नाश करनेवाले हैं ॥ २० ॥ भगवान् श्रीकृष्णजी उनको इस प्रकार से नम्रहुआ देख संतुष्टहुए और कृपापूर्वक वस्त्र देदिये ॥ २१ ॥ हे राजन् ! श्रीकृष्णजी ने उन व्रजकुमारियों को ठगा, निर्लज्ज किया, उपहास किया, वस्त्रहरण किये—अधिककया कठपुतलीकी समान नचाया तोभी उन स्त्रियों ने उनपर दोषारोपण न किया; क्योंकि प्यारे के संग वह आनन्द में मग्नहोगईथीं ॥ २२ ॥ हे राजन् ! वस्त्र पहिनकरभी वहसब स्त्रियें वहां से न चलसकीं; क्योंकि प्यारे के संगम से वशीभूतहोकर उनका

तांविज्ञायभगवान् स्वपादस्पर्शकाम्यया । धृतव्रतानांसंकल्पमाह दामोदरोऽब-
लाः ॥ २४ ॥ संकल्पोविदितःसाध्व्यो भवतीनामदर्चनम् । मयाऽनुमोदितः सोऽ-
सौसत्यो भवितुमर्हति ॥ २५ ॥ नमय्यावेशितधियां कामःकामायकल्पते । भर्जि
ताःक्वथिताधानाप्रायो बीजायनेष्यते ॥ २६ ॥ यातााऽबलाव्रजंसिद्धा मयेमारंस्य
थक्षपाः । यदुद्दिश्यव्रतमिदं चेरुरार्यार्चनंसतीः ॥ २७ ॥ श्रीशुकउवाच । इत्यादि
ष्टाभगवता लब्धकामाःकुमारिकाः । ध्यायन्त्यस्तत्पदाम्भोज कृच्छ्रान्निर्विविशुर्व्र-
जम् ॥२८॥ अथगोपैःपरिवृतो भगवान्देवकीसुतः । वृन्दावनाद्गतोदूर चारयन्गाः
सहाग्रजः ॥ २९ ॥ निदाघार्कातपेतिग्मे छायाभिःस्वाभिरात्मनः । आतपत्रायि-
तान्वीक्ष्य द्रुमानाहव्रजौकसः ॥ ३० ॥ हेस्तोककृष्णहेअंशो श्रीदमन्सुबलार्जुन ॥
विशालर्षभ तेजस्विन्देवप्रस्थ वरूथप ॥ ३१ ॥ पश्यतैतान्महाभागान्परार्थैकान्तजी
विनः । वातवर्षातपहिमान्सहन्तो वारयन्तिनः ॥ ३२ ॥ अहोएषांवरंजन्म सर्वप्रा-
ण्युपजीवनम् । सुजनस्येवयेषांवै विमुखायान्तिनार्थिनः ॥ ३३ ॥ पत्रपुष्पफलच्छा
यामूलवल्कलदारुभिः । गन्धनिर्यासभस्मास्थितोक्मैः कामान्वितन्वते ॥ ३४ ॥
एतावज्जन्मसाफल्यंदेहिनामिहदेहिषु । प्राणैरर्थैर्धियावाचाश्रेयआचरणंसदा
॥ ३५ ॥ इति प्रवालस्तबकफलपुष्पदलोत्करैः । तरूणांनम्रशाखानांमध्यतोयमुनां
गतः ॥ ३६ ॥ तत्रगाः पाययित्वाऽपः सुमृष्टाः शीतलाः शिवाः । ततोनृपस्वयंगो

चित्त भगवान की ओर खिंचगयाथा; इसहीकारण वह श्रीकृष्णजीकी ओर सलज्जभावसे देखन
लगीं ॥ २३ ॥ इन्होंने मेरे चरणस्पर्श की कामनामेंही व्रतधारण किया है—उनकी इसइच्छाको
भगवान ने जानकर कहा कि– ॥ २४ ॥ हेसाध्वी स्त्रियों ! तुमने जिस संकल्प से यह व्रत किया
उस को मैं जानताहू और स्वीकारभी करताहूं । अतएव उसका पूर्ण होना उचित है ॥२५॥जिस
का चित्त मुझमें लगाहुआ है-उसकी इच्छा पूर्ण होजाने पर फिर उसका फल नहीं भोगनापडता,
भुनाहुआ व औटाहुआ बीज दूसरे बीज को नहीं उत्पन्न करसकता ॥ २६ ॥ हे अबलाओ! तुम
व्रज में जाओ; तुम्हारी इच्छा पूर्ण होगी । हे सतीगण ! आगामी रात्रियों मे तुममेरे साथ विहार
करसकोगी । क्योंकि यही कामना करके तुमने देवी का व्रत किया है ॥ २७ ॥ श्रीशुकदेवजी ने
कहा कि–हेराजन् ! कृतार्थहुई गोपियें भगवान की इस आज्ञा को पाय उनके चरणकमलों की
चिंता करते२ अतिकष्ट से व्रज में आईं ॥ २८ ॥ अनन्तर भगवान् देवकीनन्दन–बलदेवजी
समेत गोपों को संगले गौ चराते २ वृन्दावन से दूर निकल गये ॥ २९ ॥ वहां ग्रीष्म की प्रचण्ड
धूप से वृक्षों को अपने मस्तकके ऊपर छाते की समानछायाकरते देख व्रजवासियों से बोले कि
॥ ३० ॥ हे स्तोककृष्ण ! हे अंशु ! हे श्रीदामन् ! हे सुबल ! हेअर्जुन ! हे विशाल ! हे वृषभ !
हे ओजस्विन् ! हे देवप्रस्थ ! हे वरूथप ! ॥ ३१ ॥ इनसब महाभाग वृक्षों को देखो; यह दूसरे
के स्वार्थ के निमित्त जीवित होरहे हैं । देखो—स्वयं वात, वर्षा, धूप और शीत सहनकर हमारी
सबकी रक्षाकरते हैं ॥ ३२ ॥ अहा ! इनका जन्म अत्यन्तही श्रेष्ठ है । यहसब प्राणियों कोजीवि
का देते हैं । दानी मनुष्य के निकट से याचककी समान, इन के निकट से प्राणिगण कभी भी
विमुखनहीं होते ॥ ३३ ॥ यहपत्र, फूल, फल, छाया, मूल, छाल, गोंद,काठ,भस्म, अस्थि, कोपल
आदि से सबकी कामना पूर्ण करते हैं ॥ ३४ ॥ प्राणियों में उन्हीं प्राणियों का जन्म सफल है
कि–जो प्राण, धन और वाक्य द्वारा सबका कल्याण करते हैं ॥ ३५ ॥ हेराजन् ! इस प्रकार से
प्रशंसा करतेहुए कोंपल, गुच्छक, फल, फूल और पत्तों के बोझ से लचीहुई डालियों के बीच में
होतेहुए भगवान् यमुना तटपर पहुँचे ॥ ३६ ॥ महाराज ! गोपगणों ने उस स्थान में अतिस्वच्छ

पाः कामंस्वादुपयोजलम् ॥ ३७ ॥ तस्याउपवनेकामंचारयन्तः पशून्नृप । कृष्णरामावुपागम्यक्षुधार्त्ताइदमब्रुवन् ॥ ३८ ॥

इति श्रीमद्भा० महा० दशमस्कन्धे नाम द्वाविंशोऽध्यायः ॥ २२ ॥

गोपा ऊचुः ॥ रामरामहावीर्यकृष्णदुष्टनवर्हण । एषावैबाधतेक्षुन्नस्तच्छान्तिं कर्तुमर्हथः ॥ १ ॥ श्रीशुक उवाच ॥ इतिविज्ञापितोगोपैर्भगवान्देवकीसुतः । भक्तायाविप्रभार्यायाः प्रसीदन्निदमब्रवीत् ॥ २ ॥ प्रयातदेवयजनंब्राह्मणाब्रह्मवादिनः । सत्रमाङ्गिरसंनामह्यासतेस्वर्गकाम्यया ॥ ३ ॥ तत्रगत्वौदनंगोपायाचतास्मद्विसर्जिताः । कीर्तयन्तोभगवतआर्यस्यममचाभिधाम् ॥ ४ ॥ इत्यादिष्टाभगवतागत्वाऽयाचन्ततेतथा । कृताञ्जलिपुटाविप्रान्दण्डवत्पतिताभुवि ॥ ५ ॥ हेभूमिदेवाः शृणुतकृष्णस्यादेशकारिणः । प्राप्ताञ्जानीतभद्रंवोगोपान्नोरामचोदितान् ॥ ६ ॥ गाश्चारयन्तावविदूरओदनंरामाच्युतौवोलषतोबुभुक्षितौ । तयोर्द्विजाओदनमर्थिनोर्यदिश्रद्धाचवोयच्छतधर्मवित्तमाः ॥ ७ ॥ दीक्षायाः पशुसंस्थायाः सौत्रामण्याश्चसत्तमाः । अन्यत्रदीक्षितस्यापिनान्नमश्नन्हिदुष्यति ॥ ८ ॥ इतितेभगवद्याच्ञांशृण्वन्तोऽपिनशुश्रुवुः । क्षुद्राशाभूरिकर्माणोबालिशावृद्धमानिनः ॥ ९ ॥ देशः कालः पृथग्द्रव्यंमन्त्रतन्त्रर्त्विजोऽग्नयः । देवतायजमानश्चक्रतुर्धर्मश्चयन्मयः ॥ १० ॥ तंब्रह्मपरमंसाक्षाद्भगवन्तमधोक्षजम् । मनुष्यदृष्ट्यादुष्प्रज्ञामर्त्यात्मानोनमेनिरे ॥ ११ ॥ नतेयदोमितिप्रोचुर्ननेतिचपरन्तप । गोपानिराशाः प्रत्येत्यतथोचुः कृष्णरामयोः

पवित्रजल गौओं को पिलाय आपभी पान किया ॥ ३७ ॥ कालिंदीके वनमें इच्छानुसार गाय चराते २ भूखसे व्याकुलहोकर गोपगण–श्रीकृष्णजी व बलरामजीके निकट जाय यह वचन बोले ॥ ३८ ॥

इतिश्रीमद्भा०महा०दशम०भरत्भाषाटीकायांद्वाविंशोऽध्यायः ॥ २२ ॥

गोपों ने कहा कि–हेराम ! हेमहावीर्यराम ! हेदुष्टदमनश्रीकृष्ण ! हम भूख से दुःख पारहे हैं इस के दूरकरने का आपको प्रयत्न करना चाहिये ॥ १ ॥ श्रीशुकदेवजी बोले कि हेराजन् ! गोपों के इस प्रकार कहने पर श्रीकृष्णजी ने, अपनी भक्त द्विजनारियों पर कृपा करने की इच्छा से यह कहा कि–॥ २ ॥ तुम देवयज्ञ में जाओ, वेदवेत्ता ब्राह्मणोंने स्वर्गकी कामनाकर आंगिरस नामक यज्ञका आरम्भ कियाहै ॥ ३ ॥ हेगोपगण ! मैं तुमको भेजता हूं । तुम उस स्थानमें जाकर भगवान् बलदेवजी और मेरा नाम लेकर अन्न मांगना ॥ ४ ॥ गोपगणोंने भगवान्‌की इस आज्ञाको पाय उस स्थान में जाय,पृथ्वीपर गिर हाथजोड़ ब्राह्मणोंसे अन्न मांगा ॥ ५ ॥ गोपोंनेकहा कि–हेब्राह्मणगण! आपका कल्याणहो सुनो, हम श्रीकृष्णजीके भेजेहुए आयेहैं, हम गोपोंको रामने आपके समीप भेजाहै, ॥ ६ ॥ राम और कृष्ण इस स्थानके निकटही गौ चराते २ भूखसे कातर हुएहैं, उन की इच्छाहै कि—आपके अन्नका भोजन करें । हेधर्मज्ञ श्रेष्ठ ब्राह्मणगण ! यदि आपकी श्रद्धाहो तो आप,अन्न देवें,वह प्रार्थना करते हैं ॥ ७ ॥ हेसाधुओं ! जबसे दीक्षा आरम्भहो, तबसे अग्निषोमीका पशुवधे उसके पहिले दीक्षित अन्न खानेका दोषहै परन्तु पशु मरनेके उपरांत नहीं तैसेही सौत्रामणि नामक यज्ञ बिना दीक्षितका अन्न खानमें कोइदोष नहीं॥८॥हेराजन्! वह सब ब्राह्मण इसप्रकार कृष्णजीकी प्रार्थनाको सुनी अनसुनी करगए । साधारण स्वर्गादिकी आशा करके–वह क्लेशकारक कर्मोंको करतेथे और अपनेको बड़ाज्ञानी मानतेथे । इसहीकारण भगवान्‌की आज्ञाको सुनकर उस आज्ञा का प्रतिपालन न किया ॥ ९ ॥ उन मूर्ख ब्राह्मणोंने—देश, काल, भिन्न २ पदार्थ, मन्त्र, तन्त्र, ऋत्विक् अग्नि, देवता, यजमान, यज्ञ और धर्मजिसके स्वरूपहैं उन्हीं भगवान् परब्रह्मको सामान्य पुरुष जानकर सन्मान न किया ॥ ११ ॥ हेपरंतप ! जब उन्हों

॥१२॥ तदुपाकर्ण्यभगवान्प्रहस्यजगदीश्वरः। व्याजहारपुनर्गोपान्दर्शयन्लौकिकींगतिम् ॥ १३ ॥ मांज्ञापयतपत्नीभ्यः ससंकर्षणमागतम् । दास्यन्तिकाममन्नंवः स्निग्धामय्युषिताधिया ॥ १४ ॥ गत्वाऽथपत्नीशालायां दृष्ट्वाऽऽसीनाः स्वलंकृताः। नत्वाद्विजसतीर्गोपाः प्रश्रिताइदमब्रुवन् ॥ १५ ॥ नमोवोविप्रपत्नीभ्योनिबोधतवचांसिनः। इतोऽविदूरेचरताकृष्णेनेहेषितावयम् ॥ १६ ॥ गाश्चारयन्सगोपालैः सरामोदूरमागतः। बुभुक्षितस्यतस्यान्नंसानुगस्यप्रदीयताम् ॥ १७ ॥ श्रुत्वाऽच्युतमुपायान्तंनित्यंतद्दर्शनोत्सुकाः। तत्कथाक्षिप्तमनसोबभूवुर्जातसंभ्रमाः ॥ १८ ॥ चतुर्विधंबहुगुणमन्नमादायभाजनैः। अभिसस्रुः प्रियंसर्वाः समुद्रमिवनिम्नगाः॥१९॥ निषिध्यमानाः पतिभिर्भ्रातृभिर्बन्धुभिः सुतैः। भगवत्युत्तमश्लोकेदीर्घश्रुतधृताशयाः ॥ २० ॥ यमुनोपवनेऽशोकनवपल्लवमण्डिते। विचरन्तंवृतंगोपैः साग्रजंददृशुः स्त्रियः ॥ २१ ॥ श्यामंहिरण्यपरिधिंवनमाल्यबर्हधातुप्रवालनटवेषमनुव्रतांसे। विन्यस्तहस्तमितरेणधुनानमब्जंकर्णोत्पलालककपोलमुखाब्जहासम् ॥ २२ ॥ प्रायः श्रुतप्रियतमोदयकर्णपूरैर्यस्मिन्निमग्नमनसस्तमथाक्षिरन्ध्रैः। अन्तः प्रवेश्यसुचिरंपरिरभ्यतापंप्राज्ञंयथाऽभिमतयोविजहुर्नरेन्द्र ॥ २३ ॥ तास्तथात्यक्तसर्वाशाः

ने "हां,, "ना,, कुछ न कहा तब गोपगणों ने निराश होकर कृष्णजी व बलदेवजीके समीप आय यह सब वृत्तान्त कह सुनाया ॥ १२ ॥ भगवान श्रीकृष्णजी उस बातको सुन हंसकर गोपोंसे कहने लगे कि—हेगोपालगण ! कार्य करतहुए कोई निराश नहीं होता, जो कार्य पूर्ण करनेकी इच्छा करतेहैं उनको निराश न होना चाहिये ॥ १३ ॥ तुम द्विजनारियों के यहां जाकर कहो, कि—मैं राम समेत यहां उपस्थितहूं। वह तुमको अन्न देंगी, वह मुझे बहुत चाहतीहैं उन्होंने मुझमेंही अपनी बुद्धि लगारक्खीहै, ॥ १४ ॥ अनन्तर गोपोंने पत्नीशालामें देखा कि—द्विजपत्नियें सुन्दर अलंकार धारण कियेहुए बैठीहैं। गोपोंने विनय भाव से कहा कि—१५ ॥ हेविप्रपत्नियों ! आपको प्रणामहै। हमारी बात सुनो, श्रीकृष्णजी इस स्थानके समीप भ्रमण कररहे हैं ॥१६॥ वह गोपालगण और बलरामजीके साथ गौ चरातेर बाहरचले आयेहैं इसकारण भूखसे अत्यन्त दुःखित होरहेहैं। आप उनको और उनके सेवकोंको अन्नदानकरें॥१७॥श्रीकृष्णजीके चरित्रों से द्विजनारियोंका मन उनकीओर खिंचगयथा; इसहीकारण वह उनके दर्शन करने की कामना बहुत दिनों से कररहीथीं। इससमय उनके आनेका समाचार सुनकर अत्यन्त अधीर होउठीं॥१८॥बहुतदिनों से भगवान् की लीलाओंको सुनतेहुये उनका चित्त पवित्र कीर्त्ति श्रीकृष्णजीमें बंधगयाथा अतएव पति, पिता, भ्राता, और बंधुओंके निवारण करनेपरभी समुद्र में गिरने वाली नदीके समान, सबही पात्रोंमें भक्ष्य, भोज्य, चोष्य, लेह्य, पेय अन्न लेकर प्यारेके निकट दौड़चलीं ॥ १९।२० ॥ यमुना तीरपर पहुंचकर देखाकि—श्रीकृष्णजी अशोक वृक्षके नवीन पत्तोंसे विभूषित यमुनाके उपवनमें गोपगण तथा बडेभाई के साथ घूमरहे हैं ॥ २१ ॥ उनका श्यामवर्ण है पीतवस्त्र पहिने, गले में वनमाला धारण किये; मोरपंख धातु और पत्तोंद्वारा अपना वेश बनाये नटकी समान शोभा पा रहे हैं। वह एक हाथ सेवकों के कंधेपर रखदूसरे हाथ से एक नील कमल घुमारहे हैं। उनके दोनो कानों में कमल, कपोलों पर अलकें, और कमल मुखमें हास्य शोभित होरहा है ॥ २२ ॥ बारंबार प्रियतम के श्रेष्ठ चरित्रोंको सुनकर उनके कर्ण शोभित होरहे थे इसही कारण सब प्राणियों का मन श्रीकृष्णजी में निमग्न होरहाथा। उन भगवान्को नेत्ररूप द्वारों से अपने हृदय में बिठलाय, बड़ी देरतक आलिंगनकर; सुषुप्तमान पुरुष के आलिंगन से अहं बुद्धिकी समान सब

प्राप्तानात्मदिदृक्षया । विज्ञायाखिलदृग्द्रष्टाप्राहप्रहसिताननः ॥ २४ ॥ स्वागतंवो महाभागाआस्यतांकरवामकिम् । यन्नोदिदृक्षयाप्राप्ताउपपन्नमिदंहिवः ॥ २५ ॥ नन्वद्धामयिकुर्वन्तिकुशलाः स्वार्थदर्शिनः । अहैतुक्यव्यवहितांभक्तिमात्मप्रियेयथा ॥ २६ ॥ प्राणबुद्धिमनः स्वात्मदारापत्यधनादयः । यत्संपर्कात्प्रियाआसंस्ततः कोऽन्वपरः प्रियः ॥ २७ ॥ तद्यातदेवयजनंपतयोवोद्विजातयः । स्वसत्रंपारयिष्यन्तियुष्माभिर्गृहमेधिनः ॥ २८ ॥ पत्न्य ऊचुः ॥ मैवंविभोऽर्हतिभवान्गदितुंनृशंसं सत्यंकुरुष्वनिगमंतवपादमूलम् । प्राप्तावयंतुलसिदामपदावसृष्टंकेशैर्निवोढुमतिलङ्घ्यसमस्तबन्धून् ॥ २९ ॥ गृह्णन्तिनोनपतयः पितरौसुतावानभ्रातृबन्धुसुहृदः कुतएवचान्ये । तस्माद्भवत्प्रपदयोः पतितात्मनांनोनान्याभवेद्गतिररिन्दमतद्विधेहि ॥ ३० ॥ श्रीभगवानुवाच ॥ पतयोनाभ्यसूयेरन्पितृभ्रातृसुतादयः लोकाश्चवोमयोपेतादेवाअप्यनुमन्वते ॥ ३१ ॥ नप्रीतयेऽनुरागायह्यङ्गसङ्गोनृणामिह । तन्मनोमयियुञ्जानाअचिरान्मामवाप्स्यथ ॥ ३२ ॥ श्रीशुक उवाच ॥ इत्युक्तामुनिपत्न्यस्तायज्ञवाटंपुनर्गताः । तेचानसूयवः स्वाभिः स्त्रीभिः सत्रमपारयन् ॥ ३३ ॥ तत्रैकाविधृताभर्त्राभगवन्तंयथाश्रुतम् । हृदोपगुह्यविजहौदेहंकर्मानुबन्धनम् ॥ ३४ ॥ भगवानपिगोविन्दस्तेनैवान्नेनगोपकान् । चतुर्विधेनाऽऽशयित्वास्वयंचबुभुजेप्रभुः ॥ ३५ ॥ एवं

संतापोंको दूर करदिया ॥ २३ ॥ वह सब स्त्रियें आश छोडकर आई हैं--यह जानकर भगवान् श्रीकृष्णजी ने हंसते हुये उनसे कहाकि—॥ २४ ॥ हे महाभाग ! तुमसब सुख से तो आईहो ? आओ बैठो । क्या करनेकी आज्ञा है ? हमारे दर्शन की इच्छा से जोतुम आईहो यह तुमको उचितही है ॥२५॥ जोविवेकी मनुष्य विवेक द्वारा अपने २ अभिप्रायको देखते रहते हैं वह मुझप्रिय आत्मा की भक्ति फलाभिसंधान रहित और निरवच्छिन्न होकर करते हैं ॥ २६ ॥ कारण कि—आत्मा सबसे प्यारा--प्राण, बुद्धि, जातिवाले, देह, धन, पुत्र, कलत्र आदि जिसके संबंध से प्यारे लगते हैं उससे अधिक फिर कौनप्यारा है ॥ २७ ॥ अतएव अबतुम कृतार्थ हुईं; इस समय देव यज्ञको जावो। यद्यपि तुमको याग, यज्ञकी आवश्यकता नहीं है तौभी गृहस्थ ब्राह्मण तुम्हारे स्वामी तुम सबको लेकर उस यज्ञको पूर्ण करेंगे ॥ २८ ॥ द्विजनारियों ने कहाकि--हे विभो ! ऐसे निष्ठुर वचन कहना आपको उचित नहीं है । हम अपने सब स्वजनों की अवज्ञा करके तिरस्कार सेभी दीहुई तुलसीकी मालाके सदृश धारण करनेको अर्थात् दासी होनेको आपके समीप आई हैं ॥२९॥ दूसरे की बाततो दूररही पति, पिता, माता, पुत्र, भ्राता जातिवाले और बंधुगण भी हमको ग्रहण न करेंगे । अतएव हे रिपुदमन ! जिससे हमारी दूसरा गति न होवे आपवही करदेवें । हम आपके चरणों की शरण में आई हैं ॥ ३० ॥ श्रीभगवान् ने कहाकि—पति, पिता, भ्राता और पुत्रादि तथा और मनुष्यभी तुमको दोषनि करसकेंगे और देखो, देवताभी मेरी आज्ञाको स्वीकार करते हैं इस जगत् में मनुष्यको अंगसम सेही सुख प्राप्त होताहो, सोनहीं है तुम मुझमें अपना मन समर्पणकर मुझको प्राप्त होगी मेरे नामादि क सुनने, मुझे देखने, मेरे ध्यान करने और मेरे गुणोंका वर्णन करने से जैसामुझ में प्रेम उत्पन्न होता है केवल मेरे निकट रहने से वैसा प्रेममुझ में नहीं होसकता । अतएव तुम घरको लौटजावो ॥ ३१ ॥ ३२ ॥ श्रीशुकदेवजी बोलेकि—हे राजन् ! श्रीकृष्णजी के इसभांति कहनेपर वह द्विजनारियें फिरयज्ञ स्थानमें लौटआईं । ब्राह्मणों नेभी दोष न देखकर स्त्रियोंको साथले यज्ञ समाप्त किया ॥ ३३ ॥ एक स्त्री स्वामी से पकड़ी जाकर श्री कृष्णजी के दर्शनोंको न जासकी; इस कारण उसने जैसा सुनाथा उसी प्रकार भगवान्का हृदय द्वारा आलिंगनकर कर्मकी अनुगामी देहको छोड़दिया ॥ ३४ ॥ यहां श्रीकृष्णजी ने गोपोंको उस

लीलानरवपुर्लोकमनुशीलयन् । रेमेगोगोपगोपीनांरमयन्रूपवाक्कृतैः ॥ ३६ ॥ अ
थानुस्मृत्यविप्रास्तेअन्वतप्यन्कृतागसः । यद्विश्वेश्वरयोर्याच्ञामहन्मनृविडम्बयोः
॥ ३७ ॥ दृष्ट्वास्त्रीणांभगवतिकृष्णभक्तिमलौकिकीम् । आत्मानंचतयाहीनमनुतप्ता
व्यगर्हयन् ॥ ३८ ॥ धिग्जन्मनस्त्रिवृद्विद्यांधिग्व्रतंधिग्बहुज्ञताम् । धिक्कुलंधिक्क्रि
यादाक्ष्यंविमुखायेत्वधोक्षजे ॥ ३९ ॥ नूनंभगवतोमायायोगिनामपिमोहिनी । यद्व
यंगुरवोनृणांस्वार्थेमुह्यामहेद्विजाः ॥ ४० ॥ अहोपश्यतनारीणामपिकृष्णेजगद्गुरौ ।
दुरन्तभावं योऽविध्यन्मृत्युपाशान्गृहाभिधान् ॥ ४१ ॥ नासांद्विजातिसंस्कारोन
निवासोगुरावपि । नतपोनात्ममीमांसानशौचंनक्रियाः शुभाः ॥ ४२ ॥ अथापिह्यु
त्तमश्लोकेकृष्णेयोगेश्वरेश्वरे । भक्तिर्दृढानचास्माकंसंस्कारादिमतामपि ॥ ४३ ॥
ननुस्वार्थविमूढानांप्रमत्तानांगृहेहया । अहोनःस्मारयामासगोपवाक्यैः सतांगतिः
॥ ४४ ॥ अन्यथापूर्णकामस्यकैवल्याद्याशिषांपतेः । ईशितव्यैः किमस्माभिरीश
स्यैतद्विडम्बनम् ॥ ४५ ॥ हित्वाऽन्यान्भजतेयंश्रीः पादस्पर्शाशयाऽसकृत् । आत्म
दोषापवर्गेणतद्याच्ञाजनमोहिनी ॥ ४६ ॥ देशः कालः पृथग्द्रव्यंमन्त्रतन्त्रर्त्विजो
ग्नयः । देवतायजमानश्चक्रतुर्धर्मश्चयन्मयः ॥ ४७ ॥ सएषभगवान्साक्षाद्विष्णुर्यो
गेश्वरेश्वरः । जातोयदुष्वित्याशृण्मह्यपिमूढानविद्महे ॥ ४८ ॥ अहोवयंधन्यतमाये
षांनस्तादृशीः स्त्रियः । भक्त्यायासांमतिर्जाताह्यस्माकंनिश्चलाहरौ ॥ ४९ ॥ नम

चारो प्रकारका अन्न खिलाय आपभी खाया ॥ ३५ ॥ लीला के निमित्त नर शरीरधारी भगवान् इस प्रकार से मनुष्योंका अनुकरण करते हुये रूप, वाक्य और कर्मद्वारा गौ, ग्वाल और गोपियो को क्रीड़ा कराने तथा स्वयं क्रीड़ा करनेलगे ॥ ३६ ॥ तदनंतर वह ब्राह्मणगण यह विचारकर कि "नररूप धारी भगवान् बलराम जी व कृष्णजी की प्रार्थना का हमने निरादर किया इस से अपराधी हुए" अत्यन्त संताप करनेलगे ॥ ३७ ॥ भगवान् श्रीकृष्णजी में अलौकिक भक्ति और अपनेको भक्ति रहित देखकर वह अनुताप के साथही साथ अपनेको धिक्कारनेलगे ॥ ३८ ॥ हम भगवान से विमुख है । हमारे तीनो जन्मोंको, व्रतको, पाण्डित्यको, कुल, कर्म, और निपुणताको धिक्कार है ॥ ३९ ॥ निश्चयही जानते हैं कि भगवान् की माया योगियों कोभी मोहित करडालती है। हम मनुष्यों के गुरु ब्राह्मण होकर भी अपने स्वार्थको न समझसके ॥ ४० ॥ अहा ! भगवान श्री कृष्णजी में स्त्रियों की तो प्रीतिदेखो कि जिसने घररूप मृत्यु पाशोंको काटदिया ॥ ४१ ॥ ब्राह्मणों की समान इनका उपनयन संस्कार नहीं हुआ; इन्हों ने गुरूकुल में वास नहीं किया, तपस्याभी नही की; और न आत्म तत्वका अन्वेषणही किया । इनके पवित्रता नहीं है; संध्यावन्दनादि शुभ कार्य भी नहीं हैं ॥ ४२ ॥ तौभी योगेश्वरों के ईश्वर भगवान् श्रीकृष्णजी में इनकी दृढ़भक्ति है ! हम संस्कारादि युक्त होनेपरभी उस भक्तिसे विमुख है ॥ ४३ ॥ निश्चयही जानते हैं कि हम स्वार्थ भूलकर घरके कामों मे प्रमत्त होरहे है; साधुओंको गतिदेने वाले भगवान् ने गोपोंके वचनों द्वारा हमको सद्गति का स्मरण करादिया ॥ ४४ ॥ यदिऐसा न होतातो पूर्णकाम, मोक्षदाता, वरदेन वाले भगवान् हमसे याचनाही क्यों करते ? निश्चयही यह भगवान् की विडंबना है ॥ ४५ ॥ लक्ष्मी, चरण स्पर्श की इच्छा करके अपनी चञ्चलताको छोड़ दूसरों का परित्यागकर वारंवार जिसको भजन करती हैं, उनकी याचना देखकर मनुष्योंको केवल विस्मयही उत्पन्न होता है ॥ ४६ ॥ देशो—काल, भिन्न २ द्रव्य, मन्त्र, तन्त्र, ऋत्विक् अग्नि, देवता, यजमान, यज्ञ और धर्म जिस के स्वरूप हैं ॥ ४७ ॥ उन साक्षात् भगवान् योगेश्वरों के ईश्वर विष्णुजी ने यदुकुल में जन्मलिया है यह हमने सुनाथा; तौभी इतने मूर्ख—कि उनको जान न सके ॥ ४८ ॥ अहो हमबड़े धन्य हैं, क्योंकि जिनहमारी स्त्रियां ऐसी भगवत भक्त हैं, जिनकी भक्तिसे हमारी भी हरिमें दृढबुद्धि हुई

नतस्मैभगवतेकृष्णायाकुण्ठमेधसे । यन्मायामोहितधियोभ्रमामःकर्मवर्त्मसु ॥५०॥ सवैनआद्यःपुरुषःस्वमायामोहितात्मनाम् । अविज्ञातानुभावानांक्षन्तुमर्हत्यतिक्रमम् ॥ ५१ ॥ इतिस्वाघमनुस्मृत्यकृष्णेतेकृतहेलनाः । दिदृक्षवोऽप्यच्युतयोःकंसाद्भीतानचाऽचलन् ॥ ५२ ॥

इति श्रीमद्भा० महा० दशमस्कन्धे त्रयोविंशोऽध्यायः ॥ २३ ॥

श्रीशुक उवाच ॥ भगवानपितत्रैवबलदेवेनसंयुतः । अपश्यन्निवसन्गोपानिन्द्रयागकृतोद्यमान् ॥ १ ॥ तदभिज्ञोऽपिभगवान्सर्वात्मासर्वदर्शनः । प्रश्रयावनतोऽपृच्छद्वृद्धान्नन्दपुरोगमान् ॥ २ ॥ श्रीभगवानुवाच ॥ कथ्यतांमेपितःकोऽयंसंभ्रमोवउपागतः । किंफलंकस्यचोद्देशःकेनवासाध्यतेमखः ॥ ३ ॥ एतद्ब्रूहिमहान्कामोमह्यंशुश्रूषवेपितः । नहिगोप्यंहिसाधूनांकृत्यंसर्वात्मनामिह ॥ ४ ॥ अस्त्यस्वपरदृष्टीनाममित्रोदास्तविद्विषाम् । उदासीनोरिवद्वर्ज्यआत्मवत्सुहृदुच्यते॥५॥ ज्ञात्वाऽज्ञात्वाचकर्माणिजनोऽयमनुतिष्ठति । विदुषःकर्मसिद्धिःस्यात्तथानाविदुषोभवेत् ॥ ६ ॥ तत्रतावत्क्रियायोगोभवतांकिंविचारितः । अथवालौकिकस्तन्मेपृच्छतःसाधुभण्यताम् ॥ ७ ॥ नन्द उवाच ॥ पर्जन्योभगवानिन्द्रोमेघास्तस्यात्ममूर्तयः । तेऽभिवर्षन्तिभूतानांप्रीणनंजीवनंपयः ॥ ८ ॥ तंतातवयमन्येचवार्मुचांपतिमीश्वरम् । द्रव्यैस्तद्रेतसासिद्धैर्यजन्तेक्रतुभिर्नराः ॥ ९ ॥ तच्छेषेणोपजीवंति

॥ ४९ ॥ जिन अकुंठित मेधाशाली भगवान श्रीकृष्णजी की माया से मोहित बुद्धि होकर हमकर्म मार्गमें भ्रमण करते हैं उनको नमस्कार है ॥ ५० ॥ उन भगवान की मायासे हम मोहित होकर उनके प्रभावकोन जानके; यह हमसे अपराध हुआ वह आदि पुरुष हमारे अपराधको क्षमाकरें ॥ ५१ ॥ हे राजन् ! श्रीकृष्णजीका अनादरकर उन सब ब्राह्मणों ने इसप्रकार से अपने अपराधका स्मरणकर ब्रजमें जानकी इच्छाकी परन्तु कसके भयसे न जासके ॥ ५२ ॥

इतिश्री मद्भागवतेमहापुराणेदशमस्कंधेसरलाभाषाटीकायांत्रयोविंशोऽध्यायः ॥ २३ ॥

श्रीशुकदेवजी बोले कि—हेराजन् ! ब्राह्मणगण कंस के भय से अपनेही अपने आश्रमों में रह कर भगवान की पूजा करने लगे । इस ओर भगवान श्रीकृष्णजी ने बलरामजी के साथ ब्रज में वासकरते २ देखा कि—गोपगण इन्द्रयज्ञ करने के लिये उद्योग कर रहे हैं ॥ १ ॥ सर्वदर्शी भगवान यद्यपि उस का सबभेद जानतेथे; तौभी विनयपूर्वक नन्द आदि गोपों से पूछने लगे कि- ॥ २ ॥ हे पिता ! आप इतने अधीर क्यों होरहेहो ? किस कारण किस के द्वारा यह यज्ञ सिद्धहो सकता है ? इस का फल क्या है ? हमसे कहो; इस के सुननेकी मेरी अत्यन्त इच्छा है ॥ ३ ॥ जो सबकाही आत्मावत् देखते हैं, और जिसको अपने पराए का ज्ञान नहीं है; भेद ज्ञान के नहोने से जिसका कोई शत्रुमित्र नहीं है; उदासीन नहीं है उनसे कोई कार्य गुप्तनहीं है और भेद ज्ञानके होने से उदासीन कोभी शत्रु की समान छोड देना चाहिये । सुहृदगण आत्मतुल्य होते हैं, इस कारण परामर्श के समय उनका त्याग न करना चाहिये ॥ ४ । ५ ॥ मनुष्यों में कोई जानकर और कोई अनजानकर कर्म करते रहते हैं । जो जानकर करते हैं उन्हीं का काम सिद्ध होताहै और जो अनजानकर करतेहैं उनका कार्य भलीभांतिसे पूर्ण नहींहोता ॥ ६ ॥ आपने यह कार्य करना लौकिक रीतमें विचारा है या शास्त्रसे ? यह आप मुझसे भलीप्रकार कहिये, ॥७॥ नन्दजी ने कहा कि—हेतात ! भगवान् इन्द्र मेघरूपहैं, मेघ उनकी प्रियमूर्तिहैं— वह प्राणियों के कल्याणके निमित्त प्राणके देनेवाले जलकी वर्षा करते रहतेहैं ॥ ८ ॥ हे वत्स ! उन मेघपति के बरसायेहुए जलसे जो पदार्थ उत्पन्न होतेहैं उन्हीं द्वारा यह यज्ञ कियाजाताहै ॥ ९ ॥ यज्ञकर

त्रिवर्गफलहेतवे । पुंसांपुरुषकारायांपर्जन्यःफलभावनः ॥ १० ॥ यएवंविसृजेद्धर्मं पारम्पर्यागतंनरः ।.कामाल्लोभाद्भयाद्द्वेषात्सवैनाप्नोतिशोभनम् ॥ ११ ॥ श्रीशुक उवाच ॥ वचोनिशम्यनन्दस्यतथान्येषांव्रजौकसाम् । इंद्रायमन्युंजनयन्पितरंप्राह केशवः ॥ १२ ॥ श्रीभगवानुवाच ॥ कर्मणाजायतेजन्तुःकर्मणैवविलीयते । सुखं दुःखंभयंक्षेमंकर्मणैवाभिपद्यते ॥१३॥ अस्तिचेदीश्वरःकश्चित्फलरूप्यन्यकर्मणाम्। कर्तारंभजतेसोपिनह्यकर्तुःप्रभुर्हिसः ॥ १४ ॥ किमिंद्रेणेहभूतानांस्वस्वकर्मानुव र्तिनाम् । अनीशेनान्यथाकर्तुंस्वभावविहितंनृणाम् ॥ १५ ॥ स्वभावतन्त्रोहिजनः स्वभावमनुवर्तते । स्वभावस्थमिदंसर्वंसदेवासुरमानुषम् ॥ १६ ॥ देहानुच्चाव चाञ्जन्तुःप्राप्योत्सृजतिकर्मणा । शत्रुर्मित्रमुदासीनःकर्मैवगुरुरीश्वरः ॥१७॥तस्मा त्संपूजयेत्कर्मस्वभावस्थःस्वकर्मकृत् । अञ्जसायेनवर्तेततदेवास्यहिदैवतम् ॥ १८ ॥ आजीव्यैकतरंभावंयस्त्वन्यमुपजीवति । नतस्माद्विंदतेक्षेमंजारंनार्यसतीयथा१९॥ वर्तेतब्रह्मणाविप्रोराजन्योरक्षयाभुवः । वैश्यस्तुवार्तयाजीवेच्छूद्रस्तुद्विजसेवया ॥ २० ॥ कृषिवाणिज्यगोरक्षाःकुसीदंतुर्यमुच्यते । वार्ताचतुर्विधातत्रवयंगोवृत्तयोऽ निशम् ॥ २१ ॥ सत्त्वंरजस्तमइति स्थित्युत्पत्त्यन्तहेतवः । रजसोत्पद्यतेविश्वमन्यो न्यंविविधंजगत् ॥ २२ ॥ रजसाचोदितामेघावर्षंत्यम्बूनिसर्वतः । प्रजास्तैरेवसि ध्यंतिमहेंद्रःकिंकरिष्यति ॥ २३ ॥ ननःपुरोजनपदानग्रामानगृहावयम् । नित्यंवनौ कसस्तातवनशैलनिवासिनः ॥ २४ ॥ तस्माद्गवांब्राह्मणानामद्रेश्चारभ्यतांमखः ।

मे से जो शेष रहताहै मनुष्य धर्म, अर्थ और काम सिद्धके निमित्त उसके द्वारा जीवन धारण क-रतेहैं मनुष्योंके जो कुछ व्यापार व वृत्तियेंहैं उन सबका उत्पन्न करनेवाला मघही है ॥ १० ॥ यह धर्म बहुत समयोंसे चला आताहै । जो मनुष्य काम, द्वेष, भय व लोभके वशहो इस धर्मको छोड़ देताहै उसका कल्याण कभी नहींहोता ॥ ११ ॥ श्रीशुकदेवजी बोले कि—हे राजन् ! नन्दजीकी और दूसरे व्रजवासियोंकी इसबातको सुनकर कृष्णजीने इन्द्रको क्रोधयुक्त करनेके कारण पितासे कहा कि—१२ ॥ हेपिता ! प्राणी कर्मके वशसेही सुख दुःख भय और कल्याण पाते रहते हैं । और यदि दूसरे के कर्मोंका फल देनेवाला एक ईश्वरही रहताहै तो ऐसा होनेसे वहभी कर्म कर ने वालेके आधीनहै क्योंकि जो कर्म नहीं करे वह उसको फल भी नहीं देसकता १३—१४ अत-एव जीवगण जब कर्मोंकेही अनुसारसे वर्ततहैं तब फिर इन्द्रका क्या प्रयोजन ? पूर्व संसकारोंके अनुसारसे मनुष्यके भाग्यमें जो होताहै इन्द्र उसके विपरीत कभी नहीं करसकता, ॥ १५ ॥ म-नुष्य स्वभावकेही आधीन होकर स्वभावकाही अनुसरण करता रहताहै । देवता असुर, मनुष्य स्व-भाव मेंही अवस्थित रहतेहैं ॥ १० ॥ जीवकर्म वशसेही ऊँची नीची देह प्राप्तकर कर्मवशसेही उसका परित्याग करता रहताहै । कर्मही शत्रु, मित्र, उदासीन और ईश्वरहै, ॥ १७ ॥ अतएव स्वभाव स्थित कर्म करनेवाले प्राणीको कर्मही की पूजा करनी चाहिये ॥ १८ ॥ यथार्थमें जिससे आजीविका चले वही देवताहै जैसे व्यभिचारिणी स्त्री उपपतिको पाकर सुख नहीं करसकती वैसेही जो मनुष्य एककी दीहुई आजीविका खाकर दूसरेकी सेवाकर उसको कल्याण कभी नहीं प्राप्त होसकता ॥ १९ ॥ ब्राह्मण को वेदाध्ययनसे क्षत्रीको पृथ्वी शासनसे वैश्यको वार्तासे और शूद्रको तीनोवर्णों की सेवा करके जीविका का निर्वाह करना चाहिये ॥२०॥व्यापार चारप्रकारकाहै—खेती, वनिज, गौ पालन करना और व्याजलेना । इनचार प्रकारों में से हमगौ पालन करते हैं ॥ २१ ॥ सत्व,रज और तम—पालन, उत्पत्तिऔर संहार के कारण हैं । यह संसार तथा और भी जगत रज से उत्पन्नहोते हैं,मेघसमूह रजसे चलितहो सबस्थानों पर जल वर्षाते हैं;जल से धान्यउत्पन्न होता है और उसी धान्य से प्रजा जीती है; अतएव इस में इन्द्रकी क्या आवश्यकता ? ॥ २३ ॥

य इन्द्रयागसंभारास्तैरयं साध्यतां मखः ॥ २५ ॥ पच्यन्तां विविधाः पाकाः सूपान्ताः पायसादयः । संयावापूपशष्कुल्यः सर्वदोहश्च गृह्यताम् ॥२६॥ हूयन्तामग्नयः सम्यग्ब्राह्मणैर्ब्रह्मवादिभिः । अन्नं बहुगुणं तेभ्यो देयं वो धेनुदक्षिणाः ॥ २७ ॥ अन्येभ्यश्चाश्वचाण्डालपतितेभ्यो यथार्हतः । यवसं च गवां दत्त्वा गिरये दीयतां बलिः ॥ २८ ॥ स्वलंकृता भुक्तवन्तः स्वनुलिप्ताः सुवाससः । प्रदक्षिणं च कुरुत गोविप्राऽनलपर्वतान् ॥ २९ ॥ एतन्मम मतं तात क्रियतां यदि रोचते । अयं गोब्राह्मणाद्रीणां मह्यं च दयितो मखः ॥ ३० ॥ श्रीशुक उवाच ॥ कालात्मना भगवता शक्रदर्पं जिघांसता । प्रोक्तं निशम्य नन्दाद्याः साध्वगृह्णंत तद्वचः ॥ ३१ ॥ तथा च व्यदधुः सर्वं यथाह मधुसूदनः वाचयित्वा स्वस्त्ययनं तद्द्रव्येण गिरिद्विजान् ॥ ३२ ॥ उपहृत्य बलीन्सर्वानादृता यवसं गवाम् । गोधनानि पुरस्कृत्य गिरिं चक्रुः प्रदक्षिणम् ॥ ३३ ॥ अनांस्यनडुद्युक्तानि ते चारुह्य स्वलंकृताः । गोप्यश्च कृष्णवीर्याणि गायन्त्यः सद्विजाशिषः ॥३४॥ कृष्णस्त्वन्यतमं रूपं गोपविश्रम्भणं गतः । शैलोऽस्मीति ब्रुवन्भूरि बलिमादद्बृहद्वपुः ॥३५॥ तस्मै नमो व्रजजनैः सह चक्रे आत्मनाऽऽत्मने । अहो पश्यत शैलोऽसौ रूपी नोऽनुग्रहं व्यधात् ॥३६॥ एषोऽवजानतो मर्त्यान्कामरूपी वनौकसः । हन्ति ह्यस्मै नमस्यामः शर्मणे आत्मनो गवाम् ॥३७॥ इत्यद्रिगोद्विजमखं वासुदेवप्रणोदिताः । यथा विधाय ते गोपाः सहकृष्णा व्रजं ययुः ॥३८॥ इति श्रीमद्भा० म० दशम० पू० चतुर्विंशोऽध्यायः ॥ २४ ॥

हमारे नगर, बस्ती, गांव, घर कुछभी नहीं है हम वनवासी हैं ॥ २४ ॥ अतएव गौ, ब्राह्मण और पर्वत इनकी पूजाके निमित्तही यज्ञ करना चाहिये। इन्द्र के यज्ञके निमित्त यह जो सामग्री इकट्ठी हुई है उस से इस यज्ञ का आरम्भकरो ॥ २५ ॥ खीर से लेकर दालतक, हलवा, लपसी, मालपुवा पूरी, कचौरी, करो और सब गौओं का दूध दुहलो ॥ २६ ॥ वेदवेत्ता ब्राह्मणों के हाथ से अग्नि में होम करनेका आरंभकरो। और उनको नाना प्रकारके अन्नदान व गोदान दो ॥ २७ ॥ श्वपच चाण्डाल और पतित आदि अन्यान्य मनुष्यों कोभी यथा योग्य दानकरो। गौओं को तृण और पहाड़को बलिदानकरो ॥ २८ ॥ भोजन के अंतमें उत्तम वस्त्र आभूषण पहिन तथा चंदन लेपन करगौ, ब्राह्मण, अग्नि और पर्वत की परिक्रमाकरो ॥ २९ ॥ हे पिता ! यही मेरी इच्छा है; यदि अच्छा समझोतो करो। यह यज्ञगौ ब्राह्मण आदिको तथा मुझको भी प्रिय है ॥ ३० ॥ श्रीशुकदेव जी बोलेकि-हे राजन ! काल रूपी भगवान श्रीकृष्णजी ने इन्द्रका अहंकार नाश करने की इच्छा से जोकुछ कहा उनको सुनकर नंदादि गोप सतुष्ट हुये और उनको "साधु साधु" कह उनके कथनानुसार यज्ञ करनेलगे ॥ ३१ ॥ स्वस्ति वाचन कराय आदर पूर्वक पहाड़ और ब्राह्मणो को वह सब सामग्री भेंटमेंदे गौओंको तृणदिया और गोधनको आगेकर पहाड़की परिक्रमा करनेलगे ॥ ३२ ॥ ३३ ॥ गोपियें भी भली प्रकार से वस्त्र आभूषण पहिन श्रेष्ठ बैलों युक्त गाड़ीपर सवार हो श्रीकृष्णजी के चारित्रोंका गान करती हुई पहाड़ की परिक्रमा करने लगीं। ब्राह्मण आशीर्वाद देनेलगे ॥ ३४ ॥ श्रीकृष्णजी गोपोंको विश्वास उत्पन्न कराने के निमित्त दूसरे प्रकारका रूपधारण कर "मैंपर्वतहूं" यह कहकर ढेरोंबलिका भोजन करनेलगे। उस समय उनका शरीर दीर्घ होगया ॥ ३५ ॥ अनतर व्रज वासियों के साथ आपने भी उस पर्वत रूपी आपनेको नमस्कार करके कहा कि-इस आश्चर्यकोतो देखो ! इस पर्वत ने देह धारणकर हमारे ऊपर अनुग्रहकी है। यह कामरूपी है। जोवनवासी इसका निरादर करते हैं उनको यह नाश करते रहते हैं। हम-अपने और गौओं के कल्याण के निमित्त इसको प्रणाम करते हैं ॥ ३६ ॥ ३७ ॥ श्रीकृष्णजी की आज्ञानुसार इस प्रकार यथारीति से यज्ञकर गोपगण उनके साथ व्रजमें लौटआये ॥ ३८ ॥

इतिश्री मद्भागवतेमहापुराणेदशमस्कन्धेसरलाभाषाटीकायांचतुर्विंशोऽध्यायः ॥ २४ ॥

श्रीशुक उवाच ॥ इन्द्रस्तदात्मनः पूजांविज्ञायविहतांनृप । गोपेभ्यः कृष्णनाथेभ्योनन्दादिभ्यश्चकोपसः ॥ १ ॥ गणंसांवर्तकंनाममेघानांचान्तकारिणाम् । इन्द्रःप्राचोदयत्क्रुद्धोवाक्यंचाहेशमान्युत ॥ २ ॥ अहोश्रीमदमाहात्म्यंगोपानांकाननौकसाम् । कृष्णमर्त्यमुपाश्रित्ययेचक्रुर्देवहेलनम् ॥ ३ ॥ यथादृढैः कर्ममयैः क्रतुभिर्नामनौनिभैः । विद्यामान्वीक्षिकींहित्वातितीर्षन्तिभवार्णवम् ॥ ४ ॥ वाचालंबालिशंस्तब्धमज्ञंपण्डितमानिनम् । कृष्णंमर्त्यमुपाश्रित्यगोपामेचक्रुरप्रियम् ॥ ५ ॥ एषांश्रियावलिप्तानांकृष्णेनाध्मापितात्मनाम् । धुनुतश्रीमदस्तम्भंपशून्नयतसंक्षयम् ॥ ६ ॥ अहंचैरावतंनागमारुह्यानुव्रजेव्रजम् । मरुद्गणैर्महावेगैर्नन्दगोष्ठजिघांसया ॥ ७ ॥ श्रीशुक उवाच ॥ इत्थंमघवताऽऽज्ञप्तामेघानिर्मुक्तबन्धनाः । नन्दगोकुलमासारैः पीडयामासुरोजसा ॥ ८ ॥ विद्योतमानाविद्युद्भिः स्तनन्तः स्तनयित्नुभिः । तीव्रैर्मरुद्गणैर्नुन्नाववृषुर्जलशर्कराः ॥ ९ ॥ स्थूणास्थूलावर्षधारामुञ्चत्स्वभ्रेष्वभीक्ष्णशः । जलौघैः प्लाव्यमानाभूर्नादृश्यतनतोन्नतम् ॥ १० ॥ अत्यासारातिवातेनपशवोजातवेपनाः । गोपागोप्यश्चशीतार्तागोविन्दंशरणंययुः ॥ ११ ॥ शिरः सुतांश्चकायेनप्रच्छाद्यासारपीडिताः । वेपमानाभगवतः पादमूलमुपाययुः ॥ १२ ॥ कृष्णकृष्णमहाभागत्वन्नाथंगोकुलंप्रभो । त्रातुमर्हसिदेवान्नः कुपिताद्भक्तवत्सल ॥ १३ ॥ शिलावर्षनिपातेनहन्यमानमचेतनम् । निरीक्ष्यभगवान्मेनेकुपितेन्द्रकृतंहरिः ॥ १४ ॥ अपर्त्वत्युल्बणंवर्षमतिवातंशिलामयम् । स्वयागेविहतेऽस्माभि

तृणचरानुगंश्रीनिकेतनम् । फणिफणार्पितंतेपदाम्बुजंकृणुकुचेषुनः कृन्धिहृच्छयम् ॥ ७ ॥ मधुरयागिरावल्गुवाक्ययाबुधमनोज्ञयापुष्करेक्षण । विधिकरीरिमावीरमुह्यतीरधरसीधुनाऽऽप्याययस्वनः ॥ ८ ॥ तवकथाऽमृततप्तजीवनंकविभिरीडितं कल्मषापहम् । श्रवणमङ्गलंश्रीमदाततंभुविगृणन्तितेभूरिदाजनाः ॥ ९ ॥ प्रहसितं प्रियप्रेमवीक्षणंविहरणंचतेध्यानमङ्गलम् । रहसिसंविदो याहृदिस्पृशः कुहकनोम नः क्षोभयन्तिहि ॥ १० ॥ चलसियद्व्रजाच्चारयन्पशून्नलिनसुन्दरंनाथतेपदम् । शिलतृणांकुरैः सीदतीतिनः कलिलतांमनः कान्तगच्छति ॥ ११ ॥ दिनपरिक्षयेनीलकुन्तलैर्वनरुहाननंबिभ्रदावृतम् । घनरजस्वलंदर्शयन्मुहुर्मनसिनः स्मरंवीरयच्छसि ॥ १२ ॥ प्रणतकामदंपद्मजार्चितंधरणिमण्डनंध्येयमापदि । चरणपङ्कजंशन्तमंचतेरमणनः स्तनेष्वर्पयाधिहन् ॥ १३ ॥ सुरतवर्धनंशोकनाशनंस्वरितवेणुनासुष्ठुचुम्बितम् । इतररागविस्मारणंनृणांवितरवीरनस्तेऽधरामृतम् ॥ १४ ॥ अटतियद्भवानह्निकाननं त्रुटिर्युगायते त्वामपश्यताम् ॥ कुटिलकुन्तलं श्रीमुखंचते जडउदीक्षतां पक्ष्मकृद्दृशाम् ॥ १५ ॥ पतिसुतान्वयभ्रातृबान्धवानतिविलंघ्य तेऽन्त्यच्युतागताः । गतिविदस्तवोद्गीतमोहिताः कितव योषितःकस्त्यजेन्निशि ॥ १६ ॥

और बांधवोंका निरादरकर तुम्हारे समीप आई हैं। हे शठ ! रात्रिकाल में शरण में आईहुई स्त्रियों तुम्हारे चरण कमल—जोशरणागत प्राणियों के पाप नाशक और पशुओं के पीछे फिरने वाले हैं; लक्ष्मी उनमें वासकरती हैं, तुमने सर्पके फणपर उनको अर्पण किया है; इस समय हमारे कुचों को दान करके हमारे कामदेव की व्यथाहरो ॥ ७ ॥ हे कमल लोचन ! हम तुम्हारी दासी हैं; आपके मधुर पदोंयुक्त पण्डितोंकेभी हृदय ग्राही वाक्यों से हम मोहितहुई हैं अधरामृत द्वारा हमको चैतन्यकरो ॥ ८ ॥ पृथ्वीपर संतप्त जनोंको जीवन देनेवाले कवियों से पूजित, काम और कर्मके निवारक, श्रवण करने सेही कल्याण देनेवाले आपके सुन्दर कथामृत का जोविस्तार पूर्वक उच्चा-रणकरते हैं उन्हों ने पूर्वजन्म में अनेकों दानकिये हैं ॥ ९ ॥ हे प्रिय ! हे कपटी ! जिसका ध्यान करनेसे कल्याणहोता है, तुम्हारी वह हास्य, वह प्रेमयुक्त कटाक्ष, वह बिहार, और वह मनको मोहित करने वाली क्रीडाका स्मरण आनें से हमारा चित्त क्षुभित होता है ॥ १० ॥ हे कांत ! हे नाथ ! जबतुम पशुचराते चराते व्रजसे चलेजातेहो, तब यह विचारकरकि—तुम्हारे कोमलचरण कंकर और कांटों से दुःख पातेहोंगे हमारा मन अत्यंत व्याकुल होजाता है ॥ ११ ॥ हे वीर ! दिनके अंतमें जब तुमगाऐं लेकर लौट आतेहो तब अपने केशों से घिरेहुये, गोरज से व्याप्त कमल मुख का दर्शनदे हमको कामपीडा उत्पन्न करदेतेहो परन्तु संग नहीं देते; इससे तुमको कपटी कहें या न कहें ॥ १२ ॥ हे रमण ! हे आर्तिहर ! तुम्हारे चरण कमल—शरणागतों की अभिलाषाको पूर्ण करने वाले, लक्ष्मी के कर कमलों से सेवित, पृथ्वीके भूषण विपत्ति कालमें ध्यान करने योग्य, और सेवा के समय में सुख देनेवाले हैं; इस समय उन चरणोंको हमारे स्तनोंपर धरो ॥ १३ ॥ तुम्हारा अधरामृत,—कामोद्दीपक और शोकनाशक है; शब्दायमान वंसी भली प्रकार से उसका चुंबन करती रहती है । उस अधरामृत से मनुष्यों की सार्व भौमादि सुखेच्छा भी विस्मृत होती है । आप हमको उसी अधरामृतका पान कराओ ॥ १४ ॥ दिनमें जब आप वृन्दावन में भ्रमण करते हो तब तुमको न देखकर हम आधेक्षणको भी युगकी समान जानती हैं । इसके अनंतर जबतुम दिनके अंतमें आतेहो तब सुंदर घूंघर वाले बालों से युक्त आपके श्री मुखका दर्शन अनिमिष नेत्रों से करती हैं; उस काल पलकें बनाने वाला ब्रह्मा हमें मूर्ख जानपड़ता है ॥ १५ ॥ हे अच्युत ! तुमगीतों की गतिके जानतहो; तुम्हारे उच्चगीतों से मोहितहो हम पति, पुत्र, जातिवाले, भ्राता

रहसिसंविदंहृच्छयोदयं प्रहसिताननंप्रेमवीक्षणम् । बृहदुरःश्रियोवीक्ष्यधामते मुहुरतिस्पृहामुह्यतेमनः ॥ १७ ॥ व्रजवनौकसां व्यक्तिरंगते वृजिनहन्त्र्यलं विश्वमङ्गलम् । त्यजमनाक्चनस्त्वत्स्पृहात्मनां स्वजनहृद्रुजां यन्निषूदनम् ॥ १८ ॥ यत्तेसुजातचरणाम्बुरुहं स्तनेषुभीताःशनैः प्रियदधीमहि कर्कशेषु । तेनाटवीमटसितद्व्यथते न किंस्वित्कूर्पादिभिर्भ्रमति धीर्भवदायुषांनः ॥ १९ ॥

इति श्रीमद्भा० महा० दशमस्कंधे नामैकत्रिंशोऽध्यायः ॥ ३१ ॥

श्रीशुक उवाच ॥ इतिगोप्यःप्रगायन्त्यः प्रलपन्त्यश्चचित्रधा । रुरुदुः सुस्वरंराजन्कृष्णदर्शनलालसाः ॥ १ ॥ तासामाविरभूच्छौरिः स्मयमानमुखाम्बुजः । पीताम्बरधरः स्रग्वीसाक्षान्मन्मथमन्मथः ॥ २ ॥ तंविलोक्यागतंप्रेष्ठंप्रीत्युत्फुल्लदृशोऽबलाः । उत्तस्थुर्युगपत्सर्वास्तन्वः प्राणमिवागतम् ॥ ३ ॥ काचित्कराम्बुजंशौरेर्जगृहेऽञ्जलिनामुदा । काचिद्दधारतद्बाहुमंसेचन्दनभूषितम् ॥ ४ ॥ काचिदञ्जलिनागृह्णात्तन्वीताम्बूलचर्वितम् । एकातदङ्घ्रिकमलं सन्तप्तास्तनयोरधात् ॥ ५ ॥ एकाभ्रुकुटिमाबध्यप्रेमसंरम्भविह्वला । घ्नन्तीवैक्षत्कटाक्षेपैः संदष्टदशनच्छदा ॥ ६ ॥ अपराऽनिमिषद्दृग्भ्यांजुषाणातन्मुखाम्बुजम् । आपीतमपिनातृप्यत्सन्तस्तच्चरणंयथा ॥ ७ ॥ तंकाचिन्नेत्ररन्ध्रेणहृदिकृत्यनिमील्यच । पुलकाङ्गु

को तुम्हारे अतिरिक्त और कौन छोड़सकता है ॥ १६ ॥ तुम्हारी काम उत्पन्न करने वाली सुंदर क्रीड़ा, हंसता हुआमुख, प्रेमयुक्त कटाक्ष, और लक्ष्मी के निवास भूतविशाल वक्षःस्थलको देखकर हमारा चित्तवारंवार मोहित होता है ॥ १७ ॥ हे सखे ! तुम्हारा प्रगट होना ब्रजवासियोंका दुःख नाशक, और जगतका मंगल स्वरूप है । तुम्हारे मिलने का इच्छा से हमारा चित्त व्याकुल होरहा है जिससे तुम अपने भक्तों के हृदयका रोगनाश करतेहो, आप कृपणता छोड़ कृपाकर वही औषधि हमको दीजिये ॥ १८ ॥ हे प्यारे ! तुम्हीं हमारे जीवमहो; पीछे दुःख होताहोगा,—इसही भयसे हम तुम्हारे जिनचरण कमलोंको अपने कठिन कुचोंके तृप्तकरने के निमित्त धारण करती हैं तुम उन्हीं पांवों से जंगल में भ्रमण करतेहो । क्या कंकरों से उन्हें दुःख न पहुंचताहोगा ? यही विचारकर हमारा हृदय व्याकुल होता है ॥ १९ ॥

इतिश्री मद्भागवतेमहापुराणेदशस्कंधेसरलाभाषाटीकायांएकत्रिंशोऽध्यायः ॥ ३१ ॥

श्रीशुकदेवजी बोले कि—हेराजन् ! गोपिका गण श्रीकृष्णजी के दर्शनों की अभिलाषा से इसप्रकार गानकरतीं और बहुत प्रकारसे विलापकर २ रोरहीथीं ॥ १ ॥ कि उसी समय हास्य मुख, पीताम्बरधारी, साक्षात् कामदेव को भी मोहित करनेवाले श्रीकृष्णजी उनके निकट आये ॥ २ ॥ प्यारे को सामने देखकर गोपियें अति आनन्दितहुईं, उन के कमल से नेत्र खिल गये प्राणों के लौटआने से जैसे हाथ पांव सचेतहोजाते हैं वैसेही वह श्रीकृष्णजी को पाय पुनर्जीवितहो फिर एकबार उठखड़ी हुईं ॥ ३ ॥ किसी गोपी ने आनन्दितहो श्रीकृष्णजी के दोनों कर कमल पकड़ लिये । किसी ने उनकी चन्दन चर्चित भुजा अपने कन्धे में रखली ॥ ४ ॥ किसी रमणी ने उन का चाबाहुआ पान अंजुली में लेलिया, किसी विरह से सन्तप्तहुई गोपकी ने उन के दोनों चरण अपने दोनों स्तनों पर रखलिये ॥ ५ ॥ और एक स्त्री प्रेम के कोप से विह्वलहो भृकुटी चढ़ाय, होंठ काटतीहुई कटाक्ष मार कर देखने लगी ॥ ६ ॥ कोई २ रमणी अनिमिष दोनों नेत्रों से बारम्बार उन के कमलमुख का पानकरने लगी; किंतु श्रीकृष्णजीके चरणों को देखकर जैसे साधुओं को तृप्तिनहीं होती तैसेही उन स्त्रियों की तृषा शांतिनहुई ॥ ७ ॥ कोई स्त्री नेत्रमार्ग से उनको

पगुह्यास्तेयोगीवानन्दसंप्लुता ॥८॥ सर्वास्ताः केशवालोकपरमोत्सवनिर्वृताः । ज-हुर्विरहजंतापंप्राज्ञंप्राप्ययथाजनाः ॥ ९ ॥ ताभिर्विधूतशोकाभिर्भगवानच्युतोवृतः व्यरोचताधिकंतातपुरुषः शक्तिभिर्यथा ॥ १० ॥ ताः समादायकालिन्द्यानिर्विश्य पुलिनंविभुः । विकसत्कुन्दमन्दारसुरभ्यनिलषट्पदम् ॥ ११ ॥ शरच्चन्द्रांशुस न्दोहध्वस्तदोषातमः शिवम् । कृष्णायाहस्ततरलाऽऽचितकोमलवालुकम् ॥ १२ ॥ तद्दर्शनाह्लादविधूतहृद्रुजोमनोरथान्तंश्रुतयोयथाययुः । स्वैरुत्तरीयैः कुचकुङ्कु माङ्कितैरचीक्लृपन्नासनमात्मबन्धवे ॥ १३ ॥ तत्रोपविष्टोभगवान्सईश्वरोयोगेश्वरान्त र्हृदि कल्पितासनः । चकास गोपीपरिषद्गतोर्चितस्त्रैलोक्यलक्ष्म्येकपदं वपुर्दधत ॥ १४ ॥ सभाजयित्वातमनंगदीपनं सहासलीलेक्षणविभ्रमभ्रुवा । संस्पर्शनेनाङ्क-कृताङ्घ्रिहस्तयोः संस्तुत्यईषत्कुपिताबभाषिरे ॥ १५ ॥ गोप्यऊचुः । भजतोऽनुभ-जन्त्येक एकएतद्विपर्ययम् । नोभयांश्चभजन्त्यन्य एतन्नोब्रूहिसाधुभोः ॥ १६ ॥ श्री भगवानुवाच ॥ मिथोभजन्तियेसख्यः स्वार्थैकान्तोद्यमाहिते ॥ नतत्रसौहृदंधर्मः स्वार्थार्थंतद्धिनान्यथा ॥ १७ ॥ भजन्त्यभजतोयेवै करुणाःपितरोयथा । धर्मोनिर-

हृदय में लेजाय, दोनों आंखें बन्दकर, उनका आलिंगनकर पुलकित शरीर और आनन्दमयहोकर योगियों की समान आनन्द में मग्नहोगई ॥ ८ ॥ हेराजन् ! जैसे मुमुक्षु मनुष्य ईश्वर को पाकर संसार के ताप को दूरकरता है, वैसेही श्रीकृष्णजी के दर्शन के कारण परमानन्द में सुखीहो सब गोपिकाओं ने विरह से उत्पन्नहुए सन्ताप को दूर किया ॥ ९ ॥ हेतात ! भगवान् अच्युत उन सब पापरहित गोपियों से घिरकर, सत्वादि गुणों से वेष्टित परमात्माकी समान अत्यन्त शोभा को पानेलगे ॥ १० ॥ मदन—मोहन उन सब गोपियों को ले यमुना की सुखदाई रेती में जाय क्रीड़ा करनेलगे उस रेती में खिलेहुए कुन्द और मन्दारकी सुगंधि से सुगंधित हुई पवन चलरही थी और भौंरे गूंजरहेथे ॥ ११ ॥ शारदीय चन्द्रमाकी किरणों से रात्रि का अन्धकार दूरहोगया, यमुनाजी ने अपने हाथों की समान लहरों से सुन्दरबालू बिछादीथी ॥ १२ ॥ श्रीकृष्णजी का दर्शन पायकर गोपियों की कामव्यथा नाशहोगई । श्रुतियें कर्मकाण्डमें परमेश्वर को नहीं देखतीं कर्मों का अनुगमनकर जैसे अपूर्ण काम की समानरहती हैं परन्तु ज्ञानकाण्ड में परमेश्वरको देख आनन्द से पूर्णकामहो कामनाओं को त्यागकरती हैं, वैसही श्रीकृष्णजी के दर्शन से सबगोपियें पूर्णकामहुई । उन्होंने कुच केसर से रंगेहुए अपने २ उत्तरीयवस्त्र से भगवान का आसन बना दिया ॥ १३ ॥ योगेश्वरों के हृदय में जिनका आसन विराजमान रहता है, आज वेही भगवान श्रीकृष्णजी गोपियों की सभाके बीचमें उनके बनायेहुए उस आसन पर बैठे । त्रिलोकीमें जितनी शोभा है भगवान उतनी सबशोभा का केवल एक शरीर धारणकर गोपियों की मण्डली के बीच सम्मानितहो शोभा पानेलगे ॥ १४ ॥ उनके चरण और हाथों को गोपियें गोद में ले चापती हुई हास्य व विलास सहित शोभायमान भ्रुकुटी से कामदेव का उद्दीपन करनेवाले भगवानकासन्मान कर कुछ एक कुपित होकर कहनेलगीं ॥ १५ ॥ हे श्रीकृष्ण ! कोई मनुष्य एक जनके भजन करनेपर उसका भजन करता है, कोई मनुष्यइसके विपरीत करतारहता है, कोई मनुष्य स्वयंही परस्पर एक दूसरे का भजन नहीं करते हैं हे सखे ! इसका भलीप्रकारसे निर्णयकरके हमसेकहो ॥ १६ ॥ श्रीभगवान् ने कहा कि—हेसखीगण! जो स्वार्थ साधन की इच्छाकरते हैं वेही परस्पर भजन करते रहते हैं वहां कोई सुहृदपन व धर्म नहीं है; स्वार्थही उनका अभिप्राय है,-इस के अतिरिक्त और कुछ नहीं है ॥ १७ ॥ किंतु जो नहीं भजनेवाले का भजते हैं वह कृपालु और

पवादोऽत्र सौहृदंचसुमध्यमाः ॥ १८ ॥ भजतोऽपिनवैकेचिद्भजन्त्यभजतःकुतः आत्मारामा ह्याप्तकामा अकृतज्ञागुरुद्रुहः ॥ १९॥ नाहंतुसख्योभजतोऽपि जन्तून्भ- जाम्यमीषामनुवृत्तिवृत्तये । यथाऽधनोलब्धधनेविनष्टे तच्चिन्तयाऽन्यन्निभृतोनवे द ॥२० ॥ एवंमदर्थोज्झितलोकवेदस्वानां हिवो मय्यनुवृत्तयेऽबलाः । मयापरोक्षं भजतातिरोहितं माऽसूयितुंमार्हथतत्प्रियंप्रियाः ॥ २१ ॥ नपारयेऽहंनिरवद्यसंयुजां स्वसाधुकृत्यं विबुधायुषापिवः। याऽमाभजन्दुर्जरगेहशृङ्खलाः संवृश्च्यतद्वःप्रति- यातु साधुना ॥ २२ ॥

इति श्रीमद्भा० महा० दशमस्कंधे द्वात्रिंशोऽध्यायः ॥ ३२ ॥

श्रीशुकउवाच ॥ इत्थंभगवतोगोप्यः श्रुत्वावाचः सुपेशलाः । जहुर्विरहजंता पंतदङ्गोपचिताशिषः ॥ १ ॥ तत्रारभतगोविन्दोरासक्रीडामनुव्रतैः । स्त्रीरत्नैरन्वि तः प्रीतैरन्योन्याबद्धबाहुभिः ॥ २ ॥ रासोत्सवःसंप्रवृत्तो गोपीमण्डलमण्डितः । योगेश्वरेणकृष्णेन तासांमध्येद्वयोर्द्वयोः । प्रविष्टेनगृहीतानां कण्ठेस्वनिकटंस्त्रियः। ॥ ३ ॥ यं मन्येरन्नभस्तावद्विमानशतसंकुलम्। दिवौकसां सदाराणामौत्सुक्याप हृतात्मनाम् ॥ ४ ॥ ततोदुन्दुभयो नेदुर्निपेतुःपुष्पवृष्टयः । जगुर्गन्धर्वपतयःसस्त्री कास्तद्यशोऽमलम् ॥ ५ ॥ वलयानांनूपुराणां किंकिणीनांचयोषिताम् । सप्रिया-

स्नेही हैं जैसे माता पिता—ऐसे भजन मे दयालु मनुष्यों को निष्काम धर्म और स्नेहमयमनुष्यों को सुहृदता प्राप्त होती रहती है ॥ १८ ॥ यहांपर अनिन्दित धर्म और सुहृदता दोनोंही हैं । जो आत्माराम, पूर्णकाम, अकृतज्ञ व गुरूद्रोही हैं वह—भजन नहीं करते सो उनकी बातनो दूररही, जो भजन करते हैं उनकाभी भजन नहीं करते॥१९॥हे सखीगण ! मैंतो—अपनेभजन करनेवालोंका भी भजन नहीं करता। क्योंकि ऐसा होनेसे वह निरंतरही मेराध्यान किया करते हैं । जैसे दरिद्री पुरुष धनपाकर, उसके खोजानेसे उस धनकी जैसे चिंता कियाकरता है और दूसरी सब चिंताको भूलजाता है ॥ २० ॥ हे अवलाओं ! इसी प्रकार तुमनेभी मेरे निमित्त धर्मा धर्मका विचार न कर लोक और जातिवालोंको छोड़दिया है, तुमने निरतरही मेराध्यान किया इसही कारण मैं अतर्धान होगयाथा, और अदृश्य रहकर, तुम्हारे प्रेमके वचन सुनताथा,अतएव हे प्यारियों ! प्यारे परदो- षारोपण करना तुम्हें उचित नहीं है ॥ २१ ॥ तुमवड़ा दृढ़घरका बधन छोड़कर मेरे साथमिलीहो। इस मिलाप से कुछनिंदा नहीं की जासकती । मैं देवताओं कीसी परमायुपाकर भी तुम्हारा प्रत्युप- कार नहीं करसकता । अतएव मैं तुम्हारी सुशीलताही से अऋणी होसकता हू प्रत्युकार द्वारा नहीं होसकता ॥ २२ ॥

इतिश्री मद्भागवतेमहापुराणेदशस्कंधेसरलाभाषाटीकायांद्वात्रिंशोऽध्यायः ॥ ३२ ॥

श्रीशुकदेवजी बोले कि—हेराजन् ! अत्यन्त कोमल चित्तवाली गोपिकाओंने भगवानके ऐसे सांत्वना युक्त वाकय सुन पूर्णकामहो विरहसे उत्पन्न हुये सन्तापको छोड़ परमानन्दितहो परस्पर एक दूसरे की भुजायें पकड़लीं । श्रीगोविंद उन सब स्त्री रत्नोंसे वेष्टितहो रासलीला करने लगे ॥ ॥ १—२ ॥ रासोत्सवके आरम्भ होनेपर गोपी मण्डलसे घिर भगवान् श्रीकृष्णजीने दो २ जनोंके बीचमें प्रवेशकर गोपियोंके गलेमें हाथडाललिये इससे प्रत्येक गोपीने जाना कि—श्रीकृष्णजी हमारेही निकटहैं ॥ ३ ॥ रासके आरम्भ होतेही आकाश में देवता अपनी २ स्त्रियों समेत रास देखनेको आये उनके विमानों से आकाश मण्डल परिपूर्ण होगया ॥ ४ ॥ उन्होंने आकाशसे दुंदुभी बजाने तथा फूल बरसानेका आरम्भ किया और स्त्रियां समेत गन्धर्व पति श्रीकृष्णजी के निर्मल यशको गानेलगे ॥ ५ ॥ रास मण्डलमें प्यारेके साथकी स्त्रियोंके कंकण नूपुर और किं-

कामभूच्छब्दस्तुमुलो रासमण्डले ॥ ६ ॥ तत्रातिशुशुभे ताभिर्भगवान्देवकीसुतः ॥ मध्येमणीनां हैमानां महामरकतोयथा ॥ ७ ॥ पादन्यासैर्भुजविधुतिभिः सस्मितैर्भ्रूविलासैर्भज्यन्मध्यैश्चलकुचपटैः कुण्डलैर्गण्डलोलैः ॥ स्विद्यन्मुख्यः कबररशनाग्रन्थयः कृष्णवध्वो गायन्त्यस्तं तडित इवता मेघचक्रे विरेजुः ॥ ८ ॥ उच्चैर्जगुर्नृत्यमाना रक्तकण्ठ्योरतिप्रियाः । कृष्णाभिमर्शमुदिता यद्गीतेनेदमावृतम् ॥ ९ ॥ काचित्समंमुकुन्देनस्वरजातीरमिश्रिताः । उन्निन्येपूजितातेन प्रीयतासाधुसाध्विति । तदेवध्रुवमुन्निन्ये तस्यैमानंचबह्वदात् ॥ १० ॥ काचिद्रासपरिश्रान्ता पार्श्वस्थस्य गदाभृतः ॥ जग्राहबाहुनास्कन्धं श्लथद्वलयमल्लिका ॥ ११ ॥ तत्रैकांसगतंबाहुं कृष्णस्योत्पलसौरभम् । चन्दनालिप्तमाघ्राय हृष्टरोमाचुचुम्बह ॥ १२ ॥ कस्याश्चिन्नाट्यविक्षिप्त कुण्डलत्विषमण्डितम् । गण्डंगण्डे संदधत्या आदात्तांबूलचर्वितम् ॥ १३ ॥ नृत्यन्तीगायतीकाऽपि कूजन्नूपुरमेखला । पार्श्वस्थाच्युतहस्ताब्जं श्रान्ताऽधात्स्तनयोः शिवम् ॥ १४ ॥ गोप्योलब्ध्वाऽच्युतंकान्तं श्रियएकान्तवल्लभम् ॥ गृहीतकण्ठ्यस्तद्दोर्भ्यां गायन्त्यस्तंविजह्रिरे ॥ १५ ॥ कर्णोत्पलालकविटंककपोलघर्मवक्त्रश्रियो वलयनूपुरघोषवाद्यैः । गोप्यःसमंभगवता ननृतुः स्वकेशस्रस्तस्रजो भ्रमरगायकरासगोष्ठ्याम् ॥ १६ ॥ एवं परिष्वङ्गकराभिमर्शस्निग्धेक्षणोद्दामवि

किणीका बड़ाभारी शब्द होनेलगा ॥ ६ ॥ भगवान् श्रीकृष्णजी उन सब गोपियोंके बीचमें स्वर्ण वर्णकी मणियोंसे मण्डित मरकत मणिकी समान शोभा पानेलगे ॥ ७ ॥ पैरों का चलाना भुज कंपाना हसकर भौंहें चलाना कमर कचकाना कुचोंको चंचलकरना आदि और कपोलोंके ऊपर कुण्डलोंके हिलनसे उन गोपियों के कमल मुखसे पसीना निकलआया उनका जूड़ा और नाराडोंका पड़गया श्रीकृष्णजीका गान करतीहुई मेघमण्डल में बिजली की समान शोभा पानेलगीं ॥ ८ ॥ वे रक्तकण्ठवाली गोपियें श्रीकृष्णजीके अंगस्पर्शसे आनन्दितहो उच्चस्वरस गाने लगीं उस गानसे ब्रह्माण्ड परिपूर्ण होगया ॥ ८—९ ॥ श्रीकृष्णजी जिस स्वरसे जिसप्रकार गातेथे गोपियें उनके उस स्वरसे गीत न मिलाय कर नानाप्रकारसे स्वयं गानेलगीं । श्रीकृष्ण जी उसस आनन्दितहो उनकी प्रशंसा करनेलगे । गोपियें उसीस्वर को ही ध्रुवताल से बदलकर गाने लगीं, । श्रीकृष्णजीने उनका यथोचित सत्कारकिया रासके श्रमसे श्रमितहो किसी गोपीके वलय और किसी की मल्लिका डोंली पडगयी, उन्हों ने बाहुद्वारा पार्श्व में खड़ेहुए माधव के कंधेपर हाथ रखलिये ॥१०-११॥ एक गोपी—भगवान को कमल की समान सुगंधितचदन से चर्चित भुजाको अपने कंधेपर रख उसेसूंघ, रोमांचितहो चुंबन करने लगी ॥ १२ ॥ नृत्य करतेहुये उन गोपियोंके चंचल कुंडलों की आभा से भगवान के कपोल शोभित होनेलगे । किसी गोपीने अपने कपोलपर भगवान का कपोल रखलिया और उनने उसको अपना चबाया हुआ बीड़ा देदिया ॥ १३ ॥ और एक गोपी गानकरते हुए नाचरहीथी उसके दोनों पैरोंकी नूपुर और मेखला बजनेलगीं, उनमें अंत में श्रमित होकर भगवान् के मंगल दायी करकमलोंको अपने दोनों स्तनोंपर रखलिया ॥ १४ ॥ गोपिएं लक्ष्मी कांत भगवानको एकांत में पाकर अपने गलेमें उनकी भुजाएं डालगान कर २ विहार करनेलगीं ॥ १५ ॥ और रास—सभामें गानकर रहेथे, सबगोपी उस सभामें वलय, नूपुर, और किंकिणी के बाजेके साथ जब भगवान के संग नाचने लगीं, तब कानोंके कमल, अलकों से शोभायमान कपोल और पसीने के बिंदुओं द्वारा उनका मुख मंडल अत्यंत शोभाको प्राप्तहुआ उनके चलायमान केशों से फूल गिरनेलगे ॥ १६ ॥ हे राजन्! बालक जैसे अपने प्रतिबिंबको लेकरक्रीडा

काखहासैः । रेमेरमेशो व्रजसुन्दरीभिर्यथाऽर्भकः स्वप्रतिबिम्बविभ्रमः ॥ १७ ॥ तदंगसंगप्रमुदाकुलेन्द्रियाः केशान्दुकूलंकुचपट्टिकांवा । नांजःप्रतिव्योढुमलंव्रजस्त्रियो विस्रस्तमालाभरणाः कुरूद्वह ॥ १८ ॥ कृष्णविक्रीडितंवीक्ष्य मुमुहुःखेचरस्त्रियः । कामार्दिताःशशांकश्च सगणोविस्मितोऽभवत् ॥ १९ ॥ कृत्वातावन्तमात्मानं यावतीर्गोपयोषितः । रेमेस भगवांस्ताभिरात्मारामोऽपि लीलया ॥ २० ॥ तासामतिविहारेण श्रान्तानां वदनानिसः । प्रामृजत्करुणः प्रेम्णा शन्तमेनांगपाणिना ॥ २१ ॥ गोप्यः स्फुरत्पुरटकुण्डलकुन्तलत्विड्गण्डश्रिया सुधितहासनिरीक्षणेन मानंदधत्यऋषभस्यजगुःकृतानि पुण्यानितत्करुहस्पर्शप्रमोदाः ॥ २२ ॥ ताभिर्युतः श्रममपोहितुमंगसंगघृष्टस्रजःस कुचकुंकुमरञ्जितायाः । गन्धर्वपालिभिरनुद्रुत आविशद्वाः श्रान्तो गजीभिरिभराडिव भिन्नसेतुः ॥ २३ ॥ सोऽम्भस्यलंयुवतिभिः परिषिच्यमानः प्रेम्णेक्षितः प्रहसतीभिरितस्ततोऽङ्ग । वैमानिकैः कुसुमवर्षिभिरीड्यमानो रेमेस्वयंस्वरतिरत्र गजेन्द्रलीलः ॥ २४ ॥ ततश्चकृष्णोपवने जलस्थलप्रसूनगन्धानिलजुष्टदिक्तटे । चचार भृंगप्रमदागणावृतो यथा मदच्युद्द्विरदः करेणुभिः ॥ २५ ॥ एवं शशांकांशुविराजितानिशाः स सत्यकामोनुरताबलागणः । सिषेवआत्मन्यवरुद्धसौरतः सर्वाः शरत्काव्यकथारसाश्रयाः ॥ २६ ॥ राजोवाच । सं

करता है तैसेही भगवान् रमापति इसी प्रकार से आलिंगन, करमर्दन, कटाक्ष विक्षेप, और हास्य विलास से व्रजनारियों के संग क्रीड़ा करने लगे ॥ १७ ॥ उनके अंगसंग से गोपियोंको जोआनंद उत्पन्न हुआ उससे व्रजनारियों की सब इन्द्रियें व्याकुल होगईं। हे कुरुश्रेष्ठ! वह–गिरेहुये, माला; आभूषण, रेशमी वस्त्र, और स्तनों के ऊपर के वस्त्र पहिले की समान धारण न करसकीं ॥१८॥ श्रीकृष्णजी के विहारको देखकर देवांगनाएँ कामातुरहो मोहित होगईं। चन्द्रमा भी तारागणों समेत विस्मित होगया और विस्मित होकर अपनी गतिको भूलगया; अतएव रात्रिबड़ीभारी होगई इस ही कारण विहार भी बहुत देरतक हुआ ॥ १९ ॥ भगवान यद्यपि आत्माराम हैं तोभी जितनी गोपियें थीं आपभी उतनेही हो उनके साथ क्रीड़ा करने लगे ॥ २० ॥ हे राजन्! बहुत देरतक क्रीड़ा करके जब वह श्रमित होगईं, तब उन दयालु भगवान ने प्रेमवशहो अपने शुभहाथों द्वारा उनका मुखपोंछा। उनके नखके स्पर्श से गोपियों को अति आनंद उत्पन्न हुआ ॥ २१ ॥ वह भगवान् के प्रकाशित स्वर्ण कुंडल और उनसे प्रकाशित हुये कपोलों की शोभा और सुंदर हास्य कटाक्षको देख उनका सन्मान करके उनका यशगान करने लगीं। अंतमें भगवान्, हथिनियों से घिरे हुये, पुलतोड़ने से श्रमितहुये गजराजकी समान श्रमनाश करने के निमित्त उन सब गोपिकाओं समेत जलमें घुसे उस समय अंगके संगसे मर्दनकी हुई तथा स्तनकी केसर से रंगीहुई माला के पीछे गंधर्व पतिके समान भौंरेगान करते हुयेचले ॥ २२—२३ ॥ हे राजन्! जलमें सब स्त्रियां हंसते २ प्रेमयुक्त चारोंओर से जल उछाल २ कर श्रीकृष्णजी को भिगोने लगीं, उस काल देवताओं ने फूल बरसाय२ उनकी पूजाकी। वह स्वयं आत्माराम होकरभी गजराज की समान इस प्रकार विहार करनेलगे ॥ २४ ॥ अनंतर श्रीकृष्णजी ने, भौंरे और स्त्रियों से घिरकर, हथिनियों के साथ मत्त गजराज की समान, उपवन में भ्रमण करना आरंभकिया स्थल और जलसे उत्पन्न हुये फूलोंकी सुगंधि से सुगंधित होकर वायु उस उपवनमें चल रहीथी ॥ २५ ॥ हे महाराज! सत्य संकल्प, प्रेमी स्त्रियों के मंडल में परिवृत श्रीकृष्णजी ने अपने शुक्रको रोककर, शरत काल के चन्द्रमा की शोभायमान रात्रिमें शास्त्र कथित सब रसयुक्त क्रीड़ाओंको किया ॥ २६ ॥ राजा

स्थापनाय धर्मस्य प्रशमायेतरस्यच । अवतीर्णोहिभगवानंशेन जगदीश्वरः ।२७। सकथंधर्मसेतूनां वक्ताकर्ताऽभिरक्षिता । प्रतीपमाचरद्ब्रह्मन्परदाराभिमर्शनम् ॥ ॥ २८ ॥ आप्तकामोयदुपतिः कृतवान्वैजुगुप्सितम् । किमभिप्रायएतंनः संशयंछिन्धिसुव्रत ॥ २९ ॥ श्रीशुकउवाच । धर्मव्यतिक्रमोदृष्ट ईश्वराणांचसाहसम् । तेजीयसांनदोषाय वन्हेःसर्वभुजोयथा ॥ ३० ॥ नैतत्समाचरेज्जातु मनसाऽपिह्यनीश्वरः । विनश्यत्याचरन्मौढ्याद्यथाऽरुद्रोऽब्धिजंविषम् ॥ ३१ ॥ ईश्वराणांवचः सत्यं तथैवाचरितंक्वचित् । तेषांयत्स्ववचोयुक्तंबुद्धिमांस्तत्समाचरेत् ॥ ३२ ॥ कुशलाचरितेनैषामिहस्वार्थोनविद्यते । विपर्ययेणवाऽनर्थोनिरहङ्कारिणांप्रभो ॥ ३३ ॥ किमुताखिलसत्त्वानांतिर्यङ्मर्त्यदिवौकसाम् । ईशितुश्चेशितव्यानांकुशलाकुशलान्वयः ॥ ३४ ॥ यत्पादपङ्कजपरागनिषेवतृप्तायोगप्रभावविधुताखिलकर्मबन्धाः । स्वैरंचरन्तिमुनयोऽपिननह्यमानास्तस्येच्छयाऽऽत्तवपुषः कुतएवबन्धः ॥ ३५ ॥ गोपीनांतत्पतीनांचसर्वेषामेवदेहिनाम् । योऽन्तश्चरतिसोऽध्यक्षः क्रीडनेनेहदेहभाक् ॥ ३६ ॥ अनुग्रहायभक्तानांमानुषंदेहमास्थितः । भजतेतादृशीः क्रीडायाः श्रुत्वातत्परोभवेत् ॥ ३७ ॥ नासूयन्खलुकृष्णायमोहितास्तस्यमायया । मन्यमानाः स्वपार्श्वस्थान्स्वान्स्वान्दारान्व्रजौकसः ॥ ३८ ॥ ब्रह्मरात्रउपावृत्तेवासुदेवानुमोदिताः । अनिच्छन्त्योययुर्गोप्यः स्वगृहान्भगवत्प्रियाः ॥ ३९ ॥ विक्रीडितंव्रजवधू

परीक्षितने कहाकि-हे ब्रह्मन् ! धर्मकी रक्षा और अधर्म के नाश करने के निमित्तही भगवान् ने पृथ्वीपर अवतार लियाथा ॥ २७ ॥ हे ब्रह्मन्! उन्हों ने धर्म सेतुकेवक्ता, कर्ता और रक्षक होकर क्योंकर परस्त्रियोंसे संभोग रूप अधर्मका अनुष्ठान कियाथा ॥ २८ ॥ श्रीकृष्णजी तो पूर्णकाम हैं; तो फिरऐसे निंदनीय कार्य से उन्हे क्या अभिप्राय था ? मेरे इस संदेहको दूरकरो ॥ २९ ॥ श्री शुकदेवजी बोलेकि—हे राजन्! ईश्वरोंको धर्मका उल्लघन और साहस करते देखागया है। परन्तु तेजस्वियोंको उसका दोष नहींहोता । अग्नि जैसे सबपदार्थोंका भक्षणकरती रहती है तैसेही ईश्वर को कोई दोषनहीं लगता ॥ ३० ॥ जोईश्वर नहीं हैं वह कभी ऐसा आचरण नहीं करता रुद्रने समुद्रमें उत्पन्न हुये विषको पिया यदिकोई और पियेतो मरजाय ॥ ३१ ॥ ईश्वरों के वचन सत्य होते हैं और कहीं२ आचरण भी सत्य होते हैं। अतएव वह जोकहते हैं बुद्धिमान् पुरुष वही करते हैं ॥ ३२ ॥ हे प्रभो ! उन निरहंकारी ईश्वरों के न तो धर्माचरण से अभिप्राय है और न अधर्माचरण से अनर्थही है ॥ ३३ ॥ अतएव जोपशु, मनुष्य और देवताआदि समस्त जीवोंके ईश्वर हैं, जोसमस्त ईश्वरों के अधिपति हैं तो उनकी कुशल और अकुशल की संभावना कहां से हो ॥३४॥ जिनके चरणोंके सेवक भक्तगण और ज्ञानीगणभी योगके प्रभावसे समस्तकर्मके बंधनोंको काटकर स्वाधीन होकर विचरा करते हैं और कभी संसार में नहीं फंसते, तद इच्छानुसार देह धारण करने वाले उन भगवान्को बंधन कैसे होसकता है ॥ ३५ ॥ जोगोपियों, के स्वामी, और समस्त-प्राणियों के हृदय में विराजमान और बुद्धि आदिके साक्षी हैं उन्हींभगवान्ने लीलाके कारण देह धारण कीथी ॥ ३६ ॥ प्राणियों के कल्याण के निमित्त वह मनुष्य मूर्ति गृहणकर इसप्रकार क्रीड़ा करते रहते हैं; प्राणी उनसब चरित्रोंको सुनकर उनपर भक्तिवान होसकता है ॥३७॥ हे राजन्! ब्रज वासियों ने श्रीकृष्णजी पर दोषारोपण न किया क्योंकि उन्हों ने माया से मोहित होकर अपने मनमें यही जानाकि—हमारी स्त्रियां हमारे पास सोती है ॥ ३८ ॥ अनंतर ब्राह्म मुहूर्त आनेपर कृष्णजीकी प्यारी सब गोपियें श्रीकृष्णजी की आज्ञापाय इच्छा बिनाभी अपने२घरगई ॥३९॥ जो

भिरिदं च विष्णोः श्रद्धान्वितोऽनुशृणुयादथवर्णयेद्यः । भक्तिंपरांभगवतिप्रतिलभ्य कामंहृद्रोगमाश्वपहिनोत्यचिरेणधीरः ॥ ४० ॥

इति श्रीमद्भा० महा० दशमस्कन्धे त्रयस्त्रिंशोऽध्यायः ॥ ३३ ॥

श्रीशुक उवाच ॥ एकदादेवयात्रायांगोपालाजातकौतुकाः । अनोभिरनडुद्युक्तैः प्रययुस्तेऽम्बिकावनम् ॥ १ ॥ तत्रस्नात्वासरस्वत्यांदेवंपशुपतिंविभुम् । आनर्चुरर्हणैर्भक्त्यादेवींचनृपतेऽम्बिकाम् ॥ २ ॥ गावोहिरण्यंवासांसिमधुमध्वन्नमादृताः । ब्राह्मणेभ्योददुः सर्वेदेवोनः प्रीयतामिति ॥ ३ ॥ ऊषुः सरस्वतीतीरेजलं प्राश्यधृतव्रताः । रजनींतांमहाभागानन्दसुनन्दकादयः ॥ ४ ॥ कश्चिन्महानहिस्तस्मिन् विपिनेऽतिबुभुक्षितः । यदृच्छयाऽऽगतोनन्दंशयानमुरगोऽग्रसीत् ॥ ५ ॥ सचुक्रोशाहिनाग्रस्तः कृष्णकृष्णमहानयम् । सर्पो मांग्रसते तातप्रपन्न परिमोचय ॥ ६ ॥ तस्यचाक्रन्दितंश्रुत्वागोपालाः सहसोत्थिताः । ग्रस्तंचदृष्ट्वाविभ्रान्ताः सर्पंविव्यधुरुल्मुकैः ॥ ७ ॥ अलातैर्दह्यमानोऽपिनामुञ्चत्तमुरङ्गमः तमस्पृशत्पदाऽभ्येत्यभगवान्सात्वतांपतिः ॥ ८ ॥ सवैभगवतः श्रीमत्पादस्पर्शहताशुभः । भेजे सर्पवपुर्हित्वारूपंविद्याधरार्चितम् ॥ ९ ॥ तमपृच्छद्धृषीकेशः प्रणतंसमुपस्थितम् । दीप्यमानेनवपुषापुरुषंहेममालिनम् ॥ १० ॥ कोभवान् परयालक्ष्म्यारोचतेऽद्भुतदर्शनः । कथंजुगुप्सितामेतांगतिंवाप्रापितोऽवशः ॥ ११ ॥ सर्प उवाच ॥ अहंविद्याधरः कश्चित्सुदर्शनइतिश्रुतः । श्रियास्वरूपसम्पत्त्याविमानेनाचरन्दिशः ॥ १२ ॥

व्रजनारियों समेत श्रीकृष्णजी की इस लीलाको श्रद्धापूर्वक सुनेंगे व कहेंगे वह बहुतही शीघ्र भगवान् में परमभक्ति प्राप्तकर धीरचित्तहो कामरूप मानसिक पीड़ाओं से छूटजावेंगे ॥ ४० ॥

इतिश्री मद्भागवतेमहापुराणेदशमस्कधसरलाभाषाटीकायांत्रयस्त्रिंशोऽध्यायः ॥ ३३ ॥

श्रीशुकदेवजीबोले कि–हे राजन् ! किसी समय देवयात्रा उपस्थित होनेपर, गोपगण प्रसन्न चित्त हो वृषभ युक्त शकटों में चढ़ आम्बिका के बनमें गये ॥ १ ॥ वहां सरस्वती में स्नानकर नाना भटोंसे भक्ति युक्त महादेवजी तथा आम्बिका देवीका पूजन किया ॥ २ ॥ "देव हमारे ऊपर प्रसन्न हो" इस इच्छासे सबही ने आदर पूर्वक ब्राह्मणों को गायें, सुवर्ण, वस्त्र और सुंदर मधुयुक्त मिष्टान्न दान किये ॥ ३ ॥ नंद और सुनंदादि महाभाग गोप गणों ने केवल जल पानकर उपवास किया और व्रत धारण कर उस रात्रि को सरस्वती ही के तीर रहे ॥ ४ ॥ नंदराय बन में सोरहे थे, कि उसी समय एक सर्प ने भूखे हो इच्छानुसार वहां आय नंदजी को ग्रस लिया ॥ ५ ॥ सर्पसे ग्रस्त होतेनहोते "कृष्ण ! कृष्ण ! यह अजगरमुझे निगले जाताहै हे वत्स ! मुझ शरणागत को छुड़ावो यह कहकर नंदजी चिल्ला उठे ॥ ६ ॥ उनका चिल्लाना सुनकर गोपालगण सहसाउठ खड़े हुये और नंदजीको सांपसे ग्रसित होता देख व्याकुल चित्त हो मशालों द्वारा उसको जलाने लगे ॥ ७ ॥ अजगर ने जलते हुये अंगारों से जलकर भी उनको न छोड़ा । अनंतर भक्त पाले भगवान् ने वहां पर आयकर उस के लात मारी ॥ ८ ॥ भगवानके श्रीचरण के स्पर्श होतेही उसके सब अशुभ दूरहोगये और वह अपनी सर्प देह छोड़ विद्याधरोंसे वन्दित परममनोहर रूप धारणकर उनके चरणोंमें लोटनेलगा ॥ ९ ॥ भगवान्ने उस स्वर्ण मालाधारी पुरुषसे पूछा कि–तुम कौनहो जो उत्तम वेश धारण करके शोभायमान होरहेहो ? तुम अद्भुत पुरुषहो किसप्रकार से परवशहो ऐसी निन्दित गतिको प्राप्त हुयेथे, ॥ १०—११ ॥ सर्पने कहा कि—हे प्रभो ! मैं एक गन्धर्वहूं लक्ष्मीकी कृपा और अपने सुन्दर रूपके कारण मैं सुदर्शन नामसे प्रसिद्धथा एक-

ऋषीन्विरूपानाङ्गिरसः प्राहसंरूपदर्पितः । तैरिमांप्रापितोयोनिंप्रलब्धैः स्वेनपाप्मना
॥ १३ ॥ शापोमेऽनुग्रहायैवकृतस्तैः करुणात्मभिः । यदहंलोकगुरुणापादस्पृष्टोह
ताशुभः ॥ १४ ॥ तंत्वाऽहंभवभीतानांप्रपन्नानांभयापहम् । आपृच्छेशापनिर्मुक्तः
पादस्पर्शादमीवहन् ॥१५॥ प्रपन्नोऽस्मिमहायोगिन्महापुरुषसत्पते । अनुजानीहि
मांदेवसर्वलोकेश्वरेश्वर॥१६॥ब्रह्मदण्डाद्विमुक्तोऽहंसद्यस्तेऽच्युतदर्शनात् । यन्ना
मगृह्णन्नखिलाञ्छ्रोतॄनात्मानमेवच ॥१७॥सद्यःपुनातिकिंभूयस्तस्यस्पृष्टःपदाहिते
इत्यनुज्ञाप्यदाशार्हंपरिक्रम्याभिवन्द्यच । सुदर्शनोदिवंयातः कृच्छ्रान्नन्दश्चमोचि
तः ॥ १८ ॥ निशाम्यकृष्णस्यतदात्मवैभवंव्रजौकसोविस्मितचेतसस्ततः । समा
प्यतस्मिन्नियमंपुनर्व्रजंनृपाऽऽययुस्तत्कथयन्तआदृताः ॥ १९ ॥ कदाचिदथगोविन्दो
रामश्चाद्भुतविक्रमः । विजह्रतुर्वनेरात्र्यांमध्यगौव्रजयोषिताम् ॥ २० ॥ उपगीयमा
नौललितंस्त्रीजनैर्बद्धसौहृदैः । स्वलंकृतानुलिप्ताङ्गौस्रग्विणौविरजोम्बरौ ॥ २१ ॥
निशामुखंमानयन्तावुदितोडुपतारकम् । मल्लिकागन्धमत्तालिजुष्टकुमुदवायुना२२॥
जगतुः सर्वभूतानांमनः श्रवणमङ्गलम् । तौकल्पयन्तौयुगपत्स्वरमण्डलमूर्च्छितम्
॥२३॥ गोप्यस्तद्गीतमाकर्ण्यमूर्च्छितानाविदन्नृप । स्रंसद्दुकूलमात्मानंस्रस्तकेश
स्रजंततः ॥ २४ ॥ एवंविक्रीडतोः स्वैरंगायतोः सम्प्रमत्तवत् । शङ्खचूडइतिख्यातो
धनदानुचरोऽभ्यगात् ॥ २५ ॥ तयोर्निरीक्षतोराजंस्तन्नाथंप्रमदाजनम् । क्रोशन्तं

दिन मैं अपने रूपसे गर्वितहो विमान में बैठ दिशाओं में घूमता २ अंगिरा वंशी ऋषियों की कु-
रूपता को देख हंसा इससे उन्होंने शाप दिया कि जिससे मैं सर्पयोनि को प्राप्तहुआ॥ १२—१३॥
उन दयालु ऋषियोंने मेरे ऊपर कृपा करकेही मुझे यह शाप दियाथा इसहीकारण आज आपके
त्रिलोक वन्दित चरणोंका स्पर्श हुआ, ॥ १४ ॥ हे त्रिलोकीनाथ ! आपके श्री चरणों के स्पर्शसे
मेरे सब अशुभ दूरहोगये । हे दुखनाशन ! भवभयभजन ! अब आज्ञा करिये मैं अपने नगर को
जाऊँ ॥१५ ॥ हेमहायोगिन् ! हेमहापुरुष! मैं आपकी शरणहूं । हेदेव ! हेसर्व लोकेश्वरोंके ईश्वर !
मुझे आज्ञादो॥ १६॥ हेअच्युत ! केवल आपको देखतेही मैं ब्रह्मशापसे छूटगया, । जो आपका
नाम लेताहै वह सब श्रोताओंको व अपनेको पवित्र करताहै फिर जिसके अंगमें आपके पैरोंका स्पर्श
हुआ उसके मुक्त होनेमें सन्देहही क्या, ? ॥ १७ ॥ हे राजन् ! सुदर्शन इसप्रकार आज्ञाले श्री·
कृष्णजीको प्रणाम व परिक्रमा कर स्वर्गमें गया, । श्रीनन्दरायकी विपद् दूरहोगई ॥ १८ ॥ ब्रज-
वासीगण श्रीकृष्णजीके अद्भुत पराक्रम को देख विस्मित होगये और उस स्थानमें व्रत समाप्त
कर आदर पूर्वक इस चरित्र को कहते २ फिर ब्रजमे आये, ॥ १९ ॥ कुछ दिनों के उपरांत
वीर पराक्रमी राम और कृष्ण रात्रिको ब्रजांगनाओं के साथ क्रीड़ा करनेमें प्रवृत्त हुये, ॥ २० ॥
वह सुन्दर अलंकार, अनुलेपन, माला और सुन्दर वस्त्रोंसे अलंकृतथे । स्त्रियें स्नेहके वशीभूतहो
सुन्दर स्वरोंसे उनकी स्तुति गानेलगीं ॥ २१ ॥ उससमय रात्रिका प्रथम प्रहरथा । चन्द्रमा और
ताराओं से आकाश शोभायमान होरहाथा और फूलोंसे सुगन्धितहुई वायु मन्द२ चलतीथी॥२२॥
राम कृष्णने उस रात्रिके आरम्भका सन्मान किया वह दोनों जन एक साथही सब स्वरोंकी मू-
र्च्छना कर जिसप्रकार प्राणियोंके मन और कानोंको आनन्द उत्पन्न होवे उसीप्रकार से गाने लगे
॥ २३ ॥ उन मनोहर गीतोंको सुनकर गोपनारियों के शरीरसे अचैतन्यता के कारण रेशमी वस्त्र
और केशोंसे मालाखिसक पड़ी ॥ २४ ॥ राम, कृष्ण प्रमत्तकी समानहो इसप्रकार क्रीड़ा कररहे
थे कि उसीसमय शंखचूड़ नामक एक असुर कुबेरका सेवक वहांआया ॥ २५ ॥ वह उन दोनों

कालियामास दिश्युदीच्यामशङ्कितः ॥२६॥ क्रोशन्तं कृष्ण रामेति विलोक्य स्वपरिग्रहम् । यथा गा दस्युना ग्रस्ता भ्रातरावन्वधावताम् ॥ २७ ॥ माभैष्टेत्यभयाऽऽरावौ शालहस्तौ तरस्विनौ । आसेदतुस्तं तरसा त्वरितं गुह्यकाधमम् ॥ २८ ॥ स वीक्ष्य तावनुप्राप्तौ कालमृत्यू इवोद्विजन् । विसृज्य स्त्रीजनं मूढः प्राद्रवज्जीवितेच्छया ॥ २९ ॥ तमन्वधावद्गोविन्दो यत्र यत्र स धावति । जिहीर्षुस्तच्छिरोरत्नं तस्थौ रक्षन्स्त्रियो बलः ॥ ३२ ॥ अविदूर इवाभ्येत्य शिरस्तस्य दुरात्मनः । जहार मुष्टिनैवाङ्ग सह चूडामणिं विभुः ॥ ३१ ॥ शङ्खचूडं निहत्यैवं मणिमादाय भास्वरम् । अग्रजायाददात्प्रीत्या पश्यन्तीनां च योषिताम् ॥ ३२ ॥

इति श्रीमद्भा० महा० दशमस्कन्धे चतुस्त्रिंशोऽध्यायः ॥ ३४ ॥

श्रीशुक उवाच । गोप्यः कृष्णे वनं याते तमनुद्रुतचेतसः । कृष्णलीलाः प्रगायन्त्यो निन्युर्दुःखेन वासरान् ॥ १ ॥ गोप्य ऊचुः । वामबाहुकृतवामकपोलो वल्गितभ्रुरधरार्पितवेणुम् । कोमलाङ्गुलिभिराश्रितमार्गं गोप्य ईरयति यत्र मुकुन्दः ॥ २ ॥ व्योमयानवनिताः सह सिद्धैर्विस्मितास्तदुपधार्य सलज्जाः । काममार्गणसमर्पितचित्ताः कश्मलं ययुरपस्मृतनीव्यः ॥ ३ ॥ हन्त चित्रमबलाः शृणुतेदं हारहास उरसि स्थिरविद्युत् । नन्दसूनुरयमार्तजनानां नर्मदो यर्हि कूजितवेणुः ॥४॥ वृन्दशो व्रजवृषा मृगगावो वेणुवाद्यहृतचेतस आरात् । दन्तदष्टकवला धृतकर्णा निद्रिता लिखितचित्रमिवासन् ।।५॥ बर्हिणस्तबकधातुपलाशैर्बद्धमल्लपरिबर्हविडम्बः । कर्हिचित्सबल आलि

भाइयोंके सामनेही उनश्रीकृष्णजीकी प्यारी अबलाओंको बलपूर्वक उत्तर दिशाकी ओर लेचला । ॥ २६ ॥ स्त्रियें" हे कृष्ण ! हे राम ! ,, कहकर रोनेलगीं । तब राम कृष्ण सिंहसे घिरी गायोंकी समान व्याकुल उन गोपियोंके पीछे २ दौड़े ॥ २७ ॥ दुष्ट यक्ष शीघ्रतापूर्वक भागा जाताथा इन दोनों भाइयोंने भय न करना कहकर हाथमें शालका वृक्षले उसके पीछे दौड़ना आरम्भ किया ॥ ॥ २८ ॥ वह मूर्ख शङ्ख चूड काल और मृत्युकी समान उन दोनों जनोंको आता देख अत्यन्त व्याकुल हुआ और स्त्रियोंको छोड बचने की इच्छासे भाग निकला, ॥ २९ ॥ परन्तु वह जिस २ स्थान में भागकर गया भगवान् उसके शिरका रत्न लेनेके निमित्त उसके पीछे २ दौड़ गये, । हे राजन्! बलदेवजी स्त्रियोंके रक्षकहोकररहे॥३०॥ भगवान्ने बहुत दूरजाकर घूंसेके द्वाराही उस दुष्टका मस्तक छेदनकिया ॥३१॥ और स्त्रियोंके सामनेही वह निर्मल शिरोमणि लाकर प्रीतिपूर्वक बलरामजीकोदी॥३२॥ इतिश्री मद्भा०महा० दशमस्कंधेसरलाभाषाटीकायांचतुस्त्रिंशोऽध्यायः ॥३४॥

श्रीशुकदेवजी बोले कि—हेराजन् ! श्रीकृष्णजी के वन में जाने पर गोपियां कि-जिनका चित्त भगवान में लग रहाथा, भगवान के चरित्रोंका गानकरतीहुईबड़े दुःख से समय बितातीथीं ॥ १ ॥ गोपियें कहतीं कि—हे सखिवृन्द ! श्रीकृष्णजी जब बाएं भुजा की जड़ में बाएं कपोल को रख, भौंह नचाते२, कोमल अंगुली द्वारा स्वरों के छिद्रों को रोक अधरपर रखकर वंशीबजाते हैं; तब उस वंशी का सुनकर सिद्धगणों के निकट बैठीहुई सिद्धांगनाओं को प्रथम तो विस्मय उत्पन्नहोता है तदुपरांत कामदेव के बाण से लज्जित चित्त होकर मोहित होजाती हैं । उस समय वह नारे के छूटजाने से वस्त्र काभी बांधना भूलजाती हैं ॥ २ । ३ ॥ हे अबलागण ! एकआश्चर्य की घटना तो सुनो;जिन का हास्यहारकी समान प्रकाशित होता है, जिन के वक्षःस्थल में बिजली की सदृश चंचललक्ष्मी भी स्थिर रहती है और जो पीडित मनुष्यों को आनन्द देनेवाले हैं वह श्रीनन्दनन्दनजब बंशी बजाते है-तब दूर रहने परभी, चित्त के खिचजाने से,व्रज के वृष, मृग, और गायें दांतों में तृणदाब और कान उठाय निद्रित की समान चित्र लिखे से खड़े रहजाते हैं ॥ ४ । ५ ॥ हे सखिगण ! श्रीकृष्णजी—बलराम और गोपालगणों सहित मयरपुच्छ, धातु, और

वगोपैर्गाःसमाह्वयति यत्रमुकुन्दः ॥ ६ ॥ तर्हिभग्नगतयःसरितो वैतत्पदाम्बुजर-जोऽनिलनीतम् । स्पृहयतीर्वयमिवाऽबहुपुण्याः प्रेमवेपितभुजास्तिमितापः ॥ ७ ॥ अनुचरैःसमनुवर्णितवीर्य आदिपूरुषइवाचलभूतिः । वनचरोगिरितटेषु चरन्तीर्वेणुनाऽऽह्वयतिगाःसयदाहि ॥ ८॥ वनलतास्तरवआत्मनि विष्णुं व्यंजयन्त्यइवपुष्पफलाढ्याः । प्रणतभारविटपा मधुधाराः प्रेमहृष्टतनवः ससृजुःस्म ॥ ९ ॥ ॥ दर्शनीयतिलको वनमालादिव्यगन्धतुलसीमधुमत्तैः । अलिकुलैरलघु गीतमभीष्टमाद्रियन्यर्हिसन्धितवेणुः ॥ १० ॥ सरसि सारसहंसविहंगाश्चारुगीतहृतचेतस एत्य । हरिमुपासतते यतचित्ता हन्त मीलितदृशोधृतमौनाः ॥ ११ ॥ सहबलःस्रगवतंसविलासःसानुषु क्षितिभृतोव्रजदेव्यः । हर्षयन्यर्हिवेणुरवेण जातहर्षउपरम्भति विश्वम् ॥ १२ ॥ महदतिक्रमणशंकितचेता मन्दमन्दमनुगर्जति मेघः । सुहृदमभ्यवर्षत्सुमनोभिश्छायया च विदधत्प्रतपत्रम्॥१३॥ विविधगोपचरणेषु विदग्धोवेणुवाद्यउरुधानिजशिक्षाः । तवसुतःसतियदाऽधरबिम्बे दत्तवेणुरनयत्स्वरजातीः ॥१४॥ सवनशस्तदुपधार्यसुरेशाः शक्रशर्वपरमेष्ठिपुरोगाः । कवयआनतकन्धरचित्ताः कश्मलं ययुरनिश्चिततत्त्वाः ॥ १५ ॥ निजपदाब्जदलैर्ध्वजवज्रनीरजांकुशविचित्रललामैः । व्रजभुवःशमयन्खुरतोदं वर्ष्मधुर्यगतिरीडितवेणुः ॥ १६॥ व्रजतितेनवयंस

पत्ताशद्वारा मल्ल का वेश धारणकर जब गायों को बुलाते हैं तब पवन से उडीहुई उनकीचरण रज की इच्छाकर नदियें अपनी गति बंदकरदेती हैं; परन्तु निश्चयही हमारीसमान उनकाभी पुण्यअत्यन्त अल्प है; क्योंकि प्रेमवश से उन के तरंगरूप हाथ केवल एकबारही कंपित होते हैं किंतु थोड़ीही देर में निश्चल होजाती हैं ॥ ६ । ७ ॥ आदिपुरुषके समान अचललक्ष्मीवाले देवता दिभी जिन के पराक्रम का वर्णन किया करते हैं; वह भगवान् जबवन में प्रवेशकर पहाड़ के तट में विचरनेवाली अपनी गायों को वेणु के गानसे बुलाते हैं, तब भार से जिनकी शाखा लचरहीहैं ऐसी लतायें मानो अपने मन में प्रगटहुए विष्णु का सूचन करतीहुईहों ऐसे स्नेह से पुष्टहो, फूल फल से युक्त मधुकी धारा बरसाने लगती हैं और उनके पति वृक्षोंकोभी वैसाही आनन्द होता है ॥ ८ । ९ ॥ वनमाला के मध्य में स्थित दिव्य सुगंधवाली तुलसी के मधुसे मत्तहो भ्रमर जो अनुकूल उच्चगीत करते हैं, उनगीतों का आदरकरसुन्दर श्रेष्ठ भगवान जब वेणु बजाते हैं, तब जलमें बैठेहुए सबसारस, हंस और दूसरे पक्षी उन मनोहर गीतों से प्रसन्नचित्तहो वहां आय एकाग्रचित्त से आंखें बन्दकर चुपचापहो भगवान् का ध्यान करने लगते हैं ॥ १० । ११ ॥ हे गोपिकागण ! फूलों से बनेहुए दोनों कर्णभूषणों द्वारा उनकी अपूर्व शोभा होती रहती है । वह जबबलरामजी के साथ पर्वत के सानुदेश को हर्षितकर बंशी का शब्द पूर्ण करते हैं, तब मेघ, महात्मा के अपराध के डर से भयभीतहो बंशी के शब्दके साथही साथ मंद २ गर्जना करते रहते हैं और विश्व कीपीड़ा हरने से अपने धर्म की समान धर्मवाले अपने सुहृद उन गोविंद के ऊपर फूल बरसाय २ छायाद्वारा उनकी छत्ररचना करते हैं ॥ १२ । १३ ॥ हे यशोदे ! तुम्हारा पुत्र नानाप्रकारकी गोपक्रीड़ा में अति निपुण है । इस ने बंशीबजाने के विषय में स्वयंही अपनी बुद्धि से स्वरजाति उत्पन्नकी है, अधर में बंशी लगाकर जबगाता है तब इंद्र, महादेव और ब्रह्मा आदि देवतागणभी, ऊंचे नीचे और मध्य के भेद क्रम से उन समस्तगीतों का अलापसुन कर पंडितहोकर भी मोह को प्राप्त होते हैं। उस समय गीतध्वनि से मोह होने के कारण उन के कन्धे और चित्त नीचे होजाते हैं । वह उस अलाप के स्वर भेद को नहीं जानसकते ॥१४॥ ॥ १५ ॥ हे गोपियो ! श्रीकृष्णजबध्वज और अंकुशद्वारा विचित्र रूप से चिह्नित अपने चरणरूप कमल की व्रजभूमि के गोखुर के प्रहार से उत्पन्नहुई व्यथा शांतकर गजराज की समान भ्रमण

विलासवीक्षणार्पितमनोभववेगाः। कुजगतिंगमिता न विदामः कश्मलेन कबरं वसनं वा ॥ १७ ॥ मणिधरः क्वचिदागणयन्गा मालया दयितगन्धतुलस्याः । प्रणयिनोऽनुचरस्य कदांसे प्रक्षिपन्भुजमगायत यत्र ॥ १८ ॥ क्वणितवेणुरववञ्चितचित्ताः कृष्णमन्वसत कृष्णगृहिण्यः । गुणगणार्णमनुगत्य हरिण्यो गोपिका इव विमुक्तगृहाशाः ॥ १९ ॥ कुन्ददामकृतकौतुकवेषो गोपगोधनवृतो यमुनायाम् ॥ नन्दसूनुरनघे तव वत्सो नर्मदः प्रणयिनां विजहार ॥ २० ॥ मन्दवायुरुपवात्यनुकूलं मानयन्मलयजस्पर्शेन । वन्दिनस्तमुपदेवगणा ये वाद्यगीतबलिभिः परिवव्रुः ॥ २१ ॥ वत्सलो व्रजगवां यदगध्रो वन्द्यमानचरणः पथि वृद्धैः । कृत्स्नगोधनमुपोह्य दिनान्ते गीतवेणुरनुगेडितकीर्तिः ॥ २२ ॥ उत्सवं श्रमरुचाऽपि दृशीनामुन्नयन्खुररजश्छुरितस्रक् । दित्सयैति सुहृदाशिष एष देवकीजठरभूरुडुराजः ॥ २३ ॥ मदविघूर्णितलोचन ईषन्मानदः स्वसुहृदां वनमाली । बदरपाण्डुवदनो मृदुगण्डं मण्डयन्कनककुण्डललक्ष्म्या ॥ २४ ॥ यदुपतिर्द्विरदराजविहारो यामिनीपतिरिवैष दिनान्ते । मुदितवक्त्र उपयाति दुरन्तं मोचयन्व्रजगवां दिनतापम् ॥ २५॥ श्रीशुक उवाच । एवंव्रजस्त्रियो राजन्कृष्णलीलानुगायतीः । रेमिरेऽहःसु तच्चित्तास्तन्मनस्का महोदयाः ॥ २६ ॥

इति श्रीमद्भा० महा० दशमस्कंधे पंचत्रिंशोऽध्यायः ॥ ३५ ॥

करते हैं तब उन का विलासयुक्त टेढ़ाकटाक्ष हममें काम वेग उत्पन्नकरता है;—उस समयहमारी वृक्षकीसी दशा होजाती है और मोहके कारण—हमको वस्त्र और केशों का मान नहींरहता १६॥ ॥ १७ ॥ वह गायों के गिनने के समय सुन्दर मणिमाला और प्रियगन्धा तुलसी की मालाधारण किये रहते हैं। जब प्रेमी सेवकों के कन्धे पर हाथ रखकर श्रीकृष्णजी गोगणना करतेहुए गान करते तथा वेणु बजाते हैं तब उस वेणु के शब्दको सुनकर मोहित हुई हरिणियें उन के निकट आजाती हैं और घरकी आश छोड़ीहुई गोपियों की समान उन के समीपही खड़ी रहती हैं ॥१८ ॥ १९ ॥ हे निष्पापे ! तुम्हारे पुत्र कृष्ण खेलसे कुन्दकी मालाद्वारा वेश रचकर जब गायोंसे घिर अपने साथियों को आनन्द देतेहुए यमुना के किनारे भ्रमण करते हैं तबसुन्दर सुगंद वायु चंदन के स्पर्श से सुगंधितहो उनका सम्मान कर उन्हीं के अनुकूल चलती है और देवतागण स्तुतिकरते हुए वाद्य, गीत और पूजाकी सामग्री द्वारा चारोंओर से उनकी सेवा करते हैं ॥ २० । २१ ॥ हे सखि ! अब दिन अस्तहोने पर आया; देवकी के गर्भ से उत्पन्नहुए गोकुल के चन्द्रमा समस्त गोधनको एकत्रितकर, हम लोगों के मनोरथ पूर्ण करने के निमित्त वेणु बजाते २ वह आरहे हैं वह परमकृपालु है; क्योंकि उन्होंने गोवर्द्धन पर्वत को धारणकर व्रज और गायों की रक्षाकी । उन के लौटने पर मार्ग में ब्रह्मादि वृद्धगण उनके चरणों की वन्दना करते हैं ! इसी से आने में देरी होजाती है । वह सुनो, अनुचर उनके यशका गान कररहे हैं । देखो ! देखो ! उनकी कांति मलीन होरही है तौभी नेत्र अधिक आनन्द देनेवाले हैं । उनकी माला गौओं के खुरोंकी धूलसे धूसरीहोरही है । वह देखो संध्याकालमें चन्द्रमाकी समान प्रसन्नमुख यदुपति व्रजमें बँधीहुई गायोंका ताप दूर करतेहुए गजेन्द्रकी समान समीप आरहे हैं । देखो ! उनके दोनोंनेत्र मदसे कुछेक घूर्णित होरहे हैं । वह अपने बंधुओंको आनंद उत्पन्न करारहे हैं । उनके गलेमें वनमाला शोभायमान है । कपोल, कुंडलों की कांतिसे दीप्तिवान् हैं इसही कारण मुख कुछेक पकेहुए बेरकी समान पाण्डुवर्ण का होरहा है ॥ २२—२५ ॥ श्रीशुकदेवजी ने कहाकि—हे राजन् ! व्रजनारियोंका चित्त और मन श्रीकृष्णजी में अर्पितथा इससे वह परम आनंदित रहतीथीं । इसही कारण विरह में भी श्री कृष्णजी के चरित्रोंको गाय २ कर सुखपाती थीं ॥ २६ ॥

इतिश्री मद्भागवतेमहापुराणेदशमस्कंधेसरलाभाषाटीकायांपञ्चत्रिंशोऽध्यायः ॥ ३५ ॥

श्रीशुक उवाच ॥ अथतर्ह्यागतोगोष्ठमरिष्टोवृषभासुरः । महीमहाककुत्कायः कम्पयन्खुरविक्षताम् ॥ १ ॥ रम्भमाणः खरतरंपदाचविलिखन्महीम् । उद्यम्यपुच्छं वप्राणिविषाणाग्रेणचोद्धरन् ॥ २ ॥ किञ्चित्किञ्चिच्छकृन्मुञ्चन्मूत्रयन्स्तब्धलोचनः । यस्यनिर्ह्रादितेनाङ्गनिष्ठुरेणगवांनृणाम् ॥ ३ ॥ पतन्त्यकालतोगर्भाः स्रवन्तिस्म भयेनवै । निर्विशन्तिघनायस्य ककुद्यचलशंकया ॥ ४ ॥ तंतीक्ष्णशृंगमुद्वीक्ष्य गोप्यो गोपाश्चतत्रसुः । पशवोदुद्रुवुर्भीता राजन्संत्यज्य गोकुलम् ॥५॥ कृष्णकृष्णेति तेसर्वे गोविन्दंशरणंययुः । भगवानपितद्वीक्ष्य गोकुलंभयविद्रुतम् ॥ ६ ॥ माभैष्टेतिगिराऽश्वास्य वृषासुरमुपाह्वयत् । गोपालैःपशुभिर्मन्द त्रासितैःकिमसत्तम ।७। बलदर्पहाऽहंदुष्टानां त्वद्विधानां दुरात्मनाम् । इत्यास्फोट्याच्युतोऽरिष्टं तलशब्देन कोपयन् ॥ ८ ॥ सख्युरंसे भुजाभोगं प्रसार्यावस्थितो हरिः ॥ सोऽप्येवंकोपितोऽरिष्टः खुरेणावनिमुल्लिखन् । उद्यत्पुच्छभ्रमन्मेघः क्रुद्धः कृष्णमुपाद्रवत् ॥ ९ ॥ अग्रन्यस्तविषाणाग्रः स्तब्धासृग्लोचनोऽच्युतम् । कटाक्षिप्याऽद्रवत्तूर्णमिन्द्रमुक्तोऽशनिर्यथा ॥ १० ॥ गृहीत्वाशृंगयोस्तंवा अष्टादशपदानिसः । प्रत्यपोवाह भगवान्गजं प्रतिगजोयथा ॥ ११ ॥ सोऽपविद्धोभगवता पुनरुत्थायसत्वरः । आपतत्स्विन्नसर्वांगो निःश्वसन्क्रोधमूर्छितः ॥ १२ ॥ ॥ तमापतन्तंसनिगृह्यशृंगयोःपदासमाक्रम्य निपात्यभूतले । निष्पीडयामास यथाऽऽर्द्रमम्बरंकृत्वा विषाणेनजघानसोऽपतत् ॥ १३ ॥ असृग्वमन्मूत्रशकृत्समुत्सृजन्क्षिपंश्च पादाननवस्थितेक्षणः । जगा

श्रीशुकदेवजी बोलेकि–हे राजन् ! कुछदिनों के उपरांत अरिष्टासुर बैलका आकार धरणकर खुरोंसे पृथ्वी कोक्षत विक्षत और कंपायमान करता हुआ गोठमें आया उसका ककुद और शरीर अत्यंत विशालथा ॥ १ ॥ वह घोरशब्द करता, पृथ्वी खोदता, पूंछउठाये सींगो से दीवारोंको गिराता ॥ २ ॥ और बीच २ में कुछेक मलमूत्र त्यागता उसके दोनो नेत्रभयंकर होरहे थे । उसका इतना भयानक शब्द था जिसमे अकाल मेंही गायों और स्त्रियों के गर्भपात होतेथे । मेघ उसके विशाल ककुदको पहाड समझकर उसपर बैठते थे उसके सींग अत्यत तीक्ष्ण थे । उस बैलको देखकर गोप और गोपी अत्यंतही भयभीत हुये और पशु गोकुलको छोडकर भागनेलगे ॥ ३—५ ॥ गोकुलवासीगण "हे कृष्ण ! हे कृष्ण ! रक्षाकरो यह कहकर सबही गोविंद के शरणागत हुए । गोकुलको भयसे बिह्वल हुआ देखकर भगवान् "भय न करना" कहकर सबको धैर्य बंधाया और वृषभासुरको ललकार कर कहनेलगे कि—"रेदुष्ट ! तेरीसमान दुष्टोंको दंडदेने वाला मेरे वर्तमान रहते हुए तू पशुओंको भय दिखाता है हे राजन् ! श्रीकृष्णजी ने इस प्रकार से कह भुजा फैलाय तालठोंक अरिष्टको क्रोधित किया तथा आप स्वयंसखा के कंधेपर हाथडाले खडेरहे । अरिष्टभी क्रोधितहो खुरोंसे पृथ्वीको खोदनेलगा और पूँछउठाय मेघ मंडलको कपाता हुआ श्रीकृष्णजी की ओर दौड़ा ॥ ६—९ ॥ वह सींगोंको फैलाय और लाल लाल आंखें निकाल भगवान् की ओर देखता २ इन्द्रके फेंकेहुए वज्रकी समान शीघ्रता पूर्वकचला ॥१०॥ गजके प्रतिद्वंदी गजके समान भगवान् ने उसके दोनो सींगपकड़ पीछेकी ओर १८ पगतक ढकेलकर गिरादिया ॥ ११ ॥ वह गिरकर शीघ्रही फिरखडा होगया। उसका समस्त शरीर पसीने से भीगगया और वह क्रोध से ज्ञान रहितहो बड़े २ श्वाँस छोडता हुआ फिर श्रीकृष्णजी की ओर दौडा ॥ १२ ॥ भगवान् ने सन्मुख आतेहुये वृषभके दोनो सींगपकड लातोंसे मार पृथ्वीपर गिरादिया और गीलेवस्त्र की समान उसे निष्पीडन करनेलगे । फिरसींग उखाडकर उसी से मारनेलगे ॥१३॥ अरिष्ट गिरकर रक्त उगलने और बीच २ में मलमूत्र त्यागने लगा; वह अपने हाथ पांव इधर उधर फैंकने लगा और उसकी

मकुकुंनिर्भ्रुतेरथसर्वपुष्पैःकिरन्तोहरिमीडिरेसुराः ॥ १४ ॥ एवंककुद्मिनंहत्वास्तू
यमानः स्वजातिभिः । विवेशगोष्ठंसबलोगोपीनांनयनोत्सवः ॥ १५ ॥ अरिष्टेनिह
तेदैत्येकृष्णेनाद्भुतकर्मणा । कंसायाथाहभगवान्नारदोदेवदर्शनः ॥ १६ ॥ यशोदा
या सुतांकन्यांदेवक्याः कृष्णमेवच । रामंचरोहिणीपुत्रंवसुदेवेनबिभ्यता ॥१७ ॥
न्यस्तौस्वमित्रेनन्देवैयाभ्यांतेपुरुषाहताः । निशम्यतद्भोजपति कोपात्प्रचलितेन्द्रि
यः ॥ १८ ॥ निशातमसिमादत्तवसुदेवजिघांसया । निवारितोनारदेनतत्सुतौमृ
त्युमात्मन ॥ १९ ॥ ज्ञात्वालोहमयैः पाशैर्बबन्धसहभार्यया । प्रतियातेतुदेवर्षौकं
सआभाष्यकेशिनम् ॥ २० ॥ प्रेषयामासहन्येतांभवतारामकेशवौ । ततोमुष्टिकचा
णूरशलतोशलकादिकान् ॥ २१ ॥ अमात्यान्हस्तिपांश्चैवसमाहूयाहभोजराट् । भो
भोनिशम्यतामेतद्वीरचाणूरमुष्टिकौ ॥ २२ ॥ नन्दव्रजेकिलासातेसुतावानकदुन्दु
भेः । रामकृष्णौततोमह्यंमृत्युः किलनिदर्शितः ॥ २३ ॥ भवद्भ्यामिहसंप्राप्तौहन्ये
तांमल्ललीलया । मञ्चाः क्रियन्तांविविधामल्लरङ्गपरिश्रिताः ॥ पौराजानपदाः
सर्वेपश्यन्तुस्वैरसंयुगम् ॥२४॥ महामात्रत्वयाभद्ररङ्गद्वार्युपनीयताम् । द्विपःकुवल
यापीडोजहितेनममाहितौ ॥ २५ ॥ आरभ्यतांधनुर्यागश्चतुर्दश्यांयथाविधि । विश
सन्तुपशून्मेध्यान्भूतराजायमीढुषे ॥ २६ ॥ इत्याज्ञाप्यार्थतन्त्रज्ञआहूययदुपुङ्गवम् ।
गृहीत्वापाणिनापाणिंततोऽक्रूरमुवाचह ॥ २७ ॥ भोभोदानपतेमह्यंक्रियतांमैत्रमा

आंखें घूमगईं । इस प्रकार से वह कष्टभोगता हुआ आतम यमपुरीको सिधारा । यह देखकर द-
वतागण फूल बरसाय २ भगवान की स्तुति करनेलगे ॥ १४ ॥ गोपियों के नत्रोंको आनंद देनेवाले
नंदनंदन श्रीकृष्णजी इस प्रकारसे वृषकोमार बलदेवजी के साथ गाष्ठमें आए गोपगण उनकी स्तुति
करनेलगे ॥ १५ ॥ हे राजन ! जब कृष्णजी ने अरिष्टासुरको मारडाला तब एकदिन नारदजी कंस
के समीप आयकर कहनलगे कि ॥१६॥ "हे असुरराज ! देवकी के आठवे गर्भमे जाकन्या हुई वह
यशोदाकी कन्याथी, कृष्ण और राम रोहिणी केपुत्र है देवकी और वसुदेव भयपाकर अपने मित्र
नंदके नि उन दोनोंको रखआये है । उन्हीं दोनो आनाग से हाथसे तुम्हार सवक मारेगये हैं।
यहबात सुनकर भोजपति कंसका सब इन्द्रियां व्याकुल होउठा ॥ १७—१८ ॥ उसने वसुदेव को
मारने के निमित्त तीक्ष्णखड्ग धारण किया, किंतु नारदजी के निवारण करनेमे वधतो न कियापरन
उनके तथा देवकी के पैरोंमे लोहकी बेडी डालदी । देवर्षि के चलेजानेपर कंसने केशीको आज्ञादी
कितुम राम और कृष्णका नाशकरो इसके उपरांत भोजराज कंसनेमुष्टिक, चाणूर, शल और तो-
शलादि, मात्रयो और महावतों को बुलायकर कहाकि—अहो वीर चाणूर ! अहो वीर मुष्टिक !
मैं जोकहताहूं उसको सुनो ॥ १९—२२ ॥ राम और कृष्ण नामक वसुदेव के दोपुत्र व्रजमेवास
करते हैं । देवर्षि नारद कहगए हैं ॥ २३ ॥ कि उनके हाथसे मेरी मृत्युहोगी । यह सुनतेही वह
दोनो दानव उसी समय व्रजमे जानेको उद्यत हुए परन्तु असुर राजने निवारण करके कहाकि—
तुम उस स्थानमें न जाओ, उन दोनो भाइयोको इसी स्थानपर बुलाकर मल्लक्रीड़ा करके मारडालो
नाना प्रकारके मंच और अखाडे बनाओ पुरवासी और नगरवासी सबही इस युद्धकोदेखें ॥२४॥
हे भद्रमहावत ! तू रंगद्वारमें कुवलयापीड़ हाथीको खड़ाकरदेना, उससे हमारे शत्रुओं को मारना
॥ २५ ॥ चतुर्दशी से पवित्र धनुषयज्ञका आरंभहो और वरदेनेवाले महादेवजी की पूजाके निमित्त
पशुहत्याकी जाय ॥ २६ ॥ कार्यके सिद्धांतको जाननेवाला कंस यह आज्ञाकर यदुश्रेष्ठ अक्रूरको
बुलाय और उनका हाथपकड आग्रह पूर्वक कहनेलगा कि ॥ २७ ॥ हे अक्रूर ! तुम हमारे सुहृद

हृतः। नान्यस्त्वत्तोहिततमोविद्यतेभोजवृष्णिषु ॥ २८ ॥ अतस्त्वामाश्रितः सौम्य कार्यगौरवसाधनम्। यथेन्द्रोविष्णुमाश्रित्यस्वार्थमध्यगमद्विभुः ॥ २९ ॥ गच्छनन्दव्रजंतत्रसुतावानकदुन्दुभेः। आसातेताविहानेनरथेनानयमाचिरम् ॥३०॥ निसृष्टः किलमेमृत्युर्देवैर्वैकुण्ठसंश्रयैः। तावानयसमंगोपैर्नन्दाद्यैःसाभ्युपायनैः ॥३१ ॥ घातयिष्यइहानीतौकालकल्पेनहस्तिना। यदिमुक्तौततोमल्लैर्घातयेवैद्युतोपमैः ॥३२॥ तयोर्निहतयोस्तप्तान्वसुदेवपुरोगमान्। तद्बन्धून्निहनिष्यामिवृष्णिभोजदशार्हकान् ॥ ३३ ॥ उग्रसेनंचपितरंस्थविरंराज्यकामुकम्। तद्भ्रातरंदेवकंचयेचान्येविद्विषोमम ॥ ३४ ॥ ततश्चैषामहीमित्र भवित्रीनष्टकण्टका। जरासन्धोममगुरुर्द्विविदो दयितः सखा ॥ ३५ ॥ शम्बरोनरकोबाणोमय्येवकृतसौहृदाः। तैरहंसुरपक्षीयान्हत्वाभोक्ष्येमहींनृपान् ॥ ३६ ॥ एतज्ज्ञात्वाऽऽनयक्षिप्रंरामकृष्णाविहार्भकौ। धनुर्मखनिरीक्षार्थंद्रष्टुंयदुपुरश्रियम् ॥ ३७ ॥ अक्रूर उवाच ॥ राजन्मनीषितंसध्र्यक तवस्वावद्यमार्जनम्। सिद्ध्यसिद्ध्योः समंकुर्याद्दैवंहिफलसाधनम् ॥ ३८ ॥ मनोरथान्करोत्युच्चैर्जनोदैवहतानपि। युज्यतेहर्षशोकाभ्यांतथाप्याज्ञांकरोमिते ॥ ३९ ॥ श्रीशुकउवाच एवमादिश्य चाक्रूरंमन्त्रिणश्चविसृज्यसः। प्रविवेशगृहंकंसस्तथाक्रूरः स्वमालयम् ॥ ४० ॥

इति श्रीमद्भा० महा दशमस्कन्धे षट्त्रिंशोऽध्यायः ॥ ३६ ॥

हो; सुहृदका एक कामकरो। यदु और भोजवंश में तुम्हारी अपेक्षा आदरणीय और हितकारी मित्र मेराकोई नहीं है ॥ २८ ॥ हे सौम्य ! जैसे सर्वशक्तिमान् इन्द्रने विष्णुके आश्रय से कार्य पूराकिया था वैसेही मैं कार्य साधन के निमित्त तुम्हारा आश्रय करता हू ॥ २९ ॥ तुम नंदके व्रजमें जाओ वहांपर वसुदेव के दोपुत्र हैं। इस रथमें बैठालकर उन दोनो पुत्रोंको लेआवो, देरनकरो ॥ ३० ॥ विष्णुके आश्रित देवताओं ने उनके हाथसे मेरीमृत्युका होना निश्चय किया है। भेटों (कर)समेत नंदादि गोपोंको और उनकोभी इस स्थानपर लेआवो ॥ ३१ ॥ इस स्थानपर आतेही काल की समान गजराज द्वारा उसको यमपुरी में भेजदुंगा। यदि उससे बचजायगेतो वज्रकी समान शरीर वाले मल्लों से मरवाडालूगा ॥ ३२ ॥ उनके नाश होनेपर, उनके दुःखसे दुःखी भाई वसुदेवआदि वृष्णिवंशी, भोज और दाशार्ह.वंशियों कोभी सहजही मारसकूंगा ॥ ३३ ॥ राज्यहीन मेरावृद्धपिता उग्रसेन और उसका भाई देवक तथा और भी दूसरे जोमेरे विद्रोही हैं उनको भी नष्ट करदूंगा ॥३४॥ हे सुहृद ! ऐसा होने से यह पृथ्वी कंटक रहित होजावेगी। जरासंध मेरागुरू है; द्विविद मेरा प्यारा मित्र है ॥ ३५ ॥ शंबर नरक और बाणकाभी मेरे साथ बन्धुत्व है। मैं इन्हीं केद्वारा देवपक्षी राजाओं का नाश करके सुखसे पृथ्वी को भोगूंगा ॥ ३६ ॥ यह जानकर अब इस के पूर्ण करने के निमित्त राम, कृष्णको शीघ्रही यहां लेआवो। 'धनुषयज्ञ और यदुपुरीकी शोभा देखो' यह कहकर उन्हें लाना ॥ ३७ ॥ अक्रूर ने कहा कि हेराजन् ! तुमने जो उपाय सोचा है वह बहुतही उत्तम है। इस उपायसे तुम्हारी मृत्यु निवारण होसकती है। परन्तु इस काम के सिद्धहोने की जैसी सम्भावना है वैसीही सम्भावना असिद्धहोने की भी है। क्योंकि कार्य दैवही सिद्ध करता रहता है ॥ ३८ ॥ ऊंची आशाओं का दैवसही विनाशहोता है; तौभी मनुष्य वैसी इच्छाकरके दुःख सुख भोगा करते हैं। चाहे जोहो—आपकी आज्ञा का पालन करूंगा ॥३९ ॥ श्रीशुकदेवजी बोले कि—हेराजन्! कंसअक्रूर का ऐसी आज्ञा दे मंत्रियों को विदाकर अपने घरमेंआया और अक्रूरभी अपने घर में आये ॥ ४० ॥

इतिश्री मद्भागवतेमहापुराणेदशमस्कंधेसरलाभाषाटीकायांषट्त्रिंशोऽध्यायः ॥ ३६ ॥

श्रीशुकउवाच ॥ केशीतुकंसप्रहितःखुरैर्महीं महाहयोनिर्जरयन्मनोजवः । सटावधूताऽभ्रविमानसंकुलं कुर्वन्नभोहेषितभीषिताखिलः ॥ १ ॥ (विशालनेत्रो विकटास्यकोटरो बृहद्गलोनीलमहाघनोपमः । दुराशयःकंसहितंचिकीर्षुर्व्रजं सनन्दस्यव्रजामकम्पयन् ॥१॥) तंत्रासयन्तंभगवान्स्वगोकुलं तद्धेषितैर्वालविघूर्णिताम्बुदम् । आत्मानमाजौमृगयन्तमग्रणीरुपाह्वयत्सव्यनदन्मृगेन्द्रवत् ॥ २ ॥ सतंनिशाम्याभिमुखोमुखेन खंपिबन्निवाभ्यद्रवदत्यमर्षणः । जघानपद्भ्यामरविन्दलोचनं दुरासदश्चण्डजवोदुरत्ययः ॥३॥ तद्वञ्चयित्वातमधोक्षजोरुषा प्रगृह्यदोर्भ्यां परिविध्यपादयोः । सावज्ञमुत्सृज्यधनुःशतान्तरे यथोरगंतार्क्ष्यसुतोव्यवस्थितः ॥४॥ सलब्धसंज्ञःपुनरुत्थितोरुषा व्यादायकेशीतरसाऽपतद्धरिम् । सोऽप्यस्यवक्त्रेभुजमुत्तरं स्मयन्प्रवेशयामासयथोरगंबिले ॥ ५ ॥ दन्तानिपेतुर्भगवद्भुजस्पृशस्ते केशिनस्तप्तमयस्पृशोयथा। बाहुश्चतद्देहगतोमहात्मनोयथाऽऽमयःसंववृधेउपेक्षितः ॥ ६ ॥ समेधमानेनसकृष्णबाहुना निरुद्धवायुश्चरणांश्चविक्षिपन् । प्रस्विन्नगात्रः परिवृत्तलोचनः पपातलेण्डंविसृजन्क्षितौव्यसुः ॥७॥ तद्देहतःकर्कटिकाफलोपमाद्व्यसोरपाकृष्यभुजंमहाभुजः । अविस्मितोऽयत्नहतारिरुत्स्मयैःप्रसूनवर्षैर्दिविषद्भिरीडितः ॥८॥ देवर्षिरुपसंगम्य भागवतप्रवरोनृप । कृष्णमक्लिष्टकर्माणं रहस्येतदभाषत ॥९॥ कृष्णकृष्णाप्रमेयात्मन्योगेशजगदीश्वर । वासुदेवाखिलावास सात्वतांप्रवर

श्रीशुकदेवजी बोले कि—हे राजन् ! इसओर केशी कंसका भेजाहुआ मनकी समान वेगवाली विशाल अश्वकी मूर्ति धारणकर सब को भय उत्पन्न कराता और खुरोंसे पृथ्वीको खोदता हुआ गोकुलमें आया मेघ उसकी सटाके वेगसे और विमान इधर उधर तितर बितरहो आकाश में व्याप्त होगये और भयानक हिनहिनाहट से विश्व कांप उठा ॥ १ ॥ उसको इसप्रकारसे भीम रूप धारणकिये युद्धके निमित्त आता देखकर श्रीकृष्ण भगवान् उसके आगे निकले और 'निकट आ, ऐसा कहकर उसको बुलाया। केशीभी उससमय सिंहकीसी गर्जना कर उठा ॥ २ ॥ अनन्तर प्रचण्ड वेगवाला वह दुष्ट केशी मुख फैलाय मानो आकाशको पान करताहो ऐसे उनकी ओर दौड़ आया और आतेही अत्यन्त क्रोधसे अपने पिछले दोनोंपांव उन भगवान् के मारे ॥ ३ ॥ परन्तु भगवान् ने सहजहीमें उस प्रहारको बचालिया। तब उस असुरने फिर भगवान्के लात मारनेकी इच्छाकी उसकाल श्रीकृष्णजीने दोनों हाथोंसे उसके दोनों पैर पकड़ लिये और गरुड़ जैसे सर्प फेंकताहै वैसेही सहजही उसको सौधनुष पर फेंक आप वहींपर खडेरहे ॥ ४ ॥ केशी चैतन्य होकर फिर उठा और क्रोधसे मुख फैलाय बड़ीशीघ्रतासे श्रीकृष्णजी की ओर दौड़ा। भगवानने भी हंसतेहुये बांबीमें सर्पकी समान उसके मुंहमें अपनी भुजा डालदी ॥ ५ ॥ भगवान् की भुजाका स्पर्श होतही उसकेदांत ऐसेगिरगये कि—जैसे तपेहुए लोहके स्पर्शसे गिरजाते हैं श्रीकृष्णजीकी भुजाभी उसके हृदयमें प्रवेशकर उपेक्षा कियेहुए जलोदर रोगकी समान बढ़नेलगी ॥ ६ ॥ श्रीकृष्णजी की बाहुके बढनेसे उसकी वायु रुकगई, शरीरमें पसीना निकलआया और दोनों आंखें उलटगई। वह चारों पैर फैलाय मल त्यागताहुआ प्राण रहितहो पृथ्वीपर गिरपड़ा, ॥ ७ ॥ हे-राजन् ! ककड़ी जैसे पककर फैल जातीहै उसीप्रकार केशीकी देह विदीर्ण होगई। महाभुज श्रीकृष्णजीने उसकी देहसे अपनी भुजा बाहर करली। इनके मुखमें किसीप्रकार का भी विस्मयका चिह्न न देखपड़ा उन्होंने सहजहीमें शत्रुको मारडाला। देवतागण फूल बरसार कर इनकी स्तुति करनेलगे ॥ ८ ॥ उसीसमय में भागवत प्रधान नारद उपस्थितहो भगवान श्रीकृष्णजीसे एकांतमें कहनेलगे ॥ ९ ॥ कि—हेकृष्ण ! हेअप्रमेयात्मन् ! हेयोगेश ! हेजगदीश ! हेवासुदेव ! हेसर्वाश्रय

प्रभो ॥ १० ॥ त्वमात्मा सर्वभूतानामेकोज्योतिरिवैधसाम्। गूढोगुहाशयःसाक्षी महापुरुषईश्वरः ॥ ११॥ आत्मनाऽऽत्माश्रयःपूर्वं माययाससृजेगुणान्। तैरिदंसत्य सङ्कल्पः सृजस्यत्स्यवसीश्वरः ॥ १२ ॥ सत्वंभूधरभूतानां दैत्यप्रमथरक्षसाम्। अवतीर्णोविनाशाय सेतूनांरक्षणायच ॥ १३ ॥ दिष्ट्यातेनिहतोदैत्यो लीलयायं हयाकृतिः। यस्यहेषितसंत्रस्तास्त्यजन्त्यनिमिषादिवम् ॥ १४॥ चाणूरंमुष्टिकंचैव मल्लानन्यांश्चहस्तिनम्। कंसंचनिहतंद्रक्ष्ये परश्वोऽहनितेविभो ॥ १५ ॥ तस्यानु शंखयवनमुराणांनरकस्यच । पारिजातापहरणमिन्द्रस्यचपराजयम् ॥ १६ ॥ उद्वाहंवीरकन्यानां वीर्यशुल्कादिलक्षणम्। नृगस्यमोक्षणं पापाद्द्वारकायांजगत्प ते ॥ १७ ॥ स्यमन्तकस्यच मणेरादानं सहभार्यया ॥ मृतपुत्रप्रदानंच ब्राह्मणस्य चधामतः ॥ १८ ॥ पौण्ड्रकस्यवधं पश्चात्काशिपुर्याश्च दीपनम्। दन्तवक्रस्य नि धनं चैद्यस्यचमहाक्रतौ ॥ १९ ॥ यानिचान्यानिवीर्याणि द्वारकामावसन्भवान् ॥ कर्ताद्रक्ष्याम्यहंतानि गेयानिकविभिर्भुवि ॥ २० ॥ अथतेकालरूपस्य क्षपयिष्णोर मुष्यवै। अक्षौहिणीनां निधनं द्रक्ष्याम्यर्जुनसारथेः ॥ २१ ॥ विशुद्धविज्ञानघनस्व संस्थया समाप्तसर्वार्थममोघवाञ्छितम्। स्वतेजसानित्यनिवृत्तमायया गुणप्रवा· हंभगवन्तमीमहि ॥ २२ ॥ त्वामीश्वरं स्वाश्रयमात्ममायया विनिर्मिताशेष विशेष कल्पनम्। क्रीडार्थमद्याऽऽत्तमनुष्यविग्रहं नतोऽस्मिधुर्यं यदुवृष्णिसात्वताम्॥२३॥

श्रीशुकउवाच। एवंयदुपतिंकृष्ण भागवतप्रवरोमुनिः।प्रणिपत्याभ्यनुज्ञातो ययौत

यत्र त्वाष्ट्रं विज्ञानं शिल्पनैपुणम् । रथ्याचत्वरवीथीभिर्यथावास्तु विनिर्मितम् ॥५१॥ सुरद्रुमलतोद्यानविचित्रोपवनान्वितम् । हेमशृंगैर्दिविस्पृग्भिः स्फटिकाट्टालगोपुरैः ॥ ५२ ॥ राजताऽऽरकुटैः कोष्ठैर्हेमकुम्भैरलंकृतैः । रत्नकूटैर्गृहैर्हैमैर्महामरकतस्थलैः ॥ ५३ ॥ वास्तोष्पतीनां च गृहैर्वल्लभीभिश्च निर्मितम् । चातुर्वर्ण्यजनाकीर्णं यदुदेवगृहोल्लसत् ॥ ५४ ॥ सुधर्मां पारिजातं च महेन्द्रः प्राहिणोद्धरेः । यत्र चावस्थितो मर्त्यो मर्त्यधर्मैर्न युज्यते ॥ ५५ ॥ श्यामैककर्णान्वरुणो हयाञ्छुक्लान्मनोजवान् । अष्टौ निधिपतिः कोशाँल्लोकपालो निजोदयान् ॥ ५६ ॥ यद्यद्भगवता दत्तमाधिपत्यं स्वसिद्धये । सर्वं प्रत्यर्पयामासुर्हरौ भूमिगते नृप ॥ ५७ ॥ तत्र योगप्रभावेन नीत्वा सर्वजनं हरिः । प्रजापालेन रामेण कृष्णः समनुमन्त्रितः । निर्जगाम पुरद्वारात्पद्ममाली निरायुधः ॥ ५८ ॥

इति श्रीमद्भा० महा० दशम० पंचाशत्तमोऽध्यायः ॥ ५० ॥

श्रीशुक उवाच । तं विलोक्य विनिष्क्रान्तमुज्जिहानमिवोडुपम् । दर्शनीयतमं श्यामं पीतकौशेयवाससम् ॥ १ ॥ श्रीवत्सवक्षसं भ्राजत्कौस्तुभामुक्तकन्धरम् । पृथुदीर्घचतुर्बाहुं नवकंजारुणेक्षणम् ॥ २ ॥ नित्यप्रमुदितं श्रीमत्सुकपोलं शुचिस्मितम् । मुखारविन्दं बिभ्राणं स्फुरन्मकरकुण्डलम् ॥ ३ ॥ वासुदेवो ह्ययमिति पुमाञ्छ्री

एक बारहयोजन का विस्तारित गढ़ बनवाय उसके बीचमें एक आश्चर्यमय नगर बनवाया ॥५०॥ उसमें विश्वकर्मा का ज्ञान और शिल्प (कारीगरी) की निपुणता दिखाई देनेलगी घरोंके बनाने का स्थान रख राजमार्ग, गली आंगन आदि बनाये, ॥ ५१ ॥ अनेकों उद्यानों में कल्पवृक्ष और लतायें लगा२कर उनको सुशोभित किया सुवर्ण के शिखरों वाली अत्यन्त उंची २ अटारियें व दरवाज़े सुवर्णके कलशोंसे अलकृत थ ॥५२॥ चांदी पीतल और लोहेसे बनीहुई अश्वसाला और अन्नशाला आदि जो बनायेगए उनपर सुवर्णकेकलश शोभायमानहोरहे हैं। अमूल्य मरकतमणिके स्थलवाले सुवर्णके घरों के शिखर माणिक इत्यादि रत्नोंके बनायेगयेहैं ॥५३॥ देवताओंके मन्दिर और अटारियोंकी सुन्दर रचना बनीहै चारों वर्णोंके मनुष्योंके व्याप्त होनेसे राजभवन शोभायमानहोरहाहै ॥ ५४ ॥ हेराजन् इन्द्रने भगवान के निकट देवसभा और कल्पवृक्ष भेजा जिस सभामें मनुष्य बैठारहे और उसे भूख प्यासादि मर्त्यलोकके धर्म व्याप्त न होवे॥५५॥ वरुणने मनकी समान वेगवान् श्वेतवर्ण केवल एक कानके काले घोड़े, निधपति कुबेरने आठों निधियें और लोकपालोंने अपनी २ विभूतियें भेजदीं ॥५६॥ हेराजन् ! भगवान ने अपने कार्य साधन के निमित्त दूसरे सिद्धगणों को जो २ आधिपत्य दियाथा उनके पृथ्वीपर अवतार लेनेसे उन्हों (सिद्धगण) ने सब आधिपत्य देदिये ॥ ५७ ॥ भगवान श्रीकृष्णजीने सब प्रजाको अपनी योगमायाके बलसे नगरमें पहुंचाय उनकी रक्षाके निमित्त बलदेवजी को वहांरख आप उनसे परामर्श कर केवल कमलोंकी माला पहिन बिना अस्त्र शस्त्र लिये नगरसे बाहरहुए ॥ ५८ ॥

इतिश्रीमद्भा०महा०दशम०सरलाभाषाटीकायांपञ्चाशोऽध्यायः ॥ ५० ॥

श्रीशुकदेवजी बोले कि-हे राजन् ! हरि उदय हुए चन्द्रमा की समान नगर से बाहर हुए। उनका सुंदर श्रेष्ठ श्यामवर्ण था, पीताम्बर पहिने वक्षःस्थलमें श्रीवत्सका चिह्न और गलेमें प्रकाशित कौस्तुभमणि शोभायमान है। मोटे और लंबे चार भुजा धारण किये हैं नवीन कमल की समान रक्तवर्णके नेत्र हैं ॥ १—२ ॥ सदैव आनंदयुक्त, शोभायुक्त, सुंदर कपोल वाला, सुंदर मुसकान युक्त मुख मकराकृत कुंडलसे प्रकाशित होरहा है ॥ ३ ॥ यवन इस रूपको देख मन २ में विचार

श्रीवत्सलाञ्छनः। चतुर्भुजोऽरविन्दाक्षो वनमाल्यतिसुन्दरः ॥ ४ ॥ लक्षणैर्नारदप्रोक्तैर्नान्यो भवितुमर्हति। निरायुधश्चलन्पद्भ्यां योत्स्येऽनेननिरायुधः ॥ ५ ॥ इति निश्चित्य यवनःप्राद्रवन्तं पराङ्मुखम्। अन्वधावज्जिघृक्षुस्तं दुरापमपियोगिनाम् ॥६॥ हस्तप्राप्तमिवात्मानं हरिणासपदेपदे। नीतोदर्शयतादूरं यवनेशोऽद्रिकन्दरम् ॥७॥ पलायनंयदुकुले जातस्यतवनोचितम्। इतिक्षिपन्ननुगतो नैनंप्रापाहताशुभः॥ ८ ॥ एवंक्षिप्तोऽपि भगवान्प्राविशद्गिरिकन्दरम्। सोऽपिप्रविष्टस्तत्रान्यं शयानंददृशेनरम् ॥ ९ ॥ नन्वसौदूरमानीय शेतेमामिहसाधुवत्। इतिमत्वाऽच्युतंमूढस्तं पदासमताडयत् ॥ १० ॥ सउत्थायचिरंसुप्तः शनैरुन्मील्यलोचने.॥ दिशोविलोकयन्पार्श्वे तमद्राक्षीदवस्थितम् ॥ ११ ॥ सतावत्तस्यरुष्टस्य दृष्टिपातेनभारत। देहजेनाऽग्निनादग्धो भस्मसादभवत्क्षणात् ॥ १२ ॥ राजोवाच। कोनामसपुमान्ब्रह्मन्कस्य किंवीर्यएवच। कस्माद्गुहांगतःशिश्ये किंतेजोयवनार्दनः ॥ १३ ॥ श्रीशुकउवाच। सइक्ष्वाकुकुलेजातो मान्धातृतनयोमहान्। मुचुकुन्दइतिख्यातो ब्रह्मण्यःसत्यसङ्गरः ॥ १४ ॥ सयाचितः सुरगणैरिन्द्राद्यैरात्मरक्षणे। असुरेभ्यःपरित्रस्तैस्तद्रक्षां सोऽकरोच्चिरम् ॥ १५ ॥ लब्ध्वागुहंतेस्वःपालं मुचुकुन्दमथाब्रुवन्। राजन्विरमतां कृच्छ्राद्भवान्नः परिपालनात् ॥ १६ ॥ नरलोकेपरित्यज्य राज्यं निहतक

नेलगा कि देवर्षि नारदने जिसप्रकार कहाथा इस पुरुषका ठींक उसी प्रकारका रूप दिखाई देता है। यह श्रीवत्सके चिह्नसे चिह्नित और अत्यंत सुंदर है। इसका रूप चतुर्भुज है इसके नेत्र कमलकी समान हैं और यह गलेमें वनमाला धारण किये हुए है ॥ ४ ॥ इन सब चिह्नोंके देखने से निश्चय ही जानपड़ता है कि यह वासुदेव है और कोई नहीं है। यह इस समय निरस्त्रहो पैदल जारहा है, अतएव मैंभी इसके साथ निरस्त्र होकर युद्ध करूंगा ॥५॥ यवन इसप्रकार से निश्चयकर, विमुखहो भागते हुए योगियों कोभी दुष्प्राप्य श्रीकृष्णजी के पकड़ने के निमित्त उनके पीछे २ दौड़ा ॥६॥ भगवान् पग २ में अपना एक हाथका अंतर दिखाते हुए यवन राजको अति दूरवर्त्ती पहाड़ की कंदरा में लेगये ॥ ७॥ यवन "तू यदुकुलमें उत्पन्न हुआ है तुझे भागना उचित नहीं" यह कहता हुआ तिरस्कार करता उनके पीछे२ जानेलगा। परन्तु उसके कर्मोंका क्षय नहीं हुआथा इसकारण वह उनको न पासका ॥ ८ ॥ भगवान उससे तिरस्कारित होनेहुए भी गिरिकंदरा में प्रवेश करगये। यवनने भी उसमें प्रवेश करके देखा कि एक मनुष्य सोरहा है ॥ ९ ॥ उसमूर्ख काल यवनने यह जानकर कि यही दुष्ट मुझको इतनी दूरलाकर अब साधूकी समान सोरहा है उस मनुष्यको श्रीकृष्णजी जान उसके लातमारी ॥ १० ॥ वह मनुष्य बहुत दिनोंसे सोरहाथा। धीरे २ आंखें खोल चारोंओर दृष्टिडाल पार्श्वमें उस यवनकोही देखपाया ॥ ११ ॥ वह अत्यंत क्रोधित हुआ, तबही उसकी देहसे अग्नि उत्पन्न हुई। यवन उससे जलकर तत्कालही भस्म होगया ॥१२॥ परीक्षितने पूँछा कि–हेब्रह्मन्! उसपुरुषने कि जिसने यवनकोमारा कौनथा? किसवंशकाथा? क्या नामथा किस का पुत्रथा? उसका ऐसा प्रभाव क्योंकर हुआ? और किस कारण वह गुफामें शयनकररहा था ॥ १३ ॥ श्रीशुकदेवजी ने कहा कि–हे राजन्! उसने इक्ष्वाकुवंशमें जन्म ग्रहण कियाथा, उसका नाम मुचकुंद था और वह मांधाता का पुत्रथा। मुचकुंद बड़ाही सत्य प्रतिज्ञ और ब्राह्मणोंका हितकारीथा ॥ १४ ॥ युद्धमें उसकी प्रतिज्ञा निष्फल नहीं होती थी। इन्द्रादि देवताओं ने असुरों से भयभीतहो अपनी रक्षाके निमित्त उससे सहायताचाही, उसने अनेक दिन उनकी रक्षाकी थी ॥ १५ ॥ अनंतर देवताओं ने कार्त्तिकेयको स्वर्गका रक्षकपा मुचुकुंद से कहा कि हे राजन् तुम हमारे पालन रूप कष्टके सहने से निवृत्तहो ॥ १६ ॥ हेवीर! मनुष्य लोक और निष्कंटक राज्य

वृतकम् । अस्मात्पालयतोवीर कामास्तेसर्व उज्झिताः ॥ १७ ॥ सुतामहिष्योभवतो ज्ञातयोऽमात्यमन्त्रिणः । प्रजाश्चतुल्यकालीया नाऽधुनासन्तिकालिताः ॥ १८ ॥ कालोबलीयान्बलिनां भगवानीश्वरोऽव्ययः । प्रजाःकालयते क्रीडन्पशुपालो यथा पशून् ॥ १९ ॥ वरंवृणीष्वभद्रंते ऋतेकैवल्यमद्यनः । एकएवेश्वरस्तस्य भगवान्विष्णुरव्ययः ॥ २० ॥ एवमुक्तःसवै देवानभिवन्द्य महायशाः । निद्रामेवततोवव्रे स राजाश्रमकर्शितः ॥ २१ ॥ यःकश्चिन्ममनिद्राया भंगकुर्यात्सुरोत्तमाः । सहिभस्मी भवेदाशु तथोक्तश्च सुरैस्तदा ॥२२॥ शयानश्चगुहाविष्टो निद्रयादेवदत्तया । स्वापेयातेयस्तुमध्ये बोधयेत्वामचेतनः ॥ सत्वयादृष्टमात्रस्तु भस्मीभवतुतत्क्षणात् ॥ ॥ २३ ॥ यवनेभस्मसान्नीते भगवान्सात्वतर्षभः । आत्मानंदर्शयामास मुचुकुन्दाय धीमते ॥ २४ ॥ तमालोक्यघनश्यामं पीतकौशेयवाससम् । श्रीवत्सवक्षसं भ्राजत्कौस्तुभेनविराजितम् ॥ २५॥ चतुर्भुजंरोचमानं वैजयन्त्याचमालया । चारुप्रसन्नवदनं स्फुरन्मकरकुण्डलम् ॥२६ ॥ प्रेक्षणीयंनृलोकस्य सानुरागस्मितेक्षणम् । अपीच्यवयसं मत्तमृगेन्द्रोदारविक्रमम् ॥ २७॥ पर्यपृच्छन्महाबुद्धिस्तेजसा तस्य धर्षितः । शंकितःशनकैराजा दुर्धर्षमिवतेजसा ॥ २८ ॥ मुचुकुन्द उवाच ॥ को भवानिह संप्राप्तो विपिनेगिरिगह्वरे । पद्भ्यां पद्मपलाशाभ्यां विचरस्युरुकण्टके ॥ २९॥ किंस्वित्तेजस्विनां तेजोभगवान्वा विभावसुः । सूर्यःसोमोमहेन्द्रोवा लोकपालोपरोऽपिवा ॥ ३० ॥ मन्येत्वांदेवदेवानां त्रयाणांपुरुषर्षभम् । यद्बाधसेगुहा-

---

को छोड़कर हमारी रक्षा करने में प्रवृत्तहो तुमने समस्त भोग परित्याग करदिये ॥ १७ ॥ तुम्हारे पुत्र, स्त्री, सम्बंधी, मन्त्री और तुम्हारे समय के प्रजागण कालसे चलायमानहो अब जीवित नहीं है ॥ १८ ॥ काल—बलवानों में श्रेष्ठ, भगवान, ईश्वर और अव्यय है, क्रीड़ा करता हुआ ग्वाल जैसे पशुओंको चलाता है तैसेही वह प्रजागणको चलायमान करता है॥ १९ ॥ तुम्हारा कल्याण होवे। मोक्षके अतिरिक्त जोइच्छाहो कहो, वहीवर पाओगे। क्योंकि मुक्तिके अधीश्वर केवल नारायणही हैं ॥ २० ॥ देवताओं कीइस बातको सुनकर महायशा मुचुकुंदने उनको नमस्कार किया और राज्य श्रमसे थकित होनेके कारण उनसे देवताओं से निद्राही मांगी ॥ २१ ॥ मुचुकुन्दने कहा कि—हे सुरोत्तमो ! जोकोई आकर मेरी निद्रामें विघ्नकरे, वह तुरन्त भस्महोजाय, यहवर सुनकर दो तब देवताओंने 'तथास्तु' कहा ॥२२ ॥ और ऐसावरदान दिया कि आपके सोतेसमय बीचमें जो मूर्ख जगावेगा उसपर आपकी दृष्टि पड़तही वह तुरत भस्म होजायगा फिर वह देवताओं की दीहुई निद्रासे गुफामें जाकर सोरहा ॥ २३ ॥ हे राजन् ! इस प्रकार से कालयवन के भस्म होनेपर सात्वत श्रेष्ठ भगवान ने मुचुकुंदको अपनी मूर्त्ति दिखाई ॥ २४ ॥ उनका मेघका समान श्यामवर्ण है पीताम्बर पहिने, वक्षःस्थल में श्रीवत्सधारण किये हैं प्रकाशित कौस्तुभमणि उनकी और भी शोभा बढ़ारही है ॥ २५ ॥ चतुर्भुज, वैजयंती मालासे प्रकाशित, सुंदर प्रसन्न मुखारबिंद धारण किये, मकरा कृतकुंडल पहिने ॥ २६ ॥ मनुष्यों के देखन योग्य, स्नेहयुक्त मंद मुसकान सहित देखते हुए, सुंदर अवस्था व मत्तसिंह की समान पराक्रम वाले ॥ २७ ॥ तेजयुक्त उस रूपको देखकर वह राजा भगवान केतेजसे अभिभूत और भयभीत होगया तथा धीरे २ उन तेजयुक्त भगवान से पूँछनेलगा कि ॥ २८ ॥ आप कौनहो—जोइस बहुत स कंटक युक्त वनके बीचमें आय पहाड़ की कंदरामें प्रवेशकर चरण कमल द्वारा इधर उधर भ्रमणकर रहेहो ॥ २९॥ आप क्या तेजस्वियों के तेज या भगवान विभावसुहो ? या सूर्य, चन्द्र, इन्द्र, लोकपाल इनमें से कोई हो ॥ ३० ॥ जानपड़ता है कि तीनदेवों में से आप विष्णुजी हो। क्योंकि आप दीपक कीसमान

स्वान्तंप्रदीपः प्रभयायथा ॥ ३१ ॥ शुश्रूषतामव्यलीकमस्माकं नरपुङ्गवः । स्वज-
न्मकर्मगोत्रंवाकथ्यतां यदिरोचते ॥ ३२ ॥ वयंतुपुरुषव्याघ्रऐक्ष्वाकाः क्षत्रबन्धवः।
मुचुकुन्दइतिप्रोक्तो यौवनाश्वात्मजःप्रभो ॥ ३३ ॥ चिरप्रजागरश्रान्तो निद्रयाप-
हतेन्द्रियः । शयेऽस्मिन्विजनेकामं केनाप्युत्थापितोऽधुना ॥ ३४ ॥ सोपिभस्मी
कृतोनूनमात्मीयेनैवपाप्मना । अनन्तरंभवाञ्छ्रीमाँल्लक्षितोऽमित्रशातनः ॥ ३५ ॥
तेजसातेऽविषह्येणभूरिद्रष्टुंनशक्नुमः। हतौजसोमहाभागमाननीयोऽसिदेहिनाम् ॥
॥ ३६ ॥ एवंसम्भाषितो राज्ञाभगवान्भूतभावनः । प्रत्याहप्रहसन्वाण्या मेघनाद-
गम्भीरया ॥ ३७ ॥ श्रीभगवानुवाच ॥ जन्मकर्माभिधानानि सन्तिमेऽङ्गसहस्रशः ।
नशक्यन्तेऽनुसंख्यातुमनन्तत्वान्मयापिहि॥३८॥ क्वचिद्रजांसिविममे पार्थिवान्यु
रुजन्मभिः।गुणकर्माभिधानानि नमेजन्मानिकर्हिचित्॥३९॥कालत्रयोपपन्नानिजन्म
कर्माणिमेनृप। अनुक्रमन्तोनैवान्तंगच्छन्तिपरमर्षयः॥४०॥तथाप्यद्यतनान्यङ्गशृणुष्व
गदतोमम। विज्ञापितोविरिञ्चेनपुराऽहंधर्मगुप्तये। भूमेर्भारायमाणानामसुराणांक्ष
यायच॥४१॥अवतीर्णोयदुकुलेगृहआनकदुन्दुभेः। वदन्तिवासुदेवेतिवसुदेवसुतं
हिमाम् ॥ ४२ ॥ कालनेमिर्हतःकंसःप्रलम्बाद्याश्चसद्द्विषः । अयंचयवनोदग्धोरा-
जंस्तेतिग्मचक्षुषा ॥ ४३ ॥ सोऽहंतवानुग्रहार्थं गुहामेतामुपागतः। प्रार्थितःप्रचुरं
पूर्वंत्वयाऽहंभक्तवत्सलः ॥ ४४ ॥ वरान्वृणीष्वराजर्षेसर्वान्कामान्ददामिते । मांप्र-
पन्नोजनःकश्चिन्नभूयोऽर्हतिशोचितुम् ॥ ४५॥ श्रीशुक उवाच ॥ इत्युक्तस्तंप्रणम्या

अपने प्रकाश से गुफाका अंधकार दूर करतेहो ॥ ३१ ॥ हे नरश्रेष्ठ ! आपके यथार्थ जन्म, कर्म और गोत्रके सुनने की मेरी अत्यंत इच्छा है, यदि इच्छा होतो कहिये ॥ ३२ ॥ हे प्रभो ! मैं इक्ष्वाकुवंशी विख्यात क्षत्रीहूं मैं युवनाश्व के पुत्र मांधाता का पुत्र मुचुकुन्दहूं ॥ ३३ ॥ अनेक दिनों के जागते रहने से श्रमित और निद्रामें हतेन्द्रियहो इस निर्जनवन में आय इच्छानुसार सोरहाथा, केवल इसी मनुष्य ने मेरी निद्रा भंगकी है ॥ ३४ ॥ निश्चयही यह अभागा अपनेही पापों से भस्महोगया है । इस के भस्महोने के उपरांतही श्रीमान् आपने अपने दर्शन दिये ॥ ३५ ॥ आपके असहनीय तेजसे मेरा तेज नाशहोगया है इसकारण मैं और वृत्तांत नहीं पूँछ सकता, हे महाभाग ! आप देहधारियों में श्रेष्ठहो ॥ ३६ ॥ भूतभावन भगवान इसप्रकार से पूँछे जानेपर हँसतेहुए मेघ की समान गम्भीर बाणी से बोले कि— ॥ ३७ ॥ हेराजन् ! मेरे सहस्रोंही जन्म, कर्म और नाम हैं उनसबका अन्तनहीं है इसलिये मैंभी उनकी गणना नहीं करसकता ॥ ३८ ॥ पृथ्वी के रजकण गिने जासकते हैं; परन्तु बहुत जन्मों में भी कभी कोई मेरे गुण, कर्म, नाम और जन्मकी गणनानहीं करसकता ॥ ३९ ॥ परम ऋषिगण मेरे त्रिकाल सिद्धजन्म और कर्मों का यथाक्रम से वर्णन करकेभी अन्त नहीं पाते ॥ ४० ॥ तोभी हे महाराज! मैंअपनेवर्तमान जन्म और कर्म सब आपसे कहताहूं,-सुनो प्रथम कमलयोनि ब्रह्माजीने धर्म कीरक्षाऔर पृथ्वी के भारभूत असुरों के नाशके निमित्त मुझ से प्रार्थनाकीथी ॥ ४१॥ इसकारण मैंने यदुकुल में वसुदेव के घर अवतार लिया है । मैं वसुदेवका पुत्रहूं इसीकारण मनुष्यमुझको वासुदेव कहते हैं ॥ ४२ ॥ साधुओं से द्वेष रखनेवाले कालनेमि-कंस और प्रलम्बादि असुरगण मेरे हाथ से मारेगये हैं । और केवल तुम्हारी तीक्ष्ण दृष्टि से इस असुरकोभी नाशकराया ॥ ४३ ॥ तुम्हारेऊपर अनुग्रह करने के निमित्तही मैं इस स्थानमें आयाहूं । मुझ भक्तवत्सलकी प्रथमतुमने अनेक प्रार्थनाएं कीथीं ॥ ४४ ॥ हे राजर्षि ! वरमांगो । मैं सर्वकाम का देनेवालाहूं मुझको पाकर किसी मनुष्य को शोककरना उचितनहीं ॥ ४५ ॥ श्रीशुकदेवजी बोले कि इस बात को सुन मुचुकुन्द परम

हृष्टमुचुकुन्दोमुदान्वितः ॥ ज्ञात्वानारायणंदेवंगर्गवाक्यमनुस्मरन् ॥ ४६ ॥ मुचुकुन्दउवाच ॥ विमोहितोऽयंजनईशमायया त्वदीययात्वांनभजत्यनर्थदृक् । सुखाय दुःखप्रभवेषुमज्जतेगृहेषुयोषित्पुरुषश्चवंचितः ॥ ४७ ॥ लब्ध्वाजनोदुर्लभमत्रमानुषं कथंचिदव्यंगमयत्नतोऽनघ । पादारविन्दं नभजत्यसन्मतिर्गृहान्धकूपेपतितोयथापशुः ॥ ४८ ॥ ममैषकालोऽजितनिष्फलोगतो राज्यश्रियोन्नद्धमदस्यभूपतेः । मर्त्यात्मबुद्धेः सुतदारकोशभूष्वासज्यमानस्य दुरन्तचिन्तया ॥ ४९ ॥ कलेवरेऽस्मिन्घटकुड्यसन्निभे निरूढमानोनरदेवइत्यहम् । वृतोरथेभाश्वपदात्यनीकपैर्गां पर्यटंस्त्वागणयन्सुदुर्मदः ॥ ५० ॥ प्रमत्तमुच्चैरिति कृत्यचिन्तया प्रवृद्धलोभं विषयेषुलालसम् । त्वमप्रमत्तः सहसाऽभिपद्यसे क्षुल्लेलिहानोऽहिरिवाखुमन्तकः ॥ ५१ ॥ पुरा रथैर्हेमपरिष्कृतैश्चरन्मतंगजैर्वा नरदेवसंज्ञितः । सएवकालेनदुरत्ययेनतेकलेवरो विट्कृमिभस्मसंज्ञितः ॥ ५२ ॥ निर्जित्य दिक्चक्रमभूतविग्रहो वरासनस्थः समराजवन्दितः । गृहेषुमैथुन्यसुखेषुयोषितां क्रीडामृगः पूरुषईशनीयते ॥ ५३ ॥ करोतिकर्माणितपस्सुनिष्ठितो निवृत्तभोगस्तदपेक्षयाददत् । पुनश्चभूयेयमहंस्वराडिति प्रवृद्धतर्षोनसुखायकल्पते ॥ ५४ ॥ भवापवर्गोभ्रमतोयदाभवेज्जनस्य तर्ह्यच्यु

आनंदितहुआ और जो गर्गमुनि ने कहाथा कि " अट्ठाईसवें युग में भगवान अवतार लेंगे " इस समय उस बात का स्मरणकर उनका देवदेव नारायणजान प्रणामकर स्तुति करनेलगा ॥ ४६ ॥ मुचुकुन्द ने कहा कि—हे ईश्वर ! यह लोक स्त्री और पुरुष इन दो भागों से विभक्तहो आपकी मायासे मोहित है; अतएव परमार्थ सुख स्वरूप आप को नहीं देखपाता और न आपकी सेवाकरे एक दूसरे से वंचितहोकर सुख के कारण दुःख के उत्पत्तिस्थानघर में आसक्त होतारहता है ॥ ४७ ॥ हे निष्पाप ! कर्मानुसार किसी प्रकार से दुर्लभ अविकलाङ्ग मनुष्यजन्म को पाकर मनुष्यों को विषयसुखकीही वृद्धि होती रहती है। पशुगण जैसे तृण के लोभ से तृण से ढकेहुए अंधे कुए मे गिरते हैं वैसेही वहभी घररूपी अंधकुए में गिरकर आपके चरणकमलों का भजन नहीं करते ॥ ४८ ॥ मैं राजाथा । राज्य सम्पत्ति के कारण मुझे अहंकार उत्पन्नहोगयाथा । मैं आत्मा देहकोही जानकर घोर चिंता के साथ पुत्र, स्त्री, कोष और भूमि आदि में आसक्तथा ॥ ४९ ॥ और घड़े व दीवारकी समान इस शरीर में " मैं राजाहूं " ऐसा अभिमान कर रथ, हाथी, घोड़े और पैदल वाली सेना से घिर भ्रमण करता २ अत्यंत गर्वित होगयाथा । उससमय मैंने आपका भजन नहीं किया इसकारण मेरा इतना समय व्यर्थहोगया ॥ ५० ॥ भूखा सांप जैसे गलफड़े चाटताहुआ चूहेपर आक्रमण करता है वैसेही अप्रमत्त कालरूप आपको यह २ कार्य समाप्त करनाचाहिये ऐसी चिंताओं से प्रमत्त विषय वासनाओंसे व्याकुल और बँधेहुए तृष्णान्वित मनुष्यों का हठात् भक्षण करलेतेहो ॥ ५१ ॥ जो शरीर प्रथम राजाके नामसे गर्वितहो सुवर्णसे मंढ़ेहुए रथ व हाथीपर भ्रमणकरताहै इससमय आपका अटलनीय काल मूर्त्तिसे विष्ठा कृमि व भस्म नामको पाता है ५२ ॥ हे ईश्वर ! जो पुरुष दिशा विदिशाके राजाओं को जीतकर सबसे ऊंचे आसनपर बैठ राजाओंका पूजनीयहुआहै वहभी क्रीड़ा मृगकी समान एक स्त्री के घरसे दूसरी स्त्री के घर घूमता फिरताहै मैथुन धर्मही उन सब घरोंका सुखहै ॥ ५३ ॥ इस समय सब छोड़कर जन्मान्तर में जिसप्रकारसे चक्रवर्ती होसकूं वह करूं यह विचारकर वह मनुष्य सब भोगों से निवृत्त होताहै और उस भोगको त्याग तपस्या में अत्यन्तही निष्ठितहो, कर्म करता है । इसप्रकारसे उस की तृष्णा प्रतिदिन बढ़ती रहती है; इसकारणवह सुख को नहींप्राप्त करसकता ॥ ५४ ॥ हे अच्युत ! आपके अनुग्रह से संसारी मनुष्यों के व्यवसायिक कर्म शेष

तत्सत्समागमः । सत्सङ्गमो यर्हि तदैव सद्गतौ परावरेशे त्वयि जायते मतिः ॥ ५५ ॥ मन्ये ममानुग्रह ईश ते कृतो राज्यानुबन्धापगमो यदृच्छया । यः प्रार्थ्यते साधुभिरेकचर्यया वनं विविक्षद्भिरखण्डभूमिपैः ॥५६॥ न कामयेऽन्यं तव पादसेवनादकिंचनप्रार्थ्यतमाद्वरं विभो । आराध्य कस्त्वां ह्यपवर्गदं हरे वृणीत आर्यो वरमात्मबन्धनम् ॥५७॥ तस्माद्विसृज्याशिष ईश सर्वतो रजस्तमःसत्वगुणानुबन्धनाः । निरंजनंनिर्गुणमद्वयं परंत्वां ज्ञप्तिमात्रंपुरुषंव्रजाम्यहम् ॥ ५८ ॥ चिरमिह वृजिनार्तस्तप्यमानोऽनुतापैरवितृषषडमित्रोऽलब्धशान्तिः कथंचित् । शरणद समुपेतस्त्वत्पदाब्जं परात्मन्नभयमृतमशोकं पाहि माऽऽपन्नमीश ॥ ५९ ॥ श्रीभगवानुवाच । सार्वभौममहाराज मतिस्तेविमलोर्जिता । वरैःप्रलोभितस्यापि नकामैर्विहतायतः ॥ ६० ॥ प्रलोभितो वरैर्यत्त्वमप्रमादाय विद्धितत् । न धीर्मय्येकभक्तानामाशीर्भिर्भिद्यते क्वचित् ॥६१॥ युंजानानामभक्तानां प्राणायामादिभिर्मनः । अक्षीणवासनं राजन्दृश्यते पुनरुत्थितम् ॥ ६२ ॥ विचरस्वमहींकामं मय्यावेशितमानसः । अस्त्वेवंनित्यदातुभ्यं भक्तिर्मय्यनपायिनी ॥ ६३ ॥ क्षात्रधर्मे स्थितोजन्तून्न्यवधीर्मृगयादिभिः । समाहितस्तत्तपसा जह्यघंमदुपाश्रितः ॥ ६४ ॥ जन्मन्यनन्तरे राजन्सर्वभूतसुहृत्तमः । भूत्वा द्विजवरस्त्वंवै मामुपैष्यसिकेवलम् ॥ ६५ ॥

इति श्रीमद्भा०महा० द० उ० एकपंचाशत्तमोऽध्यायः ॥ ५१ ॥

होजाते हैं, तभी वह साधुओं का संग प्राप्तकरते हैं । जैसेही साधुसंग उत्पन्नहुआ वैसेही साधुओं की गति और कार्य कारण के नियंता आप में भक्ति उत्पन्नहोती है ॥ ५५ ॥ हे ईश्वर ! तपस्या के निमित्त वनों प्रवेशकर अभिलाषीहो विवेकी चक्रवर्ती गण आप के निकट जा प्रार्थनाकरते हैं उसी राज्यानुराग से मेरीइच्छा दूरहोगई है–जानना पड़ता है कि यह आपही की कृपा है ॥५६॥ हे प्रभो ! आप के चरणों की सेवाकरनाही निरहंकारी मनुष्यों की एक प्रार्थना है मैंभी आप से उसी वरको मांगताहूं । हे हरे ! आप मुक्तिके देनेवालेहो कौनमनुष्य आप का आराधन कर इस प्रकार का वरमांगेगा कि जिससे आत्माका बंधनहोवे ॥ ५७ ॥ अतएव हे ईश्वर ! रज, तम, और सत्वगुण से बँधाहुई समस्त कामनाओं को छोड़कर मैं निरंजन, निर्गुण, अद्वय, श्रेष्ठ और विज्ञानमात्र पुरुष आप के चरणों की शरणमें आयाहूं ॥ ५८ ॥ हेपरमात्मन् ! इस असार में मैं बहुत दिनों से कर्मफलों से पीड़ितहूं, बहुत दिनों से उनमत्त वासनाओंद्वारा संतप्त होरहाहूं;तौभी मेरे छःशत्रुओं की तृष्णा दूरनहींहुई । अतएव किसी प्रकारसे भी शांति न पा आप के सत्य,भय-रहित और शोकहीन चरणकमलों का आश्रय किया है । हे ईश्वर मेरी रक्षाकरो विपत्ति मुझको व्याप्त होरही है ॥ ५९ ॥ भगवान ने कहा कि—हे सार्वभौम महाराज ! तुम्हारी बुद्धि अत्यन्त निर्मल और गंभीर है क्योंकि तुमको वरद्वारा मैंने इतने लोभ दिखाये तौभी तुम्हारीबुद्धि इच्छाओं से मोहित न हुई ॥ ६० ॥ तुमको जो वरद्वारा मैंने लोभ दिखाया, निश्चयही जानना कि तुमको भ्रममें डालनेके निमित्त मैंने नहीं कहा, जो एकांत भक्त हैं उनकी बुद्धि, भोग सुखोंको प्राप्तहो-करभी उनमें आसक्त नहीं होती ॥ ६१ ॥ किंतु हे राजन् ! जो भक्त नहीं हैं, देखाजाता है कि उनका मन प्राणायामादिद्वारा मुझमें लगाकरभी कभी २ विषयोंकी ओर दौड़ता रहताहै ॥६२॥ तुम अपने मनको मुझमें लगाकर इच्छानुसार पृथ्वी में भ्रमण करो, मुझपर सर्वदाही तुम्हारी ऐसी ही निश्चलाभक्ति रहेगी ॥ ६३ ॥ क्षत्रियधर्म का अवलंबनकर तुमने मृगया में नानाजतुओंका वध कियाहै, अतएव मेरा आश्रयकर एकाग्र मनसे तपस्याद्वारा पापोंका नाशकरो ॥६४॥ हेराजन् ! दूसरे जन्ममें तुम सर्वप्राणियों के सुहृद श्रेष्ठद्विजहो केवल मुझको प्राप्तहोगे ॥ ६५ ॥

इतिश्री मद्भागवते महापुराणे दशमस्कन्धे सरलाभाषाटीकायां एकपंचाशोऽध्यायः ॥ ५१ ॥

श्रीशुक उवाच ॥ इत्थंसोऽनुगृहीतोऽङ्गकृष्णेनेक्ष्वाकुनन्दनः । तंपरिक्रम्यसंनम्यनिश्चक्रामगुहामुखात् ॥ १ ॥ संवीक्ष्यक्षुल्लकान्मर्त्यान्पशून्वीरुद्वनस्पतीन् । मत्वाकलियुगंप्राप्तंजगामदिशमुत्तराम् ॥ २ ॥ तपःश्रद्धायुतोधीरोनिःसङ्गोमुक्तसंशयः । समाधायमनः कृष्णेप्राविशद्गन्धमादनम् ॥३॥ बदर्याश्रममासाद्यनरनारायणालयम् । सर्वद्वन्द्वसहः शान्तस्तपसाऽऽराधयद्धरिम् ॥ ४ ॥ भगवान्पुनराव्रज्यपुरींयवनवेष्टिताम् । हत्वाम्लेच्छबलंनिन्येतदीयंद्वारकांधनम् ॥ ५ ॥ नीयमानेधनेगोभिर्नृभिश्चाच्युतचोदितैः । आजगामजरासन्धस्त्रिविंशत्यनीकपः ॥ ६ ॥ विलोक्यवेगरभसंरिपुसैन्यस्यमाधवौ । मनुष्यचेष्टामापन्नौराजन्दुद्रुवतुर्द्रुतम् ॥७॥ विहायवित्तंप्रचुरमभीतौभीरुभीतवत् । पद्भ्यांपद्मपलाशाभ्यांचेलतुर्बहुयोजनम् ॥८॥ पलायमानौतौदृष्ट्वामागधः प्रहसन्बली । अन्वधावद्रथानीकैरीशयोरप्रमाणवित् ॥ ९ ॥ प्रद्रुत्यदूरंसंश्रान्तौतुङ्गमारुहतांगिरिम् । प्रवर्षणाख्यंभगवान्नित्यदायत्रवर्षति ॥ १० ॥ गिरौनिलीनावाज्ञायनाधिगम्यपदंनृप । ददाहगिरिमेधोभिः समन्तादग्निमुत्सृजन् ॥ ११ ॥ ततउत्पत्यतरसादह्यमानतटादुभौ । दशैकयोजनोत्तुङ्गान्निपेततुरधोभुवि ॥ १२ ॥ अलक्ष्यमाणौरिपुणासानुगेनयदूत्तमौ । स्वपुरंपुनरायातौसमुद्रपरिखांनृप ॥ १३ ॥ सोऽपिदग्धावितिमृषामन्वानोबलकेशवौ । बलमाकृष्यसुमहन्मगधान्मागधोययौ ॥१४॥ आनर्ताधिपतिः श्रीमान्रैवतोरैवतींसुताम् । ब्रह्मणा

श्रीशुकदेवजी बोले–कि हे राजन् ! इक्ष्वाकुनन्दन मुचुकुंद भगवान् श्रीकृष्णजीसे ऐसा अनुग्रह प्राप्तकर उनकी परिक्रमा व दण्डवतकर गुफामेंसे बाहर निकला ॥ १ ॥ बाहर निकलतेही उसने देखा कि–पशु, लता और वनस्पति सबही छोटेहोगये हैं, अतएव 'कलियुग आगया' यह विचारकर वह उत्तरकी ओर गया ॥ २ ॥ और तपस्यामें श्रद्धायुक्त, धीर, निःसंग और निःसंशयहो श्रीकृष्णजीमें मनलगाय गन्धमादन पर्वत में उपस्थित हुआ ॥ ३ ॥ वहां नरनारायणके निवासस्थान बदरिकाश्रममें प्राप्तहो सब सुख दुःखादि द्वन्द्वोंका सहनकर शांतभाव से तपस्याद्वारा भगवानकी आराधना करनेलगा ॥४॥ हे राजन् ! इधर यवनके नाशहोनेपर भगवान फिर मथुरा में आये और म्लेच्छ सेनाका संहार कर उनके धनको द्वारका ले जानेलगे ॥ ५ ॥ वह मनुष्य और बैलोंमें धनलिये जातेथे कि–उसी समयमें जरासन्ध तेईस अक्षौहिणीका सेनापतिहो फिर वहांआया ॥६॥ हे राजन् ! राम कृष्णने शत्रुसेनाके वेगको देख मनुष्य लीलाका अवलम्बनकर वेगसे भागने का आरंभ किया ॥ ७ ॥ वह यद्यपि निर्भय थे तथापि अत्यंत भीतकी समानहो अमित धनछोड़ कमल पत्रकी समान कोमल चरणों से कई योजनतक भाग चलेगये ॥ ८ ॥ बलवान मगधराज उन दोनों ईश्वरों की ईश्वरताको नहीं जानता था; उनको भागता हुआ देखरथ और सेनाले उनके पीछे २ दौड़ने लगा ॥ ९ ॥ राम और केशव अनेक दूर दौड़कर श्रमित होगये तब विश्राम के निमित्त प्रवर्षण नामक अतिऊंचे पर्वतपर चढ़गये। इन्द्र उस पर्वतपर सदैवही वर्षाकरताहै ॥१०॥ राजा जरासंधने देखाकि राम कृष्ण इस पर्वत में छिपरहे इस कारण उसने इनके ढूंढनेका बहुतसा यत्नकिया परन्तु उनका खोजनपा काष्ठद्वारा अग्निको उत्पन्नकर पर्वतको जलानेलगा ॥ ११ ॥ तब राम कृष्ण उस पर्वतके जलते हुए शिखर से शीघ्रता पूर्वक फांद ग्यारह योजन नीचे भूमिपर कूदपड़े और शत्रु व उसके अनुचरों की दृष्टिको बचाय समुद्रसे घिरीहुई अपनी पुरीमें आए॥१२॥ ॥१३॥ मगधराज ने विचारा कि—बलराम और कृष्ण जल गये हैं अतएव वह सेनाको इकट्ठा कर अपने राज्य को लौटआया ॥ १४ ॥ हेभारत ! आनर्त्त देशके राजा श्रीमान् रैवत नरेश ने

चोदितः प्रागाद्ब्रह्मलोकेतिपुरोदितम् ॥१५॥ भगवानपिगोविन्द उपयेमेकुरूद्वह । वैद र्भींभीष्मकसुतांश्रियोमात्रांस्वयंवरे ॥ १६ ॥ प्रमथ्यतरसाराज्ञः शाल्वादींश्चैद्यपक्ष गान् । पश्यतांसर्वलोकानांतार्क्ष्यपुत्रः सुधामिव ॥ १७ ॥ राजोवाच ॥ भगवान्भी ष्मकसुतांरुक्मिणींरुचिराननाम् । राक्षसेनविधानेनउपयेमइतिश्रुतम् ॥ १८ ॥ भग वन्श्रोतुमिच्छामिः कृष्णस्यामिततेजसः यथामागधशाल्वादीञ्जित्वाकन्यामुपाहर त् ॥ १९ ॥ ब्रह्मन्कृष्णकथाः पुण्यामाध्वीर्लोकमलापहाः । कोनुतृप्येतशृण्वानः श्रु तज्ञोनित्यनूतनाः ॥ २० ॥ श्रीशुक उवाच ॥ राजाऽऽसीद्भीष्मकोनामविदर्भाधिप तिर्महान् । तस्यपञ्चाभवन्पुत्राः कन्यैकाचवरानना ॥ २१ ॥ रुक्म्यग्रजोरुक्मर थोरुक्मबाहुरनन्तरः । रुक्मकेशोरुक्ममालीरुक्मिण्येषांस्वसासती ॥ २२ । सोप श्रुत्यमुकुन्दस्यरूपवीर्यगुणश्रियः । गृहागतैर्गीयमानास्तंमेनेसदृशंपतिम् ॥ २३ ॥ तांबुद्धिलक्षणौदार्यरूपशीलगुणाश्रयाम् । कृष्णश्चसदृशीं भार्यांसमुद्वोढुंमनोदधे ॥ २४ ॥बन्धूनामिच्छतांदातुंकृष्णायभगिनींनृप । ततोनिवार्यकृष्णद्विड्रुक्मीचैद्य ममन्यत ॥ २५ ॥ तदवेत्यासितापाङ्गीवैदर्भीदुर्मनाभृशम् । विचिन्त्याऽऽप्तंद्विजंक स्मिंत्कृष्णायप्राहिणोद्द्रुतम् ॥२६॥ द्वारकांसससमभ्येत्यप्रतीहारैः प्रवेशितः । अप श्यदाद्यंपुरुषमासीनंकाञ्चनासने ॥ २७ ॥ दृष्ट्वाब्रह्मण्यदेवस्तमवरुह्यनिजासना त् । उपवेश्यार्हयाञ्चक्रेयथात्मानंदिवौकसः ॥ २८ ॥ तंभुक्तवन्तंविश्रान्तमुपगम्य

ब्रह्माकी आज्ञापाय अपनी पुत्री रेवतीका बलरामजीसे विवाहकिया । सो प्रथमही मैंने तुमसे यह कथा कहीहै॥१५॥ हेकुरुश्रेष्ठ ! गरुड़ने जैसे देवताओं का मथनकर अमृत हरण कियाथा भगवान कृष्णजीनेभी वैसेही सब मनुष्योंके सामने बलपूर्वक शिशुपालके पक्षवाले शाल्व आदि राजाओंको जीतकर लक्ष्मीके अंशसे उत्पन्न हुई भीष्मक राजाकी पुत्री रुक्मिणी से विवाह किया १६–१७॥ राजा ने पूँछा कि—हेब्रह्मन् ! भगवान ने राक्षस विधि के अनुसार—भीष्मककी पुत्री सुंदर मुख वाली रुक्मिणी का विवाह किया,—यह तो मैंने सुना ॥ १८ ॥ किंतु उन्होंने जिसप्रकार जरासंध और शाल्व आदि को जीतकरकन्याको हरण कियाथा; वह सुननेकी मेरीइच्छा है ॥ १९॥हेब्रह्मन्! श्रीकृष्णजीकी कथाका अमित फल है, उस के सुनने से महासुख उत्पन्नहोता है । वह मनुष्यों के पापों को नाशकरनेवाली और नित्यनवीन है; उस के सुनन से किस सुननेवालेकी तृष्णा दूरहो सकती है ॥ २० ॥ श्रीशुकदेवजी बोले कि—राजन् ! भीष्मकनामक एक राजा विदर्भ देश के सिंहासनपरथा । उस के पांचपुत्र और मनलुभानेवाली एक कन्या उत्पन्नहुई ॥ २१ ॥ उन सब में रुक्मी जेठाथा, और रुक्मरथ, रुक्मबाहु, रुक्मकेश और रुक्ममाली यह उस से छोटे थे साध्वी रुक्मिणी इनकी बहिनथी ॥ २२ ॥ इसने घर में आयेहुए मनुष्यों के मुख से श्रीकृष्णजी के रूप वीर्य, गुण और श्रीका वर्णनसुन उन्हीं को अपने योग्य बर स्थिर किया ॥ २३ ॥ श्रीकृष्णजी ने भी बुद्धि, लक्षण, उदारता, रूप, शील और गुणों की आश्रयभूता उस रुक्मणीको अपने योग्य पात्री विचार उस के संग बिवाह करनेकी इच्छाकी ॥ २४ ॥ हेराजन् ! यद्यपि बंधुओं ने श्री कृष्णजी को रुक्मिणी देने का विचार किया परन्तु श्रीकृष्णजी के द्वेषी रुक्मी ने उन सबको निवा-रणकर शिशुपाल को रुक्मिणी देने का विचार किया ॥ २५ ॥ वह श्यामकटाक्षवाली रुक्मिणी यह जानकर अत्यन्त उदासहुई और किसी एक विश्वासी ब्राह्मण को शीघ्रही श्रीकृष्णजी के निकट भेजा ॥ २६ ॥ वह ब्राह्मण शीघ्रतापूर्वक द्वारका में आया और द्वारपाल से आज्ञाले भीतर जायकर उसने देखा कि आदिपुरुष सुवर्ण के सिंहासनपर बैठेहुए हैं ॥ २७ ॥ ब्रह्मण्य देव श्रीकृष्णजीउस ब्राह्मणको देख सिंहासनसे उतरपड़े और उसको आसनपर बैठाय उसकी पूजाइसप्रकारकी-कि जैसे देवता उनकी (भगवान) पूजाकरते हैं ॥ २८ ॥ अनन्तर भोजन के उपरांत ब्राह्मणका

सतांगतिः पाणिनाऽभिमृशन्पादावव्यग्रस्तमपृच्छत ॥२९॥ कच्चिद्द्विजवरश्रेष्ठधर्मस्तेवृद्धसंमतः। वर्ततेनातिकृच्छ्रेणसंतुष्टमनसःसदा ॥ ३० ॥ संतुष्टोयर्हि वर्तेतब्राह्मणोयेनकेनचित्। अहीयमानः स्वाद्धर्मात्सह्यस्याखिलकामधुक् ॥ ३१ ॥ असंतुष्टोऽसकृल्लोकानाप्नोत्यपिसुरेश्वरः। अकिञ्चनोऽपिसंतुष्टः शेतेसर्वाङ्गविज्व रः ॥ ३२ ॥ विप्रान्स्वलाभसंतुष्टान्साधून्भूतसुहृत्तमान्। निरहङ्कारिणः शान्तान्न मस्येशिरसाऽसकृत्॥३३॥कच्चिद्वः कुशलंब्रह्मन्राजतोयस्यहिप्रजाः। सुखंवसन्ति विषयेपाल्यमानाः समेप्रियः ॥ ३४ ॥ यतस्त्वमागतोदुर्गंनिस्तीर्येहयदिच्छ या। सर्वैनोब्रूह्यगुह्यंचेत्किंकार्यंकरवामते ॥ ३५ ॥ एवंसंपृष्टसंप्रश्नोब्राह्मणः परमे ष्ठिना। लीलागृहीतदेहेनतस्मैसर्वमवर्णयत् ॥ ३६ ॥ रुक्मिण्युवाच ॥ श्रुत्वागुणा न्भुवनसुन्दरशृण्वतांतेनिर्विश्यकर्णविवरैर्हरतोऽङ्गतापम्। रूपंदृशांदृशिमतामखि लार्थलाभंत्वय्यच्युताऽऽविशतिचित्तमपत्रपंमे ॥ ३७ ॥ कात्वामुकुन्दमहतीकुल शीलरूपविद्यावयोद्रविणधामभिरात्मतुल्यम्। धीरापतिंकुलवतीनवृणीतकन्याका लेनृसिंहनरलोकमनोऽभिरामम् ॥ ३८ ॥ तन्मेभवान्खलुवृतः पतिरङ्गजायामात्मा र्पितश्चभवतोऽत्रविभोविधेहि। मावीरभागमभिमर्शतुचैद्यआराद्गोमायुवन्मृगपते र्बलिमम्बुजाक्ष ॥ ३९ ॥ पूर्तेष्टदत्तनियमव्रतदेवविप्रगुर्वर्चनादिभिरलंभगवान्परे

श्रम दूरहुआजान साधुओं की गति श्रीभगवान ने हाथों से उसके चरणचापते २ धीरभावसे पूछा ॥ २९ ॥ हे द्विजवर ! आप का मन सदैवसंतुष्ट रहकर आपका वृद्धपुरुषों के माननीय धर्म तो सहज से प्रवर्तता है? ॥ ३० ॥ ब्राह्मण यदि किसी प्रकार से भी संतुष्ट रहकरस्वधर्म से पृथक् नहो जीवनको धारणकरसके तो धर्महीं उनकी समस्तइच्छाये पूर्णकरता है ॥ ३१ ॥ जो असंतुष्ट है वह इंद्रहोकरभी बारम्बार इस लोक से उसलोक में चक्कर खातारहता है, और जो संतुष्ट है वह दरिद्र होकरभी सुख से समय को बिताया करते हैं ॥ ३२ ॥ जो स्वयप्राप्तहुए धनसे संतुष्ट,साधु, प्राणियों के श्रेष्ठबन्धु, अभिमानरहित और शांत हैं, ऐसे ब्राह्मणों को मस्तकझुकाय मैं बारम्बार प्रणामकरताहू ॥ ३३ ॥ हे ब्रह्मन् ! आप आनन्द से तोहो ? जिस राजा के राज्य में प्रजा रक्षितहो सुख से वासकरती है वही मेरा प्रीति का पात्र है ॥ ३४ ॥ आप जिस कार्य की इच्छा से समुद्र पारकरके इस स्थानपर आयेहो वह यदि गुप्त न होवे तो मुझ से कहिये मुझे क्याआज्ञा है ॥ ३५ ॥ लीला से मनुष्यरूप धारण करनेवाले भगवान के इस भांति प्रश्न करने पर ब्राह्मण ने समस्त वृत्तांत उनसे वर्णन किया। और रुक्मिणी ने एकांत में जो पाती लिखीथी उसे थैली से निकाल श्रीकृष्णजी को दिखाया और श्रीकृष्णजी की आज्ञासे उसे पढ़कर कहनेलगा॥३६॥ श्रीरुक्मिणीजी कहती हैं कि-हेअच्युत ! हेभुवनसुन्दर ! आपके जो गुण कर्णविवरोंद्वारा प्रवेशकर सुननेवालों के शरीर का ताप हरते हैं वहसब गुण और दृष्टिवालों की दृष्टि के सम्पूर्णमनोरथों का कामस्वरूप आप के रूपका जबसे वर्णनसुना है तबसे मेरा चित्त निर्लज्जहोकर आप में आसक्त होरहा है ॥ ३७ ॥ हेमुकुन्द ! आप कुल, शील, रूप, विद्या, वय, द्रव्य, संपत्ति और प्रभाव में अपनीहीसमानहो। हे नरश्रेष्ठ ! आप से मनुष्यों को आनन्द उत्पन्नहोतारहता है; विवाहकाल उप- स्थितहोनेपर कौनगुणवती, गुणश्रेष्ठा, बुद्धिमान स्त्री आप के पति होने की इच्छा न करती होगी ॥ ३८ ॥ हे विभो ! इसहीकारण मैं आपको अपना पतिबना आत्मसमर्पण करतीहूं; अतएव आप इस स्थानपर आय मुझको अपनी स्त्री बनाओ। हेकमलाक्ष ! सियारजैसे सिंहकाभाग हरण नहीं करता वैसेही शिशुपाल आकर आपके भागका स्पर्श न करनेपावे ॥३९॥ यदि मैंने बावड़ी, कुआ

शः । आराधितोयदि गदाग्रज मत्यपाणिं गृह्णातु मेन दमघोषसुतादयोऽन्ये ॥ ४० ॥ श्वोभाविनित्वमजितोद्वहने विदर्भान्गुप्तःसमेत्य पृतनापतिभिः परीतः । निर्मथ्य चैद्यमगधेन्द्रबलंप्रसह्यमांराक्षसेन विधिनोद्वह वीर्यशुल्काम् ॥ ४१ ॥ अन्तःपुरान्तरचरीमनिहत्य बन्धूंस्त्वामुद्वहे कथमितिप्रवदाम्युपायम् । पूर्वेद्युरस्तिमहतीकुलदेवयात्रा यस्यां बहिर्नववधूर्गिरिजामुपेयात् ॥ ४२ ॥ यस्याङ्घ्रिपंकजरजःस्नपनं महान्तो वाञ्छन्त्युमापतिरिवात्मतमोऽपहत्यै । यर्ह्यम्बुजाक्ष न लभेयभवत्प्रसादं जह्यामसून्व्रतकृशांछतजन्मभिःस्यात् ॥ ४३ ॥ ब्राह्मणउवाच । इत्येतेगुह्यसंदेशा यदुदेवमयाऽऽहृताः । विमृश्य कर्तुंयच्चात्र क्रियतांतदनन्तरम् ॥ ४४ ॥

इति श्रीमद्भा० महा० दशमस्कंधे द्विपंचाशत्तमोऽध्यायः ॥ ५२ ॥

श्रीशुक उवाच ॥ वैदर्भ्याः सतुसंदेशंनिशम्ययदुनन्दनः । प्रगृह्यपाणिनापाणिंप्रहसन्निदमब्रवीत् ॥ १ ॥ श्रीभगवानुवाच ॥ तथाहमपितच्चित्तोनिद्रांचनलभेनिशि । वेदाहंरुक्मिणाद्वेषान्ममोद्वाहोनिवारितः ॥ २ ॥ तामानयिष्यउन्मथ्यराजन्यापसदान्मृधे । मत्परामनवद्यांगीमेधसोऽग्निशिखामिव ॥ ३ ॥ श्रीशुक उवाच ॥ उद्वाहर्क्षंचविज्ञायरुक्मिण्यामधुसूदनः । रथः संयुज्यतामाशुदारुकेत्याहसारथिम् ॥ ४ ॥ सचाश्वैः शैब्यसुग्रीवमघपुष्पबलाहकैः । युक्तंरथमुपानीयतस्थौप्राञ्जलिरग्रतः ॥ ५ ॥ आरुह्यस्यन्दनंशौरिर्द्विजमारोप्यतूर्णगैः । आनर्तादेकरात्रेण

आदि बनवाय दान, नियम, व्रत तथा देवता, ब्राह्मण और गुरुके पूजनादिद्वारा भगवानकी आराधना की है तो दमघोष पुत्र आदि कोई मेरा स्पर्श न करसकें;-हेभगवान ! आपहीआकर मेरा पाणिग्रहणकरो ॥ ४० ॥ हे भगवान कल विवाह का दिन है तो आजही आप गुप्तभाव से आओ और सेनापतियों को संगले शिशुपाल और जरासंधकी सेना के बलकामथनकर वीर्यरूप शुल्क दे राक्षस विधिके अनुसार मेरा विवाहकरो ॥ ४१ ॥ यदि कहोकि–तू अंतः पुरमें रहती है बिनातेरे बंधुओं का मारे किस प्रकार तुझे विवाहसकताहूं ? तो उसका उपायवह है कि विवाह के प्रथम दिन हमारे यहां कुल देवकी यात्राहोती है, उस यात्रामें व्याही जानेवाली कन्याको नगर के बाहर देवीके मंदिर में जानाहोता है ॥ ४२ ॥ हे कमल लोचन ! महादेवजी के समान बड़े मनुष्य अपने आत्मा के अज्ञान नाशके निमित्त जिन आपके चरण रजमें स्नान करनेकी प्रार्थना करते हैं मैं यदि उन आपका प्रसाद न पाऊंगी तोव्रत द्वारा जीर्णहो अपने प्राणोंको छोड़दूंगी, चाहे सौजन्म मेंभी आपकी अनुग्रह होवे परन्तु उसको अवश्य प्राप्त करूंगी ॥ ४३ ॥ ब्राह्मण ने कहा कि—हे यदुदेव ! मैं इस प्रकार का यह सम्वाद लाया हूं विचार करके जोकरना उचितहो शीघ्र करिये ॥४४॥

इतिश्री मद्भागवतेमहापुराणेदशमस्कंधेपरलाभाषाटीकायांद्विपञ्चाशत्तमोऽध्यायः ॥५२॥

श्रीशुकदेवजी बोले कि—हे राजन् ! रुक्मिणी के उस सम्वादको सुनकर श्रीकृष्ण जी अपने हाथसे ब्राह्मणका हाथ पकड़ हसकर उससे कहने लगे कि—१ ॥ मेरा मनभी इसीप्रकार रुक्मिणी में आसक्त होरहाहै इससे मुझको रात्रिको निद्रा भी नहीं आती । मैं जानताहूं कि—रुक्मीने द्वेषके कारण मेरे व्याह होनेको निवारण करादिया है, ॥ २ ॥ मैं युद्धमें दुष्टक्षत्रियों को मारकर काठसे अग्निकी समान उस अनिंदित अंगवाली रुक्मिणी को लाऊंगा ॥ ३ ॥ हेभरतनन्दन ! परसों रात्रिको रुक्मिणी का विवाह होगा । यह जानकर श्रीकृष्णजीने सारथीसे कहा कि हेदारुक ! शीघ्रही रथको जोतलाओ ॥४॥ दारुकभी सैब्य,सुग्रीव,मेघ, पुष्प और बलाहक नामक चार घोड़ों का रथ जोड़कर लाय और हाथ जोड़ सामने आकर खड़ा होगया ॥ ५ ॥ श्रीकृष्णजी

विदर्भानगमद्धयैः ॥ ६ ॥ राजासकुण्डिनपतिः पुत्रस्नेहवशंगतः । शिशुपालायस्वां कन्यांदास्यन्कर्माण्यकारयत् ॥ ७ ॥ पुरंसंमृष्टसंसिक्तमार्गरथ्याचतुष्पथम् । चित्र ध्वजपताकाभिस्तोरणैः समलंकृतम् ॥ ८ ॥ स्रग्गन्धमाल्याभरणैर्विरजोम्बरभूषितैः जुष्टंस्त्रीपुरुषैः श्रीमद्गृहैरगुरुधूपितैः ॥९॥ पितॄन्देवान्समभ्यर्च्यविप्रांश्चविधिवन्नृप । भोजयित्वायथान्यायंवाचयामासमङ्गलम् ॥ १० ॥ सुस्नातांसुदतींकन्यांकृतकौतुकमङ्गलाम् ।अहतांशुकयुग्मेनभूषितांभूषणोत्तमैः ॥११॥चक्रुःसामर्ग्यजुर्मन्त्रैर्वध्वा रक्षांद्विजोत्तमाः । पुरोहितोऽथर्वविद्वैजुहावग्रहशान्तये ॥१२॥ हिरण्यरूप्यवासांसितिलांश्चगुडमिश्रितान् । प्रादाद्धेनूश्चविप्रेभ्योराजाविधिविदांवरः ॥ १३ ॥ एवं चेदिपतीराजादमघोषः सुतायवै । कारयामासमन्त्रज्ञैः सर्वमभ्युदयोचितम्॥१४॥ मदच्युद्भिर्गजानीकैः स्यन्दनैर्हेममालिभिः । पत्त्यश्वसंकुलैःसैन्यैः परीतःकुण्डिनं ययौ ॥ १५ ॥ तंवैविदर्भाधिपतिः समभ्येत्याभिपूज्यच । निवेशयामासमुदा कल्पितान्यनिवेशने ॥ १६ ॥ तत्रशाल्वोजरासंधो दन्तवक्त्रोविदूरथः । आजग्मुश्चैद्यपक्षीयाः पौण्ड्रकाद्याःसहस्रशः ॥ १७ ॥ कृष्णरामद्विषोयत्ताः कन्यांचैद्यायसाधितुम् । यद्यागत्यहरेत्कृष्णो रामाद्यैर्यदुभिर्वृतः ॥ १८ ॥ योत्स्यामःसंहतास्तेन इतिनिश्चितमानसाः । आजग्मुर्भूभुजःसर्वे समग्रबलवाहनाः ॥ १९ ॥ श्रुत्वैतद्भगवान्रामो विपक्षीयनृपोद्यमम् । कृष्णंचैकंगतंहर्तुं कन्यांकलहशङ्कितः ॥ २० ॥ बले

रथपर बैठ ब्राह्मण को भी बैठाय शीघ्रगामी अश्वों द्वारा एक रात्रिमें आनर्त्त देशसे कुण्डिनपुर में आगए ॥ ६ ॥ इसओर कुण्डिनाधिपति राजा भीष्मकने पुत्र स्नेहके वशवर्त्तीहो शिशुपाल को कन्या देनेके निमित्त सब कर्त्तव्य कर्म करवाये ॥ ७ ॥ अनन्तर नगरके राजमार्ग गली चौराहे झाड़े और सींचे गये तथा नानाप्रकारके ध्वजा पताका और तोरण से वह भलीप्रकार भूषितहुए ॥ ८ ॥ नगर के स्त्री पुरुषोंने माला चन्दन और आभूषण धारण किये वह सुन्दर वस्त्रोंसे सज्जित हो अत्यन्त शोभा पानेलगे । श्रीयुक्त सबघर अगर द्वारा धूपितहुए॥९॥हेराजन्! राजा भीष्मकनें भी विधिवत् पितरों और देवताओंकी पूजाकर ब्राह्मणोंको भोजन कराया वह सब ब्राह्मण न्याया-नुसार स्वस्ति वाचन करनेलगे ॥ १० ॥ सुन्दर कन्यायें भलीप्रकारसे स्नानकर मंगल कृत्यकर नवीन वस्त्र और उत्तम अलंकारोंसे सज्जित हुई ॥ ११ ॥ श्रेष्ठ ब्राह्मणोंने साम, ऋक् और यजुके मन्त्रोंसे कन्याकी रक्षाकी और अथर्व वेदविद् पुरोहित ग्रह शांतिके निमित्त होम करनेलगे॥१२॥ विधिके जाननेवाले नर श्रेष्ठराजा भीष्मक ने ब्राह्मणों को सोना, चांदी, वस्त्र, गुड़, मिलेहुए. तिल और गायें दान करनेका आरम्भ किया, ॥ १३ ॥ इसीप्रकार से चेदिराज राजा दमघोषने भी मन्त्रज्ञ ब्राह्मणों द्वारा पुत्रका सब विवाह कार्य कराया ॥ १४ ॥ फिर मद झरते हुये हाथी स्वर्ण की सामग्री वाले रथ और पैदल व घोड़ों की सेनासे वेष्टितहो कुण्डिन नगर में आया, ॥ १५ ॥ विदर्भराज भीष्मकने आगे बढ़कर भगवानीकी और चेदिपति के निमित्त जो निवासस्थान सजाया था उसमें उसको राजा भीष्मक लेगए ॥ १६ ॥ उस स्थानमें शाल्व,जरासन्ध,दन्तवक्त्र,विदूरथ और पौंड्रक आदि शिशुपाल के पक्षवाले सहस्रों राजा आये ॥ १७ ॥ राम कृष्ण के द्वेषी राजा-ओं की यही इच्छाथी कि—शिशुपालको ही कन्या मिले इसहीकारण उन्होंने यह परामर्श किया कि यदि कृष्ण और बलराम आदि यदुवंशी गण यहांपर आकर कन्याका हरण करें, तो सब एकपक्ष होकर उनके साथ युद्ध करेंगे । यह स्थिरकर वह सब अपनी सेना समेत वहांआये, ॥ १८—१९ ॥ भगवान बलरामजी भी "शत्रुओं का ऐसा उद्यम और कृष्ण अकेले कन्या हरन को गयेहैं" यह सम्वाद सुन युद्धके भयसे भ्राताकी रक्षाके निमित्त बड़ी सेनाको सगके रथ, हाथी

नमहताबार्थ भ्रातृस्नेहपरिप्लुतः॥त्वरितःकुण्डिनंप्रागाद् गजाश्वरथपत्तिभिः २१॥ भीष्मकन्यावरारोहा कांक्षत्यागमनंहरेः । प्रत्यापत्तिमपश्यन्ती द्विजस्याचिन्तयत्त दा ॥ २२ ॥ अहोत्रियामान्तरित उद्वाहोमेऽल्पराधसः । नागच्छत्यरविन्दाक्षो नाहंवेद्म्यत्रकारणम् ॥ २३ ॥ सोऽपिनावर्ततेऽद्यापि मत्सन्देशहरोद्विजः । अपिमय्यन वद्यात्मा दृष्ट्वाकिंचिज्जुगुप्सितम् । मत्पाणिग्रहणेनूनं नायातिहिकृतोद्यमः ॥२४॥ दुर्भगायानमेधाता नानुकूलोमहेश्वरः । देवीवाविमुखागौरी रुद्राणीगिरिजासती ॥ २५ ॥ एवंचिन्तयतीबाला गोविन्दहृतमानसा । न्यमीलयतकालज्ञा नेत्रेचाश्रुकलाकुले ॥ २६ ॥ एवंवध्वाःप्रतीक्षन्त्या गोविन्दागमनंनृप । वामऊरुर्भुजोनेत्र मस्फुरन्प्रियभाषिणः ॥ २७ ॥ अथकृष्णविनिर्दिष्टः सएवद्विजसत्तमः । अन्तःपुरचरीं देवीं राजपुत्रींददर्शह ॥२८॥ सातंप्रहृष्टवदनमव्यग्रात्मगतिं सती । आलक्ष्यलक्षणाभिज्ञा समपृच्छच्छुचिस्मिता ॥ २९ ॥ तस्या आवेदयत्प्राप्तं शशंसयदुनन्दनम् उक्तंच सत्यवचनमात्मोपनयनं प्रति ॥ ३० ॥ तमागतंसमाज्ञाय वैदर्भीहृष्टमानसा नपश्यन्तीब्राह्मणाय प्रियमन्यन्ननामसा ॥ ३१ ॥ प्राप्तौश्रुत्वा स्वदुहितुरुद्वाहप्रेक्षणोत्सुकौ । अभ्ययात्तूर्यघोषेण रामकृष्णौसमर्हणैः ॥३२॥ मधुपर्कमुपानीय वासांसिविरजांसिसः । उपायनान्यभीष्टानि विधिवत्समपूजयत् ॥ ३३ ॥ तयोर्निवेशनं श्रीमदुपाकल्प्यमहामतिः । ससैन्ययोः सानुगयोरातिथ्यं विदधेयथा ॥ ३४ ॥ एवं राज्ञांसमेतानां यथावीर्यंयथावयः । यथाबलंयथावित्तं सर्वैःकामैःसमर्हयत् ॥३५॥

और दोनों सगत कुण्डिन पुरमें आये ॥ २०—२१ ॥ सर्वांग सुन्दरी भीष्मककी पुत्री श्रीकृष्ण जी के निमित्त अत्यन्त उत्सुक होरहीथी, सूर्योदय होचला परन्तु उस गयेहुये ब्राह्मण को आता न देख वह चिन्ता करनेलगी, ॥ २२ ॥ अहो! रात्रिके बीततेही प्रातःकाल मुझ अभागिनी का विवाहहै किन्तु भगवान कमललोचन अबतक न आये इसकाकारण कुछ स्थिर नहीं करसकती। जो ब्राह्मण मेरा सम्बाद लेकर गयाहै वहभी अबतक नहीं लौटा॥२३॥अनिंदितात्मा श्रीकृष्णजीने क्या मुझमें कुछ निंदाका कारण देखा ? जो मेरे पाणिग्रहण विषयमें उद्योगीहोकर भी न आए ॥ २४ ॥ मै मन्दभागिनीहूं, विधाता और महेश्वर भी मुझसे रुठगए क्या गिरिपुत्री सती रुद्राणी देवीभी मेरे ऊपर दयालु नहीं हैं ॥ २५ ॥ श्रीकृष्णजीसे हृतचित्त हुई समयके जाननेवाली बालाने आंसू बहाते २ दोनों नेत्र बंद करलिये ॥ २६ ॥ हेराजन्! रुक्मिणी इसीप्रकार से श्रीकृष्णजी के आनेकी राह देखतीथी कि—उसीसमय उसके मंगल सूचक बाई साथल, बाई भुजा और बायां नेत्र फड़कनेलगा ॥ २७ ॥ थोड़ेही बिलम्बके पश्चात् श्रीकृष्णजीका पठाये हुए उस श्रेष्ठ ब्राह्मण ने आकर अंतःपुरमें रहनेवाली राजकुमारीको देखा ॥ २८ ॥ उस साध्वी लक्षणों के जानने वाली, पवित्र राजपुत्री ने उसके प्रसन्न मुख और शीघ्र गतिको देख उससे पूछा ॥ २९ ॥ ब्राह्मण ने राजपुत्री से श्रीकृष्णजी के आनेका समाचार कहा और उन्हों ने पाणिग्रहण करने के निमित्त जो प्रतिज्ञा कीथा वह भी कहसुनाई ॥ ३० ॥ श्रीकृष्णजीको आया हुआ जानकर रुक्मिणी मनमें अत्यन्त प्रसन्न हुई, वह और कोई दूसरा प्रिय पदार्थ न देख ब्राह्मणको नमस्कार करनेलगी, तदनन्तर उसको बहुतसा द्रव्यभी दिया ॥ ३१ ॥ विदर्भराजने जबसुना कि—पुत्री का विवाहोत्सव देखने के निमित्त राम कृष्ण आये हैं तबवह अत्यन्त आनन्दितहुआ वह पूजाकी सामग्रीके बाजे गाजे के साथ राम कृष्णके समीपआया ॥ ३२ ॥ राजा ने मधुपर्क लाय निर्मलवस्त्र और इच्छित भेंट अर्पण कर विधिपूर्वक उनका सन्मान किया ॥ ३३ ॥ महामति राजा भीष्मकने सेना और अनुचरों समेत उन दोनों आयेहुए यदुवीरों को अच्छेस्थान में टिकाय उनका सत्कार किया ॥ ३४ ॥ उसने इसीप्रकार से सब आयेहुए राजाओं का सत्कार उनके पराक्रम और सम्पत्तिके

कृष्णस्यागमनमाकर्ण्य विदर्भपुरवासिनः।आगत्यनेत्रांजलिभिः पपुस्तन्मुखपंकजम् ॥ ॥ ३६ ॥ अस्यैवभार्याभवितुंरुक्मिण्यर्हति नापरा ॥ असावप्यनवद्यात्मा भैष्म्याः समुचितःपतिः ३७ किंचित्सुचरितंयन्नस्तेनतुष्टस्त्रिलोककृत् ॥अनुगृह्णातुगृह्णातु वैदर्भ्याः पाणिमच्युतः ॥ ३८ ॥ एवंप्रेमकलाबद्धा वदन्तिस्मपुरौकसः । कन्याचान्तःपुरात्प्रागाद्भटैर्गुप्ताऽम्बिकालयम् ॥ ३९ ॥ पद्भ्यांविनिर्ययौद्रष्टुं भवान्याःपादपल्लवम् । साचाऽनुध्यायतीसम्यंमुकुन्दचरणाम्बुजम् ॥ ४० ॥ यतवांमातृभिःसार्धं सखीभिःपरिवारिता । गुप्ताराजभटैःशूरैः संनद्धैरुद्यतायुधैः । मृदंगशंखपणवास्तूर्यभेर्यश्चजघ्निरे ॥ ४१॥ नानोपहारबलिभिर्वारमुख्याःसहस्रशः । स्रग्गन्धवस्त्राभरणैर्द्विजपत्न्यःस्वलंकृताः गायन्तश्चस्तुवन्तश्च गायकावाद्यवादकाः । परिवार्यवधूं जग्मुःसूतमागधवन्दिनः ॥ ४२ ॥ आसाद्यदेवीसदनं धौतपादकराम्बुजा । उपस्पृश्यशुचिःशांताप्रविवेशाम्बिकाऽन्तिकम् ॥ ४४ ॥ तांवैप्रवयसोबालां विधिज्ञाविप्रयोषितः । भवानींवंदयांचक्रुर्भवपत्नींभवान्विताम् ॥ ४४ ॥ नमस्येत्वाऽम्बिकेऽभीक्ष्णंस्वसन्तानयुतांशिवाम् । भूयात्पतिर्मेभगवान्कृष्णस्तदनुमोदताम् ॥ ४६ ॥ अद्भिर्गंधाक्षतैर्धूपैर्वासःस्रंमाल्यभूषणैः । नानोपहारबलिभिः प्रदीपावलिभिःपृथक् ॥ ॥ ४७ ॥ विप्रस्त्रियःपतिमतीस्तथातैःसमपूजयत् । लवणापूपतांबूलकण्ठसूत्रफलेक्षुभिः ॥ ४८ ॥ तस्यैस्त्रियस्ताःप्रददुः शेषांयुयुजुराशिषः । ताभ्योदेव्यैनमश्चक्रे शेषांचजगृहेवधूः ॥ ४९ ॥ मुनिव्रतमथत्यक्त्वा निश्चक्रामाम्बिकागृहात् । प्रगृह्य

अनुसारकिया ॥ ३५ ॥ श्रीकृष्णजी को आयाहुआसुनकर विदर्भ निवासी सबमनुष्य उपस्थितहो नेत्ररूप अंजलिद्वारा उनके कमल मुख का पान करनेलगे ॥३६॥ और कहनेलगे कि-रुक्मिणीही इनकी स्त्री होनेयोग्य है, और स्त्री नहीं । और यह अनिंदितवरभी रुक्मिणी के पतिहाने योग्य है ॥ ३७ ॥ हमारा जोकुछ थोड़ाबहुत पुण्य है भगवान उस से संतुष्ट होकर कृपापूर्वक रुक्मिणी का पाणिग्रहण करें ॥ ३८ ॥ प्रेम के आंसू बहा २ पुरवासी गण इसप्रकार कह रहेथे कि इतनेही में कन्या सैनिकों से रक्षितहो अंतःपुर से देवीजी के मन्दिर को चली ॥ ३९॥ रुक्मिणी अस्त्र शस्त्रयुक्तवीर सैनिकों से रक्षित और सखियों से वेष्टितहो, मौन धारणकर भली प्रकारसे श्रीकृष्णजी के चरणकमलों का ध्यान करते २ माताओं के साथ जैसेही देवी के चरण कमल के दर्शन को चली वैसेही मृदंग, शंख, तूरी और भेरी आदि बाजे बजने लगे ॥४०।४१॥ सहस्रों वेश्याएं नानाप्रकारकी भेंटें और पूजाकी सामग्रीले तथा भलीप्रकार से सजीहुई ब्राह्मणों की स्त्रियें माला, चन्दन, वस्त्र और आभूषणले कन्याको घेरकरचलनेलगीं ॥ ४२ ॥ गवैये,बजवैये सूत, मागध और बन्दीगण गान औरस्तुति करते २ उनके चारोओर दलबांध २ करचले॥ ४३॥ राजपुत्री ने देवमंदिर में पहुँचकर हाथ, पैर धोय और आचमनपूर्वक पवित्र व शांतहो देवी के निकट प्रवेश किया ॥ ४४ ॥ विधि के जाननेवाली वृद्धा विप्रपत्नियों ने उस पुत्री से महादेवजी समेत गौरी की पूजाकराई ॥ ४५ ॥ हे अम्बिके ! मैं मंगलस्वरूप तुम्हें और तुम्हारे गणेश आदि पुत्रों को नमस्कार करतीहू ; तुम यह वरदान देवो कि भगवान श्रीकृष्णजी मेरे स्वामीहोंवें॥४६॥ कुमारी ने इसप्रकार प्रार्थनाकर पृथक् २ जल, चन्दन, अक्षत, फूल, धूप, वस्त्र,भूषण और दीपक आदि से पूजाकी ॥ ४७ ॥ सधवा विप्र पत्नियों ने भी उनसब सामग्री और लवण, हलवा, तांबूल कण्ठसूत्र फल और ईखद्वारा भलीप्रकारसे उनकी पूजाकी ॥ ४८ ॥ अनन्तर उन सब स्त्रियों ने रुक्मिणी को प्रसाद दे आशीर्वाद दिया । रुक्मिणी ने भी उनको और देवी को प्रणाम किया ॥

पाणिनाभृत्या रत्नमुद्रोपशोभिना ॥ ५० ॥ तांदेवमायामिववीरमोहिनीं सुमध्यमां कुण्डलमण्डितानवाम्। श्यामांनितम्बार्पितरत्नमेखलां व्यंजत्स्तनींकुन्तलशंकितेक्षणाम् ॥ ५१ ॥ शुचिस्मितांबिम्बफलाधरद्युति शोणायमानद्विजकुन्दकुड्मलाम्। पदाचलन्तींकलहंसगामिनीं सिंजत्कलानूपुरधामशोभिना ॥ ५२ ॥ विलोक्यवीरामुमुहुःसमागता यशस्विनस्तत्कृतहृच्छयार्दिताः ॥ ५३ ॥ यांवीक्ष्यतेनृपतयस्तदुदारहास व्रीडावलोकहृतचेतसउज्झितास्त्राः। पेतुःक्षितौगजरथाश्वगताविमूढा यात्राच्छलेनहरयेऽर्पयतीं स्वशोभाम् ॥ ५४ ॥ सैवंशनैश्चलयतीचलपद्मकोशौ प्राप्तिंतदाभगवतःप्रसमीक्षमाणा। उत्सार्यवामकरजैरलकानपाङ्गैः प्राप्तान्ह्रियैक्षत नृपान्ददृशेऽच्युतंसा ॥५५ ॥ तांराजकन्यांरथमारुरुक्षतीं जहारकृष्णोद्विषतांसमीक्षताम्। रथसमारोप्यसुपर्णलक्षणं राजन्यचक्रं परिभूयमाधवः॥ ततोययौ रामपुरोगमैःशनैः सृगालमध्यादिवभागहृद्धरिः ॥ ५६ ॥ तमानिनःस्वाभिभवंयशःक्षयं परेजरासंधवशानसेहिरे। अहोधिगस्मान्यशआत्तधन्वनां गोपैर्हृतंकेसरिणां मृगैरिव ॥ ५७ ॥

इति श्रीमद्भा० महा० द० त्रिपंचाशत्तमोऽध्यायः ॥ ५३ ॥

श्रीशुक उवाच ॥ इतिसर्वेसुसंरब्धावाहानारुह्यदंशिताः स्वैः स्वैर्बलैः परिक्रान्ताअन्वीयुर्धृतकार्मुकाः ॥ १ ॥ तानापततआलोक्ययादवानीकयूथपाः। तस्थुस्तत्संमुखाराजन्विस्फूर्ज्यस्वधनूंषिते ॥ २ ॥ अश्वपृष्ठेगजस्कन्धेरथोपस्थेचकोवि

४९ ॥ तदनन्तर वह मौन व्रतको छोड़ रत्नकी अगूठी से शोभित हस्तद्वारा दासी को पकड़ देवी के मंदिर से बाहरहुई ॥ ५० ॥ वह देवमाया की समान धीरमनुष्यों को भी मोह उत्पन्नकरातीथी उसका कटिदेश अत्यन्त सुन्दर और मुख कुण्डलों की प्रभा से भूषितथा; रजोदर्शन जिसको अबतक नहीहुआ है, नितम्ब देशमें सुवर्णकीमेखला बँधीहुईथी, स्तन प्रगट और नेत्र कुण्डलोंके भयसे भीन होकर चंचल होरहेथे ॥ ५१ ॥ उसकी सुंदरमुसकान से खुलीहुई दंतपंक्ति कुंदरू के समान होठोंकी कांति से रक्तवर्णकी होरहीथी। वह हंसकी समान गमन करतीथी, चरण शोभायुक्त शब्दायमाननूपुर की आभा से शोभा पारहेथे ॥ ५२ उसको देखकर उस के दर्शनसे उत्पन्न हुए कामदेव से पीड़ितहो संग में आयेहुए यशस्वी वीरगण मोहित होगये ॥ ५३ ॥ घोड़े, रथ, और हाथियों में बैठेहुए वह समस्त राजगण उसके उदारहास्य और सलज्ज चितवन से मोहित चित्तहो अस्त्र शस्त्र छोड़ उस को देखने लगे और रुक्मिणी श्रीकृष्णजी के आन की राहदेखती हुई धीरे २ चलने लगी ॥ ५४ ॥ वह रुक्मिणी अलकों को. उठाय सलज्ज चितवन से राजाओं की ओर वहां आयेहुए श्रीकृष्णजी को देखने लगी ॥ ५५ ॥ महाराज! वह कन्या रथ पर बैठ तीहीथी कि उसी समय श्रीकृष्णजी ने वहां उपस्थितशत्रुओं के सामनेही उसे गरुड़ध्वज रथ पर बैठालिया और क्षत्रियों का तिरस्कार कर रुक्मिणी को हर लिया. । तदुपरांत वह सियारों के मध्य से अपने भागहारी सिंह की समान बलरामजी को आगेकर धीरे २ गमन करने लगे ५६॥ जरासंध आदि अभिमानी शत्रुगण अपने उस तिरस्कार और कीर्त्तिनाशका सहन न करके अपने संगियों से कहने लगे कि—अहो! हमको धिक्कार है! जिसप्रकार सिंहोंके भागको मृग हर ले जाय, वैसेही आज यह गोपगण धनुषधारीहो हमारे यशको हरण करके लियेजाते हैं ॥ ५७ ॥

इतिश्री मद्भा० म० दशम० सरलाभाषाटीकायांत्रिपंचाशत्तमोऽध्यायः॥ ५३ ॥

श्रीशुकदेवजी बोले कि—हेराजन्! सब राजाओंने इस प्रकारसे कह अत्यन्त कोधितहो कवच पहिन अपने २ वाहनोंपर आरूढ़हो अपनी २ सेनाको ले धनुषउठाय श्रीकृष्णका पीछाकिया ॥१॥ उनको आताहुआ देखकर सेनापति यादवगण अपने २ धनुषका टङ्कारकर उनके सम्मुखहुए ॥

राः । मुमुचुः शरवर्षाणिमेघाअद्रिष्वपोयथा ॥ ३ ॥ पत्युर्बलंशरासारैश्छन्नंवीक्ष्य
सुमध्यमा । सव्रीडमैक्षत्तद्वक्त्रंभयविह्वललोचना ॥ ४ ॥ प्रहस्यभगवानाहमास्मभै
र्वामलोचने । विनङ्क्ष्यत्यधुनैवैतत्तावकैः शात्रवंबलम् ॥ ५ ॥ तेषांतद्विक्रमंवीरा
गदसंकर्षणादयः । अमृष्यमाणानाराचैर्जघ्नुर्हयगजान्रथान् ॥ ६ ॥ पेतुः शिरांसि
रथिनामश्विनांगजिनांभुवि । सकुण्डलकिरीटानिसोष्णीषाणिचकोटिशः ॥ ७ ॥ हस्ताः
सासिगदेष्वासाः करभाऊरवोऽङ्घ्रयः । अश्वाश्वतरनागोष्ट्रखरमर्त्यशिरांसिच ॥ ८ ॥
हन्यमानबलानीकावृष्णिभिर्जयकाङ्क्षिभिः । राजानोविमुखाजग्मुर्जरासन्धपुरःस
राः ॥ ९ ॥ शिशुपालंसमभ्येत्यहृतदारमिवातुरम् । नष्टत्विषंगतोत्साहंशुष्यद्वदन
मब्रुवन् ॥ १० ॥ भोभोःपुरुषशार्दूलदौर्मनस्यमिदंत्यज । नप्रियाप्रिययोराजन्निष्ठा
देहिषुदृश्यते ॥ ११ ॥ यथादारुमयीयोषिन्नृत्यतेकुहकेच्छया । एवमीश्वरतन्त्रोऽय
मीहतेसुखदुःखयोः ॥ १२ ॥ शौरेः सप्तदशाहंवैसंयुगानिपराजितः । त्रयोविंशति
भिः सैन्यैर्जिग्यएकमहंपरम् ॥ १३ ॥ तथाऽप्यहंनशोचामिनप्रहृष्यामिकर्हिचित् ।
कालेनदैवयुक्तेनजानन्विद्रावितंजगत् ॥ १४ ॥ अधुनापिवयंसर्वेवीरयूथपयूथपाः ।
पराजिताः फल्गुतन्त्रैर्यदुभिः कृष्णपालितैः ॥ १५ ॥ रिपवोजिग्युरधुनाकालआ
त्मानुसारिणि । तदावयंविजेष्यामोयदाकालः प्रदक्षिणः ॥ १६ ॥ एवंप्रबोधितोमि
त्रैश्चैद्योऽगात्सानुगः पुरम् । हतशेषाः पुनस्तेऽपिययुः स्वंस्वंपुरंनृपाः ॥ १७ ॥ रुक्मी

॥ २ ॥ शस्त्रधारी राजगण घोड़े और हाथियोंपर बैठेहुए बादल जैसे पर्वतके ऊपर पानी बरसाता है उसीप्रकार वह यादवों के ऊपर शरोंकी वर्षा करनेलगे ॥ ३ ॥ शरोंकी वर्षासे स्वामीकी सेना को घिराहुआ देख सुमध्यमा रुक्मिणी के दोनोंनेत्र विह्वलहो उठे; वह लज्जायुक्त भगवान के मुख को देखनेलगी ॥ ४ ॥ तब भगवान ने हँसकर कहाकि—हेवामलोचने ! भयनकर; तेरेपक्षवाले सैनिकों से यह शत्रुबल अभी नष्टहोजावेगा ॥ ५ ॥ गद और सङ्कर्षण आदि वीरगण शत्रुओं के उस पराक्रमको सहन न कर बाणोंद्वारा हाथी, घोड़े और रथ सबके ऊपर प्रहार करनेलगे ॥ ॥ ६ ॥ रथ, घोड़े और हाथियोंपर बैठेहुए योद्धाओं के कुण्डल और किरीटसे शोभित व पगड़ी बँधेहुएमस्तक; और तलवार, गदा व धनुषलियेहुए हाथ, लम्बी २ साथले व जांघे कट २ कर रणभूमि मे गिरनेलगीं और घोड़े, खच्चर, ऊंट, गज तथा पैदलों के शिर कट २ कर गिरनेलगे ॥ ॥ ७—८ ॥ जयकी इच्छावाले यादवों से शूरवीर और सेनाकानाश होतेदेख जरासन्ध आदिराजा विमुख होकर भागगये ॥ ९ ॥ और स्त्री के चलेजाने की समान दुःखी और प्रभा रहितहो, निरुत्साह और सूखे मुँहसे शिशुपालके निकट आकर कहनेलगे ॥ १० ॥ कि अहे ! अहे ! राजसिंह मनकी इस उत्कण्ठाको छोड़दो हेराजन् ! प्राणियों के भले और अनभले की स्थिति नहीं देखी जाती ॥ ११ ॥ मनुष्य जैसे काठकी पुतली को इच्छानुसार नचाता है तैसेही प्राणी ईश्वरके वश हो सुख दुःखका भोगकिया करताहै ॥ १२ ॥ मैं (जरासन्ध) तेईस अक्षौहिणी सेना केवल श्री कृष्णसे युद्धकरके सत्रहबेरहारा परन्तु अन्त में एक युद्धमें जीतगया ॥ १३ ॥ तथापि न तो मैंने इसका हर्ष शोककिया और न मैंने कुछ विचारहीकिया है राजन् ! कालदैवसे प्रेरितहो जगतपर आक्रमण करता है ॥ १४ ॥ इस समय हम वीरगण भूपति कृष्णसे रक्षित थोड़ीसी यादवसेनासे हारगये ॥ १५ ॥ अभी उनका दैव अनुकूलहै इससे शत्रुओं की जीतहुई जब दैव हमारे अनुकूल होगा तब हमभी जीतसकेंगे ॥ १६ ॥ मित्रों के इसप्रकार समझानेपर शिशुपाल अपने अनुचरों समेत अपनी नगरी को गया और युद्धमें बचेहुये राजाभी अपने २ नगरोंको लौटगये, ॥ १७ ॥

तुराक्षसोद्वाहंकृष्णाविडसहन्स्वसुः।पृष्ठतोऽन्वगमत्कृष्णमक्षौहिण्यावृतोवली॥१८॥
रुक्म्यमर्षीसुसंरब्धः शृण्वतां सर्वभूभुजाम् । प्रतिजज्ञेमहाबाहुर्दंशितः सशरास-
नः ॥ १९ ॥ अहत्वासमरे कृष्णमप्रत्यूह्य च रुक्मिणीम् । कुण्डिनंनप्रवेक्ष्यामि सत्य
मेतद्ब्रवीमिवः ॥ २० ॥ इत्युक्त्वारथमारुह्य सारथिंप्राहसत्वरः । चोदयाश्वान्यतः
कृष्णस्तस्यमे संयुगंभवेत् ॥ २१ ॥ अद्याहंनिशितैर्बाणैर्गोपालस्य सुदुर्मतेः । नेष्ये
वीर्यमदंयेन स्वसामेप्रसभंहृता ॥ २२ ॥ विकत्थमानः कुमतिरीश्वरस्याप्रमाणवित्
रथेनैकेन गोविन्दं तिष्ठतिष्ठेत्यथाह्वयत् ॥ २३ ॥ धनुर्विकृष्यसुदृढं जघ्नेकृष्णंत्रि
भिःशरैः । आहचात्रक्षणं तिष्ठ यदूनांकुलपांसन ॥ २४ ॥ कुत्रयासिस्वसारंमे मुषि
त्वाध्वांक्षवद्धविः । हरिष्येऽद्यमदंमन्द मायिनःकूटयोधिनः ॥ २५ ॥ यावन्नमेहतो
बाणैः शयीथामुञ्चदारिकाम् । स्मयन्कृष्णो धनुश्छित्वा षड्भिर्विव्याधरुक्मिणम् ॥
॥ २६ ॥ अष्टभिश्चतुरोवाहान्द्वाभ्यां सूतंध्वजंत्रिभिः । सचान्यद्धनुरादाय कृष्णंवि
व्याधपंचभिः ॥२७॥ तैस्ताडितः शरौघैस्तुचिच्छेद धनुरच्युतः । पुनरन्यदुपादत्त
तदप्यच्छिनदव्ययः ॥ २८ ॥ परिघंपट्टिशंशूलं चर्मासीशक्तितोमरौ । यद्यदायुध-
मादत्त तत्सर्वं सोऽच्छिनद्धरिः ॥२९॥ ततोरथादवप्लुत्य खड्गपाणिर्जिघांसया ।
कृष्णमभ्यद्रवत्क्रुद्धः पतंगइवपावकम् ॥ ३० ॥ तस्यचापततःखड्गं तिलशश्चर्मचेषु
भिः । छित्वासिमाददे तिग्मं रुक्मिणंहन्तुमुद्यतः ॥ ३१ ॥ दृष्ट्वाभ्रातृवधोद्योगं रु-

हे राजन् ! श्रीकृष्णजी का द्वेषी वलवान् रुक्मी बहिनके राक्षसी विवाहका सहन न करसका उसने
एक अक्षौहिणी सेनाको साथले श्रीकृष्णजी का पीछा किया ॥ १८ ॥ क्रुद्ध स्वभाव महाबाहु रु-
क्मीने अत्यन्त क्रोधितहो कवच पहिन धनुष धारण कर सब राजाओं के सामने प्रतिज्ञा की ॥
॥ १९ ॥ कि—विना कृष्णको मारे और बहिनको उद्धार किये मैं कुण्डिनपुरमें न आऊगा यह मैं
सत्य कहताहूं ॥ २० ॥ यह कह रथपर बैठ शीघ्रतापूर्वक सारथिसे कहने लगा कि—जिधर कृ-
ष्ण है उधरही घोड़ोंको लेचल उसके साथ मेरा युद्ध होगा ॥ २१ ॥ अत्यन्त दुष्ट गोप ने अपने
पराक्रम के घमण्डसे मेरी बहिनका हरण कियाहै, आज मैं निश्चयही बाणों द्वारा उसके पराक्रम
को दूर करूगा ॥ २२ ॥ हेमहाराज ! दुर्मति रुक्मी भगवानके प्रभावको न जानताथा अतएव
इसप्रकार से बकवाद करता हुआ रथपर से श्रीकृष्णजी से कहने लगा कि " ठहर ठहर,, २३ ॥
फिर धनुषको खींच तीनबाणों से श्रीकृष्णजी पर प्रहार किया और कहने लगाकि—रे यदुकुल
दूषण ! थोड़ी देरयहां ठहर ॥ २४ ॥ कौआ जैसे होमकी सामग्रीले, भागता है, वैसेही तू मेरी बहिन
को हरण करके कहांजाता है । तू कैसाछली और मायावी है वह आज देखूंगा, आजमें तेरागर्व
दूर करूगा ॥ २५ ॥ मेरेबाणों से निहतहो शयन करने के प्रथमही मेरी बहिनको छोड़दे । श्री
कृष्णजी ने कुछेक हसकर उसके धनुषको काट छः बाणों से रुक्मीको वेधित किया ॥ २६ ॥ और
आठबाणों से चारों घोड़ोंपर तीनबाणों से ध्वज और दोबाणों से सारथीपर प्रहारकिया । रुक्मनी
ने दूसरा धनुषग्रहणकर पांचबाणों से श्रीकृष्णजी पर प्रहारकिया ॥ २७ ॥ भगवानने उनबाणों
से आहतहो शरोंद्वारा उसके धनुषको काटडाला । रुक्मी ने फिरधनुष ग्रहण किया, श्रीकृष्णजी
ने फिर उसे काटडाला ॥ २८ ॥ रुक्म परिघ, पट्टिश, शूल, ढाल, तलवार, शक्ति, तोमर इत्यादि
जो २ अस्त्र ग्रहण करनेलगा भगवान उन सबको काटनेलगे ॥ २९ ॥ अंतमें रुक्म रथसे फांद
पृथ्वीपर कूदपड़ा और वधकरने के निमित्त हाथमें खड्गले पतंग जैसे अग्निकी ओर दौड़ता है
वैसेही वह क्रोधितहो श्रीकृष्णजी की ओर दौड़ा॥३०॥बाणद्वारा उसके खड्ग और ढालके टुकड़े२
कर श्रीकृष्णजी भी तीक्ष्ण खड्गले उसके मारने पर उद्यत हुए ॥ ३१ ॥ भाईके मारे जानेका स-

रुक्मिणीभयविह्वला पतितापादयोर्भर्तुरुवाच करुणंसती ॥ ३२ ॥ योगेश्वराप्रमेयात्मन्देवदेव जगत्पते । हन्तुंनार्हसि कल्याण भ्रातरंमेमहाभुज ॥ ३३ ॥ श्रीशुक उवाच । तयापरित्रासविकम्पिताङ्गया शुचाऽवशुष्यन्मुखरुद्धकण्ठया । कातर्यविस्रंसितहेममालया गृहीतपादःकरुणोन्यवर्तत ॥३४॥ चैलेनबद्ध्वा तमसाधुकारिणं सश्मश्रुकेशं प्रवपन्व्यरूपयत् । तावन्ममर्दुःपरसैन्यमद्भुतं यदुप्रवीरानलिनींयथागजाः ॥ ३५ ॥ कृष्णान्तिकमुपव्रज्य ददृशुस्तत्र रुक्मिणम् । तथाभूतंहतप्रायं दृष्ट्वा संकर्षणोविभुः । विमुच्यबद्धंकरुणो भगवान्कृष्णमब्रवीत् ॥ ३६ ॥ असाध्विदंत्वयाकृष्ण कृतमस्मज्जुगुप्सितम् । वपनंश्मश्रुकेशानां वैरूप्यंसुहृदोवधः ॥ ३७ ॥ मैवास्मान्साध्व्यसूयेथा भ्रातुर्वैरूप्यचिन्तया । सुखदुःखदोनचान्योऽस्ति यतः स्वकृतभुक्पुमान् ॥ ३८ ॥ बन्धुर्वधार्हदोषोऽपिन बन्धोर्वधमर्हति । त्याज्यःस्वेनैव दोषेण हतःकिंहन्यतेपुनः ॥ ३९ ॥ क्षत्रियाणामयंधर्मः प्रजापतिविनिर्मितः । भ्राताऽपिभ्रातरं हन्याद्येनघोरतमस्ततः ॥ ४० ॥ राज्यस्यभूमेर्वित्तस्य स्त्रियोमानस्य तेजसः । मानिनोऽन्यस्यवाहेतोः श्रीमदान्धाःक्षिपन्तिहि ॥४१॥ तवेयं विषमाबुद्धिः सर्वभूतेषुदुर्हृदाम् । यन्मन्यसे सदाऽभद्रंसुहृदां भद्रमज्ञवत् ॥ ४२ ॥ आत्ममोहो नृणामेव कल्प्यतेदेवमायया । सुहृद्दुर्हृदुदासीनइति देहात्ममानिनाम् ॥ ४३ ॥

रणभूमि में आनलगे ॥ ९ ॥ श्रीकृष्णजी शार्ङ्ग धनुष से छूटेहुए पैनी अनीवाले बाणों से महादेवजी के अनुचर प्रमथ, गुह्यक, डाकिनी, राक्षस, वैताल, विनायक, भूत, मातृगण, पिशाच, कूष्मांड और ब्रह्मराक्षसों को ताड़ित करनेलगे ॥ १० । ११ ॥ महादेवजी ने पृथक् २ करके श्रीकृष्णजी पर दिव्य अस्त्रों का प्रहार किया परन्तु श्रीकृष्णजी ने विस्मित न होकर अपने अस्त्रों से उनसब को काटडाला ॥ १२ ॥ ब्रह्मास्त्रपर ब्रह्मास्त्र, वायव्यपर पर्वतास्त्र, आग्नेयास्त्रपर पर्जन्यास्त्र, और पाशुपतास्त्रपर नारायणास्त्र का प्रहार किया ॥ १३ ॥ अनन्तर सम्मोहनास्त्रद्वारा जंभाई लेतेहुए महादेवजी को मोहितकर श्रीकृष्णजी खड्ग, गदा और बाणों से बाणासुर की सेना का नाशकरने लगे ॥ १४ ॥ स्वामिकार्त्तिक चारोंओर से प्रद्युम्न के बाण लगने से व्यथित होगए; उनकी सब देह से रुधिर बहनेलगा; तब वह मयूर पर बैठकर भागगये ॥ १५ ॥ कुंभांड और कूपकर्ण मूसल के प्रहारसे पीड़ितहो रणभूमि में गिरपड़े । उनकी सेना सेनापतियों के मरजाने से चारोंओरको भागने लगी ॥ १६ ॥ अपनी सेना को चारोंओर को भागतेहुआ देख बाणासुर अत्यन्त क्रोधित हुआ और युद्ध में सात्यकि को छोड़कर रथमें बैठ श्रीकृष्णजी पर दौड़ा ॥ १७ ॥ रण-मत्तबाणासुर ने पांचसौ धनुष एक बारही खींचकर प्रत्येक धनुष में दो २ शर चढ़ाये ॥ १८ ॥ भगवान हरिने उन सब धनुष और बाणोंका एक समय मेंही काटडाला और सारथी, रथ तथा घोड़ोंको नष्टकर शंख बजाने लगे ॥ १९ ॥ कोटरा नामक बाणासुर की माता नंगीहो तथा बालोंको खोल पुत्रके प्राणोंकी रक्षाके कारण श्रीकृष्णजी के आगे आकर खड़ी होगई ॥ २० ॥ श्रीकृष्णजीने उसनग्नाको सन्मुख खड़ादेख कुछ न कह मुख फेरलिया, इधर बाणासुरने धनुष कट जाने व रथहीन होजाने पर नगर में प्रवेश किया ॥ २१ ॥ भूतोंके भाग जानेपर तीनशिर और तीन पैरोंवाला ज्वर युद्ध करने के निमित्त दौड़ता हुआ श्रीकृष्णपर आया ॥ २२ ॥ नारायण ने भी उसको देखकर शीत ज्वरको उससे युद्ध करनेको भेजा । तब माहेश्वर और वैष्णव दोनोंज्वर परस्पर युद्ध करनेलगे ॥ २३ ॥ माहेश्वर ज्वर युद्ध करते २ वैष्णव ज्वर के बलसे पीड़ित होगया

माहेश्वरोज्वरः ॥ शरणार्थीहृषीकेशं तुष्टावप्रयतांजलिः ॥ २४ ॥ ज्वरउवाच ॥ नमामित्वाऽनन्तशक्तिंपरेशं सर्वात्मानंकेवलंज्ञप्तिमात्रम् । विश्वोत्पत्तिस्थानसंरोधहेतुं यत्तद्ब्रह्मब्रह्मलिंगंप्रशान्तम् ॥ २५ ॥ कालोदैवंकर्मजीवःस्वभावो द्रव्यं क्षेत्रं प्राणआत्माविकारः । तत्संघातोबीजरोहप्रवाहस्त्वन्मायैषातन्निषेधंप्रपद्ये ॥ २६ ॥ नानाभावैर्लीलयैवोपपन्नैर्देवान्साधूँल्लोकसेतून्बिभर्षि । हंस्युन्मार्गान्हिंसयावर्तमानांजन्मैतत्तेभारहारायभूमेः ॥ २७ ॥ तप्तोऽहंतेतेजसा दुःसहेन शान्तोग्रेणात्युल्बणेनज्वरेण । तावत्तापोदेहिनांतेऽङ्घ्रिमूलं नोसेवेरन्यावदाशानुबद्धाः ॥ २८ ॥ श्रीभगवानुवाच ॥ त्रिशिरस्तेप्रसन्नोऽस्मि व्येतुतेमज्ज्वराद्भयम् । योनौस्मरतिसंवादं तस्यत्वन्नभवेद्भयम् ॥ २९ ॥ इत्युक्तोऽच्युतमानम्य गतोमाहेश्वरोज्वरः बाणस्तुरथमारूढः प्रागाद्योत्स्यञ्जनार्दनम् ॥ ३० ॥ ततोबाहुसहस्रेण नानायुधधरोऽसुरः । मुमोचपरमक्रुद्धो बाणांश्चक्रायुधेनृप ॥ ३१ ॥ तस्याऽस्यतोऽस्त्राण्य सकृच्चक्रेणक्षुरनेमिना । चिच्छेदभगवान्बाहूञ्छाखाइववनस्पतेः ॥ ३२ ॥ बाहुषुच्छिद्यमानेषु बाणस्यभगवान्भवः । भक्तानुकम्प्युपव्रज्य चक्रायुधमभाषत ॥ ३३ ॥ श्रीरुद्रउवाच ॥ त्वंहिब्रह्मपरंज्योतिर्गूढंब्रह्मणिवाङ्मये । यंपश्यन्त्यमलात्मान आकाशमिवकेवलम् ॥ ३४ ॥ नाभिर्नभोग्निर्मुखमम्बुरेतो द्यौःशीर्षमाशाःश्रुतिरंघ्रिरुर्वी । चन्द्रोमनोयस्यदृगर्कआत्मा अहंसमुद्रोजठरंभुजेन्द्रः ॥ ३५ ॥ रोमाणियस्यौषधयोम्बुवाहा केशाविरंचोधिषणाविसर्गः । प्रजापतिर्हृदयंयस्यधर्मः सवैभ

और दूसरेका आश्रय न पाय हाथजोड़ भगवान की स्तुति करने लगा ॥ २४ ॥ ज्वरने कहा कि– आप अनंत शक्ति परमेश्वरहो आपको नमस्कार है। आप सर्वात्मा, निरवच्छिन्न केवल विज्ञान और ब्रह्मादि के ईश्वरहो । आपही जगत्की उत्पत्ति, स्थिति और संहार के कारणहो। आपकर्म रहितहो अतएव जोवेद से अगम्य ब्रह्म है वह भी आपहीहो;–आपको नमस्कार है ॥ २५ ॥ काल, दैव, कर्म, जीव, स्वभाव, सूक्ष्म, भूतगण, प्राण, अहंकार, ग्यारह इन्द्रियें, पंचमहाभूत, देह और देहका प्रवाह यह सब आपकी माया है, किंतु आपसे इनका सद्भाव नहीं है, मैं आपकी शरणागत हुआ हूं ॥ २६ ॥ आप लीलावश सेही मत्स्य कूर्मादि नाना अवतार धारणकर देवगण, साधुगण और लोककी मर्यादा का पालन और हिंसामें प्रवृत्त हुए उत्पथगामी दैत्योंका संहार करते हैं; आपका यह जन्म पृथ्वीका भार हरने के निमित्त है॥ २७ ॥ आपसे उत्पन्न हुए दुःसह तेजसे तप्त होरहा हूं प्राणी जबतक आशा में बंधारहकर आपके चरणों की सेवा नहीं करता तबही तक वह संतप्त रहता है ॥ २८ ॥ भगवान ने कहाकि–हे त्रिशिरा ज्वर ! मैं तुझपर प्रसन्न हुआ, मेरे ज्वरसे जो तुझेभय हुआ है उस छोडदे । आजसे जोमनुष्य मेरे इस संवादका स्मरण करेगा तुझसे उसको भय नहीं उत्पन्न होगा ॥ २९ ॥ माहेश्वर ज्वर इस बातको सुन भगवानको प्रणाम करके चला गया हे राजन् ! इधर बाणासुर भगवान के संगयुद्ध करने के निमित्त रथपर चढ़कर फिरआया ॥३०॥ वह सहस्र भुजाओं में नाना अस्त्र शस्त्रोंको धारणकर परम क्रोधितहो श्रीकृष्णजी के ऊपर प्रहार करने लगा ॥ ३१ ॥ दैत्य पतिके बारंबार बाणवृष्टि करने पर भगवान ने छुरेकी धारवाले चक्रसे बड़े वृक्षकी शाखाओं के समान उसकी सब भुजाएं काटडालीं ॥ ३२ ॥ जब बाणासुर की भुजाएं कटनेलगीं तब भगवान महादेवजी भक्तपर दया प्रकाश करते हुए श्रीकृष्णजी के निकट आयकर कहने लगेकि ॥ ३३ ॥ हे ब्रह्मन् ! तुम वेदसे गूढ परम ज्योतिरूप परब्रह्महो, निर्मलात्मा साधुगण केवल आकाश की समानही आपका दर्शन करते हैं ॥ ३४ ॥ आकाश आपकी नाभि, अग्नि आपका मुख, जलवीर्य, स्वर्ग मस्तक दिशाएं कर्ण, पृथिवी पद, चन्द्रमा मन, सूर्यनेत्र, अहंकार आत्मा, समुद्र उदर, इन्द्र आपकी भुजाएं, ओषधियें आपके रोम, मेघ आपके केश, ब्रह्मा

वान्पुरुषोलोककल्पः ॥ ३६ ॥ तवावतारोऽयमकुण्ठधामन्धर्मस्यगुप्त्यैजगतोभवा
य । वयंचसर्वेभवतानुभाविता विभावयामोभुवनानिसप्त ॥ ३७ ॥ त्वमेकआद्यः
पुरुषोऽद्वितीयस्तुर्यः स्वदृग्धेतुरहेतुरीशः । प्रतीयसेऽथापियथाविकारं स्वमायया
सर्वगुणप्रसिद्ध्यै॥३८॥ यथैवसूर्यःपिहितःछायया स्वया छायांचरूपाणिचसंचका
स्ति । एवंगुणेनापिहितोगुणांस्त्वमात्मप्रदीपोगुणिनश्चभूमन् ॥ ३९ ॥ यन्मायामो
हितधियः पुत्रदारगृहादिषु । उन्मज्जन्तिनिमज्जन्ति प्रसक्तावृजिनार्णवे ॥ ४० ॥
देवदत्तमिमंलब्ध्वा नृलोकमजितेन्द्रियः । योनाद्रियेतत्वत्पादौ सशोच्योह्यात्मवं
चकः ॥४१ ॥ यस्त्वांविसृजतेमर्त्यआत्मानंप्रियमीश्वरम् । विपर्ययेन्द्रियार्थार्थं वि
षमत्त्यमृतंत्यजन् ॥ ४२ ॥ अहंब्रह्माऽथविबुधा मुनयश्चामलाशयाः । सर्वात्मनाप्र
पन्नास्त्वा मात्मानंप्रेष्ठमीश्वरम् ॥ ४३ ॥ तंत्वाजगत्स्थित्युदयान्तहेतुं समंप्रशान्तंसु
हृदात्मदैवम् । अनन्यमेकंजगदात्मकेतं भवापवर्गायभजामदेवम् ॥ ४४ ॥ अयंममे
ष्टोदयितोऽनुवर्ती मयाऽभयंदत्तममुष्यदेव । सम्पाद्यतांतद्भवतःप्रसादो यथाहि
तेदैत्यपतौप्रसादः ॥ ४५ ॥ श्रीभगवानुवाच ॥ यदात्थभगवंस्त्वन्नः करवामप्रियं
तव । भवतोयद्व्यवसितं तन्मेसाध्वनुमोदितम् ॥ ४६ ॥ अवध्योऽयंममाप्येष वैरो
चनिसुतोऽसुरः । प्रह्लादायवरोदत्तो नवध्योमेतवान्वयः ॥ ४७ ॥ दर्पोपशमनायास्य
प्रवृक्णाबाहवोमया । सूदितंचबलंभूरि यच्चभारायितंभुवः ॥४८॥ चत्वारोऽस्य

बुद्धि, प्रजापति शिश्न और धर्म आपका हृदय है,-आपलोक कल्पित विराट पुरुषहो ॥३५-३६॥
हे अखण्ड स्वरूप ! धर्म के पालन और संसार के कल्याण के निमित्तही आप अवतार ग्रहण
करते हो हमसब आपसेही पालितहोकर सातों भुवनों का पालन करते हैं ॥ ३७ ॥ आप
स्वयं प्रकाशमान, शुद्ध, आदि पुरुष और एकही आप कारण और कारण से रहित अद्वितीय
ईश्वरहो; तौभी सब विषयों के प्रकाश करने के निमित्त आप मायायोग से प्रत्येक शरीरोंमें भिन्न
भिन्न रूप से प्रतीत होतेहो ॥ ३८ ॥ जैसे सूर्य अपनी छायासे आच्छादित होकरभी छाया और
रूप का प्रकाश करता है हे भूमन् ! तैसेही आत्मस्वप्रकाश आप गुणों से आच्छादित होकरभी
गुण और गुणियों (जीव) का प्रकाश करतेहो ॥ ३९ ॥ हे भगवन् ! तुम्हारी माया से मोहित
हुआ प्राणी पुत्र, स्त्री और घर आदि में आसक्त होकर दुःखसागर में डूबता उछलता है ॥४०॥
इस आपके दियेहुए मनुष्य देह को पाकर जो अजितेन्द्रिय मनुष्य आपके चरणकमलका आदर
नहीं करता उस आत्मवंचककी अवस्था अत्यन्तही शोचनीय है ॥ ४१ ॥ जोमनुष्य जड़,अप्रिय
और अनीश्वर पुत्रादिकों के निमित्त चैतन्य, प्रिय और ईश्वररूप आपको त्याग देते हैं वे अमृत
को छोड़.विषका भक्षण करते हैं ॥ ४२ ॥ मैं, ब्रह्मा और निर्मल चित्तवाले मुनिलोग मन, वचन
और कर्म से प्रियतम आत्मा आपकाही भजन करते हैं ॥ ४३ ॥ हे देव ! जगत् की उत्पत्ति,
स्थिति और प्रलयके कारण, सम, शांत, मित्र, आत्मरूप, इष्टदेव, सजातीय विजातीय भेदरहित
विश्व और प्राणियों के अधिष्ठानरूप आपका हम संसार से पार होने के निमित्त भजन करते हैं ॥
४४ ॥ यह बाणासुर मेरा भक्त और प्रिय सेवक है हे देव ! मैंने इसको अभयदान दियाहै; दैत्य
राज बलिपर जैसे आपने अनुग्रह कियाथा वैसही इसपरभी कीजिये ॥ ४५ ॥ भगवानने कहा कि-
हेभगवन् ! तुमने जो मुझ से कहा मैं वही तुम्हारा प्रियसाधन करूंगा । तुमने जो कुछ कहा है
वह सबही उत्तम है; उस में मेरीभी सम्मति है ॥ ४६ ॥ यह बलिका पुत्र मेरे मारने योग्य नहीं
है क्योंकि मैंने प्रह्लाद को प्रथमही वर देदिया है कि मैं तुम्हारेवंशवालों को न मारूंगा ॥४७॥
मैंने इसका अहंकार दूर करने के निमित्तही इसकी सबभुजायें काटडाली हैं और इसका जो बल
पृथ्वी के अतिभारके निमित्त हुआथा उसको भी नाशकरदिया ॥ ४८ ॥ इसकी केवलचारभुजाएं

भुजाःशिष्टा भविष्यन्त्यजरोऽमरः। पार्षदमुख्यो भवतो नकुतश्चिद्भयोऽसुरः॥४९॥ इतिलब्ध्वाभयंकृष्णं प्रणम्यशिरसासुरः। प्राद्युम्निंरथमारोप्य सवध्वासमुपानयत्॥५०॥ अक्षौहिण्यापरिवृतं सुवासःसमलंकृतम्। सपत्नीकंपुरस्कृत्ययथौरुद्रानुमोदितः॥ ५१ ॥ स्वराजधानींसमलंकृतांध्वजैः सतोरणैरुक्षितमार्गचत्वराम्। विवेशशंखानकदुन्दुभिस्वनैरभ्युद्यतः पौरसुहृद्द्विजातिभिः ॥ ५२ ॥ यएवंकृष्णविजयं शंकरेणचसंयुगम्। संस्मरेत्प्रातरुत्थाय नतस्यस्यात्पराजयः ॥ ५३ ॥

इति श्रीमद्भा० महा० द० उ० त्रिषष्टितमोऽध्यायः॥ ६३॥

श्रीशुक उवाच॥ एकदोपवनं राजञ्जग्मुर्यदुकुमारकाः। विहर्तुंसाम्बप्रद्युम्नचारुभानुगदादयः॥ १ ॥ क्रीडित्वासुचिरंतत्रविचिन्वन्तः पिपासिताः। जलंनिरुदकेकूपेददृशुःसत्त्वमद्भुतम्॥ २ ॥ कृकलासंगिरिनिभंवीक्ष्यविस्मितमानसाः। तस्यचोद्धरणेयत्नं चक्रुस्तेकृपयान्विताः॥ ३॥ चर्मजैस्तान्तवैः पाशैर्बद्ध्वापतितमर्भकाः। नाशक्नुवन्समुद्धर्तुंकृष्णायाचख्युरुत्सुकाः॥ ४ ॥ तत्रागत्यारविन्दाक्षोभगवान्विश्वभावनः। वीक्ष्योज्जहारवामेनतंकरेणसलीलया॥ ५॥ सउत्तमश्लोककराभिमृष्टोविहायसद्यःकृकलासरूपम्। संतप्तचामीकरचारुवर्णःस्वर्ग्यद्भुतालंकरणाम्बरस्रक्॥ ६॥ पप्रच्छविद्वानपितन्निदानंजनेषुविख्यापयितुंमुकुन्दः। कस्त्वंमहाभागवरेण्यरूपोदेवोत्तमंत्वांगणयामिनूनम्॥ ७॥ दशामिमांवाकतमेनक-

---

शेष रही हैं यह अजर और अमर दैत्य आपका प्रधान पार्षद होगा इसे किसी का भी भय न होगा॥ ४९॥ बाणासुर ने इसबातको सुन नीचाशिरकरके श्रीकृष्णजीको नमस्कार किया और अनिरुद्ध को वधू समेत रथपर बिठाय वहां लेआया॥ ५०॥ श्रीकृष्णजी बाणासुर की दीहुई एक अक्षौहिणी सेना ले२ सुन्दर वस्त्र और अलंकारों से सुसज्जित स्त्रीसमेत अनिरुद्ध को आगे कर महादेवजी की संमति से वहां से चलदिये ॥ ५१ ॥ इधर भगवान का आनासुन सुन्दर ध्वजाओं से द्वारका सजाई गई और उसके चौराहे व मार्ग सुशोभित किये गये भगवान ने उस शोभित नगरी में प्रवेश किया। ब्राह्मण, पुरवासी और सब बान्धव शंख, डंका और दुन्दुभी आदि बाजे बजातेहुए—आगे जाय उनका सत्कार करके लेआये॥ ५२ ॥ हेराजन्! जो मनुष्य प्रातःकाल उठतेही श्रीकृष्णजी और शंकर के इस युद्ध और विजय का स्मरण करेगा उसकी कभी पराजय न होगी॥ ५३॥

इतिश्रीमद्भा०महा०दशम० उ०सरलाभाषाटीकायांत्रिषष्टितमोऽध्यायः॥ ६३॥

श्रीशुकदेवजी बोले कि—हेराजन्! एकदिन सांब, प्रद्युम्न, चारु, भानु, और गदादि, यदुकुमार गण क्रीडा करनेके निमित्त उपवनमेंगये॥ १॥ वहां बड़ा देरतक खेलते रहनेके कारण उन सबको प्यास लगी तब जलको ढूंढते २ एक कुएके समीप पहुँच उन्होंने उस कुएमें एक अद्भुत जीव देखा॥ २॥ वे पर्वतकी समान उसमें गिरगिट को पड़ादेख अत्यन्त विस्मितहुए फिर उन्होंने सदय होकर उसके निकालने का यत्नकिया॥ ३॥ उन बालकोंने चाड़े और रस्सी के पाशोंसे उस जीवको बांधकर उसके निकालनेके बहुतसे यत्नकिये परन्तु उसे न निकालसके तब उत्सुक चित्तसे श्रीकृष्णजीके समीप आय उस सब वृत्तांत को कहा॥ ४॥ कमललोचन भगवान् ने वहां आय उसको देख सहजमेंही बांए हाथसे उसको उठालिया॥ ५॥ भगवान् के हाथका स्पर्श होतही वह गिरगिट अपने रूपको छोड़ सुन्दरवर्ण का अत्यंत अलंकारों से अलंकृत तप्त सुवर्णकी समान देवमूर्ति होगया॥ ६॥ भगवान ने इसकारण को जानकरभी जगतमें प्रचार होने के निमित्त उससे पूँछा कि—हेमहाभाग! सुन्दर रूपधारी आपकौनहो? आप तो कोई श्रेष्ठ दे-

केनास्यामानीतोऽस्यतदर्हः सुभद्र । आत्मानमाख्याहि विवित्सतां नो यन्मन्यसे नः क्षम
मत्र वक्तुम् ॥ ८ ॥ श्रीशुक उवाच ॥ इति स्म राजा संपृष्टः कृष्णेनानन्तमूर्तिना । मा-
धवं प्रणिपत्याह किरीटेनार्कवर्चसा ॥ ९ ॥ नृग उवाच ॥ नृगो नाम नरेन्द्रोऽहमि-
क्ष्वाकुतनयः प्रभो । दानिष्वाख्यायमानेषु यदि ते कर्णमस्पृशम् ॥ १० ॥ किं नु तेऽविदि
तं नाथ सर्वभूतात्मसाक्षिणः । कालेनाव्याहतदृशो वक्ष्येऽथापि तवाज्ञया ॥ ११ ॥
यावन्त्यः सिकता भूमेर्यावन्त्यो दिवि तारकाः । यावन्त्यो वर्षधाराश्च तावतीरददं स्म
गाः ॥ १२ ॥ पयस्विनीस्तरुणीः शीलरूपगुणोपपन्नाः कपिला हेमशृङ्गीः । न्यायार्जि
ता रूप्यखुराः सवत्सा दुकूलमालाभरणा ददावहम् ॥ १३ ॥ स्वलंकृतेभ्यो गुणशील-
वद्भ्यः सीदत्कुटुम्बेभ्य ऋतव्रतेभ्यः । तपःश्रुतब्रह्मवदान्यसद्भ्यः प्रादां युवभ्यो द्विज-
पुङ्गवेभ्यः ॥ १४ ॥ गोभूहिरण्यायतनाश्वहस्तिनः कन्याः सदासीस्तिलरूप्यशय्याः ।
वासांसि रत्नानि परिच्छदान्रथानिष्टं च यज्ञैश्चरितं च पूर्तम् ॥ १५ ॥ कस्यचिद्द्विज
मुख्यस्य भ्रष्टा गौर्मम गोधने । संपृक्ताऽविदुषा सा च मया दत्ता द्विजातये ॥ १६ ॥ तां नीय
मानां तत्स्वामी दृष्ट्वोवाच ममेति तम् । ममेति प्रतिग्राह्याह नृगो मे दत्तवानिति ॥ १७ ॥
विप्रौ विवदमानौ मामूचतुः स्वार्थसाधकौ । भवान्दाताऽपहर्तेति तच्छ्रुत्वा मेऽभवद्भ्र
मः ॥ १८ ॥ अनुनीतावुभौ विप्रौ धर्मकृच्छ्रगतेन वै । गवां लक्षं प्रकृष्टानां दास्याम्येषा प्र-
दीयताम् ॥ १९ ॥ भवन्तावनुगृह्णीतां किंकरस्याविजानतः समुद्धरतं मां कृच्छ्रात्प
तन्तं निरयेऽशुचौ ॥ २० ॥ नाहं प्रतीच्छे वै राजन्नित्युक्त्वा स्वाम्यपाक्रमत् । नान्यद्

बता मान पड़तेहो ॥ ७ ॥ हे सुभद्र ! तुम किस कर्मके करनेसे इस दशाको प्राप्त हुयेथे आप तो
इस योग्य न थे । यदि तुम इस वृत्तान्तको कहसक्तेहो तो कहो मुझे इसके सुननेकी बड़ी इच्छाहै
॥ ८ ॥ श्रीशुकदेवजी बोले कि—हे राजन् ! जब श्रीकृष्णजीने उससे इसप्रकार पूँछा तबवह सूर्य
के समान प्रकाशमान किरीटसे प्रणाम कर उनसे कहने लगा कि— ॥ ९ ॥ हे प्रभो ! मैं नृग नामक
इक्ष्वाकु वंशीय राजाहूं दाता पुरुषोंका नाम सुनने के समय निश्चयही आपने मेरे नामको भी सुना
होगा ॥ १० ॥ हे नाथ ! आप सब प्राणियोंकी बुद्धि के साक्षीहो आपका ज्ञान कालसेभी नष्टनहीं
होता क्या आप इससे अज्ञातहैं?परन्तु तो भी आपकी आज्ञानुसार कहताहूं ॥ ११ ॥ पृथ्वीमें जि-
तने रजकण, आकाशमें जितने नक्षत्र और वर्षाकी जितनी धारा हैं उतनीही दुग्धवती, तरुणी,
शीलवान, रूपवान, गुणवान कपिला सुवर्णसे मढ़ेहुए सींगोंवाली न्यायपूर्वक पाईहुई चांदीसे मढ़े-
हुए खुरोंवाली, बछड़े युक्त वस्त्रादिसे अलंकृत गाएं—गुण शीलयुक्त बहुत कुटुम्बी सदाचारी त-
पस्वी शुभकर्म करनेवाले वेदपाठी उदार और युवा ब्राह्मणों को दानदीथीं १२—१४ ॥ गौ पृथ्वी
सुवर्ण, घर, घोड़ा, हाथी, दासी समेत कन्या, तिल, चांदी शय्या, वस्त्र रत्न और सबप्रकार की
सामग्री व रथ दान करता यज्ञ करता और बावड़ी कुआ बनवाता हुआ समय बिताताथा ॥ १५ ॥
एकसमय किसी एक ब्राह्मणकी गाय मेरे गोधनमें मिलगई मैंने बिनाजाने एक दूसरे ब्राह्मण को
वह गाय दान करदी ॥ १६ ॥ वह ब्राह्मण उसको लियेजाताथा कि—उसीसमय उस गाय के
प्रथम स्वामीने उसको देख उस ब्राह्मणसे कहा कि—यह गाय मेरीहै दूसरेने भी कहा कि यह
मेरीहै, राजा नृगने मुझे दान दीहै ॥ १७ ॥ इसप्रकार से विवाद करते २ वह दोनों ब्राह्मण अ-
पना २ कार्य पूरे होनेके कारण मुझसे आकर कहनेलगे कि आपही देनेवाले और आपही छीनने
वालेहो, यह सुनकर मैं व्याकुल होगया ॥ १८ ॥ धर्मसंकट उपस्थित होजानेसे मैंने दोनों
ब्राह्मणों से प्रार्थना करके कहा कि—उत्तम २ एकलक्ष गौएं दान करता हूं आप इसको
देदो, ॥ १९ ॥ मैं आपका दास हूं बिना जाने मैंने अपराध किया है आप मेरे ऊपर
अनुग्रह करो मैं अपवित्र नरक में पड़ता हूं आप इस कष्टसे मुझे बचाइये ॥ २० ॥

गवामप्ययुतमिच्छामीत्यपराययौ ॥ २१ ॥ एतस्मिन्नन्तरेयाम्यैर्दूतैर्नीतोयमक्षयम् । यमेनपृष्टस्तत्राहंदेवदेवजगत्पते ॥ २२ ॥ पूर्वंत्वमशुभंभुंक्षेउताहोनृपतेशुभम् । नान्तंदानस्यधर्मस्यपश्येलोकस्यभास्वतः ॥ २३ ॥ पूर्वंदेवाशुभंभुञ्जइतिप्राहपतेतिसः । तावदद्राक्षमात्मानंकृकलासंपतन्प्रभो ॥ २४ ॥ ब्रह्मण्यस्यवदान्यस्यतवदासस्यकेशव । स्मृतिर्नाद्यापिविध्वस्ताभवत्संदर्शनार्थिनः ॥ २५॥ सत्वंकथंममविभोऽक्षिपथःपरात्मायोगेश्वरैः श्रुतिदृशाऽमलहृद्विभाव्यः । साक्षादधोक्षजउरुव्यसनान्धबुद्धेःस्यान्मेऽनुदृश्यइहयस्यभवापवर्गः ॥ २६ ॥ देवदेवजगन्नाथगोविन्द पुरुषोत्तम । नारायणहृषीकेशपुण्यश्लोकाच्युताव्यय ॥ २७॥ अनुजानीहिमांकृष्ण यान्तंदेवगतिंप्रभो । यत्रक्वापिसतश्चेतोभूयान्मेत्वत्पदास्पदम् ॥ २८ ॥ नमस्तेसर्व भावायब्रह्मणेऽनन्तशक्तये । कृष्णायवासुदेवाय योगानांपतयेनमः ॥ २९ ॥ इत्युक्त्वातंपरिक्रम्यपादौस्पृष्ट्वास्वमौलिना । अनुज्ञातोविमानाग्र्यमारुहत्पश्यतांनृणाम् ॥ ३० ॥ कृष्ण परिजनंप्राहभगवान्देवकीसुतः । ब्रह्मण्यदेवोधर्मात्माराजन्याननुशिक्षयन् ॥३१॥ दुर्जरंबतब्रह्मस्वं भुक्तमग्नेर्मनागपि । तेजीयसोऽपिकिमुतराज्ञामीश्वरमानिनाम् ॥ ३२ ॥ नाहंहालाहलम्मन्येविषंयस्यप्रतिक्रिया । ब्रह्मस्वंहिविषंप्रोक्तंनास्यप्रतिविधिर्भुवि ॥ ३३ ॥ हिनस्तिविषमत्तारं वह्निरद्भिःप्रशाम्यति । कुलं

मेरी बातें सुनकर 'मैं राजाका दान नहीं लेता' ऐसे कहकर गौका स्वामी चलागया; 'मैंदशलक्ष गौओं का भी इच्छा नहीं करता' यह कहकर दूसरा ब्राह्मणभी चलागया ॥ २१ ॥ इसीअवसर में यमदूत आकर मुझको यमपुरी में लेगये। हे देव देव जगन्नाथ ! वहां यमने मुझ से पूँछा कि- ॥ २२ ॥ हेराजन् ! आप प्रथम धर्म का भोग करोगे? या पापका? धर्मानुष्ठान और दान से जो सुन्दर लोक प्राप्त होगा उसका तो मैं अन्तभी नहीं देखता ॥ २३ ॥ मैंने कहा कि हे देव ! मैं प्रथम पापकाही भोग करूंगा । तब उन्होंने कहा कि—तो नीचयोनि में पड़ । हे प्रभो!उसकालही मैंने देखा कि गिरगिट होकर पतितहुआहूं ॥ २४ ॥ हे केशव ! मैं ब्राह्मणों का हितकारी, दाता और आपका दासहूं मेरी स्मृति शक्ति अबतक नष्ट नहीं हुई । आप के दर्शन करने की मेरेमनमें इच्छाथी किंतु मैं विस्मितहोताहूं कि आप किसप्रकार से मेरे दृष्टिगोचरहुए ॥ २५ ॥ इंद्रियों से जो ज्ञानउत्पन्न होता है वह आप के निकट उपस्थित नहीं होसकता, अतएव योगेश्वरभी उपनिषद्रूप नेत्रोंद्वारा निर्मल हृदयमें आपका ध्यानकरसकते हैं, आप परमात्माहो । जिसकासंसारनष्ट होता है उसी को आपका दर्शन होता मैं सांसारिक दुःखों से अन्धा होरहाहूं सो मुझे आपका दर्शनहुआ ॥ २६ ॥ हे देव देव ! हेजगन्नाथ ! हेगोविंद ! हेपुरुषोत्तम ! हेनारायण ! हे हृषीकेश! हेपुण्यश्लोक ! हेअच्युत ! हेअव्यय ॥ २७ ॥ हेकृष्ण ! आप आज्ञा दीजिये मैं देवलोककोजाऊं। हे विभो ! जिस किसीस्थान में रहूं मेरा चित्त आपही के चरण कमलों में लगारहे ॥ २८॥ आप से समस्त पदार्थोंकी उत्पत्ति होती है परन्तु आप विकार रहितहो क्योंकि माया आपकी शक्ति है—। आप सब प्राणियों के आश्रय, आनन्दस्वरूप कर्मों के फल देनेवालेहो आप को नमस्कार है ॥ २९ ॥ राजानृग यह कहकर अपने मुकुटाग्रद्वारा श्रीकृष्णजी के दोनों चरणों का स्पर्श व उनकी परिक्रमाकर व उनसे आज्ञाले सबके सन्मुखही विमानपर बैठकर चलागया ॥ ३० ॥ ब्राह्मणों के भक्त धर्मात्मा श्रीकृष्णजी क्षत्रियों को शिक्षा देतेहुए अपने कुटुम्बियों से कहने लगे कि ॥ ३१ ॥ अहो ! ब्राह्मणोंका थोड़ासाभी भक्षण किया हुआ धनअग्नि की समान तेजस्वि मनुष्यों कोभी पचना कठिन होजाता है फिर मिथ्या अहङ्कार रखनेवाले राजाओंको कैसे पचे ॥३२॥ मैं हलाहलको विष नहीं जानता क्योंकि उसकातो उपाय है । ब्राह्मण के धनकोही यथार्थ विषकहा जासकता है क्योंकि पृथ्वीपर इसका यत्न नहीं है ॥ ३३ ॥ विषतो खानेवाले कोही नाश करता है

समूलंदहति ब्रह्मस्वारणिपावकः ॥ ३४ ॥ ब्रह्मस्वंदुरनुज्ञातं भुक्तंहन्तित्रिपूरुषम् । प्रसह्यतुबलाद्भुक्तं दशपूर्वान्दशापरान् ॥३५॥ राजानो राजलक्ष्म्याऽन्धा नात्मपातं विचक्षते । निरयंयेऽभिमन्यन्ते ब्रह्मस्वं साधुबालिशाः ॥ ३६ ॥ गृह्णन्ति यावतः पांशून्क्रन्दतामश्रुबिन्दवः । विप्राणांहृतवृत्तीनां वदान्यानां कुटुम्बिनाम् ॥ ३७॥ राजानोराजकुल्याश्च तावतोऽब्दान्निरंकुशाः । कुम्भीपाकेषुपच्यन्ते ब्रह्मदायापहारिणः ॥ ३८ ॥ स्वदत्तांपरदत्तांवा ब्रह्मवृत्तिंहरेच्चयः ॥ षष्टिवर्षसहस्राणि विष्ठायां जायतेकृमिः ॥ ३९ ॥ नमेब्रह्मधनं भूयाद्यद्गृध्वाऽल्पायुषोनराः । पराजिताश्च्युता राज्याद्भवन्त्युद्वेजिनोऽहयः ॥४० ॥ विप्रंकृतागसमपि नैवद्रुह्यतमामकाः । घ्नन्तं बहुशपन्तंवा नमस्कुरुतनित्यशः ॥४१॥ यथाऽहंप्रणमे विप्राननुकालं समाहितः । तथानमतयूयंच योऽन्यथामेसदण्डभाक् ॥ ४२ ॥ ब्राह्मणार्थोह्यपहृतो हर्तारंपातयत्यधः । अजानन्तमपिह्येनं नृगंब्राह्मणगौरिव ॥ ४३ ॥ एवंविश्राव्यभगवान्मुकुन्दो द्वारकौकसः । पावनःसर्वलोकानां विवेशनिजमन्दिरम् ॥ ४४ ॥

इति श्रीमद्भा०महा० द० उ० चतुःषष्टितमोऽध्यायः ॥ ६४ ॥

श्रीशुकउवाच । बलभद्रःकुरुश्रेष्ठ भगवान्रथमास्थितः ॥ सुहृद्दिदृक्षुरुत्कण्ठः प्रययौनन्दगोकुलम् ॥१॥ परिष्वक्तश्चिरात्कण्ठैर्गोपैर्गोपीभिरेवच । रामोऽभिवाद्य पितरावाशीर्भिरभिनन्दितः ॥ २ ॥ चिरंनःपाहिदाशार्ह सानुजोजगदीश्वरः । इत्यारो

और अग्नि जलसे शांत होजाता है परन्तु ब्रह्म द्रव्यरूप काठसे जोअग्नि उत्पन्न होता है वह वंश के मूलतकको जलाडालता है ॥ ३४ ॥ यदि विनासमति लिये ब्राह्मण के धनका भोग किया जावे तो तीन पीढ़ियोंका नाश होता है हठात् बल पूर्वक छीनलेने से पहिली और पिछली दश पीढियों का नाशहोता है ॥३५॥ जोब्राह्मण के धनकी इच्छा करते हैं वे नरकके अभिलाषा होते हैं अतएव ब्राह्मण के धनकी इच्छा वाले मूर्ख राजा राज्यलक्ष्मी समेत पतित होते हैं वे अपनी हानिको नहीं देखते ॥३६॥ दान,शील,कुटुंबी ब्राह्मण की वृत्ति हरण करने पर वह जब रोना आरम्भ करताहै तब उसके आंसुओं से जितने रजकण भीगते हैं, निरंकुश ब्रह्मधन हारी राजा और राज परिवार उतनेही वर्षतक कुम्भीपाक नरक में पकाये जाते हैं ॥ ३७–३८ ॥ जोअपना दिया अथवा दूसरे का दिया हुआ ब्राह्मणका धनहरता है वह साठ सहस्र वर्षतक विष्ठाका कीड़ा होकर रहता है॥३९॥ मेरे घरमें ब्राह्मणका धन न आवे कि जिस धनसे राजा अल्पायु, पराजित, राजच्युत, और अत्यंत दुःखित होते हैं ॥ ४० ॥ हे बंधुबांधवो! ब्राह्मण यदि अपराध भी करे तोभी उसका अनिष्ट नहीं करनाचाहिये। वह यदि वध वा शाप देनेपरभी प्रवृत्तहो तोभी उनको नित्य नमस्कार करना चाहिये ॥ ४१ ॥ मैं जैसे सावधान चित्तसे प्रत्येक समय ब्राह्मणोंको प्रणाम करता हूं वैसेही तुमको भी करना चाहिये । जो इसके अन्यथा करेंगे मैं उनका दंडदूंगा ॥ ४२ ॥ न जानकरभी जो ब्राह्मण का धनहरते हैं वे नरकमें गिरते हैं। इसही कारण राजानृग गिरगिट होकर पतित हुआथा ॥४३॥ हे राजन् ! सर्वलोक के पवित्र करनेवाले भगवान् कृष्णजी द्वारका की प्रजाको सदुपदेश दे अपने घरको गये ॥ ४४ ॥

इतिश्री मद्भा०महापुराणेदशमस्कंधेउ०सरलाभाषाटीकायांएकोनषष्टीतमोऽध्यायः ॥ ६४ ॥

श्रीशुकदेवजी बोलेकि–हेकुरुश्रेष्ठ ! भगवान बलभद्रजी बंधुओं के दर्शन करने के निमित्त उत्कंठितहो रथपर बैठ नंदके गोकुल में आये ॥ १ ॥ वहां आकर उत्कंठित हुए गोप गोपियों से मिल पितामाताको वंदनाकी । उन्हों ने आशीर्वाद देकर उनका सम्मान करके कहाकि ॥ २ ॥

न्योकमालिङ्ग्य नेत्रैः सिषिचतुर्जलैः ॥ ३ ॥ गोपवृद्धांश्च विधिवद्यविष्ठैरभिवन्दितः यथावयो यथासख्यं यथासम्बन्धमात्मनः ॥ ४ ॥ समुपेत्याथ गोपालान्हास्यहस्तग्रहादिभिः । विश्रान्तं सुखमासीनं पप्रच्छुः पर्युपागताः ॥ ५ ॥ पृष्टाश्चानामयं स्वेषु प्रेमगद्गदया गिरा । कृष्णे कमलपत्राक्षे संन्यस्ताखिलराधसः ॥ ६ ॥ कच्चिन्नो बान्धवाराम सर्वे कुशलमासते । कच्चित्स्मरथ नो राम यूयं दारसुतान्विताः ॥ ७ ॥ दिष्ट्या कंसो हतः पापो दिष्ट्या मुक्ताः सुहृज्जनाः । निहत्य निर्जित्य रिपून्दिष्ट्या दुर्गं समाश्रिताः ॥ ८ ॥ गोप्यो हसन्त्यः पप्रच्छुः रामसंदर्शनादृताः । कच्चिदास्ते सुखं कृष्णः पुरस्त्रीजनवल्लभः ॥ ९ ॥ कच्चित्स्मरति वा बन्धून्पितरं मातरं च सः । अप्यसौ मातरं द्रष्टुं सकृदप्यागमिष्यति । अपि वा स्मरतेऽस्माकमनुसेवां महाभुजः ॥ १० ॥ मातरं पितरं भ्रातॄन्पतीन्पुत्रान्स्वसॄरपि । यदर्थे जहिम दाशार्ह दुस्त्यजान्स्वजनान्प्रभो ॥ ११ ॥ तानः सद्यः परित्यज्य गतः संछिन्नसौहृदः । कथं नु तादृशं स्त्रीभिर्न श्रद्धीयेत भाषितम् ॥ १२ ॥ कथं नु गृह्णन्त्यनवस्थितात्मनो वचः कृतघ्नस्य बुधाः पुरस्त्रियः । गृह्णन्ति वै चित्रकथस्य सुन्दरस्मितावलोकोच्छ्वसितस्मरातुराः ॥ १३ ॥ किं नस्तत्कथया गोप्यः कथाः कथयतापराः । यात्यस्माभिर्विना कालो यदि तस्य तथैव नः ॥ १४ ॥ इति प्रहसितं शौरेर्जल्पितं चारुवीक्षितम् ॥ गतिं प्रेमपरिष्वङ्गं स्मरन्त्यो रुरुदुः स्त्रियः ॥ १५ ॥ संकर्षणस्ताः कृष्णस्य संदेशैर्हृदयंगमैः ॥ सान्त्वयामास भगवान्नानाऽनु-

---

हे दाशार्ह ! तुम जगदीश्वर छाड़ भई सर्वत हमारा निरंतर पालन करो । यह कहकर गोद में ले नेत्रों के जलसे बलदेवजी को भिगोने लगे ॥ ३ ॥ इधर गोपों को वन्दनाकर छोटी अवस्थावाले गोपों से पूजित हुए ॥ ४ ॥ समान वयवाले गोपों के सम्बन्ध और बन्धुता के अनुसार हास्य और हस्त ग्रहणादि द्वारा मिल सम्भाषण कर सुखपूर्वक वहां बैठ और कुशल पूछा, ॥ ५ ॥ उसकाल सब गोप कि—जिन्होंने श्रीकृष्ण जी के निमित्त समस्त विषयों को छोड़ दियाथा उनके निकट आय चारोंओर बैठगये और बलरामजी से पूछनेलगे कि—६ ॥ हेराम ! हमारे सब बन्धु बांधव कुशल से तो हैं ? तुम दोनोंजन स्त्री पुत्रों को पाकर क्या कभी हमारा भी स्मरण करतेहो ? । ७॥ अच्छा हुआ कि—कंस मारागया और सब बांधव दु:ख से छूटे । अच्छाहुआ कि—तुमने शत्रुओं को हरा । उनका नाशकर गढ़का आश्रय लिया ॥ ८ ॥ गोपियें रामको देख आनन्दितहो हंसतेर कहने लगीं कि—नगरकी स्त्रियों के प्यारे श्रीकृष्णजी तो सुखसे हैं ॥ ९ ॥ वह क्या कभी पिता माता और बन्धुओं का स्मरण करतेहैं ? वह महाभुज क्या कभी हमारी सेवा का भी स्मरण करतेहैं ॥ १० ॥ हेयदुनन्दन ! हेप्रभो ! हमने उनके निमित्त दुस्त्यज माता, पिता, भाई पति, और बहिन को त्यागदिया ॥ ११ ॥ तो भी वह एकसाथ मित्रताको छोड़ हमें त्यागकर चलेगये वह जोनेसमय जो कहगयेथे उन मनोहर वाक्योंपर कौन स्त्री विश्वास न करे ॥ १२ ॥ दूसरी एक गोपीने कहा कि नगरकी स्त्रियें चतुर होतीहैं वह कृतघ्न और अस्थिर चित्तवाले श्रीकृष्णके वचनों पर कैसे विश्वास करती होंगी ? अथवा श्रीकृष्णकी बातें अति मनोहरहैं वहभी उनके सुन्दरहास्य युक्त कटाक्ष विक्षेप द्वारा कामदेवसे पीड़ित और चंचलहो उनकी बातोंपर विश्वास करलेतीहों । ॥ १३ ॥ दूसरी गोपीने कहा कि—हेगोपीगण ! उनकी बातोंसे हमारा क्या प्रयोजन है दूसरी बात कहो यदि हमारे बिना उनका समय व्यतीत होताहै तो हमारा भी उनके बिना समय व्यतीत होताहै ॥ १४ ॥ ऐसी बातें कह वह सब स्त्रियां श्रीकृष्णजीके हास्य विलास बातें करना सुन्दरदृष्टि गति और प्रेमसे मिलने का स्मरणकर रोनेलगीं ॥ १५ ॥ नाना प्रकार के विषयोंकी जानने वाले

नयकोविदः ॥ १६ ॥ द्वौमासौतत्रचावात्सीन्मधुंमाधवमेवच। रामःक्षपासु भगवान्गोपीनां रतिमावहन् ॥ १७ ॥ पूर्णचन्द्रकलामृष्टे कौमुदीगन्धवायुना। यमुनोपवनेरेमे सेवितेस्त्रीगणैर्वृतः ॥ १८ ॥ वरुणप्रेषितादेवी वारुणीवृक्षकोटरात्। पतन्तीतद्वनसर्वं स्वगन्धेनाध्यवासयत् ॥१९॥ तंगन्धंमधुधाराया वायुनोपहृतंबलः। आघ्रायोपगतस्तत्र ललनाभिःसमंपपौ ॥ २० ॥ उपगीयमानचरितो वनिताभिर्हलायुधः। वनेषुव्यचरत्क्षीबो मदविह्वललोचनः ॥ २१ ॥ स्रग्व्येककुण्डलो मत्तोवैजयन्त्याचमालया। बिभ्रत्स्मितमुखाम्भोजं स्वेदप्रालेयभूषितम् ॥ २२ ॥ सआजुहावयमुनां जलक्रीडार्थमीश्वरः। निजंवाक्यमनादृत्य मत्तइत्यापगांबलः ॥ अनागतां हलाग्रेण कुपितोविचकर्षह ॥ २३ ॥ पापेत्वंमामवज्ञाय यन्नायासिमयाऽऽहुता ॥ नेष्येत्वांलांगलाग्रेण शतधाकामचारिणीम् ॥ २४॥ एवंनिर्भर्त्सिताभीता यमुनायदुनन्दनम्। उवाचचकितावाचं पतितापादयोर्नृप ॥ २५ ॥ रामराममहाबाहो नजाने तवविक्रमम्। यस्यैकांशेन विधृता जगतीजगतःपते ॥ २६ ॥ परंभावंभगवतो भगवन्मामजानतीम्। मोक्तुमर्हसि विश्वात्मन्प्रपन्नां भक्तवत्सल ॥ २७ ॥ ततोव्यमुंचद्यमुनां याचितोभगवान्बलः। विजगाहजलंस्त्रीभिः करेणुभिरिवेभराट् ॥ २८ ॥ कामंविहृत्य सलिलादुत्तीर्णायासिताम्बरे। भूषणानिमहार्हाणि ददौकान्तिःशुभां स्रजम् ॥ २९॥ वसित्वावाससीनीले मालामामुच्यकांचनीम्। रेजेस्वलंकृतोलिप्तो

प्रच्छित रामने श्रीकृष्णजी के मनोहर सम्वादों द्वारा उनको सान्त्वना की ॥ १६ ॥ बलदेवजी रात्रि कालमें गोपियोंको राग कराते हुए चैत्र वैशाख दोमहीने वहां रहे ॥ १७ ॥ और स्त्रियों से घिरकर पूर्ण चन्द्रमा की किरणों से उज्वल और कमलों की गंधसे सुगंधित हुए वायुसे सेवित यमुना के उपवन में विहार किया ॥ १८ ॥ वारूणी देवी वरूणकी आज्ञासे वृक्षोंकी खोहसे पृथ्वी पर पड़ने लगी उसकी सुगंध से समस्त वन सुगंधित होगया ॥ १९ ॥ बलदेवजी ने उस मधुकी धाराकी सुगंधको चलती हुई वायुसे सूंघ वहांजाय स्त्रियों समेत उसका पानकिया ॥ २० ॥ बलदेवजी के नेत्र मदसे विह्वल होगये और उन्मत्तहो वनमें भ्रमण करनेलगे। सबस्त्रियें उनके चरित्रों को गानेलगीं ॥ २१ ॥ हे राजन्! बलदेवजी के गलेमें वैजयन्ती माला और कानमें एक कुंडल शोभित होरहा है। हास्य युक्त मुख कमल पसीने के बिंदुरूप हिमकरण से भीगा हुआ है ॥२२॥ उन्होंने मदोन्मत्तहो जलक्रीडा करने के निमित्त यमुना को बुलाया परन्तु यमुना न आई। इससे उन्होंने विचारा कि मैं मत्तहूं इस कारण यमुना ने मेरे वचनों का तिरस्कार किया है। बलदेवजी यह विचारकर कुपितहो हलके अग्र से यमुना को खींचकर कहनेलगे ॥ २३ ॥ अरेदुष्टा! मैंने तुझे बुलाया परन्तु तू मेरा तिरस्कारकरके न आई, तू अपनी इच्छानुसार कार्य करती है; अतएव हलके अग्रभागसे तेरी सौ धाराएं किये देताहूं ॥ २४ ॥ हेराजन्! इसप्रकार से तिरस्कार करने पर भयभीत यमुना चकितहोकर कांपतीहुई बलदेवजी के चरणों पर गिरकर कहने लगीं कि—हेराम! हेमहाबाहो! मुझे आपका पराक्रम नहीं ज्ञातथा—हेजगत्पते! आपके एक अंश से पृथ्वी धारण कीजाती है ॥ २६ ॥ हेभगवन्! मैं आपकी अपारमहिमा को नहीं जानती। हेविश्वात्मन्! हेभक्तवत्सल! मुझ शरण में आई हुईको आप छोड़दो ॥ २७ ॥ यमुना के इसप्रकारकहने पर बलदेवजी ने उसको छोड़ दिया और हाथिनियों समेत हाथी की समान स्त्रियों समेत जल में उतरे ॥ २८ ॥ वह इच्छानुसार जल में विहार करके बाहर निकले, लक्ष्मीजी ने उनको नीलवस्त्र और आभूषण और कल्याणकारी मालादी ॥ २९ ॥ बलरामजी भी नीलवस्त्र व आभूषण और

माहेन्द्र इववारणः ॥ ३० ॥ अद्यापिदृश्यते राजन्यमुना कृष्टवर्त्मना । बलस्यानन्तवीर्यस्य वीर्यंसूचयतीवहि ॥ ३१ ॥ एवंसर्वानिशायाता एकेवरमतोव्रजे । रामस्याक्षिप्तचित्तस्य माधुर्यैर्व्रजयोषिताम् ॥ ३२ ॥

इतिश्री मद्भागवते महापुराणे दशा० उ० पंचषष्टितमोऽध्यायः ॥ ६५ ॥

श्रीशुक उवाच ॥ नन्दव्रजंगतेरामे करूषाधिपतिर्नृप । वासुदेवोऽहमित्यज्ञो दूतंकृष्णायप्राहिणोत् ॥ १ ॥ त्वंवासुदेवोभगवानवतीर्णो जगत्पतिः । इतिप्रस्तोभितोबालैर्मेनआत्मानमच्युतम् ॥ २ ॥ दूतंचप्राहिणोन्मन्दः कृष्णायाव्यक्तवर्त्मने । द्वारकायांयथाबालोनृपो बालकृतोऽबुधः ॥ ३ ॥ दूतस्तुद्वारकामेत्यसभायामास्थितंप्रभुम् । कृष्णंकमलपत्राक्षं राजसन्देशमब्रवीत् ॥ ४ ॥ वासुदेवोऽवतीर्णोहमेकएवनचापरः । भूतानामनुकम्पार्थंत्वंतुमिथ्याऽभिधांत्यज ॥५॥ यानित्वमस्मच्चिह्नानिमौढ्याद्बिभर्षिसात्वत त्यक्त्वैहिमांत्वंशरणंनोचेद्देहिममाहवम् ॥ ६ ॥ श्रीशुक उवाच ॥ कत्थनंतदुपाकर्ण्यपौण्ड्रकस्याल्पमेधसः ॥ उग्रसेनादयः सभ्याउच्चकैर्जहसुस्तदा ॥ ७ ॥ उवाचदूतंभगवान्परिहासकथामनु । उत्स्रक्ष्येमूढचिह्नानियैस्त्वमेवं विकत्थसे ॥ ८ ॥ मुखंतदपिधायाज्ञकङ्कगृध्रवटैर्वृतः । शयिष्यसेहतस्तत्रभवितावरणंशुनाम् ॥ ९ ॥ इतिदूतस्तदाक्षेपंस्वामिनेसर्वमाहरत् । कृष्णोऽपिरथमास्थायकाशीमुपजगामह ॥ १० ॥ पौण्ड्रकोपितदुद्योगमुपलभ्यमहारथः । अक्षौ

सुवर्ण की मालाधारणकर भली भांति से अलंकृत और चन्दनसे लिप्तहो इन्द्र के हाथीकी समान शोभा पानेलगे ॥ ३० ॥ हेमहाराज ! बलदेवजी ने जो यमुनाजी को खींचा इससे उस स्थानपर यमुनाजी टेढ़ी होकर अबतक उनके पराक्रम को प्रगटकरती हैं ॥३१ ॥ इसप्रकार से व्रजनारियों के मधुर विलासद्वारा उन्मत्त चित्तहो बलदेवजी ने उनके साथ रमण किया वह सब रात्रियें एक रात्रि के समान बीत गईं ॥ ३२ ॥

इतिश्री मद्भागवतेमहापुराणेदशमस्कंधउ०सरलाभाषाटीकायांपञ्चषष्टितमोऽध्यायः ॥ ६५ ॥

श्रीशुकदेवजी बोले कि–हेराजन् ! बलराम जी के नन्द व्रजमें चले जानेके कुछ दिनोंके उपरांत करूष देशके राजा अज्ञानान्ध पौण्ड्रकने "मैं वासुदेव हूं" ऐसा कह श्रीकृष्णजी के निकट दूत ॥ १ ॥ मूर्ख मनुष्यों के "आप भगवान जगत्पति वासुदेवहो पृथ्वीपर आप अवतीर्ण हुएहो" यह कहने पर वह बहक कर अपनेको वासुदेवही समझने लगा ॥ २ ॥ और खेलके समय बालकों से बनाये हुए कल्पित बालक राजाकी समान उस मूर्ख मन्द बुद्धिने द्वारका में भगवान के निकट दूतभी भेजदिया ॥ ३ ॥ दूत द्वारकामें आय सभामें उपस्थित हुआ और वहां बैठेहुए कमल नेत्र श्रीकृष्णजी से अपने राजाका संदेशा कहने लगा ॥४॥ मैंही एक वासुदेवजी हूं दूसरा कोई नहीं है; प्राणियों पर दया प्रकाश करने के निमित्तही मैंने अवतार लिया है मिथ्या 'वासुदेव' इस नामको छोड़ ॥ ५ ॥ हे यादव ! तूने मूर्खता वश मेरे जिन चिन्हों को धारण किया है उन सबको छोड़ मेरे निकट आयमेरी शरणले; नहीं तो मेरेसाथ युद्धकर॥६॥ श्रीशुकदेवजी बोले कि हेराजन् ! उग्रसेनादि सभासद उस अल्पबुद्धि पौंड्रककी ऐसी बातोंको सुनकर उच्चस्वर से हँस उठे ॥ ७ ॥ भगवान ने हंसकर उस दूतसे कहा—रेमूढ़ ! जिनकी सहायता से तू ऐसी बड़ाई करता है मैं उन सब सुदर्शनादि चिह्नों को छुड़ायदूंगा ॥ ८ ॥ तू जिसमुखसे बकता है उस मुख को ढककर समर में सोवेगा, कंक, गीध और वट पक्षी तुझको घेरेंगे उस स्थान मैं तू कुत्तों का आश्रयहोगा ॥ ९ ॥ उस दूत ने इनसब वाक्यों को स्वामी से आकरकहा । श्रीकृष्णजी भी रथपर बैठकर काशी को चले ॥ १० ॥ महारथ पौंड्रकभी श्रीकृष्णजी के इस उद्योग को देख दो अक्षौहिणी

हिणीभ्यां संयुक्तो निश्चक्राम पुराद्द्रुतम् ॥ ११ ॥ तस्य काशिपतिर्मित्रं पार्ष्णिग्राहोऽन्वयान्नृप । अक्षौहिणीभिस्तिसृभिरपश्यत्पौण्ड्रकं हरिः ॥ १२ ॥ शंखार्यसिगदाशार्ङ्गश्रीवत्साद्युपलक्षितम् । बिभ्राणं कौस्तुभमणिं वनमालाविभूषितम् ॥ १३ ॥ कौशेयवाससी पीते वसानं गरुडध्वजम् । अमूल्यमौल्याभरणं स्फुरन्मकरकुण्डलम् ॥ ॥ १४ ॥ दृष्ट्वा तमात्मनस्तुल्यवेषं कृत्रिममास्थितम् ॥ यथा नटं रङ्गगतं विजहास भृशं हरिः ॥ १५ ॥ शूलैर्गदाभिः परिघैः शक्त्यृष्टिप्रासतोमरैः । असिभिः पट्टिशैर्बाणैः प्राहरन्नरयो हरिम् ॥ १६ ॥ कृष्णस्तु तत्पौण्ड्रककाशिराजयोर्बलं गजस्यन्दनवाजिपत्तिमत् । गदासिचक्रेषुभिरार्दयद्भृशं यथा युगान्ते हुतभुक्पृथक्प्रजाः ॥ १७ ॥ आयोधनं तद्रथवाजिकुञ्जरद्विपत्खरोष्ट्रैररिणाऽवखण्डितैः । बभौ चितं मोदवहं मनस्विनामाक्रीडनं भूतपतेरिवोल्बणम् । ॥ १८ ॥ अथाह पौण्ड्रकं शौरिर्भो भोः पौण्ड्रक यद्भवान् । दूतवाक्येन मामाह तान्यस्त्राण्युत्सृजामि ते ॥ १९ ॥ त्याजयिष्येऽभिधानं मे यत्त्वयाज्ञ मृषा धृतम् । व्रजामि शरणं तेऽद्य यदि नेच्छामि संयुगम् ॥ २० ॥ इति क्षिप्त्वा शितैर्बाणैर्विरथीकृत्य पौण्ड्रकम् । शिरोऽवृश्चद्रथाङ्गेन वज्रेणेन्द्रो यथा गिरेः ॥ २१ ॥ तथा काशिपतेः कायाच्छिर उत्कृत्य पत्रिभिः । न्यपातयत्काशिपुर्यां पद्मकोशमिवानिलः ॥ २२ ॥ एवं मत्सरिणं हत्वा पौण्ड्रकं ससखं हरिः । द्वारकामाविशत्सिद्धैर्गीयमानकथामृतः ॥ २३ ॥ स नित्यं भगवद्ध्यानप्रध्वस्ताखिलबन्धनः । बिभ्राणश्च हरे राजन्स्वरूपं तन्मयोऽभवत् ॥ २४ ॥ शिरः पतितमालोक्य राजद्वारे सकुण्ड-

---

सेनाले शीघ्र नगर से बाहर हुआ ॥ ११ ॥ हे राजन् ! उसका मित्र काशिराजभी तीन अक्षौहिणी सेनाले उसकी सहायता के निमित्त वहां आया हरिने देखा कि— ॥ १२ ॥ पौंड्रक शङ्ख, श्रेष्ठ खड्ग, गदा, धनुष और श्रीवत्स चिह्नोंसे चिह्नित कौस्तुभ व वनमालाको धारण कियेहुए है ॥ १३ ॥ पीताम्बर व उत्तरीय वस्त्रों और सुन्दर आभूषणों से अलंकृत है । उसके कानों में मकराकार कुण्डल शोभायमान हैं ॥ १४ ॥ रेशमी वस्त्र धारण कियेहुए वह कृत्रिम गरुड़ की पीठपर बैठाहै । रंगभूमि के नटकीसमान कृत्रिम वेशधारी उस पौंड्रक को अपनावेश बनाएहुए देख भगवान् बहुत हँसे ॥ १५ ॥ शत्रु, शूल, गदा, परिघ, शक्ति, ऋष्टि, प्रास, तोमर, खड्ग, पट्टिश और बाणों से भगवान पर प्रहार करने लगे ॥ १६ ॥ प्रलयकाल की अग्नि जैसे सबप्रजा का संहार करती है, वैसही श्रीकृष्णजी गदा, खड्ग, चक्र, और बाणों द्वारा पौंड्रक और काशिराजकी चतुरङ्गिणी सेना का नाश करने लगे ॥ १७ ॥ रणभूमि चक्र से टुकड़े २ हुए रथ, अश्व, हाथी और पैदलों से व्याप्तहोगई वीर पुरुषों की वीरताको बढ़ानेवाली वह रणभूमि प्रलयकालके रुद्रकेरणस्थल की समान शोभा पाने लगी ॥ १८ ॥ अनन्तर भगवान ने पौंड्रक से कहा अरे पौंड्रक ! दूतके मुख से जो तूने मुझे कहला भेजाथा वे शस्त्र अब तुझपरही छोड़ताहूं ॥ १९ ॥ रेमूर्ख ! जो तूने मेरा झूठानाम धर लिया है वह अभी छुड़ाऊंगा यदि मैं युद्ध न चाहता होऊं तो तेरी शरण आऊं ॥ २० ॥ यह कहकर इंद्र जैसे वज्रद्वारा पर्वत को काटते हैं तैसेही कृष्णजी ने बाणों से पौंड्रक को रथहीन कर उसका शिर काटडाला ॥ २१ ॥ और इसी प्रकार बाणोंद्वारा काशिराज कीभी देह से मस्तक को काट, वायु से चलायमान कमलपत्र की समान काशीपुरी में फेंकदिया ॥ २२ ॥ श्रीहरि इसप्रकार से गर्वित पौंड्रक को उस के मित्रसमेत मार आप द्वारका में आये । सिद्धगण उनकी अमृत कथाका गानकरने लगे ॥ २३ ॥ हे राजन् ! पौंड्रक विद्वेष के कारण सर्वदाही भगवान का ध्यानकरता रहताथा अतएव उसके सब बन्धन कटगये ॥ २४ ॥ इधर काशीपुरीके राज

लम् । किमिदंकस्यवावक्त्रमितिसंशयिरेजनाः ॥ २५ ॥ राज्ञःकाशिपतेर्ज्ञात्वाम-
हिष्यःपुत्रबान्धवाः । पौराश्चहाहताराजन्नाथनाथेतिप्रारुदन् ॥ २६ ॥ सुदक्षिणस्त
स्यसुतःकृत्वासंस्थाविधिंपितुः । निहत्यपितृहन्तारंयास्याम्यपचितिंपितुः ॥ २७ ॥
इत्यात्मनाऽभिसंधायसोपाध्यायोमहेश्वरम् । सुदक्षिणोऽर्चयामासपरमेणसमाधि
ना ॥ २८ ॥ प्रीतोऽविमुक्तेभगवांस्तस्मैवरमदाद्विभुः । पितृहन्तृवधोपायंसवव्रेवर-
मीप्सितम् ॥ २९ ॥ दक्षिणाग्निंपरिचरब्राह्मणैःसममृत्विजम् । अभिचारविधानेन
सचाग्निःप्रमथैर्वृतः ॥ ३० ॥ साधयिष्यतिसङ्कल्पमब्रह्मण्ये प्रयोजितः । इत्यादिष्ट
स्तथाचक्रे कृष्णायाभिचरन्व्रती ॥ ३१ ॥ ततोऽग्निरुत्थितःकुण्डान्मूर्तिमानतिभी-
षणः । तप्तताम्रशिखाश्मश्रुरङ्गारोद्गारिलोचनः ॥ ३२ ॥ दंष्ट्रोग्रभ्रुकुटीदण्डकठो-
रास्यः स्वजिह्वया । आलिहन्सृक्किणीनग्नोविधुन्वंस्त्रिशिखंज्वलत् ॥ ३३ ॥ पद्भ्यां
तालप्रमाणाभ्यांकम्पयन्नवनीतलम् । सोऽभ्यधावद्वृतोभूतैर्द्वारकांप्रदहन्दिशः ॥
॥३४॥तमाभिचारदहनमायान्तंद्वारकौकसः। विलोक्यतत्रसुःसर्वेवनदाहेमृगायथा
॥३५॥अक्षैःसभायांक्रीडन्तंभगवन्तं भयातुराः । त्राहित्राहित्रिलोकेशवह्नेःप्रदहतः
पुरम् ॥ ३६ ॥ श्रुत्वातज्जनवैक्लव्यंदृष्ट्वास्वानांचसाध्वसम् । शरण्यःसंप्रहस्याह
माभैष्टेत्यविताऽस्म्यहम् ॥ ३७ ॥ सर्वस्यान्तर्बहिःसाक्षीकृत्यांमाहेश्वरींविभुः । वि
ज्ञायतद्विघातार्थं पार्श्वस्थंचक्रमादिशत् ॥ ३८॥ तत्सूर्यकोटिप्रतिमंसुदर्शनं जाज्व

भवन के द्वारमें गिरेहुए कुण्डलों समेत शिरको देखकर मनुष्य " यह क्या ! किसका शिर है? " इसका विचार करने लगे ॥ २५ ॥ परन्तु फिर काशीपति का शिर जानकर रानियें,पुत्र,बांधव, गण और सबप्रजा " हा ! मरगये, हाराजन् ! हानाथ ! हानाथ ! ऐसे कहकर ऊंचे स्वरसे रोने लगे ॥ २६ ॥ अनन्तर राजा के पुत्र सुदक्षिण ने पिता की मृतक क्रिया करके प्रण किया कि– पिता के मारनवाले को मारकर पिताके ऋण से मुक्तहूंगा । यह निश्चयकर वह उपाध्यायों समेत परम समाधि योगसे महादेवजी की पूजाकरने लगा ॥ २७ । २८ ॥ भगवान महादेवजी प्रसन्न हो उससे कहने लगे कि " वरमांग " । उसने पिता के मारनेवाले के बधका उपायरूप वरमांगा ॥ २९ ॥ महादेवजी ने कहा कि–ब्राह्मणों के साथ अभिचार के विधानानुसार ऋत्विक् के समान दक्षिणाग्नि की उपासना करो । ऐसा होनेसे वह अग्नि हिंसाकार्यमें नियुक्तहो–प्रमथ गणोंसे घिर कर तुम्हारा कार्य पूरा करेगा । सुदक्षिण ने यह आज्ञा पाय नियम धारणकर श्रीकृष्णजी पर अभिचार करने को वैसेही किया ॥ ३० । ३१ ॥ अनन्तर अति भयानक अग्नि मूर्तिमानहो कुंड से बाहरनिकला । उसकी शिखा और दाढी मूँछ तपेहुए तांबे की समानथे और दोनों नेत्रों से अङ्गार निकलतेथे ॥ ३२ ॥ डाढ और प्रचण्ड भौंहों द्वारा मुख अत्यन्त भयानक होरहाथा । यह अग्नि अपनी जिह्वा से दोनों गलफड़ों को चाटता, ताडकी समान दीर्घ दोनों पैरों से पृथिवीको कंपाता, दिशाओं को जलाता, प्रमथगण के साथ नग्नवेश से प्रकाशमान होताहुआ द्वारका के सम्मुख दौडा- ॥ ३३ । ३४ ॥ अभिचार कार्य से उत्पन्न हुई इस भयानक अग्निको आतादेख वन जलने के समय पशुओं की समान द्वारकावासी व्याकुल होगए ॥ ३५ ॥ भगवान उस समय में चौपड़खेलरहेथे । सबप्रजा उनकी शरण में हो, भयभीतहो कातरस्वर से भगवान से कहने लगी–हे त्रिलोकनाथ ! नगर अग्नि से दग्ध होता है; रक्षाकरो ॥ ३६॥ श्रीकृष्णजी प्रजाकी सब- व्याकुलता को सुन और सुहृदों को भयभीत देख हँसकर कहनेलगे " भय न करो मैं तुम्हारी रक्षाकरताहूं ॥ ३७ ॥सबके अन्तर और बाहरके साक्षी भगवान ने उस अग्निको माहेश्वरीअग्नि जान उसके नाश करने के निमित्त निकट में रहेहुएचक्र को आज्ञाकी ॥ ३८॥ श्रीकृष्णजी के उस

ह्यमानं प्रलयानलप्रभम्। स्वतेजसाखं ककुभोऽथ रोदसीचक्रं मुकुन्दास्त्रमथाग्नि मार्दयत्॥ ३९॥ कृत्यानलःप्रतिहतः सरथांगपाणेरस्त्रौजसा सनृपभग्नमुखो निवृत्तः। वाराणसींपरिसमेत्यसुदक्षिणंतं सर्त्विग्जनं समदहत्स्वकृतोऽभिचारः॥४०॥ चक्रंचविष्णोस्तदनुप्रविष्टं वाराणसींसाट्टसभालयापणाम्। सगोपुराट्टालककोष्ठसंकुलां सकोशहस्त्यश्वरथान्नशालाम्॥ ४१॥ दग्ध्वावाराणसींसर्वां विष्णोश्चक्रंसुदर्शनम्। भूयः पार्श्वमुपातिष्ठत्कृष्णस्याक्लिष्टकर्मणः॥ ४२॥ यएवंश्रावयेन्मर्त्य उत्तमश्लोकविक्रमम्। समाहितोवाशृणुयात्सर्वपापैः प्रमुच्यते॥ ४३॥

इति श्रीमद्भा० महा० द० उ० षट्षष्टितमोऽध्यायः॥ ६६॥

राजोवाच। भूयोऽहंश्रोतुमिच्छामि रामस्याद्भुतकर्मणः। अनन्तस्याप्रमेयस्य यदन्यत्कृतवान्प्रभुः॥ १॥ श्रीशुकउवाच। नरकस्यसखा कश्चिद्द्विविदोनामवानरः। सुग्रीवसचिवःसोऽथ भ्राताभैन्दस्यवीर्यवान्॥ २॥ सख्युःसोऽपचितिंकुर्वन्वानरो राष्ट्रविप्लवम्। पुरग्रामाकरान्घोषानदहद्वह्निमुत्सृजन्॥ ३॥ क्वचित्सशैलानुत्पाट्य तैर्देशान्समचूर्णयत्। आनर्तान्सुतरामेव यत्रास्तेमित्रहाहरिः॥४॥ क्वचित्समुद्रमध्यस्थो दोर्भ्यामुत्क्षिप्य तज्जलम्। देशान्नागायुतप्राणो वेलाकूलानमज्जयत्॥ ५॥ आश्रमानृषिमुख्यानां कृत्वाभग्नवनस्पतीन्। अदूषयच्छकृन्मूत्रैरग्नीन्वैतानिकान्खलः॥ ६॥ पुरुषान्योषितोदृप्तः क्ष्माभृद्द्रोणीगुहासुसः। निक्षिप्यचाप्यधाच्छैलैः पेशस्कारीवकीटकम्॥७॥ एवंदेशान्विप्रकुर्वन्दूषयंश्च कुलस्त्रियः। श्रुत्वासुललितंगीतं गिरिंरैवतकंययौ॥ ८॥ तत्रापश्यद्यदुपतिंरामं पुष्करमा

कोटिसूर्य को समान प्रकाशित सुदर्शनचक्र ने प्रलयकाल की अग्नि के समान प्रज्वलितहो अपने तेज से आकाश,दिशा और अन्तरिक्षको प्रकाशितकर उस अग्निको बहुत पीडित किया॥३९॥ हे राजन्! उस कृत्याग्नि ने भगवान के चक्र के तेज से दुःखितहो वहां से लौटकर काशी में आय सुदक्षिण का ऋत्विक् और सभासदों समत जलाडाला॥ ४०॥ विष्णुजी का चक्र भी अग्नि के पीछे २ आय अटारी, सभामंडप, महलों, छज्जों और कोठों स व्याप्त कोषशाला, हाथीशाला, अश्वशाला और अन्नशाला.से शोभायमान वाराणसी में प्रवेश कर समस्त काशीकोजलाय फिर श्रीकृष्णजी के समीप आय उपस्थितहुआ॥ ४१। ४२॥ हेराजन्! जोमनुष्य सावधानहो श्रीकृष्णजी के इस पराक्रम को सुने वा सुनावेगा वह सबपापों स छूटजावेगा॥ ४३॥

इतिश्रीमद्भा०महा०दशम० उ० सरलाभाषाटीकायांषट्षष्टितमोऽध्यायः॥ ६६॥

राजानेकहाकि–हे ब्रह्मन्! अद्भुत कर्मा, अनत, अप्रमेय बलरामजी ने और भी जो २ कर्म कियेथे, मैं उन सब पराक्रमोंको सुनने की इच्छा करताहूं॥१॥ श्रीशुकदेवजी बोलेकि–हे राजन्! सुग्रीवका मन्त्री और मैंदका भाई पराक्रमी द्विविद नामक एक वानर भौमासुरका सखाथा॥२॥ वह वानर मित्रका बदला लेनेके निमित्त उत्पात करनेकी इच्छासे अग्नि लगाय २ गौशाला,नगर, गांव और घोषोंको जलाने लगा॥ ३॥ दशसहस्र हाथियों की सामन बलवाला वह वानर पहाडों के शिखरोंको उखाडकर प्रदेशोंको विशेषकर भगवान के निवास स्थानोंको चूर्ण करनेलगा॥४॥ कभी समुद्रमें बैठ दोनों हाथोंसे जलको उछाल २ किनारे के देशोंको डुबोता था। दुष्ट द्विविद श्रेष्ठ ऋषियों के आश्रमो के वृक्षोंको उखाड २ विष्ठा, और मूत्र कर २ के उनकी पूजाकी सामग्रीको दूषित करने लगा॥ ५—६॥ भौंरा जैसे दूसरे कीडोंको पकड अपने घरमें बंदकर रखता है वैसेही वह अभिमानी वानर भी स्त्री पुरुषोंको पर्वतकी गुफामें डाल पत्थर से उनको बंदकर देता था॥ ७॥ इसप्रकार से सब देशोंमें उत्पात करता, कुलस्त्रियोंको दूषित करता २ वह बंदर एक समय सुंदर गीतसुन रैवतक पर्वत पर जहां बलदेवजी थे वहां आया॥ ८॥ उसने वहां आकर

लिनम् । सुदर्शनीयसर्वांगं ललनायूथमध्यगम् ॥ ९ ॥ गायन्तंवारुणींपीत्वा मद-विह्वललोचनम् । विभ्राजमानंवपुषा प्रभिन्नमिववारणम् ॥१०॥ दुष्टः शाखामृगः शाखामारूढः कम्पयन्द्रुमान् । चक्रे किलकिलाशब्दमात्मानं संप्रदर्शयन् ॥ ११ ॥ तस्यधार्ष्ट्यंकपेर्वीक्ष्य तरुण्योजातिचापलाः। हास्यप्रियाविजहसुर्बलदेवपरिग्रहाः ॥ १२ ॥ ताहेलयामासकपिर्भ्रूक्षेपैः सम्मुखादिभिः । दर्शयन्स्वगुदंतासां रामस्य चनिरीक्षतः ॥ १३ ॥ तंग्राव्णाप्राहरत्क्रुद्धो बलःप्रहरतांवरः । सवंचयित्वाग्रावाणं मदिराकलशंकपिः ॥ १४ ॥ गृहीत्वाहेलयामास धूर्तस्तंकोपयन्हसन् । निर्भिद्यक लशंदुष्टो वासांस्यास्फालयद्बलम् ॥ १५ ॥ कदर्थीकृत्य बलवान्विप्रचक्रेमदोद्ध तः । तंतस्याविनयंदृष्ट्वा देशांश्चतदुपद्रुतान् । क्रुद्धोमुसलमादत्त हलंचारिजिघां सया ॥ १६ ॥ द्विविदोऽपि महावीर्यः शालमुद्यम्य पाणिना । अभ्येत्यतरसातेन बलं मूर्धन्यताडयत् ॥ १७ ॥ तंतुसंकर्षणोमूर्ध्नि पतन्तमचलोयथा । प्रतिजग्राह बलवा-न्सुनन्देनाहनच्चतम् ॥ १८ ॥ मुसलाहतमस्तिष्को विरेजेरक्तधारया ॥ गिरिर्यथा गैरिकया प्रहारं नानुचिन्तयन् ॥ १९ ॥ पुनरन्यंसमुत्क्षिप्य कृत्वा निष्पत्रमोजसा ॥ तेनाहनत्सुसंक्रुद्धस्तं बलःशतधाऽच्छिनत् ॥ २० ॥ ततोऽन्येनरुषाजघ्ने तंचापिशत धाऽच्छिनत् । एवंयुध्यन्भगवता भग्नेभग्नेपुनःपुनः ॥ २१ ॥ आकृष्यसर्वतो वृ-क्षान्निर्वृक्षमकरोद्वनम् । ततोऽमुंचच्छिलावर्षं बलस्योपर्यमर्षितः । तत्सर्वंचूर्णया-मास लीलयामुसलायुधः ॥ २२ ॥ सबाहूतालसंकाशौ मुष्टीकृत्यकपीश्वरः । आ-साद्यरोहिणीपुत्रं ताभ्यांवक्षस्यरूरुजत् ॥ २३ ॥ यादवेन्द्रोऽपितंदोर्भ्यां त्यक्त्वामु-

देखाकि बलदेवजी के गलेमें बनमाला पड़ीहुई है उनके सब अंग देखने में अति सुंदर हैं । वह स्त्रियों के बीचमें बैठ ॥ ९ ॥ वारुणी को पी मदसे विह्वल नेत्रहो गानकर रहे हैं । शरीर के देखने से जानपड़ता है कि यह एक मत्तहाथी हैं ॥ १० ॥ वह दुष्ट बन्दर डालियोंपर बैठ वृक्षोंको हिला२ कर किलकिला शब्द करने लगा ॥ ११ ॥ चंचल स्वभाव वाली, हास्यही जिनको प्रिय है ऐसी बलदेवजी की स्त्रियें उस कपिकी ढिठाईको देख हसने लगीं ॥ १२ ॥ वह कपि बलरामजी के समाने ही; अपनी गुदाको दिखाय, भौंहेचलाय, मुख टढाकर उन स्त्रियोंका बारबार अनादर करने लगा ॥ १३ ॥ वीरश्रेष्ठ रामने क्रोधित होकर उसपर पत्थरका टुकड़ाफेंका वह दुष्ट वानर पत्थर के टु-कड़ेको बचाय मदिरा का कलश ले दूरजाय हास्यादि से बलदेवजी को क्रोध उत्पन्न कराय हंसने लगा । उस दुष्टने इस परभी शांत न हो मदिराका कलस फोड़डाला वह स्त्रियों के वस्त्र खींचकर फाड़ने लगा तथा नाना कुकर्म कर २ के उसने बलदेवजी के साथ वैरबांधा ॥ १४-१५-१६ ॥ बलदेवजी उस वानर की दुष्टताको देखकर क्रोधित होगये और शत्रुके मारने के निमित्त उन्हों ने हल मूसलको उठाया ॥ १७ ॥ महा पराक्रमी द्विविदने हाथों से शाल वृक्षको उखाड़ निकट आय बलपूर्वक बलदेवजी के शिरपर उसका प्रहार किया ॥ १८ ॥ बलरामजी पहाड़ की समान अचल खड़ेरहे और मस्तक पर गिरते समय उस वृक्षको पकड़ मूसल से उस वानर पर प्रहार किया ॥ १९ ॥ वह वानर मूसल के प्रहारको कुछ न गिन, गेरूकी धारा से शोभायमान पहाड़ की समान रुधिरकी धारासे शोभापाने लगा ॥ २० ॥ उस वानरने फिर दूसरी बारभी अत्यत क्रोधितहो बलपूर्वक वृक्षको उखाड़ और उसके पत्तेनोच उसका बलदेवजीपर प्रहार किया । ब-लरामजी ने उस वृक्षके सौटूकड़े करडाले॥२१॥वानरने और भी एक वृक्षका प्रहारकिया, हलधर ने उसके भी सौटुकड़े करडाले । वानर ने इस प्रकार से युद्ध कर२ वृक्षों के टूटने से बनमें से वृक्ष लाय २ उस बनको निर्वृक्ष करादिया ॥ २२ ॥ अंतमें क्रोधितहो वह बलदेवजी के ऊपर पत्थर बर-साने लगा । रामने सहज सेही उन सबका चूर्णकरदिया ॥ २३ ॥ कपिराजने तालकी समान दोनों

सलऌांगले । जत्राधश्चर्दयरक्कुद्ध सोऽपतद्रुधिरं वमन् ॥ २४ ॥ चकम्पेतेन पतता सटंकःसवनस्पतिः । पर्वतःकुरुशार्दूलवायुना नौरिवाम्भसि ॥ २५ ॥ जयशब्दो नमःशब्दः साधुसाध्विति चाम्बरे । सुरसिद्धमुनीन्द्राणामासीत्कुसुमवर्षिणाम् ॥२६॥ एवंनिहत्यद्विविदं जगद्व्यतिकरावहम् । संस्तूयमानो भगवाञ्जनैःस्वपुरमाविशत्

इति श्रीमद्भा० महा० द० उ० सप्तषष्टितमोऽध्यायः ॥ ६७ ॥

श्रीशुक उवाच ॥ दुर्योधनसुतांराजँल्लक्ष्मणांसमितिञ्जयः । स्वयंवरस्थाम हरत्साम्बोजाम्बवतीसुतः ॥ १ ॥ कौरवाः कुपिताऊचुर्दुर्विनीतोऽयमर्भकः । कदर्थीकृत्यनः कन्यामकामामहरद्बलात् ॥ २ ॥ बध्नीतेमंदुर्विनीतंकिंकरिष्यन्तिवृष्णयः येऽस्मत्प्रसादोपचितांदत्तांनाभुञ्जतेमहीम् ॥ ३ ॥ निगृहीतंसुतंश्रुत्वायद्येष्यन्तीह वृष्णयः । भग्नदर्पाः शमंयान्तिप्राणाइवसुसंयताः ॥ ४ ॥ इतिकर्णः शलोभूरिर्यज्ञ केतुः सुयोधनः । साम्बमारेभिरेबद्धुंकुरुवृद्धानुमोदिताः ॥ ५ ॥ दृष्ट्वाऽनुधावतः साम्बोधार्तराष्ट्रान्महारथः । प्रगृह्यरुचिरंचापंतस्थौसिंहइवैकलः ॥ ६ ॥ तंतेजिघृक्षवः क्रुद्धास्तिष्ठतिष्ठेतिभाषिणः । आसाद्यधन्विनोबाणैः कर्णाग्रण्यःसमाकिरन् ॥ ७ ॥ सोऽपविद्धः कुरुश्रेष्ठकुरुभिर्यदुनन्दनः । नामृष्यत्तदचिन्त्यार्भःसिंहःक्षुद्र मृगैरिव ॥ ८ ॥ विस्फूर्ज्यरुचिरंचापंसर्वान्विव्याधसायकैः । कर्णादीन्षड्रथान्वीर स्तावद्भिर्युगपत्पृथक् ॥ ९ ॥ चतुर्भिश्चतुरोवाहानेकैकेनचसारथीन् । रथिनश्चमहे

भुजाओं की मुट्ठीबांध बलरामजी के निकट आय उनकी छातीपर प्रहार किया ॥ २४ ॥ भगवान बलरामजी ने क्रोधितहो हल मूसलका छोड उसकी दोनों हंसलियों पर दोनों मुठियोंका प्रहारकिया वहरक्त उगलता हुआ पृथ्वीपर गिरगया ॥ २५ ॥ हे राजन् ! उसके गिरने से समुद्र मे वायुसे कांपते हुए जहाज की समान उस पर्वतके वृक्ष और वनस्पतियें कांपउठीं ॥ २६ ॥ आकाश से देवतागण फूल बरसानेलगे तथा सिद्ध और मुनि "जय जय" कर "साधु साधु" कहनेलगे ॥२७॥ हे राजन् ! भगवान बलभद्रजी संसार में उत्पात करने वाले द्विविदको इस प्रकार से मार अपने नगर में आये, देवता उनकी स्तुति करनेलगे ॥ २८ ॥

इतिश्री मद्भागवतेमहापुराणेदशमस्कंधेसरलाभाषाटीकायांसप्तषष्टितमोऽध्यायः ॥ ६७ ॥

श्रीशुकदेवजी बोले कि—हेराजन् ! इन सब घटनाओंके उपरांत दुर्योधन की पुत्री लक्ष्मणाका स्वयम्बर हुआ जाम्बवती के पुत्र युद्ध विजयी साम्बने स्वयम्बरमेंसे उसका हरण किया, ॥ १ ॥ तब कौरवों ने कुपित होकर कहा, कि—इस दुष्ट बालकने हमारी कन्या की इच्छा न रहतेहुए भी उसका बलपूर्वक हरण कियाहै ॥ इस दुष्टको मारडालो यदुवंशी क्या करेंगे वे हमारे दियेहुए राज्य का भोग करतेहैं वे स्वयं राजा नहीं हैं हमारीही कृपा से उस राज्यका एश्वर्य बढ़गयाहै ॥ ३ ॥ पुत्रको मराहुआ सुनकर यदि वृष्णिगण आवेंगे तो प्राणायामादिसे दमन की हुई इन्द्रियों की समान वह भी अहंकार रहित होकर बालककीसी दशाको प्राप्तहोंगे ॥ ४ ॥ कुरु वृद्ध भीष्मने भी इसको स्वीकार किया । अनन्तर कर्ण, शल्य, भूरि यज्ञकेतु और दुर्योधन भीष्म के संगहो साम्बको बांधने के निमित्त उसके पीछे २ दौड़े ॥५॥ धृतराष्ट्र के पुत्रोंको दौड़ताहुआ आता देख महाबली सांब सुन्दर धनुषको ग्रहणकर सिंहकी समान अकेलाही खड़ा होगया ॥६॥ कुरुनन्दन उसके पकडनेकी इच्छाकर सावधानहो खड़ारह २ कह उसके निकट आए और धनुष के बाणोंसे उसपर प्रहार किया । कर्ण उनका सेनापति हुआ, ॥ ७ ॥ हेकुरुश्रेष्ठ ! उन अचिन्त्य पुरुष भगवान.का बालक साम्ब अत्यन्त क्रोधितहो उनका सहन ऐसे न करसका कि—जैसे सिंह तुच्छ मृगोंके प्रहार का सहन न करसके ॥ ८ ॥ उस वीरने सुन्दर धनुष चढ़ाय कर्णादि छै रथियों को पृथक् २ छै २ बाणोंसे बेधा ॥ ९ ॥ महा धनुषधारी सब रथियोंका भी उसने इसप्र-

श्वासांस्तस्यततेऽभ्यपूजयन् ॥ १० ॥ तंतुतेविरथंचक्रुश्चत्वारश्चतुरोहयान्। एक स्तुसारथिंजघ्नेचिच्छेदान्यःशरासनम् ॥ ११ ॥ तंबद्ध्वाविरथीकृत्यकृच्छ्रेणकुरवो युधि। कुमारस्वस्यकन्यांचस्वपुरंजयिनोऽविशन् ॥ १२ ॥ तच्छ्रुत्वानारदोक्तंमरा जन्संजातमन्यवः। कुरून्प्रत्युद्यमंचक्रुरुग्रसेनप्रचोदिताः॥१३॥सान्त्वयित्वातुतान्रा मः संरब्धान्वृष्णिपुङ्गवान्। नैच्छत्कुरूणांवृष्णीनांकलिंकलिमलापहः ॥ १४ ॥ जगामहास्तिनपुरंरथेनादित्यवर्चसा। ब्राह्मणैः कुलवृद्धैश्चवृतश्चन्द्रइवग्रहैः ॥१५॥ गत्वागजाह्वयंरामोबाह्योपवनमास्थितः। उद्धवंप्रेषयामासधृतराष्ट्रंबुभुत्सया ॥१६॥ सोऽभिवन्द्याम्बिकापुत्रंभीष्मंद्रोणंचबाह्लिकम्। दुर्योधनंचविधिवद्राममागतम ब्रवीत् ॥ १७ ॥ तेऽतिप्रीतास्तमाकर्ण्यप्राप्तरामसुहृत्तमम्। तमर्चयित्वाभिययुः स र्वेमङ्गलपाणयः ॥ १८ ॥ तंसंगम्ययथान्यायंगामर्घ्यंचन्यवेदयन्। तेषांयेतत्प्रभाव ज्ञाः प्रणेमुः शिरसाबलम् ॥ १९ ॥ बन्धून्कुशलिनः श्रुत्वापृष्ट्वाशिवमनामयम्। प रस्परमथोरामोबभाषेऽविक्लवंवचः ॥ २० ॥ उग्रसेनः क्षितीशेशोयद्वआज्ञापयत्प्रभुः। तदव्यग्रधियः श्रुत्वाकुरुध्वंमाविलम्बितम् ॥ २१ ॥ यद्यूयंबहवस्त्वेकंजित्वाऽधर्मे णधार्मिकम्। अबध्नीताथतन्मृष्येबन्धूनामैक्यकाम्यया ॥ २२ ॥ वीर्यशौर्यबलोन्नद्ध मात्मशक्तिसमंवचः। कुरवोबलदेवस्यनिशम्योचुः प्रकोपिताः ॥ २३ ॥ अहोमह च्चित्रमिदंकालगत्यादुरत्यया। आरुरुक्षत्युपानद्वैशिरोमुकुटसेवितम् ॥ २४ ॥ ए तेयौनेनसंबद्धाः सहशय्यासनाशनाः। वृष्णयस्तुल्यतांनीताअस्मद्दत्तनृपासनाः॥

कार से सन्मान किया ॥ १० ॥ हेमहाराज ! कौरवों नें भी साम्बको विरथ करदिया चार जनों ने चारों घोड़ों और एक जनने सारथीको मारा और एक जनने धनुषको काटदिया ॥ ११ ॥ कौ-रवोंने युद्ध भूमिमें अति कष्टसे साम्बको विरथ करके बांधा वह सब उस कुमार और अपनी क-न्याको ले विजयी हो अपने नगरको लौटआये ॥ १२ ॥ हेराजन् ! नारदजी से इससब समाचार को सुन वृष्णि वीरगण क्रोधित होउठे और उग्रसेनकी आज्ञा पाय कौरवोंसे युद्ध करनेपर उद्यत हुए ॥ १३ ॥ राम की यह इच्छा नहीं थी कि कौरवों और यदुवंशियों से विवाद होवे । अतएव उन्होंने युद्धकी इच्छावाले उन यदुवंशियों को शांतकिया और स्वयं ताराओंसे घिरेहुए चन्द्रमाकी समान कुलवृद्ध ब्राह्मणोंसे घिर सूर्यकी समान प्रकाशित रथपर बैठ हस्तिनापुरमें आए १४—१५। रामने हस्तिनापुरमें पहुंच नगर के बाहर उपवन में ठहर धृतराष्ट्र का अभिप्राय जानने के निमित्त उद्धव को भेजा ॥१६॥ उद्धवने भी यथायोग्य धृतराष्ट्र, भीष्म, द्रोण, बाह्लीक और दुर्यो-धन को वन्दना करके कहा कि—राम आयेहैं ॥ १७ ॥ उन्होंने भी श्रेष्ठ बन्धु रामका आना सुनकर उद्धवकी पूजाकी अनन्तर वह मांगलिक द्रव्यले बलदेवजी के निकट आए, ॥१८॥ और उनसे यथायोग्य मिल गौ अर्पणकर अर्घदे उनके प्रभावको जाननेवालों ने उनका शिरसे प्रणाम किया ॥ १९ ॥ अनन्तर परस्पर कुशल पूँछी बंधुओं की कुशलता पूँछकर अंतमें रामने धीरभाव से कहा॥२०॥हेराजाधिराजमहाराज उग्रसेनने जो तुमको आज्ञाकीहै उसको सावधान चित्तहो सुनो और वैसाही करो ॥२१॥ उन्होंनें कहाहै कि—तुम सबने जो अधर्मसे जीतकर एक धार्मिक जनको बांधाहै बंधुता की रक्षाके कारण हमने उसका सहन करलिया अतएव तत्कालही उस पुत्रको लाकर हमकोदो ॥ २२ ॥ प्रभाव, उत्साह और धैर्ययुक्त तथा अपनी शक्तिके अनुसार बलरामजी का वचन सुनकर गर्वित कौरव क्रोधित होकर बोले कि —२३ ॥ अहो ! बड़ा आश्चर्य है काल की गति बड़ीही टेढ़ीहै कि जूता मुकुटसे सेवित शिरपर चढ़नेकी इच्छा करताहै ॥ २४ ॥ केवल कुंती के संग ब्याह का सम्बंध होनेसे इनको हमनेराज्यासन इनके संग सोना बैठना और भोजन

॥ २५ ॥ चामरव्यजनेशंखमातपत्रंचपाण्डुरम्। किरीटमासनंशय्यांभुञ्जन्त्यस्म
दुपेक्षया ॥ २६ ॥ अलंयदूनांनरदेवलाञ्छनैर्दातुः प्रतीपैः फणिनामिवामृतम्। ये
ऽस्मत्प्रसादोपचिताहियादवाआज्ञापयन्त्यद्यगतत्रपाबत ॥ २७ ॥ कथमिन्द्रोऽपिकु
रुभिर्भीष्मद्रोणार्जुनादिभिः। अदत्तमवरुन्धीतसिंहग्रस्तमिवोरणः ॥ २८ ॥ श्रीशु
क उवाच ॥ जन्मबन्धुश्रियोन्नद्धमदास्तेभरतर्षभ। आश्राव्यरामंदुर्वाच्यमसभ्याः
पुरमाविशन् ॥ २९ ॥ दृष्ट्वाकुरूणांदौःशील्यंश्रुत्वाऽवाच्यानिचाच्युतः। अवोच
त्कोपसंरब्धोदुष्प्रेक्ष्यः प्रहसन्मुहुः ॥ ३० ॥ नूनंनानामदोन्नद्धाः शान्तिंनेच्छन्त्य
साधवः। तेषांहिप्रशमोदण्डः पशूनांलगुडोयथा ॥ ३१ ॥ अहोयदून्सुसंरब्धान्कृ
ष्णंचकुपितंशनैः। सान्त्वयित्वाऽहमेतेषांशममिच्छन्निहागतः ॥ ३२ ॥ तइमेमन्द
मतयः कलहाभिरताः खलाः। तंमामवज्ञायमुहुर्दुर्भाषान्मानिनोऽब्रुवन् ॥३३॥ नो
ग्रसेनः किलविभुर्भोजवृष्ण्यन्धकेश्वरः। शक्रादयोलोकपालायस्यादेशानुवर्तिनः
॥ ३४ ॥ सुधर्माऽऽक्रम्यतेयेनपारिजातोऽमराङ्घ्रिपः। आनीयभुज्यतेसोऽसौनकिला
ध्यासनार्हणः ॥ ३५ ॥ यस्यपादयुगसाक्षाच्छ्रीरुपास्तेऽखिलेश्वरी। सनार्हतिकि
लश्रीशोनरदेवपरिच्छदान् ॥३६॥ यस्याङ्घ्रिपङ्कजरजोऽखिललोकपालैर्मौल्युत्तमै
र्धृतमुपासिततीर्थतीर्थम्। ब्रह्माभवोऽहमपियस्यकलाः कलायाःश्रीश्चोद्वहेमचिर
मस्यनृपासनंक्व ॥३७॥ भुञ्जतेकुरुभिर्दत्तंभूखण्डंवृष्णयः किल। उपानहःकिल
वयंस्वयंतुकुरवःशिरः ॥३८॥ अहोऐश्वर्यमत्तानांमत्तानामिवमानिनाम्। असंबद्धा

करके इनको अपनं समान बनाया ॥ २५ ॥ किंतु बड़ाही आश्चर्य है कि यह मूढ हमारेही
दिये हुए राज्या सनको पाय हमारीही समानता करते हैं इस समय यह हमारीही उपेक्षाकर
चामर, व्यंजन, शंख, श्वेत,छत्र,आसन और शय्याको भोग करतेहैं,॥ २६ ॥ अहो! यदुवंशी ह-
मारीही अनुग्रहसे बढकर अब हमींपर आज्ञा करतेहैं सांपको दूध पिलाने की समान इन यादवों
को राजचिह्न देनेसे अपनाही अनभल होताहै अतएव इन राजचिह्नों को छीन लेना चाहिये २७॥
भीष्म द्रोणादि कौरवोंके दान न करनेपर इंद्रभी क्या किसीवस्तु को ग्रहण करसकतेहैं भेड़ क्या
सिंहके द्रव्य को ग्रहण करसकताहै ॥२८॥ श्रीशुकदेवजी बोले कि–हेराजन्! जन्म बंधु और ल-
क्ष्मीसे जिनका गर्व बढगयाहै वे सब असभ्य कौरव बलराम जीको ऐसे कुवाक्य सुनातेहुए फिर
नगरमें आए॥ २९ ॥ भगवान कौरवोंके दुष्टाचार को देख और उनकी बातोंको सुन कुपितहुए
वह क्रोधसे वारम्वार हंसकर कहने लगे कि—३० ॥ यह सत्यहै कि नानागर्वोंसे गर्वित असाधु
मनुष्य शांतिकी इच्छा नहीं रखते पशुओंपर डण्डा मारने की समान वह भी डण्डेहि से शांत
होते हैं ॥ ३१ ॥ अहो! क्रोधित यदुवंशियों और श्रीकृष्णको मैं धीरे२ शांतकर शांतिकी इच्छा
से इस स्थान में आयाथा ॥ ३२ ॥ परंतु इन दुष्ट मदबुद्धि योंको युद्धही प्याराहै क्योंकि यह ब-
हुतगर्वित होरहे हैं, इन्हों ने मेरा तिरस्कार कर मुझेही बहुतसे कुवाक्य कहे ॥३३॥ इन्द्रादि लो-
कपालगण जिसकी आज्ञाका पालन करते हैं वृष्णि और अंधकगणों के स्वामी वह उग्रसेन राजा
नहीं हैं ॥ ३४ ॥ जिन्हों ने सुधर्माको छीन, पारिजातको लाय अपने उपवनमें स्थापित किया वह
श्रीकृष्णजी आसनके योग्य नहीं हैं॥ ३५ ॥ सबकी स्वामिनी साक्षात् लक्ष्मी जिनके दोनों चरणों
की सेवा करती हैं वह लक्ष्मी पति राजचिह्नों के योग्य नहीं हैं ॥ ३६ ॥ लोकपालगण, योगीजन
जिनके चरण रजको शिरमें धारण करते हैं और जिनके अंशोंके अंश ब्रह्मा,महादेव, लक्ष्मी, और
मैभी जिनके चरणों की उपासना करता हू उनको राज्यासन कहां ॥ ३७ ॥ निश्चयही यदुवंशी
कौरवों के दियेहुए राज्यका भोगकरते हैं हमतो जूताहैं, कौरवतो अपने शिर हैं ॥ ३८ ॥ अहो!

गिरो रूक्षाः कः सहेतानुशासिता ॥ ३९ ॥ अद्य निष्कौरवीं पृथ्वीं करिष्यामीत्यमर्षितः । गृहीत्वा हलमुत्तस्थौ दहन्निव जगत्त्रयम् ॥ ४० ॥ लाङ्गलाग्रेण नगरमुद्विदार्य गजाह्वयम् । विचकर्ष स गङ्गायां प्रहरिष्यन्नमर्षितः ॥ ४१ ॥ जलयानमिवाघूर्णं गङ्गायां नगरं पतत् । आकृष्यमाणमालोक्य कौरवा जातसंभ्रमाः ॥४२॥ तमेव शरणं जग्मुः सकुटुम्बा जिजीविषवः । सलक्ष्मणं पुरस्कृत्य साम्बं प्राञ्जलयः प्रभुम् ॥४३॥ राम रामाखिलाधार प्रभावं न विदाम ते । मूढानां नः कुबुद्धीनां क्षन्तुमर्हस्यतिक्रमम् ॥४४॥ स्थित्युत्पत्त्यप्ययानां त्वमेको हेतुर्निराश्रयः । लोकान्क्रीडनकानीश क्रीडतस्ते वदन्ति हि ॥ ४५ ॥ त्वमेव मूर्ध्नीदमनन्त लीलया भूमण्डलं बिभर्षि सहस्रमूर्धन् । अन्ते च यः स्वात्मनिरुद्धविश्वः शेषेऽद्वितीयः परिशिष्यमाणः ॥४६॥ कोपस्तेऽखिलशिक्षार्थं न द्वेषान्न च मत्सरात् । बिभ्रतो भगवन्सत्त्वं स्थितिपालनतत्परः ॥ ४७ ॥ नमस्ते सर्वभूतात्मन्सर्वशक्तिधराव्यय । विश्वकर्मन्नमस्तेऽस्तु त्वां वयं शरणं गताः ॥४८॥ श्रीशुक उवाच । एवं प्रपन्नैः संविग्नैर्वेपमानायनैर्बलः । प्रसादितः सुप्रसन्नो मा भैष्टेत्यभयं ददौ ॥ ४९ ॥ दुर्योधनः पारिबर्हं कुञ्जरान्षष्टिहायनान् । ददौ च द्वादश शतान्ययुतानि तुरंगमान् ॥ ५० ॥ रथानां षट्सहस्राणि रौक्माणां सूर्यवर्चसाम् । दासीनां निष्ककण्ठीनां सहस्रं दुहितृवत्सलः ॥ ५१ ॥ प्रतिगृह्य तु तत्सर्वं भगवान्सात्वतर्षभः । ससुतः सस्नुषः प्रायात्सुहृद्भिरभिनन्दितः ॥ ५२ ॥ ततः प्रविष्टः स्वपुरं हला

मत्त मनुष्यों की समान ऐश्वर्य से मतवाले हुए अभिमानियों के वाक्य असंभ्य और रूखे होते हैं, स्वयं दंड देनेवाला होकर कौन मनुष्य उसका सहन करसकता है ॥ ३९ ॥ आजमैं पृथिवी को कौरव रहित करदूंगा यह विचारकर बलदेवजी ने दारुण क्रोधसे मानो जगतका नाश करदेंगे ऐसे हलको ग्रहण किया ॥ ४० ॥ और हलके अग्रभाग से हस्तिना पुरको उखाडकर गंगामें फेंकदेने के निमित्त खींचने लगे ॥ ४१ ॥ खिंचते हुए नगरको गंगामें गिरता और नावकी समान घूमता हुआ देख कौरव भयसे व्याकुल होगये ॥ ४२ ॥ और प्राण बचानेकी इच्छासे कुटुंबियों के साथ लक्ष्मण समेत साम्बको ले बलरामजी की शरण में आय हाथ जोडकर कहने लगे ॥ ४३ ॥ हे राम ! हे अखिलाधार ! हम तुम्हारे प्रभावको नहीं जानते थे हम मूर्ख और कुबुद्धि हैं; हे अधीश्वर ! हमारे ऊपर आपको क्षमा करनी उचित है ॥ ४४ ॥ आप सृष्टि, स्थिति और संहार के कारण हैं, आप आश्रय रहित हैं। तुम्हारे क्रीडा करने में प्रवृत्त होनेपर यह लोक तुम्हारी क्रीडाकी सामग्री रूपसे उत्पन्न होता है ॥ ४५ ॥ हे सहस्र शिरवाले ! आप अनंतहो, लीला सेही अपने मस्तकपर भूमंडलको धारण करतेहो । प्रलय कालमें अपने स्वरूप में जगतका लय करके, अद्वितीय और शेषरहने वाले आपही शेषनाग पर शयन करतेहो ॥ ४६ ॥ आपही स्थिति और पालन में तत्पर हो आपही सत्वगुणका अवलंबन करतेहो । आपका यह कोप शिक्षादेने के निमित्तही हुआ है कुछ द्वेषवा मत्सरता से नहीं ॥४७॥ हे सर्व भूतात्मन् ! हे सर्वशक्तिधर ! हे अव्यय ! हे विश्वकर्मन् ! आपको नमस्कार है। हमने आपके चरणों की शरणली है ॥ ४८ ॥ श्रीशुकदेवजी बोलेकि राजन् ! फिर जिनका नगर कम्पित हुआ था उन दुःखित और भयभीत कौरवों से बलदेवजी ने पूजितहो उनको अभयदान दिया ॥ ४९ ॥ अनंतर पुत्रीपर प्रेमरखने वाले दुर्योधन ने साठ २ वर्षके बारह सौ हाथी, दश सहस्र घोडे, सुवर्ण के बनेहुए सूर्यकी किरण के समान प्रकाशित छः सहस्र रथ, और अलंकार युक्त सहस्र दासियें दहेज में दीं ॥ ५०-५१ ॥ भगवान बलदेवजी उन सबको ले पुत्रवधू के साथ बंधुओं से सन्मानितहो वहांसे चले ॥ ५२ ॥ तदनंतर अपनी पुरीमें आय बल-

युधः समेत्यबन्धूननुरक्तचेतसः। शशंससर्वंयदुपुंगवानां मध्येसभायांकुरुषुस्वचे ष्टितम्॥ ५३॥ अद्यापिचपुरं ह्येतत्सूचयद्रामविक्रमम्। समुन्नतंदक्षिणतो गंगाया मनुदृश्यते॥ ५४॥

इति श्रीमद्भा० महा० द० उ० नामाष्टषष्टितमोऽध्यायः॥ ६८॥

श्रीशुक उवाच॥ नरकंनिहतंश्रुत्वातथोद्वाहंचयोषिताम्। कृष्णेनैकेनबह्वीनांत द्दिदृक्षुः स्मनारदः॥ १॥ चित्रंबतैतदेकेनवपुषायुगपत्पृथक्। गृहेषुद्व्यष्टसाहस्रं स्त्रियएकउदावहत्॥२॥ इत्युत्सुकोद्वारवतींदेवर्षिर्द्रष्टुमागमत्। पुष्पितोपवनाराम द्विजालिकुलनादिताम्॥ ३॥ उत्फुल्लेन्दीवराम्भोजकह्लारकुमुदोत्पलैः। छुरिते षुसरस्सूच्चैः कूजितांहंससारसैः॥ ४॥ प्रासादलक्षैर्नवभिर्जुष्टांस्फाटिकराजतैः। महामरकतप्रख्यैः स्वर्णरत्नपरिच्छदैः॥ ५॥ विभक्तरथ्यापथचत्वरापणैः शालास भाभीरुचिरांसुरालयैः। संसिक्तमार्गाङ्गणवीथिदेहलींपतत्पताकाध्वजवारितातपाम्॥६॥ तस्यामन्तः पुरंश्रीमदर्चितंसर्वधिष्ण्यपैः। हरेः स्वकौशलयत्रत्वष्ट्राकात्स्न्र्ये नदर्शितम्॥ ७॥ तत्रषोडशभिः सद्मसहस्रैः समलंकृतम्। विवेशैकतमंशौरेः प त्नीनांभवनंमहत्॥ ८॥ विष्टब्धंविद्रुमस्तम्भैर्वैदूर्यफलकोत्तमैः। इन्द्रनीलमयैः कु ड्यैर्जगत्याचाऽहतत्विषा॥ ९॥ वितानैर्निर्मितैस्त्वष्ट्रामुक्तादामविलम्बिभिः। दा न्तैरासनपर्यङ्कैर्मण्युत्तमपरिष्कृतैः॥ १०॥ दासीभिर्निष्ककण्ठीभिःसुवासोभिरलं कृतम्। पुम्भिः सकञ्चुकोष्णीषसुवस्त्रमणिकुण्डलैः॥ ११॥ रत्नप्रदीपनिकरद्युति

देवर्जान अपने अनुरक्त चित्त बंधुओंसे मिल कौरवोंकी समस्त बातोंको यदुवंशियोंकी सभामें कहा ॥ ५३॥ हे राजन्! वह नगर दक्षिण भागमें गंगाकी ओर ऊंचाहो अबतक बलरामजी के परा-क्रमको प्रकाश करता है॥ ५४॥

इतिश्री मद्भागवतमहापुराणेदशमस्कंधेसरलाभाषाटीकायांअष्टषष्टितमोऽध्यायः॥ ६८॥

श्रीशुकदेवजी बोले कि हे राजन्! नरकासुरको मारकर श्रीकृष्णजीने बहुतसी स्त्रियोंसे बिवाह कियाहै, यह सुनकर उनके देखने के निमित्त नारदजीकी इच्छाहुई॥ १॥ अहो! यह अत्यन्त-ही आश्चर्यका विषयहै कि अकेले श्रीकृष्णजीने एक शरीरसे पृथक् २ घरम एकही समयमें सो-लहसहस्र स्त्रियोंसे बिवाह कियाहै॥ २॥ यह बिचारकर नारदजी देखने के निमित्त उत्सुक चित्त से द्वारकामें आये। द्वारकाके फूलेहुए उपवन और बागोंमें भौंर और पक्षी शब्द कररहे थे॥३॥ और समस्त तालाब फूलेहुए इंदीवर, कमल, कल्हार, बघौले और उत्पल से व्याप्त होरहेथे। हंस और सारस उन सबसरोवरोंमें ऊंचे शब्दसे बोलरहे थे॥ ४॥ वह पुरी स्फटिक और चांदीके बनेहुए लाखों महलोंकी मरकतमणिसे प्रकाश पारही थी और रत्नोंकी सामग्रियोंसे अपूर्व शोभा को बढ़ारही थी॥ ५॥ परस्पर बँटेहुए राजमार्ग, गलियें, चौराहे, दुकानें, शाला और देवमंदिरों की उस नगरीमें शोभा होरहीथी। उसके मार्ग, गलियें और देहली सब छिड़के हुएथे; और फ-हरातेहुए ध्वजा पताका वहांकी धूपको निवारण करतेथे॥ ६॥ उस नगरीमें जो भगवानकेमहल थे वह सब लक्ष्मीयुक्त और लोकपालोंसे पूजितथे। विश्वकर्माकी उसमें भलीप्रकारसे कारीगरी दीखतीथी॥ ७॥ श्रीकृष्णजीके वहां सोलहसहस्र महलबनेहुए थे। नारदजीने उन महलोंमेंसे एक प्रधान महलमें प्रवेश किया॥८॥ वह घर विद्रुममणिके खम्भोंसे व्याप्त, वैदूर्यमणिके उत्तम पटे, इन्द्र नीलमणिकी दीवारें व इन्द्र नीलमयी पृथ्वीसे शोभायमानथा॥ ९॥ वह मोतियोंकी झा लरेयुक्त विश्वकर्मा के बनाये चँदोवे, उत्तम मणियोंसे खचित आसन व पलंग॥ १०॥ गले में चन्द्रहार पहिरे सुन्दर वस्त्र धारण किये दासियें, और जामा, पगडी, सुन्दर वस्त्र व मणियों के

भिर्निरस्तध्वान्तंविविधमणिप्रदीपैः भिर्गविदुमविघाचमणिमोऽङ्ग । नृत्यन्ति यत्रविहितागुरुधूपमक्षै र्निर्यान्तमीक्ष्यघनबुद्धयउन्नदन्तः ॥ १२ ॥ तस्मिन्समानगुणरूपवयः सुवेषदासी सहस्रयुतयाऽनुसवंगृहिण्या । विप्रोददर्शचमरव्यजनेनरुक्मदण्डेनसात्वतपतिंप रिवीजयन्त्या ॥ १३ ॥ तंसंनिरीक्ष्यभगवान्सहसोत्थितः श्रीपर्यङ्कतः सकलधर्म भृतांवरिष्ठः । आनम्यपादयुगलं शिरसा किरीटजुष्टेनसांजलिरवीविशदासने स्वे ॥ १४ ॥ तस्यावनिज्यचरणौ तदपःस्वमूर्ध्ना बिभ्रञ्जगद्गुरुतरोपि सतांपतिर्हि । ब्र- ह्मण्यदेवइतियद्गुणनामयुक्तं तस्यैव यच्चरणशौचमशेषतीर्थम् ॥ १५ ॥ संपूज्यदे- वऋषिवर्यमृषिः पुराणो नारायणोनरसखो विधिनोदितेन । वाण्याभिभाष्य मितया ऽमृतमिष्टयातंप्राह प्रभोभगवतेकरवामहे किम् ॥ १६ ॥ नारद उवाच । नैवाद्भुतंत्व यि विभोऽखिललोकनाथे मैत्री जनेषुसकलेषुदमः खलानाम् ॥ निःश्रेयसायहिजग- त्स्थितिरक्षणाभ्यां स्वैरावतार उरुगाय विदामसुष्ठु ॥ १७ ॥ दृष्टंतवांघ्रियुगलं जन ताऽपवर्गंब्रह्मादिभिर्हृदि विचिन्त्यमगाधबोधैः ॥ संसारकूपपतितोत्तरणावलम्बं ध्यायंश्चराम्यनुगृहाण यथास्मृतिःस्यात् ॥ १८ ॥ ततोऽन्यदाविशद्गेहं कृष्णपत्न्याः सनारदः । योगेश्वरेश्वरस्यांग योगमायाविवित्सया ॥ १९ ॥ दीव्यन्तमक्षैस्तत्रापि प्रियया चोद्धवेनच । पूजितः परयाभक्त्या प्रत्युत्थानासनादिभिः ॥ २० ॥ पृष्टश्चा-

कुण्डल धारण किये पुरुषों से शोभायमानथा ॥ ११ ॥ हे राजन् ! वहांका अंधकार रत्नों के दीप- कोंसे दूर होताथा, जालियोंमेंसे निकलतेहुए अगरके धुँएको देख उसे मेघजान ऊंचे स्वरसे शब्द कर करके मोर छज्जोंपर नाचकर रहेथे ॥ १२ ॥ वहां प्रत्येक समयमें अपनी समान गुण, रूप, वय तथा सुंदर वेषवाली सहस्रों दासियों के संग रुक्मिणी सुवर्णकी डंडीवाला पंखा हाथ मे लिये श्रीकृष्णजीपर पवन करती थीं । नारदजीने वहां जाकर इसप्रकारसे श्रीकृष्णजीको देखा ॥ १३ ॥ सबधर्मियोंमें श्रेष्ठ भगवान श्रीकृष्णजी नारदजीको आतादेख रुक्मिणीकी सेजसे सहसा उठ खडे हुए और हाथजोड़ किरीट धरेहुए मस्तक से उनके दोनों चरणों को प्रणामकिया, और अपने आसनपर बिठाया ॥ १४ ॥ जिनके चरणों का धोयाहुआ जल (गंगा) सबकातीर्थ है अतएव वह जगतके सर्वश्रेष्ठगुरु हैं तौभी उन्होंने नारदजी के चरणों को धुलाय उस जलको अपनेमस्तक पर चढाया । वह यथार्थहीमें साधुओं के स्वामी हैं गुणों के कारण जो उनका नाम 'ब्रह्मण्यदेव' है उसके योग्यही उन्होंने यहकाम किया ॥ १५ ॥ परमपुरुष, नरके सखा नारायण ने शास्त्रयुक्त विधिवत् नारदजीका पूजनकर अमृतकी समान मीठे वचनों से उनसे बातें करके कहा कि हेप्रभो ! आप का क्या कार्य करनाहोगा, आज्ञा करिये ॥ १६ ॥ नारदजी ने कहा कि-हेविभो ! हेअखिल लोकेश्वर ! आप सबसज्जनोंपर स्नेह रखतेहो और दुष्टोंको दण्ड देतेहो यह कोई आश्चर्य की बात नहीं है । हे विशालकीर्ते ! मैं भलीप्रकार से जानताहूं कि जगत के धारण, पालन और कल्याण के निमित्तही यह आपका इच्छानुसार अवतार हुआ है ॥ १७ ॥ आप के चरणभक्तों के मोक्षदेने वाले हैं; अगाधज्ञानवाले केवल ब्रह्मादि देवतागणही उनका हृदयमें ध्यानकरसकते हैं । वह संसार कूपमें गिरेहुए मनुष्यों के उठने के निमित्त प्रधानअवलम्बनस्वरूप हैं । आज मैंने उन्हीं चरणों का दर्शन किया । तौभी जिससे उनकास्मरणरहे, आप कृपाकरके वही करो । इसहीकारणउनका ध्यान करताहुआ भ्रमणकररहाहूं ॥ १८ ॥ हेराजन् ! तदुपरांत उन नारदजी ने भगवानश्रीकृष्ण जी की योगमाया जानने के निमित्त उनकी एक स्त्रीके घरमें फिर प्रवेश करके देखा ॥ १९ ॥ कि उसस्थानमेंभी श्रीकृष्णजी प्रिया और उद्धव के संग चौसर खेलरहे हैं । भगवान लक्ष्मीपति ने मानों नहींजानते इसप्रकार से उठ आसनआदि दे विधिवत् परम भक्तिसे नारदजी की पूजाकी

विदुषेवासौ कदाऽऽयातोभवानिति। क्रियते किंनु पूर्णानामपूर्णैरस्मदादिभिः ॥२१ अथापिब्रूहिनो ब्रह्मञ्जन्मैतच्छोभनंकुरु। सतुविस्मितउत्थाय तूष्णीमन्यदगाद्गृहम् ॥२२॥ तत्राप्याचष्टगोविन्दं लालयन्तंसुताञ्छिशून्। ततोऽन्यस्मिन्गृहेऽपश्यन्मज्जनाय कृतोद्यमम् ॥ २३ ॥ जुह्वंतंच वितानाग्नीन्यजन्तं पंचभिर्मखैः। भोजयन्तं द्विजान्क्वापि भुंजानमवशेषितम् ॥ २४ ॥ क्वापिसन्ध्यामुपासीनं जपन्तंब्रह्मवाग्यतम्। एकत्रचासिचर्मभ्यां चरन्तमसिवर्त्मसु ॥ २५ ॥ अश्वैर्गजैरथैःक्वापि विचरन्तंगदाग्रजम्। क्वचिच्छयानं पर्यंके स्तूयमानंच वन्दिभिः। मन्त्रयन्तंच कपर्यंके स्तूयमानंच वन्दिभिः ॥ २६ ॥ मन्त्रयन्तंच कस्मिंश्चिन्मन्त्रिभिश्चोद्धवादिभिः। जलक्रीडारतंक्वापि वारमुख्याऽबलावृतम् ॥२७॥ कुत्रचिद्द्विजमुख्येभ्यो ददतंगाःस्वलंकृताः। इतिहासपुराणानि शृण्वन्तंमंगलानिच ॥ २८ ॥ हसन्तंहास्यकथया कदाचित्प्रियया गृहे। क्वापिधर्मं सेवमानमर्थकामौच कुत्रचित् ॥२९॥ ध्यायन्तमेकमासीनं पुरुषंप्रकृतेःपरम्। शुश्रूषन्तंगुरून्क्वापि कामैर्भोगैःसपर्यया। ॥ ३० ॥ कुर्वन्तंविग्रहंकैश्चित्सन्धिं चान्यत्रकेशवम्। कुत्रापिसहरामेण चिन्तयतं सतां शिवम् ॥ ३१ ॥ पुत्राणांदुहितॄणांच काले विध्युपयापनम्। दारैर्वरैस्तत्सदृशैः कल्पयन्तंविभूतिभिः ॥ ३२ ॥ प्रस्थापनोपानयनैरपत्यानांमहोत्सवान्। वीक्ष्य योगेश्वरेशस्ययेषांलोका विसिस्मिरे ॥ ३३ ॥ यजन्तंसकलान्देवान्क्वापिक्रतुभिरूर्जितैः। पूर्तयन्तंक्वचिद्धर्मंकूपाराममठादिभिः ॥ ३४ ॥ चरन्तंमृगयांक्वापिहयमारुह्यसैन्धवम्। घ्नन्तंततःपशून्मेध्यान्परीतंयदुपुङ्गवैः ॥ ३५ ॥ अव्यक्तलिंगंप्रकृ-

॥ २० ॥ और उनसे पूछा कि-आप कबआये ? आप पूर्णहो; मेरी समान अपूर्ण मनुष्यआपका क्याकार्य पूराकरसकते हैं ॥ २१ ॥ हे ब्रह्मन् ! तोभी आप मुझे आज्ञाकरो; मेरा जन्म सार्थक होवे। नारदजी विस्मितहो कुछनकह उठकर दूसरे घरमें गये ॥ २२ ॥ उस स्थानमें भी देखाकि-श्रीकृष्णजी पुत्रोंको खिलारहे हैं तदनंतर दूसरे घरमें देखाकि वहां वे नहाने की इच्छा कररहे हैं ॥ २३ ॥ इसप्रकार से कहीं पर अग्निहोत्र का होम, पंच महायज्ञ करते, कहीं ब्राह्मणोंको भोजन कराते और शेषरहे भोजनको आप भोजन करते दीखपड़े ॥ २४ ॥ कहीं सन्ध्यामें बैठहुए एकाग्र चित्तसे गायत्रीका जपकर रहे हैं; एक स्थान में ढाल तलवार लिये पटा खेलते दीखपड़े ॥ २५॥ कहीं हाथी, घोडा, रथपर बैठे फिरते हुए देखनेमें आये कहीं आप पलंगपर शयन कररहे हैं और बंदीजन स्तुतिकर रहे हैं ॥ २६ ॥ कहीं उद्धवादि मंत्रियों के संग परामर्श कर रहे हैं कहीं वेश्या-आदि स्त्रियोंसे घिर जलक्रीडा कररहे हैं ॥ २७ ॥ कहीं सुन्दर गौओं व ब्राह्मणों को दान देते हैं। किसी घर में इतिहास, पुराण और मंगल की कथा सुनते हैं ॥ २८ ॥ कहीं परिहासकर २ प्यारीसे हँसी कररहे हैं। कहीं धर्म कहीं अर्थ, काम का सेवन करते हैं ॥ २९ ॥ कहीं एकांतमें बैठकर प्रकृति से पर आत्माका ध्यान कररहे हैं किसीस्थान में इच्छितपदार्थों के भोगोंद्वारागुरुओं की सेवा में तत्पर हैं ॥ ३० ॥ कहीं किसी के साथ संधि और किसी के संग विग्रह कररहे हैं। किसी स्थान में बलरामजी के साथ बैठेहुए साधुओं के कल्याण के विचार में लगे हैं ॥ ३१ ॥ कहींपर बड़ी धूमधाम के साथ पुत्रों का योग्य स्त्रियों के संग और कन्याओं का योग्य वरों के संग समयानुसार यथाविधि से विवाह कररहे हैं ॥३२॥ कहींपर कन्या और जामाताओंको बुलाते और भेजते और कहीं महोत्सवोंको कररहे हैं श्रीकृष्णजी के पुत्र पौत्रादिकों के उस महोत्सवको देख सब विस्मित होरहे हैं ॥ ३३ ॥ कहीं बड़े २ यज्ञकर अपने अंशभूत देवताओंका भजनकरते हैं, कहींपर कुआ, बावड़ी, देवमंदिरआदि बनवाते हैं ॥ ३४ ॥ कहींपर श्रेष्ठ यादवों-से वेष्टितहो सिंधु देश के घोड़े पर बैठ आखेट करतेहुए यज्ञीय पशुओं को माररहे हैं ॥ ३५ ॥ भगवानकहीं

तिष्यन्तःपुरगृहादिषु। क्वचिच्चरन्तंयोगेशंतत्तद्भावबुभुत्सया ॥ ३६ ॥ अथोवाच हृषीकेशंनारदःप्रहसन्निव। योगमायोदयंवीक्ष्यमानुषीमीयुषोगतिम् ॥ ३७ ॥ विदामयोगमायास्तेदुर्दर्शाअपिमायिनाम्। योगेश्वरात्मन्निर्भाताभवत्पादनिषेवया॥ ३८ ॥ अनुजानीहिमांदेवलोकांस्तेयशसाप्लुतान्। पर्यटामितवोद्गायँल्लीलाभुवनपावनीः ॥ ३९ ॥ श्रीभगवानुवाच ॥ ब्रह्मन्धर्मस्यवक्ताऽहंकर्तातदनुमोदिता। तच्छिक्षयँल्लोकमिममास्थितःपुत्रमाखिदः ॥ ४० ॥ श्रीशुक उवाच ॥ इत्याचरन्तंसद्धर्मान्पावनान्गृहमेधिनाम्। तमेवसर्वगेहेषुसन्तमेकंददर्शह ॥ ४१ ॥ कृष्णस्यानन्तवीर्यस्ययोगमायामहोदयम्। मुहुर्दृष्ट्वाऋषिरभूद्विस्मितोजातकौतुकः ४२ ॥ इत्यर्थकामधर्मेषुकृष्णेनश्रद्धितात्मना। सम्यक्सभाजितःप्रीतस्तमेवानुस्मरन्ययौ ॥ ४३ ॥ एवंमनुष्यपदवीमनुवर्तमानोनारायणोऽखिलभवायगृहीतशक्तिः। रेमेऽङ्गषोडशसहस्रवराङ्गनानांसव्रीडसौहृदनिरीक्षणहासजुष्टः ॥ ४४ ॥ यानीहविश्वविलयोद्भववृत्तिहेतुःकर्माण्यनन्यविषयाणिहरिश्चकार। यस्त्वङ्गगायतिशृणोत्यनुमोदतेवाभक्तिर्भवेद्भगवतिह्यपवर्गमार्गे ॥ ४५ ॥

इतिश्रीमद्भा०महा०दशम०एकोनसप्ततितमोऽध्यायः ॥ ६९ ॥

श्रीशुकउवाच ॥ अथोषस्युपवृत्तायां कुक्कुटान्कूजतोऽशपन्। गृहीतकण्ठ्यःपतिभिर्माधव्योविरहातुराः ॥ १ ॥ वयांस्यरूरुवन्कृष्णं बोधयन्तीववन्दिनः। गायत्स्वलिष्वनिद्राणि मन्दारवनवायुभिः ॥२॥ मुहूर्तंतंतुवैदर्भी नामृष्यदतिशोभनम्।

कहीं नगर और अन्तःपुर के अभिप्रायको जानने के निमित्त वेष बदलर कर भ्रमण कररहे हैं ॥ ३६ ॥ इसप्रकार से नारदजी ने मनुष्यावतार भगवान के योगमाया को देख कुछेक हँसकर उनसे कहा कि- ॥ ३७ ॥ हे प्रभो ! मायावी पुरुषों केभी न जानने योग्य आपकी योगमायाको हमकेवल आप के चरणों की सेवाही से जानते हैं परन्तु आपके परमार्थ स्वरूप को नहींजानते ॥ ३८ ॥ हेदेव ! आप आज्ञा करें कि-त्रिलोकी को पवित्र करनेवाले आपके चरित्रों का गानकरताहुआ आपके यशमे व्याप्त लोकों में भ्रमणकरूं ॥ ३९ ॥ श्रीभगवान ने कहा कि हे ब्रह्मन् ! मैं धर्मकावक्ता कर्त्ता और अनुमोदन करनेवालाहूं, मनुष्यों को धर्म की शिक्षा देनाहुआ इसप्रकार से स्थितिकरताहूं अतएव तुम मोहमें मतपड़ो ॥ ४० ॥ शुकदेवजी बोले कि-हेराजन् ! नारदजी ने सबघरों में इसप्रकार से अकेले भगवानको गृहस्थियों के उत्तमधर्मों का आचरणकरते देखा ॥४१॥ अनन्त पराक्रमवाले श्रीकृष्णजी की योगमाया का वारम्वार उदयदेख नारदजी को अत्यन्त कौतुक उत्पन्नहुआ और अत्यन्त विस्मितहुए ॥ ४२ ॥ अर्थ, काम, धर्म में इसप्रकार श्रद्धायुक्त श्रीकृष्णजीने भलीप्रकार से उनका सन्मान किया, तब नारदजी प्रसन्नहो उनका ध्यानकरते २ वहां से चलेगए ॥ ४३ ॥ हेराजन् ! सर्व मङ्गलों के निमित्त अवतार धारणकरनेवाले वह भगवान मनुष्य पदवी का अनुकरणकर सोलहसहस्र श्रेष्ठस्त्रियों के घरमें हास्य विलास, कटाक्ष और संभोगआदि से इसप्रकार विहार करतेथे ॥ ४४ ॥ विश्वकी उत्पत्ति, स्थिति और संहार के कारणहरिनेपृथिवी पर जो असाधारण कर्म कियेथे, जो उनसबकर्मों को गावे, सुने वा अनुमोदनकरे उसकी मुक्ति के द्वार भगवान में भक्तिउत्पन्नहोवे ॥ ४५ ॥

इतिश्री मद्भा०महापुराणेदशमस्कन्धेउ०सरलाभाषाटीकायांएकोनसप्ततितमोऽध्यायः ॥ ६९ ॥

श्रीशुकदेवजी बोले कि—हेराजन् ! एकदिन प्रातःकाल में मुर्गे शब्दकर रहेथे, पति के गलेमें भुजा डालेहुए आलिंगन की हुई श्रीकृष्णजी की स्त्रियां उनके विरहके भयसे मुर्गोंको शाप देनेलगीं ॥ १ ॥ भौरे कमलोंसे सुगन्धित हुई वायुके संगही संगगान करनेलगे, और सब पक्षी निद्रासे उठ बन्दीजनों की समान श्रीकृष्णजी को जगातेहुये ऊँचेस्वरसे शब्द करनेलगे, ॥ २ ॥

। परिरम्भणविश्लेषात्प्रियबाह्वन्तरं गताः ॥३॥ ब्राह्मे मुहूर्त उत्थाय वार्युपस्पृश्य माधवः। दध्यौ प्रसन्नकरण आत्मानं तमसः परम् ॥ ४ ॥ एकं स्वयंज्योतिरनन्यमव्ययं स्वसंस्थया नित्यनिरस्तकल्मषम्। ब्रह्माख्यमस्योद्भवनाशहेतुभिः स्वशक्तिभिर्लक्षितभावनिर्वृतम् ॥ ५ ॥ अथाप्लुतोऽम्भस्यमले यथाविधि क्रियाकलापं परिधाय वाससी। चकार संध्योपगमादि सत्तमो हुतानलो ब्रह्म जजाप वाग्यतः ॥६॥ उपस्थायार्कमुद्यन्तं तर्पयित्वात्मनः कलाः। देवानृषीन्पितॄन्वृद्धान्विप्रानभ्यर्च्य चात्मवान् ॥ ७ ॥ धेनूनां रुक्मशृङ्गीणां साध्वीनां मौक्तिकस्रजाम्। पयस्विनीनां गृष्टीनां सवत्सानां सुवाससाम् ८॥ ददौ रूप्यखुराग्राणां क्षौमाजिनतिलैः सह। अलंकृतेभ्यो विप्रेभ्यो बद्वं बद्वं दिने दिने ९॥ गोविप्रदेवतावृद्धगुरून्भूतानि सर्वशः। नमस्कृत्यात्मसम्भूतीर्मङ्गलानि समस्पृशत् ॥१०॥ आत्मानं भूषयामास नरलोकविभूषणम्। वासोभिर्भूषणैः स्वीयैर्दिव्यस्रगनुलेपनैः ॥११॥ अवेक्ष्याज्यं तथाऽऽदर्शं गोवृषद्विजदेवताः। कामांश्च सर्ववर्णानां पौरान्तःपुरचारिणाम्। प्रदाप्य प्रकृतीः कामैः प्रतोष्य प्रत्यनन्दत ॥१२॥ संविभज्याग्रतो विप्रान्स्रक्ताम्बूलानुलेपनैः। सुहृदः प्रकृतीर्दारानुपायुङ्क्त ततः स्वयम् ॥१३॥ तावत्सूत उपानीय स्यन्दनं परमाद्भुतम्। सुग्रीवाद्यैर्हयैर्युक्तं प्रणम्यावस्थितोऽग्रतः ॥ १४ ॥ गृहीत्वा पाणिना पाणी सारथेस्तमथारुहत्। सात्यक्युद्धवसंयुक्तः पूर्वाद्रिमिव भास्करः ॥ १५ ॥ ईक्षितोऽन्तःपुरस्त्रीणां सव्रीडप्रेमवीक्षितैः। कृच्छ्राद्विसृष्टो निरगाज्जातहासो हरन्मनः ॥१६॥ सुधर्माख्यां सभां सर्वैर्वृष्णिभिः परिवारितः। प्राविशद्यन्नि

वह शब्द यद्यपि अत्यन्त सुंदरथा तो भी प्रियके आलिंगनसे बिछुड़ जानेके भयसे रुक्मणी आदि स्त्रियें उस शब्दको क्षणभर भी नहीं सहसकतीथीं ॥ ३ ॥ श्रीकृष्णजी ब्राह्म मुहूर्त में उठ जलसे आचमन कर प्रसन्न चित्तहो प्रकृतिसे पर आत्मा का ध्यान करने लगे, ॥ ४ ॥ वह उपाधि रहित आत्मस्थित, अव्यय, अखण्ड, अज्ञान रहित, ज्योतिःस्वरूप और इस जगतकी उत्पत्ति व नाशके कारण भूत, अपनी शक्तियोंसेही जिनकी सत्ता दिखाई देती है ब्रह्मनामक सदानन्द मय अपनेही स्वरूपका ध्यान करनेलगे ॥ ५ ॥ साधु श्रेष्ठ श्रीकृष्ण जी ने निर्मल जलसे स्नानकर वस्त्र धारण किये तथा विधिवत् सन्ध्योपासनादि कर्म व अग्निहोत्रकर संयम चित्तसे गायत्री का जप करने लगे ॥ ६ ॥ अनन्तर सूर्यनारायण को उदय हुआ देख उठकर उनको नमस्कार किया। उन्होंने अपने अंशभूत देवता, ऋषि पितर वृद्ध और ब्राह्मणों की पूजाकी तदुपरांत ब्राह्मणों को रेशमी वस्त्र, मृगचर्म और तिल समेत तेरहसहस्र चौरासी गौयें कि जिनके सींग स्वर्णसे मढ़ेहुए थे जो मोतियों की माला पहिन सुंदर स्वभाव वाली प्रथमबारकी ब्याईहुई बहुत दुग्धवती बछड़े युक्त सुन्दर वस्त्र पहिनाई हुई चांदीसे मढेहुए खुरोंवालीथीं दानकीं, ॥ ७—९ ॥ श्रीकृष्णजी ने अपनी विभूति गौ, ब्राह्मण, देवता, वृद्ध, गुरु और समस्त प्राणियोंको नमस्कारकर कपिला गौ, आदि मांगलिक पदार्थों का स्पर्श किया ॥ १० ॥ सृष्टि के भूषण स्वरूप अपनेको वस्त्र, आभूषण, दिव्यमाला और चन्दनसे भूषित किया॥११॥ और घृत, दर्पण, गौ, ब्राह्मण और देवताओं, का दर्शन कर सबनगर निवासी वर्णों और अन्तःपुरचारियोंको इच्छित दानदिया फिरइच्छित सामग्री दे प्रजाको संतुष्टकर स्वयं आनन्दितहुए ॥१२॥ अनंतर प्रथम ब्राह्मणोंको चन्दन और पानआदि देकर फिर स्वयं मित्र सुहृद और स्त्रियोंसे मिले ॥ १३ ॥ उसही समय सारथी सुग्रीवादि घोड़ोंको जोत परम अद्भुत रथलाय प्रणामकर सन्मुख खड़ाहोगया ॥ १४ ॥ सूर्य जैसे उदयाचलमें चढ़तेहैं भगवान वैसेही अपने हाथसे सारथी का हाथ पकड़ सात्यकि और उद्धव समेत रथपर चढ़े ॥ १५ ॥ अन्तःपुरकी नारियें प्रेम और लज्जायुक्त दृष्टिसे उनकी ओर देखनेलगीं भगवान उनके निमित्त थोड़ी देरतक खड़े रहकर हास्य द्वारा उनके मनका हरणकर वहांसेचले ॥ १६ ॥ हेराजन् ! इसप्रकार

विशन्नानसन्त्यङ्गषडूर्मयः ॥ १७ ॥ तत्रोपविष्टःपरमासनेविभुर्बभौस्वभासाककुभो ऽवभासयन्। वृतोनृसिंहैर्यदुभिर्यदूत्तमोयथोडुराजोदिवितारकागणैः ॥ १८ ॥ तत्रोपमन्त्रिणोराजन्नानाहास्यरसैर्विभुम्। उपतस्थुर्नटाचार्यानर्तक्यस्ताण्डवैःपृथक् ॥ १९ ॥ मृदङ्गवीणामुरजवेणुतालदरस्वनैः। ननृतुर्जगुस्तुष्टुवुश्चसूतमागधवन्दिनः ॥ २० ॥ तत्राहुर्ब्राह्मणाःकेचिदासीनाब्रह्मवादिनः। पूर्वेषांपुण्ययशसां राज्ञांचाकथयन्कथाः ॥ २१ ॥ तत्रैकःपुरुषोराजन्नागतोऽपूर्वदर्शनः। विज्ञापितो भगवतेप्रतीहारैःप्रवेशितः ॥ २२ ॥ सनमस्कृत्यकृष्णायपरेशायकृताञ्जलिः।राज्ञा मावेदयद्दुःखंजरासन्धनिरोधजम् ॥ २३ ॥ येचदिग्विजयेतस्यसंनतिंनययुर्नृपाः प्रसह्यरुद्धास्तेनासन्नयुतेद्वेगिरिव्रजे ॥२४॥ कृष्णकृष्णाप्रमेयात्मन्प्रपन्नभयभंजन। वयंत्वांशरणंयामोभवभीताःपृथग्धियः ॥ २५ ॥ लोकोविकर्मनिरतःकुशलेप्रमत्तः कर्मण्ययंत्वदुदितेभवदर्चनेस्वे। यस्तावदस्यबलवानिहजीविताशांसद्यश्छिनत्त्य निमिषायनमोऽस्तुतस्मै ॥ २६ ॥ लोकेभवाञ्जगदिनःकलयावतीर्णःसद्रक्षणाय खलनिग्रहणायचान्यः। कश्चित्त्वदीयमतियातिनिदेशमीशकिंवाजनःस्वकृतमृ- च्छतितन्नविद्मः ॥ २७ ॥ स्वप्नायितंनृपसुखंपरतन्त्रमीशशश्वद्भयेनमृतकेनधुरंव- हामः। हित्वातदात्मनिसुखंत्वदनीहलभ्यंक्लिश्यामहेऽतिकृपणास्तवमाययेह ॥ २८ ॥ तन्नोभवान्प्रणतशोकहराङ्घ्रियुग्मोबद्धान्वियुङ्क्ष्वमगधाह्वयकर्मपाशात्।

सब घरोंसे पृथक् २ निकल एकहो सब वृष्णि वंशियोंके साथ उन्होंने सुधर्मा नामक सभामें प्रवेश किया। हेराजन्! उस सभामें बैठेहुये मनुष्यों को भूख प्यास आदि छै शत्रु बाधा नहीं देसकते ॥ १७ ॥ विभु कृष्णजी उस सभामें प्रवेशकर यदुओंसे घिर तारागणों से घिरेहुये चंद्रमा की समान प्रकाश पानलगे ॥ १८ ॥ महाराज! वहां परिहासक (भांड़) नाना हास्य रससे नट और नाचनेवाले अपने २ नृत्य आदिसे उनकी उपासना करनेलगे, ॥ १९ ॥ सूत मागध और वन्दी मृदग, वीणा, पखावज, वेणु, करताल और शंखके शब्दके साथ नृत्य और गान कर२ के उनको सतुष्ट करनेलगे ॥ २० ॥ वहांपर बैठेहुये कुछेक वाक्य निपुण ब्राह्मण वेदमन्त्रों से व्याख्या करने और प्राचीन राजाओंके पवित्र यशको भी कहने लगे ॥ २१ ॥ हेराजन् उसहीसमय उस स्थानमें एक अनदेखाहुआ ब्राह्मण आया भगवान से इस वृत्तांत को जनाय द्वारपाल उसको लेकर उनके निकट गया ॥ २२ ॥ उस ब्राह्मणने हाथ जोड़ भगवानको नमस्कार कर जरासन्धसे बंधेहुए राजाओं के दुःख को कहा, ॥ २३ ॥ जरासन्ध के दिग्विजय में जो राजा उसके वश न हुएथे उन सबको उस दुष्टने गिरिव्रज नामक दुर्गमें बलपूर्वक बन्द कररक्खा है उन राजाओं की संख्या बीस सहस्रहै। राजाओंने कहा है कि—हेकृष्ण! हेकृष्ण! हेभक्तभयनाशन! हम भेद बुद्धिवाले संसार से भीत होकर आपकी शरणागत हुएहैं ॥ २४—२५ ॥ मनुष्योंके सकाम और अधम कर्मोंमें अत्यन्त रत होनेसे आपके कहेहुये पूजा रूप अपने मगल कर्ममें रत होनेसे जो बलवान पुरुष आकर तत्कालही उस जीवित मायाको काटडालताहै उन कालस्वरूप आपको प्रणाम है ॥ २६ ॥ आप जगत के ईश्वरहो साधुओं की रक्षा और दुष्टोंके दमन करनेके निमित्तही आपने पृथ्वी पर अवतार लियाहै, । हेईश्वर! दूसरा कोई आपकी आज्ञा को भंग करता अथवा मनुष्य (हम लोग) अपने २ कर्मोंका भोग करतेहैं यह हम नहीं जानसकते, ॥ २७ ॥ राज्य सम्बन्धी सुख विषय साध्यहैं इसकारण पराधीन होनेसे वह स्वप्न सुखकी समानहैं और यह देहभी निरन्तर भयसे भराहुआ रहताहै तो भी इससे केवल स्त्री पुत्रादिक कीही चिन्ता करते रहते हैं ॥ निष्काम मनुष्य आपसे जो स्वतःसिद्ध सुखको पाते हैं आपकी मायासे बंधकर उस सुखको छोड़ कर हम अत्यन्त कष्ट पारहे हैं ॥ २८ ॥ आपके दोनों चरण भक्तजनों के शोकको दूर करतेहैं।

योभूभुजोऽयुतमतङ्गजवीर्यमेकोबिभ्रद्रुरोधभवनेमृगराडिवाऽवीः ॥ २९ ॥ योवैत्व
याद्विनवकृत्वउदात्तचक्रभग्नोमृधेखलुभवन्तमनन्तवीर्यम् जित्वानृलोकनिरतंसकृ
दूढदर्पोयुष्मत्प्रजारुजतिनोऽजिततद्विधेहि ॥ ३० ॥ दूत उवाच ॥ इतिमागधसं
रुद्धाभवद्दर्शनकाङ्क्षिणः । प्रपन्नाःपादमूलंतेदीनानांशंविधीयताम् ॥ ३१ ॥ श्री
शुक उवाच ॥ राजदूतेब्रुवत्येवंदेवर्षिःपरमद्युतिः । बिभ्रत्पिङ्गजटाभारंप्रादुरासी
द्यथारविः ॥ ३२ ॥ तंदृष्ट्वाभगवान्कृष्णःसर्वलोकेश्वरेश्वरःववन्दउत्थितःशीर्ष्णा
ससभ्यःसानुगोमुदा ॥ ३३ ॥ सभाजयित्वाविधिवत्कृतासनपरिग्रहम् । बभाषेसू
नृतैर्वाक्यैः श्रद्धयातर्पयन्मुनिम् ॥ ३४ ॥ अपिस्विदद्यलोकानां त्रयाणामकुतोभय
म् । ननुभूयान्भगवतो लोकान्पर्यटतोगुणः ॥ ३५ ॥ नहितेऽविदितंकिञ्चिल्लोके
ष्वीश्वरकर्तृषु । अथपृच्छामहेयुष्मान् पाण्डवानांचिकीर्षितम् ॥ ३६ ॥ नारद
उवाच ॥ दृष्टामयातेबहुशोदुरत्यया मायाविभोविश्वसृजश्चमायिनः । भूतेषुभूम
श्चरतःस्वशक्तिभिर्वह्नेरिवच्छन्नरुचोनमेऽद्भुतम् ॥ ३७ ॥ तवेहितंकोऽर्हतिसाधुवे
दितुं स्वमाययेदंसृजतोनियच्छतः । यद्विद्यमानात्मतयाऽवभासते तस्मै नमस्ते
स्वविलक्षणात्मने ॥ ३८ ॥ जीवस्यय:संसरतोविमोक्षणं नजानतोऽनर्थवहाच्छरी
रतः । लीलावतारैःस्वयशःप्रदीपकं प्राज्वालयत्त्वातमहंप्रपद्ये ॥ ३९ ॥ अथाप्यथ
श्रावयेब्रह्मन्नरलोकविडम्बनम् । राज्ञःपैतृष्वसेयस्य भक्तस्यचचिकीर्षितम् ॥४०॥

इस दशसहस्र हाथियोंके बलवाले निष्ठुर सिंहकी समान जरासन्ध ने अकेलेही हम भेड़ोंकी समान राजाओंको अपने घरमें बंदकर रक्खा है। आप इस मगध राजरूपी कर्मके बधनोंसे हमें छुड़ाओ ॥ २९ ॥ हे सुदर्शन चक्रधारी! जरासंध आपसे अठारह बेर संग्राम करके सत्रह बेरहारा था और केवल एकबार मनुष्योंके अनुकरण करनेवाले आपको जीतकर वह अत्यंत अभिमानीहो आपके भक्तोंको दुःख देरहा है। हे अजित! इस विषयमें जो उचितहो करियेगा ॥ ३० ॥ हे प्रभो! इस प्रकार मगध राजसे बंधेहुए राजाओंने आपके दर्शनों की इच्छाकर आपके चरणों की शरण ली है आप उ. दीनोंका कल्याण करो ॥ ३१ ॥ राजदूत इसप्रकार से कह रहाथा कि उसी समय परम कांतिवान, पीतवर्णकी जटा धारण किये देवर्षि नारदजी सूर्यकी समान वहां आ उपस्थित हुए ॥ ३२ ॥ सर्व लोकेश्वरों के ईश्वर भगवान श्रीकृष्णजी ने उनको देख सभासद और अनुचरों सहित उठ आनंद पूर्वक उनकी बंदनाकी और विधिवत् उनका पूजनकर आसन पर बैठाय श्रद्धासे सन्तुष्टकर मीठे बचनों से कहाकि ॥ ३३-३४ ॥ इस समय त्रिलोकी में तो किसी प्रकार का भय नहीं है? इतनाही हमको परम लाभ है कि आप त्रिलोकी में भ्रमण करते रहतेहो, ईश्वर के रचेहुए इस लोक में आपसे अप्रगट कुछभी नहीं है अतएव आपसे पूंछताहूं कि पाण्डव क्या करते हैं? ॥ ३५ । ३६ ॥ नारदजीने कहा कि हे विभो! हे भूमन्! आप ब्रह्मा मोहके उत्पन्न करनेवाले और ढकी हुई अग्नि के समान अपनी शक्तियोंद्वारा अन्तर्यामीरूपसे सबप्राणियोंमें वर्तमानहो। मैंने आपकी माया को अनेकों बार देखा है अतएव आप क इसप्रकार से पूछने पर कुछआश्चर्य नहीं है ॥ ३७ ॥ यह जो जगत वास्तव में अविद्यमान है वह आपकी माया से बंध.र विद्यमान सा प्रतीत होता है, आप अपनीही माया से इसकी उत्पत्ति और नाश करते हैं अतएव आपकी इच्छा को कया कोई जानसकता है। आप का स्वरूप अचिन्त्य है इसकारण आपको केवलप्रणाम करताहूं ॥ ३८ ॥ अनर्थदायी शरीरके बन्धन से संसार में प्रवृत्तहुए मनुष्योंको मुक्ति देनेके निमित्त आप अपने लीलावतारों से ज्ञानके उत्पन्न करनेवाले अपने यशको प्रकाशित करतेहो, मैं आपकी शरणहूं ॥ ३९ ॥ हेभगवन्! आप ब्रह्महो परन्तु मनुष्यों का अनुकरण करतेहो; अतएव अपनी

यक्ष्यति त्वां मखेन्द्रेण राजसूयेन पाण्डवः । पारमेष्ठ्यकामो नृपतिस्तद्भवाननुमोदताम् ॥ ४१ ॥ तस्मिन्देव क्रतुवरे भवन्तं वै सुरादयः । दिदृक्षवः समेष्यन्ति राजानश्च यशस्विनः ॥ ४२ ॥ श्रवणात्कीर्तनाद्ध्यानात् पूयन्तेऽन्तेवसायिनः । तव ब्रह्ममयस्येश किमुतेक्षाभिमर्शिनः ॥ ४३ ॥ यस्यामलं दिवि यशः प्रथितं रसायां भूमौ च ते भुवनमंगल दिग्वितानम् । मन्दाकिनीति दिवि भोगवतीति चाधो गंगेति चेह चरणाम्बु पुनाति विश्वम् ॥४४॥ श्रीशुक उवाच ॥ तत्र तेष्वात्मपक्षेष्व गृह्णत्सु विजिगीषया । वाचः पेशैः स्मयन्भृत्यमुद्धवं प्राह केशवः ॥ ४५ ॥ श्रीभगवानुवाच ॥ त्वं हि नः परमं चक्षुः सुहृन्मन्त्रार्थतत्त्ववित् । तथाऽत्र ब्रूह्यनुष्ठेयं श्रद्दध्मः करवाम तत् ॥४६॥ इत्युपामन्त्रितो भर्त्रा सर्वज्ञेनापि मुग्धवत् । निदेशं शिरसाऽऽधाय उद्धवः प्रत्यभाषत ॥ ४७ ॥

इति श्रीमद्भा० महा० द० उ० सप्ततितमोऽध्यायः ॥ ७० ॥

श्रीशुक उवाच ॥ इत्युदीरितमाकर्ण्य देवर्षेरुद्धवोऽब्रवीत् । सभ्यानां मतमाज्ञाय कृष्णस्य च महामतिम् ॥ १ ॥ उद्धव उवाच ॥ यदुक्तमृषिणा देव साचिव्यं यक्ष्यतस्त्वया । कार्यं पैतृष्वस्रेयस्य रक्षा च शरणैषिणाम् ॥ २ ॥ यष्टव्यं राजसूयेन दिक्चक्रजयिना विभो । अतो जरासुतजय उभयार्थो मतो मम ॥३॥ अस्माकं च महानर्थो ह्येतेनैव भविष्यति । यशश्च तव गोविन्द राज्ञो बद्धान्विमुञ्चतः ॥ ४ ॥ स वै दुर्विषहो राजा

फूफी के बेटों व भक्तों के राजकार्य को सुनो ॥ ४० ॥ राजा युधिष्ठिर आप के संतुष्ट करने की इच्छा से श्रेष्ठराजसूय यज्ञद्वारा आपकी आराधना करना चाहते हैं, आप उसकी सम्मतिदो ॥४१॥ उस श्रेष्ठयज्ञ में देवादि और यशस्वी राजा भी आपके देखने को आवेंगे। जब चाण्डाल भी आप परब्रह्म के नाम और कर्मों को सुनकर व गायकर पवित्र होता है तबजो आप के दर्शन और स्पर्शन करेंगे उनकी बातको क्या कहूं ॥ ४२ । ४३ ॥ हे भुवनमंगल ! आपका यश,दिशा,स्वर्ग, मर्त्य और पाताल में दिशाओं के अलंकाररूप से व्याप्त होरहा है आप के चरणोंका जल मंदाकिनी, गंगा और भोगवती के नाम से स्वर्ग, मर्त्य और पाताल को पवित्र करता है ॥ ४४ ॥ शुकदेवजी ने कहा—हेराजन् ! जब नारदजी ने इसभांतिकहा तब यादवों ने जरासंध के विजयकी इच्छा से युधिष्ठिर के यज्ञमें जानेकी सम्मति नदी—तब भगवान ने हँसकर, मीठे वचनोंसे अपने सेवक उद्धवजी से कहा ॥ ४५ ॥ हेउद्धव ! तुमहमारे परमबन्धु, मन्त्रज्ञ और बात के तत्त्व को जाननेवालेहो इसकारण तुमहमारे परमनेत्र स्वरूपहो; मैं तुम्हारे वचनों को मानताहूं अतएव इस विषयमें जो उचितहो सोकहो मैं वही करूं ॥ ४६ ॥ स्वामी के सर्वज्ञ होने परभी इसप्रकार अज्ञान की समान परामर्श करने पर उद्धव ने उनकी आज्ञाको मस्तक पर धारणकरकेकहा॥४७॥

इतिश्रीमद्भा०महा०दशम०उ०सरलाभाषाटीकायांसप्ततितमोऽध्यायः ॥ ७० ॥

श्रीशुकदेवजी बोलेकि—हेराजन्! उद्धवजी इस बातको सुन और देवर्षि, सभासद व श्रीकृष्ण जी के अभिप्रायको जानकर कहनेलगे ॥ १ ॥ हे देव ! आपकी फूफी के बेटे जब राजसूय यज्ञ करना चाहते हैं तब आपको उनकी सहायता करनी चाहिये, यह बात जो देवर्षिने कही वह आपको करना उचित है और संदेशा भेजने वाले राजाओं की रक्षाभी अवश्यही करना चाहिये ॥ २ ॥ हे विभो ! युधिष्ठिर दिग्विजय करकेही राजसूय यज्ञ करेंगे अतएव मेरामत है कि दिग्विजय करने परही जरासंधको जीतना चाहिये; इससे दोकार्य सिद्ध होवेंगे प्रथम तो राजसूय यज्ञहोगा दूसरे शरणागतों की रक्षाहोगी ॥३॥ हे गोविंद ! ऐसा करने सेही हमारा अभिप्राय पूराहोगा । राजाओं को बंधन से छुटानेपर आपकी भी कीर्त्ति बढ़ेगी ॥४॥ वह जरासंध दशसहस्र हाथियों की समान

नागायुतसमोबलो । बलिनामपिचान्येषांभीमंसमबलंविना ॥ ५ ॥ द्वैरथेसतुजेतव्योमाशताक्षौहिणीयुतः । ब्रह्मण्योऽभ्यर्थितोविप्रैर्नप्रत्याख्यातिकर्हिचित् ॥ ६ ॥ ब्रह्मवेषधरोगत्वातंभिक्षेतवृकोदरः । हनिष्यतिनसन्देहोद्वैरथेतवसन्निधौ ॥७॥ निमित्तंपरमीशस्यविश्वसर्गनिरोधयोः । हिरण्यगर्भः शर्वश्चकालस्यारूपिणस्तव॥८॥ गायन्तितेविशदकर्मगृहेषुदेव्योराज्ञांस्वशत्रुवधमात्मविमोक्षणंच । गोप्यश्चकुञ्जरपतेर्जनकात्मजायाः पित्रोश्चलब्धशरणामुनयोवयंच ॥ ९ ॥ जरासन्धवधः कृष्णभूर्यर्थायोपकल्पते । प्रायः पाकविपाकेनतवचाभिमतःक्रतुः ॥१०॥ श्रीशुक उवाच इत्युद्धववचोराजन्सर्वतोभद्रमच्युतम् । देवर्षिर्यदुवृद्धाश्च कृष्णश्चप्रत्यपूजयन् ॥ ॥ ११ ॥ अथादिशत्प्रयाणायभगवान्देवकीसुतः । भृत्यान्दारुकजैत्रादीननुज्ञाप्य गुरून्विभुः ॥ १२ ॥ निर्गमय्यावरोधान्स्वान्ससुतान्सपरिच्छदान् । संकर्षणमनुज्ञाप्ययदुराजं च शत्रुहन् । सूतोपनीतंस्वरथमारुहद्गरुडध्वजम् ॥ १३ ॥ ततोरथद्विपभटसादिनायकैःकरालयापरिवृतआत्मसेनया । मृदङ्गभेर्यानकशंखगोमुखैःप्रघोषघोषितककुभोनिराक्रमत् ॥१४॥ नृवाजिकाञ्चनशिबिकाभिरच्युतंसहात्मजाः पतिमनुसुव्रताययुः ।वराम्बराभरणविलेपनस्रजः सुसंवृतानृभिरसिचर्मपाणिभिः ॥ १५ ॥ नरोष्ट्रगोमहिषखराश्वतर्यन:करेणुभिः पारजनवारयोषितः । स्वलंकृताःकटकुटिकम्बलाम्बराद्युपस्कराययुरधियुज्यसर्वतः ॥ १६ ॥ बलंबृहद्ध्वजपट-

बलवान है, समबल वाले भीमसेन विना वह और किसी बली से जीताभी नहीं जासकता ॥ ५ ॥ उसको द्वैरथ (दो मनुष्यों) युद्ध सेही जीतना आवश्यक है नहीं तो सौ२ अक्षौहिणी सेभी वह न जीता जासकेगा । ब्राह्मण के याचना करनेपर वह उससे कभी भी विमुख नहीं होगा । भीमसेन को ब्राह्मण वेशधारण कर वहांजाय उससे युद्धकी प्रार्थना करनी चाहिये वह आपके सामने द्वन्द्व युद्धमें उसको मारेंगे इसमें सदेह नहीं है॥६-७॥निराकार कालरूप भगवान आपही विश्वकी उत्पत्ति और संहार करतेहो ब्रह्मा और रुद्रतो केवल निमित्तमात्र हैं ऐसेही आप जरासंधको मारोगे भीमसेनतो केवल निमित्त मात्रहोंगे ॥ ८ ॥ जैसे गोपियें शङ्खचूड़ के मारने से अपने छुडाने रूप आपके पवित्र यशको गाती हैं, शरणागत लोग ग्राहके मारने और गजके छुडाने रूप व जैसे मुनिलोग रावणके मारने व जानकी के छुडाने रूप व जैसे हम कंसके मारने और उससे माता पिताके छुडाने रूप आपकी पुण्य कीर्तिको गाते हैं वैसेही उन सबबंदी राजाओंके छुटजानेसे उनकी स्त्रियें अपने २ पतिके छुटने रूप आपके यशको गावेंगी ॥ ९ ॥ हे कृष्ण ! जरासंध के मरने से बहुत कार्य सिद्धहोंगे । राजाओं के पुण्य विपाक के कारणही उस यज्ञमें जानेकी आपकी इच्छा हुई है ॥ १० ॥ श्रीशुकदेवजी बोलेकि-हे राजन् ! देवर्षि नारद, श्रीकृष्णजी और सब यदुवंशियों ने उद्धवजी के वचनोंको स्वीकार किया ॥ ११ ॥ अनंतर प्रभावशाली भगवान श्रीकृष्णजी ने यात्रा करने के निमित्त गुरुजनों की आज्ञाले दारुक, जैत्रादि सेवकोंको आज्ञाकी ॥ १२ ॥ उन्हों ने बलदेवजी की आज्ञाले अपनी स्त्रियों, पुत्रों समेत सब सामग्रीको आगेकर आप सारथी के लायेहुए गरुडध्वज रथपर बैठे ॥ १३ ॥ फिररथ, हाथी, पैदल और घोड़ोंकी भयानक सेना उनके साथ२ चली । मृदङ्ग, भेरीढक्का,शंख और गोमुखों के प्रचंड शब्दों से दिशाएं शब्दायमान होनेलगीं॥१४॥ श्रीकृष्णजी पुरीसे बाहर हुए । पतिव्रता स्त्रियें उत्तम २ वस्त्र आभूषण पहिन, चन्दन और माला धारणकर ढाल तलवार लियेहुए मनुष्यों से भलीप्रकार रक्षितहो पुत्रोंसमेत रथ, बग्घी और सुवर्ण की सामग्री वाली पालकियोंपर बैठ पति श्रीकृष्णजी के पीछे २ चलनेलगीं ॥ १५ ॥ परिजनकी स्त्रियां और वेश्याएं भलीप्रकार से अलंकृतहो चटाइयों के डेरे व कंबल वस्त्रआदि सब सामग्री मनुष्य ऊंट, बैल, भैंसे, गधे, खच्चर, गाड़े और हथिनियोंपर लाद २ चारों ओरसे चलीं ॥१६॥

छत्रचामरैर्वरायुधाभरणकिरीटवर्मभिः । दिवांशुभिस्तुमुलरवं बभौ रवेर्यथार्णवः क्षुभिततिमिङ्गिलोर्मिभिः ॥ १७ ॥ अथो मुनिर्यदुपतिना सभाजितः प्रणम्य तं हृदि विदधद्विहायसा । निशम्य तद्व्यवसितमाहृतार्हणो मुकुन्दसन्दर्शननिर्वृतेन्द्रियः ॥१८॥ राजदूतमुवाचेदं भगवान्प्रीणयन्गिरा । मा भैष्ट दूत भद्रं वो घातयिष्यामि मागधम् १९ इत्युक्तः प्रस्थितो दूतो यथावदवदन्नृपान् । तेऽपि सन्दर्शनं शौरेः प्रत्यैक्षन्यन्मुमुक्षवः ॥२०॥ आनर्तसौवीरमरूंस्तीर्त्वा विनशनं हरिः । गिरीन्नदीरतीयाय पुरग्रामव्रजाकरान् ॥ २१ ॥ ततो दृषद्वतीं तीर्त्वा मुकुन्दोऽथ सरस्वतीम् । पञ्चालानथ मत्स्यांश्च शक्रप्रस्थमथागमत् ॥ २२ ॥ तमुपागतमाकर्ण्य प्रीतो दुर्दर्शनं नृणाम् । अजातशत्रुर्निरगात्सोपाध्यायः सुहृद्वृतः ॥ २३ ॥ गीतवादित्रघोषेण ब्रह्मघोषेण भूयसा । अभ्ययात्स हृषीकेशं प्राणाः प्राणमिवादृतः ॥ २४ ॥ दृष्ट्वा विक्लिन्नहृदयः कृष्णं स्नेहेन पाण्डवः । चिराद्दृष्टं प्रियतमं सस्वजेऽथ पुनः पुनः ॥ २५ ॥ दोर्भ्यां परिष्वज्य रमामलालयं मुकुन्दगात्रं नृपतिर्हताशुभः । लेभे परां निर्वृतिमश्रुलोचनो हृष्यत्तनुर्विस्मृतलोकविभ्रमः ॥२६॥ तं मातुलेयं परिरभ्य निर्वृतो भीमः स्मयन्प्रेमजलाकुलेन्द्रियः । यमौ किरीटी च सुहृत्तमं मुदा प्रवृद्धबाष्पाः परिरेभिरेऽच्युतम् ॥ २७ ॥ अर्जुनेन परिष्वक्तो यमाभ्यामभिवादितः । ब्राह्मणेभ्यो नमस्कृत्य वृद्धेभ्यश्च यथाऽर्हतः ॥ २८ ॥ मानितो मानयामास कुरुसृञ्जयकेकयान् । सूतमागधगन्धर्वान्वन्दिनश्चोपमन्त्रिणः ॥ २९ ॥

तुमुल शब्द युक्त वह भयानक सेना ध्वजा, चमर, छत्र, पट, श्रेष्ठअस्त्र, आभूषण, किरीट, कवच व सूर्यकी किरणों से शोभायमानहो तिमिंगल और तरङ्गों से क्षुभितहुए सागर की समान शोभा पानेलगी ॥ १७ ॥ अनंतर देवर्षि नारद श्रीकृष्णजी से पूजित और उनके दर्शनों से परम आनंदितहो, उनके उद्योगको विचार प्रणाम किया और हृदयमें उनका विचार करते २ आकाश मार्गसे चलेगये ॥ १८ ॥ भगवान ने सुंदर वचनों से उस राजदूतको सन्तुष्ट करके कहा कि हे दूत ! राजाओं से कहना कि तुमभय मतकरो मैं निश्चयही शीघ्रही जरासंधको मार तुम्हारा कल्याण करूंगा ॥ १९ ॥ यह सुनकर दूतने जाय राजाओं से उस सब वृत्तांतको कह सुनाया, वे भी अपने छूटनेकी इच्छा से भगवान के दर्शनों की राह देखनेलगे ॥ २० ॥ इधर हरि आनर्त, सौवीर, मरुदेश और कुरुक्षेत्रको लांघकर पर्वत, नगर, गांव, व्रज और खानों को मझाते हुए दृषद्वती और सरस्वती के पारहो पांचाल और मत्स्यदेश को लांघकर इंद्रप्रस्थ में आये ॥ २१ । २२ ॥ जिनके दर्शन मनुष्यों को बडे दुर्लभ हैं उन श्रीकृष्णजी को आयाहुआ सुनकर युधिष्ठिर आनन्दितहो ब्राह्मणों और बन्धुओं समेत पुरी से बाहरहुए ॥ २३ ॥ जैसे इन्द्रियें प्राणसेमिलें वैसेही वह युधिष्ठिर बाजे गाजेसे और वेदध्वनि करतेहुए आदर समेत श्रीकृष्णजी से मिले ॥ २४ ॥ श्रीकृष्णजी को देखनेहीं पाण्डवों का हृदय स्नेह से द्रवीभूत होगया । वह बहुत काल के उपरांत प्यारे को देख बारम्बार उनसे मिलने लगे ॥ २५ ॥ लक्ष्मी के निर्दोष आश्रय भूत लक्ष्मीपति के शरीर से आलिंगनकरने पर राजा के सब अमंगल नष्टहोगये उनके दोनों नेत्रों से आनन्दाश्रु बहनेलगे, शरीर पुलकित होगया । उनको सब लौकिक व्यवहार भूलगया ॥ २६ ॥ भीम अपने उन मामा के पुत्रसे हँसकर मिले वहभी प्रेमाश्रु की धारासे व्याकुल होगये । नकुल सहदेव और अर्जुनभी आनन्द से प्यारे सुहृदका आलिंगनकर प्रेमाश्रुसे उनको सींचने लगे॥२७॥ अर्जुन श्रीकृष्णजी से मिले और नकुल व सहदेव ने मिलने के अनन्तर उनको प्रणामभी किया उस समय श्रीहरि ने ब्राह्मण और वृद्धपुरुषों को यथायोग्य प्रणामकर उनसे सन्मानितहो कुरु, सृंजय और केकय वंशियों का तथा सूत, मागध, बन्दी व सेवकों का सत्कार किया ॥२८।२९॥

मृदङ्गशङ्खपटहवीणापणवगोमुखैः । ब्राह्मणाश्चारविन्दाक्षं तुष्टुवुर्ननृतुर्जगुः ॥ ३० ॥
एवं सुहृद्भिः पर्यस्तः पुण्यश्लोकशिखामणिः । संस्तूयमानो भगवान्विवेशाऽलंकृतं
पुरम् ॥ ३१ ॥ संसिक्तवर्त्मकरिणांमदगन्धतोयैश्चित्रध्वजैःकनकतोरणपूर्णकुम्भैः ।
मृष्टात्मभिर्नवदुकूलविभूषणस्रग्गन्धैर्नृभिर्युवतिभिश्चविराजमानम् ॥ ३२ ॥ उद्दीप्त
दीपबलिभिःप्रतिसद्मजालनिर्यातधूपरुचिरं विलसत्पताकम् । मूर्धन्यहेमकलशैर-
जतोरुशृङ्गैर्जुष्टंददर्शभवनैःकुरुराजधाम ॥ ३३ ॥ प्राप्तंनिशम्यनरलोचनपानपात्र
मौत्सुक्यविश्लथितकेशदुकूलबन्धाः । सद्योविसृज्यगृहकर्मपतींश्चतल्पेद्रष्टुंययुर्युव
तयःस्मनरेन्द्रमार्गे ॥ ३४ ॥ तस्मिन्सुसंकुलइभाश्वरथद्विपद्भिः कृष्णंसभार्यमुपल-
भ्यगृहाधिरूढः । नार्योविकीर्यकुसुमैर्मनसोपगुह्यसुस्वागतंविदधुरुत्स्मयवीक्षि-
तेन ॥ ३५ ॥ ऊचुःस्त्रियःपथिनिरीक्ष्यमुकुन्दपत्नीस्तारायथोडुपसहाःकिमकार्य-
मूभिः । यच्चक्षुषांपुरुषमौलिरुदारहासलीलावलोककलयोत्सवमातनोति ॥२६॥
तत्रतत्रोपसंगम्यपौरामङ्गलपाणयः । चक्रुःसपर्यांकृष्णायश्रेणीमुख्याहतैनसः॥३७॥
अन्तःपुरजनैःप्रीत्या मुकुन्दःफुल्ललोचनैः । ससंभ्रमैरभ्युपेतः प्राविशद्राजमन्दिर-
म् ॥३८॥ पृथाविलोक्यभ्रात्रेयं कृष्णं त्रिभुवनेश्वरम् । प्रीतात्मोत्थाय पर्यङ्कात्सस्नु
षा परिषस्वजे ॥ ३९ ॥ गोविन्दंगृहमानीय देवदेवेशमादृतः । पूजायांनाविदत्कृ-
त्यं प्रमोदोपहतोनृपः ॥ ४० ॥ पितृष्वसुर्गुरुस्त्रीणां कृष्णश्चक्रेऽभिवादनम् । स्वयं

ये लोग मृदङ्ग, शंख, पटह, बीणा, पणव और वेणुके साथ नृत्य व गान कर २ हरि को प्रसन्न
करने लगे ॥ ३० ॥जिनके नाम और गुणों के कहने से पवित्रता उत्पन्न होती है उनके शिरोमणि
भगवान सुहृदों के साथ सुन्दरपुरी मे आये,उस समय सबमनुष्य उनकी स्तुति कररहेथे ॥३१॥
मदमत्त हाथियों के झरतेहुए मदसे नगर के मार्ग सिंचगएथे; विचित्रध्वजा, सुवर्ण के तोरण,और
भरेहुए कलशों से नगर शोभायमान होरहाथा। शुद्ध चित्त की पुरुष नवीन रेशमी वस्त्र पहिने नाना
प्रकार के अलङ्कार, माला चन्दनादि धारण किये सब स्थानों में बिराजमानथे ॥ ३२ ॥ श्रीकृष्ण
जी ने कुरुराजका निवासस्थान देखा कि घर२में दीपक और पुष्प आदि शोभायमान होरहे हैं।घरों
की जालियों से धुआं निकलरहा है और उस से पताकाएं शोभायमान होरही हैं उन में सुवर्णके
कलश औरकलशों के नीचे चांदी के शिखर शोभायमानहोरहे हैं ॥३३ ॥ स्त्रियोंके नेत्रों को आ-
नन्द देनेवाले श्रीकृष्णजीके अतिसुन्दर केश और वस्त्रों के बन्धनढीले होगए,वह तत्कालहीघरका
सबकाम और शय्या में स्वामियों को छोड़ राजमार्ग में उनके देखने के निमित्त आनेलगीं॥३४॥
हाथी, घोड़े, रथ और पैदलों से व्याप्त उस राजमार्ग में स्त्रियों समेत श्रीकृष्णजी को देख घरों
के ऊपर बैठीहुई स्त्रियें उनके ऊपर फूल बरसाय २ मन २ में उनका आलिंगन कर विस्मययुक्त
दृष्टि से उनका आदर करनेलगीं ॥३५॥ चन्द्रमाके साथ नक्षत्रों की समान मार्ग में श्रीकृष्णजीके
साथ स्त्रियोंको देख नगरकी स्त्रियें कहने लगीं कि–इन्होंने ऐसा क्या पुण्यकियाथा कि जिससे श्री-
कृष्णजी उदारहास्य विलास और लीला से इनको आनन्द उत्पन्न कराते हैं ॥ ३६ ॥ अनन्तर
पुरवासी और कारीगरलोग विशेष२ स्थानों में मांगलिक द्रव्यों से श्रीकृष्णजी की पूजाकरनेलगे
॥ ३७ ॥ श्रीकृष्णजी ने प्रीतिसे प्रफुल्लित नेत्रहो अन्तःपुरके निवासियों से घिरकर राजमंदिर में
प्रवेश किया ॥ ३८ ॥ कुंतीभाई के पुत्र त्रिभुवनेश्वर श्रीकृष्णजीको देखकर अत्यंत आनंदित हुई
और पुत्रकी बहुओं समेत पलंगपर से उठ उनका आलिंगन किया ॥ ३९ ॥ राजा युधिष्ठिर आदर
पूर्वक उनदेव देवेश कृष्णजीको लेआये वह उस समय प्रेमसे ऐसा व्याकुल होगये कि पूजा करने
की बिधिभी भूलगये ॥ ४० ॥ हे राजन् ! श्रीकृष्णजी ने फूफी और गुरु स्त्रियोंको प्रणाम किया

कृष्णया राजन्भगिन्या चाभिवन्दितः ॥ ४१ ॥ श्वश्र्वा संचोदिता कृष्णा कृष्णपत्नीश्च सर्वशः । आनर्च रुक्मिणीं सत्यां भद्रां जाम्बवतीं तथा ॥ ४२ ॥ कालिन्दीं मित्रविन्दां च शैब्यां नाग्नजितीं सतीम् । अन्याश्चाभ्यागता यास्तु वासःस्रङ्मण्डनादिभिः ॥ ४३ ॥ सुखं निवासयामास धर्मराजो जनार्दनम् । ससैन्यं सानुगामात्यं सभार्यं च नवं नवम् ॥ ४४ ॥ तर्पयित्वा खाण्डवेन वह्निं फाल्गुनसंयुतः । मोचयित्वा मयं येन राज्ञे दिव्या सभा कृता ॥ ४५ ॥ उवास कतिचिन्मासान्राज्ञः प्रियचिकीर्षया । विहरन्रथमारुह्य फाल्गुनेन भटैर्वृतः ॥ ४६ ॥

इति श्रीमद्भा० महा० द० उ० एकसप्ततितमोऽध्यायः ॥ ७१ ॥

श्रीशुक उवाच ॥ एकदा तु सभामध्य आस्थितो मुनिभिर्वृतः । ब्राह्मणैः क्षत्रियैर्वैश्यैर्भ्रातृभिश्च युधिष्ठिरः ॥ १ ॥ आचार्यैः कुलवृद्धैश्च ज्ञातिसंबन्धिबान्धवैः । शृण्वतामेव चैतेषामाभाष्येदमुवाच ह ॥ २ ॥ युधिष्ठिर उवाच ॥ क्रतुराजेन गोविन्द राजसूयेन पावनीः । यक्ष्ये विभूतीर्भवतस्तत्सम्पादय नः प्रभो ॥ ३ ॥ त्वत्पादुके अविरतं परि ये चरन्ति ध्यायन्त्यभद्रनशने शुचयो गृणन्ति । विन्दन्ति ते कमलनाभ भवापवर्गमाशासते यदि त आशिष ईश नान्ये ॥ ४ ॥ तद्देवदेव भवतश्चरणारविन्दसेवाऽनुभावमिह पश्यतु लोक एषः । ये त्वां भजन्ति न भजन्त्युत वोभयेषां निष्ठां प्रदर्शय विभो कुरुसृञ्जयानाम् ॥ ५ ॥ न ब्रह्मणः स्वपरभेदमतिस्तव स्यात्सर्वात्मनः समदृशः स्वसु

और द्रौपदी व बहिन सुभद्राने भी आकर उनको प्रणाम किया ॥ ४१ ॥ द्रौपदी ने सासकी आज्ञानुसार रुक्मिणी, सत्यभामा, भद्रा, जाम्बवती, कालिंदी, मित्रविंदा, शैब्या, नाग्नजिती और समस्त आईहुई श्रीकृष्णजी की स्त्रियों की पूजाकी । और दूसरी भी जोस्त्रियें आई थीं वस्त्र, माला और आभूषणादि देकर उनकी अर्चना की ॥ ४२-४३ ॥ युधिष्ठिर कृष्णजीको व उनकी सेना, मन्त्री और स्त्रियोंको नित्य नवीन २ सुख देकर प्रसन्नित करनेलगे ॥ ४४ ॥ श्रीकृष्णजी राजाको प्रियकरने के निमित्त सेना समेत अर्जुन सहित रथपर बैठ बिहार करते हुए कई महीने हस्तिनापुरमें रहे और अर्जुन के संगही खाण्डव वनसे अग्निको संतुष्ट कराय मयको छुडाय उससे युधिष्ठिरकी अद्भुतसभा बनवाई ॥ ४५ ॥ श्रीकृष्णजी अर्जुनको साथले, रथमें बैठ, योधाओंगों के संग राजाको प्रसन्न रखने के लिये कितने एक दिन इन्द्रप्रस्थमें रहे ॥ ४६ ॥

इतिश्री मद्भागवतमहापुराणेदशमस्कंधे उ० सरलभाषाटीकायांएकसप्ततितमोऽध्यायः ॥ ७१ ॥

श्रीशुकदेवजी बोले कि—हेराजन् ! एकदिन युधिष्ठिरने मुनि, ब्राह्मण, क्षत्रिय, वैश्य, भ्राता, आचार्य, कुलवृद्ध, सम्बन्धी और बांधवों से घिरकर सभामें बैठेहुये उन सबके सुनते श्रीकृष्णजीसे सम्बोधन करके कहा कि— ॥ १—२ ॥ हेगोविन्द ! मैं यज्ञश्रेष्ठ राजसूय यज्ञद्वारा आपके अंशरूप देवताओं का पूजन करना चाहताहूं, हेप्रभो ! तुम उसको पूर्णकरो, ॥ ३ ॥ हेकमलनाभ हेईश्वर ! जो पवित्र मनुष्य निरन्तर आपकी पादुकाओं का सेवन व ध्यान करते हैं अथवा अमंगल नाशके निमित्त पवित्र होकर नामका उच्चारण करतेहैं वेही संसारसे मुक्ति पातेहैं । और यदि वे कल्याण की इच्छा करते हैं तो उनको वही प्राप्तहोताहै कि—जिसको चक्रवर्ती भी नहीं पासकते ॥ ४ ॥ अतएव हेदेव ! इन सब मनुष्यों को आपके चरणों की सेवा का प्रभाव अवश्य ही दिखाना चाहिये । हेविभो ! कुरु और संजय वंशियों मेंसे जो आपका भजन करते हैं और जो नहीं करते उन दोनों कोही अपनी मर्यादा दिखाओ, ॥ ५ ॥ आप निरुपाधि सबके आत्मा, समदर्शी और आत्मारामहो अतएव आपको अपने और परायेका भेद नहीं है तोभी जो आप की

मनुभूतेः । संसेवतां सुरतरोरिव ते प्रसादः सेवानुरूपमुदयो न विपर्ययोऽत्र ॥ ६ ॥ श्रीभगवानुवाच ॥ सम्यग्व्यवसितं राजन्भवता शत्रुकर्शन । कल्याणी येन ते कीर्तिर्लोकाननुभविष्यति ॥ ७ ॥ ऋषीणां पितृदेवानां सुहृदामपि नः प्रभो । सर्वेषामपि भूतानामीप्सितः क्रतुराडयम् ॥ ८ ॥ विजित्य नृपतीन्सर्वान्कृत्वा च जगतीं वशे । संभृत्य सर्वसंभारानाहरस्व महाक्रतुम् ॥ ९ ॥ एते ते भ्रातरो राजँल्लोकपालांशसंभवाः । जितोऽस्म्यात्मवता तेऽहं दुर्जयो योऽकृतात्मभिः ॥ १० ॥ न कश्चिन्मत्परं लोके तेजसा यशसा श्रिया । विभूतिभिर्वाऽभिभवेद्देवोऽपि किमु पार्थिवः ॥ ११ ॥ श्रीशुक उवाच ॥ निशम्य भगवद्गीतं प्रीतः फुल्लमुखाम्बुजः । भ्रातॄन्दिग्विजयेऽयुङ्क्त विष्णुतेजोपबृंहितान् ॥ १२ ॥ सहदेवं दक्षिणस्यामादिशत्सह सृञ्जयैः । दिशि प्रतीच्यां नकुलमुदीच्यां सव्यसाचिनम् । प्राच्यां वृकोदरं मत्स्यैः केकयैः सह मद्रकैः ॥ १३ ॥ ते विजित्य नृपान्वीरा आजह्रुर्दिग्भ्य ओजसा । अजातशत्रवे भूरि द्रविणं नृप यक्ष्यते ॥ १४ ॥ श्रुत्वाऽजितं जरासन्धं नृपतेर्ध्यायतो हरिः । आहोपायं तमेवाद्य उद्धवो यमुवाच ह ॥ १५ ॥ भीमसेनोऽर्जुनः कृष्णो ब्रह्मलिङ्गधरास्त्रयः । जग्मुर्गिरिव्रजं तात बृहद्रथसुतो यतः ॥ १६ ॥ ते गत्वाऽतिथ्यवेलायां गृहेषु गृहमेधिनम् । ब्रह्मण्यं समयाचेरन्राजन्या ब्रह्मलिङ्गिनः ॥ १७ ॥ राजन्विद्ध्यतिथीन्प्राप्तानर्थिनो दूरमागतान् । तन्नः प्रयच्छ भद्रं ते यद्वयं कामयामहे ॥ १८ ॥ किं दुर्मर्षं तितिक्षूणां किमकार्यमसाधुभिः । किं न देयं वदान्या

सेवा करतेहैं कल्पवृक्ष की समान आप उनहीं पर प्रसन्न होतेहो । जो मनुष्य आपकी जैसी सेवा करताहै आप उसको वैसाही फल देतेहो कभी उसके विपरीत नहीं होता ॥ ६ ॥ श्रीभगवान ने कहा कि—हेराजन् ! हेशत्रुकर्षण ! आप जो संकल्प करतेहो वह अत्यन्तही श्रेष्ठहै आपकी यह मंगलदायी कीर्त्ति सर्वलोकमें व्याप्त होगी ॥ ७ ॥ हे प्रभो ! यह महायज्ञ ऋषियोंको, पितरोंको, देवताओंको, बन्धुओं को, समस्त प्राणियों की और मुझको भी अतिप्रिय है, ॥ ८ ॥ तुम समस्त राजाओं को जीत और पृथिवीको वशीभूत कर सब सामग्रीका प्रस्तुतकर श्रेष्ठ यज्ञका अनुष्ठान करो ॥ ९ ॥ हेराजन् ! आपके यह सब भाई लोकपालों से उत्पन्न हुए हैं इनकेही द्वारा सब राजा परास्त होंगे । मैं भी अजितेंद्रिय मनुष्यों का अजेय आपकी जितेंद्रियता से आपके वशीभूत हुआहूं ॥ १० ॥ राजाओंकी बातें तो दूररहीं देवता भी मेरे भक्तों का तेज, कीर्त्ति लक्ष्मी और सेनापति आदि से पराजय नहीं करसकते ॥ ११ ॥ श्रीशुकदेवजी बोले कि—हेराजन् ! भगवान की बातोंको सुन स्नेहसे राजाका कमलमुख प्रफुल्लितहोउठा उन्होंने विष्णु के तेज से बढ़ेहुये भाइयोंको दिग्विजयके निमित्त नियुक्त किया ॥ १२ ॥ सृञ्जयगण के साथ सहदेवको दक्षिण और मत्स्यगण के साथ नकुल को पश्चिमऔर केकय गण के साथ अर्जुन को उत्तर की ओर मद्रदेश के क्षत्रियों के साथ भीमको पूर्वकी ओर भेजा ॥ १३ ॥ हेराजन् ! वे सब वीर चारोंओरसे बलपूर्वक राजाओं को जीत २ बहुतसा धन ला २ राजा युधिष्ठिरको देनेलगे ॥ १४ ॥ केवल जरासंध के अतिरिक्त और सब राजा परास्त हुए, यह सुन राजाके चिंतित होनेपर भगवान हरिने उद्धव के कहेहुए उपाय को कहा ॥ १५ ॥ हेराजन् ! अनन्तर भीमसेन, अर्जुन और श्रीकृष्णजी तीनों जन ब्राह्मण का वेश धारणकर जरासन्ध की राजधानी गिरिव्रज में आए ॥ १६ ॥ ब्राह्मण वेश धारण कियेहुए इन क्षत्रियों ने जरासन्ध के घर अतिथि के पूजन समयमें पहुंच ब्राह्मण सेवा के निमित्त उससे याचना करके कहा कि— ॥ १७ ॥ हेराजन् ! हम बहुत दूरसे आयेहुए अतिथि हैं अतएव हमारी इच्छाको आप पूरी करो आपका कल्याण होवे ॥ १८ ॥ क्षमाशील मनुष्योंको कुछ दुःसह नहींहै असज्जनों को कोई भी कुकार्य नहींहै दान शील मनुष्योंको कुछ भी अदेयनहीं

नाकः परः समदर्शिनाम् ॥ १९ ॥ योऽनित्येनशरीरेणसतांगेयंयशोध्रुवम् । नाऽऽचिनोतिस्वयंकल्पः स वाच्यःशोच्यएवसः ॥ २० ॥ हरिश्चन्द्रोरन्तिदेव उञ्छवृत्तिः शिबिर्बलिः । व्याधःकपोतोबहवो ह्यध्रुवेणध्रुवंगताः ॥ २१ ॥ श्रीशुकउवाच । स्वरैराकृतिभिस्तांस्तु प्रकोष्ठैर्ज्याहतैरपि । राजन्यबन्धून्विज्ञाय दृष्टपूर्वानचिन्तयत् ॥ ॥ २२ ॥ राजन्यबन्धवोह्येते ब्रह्मलिङ्गानिबिभ्रति । ददामिभिक्षितंतेभ्य आत्मानम- पिदुस्त्यजम् ॥ २३ ॥ बलेर्नुश्रूयते कीर्तिर्वितता दिक्ष्वकल्मषा। ऐश्वर्याद्भ्रंशितस्या पि विप्रव्याजेन विष्णुना ॥ २४ ॥ श्रियंजिहीर्षतेन्द्रस्य विष्णवेद्विजरूपिणे । जान- न्नपिमहीं प्रादाद्वार्यमाणोऽपिदैत्यराट् ॥ २५ ॥ जीवताब्राह्मणार्थाय कोन्वर्थःक्षत्र- बन्धुना । देहेनपतमानेन नेहताविपुलंयशः ॥ २६ ॥ इत्युदारमतिःप्राह कृष्णार्जुन- वृकोदरान् । हेविप्रा व्रियतांकामो ददाम्यात्मशिरोपिवः ॥ २७ ॥ श्रीभगवानुवाच युद्धंनोदेहिराजेन्द्र द्वन्द्वशोयदिमन्यसे ॥ युद्धार्थिनोवयंप्राप्ता राजन्यानान्यकाङ्क्षि- णः ॥ २८ ॥ असौवृकोदरःपार्थस्तस्य भ्राताऽर्जुनोह्ययम् । अनयोर्मातुलेयंमां कृष्णं जानीहिते रिपुम् ॥ २९ ॥ एवमावेदितोराजा जहासोच्चैःस्ममागधः । आहचामर्षि तोमन्दा युद्धंतर्हिददामिवः ॥ ३० ॥ नत्वयाभीरुणायोत्स्ये युधिविक्लवचेतसा ॥ मथुरांस्वपुरींत्यक्त्वा समुद्रंशरणंगतः ॥ ३१ ॥ अयंतुवयसाऽतुल्यो नातिसत्त्वो न मेसमः । अर्जुनोनभवेद्योद्धा भीमस्तुल्यबलोमम ॥ ३२ ॥ इत्युक्त्वाभीमसेनाय प्रा

है और समदर्शियों को कोई भी दूसरा नहीं है ॥१९॥ जो पुरुष स्वयं समर्थ होकर इस अनित्य देहमे साधुओं के गानेयोग्य निर्मल यशको नहीं प्राप्त करता वह पुरुष निन्दनीय और शोकित हो- ताहै ॥ २० ॥ देखो ! हरिश्चन्द्र, रन्तिदेव, मुद्गल, शिवि, व्याध, कपोत और भी दूसरे बहुतोंने इस अनित्य शरीरसे नित्यलोकको प्राप्त कियाहै, ॥ २१ ॥ श्रीशुकदेवजी बोले कि—हेराजन् ! बातचीत आकृति और धनुषकी प्रत्यञ्चा के घातके चिह्नोंवाले भुजाओंसे उनको क्षत्रिय और प- हिले भी कभी देखाहुआ जान जरासन्ध विचार करनेलगा, कि— ॥ २२ ॥ यह क्षत्रीहैं, परन्तु ब्राह्मण का चिह्न धारण कियेहुए हैं मैं इनको नहीं त्यागने योग्य आत्मा को भी इनके मांगने पर आज देदूंगा ॥ २३ ॥ श्रीविष्णु ने इन्द्रका ऐश्वर्य रखने के निमित्त ब्राह्मण वेश धारणकर बलिका ऐश्वर्य छीनाथा तौ भी क्या बलिका निर्मल यश चारोंओर नहीं व्याप्त हुआ ॥ २४ ॥ दैत्यराजने जानकर और शुक्राचार्य के निवारण करनेपर भी ब्राह्मणरूपी भगवान को पृथिवी देदीथी, २५ ॥ यह देह अनित्यहै क्षत्रियों की देह यदि ब्राह्मणों का कार्यकर विपुल यशके प्राप्त करनेका यत्न न करे तो उसके जीवित न रहनेसेही क्या फलहै ॥ २६ ॥ उदार बुद्धि जरासन्धने इसप्रकारसे नि- श्चय कर श्रीकृष्ण, अर्जुन और भीमसेन से कहा, हेविप्रो ! आप इच्छित वरको मांगो, यदि आप मेरे मस्तक को भी मांगोगे तो वह भी मैं आपको देदूंगा ॥ २७ ॥ श्रीभगवानने कहा कि- हेराजेन्द्र ! हम क्षत्रीहैं युद्धकी इच्छासे यहां आयेहैं, और हमारी कुछ इच्छा नहींहै यदि इच्छाहो तो हमारे साथ द्वन्द्वयुद्ध का आरम्भ करो ॥ २८ ॥ यह कुन्ती के पुत्र भीमसेन हैं यह उनके भाई अर्जुनहैं मैं इन दोनोंके मामाका पुत्र और आपका शत्रु कृष्ण हूं, ॥ २९ ॥ राजा जरासन्ध यह सुनकर उच्चस्वरसे हंसने और क्रोधित होकर कहनेलगा कि—रेमूर्खो ! तब तो मैं तुम्हें युद्ध दूंगा, ॥ ३० ॥ कृष्ण ! तू डरपोक है तू युद्धभूमि से भागगयाथा तूने अपनी पुरी मथुरा को छोड़कर समुद्रकी शरण ली है मैं तेरे संग युद्ध न करूंगा ॥ ३१ ॥ यह अर्जुन भी वय में छोटा और निर्बल है तथा देह मैंभी मेरी समान नहीं है । अतएव यह योद्धा नहीं होसकता । भीमसेन मेरी ही समान बलवान है, इससे ही संग युद्ध करूंगा ॥ ३२ ॥ राजा जरासंध ने यह

द्वावमिहत्तौगदाम् । द्वितीयांस्वयमादाय निर्जगामपुराद्बहिः ॥ ३३ ॥ ततःसमेताकेवीरौ संयुक्कावितरेतरौ । अप्रतुर्वज्रकल्पाभ्यां गदाभ्यांरणदुर्मदौ ॥ ३४ ॥ मण्डलानि विचित्राणि सव्यंदक्षिणमेवच । चरतोःशुशुभेयुद्धं नटयोरिवरंगिणोः ॥ ३५ ॥ ततश्चटचटाशब्दो वज्रनिष्पेषसन्निभः । गदयोःक्षिप्तयो राजन्दन्तयोरिव दन्तिनोः । ॥ ३६ ॥ तेवैगदे भुजजवेन निपात्यमाने अन्योऽन्यतोंऽसकटिपादकरोरुजत्रुम् । चूर्णीबभूवतुरुपेत्ययथाऽर्कशाखे संयुध्यतोर्द्विरदयोरिवदीप्तमन्व्योः ॥ ३७ ॥ इत्थंतयोःप्रहतयोर्गदयोर्नृवीरौकुद्धौस्वमुष्टिभिरयःस्पर्शैरपिष्टाम् । शब्दस्तयोःप्रहरतोरिभयोरिवासीन्निर्घातवज्रपरुषस्तलताडनोत्थः ॥ ३८ ॥ तयोरेवंप्रहरतोःसमशिक्षाबलौजसोः । निर्विशेषमभूद्युद्धमक्षीणजवयोर्नृप ॥ ३९ ॥ एवंतयोर्महाराज युध्यतोःसप्तविंशतिः । दिनानिनिरगंस्तत्र सुहृद्वन्निशि तिष्ठतोः ॥ ४० ॥ एकदामातुलेयंवै प्राहराजन्वृकोदरः । नशक्तोऽहंजरासन्धं निर्जेतुंयुधिमाधव ॥ ४१ ॥ शत्रोर्जन्ममृती विद्वाञ्जीवितंच जराकृतम् । पार्थमाप्यायन्स्वेन तेजसाचिन्तयद्धरिः ॥ ४२ ॥ संचिन्त्यारिवधोपायं भीमस्यामोघदर्शनः । दर्शयामासविटपं पाटयन्निवसंज्ञया । ॥ ४३ ॥ तद्विज्ञायमहासत्वो भीमःप्रहरतांवरः । गृहीत्वापादयोःशत्रुं पातयामास भूतले ॥ ४४ ॥ एकंपादंपदाक्रम्य दोर्भ्यामन्यंप्रगृह्यसः । गुदतः पाटयामास शाखामिवमहागजः ॥ ४५ ॥ एकपादोरुवृषणकटिपृष्ठस्तनांसके । एकबाह्वक्षिभ्रूक-

कहकर भीमसेन को एक बडी भारी गदादी और स्वयं एक दूसरी गदा ले घरसे बाहर निकला ॥ ३३ ॥ अनंतर वह दोनों रणमें मदोन्मत्त वीर बज्रकी समान गदाओं से परस्पर एक दूसरेपर प्रहार करने लगे ॥ ३४ ॥ दाहिनी ओर बांई ओर भ्रमण करते हुए उन दोनों वीरों का युद्ध रंग भूमि मे प्रवेश किये हुए दो नटों के युद्ध की समान शोभा देने लगा ॥ ३५ ॥ हे राजन् ! दो हाथियों के लड़ने में उनके दांतों के होतेहुए शब्दकी समान उन दोनों गदाओंका वज्रपात की सदृश चट चट शब्द होता था ॥ ३६ ॥ प्रचण्ड क्रोध वाले दो हाथियों के युद्धमें प्रवृत होने पर जिस प्रकार उनके अंग से लगकर आककी शाखाएं टूट जाती हैं उसी प्रकार हाथों के वेगसे चलाईजातीहुई गदाएं परस्पर में कन्धा, कमर, हाथ, साथल और हसियों में लगकर चूर्णहोगईं ॥ ३७ ॥ उन दोनों गदाओं के इसप्रकार से टूटजाने पर वह दोनों क्रोधित वीर अपनी २ लोहे की समान मुक्कियों से परस्पर लड़ने लगे वह दोनों मुक्कियों से एक दूसरे के शरीर को चूर्णकरने लगे । मत्तहाथी की सदृश प्रहार करतेहुए इनवीरों की मुक्कियों का प्रहार वज्र के शब्दकीसमान कठोर होताथा ॥ ३८ ॥ हेराजन् ! वह दोनोंजन शिक्षा, बल और प्रभाव में समानहीथे अतएव किसी का भी वेग क्षीणनहुआ । उन दोनों का एकसायुद्ध होनेलगा ॥ ३९ ॥ इसप्रकार से युद्ध करते २ सत्ताईस दिन बीतगए, वह दिन में तो युद्ध करते परन्तु रात्रि में मित्र की समान रहते थे ॥ ४० ॥ एक दिन भीमसेन नें कृष्णजी से कहा कि-महाराज ! मैंतो युद्ध में जरासंध को नहीं जीतसकता ॥ ४१ ॥ हरि को शत्रुकाजन्म, मृत्यु और जीवन ज्ञातथा वह अपने तेजसे भीमसेन को बढ़ाय जरा राक्षसीके कार्य का विचार करने लगे ॥ ४२ ॥ अमोघ दर्शन श्रीकृष्ण जीने एक वृक्षकी टहनी ले उसको चीर सैन से भीमको शत्रु के मारने का यत्न बतलादिया ॥ ४३ ॥ प्रहारकरनेवालों में श्रेष्ठ महाबलवान भीमने उसको जान दोनों पैर पकड़ शत्रुको पृथ्वीपर गिरादिया ॥ ४४ ॥ अनन्तर अपने पैर से उसके एक पैर को दाब दोनों हाथों से उसके दूसरे पैर को पकड़ मत्तहाथी से चीरीहुई शाखा के समान गुदासे उसको चीरडाला ॥ ४५ ॥ इस से दोनों ओर को दोखण्ड गिरपड़े । उसकी कमर से एक २ ओर एक २ पैर, वृषण, कटि, स्तन,

र्णे शाकलेवृषवंशुःप्रजाः ॥ ४६ ॥ हाहाकारोमहानासीन्निहते मगधेश्वरे । पूजयामासतुर्भीमं परिरभ्यजयाच्युतौ ॥ ४७ ॥ सहदेवंतत्तनयं भगवान्भूतभावनः । अभ्यषिञ्चदमेयात्मा मगधानांपतिंप्रभुः । मोचयामास राजन्यान्संरुद्धा मागधेनये॥४८॥

इति श्रीमद्भा० महा० द० द्विसप्ततितमोऽध्यायः ॥ ७२ ॥

श्रीशुकउवाच । अयुतेद्वेशतान्यष्टौ लीलयायुधि निर्जिताः । ते निर्गतागिरिद्रोण्यां मलिनामलवाससः ॥ १ ॥ क्षुत्क्षामाःशुष्कवदनाः संरोधपरिकर्शिताः । ददृशुस्तेघनश्यामं पीतकौशेयवाससम् ॥ २ ॥ श्रीवत्साङ्कंचतुर्बाहुं पद्मगर्भारुणेक्षणम् । चारुप्रसन्नवदनं स्फुरन्मकरकुण्डलम् ॥ ३ ॥ पद्महस्तं गदाशङ्खरथाङ्गैरुपलक्षितम् । किरीटहारकटककटिसूत्राङ्गदाञ्चितम् ॥ ४ ॥ भ्राजद्वरमणिग्रीवं निवीतं वनमालया । पिबन्तइवचक्षुर्भ्यां लिहन्तइवजिह्वया ॥ ५ ॥ जिघ्रन्तइवनासाभ्यांरम्भन्तइवबाहुभिः । प्रणेमुर्हतपाप्मानोमूर्धभिःपादयोर्हरेः ॥ ६ ॥ कृष्णसंदर्शनाह्लादध्वस्तसंरोधनक्लमाः । प्रशशंसुर्हृषीकेशंगीर्भिःप्राञ्जलयोनृपाः ॥ ७ ॥ राजान ऊचुः ॥ नमस्तेदेवदेवेशप्रपन्नार्तिहराव्यय । प्रपन्नान्पाहिनःकृष्णनिर्विण्णान्घोरसंसृतेः ॥ ८ ॥ नैनंनाथान्वसूयामोमागधंमधुसूदन । अनुग्रहोयद्भवतोराज्ञांराज्यच्युतिर्विभो ॥ ९ ॥ राज्यैश्वर्यमदोन्नद्धो नश्रेयोविन्दतेनृपः । त्वन्मायामोहितोऽनित्यामन्यतेसम्पदोऽचलाः ॥ १० ॥ मृगतृष्णांयथाबालामन्यन्तउदकाशयम्

कन्धा, भुजा, नेत्र, भौंह और कानरहगये । मनुष्य उसको देखकर बडेही अचम्भितहुए ॥ ४६ ॥ मगधराज के मरने से बडाही हाहाकारहुआ । अर्जुन और श्रीकृष्णजी ने भीम से मिलकर उनकी पूजाकी ॥ ४७ ॥ भूतभावन, अमोघात्मा भगवान ने उस जरासंध के पुत्र सहदेवको मगधदेशकी राजगद्दी पर बिठायसबबन्दीराजाओंको बन्दीगृहसे छुडाया ॥ ४८ ॥

इतिश्री मद्भा०महापुराणेदशमस्कंधेउ०सरलाभाषाटीकायांद्विसप्ततितमोऽध्यायः ॥ ७२ ॥

श्रीशुकदेवजी बोलेकि–हे राजन् ! बीस सहस्र आठसौ राजा युद्धमें हारकर जरासंध से पर्वत की गुफामें बंदीहुए थे । बहुत दिनतक गुफामें बंदरहने से वह अत्यंत मलीन, कृश और भूख से पीडित होगये थे।क्षीण शरीरयुक्त कारागार से निकल उन्होंने श्रीकृष्णजीका दर्शन किया॥ १–२॥ वे भगवान पीताम्बर धारण कियेहुए थे, वक्षःस्थल में श्रीवत्सका चिह्न व चारभुजा धारण किये, उनके दोनों नेत्र कमल के भीतरी भागके समान लालवर्ण के हैं उनका मुख सुंदर व प्रसन्न है वह कानों में प्रकाशित मकराकृत कुंडल धारण किये व हाथमें कमल लिये हैं । वह गदा, शंख, और चक्रके चिह्नोंसे चिह्नित और किरीट, हार, कडे, कटिमेखला और भुजबंद से भूषित होरहे हैं। उनके कंठमें कौस्तुममणि प्रकाशित होरही है वह बनमाला धारण कियेहुए हैं । श्रीकृष्णजी के दर्शनों से जोआनंद प्राप्तहुआ तब राजा उससे कारागारके दुःखको भूलगये, उनके सब पापभी नष्टहोगये । वह दोनों नेत्रोंसे मानों पीतेहोयँ, जिह्वासे मानों चाटते, नासिका से मानों सूंघते और दोनों भुजाओं से मानों आलिङ्गन करतेहों इसप्रकारसे वे सबराजा मस्तक से हरिके दोनों चरणों को प्रणामकर हाथजोड उनकी स्तुति करनेलगे ॥ ७ ॥ राजाओं ने कहाकि–हे देव देवेश ! हे अव्यय आपको नमस्कार है। हे कृष्ण ! हम आपकी शरण में आये हैं इस दुःखदायी घोरसंसार से हमारा उद्धारकरो ॥ ८ ॥ हे नाथ ! हे मधुसूदन ! हम इस मगधराजको कुछभी दोष नहीं देते । हे विभो ! हमलोग जो राजच्युत हुए वह आपका अनुग्रह है । राजा, राज्य और ऐश्वर्य के मदसे मत्तहोकर कल्याण नहीं प्राप्त करसकते; आपकी मायासे मोहितहो अनित्य सम्पत्तिको नित्यजान गर्वित होजाते हैं ॥ ९–१० ॥ जैसे बालक मृगतृष्णाको जलाशय जानते हैं तैसेही अ-

म् । पश्यन्त्येकारिकीं मायामयुक्ता वस्तुचक्षते ॥ ११ ॥ वयंपुराश्रीमदनष्टदृष्टयोजिगी षयाऽस्याइतरेतरस्पृधः । घ्नन्तःप्रजाःस्वा अतिनिर्घृणाःप्रभोमृत्युंपुरस्त्वाऽविगण्य्यदुर्मदाः ॥ १२ ॥ तएवकृष्णाद्यगभीररंहसादुरन्तवीर्येणविचालिताःश्रियः । कालेनतन्वाभवतोऽनुकम्पयाविनष्टदर्पाश्चरणौस्मरामते ॥ १३ ॥ अथोनराज्यंमृगतृष्णिरूपितंदेहेनशश्वत्पततारुजांभुवा । उपासितव्यंस्पृहयामहेविभोक्रियाफलंप्रेत्यचकर्णरोचनम् ॥ १४ ॥ तंनःसमादिशोपायंयेनतेचरणाब्जयोः । स्मृतिर्यथानविरमेदपिसंसरतामिह ॥ १५ ॥ कृष्णायवासुदेवायहरयेपरमात्मने । प्रणतक्लेशनाशायगोविन्दायनमोनमः ॥ १६ ॥ श्रीशुक उवाच ॥ संस्तूयमानोभगवान्राजभिर्मुक्तबन्धनैः । तानाहकरुणस्तातशरण्यःश्लक्ष्णयागिरा ॥ १७ ॥ श्रीभगवानुवाच ॥ अद्यप्रभृतिवोभूपामय्यात्मन्यखिलेश्वरे । सुदृढाजायतेभक्तिर्बाढमाशंसितंतथा ॥ १८ दिष्ट्याव्यवसितंभूपाभवन्तऋतभाषिणः । श्रियैश्वर्यमदोन्नाहंपश्यउन्मादकंनृणाम् ॥ १९ ॥ हैहयोनहुषोवेनोरावणोनरकोऽपरे । श्रीमदाद्भ्रंशिताःस्थानाद्देवदैत्यनरेश्वराः ॥ २० ॥ भवन्तएतद्विज्ञायदेहाद्युत्पाद्यमन्तवत् । मांयजन्तोऽध्वरैर्युक्ताःप्रजाधर्मेणरक्षथ ॥ २१ ॥ संतन्वन्तःप्रजातन्तून्सुखंदुःखंभवाभवौ । प्राप्तंप्राप्तंचसेवन्तोमच्चित्ताविचरिष्यथ ॥ २२ ॥ उदासीनाश्चदेहादावात्मरामाधृतव्रताः । मय्यावेश्यमनःसम्यङ्मामन्तेब्रह्मयास्यथ ॥ २३ ॥ श्रीशुक उवाच ॥ इत्यादिश्यनृपान्कृष्णोभगवान्भुवनेश्वरः । तेषांन्ययुङ्क्तपुरुषान्स्त्रियोमज्जनकर्मणि ॥ २४ ॥

विचारी मनुष्य विकारवान मायाको सत्य मानते हैं ॥११ ॥ पहिले ऐश्वर्य्य के गर्वसे हमलोगों की भी बुद्धि भ्रमित होगई थी, इस पृथ्वी के जीतलेने की कामना से हम परस्पर शत्रुता रखते, और अपने शिरपर रहेमृत्यु रूप आपको न गिनकर मतवालेहो अत्यंत निठुरता से मनुष्योंको मारते थे ॥ १२ ॥ हे श्रीकृष्ण ! हम सम्पत्ति के गम्भीर पराक्रम से गर्वितहोरहे थे, आज आपकी कृपाके अनुग्रह से अभिमान रहितहो आपके दोनों चरण कमलों का स्मरण करते हैं ॥ १३ ॥ अबहमें राज्यकी कामना नहीं है। राज्य मृगतृष्णा की समान है, सबरोगों की जन्मभूमि इस क्षणभंगुर देहसे उसकी नित्य उपासना करनी पड़ती है। हम परलोक मेंभी कर्म फलसे स्वर्गादि की भी कामना नहीं करते क्योंकि वहतो केवल कानोंहीको प्रिय है ॥ १४ ॥ अतएव आप ऐसा उपाय बतलाओ कि जिससे हम संसारमें भ्रमण करते हुएभी आपके चरण कमलोंको न भूलसकें ॥१५॥ हे श्रीकृष्ण वासुदेव, हरि, परमात्मा, भक्तोंके क्लेशनाशक गोविंद आपको बारंबार हमारा नमस्कार है ॥ १६ ॥ श्रीशुकदेवजी बोलेकि—हे वत्स ! शरणागत वत्सल दयालु भगवान की जब छूटेहुए राजाओं ने इस प्रकार स्तुति की तब भगवान ने मनोहर वाक्यों से उनसे कहाकि—॥ १७ ॥ हे राजाओं ! तुमलोग जोइच्छा करतेहो वह निश्चयही आजसे मुझ अखिलेश्वर आत्मा में तुम्हारी दृढभक्ति होवेगी ॥ १८ ॥ हे राजालोग ! तुम्हारा संकल्प बहुतही अच्छा है, तुमलोग जोकहतेहो वह सब सत्य हैं। मै देखता हूं कि लक्ष्मी और ऐश्वर्यका मदलोगोंको उन्मत्त करदेता है ॥१९॥ कार्त्तवीर्य, नहुष, वेण, रावण, नरकासुर और दूसरे भी देव, दैत्य और राजा ऐश्वर्य के मदसे अंधे होकर अपने स्थानों से पतित हुए हैं ॥ २० ॥ तुम इस देहसे उत्पन्नहुई वस्तुओं का अन्त है, यह जान मेरी आराधना कर सावधानहो धर्मानुसार प्रजाका पालन करो ॥ २१ ॥ पुत्र पौत्रों का होना, सुख दुःख, मंगल अमंगल जो होवे उसीसे सन्तुष्टहो मुझमें चित्तलगाय भ्रमणकरो ॥२२॥ जो तुम देहादि से उदासीन व आत्माराम होकर नियमपूर्वक रहोगे तो अन्तमें परब्रह्म स्वरूप मुझको प्राप्त होओगे ॥ २३॥ श्रीशुकदेवजी बोले कि हे राजन् ! भुवनेश्वर भगवान श्रीकृष्णजी राजाओंको इसप्रकारसे आज्ञादे उनके उबटन और स्नानादि करानेके निमित्त कितनेही दास दासी

सपर्य्यांकारयामास सहदेवेन भारत । नरदेवोचितैर्वस्त्रैर्भूषणैः स्रग्विलेपनैः ॥ २५ ॥ भोजयित्वा वरान्नेन सुस्नातान्समलंकृतान् । भोगैश्च विविधैर्युक्तांस्ताम्बूलाद्यैर्नृपोचितैः ॥ २६ ॥ ते पूजिता मुकुन्देन राजानो मृष्टकुण्डलाः । विरेजुर्मोचिताः क्लेशात्प्रावृडन्ते यथा ग्रहाः ॥ २७ ॥ रथान्सदश्वानारोप्य मणिकाञ्चनभूषितान् । प्रीणय्य सूनृतैर्वाक्यैः स्वदेशान्प्रत्ययापयत् ॥ २८ ॥ त एवं मोचिताः कृच्छ्रात्कृष्णेन सुमहात्मना । ययुस्तमेव ध्यायन्तः कृतानि च जगत्पतेः ॥२९॥ जगदुः प्रकृतिभ्यस्ते महापुरुषचेष्टितम् । यथाऽन्वशासद्भगवांस्तथा चक्रुरतन्द्रिताः ॥ ३० ॥ जरासन्धं घातयित्वा भीमसेनेन केशवः । पार्थाभ्यां संयुतः प्रायात्सहदेवेन पूजितः ॥ ३१ ॥ गत्वा ते खाण्डवप्रस्थं शङ्खान्दध्मुर्जितारयः । हर्षयन्तः स्वसुहृदो दुर्हृदां चासुखावहाः ॥३२॥ तच्छ्रुत्वा प्रीतमनस इन्द्रप्रस्थनिवासिनः । मेनिरे मागधं शान्तं राजा चाप्तमनोरथः ॥ ॥ ३३ ॥ अभिवन्द्याथ राजानं भीमार्जुनजनार्दनाः । सर्वमाश्रावयाञ्चक्रुरात्मना यदनुष्ठितम् ॥ ३४ ॥ निशम्य धर्मराजस्तत्केशवेनानुकम्पितम् । आनन्दाश्रुकलां मुञ्चन्प्रेम्णा नोवाच किञ्चन ॥ ३५ ॥

इति श्री भ०म०द०उ० कृष्णाद्यागमने त्रिसप्ततितमोऽध्यायः ॥ ७३ ॥

श्रीशुक उवाच ॥ एवं युधिष्ठिरो राजा जरासन्धवधं विभोः । कृष्णस्य चानुभावं तं श्रुत्वा प्रीतस्तमब्रवीत् ॥ १ ॥ युधिष्ठिर उवाच ॥ ये स्युस्त्रैलोक्यगुरवः सर्वे लोकमहेश्वराः । वहन्ति दुर्लभं लब्ध्वा शिरसैवानुशासनम् ॥ २ ॥ स भवानरविन्दाक्षो

नियुक्त करदिये ॥२४॥ हे भारत! सहदेवसे राजाओं के योग्य वस्त्र,आभूषण,माला और चन्दन आदिसे उनका सन्मान करवाया ॥ २५ ॥ उन्हें श्रेष्ठ अन्नका भोजन करवाय, न्हिलाय, धुलाय, नाना प्रकार के भोग अर्पणकर, पानआदि पदार्थ दे ॥ २६ ॥ श्रीकृष्णजी ने उन राजाओं का सन्मान किया, तबवे सुंदर कुंडल धारणकर क्लेशरहितहो; वर्षाऋतु के अंतके ग्रहोंकी समान, शोभावेने लगे ॥ २७ ॥ श्रीकृष्णजी ने नाना मधुर वचनों से उन्हें सन्तुष्टकर रत्न और सुवर्ण की सामग्री वाले रथोंपर कि जिनमें श्रेष्ठ घोड़ेजुते थे बिठाय उनको अपने २ देशोमें भेजदिया॥२८॥ वे महात्मा श्रीकृष्णजी के इसप्रकार बंदीग्रह से छुटाने और उनके कार्योंका ध्यान करते २ अपने २ देशकोगये ॥ २९ ॥ उन्हों ने अपने २ राज्यमें पहुंच भगवानका सब चरित्र कहा और भगवान् ने जिसप्रकार से आज्ञाकी थी उसी प्रकारसे दुष्टोंको दंडदेते हुए राज्य कार्यमें प्रवृत्त हुए॥३०॥ हे महाराज! श्रीकृष्णजी इस प्रकार से भीमसेन द्वारा जरासंधको मरवाय, सहदेवकी पूजाको ग्रहणकर अर्जुन और भीमसेन के साथ इन्द्र प्रस्थको चले ॥ ३१ ॥ शत्रुविजयी उनतीनों वीरोंने इन्द्र प्रस्थमें पहुंच अपने बंधुओंको आनंदित और शत्रुओंको दुःखितकर, शंख बजाया ॥ ३२ ॥ इन्द्र प्रस्थवासी उस शंख नादको सुनकर जानगये कि जरासंध मारागया और राजा युधिष्ठिर के भी मनोरथपूर्ण हुए ॥ ३३ ॥ अनंतर भीम, अर्जुन और श्रीकृष्णजी ने राजाको वंदनाकी और श्रीकृष्णजी ने जोकुछ वहां किया था वह सब कह सुनाया ॥ ३४ ॥ धर्मराज श्रीकृष्णजी की उस अनुकम्पा का वृत्तान्तसुन आनंदाश्रु गिराते हुए प्रेमसे गद्गद होगये। और प्रेमके मारे उनके मुख से बोल न निकला ॥ ३५ ॥

इतिश्री मद्भागवतेमहापुराणेदशमस्कन्धेसरलाभाषाटीकायांत्रिसप्ततितमोऽध्यायः ॥ ७३ ॥

श्रीशुकदेवजी बोले कि राजायुधिष्ठिर इसप्रकारसे जरासंधके वध और श्रीकृष्णजी के उस प्रभावको सुन प्रफुल्लितहो थोड़ी देरके उपरान्त श्रीकृष्णजीसे कहा ॥ १ ॥ कि हेप्रभो! त्रिलोकी के गुरु सनकादि ऋषि और समस्त लोक व लोकपालगण भी आपकी दुर्लभ आज्ञाको पाय उस

दीनानामभिमानिनाम् । धत्सेऽनुशासनं भूमंस्तदत्यन्तविडम्बनम् ॥ ३ ॥ न ह्येकस्या
द्वितीयस्य ब्रह्मणः परमात्मनः । कर्मभिर्वर्धते तेजो ह्रसते च यथा रवेः ॥ ४ ॥ न वै तेऽ
जित भक्तानां ममाहमिति माधव । त्वं तवेति च नानाधीः पशूनामिव वैकृता ॥ ५ ॥ श्री
शुक उवाच ॥ इत्युक्त्वा यज्ञिये काले वव्रे युक्तान्स ऋत्विजः । कृष्णानुमोदितः पार्थो
ब्राह्मणान्ब्रह्मवादिनः ॥ ६ ॥ द्वैपायनो भरद्वाजः सुमन्तुर्गौतमोऽसितः । वसिष्ठश्च्य
वनः कण्वो मैत्रेयः कवषस्त्रितः ॥ ७ ॥ विश्वामित्रो वामदेवः सुमतिर्जैमिनिः क्रतुः ।
पैलः पराशरो गर्गो वैशम्पायन एव च ॥ ८ ॥ अथर्वा कश्यपो धौम्यो रामो भार्गव आसु
रिः । वीतिहोत्रो मधुच्छन्दा वीरसेनोऽकृतव्रणः ॥ ९ ॥ उपहूतास्तथा चान्ये द्रोणभी
ष्मकृपादयः । धृतराष्ट्रः सहसुतो विदुरश्च महामतिः ॥ १० ॥ ब्राह्मणाः क्षत्रिया वै
श्याः शूद्रा यत्र दिदृक्षवः । तत्रेयुः सर्वराजानो राज्ञां प्रकृतयो नृप ॥ ११ ॥ ततस्ते दे
वयजनं ब्राह्मणाः स्वर्णलाङ्गलैः । कृष्ट्वा तत्र यथाम्नायं दीक्षयाञ्चक्रिरे नृपम् ॥ १२ ॥
हैमाः किलोपकरणा वरुणस्य यथा पुरा । इन्द्रादयो लोकपाला विरिञ्चिभवसंयुता
॥ १३ ॥ सगणाः सिद्धगन्धर्वा विद्याधरमहोरगाः । मुनयो यक्षरक्षांसि खगकिन्नरचा
रणाः ॥ १४ ॥ राजानश्च समाहूता राजपत्न्यश्च सर्वशः । राजसूयं समीयुः स्म राज्ञः
पाण्डुसुतस्य वै ॥ १५ ॥ मेनिरे कृष्णभक्तस्य सूपपन्नमविस्मिताः । अयाजयन्महाराजं या
जका देववर्चसः ॥ १६ ॥ राजसूयेन विधिवत्प्राचेतसमिवामराः । सौत्येऽहन्यवनीपालो
याजकान्सदसस्पतीन् । अपूजयन्महाभागान्यथावत्सुसमाहितः ॥ १७ ॥ सदस्याग्र्या
र्हणार्हं वै विमृशन्तः सभासदः । नाध्यगच्छन्ननैकान्त्यात्सहदेवस्तदाऽब्रवीत् ॥ १८ ॥

को शिरपर धारण करते हैं । हे कमललोचन ! हे ईश्वर ! हे भूमन् ! वही भगवान आप दीन और अभिमानी मेरी आज्ञा का पालन करतेहो यह अत्यंतही विडम्बना है ॥ २—३ ॥ आप एक, अद्वितीय, ब्रह्म और परमात्माहो; सूर्य के तेज की समान आपकी महिमा किसी कर्म से भी नहीं घटबढ़सकती ॥ ४ ॥ हेमाधव ! हे अजित ! अज्ञान पशुओं की समान आप के भक्तों की शरीरादि विषय में 'मेरा' और 'मैं' व 'तू' और 'तेरा' ऐसी भेद बुद्धि नहीं होती तब आपकी क्या बात कहूं ॥ ५ ॥ श्रीशुकदेवजी बोले कि—युधिष्ठिर ने इसप्रकार से कह भगवान से सम्मतिले यज्ञके योग्य समय मे ब्रह्मवेत्ता ब्राह्मण और पुरोहितों का वरण किया ६ ॥ हेराजन् ! व्यासजी, भरद्वाज, सुमंतु, गौतम, असित, वशिष्ठ, च्यवन, कण्व, मैत्रय, कवष, त्रित, ॥ ७ ॥ विश्वामित्र, वामदेव, जैमिनि, सुमति, क्रतु, पैल, पराशर, गर्ग, वैशम्पायन, ॥ ८ ॥ अथर्वा कश्यप, धौम्य, परशुराम, आसुरि, वीतिहोत्र, मधुच्छन्दा, वीरसेन, अकृतव्रण ॥ ९ ॥ औरभी दूसरे ऋषि और द्रोण, भीष्म, कृपादि, पुत्रों समेत धृतराष्ट्र, महामति विदुर ॥ १० ॥ ब्राह्मण, वैश्य, शूद्र, समस्त राजा और राजाओं की प्रजा ये सब यज्ञ देखने की इच्छा से वहां आये ॥ ॥ ११ ॥ अनन्तर उनसब ब्राह्मणों ने सुवर्ण के हलसे यज्ञभूमि प्रस्तुतकर वेदानुसार राजा को दीक्षित किया ॥ १२ ॥ पूर्वकाल में जैसे वरुण के यज्ञमें सबसामग्री सुवर्ण कीथी वैसेही राजा युधिष्ठिर के भी यज्ञमें सबसामग्री सुवर्ण की हुई इन्द्रादि लोकपाल, गणोंसमेत शंकर, ब्रह्मा, सिद्ध, गन्धर्व, विद्याधर, उरग, मुनि, यक्ष, राक्षस, पक्षी, किन्नर, चारण और सर्वत्र से सबराजा और राजरानियें निमन्त्रित होकर वहां आईं ॥ १३-१४—१५ ॥ उन सबने विस्मितनहो श्रीकृष्णजी के भक्त राजा युधिष्ठिर के यज्ञको भलीप्रकार पूर्णकराया । देवताओं की समान तेजस्वीऋत्विज ने देवताओं ने जैसे वरुणको यज्ञकरायाथा वैसेही महाराज युधिष्ठिर को राजसूय यज्ञ करवाया ॥ १६ ॥ राजा युधिष्ठिर ने सावधानहो सोमाभिषव के दिन ऋत्विज और सभासदों का यथाविधिसे पूजन किया ॥ १७ ॥ हेराजन् ! वहांपर प्रथमपूजा पानेके योग्य बहुत से मनुष्य बैठेथे, अतएव

अर्हति ह्यच्युतः श्रैष्ठ्यं भगवान्सात्वतां पतिः। एष वै देवताः सर्वा देशकालधनादयः ॥ १९ ॥ यदात्मकमिदं विश्वं क्रतवश्च यदात्मकाः। अग्निराहुतयो मन्त्राः सांख्यं योगश्च यत्परः ॥ २० ॥ एक एवाद्वितीयोऽसावैतदात्म्यमिदं जगत्। आत्मनाऽऽत्माश्रयः सभ्याः सृजत्यवति हन्त्यजः ॥ २१ ॥ विविधानीह कर्माणि जनयन्यदवेक्षया। ईहते यदयं सर्वः श्रेयो धर्मादिलक्षणम् ॥ २२ ॥ तस्मात्कृष्णाय महते दीयतां परमार्हणम्। एवं चेत्सर्वभूतानामात्मनश्चार्हणं भवेत् ॥ २३ ॥ सर्वभूतात्मभूताय कृष्णायानन्यदर्शिने। देयं शान्ताय पूर्णाय दत्तस्यानन्त्यमिच्छता ॥ २४ ॥ इत्युक्त्वा सहदेवोऽभूत्तूष्णीं कृष्णानुभाववित्। तच्छ्रुत्वा तुष्टुवुः सर्वे साधु साध्विति सत्तमाः ॥ २५ ॥ श्रुत्वा द्विजेरितं राजा ज्ञात्वा हार्दं सभासदाम्। समर्हयद्धृषीकेशं प्रीतः प्रणयविह्वलः ॥२६॥ तत्पादाववनिज्यापः शिरसा लोकपावनीः। सभार्यः सानुजामात्यः सकुटुम्बोऽवहन्मुदा ॥ २७ ॥ वासोभिः पीतकौशेयैर्भूषणैश्च महाधनैः। अर्हयित्वाऽश्रुपूर्णाक्षो नाशकत्समवेक्षितुम् ॥ २८ ॥ इत्थं सभाजितं वीक्ष्य सर्वे प्राञ्जलयो जनाः। नमो जयेति नेमुस्तं निपेतुः पुष्पवृष्टयः ॥ २९ ॥ इत्थं निशम्य दमघोषसुतः स्वपीठादुत्थाय कृष्णगुणवर्णनजातमन्युः। उत्क्षिप्य बाहुमिदमाह सदस्यमर्षी संश्रावयन्भगवते परुषाण्यभीतः ॥ ३० ॥ ईशो दुरत्ययः काल इति सत्यवती श्रुतिः। वृद्धानामपि यद्बुद्धिर्बालवाक्यैर्विभिद्यते ॥ ३१ ॥ यूयं पात्रविदां श्रेष्ठा मा मन्ध्वं बालभाषितम्। सदस

प्रथम किसको अर्घ्य देनाचाहिए सभासद इसको विचार करनेलगे। तब सहदेव ने कहा ॥१८॥ यदुवंशियों के अधिपति भगवान श्रीकृष्णजी प्रथम पूजापाने के योग्य हैं, देश, काल और पात्र के विचारसे इनकी पूजा करनेपरही सब देवताओं की पूजाहोजायगी ॥ १९ ॥ यही विश्वके और सबयज्ञों के आत्माहैं। यही अग्नि, आहुति, मंत्र, ज्ञान और यही योगकी अंतिम सीमा हैं॥२०॥ यही एक, अद्वितीय और यही जगत् के आत्माभी हैं। हेसभासदो! यही स्वाश्रय भगवानही आप जगत्की उत्पत्ति, पालन और संहार करते हैं ॥ २१ ॥ इसकारण यह समस्त लोक इनके ही अनुग्रह से नानाकर्मों का अनुष्ठानकर धर्मादि रूप मङ्गलका साधन करसकते हैं ॥ २२ ॥ अतएव श्रीकृष्णजीकोही पहिले पूजा देनीचाहिए ऐसा करने से सबप्राणियों के आत्मा की पूजा होजावेगी ॥ २३ ॥ जो दानके अनन्तफलकी इच्छा करें उनको उचित है कि वह सर्व प्राणियों के आत्मभूत भेदज्ञानरहित शांत और पूर्ण श्रीकृष्णजीकोही दानकरें ॥ २४ ॥ श्रीकृष्णजी के प्रभाव को जाननेवाले सहदेव यह कहकर चुप होगये। यहसुनकर सब श्रेष्ठसाधू 'साधु साधु' कहनेलगे ॥ २५ ॥ राजा युधिष्ठिर ब्राह्मणों का साधुवादसुन और सभासदों का मतजान प्रेम से विह्वल होगये और उन्होंने श्रीकृष्णजी की पूजाकी, ॥ २६ ॥ श्रीकृष्णजी के दोनों पावों को धोय उस लोकपावन जलको स्त्री, भाई, मन्त्री और कुटुम्बियों समेत शिरपर धारणकिया ॥२७॥ रेशमी पीताम्बर और अमूल्य आभूषणों से पूजा करते २ राजा के दोनों नेत्रोंसे आंसू गिरनेलगे इससे वह भगवान को भलीप्रकार से न देखसके ॥ २८ ॥ सब मनुष्य श्रीकृष्णजी को इसप्रकार से पूजित होता देख हाथ जोड़ 'जय, 'नमः, यह कहकर उनको नमस्कार करने लगे और फूलों की वर्षा होनेलगी, ॥ २९ ॥ हे राजन्! श्रीकृष्णजी के गुणोंकी वर्णना होनेके कारण दमघोष के पुत्र शिशुपाल को क्रोध उत्पन्न हुआ श्री हरिके इसप्रकार के सन्मान को वह न सहसका। वह अपने आसन से उठ दोनों भुजाओं को उठाय क्रोध सहित निर्भय चित्तहो सबको सुनाता हुआ कटु वाक्योंसे भगवानकी निंदा करनेलगा ॥ ३० ॥ शिशुपाल बोला कि कैसा अलंघ्य और समर्थ काल आ उपस्थित हुआ कि—जिस से इससमय बालक के वाक्यों से बूढ़ों की भी बुद्धि विचलित होगई ॥३१॥ हेसभासदो! आप पात्र जाननेवालों में श्रेष्ठहो इस बालकके

ज्ञातयः सर्वं कृष्णो यत्संमतोऽर्हणे ॥ ३२ ॥ तपोविद्याव्रतधरान्ज्ञानविध्वस्तकल्मषान् । परमर्षीन्ब्रह्मनिष्ठाँल्लोकपालैश्च पूजितान् ॥ ३३ ॥ सदस्पतीनतिक्रम्य गोपालः कुलपांसनः । यथा काकः पुरोडाशं सपर्यां कथमर्हति ॥ ३४ ॥ वर्णाश्रमकुलापेतः सर्वधर्मबहिष्कृतः । स्वैरवर्ती गुणैर्हीनः सपर्यां कथमर्हति ॥ ३५ ॥ ययातिनैषां हि कुलं शप्तं सद्भिर्बहिष्कृतम् । वृथापानरतं शश्वत्सपर्यां कथमर्हति ॥ ३६ ॥ ब्रह्मर्षिसेवितान्देशान्हित्वैतेऽब्रह्मवर्चसम् । समुद्रं दुर्गमाश्रित्य बाधन्ते दस्यवः प्रजाः ॥ ३७ ॥ एवमादीन्यभद्राणि बभाषे नष्टमङ्गलः । नोवाच किंचिद्भगवान्यथा सिंहः शिवारुतम् ॥ ३८ ॥ भगवन्निन्दनं श्रुत्वा दुःसहं तत्सभासदः । कर्णौ पिधाय निर्जग्मुः शपन्तश्चेदिपं रुषा ॥ ३९ ॥ निन्दां भगवतः शृण्वंस्तत्परस्य जनस्य वा । ततो नापैति यः सोऽपि यात्यधः सुकृताच्च्युतः ॥ ४० ॥ ततः पाण्डुसुताः क्रुद्धा मत्स्यकैकयसृञ्जयाः । उदायुधाः समुत्तस्थुः शिशुपालजिघांसवः ॥ ४१ ॥ ततश्चैद्यस्त्वसंभ्रान्तो जगृहे खड्गचर्मणी । भर्त्सयन्कृष्णपक्षीयान्राज्ञः सदसि भारत ॥ ४२ ॥ तावदुत्थाय भगवान्स्वान्निवार्य स्वयं रुषा । शिरः क्षुरान्तचक्रेण जहारापततो रिपोः ॥ ४३ ॥ शब्दः कोलाहलोऽप्यासीच्छिशुपाले हते महान् । तस्यानुयायिनो भूपा दुद्रुवुर्जीवितैषिणः ॥ ॥ ४४ ॥ चैद्यदेहोत्थितं ज्योतिर्वासुदेवमुपाविशत् । पश्यतां सर्वभूतानामुल्केव भुवि खाच्च्युता ॥ ४५ ॥ जन्मत्रयानुगुणितवैरसंरब्धया धिया । ध्यायंस्तन्मयतां यातो

कहनेपर ध्यान न दो क्या श्रीकृष्ण पूजाके योग्य है, ॥ ३२ ॥ तपस्या, विद्या, व्रत, और ज्ञान से जिनके पाप नष्ट और अज्ञान दूरहोगयाहै, जो ब्रह्मनिष्ठ हैं लोकपाल भी जिनकी पूजा करते है उन सर्व श्रेष्ठ ऋषि सभासदों को छोड़कर कुलनाशक अहीर किसप्रकार से पूजा के योग्य होसकता है ? भला काक क्या पुरोडाश को लेसकता है ॥ ३३—३४ ॥ यह कृष्ण—वर्ण, आश्रम और कुलसे भ्रष्टहै यह सब धर्मोंसे बाहरहै इसमें और कोई गुण नहीं है-यह केवल स्वेच्छाचारी है, यह किसप्रकार पूजाको प्राप्त होसकताहै ॥ ३५ ॥ ययातिने इसके कुलको शापदिया साधुओं ने इस को छोड़दिया और निरन्तरही वृथा मद्पान में रहता है इसका कुल किसप्रकार से पूजाके योग्य होसकताहै ॥ ३६ ॥ यह ब्रह्मर्षियों से सेवित देशको समुद्रकी शरणले डाकुओं की समान प्रजा को दुःख देता रहताहै ॥ ३७ ॥ जिसके मंगल नष्ट होगयेहैं ऐसे शिशुपालने इसप्रकारके अनेकों कटुवाक्य कहे किन्तु सिंह जैसे सियार के शब्द को नहीं सुनता भगवान ने वैसेही उन सबको सुनकर कुछ न कहा ॥ ३८ ॥ सभासद् इस असह्य भगवन्निन्दा को सुन दोनों कानोंको बन्दकर क्रोधसे शिशुपाल को गाली देते २ बाहर होनेलगे ॥ ३९ ॥ जो मनुष्य भगवान व भगवद्भक्तकी निन्दा सुनकर उस स्थान से चले नहींजाते वह पुण्य रहितहो नरकमें गिरतेहैं ॥ ४० ॥ अनन्तर पांडुपुत्र, मत्स्य, सृञ्जय और केकयगण क्रोधितहो अपने अस्त्र शस्त्र उठाय शिशुपालके मारने के निमित्त उठे ॥ ४१ ॥ हेभारत ! परन्तु शिशुपाल उससे कुछभी विचलित न हुआ। उसने श्रीकृष्ण जीके पक्षवाले राजाओं का तिरस्कारकर ढाल तलवार हाथमेंली ॥ ४२ ॥ उसीसमय भगवान् ने उठकर अपने पक्षवालों को निवारण किया और शिशुपाल जैसेही आगे बढा वैसेही छुरेकी धारवाले चक्रसे उसका शिर काटडाला, ॥ ४३ ॥ शिशुपाल के मरतेही बड़ा घोर शब्द हुआ, । उसके वशवर्त्ती राजा प्राण रक्षाकी इच्छासे भागनेलगे ॥ ४४ ॥ जैसे आकाश से छूटकर उल्का पृथिवीपर गिरतीहै वैसेही शिशुपाल की देहसे ज्योति निकलकर सब मनुष्यों के सामनेही भगवानकी देहमें प्रवेश करगई ॥ ४५ ॥ तीन जन्म से जो उसने वैरकी चिन्ता की थी, इसकारण

भावोहि भवकारणम् ॥ ४६ ॥ ऋत्विग्भ्यः ससदस्येभ्यो दक्षिणां विपुलामदात्। स-
र्वान्संपूज्य विधिवच्चक्रेऽवभृथमेकराट् ॥ ४७ ॥ साधयित्वा क्रतुं राज्ञः कृष्णो योगे-
श्वरेश्वरः। उवास कतिचिन्मासान्सुहृद्भिरभियाचितः ॥४८॥ ततोऽनुज्ञाप्य राजा-
नमनिच्छन्तमपीश्वरः। ययौ सभार्यः सामात्यः स्वपुरं देवकीसुतः ॥ ४९ ॥ वर्णितं
तदुपाख्यानं मया ते बहुविस्तरम्। वैकुण्ठवासिनोर्जन्म विप्रशापात्पुनःपुनः ॥ ५० ॥
राजसूयावभृथ्येन स्नातो राजा युधिष्ठिरः। ब्रह्मक्षत्रसभामध्ये शुशुभे सुरराडिव ॥
॥ ५१ ॥ राज्ञा सभाजिताः सर्वे सुरमानवखेचराः। कृष्णं क्रतुं च शंसन्तः स्वधामानि
ययुर्मुदा ॥ ५२ ॥ दुर्योधनमृते पापं कलिं कुरुकुलामयम्। यो न सेहे श्रियं स्फीतां दृ-
ष्ट्वा पाण्डुसुतस्य ताम् ॥ ५३ ॥ य इदं कीर्तयेद्विष्णोः कर्म चैद्यवधादिकम्। राजमो-
क्षं वितानं च सर्वपापैः प्रमुच्यते ॥ ५४ ॥

इति श्रीमद्भा० महा० द० उ० चतुःसप्ततितमोऽध्यायः ॥ ७४ ॥

राजोवाच। अजातशत्रोस्तं दृष्ट्वा राजसूयमहोदयम्। सर्वे मुमुदिरे ब्रह्मन्नृदे-
वा ये समागताः ॥ १ ॥ दुर्योधनं वर्जयित्वा राजानः सर्षयः सुराः। इति श्रुतं नो भगवं-
स्तत्र कारणमुच्यताम् ॥ २ ॥ ऋषिरुवाच ॥ पितामहस्य ते यज्ञे राजसूये महात्मनः
बान्धवाः परिचर्यायां तस्यासन्प्रेमबन्धनाः ॥ ३ ॥ भीमो महानसाध्यक्षो धनाध्यक्षः
सुयोधनः। सहदेवस्तु पूजायां नकुलो द्रव्यसाधने ॥४॥ गुरुशुश्रूषणे जिष्णुः कृष्णः
पादावनेजने। परिवेषणे द्रुपदजा कर्णो दाने महामनाः ॥ ५ ॥ युयुधानो विकर्णश्च हा

क्रोधसे चिन्ता करता हुआ शिशुपाल श्रीहरि की स्वरूपता को प्राप्त हुआ, हे राजन्! ध्यानही ध्येय वस्तु की स्वरूपता का कारण है ॥ ४६ ॥ राजा युधिष्ठिरने सभासद और ऋत्विजों को इच्छित दक्षिणादी और यथाविधिसे सबकी पूजाकर अवभृत स्नान किया, ॥ ४७ ॥ योगेश्वरों के ईश्वर श्रीकृष्णजी राजा का यज्ञ समाप्त कराय बन्धुओं की प्रार्थनानुसार कुछेकदिन वहींपररहे ॥ ॥ ४८ ॥ तदनन्तर राजा की इच्छा न होतेहुए, भी उनको जनाय मन्त्री और स्त्रियों समेत अपनी नगरीमें आए ॥ ४९ ॥ ब्राह्मणों के शाप से जय विजय वैकुण्ठ वासियों का बारम्बार जन्म हुआथा इस बहुत विस्तारवाले उपाख्यान को मैं तुमसे कहचुकाहू, ॥ ५० ॥ राजसूय यज्ञ के अन्तमें स्नानकर राजा युधिष्ठिर ब्राह्मण, क्षत्रिय और वैश्यों के बीच इन्द्रकी समान शोभा पानेलगे ॥ ५१ ॥ कुरु कुल के रोग कलिरूपी पापी दुर्योधन के विना देवता मनुष्य और प्रथमगण सबही राजा से पूजितहो यज्ञ और श्रीकृष्णजी की प्रशंसा करते २ आनन्द से अपने २ स्थान में आए ॥ ५२ ॥ पांडुपुत्रों की उस बढ़ीहुई लक्ष्मी का दुर्योधन सहन न करसका ॥५३॥ जो भगवानके शिशुपाल वध आदि कार्य और राजाओं के बन्दीगृहसे छूटने का चरित्र जो गावेगा अथवा युधिष्ठिर के राजसूय यज्ञके विषय को विचारेगा वह समस्त पापोंसे छूट जावेगा ॥ ५४ ॥

इतिश्रीमद्भा०महा०दशम०उ०सरलाभाषाटीकायांचतुःसप्ततितमोऽध्यायः ॥ ७४ ॥

राजा परीक्षित् ने कहा कि—हेब्रह्मन्! अजात शत्रु राजा युधिष्ठिर के राजसूय यज्ञ को देखने के निमित्त जो देवता, ऋषि, और राजा आएथे वह सबही आनन्दित हुये, ॥ १ ॥ हेभगवन्! परन्तु केवल राजा दुर्योधनही को क्या आनन्द न हुआ, इसका क्या कारणथा सो आप कहिये ॥ १—२ ॥ श्रीशुकदेवजी बोले कि—हेराजन्! तुम्हारे उस महात्मा पितामहके यज्ञ में बान्धव गण प्रेम से बद्धहो यज्ञ कार्य में नियुक्त हुए थे ॥ ३ ॥ भीम रसोई के अध्यक्ष और दुर्योधन धन के अध्यक्ष (भंडारी) हुए थ। सहदेव सत्कार कार्य में, नकुल सामग्री के प्रस्तुत करने में ॥ ४ ॥ अर्जुन साधुओं की सेवा में, श्रीकृष्णजी साधुओं के पैर धोने में, द्रौपदी भोजन परोसनेमें और उदारचित्त दानकर्ण दान देनेमें तत्पर हुआ ॥ ५ ॥ हेराजन्! युयुधान, विकर्ण

उदकुर्वन्गङ्गायां सह कृष्णया ॥१९॥ देवदुन्दुभयो नेदुर्नरदुन्दुभिभिः समम्। मुमुचुः पुष्पवर्षाणि देवर्षिपितृमानवाः ॥ २० ॥ सस्नुस्तत्र ततः सर्वे वर्णाश्रमयुता नराः। महापातक्यपि यतः सद्यो मुच्येत किल्बिषात् ॥ २१ ॥ अथ राजाऽहते क्षौमे परिधाय स्वलंकृतः। ऋत्विक्सदस्यविप्रादीनानर्चाभरणाम्बरैः ॥ २२ ॥ बन्धूञ्ज्ञातीन्नृपान्मित्रसुहृदोऽन्यांश्च सर्वशः। अभीक्ष्णं पूजयामास नारायणपरो नृपः ॥ २३ ॥ सर्वे जनाः सुररुचो मणिकुण्डलस्रगुष्णीषकंचुकदुकूलमहार्घ्यहाराः। नार्यश्च कुण्डलयुगालकवृन्दजुष्टवक्त्रश्रियः कनकमेखलया विरेजुः ॥ २४ ॥ अथर्त्विजो महाशीलाः सदस्या ब्रह्मवादिनः। ब्रह्मक्षत्रियविट्शूद्रा राजानो ये समागताः ॥ २५ ॥ देवर्षिपितृभूतानि लोकपालाः सहानुगाः। पूजितास्तमनुज्ञाप्य स्वधामानि ययुर्नृप ॥ २६ ॥ हरिदासस्य राजर्षे राजसूयमहोदयम्। नैवातृप्यन्प्रशंसन्तः पिबन्मर्त्योऽमृतं यथा। ॥ २७ ॥ ततो युधिष्ठिरो राजा सुहृत्सम्बन्धिबान्धवान्। प्रेम्णा निवारयामास कृष्णं च त्यागकातरः ॥२८॥ भगवानपि तत्राङ्ग न्यवात्सीत्तत्प्रियंकरः। प्रस्थाप्य यदुवीरांश्च साम्बादींश्च कुशस्थलीम् ॥ २९ ॥ इत्थं राजा धर्मसुतो मनोरथमहार्णवम्। सुदुस्तरं समुत्तीर्य कृष्णेनासीद्गतज्वरः ॥ ३० ॥ एकदान्तःपुरे तस्य वीक्ष्य दुर्योधनः श्रियम्। अतप्यद्राजसूयस्य महित्वं चाच्युतात्मनः ॥ ३१ ॥ यस्मिन्नरेन्द्रदितिजेन्द्रसुरेन्द्रलक्ष्मीर्नाना विभान्ति किल विश्वसृजोपक्लृप्ताः। ताभिः पतीन्द्रुपदराजसुतोपतस्थे यस्यां विषक्तहृदयः कुरुराडतप्यत् ॥ ३२ ॥ यस्मिंस्तदा मधुपतेर्महिषीसहस्र-

---

उन ऋत्विजों ने पत्नी संयाज और अवभृथ सम्बन्धी कर्म कराने के पश्चात् आचमन करवाय राजा को द्रौपदी समेत गंगामें स्नान करवाया ॥ १९ ॥ उस समय देव दुंदुभि और नर दुंदुभि बजने लगीं तथा देवता, ऋषि, पितर, और मनुष्य फूलोंकी वर्षा करनेलगे ॥ २० ॥ फिर उस स्थानमें समस्तवर्ण और आश्रम के मनुष्यों ने स्नानकिया। हे राजन् ! उस स्थान पर स्नान करने से महा पापी भी तत्कालही पापसे छूटजाता है ॥ २१ ॥ अनन्तर राजाने नवीन रेशमी वस्त्र पहिन भली-प्रकार से अलंकृतहो वस्त्र और आभूषणों द्वाराऋत्विज और सभासदों की पूजाकी ॥ २२ ॥ भगवद्भक्त राजाने अपनेबंधु,जातिवाले, राजा, मित्र, सुहृद और भी दूसरों की भलीप्रकारसे पूजाकी ॥२३॥ सब मनुष्य देवताओं की समान कांतिवानहो और मणि,कुंडल,माला,पगड़ी, दुपट्टा, रेशमी वस्त्र और बड़े मूल्यवाले हार पहिरकर परम शोभाको प्राप्तहुए। स्त्रियोंका मुख कमल भी कुंडलों से शोभित हुआ। वह सोनेकी मेखला धारणकर और भी शोभाको पानेलगीं ॥ २४ ॥ अनंतर महाशील ऋत्विज, ब्रह्मवेत्ता सभासद और ब्राह्मण, क्षत्री, शूद्र, राजगण, देवर्षि, पितर, भूत, अनुचरों समेत सब लोकपाल और दूसरे भी जोवहां उपस्थित थे वे सबही पूजितहो राजा युधिष्ठिर की आज्ञाले प्रसन्न होरं कर अपने २ घरको गये ॥ २५—२६ ॥ जैसे मनुष्य अमृत पीकर तृप्त नहीं होता तैसेही वेभी हरिभक्त राजर्षि युधिष्ठिरके राजसूयकी प्रशंसा करके तृप्तनहीं होतेथे ॥२७॥ अनंतर राजा युधिष्ठिर ने सुहृद, सम्बंधी, बांधव और श्रीकृष्णजी कोभी कातर भावसे प्रेम समेत विदाकिया ॥ २८ ॥ हे राजन् ! भगवान श्रीकृष्णजी ने राजाके कातर वचनों से दयार्द्रहो अपने यदुवीर साम्ब आदिको द्वारका भेजा और आप वहींपर निवास करनेलगे ॥२९॥ हे राजन् ! राजा युधिष्ठिर श्रीकृष्णजी की सहायता से इस प्रकार दुस्तर मनोरथ रूप महासागर के पारहो निश्चिन्त हुए ॥ ३० ॥ महाराज ! एक समय दुर्योधन उन हरिभक्त राजा युधिष्ठिर की लक्ष्मी और राजसूय की प्रशंसा सुनकर अत्यंत संतप्त हुआ॥३१॥ जिस अन्तःपुरमें नरेन्द्र, दैत्येन्द्र, और सुरेन्द्र आदि व नाना प्रकार की विभूतियें मयसे विरचित होकर शोभा पारही थीं, वहां उन विभूतियों समेत द्रौपदी अपने पतियों की सेवाकरती थी, राजा दुर्योधन उनको देखकर अत्यंत संतापको

श्रोणीभरेणसमलंकलयद्भिश्चीभिः । मध्येसुचारुकुचकुङ्कुमशोणहारंश्रीमन्मुखप्रचलकुण्डलकुन्तलाढ्यम् ॥ ३३ ॥ सभायांमयक्लृप्तायांक्वापिधर्मसुतोऽधिराट् । वृतोऽनुजैर्बन्धुभिश्चकृष्णेनापिस्वचक्षुषा ॥ ३४ ॥ आसीनःकाञ्चनेसाक्षादासनेमघवानिव । पारमेष्ठ्यश्रियाजुष्टःस्तूयमानश्चवन्दिभिः ॥ ३५ ॥ तत्रदुर्योधनोमानीपरीतोभ्रातृभिर्नृप । किरीटमालीन्यविशदसिहस्तःक्षिपन्रुषा ॥ ३६ ॥ स्थलेऽभ्यगृह्णाद्वस्त्रान्तंजलंमत्वास्थलेऽपतत् । जलेचस्थलवद्भ्रान्त्यामयमायाविमोहितः ॥ ३७ ॥ जहासभीमस्तंदृष्ट्वास्त्रियोनृपतयोऽपरे । निवार्यमाणाअप्यङ्गराज्ञाकृष्णानुमोदिताः ॥ ३८ ॥ सव्रीडितोऽवाग्वदनोरुषाज्वलन्निष्क्रम्यतूष्णींप्रययौगजाह्वयम् । हाहेतिशब्दःसुमहानभूत्सतामजातशत्रुर्विमनाइवाभवत् । बभूवतूष्णींभगवान्भुवोभरंसमुज्जिहीर्षुर्भ्रमतिस्मयद्दृशा ॥ ३९ ॥ एतत्तेऽभिहितंराजन्यत्पृष्टोऽहमिहत्वया । सुयोधनस्यदौरात्म्यंराजसूयेमहाक्रतौ ॥ ४० ॥

इतिश्रीभा० म० द० उ० पञ्चसप्ततितमोऽध्यायः ॥ ७५ ॥

श्रीशुक उवाच ॥ अथान्यदपिकृष्णस्यशृणुकर्माद्भुतंनृप । क्रीडानरशरीरस्ययथासौभपतिर्हतः ॥ १ ॥ शिशुपालसखः शाल्वोरुक्मिण्युद्वाहआगतः । यदुभिर्निर्जितः संख्येजरासन्धादयस्तथा ॥ २ ॥ शाल्वः प्रतिज्ञामकरोच्छृण्वतांसर्वभूभुजाम् । अयादवींक्ष्मांकरिष्येपौरुषंममपश्यत ॥ ३ ॥ इतिमूढः प्रतिज्ञायदेवंपशुपतिंप्रभुम् । आराधयामासनृपःपांसुमुष्टिंसकृद्ग्रसन् ॥ ४ ॥ संवत्सरान्तेभगवानाशु

प्राप्त हुआ ॥ ३२ ॥ उस अन्तःपुरमें श्रीकृष्णजी की स्त्रियें शोभा पारही थीं, वे नितम्बों के भार से धीरे २ चलती हुई, चरणों के शब्दायमान आभूषण धारण किये, स्तनोंकी केसर से रक्तवर्ण के हार पहिरे, चलायमान कुंडल व केश पाशयुक्त सुंदर मुख व सुंदर कटिवाली स्त्रियें वहां अत्यंत शोभाको बढारही थीं ॥ ३३ ॥ एक समय धर्मराज युधिष्ठिर भाइयों, बंधुओं और अपने नेत्रस्वरूप श्रीकृष्णजी सहित लक्ष्मी वाली मयकी रचीहुई सभामें इन्द्रकी समान सुवर्णमय सिंहासनपर बैठे थे, वहां बंदीजन उनकी स्तुतिकर रहेथे । कि उसी समय अभिमानी राजा दुर्योधन भाइयों सहित क्रोधसे युधिष्ठिर का तिरस्कार करने २ हाथोंमें खड्ग लियेहुए वहांपर आया ॥ ३४—३६ ॥ वह वहां मयकी मायासे मोहितहो जल जान स्थलमें वस्त्रोंको ऊपर उठानेलगा और स्थल के भ्रमसे जलमें गिरपड़ा ॥ ३७ ॥ हे राजन् ! उसको देखकर, युधिष्ठिर के निवारण करने परभी श्रीकृष्ण जी की संमति से भीम, व सब स्त्रियें और दूसरे राजा भी हंसने लगे ॥ ३८ ॥ दुर्योधन लज्जितहो क्रोध से जलते २ नीचेको मुखकिये चुपचाप हस्तिनापुर चलागया । उस समय साधुओं में बड़ा भारी हाहाकार हुआ । इससे युधिष्ठिर कुछएक उदास होगये किन्तु भगवान चुपहोगये । पृथ्वीका भारदूर करने की ही उनकी इच्छा थी, केवल उनकी ही दृष्टिसे दुर्योधन भ्रम में पतित हुआ था ॥ ३९ ॥ हे राजन् ! तुमने जो राजसूय यज्ञ में दुर्योधन के दुरात्मता की बात पूछी थी वह मैंने तुम से कही ॥ ४० ॥

इतिश्री मद्भागवतेमहापुराणेदशमस्कन्धेउत्तरार्धेभाषाटीकायांपञ्चसप्ततितमोऽध्यायः ॥ ७५ ॥

श्रीशुकदेवजी बोले कि—हेराजन् ! जिसप्रकार सौभपति शाल्व मारागयाथा, क्रीडाकेनिमित्त मनुष्यरूपधारी श्रीकृष्णजी का एक और भी अद्भुतकर्म सुनो ॥ १ ॥ रुक्मिणी के विवाह में शिशुपाल का मित्र शाल्व आयेहुए यादवों से जरासन्ध की समान युद्ध में पराजित हुआथा ॥ २ ॥ उस समय शाल्व ने सबराजाओं के सामनेही प्रतिज्ञा कीथी कि—" पृथ्वी को यादवरहित करदूंगा मेरा पराक्रम देखना" ॥ ३ ॥ वह मूर्ख राजा इसप्रकार की प्रतिज्ञाकर प्रतिदिनएक मुट्ठी धूल को फांक महादेवजीकी आराधना करनेलगा ॥ ४ ॥ एक वर्ष के अन्तमें भगवान महादेवजी ने

[illegible] । देवासुरमनुष्याणां गन्धर्वोरगरक्षसाम् ॥ ५ ॥ [illegible] अभेद्यं कामगं वव्रे स यानं वृष्णिभीषणम् ॥ ६ ॥ तथेति गिरिशादिष्टो मयः परपुरंजयः । पुरं निर्माय शाल्वाय प्रादात्सौभमयस्मयम् ॥ ७ ॥ स लब्ध्वा कामगं यानं तमोधाम दुरासदम् । ययौ द्वारवतीं शाल्वो वैरं वृष्णिकृतं स्मरन् ॥ ८ ॥ निरुध्य सेनया शाल्वो महत्या भरतर्षभ । पुरीं बभञ्जोपवनानुद्यानानि च सर्वशः ॥ ९ ॥ सगोपुराणि द्वाराणि प्रासादाट्टालतोलिकाः । विहारान्स विमानाग्र्यान्निपेतुः शस्त्रवृष्टयः ॥ १० ॥ शिला द्रुमाश्चाशनयः सर्पा आसारशर्कराः । प्रचण्डश्चक्रवातोऽभूद्रजसाऽऽच्छादिता दिशः ॥ ११ ॥ इत्यर्द्यमाना सौभेन कृष्णस्य नगरी भृशम् । नाभ्यपद्यत शं राजंस्त्रिपुरेण यथा मही ॥ १२ ॥ प्रद्युम्नो भगवान्वीक्ष्य बाध्यमाना निजाः प्रजाः । मा भैष्टेत्यभ्यधाद्वीरो रथारूढो महायशाः ॥ १३ ॥ सात्यकिश्चारुदेष्णश्च साम्बोऽक्रूरः सहानुजः । हार्दिक्यो भानुविन्दश्च गदश्च शुकसारणौ ॥ १४ ॥ अपरे च महेष्वासा रथयूथपयूथपाः । निर्ययुर्दंशिता गुप्ता रथेभाश्वपदातिभिः ॥ १५ ॥ ततः प्रववृते युद्धं शाल्वानां यदुभिः सह । यथाऽसुराणां विबुधैस्तुमुलं लोमहर्षणम् ॥ १६ ॥ ताश्च सौभपतेर्माया दिव्यास्त्रै रुक्मिणीसुतः । क्षणेन नाशयामास नैशं तम इवोष्णगुः ॥ १७ ॥ विव्याध पञ्चविंशत्या स्वर्णपुङ्खैरयोमुखैः । शाल्वस्य ध्वजिनीपालं शरैः सन्नतपर्वभिः ॥ १८ ॥ शतेनाताडयच्छाल्वमेकैकेनास्य सैनिकान् । दशभिर्दशभिर्नेतॄन्वाहनानि त्रिभिस्त्रिभिः ॥ १९ ॥ तदद्भुतं महत्कर्म प्रद्युम्नस्य महात्मनः । दृष्ट्वा तं पूजयामासुः सर्वे स्वपरसैनिकाः ॥ २० ॥ बहुरूपैकरूपं तद्दृश्यते न च दृश्यते । मायामयं मयकृतं

शरणागत शाल्व से कहा कि-' वरमाग ' ॥५॥ तब शाल्व ने महादेवजी से देवता आ के अभेद्य और यदुवंशियों को भय उपजानेवाला विमानमांगा ॥ ६ ॥ महादेवजी ने ' तथास्तु ' कहकर शत्रुपुरको जीतनेवाले मयको आज्ञादी उसने लोहे का सौभनामक विमानबनाकर शाल्वको दिया ॥७ ॥ शाल्व उस तमोमय दुष्प्राप्य, इच्छाचारी विमान को पाय यदुवंशियोंके वैर का स्मरणकर द्वारका में आया ॥८ ॥ और अपनी बडी सेना से नगरी को घेर वहां के बाग और फुलवाडियों को तोडनेलगा ॥ ९ ॥ उस से द्वार, महल, छत, छज्जे, और खेलने के स्थान टूटन और विमान से अस्त्र, पत्थर, वृक्ष वज्र, सर्प और ओलेपडनेलगे । प्रचण्ड वायु चलने लगा और धूलसे द २ दिशाएं ढकगई ॥ १० । ११ ॥ महाराज ! पृथिवीजैसे त्रिपुरसे पीडित हुईथी वैसेही श्रीकृष्णजी का नगर शाल्व से पीडितहो सुख से न रहसका ॥ १२ ॥ अपनी प्रजाको पीडित होता देख ' भय न करो ' ऐसा कह महारथीवीर भगवान् प्रद्युम्न रथपरचढ दौडे ॥ १३ ॥ सात्यकि,चारुदेष्ण, साम्ब, अक्रूर, भाइयों समेत हार्दिक्य, भानुविंद, गद, शुक और सारण ॥ १४ ॥ तथा औरभी महाधनुर्द्धर सेनापतियों के सेनापति कवच पहिर रथ,हाथी, घोडे और पैदलों से रक्षितहो युद्ध के निमित्त नगर से बाहरहुए ॥ १५ ॥ अनन्तर देवताओं के साथ जैसे असुरों का संग्राम हुआथा वैसेही यदुवंशियों के साथ शाल्व के पक्षवालों से घोरसंग्राम होने लगा ॥१६॥ हेराजन्! उस भयानक युद्ध का वृत्तान्तसुनकर रोमाञ्चहोता है । सूर्य जैसे रात्रिके अन्धकार को दूरकरते हैं वैसेही प्रद्युम्न ने सौभपति के विख्यात मायाजाल को अपने दिव्य अस्त्रों से क्षणभर में छिन्न भिन्न करडाला ॥ १७ ॥ उन्होंने लोहे के फलवाले, सुवर्ण के पुङ्खवाले और छोटी २ सन्धियोंवाले पच्चीस बाणों से शाल्व के सेनापति को मारा, सौ बाणों से शाल्वपर, एक २ बाण से उसकी सेनापर, दश २ बाणों से सेनापतियों पर और तीन २ बाणों से सबवाहनों पर प्रहार किया॥१८॥ ॥ १९ ॥ महात्मा प्रद्युम्न के इस बडे अद्भुतकार्य को देखकर शत्रु और मित्र सबकी सेना के मनुष्य उनकी प्रशंसा करनेलगे ॥ २० ॥ मय का बनायाहुआ वह मायामय विमान कभी बहुत

दुर्विभाव्यं परैरभूत् ॥ २१ ॥ क्वचिद्भूमौ क्वचिद्व्योम्नि गिरिमूर्ध्नि जले क्वचित् । अलातचक्रवद्भ्राम्यत्सौभं तद्दुरवस्थितम् ॥ २२ ॥ यत्र यत्रोपलक्ष्येत ससौभः सहसैनिकः । शाल्वस्ततस्ततोऽमुञ्चञ्छरान्सात्वतयूथपाः ॥ २३ ॥ शरैरग्न्यर्कसंस्पर्शैराशीविषदुरासदैः । पीड्यमानपुरानीकः शाल्वोऽमुह्यत्परेरितैः ॥ २४ ॥ शाल्वानीकपशस्त्रौघैर्वृष्णिवीरा भृशार्दिताः । न तत्यजू रणं स्वं स्वं लोकद्वयजिगीषवः ॥ २५ ॥ शाल्वामात्यो द्युमान्नाम प्रद्युम्नं प्राक्प्रपीडितः । आसाद्य गदया मौर्व्या व्याहत्य व्यनदद्बली ॥ २६ ॥ प्रद्युम्नं गदया शीर्णवक्षःस्थलमरिंदमम् । अपोवाह रणात्सूतो धर्मविद्दारुकात्मजः ॥ २७ ॥ लब्धसंज्ञो मुहूर्तेन कार्ष्णिः सारथिमब्रवीत् । अहो असाध्विदं सूत यद्रणान्मेऽपसर्पणम् ॥ २८ ॥ न यदूनां कुले जातः श्रूयते रणविच्युतः । विना मत्क्लीबचित्तेन सूतेन प्राप्तकिल्बिषात् ॥ २९ ॥ किं नु वक्ष्येऽभिसंगम्य पितरौ रामकेशवौ । युद्धात्सम्यगपक्रान्तः पृष्टस्तत्रात्मनः क्षमम् ॥ ३० ॥ व्यक्तं मे कथयिष्यन्ति हसन्त्यो भ्रातृजामयः । क्लैब्यं कथं कथं वीर तवान्यैः कथ्यतां मृधे ॥ ३१ ॥ सारथिरुवाच । धर्मं विजानताऽऽयुष्मन्कृतमेतन्मया विभो । सूतः कृच्छ्रगतं रक्षेद्रथिनं सारथिं रथी ॥ ३२ ॥ एतद्विदित्वा तु भवान्मयापोवाहितो रणात् । उपसृष्टः परेणेति मूर्च्छितो गदया हतः ॥ ३३ ॥

इति श्रीमद्भा० महा० दशमस्कन्धे उ० षट्सप्ततितमोऽध्यायः ॥ ७६ ॥

रूप से कभी एक रूप से दिखाई देताथा, कभी दीखपडता कभी अदृश्य होजाताथा, इसकारण यादवगण उसको न जानसके ॥ २१ ॥ शाल्व का विमान कभी पृथ्वी पर, कभी आकाशपर, कभी जल में, कभी पहाड़की चोटी में अलात चक्र के समान भ्रमण करनेलगा ॥ २२ ॥ शाल्व सौभ विमानमें बैठाहुआ सैनिकों समेत जिधरही दीखताथा यदुसेनापति उधरही को बाण छोड़ते थे ॥ २३ ॥ अग्नि और सूर्य की समान स्पर्शवाले सर्पकी समान दुःसह, शत्रुओं के फेंकेहुए बाणों से शाल्व की सेना नाशहोनेलगी; तब शाल्व कोभी मोह प्राप्तहुआ ॥ २४ ॥ दोनों लोकों के जीतने की इच्छावाले यदुवंशियों ने शाल्व के सेनापतियों से पीड़ित होकरभी रणभूमि न छोड़ी ॥ २५ ॥ द्युमान् नाम शाल्व का एक मंत्री प्रथम प्रद्युम्न से पीड़ितहुआथा । इस समय उस बलीने निकट आय कृष्णलोह की बनीहुई गदासे प्रद्युम्न पर प्रहारकर बड़ा घोर शब्द किया ॥ २६ ॥ द्युमान् की गदासे वक्षःस्थल के जर्जर होजाने पर धर्मवेत्ता सारथि दारुकनन्दन शत्रुनाशक प्रद्युम्न को युद्धभूमि से दूसरे स्थान पर लेगया ॥ २७ ॥ प्रद्युम्नने थोड़ी देरमें सचेतहो सारथी से कहा अहो सूत ! तुमने मुझे रणभूमि से लाकर बुरा किया ॥ २८ ॥ हाय ! मुझ व्याकुल चित्तको सारथी ने रणसे बाहरलाकर दोषी किया । मेरे अतिरिक्त यदुवंशियों में कोई भी युद्ध से भागा नहीं सुना गया ॥ २९ ॥ मैं धर्मयुद्ध से भागाहुआ पिता राम—कृष्ण के निकट पहुंच उनसे अपने इस अयोग्य कार्य को किसप्रकारकहूंगा ॥ ३० ॥ यह निश्चयही जानाजाता है कि मेरे भाइयोंकीस्त्रियें यह कहकर कि 'हेवीर ! युद्ध में शत्रु ने तुम्हारा पराक्रम कैसे नाशकरदियाथा, इसप्रकार उपहास कर मुझे नपुंसक बनावेंगी ॥ ३१ ॥ सारथी ने कहा, कि—हेआयुष्मान् ! हे विभो ! सारथी को आपत्ति में फँसेहुए रथीकी और रथीको आपत्ति में फँसेहुए सारथी की रक्षाकरनी चाहिए । इसही धर्म के अनुसार मैंने यह कार्य किया है ॥ ३२ ॥ आप शत्रुकी गदाके प्रहार से आहतहो पीड़ित और मूर्छितहोरहे थे, इसही कारण मैं आपको युद्धभूमि से लेआयाथा ॥ ३३ ॥

इतिश्रीमद्भा० महा० दशम० उ० सरलभाषाटीकायांषट्सप्ततितमोऽध्यायः ॥ ७६ ॥

श्रीशुक उवाच ॥ स उपस्पृश्य सलिलं दंशितो धृतकार्मुकः । नय मां द्युमतः पा-
र्श्वं वीरस्येत्याह सारथिम् ॥ १ ॥ विधमन्तं स्वसैन्यानि द्युमन्तं रुक्मिणीसुतः । प्रति-
हत्य प्रत्यविध्यन्नाराचैरष्टभिः स्मयन् ॥ २ ॥ चतुर्भिश्चतुरो वाहान् सूतमेकेन चाहनत्
द्वाभ्यां धनुश्च केतुं च शरेणान्येन वै शिरः ॥ ३ ॥ गदसात्यकिसाम्बाद्या जघ्नुः सौभ
पतेर्बलम् । पेतुः समुद्रे सौभेयाः सर्वे संछिन्नकन्धराः ॥ ४ ॥ एवं यदूनां शाल्वानां
निघ्नतामितरेतरम् । युद्धं त्रिनवरात्रं तदभूत्तुमुलमुल्बणम् ॥ ५ ॥ इन्द्रप्रस्थं गतः कृ-
ष्ण आहूतो धर्मसूनुना । राजसूयेऽथ निर्वृत्ते शिशुपाले च संस्थिते ॥ ६ ॥ कुरुवृद्धाननु
ज्ञाप्य मुनींश्च ससुतां पृथाम् । निमित्तान्यतिघोराणि पश्यन्द्वारवतीं ययौ ॥ ७ ॥ आह
चाहमिहायात आर्यमिश्राभिसङ्गतः । राजन्याश्चैद्यपक्षीया नूनं हन्युः पुरीं मम ॥ ८ ॥
वीक्ष्य तत्कदनं स्वानां निरूप्य पुररक्षणम् । सौभं च शाल्वराजं च दारुकं प्राह केशवः ॥
॥ ९ ॥ रथं प्रापय मे सूत शाल्वस्यान्तिकमाशु वै । संभ्रमस्ते न कर्तव्यो मायावी सौभरा
डयम् ॥ १० ॥ इत्युक्तश्चोदयामास रथमास्थाय दारुकः । विशन्तं ददृशुः सर्वे स्वे परे
चारुणानुजम् ॥ ११ ॥ शाल्वश्च कृष्णमालोक्य हतप्रायबलेश्वरः प्राहरत्कृष्णसूताय
शक्तिं भीमरवां मृधे ॥ १२ ॥ तामापतन्तीं नभसि महोल्कामिव रंहसा । भासयन्तीं
दिशः शौरिः सायकैः शतधाऽच्छिनत् ॥ १३ ॥ तं च षोडशभिर्विद्ध्वा बाणैः सौभं च खे
भ्रमत् । अविध्यच्छरसन्दोहैः खं सूर्य इव रश्मिभिः ॥ १४ ॥ शाल्वः शौरेस्तु दोः सव्यं

श्रीशुकदेवजी बोले कि—हे राजन् ! फिर प्रद्युम्नने जलसे आचमनकर कवच पहिन धनुष ले
सारथी से कहा कि—'मुझको वीर द्युमान के निकट लेचल ॥ १ ॥ द्युमान प्रद्युम्नकी सेनाका
नाश कररहाथा, रुक्मिणी नन्दन ने उसको रोक हँसकर आठबाण उसके मारे ॥ २ ॥ चारबाण
घोड़ोंके और एकबाण सारथीके मारा । तदनन्तर उसने दोबाणों से उसके धनुष और केतुको
और एकबाणसे द्युमानका शिर काटडाला ॥ ३ ॥ इधर गद, सात्यकि और साम्ब आदि वीर
सौभपति की सेनाका नाश कररहेथे । सौभकी सेना शिर रहितहोकर समुद्रमें गिरने लगी ॥४॥
हे राजन् ! इसप्रकारसे एक दूसरेको नाश करनेवाला घोरयुद्ध यदुवंशियोंसे और शाल्वसे सत्ता-
ईस दिनतक हुआ ॥५॥ युधिष्ठिरसे निमन्त्रितहोकर श्रीकृष्णजी इन्द्रप्रस्थ गयेथे । राजसूयसमाप्त
होने और शिशुपालके मरनेपर श्रीकृष्णजी भयानक उत्पात देखनेलगे । इससे वृद्ध कौरव, मुनियों
कुंती और युधिष्ठिरादि से आज्ञा ले वह द्वारकाको चले ॥ ६ । ७ ॥ मार्ग में मन २ में विचारने
लगे कि—मैं बलदेवजीके संग इन्द्रप्रस्थमें निवासकरताथा, निश्चयही शिशुपालके पक्षवाले राजा-
ओंने मेरीनगरीमें उत्पात आरम्भ कियाहै॥८॥अनन्तर उन्होंने द्वारकामेंआय अपने मनुष्योंसे सब
वृत्तान्त सुन और देख रामको नगरकी रक्षा में नियुक्त किया और सौभ व शाल्व राजाको देख
दारुक से कहा कि ॥ ९ ॥ हे सारथे ! शीघ्रही शाल्वके निकट मेरेरथको लेचल, यह बड़ाही
मायावी है इससे तू कुछभी मत घबड़ाना ॥ १० ॥ दारुक ने यहसुन भलीप्रकार से रथपर बैठ
रथको चलाया । अपन और शत्रुके पक्षवाले सबोंहीने श्रीकृष्णजीको देखा ॥११॥ शाल्वने अपनी
बहुतसी सेनाको मरादेख श्रीकृष्णजी के सारथीपर भयंकर वेगवाली शक्तिका प्रहार किया १२ ॥
वह प्रचण्ड शक्ति बड़ी उल्काके समान दिशाओं को प्रकाशित करतीहुई आकाश मार्गसे शी-
घ्रता पूर्वक आनेलगी श्रीकृष्णजीने बाणोंसे उसके सौटुकड़े करडाले, ॥ १३ ॥ उन्होंने शाल्वको
भी सोलहबाणोंसे बेध सूर्य जैसे किरणोंसे आकाश को भेदताहै वैसेही बाणोंसे उन्होंने आकाश में
भ्रमण करनेवाले सौभको भेदडाला ॥ १४ ॥ परन्तु शाल्वने धनुषधारी श्रीकृष्णजी की धनुष स-

सशार्ङ्गंशार्ङ्गधन्वनः । बिभेदन्यपतद्धस्ताच्छार्ङ्गमासीत्तदद्भुतम् ॥ १५ ॥
हाहाकारोमहानासीद्भूतानांतत्रपश्यताम् । निनद्यसौभराडुच्चैरिदमाहजनार्द-
नम् ॥ १६ ॥ यत्त्वयामूढनः सख्युर्भ्रातुर्भार्याहृतेक्षताम् ॥ प्रमत्तःससभाम-
ध्येत्वयाव्यापादितःसखा ॥ १७ ॥ तंत्वाद्यनिशितैर्बाणैरपराजितमानिनम्नया
म्यपुनरावृत्तिं यदितिष्ठेर्ममाग्रतः ॥ १८ ॥ श्रीभगवानुवाच । वृथात्वंकत्थ
सेमन्द न पश्यस्यन्तिकेऽन्तकम् । पौरुषंदर्शयन्ति स्मशूरानबहुभाषिणः ॥
॥ १९ ॥ इत्युक्त्वाभगवाञ्छाल्वं गदयाभीमवेगया । तताडजत्रौसंरब्धः सचकम्पे
वमन्नसृक् ॥ २० ॥ गदायांसंनिवृत्तायां शाल्वस्त्वन्तरधीयत । ततोमुहूर्तआगत्य
पुरुषःशिरसाऽच्युतम् । देवक्याप्रहितोऽस्मीति नत्वाप्राहवचोरुदन् ॥२१॥ कृष्ण
कृष्णमहाबाहो पिताते पितृवत्सल । बद्ध्वाऽपनीतःशाल्वेन सौनिकेनयथापशुः ॥
॥ २२ ॥ निशम्यविप्रियंकृष्णो मानुषींप्रकृतिंगतः । विमनस्कोघृणी स्नेहाद्बभाषे प्रा
कृतोयथा ॥ २३ ॥ कथंराममसंभ्रान्तं जित्वाऽजेयंसुरासुरैः । शाल्वेनाल्पीयसा नी
तः पितामेबलवान्विधिः ॥ २४ ॥ इतिब्रुवाणेगोविन्दे सौभराट्प्रत्युपस्थितः । वसु
देवमिवानीय कृष्णंचेदमुवाचसः ॥ २५ ॥ एषतेजनितातातो यदर्थमिहजीवसि ।
वधिष्येवीक्षतस्तेऽमुमीशश्चेत्पाहि बालिश ॥ २६ ॥ एवंनिर्भर्त्स्यमायावी खड्गेना
नकदुन्दुभेः । उत्कृत्यशिरआदाय खस्थंसौभंसमाविशत् ॥ २७ ॥ ततोमुहूर्तंप्रकृ-
तावुपप्लुतः स्वबोधआस्ते स्वजनानुषङ्गतः । महानुभावस्तदबुध्यदासुरीं मायांस
शाल्वप्रसृतां मयोदिताम् ॥ २८ ॥ नतत्रदूतंनपितुःकलेवरं प्रबुद्धआजौ समपश्यद्-

---

मन बाईं भुजापर प्रहार किया तब उनके हाथसे धनुष छूटगया, ॥ १५ ॥ जो प्राणी उस घोर
संग्रामको देख रहेथे वे महा हाहाकार करउठे सौभराजने उच्चस्वरसे श्रीकृष्णजीसे कहा, ॥१६॥
रेमूढ ! मेरे सामनेही तूने मेरे मित्र और भाई की स्त्री का हरण कियाथा, और मेरे मित्र की
असावधानी पर तूने उसे सभामें मारडाला ॥१७॥ यदि तू आज मेरे सन्मुख स्थितरहा तो तीक्ष्ण
शरसे तुझे यमपुरी भेजूंगा । तेरे मनमें इसबात का बड़ाही अहंकारहै कि—मुझको कोई परास्त
ही नहीं करसकता ॥ १८ ॥ भगवानने कहा कि—रेमूर्ख ! तू वृथा बकवाद करताहै, तेरे सन्मुख
जो काल खड़ाहै उसको नहीं देखता । वीर पुरुष वीरताही दिखातेहैं वृथा बकवक नहीं करते ॥
॥ १९ ॥ भगवान ने यह कह क्रोधितहो बड़ी भयानक वेगवाली गदासे शाल्वपर प्रहार किया,
इससे वह रुधिर उगिलताहुआ कांपनेलगा ॥ २० ॥ गदाकी पीड़ा कुछेक दूर होनेपर शाल्व स-
चेतहो अन्तर्ध्यान होगया । अनन्तर एक क्षणमात्रमें एक पुरुषनेआय भगवानको प्रणामकर रोतेर
कहाकि हेमहाराज! देवी देवकीने मुझकोभेजाहै और कहाहै कि॥२१॥हेकृष्ण! हेकृष्ण! हेमहाबाहो!
हे पितृवत्सल ! कसाई जैसे पशुको लेजाय वैसेही शाल्व तुम्हारे पिताको बांधकर लेगयाहै ॥२२॥
मनुष्य प्रकृतिको प्राप्तहुये दयावान श्रीकृष्णजी इस अशुभ समाचार को सुनकर स्नेह से विवश
होगए और सामान्य मनुष्यों की भांति कहनेलगे, कि— ॥ २३ ॥ सुर और असुरों के जीतने
योग्य भ्रमरहित रामको जीतकर क्षुद्र शाल्व मेरे पिताको किसप्रकार लेगया, ॥ २४ ॥ श्रीकृष्ण-
जी इसप्रकार कहरहेथे कि—उसीसमय शाल्वने वहांपर आय वसुदेवकी समान एक मनुष्यको वहां
लाय श्रीकृष्णजी से कहा कि—यह तेरा जन्मदाता पिताहै जिसके निमित्त तू जीताहै मैं तेरे स-
न्मुखही इसको मारे डालताहूं रेमूर्ख ! यदि तुझ में शक्तिहै तो इसको बचा ॥ २५—२६ ॥ यह
कहकर मायावी शाल्व खड्ग से वसुदेव का शिर काट उसेले आकाश चारी सौभमें चलागया ।
॥ २७ ॥ श्रीकृष्णजी स्वयंही ज्ञानवानहैं तो भी पिताके स्नेहके कारण क्षणभर मनुष्य स्वभाव से
चुपचाप बैठेरहे फिर विचारा कि—यह शाल्वकी मायारचित आसुरी मायाहै, ॥ २८ ॥ थोडीही

द्भ्यामिमांमहाराजमहासत्त्वोव्यदृश्यत ॥ २ ॥ तंतथाऽऽयान्तमालोक्यगदामादाय सत्वरः । अवप्लुत्यरथात्कृष्णः सिन्धुंवेलेवप्रत्यधात् ॥ ३ ॥ गदामुद्यम्यकारूषोमुकुन्दंप्राहदुर्मदः । दिष्ट्यादिष्ट्याभवानद्यममदृष्टिपथंगतः ॥ ४ ॥ त्वंमातुलेयोनः कृष्णमित्रध्रुङ्मांजिघांससि । अतस्त्वांगदयामन्दहनिष्येवज्रकल्पया ॥ ५ ॥ तर्ह्यानृण्यमुपैम्यज्ञमित्राणांमित्रवत्सलः । बन्धुरूपमरिंहत्वाव्याधिंदेहचरंयथा ॥ ६ ॥ एवंरूक्षैस्तुदन्वाक्यैः कृष्णंतोत्रैरिवद्विपम् । गदया ताडयन्मूर्ध्नि सिंहवद्व्यनदच्चसः ॥ ७ ॥ गदयाऽभिहतोऽप्याजौनचचालयदूद्वहः । कृष्णोऽपितमहन्गुर्व्याकौमोदक्यास्तनान्तरे ॥ ८ ॥ गदानिर्भिन्नहृदय उद्वमन्रुधिरंमुखात् । प्रसार्यकेशबाह्वङ्घ्रीन्धरण्यांन्यपतद्व्यसुः ॥ ९ ॥ ततःसूक्ष्मतरंज्योतिः कृष्णमाविशदद्भुतम् ॥ पश्यतां सर्वभूतानां यथाचैद्यवधेनृप ॥ १० ॥ विदूरथस्तुतद्भ्राता भ्रातृशोकपरिप्लुतः ॥ आगच्छदसिचर्मभ्यामुच्छ्वसंस्तज्जिघांसया ॥ ११ ॥ तस्यचापततःकृष्णश्चक्रेण-क्षुरनेमिना । शिरोजहारराजेन्द्र सकिरीटंसकुण्डलम् ॥ १२ ॥ एवंसौभंचशाल्वं दन्तवक्त्रं सहानुजम् । हत्वादुर्विषहानन्यैरीडितः सुरमानवैः ॥ १३ ॥ मुनिभिः सिद्धगन्धर्वैर्विद्याधरमहोरगैः । अप्सरोभिःपितृगणैर्यक्षैः किन्नरचारणैः ॥ १४ ॥ उपगीयमानविजयः कुसुमैरभिवर्षितः । वृतश्च वृष्णिप्रवरैर्विवेशालंकृतांपुरीम् ।१५ एवंयोगेश्वरःकृष्णो भगवाञ्जगदीश्वरः । ईयतेपशुदृष्टीनां निर्जितो जयतीतिसः१६॥ श्रुत्वायुद्धोद्यमंरामः कुरूणांसहपाण्डवैः । तीर्थाभिषेकव्याजेन मध्यस्थःप्रययौकि-

ओर दौड़ा ॥ १ ॥ २ ॥ उसको इस प्रकार से गदा हाथमें लिये हुए आता देख श्रीकृष्णजी ने शीघ्रही रथसे कूद पृथिवी पर आय जैसे बेला समुद्रको रोकती है वैसेही उसको रोकलिया ॥ ३ ॥ दुष्ट दंतवक्त्रने गदा उठाय श्रीकृष्णजी से कहा कि—अच्छा ! अच्छा ! आज तू मेरे दृष्टि गोचर हुआ है ॥ ४ ॥ कृष्ण ! तू मेरे मामा का पुत्र और मित्रघाती है; तुझे मेरेभी मारनेकी इच्छा है अतएव रे मंद ! आज तुझे वज्रकी समान गदा से मारूंगा ॥ ५ ॥ हे मूर्ख ! मैं मित्रोंका चाहने वाला तुझ बंधुरूप शत्रु को मार कर मित्रों के ऋण से उऋण हूंगा । जैसे अंकुशसे हाथी पीडित होता है दंतवक्त्र वैसेही कटु बचनों से श्रीकृष्णजीको पीडित कर गदासे इनके मस्तक पर प्रहार कर सिंह की समान गर्जने लगा ॥ ६ ॥ ७ ॥ यदुश्रेष्ठ रण भूमि में गदासे आहत होकरभी क्षण मात्र को चलाय मान न हुए; उन्होने भी अपनी कौमोद की गदा उसकी छातीमें मारी ॥ ८ ॥ उस प्रचण्ड गदाके प्रहार से दंतवक्त्र का हृदय चूर२ होगया; वह रुधिर उगिलता हुआ केशोंको बिखराय व हाथों पावों को फैलाय प्राण रहित हो गिर पड़ा ॥ ९ ॥ हे राजन् ! जैसे शिशुपाल के शरीर की ज्योति ने श्रीकृष्णजी के चरण कमलों में प्रवेश किया था, वैसेही दंतवक्त्रकी देहसे भी सूक्ष्म ज्योति निकल सब प्राणियों के सामनेही श्रीकृष्णजी में प्रवेश कर गई ॥ १० ॥ उसका भाई विदूरथ भाई के शोक से व्याकुल हो श्रीकृष्णजी के मरने के निमित्त ढाल तलवार ले दीर्घ श्वास छोड़ता हुआ दौड़ा आया ॥ ११ ॥ हे राजेन्द्र ! श्रीकृष्णजीने छुरेकी धार वाले चक्रसे उस आते हुए विदूरथके कुंडल किरीट से शोभित मस्तक को काट डाला ॥ १२ ॥ इसप्रकार से श्री कृष्णजी सौभविमान, शाल्व, और भाइयों समेत दंतवक्त्र आदि दुःसह वीरों को मार श्रेष्ठ यदु बंशियोंसे घिर अपनी सुंदर नगरी में आये । देवता और मनुष्य उनकी स्तुति और मुनि, सिद्ध गन्धर्व, विद्याधर, नाग, अप्सरा, पितर, यक्ष, किन्नर और चारण गण उनके चरित्रों का गान करने लगे ॥ १३—१५ ॥ योगेश्वर भगवान इसप्रकार लीला से सदैवही जय पाते हैं परंतु कोई २ पशु बुद्धि मनुष्य कहते हैं कि वे जरासंधसे हार गये थे ॥ १६ ॥ हे राजन् ! एकदिन बलदेव जी ने सुना कि कौरव और पाण्डवों के संग युद्ध का उद्यम होरहा है बलदेवजी किसी की ओर

छ ॥ १७ ॥ स्नात्वाप्रभासे सन्तर्प्य देवर्षिपितृमानवान् । सरस्वतींप्रतिस्रोतंययौ ब्राह्मणसंवृतः ॥ १८ ॥ पृथूदकं बिन्दुसरस्त्रितकूपं सुदर्शनम् । विशालं ब्रह्मतीर्थंच चक्रंप्राचींसरस्वतीम् ॥ १९ ॥ यमुनामनुयान्येव गंगामनुचभारत । जगामनैमिषंयत्र ऋषयःसत्रमासत ॥ २० ॥ तमागतमभिप्रेत्य मुनयोदीर्घसत्रिणः । अभिनन्द्ययथान्यायं प्रणम्योत्थायचार्चयन् ॥ २१ ॥ सोऽर्चितःसपरीवारः कृतासनपरिग्रहः । रोमहर्षणमासीनं महर्षेःशिष्यमैक्षत ॥ २२ ॥ अप्रत्युत्थायिनं सूतमकृतप्रह्वणांजलिम् । अध्यासीनंच तान्विप्रांश्चुकोपोद्वीक्ष्य माधवः ॥ २३ ॥ कस्मादसाविमान्विप्रानध्यास्ते प्रतिलोमजः धर्मपालांस्तथैवास्मान्वधमर्हति दुर्मतिः ॥ २४ ॥ ऋषेर्भगवतोभूत्वा शिष्योऽधीत्यबहूनिच । सेतिहासपुराणानि धर्मशास्त्राणिसर्वशः ॥ २५ ॥ अदान्तस्याविनीतस्य वृथा पण्डितमानिनः । नगुणायभवन्तिस्म नटस्येवाऽजितात्मनः ॥ २६ ॥ एतदर्थोहि लोकेऽस्मिन्नवतारोमयाकृतः । वध्यामेधर्मध्वजिनस्तेहि पातकिनोऽधिकाः ॥ २७ ॥ एतावदुक्त्वा भगवान्निवृत्तोऽसद्वधादपि । भावित्वात्तंकुशाग्रेण करस्थेनाहनत्प्रभुः ॥ २८ ॥ हाहेतिवादिनःसर्वे मुनयःखिन्नमानसाः ऊचुःसंकर्षणं देवमधर्मस्तेकृतःप्रभो ॥ २९ ॥ अस्यब्रह्मासनं दत्तमस्माभिर्यदुनन्दन । आयुश्चात्माऽक्लमं तावद्यावत्सत्रंसमाप्यते ॥ ३० ॥ अजानतैवाचरितस्त्वया ब्रह्मवधोयथा । योगेश्वरस्यभवतो नाम्नायोऽपिनियामकः ॥ ३१ ॥ यद्येतद्ब्रह्महत्यायाः पावनंलोकपावन । चरिष्यतिभवाँल्लोकसंग्रहोऽनन्यचोदितः

न होने की इच्छासे तीर्थ स्नान के मिष से द्वारका से प्रभास तीर्थ को चले गये ॥ १७ ॥ अनंतर वहां पर स्नान कर देव, ऋषि, पितर और मनुष्यों को तृप्तकर ब्राह्मणों समेत सरस्वती पर आये ॥ १८ ॥ क्रमसे वह पृथूदक, बिंदुसर, त्रितकूप, सुदर्शन, विशाला, ब्रह्मतीर्थ, चक्र और पश्चिम बाहिनी सरस्वतीमें गये और गंगा व यमुनाके पार वाले सब तीर्थोंमें होते हुए नैमिषारण्य में पहुंचे ऋषिगण वहां बारह बरसवाले यज्ञके अनुष्ठान में प्रवृत्तथे ॥ १९-२० ॥ बलरामजीको आयादेख दीर्घ यज्ञवाले उन मुनियों ने उठकर उनको प्रणाम व बंदना की ॥ २१ ॥ रामने मुनियों से पूजितहो आसनपर बैठकर देखाकि महर्षि व्यासके शिष्य रोमहर्षण बैठेहुए हैं ॥ २२ ॥ वह जाति का सूत होकर न उठान प्रणाम व दंडवत की और ब्राह्मणों की अपेक्षा ऊंचे आसनपर बैठाहुआ है यह देखकर बलदेवजी क्रोधित हुए ॥ २३ ॥ और 'यहदुष्ट प्रतिलोम जातिका सब धर्मपाल ब्राह्मणों और मेरी अपेक्षा भी ऊंचे आसनपर क्यों बैठारहा ? यह दुष्ट मारने योग्य है ॥ २४ ॥ भगवान वेद व्यासका शिष्यहो अनेक इतिहास, पुराण और धर्मशास्त्रोंको पढ़कर भी यहज्ञानी और विनीत नहीं हुआ ॥ २५ ॥ व्यर्थही अपनेको पंडित जानता है' । आत्माको तो जीतही न सका अतएव नटकी समान इसके सबगुण नाममात्रको हैं ॥ २६ ॥ जोधर्मका चिह्न धारण करता है वह अधिक पातकी है इस प्रकार के धर्म नाशक मनुष्यों के मारने के निमित्तही मैंने अवतार लिया है ॥ २७ ॥ भगवान संकर्षण ने दुष्टोंको भी मारना छोड़दियाथा तौभी भावीवश इतना कहकर हाथमें लिये हुए कुशके अग्रसे सूतको मारडाला ॥ २८ ॥ तबसब मुनिलोग हाहाकार करनेलगे और अत्यंत खिन्नहो बलदेवजी से कहनेलगे कि-प्रभो ! आपने अधर्म किया ॥ २९ ॥ हे यदुनंदन ! जबतक यज्ञ समाप्त न होवे तबतक के निमित्त हमने इसको ब्रह्म आसन और शारीरिक क्लेशरहित आयु दीथी । आपने न जानकर ब्रह्म बधकी समान इसका संहार किया ॥ ३० ॥ आप योगेश्वरहो, वेद भी आपका नियामक नहीं है तौभी हे लोकपावन् ! यदि आपही इस ब्रह्महत्या के समान पापका प्रायश्चित्त करोगे तभी सृष्टिकी मर्यादा रहेगी ॥ ३१ ॥ भगवान ने कहाकि-मैं सृष्टिपर अनुग्रह करने

॥ ३२ ॥ श्रीभगवानुवाच । करिष्ये वधनिर्वेशं लोकानुग्रहकाम्यया । नियमः प्रथमे कल्पे यावान्स तु विधीयताम् ॥ ३३॥ दीर्घमायुर्बतैतस्य सत्त्वमिन्द्रियमेव च । आशासितं यत्तद्ब्रूत साधये योगमायया ॥ ३४॥ ऋषय ऊचुः ॥ अस्त्रस्य तव वीर्यस्य मृत्यो रस्माकमेव च । यथा भवेद्वचः सत्यं तथा राम विधीयताम् ॥ ३५ ॥ श्रीभगवानुवाच ॥ आत्मा वै पुत्र उत्पन्न इति वेदानुशासनम् । तस्मादस्य भवेद्वक्ता आयुरिन्द्रियसत्त्ववान् ॥ ३६ ॥ किं वः कामो मुनिश्रेष्ठा ब्रूताहं करवाण्यथ । अजानतस्त्वपचितिं यथा मे चिन्त्यतां बुधाः ॥ ३७ ॥ ऋषय ऊचुः ॥ इल्वलस्य सुतो घोरो बल्वलो नाम दानवः । स दूषयति नः सत्रमेत्य पर्वणि पर्वणि ॥ ३८ ॥ तं पापं जहि दाशार्ह तन्नः शुश्रूषणं परम् । पूयशोणितविण्मूत्रसुरामांसाभिवर्षिणम् ॥ ३९ ॥ ततश्च भारतं वर्षं परीत्य सुसमाहितः । चरित्वा द्वादश मासांस्तीर्थस्नायी विशुध्यसे ॥ ४० ॥

इति श्रीमद्भा० महा० दशमस्कन्धे उ० अष्टसप्ततितमोऽध्यायः ॥ ७८ ॥

श्रीशुक उवाच ॥ ततः पर्वण्युपावृत्ते प्रचण्डः पांसुवर्षणः भीमो वायुरभूद्राजन्पूयगन्धस्तु सर्वशः ॥ १ ततोऽमेध्यमयं वर्षं बल्वलेन विनिर्मितम् । अभवद्यज्ञशालायां सोऽन्वदृश्यत शूलधृक् ॥ २. ॥ तं विलोक्य बृहत्कायं भिन्नाञ्जनचयोपमम् । तप्तताम्रशिखाश्मश्रुं दंष्ट्रोग्रभ्रुकुटीमुखम् ॥ ३ ॥ सस्मार मुसलं रामः परसैन्यविदारणम् हलं च दैत्यदमनं ते तूर्णमुपतस्थतुः ॥ ४ ॥ तमाकृष्य हलाग्रेण बल्वलं गगनेचरम् । मुसलेनाहनत्क्रुद्धो मूर्ध्नि ब्रह्मद्रुहं बलः ॥ ५ ॥ सोऽपतद्भुवि निर्भिन्नललाटोऽसृक्समुत्सृज

की इच्छासे इस हत्याका प्रायश्चित करूंगा; मुख्य पक्षमें जो नियमहों आप उसका वर्णनकरो ॥३२॥ हे मुनियो! इस सूतकी दीर्घ आयु, बल, इन्द्रिय सामर्थ्य और दूसरे भी जोचाहतेहो कहो । मैं योगमाया से उसके अनुसार वही करूंगा ॥ ३३ ॥ ऋषियों ने कहाकि–हे राम! जिस प्रकार से आपका अस्त्र और पराक्रम, इसकी मृत्यु और हमारे वाक्य सत्यहोवें आप वहीकरो आपसे और अधिक क्याकहें ॥ ३४ ॥ भगवान ने कहाकि—वेदमें यह उपदेश है कि आत्मा पुत्ररूप से उत्पन्न होता है। अतएव इसका पुत्र उग्रभवा आपलोगोंका वक्ता होवेगा इसकोही आयु, इन्द्रियों की सामर्थ्य और बलप्राप्त होवेगा ॥ ३५ ॥ हे श्रेष्ठ मुनियो! इसके उपरांत मैं आपका कौनसा कार्यकरूं कहिये। और मेरे अज्ञानसे किये हुए ब्रह्मवधका प्रायश्चित्तक्या है उसकाभी आप विचार करिये ॥ ३६ ॥ ऋषियों ने कहाकि–हे देव! इल्वलका पुत्र बल्वल नामका एक घोरदैत्य पर्व २ में आकर हमारे यज्ञको दूषित करता है ॥ ३७ ॥ हे यादव! उस दुष्टको मारो उसके मरनेसेही हमारा उपकार होगा। वह दानव पूय, रुधिर, विष्ठा, मूत्र, सुरा और मांसकी वर्षा करकर यज्ञका विघ्नकरता है ॥ ३८ ॥ उसको मार करके आप काम क्रोधादि रहितहो भारत वर्षमें भ्रमण करो और बारह महीने कष्टको सह.तीर्थोंका स्नानकरो तब शुद्धहोगे ॥ ३९ ॥

इतिश्री मद्भागवतेमहापुराणेदशमस्कन्धे उ०सरलाभाषाटीकायामष्टसप्ततितमोऽध्यायः ॥ ७८ ॥

श्रीशुकदेवजी बोले कि—हेराजन्! अनन्तर पर्व आनेपर प्रचण्ड भयानक वायु चलने लगी, और सब ओरसे पूयकी गन्ध फैलगई ॥ १ ॥ इसके उपरांत यज्ञशालामें बल्वल अपवित्र पदार्थों को बरसाने लगा और हठात् शूल धारणकर सबके आगमें वह प्रगट हुआ ॥२॥ वह काजल के ढेरकी समान अति श्यामवर्ण उसकी चोटी, और दाढ़ी-मूछ तपेहुए तांबेकी समान, बड़ी भौंहोंयुक्तमुख डाढों समेत देखने में अत्यन्त भयानक, और शरीर अत्यन्त दीर्घथा। उसको देख बलरामजी ने शत्रु-सैन्यनाशक मूसल और दैत्य दमन हलको स्मरण किया। तत्कालही वह आ उपस्थितहुये ॥ ३ । ४ ॥ बलदेवजी ने क्रोधितहो उस ब्रह्मद्वेषी आकाशचारी बल्वल को हलसे खींच मूसल से उस पर प्रहार किया ॥ ५ ॥ जिस से उसका मस्तक चूर्णहोगया। वह

न् । मुञ्चन्नार्तस्वरंशैलोयथावज्रहतोऽरुणः ॥ ६ ॥ संस्तुत्यमुनयोरामंप्रयुज्यावि
तथाशिषः । अभ्यषिञ्चन्महाभागावृत्रघ्नंविबुधायथा ॥ ७ ॥ वैजयन्तींददुर्मालां
श्रीधामाम्लानपङ्कजाम् । रामायवाससीदिव्येदिव्यान्याभरणानिच ॥ ८ ॥ अथतै
रभ्यनुज्ञातः कौशिकीमेत्यब्राह्मणैः । स्नात्वासरोवरमगाद्यतः सरयुरास्रवत् ॥ ९ ॥
अनुस्रोतेनसरयूंप्रयागमुपगम्यसः । स्नात्वासंतर्प्यदेवादीञ्जगामपुलहाश्रमम् ॥ १०॥
गोमतींगण्डकींस्नात्वाविपाशांशोणआप्लुतः । गयांगत्वापितॄनिष्ट्वागङ्गासागरसं
गमे ॥ ११ ॥ उपस्पृश्यमहेन्द्राद्रौरामंदृष्ट्वाऽभिवाद्यच । सप्तगोदावरींवेणांपम्पां
भीमरथींततः ॥ १२ ॥ स्कन्दंदृष्ट्वाययौरामः श्रीशैलंगिरिशालयम् । द्रविडेषुम
हापुण्यंदृष्ट्वाद्रिंवेङ्कटंप्रभुः ॥ १३ ॥ कामकोष्णींपुरींकाञ्चींकावेरींचसरिद्वराम् ।
श्रीरङ्गाख्यंमहापुण्यंयत्रसन्निहितोहरिः ॥ १४ ॥ ऋषभाद्रिंहरेः क्षेत्रंदक्षिणांमथुरां
तथा । सामुद्रंसेतुमगमन्महापातकनाशनम् ॥ १५ ॥ तत्रायुतमदाद्धेनूर्ब्राह्मणेभ्यो
हलायुधः । कृतमालांताम्रपर्णींमलयंचकुलाचलम् ॥ १६ ॥ तत्रागस्त्यंसमासीनंन
मस्कृत्याभिवाद्यच । योजितस्तेनचाशीर्भिरनुज्ञातोगतोऽर्णवम् । दक्षिणंतत्रकन्या
ख्यांदुर्गांदेवींददर्शसः ॥ १७ ॥ ततः फाल्गुनमासाद्यपञ्चाप्सरसमुत्तमम् । विष्णुः
सन्निहितोयत्रस्नात्वाऽस्पर्शद्गवायुतम् ॥ १८ ॥ ततोऽभिव्रज्यभगवान्केरलांस्तुत्रिगर्त
कान् । गोकर्णाख्यंशिवक्षेत्रंसान्निध्यंयत्रधूर्जटेः ॥ १९ ॥ आर्यांद्वैपायनींदृष्ट्वाशूर्पा
रकमगाद्बलः । तापींपयोष्णींनिर्विन्ध्यामुपस्पृश्याथदण्डकम् ॥ २० ॥ प्रविश्यरेवा

रक्त उगलताहुआ आर्त्तनादकरता २ वज्र से टूटेहुए अरुणवर्ण के पर्वत की समान भूमि में गिर पड़ा ॥ ६ ॥ यह देखकर वेत्ता ऋषि रामकी स्तुति करने और अमोघ आशीर्वाद देनेलगे; देवता ओं ने जैसे वृत्रासुर के मारनेवाले इन्द्र का अभिषेक कियाथा, तैसेही उन्होंने उनका अभिषेक किया ॥ ७ ॥ अनन्तर उन्होंने रामको न कुम्हलानेवाले कमलों की लक्ष्मी की निवासभूत वैजयन्तीमाला, दिव्यवस्त्र व दिव्यआभूषण दिये ॥ ८ ॥ अनन्तर राम ने उनकी आज्ञासे ब्राह्मणों समेत कौशिकी में आय स्नानकिया; फिर जिससे सरयूनदी निकली है उस सरोवर पर आये ८॥ फिर वह सरयू में होतेहुए प्रयाग में आये और वहां स्नान व देवताओं का तर्पणकर पुलहाश्रम में आये ॥ १० ॥ फिर वहां से गोमती, गण्डकी, विपाशा और शोण में स्नानकर गया में पहुँच पित्रों की पूजाकी वहां गंगासागर के संगम में स्नानकर महेन्द्र पर्वत पर पहुंचे। वहां पर परशुराम को देख प्रणामकर वहां से सप्तगोदावरी, वेणु, पंपा और भीमरथी में हो स्वामिकार्तिक के दर्शन कर महादेवजी के श्रीशैल पर्वत पर आये। फिर बलरामजी ने द्रविड़ देश में पहुंच महापुण्य वेंकट पर्वत के दर्शन किये ॥ ११—१३ ॥ वह कामकोष्णी, कांचीपुरी, सरिद्वरा, कावेरी, जहां हरि विराजमान रहते हैं उस महापुण्य श्रीरंग, हरिक्षेत्र, ऋषभपर्वत और दक्षिणमथुराको देख महापाप नाशक सेतुबन्धमें पहुंचे ॥ १४ । १५ ॥ बलरामजी वहां ब्राह्मणों को दशसहस्र गौएं दानकर कृत माला और ताम्रपर्णी कुलाचल में हो मलयाचल में गये। वहां बैठेहुए अगस्त्य मुनि को नमस्कार और प्रणामकर उनका आशीर्वाद और आज्ञा पाय दक्षिण समुद्रको गये ॥ १६ । १७ ॥ उन्होंने वहां कन्यानाम्नी दुर्गा देवी का दर्शन किया, फिर फाल्गुनतीर्थ पर आय उत्तम पंचाप्सर सरोवर में स्नानकर दशसहस्र गौएं दानकीं; उस स्थान में विष्णुजी सदैव विराजमान रहते हैं ॥ १८ ॥ अनन्तर केरल और त्रिगर्त देश में होतेहुए गोकर्ण क्षेत्रमें कि जहां शिवजीसदैव विराजमान रहते हैं पहुंचे ॥ १९ ॥ बलदेवजी वहां आर्या द्वैपायनी का दर्शनकर शूर्पारक में गये । अनन्तर तापी पयोष्णी और निर्विन्ध्या में स्नानकर दण्डकारण्य में आय माहिष्मती पुरी के निकट नर्मदा में

मगमथमाहिष्मतीपुरी । मनुतीर्थमुपस्पृश्यप्रभासंपुनरागमत् ॥ २१ ॥ श्रुत्वाद्विजैः कथ्यमानंकुरुपाण्डवसंयुगे । सर्वराजन्यनिधनंभारंमेनेहृतंभुवः ॥ २२ ॥ सभीमदुर्योधनयोर्गदाभ्यांयुध्यतोर्मृधे । वारयिष्यन्विनशनंजगामयदुनन्दनः ॥ २३ ॥ युधिष्ठिरस्तुतंदृष्ट्वायमौकृष्णार्जुनावपि । अभिवाद्याभवंस्तूष्णींकिंविवक्षुरिहागतः ॥२४॥ गदापाणीउभौदृष्ट्वासंरब्धौविजयैषिणौ । मण्डलानिविचित्राणिचरन्ताविदमब्रवीत् ॥२५॥ युवांतुल्यबलौवीरौहेराजन्हेवृकोदर । एकंप्राणाधिकंमन्येउतैकंशिक्षयाधिकम् ॥ २६ ॥ तस्मादेकतरस्येहयुवयोः समवीर्ययोः । नलक्ष्यतेजयोऽन्योवा विरमत्वफलोरणः ॥ २७ ॥ नतद्वाक्यंजगृहतुर्बद्धवैरौनृपार्थवत् । अनुस्मरन्तावन्योन्यंदुरुक्तंदुष्कृतानिच ॥ २८ ॥ दिष्टंतदनुमन्वानोरामोद्वारवतींययौ । उग्रसेनादिभिः प्रीतैर्ज्ञातिभिः समुपागतः ॥ २९ ॥ तंपुनर्नैमिषंप्राप्तमृषयोऽयाजयन्मुदा । क्रत्वङ्गंक्रतुभिः सर्वैर्निवृत्ताखिलविग्रहम् ॥ ३० ॥ तेभ्योविशुद्धविज्ञानंभगवान्व्यतरद्विभुः । येनैवात्मन्यदोविश्वमात्मानंविश्वगंविदुः ॥ ३१ ॥ स्वपत्न्यावभृथस्नातो ज्ञातिबन्धुसुहृद्वृतः रेजेस्वज्योत्स्नयेवेन्दुः सुवासाः सुष्ठ्वलंकृतः ॥ ३२ ॥ ईदृग्विधान्यसंख्यानिबलस्यबलशालिनः । अनन्तस्याप्रमेयस्यमायामर्त्यस्य सन्तिहि ॥३३॥ योऽनुस्मरेतरामस्य कर्माण्यद्भुतकर्मणः । सायं प्रातरनन्तस्य विष्णोः सदयितो भवेत् ॥३४॥ इति श्रीमद्भा०महा०दशमस्कन्धेउ०एकोनाशीतितमोऽध्यायः ॥७९॥

स्नान किया । अन्त को मनुतीर्थ में स्नानकर फिर प्रभास में आये ॥ २० । २१ ॥ वहां ब्राह्मण कौरव पाण्डवों का युद्ध और क्षत्रियों के मारेजाने की बातें कहरहेथे,बलदेवजी ने उसको सुनकर जानलिया कि पृथ्वी का भार दूरहोगया ॥ २२॥ उस समय भीम और दुर्योधन युद्धभूमि में गदा युद्ध कररहेथे; बलदेवजी उन्हें मनाकरने को कुरुक्षेत्र में गये ॥ २३ ॥ युधिष्ठिर, नकुल, सहदेव अर्जुन और श्रीकृष्णजीने उनको देखकर प्रणाम किया और यह क्या कहने के निमित्त इसस्थान में आये हैं, यह विचारतेहुए चुप खड़ेरहगए ॥ २४ ॥ इधर भीमसेन और दुर्योधन दोनों अपने अपने हाथों में गदा लिये क्रोधित होतेहुए विजयकी इच्छा से नाना मण्डलों में (चक्करकाटतेहुए) भ्रमण कररहेथे, राम ने उनको देखा और देखकरकहा ॥ २५ ॥ हेराजन् ! हेवृकोदर ! तुमदोनों जन बलमें समानहो; दोनों जनही समान वीरहो; मैं एक जनको बलमें और दूसरेको शिक्षा में अधिक जानताहूं ॥ २६ ॥ अतएव इसयुद्ध में तुमदोनोंजनों के समान पराक्रमी होने से एककीजीत वा हारहोतीहुई नहीं दिखाई देती; अतएव निष्फलयुद्धकरने से निवृत्तहोओ ॥ २७ ॥ हेराजन् ! दोनों जनों में बहुत शत्रुता बंधीथी एक ने दूसरे के कटुवाक्य और अपकार का स्मरणकर बल० देवजी के इन धर्मवाले वचनों पर ध्यान न दिया ॥ २८ ॥ इससे बलरामजी, भावीही बलवान है ऐसा कह द्वारका में आये उन्होंने वहां जातिवालों और उग्रसेनादिसे मिलकर उनको प्रसन्न किया ॥ २९ ॥ महाराज ! बलदेवजी फिर नैमिषारण्य में आये । यज्ञमूर्त्ति, भेदज्ञानरहित बलदेवजीको ब्राह्मणों ने आनन्दपूर्वक यज्ञकराया ॥ ३० ॥ भगवान बलरामजी ने उन को जो शुद्धज्ञान दिया उससे उन मुनियों ने विश्व को आत्मा में और आत्मा को सर्वत्र स्थित देखा ॥ ३१ ॥ बलराम जी जातिवाले, बन्धुओं और सुहृदों से वेष्टितहो अपनी स्त्री समेत अवभृथ स्नानकर सुन्दरवस्त्र धारणकर माला को पहिर ताराओं समेत चन्द्रमा की समान प्रकाश पानेलगे ॥ ३२ ॥ हेराजन् ! माया मनुष्य, बलशील, अप्रमेय, अनन्त बलदेवजी के इसप्रकार से अनेक कर्म हैं ॥ ३३ ॥ जो सन्ध्या और प्रातःकाल में अद्भुत कर्मवाले अनन्त बलरामजी के कर्मों का स्मरण करे वह विष्णुभक्त होजावे ॥ ३४ ॥

इतिश्री भद्भा०महापुराणेदशमस्कंधेउ०सरलाभाषाटीकायांएकोनाशीतितमोऽध्यायः ॥ ७९ ॥

राजोवाच ॥ भगवन्यानि चान्यानि मुकुन्दस्य महात्मनः । वीर्याण्यनन्तवीर्यस्य श्रोतुमिच्छामहे प्रभो ॥ १ ॥ को नु श्रुत्वासकृद्ब्रह्मन्नुत्तमश्लोकसत्कथाः । विरमेत विशेषज्ञो विषण्णः काममार्गणैः ॥ २ ॥ सा वाग्यया तस्य गुणान्गृणीते करौ च तत्कर्मकरौ मनश्च । स्मरेद्वसन्तं स्थिरजङ्गमेषु शृणोति तत्पुण्यकथाः स कर्णः ॥ ३ ॥ शिरस्तु तस्योभयलिङ्गमानमेत्तदेव यत्पश्यति तद्धि चक्षुः । अङ्गानि विष्णोरथ तज्जनानां पादोदकं यानि भजन्ति नित्यम् ॥ ४ ॥ सूत उवाच ॥ विष्णुरातेन संपृष्टो भगवान्बादरायणिः । वासुदेवे भगवति निमग्नहृदयोऽब्रवीत् ॥ ५ ॥ श्रीशुक उवाच ॥ कृष्णस्यासीत्सखा कश्चिद्ब्राह्मणो ब्रह्मवित्तमः । विरक्त इन्द्रियार्थेषु प्रशान्तात्मा जितेन्द्रियः ॥ ६ ॥ यदृच्छयोपपन्नेन वर्तमानो गृहाश्रमी । तस्य भार्या कुचैलस्य क्षुत्क्षामा च तथाविधा ॥ ७ ॥ पतिव्रता पतिं प्राह म्लायता वदनेन सा । दरिद्रं सीदमाना वै वेपमानाभिगम्य च ॥ ८ ॥ ननु ब्रह्मन्भगवतः सखा साक्षाच्छ्रियः पतिः । ब्रह्मण्यश्च शरण्यश्च भगवान्सात्वतर्षभः ॥ ९ ॥ तमुपैहि महाभाग साधूनां च परायणम् । दास्यति द्रविणं भूरि सीदते ते कुटुम्बिने ॥ १० ॥ आस्तेऽधुना द्वारवत्यां भोजवृष्ण्यन्धकेश्वरः । स्मरतः पादकमलमात्मानमपि यच्छति ॥ ११ ॥ किं न्वर्थकामान्भजतो नात्यभीष्टाञ्जगद्गुरुः । स एवं भार्यया विप्रो बहुशः प्रार्थितो मृदु ॥ अयं हि परमो लाभ उत्तमश्लो

राजा परीक्षितने कहा कि हे भगवन् ! हे प्रभु ! महात्मा अनन्त पराक्रमवाले श्रीकृष्णजी के जो पराक्रम हैं, मैं उनके सुननेकी इच्छा करता हूं ॥ १ ॥ हे ब्रह्मन् ! भगवानकी सुन्दर कथाओं को एकबारभी सुनकर कौन तत्त्वज्ञ मनुष्य कि जो कामके बाणोंसे खेदितहै ; उनसे विरह होसकताहै ॥ २ ॥ जिन वाणीसे भगवानके गुणगाएजावें वही वाणी है ; जिन हाथोंसे भगवानकी सेवा की जावे वेही हाथ हैं, जो मन स्थावर जगम में रहेहुए भगवानका स्मरणकरे वही मन है, जो कान उनकी पवित्र कथाको सुनें वही कानहैं ॥ ३ ॥ जो मस्तक उनके स्थावर जगमरूपको प्रणामकरे वही मस्तकहै, जो नेत्र भगवानका दर्शन करें वेही नेत्र सफल हैं और जो अंग उन विष्णुजी व उनके भक्तोंके चरणोंदकका सेवनकरें वेही अंग सफल हैं ॥ ४ ॥ सूतजीने कहाकि जब राजा परीक्षितने वेदव्यासतनय शुकदेवजीसे इसप्रकार पूँछा तब शुकदेवजी वासुदेवमें चित्त को लगाय उनके गुणोंका कहनेलगे ॥ ५ ॥ श्रीशुकदेवजी बोले कि हे राजन् ! कोई एक वेद-वेत्ता श्रेष्ठ ब्राह्मण श्रीकृष्णजीका सखाथा वह इन्द्रियोंके सेवनकरने योग्य सब विषयोंसे विरक्त होकर शान्तात्मा और जितेन्द्रिय होगयाथा वह ब्रह्मवेत्ता ब्राह्मण भगवदिच्छासे जो प्राप्त होता उसी द्रव्य से जीवन धारणकर एक मलीनवस्त्र पहिने गृहस्थाश्रममें बास करता । उसकी स्त्री भी वैसेही वस्त्र पहिने सदैव भूँख से कातर रहती । स्वामी भोगों को प्राप्त न करसकताथा इस कारण वह पतिव्रता सदैवही दुःखसे समय बिताती । एकदिन उसने कांपते २ मलीन मुखहो स्वामी से कहा कि ॥ ६—८ ॥ हे ब्रह्मन् ! मैंने सुनाहै कि लक्ष्मीपति ब्राह्मणों के हितकारी, शरणागतवत्सल यादव श्रेष्ठ भगवान तो आपके सखा हैं ॥ ९ ॥ हे महाभाग ! व साधुओं के परमस्थान हैं आप उनके निकट जाओ । आप कुटुम्बी कष्ट पारहेहो यह देखकर वे आपको आपकी इच्छानुसार धन देवेंगे ॥ १० ॥ वे इस समय भोज, वृष्णि और अन्धकों के राजाहो द्वारका में वास करते हैं । जो उनके चरण कमलों का ध्यान करते हैं वे जगद्गुरु उसको आत्मातक देदेते हैं । उनका भजन करने से वे जो इच्छित बरदेवें उसमें सन्देहही क्याहै उस दरिद्र ब्राह्मण से जब उसकी स्त्री ने इसप्रकार बारम्बार कहा तब उसने विचारा कि और चहे कुछहो चाहे न हो बड़ालाभ यही होगा कि श्रीकृष्णजी के दर्शन होंगे ॥ ११ ॥

[illegible] ॥ १२ ॥ इति संचिन्त्य मनसा गमनाय मतिं दधे । अप्यस्त्युपायनं किंचिद् गृहे कल्याणि दीयताम् ॥ १३ ॥ याचित्वा चतुरो मुष्टीन्विप्रान्पृथुकतण्डुलान् । चैलखण्डेन तान्बद्ध्वा भर्त्रे प्रादादुपायनम् ॥ १४ ॥ स तानादाय विप्राग्र्यः प्रययौ द्वारकां किल । कृष्णसन्दर्शनं मह्यं कथं स्यादिति चिन्तयन् ॥ १५ ॥ त्रीणि गुल्मान्यतीयाय तिस्रः कक्षाश्च सद्विजः । विप्रोऽगम्यान्धकवृष्णीनां गृहेष्वच्युतधर्मिणाम् ॥ १६ ॥ गृहं द्व्यष्टसहस्राणां महिषीणां हरेर्द्विजः । विवेशैकतमं श्रीमद्ब्रह्मानन्दं गतो यथा ॥ १७ ॥ तं विलोक्याच्युतो दूरात्प्रियापर्यङ्कमास्थितः । सहसोत्थाय चाभ्येत्य दोर्भ्यां पर्यग्रहीन्मुदा ॥ १८ ॥ सख्युः प्रियस्य विप्रर्षेरङ्गसङ्गातिनिर्वृतः । प्रीतो व्यमुञ्चदब्बिन्दून्नेत्राभ्यां पुष्करेक्षणः ॥ १९ ॥ अथोपवेश्य पर्यङ्के स्वयं सख्युः समर्हणम् । उपहृत्यावनिज्यास्य पादौ पादावनेजनीः ॥ २० ॥ अग्रहीच्छिरसा राजन्भगवाँल्लोकपावनः । व्यलिम्पद्दिव्यगन्धेन चन्दनागुरुकुङ्कुमैः ॥ २१ ॥ धूपैः सुरभिभिर्मित्रं प्रदीपावलिभिर्मुदा । अर्चित्वाऽऽवेद्य ताम्बूलं गां च स्वागतमब्रवीत् ॥ २२ ॥ कुचैलं मलिनं क्षामं द्विजं धमनिसन्ततम् । देवी पर्यचरत्साक्षाच्चामरव्यजनेन वै ॥ २३ ॥ अन्तःपुरजनो दृष्ट्वा कृष्णेनामलकीर्तिना । विस्मितोऽभूदतिप्रीत्या अवधूतं सभाजितम् ॥ २४ ॥ किमनेन कृतं पुण्यमवधूतेन भिक्षुणा । श्रिया हीनेन लोकेऽस्मिन्गर्हितेनाधमेन च ॥ २५ ॥ योऽसौ त्रिलोकगुरुणा श्रीनिवासेन संभृतः । पर्यङ्कस्थां श्रियं हित्वा परिष्वक्तोऽग्रजो यथा ॥ २६ ॥ कथयां चक्रतुर्गाथाः पूर्वा गुरुकुले सतोः । आत्मनो ललिता राजन्करौ गृह्य परस्परम् ॥ २७ ॥ श्रीभगवानुवाच ॥ अपि ब्रह्मन्गुरुकुलाद्भवता लब्धदक्षि

॥ १२ ॥ यह मन २ में विचार उसने जानेका निश्चय कर अपनी स्त्रीसे कहा कि हे कल्याणि ! घरमें जो कुछ भेट देनेकी सामग्रीहो वह दे तो मैं लेजाऊं, ॥ १३ ॥ ब्राह्मणी यह सुन चारमुट्ठी चावलों को मांगकर लाई और एक चीथडे में बांधकर स्वामीको दिये, ॥ १४ ॥ वह द्विजश्रेष्ठ उन चारमुट्ठी चावलों कोले किसप्रकार मुझे महाराज श्रीकृष्ण जी का दर्शन होगा यह विचारते विचारते द्वारकामें पहुंचा ॥ १५ ॥ वह ब्राह्मण तीन चौकी और तीन ड्योढियोंको उलंघ कर धर्मधारी व अगम्य वृष्णि और अंधकगणों के घरों के बीच में होताहुआ श्रीकृष्णजी की सोलह सहस्र स्त्रियों मेंसे एक स्त्री के सुन्दर घर में गया उससमय उसको जानपड़ा कि मानों मैं ब्रह्मानन्दको प्राप्तहुआहूं ॥ १६-१७ ॥ श्रीकृष्ण जी प्यारी के साथ सेजपर बैठेहुयेथे दूरसेही ब्राह्मण को आतादेख सहसा उठकर निकट आय आनन्दपूर्वक उससे दोनों भुजा पसारकर मिले॥१८॥ अपने प्रियमित्र ब्राह्मणके अंगस्पर्श से श्रीकृष्ण जी को आनन्द उत्पन्न हुआ उनके दोनों नेत्रोंसे आनंदाश्रु बहनेलगे ॥ १९ ॥ हेराजन् ! अनन्तर भगवान मित्र को सेजपर बिठाय स्वयं पूजाकी सामग्री लाये और उसके दोनों चरणोंको धोय लोकपावन भगवानने उस चरणोदकको मस्तक पर चढ़ाय। । फिर सुन्दर सुगन्ध युक्तचन्दन अगर और कुंकुमसे ब्राह्मणको लिप्तकिया॥२०-२१॥ और सुगन्धित धूप दीपसे पूजाकर पान और गौदे मित्रकी कुशलपूछी ॥ २२ ॥ ब्राह्मण मलीन और दुर्बल व चिथड़े पहिरे हुएथा उसके समस्त शरीरमें नसें दीखरहीथी । साक्षात् देवी रुक्मिणी समेत पंखेसे उसकी पवन करनेलगी ॥ २३ ॥ पुण्यकीर्ति श्रीकृष्णजी को उस अवधूत की पूजा करतेदेख सब अन्तःपुरवासी विस्मित होगये और विचारनेलगे, कि ॥२४॥ इस अवधूत भिखारी, निर्धन, लोकनिन्दित मनुष्य का कैसा पुण्यहै कि जो लोकगुरु श्रीकृष्णजी ने इसका सम्मानकिया और पलँगपर बैठेहुए अपनी प्यारीको छोड़ वह बड़ेभाई की समान इससे मिले, ॥ २५-२६ ॥ हेराजन् ! अनन्तर श्रीकृष्णजी और वह ब्राह्मण परस्पर एक दूसरे का हाथ पकड़ आप पहिले जब गुरुकुलमेंथे उससमयकी सुन्दर बातें कहनेलगे ॥ २७ ॥ भगवानने कहा कि—हेब्रह्मन् ! हे

जात् । समावृत्तेनधर्मज्ञभार्योढासदृशीनवा ॥ २८ ॥ प्रायोगृहेषुतेचित्तमकामवि-
हितंतथा । नैवातिप्रीयसेविद्वन्धनेषुविदितंहिमे ॥ २९ ॥ केचित्कुर्वन्तिकर्माणिका
मैरहतचेतसः । त्यजन्तःप्रकृतीर्दैवीर्यथाऽहंलोकसंग्रहम् ॥ ३० ॥ कच्चिद्गुरुकुले
वासंब्रह्मन्स्मरसिनौयतः । द्विजोविज्ञायविज्ञेयंतमसःपारमश्नुते ॥ ३१ ॥ सवैस-
त्कर्मणांसाक्षाद्द्विजातेरिहसंभवः । आद्योऽङ्गयत्राश्रमिणांयथाऽहंज्ञानदोगुरुः ॥३२॥
नन्वर्थकोविदाब्रह्मन्वर्णाश्रमवतामिह । येमयागुरुणावाचातरन्त्यञ्जोभवार्णवम् ॥
॥ ३३ ॥ नाहमिज्याप्रजातिभ्यांतपसोपशमेनवा । तुष्येयंसर्वभूतात्मागुरुशुश्रूषया
यथा ॥ ३४ ॥ अपिनःस्मर्यतेब्रह्मन्वृत्तंनिवसतांगुरौ । गुरुदारैश्चोदितानामिन्ध-
नानयने क्वचित् ॥३५॥ प्रविष्टानां महारण्यमपर्तौ सुमहद्द्विज । वातवर्षमभूत्तीव्रं
निष्ठुराः स्तनयित्नवः ॥ ३६ ॥ सूर्यश्चास्तंगतस्तावत्तमसा चावृतादिशः ॥ निम्नं
कूलंजलमयन प्राज्ञायतकिंचन ॥ ३७ ॥ वयंभृशंतत्र महानिलाम्बुभिर्निहन्यमाना
मुहुरम्बुसंप्लवे । दिशोऽविदन्तोऽथपरस्परं वनेगृहीतहस्ताः परिबभ्रिमातुराः ॥३८॥
एतद्विदित्वाउदितेरवौ सान्दीपनिर्गुरुः । अन्वेषमाणोनः शिष्यानाचार्योऽपश्यदा-
तुरान् ॥ ३९ ॥ अहोहेपुत्रका यूयमस्मदर्थेऽतिदुःखिताः । आत्मावैप्राणिनां प्रेष्ठस्त
मनादृत्य मत्पराः ॥ ४० ॥ एतदेवहिसच्छिष्यैः कर्तव्यंगुरुनिष्कृतम् । यद्वैविशुद्ध-
भावेन सर्वार्थात्मार्पणंगुरौ ॥ ४१ ॥ तुष्टोऽहंभोद्विजश्रेष्ठाः सत्याःसन्तुमनोरथाः ॥

धर्मज्ञ ! दक्षिणादे गुरुकुलसे लौट तुमने अपनेसमान स्त्रीसे विवाह किया या नहीं॥२८॥ मैं जानता
हूं कि—प्रायः तुम्हारा मन घरके कामोंमें आसक्त न होता होगा हे विद्वन् इसीसे धनमें तुम्हारी
प्रीति नहींहै ॥ २९ ॥ कुछ एक मनुष्य काम आदिसे हतचेतन न हो ईश्वरकी रचीहुई मायाकी
वासनाको छोड़ देते हैं और वे मेरेही समान लोककी मर्यादाके निमित्त कर्म करते रहते हैं,॥३०॥
हेब्रह्मन् ! जहां रहकर द्विजलोग आत्मतत्त्व को जान संसारसे पार होजाते हैं उस श्रेष्ठ गुरुकुल में
हमने तुमने निवास कियाथा वह तुमको स्मरणहै ॥ ३१ ॥ हेसखे ! इस ससार में जिससे जन्म
होताहै वह प्रथमगुरु जिससे ब्राह्मणोंके सत्कर्मकी उत्पत्ति होतीहै वह दूसरा गुरु और आश्रमवा-
सियोंको ब्रह्मविद्या देनेवाला तीसरा गुरुहै जो साक्षात् मेरी समानहै ॥ ३२ ॥ हे ब्रह्मन् ! इस म-
नुष्य जन्ममें जो गुरुरूपी मेरे उपदेशसे संसाररूपी समुद्रसे पार होजातेहैं वह निश्चयही अपने अ-
भिप्राय साधनमें पण्डितहैं ॥ ३३ ॥ मैं गुरुकी सेवासे जितना संतुष्ट होताहूं गृहस्थ,ब्रह्मचर्य, वान
प्रस्थ और सन्यासी धर्मसेभी उतना संतुष्ट नहीं होता ॥ ३४ ॥ हेब्रह्मन् ! जब हम गुरुकुल में
रहतेथे तब जो एक घटनाहुईथी उसका तो तुम्हें स्मरण होहीगा ॥३५॥हेद्विज!गुरुपत्नीकी वन से
लकड़ी लानेकी आज्ञापाय जब महावन में प्रवेश किया, तब बिना समयही प्रचण्ड वायु चलने
और घनघोर मेघ गर्जनेलगे ॥ ३६ ॥ सूर्यनारायण अस्त होनेकोथे, कि—उसीसमय दशों दि-
शाएं अन्धकारसे छागईं सब पृथ्वी जलमय होगई इससे कुछ ऊंचा नीचा नहीं जानपड़ताथा, ॥
३७ ॥ जलसे भरेहुए उस वनमें हम महावायु और जलसे बारम्बार पीड़ित होनेलगे और दिशा
ओं का विचार न कर हम तुम एक दूसरे का परस्पर हाथ पकड़ कातरहो बोझा लेकर च-
लने लगे, ॥ ३८ ॥ आचार्य गुरु सांदीपन सूर्योदय होते न होते हमारे खोजनेको बाहर निकले
और वनमें हमको कातर देखकर कहनेलगे कि—, ॥ ३९ ॥ अहो हेपुत्रों ! आत्माही प्राणियों
में श्रेष्ठहै तुम उसी आत्माका तिरस्कारकर मुझको श्रेष्ठ मान और मेरे निमित्त दुःख भोगतेहो ॥
॥४०॥यह देह कि जिससे सब पुरुषार्थ प्राप्त होतेहैं उसदेहको शुद्ध भावसे गुरुके समर्पण करना
यही उत्तम शिष्योंके लिये गुरुका प्रत्युपकार है, ॥ ४१ हेद्विजश्रेष्ठ मैं तुम्हारे ऊपर संतुष्ट हुआ

छन्दांस्ययातयामानि भवन्त्विह परत्र च ॥ ४२ ॥ इत्थंविधान्यनेकानि वसतां गुरुवेश्मसु । गुरोरनुग्रहेणैव पुमान्पूर्णः प्रशान्तये ॥ ४३ ॥ ब्राह्मणउवाच । किमस्माभिरनिर्वृत्तं देवदेव जगद्गुरो । भवता सत्यकामेन येषां वासो गुरावभूत् ॥ ४४ ॥ यस्य च्छन्दोमयं ब्रह्म देह आवपनं विभो । श्रेयसां तस्य गुरुषु वासोऽत्यन्तविडम्बनम् ॥ ४५ ॥

इति श्रीमद्भा० महा० द० उ० अशीतितमोऽध्यायः ॥ ८० ॥

श्रीशुकउवाच । स इत्थं द्विजमुख्येन सह संकथयन्हरिः । सर्वभूतमनोऽभिज्ञः स्मयमानउवाच तम् ॥ १ ॥ ब्रह्मण्यो ब्राह्मणं कृष्णो भगवान्प्रहसन्प्रियम् । प्रेम्णा निरीक्षणेनैव प्रेक्षन्खलु सतां गतिः ॥ २ ॥ श्रीभगवानुवाच ॥ किमुपायनमानीतं ब्रह्मन्मे भवता गृहात् । अण्वप्युपाहृतं भक्तैः प्रेम्णा भूर्येव मे भवेत् । भूर्यप्यभक्तोपहृतं न मे तोषाय कल्पते ॥ ३ ॥ पत्रं पुष्पं फलं तोयं यो मे भक्त्या प्रयच्छति । तदहं भक्त्युपहृतमश्नामि प्रयतात्मनः ॥ ४ ॥ इत्युक्तोऽपि द्विजस्तस्मै व्रीडितः पतये श्रियः । पृथुकप्रसृतिं राजन्न प्रायच्छदवाङ्मुखः ॥ ५ ॥ सर्वभूतात्मदृक् साक्षात्तस्यागमनकारणम् ॥ विज्ञायाचिन्तयन्नायं श्रीकामो माऽभजत्पुरा ॥ ६ ॥ पत्न्याः पतिव्रतायास्तु सखा प्रियचिकीर्षया । प्राप्तो मामस्य दास्यामि संपदोऽमर्त्यदुर्लभाः ॥ ७ ॥ इत्थं विचिन्त्य वसनाच्चीरबद्धान्द्विजन्मनः । स्वयं जहार किमिदमिति पृथुकतण्डुलान् ॥ ८ ॥ नन्वेतदुपनीतं मे परमप्रीणनं सखे । तर्पयन्त्यङ्ग मां विश्वमेते पृथुकतण्डुलाः ॥ ९ ॥ इति मुष्टिं सकृज्जग्ध्वा द्वितीयां जग्धुमाददे । तावच्छ्रीर्जगृहे हस्तं तत्परा परमेष्ठिनः ।

तुम्हारे मनोरथ पूर्ण होवें, मेरे निकट जो वेद पढे हैं उनका सार इसलोक और परलोक मेंभी दूर न होवे ॥ ४२ ॥ हे ब्रह्मन् ! गुरुकुलमें वास करनेके समय इसप्रकार की जो हमारे पक्षमें घटनाएं हुईं थीं उनका क्या तुम्हें स्मरण है ? गुरुकी ही कृपासे मनुष्य शांति को प्राप्त होता है ॥ ४३ ॥ ब्राह्मणने कहा—हे देव देव जगद्गुरो ! आप सत्यकाम हो; हम और आप जब साथही गुरु कुल में वास करते थे तब मुझे किसी बातकी पूर्णता न हुई ॥ ४४ ॥ हे प्रभो ! जिसकी देह वेद मय ब्रह्म और मंगलोंकी उत्पत्तिस्थान है उसका गुरुकुल में वास करना केवल विडंबना की बात है ॥ ४५ ॥

इति श्रीमद्भागवतेमहापुराणे दशमस्कन्धे उ० सरलाभाषाटीकायां अशीतितमोऽध्यायः ॥ ८० ॥

श्रीशुकदेवजी बोलेकि—हे राजन् ! उस श्रेष्ठ ब्राह्मणके साथ इस प्रकारसे बातें करते २ सब प्राणियों केमनके अभिप्रायको जानने वाले भगवान ने हंसते २ कहा ॥ १ ॥ ब्राह्मणों के हितकारी साधुओं के गति भगवान् श्रीकृष्णजी प्यारेको प्रेमदृष्टि से देख हंसकर बोले। हे ब्रह्मन् ! तुमघर से मेरे निकट क्या भेंटलाएहो ? भक्तोंके लायेहुए अणुमात्र द्रव्यकोभी मैं बहुत मानता हूं। अभक्तों के लायेहुए बहुत द्रव्य से भी मुझे संतोष नहीं होता ॥ २–३ ॥ पत्ते, फूल, और जलभक्ति पूर्वक जोकुछ मुझको दान कियाजाता है मैं उसीको ही ग्रहण करता हूं ॥ ४ ॥ हे राजन् ! वह ब्राह्मण इस प्रकार कहेजाने परभी लज्जाके कारण चावल आदि भगवानको न देसका, केवल नीचेको मुख करके रहगया ॥ ५ ॥ साक्षात् सब प्राणियों के अन्तःकरण के साक्षी श्रीकृष्णजी उस ब्राह्मण का आना जानकर चिंताकरने लगेकि इसने लक्ष्मी की कामना करके पहिले मेरी उपासना नहीं की। किंतु अपनी पतिव्रता स्त्री के प्रिय करने के निमित्त मेरे निकट आया है, अतएव इसको देवताओं की समान दुर्लभ सम्पत्तिदूंगा ॥ ६—७ ॥ श्रीकृष्णजी ने इसप्रकारसे विचारकर "यह क्या है" कहकर उस ब्राह्मण के वस्त्र से चीथड़ेमें बँधेहुए चावल छीनलिये और कहा कि ॥ ८ ॥ हे सखे ! यह भेंटतो मुझको अत्यंतही प्यारी है। हे सखे ! इन चावलों से मैं जगदात्मा संतुष्ट होजाऊंगा ॥ ९ ॥ यह कहकर भगवान एक मुट्ठी चावलतो उसमें से खागये और दूसरी मुट्ठी

॥ १० ॥ एतावताऽलं विश्वात्मन्सर्वसंपत्समृद्धये । अस्मिँल्लोकेऽथवाऽमुष्मिन्पुंसस्त्वत्तोषकारणम् ॥ ११ ॥ ब्राह्मणस्तां तु रजनीमुषित्वाऽच्युतमन्दिरे । भुक्त्वा पीत्वा सुखं मेने आत्मानं स्वर्गतं यथा ॥ १२ ॥ श्वोभूते विश्वभावेन स्वसुखेनाभिवन्दितः । जगाम स्वालयं तात पथ्यनुव्रज्य नन्दितः ॥ १३ ॥ स चालब्ध्वा धनं कृष्णान्न तु याचितवान्स्वयम् । स्वगृहान्व्रीडितोऽगच्छन्महद्दर्शननिर्वृतः ॥ १४ ॥ अहो ब्रह्मण्यदेवस्य दृष्टा ब्रह्मण्यता मया । यद्दरिद्रतमो लक्ष्मीमाश्लिष्टो बिभ्रतोरसि ॥ १५ ॥ क्वाहं दरिद्रः पापीयान्क्व कृष्णः श्रीनिकेतनः । ब्रह्मबन्धुरिति स्माहं बाहुभ्यां परिरम्भितः ॥ १६ ॥ निवासितः प्रियाजुष्टे पर्यङ्के भ्रातरो यथा । महिष्या वीजितः श्रान्तो बालव्यजनहस्तया ॥ १७ ॥ शुश्रूषया परमया पादसंवाहनादिभिः । पूजितो देवदेवेन विप्रदेवेन देववत् ॥ १८ ॥ स्वर्गापवर्गयोः पुंसां रसायां भुवि संपदाम् । सर्वासामपि सिद्धीनां मूलं तच्चरणार्चनम् ॥ १९ ॥ अधनोऽयं धनं प्राप्य माद्यन्नुच्चैर्न मां स्मरेत् । इति कारुणिको नूनं धनं मेऽभूरि नाददात् ॥ २० ॥ इति तच्चिन्तयन्नन्तः प्राप्तो निजगृहान्तिकम् । सूर्यानलेन्दुसंकाशैर्विमानैः सर्वतो वृतम् ॥ २१ ॥ विचित्रोपवनोद्यानैः कूजद्द्विजकुलाकुलैः । प्रोत्फुल्लकुमुदाम्भोजकह्लारोत्पलवारिभिः ॥ २१ ॥ जुष्टं स्वलंकृतैः पुम्भिः स्त्रीभिश्च हरिणाक्षिभिः । किमिदं कस्य वा स्थानं कथं तदिदमित्यभूत् ॥ २३ ॥ एवं मीमांसमानं तं नरा नार्योऽमरप्रभाः । प्रत्यगृह्णन्महाभागं गीतवाद्य

कनेका हाथ पसारा कि इतनेही में लक्ष्मीजी ने उनका हाथ पकड़ लिया और कहाकि ॥ १० ॥ हे विश्वात्मन् ! इसलोक और परलोक में भक्तकी जिस संपत्तिको देखकर आप प्रसन्न होतेहो उस समृद्धिके निमित्ततो इतनाही बहुतहै दूसरी मुट्ठी खाकर क्यामुझे इसके आधीनकरोगे ॥ ११ ॥ हेवत्स! ब्राह्मणने भगवानके मंदिरमें उसरात्रिको निवासकिया, सुखसे भोजनतथा पानकर आपको वह स्वर्गमें गयाहुआ विचारने लगा ॥ १२ ॥ दूसरेदिन प्रातःकाल अपने घरकी ओर चला और विश्वके उत्पन्न करने वाले श्रीकृष्णजी ने साथ साथमें कुछदूर जाय प्रणाम और विनयकी बातोंसे उसका संतुष्टकिया ॥ १३ ॥ नतो भगवानने उसे धनदिया औरन उसने लाजके मारमांगा, भगवान के दर्शन से आनंद युक्तहो वह अपने घरकोचला ॥ १४ ॥ जातसमय मनमें विचारने लगाकि—अहो ! मैंने ब्राह्मणों के भक्त भगवान के दर्शन किये, वे वक्ष स्थलमें लक्ष्मीजीको धारण करतेहैं तोभी उन्होंने मुझ दरिद्रीको आलिंगन किया ॥ १५ ॥ कहांतो मैं दरिद्री और नीच ? औरकहां लक्ष्मी के निवास भूमि श्रीकृष्णजी ? मैं श्रेष्ठ ब्राह्मण हूं इसही कारणसे दोनों भुजाओं से मुझ से मिले ॥ १६ ॥ भाइयों की समान लक्ष्मी के सेवन योग्य पलग पर बिठाया और चामर हाथोंमें ले लक्ष्मी ने भी मुझपर पवनकी ॥ १७ ॥ जैसे ब्राह्मण देवताओं की पूजाकरते हैं, भगवान ने वैसेही परम सेवा और पांव आदि चापकरमेरी पूजाकी ॥ १८ ॥ उनके चरणों की सेवा मनुष्योंको स्वर्ग, मुक्ति, पृथ्वीपर बहुतसी संपत्ति, और समस्त सिद्धियों की जड़ है, तोभी ॥ १९ ॥ यह निर्धन धनपाय अत्यंत मतवालाहो मेरास्मरण न करेगा, निश्चयही यह विचारकर परम दयालु भगवानने मुझको धन न दिया ॥ २० ॥ ब्राह्मण इस प्रकार से विचार करते २ अपने घरके निकट आया तोवहां देखाकि घरके चारों ओर सूर्य, अग्नि और चन्द्रमा की समान प्रकाशित विमान छायरहे रहे हैं ॥ २१ ॥ वह विचित्र बाग और फुलवाड़ियों से परिपूर्ण है; उन बागोंके वृक्षोंकी शाखाओं में नाना प्रकार के पक्षी सुखसे गानकररहे हैं सरोवरों में बघौला, कल्हार, उत्पल, कमल और नाना प्रकार के फूलशोभा पारहे हैं ॥ २२ ॥ औरभली प्रकारसे सजेहुए स्त्री पुरुष वहां शोभित होरहे हैं यह देखकर वह ब्राह्मण "यह क्या ? यह स्थान किसका है ? किस प्रकार यह स्थान ऐसा होगया ?" मन २ में इस प्रकार का विचार करनेलगा ॥ २३ ॥ उसही समय देवताओं क

मभूषणा ॥ २४ ॥ पतिमागतमाकर्ण्य पत्न्युद्धर्षातिसंभ्रमा । निश्चक्राम गृहात्तूर्णं रूपिणी श्रीरिवालयात् ॥ २५ ॥ पतिव्रतापतिंदृष्ट्वा प्रेमोत्कण्ठाऽश्रुलोचना । मीलिताक्ष्यनमद्बुद्ध्या मनसापरिषस्वजे ॥ २६ ॥ पत्नींवीक्ष्यविस्फुरन्तीं देवींवैमानिकीमिव । दासीनांनिष्ककण्ठीनांमध्येभान्तींसविस्मितः ॥२७॥ प्रीतःस्वयंतयायुक्तः प्रविष्टोनिजमन्दिरम् । मणिस्तम्भशतोपेतंमहेन्द्रभवनंयथा ॥ २८ ॥ पयःफेननिभाः शय्यादान्तारुक्मपरिच्छदाः । पर्यङ्काहेमदण्डानिचामरव्यजनानिच ॥ २९ ॥ आसनानिचहैमानिमृदूपस्तरणानिच । मुक्तादामविलम्बीनिवितानानिद्युमन्तिच ॥३० स्वच्छस्फटिककुड्येषुमहामारकतेषुच । रत्नदीपान्भ्राजमानाँल्ललनारत्नसंयुताः ॥ ३१ ॥ विलोक्यब्राह्मणस्तत्रसमृद्धीःसर्वसंपदाम् । तर्कयामासनिर्व्यग्रः स्वसमृद्धिमहैतुकीम् ॥ ३२ ॥ नूनंबतैतन्ममदुर्भगस्यशश्वद्दरिद्रस्यसमृद्धिहेतुः । महाविभूतेरवलोकतोऽन्योनैवोपपद्येतयदूत्तमस्य ॥ ३३ ॥ नन्वब्रुवाणोदिशतेसमक्षंयाचिष्णवेभूर्यपिभूरिभोजः । पर्जन्यवत्तत्स्वयमीक्षमाणोदाशार्हकाणामृषभः सखा मे ॥ ३४ ॥ किञ्चित्करोत्युर्वपियत्स्वदत्तंसुहृत्कृतंफल्ग्वपिभूरिकारी । मयोपनीतं पृथुकैकमुष्टिंप्रत्यग्रहीत्प्रीतियुतोमहात्मा ॥ ३५ ॥ तस्यैवमेसौहृदसख्यमैत्रीदास्यं पुनर्जन्मनिजन्मनिस्यात् । महानुभावेनगुणालयेनविषज्जतस्तत्पुरुषप्रसङ्गः ॥३६॥ भक्तायचित्राभगवान्हिसंपदोराज्यंविभूतीर्नसमर्थयत्यजः । अदीर्घबोधायविचक्ष

प्रभाकी समान स्त्री पुरुषों ने बाजेगाजे से आनंद पूर्वक भेटआदिदे उसका आदर किया ॥२४॥ स्वामीका आनासुन उस ब्राह्मण की स्त्रीको अत्यंत आनंद हुआ । वह अत्यंत आदर से मूर्तिमान लक्ष्मी की समान शीघ्रही घरसे बाहर निकली ॥ २५ ॥ पतिको देखतेही प्रेमसे उत्कंठितहो पतिव्रता के नेत्रोंमें आनंदाश्रु भरआये । उसने आंखोंको बन्दकर बुद्धिसे उसको प्रणाम और मनसे आलिंगन किया ॥ २६ ॥ स्त्रीको विमान में बैठीहुई देवीकी समान प्रकाशित और आभूषणों से सजीहुई दासियों के बीचमें विराजमान देखकर वह ब्राह्मण अत्यंत विस्मित हुआ ॥ २७ ॥ फिर प्रसन्नचित्तहो उसके साथ स्वयं इन्द्रभवनकी समान सौ खंभोंवाले अपने घरमेंगया ॥ २८ ॥ वहां दुग्धके फेनकी समान शय्या, सुवर्णकी सामग्री युक्त हाथीदांत के पलंग, सुवर्णकी डंडीवाले चामर और व्यजन ॥ २९ ॥ कोमल बिछौने बिछेहुए आसन, सुंदर मोतियों की झालरोंयुक्त कांतिशाली विमान और स्त्री रत्नोंसमेत स्फटिक मणियों की भीतों और मरकत मणियों के स्थलों मे रत्नों के दीपक शोभायमान होरहेथे ॥ ३०—३१ ॥ अपने घरमें इस प्रकार की सम्पत्तिको देखकर ब्राह्मण चुपचापहो स्थिर चित्तसे विचार करनेलगा, कि—॥ ३२॥ मैं अत्यतही अभागा और दरिद्री हूं, मेरी सम्पत्तिका कारण महा विभूतिशाली भगवान के दर्शनबिना और कुछ नहीं होसकता ॥३३॥ जैसे समुद्रको पूर्ण करने वाला महा उदार मेघ किसी समय अधिकतर वृष्टिकोभी अल्प जानकर मानो सरमाता है । ऐसे समय में बरसता हुआ रात्रीमे मनुष्यों के सोजानेपर उनके खेतोंको जल से पूर्ण करदेता है । वैसेही मेरे मित्रश्रेष्ठ यादव श्रीकृष्णजी बहुतसा दान करके भी स्वयं उसको थोड़ा जानकर दर्शन करते हुए याचक के सामने न कहकर बहुत कुछदेते हैं ॥ ३४ ॥ वह अपने दियेहुए अधिक दानको भी तुच्छ और और भक्तके दानको तुच्छ होतेहुए भी बहुत कुछ मानतेहैं इसही कारण मैं जोथोडे से चावल लेगयाथा, महात्मा ने प्रीतिवशहो उन्हींको ग्रहण किया ॥३५॥ मेरी उनसे यही प्रार्थना है किमुझे जन्म २ में उन्हीं में प्रेम, सुहृदता, मित्रता व दासभाव प्राप्त होवे और उन्हीं महानुभाव भगवान में प्रीतिहो उनके भक्तों से सत्संग हुआकरे ॥ ३६ ॥ स्वयं

नः स्वयं मन्यते विपातं श्रीमान् मदोन्नम् ॥ ३७ ॥ इत्थं व्यवसितो बुद्ध्या भक्तोऽतीव जनार्दने । विषयाञ्जायया त्यक्ष्यन्बुभुजे नातिलम्पटः ॥ ३८ ॥ तस्य वै देवदेवस्य हरेर्यज्ञपतेः प्रभोः । ब्राह्मणाः प्रभवो दैवं न तेभ्यो विद्यते परम् ॥ ३९ ॥ एवं स विप्रो भगवत्सुहृत्तदा दृष्ट्वा स्वभृत्यैरजितं पराजितम् । तद्ध्यानवेगोद्ग्रथितात्मबन्धनस्तद्धाम लेभेऽचिरतः सतां गतिम् ॥४०॥ एतद्ब्रह्मण्यदेवस्य श्रुत्वा ब्रह्मण्यतां नरः । लब्धभावो भगवति कर्मबन्धाद्विमुच्यते ॥ ४१ ॥

इति श्रीमद्भा० महा० दशमस्कन्धोत्तरार्धे एकाशीतितमोऽध्यायः ॥ ८१ ॥

श्रीशुक उवाच ॥ अथैकदा द्वारवत्यां वसतो रामकृष्णयोः । सूर्योपरागः सुमहानासीत्कल्पक्षये यथा ॥ १ ॥ तं ज्ञात्वा मनुजा राजन्पुरस्तादेव सर्वतः । स्यमन्तपञ्चकं क्षेत्रं ययुः श्रेयोविधित्सया ॥ २ ॥ निःक्षत्रियां महीं कुर्वन्रामः शस्त्रभृतां वरः । नृपाणां रुधिरौघेण यत्र चक्रे महाह्रदान् ॥ ३ ॥ ईजे च भगवान्रामो यत्रास्पृष्टोऽपि कर्मणा । लोकं संग्राहयन्नीशो यथाऽन्योऽघापनुत्तये ॥४॥ महत्यां तीर्थयात्रायां तत्राऽऽगन्भारतीः प्रजाः । वृष्णयश्च तथाऽक्रूरवसुदेवाहुकादयः ॥ ५ ॥ ययुर्भारत तत्क्षेत्रं स्वमघं क्षपयिष्णवः । गदप्रद्युम्नसाम्बाद्याः सुचन्द्रशुकसारणैः ॥ ६ ॥ आस्तेऽनिरुद्धो रक्षायां कृतवर्मा च यूथपः । तेरथैर्देवधिष्ण्याभैर्हयैश्च तरलप्लवैः ॥ ७ ॥ गजैर्नदद्भिरभ्राभैर्नृभिर्विद्याधरद्युभिः । व्यरोचन्त महातेजाः पथि काञ्चनमालिनः ॥ ८ ॥ दिव्यस्रग्वस्त्रसन्नाहाः कलत्रैः खेचरा इव । तत्र स्नात्वा महाभागा उपोष्य सुसमाहिताः ॥ ९ ॥ ब्राह्मणेभ्यो ददुर्धेनूर्वासः स्रग्रुक्ममालिनीः । रामह्रदेषु विधिवत्पुनराप्लुत्य वृ

विचकी भगवान धनी पुरुषोंको धनके मदसे गिरता देख अविचारी भक्तको नाना संपत्ति, राज्य और ऐश्वर्य नहीं देते ॥ ३७ ॥ श्रीदाम बुद्धिसे इसप्रकार निश्चयकर भगवान में अत्यंत भक्तिमान हुआ और विषयोंको धीरेधीरे त्याग अति आसक्त नहो स्त्रीके साथ विषयभोग करनेलगा ॥३८॥ देवदेव यज्ञपति भगवान के ब्राह्मणही प्रभु और इष्टदेव हैं इनसे बढकर और कोईश्रेष्ठ नहीं है ॥ ३९ ॥ इस प्रकार भगवानका मित्र वह ब्राह्मण श्रीकृष्णजी को अजित और भक्तों से पराजित होतादेख उनका ध्यान करता हुआ अहंकार रहित होगया और थोड़ेही दिनों के उपरांत ब्रह्मवेत्ताओं के गति उस शुद्ध धामको प्राप्त हुआ ॥ ४० ॥ हे राजन्! जोमनुष्य ब्रह्मण्य देव भगवान की इस ब्रह्मण्यताको सुनेगा वह भगवद्भक्ति प्राप्तकर कर्मके बंधानों से छूटजावेगा ॥ ४१ ॥

इतिश्री मद्भागवतेमहापुराणेदशमस्कंधेसरलाभाषाटीकायांएकाशीतितमोऽध्यायः ॥ ८१ ॥

श्रीशुकदेवजी बोले कि—हे राजन्! राम कृष्णके द्वारकामें निवासकरतेहुए एकसमय प्रलय कालकी समान बडाभारी सूर्य ग्रहण पडा ॥ १ ॥ हे राजन्। सबओरके मनुष्य प्रथमसेही इसको जानकर अपने कल्याणकी इच्छासे कुरुक्षेत्रमें आये ॥ २ ॥ शस्त्रधारियोंमें श्रेष्ठ परशुरामजी ने पृथिवीको क्षत्रीरहित कर राजाओंके रुधिरसे वहां बड़े२ ह्रद बनायेथे ॥ ३ ॥ वहांपर भगवान परशुरामजीने पापका स्पर्श न होनेपरभी साधारण मनुष्योंकी समान पाप निवृत्तिके निमित्त लोक की मर्यादाके कारण यज्ञकिये थे ॥ ४ ॥ इस बडे पर्वमें भारतवर्षकी समस्तप्रजा वहां आई। हे भारत! अक्रूर, वसुदेव, और आहुकादि वृष्णिगणभी अपने पाप दूरकरनेकी इच्छासे उस क्षेत्रमें आये ॥ ५ ॥ गद, प्रद्युम्न, साम्ब, सुचन्द्र, शुक और सारण के साथ ॥ ६ ॥ अनिरुद्ध और सेनापति कृतवर्मा द्वारकामें रक्षाके निमित्तरहे। विमानों की समान रथ, तरङ्गों की समान चंचल घोड़े, बादल की सदृश गरजतेहुए हाथी, व विद्याधरोंकी समान देदीप्यमान यादव सुवर्ण की माला धारण किये ॥७—८॥ और दिव्यवस्त्र व कवच पहिरे स्त्रियोंके संग जातेहुए देवताओंकी समान शोभा देरहे थे उससमय महाभाग वृष्णियोंने वहां स्नानकर एकाग्र चित्तसे व्रत धारण किया ॥ ९ ॥ और ब्राह्मणोको उन्होंने वस्त्र, माला, और कंचनके मालावाली गौयें दानदीं उन्हों

ण्यः ॥ १० ॥ ददुः स्वन्नं द्विजाग्र्येभ्यः कृष्णे नो भक्तिरस्त्विति । स्वयं च तदनुज्ञाता वृष्णयः कृष्णदेवताः ॥ ११ ॥ भुक्त्वोपविविशुः कामं स्निग्धच्छायाङ्घ्रिपाङ्घ्रिषु । त आगतांस्तेददृशुः सुहृत्सम्बन्धिनो नृपान् ॥ १२ ॥ मत्स्योशीनरकौसल्यविदर्भकुरुसृञ्जयान् । काम्बोजकैकयान्मद्रान्कुन्तीनानर्तकेरलान् ॥ १३ ॥ अन्यांश्चैवात्मपक्षीयान्परांश्च शतशो नृप । नन्दादीन्सुहृदो गोपान्गोपीश्चोत्कण्ठिताश्चिरम् ॥ १४ ॥ अन्योऽन्यसंदर्शनहर्षरंहसा प्रोत्फुल्लहृद्वक्त्रसरोरुहश्रियः । आश्लिष्य गाढं नयनैः स्रवज्जला हृष्यत्त्वचो रुद्धगिरो ययुर्मुदम् ॥ १५ ॥ स्त्रियश्च संवीक्ष्य मिथोऽतिसौहृदस्मितामलापाङ्गदृशोऽभिरेभिरे । स्तनैः स्तनान्कुङ्कुमपङ्करूषितान्निहत्य दोर्भिः प्रणयाश्रुलोचनाः ॥ १६ ॥ ततोऽभिवाद्य ते वृद्धान्यविष्ठैरभिवादिताः । स्वागतं कुशलं पृष्ट्वा चक्रुः कृष्णकथा मिथः ॥ १७ ॥ पृथा भ्रातॄन्स्वसॄर्वीक्ष्य तत्पुत्रान्पितरावपि । भ्रातृपत्नीर्मुकुन्दं च जहौ संकथया शुचः ॥ १८ ॥ कुन्त्युवाच । आर्य भ्रातरहं मन्ये आत्मानमकृताशिषम् । यद्वा आपत्सु मद्वार्तां नानुस्मरथ सत्तमाः ॥ १९ ॥ सुहृदो ज्ञातयः पुत्रा भ्रातरः पितरावपि । नानुस्मरन्ति स्वजनं यस्य दैवमदक्षिणम् ॥ २० ॥ वसुदेव उवाच ॥ अम्ब मास्मानसूयेथा दैवक्रीडनकान्नरान् । ईशस्य हि वशे लोकः कुरुते कार्यतेऽथवा ॥ २१ ॥ कंसप्रतापिताः सर्वे वयं याता दिशो दश । एतर्ह्येव पुनः स्थानं दैवेनासादिताः स्वसः ॥ २२ ॥ श्रीशुक उवाच ॥ वसुदेवोग्रसेनाद्यैर्यदुभिस्तेऽर्चिता नृपाः । आसन्नच्युतसंदर्शपरमानन्दनिर्वृताः ॥ २३ ॥ भीष्मो द्रोणोऽम्बिकापु

ने फिर दूसरीबार रामकुण्ड में विधिवत स्नानकर ॥ १० ॥ श्रीकृष्णजीमें हमारी भक्तिहोवे, इसकामना से ब्राह्मणों को सुस्वादु भोजनदिया श्रीकृष्णजीही जिनके देवता हैं ऐसे वृष्णिवंशी उनकी आज्ञापाय ॥ ११ ॥ आपभी भोजनकर शीतल छायावाले वृक्षोंके नीचे सुखसे बैठे हे राजन् ! वहां उशीनर, कौशल्य, विदर्भ, कुरु, सृंजय, काम्बोज, केकय, मद्र, कुंति, आनर्त्त, केरल ॥ १२-१३ ॥ आदि श्रीकृष्णजीके सुहृद और सम्बन्धी राजा व सैकड़ों दूसरे अपने पक्षवाले राजा व सुहृद नन्दादि गोप और उत्कंठित गोपियें भी आईं ॥ १४ ॥ परस्परके दर्शनों से जो हर्ष उत्पन्नहुआ उसके मारे उनका सुन्दर कमलमुख भलीभांति प्रफुल्लितहोगया, प्रेमसे गाढ आलिंगनकर उनके नेत्रों से आंसुओं की धारा बहने लगी अत्यानन्द का अनुभव करनेलगे ॥ १५ ॥ परस्पर मिल सुहृदता के कारण स्त्रियों की कटाक्ष दृष्टि निर्मल हुई वे केसर लगेहुए स्तनों को मल २ भुजाओंसे परस्पर आलिंगनकरने लगीं नेत्रों से उनके प्रेमाश्रु बहनेलगे ॥ १६ ॥ अनतर वे वृद्धों को प्रणामकर और छोटों से पूजित हो परस्पर की कुशल पूछ श्रीकृष्णजी की बातें करन लगे ॥ १७ ॥ कुंती भाइयों-सहित बहिनों और उनके पुत्रों को पिता माता, भाइयोंकी स्त्रियों को और श्रीकृष्णजी को देख श्री० की. बातों से शोक रहित हुईं ॥ १८ ॥ कुंतिने वसुदेव से कहाकि—हे आर्य्य भ्राता ! मैं अपनेको अकृतार्थ जानतीहूं क्योंकि अति सामर्थ्य वान तुम विपत् कालमें भी मेरीसुध नहीं लेते ॥ १९ ॥ जिससे दैव विमुख होता है उसका स्मरण, सुहृद, जातिवाले, पुत्र, भ्राता, पिता और माता भी नहीं करते ॥ २० ॥ वसुदेवजी ने कहा कि—हे अम्ब ! हमें दोषन दो, हम मनुष्य दैव के खिलौने हैं; लोक भगवान केही वशमें हो कार्य करते हैं ॥ २१ ॥ हम लोग कंससे अत्यत दुःखित हो दशों दिशाओं को भाग निकले थे । हे भगिनि ! दैवेच्छासे अभी अपने स्थान पर आये हैं ॥ २२ ॥ श्रीशुकदेवजी बोले कि—हे राजन् ! पूर्वोक्त सब राजा वसुदेव और उग्रसेनादि यदु वंशियों से पूजित हो श्रीकृष्णजी का दर्शन कर अत्यत आनंद को प्राप्त हुए ॥ २३ ॥ हे राजेन्द्र ! भीष्म, द्रोण, धृतराष्ट्र, पुत्रों समेत गांधारी, स्त्रियों समेत पाण्डव, कुंती, संजय, विदुर, कृप, कुंतिभोज, विराट, भीष्मक, नग्नजित, पुरुजित, द्रुपद, शल्य, धृष्टकेतु,

गान्धारी ससुता तथा । सदाराः पाण्डवाः कुन्ती सञ्जयो विदुरः कृपः ॥२४॥ कुन्तिभो-
जो विराटश्च भीष्मको नग्नजिन्महान् । पुरुजिद्द्रुपदः शल्यो धृष्टकेतुः स काशिराट् ॥
॥ २५ ॥ दमघोषो विशालाक्षो मैथिलो मद्रकेकयौ । युधामन्युः सुशर्मा च ससुता बा-
ह्लिकादयः ॥ २६ ॥ राजानो ये च राजेन्द्र युधिष्ठिरमनुव्रताः । श्रीनिकेतं वपुः शौरेः
सस्त्रीकं वीक्ष्य विस्मिताः ॥२७॥ अथ ते रामकृष्णाभ्यां सम्यक्प्राप्तसमर्हणाः । प्रश-
शंसुर्मुदा युक्ता वृष्णीन्कृष्णपरिग्रहान् ॥२८॥ अहो भोजपते यूयं जन्मभाजो नृणामिह ।
यत्पश्यथासकृत्कृष्णं दुर्दर्शमपि योगिनाम् ॥ २९ ॥ यद्विश्रुतिः श्रुतिनुतेदमलं पुनाति
पादावनेजनपयश्च वचश्च शास्त्रम् । भूः कालभर्जितभगापि यदङ्घ्रिपद्मस्पर्शोत्थशक्ति
रभिवर्षति नोऽखिलार्थान् ॥ ३० ॥ तद्दर्शनस्पर्शनानुपथप्रजल्पशय्यासनाशनसयौ
नसपिण्डबन्धः । येषां गृहे निरयवर्त्मनि वर्ततां वः स्वर्गापवर्गविरमः स्वयमास विष्णुः
॥ ३१ ॥ श्रीशुक उवाच ॥ नन्दस्तत्र यदून्प्राप्ताञ्ज्ञात्वा कृष्णपुरोगमान् । तत्रागमद्वृ
तो गोपैरनःस्थार्थैर्दिदृक्षया ॥ ३२ ॥ तं दृष्ट्वा वृष्णयो हृष्टास्तन्वः प्राणमिवोत्थिताः
। परिषस्वजिरे गाढं चिरदर्शनकातराः ॥ ३३ ॥ वसुदेवः परिष्वज्य सम्प्रीतः प्रेमवि-
ह्वलः । स्मरन्कंसकृतान्क्लेशान्पुत्रन्यासं च गोकुले ॥३४॥ कृष्णरामौ परिष्वज्य पि-
तरावभिवाद्य च । न किञ्चनोचतुः प्रेम्णा साश्रुकण्ठौ कुरूद्वह ॥ ३५ ॥ तावात्मासन
मारोप्य बाहुभ्यां परिरभ्य च । यशोदा च महाभागा सुतौ विजहतुः शुचः ॥ ३६ ॥
रोहिणी देवकी चाथ परिष्वज्य व्रजेश्वरीम् । स्मरन्त्यौ तत्कृतां मैत्रीं बाष्पकण्ठ्यौ समू-

काशिराज, दमघोष, विशालाक्ष, मैथिल, मद्र, केकय, युधामन्यु, सुशर्मा, पुत्रोंसमेत बाह्लीक, और युधिष्ठिर के वशवर्ती दूसरे राजा श्रीकृष्णजी को उनकी स्त्रियों समेत देखकर विस्मितहुए २४॥ ॥ २७ ॥ अतएव बलदेवजी व श्रीकृष्णजी ने उनका भलीभांति सत्कार किया वे सब राजालोग उनसे सम्मानितहो सब यादवों की प्रशंसा करने लगे ॥ २८ ॥ अहो ! भोजपते ! इसलोक में मनुष्यों में आपही का जन्म सार्थक है; कारण कि आप श्रीकृष्णजी के दर्शन कि जिनके दर्शन योगियों को भी दुर्लभ हैं निरन्तर किया करतेहो ॥ २९ ॥ श्रुति में गाई हुई जिनकी कीर्ति, व जिनके चरणों का जल और वाक्यरूप शास्त्र इस विश्व को पवित्र करते हैं और यह पृथिवी काल की गति से शक्तिहीन होनेपरभी जिनके चरणों के स्पर्श से शक्तिपाकर हमको सबपदार्थ देती है ॥ ३० ॥ आप संसार के कारणरूप घर में बसकर भी उन्हीं श्रीविष्णुजी के साथ दर्शन, स्पर्शन गमन, वार्तालाप, शयन, भोजन, विवाह, और दैहिक सम्बन्ध से सम्बन्धितहो स्वर्ग और मोक्ष की तृष्णा से निवृत्त होगयेहो अतएव तुम्हारा जन्म सफल हुआ ॥ ३१ ॥ श्रीशुकदेवजी ने कहा कि हेराजन् ! श्रीकृष्णआदि यदुवंशियों को वहां आयाहुआ जान श्रीनन्दजी दर्शन करने की इच्छा से गोपों समेत शकटों में सामग्री आदि भरकर वहां आये ॥ ३२ ॥ उनको वहां आया देख, बहुत दिनों के उपरांत दर्शन होने के कारण, यदुगण आनन्दितहो प्राण के आनेसे देह के उठने की समान उठकर भलीप्रकार उनसे मिले ॥ ३३ ॥ कंसके दियेहुए क्लेशों और गोकुल में पुत्रों के छोड़ने का स्मरणकर वसुदेवजी उनसे मिलकर अत्यन्त आनन्दित और प्रेमसे विह्वल होगए ॥ ३४ ॥ हे कुरुश्रेष्ठ ! पिता माता से मिल और उनको प्रणामकर श्रीकृष्णजी और बलरामजी का कण्ठ प्रेमाश्रु से रुकगया और वे कुछ न कहसके ॥ ३५ ॥ महाभागा यशोदाने उन दोनों पुत्रों को अपने आसनपर बिठाय दोनों बाहों से उनसे मिल अपने सबशोक को दूर किया ॥ ३६ ॥ अनन्तर रोहिणी और देवकी ने यशोदाजी से मिल उनकी मित्रता का स्मरणकर आंसू भरकर उनसे एकसंगही कहा कि—॥३७॥ हे व्रजेश्वरि ! कौन स्त्री तुम दोनों जनों की मित्रता को भूलसकती है ? इंद्र की समान ऐश्वर्य पाने पर भी उसका बदला नहीं दियाजासकता॥३८॥

चतुः ॥ ३७ ॥ कच्चित्स्मरथ नो मैत्रीमनिवृत्तां व्रजेश्वर । अवाप्याप्यैन्द्रमैश्वर्यं यस्या नेह प्रतिक्रिया ॥ ३८ ॥ एतावदृष्टपितरौ युवयोः स्म पित्रोः संप्रीणनाभ्युदयपोषणपालनानि । प्राप्योषतुर्भवति पक्ष्म ह यद्वदक्ष्णोर्न्यस्तावकुत्रचभयौ न सतां परः स्वः ॥ ३९ ॥ श्रीशुक उवाच ॥ गोप्यश्च कृष्णमुपलभ्य चिरादभीष्टं यत्प्रेक्षणे दृशिषु पक्ष्मकृतं शपन्ति । दृग्भिर्हृदीकृतमलं परिरभ्य सर्वास्तद्भावमापुरपि नित्ययुजां दुरापम् ॥ ४० ॥ भगवांस्तास्तथाभूता विविक्त उपसंगतः । आश्लिष्यानामयं पृष्ट्वा प्रहसन्निदमब्रवीत् ॥ ४१ ॥ अपि स्मरथ नः सख्यः स्वानामर्थचिकीर्षया । गतांश्चिरायिताञ्छत्रुपक्षक्षपणचेतसः ॥ ४२ ॥ अप्यवध्यायथाऽस्मान्स्विदकृतज्ञा विशङ्कया । नूनं भूतानि भगवान्युनक्ति वियुनक्ति च ॥ ४३ ॥ वायुर्यथा घनानीकं तृणं तूलं रजांसि च । संयोज्याक्षिपते भूयस्तथा भूतानि भूतकृत् ॥ ४४ ॥ मयि भक्तिर्हि भूतानाममृतत्वाय कल्पते । दिष्ट्या यदासीन्मत्स्नेहो भवतीनां मदापनः ॥ ४५ ॥ अहं हि सर्वभूतानामादिरन्तोऽन्तरं बहिः । भौतिकानां यथा खं वार्भूर्वायुर्ज्योतिरङ्गनाः ॥ ४५ ॥ एवं ह्येतानि भूतानि भूतेष्वात्मात्मना ततः । उभयं मय्यथ परे पश्यताभातमक्षरे ॥ ४७ ॥ श्रीशुक उवाच ॥ अध्यात्मशिक्षया गोप्य एवं कृष्णेन शिक्षिताः । तदनुस्मरणध्वस्तजीवकोशास्तमध्यगन् ॥ ४८ ॥ आहुश्च ते नलिननाभ पदारविन्दं योगेश्वरैर्हृदि विचिन्त्यमगाधबोधैः । संसारकूपपतितोत्तरणावलम्बं गेहं जुषामपि मनस्युदियात्सदा नः ॥ ४९ ॥

इति श्रीमद्भा० महा० दशमस्कन्धे उ० द्व्यशीतितमोऽध्यायः ॥ ८२ ॥

जिन हमारे दोनों बालकों ने पिता माता को भी न देखा; पलकें जैसे आंखों की रक्षाकरती हैं उसी प्रकार वे, माता पिता रूप आप से भलीप्रकार भोजन, पोषण, पालनादि पाकर रक्षितहुए कहींभी इनको भय नहींहुआ सत्य है सत्पुरुषों में भेदबुद्धि नहीं होती ॥ ३९ ॥ श्रीशुकदेवजी बोले कि–हेराजन् ! जिनके दर्शन में पलकों की ओट हानेसे पलक बनानेवाले ब्रह्मा को गोपियें गाली देती हैं उन प्यारे श्रीकृष्णको उन्होंने बहुत दिनों में देखा, अतएव वे नेत्रोंद्वारा उन्हें हृदय में स्थापितकर–योगियों को भी दुर्लभ तद्रूपभाव को प्राप्तहो गद्गद होगईं ॥ ४० ॥ जो गोपियां भगवान से एकांत में मिलीं भगवान ने उनसे आलिंगनकर आरोग्य पूछ हंसकर कहा कि–॥४१॥ हे सखियों ! क्यातुम हमारा कभी स्मरण करतीहो ? मैं अपने बंधु बांधवों के अभिप्राय पूर्ण करने के निमित्त चलाआयाथा ॥ ४२ ॥ मैं अकृतज्ञहूं—तुमक्या इसप्रकार की कुछ शंका करतीहो ? क्या इसही कारण मुझ से क्रोधित रहतीहो ? निश्चय भगवानही प्राणियों को मिलाते और बिछुड़ाते हैं ॥४३ ॥ जैसे पवन बादलों को और तृण, धूल रुई को मिलाता औरबिछुड़ाता है वैसेही ईश्वरभी प्राणियों को मिलाकर बिछुड़ा देता है ॥ ४४॥ मुझ में भक्ति करके प्राणी मोक्ष पासकते हैं । भाग्यवश मुझ में तुम्हारा स्नेह हुआ है कि जिससे मेरी प्राप्ति होसकती है ॥ ४५॥ हे अंगनाओ ! जैसे आकाश, जल, पृथिवी, वायु, और तेज ये पांच महाभूतही घटादिक पदार्थों के आदि अंत, बाहिरी भीतरी रूप हैं वैसेही मैंभी सब प्राणियों का आदि अंत बाहिरी, भीतरी रूपहूं ॥ ४६ ॥ इसी प्रकारजरायुज, अण्डज, स्वेदज, उद्भिज ये चारप्रकारके जीव अपनेकारण रूप पंचमहाभूतों में रहते हैं आत्माही से भूत सबस्थानों में विस्तृत रहते हैं; परंतु यह दोनों परमपुरुष मुझ में प्रकाशमान हैं॥४७॥श्रीशुकदेवजी बोलेकि–श्रीकृष्णजीने इसप्रकार उन्हें स्वरूप उपदेश से शिक्षित किया, उसके स्मरण से उनका लिंगदेह छूटगया और उन्हीं को प्राप्तहुईं और इसप्रकार से कहने लगीं॥४८॥कि–हेपद्मनाभ ! हमारी प्रार्थनाहै कि चाहे हमघरका सेवन भलेही करें परंतु तौभी अगाध बोध योगी जिसका हृदय में ध्यान करते हैं और जो संसार कूपमें गिरे हुए मनुष्यों के लिये अवलम्बनरूप हैं उन आप के चरणों में सदैव हमारामन लगारहे ॥ ४९ ॥

इतिश्री मद्भागवतमहापुराणेदशमस्कंधेउ०सरलाभाषाटीकायांद्व्यशीतितमोऽध्यायः ॥ ८२ ॥

श्रीशुकउवाच। तथानुगृह्य भगवान्गोपीनां सगुरुर्गतिः। युधिष्ठिरमथापृच्छत्सर्वांश्च सुहृदोऽव्ययम् ॥ १ ॥ तएवंलोकनाथेन परिपृष्टाःसुसत्कृताः प्रत्यूचुर्हृष्टमनसस्तत्पादेक्षाहतांहसः ॥ २ ॥ कुतोऽशिवंत्वच्चरणाम्बुजासवं महन्मनस्तोमुखनिःसृतंक्वचित्। पिबन्तियेकर्णपुटैरलंप्रभो देहंभृतांदेहकृदस्मृतिच्छिदम् ॥ ३ ॥ हित्वाऽऽत्मधाम विधुतात्मकृतत्र्यवस्थमानन्दसम्प्लवमखण्डमकुण्ठबोधम्। कालोपसृष्टनिगमावन आत्तयोगमायाकृतिं परमहंसगतिंनताःस्मः ॥ ४ ॥ ऋषिरुवाच। इत्युत्तमश्लोकशिखामणिं जनेष्वभिष्टुवत्स्वन्धककौरवस्त्रियः। समेत्यगोविन्दकथामिथोऽगृणंस्त्रिलोकगीताः शृणुवर्णयामिते ॥ ५ ॥ द्रौपद्युवाच। हेवैदर्भ्यच्युतोभद्रे हेजाम्बवतिकौसले। हेसत्यभामे कालिन्दिशैब्ये रोहिणिलक्ष्मणे ॥ ६ ॥ हेकृष्णपत्न्यएतन्नोब्रूत वोभगवान्स्वयम्। उपयेमेयथा लोकमनुकुर्वन्स्वमायया ॥ ७ ॥ रुक्मिण्युवाच। चैद्यायमाऽर्पयितुमुद्यतकार्मुकेषु राजस्वजेयभटशेखरिताङ्घ्रिरेणुः। निन्येमृगेन्द्रइव भागमजावियूथात्तच्छ्रीनिकेतचरणोऽस्तु ममार्चनाय ॥ ८ ॥ सत्यभामोवाच ॥ योमेसनाभिवधतप्तहृदा ततेनलिप्ताभिशापमपमार्ष्टुमुपाजहार ॥ जित्वर्क्षराजमथरत्नमदात्सतेन भीतःपिताऽदिशतमांप्रभवेऽपिदत्ताम् ॥ ९ ॥ जाम्बवत्युवाच। प्राज्ञायदेहकृदमुंनिजनाथदैवं सीतापतिं त्रिणवहान्यमुनाऽभ्ययुध्यत् ज्ञात्वापरीक्षितउपाहरदर्हणंमांपादौप्रगृह्यमणिनाऽहममुष्यदासी ॥१०॥ कालिन्द्यु-

शुकदेवजी बोले कि—हेराजन्! सबके गुरु और गति भगवान श्रीकृष्णजीने गोपियोंपर अनुग्रह कर युधिष्ठिर और समस्त बंधुओं की कुशल पूछी, ॥ १ ॥ भगवान के इसप्रकार अति आदर से प्रश्न करनेपर वे निष्पापहो प्रसन्न मनसे कहनेलगे कि—॥२॥ हेप्रभो! आपका चरणोदक रूप आसव प्राणियों के देह जनित अविद्या का नाश करताहै वह महात्माओं के मन से मुखद्वारा प्रगट होता रहताहै। जो कानोंरूप अंजुली से उसको पीतहैं उनको अमंगल कहांसे होसक्ता है, ॥ ३ ॥ हम आपको प्रणाम करतेहैं, अपने तेजसेही अपने आपही तीनों अवस्थाएं दूर होतीहैं, अतएव आप सर्वानंद कदम्ब स्वरूपहो। आप अखण्ड अकुंठित शक्तिवालेहो काल वशसे लुप्तहुए वेदों की रक्षाके निमित्त आप योगमाया के योग से नानाप्रकार की मूर्त्ति धारण करते रहतेहो आप परमहंसों की गतिहो ॥ ४ ॥ शुकदेवजीने कहा कि—हेराजन्! मनुष्य इस प्रकार से पवित्र यशवाले भगवानकी स्तुति करनेलगे, अंधकों और कौरवोंकी स्त्रियें मिलकर परस्पर के नानागीतों से भगवान मुकुन्द के चरित्र गानेलगीं इससमय उनका वर्णन करताहूं सुनो ॥ ५ ॥ प्रथम द्रौपदीने कहाकि—हे विदर्भनन्दिनि! हेभद्रे! हे जांबवति! हेसत्यभामे! हेकालिन्दि! हेमित्रविंदे! हेरोहिणि! हेलक्ष्मणे! हेदूसरी श्रीकृष्णजीकी स्त्रियों! स्वयं भगवानने अपनी मायाके योगसे मनुष्यों का अनुकरण कर जिसप्रकार अपने विवाह कियेथे उन सबका वर्णन करो ॥ ६—७ ॥ रुक्मिणी ने कहा कि—जरासन्ध आदि राजा मुझे शिशुपालके देनेके निमित्त धनुष लेकर उद्यत हुएथे परन्तु श्रीकृष्णजीने अपना चरण उन अजय योद्धाओंके मस्तक पर रख सियारों के बीचमेंसे अपने भागहारी सिंहकी समान मेरा हरण कियाथा वे भगवान मेरे पूजनीयहैं ॥ ८ ॥ सत्यभामा ने कहा कि—भाई प्रसेन के मारे जानेसे मेरा पिता अत्यन्त संतप्त हुआथा। श्रीकृष्णजी ने अपना अपयश दूर करनेके निमित्त जांबवत को परास्तकर मणिलाए। इससे मेरे पिताने उस अपने कियेहुये अपराध से भयभीतहो यद्यपि मेरी मँगनी होगईथी तो भी इन्हीं प्रभुके हाथमें मुझे अर्पण किया ॥ ९ ॥ जांबवतीने कहा कि-पिता जांबवानने इनको अपना ईश्वर सीतापति न जान इनसे सत्ताईस दिन युद्धकिया। अन्त में निश्चय होनेपर मेरे पिता ने इनके चरणोंमें गिर भेंटकी भांति मणिके साथ मुझेभी अर्पण किया ऐसे मैं इनकी दासीहूं १०॥

वाच । तपश्चरन्तीमाज्ञाय स्वपादस्पर्शनाऽऽशया । सख्योपेत्याग्रहीत्पाणिं योऽहं तद्गृहमार्जनी ॥ ११ ॥ भद्रोवाच ॥ यो मां स्वयंवर उपेत्य विजित्य भूपान्निन्ये श्वयूथगमिवात्मबलिं द्विपारिः । भ्रातॄंश्च मेऽपकुरुतः स्वपुरं श्रियौकस्तस्यास्तु मेऽनुभवमङ्घ्र्यवनेजनत्वम् ॥ १२ ॥ सत्योवाच । सप्तोक्षणोऽतिबलवीर्यसुतीक्ष्णशृङ्गान्पित्रा कृतान्क्षितिपवीर्यपरीक्षणाय । तान्वीरदुर्मदहनस्तरसा निगृह्य क्रीडन्बबन्ध ह यथा शिशवोऽजतोकान् ॥ १३ ॥ य इत्थं वीर्यशुल्कां मां दासीभिश्चतुरङ्गिणीम् । पथि निर्जित्य राजन्यान्निन्ये तद्दास्यमस्तु मे ॥१४॥ मित्रविन्दोवाच ॥ पिता मे मातुलेयाय स्वयमाहूय दत्तवान् । कृष्णे कृष्णाय तच्चित्तामक्षौहिण्या सखीजनैः॥१५॥ अस्य मे पादसंस्पर्शो भवेज्जन्मनि जन्मनि । कर्मभिर्भ्राम्यमाणाया येन तच्छ्रेय आत्मनः ॥ ॥ १६ ॥ लक्ष्मणोवाच ॥ ममापि राज्ञ्यच्युतजन्मकर्म श्रुत्वा मुहुर्नारदगीतमास ह ॥ चित्तं मुकुन्दे किल पद्महस्तया वृतः सुसंमृश्य विहाय लोकपान् ॥ १७ ॥ ज्ञात्वा मम मतं साध्वि पिता दुहितृवत्सलः । बृहत्सेन इति ख्यातस्तत्रोपायमचीकरत् ॥ १८ ॥ यथा स्वयंवरे राज्ञि मत्स्यः पार्थेप्सया कृतः । अयं तु बहिराच्छन्नो दृश्यते स जले परम् । ॥ १९ ॥ श्रुत्वैतत्सर्वतो भूपा आययुर्मत्पितुः पुरम् । सर्वास्त्रशस्त्रतत्त्वज्ञाः सोपाध्यायाः सहस्रशः ॥ २० ॥ पित्रा सम्पूजिताः सर्वे यथावीर्यं यथावयः । आददुः सशरं चा-

कालिंदी ने कहा कि मैं श्रीकृष्णजी के चरणस्पर्श की कामनासे तपस्या करतीथी, श्रीकृष्णजी ने मुझे तपस्या करते जान अपने मित्र अर्जुन के सगजाय मेरा पाणिग्रहण कियाथा उससमयसे मैं उनके घरमे बुहारी देनेवाली दासीहुई, ॥ ११ ॥ भद्राने कहा कि—श्रीनिवास स्वयं स्वयम्बर स्थलमें जाय राजाओं को और अपकार करनेमें प्रवृत्त मेरे भाइयों को जीत कुत्तोंके बीचसे अपने बलिके लेनेवाले सिंहकी समान मुझे अपने नगरमें लेगयेथे । मैं प्रार्थना करतीहूं कि जन्म जन्मों उन्हीं के चरणोंकी सेवामें प्रवृत्तरहूं ॥१२॥ सत्याने कहा कि मेरे पिताने राजाओं के बल की परीक्षा करनेके निमित्त तीक्ष्ण सींगोंवाले अति पराक्रमी सातसांड पालेथे जैसे बालक बकरी के बच्चोंको बांधलेवै श्रीकृष्णजी ने वैसेही वीरों के मदनाशक उन सातों सांडों को सहजही से बलपूर्वक बांधलियाथा ॥१३॥ जिन्होंने इसप्रकार पराक्रमरूप शुल्कदे मार्गमें राजाओं को जीत चतुरंगिणी सेना और दासियों समेत मुझको लाए मैं निरन्तर उनकीही दासी होऊं, ॥ १४ ॥ मित्र विंदाने कहा कि–हे कृष्णा ! पिताने मेरा चित्त श्रीकृष्णजी में लगा देख स्वयंही सखियां और एक अक्षौहणी सेना समेत मुझे मामाके पुत्र श्रीकृष्णजी को देदिया ॥ १५ ॥चाहे मैं नानाकर्मोंके वशहो संसारमें भ्रमण करतीरहूं परन्तु जन्म२ में श्रीकृष्णजीकेही चरणोंकी दासी होऊं उसीमें मेरा कल्याणहै ॥ १६ ॥ लक्ष्मणाने कहा कि—हेराज्ञि ! नारद के मुख से बारम्बार भगवान के जन्म और कर्मों का वृत्तान्त सुनकर मेराभी चित्त लोकपालों को छोडकर श्रीकृष्णजी में आसक्त हुआ, ॥ १७ ॥ हे साध्वि ! लक्ष्मीजी ने भी जिनका वरण किया उनकी दासी होनेकोमैं अत्यन्त उत्सुक हुई । पुत्रीप्रिय पिता बृहत्सेन ने मेरी कामना जानकर उसका उपाय किया, ॥ १८ ॥ हेराज्ञि जैसे आपके स्वयम्बरमें अर्जुन के पानेकी इच्छा से मत्स्य निर्माण कियागयाथा मेरे स्वयम्बर में भी ठीक वैसेही हुआ । तुम्हारेसे इसमें यह विशेषताथी कि यह मत्स्य खंभेकी जड़में रखेहुए कलशेके जलमेंही देखाजाताथा अतएव नीचेको दृष्टिकर ऊपरके निशानेको भेदनाथा । इसका होना श्रीकृष्णजी के विना और किसी से सम्भव न था ॥ १९ ॥ मेरे इस स्वयंवर के वृत्तांतको सुनकर सब स्थानों से शस्त्र के तत्त्वको जानने वाले सहस्रों राजा उपाध्यायों समेत दिशा विदिशासे मेरे पिताके नगरमें आनेलगे ॥ २० ॥ वेसब पराक्रम और अवस्था

पं वेद्धुं पर्षदि मद्धियः ॥ २१ ॥ आदाय व्यसृजन्केचित्सज्यं कर्तुमनीश्वराः । आको-
ष्ठं ज्यां समुत्कृष्य पेतुरेकेऽमुनाहताः ॥ २२॥ सज्यं कृत्वाऽपरे वीरा मागधाम्बष्ठचेदि
पाः । भीमो दुर्योधनः कर्णो नाविन्दंस्तदवस्थितिम् ॥ २३ ॥ मत्स्याभासं जले वीक्ष्य
ज्ञात्वा च तदवस्थितिम् । पार्थो यत्तोऽसृजद्बाणं नाच्छिनत्पस्पृशे परम् ॥ २४ ॥ राज
न्येषु निवृत्तेषु भग्नमानेषु मानिषु । भगवान्धनुरादाय सज्यं कृत्वाऽथ लीलया ।२५
तस्मिन्संधाय विशिखं मत्स्यं वीक्ष्य सकृज्जले । छित्त्वेषुणाऽपातयत्तं सूर्ये चाभिजि
ति स्थिते ॥ २६ ॥ दिवि दुन्दुभयो नेदुर्जयशब्दयुता भुवि । देवाश्च कुसुमासारा-
न्मुमुचुर्हर्षविह्वलाः ॥ २७ ॥ तद्रङ्गमाविशमहं कलनूपुराभ्यां पद्भ्यां प्रगृह्य कनको-
ज्ज्वलरत्नमालाम् । नूत्ने निवीय परिधाय च कौशिकाग्र्ये सव्रीडहासवदना कबरीधृ-
तस्रक् ॥ २८ ॥ उन्नीय वक्त्रमुरुकुन्तलकुण्डलत्विड्गण्डस्थलं शिशिरहासकटाक्ष-
मोक्षैः । राज्ञो निरीक्ष्य परितः शनकैर्मुरारेरंसेऽनुरक्तहृदया निदधे स्वमालाम् ॥ २९॥
तावन्मृदङ्गपटहाः शंखभेर्यानकादयः । निनेदुर्नटनर्तक्यो ननृतुर्गायका जगुः ॥३०॥
एवं वृते भगवति मयेशे नृपयूथपाः । न सेहिरे याज्ञसेनि स्पर्धन्तो हृच्छयातुराः ॥ ३१ ॥
मां तावद्रथमारोप्य हयरत्नचतुष्टयम् । शार्ङ्गमुद्यम्य सन्नद्धस्तस्थावाजौ चतुर्भुजः ॥
॥ ३२ ॥ दारुकश्चोदयामास काञ्चनोपस्करं रथम् । मिषतां भूभुजां राज्ञि मृगाणां मृ-
गराडिव ॥ ३३ ॥ तेऽन्वसज्जन्त राजन्या निषेद्धुं पथि केचन । संयत्ता उद्धृतेष्वा

के अनुसार मेरे पितासे भली प्रकार पूजितहो सबने मुझमें चित्तलगाय लक्ष्य वेधने के निमित्त
सभामें धनुषबाण ग्रहणकिया ॥२१॥किसी२ ने धनुषके धनुषकी प्रत्यचा न चढ़ा सकने के कारण
उसको छोड़दिया; कोई कोई उसे अपनी कमरतक खींच उस धनुषके झटके सेही गिरपड़े ॥२२॥
इसी प्रकार जरासंध, अंबष्ठ और शिशुपाल आदि दूसरेवीर और भीम, दुर्योधन व कर्णआदि ने
धनुषकी प्रत्यचा चढ़ाकर भी उस मत्स्यकी स्थिति न जानी ॥ २३ ॥ फिरअर्जुन ने जलमें मत्स्य
की छायादेख और मत्स्यकी स्थिति भी जान सावधान होकर बाणचलाया; किंतु उसका छेदन न
करसके; केवल स्पर्शही किया ॥ २४ ॥ इस प्रकार समस्त क्षत्रियों के निवृत्त और अभिमानियों
के मानभंग होनेपर भगवान ने धनुष ग्रहणकर सहज सेही प्रत्यचाको चढ़ालिया और उसमें बा[ण]
जोड़कर जलमें केवल एकबार मत्स्यको देख अभिजित मुहूर्त में उसको बाणसे बेधकर गिरादिया
॥ २५–२६ ॥ स्वर्गमें दुंदुभी बजनेलगीं । पृथिवी परभी जय शब्दहो ने और दुंदुभी बजनेलगीं ।
देवता हर्षसे विह्वलहो फूल बरसा ने लगे ॥ २७ ॥ उस समय मैंनें नवीन रेशमी वस्त्रोंको पहिर,
स्वर्णसे उज्ज्वल रत्नोंकी माला धारणकर मधुर नूपुरकी ध्वनि करते २ सभामें प्रवेश किया । मेरे
जूड़ामें फूल और मुख में लज्जायुक्त हास्य शोभा पारहाथा, कपोल कुंडलों की कांति से अलंकृत
होरहे थे । मैंने मुखको उठाय, स्निग्ध हास्ययुक्त कटाक्ष विक्षेपसे चारों ओर के राजाओंको धीरे २
देखते २ श्रीकृष्णजी के गलेमें वरमाला डाली । मेराचित्त उन्हीं में लगा हुआ था ॥ २८–२९ ॥
उससमय मृदङ्ग, पटह शंख, भेरी और ढक्काआदि बाजे बजनेलगे, नचैये और गवैये नाचने गाने
लगे ॥ ३० ॥ हे याज्ञसनि ! मैंने इस प्रकार भगवान का वरणकिया, सब राजा कामसे कातरहो
डाहसे इसका सहन न करसके ॥ ३१ ॥ चतुर्भुज भगवान उसी समय रत्नरूप चार घोड़ोंवाले
रथमें मुझे बैठाय कवच धारणकर धनुष हाथमें ले युद्धको तइयार हुए ॥ ३२ ॥ हे राज्ञि ! दारुक
सुवर्ण की सामग्री वाले रथको चलाता था । मृगोंके बीचमेंसे हो सिंहकी समान हरिने देखनेवाले
राजाओं के बीचमें होकर गमन किया ॥ ३३ ॥ उन सब राजाओं ने उनका पीछा किया । जैसे

आग्रामसिंहाययथाहरिम् ॥३४॥ तेशार्ङ्गच्युतबाणौघैःकृत्तबाह्वंघ्रिकन्धराः । निपेतुःप्रधनेकेचिदेकेसन्त्यज्यदुद्रुवुः ॥ ३५ ॥ ततःपुरींयदुपतिरत्यलंकृतांरविच्छदध्वजपटचित्रतोरणाम् । कुशस्थलींदिविभुविचाभिसंस्तुतांसमाविशत्तरणिरिवस्वकेतनम् ॥ ३६ ॥ पितामेपूजयामाससुहृत्संबन्धिबान्धवान् । महार्हवासोलङ्कारैःशय्यासनपरिच्छदैः ॥ ३७ ॥ दासीभिःसर्वसम्पद्भिर्भटेभरथवाजिभिः । आयुधानिमहार्हाणिददौपूर्णस्यभक्तितः ॥ ३८ ॥ आत्मारामस्यतस्येमावयंवैगृहदासिकाः । सर्वसङ्गनिवृत्त्याऽद्धातपसाचबभूविम ॥ ३९ ॥ महिष्यऊचुः । भौमंनिहत्यसगणंयुधितेनरुद्धाज्ञात्वाऽथनःक्षितिजयेजितराजकन्याः । निर्मुच्यसंसृतिविमोक्षमनुस्मरन्तीःपादाम्बुजंपरिणिनाययआप्तकामः ॥४०॥ नवयंसाध्विसाम्राज्यंस्वाराज्यंभौज्यमप्युत । वैराज्यंपारमेष्ठ्यंचआनन्त्यंवाहरेःपदम् ॥ ४१ ॥ कामयामहएतस्यश्रीमत्पादरजःश्रियः । कुचकुङ्कुमगन्धाढ्यंमूर्ध्नावोढुंगदाभृतः ॥४२॥ व्रजस्त्रियोयद्वाञ्छन्तिपुलिन्द्यस्तृणवीरुधः । गावश्चारयतोगोपाःपादस्पर्शंमहात्मनः ॥ ४३ ॥

इतिश्रीम० म० द० उ० त्र्यशीतितमोऽध्यायः ॥ ८३ ॥

श्रीशुक उवाच ॥ श्रुत्वापृथासुबलपुत्र्यथयाज्ञसेनीमाधव्यथक्षितिपपत्न्यउतस्वगोप्यः । कृष्णेऽखिलात्मनिहरौप्रणयानुबन्धंसर्वाविसिस्म्युरलमश्रुकलाकुलाक्ष्यः ॥१॥ इतिसंभाष्यमाणासुस्त्रीभिःस्त्रीषुनृभिर्नृषु । आययुर्मुनयस्तत्रकृष्णरामदि

कुत्ते सिंहके रोकने की चेष्टाकरते हैं उसी प्रकार कोई२ किसी के आगेहो श्रीकृष्णजीको मार्गमें रोकने के निमित्त धनुष ले युद्धके निमित्त खडे होगये ॥ ३४ ॥ वे भगवान के धनुष से छूटेहुए बाणों से छिन्नभुज, छिन्नपांव और छिन्न शरीरहो युद्धमेंगिरे और कुछेकतो युद्ध छोड़कर भागगये ॥ ३५ ॥ अनंतर भगवान ने स्वर्ग और मर्त्यलोक में प्रशंसा योग्य सुंदर सजीहुई अपनी नगरी द्वारकामें सूर्यके अस्ताचलमें प्रवेश करनेकी समान प्रवेश किया; वह ध्वजा, पताका और तोरणों से अत्यंत सजीहुई थी ॥ ३६ ॥ मेरे पिताने महामूल्य के वस्त्र, अलंकार, शय्या, आसन और पूजाकी सामग्रियों से सुहृद, सम्बन्धी और बांधवोंकी पूजाकी ॥ ३७ ॥ यद्यपि भगवान सर्वविषयों से परिपूर्ण हैं तौभी पिताने उनको भक्ति पूर्वक दास दासी, सम्पत्ति, सेना, हाथी और घोड़ो समेत महामूल्य के अस्त्र और शस्त्र आदि दियेथे ॥ ३८ ॥ इस प्रकार से मैं सबसंगों से रहितहो स्वधर्म प्रतिपालन द्वारा उन आत्मा रामकी साक्षात घरकी दासीहुई हूं ॥ ३९ ॥ स्त्रियों ने कहाकि दलबल समेत भौमको युद्धमें मार; उसके दिग्विजयमें जोराजा पराजित हुएथे उनकी कन्याओं को उसने रोकरक्खा है यह जान भगवानने उनका उद्धार किया और स्वयंपूर्ण काम होकर भी संसार नाशक चरण कमलोंकी अभिलाषिनी उन कन्याओं से विवाह किया ॥ ४० ॥ हे साध्वि ! हम राज्य, इन्द्रत्व, अणिमादिक सिद्धियां, ब्रह्मपद, मोक्ष व हरिके पदकी भी प्रार्थना नहीं करतीं ॥ ४१ ॥ उन गदाधारी के लक्ष्मी के स्तनों की केसर से गंधयुक्त चरण रजको सर्वदा मस्तकमें धारण करने की इच्छा करती हैं ॥ ४२ ॥ वेजब नदीके तटपर गौओंको चराते तब व्रज नारियें और गोप जिनकी इच्छा करते थे भगवान के उन्हीं चरणों के स्पर्शको हम चाहती हैं ॥ ४३ ॥

इतिश्री मद्भागवतेमहापुराणेदशमस्कन्धे उ०सरलाभाषाटीकायांत्र्यशीतितमोऽध्यायः ॥ ८३ ॥

श्रीशुकदेवजी बोले कि—हेराजन् ! कुंती, गांधारी, द्रौपदी, सुभद्रा-व राजाओं की स्त्रियें और श्रीकृष्णजी की भक्त गोपियें श्रीकृष्णजी की उन स्त्रियों के प्रेम की कथा सुन आंखों में आंसूभर अत्यंत विस्मय करने लगीं ॥ १ ॥ हेराजन् ! स्त्रियें स्त्रियों से और राजा राजाओं से इसप्रकार कहतेथे । कि उसी समय राम कृष्ण के दर्शन करने की इच्छा से महर्षि व्यास, नारद,

दृक्षया ॥२॥ द्वैपायनोनारदश्च च्यवनोदेवलोऽसितः। विश्वामित्रःशतानन्दोभरद्वाजोऽथगौतमः ॥३॥ रामः सशिष्योभगवान्वसिष्ठोगालवोभृगुः। पुलस्त्यःकश्यपोऽत्रिश्चमार्कण्डेयोबृहस्पतिः ॥ ४ ॥ द्वितस्त्रितश्चैकतश्चब्रह्मपुत्रास्तथाङ्गिराः। अगस्त्योयाज्ञवल्क्यश्चवामदेवादयोऽपरे ॥ ५ ॥ तान्दृष्ट्वासहसोत्थायप्रागासीनानृपादयः। पाण्डवाः कृष्णरामौचप्रणेमुर्विश्ववन्दितान् ॥ ६ ॥ तानानर्चुर्यथासर्वेसहरामोऽच्युतोऽर्चयत्। स्वागतासनपाद्यार्घ्यमाल्यधूपानुलेपनैः ॥ ७ ॥ उवाचसुखमासीनान्भगवान्धर्मगुप्तनुः। सदसस्तस्यमहतोयतवाचोऽनुशृण्वतः ॥ ८ ॥ श्रीभगवानुवाच ॥ अहोवयंजन्मभृतोलब्धंकात्स्न्र्येनतत्फलम्। देवानामपिदुष्प्रापंयद्योगेश्वरदर्शनम् ॥ ९ ॥ किंस्वल्पतपसांनृणामर्चायांदेवचक्षुषाम्। दर्शनस्पर्शनप्रश्नप्रह्वपादार्चनादिकम् ॥ १० ॥ नह्यम्मयानितीर्थानिनदेवामृच्छिलामयाः। तेपुनन्त्युरुकालेनदर्शनादेवसाधवः ॥ ११ ॥ नाग्निर्नसूर्योनचचन्द्रतारकानभूर्जलंखंश्वसनोऽथवाङ्मनः। उपासिताभेदकृतोहरन्त्यघंविपश्चितोघ्नन्तिमुहूर्तसेवया। १२। यस्यात्मबुद्धिः कुणपेत्रिधातुकेस्वधीः कलत्रादिषुभौमइज्यधीः। यत्तीर्थबुद्धिः सलिलेनकर्हिचिज्जनेष्वभिज्ञेषुसएवगोखरः॥१३॥ श्रीशुक उवाच ॥ निशम्येत्थंभगवतःकृष्णस्याकुण्ठमेधसः। वचोदुरन्वयंविप्रास्तूष्णीमासन्भ्रमद्धियः॥१४॥चिरंविमृश्यमुनयईश्वरस्येशितव्यताम्। जनसंग्रहइत्यूचुः स्मयन्तस्तंजगद्गुरुम्॥१५॥मुनयऊचुः।यन्माययातत्त्वविदुत्तमावयंविमोहिताविश्वसृजामधीश्वराःयदीशितव्या

च्यवन, देवल, असित, विश्वामित्र, शतानन्द, भरद्वाज, गौतम, राम,शिष्यों समेत भगवान वशिष्ठ गालव, भृगु, पुलस्त्य, कश्यप, अत्रि, मार्कण्डेय, बृहस्पति, द्वित, त्रित, एकत, ब्रह्माजी के पुत्र अंगिरा, अगस्त्य, याज्ञवल्क्य और वामदेव आदि ऋषि वहां पर आये ॥ २—५॥ पहिले से बैठे हुए राजा, पाण्डव व श्रीकृष्ण और राम ने उन समस्त विश्व के वन्दनीय ऋषियों को देख सहसा उठकर प्रणाम किया ॥ ६ ॥ सब विधिवत उनकी पूजा करने लगे। राम और कृष्णजी ने उन सबकी कुशल पूछ अर्घ्य, माला, धूप और चन्दन से उनकी पूजाकी ॥ ७ ॥ अनन्तर उन सब के सुख से बैठने पर धर्म की रक्षाके निमित्त देह धारण करनेवाले भगवान उनसे कहने औरसब सभासद चुपचापही सुनने लगे ॥ ८ ॥ भगवान ने कहा कि—अहो ! आज हमाराजन्म सफल हुआ—;आज हमने देवताओं के भी न मिलने योग्य योगेश्वरोंके दर्शनकर जीवन का फल पाया ॥ ९॥ अल्प तपस्यावाले मनुष्य प्रतिमा कोही देवता स्वरूप से देखते हैं योगेश्वरों के दर्शन, स्पर्शन उनसे वार्तालाप, प्रणाम और उनके चरणों की पूजाकरना क्या उन मनुष्यों को प्राप्त होसकता है ॥ १० ॥ जलमय स्थान होनसेही तीर्थ नहीं होता, मिट्टी पत्थर के सब पदार्थही देवता नहीं होते; होने परभी वह मनुष्य को बहुत काल में पवित्र करते हैं; परंतु साधुओं के दर्शन करने से ही पवित्रता प्राप्त होती है ॥ ११ ॥ अग्नि, सूर्य, चन्द्रमा, तारा, पृथिवी, जल, आकाश, वायु, और वाक्य व मन भेद बुद्धि से उपासित होनेपर अज्ञान को नाश नहीं करसकते; किंतु क्षण मात्र की साधु सेवा से अज्ञान नाशहोजाता है ॥ १२ ॥ जिसकी वात पित्त कफ मय शरीर मेंही आत्मबुद्धि स्त्री आदि में आत्मीय बुद्धि, प्रतिमा आदिको देवता बुद्धि और जल आदिमें तीर्थ बुद्धि है परन्तु तत्त्ववेत्ता साधुओंको उसप्रकार नहीं जानता वह मनुष्य घास लादनेके गधेकी समान है ॥ १३ ॥ शुकदेवजीने कहा कि हे राजन् ! वे ऋषि अकुंठित बुद्धिवाले भगवान श्रीकृष्ण जीकी ऐसीबातोंको सुन भ्रमित बुद्धिहो कुछ देरतक चुपचाप खड़े रहे। उन्होंने ईश्वरकी अनीश्वरता युक्त बातोंको सुन विचार करके जाना कि लोककी मर्यादाके निमित्त इन्होंने इसप्रकार कहा है ॥ १४ । १५ ॥ तदनन्तर वे हँसकर भगवानसे कहनेलगे कि हम श्रेष्ठ तत्ववेत्ता और लोकपालों

चितमूहयथामहोविचित्रंभगवद्विचेष्टितम् ॥ १६ ॥ अनीहएतद्बहुधैकआत्मनासृज त्यवत्यत्तिनबध्यतेयथा । भौमैर्हिभूमिर्बहुनामरूपिणीअहोविभूम्नश्चरितंविडम्बनम् ॥ १७ ॥ अथापिकालेस्वजनाभिगुप्तयेबिभर्षिसत्त्वंखलनिग्रहायच । स्वलीलयावे दपथंसनातनंवर्णाश्रमात्मापुरुषः परोभवान् ॥ १८ ॥ ब्रह्मतेहृदयंशुक्लंतपः स्वा ध्यायसंयमैः । यत्रोपलब्धंसद्व्यक्तमव्यक्तंचततः परम् ॥ १९ ॥ तस्माद्ब्रह्मकुलंब्रह्म ञ्छास्त्रयोनेस्त्वमात्मनः । सभाजयसिसद्धामतद्ब्रह्मण्याग्रणीर्भवान् ॥ २० ॥ अद्य नोजन्मसाफल्यंविद्यायास्तपसोदृशः । त्वयासंगम्यसद्गत्यायदन्तः श्रेयसांपरः ॥ २१ ॥ नमस्तस्मैभगवतेकृष्णायाकुण्ठमेधसे । स्वयोगमाययाच्छन्नमहिम्नेपरमा त्मने ॥ २२ ॥ नयंविदन्त्यमीभूपाएकारामाश्चवृष्णयः । मायाजवनिकाच्छन्नमात्मा नंकालमीश्वरम् ॥ २३ ॥ यथाशयानः पुरुषआत्मानंगुणतत्त्वदृक् । नाममात्रेन्द्रिया भातंनवेदरहितंपरम् ॥ २४ ॥ एवंत्वानाममात्रेषुविषयेष्विन्द्रियेहया । मायया विभ्र मच्चित्तोनवेदस्मृत्युपप्लवात् ॥ २५ ॥ तस्याद्यतेददृशिमाङ्घ्रिमघौघमर्षतीर्थास्पदं हृदिकृतंसुविपक्वयोगैः । उत्सिक्तभक्त्युपहताशयजीवकोशाआपुर्भवद्गतिमथा ऽनुगृहाणभक्तान् ॥ २६ ॥ श्रीशुक उवाच ॥ इत्यनुज्ञाप्यदाशार्हंधृतराष्ट्रंयुधिष्ठिर म् । राजर्षेस्वाश्रमान्गन्तुंमुनयोदधिरेमनः ॥ २७ ॥ तद्वीक्ष्यतानुपव्रज्यवसुदेवोम

के अधीश्वर होकरभी जिनकी मायासे मोहितहोरहे हैं वे आप मायाके स्वामी होकरभी मोहित मनुष्योंकी सदृश आचरण करते हैं । अहो ! आपकी लीला बड़ी अचिन्त्य है ॥ १६ ॥ जिस प्रकार पृथिवी घटादिक पदार्थोंसे अनेक नाम और रूपवाली है उसीप्रकार आप अक्रिय और एक होकरभी इस जगतकी उत्पत्ति स्थिति और प्रलयकरतेहो । आप परिपूर्ण परमेश्वरहो आपका जन्मादि धारण करना केवल विडम्बना मात्रहै, । स्वजनों की रक्षा और दुष्टों के दमन करने के निमित्तही आप समय २ पर शुद्ध सत्वात्मक स्वरूप धारण करतेहो, ॥ १७—१८ ॥ आप वर्णा श्रमात्मा पुरुष भगवान अपने आचारोंसे वेदमार्गकाभी पालन करतेहो, । तपस्या स्वाध्याय और संयम द्वारा जिससे कार्य कारण और उससे परे सन्मात्र ब्रह्मकी प्राप्ति होती है, ॥ १९ ॥ वही आप वेदोंमें कहेहुए ब्रह्म और विशुद्ध हृदयहो, । ब्रह्मन् ! इसहीकारण आप शास्त्रयोनि भी हो, । आप के श्रेष्ठ उपलब्धि स्थान ब्राह्मण आपकी पूजा करते रहते हैं अतएव आप ब्राह्मणों में अ- ग्रणी और ब्रह्मण्य देवहो ॥ २० ॥ आप सब मंगलों की खानहो इसहीकारण आज आपसे मि- लकर हमारा जन्म, विद्या, तपस्या और दृष्टि सफलहुई अपनीही योगमाया से जिसकी महिमा ढकीहै जो अकुंठित बुद्धिवालेहैं, एकस्थानमें रहतेहुए, सब राजा और यदुवंशी जिनके मायारूप पर्देसे ढककर जिन कालरूपी ईश्वरको नहीं जानते उन परमात्मा भगवान श्रीकृष्णजी आपको नमस्कारहै ॥ २१—२२ ॥ जैसे स्वप्न देखता हुआ मनुष्य स्वप्नके देखेहुए विषयोंको यथार्थरूप से देखताहै और मनसे प्रकाशित नाम आदि रूपको आत्मा करके मानता है उसके अतिरिक्त अपने आदिरूप इत्यादिको नहीं जानता, हेब्रह्मन् ! वैसेही यह सब लोकमाया से भ्रमित चित्तहो स्मृति नाश होनेके कारण इन्द्रिय और मन द्वारा प्रकाश पातेहुए केवल आपके नामकोंही जानते हैं किंतु स्वरूपको नहीं जानते॥२३।२५॥आज हमने उन्हीं पापनाशक गंगा तीर्थके उत्पन्न करने वाले परिपक्व योगवाले योगियोंके चिंतनीय आपके चरणकमलका दर्शन किया,अतएव हमें भक्त जानकर अनुग्रह करो । बढ़ीहुई भक्तिसे जिनका इच्छारूप लिंग शरीर नाशहोगयाहै वही आपकी गति पाते हैं॥२६॥श्रीशुकदेवजीने कहा कि—हेराजर्षे ! मुनियोंने इसप्रकार कह श्रीकृष्ण धृतराष्ट्र और युधिष्ठिरकी आज्ञाले अपने २ आश्रमोंमें जानेकी इच्छाकी ॥ २७ ॥ उनको जानेपर उद्यत

हायशाः । प्रणम्यचोपसंगृह्यबभाषेदं सुयन्त्रितः ॥ २८ ॥ वसुदेव उवाच ॥ नमोवः सर्वदेवेभ्यऋषयः श्रोतुमर्हथ । कर्मणाकर्मनिर्हारोयथास्यान्नस्तदुच्यताम् ॥२९॥ नारद उवाच ॥ नातिचित्रमिदंविप्रावसुदेवोबुभुत्सया । कृष्णंमत्वाऽर्भकंयन्नः पृच्छतिश्रेयआत्मनः ॥ ३० ॥ संनिकर्षोऽत्रमर्त्यानामनादरणकारणम् । गाङ्गंहित्वाय थाऽन्याम्भस्तत्रत्योयातिशुद्धये ॥ ३१ ॥ यस्यानुभूतिः कालेनलयोत्पत्त्यादिनाऽस्य वै । स्वतोऽन्यस्माच्चगुणतोनकुतश्चनरिष्यति॥३२॥तंक्लेशकर्मपरिपाकगुणप्रवाहैर व्याहतानुभवमीश्वरमद्वितीयम् । प्राणादिभिः स्वविभवैरुपगूढमन्योमन्येतसूर्यमि वमेघहिमोपरागैः ॥ ३३ ॥अथोचुर्मुनयोराजन्नाभाष्यानकदुन्दुभिम् । सर्वेषांशृण्व तां राज्ञांतथैवाच्युतरामयोः ॥ ३४ ॥ कर्मणा कर्मनिर्हार एषसाधुनिरूपितः । यच्छ्र द्धयायजेद्विष्णुं सर्वयज्ञेश्वरंमखैः ॥ ३५ ॥ चित्तस्योपशमोऽयंवै कविभिःशास्त्रच क्षुषा । दर्शितःसुगमोयोगो धर्मश्चात्ममुदावहः ॥ ३६ ॥ अयंस्वस्त्ययनःपन्था द्वि जातेर्गृहमेधिनः । यच्छ्रद्धयाऽऽप्तवित्तेन शुक्लेनेज्येत पूरुषः ॥ ३७ ॥ वित्तैषणां यज्ञदानैर्गृहैर्दारसुतैषणाम् । आत्मलोकैषणांदेव कालेनविसृजेद्बुधः ॥ ग्रामेत्यक्तै षणाःसर्वे ययुर्धीरास्तपोवनम् ॥ ३८ ॥ ऋणैस्त्रिभिर्द्विजोजातो देवर्षिपितॄणांप्रभो यज्ञाध्ययनपुत्रैस्तान्यनिस्तीर्य त्यजन्पतत् ॥ ३९ ॥ त्वंत्वद्यमुक्तोद्वाभ्यां वै ऋषि पित्रोर्महामते । यज्ञैर्देवर्णमुन्मुच्य निर्ऋणोऽशरणोभव ॥ ४० ॥ वसुदेवभवान्नूनं

देख महायशस्वी वसुदेवजी उनके निकट जाय चरणों पर गिर विनीत भावसे कहनेलगे, २८ ॥ हेऋषियो ! सब देवताओं के निवासरूप आपको नमस्कारहै हेऋषियों आप सुनो कि जिस कर्मसे मेरे कर्मोंका क्षयहोवे वह मुझसे कहिये ॥ २९ ॥ नारदजीने कहा कि—हेविप्रो ! वसुदेव श्रीकृष्ण जी को पुत्र जान जो आपने कल्याणके निमित्त हमसे पूछते हैं यह आश्चर्यकी बात नहीं है, ॥ ॥ ३० ॥ निकट रहनाही मनुष्य के निरादर का कारण है गंगाके तटपर रहनेवाले मनुष्य गंगा-जल को छोड़कर शुद्धि के निमित्त दूसरे जलका सेवन करते हैं, ॥ ३१ ॥ इस जगत्की उत्पत्ति, स्थिति प्रलय द्वारा अथवा काल व स्वतः परतः वा गुणतः किसीप्रकारसे भी श्रीकृष्णजीके ज्ञान का विनाश नहीं है ॥ ३२ ॥ मनुष्य जैसे सूर्यको बादल राहु हिमसे ढकाहुआ जानते हैं उसही प्रकार मनुष्य अखण्ड ज्ञानवाले भगवानको क्लेश, कर्म कर्मों के परिपाक गुण प्रवाह और प्राणादि से ढका जानते हैं ॥ ३३ ॥ हे राजन् ! अनन्तर मुनियों ने सुननेवाले सब राजाओं और रामकृष्ण के सामने वसुदेवजी से सम्बोधन करके कहा ॥ ३४ ॥ हे वसुदेव ! यह साधुओं ने निश्चय किया है कि कर्मोंही से कर्मों का क्षय होता रहता है श्रद्धा पूर्वक यज्ञकर सर्व यज्ञेश्वर भगवान विष्णुजीकी पूजा करनाही कर्म के बन्धनों से छूटनेका उपाय है ॥ ३५ ॥ पण्डित जनोंने शास्त्ररूप दृष्टिसे चित्तोपशम और मोक्षका लक्ष व क्रमशः अन्तःकरणको शुद्धकरने वाला सुगम स्वधर्मभी यही दिखाया ॥ ३६ ॥ न्यायसे प्राप्त कियेहुए द्रव्यसे श्रद्धायुक्त भगवान की आराधना करनाही ब्राह्मण गृहस्थियोंको कल्याणदायक है ॥ ३७ ॥ हे वसुदेव ! ज्ञानीमनुष्य को यज्ञ और दानसे धनकी इच्छा, गृहादि भोगोंसे स्त्री पुत्रकी इच्छा और कालसे अपने स्वर्गादि लोककी इच्छाको छोड़ना चाहिये ॥ ३८ ॥ समस्त धीर मनुष्योंको वासना रहितहो ग्राम में बास कर फिर तपोवन में जाना चाहिये । द्विज देवऋण ऋषिऋण और पितृऋणसे ऋणीहोकर जन्म ग्रहण करते हैं, किंतु जो यज्ञ, वेदाध्ययन और पुत्रोत्पादनद्वारा उससे उऋण नहीं होते वे पतित होते हैं ॥ ३९ ॥ हे महामते ! आप तो दोऋणों से मुक्त होगयेहो अब यज्ञद्वारा देवऋणसे मुक्त हो गृह त्यागी हो ॥ ४० ॥ हे वसुदेव ! निश्चयही आपने परम शक्तिसे भगवान हरिकी पूजाकी

अकल्पाः परमथाहरिम् । जगतामीश्वरंप्रार्थ्यः सयद्वांपुत्रतांगतः ॥ ४१ ॥ श्रीशुक उवा-
च । इतितद्वचनंश्रुत्वा वसुदेवोमहामनाः । तानृषीनृत्विजो वव्रेमूर्ध्नाऽऽनम्य प्रसाद्य
च ॥ ४२ ॥ तएनमृषयो राजन्वृता धर्मेणधार्मिकम् । तस्मिन्नयाजयन्क्षेत्रे मखैरुत्त-
मकल्पकैः ॥ ४३ ॥ तद्दीक्षायांप्रवृत्तायां वृष्णयःपुष्करस्रजः । स्नाताःसुवाससोरा
जन्राजानः सुष्ठ्वलंकृताः ॥ ४४ ॥ तन्महिष्यश्चमुदिता निष्ककण्ठ्यः सुवाससः ।
दीक्षाशालामुपाजग्मुरालिप्ता वस्तुपाणयः ॥ ४५ ॥ नेदुर्मृदंगपटहशंखभेर्यानकाद-
यः । ननृतुर्नटनर्तक्यस्तुष्टुवुः सूतमागधाः । जगुःसुकण्ठ्योगन्धर्व्यः संगीतंसहभ-
र्तृकाः ॥ ४६ ॥ तमभ्यषिंचन्विधिवदक्तमभ्यक्तमृत्विजः । पत्नीभिरष्टादशभिःसो-
मराजमिवोडुभिः ॥ ४७ ॥ ताभिर्दुकूलवलयैर्हारनूपुरकुण्डलैः । स्वलंकृताभिर्विब-
भौ दीक्षितोऽजिनसंवृतः ॥ ४८ ॥ तस्यर्त्विजोमहाराज रत्नकौशेयवाससः ॥ स-
सदस्याविरेजुस्ते यथा वृत्रहणोऽध्वरे ॥ ४९ ॥ तदारामश्चकृष्णश्च स्वैःस्वैर्बन्धुभि
रन्वितौ । रेजतुःस्वसुतैर्दारैर्जीवेशौ स्वविभूतिभिः ॥ ५० ॥ ईजेऽनुयज्ञंविधिना
अग्निहोत्रादिलक्षणैः । प्राकृतैर्वैकृतैर्यज्ञैर्द्रव्यज्ञानाक्रियेश्वरम् ॥ ५१ ॥ अथर्त्विग्भ्यो
ऽददात्काले यथाम्नातंसदक्षिणाः । स्वलंकृतेभ्योविप्रेभ्यो गोभूकन्यामहाधनाः ॥
॥५२॥पत्नीसंयाजावभृथ्यैश्चरित्वातेमहर्षयः । सस्नूरामह्रदे विप्रा यजमानपुरःसराः
॥ ५३ ॥ स्नातोऽलंकारवासांसी वन्दिभ्योऽदात्तथास्त्रियः । ततःस्वलंकृतो वर्णा-
न श्वभ्योऽन्नेनपूजयत् ॥ ५४ ॥ बन्धून्सदारान्ससुतान्पारिबर्हेण भूयसा । विदर्भ

है; नहींतो यह दोनों जन किस प्रकार आपके यहां पुत्र रूपसे उत्पन्न होते ॥ ४१ ॥ शुकदेवजी ने कहा कि—मुनियों की इस वातको सुनकर उदार मनवाले वसुदेवजी ने उनको मस्तकसेप्रणाम कर उन्हें प्रसन्नकर ऋत्विज का काम करने को उनका वरण किया ॥ ४२ ॥ हेराजन् ! वेसव ऋषि धर्मानुसार घरेजाकर कुरुक्षेत्र में धर्मात्मा वसुदेवजी को उत्तम कल्पयुक्त यज्ञोंसे यजनकराने लगे ॥ ४३ ॥ हे राजन् ! वसुदेवजी के यज्ञमें दीक्षित होनेपर यदुवंशी और राजा लोग स्नानकर कमलों की माला व सुंदर वस्त्रों को पहिर वहां आनेलगे ॥ ४४ ॥ उनकी स्त्रियेंभी कण्ठ में आभूषण धारणकर सुंदर वस्त्रों को पहिर हाथ में पूजाकी सामग्रीले आनंदपूर्वक यज्ञशाला में आई । [illegible] ॥ मृदङ्ग,पटह,शङ्ख,भेरी,ढक्का और दुंदुभी आदि बाजे बजनेलगे; नट और नचैये नाचने,सूत मागध स्तुति करने और सुंदर कण्ठवाली गधर्वियें स्वामियों समेत गाने में प्रवृत्त हुई ॥ ४६ ॥ अनंतर ऋत्विजों ने अठारह स्त्रियों समेत वसुदेव का अंजन और उबटनआदि से ताराओं समेत चंद्रमाकी समान अभिषेक किया ॥ ४७ ॥ वह रेशमीवस्त्र, कंकण,हार,कुण्डल, नूपुर आदि अलंकारों स भलीप्रकार अलंकृत उनसब स्त्रियों समेत दीक्षित और सभासदों से घिर शोभा पानेलगे ॥ ४८ ॥ हे महाराज ! उसयज्ञ में सभासदों समेत उनके ऋत्विक् पीत रेशमीवस्त्र धारणकर इंद्र के यज्ञके ऋत्विकों की समान शोभायमानहुए ॥ ४९ ॥ उसही समय प्राणियोंके ईश्वर राम और कृष्ण बंधुओं समेत सयुक्तहो अपनी स्त्री, पुत्र और विभूतियों के साथ शोभा देनेलगे ॥ ५० ॥ प्रत्येक यज्ञमें विधिपूर्वक अग्निहोत्रादिक प्रकृति और विकृति रूप यज्ञों से द्रव्य, मंत्र और कर्मों से भगवान का यजनहोनेलगा ॥ ५१ ॥ अनंतर वसुदेव ने समय पर वेदानुसार भलीप्रकार से अलंकृत ब्राह्मणों की पूजाकर गो, भूमि, कन्या और बहुतसी द्रव्य दक्षिणा के साथ दान की ॥ ५२ ॥ उन महर्षियों ने पत्नीसमाज और अवभृथ कर्मों आदि को समाप्तकर यजमान समेत रामकुण्ड में स्नानकिया ॥ ५३ ॥ वसुदेव ने बंदियों को नाना अलंकार, वस्त्र और स्त्रियों ने दानकर अन्नद्वारा कुत्ते आदि सब जीवों को संतुष्ट किया ॥ ५४ ॥

कोशलकुरून्काशिकेकयसृञ्जयान् ॥ ५५ ॥ सदस्यर्त्विक्सुरगणान्नृभूतपितृचारणा
न् । श्रीनिकेतमनुज्ञाप्य शंसन्तः प्रययुः क्रतुम् ॥ ५६ ॥ धृतराष्ट्रोऽनुजः पार्था भीष्मो
द्रोणः पृथा यमौ । नारदो भगवान्व्यासः सुहृत्सम्बन्धिबान्धवाः ॥ ५७ ॥ बन्धून्परि-
ष्वज्य यदून्सौहृदाऽऽक्लिन्नचेतसः । ययुर्विरहकृच्छ्रेण स्वदेशांश्चापरे जनाः ॥५८॥
नन्दस्तु सह गोपालैर्बृहत्या पूजयाऽर्चितः । कृष्णरामोग्रसेनाद्यैर्न्यवात्सीद्बन्धुवत्स
लः ॥ ५९ ॥ वसुदेवोऽञ्जसोत्तीर्य मनोरथमहार्णवम् ॥ सुहृद्वृतः प्रीतमना नन्द-
माह करे स्पृशन् ॥ ६० ॥ वसुदेव उवाच । भ्रातरीशकृतः पाशो नृणां यः स्नेहसंज्ञितः
तं दुस्त्यजमहं मन्ये शूराणामपि योगिनाम् ॥ ६१ ॥ अस्मास्वप्रतिकल्पेयं यत्कृताऽ-
ज्ञेषु सत्तमैः । मैत्र्यर्पिताऽफला चापि न निवर्तेत कर्हिचित् ॥ ६२ ॥ प्रागकल्पाच्च कु
शलं भ्रातर्वो नाचराम हि । अधुना श्रीमदान्धाक्षा न पश्याम पुरः सतः ॥ ६३ ॥ मा रा
ज्यश्रीरभूत्पुंसः श्रेयस्कामस्य मानद । स्वजनानुत बन्धून्वा न पश्यति ययाऽन्धदृक्
॥ ६४ ॥ श्रीशुक उवाच । एवं सौहृदशैथिल्यचित्त आनकदुन्दुभिः ॥ रुरोद तत्कृतां
मैत्रीं स्मरन्नश्रुविलोचनः ॥ ६५ ॥ नन्दस्तु सख्युः प्रियकृत्प्रेम्णा गोविन्दरामयोः ॥
अद्य श्व इति मासांस्त्रीन्यदुभिर्मानितोऽवसत् ॥ ६६ ॥ ततः कामैः पूर्यमाणः सव्रजः
सहबान्धवः । परार्ध्याभरणक्षौमनानानर्घ्यपरिच्छदैः ॥ ६७ ॥ वसुदेवोग्रसेनाभ्यां
कृष्णोद्धवबलादिभिः । दत्तमादाय पारिबर्हं यापितो यदुभिर्ययौ ॥ ६८ ॥ नन्दो गो
पाश्च गोप्यश्च गोविन्दचरणाम्बुजे । मनः क्षिप्तं पुनर्हर्तुमनीशा मथुरां ययुः ॥ ६९ ॥

फिर हाथी, अश्व, रथ आदि सामग्रियों से स्त्रियों समेत बंधुओं को व विदर्भ, कोशल, कुरुकाशी
केकय और सृंजय आदि को व सभासद, ऋत्विज, देवता, मनुष्य, भूत, पितृ, और चारणों की
पूजाकी । व श्रीकृष्णजी की आज्ञाले यज्ञकी प्रशंसा करते २ अपने २ घर गये ॥ ५५—५६ ॥
धृतराष्ट्र, विदुर, अर्जुन आदि, भीष्म, द्रोण, कुंती, नकुल, सहदेव, नारद, भगवान व्यास, सुहृद,
सम्बंधी और सबबांधव यदुवंशियों से मिल सुहृदता के कारण अत्यंत दुःखितहृदयहो विरह से
कातरहो अपने २ देश को गये और दूसरे जनभी चलेगए ॥ ५७ । ५८ ॥ परंतु बंधुवत्सल श्री
नंदजी गोपाओं सहित श्रीकृष्ण, राम और उग्रसेन से बड़ी पूजापाय वहां वास करनेलगे ॥५९॥
वसुदेवजी अनायास से मनोरथ रूप महासागर से पारउतर बंधुओं से घिर आनंदित मनहो नंद
जी का हाथपकड़कर कहने लगे कि—॥ ६० ॥ हे भ्राता ! ईश्वरका कियाहुआ स्नेह नामक पाश
अत्यंतही दुस्त्यज है; वीरों के बल और योगियों के ज्ञानसे भी उसका छेदननहीं होसकता ६१ ॥
तुम साधुओं के हम अकृतज्ञ हैं—आपने जो हमारे साथ इस मित्रता को स्थापित किया है; वह
कभी निष्फल न होगी ॥ ६२ ॥ हेभ्राता ! पहिले असमर्थता के कारण हम आपका भला नहीं
करसके; इस समयभी सौभाग्यता के मदसे नेत्ररहितहो सन्मुख स्थित आप सरीखे साधुओं को
नहीं देखपाते ॥ ६३ ॥ हेमानद ! जिस राजलक्ष्मी से अंधदृष्टि होकर मनुष्य स्वजन और बंधुओं
को नहीं देखता, कल्याण की इच्छावाले मनुष्यों को वह राजलक्ष्मी नहीं प्राप्तहोती ॥ ६४ ॥वसु-
देव इसप्रकार मित्रताको स्मरणकर आनंद से शिथिल चित्तहो रोनेलगे॥६५॥ नंदजीभी यदुवंशियों
से सन्मानितहो अपने मित्र और राम कृष्णकी प्रसन्नता के निमित्त प्रीतिपूर्वक "आजकल"
करके तीन महीने वहां रहे ॥ ६६ ॥ इसके उपरांत महामूल्यके आभूषण, रेशमीवस्त्र व अनेक
प्रकारकी सामग्रियों व इच्छितकामनाओं से परिपूर्ण नंदरायजी ब्रज व बांधवों को संगले ॥६७॥
वसुदेव, उग्रसेन, श्रीकृष्ण, उद्धव, और बलदेवजी आदिकी दीहुई पहिरावनी को ग्रहणकरयादवों
की बड़ी सेना को साथले वहां से चले ॥ ६८ ॥ श्रीनन्द, गोपी और गोपों ने श्रीकृष्णजी के
चरणकमलों में मन समर्पण कियाथा,इससमय उन्होने मनको पीछेहटाने में असमर्थहो अतिकष्टसे

बन्धुषुप्रतियातेषु वृष्णयः कृष्णदेवताः ॥ वीक्ष्यप्रावृषमासन्नां ययुर्द्वारवतींपुनः ॥ ॥ ७० ॥ जनेभ्यः कथयाञ्चक्रुर्यदुदेवमहोत्सवम् । यदासीत्तीर्थयात्रायां सुहृत्संद र्शनादिकम् ॥ ७१ ॥

इति श्रीमद्भा० महा० द० उ० चतुरशीतितमोऽध्यायः ॥ ८४ ॥

श्रीबादरायणिरुवाच ॥ अथैकदात्मजौप्राप्तौकृतपादाभिवन्दनौ । वसुदेवोऽभिनन्द्याहप्रीत्यासङ्कर्षणाच्युतौ ॥ १ ॥ मुनीनांसवचः श्रुत्वापुत्रयोर्धामसूचकम् । तद्वीर्यैर्जातविश्रम्भः परिभाष्याभ्यभाषत ॥ २ ॥ कृष्णकृष्णमहायोगिन्सङ्कर्षणसनातन । जानेवामस्ययत्साक्षात्प्रधानपुरुषौपरौ ॥ ३ ॥ यत्रयेनयतोयस्ययस्मैयद्यद्यथायदा । स्यादिदंभगवान्साक्षात्प्रधानपुरुषेश्वरः ॥ ४ ॥ एतन्नानाविधंविश्वमात्मसृष्टमधोक्षज । आत्मनाऽनुप्रविश्यात्मन्प्राणोजीवोबिभर्ष्यज ॥ ५ ॥ प्राणादीनां विश्वसृजांशक्तयोयाःपरस्यताः । पारतन्त्र्याद्वैसादृश्याद्द्वयोश्चेष्टैवचेष्टताम् ॥ ६ ॥ कान्तिस्तेजः प्रभासत्ताचन्द्राग्न्यर्कर्क्षविद्युताम् । यत्स्थैर्यंभूभृतांभूमेर्वृत्तिर्गन्धोऽर्थतोभवान् ॥ ७ ॥ तर्पणंप्राणनमपांदेवत्वंताश्चतद्रसः । ओजः सहोबलंचेष्टागतिर्वायोस्तवेश्वर ॥ ८ ॥ दिशांत्वमवकाशोऽसिदिशःखंस्फोटआश्रयः । नादोवर्णस्त्वमोङ्कारआकृतीनांपृथक्कृतिः ॥ ९ ॥ इन्द्रियंत्विन्द्रियाणांत्वंदेवाश्चतदनुग्रहः । अवबोधोभवान्बुद्धेर्जीवस्यानुस्मृतिः सती ॥ १० ॥ भूतानामसिभूतादिरिन्द्रियाणांचतैजसः । वैकारिकोविकल्पानांप्रधानमनुशायिनाम् ॥ ११ ॥ नश्वरेष्विहभावेषुतद

मथुराको गमन किया ॥ ६९ ॥ हेराजन् ! बधुओं के चलेजाने व श्रीकृष्णजी को इष्टदेव माननेवाले यादवों ने वर्षा को निकट आया देख फिर द्वारका को गमन किया ॥ ७० ॥ वहां उन्होंने पहुंचकर मनुष्यों से तीर्थमें सुहृदों के दर्शन आदि और यदुदेवके यज्ञमहोत्सवका वर्णनकिया॥७१॥

इतिश्री मद्भा०महापुराणेदशमस्कंधेउ०सरलाभाषाटीकायांचतुरशीतितमोऽध्यायः ॥ ८४ ॥

श्रीशुकदेवजी बोले कि—हेमहाराज ! वसुदेवजी ने मुनियों के मुख से राम कृष्ण के प्रभाव का वृत्तांत सुनकर उन पर विश्वास कियाथा । एक दिन दोनों भाइयों ने उनके निकट आयकर चरणों की वन्दनाकी वसुदेवजी ने उनका प्रीतिपूर्वक सत्कार करके कहा ॥ १ । २ ॥हेकृष्ण!हेमहायोगिन्कृष्ण ! हेसनातन सङ्कर्षण ! मै तुम दोनों जनों को इस विश्व का साक्षात् कारणरूप प्रधान पुरुष और उनका भी ईश्वरमानताहूं॥३॥जिसमें, जिससे, जिसके कारण जिसपर जिसका जिस प्रकार से जो होताहै तुम उन सबके साक्षात् प्रधान पुरुषहो, ॥ ४ ॥ हेभगवान ! हेअधोक्षज ! हे आत्मन् ! आप जन्महीन होकर नानाप्रकारके विश्वमें आत्माद्वारा प्रवेशकर क्रियाशक्ति और ज्ञानशक्ति रूपहो उसका पोषण करतेहो ॥ ५ ॥ क्रियाशक्ति आदि जो शक्तियें विश्वकी कारणहैं वे सब ऐश्वरिकहैं क्योंकि अन्य पदार्थ परतन्त्र व जडहैं निश्चयही ईश्वरकी सत्तासे उनका कार्य होता रहता है, ॥ ६ ॥ तुमही चन्द्रमा की कांति अग्निका तेज सूर्यकी ज्योति नक्षत्रोंकी प्रभा, बिजली की चमक,पर्वतों की स्थिरता और पृथ्वी की गन्धहो ॥७॥ तुमही जलकी तृप्ति करनेकी शक्ति जिलानेकी शक्ति तुमही जल और जलके रसहो । हेईश्वर ! तुम वायुके इन्द्रियबल मनोबल और देहबलहो ॥ ८ ॥ तुम सब दिशाओंको अवकाश दिशाए आकाश और उसके आश्रय शब्द तन्मात्र नाद, ओंकार, वर्ण और जिससे सब पदार्थों का नामकरण होताहै वह भी तुमहीहो । तुमही सब इन्द्रिय देवता और उनकी अनुष्ठान शक्तिहो तुमही बुद्धिकी निश्चयशक्ति और अंतःकरणकी अनुसन्धान शक्तिहो ॥ ९—१० ॥ तुमही प्राणियोंके के कारण तामस अहंकार इन्द्रियों के कारण राजस अहंकार देवताओंके कारण सात्विक अहंकार और जीवोंके संसारके कारण प्र-

त्स्वमनश्वरम् । यथाद्रव्यविकारेषुद्रव्यमात्रंनिरूपितम् ॥ १२ ॥ सत्त्वंरजस्तमइतिगुणास्तद्वृत्तयश्चयाः । त्वय्यद्धाब्रह्मणिपरेकल्पितायोगमायया ॥ १३ ॥ तस्मान्नसन्त्यमीभावायर्हित्वयिविकल्पिताः।त्वंचामीषुविकारेषुह्यन्यदाव्यावहारिकः १४॥ गुणप्रवाहएतस्मिन्नबुधास्त्वखिलात्मनः । गतिं सूक्ष्मामबोधेन संसरन्तीहकर्मभिः ॥ १५ ॥ यदृच्छयानृतांप्राप्यसुकल्पामिहदुर्लभाम् । स्वार्थेप्रमत्तस्यवयोगतंत्वन्माययेश्वर ॥१६॥ असावहंममैवैतेदेहेचास्यान्वयादिषु । स्नेहपाशैर्निबध्नातिभगवान्सर्वमिदंजगत् ॥ १७ ॥युवांननः सुतौसाक्षात्प्रधानपुरुषेश्वरौ । भूभारक्षत्रक्षपणअवतीर्णौतथात्थह ॥ १८ ॥ तत्तेगतोऽस्म्यरणमद्यपदारविन्दमापन्नसंसृतिभयापहमार्तबन्धो । एतावताऽलमलमिन्द्रियलालसेन मर्त्यात्मदृक् त्वयिपरेयदपत्यबुद्धिः ॥ १९ ॥ सूतीगृहेननुजगादभवानजोनौसंजज्ञइत्यनुयुगंनिजधर्मगुप्त्यै । नानातनूर्गगनवद्विदधज्जहासिकोवेदभूम्नउरुगायविभूतिमायाम् ॥ २० ॥ श्रीशुक उवाच॥ आकर्ण्येत्थंपितुर्वाक्यंभगवान्सात्वतर्षभः । प्रत्याहप्रश्रयाऽऽनम्रः प्रहसञ्श्लक्ष्णयागिरा ॥ २१ ॥ श्रीभगवानुवाच ॥ वचोवः समवेतार्थंतातैतदुपमन्महे । यन्नः पुत्रान्समुद्दिश्यतत्त्वग्रामउदाहृतः ॥ २२ ॥ अहंयूयमसावार्यइमेचद्वारकौकसः । सर्वेऽप्येवंयदुश्रेष्ठविमृग्याः सचराचरम् ॥ २३ ॥ आत्माह्येकः स्वयंज्योतिर्नित्योऽन्योनिर्गुणोगुणैः । आत्मसृष्टैस्तत्कृतेषुभूतेषुबहुधेयते ॥ २४ ॥ खंवायुर्ज्योतिरापोभूस्त

कृतिहा ॥ ११ ॥ जैसे नाशवान घट कुण्डलादि पदार्थोंमें मिट्टी और सुवर्ण आदि पदार्थ अविनाशी हैं इसीप्रकार ऊपर कहे सब पदार्थोंमें तुमही केवल अविनाशी नित्यपदार्थहो ॥ १२ ॥ सत्त्व, रज और तम और उनकी वृत्तियें अर्थात् महदादि परिणाम यह सब तुमपरब्रह्मकी योगमायामे कल्पित हुई हैं ॥ १३ ॥ अतएव यह सब भावविकार तुममें कुछ नहीं हैं । जब यह सब तुमसे कल्पितहैं तब तुमही इनके अनुगतहो, अन्यसमय में तुम निर्विकल्पहो ॥ १४ ॥ इस गुण प्रवाहसे भगवान प्रपंच हीनकी गति न जानकर देहाभिमान के कारण कियेहुए कर्मोंसे, जीव इससंसार में प्रवृत्त होताहै ॥ १५ ॥ हेईश्वर ! इच्छानुसार दुर्लभमनुष्य जन्म और अतिसुन्दर इन्द्रियों को पाय जो मनुष्य स्वार्थमें प्रमत्त होजाता है तुम्हारी मायासे ढककर उसकी आयु व्यर्थ चली जाती है ॥ १६ ॥ तुम इस समस्त जगतको देहसे अथवा देहके अंशादिसे 'मैं' और 'मेरा' इसप्रकार के स्नेह पाश से बांधते हो ॥ १७ ॥ तुम दोनों जन मेरे पुत्र नहीं हो तुम साक्षात् प्रकृति और पुरुष के ईश्वर हो, तुम पृथ्वी के भाररूप क्षत्रियोंके नाश करने के निमित्त अवतीर्ण हुए हो ॥ १८ ॥ हे आर्तबंधो ! शरणागतोंके संसार रूपी भयको दूर करने वाले आपके चरण कमलोंकी शरण आया हूं । इन्द्रियें तृष्णा द्वारा जिस मर्त्य शरीरको आत्मरूप से देखती हैं और आप परमेश्वरोंमें जा पुत्र बुद्धि हुई है इतनीही विषयलालसा बहुत है ॥ १९ ॥ तुम प्रति जन्ममें ही सूतिकागार में मुझे सम्बोधन करके कहते हो कि 'मैं अज' ईश्वर हूं अपने धर्मकी रक्षा करने के निमित्तही जन्मग्रहण किया है । आकाशकी समान तुम नाना शरीर धारण करके त्याग करते हो । हे उरुगाय ! हे सर्वगत ! तुम्हारी विभूति रूपी मायाको कौन जान सकता है ॥ २० ॥ शुकदेवजी ने कहा—हे राजन् ! भगवान ने पिता की इन बातों को सुनकर बिनयसे नम्रहो सुंदर वचनों से कहा ॥ २१ ॥ हेपिता ! हम आपके पुत्र हैं जो आपने हमारे विषय में तत्त्वसमूहका निरूपण किया उसको मैं यथार्थ मानकर स्वीकार करताहूं ॥ २२ ॥ हे यदुश्रेष्ठ ! आप, आर्य बलदेव, ये द्वारकावासी और समस्त चराचर जगत को ब्रह्मरूपसेही बिचारना चाहियें । एक, स्वयं प्रकाशमान, नित्य, अनन्य और निर्गुण ब्रह्म आत्मसृष्ट गुणों से प्राणियों में नानाप्रकार से प्रतीत होता है । आकाश, वायु, तेज, जल और पृथिवी उपाधि अनुसार घटादिकपदार्थों में नाना

रूतेषुयथाशयम्। आविरितरोऽल्पभूयेकोनानात्वंयात्यसावपि ॥ २५ ॥ श्रीशुक उवाच ॥ एवंभगवताराजन्वसुदेवउदाहृतः। श्रुत्वाविनष्टनानाधीस्तूर्णींप्रीतमनाअभूत् ॥ २६ ॥ अथतत्रकुरुश्रेष्ठदेवकीसर्वदेवता। श्रुत्वाऽऽनीतंगुरोः पुत्रमात्मजाभ्यांसुविस्मिता ॥ २७ ॥ कृष्णरामौसमाश्राव्य पुत्रान्कंसविहिंसितान्। स्मरन्ती कृपणंप्राह वैक्लव्यादश्रुलोचना ॥ २८ ॥ देवक्युवाच ॥ राम रामाप्रमेयात्मन्कृष्ण योगेश्वरेश्वर। वेदाहंवां विश्वसृजामीश्वरावादिपूरुषौ ॥ २९ ॥ कालविध्वस्तसत्त्वानां राज्ञामुच्छास्त्रवर्तिनाम्। भूमेर्भारायमाणानामवतीर्णौ किलाद्यमे ॥३०॥ यस्यांशांशांशभागेन विश्वोत्पत्तिलयोदयाः ॥ भवन्तिकिलविश्वात्मंस्तं त्वाऽद्याहं गतिंगता ॥ ३१ ॥ चिरान्मृतसुतादाने गुरुणाकालचोदितौ। आनिन्यथुः पितृस्थानाद्गुरवे गुरुदक्षिणाम् ॥ ३२ ॥ तथामेकुरुतंकामं युवांयोगेश्वरेश्वरौ। भोजराजहृतान्पुत्रान्कामये द्रष्टुमाहृतान् ॥ ३३ ॥ ऋषि रुवाच। एवंसंचोदितोमात्रा रामः कृष्णश्चभारत। सुतलं संविविशतुर्योगमायामुपाश्रितौ ॥ ३४ ॥ तस्मिन्प्रविष्टावुपलभ्य दैत्यराड्विश्वात्मदैवं सुतरांतथात्मनः॥ तद्दर्शनाह्लादपरिप्लुताशयःसद्यःसमुत्थायननामसान्वयः ३५॥तयोःसमानीयवरासनंमुदानिविष्टयोस्तत्रमहात्मनोस्तयोः। दधःरपादाववनिज्यतज्जलंसवृन्द आब्रह्मपुनद्यदम्बुह ॥ ३६ ॥ समर्हयामाससतौविभूतिभिर्महार्हवस्त्राभरणानुलेपनैः। ताम्बूलदीपामृतभक्षणादिभिः स्वगोत्रवित्तात्मसमर्पणेनच ॥ ३७ ॥ सइन्द्रसेनोभगवत्पदाम्बुजंबिभ्रन्मुहुः प्रेमविभिन्नयाधिया। उवाचहाऽऽनन्दजलाकुलेक्षणःप्रहृष्टरोमानृपगद्गदाक्षरम् ३८॥

प्रकार से प्रतीत होते हैं और उसी से आविर्भाव,तिरोभाव,अल्पता,बहुलता और विविधप्रकारता प्रतीत होती है इसीप्रकार आत्माको भी जानो ॥ २३—२५ ॥ श्रीशुकदेवजी ने कहा—हेराजन्! भगवान की ऐसी बातों को सुन वसुदेवजी की भेदबुद्धि नष्टहोगई; वह प्रसन्न चित्तहो चुपहोगए ॥ २६ ॥ हेकुरुश्रेष्ठ! 'राम कृष्ण मरे गुरुपुत्र को लेआए हैं' इस वृत्तांतकोसुन देवकीको चिस्मय हुआथा, ॥ २७ ॥ इस समय उसने कंससे मारेगये पुत्रों का स्मरण कर दुःखित और विकलहो आंसू बहाते २ राम कृष्णसे कहा ॥ २८ ॥ हे अप्रमेयात्मन् राम! हे योगेश्वरोंकेईश्वर कृष्ण! मैं जानतीहू कि तुम दोनों जन लोकपालोंके ईश्वर और आदिपुरुषहो ॥ २९ ॥ हेआद्य! काल के प्रभावसे सत्वगुण का नाश होनेपर शास्त्र की मर्यादा को उल्लघनेवाले पृथ्वी के भार भूत राजाओं के मारने के निमित्तही तुम मेरे गर्भ में अवतीर्णहुएहो ॥ ३० ॥ हे विश्वात्मन्! हेआद्य! जिस के अंश के अंशरूप माया के गुणों के लेशसे जगतकी उत्पत्ती, स्थिति, संहार होता है उनआपके मैं शरण आईहू ॥ ३१ ॥ हे योगेश्वरेश्वर! चिरकाल से मरेहुए पुत्र को लादेने के लिये गुरुने आज्ञा की तबतुमने पितृस्थान से गुरू को गुरुदक्षिणा लाकरदीथी। उसी प्रकार हमारीभी इच्छा पूर्ण करो; कंससे मारेहुए पुत्रों को लाओ, मैं उनके देखन की इच्छा करतीहू ॥ ३२—३३ ॥ ऋषि ने कहा कि—हेभारत! राम कृष्ण ने इसप्रकार माता से आज्ञा पाय योगमाया का अवलम्बनकर सुतल में प्रवेश किया ॥ ३४ ॥ विश्व के विशेषकर अपने इष्ट देवता उन दोनों जनों को वहां पर आया देख उनके दर्शनों से प्रसन्नचित्तहो दैत्यराजबलिका चित्त अभिषिक्त होगया। उसने तत्कालही वंश समेत उठकर प्रणाम किया ॥ ३५ ॥ और आनन्द से उनको श्रेष्ठआसन लाकरदिया अनंतर वे दोनों महात्मा उसपर बैठे। दैत्यराज ने उनकेदोनों चरणों को धोय उस जलको सपरिवार मस्तकपर धारण किया ॥ ३६ ॥ और महाविभूति, महा मूल्य के वस्त्र और आभूषण, चंदन, माला, धूप, दीप, चित्त और आत्म समर्पण से उनकीपूजा की ॥ ३७ ॥ हेराजन्! उस बलि ने प्रेमसे विह्वलचित्तहो भगवान के चरण कमलों को हृदय में

बलिरुवाच ॥ नमोऽनन्तायबृहतेनमःकृष्णायवेधसे । सांख्ययोगवितानायब्रह्मणे परमात्मने ॥ ३९ ॥ दर्शनंवांहिभूतानांदुष्प्रापंचाप्यदुर्लभम् । रजस्तमःस्वभावानांयन्नःप्राप्तैःयदृच्छया ॥ ४० ॥ दैत्यदानवगन्धर्वाःसिद्धविद्याध्रचारणाः । यक्षरक्षःपिशाचाश्चभूतप्रमथनायकाः ॥ ४१ ॥ विशुद्धसत्त्वधाम्न्यद्धात्वयिशास्त्रशरीरिणि । नित्यंनिबद्धवैरास्तेवयंचान्येचतादृशाः ॥ ४२ ॥ केचनोद्बद्धवैरेणभक्त्याकेचनकामतः । नतथासत्त्वसंरब्धाःसन्निकृष्टाःसुरादयः ॥ ४३ ॥ इदमित्थमितिप्रायस्तवयोगेश्वरेश्वर । नविदन्त्यपियोगेशायोगमायांकुतोवयम् ॥ ४४ ॥ तन्नःप्रसीद निरपेक्षविमृग्ययुष्मत्पादारविन्दधिषणान्यगृहान्धकूपात् । निष्क्रम्यविश्वशरणांघ्र्युपलब्धवृत्तिःशान्तो यथैकउतसर्वसखैश्चरामि ॥ ४५ ॥ शाध्यस्मानीशितव्येश निष्पापान्कुरुनःप्रभो । पुमान्यच्छ्रद्धया तिष्ठंश्चोदनाया विमुच्यते ॥ ४६ ॥ श्रीभगवानुवाच । आसन्मरीचेःषट्पुत्रा ऊर्णायांप्रथमेऽन्तरं । देवाःकंजहसुर्वीक्ष्य सुतांयभितुमुद्यतम् ॥ ४७ ॥ तेनासुरीमगन्योनिमधुनाऽवद्यकर्मणा । हिरण्यकशिपोर्जाता नीतास्तेयोगमायया ॥ ४८ ॥ देवक्याउदरे जाता राजन्कंसविहिंसिताः सातांशोचत्यात्मजान्स्वांस्त इमेऽध्यासतेऽन्तिके ॥ ४९ ॥ इतएतान्प्रणेष्यामो मातृशोकापनुत्तये । ततःशापाद्विनिर्मुक्ता लोकंयास्यन्तिविज्वराः ॥ ५० ॥ स्मरोद्गीथः परिष्वङ्गः पतंगःक्षुद्रभृद्घृणी । षडिमेमत्प्रसादेन पुनर्यास्यन्तिसद्गतिम् ॥ ५१ ॥

धारण किया । उसका शरीर रोमांचित होगया, और नेत्रों से आनन्दाश्रु बहनेलगे ॥ ३८ ॥ उसने गद्गद वाक्यों से कहा कि–हेमहत् अनन्त ! विधाताकृष्ण ! सांख्य और योगके विस्तृतकारण परमात्मा आप को नमस्कार है ॥ ३९ ॥ हेभगवान् ! आप दोनों पुरुषों के दर्शन प्राणियों को दुर्लभ और सुलभभीहैं; क्योंकि रज तम प्रकृतिवाले हमको आपके दर्शन यदृच्छा से हुएहैं ॥ ४० ॥ अहो! दैत्य,दानव,गंधर्व,विद्याधर,चारण,यक्ष,राक्षस,पिशाच,भूत,प्रमथ,नायक ॥ ४१ ॥ येसब साक्षात् विशुद्ध, सत्व के धाम, शास्त्र शरीर आप से शत्रुता रखते हैं; मैंभी उन्हीं के तुल्यहूं ॥ ४२ ॥ कोई २ दैत्य प्रचण्ड वैरभावसे और गोपियें काम के प्रभाव से जैसे आप को प्राप्त हुई हैं, शुद्ध सत्व देवता भी वैसे आपको नहीं प्राप्त होसकते ॥ ४३ ॥ हे योगेश्वरों के ईश्वर ! योग के जाननेवाले भी जब आपकी योगमाया के प्रभावको भली प्रकार से नहीं जानसकते तब हम कहांरहे ॥ ४४ ॥ अतएव आप हमारे ऊपर प्रसन्नहो। आपके चरणारविंद निष्काम मुनियों के परम आश्रय हैं, गृहादि दूसरे पदार्थ सबही अन्धकूप हैं । उस अन्धकूप से निकल, वृक्ष के नीचे पड़ेहुए फलोंको खाय, शांतहो अकेले अथवा सब प्राणियों के मित्रबड़े मनुष्यों के साथ विचरण करूं ॥ ४५ ॥ हे सर्व प्राणियों के ईश्वर ! हमको शिक्षादो; हे प्रभो ! हमें निष्पापकरो; आपकी आज्ञाका आश्रयकर मनुष्य नाना प्रकार के दुःखों से छूटजाता है ॥ ४६ ॥ भगवान ने कहाकि–प्रथम स्वायम्भुव मन्वतरमें ऊर्णाके गर्भमें मरीचिके छहपुत्र उत्पन्न हुयेथे । देव सदृश उन ऋषिपुत्रों ने ब्रह्माको अपनी पुत्रीपर मैथुनके निमित्त उद्युक्त हुआ देख उनका उपहास किया ॥ ४७ ॥ उसही पाप कर्मके कारण वे तत्कालही आसुरी योनिको प्राप्तहो हिरण्य कशिपु के वीर्य से उत्पन्न हुए । फिरवे योगमायासे देवकी के गर्भसे उत्पन्न हुए ॥ ४८ ॥ राजन् ! वेही कंसके हाथसे मारेगये । देवी देवकी उनको अपनापुत्र जानकर शोक करती हैं । इस समय वे तुम्हारे निकट हैं ॥ ४९ ॥ माताके शोक दूर करने के निमित्त इस स्थान से उनको लियेजाता हूं तदनंतर वेशापमुक्त और पाप रहितहो देव लोकको जावेंगे ॥ ५० ॥ फिर स्मर, उद्गीथ, परिष्वंग, पतंग, क्षुद्रभृत और घृणिये छहों ऋषि-

इत्युक्त्वातान्समादायददृग्प्रसंमेन पूजितौ । पुनर्द्वारवतीमेत्य मातुः पुत्रानयच्छताम् ॥ ५२ ॥ तान्दृष्ट्वाबालकान्देवी पुत्रस्नेहस्नुतस्तनी । परिष्वज्यांकमारोप्य मूर्ध्न्यजिघ्रदभीक्ष्णशः ॥ ५३ ॥ अपाययत्स्तनं प्रीता सुतस्पर्शपरिप्लुता । मोहिता माययाविष्णोर्यया सृष्टिःप्रवर्तते ॥ ५४ ॥ पीत्वाऽमृतंपयस्तस्याः पीतशेष गदाभृतः ॥ नारायणांगसंस्पर्शप्रतिलब्धात्मदर्शनाः ॥ ५५ ॥ तेनमस्कृत्यगोविन्दं देवकींपितरंबलम् । मिषतांसर्वभूतानां ययुर्धामदिवौकसाम् ॥ ५६ ॥ तंदृष्ट्वादेवकीदेवीमृतागमननिर्गमम् । मेनेसुविस्मिता मायां कृष्णस्यरचितांनृप ॥ ५७ ॥ एवंविधान्यद्भुतानि कृष्णस्य परमात्मनः । वीर्याण्यनन्तवीर्यस्य सन्त्यनन्तानिभारत ॥ ५८ ॥ सूतउवाच । यइदमनुशृणोतिश्रावयेद्वा मुरारेश्चरितममृतकीर्तेर्वर्णितं व्यासपुत्रैः ॥ जगदघभिदलं तद्भक्तसत्कर्णपूरं भगवतिकृतचित्तो यातितत्क्षेमधाम ॥ ५९ ॥

इति श्रीमद्भा० महा० द० उ० पंचाशीतितमोऽध्यायः ॥ ८५ ॥

राजोवाच ॥ ब्रह्मन्वेदितुमिच्छामः स्वस्रारंरामकृष्णयोः । यथोपयेमेविजयो याममासीत्पितामही ॥ १॥ श्रीशुक उवाच ॥ अर्जुनस्तीर्थयात्रायांपर्यटन्नवनींप्रभुः । गतः प्रभासमशृणोन्मातुलेयींसआत्मनः ॥ २ ॥ दुर्योधनायरामस्तांदास्यतीतिनचापरे । तल्लिप्सुः सयतिर्भूत्वात्रिदण्डीद्वारकामगात् ॥ ३ ॥ तत्रवैवार्षिकान्मासानवात्सीत्स्वार्थसाधकः । पौरैः सभाजितोऽभीक्ष्णरामेणाऽजानताचसः ॥ ४ ॥ एकदागृहमानीयआतिथ्येननिमन्त्र्यतम् । श्रद्धयोपहृतंभैक्ष्यंबलेनबुभुजेकिल ॥ ५ ॥

कुमार मेरीकृपा से मोक्षको पावेंगे ॥ ५१ ॥ यह कह श्रीकृष्णजी उनको ले और बलिसे पूजितहो फिर द्वारका में आये। वहां पुत्रोंको माताके अर्पण किया ॥ ५२ ॥ उन बालकोंको देख पुत्र स्नेह से देवकी के स्तनों मे दूध झरनेलगा । वह पुत्रोंसे आलिंगनकर उनको गोदमें ले बारंबार उनका मस्तक सूंघनेलगी॥५३॥ विश्व की सृष्टिको प्रवृत्त करनेवाली भगवानकी मायासे मोहित पुत्रहो व स्पर्श के आनंद में प्रसन्नहो देवकीने उनको स्तनपान कराया ॥ ५४ ॥ श्रीकृष्णजी के पानकरने से बाकी रहाथा उसअमृत दुग्धको पीकर और नारायण के अंगस्पर्श से उनको आत्मज्ञान प्राप्त हुआ ॥ ५५ ॥ वे श्रीकृष्णजी, देवकी, पिता और बलदेवजीको प्रणामकर देखने वालोंके सामने आकाश मार्गमें देव लोकको चलेगये ॥ ५६ ॥ हे राजन् ! मरे पुत्रोंका आना और जाना देखकर देवकीको अत्यंत आश्चर्य हुआ और जानलिया कि यह सब भगवान की रचीहुई माया है ॥ ५७ ॥ हे भारत ! अनंत पराक्रम वाले श्रीकृष्णजी के ऐसे अनेकों पराक्रम के कार्य हैं ॥५८॥ सूतने कहाकि--पूजनीय व्यासजी के पुत्र से वर्णित जगत के पाप नाशक और भक्तों के कानों के आभूषण रूप अमृत कीर्ति श्रीकृष्णजी के इस अद्भुत कार्यको एकाग्र चित्तहो सुने व सुनावे वह भगवान मे चित्तलगाय उनके मंगलमय धाम में जासकता है ॥ ५९ ॥

इतिश्री मद्भागवतेमहापुराणेदशमस्कंधेउ०सरलाभाषाटीकायांपंचाशीतितमोऽध्यायः ॥ ८५ ॥

राजाने कहा कि—हे ब्रह्मन् ! जो मेरी दादी थी उस रामकृष्णकी बहिन सुभद्रासे जैसे अर्जुन ने विवाह किया उसके सुनने की मेरी इच्छा है ॥१॥ शुकदेवजी ने कहा कि—हे राजन् ! अर्जुनने तीर्थ यात्राके समय पृथिवी पर भ्रमण करते २ प्रभास में जाकर सुना कि अपने मामाकी पुत्रीको बलरामजी दुर्योधनको देंगे । अर्जुन उस कन्या के लेने की इच्छा से त्रिदंडी सन्यासीका रूप धर द्वारका में आये ॥ २--३ ॥ पुरवासी और बलदेवजी भी उनको न पहिचान सके । अर्जुन उनसे पूजित हो कन्या पानेकी इच्छा से वर्षा के चार महीने वहां रहे ॥ ४ ॥ एक दिन बलदेवजी ने उनका निमंत्रण कर घरलाय श्रद्धा पूर्वक उनको भोजन कराया ॥ ५ ॥

सोऽपश्यत्तत्रमहतींकन्यांवीरमनोहराम् । प्रीत्युत्फुल्लेक्षणस्तस्यांभावक्षुब्धंमनोदधे ॥ ६ ॥ सापितंचकमेवीक्ष्यनारीणांहृदयङ्गमम् । हसन्तीव्रीडितापाङ्गीतन्न्यस्तहृदयेक्षणा ॥ ७ ॥ तांपरंसमनुध्यायन्नन्तरंप्रेप्सुरर्जुनः । नलेभेशंभ्रमच्चित्तः कामेनातिबलीयसा ॥ ८ ॥ महत्यांदेवयात्रायां रथस्थांदुर्गनिर्गताम् ॥ जहारानुमतः पित्रोः कृष्णस्यचमहारथः ॥ ९ ॥ रथस्थोधनुरादाय शूरांश्चाऽऽरुन्धतोभटान् । विद्राव्य क्रोशतांस्वानां स्वभागंमृगराडिव ॥ १० ॥ तच्छ्रुत्वाक्षुभितोरामः पर्वणीवमहार्णवः । गृहीतपादःकृष्णेन सुहृद्भिश्चान्वशाम्यत ॥ ११ ॥ प्राहिणोत्पारिबर्हाणि वरवध्वोर्मुदाबलः । महाधनोपस्करेभरथाश्वनरयोषितः ॥ १२ ॥ श्रीशुक उवाच ॥ कृष्णस्यासीद्द्विजश्रेष्ठः श्रुतदेवइतिश्रुतः । कृष्णैकभक्त्या पूर्णार्थः शान्तःकविरलम्पटः ॥१३॥ सउवासविदेहेषु मिथिलायांगृहाश्रमी । अनीहयागताहार्यनिर्वर्तितनिजक्रियः ॥ १४ ॥ यात्रामात्रं त्वहरहर्दैवादुपनमत्युत । नाधिकंतावतातुष्टः क्रियाश्चक्रेयथोचिताः ॥ १५ ॥ तथातद्राष्ट्रपालोऽङ्ग बहुलाश्वइतिश्रुतः । मैथिलोनिरहंमान उभावप्यच्युतप्रियौ ॥ १६ ॥ तयोःप्रसन्नो भगवान्दारुकेणाहृतंरथम् । आरुह्यसाकं मुनिभिर्विदेहान्प्रययौ प्रभुः ॥१७॥ नारदोवामदेवोऽत्रिः कृष्णो रामोऽसितोऽरुणिः । अहंबृहस्पतिःकण्वो मैत्रेयच्यवनादयः ॥ १८ ॥ तत्रतत्रतमायान्तं पौराजानपदानृप । उपतस्थुःसार्घहस्ता ग्रहैःसूर्यमिवोदितम् ॥ १९ ॥ आनर्तधन्वकु-

---

उसी समय धीरपुरुषोंके मनके हरने वाली सुंदर मुख वाली सुभद्रा उनकी दृष्टिगोचर हुई उनके नेत्र आनंद से प्रफुल्लित होगये और रतिकी कामना से क्षुभित हुआ मन उसमें लग गया ॥ ६ ॥ वह कन्याकी स्त्रियों के मनको मोहने वाले अर्जुन को चाह मन २ में हसने और लज्जित भावसे तिरछा निहारनेलगी तथा उन्हींमें मन और हृदयको लगारक्खा ॥७॥ सुभद्राकी रात दिन चिंता कर कामसे अर्जुनका चित क्षीणहोनेलगा ; अतएव वह सुखी न रह सुभद्राके हरनेका अवसर ढूंढनेलगे ॥ ८ ॥ इतनेमें एकदिन सुभद्रा पिता, माता और श्रीकृष्णजीकी आज्ञानाय देवदर्शनके निमित्त रथपर बैठ दुर्गसे बाहर निकली, अर्जुनने धनुषले रक्षक वीर सैनिकोंका वगनकर शृगालों के बीचसे भागलेनेवाले सिंहकी समान कोलाहल करतेहुए सम्बन्धियोंके बीचमेंसे उसका हरण किया ॥ ९ । १० ॥ राम यह वृत्तान्त सुनकर पूर्नोके दिनके महासागरकी समान क्षुभितहुए परन्तु श्रीकृष्णजी व दूसरे बंधुओंके पैरोंपर पड़नेसे शान्तहोगये ॥ ११ ॥ बलदेवजीने आनन्दित हो दूल्ह, दुलहनको महामूल्य की सामग्री, हाथी, रथ, घोड़े और दासदासी दहेजमें भेजे ॥१२॥ श्रीशुकदेवजीने कहा कि—महाराज ! श्रुतदेव नामक एक विख्यात श्रेष्ठ ब्राह्मण श्रीकृष्णजी का अनन्य भक्त था । श्रीकृष्ण जी की ऐकांतिकी भक्तिसे उसके सब अभिप्राय पूर्ण होते थे वह शांत, पण्डित और लोभ रहित था ॥ १३ ॥ वह मिथिला पुरीमें रहता था दैवेच्छा से जोउसको प्राप्तहोता अतदेव उसीसे अपने कार्यका निर्वाह करता ॥ १४ ॥ जिससे उसका कार्य पूराहोजावे उतना उसके निकट उपस्थित होजाता अधिक न प्राप्तहोता परन्तु वह उसीसे संतुष्ट रहकरअपना काम करलेता ॥ १५ ॥ हे राजन् ! मैथिल वंशमें उत्पन्न हुआ निरहंकारी बहुलाश्व उस समय वहांका राजा था । श्रुत देवकी समान वह भी श्रीकृष्णजीका अत्यंत भक्तथा ॥ १६॥ उन दोनों जनोंके ऊपर प्रसन्नहो प्रभुभगवान दारुक के लायेहुए रथपर बैठ मुनियों समेत विदेह देशको चले ॥ १७ ॥ नारद, वामदेव, अत्रि, वेदव्यासजी, परशुरामजी असित, अरुणि, बृहस्पति, कंठ, मैत्रेय और च्यवन आदि मुनि और हम उनके संगथे ॥ १८ ॥ हे राजन् ! श्रीकृष्णजी जिस २ देशमें जानेलगे उस २ देशके पुरवासी और नगर वासी हाथ में अर्घ्य लेले ग्रहों समेत उदय हुए सूर्य

र्जांगलकङ्कमत्स्यपांचालकुन्तिमधुकेकयकोशलार्णाः । अन्येच तन्मुखसरोजमुदारहासस्निग्धेक्षणं नृपपपुर्दृशिभिर्नृनार्यः ॥ २० ॥ तेभ्यःस्ववीक्षणविनष्टतमिस्रदृग्भ्यः क्षेमं त्रिलोकगुरुरर्थदृशंच यच्छन् । शृण्वन्दिगन्तधवलं स्वयशोऽशुभघ्नंगीतंसुरैर्नृभिरगाच्छनकैर्विदेहान् ॥ २१ ॥ तेऽच्युतंप्राप्तम कर्ण्य पौराजानपदानृप ॥ अभीयुर्मुदितास्तस्मै गृहीतार्हणपाणयः ॥ २२ ॥ दृष्ट्वातउत्तमश्लोकं प्रीत्युत्फुल्लाननाशयाः । कैर्धृतांजलिभिर्नेमुः श्रुतपूर्वांस्तथामुनीन् ॥ २३ ॥ स्वानुग्रहायसंप्राप्तं मन्वानौतंजगद्गुरुम् । मैथिलःश्रुतदेवश्च पादयोःपेततुःप्रभोः ॥ २४ ॥ न्यमन्त्रयेतां दाशार्हमातिथ्येन सहद्विजैः । मैथिलःश्रुतदेवश्च युगपत्संहतांजली ॥२५॥ भगवांस्तदभिप्रेत्य द्वयोःप्रियचिकीर्षया । उभयोराविशद्गेहमुभाभ्यां तदलक्षितः ॥ ॥ २६ ॥ श्रोतुमप्यसतां दूरांजनकः स्वगृहागतान् । आनीतेष्वासनाग्र्येषु सुखासीनान्महामनाः ॥ २७ ॥ प्रवृद्धभक्त्या उद्धर्षहृदयास्राविलेक्षणः । नत्वातदंघ्रीन्प्रक्षाल्य तदपोलोकपावनीः ॥ २८ ॥ सकुटुम्बोवहन्मूर्ध्ना पूजयांचक्रईश्वरान् । गन्धमाल्याम्बराकल्पधूपदीपार्घ्यगोवृषैः ॥ २९ ॥ वाचामधुरया प्रीणन्निदमाहान्नतर्पितान् पादावंकगतौ विष्णोः संस्पृशञ्छनकैर्मुदा ॥ ३० ॥ राजोवाच॥ भवान्हिसर्वभूतानामात्मा साक्षी स्वदृग्विभो । अथनस्त्वत्पदाम्भोजं स्मरतांदर्शनंगतः ॥३१॥ स्व

की समान उनके सम्मुख आनेलगे ॥ १९ ॥ हे नरपाल ! आनर्त्त, मरु, कुरु, जाङ्गल, कंक, मत्स्य, पांचाल, कुंति, मधु, केकय, कोशल और अर्णदेशके निवासी और दूसरे भी स्त्री पुरुष उदार हास्य और सुंदर दृष्टिसे भगवान के मुख कमल का नेत्रों से पानकरते थे ॥ २० ॥ इन त्रिलोकी गुरुको देखकर जिनकी अंधदृष्टि नष्टहोगईहै उन नरनारियोंको कृष्णजी अभय और तत्वज्ञान देते, देवता और मनुष्योंसे अशुभ नाशक दिशाओंमें व्याप्त अपन यशको सुनते २ विदेह नगरमें पहुंचे ॥ २१ ॥ हे राजन् ! उस समय पुरवासी और ग्रामवासी भगवानका आया सुनकर आनंद से पूजाकी सामग्री हाथ में ले उनकी पूजाकरने के निमित्त आगयेहैं ॥ २२ ॥ उन पवित्र यशवाले भगवान का दर्शन कर उनका मुख और अंतःकरण प्रफुल्लित होउठा, उन्हों ने उनको और पहिले जिनको सुनाथा उन सब ऋषियों को हाथ जोड़कर प्रणाम किया ॥ २३ ॥ अनुग्रह करने के निमित्त जगद्गुरु आये हैं—यहजान मैथिलराज और श्रुतदेव भगवान के चरणों में गिरे ॥ २४ ॥ और एकही साथ हाथ जोड़ अतिथि होने के निमित्त ब्राह्मणों समेत श्रीकृष्ण जी का निमन्त्रण किया और बहुलाश्व और श्रुतदेव ने हाथ जोड़ ब्राह्मणों के साथ भगवानका सत्कार किया ॥ २५ ॥ भगवान उसे स्वीकारकर दोनों जनों के प्रिय करने के निमित्त ब्राह्मणों के साथ दोरूप धारणकर दोनों के घर एकही समय में गये यह बात किसी ने नजानी ॥ २६ ॥ अनतर बहुलाश्व ने श्रमित और दूर से आयेहुए उनसब को श्रेष्ठआसनलाकर दिये ॥२७॥ राजा ने सुखपूर्वक विराजमान उन मुनियों को नमस्कारकर उन के चरण धोये और उस लोकपावन जलको कुटुम्बियों समेत मस्तकपर धारणकर गंध, माल्य, वस्त्र, भूषण, धूप, दीप, अर्घ्य, गौ और बैल देकर उनकी पूजाकी । बढ़ीहुई भक्तिसे राजा का हृदय आनंदित होगया और आंखों में आंसू भरआये ॥ २८—२९ ॥ अनतर उनको अन्न,जल और तांबूलादि से तृप्तकर जनकराजने भगवान के दोनों चरणों को छाती में लगाय प्रीति से प्रफुल्लितमनहो मधुर २ वाक्यों से धीरे २ कहा ॥ ३० ॥ हे विभो!स्वयं प्रकाशमान आपही सब प्राणियों को चेतन देनवाले औरप्रकाशक हो, इसही कारण आपके चरणकमल के स्मरण करनेवाले मुझ को आपने दर्शन दिया ॥ ३१ ॥

वचस्तदृतं कर्तुमस्मद्दृग्गोचरो भवान् । यदात्थैकान्तभक्तान्मे नानन्तः श्रीरजः प्रियः ॥ ३२ ॥ को नु त्वच्चरणाम्भोजमेवंविद्विसृजेत्पुमान् । निष्किञ्चनानां शान्तानां मुनीनां यस्त्वमात्मदः ॥ ३३ ॥ योऽवतीर्य यदोर्वंशे नृणां संसरतामिह । यशो वितेने तच्छान्त्यै त्रैलोक्यवृजिनापहम् ॥ ३४ ॥ नमस्तुभ्यं भगवते कृष्णायाकुण्ठमेधसे ॥ नारायणाय ऋषये सुशान्तं तप ईयुषे ॥ ३५ ॥ दिनानि कतिचिद्भूमन्गृहान् नो निवस द्विजैः । समेतः पादरजसा पुनीहीदं निमेः कुलम् ॥ ३६ ॥ इत्युपामन्त्रितो राज्ञा भगवाँल्लोकभावनः । उवास कुर्वन्कल्याणं मिथिलानरयोषिताम् ॥ ३७ ॥ श्रुतदेवोऽच्युतं प्राप्तं स्वगृहाञ्जनको यथा । नत्वा मुनीन्सुसंहृष्टो धुन्वन्वासो ननर्त ह ॥ ३८ ॥ तृणपीठबृसीष्वेतानानीतेषूपवेश्य सः । स्वागतेनाभिनन्द्याङ्घ्रीन्सभार्योऽवनिजे मुदा ॥ ३९ ॥ तदम्भसा महाभाग आत्मानं सगृहान्वयम् । स्नापयाञ्चक्र उद्धर्षो लब्धसर्वमनोरथः ॥ ४० ॥ फलार्हणोशीरशिवामृताम्भसा मृदा सुरभ्या तुलसीकुशाम्बुजैः । आराधयामास यथोपपन्नया सपर्यया सत्त्वविवर्धनान्धसा ॥४१॥ स तर्कयामास कुतो ममान्वभूद् गृहान्धकूपे पतितस्य सङ्गमः । यः सर्वतीर्थास्पदपादरेणुभिः कृष्णेन चास्यात्मनिकेतभूसुरैः ॥ ४२ ॥ सूपविष्टान्कृतातिथ्याञ्छ्रुतदेव उपस्थितः । सभार्यस्वजनापत्य उवाचाङ्घ्र्यभिमर्शनः ॥ ४३ ॥ श्रुतदेव उवाच ॥ नाद्य नो दर्शनं प्राप्तः परं परमपूरुषः । यर्हीदं शक्तिभिः सृष्ट्वा प्रविष्टो ह्यात्मसत्तया ॥ ४४ ॥ यथा शयानः पुरुषो मनसैवात्ममायया । सृष्ट्वा लोकं परं स्वाप्न

आपका जोकथन है कि 'एकांत भक्तकी अपेक्षा अनंत, लक्ष्मी और ब्रह्माभी मुझेप्रिय नहीं हैं' उसही वाक्य के सत्य करने के निमित्त आपमेरे दृष्टिगोचर हुएहो ॥ ३२ ॥ 'आप निष्किंचन शांत और सबके आत्माहो' यह जानकर कौन मनुष्य आपके चरण कमलको छोड़ सकता है ? आप इस पृथ्वी पर संसारी मनुष्यों के बीच यदुवंशियों में अवतीर्णहो संसार की शांतिके निमित्त त्रैलोक्यमें पाप नाशक यशका विस्तार करतेहो ॥ ३३—३४ ॥ आप अकुंठित बुद्धिवाले, शांत, तपस्यावलम्बी, नारायणऋषि भगवान श्रीकृष्णहो ; आपको नमस्कार है ॥ ३५ ॥ हे भूमन् ! इस समय ब्राह्मणों समेत कुछदिन हमारे घरमें वासकर अपनी चरण रजसे इस निमिवंशको पवित्र करो ॥ ३६ ॥ लोकपावन भगवान हरि राजासे इस प्रकार प्रार्थितहो मिथिला निवासियोंका कल्याण करते हुए कुछदिन वहींरहे ॥ ३७ ॥ राजन् ! जनककी समानश्रुत देवनेभी अपने घरमें भगवान और मुनियोंका देख उनको प्रणाम किया और आनंदितहो वस्त्रोंको घुमाय २ नाचनेलगा ॥ ३८ ॥ उसने कुशासन, पीढ़े और चटाइयां लाय उनसबको बिठाया और उनकी कुशल पूछ आदर से सत्कारकर स्त्री समेत उनके चरण धोये ॥ ३९ ॥ महाभाग विप्रने सब मनोरथों को प्राप्तहो प्रसन्न चित्त से उस जलद्वारा घर और वंश समेत अपने को स्नानकराया ॥ ४० ॥ फिर फल पूजाके पदार्थ, खशसे सुवासित सुंदर अमृत की समान जल , सुगंधित मिट्टी , तुलसी, कुश , कमल और सतगुण के बढ़ानेवाले अन्न आदि बनसकनेवाली पूजासे उनकी पूजाकर ॥ ४१ ॥ विचारने लगा कि-अहो ! मैं घर रूप अंधेकुए में गिराहुआहू मुझको इन श्रीकृष्णजी का दर्शन मुनियों समेत कि जिनकी चरणरज सब तीर्थों की आस्पद व जो आत्मा के निवासरूप हैं किस पुण्यसे प्राप्तहुआ ? ॥ ४२ ॥ हेमहाराज ! अनंतर श्रीकृष्णजी के सुखसे बैठनेपर श्रुतदेव स्त्री, स्वजन और पुत्रोंसमेत उनके निकटवर्तीहो चरण चापते २ कहने लगा ॥ ४३ ॥ श्रुतदेवने कहा कि—हे परमपुरुष ! आप जोमुझको आजही प्राप्तहुएहो ऐसा नहीं है जब शक्तियों से इस विश्वको उत्पन्नकर अपनी सत्तासे इसके भीतर प्रवेश किया तभीसे प्राप्त हुएहो ॥ ४४ ॥

मनुविश्यावभासते ॥ ४५ ॥ शृण्वतां गदतां शश्वदर्चतां त्वाऽभिवन्दताम्। नृणां संवदतामन्तर्हृदि भास्यमलात्मनाम् ॥ ४६ ॥ हृदिस्थोऽप्यतिदूरस्थः कर्मविक्षिप्तचेतसाम्। आत्मशक्तिभिरग्राह्योऽप्यन्त्युपेतगुणात्मनाम् ॥ ४७ ॥ नमोऽस्तु तेऽध्यात्मविदां परात्मने अनात्मने स्वात्मविभक्तमृत्यवे ॥ सकारणाकारणलिंगमीयुषे स्वमाययाऽसंवृतरुद्धदृष्टये ॥ ४८ ॥ स त्वं शाधि स्वभृत्यान्नः किं देव करवामहे। एतदन्तो नृणां क्लेशो यद्भवानक्षिगोचरः ॥ ४९ ॥ श्रीशुक उवाच॥ तदुक्तमित्युपाकर्ण्य भगवान्प्रणतार्तिहा। गृहीत्वा पाणिना पाणिं प्रहसंस्तमुवाच ह ॥ ५० ॥ श्रीभगवानुवाच। ब्रह्मंस्तेऽनुग्रहार्थाय संप्राप्तान्विद्ध्यमून्मुनीन्। संचरन्ति मया लोकान्पुनन्तः पादरेणुभिः ॥ ५१ ॥ देवाः क्षेत्राणि तीर्थानि दर्शनस्पर्शनार्चनैः। शनैः पुनन्ति कालेन तदप्यर्हत्तमेक्षया ॥ ५२ ॥ ब्राह्मणो जन्मना श्रेयान्सर्वेषां प्राणिनामिह। तपसा विद्यया तुष्ट्या किमु मत्कलया युतः ॥ ५३ ॥ न ब्राह्मणान्मे दयितं रूपमेतच्चतुर्भुजम्। सर्ववेदमयो विप्रः सर्वदेवमयो ह्यहम् ॥ ५४ ॥ दुष्प्रज्ञा अविदित्वैवमवजानन्त्यसूयवः। गुरुं मां विप्रमात्मानमर्चादाविज्यदृष्टयः ॥ ५५ ॥ चराचरमिदं विश्वं भावा ये चास्य हेतवः। मद्रूपाणीति चेतस्याधत्ते विप्रो मदीक्षया ॥ ५६ ॥ तस्माद्ब्रह्मऋषीनेतान्ब्रह्मन्मच्छ्रद्धयाऽर्चय। एवं चेदर्चितोऽस्म्यद्धा नान्यथा भूरिभूतिभिः ॥ ५७ ॥ श्रीशुक उवाच ॥ स इत्थं प्रभुणाऽऽदिष्टः सहकृष्णान्द्विजोत्तमान्। आराध्यैकात्मभा-

---

जैसे सोताहुआ मनुष्य अपनी अविद्यासे स्वप्न में मनहीसे दूसरे देहको रचकर उसमें प्रवेशहो ऐसा जानपडताहै वैसेही आपभी इस विश्वको सृजकर मानो उसमें प्रवेश हुएहो ऐसे प्रतीत होतेहो, ॥ ४५ ॥ जो मनुष्य निरन्तर आपकेही शुभ कर्मों को गाता व सुनताहै आपकी अर्चना और पूजा करताहै; आपहीकी चरचा करता है आप उसके हृदय के भीतर प्रकाशित होतेरहते हो॥४६॥जिसमनुष्यका चित्त,कर्मसे विक्षिप्तहै आपहृदय में स्थित रहकरभी उससे दूर रहतेहो, और जो निरहंकार मनुष्य श्रवण कीर्तनादिद्वारा अन्तःकरणकी पवित्रता प्राप्त कराते हैं आप उनके निकट रहतेहो ॥ ४७ ॥ आप अध्यात्म वेत्ताओंके परमात्मा; और आपही अनात्माहो;आपअपनी मायासे दृष्टि को संवरण और आवरण कररखते हैं अतएव सकारण और अकारण उपाधि को [illegible] हुएहो आपको नमस्कार है ॥४८॥हे देव! मैं आपका दासहूं ; आप आज्ञा करो मैं आपका कौनसा कार्य करू। जबतक आप दृष्टिगोचर नहीं होते तबतकही मनुष्य को क्लेश रहता है ॥ ४९ ॥ श्रीशुकदेवजी बोले कि—हेराजन्! भक्तों के दुःख दूर करनेवाले भगवान् श्रुतदेवकी इन बातों को सुनकर उसकाहाथपकड़ हँसकर कहनेलगे कि—॥ ५० ॥ हेब्रह्मन्! यहसब मुनि तुम पर अनुग्रह करने के निमित्त उपस्थित हुएहैं यहसब चरणरजद्वारा लोकों को पवित्र करतेहुए मेरे साथ भ्रमण कररहे हैं ॥ ५१ ॥ देवता, क्षेत्र, तीर्थ, येसब दर्शन, स्पर्शन और पूजनसे बहुत दिनों में पवित्र करते हैं, किंतु ब्राह्मण के चरण स्पर्श से बहुतही शीघ्र पवित्रता होती है ॥५२॥ ब्राह्मण इसलोक में जन्मद्वाराही सबप्राणियों में श्रेष्ठ हैं; उनमें से जो ब्राह्मण तपस्या, विद्या, तुष्टि और उपासनावाले हैं उनकी और क्याबातकहूं ? ॥ ५३ ॥ इस चतुर्भुज रूपकी अपेक्षा ब्राह्मणों की आराधना करनाही मुझे अत्यन्त प्रिय है। क्योंकि ब्राह्मण सर्ववेदमय और मैं सर्वदेवमयहूं ॥ ५४ ॥ अज्ञान मनुष्य इसप्रकार न जानकर गुरु, आत्मा और मुझरूप ब्राह्मण का तिरस्कारकरते हैं पूजाही में पूज्य दृष्टि रखने वाले इस दोष का आरोपण करतेहैं। चराचर जगत् और इसके कारण महत्तादि भावमें मेरी सर्वत्रही दृष्टि है। इसही कारण ब्राह्मण उनसबको मेरा रूप जान मुझे मनमें धारण करते हैं। अतएव हेब्रह्मन्! इनसब महर्षियों की श्रद्धासहित पूजाकरो। इन की पूजा करने से साक्षातमैं पूजित होताहूं; और दूसरी प्रकार बहुत सम्पत्तिसे भी मेरी पूजाकरने

येनमैथिलश्चापसद्गतिम् ॥ ५८ ॥ एवंस्वभक्तयोराजन्भगवान्भक्तभक्तिमान् । उ षित्वाऽऽदिश्यसन्मार्गंपुनर्द्वारवतीमगात् ॥ ५९ ॥

इतिश्रीभा० म० द० उ० षडशीतितमोऽध्यायः ॥ ८६ ॥

परीक्षिदुवाच ॥ ब्रह्मन्ब्रह्मण्यनिर्देश्येनिर्गुणेगुणवृत्तयः । कथंचरन्तिश्रुतयःसा क्षात्सदसतः परे ॥ १ ॥ श्रीशुक उवाच ॥ बुद्धीन्द्रियमनःप्राणाञ्जनानामसृजत्प्र भुः । मात्रार्थंचभवार्थंचआत्मनेऽकल्पनायच ॥२॥ सैषाह्युपनिषद्ब्राह्मीपूर्वेषांपूर्वजै र्धृता । श्रद्धयाधारयेद्यस्तांक्षेमंगच्छेदकिञ्चनः ॥ ३ ॥ अत्रतेवर्णयिष्यामिगाथांना रायणान्विताम् । नारदस्यचसंवादमृषेर्नारायणस्यच ॥ ४ ॥ एकदानारदोलोका न्पर्यटन्भगवत्प्रियः । सनातनमृषिंद्रष्टुंययौनारायणाश्रमम् ॥ ५ ॥ योवैभारतवर्षेऽ स्मिन्क्षेमायस्वस्तयेनृणाम् । धर्मज्ञानशमोपेतमाकल्पादास्थितस्तपः ॥ ६ ॥ तत्रोप विष्टमृषिभिः कलापग्रामवासिभिः । परीतंप्रणतोऽपृच्छदिदमेवकुरूद्वह ॥ ७ ॥ त स्मैह्यवोचद्भगवानृषीणांशृण्वतामिदम् । योब्रह्मवादःपूर्वेषांजनलोकनिवासिनाम् ॥ ८ ॥ श्रीभगवानुवाच ॥ स्वायम्भुवब्रह्मसत्रंजनलोकेऽभवत्पुरा । तत्रस्थानांमान सानांमुनीनामूर्ध्वरेतसाम् ॥ ९ ॥ श्वेतद्वीपंगतवतित्वयिद्रष्टुंतदीश्वरम् । ब्रह्मवादः सुसंवृत्तःश्रुतयोयत्रशेरते । तत्रहाऽयमभूत्प्रश्नस्त्वमांयमनुपृच्छसि ॥ १० ॥ तुल्य श्रुततपःशीलास्तुल्यस्वीयारिमध्यमाः । अपिचक्रुःप्रवचनमेकंशुश्रूषवोऽपरे ॥

पर में पूजित नहीं होता ॥ ५६—५७ ॥ शुकदेवजी ने कहा कि—वह मैथलब्राह्मण—भगवान श्री कृष्णजी की इस आज्ञाको पाय उनके साथ उन श्रेष्ठ ब्राह्मणों की एकात्मभाव से पूजाकरसद्गति को प्राप्तहुआ ॥ ५८ ॥ हेराजन् ! वह भक्तवत्सल भगवान् दोनों भक्तों को श्रुति समूह के ब्रह्म परस्वरूप मुक्ति मार्ग का उपदेशकर द्वारका में आये ॥ ५९ ॥

इतिश्री मद्भागवतेमहापुराणेदशमस्कंधे उ०सरलाभाषाटीकायांषड्शीतितमोऽध्यायः ॥ ८६ ॥

राजा परीक्षितने पूँछा कि—हे ब्रह्मन् ! जिसका भली भांति से निश्चय नहीं किया जासकता, जो निर्गुण और कार्य कारण से परे हैं, सगुण श्रुतिन उन अगुण परब्रह्मका स्वरूप किसप्रकार वर्णन किया है सो हमसे कहो ॥ १ ॥ श्रीशुकदेवजी बोले कि—हे राजन् ! नारायण ने मनुष्यों के अर्थ, धर्म, काम और मुक्ति के निमित्त बुद्धि, इन्द्रिय, मन और प्राणको रचा है ॥ २ ॥ "[illegible]-ब्रह्मपर" इस उपनिषद के वाक्य को पूर्वजों के पूर्वज आचार्यों ने भी धारण किया था । जो श्रद्धायुक्त इसको धारण करते हैं वे देहादि उपाधि में निवास कर परमानंद को प्राप्त कर सकते हैं ॥ ३ ॥ इस विषय में तुमसे एक इतिहास का वर्णन करता हू उस इतिहास को नारायण ने नारदजी से कहा है ॥ ४ ॥ एकसमय भगवत् प्रिय नारदजी सब लोकों में भ्रमण करतेरसनातन ऋषि के दर्शन करने के निमित्त नारायणजी के आश्रम में आये ॥ ५ ॥ वे भारतवर्षीय मनुष्यों के कल्याण के निमित्त कल्प के आरंभ से धर्म ज्ञानयुक्त और शमसंयुक्त तपस्या करते हुए उस स्थान में कलाप ग्रामवासी ऋषियों से वेष्ठित हो निवास करते हैं देवर्षि ने उनको नमस्कार कर उनसे यह पूँछा ॥ ६ । ७ ॥ तब भगवान नारायणनेभी सबके सामने नारदजीसे वही ब्रह्मवाद का विषय कहा—कि जो पहिले जन लोकके निवासी सनकादिकोंके बीचमें हुआ था ॥ ८ ॥ भगवान ने कहा कि—हे स्वयम्भू नदन ! पहिले जनलोकमें वहांके ऊर्ध्व रेता ऋषियोंने ब्रह्मसत्र नामसे एक यज्ञ किया था ॥ ९ ॥ उस समय तुम मेरेही विशेष अंश अनिरुद्ध मूर्त्तिके देखने के निमित्त श्वेत द्वीप में गये थे । इस समय तुमने जो मुझ से पूँछा है वहां ऋषियों में भी यही प्रश्न हुआ था ॥ १० ॥ सबही शास्त्र ज्ञान, तपस्या और स्वभावमें समान थे सबही शत्रु मित्रको समान जानते और उदासीन थे; तौभी—कौतुक से एक जनको कहने वाला कर और सब सुनने लगे ॥ ११ ॥

॥ ११ ॥ सनन्दन उवाच ॥ स्वसृष्टमिदमापीय शयानं सह शक्तिभिः । तदन्ते बोधयांचक्रुस्तल्लिङ्गैः श्रुतयः परम् ॥ १२॥ यथा शयानं सम्राजं वन्दिनस्तत्पराक्रमैः । प्रत्यूषेऽभ्येत्य सुश्लोकैर्बोधयन्त्यनुजीविनः ॥ १३ ॥ श्रुतय ऊचुः ॥ जयजय जह्यजामजित दोषगृभीतगुणां त्वमसि यदात्मना समवरुद्धसमस्तभगः । अगजगदोकसामखिलशक्त्यवबोधक ते क्वचिदजयाऽत्मना च चरतोऽनुचरेन्निगमः ॥१४॥ बृहदुपलब्धमेतदवयन्त्यवशेषतया यत उदयास्तमयौ विकृतेर्मृदि वाऽविकृतात् । अत ऋषयो दधुस्त्वयि मनोवचनाचरितं कथमयथा भवन्ति भुवि दत्तपदानि नृणाम् ॥१५॥ इति तव सूरयस्त्र्यधिपतेऽखिललोकमलक्षपणकथाऽमृताब्धिमवगाह्य तपांसि जहुः । किमुत पुनः स्वधामविधुताशयकालगुणाः परम भजन्ति ये पदमजस्रसुखानुभवम् ॥ ॥१६॥ दृतय इव श्वसन्त्यसुभृतो यदि तेऽनुविधा महदहमादयोऽण्डमसृजन्यदनुग्रह-

उनमें से सनन्दन ने कहा कि—अपने रचे हुए इसजगत् को अपनी शक्तियोंसे अपने स्वरूपमें लय

कर योगोंके कारण मानोनिद्रा लेते हों इसतरह ज्ञात होते सगुण ब्रह्मको सृष्टिके आरम्भमें उनके प्रथम निःश्वास से प्रकट हुई श्रुतियां उनके प्रतिपादक वाक्यों से जगाने लगीं ॥ १२ ॥ जैसे अनुजीवी बंदीजन प्रातःकालही में आयकर सोते हुए चक्रवर्ती राजाको सुंदर कीर्ति और पराक्रम का वर्णन करके जगाते हैं उसही प्रकार अपने उत्पन्न किये हुए इस विश्वको संहार कर अपनी शक्तियां समेत योग निद्रा से निद्रित ईश्वरको श्रुतियें प्रलयके अंत में पलयांत प्रतिपादक.वाक्यों से इस भांति जगाने लगीं ॥ १३ ॥ श्रुतियोंने कहा कि—हे जय जय अजित अच्युत ! हे प्रभु ! स्थावर जंगमात्मक जीवोंकी अविद्याका नाशकरो क्योंकि उन सबके आपही स्वरूप, सब ऐश्वर्यों के अधिकारी हो और अविद्याभी प्राणियोंके मोह उत्पन्न करनेके निमित्तही गुणोंको ग्रहण करके स्थिति करती है; अतएव इस अज्ञान करनेवाली अविद्या को आपको नाशकरना चाहिए । हे प्रभो ! आप सर्वान्तर्यामी, सब प्राणियों की शक्तिके उत्पन्न करनेवालेहो आप के अतिरिक्तऔर कौन अविद्याको नाश करसकता है ? हे ठकुर ! यहतत्त्व हमको (श्रुति) ज्ञात है । आपकी माया से मिलेहुए सृष्ट्यादि का लीनस्वरूप और सत्य ज्ञानानंद,अखण्ड, नित्यरूप वेदही प्रतिपादित है ॥ १४ ॥ इंद्र अग्नि प्राधान्य भी वेदसे प्रतिपादितहुए हैं किंतु वे सब वेद मन्त्र इंद्रादिको ...मानास्वरूप बिचारते हैं । जैसे घड़े की उत्पत्ति, लयमिट्टीही से होती है और मिट्टीही घट की शेषावस्था है इसकारण घट मिट्टी से अतिरिक्त नहीं जानाजाता । इसही प्रकार अविकारी ब्रह्म से भी अपने सब (इंद्र अग्नि आदिभी) की उत्पत्ति व लय होती है और वही आप सब की शेषावस्था हैं; अतएव इंद्रादिभी आपसे अतिरिक्त नहीं हैं । इसही कारण वेदमंत्र वा ऋषि गण आपहीको वा मानसकर्मों को स्थापन करते हैं । फल यहहै कि भूचर प्राणी पत्थर ईंट आदि जहां परही पैर रक्खाजावे वही पृथिवी है, जैसे यह सिद्धांत है, इसी प्रकार जो कोई कुछभी कहे वही आपका प्रतिपादक है ॥ १५ ॥ हे त्रिगुणेश्वर ! आपही परमार्थहो—यह विचारकर पण्डित जन सर्व लोकों के पापनाशक आप के कथामृतसागर में डुबकी मार पाप ताप से जब छूटजाते हैं तब हे परम ! जो आत्मतत्त्वज्ञान से राग द्वेषादि अंतःकरण के धर्म और बुढ़ापा जवानी आदि काल धर्म से छूटकर अखण्डानन्दानुभव स्वरूप आपके स्वरूप का भजन करते हैं उनके जो पाप ताप दूर होजावें उसका क्याकहना है ? ॥ १६ ॥ मनुष्य यदि आपके भक्त होवें तभी उन का जीवन सफल है; नहीं तो वे केवल वृथा श्वास लेतेरहते है । क्योंकि महत्तत्त्व और अहङ्कारादि जिनकी अनुग्रह से इसदेह को उत्पन्न करते हैं, जो अन्न मयादि—पञ्च कोश के साथ मिल कर अन्न मयादि पंचकोशवत् प्रतीयमान होता है, जो अन्नमयादि पञ्चकोश का मूल है, जो

तः । पुरुषविधोऽन्वयोऽत्रचरमोऽन्नमयादिषु यः सदसतः परं त्वमथयदेष्ववशेषमृतम् ॥ १७ ॥ उदरमुपासते यऋषिवर्त्मसु कूर्पदृशः परिसरपद्धतिं हृदयमारुणयो दहरम् । ततउदगादनन्ततवधामशिरःपरमं पुनरिहयत्समेत्यनपतन्तिकृतान्तमुखे ॥ ॥ १८ ॥ स्वकृतविचित्रयोनिषुविशन्निवहेतुतयातरतमतश्चकास्स्यनलवत्स्वकृतानुकृतिः । अथवितथास्वमूष्ववितथंतवधामसमंविरजधियोऽनुयन्त्यभिविपण्यव एकरसम् ॥ १९ ॥ स्वकृतपुरेष्वमीष्वबहिरन्तरसंवरणंतवपुरुषंवदन्त्यखिलशक्तिधृतोंऽशकृतम् । इतिनृगतिंविविच्यकवयोनिगमावपनंभवतउपासतेऽङ्घ्रिमभवंभुविविश्वसिताः ॥ २० ॥ दुरवगमात्मतत्त्वनिगमायतवात्ततनोश्चरितमहामृताब्धिपरिवर्तपरिश्रमणाः । नपरिलषन्तिकेचिदपवर्गमपीश्वरतेचरणसरोजहंसकुलसङ्गविसृष्टगृहाः ॥ २१ ॥ त्वदनुपथंकुलायमिदमात्मसुहृत्प्रियवच्चरतितथोन्मुखेत्वयिहितेप्रियआत्मनिच । नबतरमन्त्यहोअसदुपासनयाऽऽत्महनोयदनुशयाभ्रमन्त्युरुभयेकुशरीरभृतः ॥ २२ ॥ निभृतमरुन्मनोऽक्षदृढयोगयुजोहृदियन्मुनयउपासते तदरयोऽपिययुःस्मरणात् । स्त्रियउरगेन्द्रभोगभुजदण्डविष

हाः पतन्त्यधः ॥ १५ ॥ ये कैवल्यमसम्प्राप्ता ये चातीताश्च मूढताम् । त्रैवर्गिका ह्यक्ष-
णिका आत्मानं घातयन्ति ते ॥ १६ ॥ एत आत्महनोऽशान्ता अज्ञाने ज्ञानमानिनः । सी-
दन्त्यकृतकृत्या वै कालध्वस्तमनोरथाः ॥ १७ ॥ हित्वाऽत्यायासरचिता गृहापत्य-

अभिमानी पापी मनुष्य हरिभक्त साधुओंका उपहास करते हैं ॥ ७ ॥ स्त्रिय सेवक वे सब मनुष्य
मैथुन सुखकोही प्रधानमान घरमें बसकर परस्पर कल्याण की बातें करते रहते हैं । दक्षिणा,अन्न
दान वा दक्षिणा का विधान नकरयाग करते हैं और भली प्रकार अवगत न होकर केवल जी-
विका के निमित्तही पशुओं की हिंसा करते रहते हैं ॥ ८ ॥ दुष्टजन, सम्पत्ति, ऐश्वर्य, उत्तमकुल
में जन्म, विद्या, दान, रूप, बल, और कर्मों से उत्पन्न हुए मदसे अधबुद्धिहो साधुओं और ईश्वर
का तिरस्कार करते हैं ॥ ९ ॥ मूर्ख मनुष्य देहहीमें आकाश की समान निरंतर स्थित अभीष्टदेव
वर्णित ईश्वर आत्मा का श्रवण नहीं करते; क्योंकि वे मनोरथरूपी कल्पित विषयोंको के कथोप
कथन करते रहते हैं । जगतमें स्त्रीसंग,मांस भक्षण और सुरापान करना यह सब प्राणियोंके इच्छा
धीन है अतएव वेद प्रवृत्ति काही निरूपण करता है ॥ १० ॥ विवाह में स्त्री संसर्ग, यज्ञमें पशु-
हत्या और सुराग्रह नामक कार्यमें मद्यपान करना, वेदमें यह व्यवस्थादी हुई है, किंतु इन सब
[illegible]ओं से निवृत्त होने परही परम मंगल है ॥ ११ ॥ जिस धर्मसे अपरोक्ष ज्ञान तदनंतर निर्वाण
रूप परमशांति उत्पन्न होवे वही धर्म धनका एक मात्रफल है मूर्खलोग ऐसे देहादि के कल्याण
कारी धनसे धनी होकरभी अपार पराक्रम वाले मृत्युको नहीं देखते ॥ १२ ॥ वेदमें सुराका सूंघना
आहार रूपसे कहागया है इसी प्रकार देवताही के निमित्त पशुवधकी भी आज्ञा है इस प्रकारका
पशुवध हिंसा नहीं है, अपने मांस भक्षण करने की वेदमें आज्ञा नहीं है । इसी प्रकार संतान के
निमित्तही स्त्री संग विहित हुआ है किन्तु रतिके निमित्त नहीं; अतएव मनोरथवादी मनुष्य इस
शुद्धधर्मको नहीं जानते ॥ १३ ॥ इस प्रकार के धर्मको न जानने वाले जो मूर्ख, गर्वित, मदाभि-
मानी असाधु मनुष्य निःशंक भावसे पशुहिंसा करते हैं वेही सबपशु परलोक में उनका भक्षण
करते रहते हैं ॥ १४ ॥ जो अभिचारादि से दूसरे के शरीर स्थित आत्मा हरिसे द्वेष करता है
वह पुत्रादि समेत इस देहसे स्नेह बद्धहो नरक में गिरता है ॥ १५ ॥ जोअधबीच लटकने वाले
(न अज्ञानी न तत्वज्ञानी) धर्म अर्थ, कामकोही प्रधान और देहादिकको नित्य जानते हैं अ-
तएव तत्व ज्ञानको नहीं प्राप्त हुए । वह अपने सत् आत्माको असत्‌ही जानते हैं ॥ १६ ॥ ऐसे
अशांत, आत्मघाती और अज्ञान कोही ज्ञान जानने वाले मनुष्यों के कालसे मनोरथ निष्फल हो-
जाते हैं तबवे अकृत कार्य होकर दुःखपाते हैं ॥ १७ ॥ भगवान वासुदेव से बहिर्मुख ऐसे मनुष्य

शुद्धन्द्रियः । तमो विशन्त्यनिच्छन्तो वासुदेवपराङ्मुखाः ॥ १८ ॥ राजोवाच । कस्मिन्काले स भगवान्किंवर्णः कीदृशो नृभिः ॥ नाम्ना वा केन विधिना पूज्यते तदिहोच्यताम् ॥ १९ ॥ करभाजन उवाच । कृतं त्रेता द्वापरं च कलिरित्येषु केशवः । नानावर्णाभिधाकारो नानैव विधिनेज्यते ॥ २० ॥ कृते शुक्लश्चतुर्बाहुर्जटिलो वल्कलाम्बरः कृष्णाजिनोपवीताक्षान्बिभ्रद्दण्डकमण्डलू ॥ २१ ॥ मनुष्यास्तु तदा शान्ता निर्वैराः । सुहृदः समाः । यजन्ति तपसा देवं शमेन च दमेन च ॥२२॥ हंसः सुपर्णो वैकुण्ठो धर्मो योगेश्वरोऽमलः । ईश्वरः पुरुषोऽव्यक्तः परमात्मेति गीयते ॥ २३ ॥ त्रेतायां रक्तवर्णोऽसौ चतुर्बाहुस्त्रिमेखलः । हिरण्यकेशस्त्रय्यात्मा स्रुक्स्रुवाद्युपलक्षणः ॥ २४ ॥ तं तदा मनुजा देवं सर्वदेवमयं हरिम् । यजन्ति विद्यया त्रय्या धर्मिष्ठा ब्रह्मवादिनः ॥२५॥ विष्णुर्यज्ञः पृश्निगर्भः सर्वदेव उरुक्रमः । वृषाकपिर्जयन्तश्च उरुगाय इतीर्यते ॥ २६ ॥ द्वापरे भगवाञ्छ्यामः पीतवासा निजायुधः । श्रीवत्सादिभिरङ्कैश्च लक्षणैरुपलक्षितः ॥ २७ ॥ तं तदा पुरुषं मर्त्या महाराजोपलक्षणम् । यजन्ति वेदतन्त्राभ्यां परं जिज्ञासवो नृप ॥२८॥ नमस्ते वासुदेवाय नमः संकर्षणाय च । प्रद्युम्नायानिरुद्धाय तुभ्यं भगवते नमः ॥ २९ ॥ नारायणाय ऋषये पुरुषाय महात्मने । विश्वेश्वराय विश्वाय सर्वभूतात्मने नमः ॥ ३० ॥ इति द्वापर उर्वीश स्तुवन्ति जगदीश्वरम् । नानातन्त्रविधानेन कलावपि यथा शृणु ॥ ३१ ॥ कृष्णवर्णं त्विषाकृष्णं साङ्गोपाङ्गास्त्रपार्षदम् । यज्ञैः संकीर्तनप्रायैर्यजन्ति हि सुमेधसः ॥ ३२ ॥ ध्येयं सदा परिभवघ्नमभीष्टदोहं तीर्था

इच्छा न करने परभी आत्म मायासे विरचित घर, पुत्र, सुहृद और लक्ष्मीको त्यागकर नरक में गिरते हैं ॥ १८ ॥ निमिराजाने कहा कि—वह भगवान किस समय में, कैसा आकार धारणकर कैसे वर्णके हो, किस नाम और किस प्रकार से मनुष्यों द्वारा पूजित होते हैं ? आपकृपा करके उनका वर्णन करिये ॥ १९ ॥ करभाजन ने कहा कि—हे राजन् ! सत्य, त्रेता, द्वापर और कलियुग इन चारों युगोंमें भगवान नानावर्ण, नानानाम, नाना प्रकार के आकार धारणकर नाना विधिसे पूजित होते रहते हैं ॥ २० ॥ सत्य युगमें भगवान श्वेतवर्ण, चतुर्भुज, जटाधारी, वल्कल वस्त्र पहिने और कृष्ण मृगचर्म, यज्ञोपवीत, माला, दंड, कमंडलु, धारणकिये विराजमान रहते हैं ॥ २१ ॥ तवशांत, वैर रहित, सुहृद, समदर्शी मनुष्य ध्यान, शम और दमसे उन देवकी पूजा करते हैं ॥ २२ ॥ इस युगमें भगवान हंस, सुपर्ण, वैकुंठ, धर्म, योगेश्वर, अमल, ईश्वर, पुरुष अव्यक्त और परमात्मा इनसब नामोंसे गायेजाते हैं ॥ २३ ॥ त्रेता युगमें यह रक्तवर्ण, चतुर्भुज, तीन मेखला धारणकिये, पीलेकेश, वेदमय और स्रुक स्रुवादि चिह्नोंसे चिह्नित रहते हैं ॥ २४ ॥ तब धार्मिक, ब्रह्मवादी मनुष्य सर्व देवमय उनदेव हरिकी वेदत्रयीमें कहेहुए कर्मोंद्वारा पूजाकरते हैं ॥ २५ ॥ इस युगमें भगवान विष्णु यज्ञ, पृश्निपुत्र, सर्वदेव, उरुक्रम, वृषाकपि, जयंत और उरुगाय इन सब नामोंसे गायेजाते हैं ॥ २६ ॥ द्वापर में भगवान श्यामवर्ण, पीताम्बर पहिने, अपने अस्त्र शस्त्र शंख चक्रादि धारी और श्रीवत्सादि चिह्नोंसे चिह्नित रहते हैं ॥ २७ ॥ उस समय मनुष्यगण ईश्वर के जानने की अभिलाषाकर महाराज चिह्नसे चिह्नित पुरुष की वेद और तंत्र के अनुसार पूजाकरते हैं ॥ २८ ॥ वासुदेव, संकर्षण, आप भगवान प्रद्युम्न, अनिरुद्ध, नारायण, ऋषि, पुरुष, महात्मा, विश्वेश्वर, विश्वरूपी सर्वभूतात्मा आप को नमस्कार है ॥ २९।३० ॥ हे महीपते ! द्वापर में मनुष्य यह कहकर भगवान की पूजा करते हैं । कलिमें भी नाना तंत्रों के अनुसार जिसप्रकार श्रीहरि पूजित होते हैं उसको सुनो ॥ ३१ ॥ उस समय विवेकीमनुष्य कृष्ण वर्ण, अंगउपांग, अस्त्र और पार्षदों समेत बहुत २ अर्चनाओं से पूजा करते हैं ॥ ३२ ॥ हे महा

ध्येयं सदा परिभवघ्नमभीष्टदोहं तीर्थास्पदं शिवविरिञ्चिनुतं शरण्यम्। भृत्यार्तिहं प्रणतपाल भवाब्धिपोतं वन्दे महापुरुष ते चरणारविन्दम् ॥ ३३ ॥ त्यक्त्वा सुदुस्त्यजसुरेप्सितराज्यलक्ष्मीं धर्मिष्ठआर्यवचसायदगादरण्यम्। मायामृगंदयितयेप्सितमन्वधावद्वन्दे महापुरुषतेचरणारविन्दम् ॥ ३४ ॥ एवंयुगानुरूपाभ्यां भगवान्युगवर्तिभिः। मनुजैरिज्यते राजञ्छ्रेयसामीश्वरोहरिः ॥ ३५ ॥ कलिंसभाजयन्त्यार्या गुणज्ञाःसारभागिनः। यत्रसंकीर्तनेनैव सर्वःस्वार्थोऽभिलभ्यते ॥ ३६ ॥ नह्यतःपरमोलाभो देहिनांभ्राम्यतामिह। यतोविन्देतपरमांशांतिं नश्यतिसंसृतिः ॥ ३७ ॥ कृतादिषुप्रजा राजन्कलाविच्छन्ति संभवम्। कलौखलुभविष्यन्ति नारायणपरायणाः ॥ ३८ ॥ क्वचित्क्वचिन्महाराज द्रविडेषुचभूरिशः। ताम्रपर्णीनदीयत्र कृतमालापयस्विनी ॥ ३९ ॥ कावेरीचमहापुण्या प्रतीचीचमहानदी। येपिबन्तिजलंतासां मनुजामनुजेश्वर। प्रायोभक्ताभगवति वासुदेवेऽमलाशयाः ॥ ४० ॥ देवर्षिभूताप्तनृणां पितॄणांन किंकरोनायमृणीचराजन्। सर्वात्मनायःशरणं शरण्यं गतोमुकुन्दंपरिहृत्यकर्तम् ॥ ४१ ॥ स्वपादमूलंभजतःप्रियस्य त्यक्तान्यभावस्यहरिः परेशः। विकर्मयच्चोत्पतितंकथंचिद्धुनोति सर्वंहृदिसंनिविष्टः ॥ ४२ ॥ नारदउवाच ॥ धर्मान्भागवतानित्थं श्रुत्वाऽथ मिथिलेश्वरः। जायन्तेयान्मुनीन्प्रीतः सोपाध्यायोह्यपूजयत् ॥ ४३ ॥ ततोऽन्तर्दधिरे सिद्धाः सर्वलोकस्यपश्यतः। राजाधर्मानुपातिष्ठन्नवाप परमांगतिम् ॥ ४३ ॥ त्वमप्येतान्महाभाग धर्मान्भागवतांश्रुतान्। आस्थितःश्रद्धयायुक्तो निःसंगोयास्यसे

पुरुष आप सर्वदा ध्यान करने योग्य, सांसारिक दुःख के नाशक, मनोरथ के पूर्ण करनेवाले तीर्थों के आश्रय रूप ! शिव ब्रह्मासे स्तुति कियेजाते, शरणागत भक्तों के पीडानाशक, भक्तोंकेरक्षक भवसागर के नौकाहो आप के चरणों की बंदना करते हैं, ॥ ३३ ॥ हे महापुरुष आप अतिधर्मिष्ठ हो; क्योंकि पिता के केवल वचनों कोही मानकर आप दुस्त्यज राज्यलक्ष्मी को छोड़ बनों गयेथे, वहां प्यारी के इच्छित माया मृग का अनुसरण कियाथा; आप के चरणों को प्रणाम करते हैं ॥ ३४ ॥ हेराजन् ! कलियुग में उत्पन्नहुए मनुष्य इसप्रकार से नाम और मूर्तिद्वारा सब कल्याणों के ईश्वर मुक्तिदाता हरि की पूजाकरते रहते हैं ॥ ३५ ॥ गुण के जाननेवाले सारभागी श्रेष्ठमनुष्य कलिकाही सब युगों की अपेक्षा आदरकरते हैं, क्योंकि केवल कीर्तन द्वाराही इस युग में समस्त पुरुषार्थ प्राप्त होते रहते हैं ॥ ३६ ॥ इस संसारमें भ्रमणशील मनुष्यों का इसकी अपेक्षा परमलाभ और नहीं है। क्योंकि इससेही परमशांति प्राप्त होती है और इससेही संसार का बंधन दूरहोता है ॥ ३७ ॥ हे राजन् ! सत्यादियुग के सब मनुष्य कलिमेंही जन्म की इच्छा करते हैं। हे महाराज ! कलि में किसी २ स्थान में मनुष्य भगवद्भक्त होवेंगे; ॥ ३८ ॥ जैसे ताम्रपर्णी, कृतमाला, पयस्विनी, कावेरी, महापुण्या, प्रचीती-और महानदी बहती हैं उसी द्रविड़ देश में बहुत से हरिभक्त होवेंगे। हे लोकनाथ ! जो मनुष्य इन नदियों का जल पीते हैं वह प्रायः भगवान वासुदेव-परभक्तियुक्त होते हैं और उनके अंतःकरण शुद्धि प्राप्त करते हैं ॥ ३९—४० ॥ हे राजन् ! जिसने काम छोड़कर काय, मन, वाक्य से शरणागत पालक भगवान के चरणों की शरणली है वह देवता, ऋषि, प्राणी, कुटुम्ब, मनुष्य और पित्रों का किंकर (दास) या ऋणी नहीं है। भगवत्चरण सेवी प्रियभक्त यदि कभी प्रमादवश निषिद्ध कर्म से पतित होवे तो भगवान हरि उसके हृदय में प्रवेश कर उन समस्त पापों का नाश करते हैं ॥ ४१—४२ ॥ नारदजी ने कहा कि—उस मैथिलराजने इसप्रकार के भागवत धर्म कोसुन प्रसन्नहो उपाध्यायों समेत उन ऋषियों की पूजाकी ॥ ४३ ॥ अनंतर सबमनुष्योंके सन्मुखही वे सिद्ध अंतर्ध्यान होगये। राजा ने उन सब धर्मों का अनुष्ठान कर परम गति प्राप्तकी ॥ ४४ ॥ हे महाभाग ! आप भी श्रद्धायुक्त और निः

परम् ॥ ४५ ॥ युवयोःखलुदम्पत्योर्यशसा पूरितंजगत् । पुत्रतामगमद्यद्वां भगवानीश्वरोहरिः ॥ ४६ ॥ दर्शनालिंगनालापैः शयनासनभोजनैः ॥ आत्मावांपावितःकृष्णे पुत्रस्नेहंप्रकुर्वतोः ॥ ४७ ॥ वैरेणयंनृपतयः शिशुपालपौण्ड्रशाल्वादयो गतिविलासविलोकनाद्यैः । ध्यायन्तआकृतधियः शयनासनादौ तत्साम्यमापुरनुरक्तधियांपुनःकिम् ॥ ४८ ॥ माऽपत्यबुद्धिमकृथाः कृष्णेसर्वात्मनीश्वरे । मायामनुष्यभावेन गूढैश्वर्यंपरेऽव्यये ॥ ४९ ॥ भूभारासुरराजन्यहन्तवे गुप्तयेसताम् । अवतीर्णस्य निर्वृत्यैयशोलोकेवितन्यते॥५०॥ श्रीशुकउवाच । एतच्छ्रुत्वामहाभागो वसुदेवोऽतिविस्मितः । देवकीचमहाभागा जहतुर्मोहमात्मनः ॥ ५१ ॥ इतिहासमिमंपुण्यं धारयेद्यःसमाहितः । सविधूयेहशमलं ब्रह्मभूयायकल्पते ॥ ५२ ॥

इति श्रीमद्भा० महा० एकाद० पंचमोऽध्यायः ॥ ५ ॥

श्रीशुक उवाच ॥ अथब्रह्मात्मजैर्देवैः प्रजेशैरावृतोऽभ्यगात् । भवश्चभूतभव्येशो ययौभूतगणैर्वृतः ॥ १ ॥ इन्द्रोमरुद्भिर्भगवाना दित्यावसवोऽश्विनौ । ऋभवोऽङ्गिरसोरुद्रा विश्वेसाध्याश्चदेवताः ॥२॥ गन्धर्वाप्सरसोनागाः सिद्धचारणगुह्यकाः । ऋषयःपितरश्चैव सविद्याधरकिन्नराः ॥ ३ ॥ द्वारकामुपसंजग्मुः सर्वेकृष्णदिदृक्षवः । वपुषायेनभगवान् नरलोकमनोरमः ॥ यशोवितेनलोकेषु सर्वलोकमलापहम् ॥ ४ ॥ तस्यांविभ्राजमानायां समृद्धायांमहर्द्धिभिः । व्यचक्षतावितृप्ताक्षाः कृष्णमद्भुतदर्शनम् ॥ ५ ॥ स्वर्गोद्यानोपगैर्माल्यैश्छादयन्तोयदूत्तमम् ।

संगहो इन समस्त शुभभागवत धर्मों का आचरण करो; इसही से परमपद प्राप्त करसकोगे४५॥ आपका यश जगत में परिपूर्ण है क्योंकि भगवान ईश्वर हरि आप के पुत्ररूप से अवतीर्ण हुए हैं ॥ ४६ ॥ श्रीकृष्णजी पर पुत्रका स्नेह होने से आपका आत्मा उनके दर्शन, आलिंगन, स्पर्शन, शयन, भोजन और सगही बैठने आदि से निर्मल हुआ है ॥ ४७ ॥ जब शिशुपाल, पौण्ड्रकऔर शाल्वादि राजा शयन और भोजन काल में गति, विलास और दृष्टि आदिद्वारा उनकी आकृतिका ध्यानकर उनकी गति को प्राप्तहुएथे; तब जिनकामन सदैवही उनमें लगारहता है उनकी तोबात ही क्या कहूं ॥ ४८ ॥ सर्वात्मा ईश्वर श्रीकृष्णजी को पुत्र न जानो, माया के कारण मनुष्य-से उनका ऐश्वर्य गुप्त है; वह अव्यय, पुरुष ॥ ४९ ॥ पृथिवी के भारभूत असुरावतार राजाओं के नाश और साधुओं की रक्षा करने के निमित्त अवतीर्ण हुए हैं । उनका यश मनुष्यों की मुक्ति के निमित्त ससार में विख्यात होरहा है ॥ ५० ॥ श्रीशुकदेवजी ने कहा कि—महाभाग वसुदेवजी और महाभागा देवकी ने यहसुन अत्यन्त विस्मितहो आत्मा का मोह दूर किया ॥५१॥ जोमनुष्य एकाग्रचित्तहो इस पवित्र इतिहास को आदरपूर्वक धारण करता है वह सांसारिक मोह से छूटकर मोक्ष को प्राप्तहोता है ॥ ५२ ॥

इतिश्रीमद्भा०महा०एकादशस्क०सरलाभाषाटीकायां पंचमोऽध्यायः ॥ ५ ॥

श्रीशुकदेवजी बोले कि—एक समय ब्रह्माजी अपने पुत्रों, देवताओं और लोकपालों से घिरकर सर्व मंगलमय महादेवजी भूतोंसे वेष्टित हो ॥ १ ॥ मरुद्गणों समेत इन्द्र; वसु, आदित्यगण, अश्विनीकुमार, अंगिरस, रुद्र, विश्वेदेवा ॥२॥ गन्धर्व अप्सराएं नाग, सिद्ध, चारण, गुह्यक, ऋषि, पितर, विद्याधर और किन्नरादि सबही श्रीकृष्णजीके दर्शनोंके निमित्त द्वारकामें आये । जिन भगवान श्रीकृष्णजीने देह द्वारा मनुष्योंके मन रमण कराने वाले होकर जगतमें सब मनुष्यों के पाप नाशक यशका विस्तार किया था ब्रह्मादि को उन्हींके दर्शन की इच्छा थी ॥ ३ । ४ ॥ वे समृद्धि युक्त देदीप्यमान नगरी में विराजमान अद्भुत दर्शन श्रीकृष्णजी को अतृप्त नेत्रोंसे देखने

गीर्भिश्चित्रपदार्थाभिस्तुष्टुवुर्जगदीश्वरम् ॥ ६ ॥ देवाऊचुः ॥ नताःस्मतेनाथ पदा
रविन्दं बुद्धीन्द्रियप्राणमनोवचोभिः । यच्चिन्त्यतेऽन्तर्हृदिभावयुक्तैर्मुमुक्षुभिः क
र्ममयोरुपाशात् ॥ ७ ॥ त्वंमाययात्रिगुणयात्मनिदुर्विभाव्यं व्यक्तंसृजस्यवसिलुं
म्पसितद्गुणस्थः । नैतैर्भवानजितकर्मभिरज्यतेवै यत्स्वेसुखेऽव्यवहितेऽभिरतोऽन
वद्यः ॥८॥ शुद्धिर्नृणांनतुतथेड्यदुराशयानां विद्याश्रुताध्ययनदानतपःक्रियाभिः ।
सत्वात्मनामृषभतेयशसिप्रवृद्धसच्छ्रद्धयाश्रवणसंभृतयायथास्यात् ॥ ९ ॥ स्या
न्नस्तवांघ्रिरशुभाशयधूमकेतुः क्षेमाययोमुनिभिरार्द्रहृदोह्यमानः । यःसात्वतैःसम
विभूतयआत्मवद्भिर्व्यूहेऽर्चितःसवनशःस्वरतिक्रमाय ॥ १० ॥ यश्चिन्त्यतेप्रयतपा
णिभिरध्वराग्नौ त्रय्यानिरुक्तविधिनेशहविर्गृहीत्वा । अध्यात्मयोगउतयोगिभिरा
त्ममायां जिज्ञासुभिःपरमभागवतैःपरीष्टः ॥ ११ ॥ पर्युष्टयातवविभोवनमालयेयं
संस्पर्धिनीभगवतीप्रतिपत्निवच्छ्रीः । यःसुप्रणीतममुयाऽर्हणमाददन्नो भूयात्सदां
घ्रिरशुभाशयधूमकेतुः ॥ १२ ॥ केतुस्त्रिविक्रमयुतस्त्रिपतत्पताको यस्तेभयाभयक
रोऽसुरदेवचम्वोः । स्वर्गायसाधुषुखलेष्वितरायभूमन् पादःपुनातुभगवन्भजता
मघंनः ॥ १३ ॥ नस्योतगावइवयस्यवशेभवन्ति ब्रह्मादयस्तनुभृतोमिथुरर्द्यमानाः।
कालस्यतेप्रकृतिपूरुषयोःपरस्यशंनस्तनोतुचरणःपुरुषोत्तमस्य ॥ १४ ॥ अस्यासि

और स्वर्गीय फूलोंकी मालासे यदुश्रेष्ठ को आवृत कर मनोहर पद और अर्थयुक्त वाक्योंसे स्तुति करने लगे ॥ ५—६ ॥ देवताओं ने कहा कि—हे नाथ ! कर्ममय दृढ़ पाशसे छूटने की इच्छा कर ऋषिगण हृदय में जिनका ध्यान करते हैं, हम, बुद्धि इन्द्रिय, प्राण, मन, और वचनों द्वारा आपके उन्हीं चरण कमलोंको प्रणाम करते हैं ॥ ७ ॥ हे अजित ! आप मायागुण में स्थितिकर त्रिगुण मायासे इस अतर्कनीय विश्वकी उत्पत्ति, स्थिति और संहार करते हैं; परन्तु उन सब कर्मों में आप लिप्त नहीं होते, क्योंकि आप रागादि दोष रहित, आवरण रहित आत्म सुख निरतहो ॥८॥ हे पूज्य ! हे श्रेष्ठ ! आपके यशके सुनने से पुष्टहुई उत्तमश्रद्धा द्वारा साधुओंको जिस प्रकार की शुद्धिहोती है विद्या, श्रुत, अध्ययन, दान, तपस्या और कर्मों में आसक्त हुए मनुष्य वैसी शुद्धि नहीं प्राप्त करसकते ॥ ९ ॥ हे ईश्वर ! मुनिलोग मुक्तिके निमित प्रेमार्द्र हृदय से आपके जिन चरणोंकी उपासना करते हैं, भक्तलोग आपका सा ऐश्वर्य पानेके निमित्त जिनकी वासुदेवादि मूर्त्ति से पूजाकरते हैं और धीर मनुष्य स्वर्गका लोभ छोड़कर वैकुंठ के निमित्त जिनकी त्रिकाल पूजा करते हैं, यज्ञ करने वाले हाथजोड़ हविग्रहण कर वेदोक्त विधिसे जिनका ध्यान करते हैं, आत्म मायाके खोजने वाले योगीजन अध्यात्मयोग से जिनका भजन करते हैं, और परम भागवत जिन की सर्वत्र सर्वतोभाव से आराधना करते हैं वही चरण कमल हमारी विषय वासनाओंको निर्मूल करें ॥ १०—११ ॥ हे विभू ! लक्ष्मीजी सौती की समान इस पर्यूषिता वनमाला के साथ डाह करती रहती हैं तौभी वनमाला भक्तोंकी अर्पण की हुई है ऐसा विचार आप वनमाला से की हुई भक्तोंकी पूजाको भलीभांति अंगीकार करतेहो, उन्हीं आपके चरण हमारी विषय वासनाओं के नाश करने के निमित्त धूमकेतु होवें ॥ १२ ॥ हे भूमन् ! हे भगवन् ! आपका जो चरण कमल बलिराजा के बांधने के समय पराक्रम युक्त ध्वज स्वरूप हुआ था, तीन धारवाली गंगा जिसकी पताका स्वरूप हुई थीं, जोदेवता और असुरों की सेनाओंको अभय और भय देनेवाला है. और जो साधुओंको स्वर्ग स्वरूप व असाधुओंको नरक स्वरूप है उसीका हम भजन करते हैं हमको पापों से शुद्धकरिये ॥ १३ ॥ आप प्रकृति पुरुष के पर, काल रूपीहो, परस्पर द्वेषादिक से पीड़ित हुए ब्रह्मादि सबही प्राणी नाकछिदे रस्सीसे बंधेहुए बैलकी समान आपके वशीभूत हैं, आपके चरण

हेतुरुदयस्थितिसंयमानामव्यक्तजीवमहतामपिकालमाहुः॥सोऽयंत्रिणाभिरखिला
पचयेप्रवृत्तः कालोगभीररयउत्तमपूरुषस्त्वम् ॥ १५ ॥ त्वत्तःपुमान्समधिगम्य
यास्यवीर्यं धत्तेमहान्तमिवगर्भममोघवीर्यः । सोऽयंतयाऽनुगतआत्मनआण्डको
शं हैमंससर्जबहिरावरणैरुपेतम् ॥ १६ ॥ तत्तस्थुषश्चजगतश्चभवानधीशो यन्मा
ययोत्थगुणविक्रिययोपनीतान् । अर्थाञ्जुषन्नपिहृषीकपतेनलिप्तो येऽन्येस्वतःपरि
हृतादपिबिभ्यतिस्म ॥ १७ ॥ स्मायावलोकलवदर्शितभावहारि भ्रूमण्डलप्रहित
सौरतमन्त्रशौण्डैः । पत्न्यस्तुषोडशसहस्रमनङ्गबाणैर्यस्येन्द्रियं विमथितुंकरणैर्न वि
भ्व्यः ॥ १८ ॥ विभ्व्यस्तवामृतकथोदवहास्त्रिलोक्याः पादावनेजसरितःशमला
निहन्तुम् । आनुश्रवंश्रुतिभिरङ्घ्रिजमङ्गसंगैस्तीर्थद्वयंशुचिषदस्तउपस्पृशन्ति॥१९॥
बादरायणिरुवाच ॥ इत्यभिष्टूयविबुधैः सेशःशतधृतिर्हरिम् । अभ्यभाषतगोवि
न्दं प्रणम्याम्बरमाश्रितः ॥ २० ॥ ब्रह्मोवाच ॥ भूमेर्भारावताराय पुराविज्ञापितः
प्रभो । त्वमस्माभिरशेषात्मन्तत्तथैवोपपादितम् ॥ २१ ॥ धर्मश्चस्थापितःसत्सु स
त्यसन्धेषुवैत्वया । कीर्तिश्चदिक्षुविक्षिप्ता सर्वलोकमलापहा ॥ २२॥ अवतीर्ययदो
र्वंशे बिभ्रद्रूपमनुत्तमम् । कर्माण्युद्दामवृत्तानि हितायजगतोऽकृथाः ॥ २३ ॥ यानि
तेचरितानीश मनुष्याःसाधवःकलौ । शृण्वन्तःकीर्तयन्तश्च तरिष्यन्त्यंजसातमः
॥ २४ ॥ यदुवंशेऽवतीर्णस्य भवतःपुरुषोत्तमः । शरच्छतंव्यतीयाय पंचविंशाधि
कंप्रभो ॥ २५ ॥ नाधुनातेऽखिलाधार देवकार्यावशेषितम् । कुलंचविप्रशापेननष्ट

हमारा मंगलकरें ॥ १४ ॥ आप इस विश्वकी उत्पत्ति, स्थिति और नाशके कारणहो, आप प्रकृति, पुरुष और महत्तत्व के नियन्ताहो । आपही त्रिनाभि (तीनभाग) युक्त, सबके नाशमें प्रवृत्त, गम्भीर वेगशाली कालहो, अतएव आपही उत्तम पुरुषहो ॥ १५ ॥ जिस अमोघ पराक्रम पुरुष ने स्वयंही शक्ति प्राप्तकर, गर्भकी समान, मायाके साथ महत्तत्व धारण किया उसही पुरुष ने उस मायाके अनुसारीहो बाहरी आवरणों समेत हेमअण्डकोषरचा है ॥ १६ ॥ हे हृषीकेश ! आप स्थावर जंगमों के अधीश्वरहो क्योंकि मायासे प्रकाशित इन्द्रियों की वृत्तियों द्वारा प्राप्तहुए सब विषयोंको भोगकर भी आप उनमें लिप्त नहीं होते, किन्तु आपसे भिन्न और सबही स्वयं त्यक्त स्वरूप विषयों से भीतहोते रहते हैं ॥ १७ ॥ सोलह सहस्र स्त्रियें मंदहास्य युक्त कटाक्ष दृष्टिद्वारा सूचित कियेहुए अभिप्राय से मनोहर भौंहों से प्रेरित काम कलादिक साधनों सेभी आपके मनको मोहित न करसकीं ॥ १८ ॥ अतएव आपकी कथा रूप अमृत जल वाहिनी और चरण धोनेके जल रूप नदियां त्रिलोकी का पाप धोनेको समर्थ है, स्वस्व आश्रम धर्मावलंबी मनुष्य वेद विहित तीर्थों का श्रवणेन्द्रिय द्वारा और चरणों से उत्पन्न हुए तीर्थों का निःसंग संग द्वारा सेवन किया करते हैं ॥ १९ ॥ श्रीशुकदेवजी बोलेकि–महादेवजी और ब्रह्माजी ने देवताओं समेत आकाशका आश्रय ले भगवान की इस प्रकार से स्तुति व प्रणामकर कहा ॥ २० ॥ ब्रह्माजी ने कहाकि–हे अशेषात्मन् ! हे प्रभो ! प्रथम हमने पृथिवीका भार हरनेके निमित्त आपको जनायाथा, तब आपने अवतार धारणकर पृथिवीका भारदूर किया ॥ २१ ॥ आपने सत्य प्रतिज्ञ साधुओंका धर्म स्थापन किया है, सब मनुष्यों के पाप हरने वाली कीर्तिकाभी सब दिशाओं में विस्तार किया है, सर्वोत्तम रूप धारणकर यदुकुल में अवतीर्णहो जगतके कल्याण के निमित्त बड़े २ पराक्रमके कार्य किये हैं ॥ २२—२३ ॥ हे ईश्वर ! आपके उन सब चरित्रोंको सुनकर व गायकर कलियुग में साधुजन सहसा अज्ञान से पार होवेंगे ॥ २४ ॥ हे पुरुषोत्तम ! हे विभो ! आपको यदुवंश में अवतार लिये एकसौ पचीस वर्ष बीतगये । हे अखिलाश्रय ! इस समय अब आपका कोई देव कार्य शेष नहीं

प्रायमभूदिदम् ॥ २६ ॥ ततःस्वधामपरमंविशस्वयदिमन्यसे । सलोकाँल्लोकपालान्नः पाहिवैकुण्ठकिंकरान् ॥ २७ ॥ श्रीभगवानुवाच ॥ अवधारितमेतन्मे यदात्थविबुधेश्वर । कृतंवःकार्यमखिलं भूमेर्भारोऽवतारितः ॥ २८ ॥ तदिदंयादवकुलं वीर्यशौर्यश्रियोद्धतम् । लोकंजिघृक्षद्रुद्धं मेवेलयेवमहार्णवः ॥ २९ ॥ यद्यसंहृत्यदृप्तानां यदूनांविपुलंकुलम् । गन्तास्म्यनेनलोकोऽयमुद्वेलेनविनंक्ष्यति ॥३०॥ इदानींनाशआरब्धः कुलस्यद्विजशापतः । यास्यामिभवनंब्रह्मन्नेतदन्तेतवानघ३१॥ श्रीशुकउवाच ॥ इत्युक्तोलोकनाथेन स्वयम्भूःप्रणिपत्यतम् । सहदेवगणैर्देवः स्वधामसमपद्यत ॥ ३२ ॥ अथतस्यांमहोत्पातान् द्वारवत्यांसमुत्थितान् । विलोक्यभगवानाह यदुवृद्धान्समागतान् ॥ ३३ ॥ श्रीभगवानुवाच ॥ एतेवैसुमहोत्पाता व्युत्तिष्ठन्तीहसर्वतः । शापश्चनः कुलस्यासीद्ब्राह्मणेभ्यो दुरत्ययः ॥ ३४ ॥ नवस्तव्यमिहास्माभिर्जिजीविषुभिरार्यकाः । प्रभासंसुमहत्पुण्यं यास्यामोऽद्यैव माचिरम् ॥ ३५ ॥ यत्रस्नात्वा दक्षशापाद्गृहीतो यक्ष्मणोडुराट् । विमुक्तः किल्बिषात्सद्यो भेजेभूयःकलोदयम् ॥ ३६ ॥ वयंचतस्मिन्नाप्लुत्य तर्पयित्वा पितॄन्सुरान् । भोजयित्वोशिजो विप्रान्नानागुणवताऽन्धसा ॥ ६७ ॥ तेषुदानानिपात्रेषु श्रद्धयोप्त्वा महान्तिवै । वृजिनानितरिष्यामो दानैर्नौभिरिवार्णवम् ॥ ३८ ॥ श्रीशुक उवाच । एवंभगवताऽऽदिष्टा यादवाःकुलनन्दन । गन्तुंकृतधियस्तीर्थं स्यन्दनान्समयूयुजन् ॥ ३९ ॥ तन्निरीक्ष्योद्धवो राजञ्छ्रुत्वाभगवतोदितम् । दृष्ट्वाऽरिष्टानिघो-

---

रहा, और आपका बंश भी प्रायः नष्ट होसा होगया है ॥ २५—२६ ॥ अतएव यदि उचित समझिये तो अपने वैकुंठ धाममें गमनकर वैकुंठके सेवक लोकपालोंकी हमारे समेत रक्षाकरो ॥२७॥ श्रीभगवान ने कहाकि-हे देवेश ! आपने जोकहा वही मैंने भी निश्चय किया है, पृथिवी का भार हरणकर आपके सब कार्य करादिये ॥ २८ ॥ ऐश्वर्य, पराक्रम और श्री से बढ़ा हुआ यादव बंश लोकका नाशकर देनेपर उद्यत है; तट जैसे समुद्रको रोक रखता है मैंनभी उसीप्रकार इन्हेंरोक रक्खा है ॥ २९ ॥ यदि अभिमानी यादवोंका बंश नाश न किया जावेगा तो यह बहुत बढ़कर लोकका नाश करेंगे॥३०॥इससमय ब्रह्मशाप से बंशनाशका काल उपस्थित है,हे निष्पाप ब्रह्मन् ! इसकार्यके करनेके उपरांत तुम्हारे धाम में आऊंगा ॥ ३१ ॥ श्रीशुकदेवजी बोले कि—ब्रह्माजी श्रीकृष्णजी की इसबातको सुन उनको प्रणामकर देवताओं समेत अपने स्थानको गये॥३२॥अनन्तर उस द्वारकापुरी में बडे२ उत्पात होनेलगे । उन उत्पातोंको देख भगवानने अपने निकट आये हुए वृद्ध यादवों से कहा कि—॥ ३३ ॥ हे आर्यो ! इस नगरी में सबओरसे बड़े २ उत्पात होरहे हैं ; हमारे बंशके ऊपर ब्राह्मणों का दुरत्यय शापभी हुआ है ॥ ३४ ॥ जीवन की इच्छा करके हमारा इस स्थान में रहना अनुचित है, आजही अविलम्ब से परम पवित्र प्रभासतीर्थ में चलना चाहिए ॥ ३५ ॥ दक्ष के शापसे यक्ष्मा रोग में ग्रस्तहुए चन्द्रमा ने जिसतीर्थ में स्नानकर पाप से छूट फिर कलावृद्धि प्राप्त कीथी, ॥ ३६ ॥ हमभी उसी प्रभास में स्नानकर पितर और देवताओं का तर्पण कर नाना गुणयुक्त अन्नोंसे उत्तम ब्राह्मणोंको भोजन करावें ॥ ३७ ॥ और उन सब ब्राह्मणों को श्रद्धापूर्वक दानदे, नावद्वारा जैसे सागर से पारहुआ जाता है वैसेही नाना प्रकार के दानोंद्वारा पापोंसे पार होवें ॥ ॥ ३८ ॥ श्रीशुकदेवजी ने कहा कि—हे कुरुनन्दन ! इस प्रकार यदुवंशी भगवान की आज्ञा से तीर्थ जाने को उत्सुकहुए और सब सवारियों को जोड़ने लगे ॥ ३९ ॥ हे राजन् यह देख, भगवान की बातों को सुन और भयानक उत्पातों को देख श्री

राणि नित्य कृष्णमनुव्रतः ॥ ४० ॥ विविक्तउपसंगम्य जगतामीश्वरेश्वरम् । प्रणम्य शिरसापादौ प्रांजलिस्तमभाषत ॥ ४१ ॥ उद्धवउवाच । देवदेवेशयोगेश पुण्यश्रवणकीर्तन । संहृत्यैतत्कुलं नूनं लोकंसंत्यक्ष्यतेभवान् । विप्रशापंसमर्थोऽपि प्रत्यहन्नयदीश्वरः ॥ ४२ ॥ नाहंतवांघ्रिकमलं क्षणार्धमपिकेशव ॥ त्यक्तुंसमुत्सहेनाथ स्वधामनयमामपि ॥ ४३ ॥ तव विक्रीडितंकृष्ण नृणांपरममंगलम् । कर्णपीयूषमास्वाद्य त्यजत्यन्यस्पृहांजनः ॥ ४४ ॥ शय्यासनाटनस्थानस्नानक्रीडाशनादिषु ॥ कथंत्वां प्रियमात्मानं वयंभक्तास्त्यजेमहि ॥ ४५ ॥ त्वयोपभुक्तस्रग्गन्धवासोलङ्कारचर्चिताः । उच्छिष्टभोजिनो दासास्तवमायांजयेमहि ॥ ४६ ॥ वाताशनायऋषयः श्रमणाऊर्ध्वमन्थिनः । ब्रह्माख्यंधामतेयान्ति शान्ताः संन्यासिनोऽमलाः ॥ ४७ ॥ वयंत्विह महायोगिन्भ्रमन्तः कर्मवर्त्मसु । त्वद्वार्तया तरिष्यामस्तावकैर्दुस्तरंतमः । ॥ ४८ ॥ स्मरन्तःकीर्तयन्तस्ते कृतानिगदितानिच ॥ गत्युत्स्मितेक्षणक्ष्वेलि यन्नृलोकविडम्बनम् ॥ ४९ ॥ श्रीशुकउवाच । एवंविज्ञापितो राजन्भगवान्देवकीसुतः ॥ एकान्तिनं प्रियं भृत्यमुद्धवं समभाषत ॥ ५० ॥

इति श्रीमद्भा० महा० एकाद० षष्ठोऽध्यायः ॥ ६ ॥

श्रीभगवानुवाच ॥ यदात्थमांमहाभागतच्चिकीर्षितमेवमे । ब्रह्माभवोलोकपालाःस्वर्वासंमेऽभिकाङ्क्षिणः ॥ १ ॥ मयानिष्पादितंह्यत्रदेवकार्यमशेषतः । यदर्थमवतीर्णोऽहमंशेनब्रह्मणार्थितः ॥ २ ॥ कुलंवैशापनिर्दग्धंनङ्क्ष्यत्यन्योन्यवि

कृष्णजी के परम प्रियभक्त उद्धवजी एकांत में श्रीकृष्णजी के समीप बैठ उनके दोनों चरणों को मस्तक से प्रणामकर हाथ जोड़ कहने लगे कि—॥ ४०—४१ ॥ हे देव देवेश ! हे योगेश ! हे पुण्यश्रवण ! हेपुण्यकीर्तन ! निश्चयही आप इस वंश का नाशकर लोक को छाड़ोगे; क्योंकिआप ईश्वर सामर्थ होकरभी ब्रह्मशाप का खण्डन करोगे ॥ ४२ ॥ हे केशव ! हेनाथ ! मैं आधेक्षण के निमित्त भी आप के चरण कमलों को नहीं त्यागसकता; इसलिये मुझ को भी अपने धामको लिये चलो ॥ ४३ ॥ हेकृष्णजी ! मनुष्यों के परम मंगलस्वरूप कानों से अमृत की समान आप की लीला चरित का स्वादले मनुष्य दूसरी कामनाओं को छोड़ देते हैं ॥ ४४॥ हमने भक्तहोकर शयन, आसन, चलना, खड़ारहना, स्नान, क्रीड़ा और भोजनादि समयों में आपकी सेवा की है, ऐसे परम प्रिय आत्मा आपको हम कैसे त्यागसकैं ? ॥ ४५ ॥ आप के भोगेहुए माला, चन्दन, वस्त्र, भूषण से चर्चितहो जूठनखानेवाले दास हमने आपकी माया को जय करलिया है ॥ ४६ ॥ हे महायोगिन् ! वायुका भक्षण कर २ रहनेवाले नग्न, ऊर्ध्वरेता, तपके श्रमी, शांत, शुद्धसन्यासी ऋषि बड़ी कठिनतासे आपके ब्रह्मधाम को जाते हैं ॥ ४७ ॥ किंतु हे महायोगिन् ! हमतो संसार में कर्म मार्गों में भ्रमण करतेहुए भी आपके भक्तों के साथ आप के विषय (सम्बन्ध) का कथोप कथन करकेही दुस्तर संसार को तर जायँगे ॥ ४८ ॥ आपकी मनुष्य लीला का अनुकरण गति, हास्य, परिहास, कर्म और वचनों का स्मरण करके और स्मरण कराय के दुस्तर अहंकार से पार होजावेंगे ॥ ४९ ॥ शुकदेवजी बोले कि—हनरनाथ! जब उद्धवजी ने भगवान देवकीनन्दन से इसप्रकार कहा तब भगवान अपने एकांत भक्त उद्धव से इसप्रकार कहनेलगे ॥ ५० ॥

इतिश्रीमद्भा०महा०एकादशस्क०सरलाभाषाटीकायांषष्ठोऽध्यायः ॥ ६ ॥

श्रीभगवान बोले कि—हेमहाभाग ! तुमने जो अनुमान किया है वह सत्य है; मैंने यही करने की इच्छा की है । तथा ब्रह्मा, महादेव और सब लोकपालों ने भी मुझ से वैकुण्ठचलने की प्रार्थना की है ॥ १ ॥ ब्रह्माजी की प्रार्थना करने से मैं जिसकारण अंश के साथ अवतीर्ण हुआ हूं वे सब देवकार्य मैं भलीप्रकार से पूरे करचुका ॥ २ ॥ यह वंश शापसे दग्धहो परस्पर युद्ध

प्रहात् । समुद्रःसप्तमेऽह्न्येतांपुरीं चप्लावयिष्यति ॥ ३ ॥ यर्ह्येवायंमयात्यक्तोलोको ऽयंनष्टमङ्गलः । भविष्यत्यचिरात्साधोकलिनापिनिराकृतः ॥ ४ ॥ नवस्तव्यंत्वये वेह त्यात्यक्तेमहीतले । जनोऽधर्मरुचिर्भद्रभविष्यतिकलौयुगे ॥ ५ ॥ त्वंतुसर्वंप रित्यज्यस्नेहं स्वजनबन्धुषु । मय्यावेश्यमनः सम्यक्समदृग्विचरस्वगाम् ॥६॥ यदि दंमनसावाचा चक्षुर्भ्यां श्रवणादिभिः । नश्वरंगृह्यमाणंचविद्धिमायामनोमयम् ॥७॥ पुंसोऽयुक्तस्यनानार्थोभ्रमःसगुणदोषभाक् । कर्माकर्मविकर्मेतिगुणदोषधियोभि- दा ॥ ८ ॥ तस्माद्युक्तेन्द्रियग्रामोयुक्तचित्तइदंजगत् । आत्मनीक्षस्वविततमात्मा- नंमय्यधीश्वरे ॥९॥ ज्ञानविज्ञानसंयुक्तआत्मभूतःशरीरिणाम् । आत्मानुभवतुष्टात्मा नान्तरायैर्विहन्यसे ॥ १० ॥ दोषबुद्ध्योभयातीतोनिषेधान्ननिवर्तते । गुणबुद्ध्या- चविहितं नकरोतियथाऽर्भकः ॥ ११ ॥ सर्वभूतसुहृच्छान्तो ज्ञानविज्ञाननिश्च यः । पश्यन्मदात्मकंविश्वंनविपद्येतवैपुनः ॥ १२ ॥ श्रीशुक उवाच ॥ इत्यादिष्टो भगवतामहाभागवतोनृप । उद्धवः प्रणिपत्याहतत्त्वजिज्ञासुरच्युतम् ॥ १३ ॥ उ- द्धव उवाच ॥ योगेशयोगविन्यासयोगात्मन्योगसम्भव ॥ निःश्रेयसायमेप्रोक्तस्त्यागः संन्यासलक्षणः ॥ १४ ॥ त्यागोऽयंदुष्करोभूमन्कामानांविषयात्मभिः । सुतरांत्व यिसर्वात्मन्नभक्तैरितिमेमतिः ॥ १५ ॥ सोऽहंममाहमितिमूढमतिर्विगाढस्त्वन्मा- यथाविरचितात्मनिसानुबन्धे । तत्त्वञ्जसानिगदितंभवतायथाहंसंसाधयामिभगव

कर नाश होजावेगा आजसे सातवें दिन समुद्र भी इस नगरी को डुबोदेगा ॥ ३ ॥ हेसाधो ! मैं जैसेही इस लोक को छोडूंगा वैसेही इनके सब कल्याण नाशहोजावैंगे, और कलियुग शीघ्रही इसे पर आक्रमण करेगा ॥ ४ ॥ मेरे पृथ्वी के परित्याग करने पर तुम इस स्थान में वास न करना हेभद्र ! कलियुग में मनुष्यों के धर्म की प्रवृत्ति नष्ट होजायगी ॥५॥ तुम स्वजन और बन्धुओं का स्नेह आदि सब छोड़कर मुझ में भली प्रकार से मनलगाय समदर्शीहो पृथ्वी पर भ्रमणकरो ॥६॥ जो मन, वाक्य, दोनोंनेत्रों और श्रवणादि द्वारा गृहीत होता है उसही जगतको मनोमय माया- मय और नश्वर जानो ॥ ७ ॥ विक्षिप्त चित्त मनुष्यका, भेदविषयक भ्रमही, गुणदोष का कारण है । गुणदोष बुद्धि वाले मनुष्यो को कर्म, अकर्म और विकर्म यही भ्रम होता है ॥ ८ ॥ अतएव इन्द्रियों को वशकर इस जगतको आत्मा को अधीश्वर में वितत (ब्रह्मरूप से) देखो ॥ ९ ॥ मुझको अधीश्वर, ज्ञान विज्ञानयुक्त, आत्मा के अनुभव से सन्तुष्ट, सब प्राणियों का आत्मस्व- रूपजानने से कोई विघ्नभी उपद्रव नहीं करसकता ॥ १० ॥ गुणदोष के विचार से रहितहुआ ज्ञानी भी बालक की समान 'दोष' यह विचारकरभी निषेध से निवृत्त नहीं होता 'गुण' यह विचारकर भी वेदोक्त कार्य में आसक्त नहीं होता ॥ ११ ॥ इसप्रकार के मनुष्य सब प्राणियों के सुहृद, शांत और ज्ञान विज्ञान युक्तहो विश्वको मेरेरूपसे देखते हैं; ऐसे मनुष्य आपत्ति में नहीं फँसते ॥ १२ श्रीशुकदेवजी बोलेकि—हे राजन् ! महाभागवत उद्धवजीने भगवानकी ऐसी आज्ञाको पाय तत्त्व जाननेकी इच्छासे प्रणामकर भगवान से कहा कि—॥ १३ ॥ हे योगेश्वर ! हे योग जाननेवालों के गुप्त निधिरूप ! हे योगात्मन् ! हे योग के उत्पत्तिस्थान, जो मुझको अपने मोक्षके निमित्त सन्यास रूपकर्म का त्याग उपदेश दिया है ॥ १४ ॥ हे भूमन् ! जिसका मन विषयों में आसक्त है उसको कामनाओं का छोड़ना अत्यन्तही कठिन है । विशेष करके जो मनुष्य आप सर्वात्मा के अभक्त हैं उनको तो और भी कठिन है यही मैं मानताहूं ॥ १५ ॥ मैं मूर्खबुद्धि आपकी माया से रचेहुए पुत्रादिकों समेत देह में अहंता ममतासे डूबाहुआहूं अतएव

मनुसाधिभृत्यम् ॥ १६ ॥ सत्यस्यतेस्वदृशआत्मनआत्मनोऽन्यंवक्तारमीशविबुधेष्वपिनानुचक्षे । सर्वेविमोहितधियस्तवमाययेमे ब्रह्मादयस्तनुभृतोबहिरर्थभावाः ॥ १७ ॥ तस्माद्भवन्तमनवद्यमनन्तपारं सर्वज्ञमीश्वरमकुण्ठविकुण्ठधिष्ण्यम् । निर्विण्णधीरहमुहेवृजिनाभितप्तो नारायणंनरसखंशरणंप्रपद्ये ॥ १८ ॥ श्रीभगवानुवाच । प्रायेणमनुजालोके लोकतत्त्वविचक्षणाः । समुद्धरन्ति ह्यात्मानमात्मनैवाशुभाशयात् ॥ १९ ॥ आत्मनोगुरुरात्मैव पुरुषस्यविशेषतः । यत्प्रत्यक्षानुमानाभ्यां श्रेयोऽसावनुविन्दते ॥ २० ॥ पुरुषत्वेचमांधीराः सांख्ययोगविशारदाः । आविस्तरांप्रपश्यन्ति सर्वशक्त्युपबृंहितम् ॥ २१ ॥ एकद्वित्रिचतुष्पादो बहुपादस्तथाऽपदः । बह्व्यःसन्तिपुरः सृष्टास्तासांमेपौरुषीप्रिया ॥ २२ ॥ अत्रमांमार्गयन्त्यद्धा युक्ताहेतुभिरीश्वरम् । गृह्यमाणैर्गुणैर्लिङ्गैरग्राह्यमनुमानतः ॥ २३ ॥ अत्राप्युदाहरन्तीममितिहास पुरातनम् । अवधूतस्यसंवादं यदोरमिततेजसः ॥ २४ ॥ अवधूतंद्विजंकंचिच्चरन्तमकुतोभयम् । कविंनिरीक्ष्यतरुणं यदुःपप्रच्छधर्मवित् ॥ २५ ॥ यदुरुवाच । कुतोबुद्धिरियंब्रह्मन्नकर्तुः सुविशारदा । यामासाद्यभवाँल्लोकं विद्वांश्चरतिबालवत् ॥ २६ ॥ प्रायोधर्मार्थकामेषु विवित्सायांचमानवाः । हेतुनैवसमीहन्त आयुषोयशसःश्रियः ॥ २७ ॥ त्वंतुकल्पःकविर्दक्षः सुभगोऽमृतभाषणः । नकर्ता नेहसे किंचिज्जडोन्मत्तपिशाचवत् ॥ २८ ॥ जनेषुदह्यमानेषु कामलोभदवाग्निना ।

आपके कहेहुए उपदेश का जिससे शीघ्र साधन करसकूं, हे भगवन्! दासको वैसीही धीरे २ शिक्षा दो ॥ १६ ॥ हे ईश्वर! आप स्वप्रकाश, सत्य और आत्माहो, देवताओं में से भी किसीको मैं नहीं देखता—कि आपके अतिरिक्त और कोई आत्मोपदेश की शिक्षा देसके। ब्रह्मादिक सब प्राणी भी आपकी माया से मोहित होकर विषयों को आप से भिन्न मानते हैं॥१७॥आपआनंदित अनंतपार, सर्वज्ञ, ईश्वर, अविनाशी वैकुण्ठवासी, मनुष्योंके मित्र नारायणहो अतएव मैं विषयों से खेदित और संतप्त होकर आपकी शरण में आयाहूं ॥ १८ ॥ श्रीभगवान ने कहा कि—भूमण्डल में लोकतत्व विचारक मनुष्य प्रायः आत्मा द्वाराही आत्माको विषय वासनाओं से उद्धार करते रहते हैं। गुरुके उपदेश की कुछभी अपेक्षा नहीं रखते॥१९॥पशुके आत्मा मेंभी आत्माही हित अहित विचारनेमें गुरुरूप होता है और विशेषकर मनुष्य के शरीर में तो होताही हैक्योंकि यह आत्माही प्रत्यक्ष और अनुभव द्वारा—मुक्तिफल प्राप्त करता है ॥ २० ॥ सांख्ययोग में निपुण पण्डितजन मुझको सर्व शक्ति से बढ़ेहुए पुरुष रूपसेही भिन्न २ प्रकाश से देखते रहते हैं २१॥ एकपाद, द्विपाद, त्रिपाद, चतुष्पाद, बहुपाद और बिना पैर आदि के रचेहुए बहुत से शरीर हैं परन्तु उनमें से पुरुष शरीरही मुझ को प्रिय है ॥ २२॥ इस मनुष्यशरीर में मैं कि जो बुद्धिआदि दृश्य पदार्थों से भिन्नहूं उसको सावधान पुरुष गुणों और चिह्नों द्वारा भली प्रकार से खोज लेतेहैं ॥ २३॥इस विषय में पराक्रमी यदु और अवधूत का सम्वाद रूप प्राचीन इतिहास कहाजाताहै॥२४॥ धर्मज्ञ यदु ने निर्भय से भ्रमण करनेवाले किसीएक पण्डित युवाअवधूतको देखकर पूछा कि-२५॥हे ब्रह्मन्!हे अवधूत! किसकोपायतुम विद्वानहोकरभी अतिबालककी समान संसारमेंभ्रमणकरतेहो, अकर्ता आपकी ऐसी निर्मल बुद्धि कहांसे उत्पन्नहुई॥२६॥प्रायः मनुष्य आयु,यश और कल्याणकी कामना के निमित्तही धर्म, अर्थ, काम और आत्मविचार में चेष्टित रहता है ॥ २७ ॥ किन्तु आप समर्थ पण्डित, निपुण, सौभाग्यशाली और मधुर भाषी होकरभी जड़ उन्मत्त और पिशाच की समान निष्कर्म और निस्पृह (बेचाहना) हो ॥ २८ ॥ समस्त लोक काम, लोभरूप दावानल से दग्ध

न तप्यसेऽग्निना मुक्तो गंगाम्भःस्थ इव द्विपः ॥ २९ ॥ त्वं हि नः पृच्छतां ब्रह्मन्नात्मन्यानन्दकारणम् । ब्रूहि स्पर्शविहीनस्य भवतः केवलात्मनः ॥ ३० ॥ श्रीभगवानुवाच यदुनैवं महाभागो ब्रह्मण्येन सुमेधसा ॥ पृष्टः सभाजितः प्राह प्रश्रयावनतं द्विजः ॥ ॥ ३१ ॥ ब्राह्मण उवाच । सन्ति मे गुरवो राजन्बहवो बुद्ध्युपाश्रिताः । यतो बुद्धिमुपादाय मुक्तोऽटामीह ताञ्छृणु ॥३२॥ पृथिवी वायुराकाशमापोऽग्निश्चन्द्रमा रविः । कपोतोऽजगरः सिन्धुः पतंगो मधुकृद्गजः ॥ ३३ ॥ मधुहा हरिणो मीनः पिंगला कुररोऽर्भकः । कुमारी शरकृत्सर्प ऊर्णनाभिः सुपेशकृत् ॥ ३४ ॥ एते मे गुरवो राजंश्चतुर्विंशतिराश्रिताः । शिक्षा वृत्तिभिरेतेषामन्वशिक्षमिहात्मनः ॥ ३५ ॥ यतो यदनुशिक्षामि यथा वा नाहुषात्मज । तत्तथा पुरुषव्याघ्र निबोध कथयामि ते ॥ ३६ ॥ भूतैराक्रम्यमाणोऽपि धीरो दैववशानुगैः । तद्विद्वान्न चलेन्मार्गादन्वशिक्षं क्षितेर्व्रतम् । ॥ ३७ ॥ शश्वत्परार्थसर्वेहः परार्थैकान्तसम्भवः । साधुः शिक्षेत भूभृत्तो नगशिष्यः परात्मताम् ॥३८॥ प्राणवृत्त्यैव संतुष्येन् मुनिर्नैवेन्द्रियप्रियैः । ज्ञानं यथा न नश्येत नावकीर्येत वाङ्मनः ॥ ३९ ॥ विषयेष्वाविशन्योगी नानाधर्मेषु सर्वतः । गुणदोषव्यपेतात्मा न विषज्जेत वायुवत् ॥४०॥ पार्थिवेष्विह देहेषु प्रविष्टस्तद्गुणाश्रयः । गुणैर्न युज्यते योगी गन्धैर्वायुरिवात्मदृक् ॥ ४१ ॥ अन्तर्हितश्च स्थिरजंगमेषु ब्रह्मात्मभावेन समन्वयेन । व्याप्त्याऽव्यवच्छेद मसङ्गमात्मनो मुनिर्नभस्त्वं विततस्य

होते हैं किन्तु आप अग्नियुक्त होकरभी गंगाजलमें खड़े हुए हाथी की समान सतप्त नहीं होते । ऐसा आनद आपको कहांसे प्राप्त हुआ ॥ २९ ॥ हे ब्रह्मन् ! आप स्त्री पुत्रादिकों से रहित और, विषयभोगों से वर्जित हो; आपके आत्मानंद का कारण पूछताहूं , मुझसे कहो ॥ ३० ॥ श्रीभगवानने कहा कि-उस महाभाग ब्राह्मणने, ब्राह्मणों के हितकारी बुद्धिमान यदुसे इसप्रकार पूजितहो उनके पूछने पर विनयवत राजासे कहा ॥ ३१ ॥ हे राजन् ! मैंने अपने ही आप बहुत से गुरू किये हैं उन्होंने मुझ उपदेश नहीं किया, उन्हींसे मैं बुद्धि प्राप्त कर मुक्त भावसे विचरण करता हूं ॥ ३२ ॥ उनके नाम सुनो; पृथिवी, वायु, आकाश, जल, अग्नि, चन्द्रमा, सूर्य, कबूतर, अजगर, समुद्र, पतंग, शहदकी मक्खी, हाथी ॥ ३३ ॥ शहद लेजानेवाला, हरिण, मछली, पिंगला (वेश्या) टिटिहरी, बालक, कुमारी, बाणबनाने वाला, सर्प, मकरी, और भौंरी ॥ ३४ ॥ हे राजन् ! इन्हीं चौबीस गुरुओं का अवलवन कर इन्हीं के आचरणोंसे मैंने अपने भले बुरे की शिक्षाली है ॥ ३५ ॥ हे पुरुषश्रेष्ठ ! जिससे जिस प्रकार जो शिक्षाली है वह तुमसे कहता हूं सुनो ॥ ३६ ॥ पीडा देनेवाले प्राणी दैवके वशवर्त्ती हैं यह जानकर पण्डित जनोंको अपने नियम से चलायमान न होना चाहिये, पृथ्वी से यही शिक्षाली है ॥ ३७ ॥ साधुओं को पर्वतके निकट से निरतर परोकार के निमित्त समस्त चेष्टाए और एकांत उत्पत्ति की शिक्षा ग्रहण करनी चाहिये, इसही प्रकार वृक्षके निकट आत्माके पराधीनता की शिक्षा करनी चाहिये ॥ ३८ ॥ मुनियों का ज्ञान नष्ट न होवे इसकारण केवल प्राण वृत्ति के द्वाराही सतुष्ट रहना चाहिये, वाक्य और मन को विक्षिप्त न करना चाहिये । योगी को सर्वत्र नाना धर्म शील विषयों का सेवन करके भी गुण और दोषसे आत्माको पृथक् रख वायुकी समान निर्लिप्त रहना चाहिये । वायु जैसे सुगंधि दुर्गंधि वालीजान पड़ती है परंतु वास्तवमें उसमें सुगंधि दुर्गंधि नहीं होती ऐसेही आत्मा पृथिवी के विकार रूप देहादिक में रहने से जन्म मरणादिक वाला जान पड़ता है परतु वास्तवमें ऐसा नहीं है ॥ ३९—४१ ॥ जिस प्रकार आकाश सबमें व्याप्त है परतु वह निःसग है इसही प्रकार देह के भीतर रहनेपरभी योगीको उचितहै कि ब्रह्म स्वरूपता का बोधकर अपने आत्माको स्थावर जगम

भावयेत् ॥ ४२ ॥ तेजोऽबन्नमयैर्भावैर्मेघाद्यैर्वायुनेरितैः । नस्पृश्यते नभस्तद्वत्काल सृष्टैर्गुणैः पुमान् ॥ ४३ ॥ स्वच्छः प्रकृतितः स्निग्धो माधुर्यस्तीर्थभूर्नृणाम् । मुनिः पुनात्यपामिव मीक्षोपस्पर्शकीर्तनैः ॥ ४४ ॥ तेजस्वी तपसा दीप्तो दुर्धर्षोदरभाजनः । सर्वभक्षोऽपियुक्तात्मा नादत्ते मलमग्निवत् ॥ ४५ ॥ क्वचिच्छन्नः क्वचित्स्पष्ट उपास्यः श्रेयइच्छताम् । भुंक्ते सर्वत्र दातॄणां दहन्प्रागुत्तराशुभम् ॥ ४६ ॥ स्वमायया सृष्टमिदं सदसल्लक्षणं विभुः । प्रविष्ट ईयते तत्तत्स्वरूपोऽग्निरिवैधसि ॥४७॥ विसर्गाद्याः श्मशानान्ता भावा देहस्य नात्मनः । कलानामिव चन्द्रस्य कालेनाव्यक्तवर्त्मना ॥ ४८ कालेन ह्योघवेगेन भूतानां प्रभवाप्ययौ । नित्यावपि न दृश्येते आत्मनोऽग्नेर्यथार्चिषाम् ॥ ४९ ॥ गुणैर्गुणानुपादत्ते यथाकालं विमुंचति । न तेषु युज्यते योगी गोभिर्गा इव गोपतिः ॥ ५० ॥ बुध्यते स्वे न भेदेन व्यक्तिस्थ इव तद्गतः । लक्ष्यते स्थूलमतिभिरात्मा चावस्थितोऽर्कवत् ॥ ५१ ॥ नातिस्नेहः प्रसंगो वा कर्तव्यः क्वापि केनचित् । कुर्वन्विन्देत संतापं कपोत इव दीनधीः ॥ ५२ ॥ कपोतः कश्चनारण्ये कृतनीडो वनस्पतौ । कपोत्या भार्यया सार्धं मुवास कतिचित्समाः ॥ ५३ ॥ कपोतौ स्नेहगुणित हृदयौ गृहधर्मिणौ । दृष्टिं दृष्ट्याऽङ्गमङ्गेन बुद्धिं बुद्ध्या बबन्धतुः ॥ ५४ ॥ शय्यासनाटनस्थान वार्ताक्रीडाशनादिकम् । मिथुनीभूय विस्रब्धौ चेरतुर्वनराजिषु ॥ ५५ ॥

सबमें रहा हुआ जानकर उसको अपरिछिन्न और निःसंग विचारे ॥ ४२ ॥ आकाशका जैसे वायु चालित मेघादि से सम्बंध नहीं होता वैसेही पुरुषका तेज, जल और पृथिवीमय कालसे रचे हुए गुणों से सम्बंध नहीं होता ॥ ४३ ॥ हे राजन् ! योगी को चाहिये कि—जलकी समान निर्मल, स्वभाव सेही स्निग्ध, मधुर और तीर्थ भूत हो दर्शन, स्पर्शन और कीर्तनद्वारा देखने वालोंको पवित्र करे ॥ ४४ ॥ तेजस्वी दीप्त, दुर्द्धर्ष, परिग्रहरहित, संयतात्मा मुनि अग्नि की समान सर्व भोजी होनेपर मल (दोष) नहीं ग्रहण करता ॥ ४५ ॥ अग्निकी समान कभी गुप्त और कभी प्रगट होकर कल्याण चाहनेवालों का उपासितहो, भूत भविष्यत अशुभों का नाशकर दाताओं के निकट से सर्वत्र भोजन करते रहना चाहिये ॥ ४६ ॥ अग्नि जैसे काठ में रहने से उस काठ की समानही लम्बा चौड़ा आदि जानपड़ता है वैसेही माया से रचित इस विश्वमेंभी आत्माप्रवेश कर देहोंके अनुसार उच्च नीच प्रतीत होता है ॥४७ ॥ जन्म से लेकर श्मशान तक जोअवस्थायें होती हैं वह देह कीही होती हैं आत्मा की नहीं; जैसे अव्यक्त गति काल चन्द्रमाकी कलाओं को बढ़ाता घटाता रहता है, परन्तु उस से कुछ चन्द्रमा की घटती बढती नहीं होती ॥४८॥जैसे लपटकाही उत्पत्ति और नाशदीखपड़ता है,—अग्नि का नहीं वैसेही जल के बहने की समान वेगशाली काल से प्राणियों का नित्य उत्पन्नहोना और नाश होना देखा जाता है, आत्मा का नहीं॥ ४९ ॥ जैसे सूर्य अपनी किरणों से जल को खींचकर समयानुसार उसे त्यागता है, वैसेही योगी को इंद्रियों द्वारा सब विषयों को ग्रहणकर समयानुसार मांगनेवालोंको देना चाहिए। परन्तु स्वयं उसके लाभालाभमें आसक्त न होवे ॥ ५०॥ जैसे एक सूर्य जल के पात्ररूप उपाधि भेद से भिन्न भिन्न रूप से प्रतीत होता है उसही प्रकार आत्मा अपने स्वरूप में भिन्न रूप नहीं है परन्तु शरीरादिकों में रहने से स्थूल बुद्धिवालों को ईश्वर होनेपरभी भिन्न २ रूप दीखता है ॥ ५१ ॥ किसीपर अति स्नेह व अत्यासक्ति न करना चाहिए, करने से दीन बुद्धि कपोत की समान दुःख भोगना पड़ता है ॥ ५२ ॥ किसी एक कबूतर ने जंगल में वृक्ष में घोंसलाबनाकर अपनी स्त्री कबूतरी समेत कई बरस निवास किया ॥ ५३ ॥ गृहस्थ कबूतर कबूतरी के स्नेह से बद्धचित्तहो दृष्टि से दृष्टि, अंग से अंग और बुद्धि से बुद्धिबांधी ॥५४॥ ये दोनों उस बन में एकत्रितहो निःशंकभाव से सोना, बैठना, घूमना, कथोपकथन, क्रीड़ा और भोजनादि करतेथे ॥५५॥ हेराजन् !

यंयंवाञ्छतिसाराजंस्तंयन्स्यनुकम्पिता। तंतंसमनयत्कामं कृच्छ्रेणाप्यजितेन्द्रियः॥ ५६॥ कपोतीप्रथमंगर्भं गृह्णतीकालआगते। अण्डानिसुषुवेनीडे स्वपत्युःसन्निधौसती॥ ५७॥ तेषुकालेव्यजायन्त रचितावयवाहरेः। शक्तिभिर्दुर्विभाव्याभिः कोमलांगतनूरुहाः॥५८॥ प्रजाःपुपुषतुःप्रीतौ दम्पतीपुत्रवत्सलौ। शृण्वन्तौकूजितंतासां निर्वृतौकलभाषितैः॥ ५९॥ तासांपतत्रैःसुस्पर्शैः कूजितैर्मुग्धचेष्टितैः। प्रत्युद्गमैरदीनानां पितरौमुदमापतुः॥ ६०॥ स्नेहानुबद्धहृदया वन्योन्यंविष्णुमायया। विमोहितौदीनधियौ शिशून्पुपुषतुःप्रजाः॥ ६१॥ एकदाजग्मतुस्तासां गन्नार्थौतौकुटुम्बिनौ। परितःकाननेतस्मिन् नर्थिनौचेरतुश्चिरम्॥ ६२॥ दृष्ट्वातांल्लुब्धकःकश्चिद्यदृच्छातोवनेचरः। जगृहेजालमातत्य चरतःस्वालयान्तिके॥ ६३॥ कपोतश्चकपोतीच प्रजापोषेसदोत्सुकौ। गतौपोषणमादाय स्वनीडमुपजग्मतुः॥ ६४॥ कपोतीस्वात्मजान्वीक्ष्य बालकाजालसंवृतान्। तानभ्यधावत्क्रोशन्तीक्रोशतोभृशदुःखिता॥ ६५॥ साऽसकृत्स्नेहगुणिता दीनचित्ताऽजमायया। स्वयंचाबध्यतशिचा बद्धान्पश्यन्त्यपस्मृतिः॥ ६६॥ कपोतश्चात्मजान्बद्धानात्मनोऽप्यधिकान्प्रियान्। भार्यांचात्मसमांदीनो विललापातिदुःखितः॥ ६७॥ अहोमेपश्यतापाय मल्पपुण्यस्यदुर्मतेः। अतृप्तस्याकृतार्थस्य गृहस्त्रैवर्गिकोहतः॥ ६८॥ अनुरूपानुकूलाच यस्यमेपतिदेवता। शून्येगृहेमांसंत्यज्यपुत्रैःस्वर्यातिसाधुभिः॥ ६९॥ सोऽहंशून्येगृहेदीनो मृतदारोमृतप्रजः। जिजीविषेकिमर्थंवा विधुरोदुःखजीवितः॥ ७०॥ तांस्तथैवावृताञ्शिग्भिर्मृत्युग्रस्तान्विचेष्ट

तृप्ति देनेवाली, प्रेमकी पात्री वह कबूतरी जिस २ पदार्थकी इच्छा करती, अजितेंद्रिय कपोत कष्ट पाकर भी उन सब पदार्थों को देता ॥ ५६ ॥ समय उपस्थित होनेपर कपोती ने पहिला गर्भ धारणकर अपने स्वामी के सन्मुख घोंसले में कई एक अंडे दिये ॥ ५७ ॥ उस में से नारायण की न जानने योग्य शक्तिसे रचेहुए कोमल अंग व लोमोंयुक्त कई एक पक्षी उत्पन्नहुए ॥ ५८ ॥ संतानों के मधुर शब्दों को सुनकर वे पुत्रवत्सल स्त्री पुरुष उनका पालन करने लगे ॥५९॥ पिता माता अत्यानंदितथे; वे कपोत कपोती अपने २ बच्चों के कोमल २ पक्षों को छू और उनकी भोली भोली चेष्टा को देख अत्यन्त प्रसन्न होनेलगे ॥ ६० ॥ वे हरि की माया से परस्पर स्नेहबद्ध हृदय से दीनबुद्धि और मोहितहो संतानों का पालन करने लगे ॥ ६१ ॥ एक समय पिता माता उनके आहार लेनेके निमित्त बाहर जाय आहार को खोजतेहुए बहुत समय तक बनमें घूमे ॥ ६२ ॥ इतने में किसी एक बहेलिये ने यदृच्छासे उस बनमें घूमते २ उन कपोत के बच्चों को उस घोंसले के समीप उड़ता देख जाल फैलाकर उन्हें पकड़ लिया ॥ ६३ ॥ संतानपालन में उत्सुक कपोत कपोती आहार लेकर अपने घोंसले में आये ॥ ६४ ॥ कपोती अपने बच्चों को जाल में फँसा देख अत्यन्त दुःखित अंतःकरण से चिल्लाती २ उनके समीप जाने को दौड़ी ॥ ६५ ॥ स्नेह से बंधीहुई वह कातरहृदय कपोती बच्चों को फँसादेख स्मृति भ्रष्ट होने के कारण आपभी उस जाल में जाफँसी ॥ ६६ ॥ अपने प्राणों से भी प्रिय बच्चों को और आत्मसदृशी भार्याको जाल में फँसाहुआ देख कपोत अत्यन्त दुःखितहोकर विलाप करने लगा ॥ ६७ ॥ अहो! मैं अत्यन्त अल्प पुण्य और मूर्खहूं, मेरी दुर्गति तो देखो! गृहस्थाश्रम में तृप्त और कृतार्थ होते न होते मेरा त्रिवर्ग साधन घर नष्टहोगया ॥ ६८ ॥ मेरी प्यारी, मेरे अनुकूल रहनेवाली, पतिव्रतास्त्री अब मुझको सूने घर में छोड़कर पुत्रों समेत स्वर्ग में जाती है ॥ ६९ ॥ तब मैं दीन, स्त्रीरहित, पुत्ररहित, कातर और दुःखजीवी होकर क्योंकर सूने घर में जीवन धारण करूं? ॥ ७० ॥ मूर्ख

तः। स्वयंचकृपणःशिक्षु पश्यन्नप्यबुधोऽपतत् ॥ ७१ ॥ तंलब्ध्वालुब्धकःक्रूरः कपोतंगृहमेधिनम्। कपोतकान्कपोतींच सिद्धार्थःप्रययौगृहम् ॥ ७२ ॥ एवंकुटुम्ब्यशान्तात्मा द्वन्द्वारामःपतत्रिवत्। पुष्णन्कुटुम्बंकृपणः सानुबन्धोऽवसीदति ॥ ७३ ॥ यःप्राप्यमानुषंलोकं मुक्तिद्वारमपावृतम्। गृहेषुखगवत्सक्तस्तमारूढच्युतं विदुः ॥ ७४ ॥

इति श्रीमद्भा० महा० एकाद० सप्तमोऽध्यायः ॥ ७ ॥

ब्राह्मण उवाच ॥ सुखमैन्द्रियकंराजन्स्वर्गेनरकएवच। देहिनांयद्यथादुःखं तस्मान्नेच्छेततद्बुधः ॥ १ ॥ ग्रासंसुमृष्टंविरसं महान्तंस्तोकमेववा। यदृच्छयैवापतितंग्रसेदाजगरोऽक्रियः ॥ २ ॥ शयीताहानिभूरीणिनिराहारोऽनुपक्रमः। यदि नोपनयेद्ग्रासोमहाहिरिवदिष्टभुक् ॥ ३ ॥ ओजःसहोबलयुतंबिभ्रद्देहमकर्मकम्। शयानोवीतनिद्रश्चनेहेतेन्द्रियवानपि ॥ ४ ॥ मुनिःप्रसन्नगम्भीरोदुर्विगाह्योदुरत्ययः। अनन्तपारोह्यक्षोभ्यः स्तिमितोदइवार्णवः ॥ ५ ॥ समृद्धकामोहीनोवानारायणपरोमुनिः। नोत्सर्पेतनशुष्येतसरिद्भिरिवसागरः ॥ ६ ॥ दृष्ट्वास्त्रियंदेवमायां तद्भावैरजितेन्द्रियः। प्रलोभितःपतत्यन्धेतमस्यग्नौपतङ्गवत् ॥ ७ ॥ योषिद्धिरण्याभरणाम्बरादिद्रव्येषु मायारचितेषुमूढः। प्रलोभितात्माह्युपभोगबुद्ध्यापतङ्गवन्नश्यतिनष्टदृष्टिः ॥ ८ ॥ स्तोकंस्तोकंग्रसेद्ग्रासंदेहोवर्तेतयावता। गृहानहिं-

---

और दुःखित कपोत उन स्त्री पुत्रों को जाल में फँसा और मृत्युग्रस्तहो छटपटाते देख आपभी उस जाल में गिरपड़ा ॥ ७१ ॥ वह क्रूर बहेलिया अपना काम होजाने पर उन कपोत, कपोती और बच्चों को ले अपने घर को गया ॥ ७२ ॥ जो अत्यन्त कुटुम्बी मनुष्य अशांत हृदय और गृहसेवीहो अत्यन्त आसक्ति वशकुटुम्ब का पोषण करता है वह इन्हीं कपोत पक्षियों की समान दुःखितहो निरंतर व्याकुल रहता है ॥ ७३॥ मुक्तिके खुलेद्वाररूप मनुष्य जन्म को पाय जोमनुष्य पक्षियों की समान घर में आसक्त होता है शास्त्र में वह मूर्ख ' चढ़कर गिराहुआ ' इस प्रकार से कथित होता है ॥ ७४ ॥

इतिश्रीमद्भा०महा०एकादशस्कन्धेसरलभाषाटीकायांसप्तमोऽध्यायः ॥ ७ ॥

ब्राह्मण ने कहाकि–हे राजन्! स्वर्ग और नरक दोनों स्थानो मेंही प्राणियोंको इन्द्रिय जनित सुख दुःख समानहैं; अतएव पण्डितोंको उसकी इच्छा नहीं करनी चाहिये ॥ १ ॥ खानेका पदार्थ चाहे सुरसहो चाहेविरस, अधिकहो चाहेथोड़ा, यदृच्छा से उपस्थित होनेपर उदासीनहो अजगर की समान उसको ग्रहण करना चाहिये ॥ २ ॥ यदि भोजन उपस्थित न होवेतो 'देवही देने वाला है' इस प्रकार से विचार धैर्य धारणकर अजगर की समान निराहार और निरुद्यमहो बहुत दिनोंतक शयन करते रहना चाहिये ॥ ३ ॥ इन्द्रियबल, मनोबल और देहबलको प्राप्तहो अकर्म कारी शरीर धारणकर निद्रारहितहो स्वार्थ में दृष्टिरख अजगर की समान शयन करते रहना चाहिये; इन्द्रिययुक्त होकर भी कोईचेष्टा न करनी चाहिये ॥ ४ ॥ मुनिको निश्चल समुद्र की समान प्रशांत, गंभीर, अगाध, अलंघनीय, अनंतपार और क्षोभ रहित होना चाहिये ॥५॥ समुद्र जैसे वर्षाऋतु में सब नदियों के जलको प्राप्तहोकर भी अपने तटको नहीं लांघता और ग्रीष्म कालमें सब नदियों के सूखने परभी वह स्वयं नहीं सूखता वैसेही नारायण परायण योगीको सब कामोंको भलीप्रकार पानेसे वा इन सबके रहित होनेस आनंद में मत्त व दुःख में मलीन नहीं होनाचाहिये ॥ ६ ॥ अजितेन्द्रिय मनुष्य देवमाया रूपिणी स्त्रीको देखकर उसके भावोंसे लोभितहो, अग्निमें पतंगकी समान अंधनरक में गिरता है ॥ ७ ॥ माया कल्पित स्त्री, सुवर्ण, आभूषण और वस्त्र आदि पदार्थों में उपभोग बुद्धिसे ललचाकर यह मूढ़ मनुष्य अंधाहो पतंग की समान नष्ट होजाता है ॥ ८ ॥ जितने

भ्यातिष्ठेद्वृत्तिमाधुकरींमुनिः ॥ ९ ॥ अणुभ्यश्चमहद्भ्यश्चशास्त्रेभ्यः कुशलोनरः । सर्वतःसारमादद्यात्पुष्पेभ्यइवषट्पदः ॥१०॥ सायन्तनंश्वस्तनंवानसंगृह्णीतभिक्षितम् ।पाणिपात्रोदरामत्रोमक्षिकेवनसंग्रही ॥११॥सायन्तनंश्वस्तनंवानसंगृह्णीतभिक्षुकः । मक्षिकाइवसंगृह्णन्सहतेनविनश्यति ॥ १२ ॥ पदापियुवतींभिक्षुर्नस्पृशेद्दारवीमपि । स्पृशन्करीवबध्येतकरिण्याअङ्गसङ्गतः ॥ १३ ॥ नाधिगच्छेत्स्त्रियंप्राज्ञःकर्हिचिन्मृत्युमात्मनः । बलाधिकैःसहन्येतगजैरन्यैर्गजोयथा ॥ १४ ॥ नदेयंनोपभोग्यंचलुब्धैर्यद्दुःखसञ्चितम् । भुंक्तेतदपितच्चान्योमधुहेवार्थविन्मधु ॥ सुदुःखोपार्जितैर्वित्तैराशासानांगृहाशिषः । मधुहेवाग्रतोभुङ्क्तेयतिर्वैगृहमेधिनाम् ॥ १६ ॥ ग्राम्यगीतंनशृणुयाद्यतिर्वनचरःक्वचित् । शिक्षेतहरिणाद्बद्धान्मृगयोर्गीतमोहितात् ॥ १७ ॥ नृत्यवादित्रगीतानिजुषन्ग्राम्याणियोषिताम् । आसांक्रीडनकोवश्य ऋष्यशृंगोमृगीसुतः ॥ १८ ॥ जिह्वयाऽतिप्रमाथिन्या जनोरसविमोहितः । मृत्युमृच्छत्यसद्बुद्धिर्मीनस्तु बडिशैर्यथा ॥ १९ ॥ इन्द्रियाणिजयन्त्याशु निराहारामनीषिणः । वर्जयित्वातुरसनं तन्निरन्नस्यवर्धते ॥ २० ॥ तावज्जितेन्द्रियोन स्याद्विजितान्येन्द्रियः पुमान् । नजयेद्रसनं यावज्जितंसर्वंजितेरसे २१॥ पिंगलानाम वेश्याऽऽसीद्विदेहनगरेपुरा । तस्यामे शिक्षितं किंचिन्निबोधनृपनन्द-

में देह रहसके उतना अन्न थोड़ा २ कर कईघरोंसे ले भोजन करना चाहिये, मुनिको इसप्रकार की भ्रमरवृत्तिका अवलंबन कर रहना योग्य है ॥ ९ ॥ भौंरा जैसे सबफूलों से सार ग्रहण करता है वैसेही पण्डित जनको सब शास्त्रों से थोडा, बहुत सार ग्रहण करना चाहिये ॥ १० ॥ खानेके द्रव्य सायंकाल व दूसरे दिनके निमित्त इकट्ठे करके नहीं रखने चाहिये केवल हाथ को व पेटको ही पात्र करके रखने चाहिये, मधुमक्षिका की समान सग्रह न करे ॥ ११ ॥ भिक्षुक संध्या व दूसरे दिन के निमित्त संग्रह करने पर मक्षिका की समान उस संग्रह किये हुए द्रव्य समेत नष्ट होजाता है ॥ १२ ॥ योगी को पैरसेभी काठकी स्त्री का स्पर्श न करना चाहिये ; स्पर्श करने से हथिनीके अंग संगके लालचसे हाथी की समान गड्ढे में गिरना होता है ॥ १३ ॥ बुद्धिमान मनुष्यको कभी भी अपने मृत्युरूपिणी स्त्रीका ग्रहण न करना चाहिये, करनेसे जैसे दूसरे हाथियों द्वारा और सब हाथी मारेजाते हैं उसीप्रकार उसकोभी बलवानोंसे निहतहोना पड़ता है ॥ १४ ॥ जैसे शहद लेजाने वाला मक्षिका के संचित किये हुए मधुको जानकर उसका हरण करता है, उसही प्रकार दूसरे अर्थ वेत्ताभी, कजूसों के दुःख से इकट्ठा किये हुए दान भोग वर्जित धनको हरण करते हैं ॥ १५ ॥ शहद लेजाने वाला जैसे सचयकारी मक्षिकाओं से पहिलेही शहद लेजाकर उसको भोगता है वैसेही यती, नितांत दुःखसे उत्पन्न किये हुए धनको घरके कल्याण की इच्छा वाले गृहस्थों के पहिलेही भोगते हैं ॥ १६ ॥ बहेलियाके गीतसे मोहित हो बधे हुए मृगके निकट से यह शिक्षाली कि—वन में भ्रमण करने वाले यतीको ग्राम्य गीत न सनने चाहियें ॥१७॥ मृगी का पुत्र ऋष्य श्रंग स्त्रियोंके ग्राम्य गीत, बाजे और नाचका उपभोगकर उनके वश में हो उनका खिलौना बनगया था ॥ १८ ॥ मूर्ख मनुष्य दुःखदायी जिह्वा द्वारा रसके स्वादसे मोहित हो बंसी द्वारा मछली की समान मृत्यु ग्रस्त होना है ॥ १९ ॥ पण्डित जन जिह्वा के अतिरिक्त और सब इन्द्रियों को शीघ्र जीतसकते हैं क्योंकि निराहार रहनेसे उसका लालच बढ़ताही रहता है ॥ २० ॥ पुरुष दूसरी इन्द्रियों को जीतकरभी जबतक जिह्वा को नहीं जीतसकता तबतक वह जितेन्द्रि नहीं होसकता; जिह्वा के जीतने सेही सब इन्द्रियें जीती जाती हैं ॥ २१ ॥ हे नृपनंदन ! प्राचीनसमयमें मिथिलानगरी में एक पिंगलानामक वेश्या रहती थी । उससे मैंने कुछ शिक्षा प्राप्त

न ॥ २२ ॥ स्वैरिण्येकदा कान्तं संकेत उपनेष्यती । अभूत्काले बहिर्द्वारि बिभ्रती रूपमुत्तमम् ॥ २३ ॥ मार्ग आगच्छतो वीक्ष्य पुरुषान्पुरुषर्षभ । तान्शुल्कदान्वित्तवतः कान्तान्मेनेऽर्थकामुका ॥ २४ ॥ आगतेष्वपयातेषु सा संकेतोपजीविनी ॥ अप्यन्यो वित्तवान्कोऽपि मामुपैष्यति भूरिदः ॥ २५ ॥ एवं दुराशया ध्वस्तनिद्रा द्वार्यवलम्बती । निर्गच्छन्ती प्रविशती निशीथं समपद्यत ॥ २६ ॥ तस्या वित्ताशया शुष्यद्वक्त्राया दीनचेतसः । निर्वेदः परमो जज्ञे चिन्ताहेतुः सुखावहः ॥ २७ ॥ तस्या निर्विण्णचित्ताया गीतं शृणु यथा मम । निर्वेद आशापाशानां पुरुषस्य यथा ह्यसिः ॥ २८ ॥ न ह्यङ्गाजातनिर्वेदो देहबन्धं जिहासति । यथा विज्ञानरहितो मनुजो ममतां नृप २९ ॥ पिंगलोवाच । अहो मे मोहविततिं पश्यताऽविजितात्मनः ॥ या कान्तादसतः कामं कामये येन बालिशा ॥ ३० ॥ सन्तं समीपे रमणं रतिप्रदं वित्तप्रदं नित्यमिमं विहाय । अकामदं दुःखभयाधिशोकमोहप्रदं तुच्छमहं भजेऽज्ञा ॥ ३१ ॥ अहो मयात्मा परितापितो वृथा सांकेत्यवृत्त्याऽतिविगर्ह्यवार्तया । स्त्रैणान्नराद्याऽर्थतृषोऽनुशोच्यात्क्रीतेन वित्तं रतिमात्मनेच्छती ॥ ३२ ॥ यदस्थिभिर्निर्मितवंशवंश्यस्थूणं त्वचा रोमनखैः पिनद्धम् । क्षरन्नवद्वारमगारमेतद्विण्मूत्रपूर्णं मदुपैति काऽन्या ॥ ३३ ॥ विदेहानां पुरे ह्यस्मिन्नहमेकैव मूढधीः । याऽन्यमिच्छन्त्यसत्यस्मादात्मदात्काममच्युतात् ३४ ॥ सुहृत्प्रेष्ठतमो नाथ आत्मा चायं शरीरिणाम् । तं विक्रीयात्मनैवाहं रमेऽनेन यथा रमा

की है उसको सुनों ॥ २२ ॥ एक दिन यह वेश्या पुरुषको अपने रतिस्थान में लेजाने के निमित्त सोलह श्रृंगारों से सज्जित हो संध्याकाल के समय घरसे निकल कर बाहर आबैठी ॥ २३ ॥ हे पुरुषश्रेष्ठ ! वह धनके चाहने वाली मार्ग में पुरुषों को आते देख उन पुरुषोंमें से धनवान अपने को मूल्य देनेवाले नागर (मैथुन चाहने वाला) को विचारने लगी ॥ २४ ॥ किंतु उसके निकट आय फिरचले जानेपर उस संकेतवृत्तिसे जीवका करनेवाली वेश्याने विचाराकि—और कोई दूसरा धनी पुरुष मेरे निकट आय बहुतसाधन देवे ॥ २५ ॥ इसप्रकार की दुराशासे वह निद्रारहित हो उस द्वारपर खड़ीरही; कुछ देरके उपरांत भीतर गई परंतु फिर बाहर निकली;—इसप्रकार करते २ आधीरात आगई ॥ २६ ॥ धनकी आशा से उसका मुख सूख गया और अंतःकरण दुःखित होउठा । उसी अवस्था में धनाचिंताके निमित्त परम सुख का देनेवाला निर्वेद उसको उत्पन्नहुआ ॥२७॥ अंतःकरणके खुलनेसे जो२कुछउसने कहा वह सबमैं तुमसे कहताहू सुनो ॥२८॥ वैराग्यही मनुष्योंकी आशापाशका खड्ग है, हेराजन् ! जिसको वैराग्यननहीं है उसके देहबंधन छेदनेका और कोई दूसरा उपाय नहीं है ॥ २९ ॥ पिंगलाने कहा कि—अहो ! मैं कैसी विचाररहित और अजितचित्ताहू मेरे मोहको तो देखो ! मैं अत्यन्त मूर्ख हूं ; क्योंकि मैं अति तुच्छकांत के निकट से काम्य पदार्थों की इच्छा करती हूं ॥ ३० ॥ मैं निरन्तर रमनेवाले, आनन्ददायक और धन देनेवाले इस नित्यसत्पदार्थ की उपासना छोड़कर मूर्खकी समान अकामद, दुःखदायी; भयशोक और पीडादायक पुरुषों की उपासना करतीहूं ॥ ३१ ॥ सांकेत वृत्ति अति निंदनीया वृत्ति है; अहो! उसकेद्वारा मैंने व्यर्थही अबतक आत्माको सन्तप्त किया ! उसमें लम्पट—अर्थ चाहनेवाले अनुशोचनीय पुरुषोंके निकटसे उनकी मोलकी हुई देहसे धन और रतिकी इच्छा करती हू ॥३२॥ हड्डियोंसे जिसके वंश(आडसल)वंश्य(पीडा) स्थूण (खम्भा) बनेहुएहैं, जो त्वक्, रोम और नख से घिराहुआ है और जिसमें कीडे चलते हैं, ऐसे इस विष्ठामूत्र से भरेहुए घरकी मेरे अतिरिक्त और कौन स्त्री सेवाकर सकती है ? ॥ ३३ ॥ इस विदेह नगर में निश्चय अकेली मैंही मूर्ख हूं ; क्योंकि मैं आत्मप्रद भगवानके अतिरिक्त दूसरे से कामकी इच्छा करती हू ॥ ३४ ॥ भगवान प्राणियों

॥ ३५ ॥ कियत्प्रियंते व्यभजन्कामा येकामदानराः । आद्यन्तवन्तोभार्याया देवावा कालविद्रुताः ॥ ३६ ॥ नूनंमेभगवान्प्रीतो विष्णुः केनापिकर्मणा। निर्वेदोऽयंदुराशाया यन्मेजातःसुखावहः ॥ ३७ ॥ मैवंस्युर्मन्दभाग्यायाः क्लेशा निर्वेदहेतवः । येनानुबन्धंनिर्हृत्य पुरुषःशममृच्छति ॥ ३८ ॥ तेनोपकृतमादाय शिरसा ग्राम्यसंगताः त्यक्त्वादुराशाः शरणं व्रजामितमधीश्वरम् ॥३९॥ सन्तुष्टा श्रद्दधत्येतद्यथालाभेन जीवती । विहराम्यमुनैवाहमात्मना रमणेनवै ॥ ४० ॥ संसारकूपे पतितं विषयैर्मुषितेक्षणम् । ग्रस्तंकालाहिनात्मानं कोऽन्यस्त्रातुमधीश्वरः ॥ ४१ ॥ आत्मैवह्यात्मनोगोप्ता निर्विद्येतयदाखिलात् । अप्रमत्तइदंपश्येद्ग्रस्तं कालाहिनाजगत् ॥ ४२ ॥ ब्राह्मण उवाच । एवं व्यवसितमतिर्दुराशां कान्ततर्षजाम् ॥ छित्त्वोपशममास्थाय शय्यामुपविवेशसा ॥ ४३ ॥ आशाहिपरमंदुःखं नैराश्यंपरमंसुखम् । यथासञ्छिद्यकान्ताशां सुखंसुष्वापपिंगला ॥ ४४ ॥

इति श्रीमद्भा० महा० एकाद० अष्टमोऽध्यायः ॥ ८ ॥

ब्राह्मण उवाच ॥ परिग्रहोहिदुःखाय यद्यत्प्रियतमंनृणाम् । अनन्तंसुखमाप्नोति तद्विद्वान्यस्त्वकिंचनः ॥१॥ सामिषंकुररं जघ्नुर्बलिनो ये निरामिषाः । तदामिषंपरित्यज्य ससुखंसमविन्दत ॥ २ ॥ नमेमानापमानौस्तो नचिन्तागेहपुत्रिणाम् । आत्मक्रीडआत्मरतिर्विचरामीह बालवत् ॥ ३ ॥ द्वावेवचिन्तयामुक्तौ परमानन्दआ-

---

के सुहृद, प्रियतम, नाथ और आत्मा हैं; मैं स्वय अपने द्वारा इनको मोल लेकर लक्ष्मीकी समान इनके साथ विहार करूंगी ॥ ३५ ॥ विषय विषयों के देनेवाले पुरुष और देवताभी कि जो आदि अंतवाले और कालके कवलरूप हैं उन्होंने स्त्रियोंका क्या भलाकिया ? ॥ ३६ ॥ मैं निराश हूं, मुझे जो यह सुखदायी निर्वेद उत्पन्न हुआ, इससे निश्चयही जानाजाता है कि भगवान विष्णु जी मेरे ऊपर संतुष्टहुए हैं ॥ ३७ ॥ मैं यदि मन्दभागहोती तो मुझ वैराग्यका हेतु भूत इतना क्लेश न होता, जिस वैराग्य से गृहादिका बन्धनछोड मनुष्य सुखको प्राप्त करता है ॥ ३८ ॥ उनके कियेहुए इस उपकारको मस्तक में ल दुष्ट निराशाओं को छोड उन्हीं भगवान की शरण लेती हू ॥ ३९ ॥ सन्तोषकर श्रद्धापूर्वक जो पाऊंगी उसीस जीवन धारणकर प्रियआत्माके साथ विहारकरूंगी ॥ ४० ॥ संसाररूप कूपमें पडा, विषयोंसे अधा, कालसर्पसे ग्रसित इस मेरे जीव का भगवान बिना और कौन उद्धारकर सकता है ? ॥ ४१ ॥ मनुष्य जब कालरूप सर्प से इस जगत को ग्रसित देखता है और उस से सावधान होकर इस लोक और परलोक के भोगों से वैराग्य पाता है तब वह अपने आपही अपनी रक्षा करसकता है ॥ ४२ ॥ ब्राह्मण ने कहा कि— पिंगला इसप्रकार निश्चयकर पुरुष पाने के निमित्त दुराशा को छोड़ शांति धारणकर अपनीशय्या में जा सोई ॥ ४३ ॥ आशाही परम दुःख और निराशाही परम सुख है क्योंकि कांतकी आशा छोड़कर पिंगला सुख से सोईथी ॥ ४४ ॥

इतिश्रीमद्भा०महा०एकादशस्कन्धेसरलाभाषाटीकायांअष्टोऽध्यायः ॥ ८ ॥

ब्राह्मणने कहा कि—मनुष्योंको जो २ वस्तु प्यारी है, उस२वस्तु के साथ आसक्तिही दुःख का कारण है अतएव जो अकिंचन मनुष्य यहजान आसक्ति रहित होते हैं वेही अनन्त सुखको प्राप्त करते हैं ॥ १ ॥ मांस लियेहुए कुरर पक्षी को मांस रहित दूसरे कुरर मार डालते हैं। उस मांस के त्याग देने सेही वह सुखी होता है ॥ २ ॥ मुझे मान अपमान नहीं है; पुत्रवान और गृहस्थियोंकी समान कोई चिंता भी नहीं है; मैं अपने आपही क्रीड़ाकर और अपनेमेंही आसक्त हो बालकों की समान इस संसार में भ्रमण करताहूं ॥ ३ ॥ अज्ञानी उद्यम रहित बालक और

प्लुतौ । योविमुग्धोजडोबालो योगुणेभ्यः परंगतः ॥ ४ ॥ क्वचित्कुमारी त्वात्मानं वृणानान्गृहमागतान् । स्वयंतानर्हयामास क्वापियातेषु बन्धुषु ॥ ५ ॥ तेषामभ्यवहारार्थं शालीन्रहसिपार्थिव । अवघ्नन्त्याःप्रकोष्ठस्थाश्चक्रुः शंखाःस्वनंमहत् ॥ ६ ॥ सातज्जुगुप्सितंमत्वा महतीव्रीडितातत: । बभंजैकैकशःशंखान्द्वौ द्वौपाण्योरशेषयत् ॥ ७ ॥ उभयोरप्यभूद्घोषो ह्यवघ्नन्त्याःस्मशंखयोः । तत्राप्येकं निरभिददेकस्मान्नाभवद्ध्वनिः ॥ ८ ॥ अन्वशिक्षमिमंतस्या उपदेशमरिन्दम । लोकाननुचरन्नेतॉंल्लोकतत्त्वविवित्सया ॥ ९ ॥ वासेबहूनांकलहो भवेद्वार्ताद्वयोरपि । एकएव चरेत्तस्मात्कुमार्या इवकङ्कणः ॥ १० ॥ मनएकत्र संयुञ्ज्याज्जितश्वासो जितासनः । वैराग्याभ्यासयोगेन ध्रियमाणमतन्द्रितः ॥ ११ ॥ यस्मिन्मनोलब्धपदं यदेतच्छनैः शनैर्मुञ्चतिकर्मरेणून् । सत्त्वेनवृद्धेनरजस्तमश्च विधूयनिर्वाणमुपैत्यनिन्धनम् ॥ १२ ॥ तदेवमात्मन्यवरुद्धचित्तो नवेद किंचिद्बहिरन्तरंवा । यथेषुकारोनृपतिं व्रजन्तमिषौ गतात्मानददर्शपार्श्वे ॥ १३ ॥ एकचार्यनिकेतः स्यादप्रमत्तो गुहाशयः ॥ अलक्ष्यमाण आचारैर्मुनिरेकोऽल्पभाषणः ॥ १४ ॥ गृहारम्भोतिदुःखाय विफलश्चाध्रुवात्मनः । सर्पःपरकृतं वेश्मप्रविश्यसुखमेधते ॥ १५ ॥ एकोनारायणो देवः पूर्वसृष्टंस्वमायया । संहृत्यकालकलया कल्पान्तइदमीश्वरः ॥ १६ ॥ एक एवाद्वितीयोऽभूदात्माधारोऽखिलाश्रयः । कालेनात्मानुभावेन साम्यंनीतासुशक्तिषु । सत्त्वादिष्वादि

जो प्रकृति के पर ईश्वर को प्राप्त हुए हैं वह दोनोंही चिंता से मुक्तहो परम आनन्दित रहते हैं ॥ ४ ॥ किसी एक समय में कुछ एक मनुष्य किसी एक कन्या के वरण करने के निमित्त उसके घर में आए; उस समय उस के बन्धुजन किसी स्थान में गयेथे, इसकारण उस कन्या ने स्वयही उनका सत्कार किया ॥ ५ ॥ हे महीपते ! कुमारी उनके भोजन के निमित्त धान कूटने में प्रवृत्त हुई, उस समय उस कन्या के हाथों की चूडियों से अति शब्द होनेलगा ॥ ६ ॥ उसने उनकोलज्जा उत्पन्न करनेवाली जानकर एक २ करके सब चूड़ियें को तोड़डाला, केवल दो २ चूड़ियें एक एक हाथ में रहनेदीं ॥ ७ ॥ तौभी धान कूटने के समय उन दोनों चूड़ियों से शब्द होनेलगा। इससे उसने एक २ और तोडडालीं एक २ शेष रहने से फिर शब्द न हुआ ॥ ८ ॥ हे अरिंदम ! लोकतत्त्व जानने की इच्छा से इन सबलोकों में भ्रमण करते २ मैंने उस कुमारी से यह उपदेश पाया है कि— ॥ ९ ॥ बहुत जनों का एक स्थान पर वास या दोजनोंका एकत्रवासभी कलहका कारण होता है, अतएव कन्या की चूड़ी की समान अकेलेही वासकरना चाहिये ॥ १० ॥ आसन और श्वास को जीत आलस्य छोड वैराग्य और अभ्यास योगसे मनको एक विषयमें संयुक्तकर रखना चाहिए ॥ ११ ॥ यह मन जिससे स्थान प्राप्तकर धीरे२ कर्म वासनाओं को छोड़कर और उपशमात्मक सत्वगुणद्वारा रज,तम नाशकरके गुण और गुणकार्यों से रहित निर्वाण पदको प्राप्त होवे, इसको उसी से संयुक्त करके रखना चाहिए ॥ १२ ॥ जैसे बाण में चित्त लगाएहुए बाण बनानेवाले मनुष्य ने निकट से निकलगयेहुए राजा को नहीं जाना, इसीप्रकार चित्त को रोकने से बाहिरी और भीतरी कुछभी सुख दुःख का ज्ञान नहीं रहता ॥ १३ ॥ सर्प की समान मुनि को अकेला भ्रमण करनेवाला, गृहरहित, सावधान, गुफामें सोनेवाला, आचारों से अलक्ष्य' असहाय और कम बोलनेवाला होना चाहिए ॥ १४ ॥ घर का बनानाही इस नाशवान देह के दुःख का कारण है और निःष्फल है;सर्प दूसरेही के बनायेहुए घर में बास करके सुखी होता है ॥ १५ ॥ नारायण देव इस रचेहुए जगत को कल्पांत समय में काल शक्तिद्वारा संहार करके आत्माधार और अखिलाश्रय रूप से एक और अद्वितीय होरहते हैं । आत्मशक्ति, कालप्रभावसे सबशक्तियें और सत्तादि क्रम से अपने २ कारणों में लीन होनेपर आदि पुरुष भगवान ब्रह्मादि और दूसरे

पुरुषः प्रधानपुरुषेश्वरः ॥ १७ ॥ परावराणां परम आस्ते कैवल्यसंज्ञितः । केवलानुभवानन्दसन्दोहो निरुपाधिकः ॥१८॥ केवलात्मानुभावेन स्वमायां त्रिगुणात्मिकाम् । संक्षोभयन्सृजत्यादौ तया सूत्रमरिन्दम ॥ १९ ॥ तामाहुस्त्रिगुणव्यक्तिं सृजन्तीं विश्वतोमुखम् । यस्मिन्प्रोतमिदं विश्वं येन संसरते पुमान् ॥ २० ॥ यथोर्णनाभिर्हृदयादूर्णां संतत्य वक्त्रतः । तया विहृत्य भूयस्तां ग्रसत्येवं महेश्वरः ॥ २१ ॥ यत्र यत्र मनो देही धारयेत्सकलं धिया । स्नेहाद्द्वेषाद्भयाद्वापि याति तत्तत्सरूपताम्॥२२॥ कीटः पेशस्कृतं ध्यायन्कुड्यां तेन प्रवेशितः । याति तत्सात्मतां राजन्पूर्वरूपमसंत्यजन् ॥ २३ ॥ एवं गुरुभ्य एतेभ्य एषा मे शिक्षिता मतिः । स्वात्मोपशिक्षितां बुद्धिं शृणु मे वदतः प्रभो ॥ २४ ॥ देहो गुरुर्मम विरक्तिविवेकहेतुर्बिभ्रत्स्म सत्त्वनिधनं सतताऽऽर्त्युदर्कम् । तत्त्वान्यनेन विमृशामि यथा तथापि पारक्यमित्यवसितो विचराम्यसंगः ॥ २५ ॥ जायात्मजार्थपशुभृत्यगृहाप्तवर्गान्पुष्णाति यत्प्रियचिकीर्षया वितन्वन् । स्वान्ते सकृच्छ्रमवरुद्धधनः स देहः सृष्ट्वाऽस्य बीजमवसीदति वृक्षधर्मा ॥२६॥ जिह्वैकतोऽमुमपकर्षति कर्हि तर्षा शिश्नोऽन्यतस्त्वगुदरं श्रवणं कुतश्चित् । घ्राणोऽन्यतश्चपलदृक्क्व च कर्मशक्तिर्बह्व्यः सपत्न्य इव गेहपतिं लुनन्ति ॥ २७ ॥ सृष्ट्वा पुराणि विविधान्यजयात्मशक्त्या वृक्षान्सरीसृपपशून्खगदंशमत्स्यान् ।। तैस्तैरतुष्टहृदयः पुरुषं विधाय ब्रह्मावलोकधिषणं मुदमाप देवः ॥२८॥ लब्ध्वा सुदुर्लभमिदं बहुसंभ-

मुक्तजीवों को प्राप्तहो अवस्थिति करते हैं ॥ १६—१७ ॥ क्योंकि वह निरुपाधिक, निर्विषय, स्वप्रकाश और आनन्द संदोह हैं अतएव मोक्षशब्द के प्रतिपाद्य हैं ॥ १८ ॥ हेशत्रुदमन ! निरवच्छिन्न आत्मानुभवरूपभगवान ने काल से तीन गुणवाली अपनी माया को क्षोभित कर उसके द्वारा प्रथम मोहतत्त्व को उत्पन्न किया ॥ १९ ॥ अहङ्कार को विश्व का उत्पन्न करनेवाला कहते हैं अतएव विश्व तो मुख और त्रिगुणात्मक ही उस मायाका सूत्रात्मा कहाजाता है ; इससेही यह विश्व ओतप्रोत भावसे गुन्थ रहा है और इससेही पुरुष संसार में प्रवृत्त होते रहते हैं २० ॥ जैसे मकरी मुखद्वारा अपने हृदयसे जाल को फैलायकर फिर उसको लीलजाती है उसहीप्रकार भगवान इस विश्वकी उत्पत्ति, स्थिति और संहार करते रहते हैं ॥ २१ ॥ प्राणी; स्नेह द्वेष व भय के कारण जिस जिसमें मनलगाता है, मरणके उपरांत उसही उसकी स्वरूपता को प्राप्तहोता है ॥ २२ ॥ हेराजन् ! कीडाभ्रमरी से दीवारमें वंद होकर उसका ध्यान करते २ अपने पूर्व रूप को न छोडकर उसकाही स्वरूपताको प्राप्त होता है, ॥ २३ ॥ इन सब गुरुओं से मैंने यही शिक्षाए प्राप्त की हैं। हेप्रभो ! अपने शरीर से जो बुद्धि प्राप्तकी है उसको सुनो ॥ २४ ॥ शरीर मेरा गुरु है; क्योंकि मनकी पीडा जिसका अंतिम फलहै वही उत्पत्ति विनाश इसका धर्महै, मैं इसकेद्वारा यथार्थ तत्वका अनुसंधानकरतारहताहू; अतएव यही मेरेविवेक का कारण है; तौभी इसको दूसरे (काक, कुत्ते) का भक्ष्य स्थिरकर संगहीन होकर बिचरण करता फिरताहू २५॥ मनुष्य जिस देह के हितसाधन करने के निमित्त, स्त्री, पुत्र, धन, पशु, दास, घर और स्वजनों का बिस्तारकर कष्ट से धन इकट्ठा कर उनका पोषण करता है, वृक्षधर्मी यह देह उसही पुरुष का कर्मरूप देहांतरबीज उत्पन्नकरके नष्टहोता रहता है ॥ २६॥ जैसे बहुतसी स्त्रियें घरकेस्वामी को जीर्ण करडालती हैं, उसही प्रकार जिह्वा इसको एक ओर, तृष्णा दूसरी ओर—;शिश्नअन्य ओर; त्वक् , उदर, कर्ण और नाक चंचलनेत्र तथा कर्म शक्ति अन्यान्य ओरको खींचतीहैं॥२७॥ भगवान ने आत्मशक्ति माया से वृक्ष, सरीसृप, पशु, पक्षी और हिंसक आदि नाना शरीरों को रच उनसे संतुष्टनहो ब्रह्मदर्शनके निमित्त बुद्धियुक्त पुरुष शरीर को रचकर परम संतोष प्राप्त

मान्तेमानुष्यमर्थदमनित्यमपीह धीरः।तूर्णंयतेतनपतेदनुमृत्यु यावन्निःश्रेयसाय विषयःखलुसर्वतः स्यात् ॥ २९ ॥ एवंसंजातवैराग्यो विज्ञानालोकआत्मनि । विचरामिमहीमेतां मुक्तसंगोऽनहंकृतिः ॥ ३० ॥ नह्येकस्माद्गुरोर्ज्ञानं सुस्थिरं स्यात्सुपुष्कलम् । ब्रह्मैतदद्वितीयंहि गीयतेबहुधर्षिभिः॥३१॥श्रीभगवानुवाच ॥ इत्युक्त्वा सयदुंविप्रस्तमामन्त्र्यगभीरधीः। वन्दितोऽभ्यर्थितोराज्ञा ययौप्रीतोयथागतम् ३२ अवधूतवचःश्रुत्वा पूर्वेषांनःसपूर्वजः । सर्वसंगविनिर्मुक्तः समचित्तोबभूवह ३३॥

इतिश्री मद्भागवते महा० एकादशस्कंधे नवमोऽध्यायः ॥ ९ ॥

श्रीभगवानुवाच ॥ मयोदितेष्ववहितः स्वधर्मेषुमदाश्रयः । वर्णाश्रमकुलाचारमकामात्मासमाचरेत्॥१॥अन्वीक्षेतविशुद्धात्मा देहिनांविषयात्मनाम् । गुणेषुतत्त्वध्यानेन सर्वारम्भविपर्ययम् ॥२॥ सुप्तस्यविषयालोको ध्यायतोवामनोरथः । नानात्मकत्वाद्विफलस्तथाभेदात्मधीर्गुणैः ॥३॥ निवृत्तंकर्मसेवेत प्रवृत्तंमत्परस्त्यजेत् । जिज्ञासायांसंप्रवृत्तो नाद्रियेत्कर्मचोदनाम्॥४॥यमानभीक्ष्णंसेवेत नियमान्मत्परः क्वचित् । मदभिज्ञंगुरुंशान्त मुपासीतमदात्मकम्॥५॥अमान्यमत्सरोदक्षोनिर्ममो दृढसौहृदः । असत्वरोर्थजिज्ञासु रनसूयुरमोघवाक् ॥६॥जायापत्यगृहक्षेत्र स्वजनद्रविणादिषु । उदासीनःसमंपश्यन्सर्वेष्वर्थमिवात्मनः ॥७॥विलक्षणःस्थूलसूक्ष्मा

किया ॥ २८ ॥ इससंसार में बहुत जन्मोंके उपरांत, अनित्य होने पर भी पुरुषार्थ साधनमनुष्य जन्मप्राप्तकर इसके पतित न होते होते धीर मनुष्यको शीघ्रही मुक्तिके निमित्त यत्नकरनाचाहिए विषय भोग सब जन्मों मेंही होते रहते हैं ॥ २९ ॥ मैं इसप्रकार वैराग्ययुक्तहो विज्ञानरूपी दीपक के प्रभाव से अहंकार और संगको छोड़ आत्मनिष्ठहो पृथिवीपर घूमताहूं ॥ ३० ॥ निश्चयही एक गुरु से स्थिर और पुष्टज्ञान उत्पन्न न हुआ । क्योंकि ब्रह्म का निर्णय उसके अद्वितीय होने पर भी भिन्न २ ऋषियों ने भिन्न २ रूप से किया है ॥ ३१ ॥ भगवान ने कहा कि–वह अगाधबुद्धि वाला ब्राह्मण यह कथाकह चुपहोगया और राजा से वंदित व पूजितहो उनकी आज्ञाले जहांसे आयेथे वहां गये ॥ ३२ ॥ हमारे पूर्व पुरुषों के पूर्व उत्पन्नहुए वह यदु अवधूत के वचन सुन निःसंग और समदर्शी होगयेथे ॥ ३३ ॥

इतिश्रीमद्भा॰महा॰एकादशस्क॰सरलाभाषाटीकायां नवमोऽध्यायः ॥ ९ ॥

श्रीभगवान बोले कि–मैंने जो समस्त निज २ धर्म कहे हैं, भगवद्भक्तों को सावधान होकर मनसे वासनाओं को त्याग वर्ण, आश्रम और कुलकी समान आचरण करना चाहिए ॥ १ ॥विषयासक्त प्राणी सब विषयों को यथार्थ जानकर जो २ कार्य करते हैं उन समस्तसेही विपरीतफल प्राप्त होता है;—शुद्ध चित्तहोकर इसको देखता रहे ॥ २ ॥ सोतेहुए मनुष्य के स्वप्नावस्था में देखेहुए विषय और विचारेहुए मनोरथ जैसे नानाप्रकार के होकरभी अर्थ शून्य रहते हैं ऐसेही इन्द्रियों से जानेजातेहुए सब विषयभी अर्थरहित हैं कारण कि वे अनेकप्रकार के होते हैं ॥ ३ ॥ मेरे भक्तको निष्काम होकर नित्य नैमित्तिक कर्मों को करना चाहिए, वह काम्यकर्मों को छोड़ देवे; आत्म विचार में भलीप्रकारसे प्रवृत्तहो निवृत्तिके कर्म विधानमें भी आदरवान न होवे॥४॥ किंतु मत्परायणहो सब संयमों की नित्य सेवाकरे; कभी २ नियमों की भी सेवा करनी चाहिए,और जो मुझको भली प्रकार से जानते हैं.मेरे स्वरूप उनही शांतगुरु की आराधना करनी चाहिए५॥ अभिमान, मात्सर्य, आलस्य और ममताको छोड़देवे, गुरुसे भलीप्रकार सुहृदताका बन्धन बांधे; व्यग्र न होवे, तत्त्व जानेकी इच्छा करे और बड़ाई मारना व व्यर्थ बकवाद छोड़ देवे ॥ ६ ॥ अपने अभिप्रायको सर्वत्रही समान देख स्त्री, पुत्र, घर, क्षेत्र, स्वजन और धनादि से उदासीन हो। केवल गुरुकीही उपासना करनी चाहिये ॥ ७ ॥ जैसे दाहक और प्रकाशक अग्निदाह्य और

दाह्यात्मेक्षितात्स्वदृक् । यथाग्निर्दारुणोदाह्याद्दाहकोऽन्यःप्रकाशकः ॥ ८ ॥ निरो
धोत्पत्त्यणुबृहन्नानात्वंतत्कृतान्गुणान् । अन्तःप्रविष्टआधत्ते एवंदेहगुणान्परः ॥९॥
योऽसौगुणैर्विरचितो देहोऽयंपुरुषस्यहि । संसारस्तन्निबन्धोऽयं पुंसोविद्याच्छि
दात्मनः ॥ १० ॥ तस्माज्जिज्ञासयात्मान मात्मस्थंकेवलंपरम् । संगम्यनिरसेदेत
द्वस्तुबुद्धिंयथाक्रमम् ॥ ११ ॥ आचार्योऽरणिराद्यः स्यादन्तेवास्युत्तरारणिः । त
त्संधानंप्रवचनं विद्यासन्धिःसुखावहः ॥ १२ ॥ वैशारदीसातिविशुद्धबुद्धिर्धुनो
तिमायांगुणसंप्रसूताम् । गुणांश्चसंदह्ययदात्ममेतत्स्वयंच शाम्यत्यसमिद्यथाग्निः
॥ १३ ॥ अथैषांकर्मकर्तॄणां भोक्तृणांसुखदुःखयोः । नानात्वमथनित्यत्वं लोकका
लागमात्मनाम् ॥ १४ ॥ मन्यसेसर्वभावानांसंस्थाह्यौत्पत्तिकीयथा । तत्तदाकृति
भेदेन जायतेभिद्यतेचधीः ॥ १५ ॥ एवमप्यङ्गसर्वेषां देहिनांदेहयोगतः । काला
वयवतःसन्ति भावाजन्मादयोऽसकृत् ॥ १६ ॥ अत्रापिकर्मणांकर्तुरस्वातन्त्र्यंच
लक्ष्यते । भोक्तुश्चदुःखसुखयोः कोन्वर्थोविवशंभजेत् ॥ १७ ॥ न देहिनांसुखंकि
ञ्चिद्विद्यतेविदुषामपि । तथाचदुःखंमूढानां वृथाहंकरणंपरम् ॥ १८ ॥ यदिप्रा
प्तिंविघातंच जानन्तिसुखदुःखयोः । तेऽप्यद्धानविदुर्योगं मृत्युर्नप्रभवेद्यथा ॥१९॥
कोन्वर्थःसुखयत्येनं कामोवामृत्युरन्तिके । आघातंनीयमानस्य वध्यस्येवनतुष्टिदः
॥ २० ॥ श्रुतंचदृष्टवद्दुष्टं स्पर्धासूयात्ययव्ययैः । बह्वन्तरायकामत्वात् कृषिवच्चा

प्रकाश्य काष्ठसे भिन्न पदार्थ है उसही प्रकार दर्शक और स्वप्रकाश आत्मा स्थूल और सूक्ष्म देह से पृथक् है ॥ ८ ॥ ध्वंस, जन्म, सूक्ष्मत्व और नानात्व अग्निका गुण नहीं है; अग्निका काष्ठ के साथ मिले रहने से वह उसके गुणों का अवलम्बन करती है; इसही प्रकार आत्माभी देहके गुणोंको धारण करता रहता है ॥ ९ ॥ ईश्वरके गुणों द्वारा स्थूल देह रचा हुआ है उसके अध्यास के हेतुही जीवकी उत्पत्ति हुई है, वह आत्मज्ञान द्वाराही संसार से निवृत्त होता है ॥ ॥ १० ॥ अतएव कार्य कारण समूह में अवस्थित, निष्कल परमात्मा को विचारद्वारा भलीप्रकार से जान धीरे २ इस देहादिक में रहीहुई वस्तु बुद्धि का त्याग करे ॥ ११ ॥ आचार्य नीचे के काठकी समान, शिष्य ऊपर के काठकी समान, उपदेश बीचवाले मंथन काष्ठकी समान, और विद्या उससे उत्पन्न हुई सुखदेनेवाली अग्नि के समान है ॥ १२ ॥ अति निपुण शिष्य से ग्रहण की हुई वह अति विशुद्ध बुद्धि गुणों से उत्पन्नहुई मायाको दूर करदेती है और इन संसारी गु-णों को जलाय काष्ठरहित अग्निकी समान फिर स्वयं भी निवृत्त होजाती है ॥ १३ ॥ यदि कर्म कर्ता और सुख दुख भोगी इन सब जीवात्मा के नानात्वको स्वीकारकरे; यदि स्वर्गादिलोक, काल धर्म बोधकशास्त्र और आत्माकी नित्यताको विचारें ॥ १४ ॥ यदि समस्त भोग्य पदार्थोंकी यथावत् स्थिति को धारणके रूपसे नित्य कहकर स्वीकारकरें और यदि विचारें कि तत्त्व और आकृति के भेदसे बुद्धि उत्पन्न होती और फिर अनित्य होने के कारण नाशको प्राप्त होती है ॥ ॥ १५ ॥ तो ऐसा होने से देह संयोग और कालके अवयव हेतु समस्त प्राणियों की बारम्बार जन्मादि अवस्था होसकती है ॥ १६ ॥ और इस पक्षमें कर्मों के करने वालोंकी और सुख दुःख के भोगने वालों की पराधीनता दिखाई देती है ॥ १७ ॥ अस्वाधीन को किस पुरुषार्थ के साधन के उद्देश से उपासना करना चाहिये ? पण्डितजनों कोभी किंचित सुख नहीं है; इसही प्रकार मूर्खों को कभी भी दुःख नहीं है; अतएव अहंकार करना व्यर्थही है ॥ १८ ॥ यदि सुख दुःख की प्राप्ति और नाश जाने तौभी वह मृत्युप्रभावके प्रतिबन्धक याग को नहीं जान सकता ॥ ॥ १९ ॥ जब वध्यस्थान में खड़ेहुए वध्यकी समान अत्यन्तही समीप मृत्यु वास करती है, तब कौन पुरुषार्थ व काम इसको सुखी कर सकता है ? ॥ २० ॥ जिस प्रकार से कि इस

पिनिष्फलम् ॥ २१ ॥ अन्तरायैरविहतो यदि धर्मः स्वनुष्ठितः । तेनापि निर्जितं स्थानं यथा गच्छति तच्छृणु ॥ २२ ॥ इष्ट्वेह देवता यज्ञैः स्वर्लोकं याति याज्ञिकः । भुंजीत देववत्तत्र भोगान्दिव्यान्निजार्जितान् ॥ २३ ॥ स्वपुण्योपचिते शुभ्रे विमान उपगीयते । गन्धर्वैर्विहरन्मध्ये देवीनां हृद्यवेषधृक् ॥ २४ ॥ स्त्रीभिः कामगयानेन किंकिणीजालमालिना । क्रीडन्न वेदात्मपातं सुराक्रीडेषु निर्वृतः ॥ २५ ॥ तावत्प्रमोदते स्वर्गे यावत्पुण्यं समाप्यते । क्षीणपुण्यः पतत्यर्वागनिच्छन्कालचालितः ॥ २६ ॥ यद्यधर्मरतः संगादसतां वाऽजितेन्द्रियः । कामात्मा कृपणो लुब्धः स्त्रैणो भूतविहिंसकः ॥ २७ ॥ पशूनविधिनालभ्य प्रेतभूतगणान्यजन् । नरकानवशो जन्तुर्गत्वा यात्युल्बणं तमः ॥ २८ ॥ कर्माणि दुःखोदर्काणि कुर्वन्देहेन तैः पुनः । देहमाभजते तत्र किं सुखं मर्त्यधर्मिणः ॥ २९ ॥ लोकानां लोकपालानां मद्भयं कल्पजीविनाम् । ब्रह्मणोपि भयं मत्तो द्विपरार्धपरायुषः ॥ ३० ॥ गुणाः सृजन्ति कर्माणि गुणोऽनुसृजते गुणान् । जीवस्तु गुणसंयुक्तो भुंक्ते कर्मफलान्यसौ ॥ ३१ ॥ यावत्स्याद्गुणवैषम्यं तावन्नानात्वमात्मनः । नानात्वमात्मनो यावत्पारतन्त्र्यं तदैव हि ॥ ३२ ॥ यावदस्याऽस्वतन्त्रत्वं तावदीश्वरतो भयम् । य एतत्समुपासीरंस्ते मुह्यन्ति शुचार्पिताः ॥ ३३ ॥ काल आत्मागमो लोकः स्वभावो धर्म एव च । इति मां बहुधा प्राहुर्गुणव्यतिकरे सति ।

लोकमें सुख नहीं है वैसेही परलोक में भी नहीं है क्योंकि वहभी दूसरे के सुखकी असहन शीलता, पराये गुणों में दोष देखना, नाश और क्षय आदि के दोषों से दूषित है और जैसे कृषि के सफल होने में भी अनेकों बाधायें आ पडती हैं वैसेही यज्ञादि से प्राप्त होनवाले स्वर्गादिक की प्राप्तिमें भी अनेक विघ्न आजाते हैं ॥ २१ ॥ भली प्रकार से अनुष्ठित धर्म कर्मके विघ्न रहित होने से उसके द्वारा प्राप्तहुआ स्थान जिसप्रकारसे पाया जाता है उसको सुनो ॥ २२ ॥ याज्ञिक इसलोकमें यज्ञादि द्वारा देवताओं का आराधन कर स्वर्ग में जाते हैं; वहां वे देवताओंकी समान स्वयं उपार्जित किये हुए दिव्य भोगोका भोग करते रहते हैं ॥ २३ ॥ मनोहर वेश धारण कर अपने पुण्यों द्वारा सर्व भोगों युक्त सुंदर विमानोंमें बैठ स्त्रियों के बीचमें विहार करते २ गन्धर्वों से प्रशंसित होते रहते हैं ॥ २४ ॥ देवताओं के क्रीडा स्थानमें घूंघरूओं के समूहसे शोभायमान इच्छाचारी विमानोंमें बैठ स्त्रियों समेत क्रीडा करते २ सुखि हो अपने अवश्य होनेवालेपतनको नहीं जान सकते ॥ २५ ॥ जबतक पुण्यकी समाप्ति नहीं होती तब तक वह स्वर्ग में आनंद का अनुभव करते रहते हैं; पुण्य के क्षय होतेही—कालसे प्रेरित हो अनिच्छा होते हुए भी अधः पतित होते हैं ॥ २६ ॥ और यदि जीव दुष्टजनों के संग हो अधर्म में तत्पर, अजितेन्द्रिय नीचाशय, लुब्ध, कामी और प्राणियों का हिंसक हो ॥ २७ ॥ अनरीत से पशुवधकर प्रेत और भूतों का याग करता है तो वह अंतमें नरकगामी हो अज्ञान में प्रवेश करता है ॥ २८ ॥ कर्ममें प्रवृत्त पुरुषको सुख नहीं मिलता देह द्वारा उन सब कर्मोंका अनुष्ठानकर उन्हीके द्वारा फिर शरीर प्राप्त करता है; अतएव मर्त्य लोकमें रहे हुए प्राणियोंको सुख कहां है ॥ २९ ॥ लोक और कल्पजीवी लोकपालोंको मुझसे भय है; द्विपरार्द्ध सम्वत्सरकी जिसकी परमायु है उस ब्रह्माकोभी मुझसे भय है ॥ ३० ॥ गुणों द्वाराही इन्द्रियोंकी उत्पत्ति होती रहती है, यह जीव इन्द्रिय संयुक्त होकर सब कर्म फलोंका भोग करते रहते हैं ॥३१॥ जब तक गुणोंकी विषमता रहती है तबही तक आत्माका अनेकत्व और तबही तक पराधीनता रहती है ॥ ३२ ॥ जब तक इसकी पराधीनता है तभीतक कालका भय रहता है । जो भोग और कर्मका सेवन करते हैं वे शोकग्रस्त हो मूढ हो से रहते हैं ॥ ३३ ॥ मायाका क्षोभ होने से मुझको काल, आत्मा, आगम, लोक, स्वभाव वा धर्म इसप्रकार

॥ ३४ ॥ उद्धव उवाच । गुणेषुवर्तमानोऽपि देहजेष्वनपावृतः । गुणैर्नबध्यते देही बध्यतेवाकथं विभो ॥३५॥ कथंवर्तेतविहरेत्कैर्वा ज्ञायेतलक्षणैः । किंभुंजीतोतवि सृजेच्छयीतासीतयातिवा ॥ ३६ ॥ एतदच्युतमेब्रूहि प्रश्नंप्रश्नविदांवर । नित्यबद्धो नित्यमुक्तएकएवेति मेभ्रमः ॥ ३७ ॥

इति श्रीमद्भा० महा०.एकाद० दशमोऽध्यायः ॥ १० ॥

श्रीभगवानुवाच । बद्धोमुक्तइतिव्याख्या गुणतोमेनवस्तुतः । गुणस्यमायामूलत्वान्न मेमोक्षोनबन्धनम् ॥ १ ॥ शोकमोहौसुखं दुःखं देहापत्तिश्चमायया । स्वप्नोयथात्मनः ख्यातिः संसृतिर्नतुवास्तवी ॥ २ ॥ विद्याविद्येममतनू विद्ध्युद्धवशरीरिणाम् । मोक्षबन्धकरी आद्ये माययामेविनिर्मिते ॥ ३ ॥ एकस्यैवममांशस्य जीवस्यैवमहामते । बन्धोऽस्याविद्ययानादिर्विद्ययाचतथेतरः ॥ ४ ॥ अथबद्धस्यमुक्तस्य वैलक्षण्यंवदामिते । विरुद्धधर्मिणोस्तात स्थितयोरेकधर्मिणि ॥ ५ ॥ सुपर्णावेतौसदृशौसखायौ यदृच्छयैतौ कृतनीडौचवृक्षे । एकस्तयोःखादति पिप्पलान्नमन्यो निरन्नोऽपिबलेनभूयान् ॥ ६ ॥ आत्मानमन्यंच सवेदविद्वानपिप्पलादोनतुपिप्पलादः । योऽविद्ययायुक्सतु नित्यबद्धो विद्यामयोयःसतुनित्यमुक्तः ॥ ७ ॥ देहस्थोपिनदेहस्थो विद्वान्स्वप्नाद्यथोत्थितः । अदेहस्थोपिदेहस्थः कुमतिःस्वप्नदृग्यथा ॥ ८ ॥ इन्द्रियैरिन्द्रियार्थेषु गुणैरपिगुणेषुच ॥ गृह्यमाणेष्वहंकुर्यान्न विद्वान्य-

---

नाना रूपसे वर्णन करते हैं ॥ ३४ ॥ उद्धवजी ने कहा कि—हे विभो ! गुणोंके साथ सम्बंध रहते हुए प्राणी देहसे उत्पन्न हुए कर्म और सुखादि में किस प्रकार से नहीं बंधता ॥ ३५ ॥ और सम्बध न रहते हुए गुणों द्वाराही क्योंकर बद्ध होता है ? बद्ध और मुक्त व्यक्ति किस प्रकार व्यवहार करते हैं, किस प्रकार विहार करते हैं ? किन किन लक्षणों द्वारा दोनों को जाना जासकता है । किस प्रकार से भोजन करते हैं ? कहां शयन करते हैं ? क्या परित्याग करते हैं ? कहां बैठते हैं ? कैसे चलते हैं ॥ ३६ ॥ हे प्रश्नोतर देनेवालोंमें श्रेष्ठ ! यहमेरा प्रश्न है । तब क्या एक ही आत्मा नित्यबद्ध और नित्यमुक्त है ? इस मेरे भ्रमको आप दूरकरो ॥ ३७ ॥

इति श्रीमद्भागवतेमहापुराणे एकादशस्कन्धे सरलाभाषाटीकायां दशमोऽध्यायः ॥ १० ॥

श्रीभगवान ने कहा कि— मेरे सत्वादि गुण रूप की उपाधिसे आत्मा बद्ध और मुक्त होता रहता है परन्तु वास्तव में ऐसा नहीं है मैं इसही प्रकार का निर्णय करताहूं कि गुणके माया मूलक होने से वास्तविक में बद्ध मोक्ष नहीं है शोक, मोह, सुख, दुःख और देह की उत्पत्ति मायाहीके द्वारा होतीरहती है स्वप्नकी समान संसारभी बुद्धि कार्य और मिथ्याहै॥२॥हे उद्धव निश्चय जानना कि प्राणियों के बद्ध और मोक्ष करनेवाली विद्या और अविद्या दोनों ही मेरी मायाशक्ति हैं जो मेरी मायाद्वारा बनी हैं ॥ ३ ॥ हेमहामते ! मेरे अंशस्वरूप इस अद्वितीय अनादि जीवका अविद्याद्वारा बन्ध और विद्याद्वारा मोक्ष होतारहता है ॥ ४ ॥हेतात ! यह दोनों एक आश्रय में स्थित हैं इन विरुद्धधर्मवाले बध और मुक्ति का लक्षण तुमसे कहताहूं सुनो ॥ ५ ॥ यह दोनोंही सुन्दर पक्ष वाले, समानसखा, इच्छानुसार वृक्षमें घोंसलाबनाकर रहे हैं । इन में से एकतो फलों (कर्मफल) को खाता है और दूसरा निराहार रहकरभी बलमें उससे अधिक है ॥ ६ ॥ जोभक्षण नहींकरता वह विद्वान, आत्माको और आत्माकी भिन्नता को जानता है जो भक्षण करता है वह इस प्रकार का नहीं है जो अविद्याके साथ संयुक्त है वह नित्यबद्ध है और जो विद्यामय है वह नित्यमुक्त है ॥ ७ ॥ स्वप्न से उठेहुए मनुष्य की समान, विद्वान देहस्थ होकरभी देहस्थ नहीं है; मूर्ख मनुष्य स्वप्नदर्शी के समान देहस्थ न होकरभी देहस्थ है ॥ ८ ॥ जो निर्विकार,विद्वान, इन्द्रियोंद्वाराविषय

स्त्वविक्रियः ॥ ९ ॥ दैवाधीने शरीरेऽस्मिन्गुणभाव्येन कर्मणा । वर्तमानोऽबुधस्तत्र कर्तास्मीति निबध्यते ॥ १० ॥ एवंविरक्तःशयन आसनाटनमज्जने । दर्शनस्पर्शनघ्राणभोजनश्रवणादिषु ॥ ११ ॥ नतथाबध्यते विद्वांस्तत्र तत्रादयन्गुणान् । प्रकृतिस्थोऽप्यसंसक्तो यथाखंसवितानिलः ॥ १२ ॥ वैशारद्येक्षयाऽसंगशितया छिन्नसंशयः । प्रतिबुद्धइव स्वप्नान्नानात्वाद्विनिवर्तते ॥ १३ ॥ यस्यस्युर्वीतसंकल्पाः प्राणेन्द्रियमनोधियाम् । वृत्तयःसविनिर्मुक्तो देहस्थोपिहि तद्गुणैः ॥ १४ ॥ यस्यात्माहिंस्यते हिंस्रैर्येन किंचिद्यदृच्छया । अर्च्यतेवाक्वचित्तत्र नव्यतिक्रियतेबुधः ॥ ॥ १५ ॥ नस्तुवीतननिन्देत कुर्वतःसाध्वसाधुवा । वदतोगुणदोषाभ्यां वर्जितःसमदृङ्मुनिः ॥ १६ ॥ नकुर्यान्नवदेत्किंचिन्न ध्यायेत्साध्वसाधुवा । आत्मारामोऽनयावृत्त्या विचरेज्जडवन्मुनिः ॥ १७ ॥ शब्दब्रह्मणिनिष्णातो ननिष्णायात्परे यदि । श्रमस्तस्यश्रमफलो ह्यधेनुमिवरक्षतः ॥ १८ ॥ गांदुग्धदोहामसतींच भार्यांदेहं पराधीनमसत्प्रजांच । वित्तंत्वतीर्थीकृतमंग वाचं हीनांमयारक्षति दुःखदुःखी ॥१९॥ यस्यांनमेपावनमंगकर्म स्थित्युद्भवप्राणनिरोधमस्य ॥ लीलावतारेप्सितजन्मवा स्याद्वन्ध्यांगिरंतांबिभृयान्नधीरः ॥ २० ॥ एवंजिज्ञासयाऽपोह्य नानात्वभ्रममात्मनि । उपारमेतविरजं मनोमय्यर्प्यसर्वगे ॥ २१ ॥ यद्यनीशोधारयितुं मनोब्रह्मणिनिश्चलम् । मयिसर्वाणिकर्माणि निरपेक्षःसमाचर ॥ २२ ॥ श्रद्धालुर्मेकथाःशृण्वन्सु

और गुणोंद्वारा गुणों को ग्रहण करता है परन्तु वह ऐसा नहीं विचारता कि ' मैंने ग्रहण किया है ' ॥ ९ ॥ मूर्ख मनुष्य गुणों से उत्पन्नहुए कर्मों द्वारा इस कर्माधीन शरीर में वासकर ' मैंकर्त्ताहूं ' ऐसा विचार करके उसी में लीन रहता है ॥ १० ॥ विद्वानमनुष्य इसप्रकार से विरक्तहो शयन, उपवेशन, पर्यटन, (गमनागमन), मज्जन, दर्शन, स्पर्शन, घ्राण (सूंघना)भोजन औरश्रवणादि विशेष २ विषयों में इंद्रियों को भोगकराता है कि उसमें बद्ध नहीं होता; वह प्रकृति में स्थिति करके भी आकाश सूर्य और अग्निकी समान निःसंगहो वैराग्य योग से बढ़ीहुई तीक्ष्ण व निपुण बुद्धि की दृष्टिद्वारा संशयों का नाशकरता है और स्वप्न से जाग्रतहुए मनुष्य की समान देहादि प्रपंचों से निवृत्त होतारहता है ॥ ११—१३ ॥ जिनके प्राण, इंद्रिय, मन, और बुद्धिके आचरण सबही संकल्प रहित हैं वह देहस्थ होकरभी गुणों से मुक्त हैं ॥ १४ ॥ जिसकी देह हिंसकों से हिंसित और कहीं पर किसी मनुष्य से इच्छानुसार कुछ पूजितहो और उसको विकार न होवे वही पण्डित है ॥ १५ ॥ समदर्शी गुणदोष से वर्जित मुनिजन प्रियकारी अथवा अप्रियकारी व प्रियवादी अथवा अप्रियवादी मनुष्यों की स्तुति व निन्दा नहीं करते ॥ १६ ॥ मुनिजन भलाबुरा कुछ नहीं करते, न कुछ कहें न किसी की चिंता करें । आत्मारामहो इसही वृत्ति का अवलम्बन कर जड़की समान विचरण किया करते हैं ॥ १७ ॥ शब्द ब्रह्म का पारगामी होकरभी यदि परब्रह्म में ध्यानादि योगनकरे तो विना ब्याई गौ के, गौ प्रतिपालक की समान परिश्रमही उसका श्रमफल है ॥ १८ ॥ हे उद्धव ! जो मनुष्य दुःखों से दुःखी है वही दुग्धदोह गौ को, असती स्त्री को, पराधीन देह, असत्पुत्र, पापदेने वाले धन और मेरी वर्णन रहित वाणी को रखता है ॥ ॥ १९ ॥ अहो ! जिससे इस विश्व के उत्पत्ति, स्थिति और प्रलय स्वरूप मेरे पवित्रकर्म और लीलावतारों के इच्छितवर देनेवाले जन्मचरित न हुए वह वाक्य निष्फल है, पण्डित उसको धारण नहीं करते ॥ २० ॥ इसही प्रकार तत्त्व विचारद्वारा आत्माके अनेकत्व का भ्रम छोड़ विशुद्ध चित्तको मुझसर्वव्यापी में अर्पणकर तृप्तिको प्राप्त होना चाहिये ॥ २१ ॥ यदि ब्रह्म में निश्चल मन लगाने में असमर्थ होवे तो निष्कामहो मुझकोही समस्तकर्म अर्पणकरे ॥ २२ ॥ हे उद्धव !

मद्गाथा लोकपावनीः। गायन्ननुस्मरन्कर्म जन्म चाभिनयन्मुहुः॥ २३॥ मदर्थे धर्मकामार्थानाचरन्मदपाश्रयः। लभते निश्चलां भक्तिं मय्युद्धव सनातने॥ २४॥ सत्संगलब्धया भक्त्या मयि मां स उपासिता। स वै मे दर्शितं सद्भिरञ्जसा विन्दते पदम्॥२५॥ उद्धव उवाच॥ साधुस्तवोत्तमश्लोक मतः कीदृग्विधः प्रभो। भक्तिस्त्वय्युपयुज्येत कीदृशी सद्भिरादृता॥ २६॥ एतन्मे पुरुषाध्यक्ष लोकाध्यक्ष जगत्प्रभो। प्रणतायानुरक्ताय प्रपन्नाय च कथ्यताम्॥ २७॥ त्वं ब्रह्म परमं व्योम पुरुषः प्रकृतेः परः। अवतीर्णोऽसि भगवन् स्वेच्छोपात्तपृथग्वपुः॥ २८॥ श्रीभगवानुवाच॥ कृपालुरकृतद्रोहस्तितिक्षुः सर्वदेहिनाम्। सत्यसारोऽनवद्यात्मा समः सर्वोपकारकः॥ २९॥ कामैरहतधीर्दान्तो मृदुः शुचिरकिंचनः। अनीहो मितभुक्शान्तः स्थिरो मच्छरणो मुनिः॥ ३०॥ अप्रमत्तो गभीरात्मा धृतिमाञ्जितषड्गुणः। अमानी मानदः कल्पो मैत्रः कारुणिकः कविः॥ ३१॥ आज्ञायैवं गुणान्दोषान् मयाऽऽदिष्टानपि स्वकान्। धर्मान्संत्यज्य यः सर्वान् मां भजेत स सत्तमः॥ ३२॥ ज्ञात्वाऽज्ञात्वाथ ये वै मां यावान्यश्चास्मि यादृशः। भजन्त्यनन्यभावेन ते मे भक्ततमा मताः॥ ३३॥ मल्लिंगमद्भक्तजनदर्शनस्पर्शनार्चनम्। परिचर्या स्तुतिः प्रह्वगुणकर्मानुकीर्तनम्॥ ३४॥ मत्कथाश्रवणे श्रद्धा मदनुध्यानमुद्धव। सर्वलाभोपहरणं दास्येनात्मनिवेदनम्॥३५॥ मज्जन्मकर्मकथनं मम पर्वानुमोदनम्। गीतताण्डववादित्रगोष्ठीभिर्मद्गृहोत्सवः

पुरुष श्रद्धायुक्तहो मेरी लोकपावनी सुन्दरकथाको. सुनना, गाना और स्मरण करना तथा बार-म्बार मेरे जन्म और कर्मोंकी लीलाकरके वो मेरे निमित्त सब धर्मार्थ कामों का आचरणकरें मेरी निश्चलभक्ति प्राप्तकर सकते हैं ॥ २३—२४ ॥ वह सत्संग वश प्राप्त हुई मेरी भक्तिद्वारा मेराध्यान करके साधुओं के दिखायेहुए मेरे पदके सुखका भोग निश्चयही प्राप्तकरसकते हैं २५॥ उद्धवजीने कहा कि—हे उत्तम श्लोक! हे प्रभो! अपनी २ बुद्धि से बनेहुए साधु अनेक हैं, परन्तु आप कैसे लक्षणावालेको साधु मानते हो? किसप्रकारकी भक्ति आपमें उपयोगी होती है? और सत्पुरुष कैसी भक्ति का आदर करते हैं॥ २६॥ हे पुरुषाध्यक्ष! हेलोकाध्यक्ष! हेजगत् प्रभो! मैं आपका भक्त, अनुरक्त और शरणागतहूं आप मुझसे इन बातोंका वर्णन कीजिये २७॥ आप आकाश की समान निःसंग प्रकृति से परें, परमब्रह्महो; हेभगवन्! इच्छानुसार देहधारण कर आप अवतीर्णहुएहो॥ २८॥ श्रीभगवान ने कहा—हेउद्धव! जो सब प्राणियों पर कृपालु अहिंसक और क्षमाशील हैं; सत्यही जिनका बल है; जो निर्दोष, समदर्शी और सर्वोपकारी हैं; ॥ २९॥ जिनका चित्त विषयों से क्षुभित नहीं होता; जो जितेन्द्रिय, कोमल चित्त, सदाचारी, निःसंग, निरीह, मितभोजी, जितचित्त, स्वधर्म में निरत, मेराही भजन करनेवाला और चिन्ताशील है॥ ३०॥ जो सावधान, निर्विकार चित्त, धैर्यशाली, षड्गुण विजयी, मान की इच्छा न रखने वाला दूसरोंको मान देनेवाला, दूसरे को ज्ञान देनेमें चतुर किसीको न ठगनेवाला, कारुणिकऔर भली प्रकार से ज्ञानी हैं; ॥ ३१॥ वही श्रेष्ठ साधू हैं। और जो गुण दोषों को जानकर वेदरूप से मेरे बनायेहुए कर्मों को छोड़कर मेरा भजन करता है वह भी श्रेष्ठसाधू है॥ ३२॥ मैं जोहू जैसाहूं जिसप्रकार काहूं, यह बारम्बार जानकर जो एकांतमन से मेरा भजन करते हैं वही मेरे श्रेष्ठ भक्त हैं॥ ३३॥ हेउद्धव! मेरे प्रतिमादि चिह्नों का देखना मेरे भक्तों का दर्शन करना, स्पर्शन, पूजा, परिचर्या, स्तुति और मनोहर गुण कर्मों का कथन, मेरी कथा सुनने में श्रद्धा; मेरा ध्यान; मुझ में समस्त पदार्थों का अर्पण करना; दास्यभावसे आत्म निवेदनकरना; ॥ ३४।३५॥ मेरे जन्म कर्मों का कथन मेरे पर्व आदि उत्सवों का अनुमोदनकरना; गाने, बजाने और सम्प्रदा

॥ ३६ ॥ यात्राबलिविधानंच सर्ववार्षिकपर्वसु । वैदिकीतान्त्रिकीदीक्षा मदीयव्रतधारणम् ॥ ३७ ॥ ममार्चास्थापनेश्रद्धा स्वतःसंहत्यचोद्यमः । उद्यानोपवनाक्रीडपुरमन्दिरकर्मणि ॥ ३८ ॥ संमार्जनोपलेपाभ्यां सेकमण्डलवर्तनैः । गृहशुश्रूषणंमह्यं दासवद्यदमायया ॥ ३९ ॥ अमानित्वमदम्भित्वं कृतस्यापरिकीर्तनम् । अपिदीपावलोकंमे नोपयुञ्ज्यान्निवेदितम् ॥ ४० ॥ यद्यदिष्टतमंलोके यच्चातिप्रियमात्मनः । तत्तन्निवेदयेन्मह्यं तदानन्त्यायकल्पते ॥ ४१ ॥ सूर्योऽग्निर्ब्राह्मणोगावो वैष्णवःखंमरुज्जलम् । भूरात्मासर्वभूतानि भद्रपूजापदानिमे ॥४२॥ सूर्येतुविद्यया त्रय्या हविषाग्नौयजेतमाम् । आतिथ्येनतुविप्राग्र्ये गोष्वंगयवसादिना ॥ ४३ ॥ वैष्णवेबन्धुसत्कृत्या हृदिखेध्याननिष्ठया । वायौमुख्यधियातोये द्रव्यैस्तोयपुरस्कृतैः ॥ ४४ ॥ स्थण्डिलेमन्त्रहृदयैर्भोगैरात्मानमात्मनि । क्षेत्रज्ञंसर्वभूतेषु समत्वेनयजेतमाम् ॥ ४५ ॥ धिष्ण्येष्वित्येषुमद्रूपं शंखचक्रगदाम्बुजैः । युक्तंचतुर्भुजं शान्तं ध्यायन्नर्चेत्समाहितः ॥ ४६ ॥ इष्टापूर्तेनमामेवं योयजेतसमाहितः । लभतेमयिसद्भक्तिं मत्स्मृतिःसाधुसेवया ॥ ४७ ॥ प्रायेणभक्तियोगेन सत्संगेनविनोद्धव । नोपायोविद्यतेसध्र्यङ् प्रायणंहिसतामहम् ॥ ४८ ॥ अथैतत्परमंगुह्यं शृण्वतो यदुनन्दन । सुगोप्यमपिवक्ष्यामि त्वंमेभृत्यसुहृत्सखा ॥ ४९ ॥

इतिश्रीमद्भा० महा० एकाद० एकादशोऽध्यायः ॥ ११ ॥

यों द्वारा घर में उत्सवकरना ॥ ३६ ॥ सब वार्षिक पर्वों में यात्रा और पुष्प आदि देना, वैदिकी और तांत्रिकी दीक्षा; मेरे व्रतों का धारण करना ॥ ३७ ॥ मेरे प्रतिमास्थापन में श्रद्धा; बाग, उपबन, क्रीडास्थान, पुर और मन्दिर आदि के बनाने में स्वतः अथवा दूसरों के साथ मिलकर उद्यम करना ॥ ३८ ॥ मेरे घरकी अकपटभाव से सेवा करना, झाड़ना, बुहारना, लीपना, पोतना आदि करना ॥ ३९ ॥ अभिमानत्याग; पाखण्ड को छोड़ना; और आचरित धर्म कर्मोंका कहना न करना; यहीसब भक्तिके लक्षण हैं । भक्ति के और भी लक्षण कहताहूं ;—मेरे अर्पण कियेहुए पदार्थ का आपना स्वयं उपभोगनकरना; अन्यपदार्थ तो दूर रहा दीपक का प्रकाशभी काम में न लाना ॥ ४० ॥ मनुष्यों को जो पदार्थ अत्यन्तही इच्छित और अपने को प्रियहो मेरे उद्देश से निवेदित होने पर वह अत्यंतही फल दायी होता है ॥ ४१ ॥ हेभद्र ! सूर्य, अग्नि, ब्राह्मण, गौ, वैष्णव, हृदय, वायु, जल पृथिवी, आत्मा और समस्त प्राणी मेरी पूजाके आधार हैं ॥४२॥ अहो ! वेद विद्याद्वारा सूर्य में, घृतद्वारा अग्नि में, आतिथ्यद्वारा ब्राह्मण में, तृणादिद्वारा गौओं में, ॥ ४३ ॥ मित्रों की समान सन्मानद्वारा वैष्णवों में, ध्यानद्वारा हृदयाकाश में, प्राणदृष्टिद्वारा वायु में, जल आदि द्रव्यों द्वारा जल में ॥ ४४ ॥ और गोपनीय मंत्रन्यासद्वारा पृथिवी में मेरी पूजाकरे नाना प्रकार के भोगों द्वारा आत्मा में आत्मरूपी मेरी पूजाकरे, मैं सब प्राणियों में क्षेत्रज्ञरूपहूं, समताद्वारा मेरा यागकरे ॥ ४५ ॥ समाधियोग से मेरे शंख, चक्र, गदा, पद्म युक्त चतुर्भुजशांत रूप का ध्यान करे, इसही प्रकार इन्हीं समस्त आधारों से पूजाकरनी चाहिए ॥४६॥ जो समाधिस्थहो कुआं बावड़ी आदि बनवाय मेरा यागकरेंगे वे मुझ में उत्तम भक्तिमान होंगे । साधुसेवा द्वारा मेरा सम्बन्धी ज्ञान उत्पन्न होता है ॥ ४७ ॥ हे उद्धव ! सत्संग से उत्पन्नहुए भक्तियोगके अतिरिक्त संसार से तरने का और कोई उत्तमउपाय नहीं है; क्योंकि मैं साधुओं काही श्रेष्ठ आश्रयहूं ॥ ४८ ॥ हेयदुनन्दन ! तुमने परमगुप्त वार्त्ता को सुना, इसके उपरांत तुमसे औरभी अत्यंत गूढ़ विषय कहताहूं उसको सुनों क्योंकि तुम मेरे सेवक, भक्त और सखाहो ॥ ४९ ॥

इतिश्रीमद्भा०महा०एकादशस्कंधेसरलाभाषाटीकायांएकादशोऽध्यायः ॥ ११ ॥

श्रीभगवानुवाच। नरोधयति मांयोगो नसांख्यंधर्मएवच। नस्वाध्यायस्तपस्त्यागो नेष्टापूर्तंनदक्षिणा ॥ १ ॥ व्रतानियज्ञश्छन्दांसि तीर्थानिनियमायमाः। यथावरुन्धेसत्संगः सर्वसंगापहोहिमाम् ॥ २ ॥ सत्संगेनहिदैतेया यातुधानामृगाःखगाः गन्धर्वाप्सरसोनागाः सिद्धाश्चारणगुह्यकाः ॥ ३ ॥ विद्याधरामनुष्येषु वैश्याःशूद्राः स्त्रियोऽन्त्यजाः। रजस्तमः प्रकृतयस्तस्मिंस्तस्मिन्युगेऽनघ ॥ ४ ॥ बहवोमत्पदंप्राप्तास्त्वाष्ट्रकायाधवादयः। वृषपर्वाबलिर्बाणो मयश्चाथविभीषणः ॥ ५ ॥ सुग्रीवो हनुमानृक्षो गजोगृध्रोवणिक्पथः। व्याधःकुब्जाव्रजेगोप्यो यज्ञपत्न्यस्तथापरे॥६॥ तेनाधीतश्रुतिगणा नोपासितमहत्तमाः। अव्रतातप्ततपसः सत्संगान्मामुपागताः ॥ ॥ ७ ॥ केवलेनहिभावेन गोप्योगावो नगामृगाः। येऽन्येमूढधियोनागाः सिद्धामामीयुरंजसा ॥ ८ ॥ यंनयोगेनसांख्येन दानव्रततपोऽध्वरैः ॥ व्याख्यास्वाध्यायसंन्यासैः प्राप्नुयाद्यत्नवानपि ॥ ९ ॥ रामेणसार्धंमथुरां प्रणीते श्वाफल्किना मय्यनुरक्तचित्ताः। विगाढभावेन नमे वियोगतीव्राधयोऽन्यं ददृशुःसुखाय ॥ १० ॥ तास्ताःक्षपाः प्रेष्ठतमेननीता मयैववृन्दावनगोचरेण । क्षणार्धवत्ताःपुनरंगतासां हीनामयाकल्पसमा बभूवुः ॥ ११ ॥ तानाविदन्मय्यनुषंगबद्धधियः स्वमात्मानमदस्तथेदम्। यथासमाधौ मुनयोऽब्धितोये नद्यःप्रविष्टाइवनामरूपे ॥ १२ ॥ मत्कामार-

---

श्री भगवान ने कहा कि—हेसखे ! सबके संगका निवृत करनेवाला साधुसंग मुझको जैसा वशीभूतकरता है, योग, ज्ञान, धर्म, वेदाध्ययन, तपस्या, दान, कुवा, बावडी आदि का बनाना, दक्षिणा, व्रत, देवार्चना, गोपनीयमन्त्र, तीर्थों में भ्रमणकरना, नियम और यम इनमें से कोई भी मुझको वैसा वशनहीं करसकता ॥ १—२ ॥ हे उद्धव ! दैत्य, राक्षस, पक्षी, मृग, गन्धर्व, अप्सरा, नाग, सिद्ध, चारण, गुह्यक, विद्याधर,—विशेष २ युगमें मनुष्यों में से रज और तमकी प्रकृति वाले वैश्य, शूद्र, स्त्री और अन्त्यज यह भी केवल सत्संग से मुझको प्राप्तहुए हैं ॥ ३ ॥ ॥ ४ ॥ वृत्रासुर और प्रह्लादादि तथा वृषपर्वा, बलि, बाणासुर, मयदानव, विभीषण, सुग्रीव, हनूमान, जाम्बवान, गज, जटायूगीध, तुलाधार, वैश्य, व्याध, कुब्जा, व्रजगोपियें और यज्ञपत्नी, और भी अनकों ने सत्संग के कारण मेरे पदको प्राप्तकिया है ॥ ५—६ ॥ इन्होंने श्रुति का पाठ नहीं किया, बडे महात्माओं की उपासना भी नहीं की, व्रताचरण व तपस्याभी नहींकी, केवल साधुसंगरूप मेरेही संग वश मुझको प्राप्तकिया है ॥ ७ ॥ गोपियें, गौऐं, यमलार्जुनादि, मृगगण, कालियादि नागगण, और दूसरे भी अनेक मूर्खों ने केवल प्रीति द्वाराही कृतार्थ होकर स्वच्छन्दता से मुझको प्राप्त किया है ॥ ८ ॥ जिस स्वरूपको यत्नवान होनेपरभी योग, ज्ञान, दान, व्रत, तपस्या, यज्ञ, व्याख्या, वेदाध्ययन, और सन्यास द्वारा मनुष्य मुझको नहीं पासकते। उस स्वरूप को सत्संगद्वारा यह पूर्वोक्त प्राणी प्राप्तहुए हैं ॥ ९ ॥ जब अक्रूर राम समेत मुझ को मथुरा ले गये तब दृढ प्रेमके वशसे मुझमें अनुरक्त हृदय, मेरे वियोग के दुःखसे अत्यन्त दुःखी गोपियोंको और कुछभी पदार्थ सुखदायी न जानपडा ॥ १० ॥ उन्होंने वृन्दावन में गौचरानेवाले मुझ प्यारे के साथ जिन २ रात्रियों को आधे क्षणकी समान बिताया था; अहा ! मेरे विरह से उनको वही रात्रियें कल्पकी समान होगईं ॥ ११ ॥ जैसे समाधि के समय मुनिजनोंको नाम और रूपका आभास नहीं रहता वैसेही आसक्ति के कारण मुझमें चित्त लगाये हुए उन गोपियों को भी निकटस्थ और दूरस्थ अपने देह का भान न रहा। किंतु जैसे समुद्र में नदियें मिलजाती हैं वैसेही मेरे स्वरूप में लीन होगई ॥ १२ ॥ इस प्रकार उनकी केवल मुझमें इच्छा

मणं जारमस्वरूपविदोऽबलाः । ब्रह्ममांपरमंप्रापुः संगाच्छतसहस्रशः ॥ १३ ॥ तस्मात्त्वमुद्धवोत्सृज्य चोदनांप्रतिचोदनाम् । प्रवृत्तंचनिवृत्तंच श्रोतव्यंश्रुतमेवच । ॥ १४ ॥ मामेकमेव शरणमात्मानं सर्वदेहिनाम् । याहिसर्वात्मभावेन मयास्याह्यकुतोभयः ॥ १५ ॥ उद्धवउवाच । संशय.शृण्वतोवाचं तवयोगेश्वरेश्वर । ननिवर्ततआत्मस्थो येनभ्राम्यतिमेमनः ॥ १६ ॥ श्रीभगवानुवाच । सएषजीवो विवरप्रसूतिः प्राणेनघोषेणगुहांप्रविष्टः । मनोमयंसूक्ष्ममुपेत्यरूपं मात्रास्वरोवर्णइतिस्थविष्ठः ॥ १७ ॥ यथाऽनलः खेऽनिलबन्धुरूष्मा बलेनदारुण्यधिमथ्यमानः । अणुः प्रजातोहविषासमिध्यते तथैवमेव्यक्तिरियंहिवाणी ॥ १८ ॥ एवंगदिः कर्मगतिर्विसर्गोघ्राणोरसोदृक्स्पर्शःश्रुतिश्च । संकल्पविज्ञानमथाभिमानः सूत्रंरजः सत्वतमोविकारः ॥ १९ ॥ अयंहि जीवस्त्रिवृदब्जयोनिरव्यक्त एकोवयसासआद्यः । विश्लिष्टशक्तिर्बहुधेवभाति बीजानियोनिंप्रतिपद्ययद्वत् ॥ २० ॥ यस्मिन्निदंप्रोतमशेषमोतंपटोयथातन्तुवितानसंस्थः । यएषसंसारतरु.पुराण. कर्मात्मकः पुष्पफलेप्रसूते ॥ २१ ॥ द्वेअस्यबीजे शतमूलस्त्रिनाल. पंचस्कन्धः पंचरसप्रसूतिः ॥ दशैकशाखो द्विसुपर्णनीडस्त्रिवल्कलोद्विफलोऽर्कंप्रविष्टः॥२२॥अदन्तिचैकंफलमस्यगृध्रा ग्रामेचराएकमरण्यवासाः । हंसायएकं बहुरूपमिज्यैर्मायामयं वेद सवेदवेदम् ॥

थी वे स्वरूप को नहीं जानती थीं, तौ भी इस प्रकार सहस्र सहस्र स्त्रियें साधुसंग के कारण, उपपातिकी बुद्धि होने परभी परब्रह्म स्वरूप मुझको प्राप्त हुईथीं ॥ १३ ॥ अतएव हे उद्धव ! श्रुति, स्मृति, निवृत्ति, और श्रोतव्य तथा श्रुत विषयों को छोड सब प्राणियों के आत्मरूप केवल मेरीही एकाग्रभक्ति से शरणले मेरे द्वाराही निडरहो ॥ १४—१५ ॥ उद्धवजी ने कहा कि—हे योगेश्वरों के ईश्वर ! जिन सन्देहों द्वारा मन अत्यन्त भ्रमित होरहा है वह मेरा आत्मा में स्थित हुआ सन्देह आपके वचन सुनकर इससमयभी नहीं दूरहुआ ॥ १६ ॥ श्रीभगवानने कहाकि—चक्र समुदाय के मध्यमें जिसका प्रकाश है वेही अपरोक्ष परमेश्वर नाद युक्त प्राणों समेत गुफामें प्रवेशकर सूक्ष्ममनोमय रूप को प्राप्तहो मात्रा, स्वर और वर्ण,—इस रूपसे अत्यन्त स्थूल होते रहते हैं ॥१७॥ जैसे आकाश में स्थित उष्मारूप अग्नि बलपूर्वक काष्ठ में.मथन करनेसे पवनकी सहायता से छोटी चिनगारी रूप प्रगट होताहै फिर वही घृतके योग से बढजाताहै, इसहीप्रकार यह वाक्यभी मेरा प्रकाश है॥१८॥इसहीप्रकार वचन,कर्म,गति,विसर्जन,घ्राण,रसन,दर्शन,स्पर्शन, श्रवण,संकल्प,विज्ञान,अभिमान,सूत्र और सत्व,रज तथा तमोगुणका विकार मेरा प्रकाश है॥१९॥ यह परमेश्वर आदि में अव्यक्त व एकमात्र थे, बीज जैसे क्षेत्रको पाकर अनेक प्रकारका होजाता है वैसेही वह भी सब शक्तियों से विभक्त हो मानों .अनेकों रूपसे प्रतीत होते हैं क्योंकि वह त्रिगुणके आश्रय पद्मयोनि हैं ॥ २० ॥ ॥ जैसे वस्त्र तन्तुओं में ओत प्रोतभाव से रहता है, और तन्तुओं से अलग नहीं है, ऐसेही यह जगत् ईश्वर में है, ईश्वर से भिन्न नहीं है । यह अनादि प्रवृत्ति स्वभाव वाला संसाररूपी वृक्षभोग और मुक्तिरूपदो फूल और फल उत्पन्न करता है ॥ २१ ॥ पुण्य और पाप इस वृक्षके दो बीज हैं, अपरिमित वासनायें इसकी जड हैं, तीनगुण इस के काण्ड; पंचभूत इसके स्कंध; और शब्द स्पर्शादि इसके पांचरस हैं ग्यारह इन्द्रियें इसकी शाखा, जीवात्मा और परमात्मारूप दो सुन्दर पक्षवाले पक्षी, इसमें घोसला बनाये हुए हैं; वात, पित्त और कफ इसके तीन वल्कल हैं; सुख दु ख दो पकेहुए फल हैं यह वृक्ष सूर्य मण्डलतक फैलाहुआ है ॥ २२ ॥ गृहस्थकामी इसका दु खरूपफल और वनवासी योगी सुखरूप फलका भक्षण करते हैं । जो पूज्यगुरुकी सहायता से एककी मायामयहोने के कारण बहुतरूपसे जाने वही

॥ २३ ॥ एवंगुरूपासनयैकभक्त्या विद्याकुठारेणशितेनधीरः । विवृश्च्यजीवाशयमप्रमत्तः संपद्य चात्मानमथ त्यजास्त्रम् ॥ २४ ॥

इति श्रीमद्भा० महा० एकाद० द्वादशोऽध्यायः ॥ १२ ॥

श्रीभगवानुवाच । सत्वंरजस्तमइति गुणाबुद्धेर्नचात्मनः । सत्वेनान्यतमौ हन्यात्सत्वंसत्वेनचैवहि ॥ १ ॥ सत्वाद्धर्मोभवेद्वृद्धात्पुंसो मद्भक्तिलक्षणः । सात्विकोपासयासत्वं ततोधर्मःप्रवर्तते ॥ २ ॥ धर्मोरजस्तमो हन्यात्सत्ववृद्धिरनुत्तमः । आशुनश्यतितन्मूलो ह्यधर्मउभयेहते ॥ ३ ॥ आगमोऽपःप्रजादेशः कालःकर्मचजन्मच । ध्यानंमन्त्रोऽथसंस्कारो दशैतेगुणहेतवः ॥ ४ ॥ तत्तत्सात्विकमेवैषां यद्यद्वृद्धाःप्रचक्षते । निन्दन्तितामसं तत्तद्राजसंतदुपेक्षितम् ॥ ५ ॥ सात्विकान्येवसेवेत पुमान्सत्वविवृद्धये । ततोधर्मस्ततोज्ञानं यावत्स्मृतिरपोहनम् ॥ ६ ॥ वेणुसंघर्षजोवह्निर्दग्ध्वा शाम्यतितद्वनम् । एवंगुणव्यत्ययजो देहः शाम्यति तत्क्रियः । ॥ ७ ॥ उद्धव उवाच । विदन्तिमर्त्याःप्रायेण विषयान्पदमापदाम् ॥ तथापिभुंजते कृष्ण तत्कथंश्वखराजवत् ॥ ८ ॥ श्रीभगवानुवाच । अहमित्यन्यथाबुद्धिः प्रमत्तस्ययथाहृदि । उत्सर्पतिरजोघोरं ततोवैकारिकंमनः ॥ ९ ॥ रजोयुक्तस्यमनसः संकल्पःसविकल्पकः । ततःकामोगुणध्यानाद्दुःसहः स्याद्धिदुर्मतेः ॥ १० ॥ करोतिकामवशगः कर्माण्यविजितेन्द्रियः ॥ दुःखोदर्काणि संपश्यन्रजोवेगविमोहितः ॥ ११ ॥ रजस्तमोभ्यां यदपि विद्वान्विक्षिप्तधीःपुनः । अतन्द्रितोमनो युंजन्दो

तत्वार्थ का जानने वाला है ॥ २३ ॥ अतएव तुम इस प्रकार एकांत.भक्तिसे गुरुकी उपासना से उत्पन्नहुए.भक्तियोग द्वारा तीक्ष्णहुए विद्यारूपी कुल्हाडे से सावधानहो जीवोपाधिलिंग शरीर का छेदनकर परमात्मा में लीनहो सब साधनाओं को छोडदो ॥ २४ ॥

इतिश्रीमद्भा०महा०एकादशस्कंधेसरलाभाषाटीकायांद्वादशोऽध्यायः ॥ १२ ॥

श्रीभगवान बोले कि—सत्व, रज और तम यह समस्त गुण बुद्धिके हैं;—आत्माके नहीं । सत्व द्वारा अन्य दो गुणोंको और सत्वको सत्व मारना चाहिये ॥ १ ॥ बढ़े हुए सत्वसे मनुष्यको मेरा भक्तिरूप धर्म उत्पन्न होता है; सात्विक पदार्थों के सेवन से सत्वकी वृद्धि होती है; उससे फिर धर्म में प्रवृत्ति होती है ॥ २ ॥ सत्वसे बढ़े हुए सर्वोत्तम धर्म द्वारा रज और तमका नाश होता है उनके नाश होतेही उनकी जड़ अधर्मका शीघ्रही नाश होजाता है ॥ ३ ॥ शास्त्र, जल, जन, देश, काल, कर्म, जन्म, ध्यान, मंत्र और संस्कार ये दशों पदार्थ तीनो गुणोंकी वृद्धिके कारण हैं ॥ ४ ॥ इन पदार्थोंमें से वृद्ध पुरुष जिनकी प्रशंसा करते हैं वही सात्विक हैं जिनकी निंदा करते हैं वह तामस हैं, और जिनकी निंदा व प्रशंसा कुछकी नहीं करते वह राजस हैं ॥ ५ ॥ सत्वके बढ़ाने के निमित्त मनुष्यको सात्विक शास्त्रादिकोंका सेवनकरना चाहिये. इससे धर्म होताहै और स्मृति के गुणोंके नाश पर्यंत ज्ञानकी उत्पत्ति होती है ॥ ६ ॥ बांससे उत्पन्न हुई अग्नि उस बनको नाश करके शान्ति होती है; ऐसेही गुणों से उत्पन्न हुआ देह निज से उत्पन्न हुई विद्या द्वारा गुणों को नाश करके आपभी शांत होजाता है ॥ ७ ॥ उद्धवजी ने कहा कि—हे कृष्ण ! मनुष्य अनेकों विषयों को आपत्ति का स्थान विचारते हैं; तोभी क्यों कुत्ते, गधे और बकरेकी समान उन सब विषयोंका उपभोग करते हैं ॥ ८ ॥ भगवानने कहा कि—अविवेकी मनुष्यके हृदयमें जो 'मैं' यह मिथ्याज्ञान उत्पन्न होता है उससे सत्व प्रधान मनका दुःखात्मक रजोगुणसे सम्बंध होता है ॥ ९ ॥ रजो युक्त मनसे संकल्प विकल्प उत्पन्न होते हैं; इस विषय चिन्ता से उत्पन्न हुए दुःसह कामकी प्रवृत्ति होती है ॥ १० ॥ रजोगुण से मोहित कामके वशीभूत, अजितेन्द्रिय, दुर्बुद्धि मनुष्यकर्मोंको दुःखदायी समझकरभी उनको करतारहता है ॥ ११ ॥ रजोगुणसे और तमोगुणसे मूढ़

पदृष्टैर्नसज्जते॥१२॥अप्रमत्तोऽनुयुञ्जीतमनोमय्यर्पयञ्छनैः। अनिर्विण्णोयथाकालं जितश्वासोजितासनः ॥१३॥ एतावान्योगआदिष्टो मच्छिष्यैः सनकादिभिः सर्वतो मनआकृष्य मय्यद्धाऽऽवेश्यतेयथा॥१४॥उद्धवउवाच ॥ यदात्वंसनकादिभ्यो येन रूपेणकेशव । योगमादिष्टवानेतद्रूपमिच्छामिवेदितुम्॥१५॥श्रीभगवानुवाच॥ पुत्रा हिरण्यगर्भस्य मानसाःसनकादयः । पप्रच्छुःपितरंसूक्ष्मां योगस्यैकान्तिकींगतिम् ॥ १६ ॥ सनकादयऊचुः ॥ गुणेष्वाविशतेचेतो गुणाश्चेतसिचप्रभो । कथमन्योन्यसंत्यागो मुमुक्षोरतितितीर्षोः ॥ १७ ॥ श्रीभगवानुवाच ॥ एवंपृष्टोमहादेवः स्वयंभूर्भूतभावनः । ध्यायमानःप्रश्नबीजं नाभ्यपद्यतकर्मधीः ॥ १८ ॥ समाम चिन्तयद्देवः प्रश्नपारतितीर्षया । तस्याहंहंसरूपेण सकाशमगमंतदा ॥ १९ ॥ दृष्ट्वामांतउपव्रज्य कृत्वापादाभिवन्दनम् । ब्रह्माणमग्रतःकृत्वा पप्रच्छुःकोभवा निति ॥ २० ॥ इत्यहंमुनिभिःपृष्टस्तत्त्वजिज्ञासुभिस्तदा । यदवोचमहंतेभ्यस्तदु द्धवनिबोधमे ॥ २१ ॥ वस्तुनोयद्यनानात्व आत्मनःप्रश्नईदृशः । कथंघटेतवोविप्रा वक्तुर्वामेकआश्रयः ॥ २२ ॥ पञ्चात्मकेषुभूतेषु समानेषुचवस्तुतः । कोभवानि तिवःप्रश्नो वाचारम्भोह्यनर्थकः ॥ २३ ॥ मनसावचसादृष्ट्या गृह्यतेऽन्यैरपीन्द्रि यैः । अहमेवनमत्तोऽन्यदितिबुध्यध्वमञ्जसा ॥ २४ ॥ गुणेष्वाविशतेचेतो गुणाश्च तसिचप्रजाः । जीवस्यदेहउभयं गुणाश्चेतोमदात्मनः ॥ २५ ॥ गुणेषुचाविशच्चि

बुद्धि होकरभी विद्वानमनुष्य उसमेंदोषदेख निरालस्यभावसे चित्तकीवृत्तिकोरोककरउसमें लिप्तनहीं होता ॥ १२ ॥ वह सावधान और आलस्य रहित होकर समयानुसार जितश्वास और जितासन हो मुझ में चित्तलगाय धीरे २ समाधिस्थ होता है ॥ १३ ॥ मनके समस्त विषयों का नाशकर साक्षात मुझमेंही मनको लगादेवे, इसी मुख्य योग का मैंने अपने शिष्य सनकादिकों को उपदेश किया है ॥ १४ ॥ उद्धव जीने कहा कि—हेकेशव ! आपने जिस समय जिसरूप से इस योग का सनकादिक ऋषियों से उपदेश कियाथा मैं उसी रूप और उसीसमयके जाननेका अभिलाषी हूं ॥ १५ ॥ श्रीभगवान ने कहा कि–ब्रह्माजी के मनसे उत्पन्नहुए सनकादिकऋषियों ने एकसमय पिता से योगसम्बन्धी दुर्ज्ञेय परमतत्वका पूछा ॥ १६ ॥ योगियों ने कहा,–हेप्रभो ! चित्त सब विषयों में और विषय मनमें प्रवेश करते हैं । अब विषयों का त्यागनेवाला मुमुक्षु मनुष्य परस्पर इन दोनों को किसप्रकार पृथक् करे ? ॥ १७ ॥ श्रीभगवान ने कहा कि—भूतभावन भगवान ब्रह्माजी इसप्रकार जिज्ञासितहो विचारने लगे परन्तु उनकी बुद्धि दूसरे कामों में लगीथी इससे विचार करने परभी इस प्रश्न के सार को न समझ सके ॥ १८ ॥ उन देव ने प्रश्नसे पार होनेके अभिलाषीहो मेरा ध्यान किया; मैं उस समय हंस रूप से उनके निकटआया ॥ १९ ॥ वेसबमुझ को देखकर उठ खड़ेहुए और ब्रह्माको आगेकर चरणों की वन्दना करके पूछनेलगे कि आप कौन हो ? ॥ २० ॥ हेउद्धव ! जब तत्त्व जाननेवाले मुनियों ने मुझ से इसप्रकार पूछा तब जोकुछमैंने उससे कहा था वह सुनो ॥ २१ ॥ हंसने कहा;–हे विप्रो ! तुम्हारी यह प्रश्न यदि आत्मा के सम्बन्धी हैं, तो जब परमात्म-स्वरूप सत्पदार्थ का अनेकत्व नहीं है तब इसप्रकार का प्रश्नही होना असम्भव है । मैं किसका आश्रय करके उत्तरदूं ॥ २२ ॥ और जो यदि पञ्चभूत संबन्धी प्रश्न है तो जब पंचात्मक समस्त भूत वास्तव मेंही अभिन्न हैं, तब 'आप कौनहो, ' तुम्हारा यह प्रश्न सर्वथा निरर्थकहै ॥ २३ ॥ मन, वाक्य, दृष्टि और अन्यान्य इन्द्रियों द्वाराभी जो२ संगृहीत होता है वह सबही मैं हूं; मुझमें अन्य कुछ नहीं है,- इसको तुम तत्त्व विचारसे समझ देखो । ॥ २४ ॥ हे पुत्रो ! विषयोंमें प्रवेश करने वाला चित्त और चित्तमें प्रवेश करने वाले विषय यह दोनोंही मेरे आत्मा जीव की उपाधि हैं ॥ २५ ॥ बारम्बार गुणों के सेवन करने से जो चित्त

त्तमभीक्ष्णंगुणसेवया । गुणाश्चचित्तप्रभवा मद्रूपउभयंत्यजेत् ॥ २६ ॥ जाग्रत्स्व
प्न सुषुप्तं च गुणतोबुद्धिवृत्तयः । तासांविलक्षणोजीवः साक्षित्वेनविनिश्चितः२७॥
यर्हिसंसृतिबन्धोऽयमात्मनो गुणवृत्तिदः । मयितुर्ये स्थितोजह्यात्त्यागस्तद्गुणचेत
साम् ॥ २८ ॥ अहंकारकृतं बन्धमात्मनोऽर्थविपर्ययम् ॥ विद्वान्निर्विद्य संसारचि
न्तांतुर्ये स्थितस्त्यजेत् ॥ २९ ॥ यावन्नानार्थधीः पुंसोननिवर्तेतयुक्तिभिः । जाग
र्त्यपिस्वपन्नज्ञः स्वप्ने जागरणंयथा ॥ ३० ॥ असत्त्वादात्मनोऽन्येषां भावानांतत्कृ
ताभिदा । गतयोहेतवश्चास्य मृषास्वप्नदृशो यथा ॥ ३१ ॥ योजागरे बहिरनुक्षण
धर्मिणोऽर्थान्भुंक्ते समस्तकरणैर्हृदि तत्सदृक्षान् । स्वप्नेसुषुप्तउपसंहरते सएकःस्मृ
त्यन्वयात्त्रिगुणवृत्तिदृगिन्द्रियेशः ॥ ३२ ॥ एवंविमृश्यगुणतोमनसस्त्र्यवस्था म
न्मायया मयिकृताइतिनिश्चितार्थाः । संछिद्यहार्दमनुमानसदुक्तितीक्ष्ण ज्ञानासि
नाभजतमाऽखिलसंशयाधिम् ॥ ३३ ॥ ईक्षेतविभ्रममिदंमनसोविलासं दृष्टंविन
ष्टमतिलोलमलातचक्रम् । विज्ञानमेकमुरुधेवविभातिमाया स्वप्नस्त्रिधागुणविसर्ग
कृतोविकल्पः३४ दृष्टिंततःप्रतिनिवर्त्यनिवृत्ततृष्णस्तूष्णींभवेन्निजसुखानुभवोनिरी
हः । संदृश्यतेक्वचयदीदमवस्तुबुद्ध्या त्यक्तंभ्रमायनभवेत्स्मृतिरानिपातात् ३५॥
देहंचनश्वरमवस्थितमुत्थितंवा सिद्धोनपश्यतियतोऽध्यगमत्स्वरूपम् । दैवादपे

गुणों में प्रविष्ट होता है; और वासना रूप से चित्त में उत्पन्नहुए गुण इन दोनों को मत्स्वरूप हो त्याग करना चाहिए ॥ २६ ॥ जागरण स्वप्न और सुषुप्ति यह अवस्थायें बुद्धिकी वृत्तियें हैं और जो गुणों से उत्पन्न हुई हैं; जीव तो उन अवस्थाओं का साक्षी है इसस वह अवस्थाओंसे रहित है ऐसा जानना ॥ २७ ॥ बुद्धि का बन्धनही आत्माकी वृत्ति का सञ्चालक है; अतएव तुरीय स्वरूप मुझ में अवस्थितहो इस बुद्धिके बंधन का त्याग करना चाहिए ॥ २८ ॥ जबऐसा होता है तभी गुण और चित्त परस्पर पृथक् होजाते हैं । अहंकार से उत्पन्नहुए बंधन को आत्मा के अनर्थ का मूल जान व सावधानहो मुझ तुरीय स्वरूपमें अवस्थिति कर अहंज्ञानका त्याग दे ॥ २९ ॥ जबतक युक्तिद्वारा मनुष्यकी नानात्व बुद्धि दूर न होवे, तबतक स्वप्नमें जागरणकीसमान भली प्रकार से दर्शन न होनेपर उस जागने को भी निद्राही जानो; ॥३०॥ कोई पदार्थ आत्मासे भिन्न नहीं है, देहादि पदार्थ समूह उसके भेद हैं जिसप्रकार स्वप्न सम्बन्ध देहादिकके कियेहुए भेद, फल और कर्म मिथ्याहैं एसही आत्माके जो गुण पूर्व कहेगये हैं वे सबमिथ्याहैं ॥३१॥ जो जागरण कालमें बाहरभागमें समस्त इन्द्रियोंद्वारा क्षणभंगुर विषयोंका भोगकरताहै जो स्वप्नावस्था में हृदयमें उसके अनुसार सबविषयोंका भोग करताहै और जो सुषुप्ति समयमें सब विषय भोगों से रहित रहताहै वह एकहै; स्मृतिका सम्बन्ध रहनसे वह तीनोंअवस्थाओं का दृष्टाहै ॥ ३२ ॥ मनकी यह तीन अवस्थायें मेरीमायाके गुणोंद्वारा मुझमेंही रचीहुई हैं,—इसप्रकारका विचार करते हुए तुम आत्मरूप अर्थका निश्चयकर तुम अनुमान और सदुक्तियोगसे तीक्ष्ण ज्ञान खड्ग द्वारा समस्त संशयों के आश्रय अहंकार का नाशकर हृदय में स्थित मेरा भजन करो ॥ ३३ ॥ मनद्वारा प्रकाशित, दृष्ट, नाशवान अलात—चक्र (बनेठी) की समान अत्यन्त चलायमान इस विश्व को विभ्रम स्वरूप से देखे; एक विज्ञानही बहुत रूप से प्रकाशित होता है; अतएव गुणों के परिणाम से उत्पन्नहुए तीनों प्रकारका संकल्पही माया मात्र है कि जैसे स्वप्न ॥३४॥ दीखते हुए विश्व से दृष्टि को खींचकर तृष्णा को त्याग चेष्टाको छोड अपने सुखानुभव में तत्पर होना चाहिए । यदि आहार आदि आवश्यक कार्यों में द्वैत देखने में आवे तोभी ' यह पदार्थ नहीं है ' यह विचार उसको पहिले सेही त्याग दिया तो भ्रम का कारण नहीं होसकता; शरीर के नाशहोने तक स्मृति रहती है ॥ ३५ ॥ जिसके द्वारा स्वरूप को जानसकते हैं वह नाशवान देह बैठाहो,

तमुतदैववशादुपेतं वासोयथापरिकृतंमदिरामदान्धः ॥ ३६ ॥ देहोऽपिदैववशगःखलुकर्मयावत् स्वारम्भकंप्रतिसमीक्षतएवसासुः । तंसप्रपंचमधिरूढसमाधियोगः स्वाप्नंपुनर्नभजतेप्रतिबुद्धवस्तुः ॥ ३७ ॥ मयैतदुक्तंवोविप्रा गुह्यंयत्सांख्ययोगयोः । जानीतमागतंयज्ञं युष्मद्धर्मविवक्षया ॥ ३८ ॥ अहंयोगस्यसांख्यस्य सत्यस्यर्तस्यतेजसः । परायणंद्विजश्रेष्ठाः श्रियःकीर्तेर्दमस्यच ॥ ३९ ॥ मांभजन्ति गुणाःसर्वे निर्गुणंनिरपेक्षकम् । सुहृदंप्रियमात्मानं साम्याऽसङ्गादयोगुणाः ॥ ४० ॥ इतिमेछिन्न संदेहा मुनयःसनकादयः । सभाजयित्वापरया भक्त्यागृणतसंस्तवैः ॥ ४१ ॥ तैरहंपूजितःसम्यक् संस्तुतःपरमर्षिभिः । प्रत्येयायस्वकंधाम पश्यतः परमेष्ठिनः ॥ ४२ ॥

इतिश्री मद्भागवते महापुराणे एकादशस्कंधे त्रयोदशोऽध्यायः ॥ १३ ॥

उद्धवउवाच ॥ वदन्तिकृष्णश्रेयांसि बहूनिब्रह्मवादिनः । तेषांविकल्पप्राधान्यमुताहोएकमुख्यता ॥ १ ॥ भवतोदाहृतःस्वामिन् भक्तियोगोनपेक्षितः । निरस्यसर्वतःसंगं येनत्वय्याविशेन्मनः ॥ २ ॥ श्रीभगवानुवाच ॥ कालेननष्टाप्रलये वाणीयंवेदसंज्ञिता । मयादौब्रह्मणेप्रोक्ता धर्मोयस्यांमदात्मकः ॥ ३ ॥ तेनप्रोक्ता स्वपुत्राय मनवेपूर्वजायसा । ततोभृग्वादयोऽगृह्णन् सप्तब्रह्ममहर्षयः ॥ ४ ॥ तेभ्यःपितृभ्यस्तत्पुत्रा देवदानवगुह्यकाः । मनुष्याःसिद्धगन्धर्वाः सविद्याधरचारणाः ॥ ५ ॥ किंदेवाःकिन्नरानागा रक्षःकिंपुरुषादयः । बह्वयस्तेषांप्रकृतयो रजः

खड़ाहो, दैवाधीन से स्थानें भ्रष्टहीहो,तथा स्थान से चाहे निवृत्तहीहो;परन्तु जैसे मदिरा के मदसे अन्धा मनुष्य अपने छूटेहुएवस्त्रों को भी नहीं देखपाता·उसी प्रकार सिद्धमनुष्य भी उसको (देह को) नहीं देखते ॥ ३६ ॥ शरीरभी दैव के वशवर्त्तीहो अपने प्रारब्ध कर्म के हेतु चलताहुआ प्राण इंद्रिययुक्तहो जीवित रहता है । जो समाधि योग को प्राप्त हुए हैं अतएव परमार्थ वस्तु को जानसकते हैं वह स्वप्न की समान प्रपंचवाली इस देह में आसक्त नहीं होते ॥ ३७ ॥ हेविप्रो! सांख्ययोग का रहस्य विषय यही है, मैंने तुमसे कहा;मुझको विष्णुजानो तुमसे धर्म कहनेकोही मैं आयाहूं ॥ ३८ ॥ हे द्विजश्रेष्ठो ! मैं योग, ज्ञान, धर्मप्रमाण, धर्मानुष्ठान, तेज, श्री, कीर्त्ति और दमकी परम गतिहूं ॥ ३९ ॥ मैं निर्गुण, अपेक्षा रहित, सबकाबन्धु, प्रिय और आत्मारूपईश्वर हूं मुझमें समता और असंगादि नित्यगुण हैं इससे मेरे वचनों में दृढ़ विश्वासरक्खो ॥ ४० ॥ मेरे द्वारा इसप्रकार से संदेह रहितहो सनकादि मुनियों ने परम भक्तिसे पूजाकर मेरी नानाप्रकारकी स्तुति कीथी ॥ ४१ ॥ मैं इन सब परम ऋषियों से भली प्रकार पूजित और सम्मानितहो ब्रह्माके देखते २ अपने धामको लौटगयाथा ॥ ४२ ॥

इतिश्रीमद्भा०महा०एकादशस्कन्धेसरलाभाषाटीकायांत्रयोदशोऽध्याय: ॥ १३ ॥

उद्धवजी ने कहा—हे कृष्ण ! ब्रह्मवादीलोग मुक्ति के साधन का निर्देश किया करते हैं उन में से क्या एकही साधन प्रधान है ॥ १ ॥ हे स्वामिन् ! आपने निष्काम भक्तियोग कहा है; इसही के द्वारा मन निःसंगहो आपमें प्रविष्ट होता है ॥ २ ॥ श्रीभगवान ने कहा—प्रलयकाल में नष्ट होने वाली मेरी वाणी कि जो वेद में पाई जाती है उसको मैंने पहिले ब्रह्माजी से कहाथा; जिसके द्वारामुझमें चित्तलगै वही धर्म इन सब में प्रधान है । वही धर्म ब्रह्माजीने अपने जेठे पुत्र मनुसे कहाथा; उनसे भृगुआदि सप्त ब्रह्मर्षियों ने ग्रहणकिया ॥ ३—४ ॥ उन सब प्रजापतियों के निकटसे उनके पुत्र देव, दानव, गुह्यक, मनुष्य, सिद्ध, गन्धर्व, विद्याधर, चारण, किंदेव, किन्नर, नाग, राक्षस और किम्पुरुषादिकों को वह प्राप्त हुआ । रज, सत्व और तमोगुण से उत्पन्न

रजस्तमोभुवः ॥ ६ ॥ याभिर्भूतानि भिद्यन्ते भूतानांमतयस्तथा। यथाप्रकृतिसर्वे षां चित्रावाचःस्रवन्तिहि ॥ ७ ॥ एवंप्रकृतिवैचित्र्याद्भिद्यन्तेमतयोनृणाम्। पार म्पर्येणकेषांचित् पाखण्डमतयोपरे ॥ ८ ॥ मन्मायामोहितधियः पुरुषाःपुरुषर्षभ। श्रेयोवदन्त्यनेकान्तं यथाकर्मयथारुचि ॥ ९ ॥ धर्ममेकेयशश्चान्ये कामंसत्यंदमं शमम्। अन्येवदन्तिस्वार्थंवा ऐश्वर्यंत्यागभोजनम् ॥१०॥ केचिद्यज्ञतपोदानं व्रता निनियमान्यमान्। आद्यन्तवन्तएवैषां लोकाःकर्मविनिर्मिताः। दुःखोदर्कास्तमोनि ष्ठाः क्षुद्रानन्दाःशुचार्पिताः ॥ ११ ॥ मय्यर्पितात्मनःसभ्य निरपेक्षस्यसर्वतः। म यात्मनासुखंयत्तत् कुतःस्याद्विषयात्मनाम् ॥ १२ ॥ अकिंचनस्यदान्तस्य शान्त स्यसमचेतसः। मयासंतुष्टमनसः सर्वाःसुखमयादिशः ॥ १३ ॥ नपारमेष्ठ्यंनम हेन्द्रधिष्ण्यं नसार्वभौमंनरसाधिपत्यम्। नयोगसिद्धीरपुनर्भवंवा मय्यर्पितात्मे च्छतिमद्विनान्यत् ॥ १४ ॥ नतथामेप्रियतमआत्मयोनिर्नशंकरः। नचसंकर्षणोन श्रीर्नैवात्माचयथाभवान् ॥ १५ ॥ निरपेक्षंमुनिंशान्तं निर्वैरंसमदर्शनम्। अनुव्र जाम्यहंनित्यं पूयेयेत्यंघ्रिरेणुभिः ॥ १६ ॥ निष्किंचनामय्यनुरक्तचेतसः शान्ता महान्तोऽखिलजीववत्सलाः। कामैरनालब्धधियोजुषन्ति यत्तन्नैरपेक्ष्यंनविदुः सुखंमम ॥ १७ ॥ बाध्यमानोऽपिमद्भक्तो विषयैरजितेन्द्रियः। प्रायःप्रगल्भया भक्त्या विषयैर्नाभिभूयते ॥१८॥ यथाग्निःसुसमृद्धार्चिः करोत्येधांसिभस्मसात्।

सुख की प्राप्ति होती है ॥ २३ ॥ भिक्षाके निमित्त नगर, गांव, व्रज और सार्थ में प्रवेश कर सदैव पवित्र देश नदियां, पर्वत, वन व आश्रमोंवाली पृथ्वी में अकेलाही भ्रमण करे ॥ २४ ॥ वानप्रस्थों के आश्रमों से बारम्बार भिक्षालावे क्योंकि शिलवृत्ति के द्वारा प्राप्तहुए अन्नके भोजनसे अतःकरण शुद्धहो मोह की निवृत्ति होती है मोह की निवृत्ति से मोक्ष मिलती है ॥ २५ ॥ देख पड़नेवाली मिष्टान्नादिक वस्तु को वास्तविक नहीं समझना; क्योंकि यह नाशवान हैं,अतएव इस लोक और परलोक की आसक्ति को छोड़ उन लोगों के निमित्त जो काम किये जाते हैं उनसे निवृत्त रहना ॥ २६ ॥ चित्त, वाक्य और प्राण द्वारा आत्मा में बिरचित इस जगत को; अहं-कारास्पद शरीर को और इससे उत्पन्नहुए समस्त सुखों को " माया " विचार उनको त्याग कर आत्मनिष्ठ होवे और उनका स्मरण भी न करे ॥ २७ ॥ मुमुक्षु होकर जो ज्ञाननिष्ठ अथवा मुक्ति विषय में निरपेक्ष मेरे भक्त हैं वह चिह्नों समेत समस्त आश्रमों को छोड़देवें और जितना बनपड़े उतना आश्रम सम्बन्धी धर्मों का पालन करें ॥ २८ ॥ विवेकी होकर भी बालककीसमान क्रीड़ा करे; निपुण होकरभी जडकी समान व्यवहार करे, पण्डित होकरभी उन्मत्तकी समान बात करे; वदनिष्ठ होकरभी नियम शून्यभावसे बैल की भांति स्थिति में रहे ॥ २९ ॥ कर्मकाण्ड का व्याख्यान करे; श्रुति स्मृति के विरुद्ध कार्य भी न करे और केवल तर्कपरायण भी न होवे; प्रयो-जन रहित विवाद में किसी पक्षकाभी अवलम्बन न करे ॥३०॥ किसी मनुष्य से उद्वेग नहींरक्खे धैर्य रखकर किसी को उद्वेग नहीं देवे । सब दुर्वाक्यों का सहनकरे, किसी का तिरस्कार न करे, इस देह के उद्देश से किसी के साथ शत्रुता न करे ॥ ३१ ॥ जिसप्रकार एक चन्द्रमा अनेकों जल पात्रों में अवस्थित रहता है उसही प्रकार केवल एक परमात्मासब प्राणियों में और अपनी देह में स्थित रहता है; समस्त प्राणी एकात्मक हैं ॥ ३२ ॥ उस प्राणी को समय २ में भोजन न मिलने पर कातर न होना चाहिये और पाने से प्रसन्न भी न होना चाहिए । दोनोंही दैवाधीन हैं ॥ ३३ ॥ आहार के निमित्त प्रयत्न करना, क्योंकि प्राणका धारण करना अवश्य है क्योंकि प्राण के धारण करनेसेही तत्त्व का विचार होता है, तत्त्वज्ञ होनेसे मोक्ष मिलती है ॥ ३४ ॥ मुनि को दैवेच्छासे प्राप्तहुए अन्नका चाहे वह ऊंचहो या नीच खाना चाहिए, इसी प्रकार वस्त्र और शय्या का भी कि जैसी प्राप्तहो वैसा व्यवहार करे ॥ ३५ ॥ ज्ञाननिष्ठ मनुष्य को वेदानुसारशौच

यमाऽज्ञानी यथाऽहंलीलयेश्वरः ॥ ३६ ॥ नहितस्यविकल्पाख्या याचमद्वीक्षया हता । आदेहान्तात्क्वचित्ख्यातिस्ततःसंपद्यतेमया ॥ ३७ ॥ दुःखोदर्केषुकामेषु जातनिर्वेदआत्मवान् । अजिज्ञासितमद्धर्मो गुरुंमुनिमुपाव्रजेत् ॥३८॥ तावत्परिचरेद्भक्तः श्रद्धावाननसूयकः । यावद्ब्रह्मविजानीयान्मामेवगुरुमादृतः ॥ ३९ ॥ यस्त्वसंयतषड्वर्गः प्रचण्डेन्द्रियसारथिः । ज्ञानवैराग्यरहितस्त्रिदण्डमुपजीवति ॥ ४० ॥ सुरानात्मानमात्मस्थं निह्नुते मांचधर्महा । अविपक्वकषायोऽस्मादमुष्माच्चविहीयते ॥ ४१ ॥ भिक्षोर्धर्मःशमोऽहिंसातपईक्षावनौकसः । गृहिणोभूतरक्षेज्याद्विजस्याचार्यसेवनम् ॥ ४२ ॥ ब्रह्मचर्यंतपःशौचंसंतोषोभूतसौहृदम् । गृहस्थस्याप्यृतौगन्तुः सर्वेषांमदुपासनम् ॥ ४३ ॥ इतिमांयःस्वधर्मेण भजन्नित्यमनन्यभाक् । सर्वभूतेषु मद्भावो मद्भक्तिंविन्दतेचिरात् ॥ ४४ ॥ भक्त्योद्धवानपायिन्या सर्वलोकमहेश्वरम् । सर्वोत्पत्त्यप्ययंब्रह्म कारणंमोपयातिसः ॥ ४५ इतिस्वधर्मनिर्णिक्त सत्त्वोनिर्ज्ञातमद्गतिः । ज्ञानविज्ञानसंपन्नो नचिरात्समुपैतिमाम् ॥ ४६ ॥ वर्णाश्रमवतांधर्म एषआचारलक्षणः । सएवमद्भक्तियुतो निःश्रेयसकरःपरः ॥ ४७ ॥ एतत्तेऽभिहितं साधो भवान्पृच्छतियच्चमाम् । यथास्वधर्मसंयुक्तो भक्तोमांसमियात्परम् ॥४८॥

इतिश्री मद्भागवते महापुराणे एकादशस्कन्धे ऽष्टादशोऽध्यायः ॥१८॥

आचरण, ज्ञान व दूसरे औरभी नियमों का आचरण न करना चाहिये मैं ईश्वर जिसप्रकार कार्यों का लीलापूर्वक अनुष्ठान करताहू उनको भी वैसेही लीलापूर्वक अनुष्ठान करना चाहिये ॥ ३६ ॥ मुनियों को भेद ज्ञान नहीं होता और जो होता भी है वह ज्ञानद्वारा नाश होजाता है,—जबतक देह का अन्त नहीं होता तबतक कभी २ भेद प्रतीती देखने में आती है परन्तु देह पड़ने के पीछे उसको विदेह मुक्ति प्राप्त होती है ॥ ३७ ॥ जिस पुरुष के परिणाम में दुःख देनेवाले विषयों में वैराग्य उत्पन्न होजाय और उसे मेरी प्राप्ति का साधन न जानने में आयाहो तो उसे उचित है कि धीरज धर किसी ब्रह्मवेत्ता गुरूकी शरण लेवे ॥ ३८ ॥ जबतक ब्रह्म को न जाने तबतक श्रद्धालु और असूया रहितहो भक्ति पूर्वक गुरू को मेरा रूप जान उसकी सेवाकरे ॥ ३९ ॥ जो अजितेन्द्रिय हैं,—प्रचण्ड इंद्रियें जिनकी सारथी हैं तथा ज्ञान वैराग्य नहीं है, और सन्यास का अवलम्बन करलिया है,—ऐसे धर्म विघाती मनुष्य देवताओं को, आत्माको और आत्मा में रहेहुए मुझको ठगते हैं वह असम्पूर्ण मनोरथहो इस लोक और परलोक से गिरते हैं ॥ ४०—४१ ॥ संन्यासीका धर्म शम और अहिंसा. वानप्रस्थ का धर्म तपश्चरण; गृहस्थी का धर्म प्राणियों का रक्षण और यजन ब्रह्मचारी का धर्म आचार्य की सेवाकरना है ॥ ४२ ॥ ब्रह्मचर्य, तपस्या, शौच संतोष, प्राणियोंपर दयाकरना; और ऋतुकालमें स्त्रीगमन यह गृहस्थीके धर्म हैं; और मेरी उपासना करना सभी का धर्म है ॥ ४३ ॥ जो मनुष्य वर्णाश्रम के धर्म पालकर निरंतर मेरा भजन करे दूसरे स्त्री पुत्रादिकों में प्रीति नरक्खे और सब प्राणियों में मेरी भावना रक्खे उस पुरुषको मेरी भक्ति प्राप्त होजाती है ॥ ४४ ॥ हे उद्धव ! अविनाशिनी भक्ति द्वारा वह सर्व लोकके महेश्वर सबकी उत्पत्ति नाशके प्रवर्त्तक, कारण रूपी वैकुण्ठवासी मुझको प्राप्त होते हैं ॥ ४५ ॥ इस प्रकार स्वधर्मद्वारा शुद्ध सत्व होने से मेरी गति जानीजासकती है और ज्ञान विज्ञानयुक्त तथा विरक्त होनेसे मैं प्राप्त होजाताहूं ॥ ४६ ॥ यह वर्ण तथा आश्रमवालों का आचार लक्षण धर्म उनको पितृलोक प्राप्तकरनेवाला है किंतु यदि यही धर्म मेरे अर्पण कियाजाय तो मुक्ति का साधन होजाता है ॥ ४७ ॥ हे साधो ! निजधर्म संयुक्त मेराभक्त जिसप्रकार परमेश्वर मुझको प्राप्त होसके इस विषय में जो तुमने पूछाथा,—वह मैंने तुमसे कहा ॥ ४८

इतिश्रीमद्भा०महा०एकादशस्कंधेसरलाभाषाटीकायांअष्टादशोऽध्यायः ॥ १८ ॥

श्रीभगवानुवाच ॥ योविद्याश्रुतसंपन्न आत्मवान्नानुमानिकः । मायामात्रमिदं ज्ञात्वाज्ञानंचमयिसंन्यसेत् ॥ १ ॥ ज्ञानिनस्त्वहमेवेष्टःस्वार्थोहेतुश्चसंमतः । स्वर्गश्चैवापवर्गश्चनान्योऽर्थोमदृतेप्रियः ॥ २ ॥ ज्ञानविज्ञानसंसिद्धाःपदंश्रेष्ठंविदुर्मम । ज्ञानीप्रियतमोऽतोमेज्ञानेनासौविभर्तिमाम् ॥ ३ ॥ तपस्तीर्थंजपोदानंपवित्राणीतराणिच । नाऽलंकुर्वन्तितांसिद्धिंयाज्ञानकलयाकृता ॥ ४ ॥ तस्माज्ज्ञानेनसहितंज्ञात्वास्वात्मानमुद्धव । ज्ञानविज्ञानसंपन्नोभजमांभक्तिभावितः ॥ ५ ॥ ज्ञानविज्ञानयज्ञेन मामिष्ट्वात्मानमात्मनि । सर्वयज्ञपतिंमांवैसंसिद्धिंमुनयोऽगमन् ॥ ६ ॥ त्वय्युद्धवाश्रयतियस्त्रिविधोविकारोमायाऽन्तराऽऽपततिनाद्यपवर्गयोर्यत् । जन्मादयोऽस्य यदमीतवतस्य किंस्युराद्यन्तयोर्यदसतोऽस्तितदेवमध्ये ॥ ७ ॥ उद्धव उवाच ॥ ज्ञानंविशुद्धंविपुलंयथैतद्वैराग्यविज्ञानयुतंपुराणम् । आख्याहिविश्वेश्वर विश्वमूर्ते त्वद्भक्तियोगंचमहद्विमृग्यम् ॥ ८ ॥ तापत्रयेणाभिहतस्यघोरेसंतप्यमानस्यभवाध्वनीश । पश्यामिनान्यच्छरणंतवाङ्घ्रिद्वन्द्वातपत्रादमृताभिवर्षात् ॥ ९ ॥ दष्टंजनं संपतितंबिलेऽस्मिन्कालाहिनाक्षुद्रसुखोरुतर्षम् । समुद्धरैनंकृपयाऽऽपवर्ग्यैर्वचोभिरासिञ्चमहानुभाव ॥ १० ॥ श्रीभगवानुवाच ॥ इत्थमेतत्पुराराजाभीष्मंधर्मभृतांवरम् । अजातशत्रुःपप्रच्छसर्वेषांनोऽनुशृण्वताम् ॥ ११ ॥ निवृत्तेभारतेयुद्धे सुहृन्निधनविह्वलः । श्रुत्वाधर्मान्बहून्पश्चान्मोक्षधर्मानपृच्छत ॥ १२ ॥ तानहंतेऽ

श्रीभगवान बोले कि—जो मनुष्य अनुभव पर्यन्त शास्त्र सम्पन्न के कारण आत्मतत्त्व को प्राप्त होगया है,—परन्तु केवल परोक्ष ज्ञानशाली नहीं उस को द्वैतभाव और उसके निवृत्ति साधनको मायामात्र जानकर ज्ञानको और ज्ञानसाधनको मुझ में समर्पणकरना चाहिये ॥ १ ॥ मैंही ज्ञानियोंका अभिमत अपेक्षित स्वार्थ, फल, हेतु, अभ्युदय और भक्तिहूं ; मेरेअतिरिक्त उन को और कुछ प्रियपदार्थ नहीं है ॥ २ ॥ ज्ञान विज्ञान युक्त मनुष्य सब मेरे श्रेष्ठपदको जानते हैं क्योंकि ज्ञानी ज्ञानद्वारा मुझको धारण करते हैं अतएव वही मेरे प्रियतम हैं ॥ ३ ॥ ज्ञान के लेशद्वारा जो शुद्धि उत्पन्न होती है वैसी शुद्धि तपस्या, तीर्थसेवा, जप, दान और अन्यान्य पवित्र पदार्थोंद्वारा नहीं उत्पन्न होती ॥ ४ ॥ अतएव हे उद्धव ! जहांतक ज्ञान रहताहै अपने आत्माको वहांतक जान ज्ञान विज्ञान युक्तहो भक्तिभाव से मेरा भजनकरो ॥ ५ ॥ मुनिलोग सर्व यज्ञपति आत्मा,—मुझको ज्ञान विनिमय यज्ञद्वारा आत्मयोगकर सिद्धि स्वरूप मुझको प्राप्त करते हैं ॥ ६ ॥ हे उद्धव ! तुममें जो आध्यात्मिकादि तीन प्रकार का विकार देखने में आता है वह माया है क्योंकि वह मध्यदशा में ही देखपड़ता है आदि अन्त में नहीं देख पड़ता ! अतएव इस विकाररूप देहादिक के जन्म आदि विकार होते हैं ; परन्तु तौभी तुम्हारा कुछ नहीं है वास्तव में असत् पदार्थ के आदि अन्त में जो होताहै वही मध्यमें अवस्थित रहताहै ॥७॥ उद्धवजी बोले कि—हे विश्वमूर्ते ! वैराग्य और विज्ञानसहित यह पुरातनशुद्धज्ञान जिसप्रकार से विस्तारहित होवे वह कहो, और अपना भक्तियोग कि जिसे ब्रह्मादिक महात्माभी देखाकरते हैं उसविषयको मैं जानना चाहता हूं, आप कहिये ॥ ८ ॥ हे ईश्वर ! घोर संसारमार्ग में तीनों तापों से व्यथित मनुष्य के पक्षमें चारोंओर से अमृतवर्षी आपके चरणयुगलरूप छत्र बिना दूसरा और कोई भी रक्षाकरनेवाला नहीं देखपड़ता ॥ ९ ॥ संसाररूपी कूपमें गिरे, काल सर्प से काटेहुए, क्षुद्रसुखों में अत्यन्त तृष्णायुक्त मेरे अत्यन्त तापों को शांतकरो । हे महानुभाव ! मोक्षबोधक वाक्यामृत से मेरे सर्वांगको सींचो ॥ १० ॥ श्रीभगवान ने कहाकि—राजा युधिष्ठिरने प्रथम धार्मिक श्रेष्ठ भीष्म से हम सबके सामनेही इसीप्रकार पूछाथा॥११॥महाभारतयुद्ध के अन्त होनेपर बन्धुओं के मरने से विह्वलहुए राजा युधिष्ठिरने बहुतसे धर्म सुनकर अन्तमें यही

भिधास्यामिदेवव्रतमुखाच्छ्रुतान् । ज्ञानवैराग्यविज्ञानश्रद्धाभक्त्युपबृंहितान्॥ १३॥ नवैकादशपञ्चत्रीन्भावान्भूतेषुयेनवै । ईक्षेताथैकमप्येषुतज्ज्ञानंममनिश्चितम् ॥ १४ ॥ एतदेवहिविज्ञानंनतथैकेनयेनयत् । स्थित्युत्पत्त्यप्ययान्पश्येद्भावानांत्रिगुणात्मनाम् ॥ १५ ॥ आदावन्तेचमध्येचसृज्यात्सृज्यंयदन्वियात् । पुनस्तत्प्रतिसंक्रामेयच्छिष्येततदेवसत् ॥ १६ ॥ श्रुतिःप्रत्यक्षमैतिह्यमनुमानंचतुष्टयम् । प्रमाणेष्वनवस्थानाद्विकल्पात्सविरज्यते ॥ १७ ॥ कर्मणांपरिणामित्वादाविरिञ्च्यादमङ्गलम् । विपश्चिन्नश्वरंपश्येददृष्टमपिदृष्टवत् ॥ १८ ॥ भक्तियोगःपुरैवोक्तः प्रीयमाणायतेऽनघ । पुनश्चकथयिष्यामि मद्भक्तेःकारणंपरम् ॥ १९ ॥ श्रद्धाऽमृतकथायांमे शश्वन्मदनुकीर्तनम् । परिनिष्ठाचपूजायां स्तुतिभिःस्तवनंमम ॥ २० ॥ आदरःपरिचर्यायां सर्वांगैरभिवन्दनम् । मद्भक्तपूजाऽभ्यधिका सर्वभूतेषुमन्मतिः ॥ २१ ॥ मदर्थेष्वंगचेष्टाच वचसामद्गुणेरणम् । मय्यर्पणंचमनसः सर्वकामविवर्जनम् २२ मदर्थेऽर्थपरित्यागो भोगस्यचसुखस्यच । इष्टंदत्तंहुतंजप्तं मदर्थंयद्व्रतंतपः २३॥ एवंधर्मैर्मनुष्याणा मुद्धवात्मनिवेदिनाम् । मयिसंजायतेभक्तिः कोऽन्योऽर्थोऽस्या ऽवशिष्यते ॥२४॥ यदात्मन्यर्पितंचित्तं शान्तंसत्वोपबृंहितम् । धर्मंज्ञानंसवैराग्य मैश्वर्यंचाभिपद्यते ॥ २५ ॥ यदर्पितंतद्विकल्पे इन्द्रियैःपरिधावति । रजस्वलंचा

मोक्षधर्म सम्बन्धी प्रश्न कियाथा ॥ १२ ॥ भीष्मके मुखसे सुनाहुआ ज्ञान, विज्ञान, वैराग्यश्रद्धा, और भक्तिद्वारा वर्द्धित उस सब धर्म को मैं तुमसे कहूंगा ॥ १३ ॥ जिस ज्ञानद्वारा ब्रह्मासे लेकर स्थावर पर्यंत सब प्राणियों में प्रकृति, पुरुष, महत्तत्व, अहंकार और पञ्चतन्मात्रा,—यहनव, ग्यारह इन्द्रियें, पञ्चमहाभूत और सत्व,रज,तम यह तीन गुण सब समेत यह अट्ठाईस तत्वजाने जावें और जिसके द्वारा इन सबमें एक आत्मतत्व का अनुभव कियाजाय वही ज्ञान निश्चय मेरेही विषय का ज्ञान है ॥ १४ ॥ जिस ज्ञानद्वारा पहिले सबको एकके साथ अनुगतदेखाथा उसही के द्वारा जब उस प्रकार का न देखे तबही ज्ञान विज्ञान नाम से कहने में आता है फिर इसही विज्ञान से सब पदार्थों की उत्पत्ति, स्थिति और प्रलय देख पडेगी ॥१५॥ जिसके आदि अन्त और मध्य में कार्य से कार्यान्तर में अनुगतहोवे उसको फिर वहींपरलेजावे जोशेषरहै वही सत् है॥१६॥ वेद प्रत्यक्ष महाजन प्रसिद्ध और अनुमान यहचारप्रमाण हैं इनसमस्त प्रमाणों के साथ बोधहोनेपर विकल्पसे विरक्त होना चाहिये॥१७॥जैसे यहलोक विनाशी देखपडताहै ऐसही इस लोकके कर्मोंके फलों से सिद्ध होनेवाले स्वर्गसे लेकर ब्रह्मलोक तक ऊपर के लोकोंका सुख भी दुःखरूप अर्थात् नाशवानहै ऐसा देखतेरहना॥१८॥हेअनघ! तुम अत्यतही प्रियपात्रहो ! पहिलेही तुमसे भक्तियोग कहाहै फिरभी मैं भक्तिके परमकारण उसभक्ति योग को तुमसे कहताहूं ॥१९॥ मेरी अमृत कथा में श्रद्धा; मेराकथन; मेरी पूजामें निष्ठा, स्तुति वचनोंद्वारा मेरीस्तुतिकरना ॥२०॥ मेरीसेवामें आदर सर्वांगद्वारा मेरा वंदन मेरे भक्तों की पूजा करना सर्व प्राणियों मे मेरा अस्तित्व जानना ॥ २१ ॥ मेरेनिमित्त लौकिक कार्य ; वाक्योंद्वारा मेरा गुण कथन, मुझ में मनका अर्पण करना सबकामों का परित्यागकरना,॥२२॥ मेरेनिमित्त धन भोग व सुखका त्यागकरना, और जोकुछ याग,दान, होम, जप, तप, व्रत करे वह सब मेरे निमित्त करना ॥२३॥ हेउद्धव ! जो इसप्रकारके सब धर्मोंद्वारा आत्म निवेदक मनुष्यकी मुझ में भक्ति उत्पन्न होती है ; उस के कोई भी साध्य व साधनरूप अर्थ शेष नहीं रहता ॥ २४ ॥ जब शांत और सत्वगुणद्वारा परिपूर्णमन आत्मा में अर्पितहोता है तब धर्म ज्ञान, वैराग्य और ऐश्वर्य की प्राप्ति होती है ॥ २५ ॥ रजोगुण निष्ठ व असत् अभिनिवेशवाला मन जब देह घर आदि में लगादिया जावे तो वह इंद्रियों के द्वारा इधर

चासन्निष्ठं चित्तंविद्धिविपर्ययम् ॥ २६ ॥ धर्मोमद्भक्तिकृत्प्रोक्तो ज्ञानंचैकात्म्यदर्शनम्
गुणेष्वसंगोवैराग्य मैश्वर्यंचाणिमादयः ॥ २७ ॥ उद्धव उवाच ॥ यमःकतिविधः
प्रोक्तो नियमोवाऽरिकर्शन । कःशमःकोदमःकृष्ण कातितिक्षाधृतिःप्रभो ॥ २८ ॥
किंदानंकिंतपःशौर्यं किंसत्यमृतमुच्यते । कस्त्यागःकिंधनंचेष्टं कोयज्ञःकाचदक्षि
णा ॥ २९ ॥ पुंसःकिंस्विद्बलंश्रीमन् भगोलाभश्चकेशव । काविद्याह्रीःपराकाश्रीः
किंसुखंदुःखमेवच ॥ ३० ॥ कःपण्डितःकश्चमूर्खः कःपन्थाउत्पथश्चकः । कःस्वर्गो
नरकःकःस्वित्कोबन्धुरुतकिंगृहम् ॥ ३१ ॥ कआढ्यःकोदरिद्रोवा कृपणःकःकईश्व
रः । एतान्प्रश्नान्ममब्रूहि विपरीतांश्चसत्पते ॥ ३२ ॥ श्रीभगवानुवाच ॥ अहिंसा
सत्यमस्तेय मसंगोह्रीरसंचयः । आस्तिक्यंब्रह्मचर्यंच मौनंस्थैर्यंक्षमाऽभयम् ॥ ३३ ॥
शौचंजपस्तपोहोमः श्रद्धाऽऽतिथ्यंमदर्चनम् । तीर्थाटनंपरार्थेहा तुष्टिराचार्यसेव
नम् ॥ ३४ ॥ एतेयमाःसनियमा उभयोर्द्वादशस्मृताः । पुंसामुपासितास्तात यथा
कामंदुहन्तिहि ॥ ३५ ॥ शमोमन्निष्ठताबुद्धेर्दमइन्द्रियसंयमः । तितिक्षादुःखसम्म
र्षो जिह्वोपस्थजयोधृतिः ॥ ३६ ॥ दण्डन्यासःपरंदानं कामत्यागस्तपःस्मृतम् ।
स्वभावविजयःशौर्यं सत्यंचसमदर्शनम् ॥ ३७ ॥ ऋतंचसूनृतावाणी कविभिःप
रिकीर्तिता । कर्मस्वसंगमःशौचं त्यागःसंन्यासउच्यते ॥ ३८ ॥ धर्मइष्टंधनंनृणां
यज्ञोऽहंभगवत्तमः । दक्षिणाज्ञानसंदेशः प्राणायामःपरंबलम् ॥ ३९ ॥ भगोमऐश्व

उधर विषयों की ओर दौड़ता है और उस से अधर्म, अज्ञान, वैराग्य, और अनैश्वर्य प्राप्त होते हैं ॥ २६ ॥ जिससे मेरी भक्ति उत्पन्न होवे वह धर्म है। एकात्म्य दर्शन वह ज्ञान है; विषयोंमेंसे आसक्तिका छूटजाना वैराग्य है और अणिमादि सिद्धियों का होना ऐश्वर्य कहलाता है ॥ २७ ॥ उद्धवजी ने कहा कि—हेशत्रुकर्षण ! यम कितने प्रकार का है ? नियम कौन २ हैं ? हेकृष्ण ! शम, दम, धैर्य और तितिक्षा किसे कहते हैं ? ॥ २८ ॥ दान क्या है ? तपस्या क्या है शौर्य क्या है ? सत्य और ऋत किसको कहते हैं ? त्याग क्या है ? इष्टधन किसप्रकारका है? यज्ञ क्या है? दक्षिणा क्या है ? ॥ २९ ॥ हेश्रीमन् ! पुरुष का बलक्या है ? हे केशव ! दया क्या है ? लाभ क्या है ? उत्कृष्ट विद्या, लज्जा और श्री क्या है ? सुख क्या है ? दुःख क्या है ? ॥ ३० ॥ पण्डित कौन है ? मूर्ख कौन है ? सुमार्ग क्या है? कुमार्ग क्या है?स्वर्ग व नरकक्याहै ? बन्धु क्या है ? घर क्या है ? ॥ ३१ ॥ धनी व दरिद्र कौन है ? कृपण कौन है ? प्रभु कौन है? हे साधुपते ! मेरे इन सब प्रश्नों की व्याख्या करो और इनसे उलटे जो हैं उन सबके अर्थ मुझसे प्रगट करो ॥ ३२ ॥ श्रीभगवानने कहा कि अहिंसा, सत्य, अचौर्य असंग, लज्जा, असंचय, स्वधर्ममें स्थिर विश्वास, ब्रह्मचर्य, मौन, स्थैर्य, क्षमा और अभय यह बारह यम हैं ॥ ३३ ॥ तथा बाहरी शौच, आंतरिकशौच, जप, तपस्या, होम, धर्म, आदर, आतिथ्य, मेरीपूजा, तीर्थभ्रमण, दूसरे के निमित्त चेष्टा करना, संतोष और आचार्य की सेवा करना ॥ ३४ ॥ प्रवृत्ति और निवृत्ति मार्गावलंबियोंके यह बारह नियम हैं। हे तात ! इनसब नियमों के पालित होनेसे मनुष्यको इच्छानुसार फल मिलता है ॥ ३५ ॥ मुझमें बुद्धिनिष्ठा–शम; इन्द्रिय संयम–दम, दुःख सहन–तितिक्षा, जिह्वा और उपस्थ का जीतना–धैर्य ॥ ३६ ॥ दण्ड परित्याग करना परमदान है। काम विसर्जन तपस्या, स्वभाव विजय–वीरता, समदर्शन–सत्य, पण्डितों के कहेहुए सत्य वाक्य और सत्यकर्म में अनासक्ति–शौच, और त्यागको कविलोग सन्यास कहते हैं ॥ ३७ । ३८ ॥ धर्म, मनुष्योंका इष्टधन है, परमेश्वर मैंही यज्ञ, ज्ञानोपदेश–दक्षिणा, प्राणायाम–उत्कृष्टबल ॥ ३९ ॥ मेरे ईश्वरपन

ऐश्वर्यादिर्लाभो मद्भक्तिरुत्तमः। विद्यात्मनि भिदाबाधो जुगुप्सा ह्रीरकर्मसु ॥ ४०॥ श्रीर्गुणा नैरपेक्ष्याद्याः सुखं दुःखसुखात्ययः। दुःखं कामसुखापेक्षा पण्डितो बन्धमोक्षवित् ॥ ४१ ॥ मूर्खो देहाद्यहंबुद्धिः पन्था मन्निगमः स्मृतः । उत्पथश्चित्तविक्षेपः स्वर्गः सत्त्वगुणोदयः ॥ ४२ ॥ नरकस्तमउन्नाहो बन्धुर्गुरुरहं सखे। गृहं शरीरं मानुष्यं गुणाढ्यो ह्याढ्य उच्यते ॥ ४३ ॥ दरिद्रो यस्त्वसन्तुष्टः कृपणो योऽजितेन्द्रियः। गुणेष्वसक्तधीरीशो गुणसङ्गो विपर्ययः ॥ ४४ ॥ एत उद्धव ते प्रश्नाः सर्वे साधु निरूपिताः । किं वर्णितेन बहुना लक्षणं गुणदोषयोः। गुणदोषदृशिर्दोषो गुणस्तूभयवर्जितः ॥ ४५ ॥

इति श्रीमद्भा० महा० एकाद० एकोनविंशोऽध्यायः ॥ १९ ॥

उद्धव उवाच। विधिश्च प्रतिषेधश्च निगमो हीश्वरस्य ते। अवेक्षतेऽरविन्दाक्ष गुणं दोषं च कर्मणाम् ॥ १ ॥ वर्णाश्रमविकल्पं च प्रतिलोमानुलोमजम्। द्रव्यदेशवयःकालान्स्वर्गं नरकमेव च ॥ २ ॥ गुणदोषभिदादृष्टिमन्तरेण वचस्तव। निःश्रेयसं कथं नॄणां निषेधविधिलक्षणम् ॥ ३ ॥ पितृदेवमनुष्याणां वेदश्चक्षुस्तवेश्वर। श्रेयस्त्वनुपलब्धेऽर्थे साध्यसाधनयोरपि ॥ ४ ॥ गुणदोषभिदादृष्टिर्निगमात्ते न हि स्वतः। निगमेनापवादश्च भिदाया इति ह भ्रमः ॥ ५ ॥ श्रीभगवानुवाच। योगास्त्रयो मया प्रोक्ता नृणां श्रेयोविधित्सया। ज्ञानं कर्म च भक्तिश्च नोपायोऽन्योऽस्ति कुत्रचित् ॥ ६ ॥ निर्विण्णानां ज्ञानयोगो न्यासिनामिह कर्मसु। तेष्वनिर्विण्णचित्तानां क-

के ऐश्वर्य आदिको भाग्य, मेरे प्रति भक्ति–उत्तम लाभ, आत्मामें अभेद ज्ञान–विद्या, अकर्म में हेयता दर्शन और लज्जा ॥ ४० ॥ अपेक्षा हीनतादि गुण–श्री, सुख दुःखका अति क्रम सुख, विषय भोग वासना–दुःख बंध मोक्षको जानने वाला पण्डित ॥ ४१ ॥ देहादिमें अहं ज्ञानयुक्त मनुष्य–मूर्ख है। जिसके द्वारा मैं प्राप्त होऊं वह सुमार्ग है। चित्तका विक्षेप कुमार्ग; सत्वगुण के उदय को स्वर्ग ॥ ४२ ॥ तमोगुणकी वृद्धिको नरक कहते हैं। हे सखे ! गुरु बंधु है, मैंही वह गुरु हू। मनुष्य देहही घर है; गुण सम्पन्न धनवानहै ॥ ४३ ॥ असंतुष्ट मनुष्य दरिद्र; अजितेन्द्रिय मनुष्य कृपण, जिसका चित्त विषय समूह में अनासक्त है, वही ईश्वर, गुणोंमें जिसकी अनासक्ति नहो वही अनीश्वर है ॥ ४४ ॥ हे उद्धव ! तुम्हारे इन प्रश्नोंका मैंने भलीप्रकारसे उत्तर दिया। गुण और दोषको अधिकतासे क्या वर्णन करूं ? गुण दोषोंका देखना तो दोष, और दोनोंके देखने को त्यागदेना यही गुण है ॥ ४५ ॥

इतिश्रीमद्भा०महा०एकादशस्कंधेसरलाभाषाटीकायांएकोनविंशोऽध्यायः ॥ १९ ॥

उद्धवजी ने कहा कि—हे कमललोचन ! आपकी आज्ञारूप वेदविधि निषेध मय है और वह विधि निषेधरूप वेद, विहित और निषिद्ध कर्मों के गुणदोषको प्रतिपादन करता है ॥ १ ॥ सबवर्ण आश्रमों क भेद,—प्रतिलोमज अनुलोमज जाति, द्रव्य, देश, अवस्था, काल, तथा स्वर्ग और नरकको गुण दोष रूपही प्रतिपादन करता है। गुण दोष में भेद दृष्टि रखने के अतिरिक्त आप के विधिनिषेधरूप वाक्य किसप्रकार हो सकते हैं ? मनुष्यों की मुक्ति किसप्रकार होवे ॥ ॥ २—३ ॥ हे ईश्वर ! अनुपलब्ध अर्थ तथा साध्य व साधन से आप के वाक्यरूप वेद,—पितरों का देवताओं और मनुष्यों का श्रेष्ठ नेत्र है ॥ ४ ॥ गुणदोष में जो भेद दृष्टि है वह आपकी आज्ञा सेही है स्वयं नहीं मानी गई । और भेदका अपवाद भी आपकीही आज्ञा से है, अतएव मुझको इसमें भ्रम होता है ॥ ५ ॥ श्रीभगवान ने कहाकि—मनुष्योंके मंगलसाधनकी इच्छा से मैंने तीनप्रकारका ज्ञानयोग, कर्मयोग और भक्तियोग कहा है, इसके अतिरिक्त कल्याण साधन का और कोई दूसरा उपाय नहीं है ॥६॥ दुःख जानकर जो संसारके कामों से विरक्त हैं उनकर्म

र्मयोगस्तुकामिनाम् ॥ ७ ॥ यदृच्छयामत्कथादौ जातश्रद्धस्तुयःपुमान् । ननिर्विण्णोनातिसक्तोभक्तियोगोऽस्यसिद्धिदः ॥ ८ ॥ तावत्कर्माणिकुर्वीतननिर्विद्येत यावता । मत्कथाश्रवणादौवाश्रद्धायावन्नजायते ॥ ९ ॥ स्वधर्मस्थोयजन्यज्ञैरनाशीःकामउद्धव । नयातिस्वर्गनरकौयद्यन्यन्नसमाचरेत् ॥ १० ॥ अस्मिँल्लोकेवर्तमानःस्वधर्मस्थोऽनघःशुचिः । ज्ञानंविशुद्धमाप्नोति मद्भक्तिंवायदृच्छया ॥ ११ ॥ स्वर्गिणोऽप्येतमिच्छन्ति लोकंनिरयिणस्तथा । साधकं ज्ञानभक्तिभ्यामुभयंतदसाधकम् ॥ १२ ॥ ननरःस्वर्गतिंकाङ्क्षेन्नारकींवा विचक्षणः । नेमंलोकंचकाङ्क्षेत देहाऽऽवेशात्प्रमाद्यति ॥ १३ ॥ एतद्विद्वान्पुरामृत्योरभवायघटेतसः । अप्रमत्तइदंज्ञात्वामर्त्यमप्यर्थसिद्धिदम् ॥ १४ ॥ छिद्यमानंयमैरेतैः कृतनीडंवनस्पतिम् । खगः स्वकेतमुत्सृज्य क्षेमंयातिह्यलम्पटः ॥१५॥ अहोरात्रैश्छिद्यमानं बुद्ध्वाऽऽयुर्भयवेपथुः मुक्तसङ्गःपरंबुद्ध्वा निरीहउपशाम्यति ॥ १६ ॥ नृदेहमाद्यंसुलभंसुदुर्लभं प्लवंसुकल्पंगुरुकर्णधारम् । मयाऽनुकूलेननभस्वतेरितं पुमान्भवाब्धिंनतरेत्सआत्महा ॥ ॥ १७ ॥ यदारम्भेषुनिर्विण्णोविरक्तः संयतेन्द्रियः । अभ्यासेनात्मनोयोगी धारयेदचलंमनः ॥ १८ ॥ धार्यमाणंमनोयर्हि भ्राम्यदाश्वनवस्थितम् । अतन्द्रितोऽनुरोधेन मार्गेणात्मवशंनयेत् ॥ १९ ॥ मनोगतिंन विसृजेज्जितप्राणोजितेन्द्रियः । स

परित्याग कारियों को ज्ञानयोग सिद्धि का देनेवालाहै और जिनके चित्त में निर्वेद उत्पन्न नहीं हुआ है उन कर्मफलकी आसक्तिवाले मनुष्यों के निमित्त कर्मयोग कल्याणकारी है ॥ ७ ॥ और यदि किसी भाग्योदयसे जिस पुरुषको मेरी कथामें श्रद्धा उत्पन्न हुई है जो कर्मफल में अविरक्त और अनति आसक्त हैं उनको भक्तियोग सिद्धिका देनेवाला है ॥८॥ जबतक कर्म फलोंसे विराग न होवे अथवा मेरी कथा सुनने में जबतक श्रद्धा न होवे, तबतक कर्मानुष्ठान में प्रवृत्त रहना चाहिये ॥ ९ ॥ हे उद्धव ! फलकी इच्छा न रखने वाला, यज्ञोंद्वारा मेरा आराधन करनेवाला स्वधर्म में रत मनुष्य यदि कोई निषिद्ध आचरण न करे तो वह न तो स्वर्ग को जाता है न नर्क को ॥ ॥ १० ॥ किन्तु इसीलोक में रहता अपने धर्म में स्थित होने से निष्पाप और पवित्र हो इस देह मेंही अवस्थित करके विशुद्ध ज्ञान अथवा मेरी भक्ति को प्राप्त करता है ॥ ११ ॥ नारकी मनुष्यों की समान स्वर्गवासीभी ज्ञान और भक्तिके साधन इस शरीरकी इच्छा करते हैं, दोनोंही दोनोंसाधनों के बाधक हैं॥१२॥ विवेकी मनुष्य नारकी गति की समान स्वर्ग गतिकी भी कामना नहीं करते, और वह इस शरीर की भी कामना नहीं करते, क्योंकि देहकी आसक्ति से वह मनुष्य असावधानशून्य होजाता है ॥ १३ ॥ यह जानकर तथा इस शरीर के अर्थ को सिद्धिदेनेवाला होने पर भी नाशवान जानकर सावधान हो मृत्यु के पहिलेही उसको मुक्तिके निमित्त यत्न करना चाहिये ॥१४॥ जिसमें अपना घोंसला बनायाहै अपनेआश्रयी उस पेड को यमकी समान निर्दयी मनुष्य जबकाटते हैं तब अनासक्त पक्षी उसको छोड़कर निश्चयही मंगलप्राप्त करताहै इसीप्रकार जो मनुष्य यह विचारकर कि दिनरात आयु का क्षय कररहे हैं, भयसे कम्पित हो आसक्ति छोड परमेश्वरको जानताहै वही यथार्थ सुखी है ॥१५—१६॥ सब फलों की मूल, अति दुर्लभ अति दृढ इस मनुष्य देह रूप नौका को व गुरुरूप खेवैया (मल्लाह) तथा मुझरूप अनुकूल पवनकी प्रेरणाको पाकर जो मनुष्य इससंसाररूप समुद्रसे न उतरे उसे आत्मघातीसमझनाचाहियें॥१७॥ जब कर्मों में निर्वेद प्राप्त होजाय और उनमें दुःखजान पडने से वैराग्य उत्पन्न होजाय तथा इन्द्रियें वशमें होजांय तब योगी को अभ्यास करके अपने मनको स्थिरकरना चाहिये ॥ १८ ॥ धारण करने के समय मन यदि शीघ्र भ्रमण में प्रवृत्त होकर चंचल होजावे तो सावधान रहकर कुछ उसकी अपेक्षा पूरण करने द्वारा उसको अपने वश में करे ॥ १९ ॥ प्राण और इंद्रियों के

त्वसंपन्नयाबुद्ध्या मन आत्मवशंनयेत् ॥२०॥ एषवैपरमोयोगो मनसः संग्रहःस्मृतः । हृदयज्ञत्वमन्विच्छन्दम्यस्येवार्वतो मुहुः ॥ २१ ॥ सांख्येनसर्वभावानां प्रतिलोमानुलोमतः । भवाप्ययावनुध्यायेन्मनो यावत्प्रसीदति ॥ २२ ॥ निर्विण्णस्य विरक्तस्य पुरुषस्योक्तवेदिनः। मनस्त्यजतिदौरात्म्यं चिन्तितस्यानुचिन्तया २३॥ यमादिभिर्योगपथैरान्वीक्षिक्याच विद्यया । ममार्चोपासनाभिर्वा नान्यैर्योग्यं स्मरेन्मनः ॥ २४ ॥ यदिकुर्यात्प्रमादेनयोगी कर्मविगर्हितम् । योगेनैवदहेदंहो नान्यत्तत्रकदाचन ॥ २५ ॥ स्वेस्वेऽधिकारेयानिष्ठा सगुणःपरिकीर्तितः । कर्मणांजात्यशुद्धानामनेननियमः कृतः । गुणदोषविधानेन संगानांत्याजनेच्छया ॥ २६ ॥ जातश्रद्धोमत्कथासुनिर्विण्णः सर्वकर्मसु । वेद दुःखात्मकान्कामान्परित्यागेऽप्यनीश्वरः ॥ २७ ॥ ततोभजेतमां प्रीतः श्रद्धालुर्दृढनिश्चयः । जुषमाणश्च तान्कामान्दुःखोदर्कांश्च गर्हयन् ॥ २८ ॥ प्रोक्तेनभक्तियोगेन भजतोमाऽसकृन्मुनेः । कामाहृदय्यानश्यन्ति सर्वेमयिहृदिस्थिते ॥२९ ॥ भिद्यतेहृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः क्षीयन्तेचाऽस्यकर्माणि मयिदृष्टेऽखिलात्मनि ॥ ३० ॥ तस्मान्मद्भक्तियुक्तस्य योगिनो वैमदात्मनः । नज्ञानंनचवैराग्यं प्रायः श्रेयोभवेदिह ॥ ३१ ॥ यत्कर्मभिर्यत्तपसा ज्ञानवैराग्यतश्चयत् । योगेनदानधर्मेण श्रेयोभिरितरैरपि ॥ ३२ ॥ सर्वंमद्भक्ति

जीतन परभी मनको स्वाधीन नहीं छोड़ देना चाहिए किंतु जैसे बने वैसे सत्वगुणवाली बुद्धि से उसको आधीनही रक्खे ॥ २० ॥ जैसे घोड़े का पकड़नेवाला दुष्टघोड़े के हृदयकी इच्छा जानन को उसे कुछ दूर उसकीही चालपर जाने देता है फिर पीछे लगाम तानकरजाताहै उसहीप्रकार अनुभूति मार्ग द्वारा मन को घोड़े की समान धीरे २ वश में करे ॥ २१ ॥ जबतक मन निश्चल नहोवे तबतक तत्वविवेकद्वारा अनुलोम और प्रतिलोम से सब पदार्थों के उत्पत्ति और नाशकी चिंता करे ॥ २२ ॥ अविवेक से प्राप्त संसार में जिस पुरुष को निर्वेद प्राप्त होने के कारण विराग होजाय उसको गुरुके उपदेश कियेहुए अर्थ का विचारकरना और उस विचारेहुएपदार्थ का बारम्बार विचार करना चाहिए ऐसे विचार करतेहुए देहादि से अभिमान को परित्यागकरै॥ २३ ॥ यम आदि योगके मार्गों से, आत्म विचार रूप वेदांत विद्या से वा मेरी अर्चना तथा उपासनासे परमात्मारूप मेरे में मनलगाना, किंतु इसके अतिरिक्त और कोई दूसरा यत्न न करना ॥ २४ ॥ योगी यदि प्रमादवश निंदित कर्मों का अनुष्ठान करे तो ज्ञानाभ्यास और नाम संकीर्तनादि द्वाराही उस कर्म से उत्पन्नहुए पाप को नाशकरै; दूसरा प्रायश्चित्त न करै ॥ २५ ॥ निज निज अधिकारोंकी निष्ठाही गुण कहकर कथित हुई है सबका संग छुड़ाने के अभिप्राय से इस गुण दोष विधानद्वारा उत्पत्ति—अशुद्धकर्मों का सकोच कियागया है ॥ २६॥ मेरी कथामें जिस की श्रद्धा उत्पन्न हुई है वह जानबूझकरभी यदि दुःखात्मक इच्छाओं को न छोड़ सके तो दृढ निश्चय और श्रद्धा पूर्ण हृदय से उन सब कामनाओं का भोग करके भी दुःख उपजानेवालाजान उनकी निंदाकरे और प्रसन्न चित्त से मेरे भजन में प्रवृत्त रहे। अतएव जोसब कर्मों से विरक्त हुए हैं,—पहिले कहेहुए भक्ति योगद्वारा जो मुनि निरंतर मेरा भजन करते हैं उनके हृदय में मैं सदैव विराजमान रहताहूं इससे उनके हृदय की समस्त कामनायें नष्ट होजाती हैं ॥ २७—२८ सर्वात्मभूत मेरा साक्षात्कार होनेसे उनके हृदय की ग्रन्थि छिन्न होजाती है;—समस्त संशयों का नाशहो सबकर्म नष्ट होजाते हैं ॥ ३० ॥ अतएव मैं कहताहूं कि जो योगी मेरे में मनको लगा कर मेरी भक्ति करता है उसको ज्ञान वैराग्य मुक्तिके साधन नहीं हैं किंतु भक्ति योगही कल्याण कारी है ॥ ३१ ॥ जो कर्मकाण्ड और तपस्याद्वारा, जो ज्ञान और वैराग्यद्वारा, जो योग और दानद्वारा तथा जो अन्यान्य मंगल अनुष्ठानोंद्वारा प्राप्त होता है ॥ ३२ ॥ वहसब मेरी भक्तिसे

योगेन मद्भक्तोऽञ्जसा । स्वर्गापवर्गं मद्धाम कथंचिद्यदि वाञ्छति ॥ ३३ ॥ न किंचित्साधवो धीरा भक्ता ह्येकान्तिनो मम । वाञ्छन्त्यपि मया दत्तं कैवल्यमपुनर्भवम् ॥ ३४ ॥ नैरपेक्ष्यं परं प्राहुर्निःश्रेयसमनल्पकम् । तस्मान्निराशिषो भक्तिर्निरपेक्षस्य मे भवेत् ॥ ३५ ॥ न मय्येकान्तभक्तानां गुणदोषोद्भवा गुणाः । साधूनां समचित्तानां बुद्धेः परमुपेयुषाम् ॥ ३६ ॥ एवमेतान्मया दिष्टाननुतिष्ठन्ति मे पथः । क्षेमं विन्दन्ति मत्स्थानं यद्ब्रह्म परमं विदुः ॥ ३७ ॥

इति श्रीमद्भा० महा० एकाद० विंशतितमोऽध्यायः ॥ २० ॥

श्रीभगवानुवाच । य एतान्मत्पथो हित्वा भक्तिज्ञानक्रियात्मकान् । क्षुद्रान्कामांश्चलैः प्राणैर्जुषन्तः संसरन्ति ते ॥ १ ॥ स्वे स्वेऽधिकारे या निष्ठा स गुणः परिकीर्तितः । विपर्ययस्तु दोषः स्यादुभयोरेष निश्चयः ॥ २ ॥ शुद्ध्यशुद्धी विधीयेते समानेष्वपि वस्तुषु । द्रव्यस्य विचिकित्सार्थं गुणदोषौ शुभाशुभौ ॥ ३ ॥ धर्मार्थं व्यवहारार्थं यात्रार्थमिति चानघ । दर्शितोऽयं मयाऽऽचारो धर्ममुद्वहतां धुरम् ॥ ४ ॥ भूम्यम्ब्वग्न्यनिलाकाशा भूतानां पञ्च धातवः । आब्रह्मस्थावरादीनां शारीरा आत्मसंयुताः ॥ ५ ॥ वेदेन नामरूपाणि विषमाणि समेष्वपि । धातुषूद्धव कल्प्यन्त एतेषां स्वार्थसिद्धये ॥ ६ ॥ देशकालादिभावानां वस्तूनां मम सत्तम । गुणदोषौ विधीयेते नियमार्थं हि कर्मणाम् ॥ ७ ॥ अकृष्णसारो देशानामब्रह्मण्योऽशुचिर्भवेत् । कृष्णसारोऽप्य-

भजनाद्वारा सहजही प्राप्त होजाता है और इच्छा करने से स्वर्ग, मुक्ति तथा वैकुण्ठभी प्राप्त होता है ॥ ३३ ॥ जो धीर, साधु लोग मेरे एकांत भक्त हैं वे किसी फलकी इच्छा नहीं रखते, यद्यपि मैं इन को कैवल्य मोक्ष देना चाहताहूं परन्तु वे उसकी भी चाहना नहीं करते ॥ ३४ ॥ कामनाकात्याग करनाही श्रेष्ठ फल और साधन कहलाता है अतएव कामना रहित प्रार्थनाहीन मनुष्य कीही मुझ पर भक्ति होती है ॥ ३५ ॥ जिन के रागादि दोष निवृत्त होकर अतःकरण समभाव को प्राप्त होगये हैं और उसी बुद्धिसे परमेश्वर को प्राप्त होगये हैं उनके गुण दोष से होनेवाले पुण्य पापादिकों से कुछ भी विकार नहीं होता ॥ ३६ ॥ इसप्रकार अपने प्राप्त करने के जिन जिन उपदेशों को मैंने कहा है जो उन सब उपदेशों के अनुसार चलते हैं वे काल मायादि रहित मेरे लोक को प्राप्त होते हैं और परब्रह्मको जानसकते हैं ॥ ३७ ॥

इतिश्रीमद्भा०महा०एकादशस्कन्धेसरलाभाषाटीकायांविंशोऽध्यायः ॥ २० ॥

श्रीभगवान बोले कि—जो मनुष्य मुझको प्राप्त होने के निमित्त भक्ति, ज्ञान, क्रियात्मक इन सब उपायोंको छोड़कर चञ्चल इंद्रियोंद्वारा क्षुद्र कामनाओं का सेवन करते हैं वही इस संसार में नाना योनियों को प्राप्त होते रहते हैं ॥ १ ॥ अपने २ अधिकार में निष्ठा रखनाही गुण कहा जाता है; इसके विपरीत दोष होता है, दोनों पक्ष में यही निर्णय है ॥ २ ॥ हे उद्धव ! यह योग्य है या अयोग्य ? इसप्रकार के संशयद्वारा क्रमकी स्वाभाविक प्रवृत्तिके संकोच करने के निमित्त; धर्म, व्यवहार व प्राणरक्षा के निमित्त एकसी वस्तुओं में शुद्धि, अशुद्धि; गुण, दोष; और मंगल अमंगल का विधान कियागया है ॥ ३ ॥ इसप्रकार धर्म रूप भार ढोनेवाले मनुष्यों के निमित्त मैंनेही मनुआदि रूप धारण करके इस आचार को दिखाया है ॥ ४ ॥ पृथिवी, जल, अग्नि, वायु और आकाश यह पांचमहाभूत ब्रह्मासे सामान्य स्थावरपर्यंत प्राणियोंके शरीरके धातु व आरंभक हैं ॥ ५ ॥ हे उद्धव ! इन समस्त प्राणियों के स्वार्थ सिद्धिके निमित्त यह एकही प्रकार के शरीर वेदों द्वारा पृथक् २ नाम और रूपमें कल्पित हुए हैं ॥ ६ ॥ हे साधुश्रेष्ठ ! मैंने सबकर्मोंका संकोच करने के निमित्त देश, कालआदि सब वस्तुओंमें गुण दोषका विधान किया है ॥ ७ ॥ सब

सौवीरःकीकटासंस्कृतेरिणम् ॥ ८ ॥ कर्मण्योगुणवान्कालो द्रव्यतःस्वतएववा । यतोनिवर्ततेकर्मसदोषोऽकर्मकःस्मृतः ॥ ९ ॥ द्रव्यस्यशुद्ध्यशुद्धीच द्रव्येणवचनेनच । संस्कारेणाथकालेन महत्त्वाल्पतयाऽथवा ॥ १० ॥ शक्त्याऽशक्त्याऽथवाबुद्ध्या समृद्ध्याचयदात्मने । अघंकुर्वन्तिहियथा देशावस्थानुसारतः ॥ ११ ॥ धान्यदार्वस्थितन्तूनां रसतैजसचर्मणाम् । कालवाय्वग्निमृत्तोयैः पार्थिवानांयुतायुतैः ॥ १२ ॥ अमेध्यलिप्तंयद्येन गन्धलेपंव्यपोहति ॥ भजतेप्रकृतिंतस्य तच्छौचं तावदिष्यते ॥ १३ ॥ स्नानदानतपोऽवस्थावीर्यसंस्कारकर्मभिः । मत्स्मृत्याचात्मनः शौचंशुद्धःकर्माचरेद्द्विजः ॥ १४ ॥ मन्त्रस्यचपरिज्ञानं कर्मशुद्धिर्मदर्पणम् ॥ धर्मःसंपद्यते षड्भिरधर्मस्तु विपर्ययः ॥ १५ ॥ क्वचिद्गुणोपिदोषः स्याद्दोषोपि विधिनागुणः । गुणदोषार्थनियमस्तद्भिदामेव बाधते ॥ १६ ॥ समानकर्माचरणंपतितानां नपातकम् । औत्पत्तिकोगुणःसङ्गो नशयानःपतत्यधः ॥ १७ ॥ यतोयतो निवर्तेत विमुच्येततत्स्ततः । एषधर्मोनृणांक्षेमः शोकमोहभयापहः ॥ १८ ॥ विषयेषुगुणाध्यासात्पुंसः संगस्ततोभवेत् । संगात्तत्रभवेत्कामः कामादेवकलिर्नृणाम् । कलेर्दुर्विषहः क्रोधस्तमस्तमनुवर्तते । तमसाग्रस्यतेपुंसश्चेतना व्यापिनीद्रुतम् ॥२०॥ तयाविरहित.साधो जन्तु शून्यायकल्पते ॥ ततोऽस्यस्वार्थविभ्रंशो मू-

देशों में कृष्णसारहीन और विप्रभक्त शून्यदेश अपवित्र हैं और जहां कृष्ण मृगभी होवें और स-त्पुरुष न होवें वह देशभी अपवित्र गिनाजाताहै और कीकट (अंग देश) में देश सत्पुरुष तथा कृष्णसारके होने परभी अपवित्र माना जाता है ॥ ८ ॥ द्रव्य संगति शब्द अथवा स्वाभावसेही कर्म योग्य काल गुणवान है । जिससे कर्मकी निवृत्ति होती है और जो कर्ममें अयोग्यके नाशसे प्रसिद्ध है वही काल अशुद्ध है ॥ ९ ॥ द्रव्य, वाक्य, संस्कार कालमहत्व, अल्पत्व, शक्ति, अशक्ति, बुद्धि, वा समृद्धि, द्वारा द्रव्यकी शुद्धि व अशुद्धि होती है ॥ १० ॥ ये सब द्रव्यादि आत्माके सम्बंध से देश और अवस्था के अनुसार यथार्थ पापको उत्पन्न करते रहते हैं ॥ ११ ॥ धान्य, काष्ठ, अस्थि तंतु, रस, तैजस, चर्म और मृण्मय पदार्थ काल, वायु, अग्नि, मृत्तिका और जलके एकत्र होनेसे व प्रत्येक से शुद्ध होते हैं ॥ १२ ॥ जिस पदार्थ में अपवित्र वस्तु लिप्त होजाय तो उस वस्तुकी शुद्धि छीलने वा खटाई में डालने आदि से मानीजाती है कि उसकी गंध और लेप आदि दूर हो-जाय ॥ १३ ॥ स्नान, दान, तपस्या, अवस्था, शक्ति, संस्कार, कर्म और मेरे स्मरणद्वारा आत्मा का शौच होता है । द्विजको इसप्रकारसे शुद्धहो कर्मोंका अनुष्ठान करना चाहिये ॥ १४ ॥ विशेष ज्ञान जाननेसे मंत्रकी शुद्धि, मुझमें अर्पण करनेसे कर्मकी शुद्धि कहाती है, देश, काल, द्रव्य, क-र्ता, मंत्र और कर्म इन छहकी शुद्धिओंसे धर्म होता है, इनकी अशुद्धतासे अधर्म होता है ॥१५॥ विधिबल से दोषभी कभी गुण और गुणभी कभी दोष होतेहैं । इसप्रकारसे गुण दोषका नियामक शास्त्रही इन दोनोंके भेदका बाधक है ॥ १६ ॥ समान कर्मका अनुष्ठान पतित मनुष्योंको पातकका देनवाला नहीं है किंतु पूर्व स्वीकृत होने से दोषरूप नहीं गुण रूप है, पृथिवीपर सोया हुआ मनु-ष्य क्या फिर नीचे गिरता है ? अतएव जिस जिससे निवृत्त होता है उसही उसहीसे मुक्त होता है, यह धर्म मनुष्योंका शोक, मोह भयनाशक परम मंगलका कारण है ॥ १७ । १८ ॥ गुणका विचार करनेसे मनुष्योंको विषयासक्ति उत्पन्न होती है और आसक्ति से वे सबकामनायें उत्पन्न होती हैं; कामनासेही मनुष्यों को कलह ॥ १९ ॥ और कलह सेही दुर्विषह्य क्रोध उत्पन्नहोता है; अविवेक उसका अनुवर्ती है । अविवेक मनुष्य के अविनाशी चैतन्य को शीघ्रही ग्रस लेता है ॥ २० ॥ हे साधो ! जीव के चैतन्यहीन होने से वह असत् की सदृश होजाता है फिरउससे

र्छितस्यमृतस्यच ॥ २१ ॥ विषयाभिनिवेशेन नात्मानंवेदनापरम् । वृक्षजीविकया जीवन्व्यर्थं भस्त्रेवयः श्वसन् ॥ २२ ॥ फलश्रुतिरियंनृणांन श्रेयोरोचनंपरम् । श्रेयो विवक्षयाप्रोक्तं यथाभैषज्यरोचनम् ॥ २३ ॥ उत्पत्त्यैवहि कामेषु प्राणेषुस्वजनेषुच आसक्तमनसोमर्त्या आत्मनोऽनर्थहेतुषु ॥ २४ ॥ नतानविदुषःस्वार्थंभ्राम्यतो वृजिनाध्वनि । कथंयुञ्ज्यात्पुनस्तेषु तांस्तमो विशतोबुधः ॥ २५ ॥ एवंव्यवसितंकेचि दविज्ञाय कुबुद्धयः । फलश्रुतिंकुसुमितांन वेदज्ञावदन्तिहि ॥ २६ ॥ कामिनः कृपणालुब्धाः पुष्पेषुफलबुद्धयः । अग्निमुग्धाधूमतान्ताः स्वंलोकंनविदन्तिते २७ ॥ नतेमामङ्गजानन्ति हृदिस्थंयइदंयतः। उक्थशस्त्राह्यसुतृपो यथानीहारचक्षुषः२८॥ तेमे मतमविज्ञाय परोक्षं विषयात्मकाः । हिंसायांयदिरागः स्याद्यज्ञएवनचोदना ॥ ॥ २९ ॥ हिंसाविहाराह्यालब्धैः पशुभिः स्वसुखेच्छया । यजन्ते देवतायज्ञैः पितृभूतपतीन्खलाः ॥ ३० ॥ स्वप्नोपमममुंलोकमसन्तं श्रवणप्रियम् । आशिषोहृदिसंकल्प्य त्यजन्त्यर्थान्यथावणिक् ॥ ३१ ॥ रजःसत्त्वतमोनिष्ठा रजःसत्त्वतमोजुषः उपासतइन्द्रमुख्यान् देवादीन्नतथैवमाम् ॥३२॥ इष्ट्वेह देवतायज्ञैर्गत्वा रंस्यामहे-

पुरुषार्थ की हानि होती है पुरुषार्थहीन मनुष्य मूर्छित और मृतककी समान कहाजाता है॥ २१ ॥ जो मनुष्य विषयों के वशीभूतहो अपने को और परमात्मा को नहींजानता उसको जीवनकाधारण करना वृक्षकी समान वृथाहै वह धौंकनीकी समान वृथा श्वास प्रश्वासको लेता छोड़ता है ॥२२॥ स्वर्ग के सुख का श्रवण मनुष्यों का परम पुरुषार्थ रूप नहीं,—इसका अभिप्राय रुचि का उत्पन्न करना है औषधि में रुचि उत्पन्न कराने की समान मोक्ष कथन का अभिप्राय भी इसी प्रकार कथित हुआ है ॥ २३ ॥ इच्छित पदार्थ, प्राण और स्वजन यहसब अपने अर्थ के कारणीभूत होने से स्वभाव सेही इनमें मनुष्यों का मन आसक्त रहता है ॥ २४ ॥ अतएव वह परम सुख को नहीं जानसकते । इसकारण 'वेदजो समझाता है वही मोक्ष है' इस प्रकार से दृढ़ विश्वास कर जो देवादि योनि में भ्रमण करते हैं, फिर वृक्षादि योनि में प्रवेश करने जाते हैं उनको वेद स्वयं क्याकरके उन समस्त कामों में प्रवर्तित करेगा ? ॥ २५ ॥ वेद के इसप्रकारके अभिप्राय को न जान कुबुद्धि लोग फूलकी समान स्वर्गादि सुख रूप सुनेहुए फलकोही मुख्य फल मान बैठते हैं; परन्तु वेदज्ञ ऐसा नहीं करते ॥ २६ ॥ कामी, कृपण मनुष्य लोभी होकर फूलकोहीफल जानता है,-वह अग्निसाध्य कर्मों के अभिनिवेश से विवेकहीन होजाता है; अन्त में उसका धूम मार्ग (दक्षिणायन मार्ग) ही रहता है, वह आपके लोक को नहीं जानते ॥ २७ ॥ अहो!कर्मही उस का शास्त्र है, इसकारण वह प्राण कोही संतुष्ट करता रहता है । यह जगत् जिससे उत्पन्न हुआ है उस अन्तर्यामी मुझको वह इसप्रकार नहीं जानसकता; जैसे अन्धकार से घिरे दृष्टिवाला मनुष्य अपने निकट के पदार्थ को नहीं देखपाता ॥ २८ ॥ ऐसे विषयात्मक मनुष्य मेरे इसगूढ़ मतको नहीं जानसकते वे देवताओं कीही पूजा करते रहते हैं । उनमें से जो हिंसक हैं वहयज्ञ के अनुष्ठान में प्रवृत्त होते हैं; किंतु यह विधि नहीं है केवल परिसंख्या है ॥ २९ ॥ वह हिंसक मनुष्य यज्ञ में बलिरूप से पशुहत्या द्वारा अपने सुखकी इच्छा से देवता, पितर और प्राणियों का याग करते हैं ॥ ३० ॥ स्वप्न की समान असत्, कर्णप्रिय परलोक को वह 'आशिलमङ्गलमय जान वणिक की समान सब अर्थों का परित्याग करता है (जब धनके लालच से वणिक विदेश को जाता है तो सबद्रव्य घर में छोड़जाता है) ॥ ३१ ॥ रज, सत्व और तमोनिष्ठावाले रज, सत्व और तमसेभी इन्द्रादि देवताओं की उपासना करते हैं,—मेरी यथार्थ पूजा नहीं करते ३२॥

दिवि । तस्यान्तइहभूयास्म महाशाला महाकुलाः ॥३३॥ एवंपुष्पितया वाचा व्याक्षिप्तमनसांनृणाम् । मानिनांचातिस्तब्धानां मद्वार्ताऽपिनरोचते ॥३४॥ वेदाब्रह्मात्मविषयास्त्रिकाण्डविषयाइमे । परोक्षवादाऋषयः परोक्षंममचप्रियम् ॥३५॥ शब्दब्रह्मसुदुर्बोधं प्राणेन्द्रियमनोमयम् । अनन्तपारंगम्भीरं दुर्विगाह्यंसमुद्रवत्॥३६॥ मयोपबृंहितंभूम्ना ब्रह्मणानन्तशक्तिना । भूतेषुघोषरूपेण बिसेषूर्णेवलक्ष्यते ३७॥ यथोर्णनाभिर्हृदयादूर्णामुद्वमतेमुखात् । आकाशाद्घोषवान्प्राणो मनसास्पर्शरूपिणा ॥ ३८ ॥ छन्दोमयोऽमृतमयः सहस्रपदवींप्रभुः । ओंकाराद्व्यञ्जितस्पर्शस्वरोष्मान्तःस्थभूषिताम् ॥ ३९ ॥ विचित्रभाषाविततां छन्दोभिश्चतुरुत्तरैः । अनन्तपारांबृहतीं सृजत्याक्षिपतेस्वयम् ॥ ४० ॥ गायत्र्युष्णिगनुष्टुप्च बृहतीपंक्तिरेवच । त्रिष्टुब्जगत्यतिच्छन्दो ह्यत्यष्ट्यतिजगद्विराट् ॥ ४१ ॥ किं विधत्ते किमाचष्टे किमनूद्य विकल्पयेत् । इत्यस्याहृदयंलोके नान्योमद्वेदकश्चन ॥४२॥ मां विधत्तेऽभिधत्ते मां विकल्प्यापोह्यते त्वहम् । एतावान्सर्ववेदार्थः शब्दआस्थायमां भिदाम् । मायामात्रमनूद्यान्ते प्रतिषिध्यप्रसीदति ॥ ४३ ॥

इति श्रीमद्भा० महा० एकाद० एकविंशोऽध्यायः ॥ २१ ॥

इस लोक मे देवताओं की आराधना करके स्वर्ग में जाय सुख पूर्वक विहार करेंगे फिर स्वर्ग का सुख भोग पीछे यहां आकर जन्म लेवेंगे तो बड़े कुलवान और गृहस्थ होवेंगे' इसप्रकारकी कल्पना वह हृदय में करते रहते हैं ॥ ३३ ॥ इसप्रकार के कुसुमित वाक्योंद्वारा विचलित मनवाले, अभिमानी अतिलोभी मनुष्य मुझे प्रिय नहीं लगते ॥ ३४ ॥ त्रिकाण्डमय यह समस्त वेद ब्रह्मात्मपर और ममगंत्र परोक्ष वादक हैं । परोक्षही मरा प्रियशब्द ब्रह्म है जो अत्यन्त दुर्बोध और प्राणमय इन्द्रियमय, मनोमय तथा समुद्र की समान अनन्तपार, गम्भीर और दुरवगाह हैं ॥ ३५—३६ ॥ भूमा अनन्त शक्ति ब्रह्म मेरे द्वारा वर्द्धितहो कमल नालके तन्तुओं की समान प्राणियों के नाद रूप से प्रतीत होता है ॥ ३७ ॥ जैसे मकड़ी हृदय से जाले को निकालती है ऐसेही यह वेद मूर्ति और अमृतमय सामर्थ नादवाला प्राण स्पर्श आदि वर्णों की भले प्रकार संकल्पकारी चित्त द्वारा हृदयाकाश से बैखरी नाम वाणी को आपही प्रगटकरता और फिर पीछे आपही संहारकरता है ॥ ३८ ॥ यह बैखरी नाम वाणी हृदयगत सूक्ष्म ओंकार से व्यंजितहुए स्पर्श वर्ण, स्वरवर्ण, ऊष्मवर्ण और अन्तस्थवर्ण से भूषित व विचित्र लौकिक और वैदिक भाषाओं से विस्तृत और उत्तरोत्तर चार २ अक्षर जिनमें अधिक हैं ऐसे छन्दों द्वारा विदित है । इस वेदराशि में गायत्री, उष्णिक्, अनुष्टुप्, बृहती, पंक्ति, त्रिष्टुप्, जगती, अतिच्छन्द, अत्यष्टि, अतिजगती और अतिविराट आदि छन्द वर्तमान हैं ॥ ३९—४१ ॥ यह वेदवाणी कर्म काण्ड में विधि वाक्योंसे क्या विधान करती है ? देवता काण्ड में मंत्रवाक्यों से क्या प्रकाश करती है ? और ज्ञानकांड में किसका आश्रय कर क्यातर्क बितर्क करती है, इसका तात्पर्य इस लोक में मेरे अतिरिक्तकोई नहीं जानसकता ॥ ४२ ॥ इससे यह यज्ञरूप में मेराही विधान करती है, देवता रूपमें मुझे प्रकाश करती है और मुझकोही वादी के अर्थरूप से कथितकर प्रतिवादी के कथित तर्कान्तरद्वारा निरस्त करती है । वेद परमात्म स्वरूप मेराही आश्रयकर ' सब भेद मायामात्रहै ' इसका प्रतिपादन करता है, फिर निषेध करके प्रसन्न होता है । यही समस्त वेद का अभिप्राय है ॥ ४३ ॥

इतिश्रीमद्भा०महा०एकादशस्कंधेसरलाभाषाटीकायांएकविंशोऽध्यायः ॥ २१ ॥

उद्धवउवाच । कतितत्त्वानिविश्वेश संख्यातान्यृषिभिःप्रभो । नवैकादशपञ्चत्रीण्यात्थत्वमिहशुश्रुम ॥१॥ केचित्षड्विंशतिंप्राहुरपरे पञ्चविंशतिम् । सप्तैकेनवषट् केचिच्चत्वार्येकादशापरे ॥ २ ॥ केचित्सप्तदशप्राहुः षोडशैकेत्रयोदश। एतावत्त्वंहि संख्यानामृषयोयद्विवक्षया । गायन्तिपृथगायुष्मन्निदंनो वक्तुमर्हसि ॥ ३ ॥ श्रीभगवानुवाच । युक्तंचसन्तिसर्वत्र भाषन्तेब्राह्मणायथा । मायांमदीयामुद्गृह्यवदतांकिंनुदुर्घटम् ॥४॥नैतदेवंयथात्थत्वं यदहंवच्मितत्तथा। एवंविवदतांहेतुंशक्तयोमेदुरत्ययाः ॥ ५ ॥ यासांव्यतिकरादासीद्विकल्पोवदतांपदम् । प्राप्तेशमदमेऽप्येति वादस्तमनुशाम्यति ॥६॥परस्परानुप्रवेशात्तत्त्वानां पुरुषर्षभ । पौर्वापर्यप्रसंख्यानंयथा वक्तुर्विवक्षितम् ॥ ७ ॥ एकस्मिन्नपिदृश्यन्ते प्रविष्टानीतराणिच । पूर्वस्मिन् वाऽपरस्मिन्वातत्त्वेतत्त्वानिसर्वशः ॥८॥पौर्वापर्यमतोऽमीषांप्रसंख्यानमभीप्सताम् । यथाविविक्तंयद्वक्त्रंगृह्णीमोयुक्तिसंभवात्॥९॥अनाद्यविद्यायुक्तस्य पुरुषस्यात्मवेदनम् । स्वतोनसंभवादन्यस्तत्त्वज्ञोज्ञानदोभवेत् ॥१०॥ पुरुषेश्वरयोरत्र नवैलक्षण्यमण्वपि । तदन्यकल्पनाऽपार्थाज्ञानंचप्रकृतेर्गुणः॥११॥ प्रकृतिर्गुणसाम्यं वैप्रकृतेर्नात्मनोगुणाः । सत्त्वंरजस्तमइतिस्थित्युत्पत्त्यन्तहेतवः ॥१२॥ सत्त्वंज्ञानंरजःकर्म तमोऽज्ञानमिहोच्यते । गुणव्यतिकरःकालः स्वभावःसूत्रमेवच

उद्धवजी ने कहा—हे देवेश ! हे प्रभो ! ऋषियों ने कितने प्रकारकी तत्व संख्याकी है—आपने यह कहा । मैंने सुनाकि आपने २८ तत्व संख्याका निर्णय किया है ॥ १ ॥ परन्तु कोई २ छब्बीस, कोई पचीस कोई नव कोई सात कोई छह कोई दूसरे चार कोई ग्यारह ॥२॥ कोई सत्रह कोई सोलह और एक सम्प्रदाय तेरह तत्व कहता है । हे नित्यमूर्त्ते ! ऋषियों ने जिस जिस अभिप्राय से पृथक् २ संख्याका निरूपणकिया है वह अयुक्त नहीं हैं क्योंकि समस्त भूतही अन्तर्भूत हैं और जो मेरी मायाको स्वीकारकर जो बातें बनावे उनकी बातोंमें किसी प्रकारकी दुर्घटना न समझनी ॥ ४ ॥ तुम जैसा कहते हो यह उस प्रकार नहीं है; मैं जिसप्रकार कहता हूं वह प्रकार है,—यह कारण ले इस प्रकार के विवादियों के पक्षमें मेरी सत्वादि शक्ति ही उस विवादका कारण है ॥ ५ जिन क्षोभोंसे वादियों के विवादास्पद विकल्प उत्पन्न होते हैं शम दम प्राप्त होनेपर विकल्पलयको प्राप्त होता है, उसके उपरांतही वादभी शांत होजाता है ॥ ॥ ६ ॥ हे पुरुषश्रेष्ठ ! तत्वों का एक दूसरे में अन्तर्भाव होजाता है, इससे कहनेवाले की जैसी इच्छा होती है उसही के अनुसार न्यून या अधिक संख्या होसकती है ॥ ७ ॥ कारण तत्व में वा कार्य तत्व में और सब तत्वों का प्रवेश देखाजाता है ॥ ८ ॥ इसकारण तत्वोंके कार्य कारणता के विषय में और न्यूनाधिक संख्या के विषयमें वाद करनेवालों में जैसी जिसकी इच्छा होती है उसकी वाणी उस अपनी इच्छा को पूर्ण करसकती है इसकारण इन सब युक्तियों की सम्भावना है ॥ ९ ॥ अनादि अविद्यायुक्त मनुष्यको स्वतः आत्मज्ञान होना असम्भव है; तत्वज्ञ दूसरे मनुष्यको उसका ज्ञानदाता होता है ॥ १० ॥ इस विषयमें पुरुष और ईश्वरकी अणुमात्र भी विलक्षणता नहीं है; अतएव उन दोनों में भेद कल्पना का अर्थ नहीं है और ज्ञान प्रकृति काही गुण है ॥ ११ ॥ तथा गुणों की समता यह प्रकृति स्वरूप है । स्थिति, सृष्टि और ध्वंस के कारणीभूत सत्व, रज और तमोगुण यह सब प्रकृति केही हैं आत्मा के नहीं ॥ १२ ॥ इस संसार में ज्ञान सत्व, के नाम से कर्मरज, के नाम से और अज्ञान तमके नामसे प्रसिद्ध है । इसकारण इनका प्रकृति में अन्तरभाव होने से, इनको पृथक तत्वरूप नहीं मानते, स्वभाव यह महत्तत्वका स्वरूप है इसलिये उसका प्रकृति में अन्तर भाव होता है और

॥१३॥ पुरुषःप्रकृतिर्व्यक्तमहङ्कारोनभोऽनिलः । ज्योतिरापःक्षितिरिति तत्त्वान्युक्तानिमेनव ॥ १४ ॥ श्रोत्रंत्वग्दर्शनंघ्राणो जिह्वेतिज्ञानशक्तयः । वाक्पाण्युपस्थपाय्वङ्घ्रिकर्माण्यङ्गोभयंमनः ॥१५॥ शब्दःस्पर्शोरसोगन्धो रूपंचेत्यर्थजातयः । गत्युक्त्युत्सर्गशिल्पानि कर्मायतनसिद्धयः ॥ १६ ॥ सर्गादौप्रकृतिर्ह्यस्य कार्यकारणरूपिणी । सत्त्वादिभिर्गुणैर्धत्ते पुरुषोऽव्यक्तईक्षते ॥ १७ ॥ व्यक्तादयोविकुर्वाणा धातवःपुरुषेक्षया । लब्धवीर्याःसृजन्त्यण्डंसंहताः प्रकृतेर्बलात् ॥ १८ ॥ सप्तैवधातवइति तत्रार्थाःपञ्चखादयः । ज्ञानमात्मोभयाधारस्ततो देहेन्द्रियासवः ॥ १९ ॥ षडित्यत्रापिभूतानिपञ्चषष्ठःपरःपुमान् । तैर्युक्तआत्मसम्भूतैः सृष्ट्वेदंसमुपाविशत् ॥ २० ॥ चत्वार्येवेतितत्रापि तेजआपोऽन्नमात्मनः । जातानितैरिदंजातं जन्मावयविनःखलु ॥ २१ ॥ संख्यानेसप्तदशके भूतमात्रेन्द्रियाणिच । पञ्चपञ्चैकमनसा आत्मासप्तदशःस्मृतः ॥ २२ ॥ तद्वत्षोडशसंख्याने आत्मैवमनउच्यते । भूतेन्द्रियाणिपञ्चैव मनआत्मात्रयोदश ॥ २३ ॥ एकादशत्वआत्माऽसौ महाभूतेन्द्रियाणिच । अष्टौप्रकृतयश्चैव पुरुषश्चनवेत्यथ ॥ २४ ॥ इतिनानाप्रसंख्यानं तत्त्वानामृषिभिःकृतम् । सर्वंन्याय्यंयुक्तिमत्त्वाद्विदुषांकिमशोभनम् ॥ २५ ॥ उद्धवउवाच ॥ प्रकृतिःपुरुषश्चोभौ यद्यप्यात्मविलक्षणौ । अन्योन्यापाश्रयात्कृष्ण दृश्यतेनभिदा

काल तो ईश्वर का स्वरूप हैही ॥ १३ ॥ हे उद्धव ! पुरुष प्रकृति, महत्तत्व, अहंकार, आकाश, वायु, ज्योति, जल, और पृथिवी यह नौ तत्व मेरे द्वारा कथित हुए हैं ॥ १४ ॥ कर्ण, त्वक् , नेत्र, नासिका, और रसना यह समस्त ज्ञानेन्द्रिय हैं । वाक्य, हस्त, उपस्थ, पायु और पाद यह समस्त कर्मेन्द्रिय और मन उभयात्मक है ॥ १५ ॥ शब्द, स्पर्श, रस, गंध, और रूप ये पांच विषय और तीन गुण ऐसे अट्ठाईस तत्व कहे, गति, भाषण, वीर्योत्सर्ग मलोत्सर्ग और शिल्पये पांच कर्मेन्द्रियोंके फल रूप हैं ॥ १६ ॥ प्रकृति, इस विश्व सृष्टि के आदिमें कार्य कारण रूपिणी हो सत्वादि गुणों द्वारा विशेष२ अवस्थाओं को धारण करती है और पुरुष तो अपरिणामी देखने वालाहै ॥१७॥महत् आदि कारण तत्व विकृत होनेमें प्रवृत्तहो पुरुषोंकी दृष्टि वशसे लब्धवीर्य और मिलितहोने के उपरान्त प्रकृतिका आश्रयकर ब्रह्माण्डको उत्पन्न करते हैं ॥१८॥ कितनों के मतमें "सातही कारण तत्व है" यह इसप्रकारसे कहतेहैं कि आकाशादि पंचतत्व, जीव और इनसबका आश्रय परमात्मा यह साततत्व हैं; तथा देह इन्द्रिय और प्राण यह सब इनतत्वोंसे उत्पन्नहुए हैं ॥ १८ ॥ कितनों के मतमें छः तत्व हैं वह इसप्रकारसे हैं कि पञ्चभूत और परमपुरुष । ईश्वरत्व य उत्पन्नहुआ और इन सबके साथ मिलकर इस विश्वको उत्पन्नकरके इसमें प्रविष्टहुआहै ॥२०॥ चारतत्वोंके माननेवालोंके मतमें तेज, जल, पृथिवी और आत्मा यह चारतत्व हैं । इन चारतत्वों सेही और सबतत्वोंकी उत्पत्ति हुई है, इससे सर्वकार्यमात्रका इनमें अन्तर्भाव कियागयाहै ॥२१॥ सत्रहतत्वोंके माननेवाले पञ्चभूत, पञ्चतन्मात्रा, पंचइन्द्रिय, मन और आत्मा ऐसे सत्रहतत्वोंको मानते हैं ॥ २२ ॥ इसहीप्रकार सोलहतत्वोंके माननेवाले आत्माकोही मन कहते हैं । तेरहतत्व के माननेवाले पञ्चभूत, पञ्चइन्द्रिय, मन और जीव व परमात्माको मानते हैं ॥ २३ ॥ किसी के मतमें ग्यारहतत्व हैं, उनमें पांचमहाभूत, पांचइन्द्रियां और आत्मा यह ग्यारह गिनेजाते हैं, किसी मतमें नौहीतत्व हैं, तिनमें प्रकृति, महत्तत्व, अहंकार, पञ्चमहाभूत, और आत्मा यह नव गिनेजाते हैं ॥ २४ ॥ ऋषियोंने इसप्रकार अनेकभांति तत्वोंकी गणना की है, युक्ति युक्त होने से यह सबही ठीक हैं । पण्डितों की उक्ति कुछभी अयुक्त वा अघटित नहीं है ।' २५ ॥ उद्धव जीने कहा हे कृष्ण ! प्रकृति और पुरुष यदि स्वभावसेही भिन्नहैं तो फिर परस्परका परित्यागकर

तयोः । प्रकृतौ लक्ष्यते ह्यात्मा प्रकृतिश्च तथात्मनि ॥२६॥ एवं मे पुण्डरीकाक्ष महान्तं संशयं हृदि । छेत्तुमर्हसि सर्वज्ञ वचोभिर्नयनैपुणैः ॥ २७ ॥ त्वत्तो ज्ञानं हि जीवानां प्रमोषस्तेऽत्र शक्तितः । त्वमेव ह्यात्ममायाया गतिं वेत्थ न चापरः ॥२८॥ श्रीभगवानुवाच॥प्रकृतिः पुरुषश्चेति विकल्पः पुरुषर्षभ । एष वैकारिकः सर्गो गुणव्यतिकरात्मकः ॥ २९ ॥ ममाङ्ग माया गुणमय्यनेकधा विकल्पबुद्धीश्च गुणैर्विधत्ते । वैकारिकस्त्रिविधोऽध्यात्ममेकमथाधिदैवमधिभूतमन्यत् ॥३०॥ दृग्रूपमार्कं वपुरत्र रन्ध्रे परस्परं सिध्यति यः स्वतः खे । आत्मा यदेषामपरो य आद्यः स्वयाऽनुभूत्याऽखिलसिद्धसिद्धिः एवं त्वगादि श्रवणादि चक्षुर्जिह्वादि नासादि च चित्तयुक्तम् ॥ ३१ ॥ योऽसौ गुणक्षोभकृतो विकारः प्रधानमूलान्महतः प्रसूतः । अहं त्रिवृन्मोहविकल्पहेतुर्वैकारिकस्तामस ऐन्द्रियश्च ॥ ३२ ॥ आत्मापरिज्ञानमयो विवादो ह्यस्तीति नास्तीति भिदाऽर्थनिष्ठः । व्यर्थोऽपि नैवोपरमेत पुंसां मत्तः परावृत्तधियां स्वलोकात् ॥३३॥ उद्धव उवाच । त्वत्तः परावृत्तधियः स्वकृतैः कर्मभिः प्रभो । उच्चावचान्यथा देहान्गृह्णन्ति विसृजन्ति च ॥ ३४ ॥ तन्ममाख्याहि गोविन्द दुर्विभाव्यमनात्मभिः । न ह्येतत्प्रायशो लोके विद्वांसः सन्ति वञ्चिताः ॥ ३५ ॥ श्रीभगवानुवाच । मनः कर्ममयं नृणामिन्द्रियैः पञ्चभिर्युतम् । लोकाल्लोकं प्रयात्यन्य आत्मा तदनुवर्तते ॥३६॥ ध्या

नेसें उसकी प्रतीति क्यों नहीं होती ! आत्माकी प्रकृतिसे और प्रकृतिको आत्मासे प्रतीति होती है ॥ २६ ॥ हे कमलनेत्र ! हे सर्वज्ञ ! आपको मेरे हृदय स्थित इसे संदेहको अपने प्रवीण वचनों से दूरकरना चाहिये ॥ २७ ॥ जीवोंको ज्ञान निश्चय आपहीसे होताहै और आपकी मायाशक्तिके कारणही माया होती रहती है, अतएव आपही अपनी मायाकी गतिको जानतेहो,—दूसरा नहीं जानता ॥ २८ ॥ श्रीभगवानने कहा, हे पुरुष श्रेष्ठ उद्धव ! प्रकृति और पुरुष यह अत्यन्तही भिन्न हैं क्योंकि गुणों के क्षोभसे उत्पन्नहुआ यह जगत विकारयुक्त है ॥ २९ ॥ अहो ! मेरी गुणमयी माया नाना प्रकार के गुणों द्वारा अनेकों भेदों को और भेद बुद्धि को उत्पन्न करती हैं । सृष्टि अनेकों विकारयुक्त होने परभी अध्यात्म, अधिभूत और अधिदैव इस भांति तीन प्रकारकी है ॥ ३० ॥ चक्षु, रूप और चक्षु के गोलक में गयाहुआ सूर्य का अंश यह परस्पर सापेक्ष भावसे प्रकाशित होते रहते हैं, आकाश में जो स्वयं सूर्य देव हैं वह स्वयंही प्रकाश पाते हैं । यहीसबका कारण, एक और अभिन्न है, इसेही कारण इससे भिन्न यह आत्मा स्वत.प्रकाश द्वारा समस्त प्रकाशकों का प्रकाशक है अतएव उसका प्रकाश स्वतःसिद्ध है । चक्षु की समान त्वक्, स्पर्श और वायु; श्रवण, शब्द और दिशाएं; जिह्वा,रस और वरुण; नासिका, गन्ध और अश्विनीकुमार चित्त, चेतयितव्य और वासुदेव; तथा मन, मन्तव्य और मंत्र इत्यादि आध्यात्मिक, आधिभौतिक और आधिदैविक हैं ॥ ३१ ॥ गुणक्षोभक परमेश्वर को निमित्तकर प्रकृतिमूलक महत्तत्त्व से जो विकार अहंकार उत्पन्न होता है वह वैकारिक, तामस और इंद्रिय इन तीनप्रकारका है और वही मोहमय विकार का कारण है । " है " " नहीं " इस प्रकारका भेद घटित विवादभी आत्माके अज्ञानके हेतुही प्रतीत हुआ है । भेद के निरर्थक होनेपर भी अपनी गति स्वरूप मुझसे जिस का मन विमुख है उसकी समझ में यह आना अत्यन्तही कठिन है, उसका संशय किसी प्रकार निवृत्त नहोगा ॥ ३४ ॥ उद्धव ने कहा हे प्रभो ! जिसका मन आपसे विमुख होरहा है वहअपने कियेहुए कर्मोंद्वारा, जिसप्रकार ऊंचे और नीचे शरीरों को ग्रहण करते व छोड़ते रहते हैं, हे गोविंद ! यह मुझसे कहिये । जिसकी आत्मा निकृष्ट है वह कुछ नहीं समझ सकता । निश्चयही इस लोक में कोई विद्वान् नहीं है; क्योंकि सबही माया से मोहित हैं ॥ ३५ ॥ भगवान् ने कहा कि—मनुष्यों का कर्ममय मन,—पांच इन्द्रियों के साथ इस लोक से उस लोक में और फिर वहां

ध्यायन्मनोऽनुविषयान्दृष्टान्वाऽनुश्रुतानथ । उद्यत्सीदत्कर्मतन्त्रं स्मृतिस्तदनुशाम्यति
॥ ३७॥ विषयाभिनिवेशेन नात्मानंयत्स्मरेत् पुनः। जन्तोर्वै कस्यचिद्धेतोर्मृत्युरत्य
न्तविस्मृतिः ॥ ३८ ॥ जन्मत्वात्मतयापुंसः सर्वभावेनभूरिद । विषयस्वीकृतिंप्रा-
हुर्यथा स्वप्नमनोरथः ॥ ३९ ॥ स्वप्नंमनोरथंचेत्थं प्राक्तनंनस्मरत्यसौ । तत्र पूर्वमि
वात्मानमपूर्वं चानुपश्यति ॥ ४० ॥ इन्द्रियायनसृष्ट्येदं त्रैविध्यंभातिवस्तुनि । ब-
हिरन्तर्भिदाहेतुर्जनोऽसज्जनकृद्यथा ॥४१ ॥ नित्यदाह्यङ्गभूतानि भवन्तिनभवन्ति
च । कालेनालक्ष्यवेगेन सूक्ष्मत्वात्तन्नदृश्यते ॥४२ ॥ यथाऽर्चिषांस्रोतसांच फला
नांवावनस्पतेः । तथैवसर्वभूतानां वयोऽवस्थादयःकृताः ॥ ४३ ॥ सोऽयंदीपोऽ-
र्चिषां यद्वत्स्रोतसांतदिदंजलम् । सोऽयंपुमानितिनृणां मृषागीर्धीर्मृषायुषाम् ४४॥
मास्वस्यकर्मबीजेन जायतेसोऽप्ययंपुमान् । म्रियतेवाऽमरोभ्रान्त्या यथाऽग्निर्दा-
रुसंयुतः ॥ ४५ ॥ निषेकगर्भजन्मानि बाल्यकौमारयौवनम् । वयोमध्यंजरा मृत्यु
रित्यवस्थास्तनोर्नव ॥ ४६ ॥ एतामनोरथमयीर्ह्यन्यस्योच्चावचास्तनूः । गुणसं
गादुपादत्ते क्वचित्कश्चिज्जहातिच ॥ ४७ ॥ आत्मनःपितृपुत्राभ्या मनुमेयौभवा

स दूसरे में जाता है; आत्मा उसका अनुसरण करता रहता है ॥ ३६ ॥ कर्माधीन मन, दीखते
हुए व वेदोक्त विषयों की चिंता करते २ विषयों में प्रगट व लीन होजाता है; इसके उपरांत स्मृति
का नाश होता है। सब विषयों के अभिनिवेश वश किसी कारण से मनको जो पूर्व शरीर का
स्मरण न रहे तोवह अत्यन्त विस्मरणही प्राणी की मृत्यु कहलाती है ॥ ३७—३८ ॥ हेवदान्य !
अभेद क्रम से देह को जो आत्मस्वरूप से स्वीकार कियाजाय वही पुरुष का जन्म है । यहठीक
स्वप्न और मनोरथ की समान है; कि जैसे वर्तमान स्वप्न और मनोरथ में लगजाने से पहिले
स्वप्न और मनोरथके भूलजानें पर मनके अभ्यास के कारण आत्मा अपने को पूर्वसिद्ध होनेपर
भी नयाही सा देखता है इसप्रकार मनके पूर्व देह का विस्मरण और दूसरे देह का स्मरणहोने
पर उस मनके अभ्यास के हेतु आत्मा अपने का सिद्ध होनेपरभी नयाजन्म हुआ मानताहै ३९॥
॥ ४० ॥ जिसप्रकार जीव स्वप्न में बहुत जीवों को देख बहुत रूप का होता है, इसही प्रकार
जनकी जो उत्पत्ति है उसके द्वाराही यह प्रकारत्रय आत्मा में असत् रूप से प्रकाश पाता है;
आत्मा बाहिरी और भीतरी भेद का कारण है । अहो ! अलक्ष्य वेगकाल, महाकाल, प्राणीनित्य
ही जन्मते और नाश होते हैं; काल के सूक्ष्मत्व प्रयुक्तको अविवेकी मनुष्य नहीं देखपाते ॥४१॥
॥ ४२ ॥ काल जैसे परिणामद्वारा तेजकी, प्रवाह त्यागद्वारा स्रोतकी और पक्वता द्वारा वृक्षके
फलोंकी अवस्थाको क्षण २ में बदलताहै वैसेही सब प्राणियों की वयस और अवस्थाआदिको भी
बदलता है ॥ ४३ ॥ परन्तु तोभी जैसे तेज प्रगट होने से ' यह वही दीपक है ' और स्रोत के
आजाने से यह वही जल है;' इसही प्रकार प्राणियों का ' यह वही शरीर है ' इसप्रकार से अ-
विचारी मनुष्य वृथा अज्ञान होकर बका करते हैं ॥ ४४ ॥ अज और अमर होकरभी जो जीव
अपने कर्मों द्वारा जन्म ग्रहण करता या मरता है,—यह नहीं है; किंतु भ्रांतिद्वारा जन्मता रहता है
और नाशपाता रहता है । जिस प्रकार महाभूत रूप अग्नि कल्पांत पर्यंत अवस्थित होकरभी
केवल काठके संयोग और वियोग से जन्म मृत्यु को प्राप्त होता है उसही प्रकार आत्मा अजर
और अमर होकरभी भ्रांतिवश उत्पत्ति और नाश को प्राप्त होता है ॥ ४५ ॥ उदर में प्रवेश,
उदर में वृद्धि, जन्म, बाल्य, कौमार, यौवन, मध्यवयस, जरा और मृत्यु शरीरकी यहनवअवस्था
यें हैं ॥ ४६ ॥ स्वाभाविक अविवेक के कारण जीव दूसरे की इन सब मनोरथमयी ऊंची नीची
अवस्थाओं को ग्रहण करता है; कभी किसी को छोड़तारहता है ॥ ४७ ॥ पिता और पुत्रद्वारा

व्ययौ । नभवाव्ययवस्तूनामभिज्ञोद्वयलक्षणः ॥ ४८ ॥ तरोर्बीजविपाकाभ्यां यो विद्वाञ्जन्मसंयमौ । तरोर्विलक्षणोद्रष्टा एवंद्रष्टातनोःपृथक् ॥ ४९ ॥ प्रकृतेरेवमात्मानमविविच्याबुधःपुमान् । तत्त्वेनस्पर्शसंमूढः संसारंप्रतिपद्यते ॥ ५० ॥ सत्वसंगादृषीन्देवान्रजसाऽसुरमानुषान् । तमसाभूततिर्यक्त्वं भ्रामितोयातिकर्मभिः ॥ ॥ ५१ ॥ नृत्यतोगायतःपश्यन् यथैवानुकरोतितान् । एवंबुद्धिगुणान्पश्यन्ननीहो ऽप्यनुकार्यते ॥ ५२ ॥ यथाऽम्भसाप्रचलता तरवोऽपिचलाइव । चक्षुषाभ्राम्यमाणेन दृश्यतेभ्रमतीवभूः ॥ ५३ ॥ यथामनोरथधियो विषयानुभवोमृषा । स्वप्नदृष्टाश्चदाशार्ह तथासंसारआत्मनः ॥ ५४ अर्थेह्यविद्यमानेपि संसृतिर्ननिवर्तते । ध्यायतोविषयानस्य स्वप्नेऽनर्थागमोयथा ॥ ५५ ॥ तस्मादुद्धवमाभुङ्क्ष्व विषयानसदिन्द्रियैः । आत्माऽग्रहणनिर्भातं पश्यवैकल्पिकंभ्रमम् ॥ ५६ ॥ क्षिप्तोऽवमानितोऽसद्भिः प्रलब्धोऽसूयितोऽथवा । ताडितःसन्निबद्धोवा वृत्त्यावापरिहापितः ५७ निष्ठितोमूत्रितोवाऽज्ञैर्बहुधैवंप्रकम्पितः । श्रेयस्कामःकृच्छ्रगत आत्मनात्मानमुद्धरेत् ॥५८॥ उद्धव उवाच ॥ यथैवमनुबुध्येयं वदनोवदतांवर । सुदुःसहमिमंमन्ये आत्मन्यसदतिक्रमम् ॥ ५९ ॥ विदुषामपिविश्वात्मन् प्रकृतिर्हिबलीयसी । ऋते त्वद्धर्मनिरतान्शान्तांस्तेचरणालयान् ॥ ॥ ६० ॥

इतिश्रीमद्भागवते महापुराणे एकादशस्कन्धे द्वाविंशोऽध्यायः ॥ २२ ॥

अपने नाश और उत्पत्ति का अनुमान नहीं कियाजाता; जब इसप्रकार है तब उत्पत्ति विनाश शाली देह सबकी द्रष्टा दोनों लक्षणों युक्त नहीं है ॥ ४८ ॥ जिस प्रकार बीज और विपाकसे वृक्ष का जन्म और नाश जानाजाता है वह जानपड़नेवाला द्रष्टा वृक्षसे भिन्न है, इसही प्रकार देहका भी द्रष्टा भिन्न है ॥ ४९ ॥ अविवेकी मनुष्य प्रकृति से आत्मा को भलीप्रकार न विचार देहाभिमानद्वारा मूढ़हो संसार को प्राप्त होता है ॥ ५० ॥ सत्व संसर्ग के कारण ऋषि और देव;रज संगसे असुर तथा नर और तमसंग से भूत तथा पशु पक्षी आदि योनियों में यह कर्मोद्वाराभ्रमण करते फिरते हैं ॥ ५१ ॥ जैसे मनुष्य नर्तकों और गायकों को देख उनका अनुकरण करता है, उसही प्रकार अनीह जीव बुद्धि के गुणोंको देखकर उनका अनुकरण करता है ॥ ५२ ॥ जिस प्रकार के कांपने से किनारे के सब वृक्षभी मानों कांपते हुए जान पड़ते हैं; जैसे नेत्रों घूमने से मानोंपृथिवी भी घूमती हुई देख पड़ती है ॥ ५३ ॥ हे दाशार्ह ! जिसप्रकार कामनासक्त चित्त मनुष्यके विषयानुभव तथा स्वप्नके देखेहुए विषय मिथ्या होते हैं,—उसही प्रकार आत्माकी जन्ममृत्यु है । यह मनुष्य विषयों की चिन्ता करता रहता है इसकारण सब विषयों के वर्तमान न रहते हुएभी, स्वप्न में धन प्राप्ति के समान उसके पक्ष में संसार में सुख नहीं प्राप्त होता; ॥ ५४—५५ ॥ अतएव हे उद्धव ! भ्रांत इंद्रियोंद्वारा सब विषयों का भोग न करना चाहिये, देखो, विकल्प सम्बन्धीभ्रम आत्मअज्ञान के वशही प्रकाशित होता है ॥ ५६ ॥ नीच मनुष्य तिरस्कार करें, अपमान करें, हसें, ईर्षाकरें, ताड़नादें, बांधें, जीविका नष्ट करें, ॥ ५७ ॥ शिर पर थूकें वा मूत्र करें तथा और भी ऐसेही दूसरे उपायों से मुझ निष्ठासे से भ्रष्ट करना चाहें और उससे अपने को बहुत कष्ट होवे तौ भी कष्ट मंगलाकांक्षीको उचित है कि निष्ठायुक्तहो आत्माद्वारा आत्माका उद्धार करे ॥ ५८ ॥ उद्धव ने कहाकि—हेवाग्मिश्रेष्ठ ! आपका इस प्रकार का उपदेश अति दुर्ज्ञेय है । मैं सहज में जिससे इसको समझसकूं उसका फिर उपदेश करिये ॥ हे विश्वात्मन् ! आपके धर्मावलम्बी, आपके चरणाश्रित शांतचित्त साधुओं के अतिरिक्त, असत् मनुष्यों द्वारा आत्मा के इसप्रकारके तिरस्कारको पंडितजनभी अति दुःसह मानते हैं ॥६०॥

इतिश्रीमद्भा०महा०एकादशस्कन्धेसरलाभाषाटीकायांद्वाविंशोऽध्यायः ॥ २२ ॥

बादरायणिरुवाच ॥ स एवमाशंसित उद्धवेन भागवतमुख्येन दाशार्हमुख्यः । सभाजयन्भृत्यवचो मुकुन्दस्तमावभाषे श्रवणीयवीर्यः ॥ १ ॥ श्रीभगवानुवाच ॥ बार्हस्पत्य स वै नात्र साधुर्वै दुर्जनेरितैः । दुरुक्तैर्भिन्नमात्मानं यः समाधातुमीश्वरः ॥ २ ॥ न तथा तप्यते विद्धः पुमान्बाणैः सुमर्मगैः । यथा तुदन्ति मर्मस्था ह्यसतां परुषेषवः ॥ ३ ॥ कथयन्ति महत्पुण्यमितिहासमिहोद्धव । तमहं वर्णयिष्यामि निबोध सु समाहितः ॥ ४ ॥ केनचिद्भिक्षुणा गीतं परिभूतेन दुर्जनैः । स्मरता धृतियुक्तेन विपाकं निजकर्मणाम् ॥ ५ ॥ अवन्तिषु द्विजः कश्चिदासीदाढ्यतमः श्रिया । वार्तावृत्तिः कदर्यस्तु कामी लुब्धोऽतिकोपनः ॥ ६ ॥ ज्ञातयोऽतिथयस्तस्य वाङ्मात्रेणापि नार्चिताः । शून्यावसथ आत्मापि काले कामैरनर्चितः ॥ ७ ॥ दुःशीलस्य कदर्यस्य द्रुह्यन्ते पुत्रबान्धवाः । दारा दुहितरो भृत्या विषण्णा नाचरन्प्रियम् ॥ तस्यैवं यक्षवित्तस्य च्युतस्योभयलोकतः । धर्मकामविहीनस्य चुक्रुधुः पञ्चभागिनः ॥ ९ ॥ तदवध्यानविस्रस्तपुण्यस्कन्धस्य भूरिद । अर्थोऽप्यगच्छन्निधनं बह्वायासपरिश्रमः ॥ १० ॥ ज्ञातयो जगृहुः किञ्चित्किञ्चिद्दस्यव उद्धव । दैवतः कालतः किञ्चिद्ब्रह्मबन्धोर्नृपार्थिवात् ॥ ११ ॥ स एवं द्रविणे नष्टे धर्मकामविवर्जितः । उपेक्षितश्च स्वजनैश्चिन्तामाप दुरत्ययाम् ॥ १२ ॥ तस्यैवं ध्यायतो दीर्घं नष्टरायस्तपस्विनः । खिद्यतो बाष्पकण्ठस्य निर्वेदः सुमहानभूत् ॥ १३ ॥ स चाहेदमहो कष्टं वृथात्मा मेऽनुतापितः । न

श्रीशुकदेवजी बोले कि—जिनके पराक्रम सुनने योग्य हैं वह दाशार्ह श्रेष्ठ श्रीकृष्णजी भगवत प्रधान उद्धव कर्तृक इस प्रकार से जिज्ञासितहो सेवकके वाक्यों में आदर प्रकाशकर उससे कहने लगे; ॥ १ ॥ हे बृहस्पति के-शिष्य ! ऐसे साधु इस लोक में नहीं देखे जाते कि जो दुर्जनों के कहेहुए कटुवचनोंद्वारा क्षुभितहुए मनको शांत करने में समर्थहों ॥ २ ॥ असाधुओं के कटुवाक्य रूपी शर मर्म में बिंधकर जिसप्रकार से कष्ट देते हैं मर्म के छेदनेवाले बाणों द्वारा छिद करभी मनुष्य को वैसा कष्ट नहीं होता ॥ ३ ॥ हे उद्धव इस विषय में एक बड़ा भारी इतिहास कहाजाता है, मैं वह कहताहूं, ध्यानलगाकर सुनो ॥ ४ ॥ किसी एक भिक्षुकने दुष्टजनों से तिरस्कृतहो धैर्य धारणकर अपने कर्मों के फलकी सुध करतेहुए बहुत अच्छा निश्चय किया है । उस का चरित्र यों है; कि—॥ ५ ॥ पुराने समय में मालवा देश में कोई एक धनाढय ब्राह्मण वास करताथा । वह अत्यन्तही कृपणथा उसने वाणिज व्यौपारआदि करके बहुतसा धन संचय किया था । वह कामी, अतिलोभी और क्रोधीथा ॥६॥ वह जातिवालों और अतिथियों का बचनमात्रसे भी सत्कार न करता धर्म कार्य रहित घर में रहकर उसका आत्मा भी यथासमय में भोगोंद्वारा तृप्त न होता ॥ ७ ॥ उस दुःशील ब्राह्मण के पुत्र और बांधव आदिभी उससे द्रोहकरनेलगे स्त्री, कन्या और सेवकभी उससे दुःखितहो उसकी इच्छानुसार कार्य न करते । इसप्रकार यक्षकी समान धनका संचय करनेवाले, दोनों लोक से भ्रष्ट, धर्मकाम विहीन उस ब्राह्मण के ऊपर पंचयज्ञभागी देवताभी क्रोधित होगये ॥ ९ ॥ हे उद्धव ! आत्मीय और देवताओं के अनादर से उसका धन मिलने का जो पूर्व पुण्यथा वहभी नष्ट होगया इस कारण बहुत परिश्रम से प्राप्त कियाहुआ उस का समस्त धन नष्ट होगया ॥ १० ॥ हे उद्धव ! उस धनको कुछकतो जाति वालों ने ग्रहण किया, कुछ चोरों ने लिया कुछ अन्य मनुष्यों, राजा, दैव और काल से नाश होगया ॥ ११ ॥ इसप्रकार धनके नाश होजानेपर वह धर्म कामरहित ब्राह्मण अपने स्वजनों से फटकाराजाकर घोर चिंता में निमग्नहुआ ॥ १२ ॥ धनके नाशहोने से संतप्त और गद्गद कण्ठहो खेद करता हुआ बड़ी देरतक चिन्ता करते २ उसको अत्यन्त विराग उत्पन्न होगया ॥ १३ ॥ वह कहने लगा अहो ! क्या कष्टहै ! मैंने व्यर्थही आत्मको सन्तापित किया, मेरा धन न तो धर्महीं में व्यय

धर्मायनकामाय यस्यार्थोयासईश्वरः ॥ १४ ॥ प्रायेणार्थाःकदर्याणां नसुखायकदाचन । इहचात्मोपतापाय मृतस्यनरकायच ॥ १५ ॥ यशोयशस्विनांशुद्धं श्लाघ्यायेगुणिनांगुणाः । लोभःस्वल्पोऽपितान्हन्ति श्वित्रोरूपमिवेप्सितम् ॥ १६ ॥ अर्थस्यसाधनेसिद्धे उत्कर्षेरक्षणेव्यये । नाशोपभोगआयासस्त्रासश्चिन्ताभ्रमोनृणाम् ॥ ॥ १७ ॥ स्तेयंहिंसाऽनृतंदम्भः कामःक्रोधःस्मयोमदः । भेदोवैरमविश्वासः संस्पर्धाव्यसनानिच ॥ १८ ॥ एतेपंचदशानर्था ह्यर्थमूलामतानृणाम् । तस्मादनर्थमर्थाख्यं श्रेयोऽर्थीदूरतस्त्यजेत् ॥ १९ ॥ भिद्यन्तेभ्रातरोदाराः पितरःसुहृदस्तथा । एकास्निग्धाःकाकिणिनासद्यःसर्वेऽरयःकृताः ॥ २० ॥ अर्थेनाल्पीयसाह्येते संरब्धादीप्तमन्यवः । त्यजन्त्याशुस्पृधोघ्नन्ति सहसोत्सृज्यसौहृदम् ॥२१॥ लब्ध्वा जन्माऽमरप्रार्थ्यं मानुष्यंतद्द्विजाग्र्यताम् ॥ तदनादृत्ययेस्वार्थं घ्नन्तियान्त्यशुभांगतिम् ॥ २२ ॥ स्वर्गापवर्गयोर्द्वारं प्राप्यलोकमिमंपुमान् । द्रविणेकोनुषज्जेत मर्त्योऽनर्थस्यधामनि ॥ २३ ॥ देवर्षिपितृभूतानि ज्ञातीन्बंधूंश्च भागिनः । असंविभज्यचात्मानं यक्षवित्तःपतत्यधः ॥ २४ ॥ व्यर्थयार्थेहयावित्तं प्रमत्तस्यवयोबलम् । कुशलायेनसिध्यन्ति जरठःकिंनुसाधये ॥ २५ ॥ कस्मात्संक्लिश्यते विद्वान्व्यर्थयाऽर्थेहयाऽसकृत् । कस्यचिन्माययानूनं लोकोऽयंसुविमोहितः ॥ २६ ॥ किंधनैर्धनदैर्वा किं कामैर्वाकामदैरुत । मृत्युनाग्रस्यमानस्य कर्मभिर्वोतजन्मदैः ॥ २७ ॥ नूनंमेभगवा

यहुआ न मैं स्वयही उसको भोगसका । इतने दिनतक मैंने व्यर्थ धनके निमित्त इतना कष्ट स्वीकारकिया ॥ १४ ॥ कृपणजनों का धन इसलोक में आत्मा के सन्ताप का कारण और मरने पर नरक भोगन का कारण है कभीभी इससे सुख नहीं प्राप्त होता ॥ १५ ॥ कुष्ठ जैसे सुन्दर स्वरूपका नाश करदेता है वैसेही किंचित् लोभभी यशस्वियों के यश और गुणियों के गुणका नाश करता है ॥ १६ ॥ द्रव्य क प्राप्त करने और प्राप्त कियेहुये धनके बढ़ने, रक्षाकरने, व्यय, नाश और उपभोग मे मनुष्योंको सदाही त्रास, चिंता और श्रम उत्पन्न होता रहता है ॥ १७ ॥ चौर्य, हिंसा, मिथ्या, शठता, काम, क्रोध, गर्व, मोह, भेद, वैर, अविश्वास, स्पर्द्धा और व्यसन आदि यह मनुष्योंके अनर्थ मूलक कहगये हैं । अतएव मङ्गलाभिलाषी मनुष्यों को अर्थ नामक अनर्थ दूरसेही परित्यागकर देना चाहिये ॥ १८—१९ ॥ साधारण द्रव्यके निमित्त भाई, स्त्री पिता, माता, और बन्धुओं से शत्रुता होती है और एक प्राण तथा अत्यन्त प्रिय मनुष्य से भी कलह उपस्थित होजाता है । साधारण द्रव्य क निमित्त यह क्षुभित और ज्वलित क्रोधहो एकसाथ सुहृदताको भूल परस्पर में झगड़कर शीघ्र एक दूसरे का नाश करते रहते हैं ॥ २० ॥ ॥ २१ ॥ देवताभी जिसे चाहते हैं ऐसा मनुष्य जन्म उसपरभी ब्राह्मणत्व की श्रेष्ठता को पाय उसका अनादर कर जो अपना हित साधन नहीं करता वह अशुभगति को प्राप्त करता है ॥ ॥ २२ ॥ स्वर्ग और मोक्षके द्वार स्वरूप इसलोकको प्राप्तकर कौन मनुष्य अनर्थकारी धन में आसक्त होगा ? धन प्राप्त होनेपर भी जो मनुष्य विभाग योग्य देवता, ऋषि, पितृ, भूत, जातिवाले और बान्धवों को तथा अपने कोभी प्राप्तहुए पदार्थोंका विभाग न कर यक्ष वृत्तिका अवलम्बन करता है वह नर्क में गिरता है ॥ २३—२४ ॥ विवेकीजन जिसके द्वारा मुक्त होते हैं अनर्थकारी धनकी चेष्टाद्वारा प्रमत्त मनुष्य उस धन, वय, और बलको खो बैठते हैं । वृद्ध होनेपर और क्या साधन कियाजाय ! जानकरभी मनुष्य किस कारण व्यर्थ धनकी चेष्टा से बारम्बार क्लेश पाता है ? निश्चय यह मनुष्य किसी की मायाद्वारा अत्यन्त मोहित है ॥ २५—२६ ॥ मृत्यु से नाश होनेवालेमनुष्य का, धनसे क्या होता है ? धन देनेवालेही कौन है ? सुख अथवा सुख देने वालोंसेही क्या अभिप्राय ? बारम्बार जन्म देनेवाले कर्मों सेही क्या प्रयोजन है ?—॥२७॥

स्तुष्टः सर्वदेवमयो हरिः । येननीतो दशामेतां निर्वेदश्चात्मनः प्लवः ॥ २८ ॥ सोऽ-
हंकालावशेषेण शोषयिष्येऽङ्गमात्मनः । अप्रमत्तोऽखिलस्वार्थे यदि स्यात्सिद्ध आ
त्मनि ॥ २९ ॥ तत्रमामनुमोदेरन्देवास्त्रिभुवनेश्वराः । मुहूर्तेनब्रह्मलोकं खट्वांगः
समसाधयत् ॥ ३० ॥ श्रीभगवानुवाच । इत्यभिप्रेत्यमनसा ह्यावन्त्योद्विजसत्तमः
उन्मुच्यहृदयग्रन्थीन्शान्तो भिक्षुरभून्मुनिः ॥ ३१ ॥ सचचारमहीमेतां संयतात्मे
न्द्रियानिलः । भिक्षार्थं नगरग्रामानसङ्गोऽलक्षितोऽविशत् ॥ ३२ ॥ तंवैप्रवयसं
भिक्षुमवधूतमसज्जनाः । दृष्ट्वापर्यभवन्भद्र बह्वीभिः परिभूतिभिः ॥ ३३ ॥ के-
चित्त्रिवेणुं जगृहुरेकेपात्रं कमण्डलुम् ॥ पीठंचैकेऽक्षसूत्रंच कन्थांचीराणि केचन ॥
॥ ३४ ॥ प्रदायचपुनस्तानि दर्शितान्याददुर्मुनेः ॥ अन्नंचभैक्ष्यसंपन्नं भुंजानस्य
सरित्तटे ॥ ३५ ॥ मूत्रयन्तिचपापिष्ठाः ष्ठीवन्त्यस्यचमूर्धनि । यतवाचंवाचयन्ति
ताडयन्तिनवक्तिचेत् ॥ ३६ ॥ तर्जयन्त्यपरे वाग्भिः स्तेनोऽयमितिवादिनः । बध्न
न्तिरज्ज्वातं केचिद्बध्यतां बध्यतामिति ॥ ३७ ॥ क्षिपन्त्येकेऽवजानन्त एषधर्मध्व
जःशठः । क्षीणवित्तइमां वृत्तिमग्रहीत्स्वजनोज्झितः ॥ ३८ ॥ अहोएषमहासारोधृ
तिमान्गिरिराडिव । मौनेनसाधयत्यर्थं बकवद्दृढनिश्चयः ॥३९॥ इत्येके विहसन्त्ये
नमेकेदुर्वातयन्तिच । तंबबन्धुर्निरुरुधुर्यथा क्रीडनकं द्विजम् ॥ ४० ॥ एवंसभौ-

निश्चयही सर्वदेवमय भगवानहरि मुझपर सन्तुष्टहुएहैं उन्होंने मुझको इसदशापर पहुँचाकर आत्मा के भेदक स्वरूप वैराग्य को उत्पन्न करादिया है ॥ २८ ॥ अतएव यदि होगा तो आयुकाशेष भागमें अपने आत्मा सेहीं सन्तुष्ट और समस्त धर्मादि के साधनों में अप्रमत्तहो अपने शरीर को सुखाऊंगा ॥ २९ ॥ इस विषय में त्रिलोकी के स्वामी देवता मुझपर अनुग्रहकरें । खटवांग ने तो क्षणभर मेंही ब्रह्मलोक को प्राप्तकरलियाथा ॥ ३० ॥ भगवान ने कहा, कि उस मालव देशीय श्रेष्ठ ब्राह्मण ने इसप्रकार से मन २ में विचार सब हृदयकी ग्रंथियों का नाश किया तथा शांत और भिक्षुक मुनिवृत्ति का अवलम्बनकर ॥ ३१ ॥ आत्मा, इंद्रिय और प्राणोंको जीत वह भूमण्डल में भ्रमण करनेपर प्रवृत्तहुआ. । वह आसक्त रहित, और अलक्षितहो भिक्षाके निमित्त नगर और गांवों में जाता; वहांपर दुष्ट मनुष्य उस वृद्ध भिक्षुक अवधूत का नानाप्रकार के तिरस्कृतवाक्यों द्वारा तिरस्कार करते, ॥ ३२—३३ ॥ कोई २ उसका त्रिदण्ड, कोई कमण्डलु, कोई भोजनपात्र, कितने एक बैठनेका आसन, कितनेएक जप करने की माला, कितने एक गूदड़ी और कितनेही उसके चीथड़े खींचे लेते,—॥ ३४ ॥ फिर दिखाकर लौटा देते और फिर छीन लेते । जब वह नदीके किनारे भिक्षासे प्राप्तहुए अन्नका भोजन करने बैठता तो उसको उस से कोई २ छीन लेता ॥ ३५ ॥ और दूसरे दुष्टजन उसके शरीर पर मूतते और मस्तकपर थूकते उसने मौनव्रत धारण किया था इससे उसको बुलाने का यत्न करते, यदि वह न बोलता तो उस को मारते ॥ ३६ ॥ औरभी उसे 'चोर चोर, कहकर नाना प्रकारके वाक्योंद्वारा उसका तिरस्कार करते । कोई २ 'बांधोबांधो' करके उसको रस्सियों से बांधते । कुछेक मनुष्य "मूर्खने सब धर्म के चिह्नों को धारण किया है, धनहीन और स्वजन वर्जितहो इस वृत्तिका अवलम्बन किया है" यह कहकर उसकी निंदा करते ॥ ३७—३८ ॥ अहो ! यह अत्यन्त बलिष्ठ और पर्वत राजकी समान धैर्यशाली है; दृढ़ता पूर्वक मौन व्रतका धारणकर बगुले की समान अपने कार्य का साधन कररहा है" ॥ ३९ ॥ यह कहकर कुछेक मनुष्य उसका उपहास करने लगे । उसके ऊपर कोई कोई अधोवायु छोड़ते, कोई २ उसको खेलके पक्षी की समान बांधते और बंद करते ॥ ४० ॥

तिकं दुःखं दैविकं दैहिकं च यत् । भोक्तव्यमात्मनो दिष्टं प्राप्तंप्राप्तमबुध्यत ॥ ४१ ॥ परिभूत इमां गाथामगायत नराधमैः । पातयद्भिः स्वधर्मस्थो धृतिमास्थाय सात्विकीम् ॥४२॥ द्विज उवाच । नायं जनो मे सुखदुःखहेतुर्न देवताऽऽत्मा ग्रहकर्मकालाः मनःपरकारणमामनन्ति संसारचक्रंपरिवर्तयेद्यत् ॥ ४३ ॥ मनो गुणान्वै सृजते बली यस्ततश्च कर्माणि विलक्षणानि । शुक्लानि कृष्णान्यथ लोहितानि तेभ्यः सवर्णाः सृतयो भवन्ति ॥ ४४ ॥ अनीह आत्मा मनसा समीहता हिरण्मयो मत्सख उद्विचष्टे । मनः स्वलिंगं परिगृह्य कामान् जुषन्निबद्धो गुणसंगतोऽसौ ॥४५॥ दानस्वधर्मो नियमो यमश्च श्रुतानि कर्माणि च सद्व्रतानि । सर्वे मनोनिग्रहलक्षणान्ताः परो हि योगो मनसः समाधिः ॥ ४६ ॥ समाहितं यस्य मनःप्रशान्तं दानादिभिः किं वद तस्य कृत्यम् । असंयतं यस्य मनो विनश्यद्दानादिभिश्चेदपरं किमेभिः ॥ ४७ ॥ मनोवशेऽन्ये ह्यभवन्स्म देवा मनश्च नान्यस्य वशं समेति । भीष्मो हि देवः सहसः सहीयान्युंज्याद्वशे तं स हि देवदेवः ॥ ४८ ॥ तं दुर्जयं शत्रुमसह्यवेगमरुन्तुदं तन्न विजित्य केचित् । कुर्वन्त्यसद्विग्रहमत्र मर्त्यैर्मित्राण्युदासीनरिपून्विमूढाः ॥ ४९ ॥ देहं मनोमात्रमिमं गृहीत्वा ममाहमित्यन्धधियो मनुष्याः । एषोऽहमन्योऽयमिति भ्रमेण दुरन्तपारे तमसि भ्रमन्ति ॥ ५० ॥ जनस्तु हेतुः सुखदुःखयोश्चेत्किमात्मनश्चात्र हि भौमयोस्तत् । जिह्वां क्वचित् संदशति स्वदद्भिस्तद्वेदनायां कतमाय कुप्येत् ॥५१॥ दुःखस्य हे-

वह जितनाही आत्म भोग्य दैव से प्राप्तहुए ऐसे भौतिक, दैहिक और दैविक भोगों को भोगने लगा उस का ज्ञान उतनाही वृद्धिपानेलगा ॥ ४१ ॥ वह धर्म नाशक दुष्टों द्वारा तिरस्कृतहो सात्विक धैर्य धारणकर अपने धर्म में स्थित होरहाथा; क्यामनुष्य, क्या देवता, क्या आत्मा, क्या ग्रह, क्याकर्म, क्याकाल—कुछभी मेरे दुःख का कारण नहीं है; केवल मनही दुःख का कारण है । मनद्वाराही संसार चक्र घुमाकरता है ॥ ४२—४३ ॥ बलवान मनही सबगुणों को उत्पन्न करता है गुणों से सात्विक, राजस, और तामस ऐसे पृथक् २ भांति के कर्म होते हैं औरकर्मों सेही सत्वगुणी रजोगुणी और तमोगुणी जन्म होते हैं ॥ ४४ ॥ आत्मा निरीह है;यह मद्रूपीजीव का नियंता और विद्या शक्ति प्रधान है अतएव चेष्टासाधन चित्तद्वारा ऊंची चेष्टा करता है। किंतु यह स्वयं संसार प्रकाशक मनको आत्म स्वरूप से मानकर गुणों के संग के कारण सगरतविषयों का सेवन करताहुआ बंधारहता है ॥ ४५ ॥ दान, स्वधर्म, नियम, यम; वेदाध्ययन, कर्म और व्रतआदि का अंतिम फलही मनका संयम करना है; मनका दमन करनाही परम योग है । जिस पुरुष का मन शांत और वशीभूत है ॥ ४६ ॥ उसको दानादि से क्या अभिप्राय ? जिसकामन शांतनहो आलस्य आदि से घिराहुआ है उसका दानादि से क्या प्रयोजन सिद्धहोगा ? ॥ ४७ ॥ अन्यान्य देवता मनकेही वशीभूत हैं; मन दूसरे की आधीनता को स्वीकार नहीं करता । मन रूपी देव बलीहोकरभी अधिक बलवानहै, इस कारण योगियों को भी भय उपजानेवाला है,जिसने इसको वश करलिया वही देव देव है ॥ ४८ ॥ यही दुःसह वेगवाला मर्म पीडादायकशत्रु है । कुछेक मूढमनुष्य उसे न जीतकर संसार में व्यर्थही कलह में प्रवृत्त होते हैं और कितनोंही को मित्र,कितनोंहीको शत्रु और कितनोंही को उदासीन मानलेता है ॥४९॥ केवल मनसेही कल्पित कियेहुए इस शरीर का अवलम्बनकर ' मैं और मेरा ' ऐसा माननेवाले मूढ बुद्धि मनुष्य ' यह मैं ' ' यह दूसरा ' इस भ्रम से दुस्तर संसार में भ्रमण करते हैं ॥ ५० ॥ यदि मनुष्यही सुख और दुःख का कारण होवे तो उसमें आत्माको क्या ? कुछभी नहीं । सुख दुःख का भोक्तृत्व और सुख दुःख का कर्तृत्व आत्मा में नहीं है, केवल भौतिक देह सेही उसका कर्तृत्व सम्भव है; अतएव सुख दुःखके होने से उस पर किसीको अनुराग व कोप न करना चाहिये ॥ ५१ ॥ क्यों

तुर्यदि देवतास्तु किमात्मनस्तत्र विकारयोस्तत्। यदङ्गमङ्गेन निहन्यते क्वचित् क्रुध्येत कस्मै पुरुषः स्वदेहे ॥ ५२ ॥ आत्मा यदि स्यात्सुखदुःखहेतुः किमन्यतस्तत्र निजस्वभावः। नह्यात्मनोऽन्यद्यदि तन्मृषा स्यात् क्रुध्येत कस्मान्न सुखं न दुःखम् ॥ ५३ ॥ ग्रहानिमित्तं सुखदुःखयोश्चेत्किमात्मनोऽजस्य जनस्य ते वै ॥ ग्रहैर्ग्रहस्यैव वदन्ति पीडां क्रुध्येत कस्मै पुरुषस्ततोऽन्यः ॥ ५४ ॥ कर्मास्तु हेतुः सुखदुःखयोश्चेत्किमात्मनस्तद्धि जडाजडत्वे। देहस्त्वचित् पुरुषोऽयं सुपर्णः क्रुध्येत कस्मै नहि कर्ममूलम् ॥ ५५ ॥ कालस्तु हेतुः सुखदुःखयोश्चेत्किमात्मनस्तत्र तदात्मकोऽसौ। नाग्नेर्हि तापो न हिमस्य तत्स्यात् क्रुध्येत कस्मै न परस्य द्वन्द्वम् ॥ ५६ ॥ न केनचित्क्वापि कथंचनास्य द्वन्द्वोपरागः परतः परस्य। यथाऽहमः संसृतिरूपिणः स्यादेवं प्रबुद्धो न बिभेति भूतैः ॥ ५७ ॥ एतां स आस्थाय परात्मनिष्ठा मध्यासितां पूर्वतमैर्महर्षिभिः। अहं तरिष्यामि दुरन्तपारं तमो मुकुन्दाङ्घ्रिनिषेवयैव ॥ ५८ ॥ श्रीभगवानुवाच ॥ निर्विद्य नष्टद्रविणो गतक्लमः प्रव्रज्य गां पर्यटमान इत्थम्। निराकृतोऽसद्भिरपि स्वधर्मादकम्पितोऽमूं मुनिराह गाथाम् ॥ ५९ ॥ सुखदुःखप्रदो नान्यः पुरुषस्यात्मविभ्रमः।

कि अपने दांतोसे जीभके काटने पर उससे दुःख उत्पन्नहोनेपर किसपर क्रोध किया जासकताहै ? यदि देवताओं कोही दु खका कारण कहाजाय तो फिर उसमेंभी औरोंको क्या!—एकने दूसरेको मारा अथवा काटखाया तो इस विकार से हाथके देवता इन्द्रका और मुखके देवता अग्निका कलह हुआ इससे आत्माको क्या ? निर्विकार और अहंकाररहित आत्मामें कुछभी संभव नहीं देवताभी सब शरीर में अनेकानेक हैं इससे किसीपर क्रोध नहीं होसकता । अपने शरीर मेंही देवताओं के आश्रय एक अंग पर दूसरे अंगका प्रहार होवेतो वह किसपर क्रोध किया जाय ? आत्माही यदि सुख दुःख का कारण होवे, तो फिर इससे दूसरे को क्या हुआ—उसका स्वयही स्वभाव है; निश्चयही आत्मासे दूसरा नहीं है यदि है तो वह मिथ्या है, अतएव किस कारण कोप कियाजाय ? कारण यह कि—सुख दुःखका निमित्त सुख वा दुःख कुछभी वास्तविक नहीं है ॥ ५२ । ५३ ॥ ग्रहों कोही यदि सुख दुःख का कारण कहाजाय तो फिर आत्माहीको क्या ? वह जन्मता नहीं उद्भव शील देह कोही दुःख सुख का होना सम्भव है, देवज्ञगण ग्रहोंद्वाराही ग्रहपीड़ा करते हैं, अतएव मनुष्य किस २ पर क्रोध करे ? वह उससे भिन्न है ॥ ५४ ॥ यदि कर्मही सुख दुःख का कारण है तो फिर उससेही आत्माको क्या ? क्योंकि जड़ता और अजड़ता दोनोंकोही एक होने से कर्म का होना संभावित होसकता है, परन्तु शरीर जड़ और यह पुरुष शुद्ध ज्ञानमय है; अतएव सुख और दुःख की जड़ कर्मही नहीं है । किसके ऊपर कुपित होवे ? ॥ ५५ ॥ कालही यदि सुख और दुःख का कारण है तो उससेही आत्माको क्या ? क्योंकि काल स्वयही आत्मा का अंश है तो जैसे ज्वाला की गर्मी अग्नि को नहीं लगती और हिमकण का शीत हिम को नहीं लगता ऐसेही काल से होतेहुए सुख दुःख से आत्मा को किसी प्रकार का क्लेश नहीं होसकता ॥ ५६ ॥ अतएव किसके ऊपर कोप कियाजाय ? ससार प्रकाशकारी अहङ्कार से जैसा भय उत्पन्न होता है वैसा भय फिर बुद्धिमान होनेपर नहीं रहता; इसही प्रकार आत्माके अन्यत्र से किसी के भी द्वारा, कहीं किसी प्रकार से सुख दुःखादि नहीं होसकता ॥ ५७ ॥ अतएव मैं प्राचीनतम महर्षियों की सेवित इस ब्रह्मनिष्ठा का आश्रयके भगवान की चरण सेवा द्वारा इस दुस्तर ससार से पारहूंगा ॥ ५८ ॥ भगवान ने कहा कि—वह नष्टधन, गतभ्रम, वैराग्ययुक्त मुनि दुष्टों के इसप्रकार तिरस्कृत करने परभी अपने स्वधर्म से न विचलितहुआ । उसने पृथ्वी पर भ्रमण करते २ इस गाथा को कहाथा ॥ ५९ ॥ मनुष्योंके सुख दुःख का देनेवाला दूसरा

मित्रोदासीनरिपवः संसारस्तमसः कृतः ॥ ६० ॥ तस्मात्सर्वात्मना तात निगृहाण मनोधिया । मय्यावेशितया युक्त एतावान्योगसंग्रहः ॥ ६१ ॥ य एतांभिक्षुणागीतां ब्रह्मनिष्ठांसमाहितः । धारयञ्छ्रावयञ्छृण्वन् द्वन्द्वैर्नैवाभिभूयते ॥ ६२ ॥

इति श्रीमद्भा० महा० एकाद० त्रयोविंशोऽध्यायः ॥ २३ ॥

श्रीभगवानुवाच । अथतेसंप्रवक्ष्यामि सांख्यंपूर्वैर्विनिश्चितम् । यद्विज्ञायपुमान्सद्यो जह्याद्वैकल्पिकंभ्रमम् ॥ १ ॥ आसीज्ज्ञानमथो अर्थएकमेवाविकल्पितम् । यदाविवेकनिपुणाआदौकृतयुगेयुगे ॥ २ ॥ तन्मायाफलरूपेण केवलंनिर्विकल्पितम् । वाङ्मनोऽगोचरंसत्यं द्विधासमभवद्बृहत् ॥ ३ ॥ तयोरेकतरोह्यर्थःप्रकृतिः सोभयात्मिका । ज्ञानंत्वन्यतमोभावः पुरुषःसोऽभिधीयते ॥ ४ ॥ तमोरजःसत्वमिति प्रकृतेरभवन्गुणाः । मयाप्रक्षोभ्यमाणायाः पुरुषानुमतेनच ॥ ५ ॥ तेभ्यः समभवत्सूत्रंमहान्सूत्रेणसंयुतः । ततोविकुर्वतोजातोयो ऽहङ्कारोयोविमोहनः ॥ ६ ॥ वैकारिकस्तैजसश्च तामसश्चेत्यहंत्रिवृत् । तन्मात्रेन्द्रियमनसां कारणंचिदचिन्मयः ॥७॥ अर्थस्तन्मात्रिकाज्जज्ञे तामसादिन्द्रियाणिच । तैजसाद्देवताआसन्नेकादशचवैकृतात् ॥ ८ ॥ मयासंचोदिताभावाः सर्वेसंहत्यकारिणः । अण्डमुत्पादयामासुर्ममायतनमुत्तमम् ॥ ९ ॥ तस्मिन्नहंसमभवमण्डे सलिलसंस्थितौ । ममनाभ्या-

नहीं है; मित्र, उदासीन, शत्रु और समस्त संसार भी अज्ञान के कारण अपने मनकी भ्रांति से उत्पन्न कियाहुआ है ॥ ६० ॥ अतएव हेवत्स ! मुझमें अपनी बुद्धि को लगाय सबप्रकार से मनको वशीभूतकर योगाभ्यास करो ॥ ६१ ॥ जो मनुष्य इस भिक्षुक के गीतको ब्रह्म निष्ठा धारण करेगा अथवा सुनेगा और सुनावेगा, वह सुख दुःखादि द्वन्द्वों से संतप्त न होगा ॥ ६२ ॥

इतिश्रीमद्भा०महा०एकादशस्कन्धेसरलाभाषाटीकायांत्रयोविंशोऽध्यायः ॥ २३ ॥

श्री भगवान बोले कि—हेउद्धव ! कपिलादि प्राचीन ऋषियों द्वारा भली प्रकार से निश्चित् सांख्ययोग को अब तुमसे कहूंगा । उसको जानकर मनुष्य तत्कालही भेद निबन्धन सुख दुःखादि से मुक्त होते हैं ॥ १ ॥ पहिले प्रलय काल में ये समस्त दृश्यपदार्थ विकल्प रहित एक अद्वितीय परम ब्रह्मरूपथे, उसके उपरांत युगांतर में जब सबमनुष्य विवेकी और निपुणथे, तबभी भेदज्ञान न होने से सब ईश्वरही रूप जानजातेथे ॥ २ ॥ केवल भेद रहित और सत्य यह व्यापक ब्रह्मही अपनी माया के हेतु वाणीकी और मनकी प्रवृत्ति होवे ऐसे दृश्य और द्रष्टारूप से दो प्रकार का हुआ ॥ ३ ॥ इस दृश्य और द्रष्टा में जो दृश्यपदार्थ है वह कार्य कारणरूप प्रकृति है और दूसरा द्रष्टापदार्थ पुरुष कहाजाता है ॥ ४ ॥ मैंने जीवों के अदृश्यके निमित्त ईक्षणरूप द्वार से प्रकृति को क्षुभित किया तब उससे सत्व, रज और तम येतीन गुण उत्पन्नहुए ॥ ५ ॥ इनसे महत्तत्व और क्रियाशक्ति उत्पन्नहुई, उससे क्रियाशक्ति संयुक्त ज्ञानशक्ति, उस में विकार प्रवृत्त होने पर उससे अहंकार उत्पन्न हुआ; वह अहंकारही जीवों को भ्रम उत्पन्न कराता है ॥ ६ ॥ अहंकार के वैकारिक, तैजस और तामस यह तीन भेद हैं इनमें वैकारिक अहंकार से इंद्रियों के ग्यारह देवता और मन उत्पन्नहुआ, तैजस से ग्यारह इंद्रियां उत्पन्नहुई, तामस से शब्द स्पर्श, रूप, रस और गन्ध यह पांचतन्मात्रा उत्पन्नहुई यह अहंकार चिदाभास से व्याप्त होनेके कारण जड और चैतन्यकी ग्रंथिरूप कहाता है, देवता और मनका प्रकाश स्वभाव है, इस निमित्त उनको वैकारिक सात्विक अहंकार माना है, इंद्रियों का प्रवृत्तिस्वभाव है, इस लिये उनको तैजस अहंकार का कार्य माना है, पंच महाभूतों का आवरण स्वभाव है इसकारण वे तामसअहंकार के कार्य मानेगये हैं ॥ ७—८ ॥ मेरी प्रेरणासे इनसब पदार्थों ने एकत्रित होकर मेरे उत्तम विश्राम स्थान अण्डको उत्पन्न किया ॥ ९ ॥ जल में स्थित उस अण्डमें मैं उत्पन्नहुआ । मेरी नाभि से

मभूत्पद्मं विश्वाख्यं तस्मिन्नात्मभूः ॥ १० ॥ सोऽसृजत्तपसायुक्तो रजसामदनुग्रहात् । लोकान्सपालान्विश्वात्मा भूर्भुवःस्वरितित्रिधा ॥ ११ ॥ देवानामोक आसीत्स्वर्भूतानां चभुवःपदम् । मर्त्यादीनांचभूर्लोकःसिद्धानांत्रितयात्परम् ॥ १२ ॥ अधोऽसुराणांनागानांभूमेरोकोसृजत्प्रभुः । त्रिलोक्यांगतयःसर्वाःकर्मणांत्रिगुणात्मनाम् ॥ १३ ॥ योगस्यतपसश्चैव न्यासस्यगतयोऽमलाः । महर्जनस्तपःसत्यंभक्तियोगस्य मद्गतिः ॥१४॥ मयाकालात्मनाधात्रा कर्मयुक्तमिदं जगत् । गुणप्रवाहएतस्मिन्नुन्मज्जतिनिमज्जति १५ अणुर्बृहत्कृशःस्थूलोयोयोभावःप्रसिध्यति । सर्वोऽप्युभयसंयुक्तः प्रकृत्यापुरुषेणच ॥ १६ ॥ यस्तुयस्यादिरन्तश्चसवैमध्यंचतस्यसन् । विकारोव्यवहारार्थो यथातैजसपार्थिवाः १७ ॥ यदुपादायपूर्वस्तु भावोविकुरुतेऽपरम् । आदिरन्तोयदायस्य तत्सत्यमभिधीयते ॥ १८ ॥ प्रकृतिर्यस्योपादान माधारःपुरुषःपरः । सतोऽभिव्यञ्जकःकालो ब्रह्मतत्त्रितयंत्वहम् ॥ १९ ॥ सर्गःप्रवर्ततेतावत् पौर्वापर्येणनित्यशः । महान्गुणविसर्गार्थः स्थित्यन्तोयावदीक्षणम् ॥२०॥ विराण्मयाऽऽसाद्यमानो लोककल्पविकल्पकः । पंचत्वायविशेषाय कल्पतेभुवनैःसह ॥ २१ ॥ अन्नेप्रलीयतेमर्त्यं मन्नंधानासुलीयते । धानाभूमौप्रलीयन्ते भूमिर्गन्धेप्र लीयते ॥ २२ ॥ अप्सुप्रलीयतेगन्ध आपश्चस्वगुणेरसे । लीयतेज्योतिषिरसो ज्योतीरूपेप्रलीयते ॥ २३ ॥ रूपंवायौसचस्पर्शे लीयतेसोऽपिचाम्बरे । अम्बरंश

विश्वनामकपद्म और उससे आत्मयोनि ब्रह्माजी उत्पन्नहुए ॥ १० ॥ उन विश्वात्मा ने तपस्या के प्रभाव और मेरे अनुग्रह से रज द्वारा लोक पालों सहित सब लोक तथा भूः, भुवः और स्वः— इन तीन लोकों को उत्पन्न किया ॥ ११ ॥ स्वर्लोक देवताओं का निवास स्थान हुआ, भुवर्लोक भूत आदिका, भूर्लोक मनुष्योंका तथा इन तीनों लोकों से महर्लोकादि सिद्ध गणों के निवास हुए ॥ १२ ॥ ब्रह्माजी ने पृथ्वी के निचे के भागमें असुर और नागोंका निवास स्थान बनाया । त्रिगुणात्मक कर्म करने से जो गतिया होती हैं वे सब त्रिलोकी के भीतर है ॥ १३ ॥ योग तपस्या और सन्यास की निर्मल गतियां महर्लोक, जनलोक, तपोलोक और सत्यलोक हैं और भक्तियोग की गति वैकुण्ठ है ॥ १४ ॥ मैं काल रूपी धाता हू; मुझसेही कर्म सहित यह जगत इसही गुण प्रवाह से उठता है और मग्न होता है ॥ १५ ॥ छोटे, बडे, सूक्ष्म, स्थूल जो २ प्रसिद्ध पदार्थ हैं वे सबही प्रकृति और पुरुष दोनोंसे संयुक्त हैं ॥ १६ ॥ जो पदार्थ जिसका कारण और लयस्थान है वही उसकी मध्यावस्था है, अतएव वही सत् है,—विकार तो केवल व्यवहारके कारण है, कंकण आदि तैजस पदार्थ और घट शरीरादि पार्थिव पदार्थ उसका दृष्टांत है ॥ १७ ॥ यदिकिसी पदार्थ के उपादान कारणका दूसरा उपादान कारणहो तो वह प्रथम उपादान कारणही यथार्थ में सत्य है । तो फिर जब जो जिसका उपादान स्वरूपहो तब वही उसकी अपेक्षा सत्य है ऐसा वेद में कहा है ॥ १८ ॥ कार्यकी उपादान प्रकृति; अधिष्ठाता—परम पुरुष; और कार्यों का प्रगट करने वाला काल यह तीनों मेरेही स्वरूप हैं ॥ १९ ॥ जीवको भोग देनेके निमित्त उत्पन्न हुई इस सृष्टि स्थिति का जब तक अंत आता है तब तक यह पिता और पुत्रादिक रूपसे अविछिन्न चला करती है और यह सृष्टि स्थिति जब तक परमेश्वर का ईक्षण होता है तब तक रहती है ॥ २० ॥ मेरे द्वारा व्याप्त ब्रह्माण्ड,—जगतकी अनेकों सृष्टि और प्रलयकी रचना भूमि होकरभी सब भुवनोंके साथ पंचत्वरूप से विभाग के योग्य है ॥ २१ ॥ शरीर अन्न में; अन्न अंकुरमें, अंकुर भूमि में, भूमि गन्धमें ॥ २२ ॥ गंध जलमें, जल अपने गुणरसमें, रस ज्योतिमें, ज्योतिरूप

ब्दतन्मात्र इन्द्रियाणिस्वयोनिषु ॥ २४ ॥ योनिर्वैकारिकेसौम्य लीयतेमनसीश्वरे । शब्दोभूतादिमप्येति भूतादिर्महतिप्रभुः ॥ २५ ॥ सलीयतेमहान्स्वेषु गुणेषु गुणवत्तमः । तेऽव्यक्तेसंप्रलीयन्ते तत्कालेलीयतेऽव्यये ॥ २६ ॥ कालोमायामये जीवे जीवआत्मनिमय्यजे । आत्माकेवलआत्मस्थो विकल्पापायलक्षणः ॥ २७ ॥ एवमन्वीक्षमाणस्य कथंवैकल्पिकोभ्रमः । मनसोहृदितिष्ठेत व्योम्नीवार्कोदयेतमः ॥ २८ ॥ एषसांख्यविधिःप्रोक्तः संशयग्रन्थिभेदनः । प्रतिलोमानुलोमाभ्यां परावरदृशामया ॥ २९ ॥

इतिश्री मद्भागवते महापुराणे एकादशस्कन्धे चतुर्विंशोऽध्यायः ॥ २४ ॥

श्रीभगवानुवाच ॥ गुणानामसमिश्राणां पुमान्येनयथाभवेत् । तन्मेपुरुषवर्येद मुपधारयशंसतः ॥ १ ॥ शमोदमस्तितिक्षेक्षा तपःसत्यंदयास्मृतिः । तुष्टिस्त्यागोऽस्पृहाश्रद्धा ह्रीर्दयादिस्वनिर्वृतिः ॥ २ ॥ कामईहामदस्तृष्णा स्तम्भआशीर्भिदासुखम् । मदोत्साहोयशःप्रीतिर्हास्यंवीर्यंबलोद्यमः ॥ ३ ॥ क्रोधोलोभोऽनृतंहिंसा याच्ञादम्भःक्लमःकलिः । शोकमोहौविषादार्ती निद्राऽऽशाभीरनुद्यमः ॥ ४ ॥ सत्त्वस्यरजसश्चैतास्तमसश्चानुपूर्वशः । वृत्तयोवर्णितप्रायः सन्निपातमथोशृणु ॥ ५ ॥ सन्निपातस्त्वहमिति ममेत्युद्धवयामतिः । व्यवहारःसन्नि

में रूप वायुमें और वायु स्पर्शमें लीन होजाता है । हे सौम्य ! वहभी आकाश में आकाश शब्द तन्मात्र में, इन्द्रिय वर्ग अपने २ प्रवर्त्तक देवताओं में ॥ २३ । २४ ॥ सब देवता मनमें और मन वैकारिक अहङ्कार में लीन होजाता है । शब्द तन्मात्रा का लय तामसाहंकार में और मनका लय सात्विकाहंकारमें होता है । सब जगतको मोहित करने वाला अहङ्कार महत्तत्वमें लीन होता है ॥ २५ ॥ वह महत्तत्व अपने कारणी भूत गुणोंमें वह गुण प्रकृतिमें और प्रकृति अव्यय काल में लीन हो जाती है ॥ २६ ॥ काल, ज्ञानमय महापुरुष में और महापुरुष अज आत्मा मुझ में लीन होजाता है आत्मा विश्वकी उत्पत्ति और लय द्वारा स्थिति भूति और सीमारूप से लक्षित होता रहता है; इसही कारण वह निरुपाधिक और आत्मरूप में अवस्थित है ॥ २७ ॥ जो इस प्रकार देखते हैं, सूर्योदय होने पर आकाश से जैसे अन्धकार दूर होजाता है उसही प्रकार उनके मनसे भेद जनित भ्रम दूर होजाताहै ॥ २८ ॥ भूत भविष्यके ज्ञाता मैंने प्रतिलोम और अनुलोम क्रमसे इस संदेह ग्रन्थिनाशक सांख्य विधिका वर्णन किया ॥ २९ ॥

इतिश्रीमद्भा०महा०एकादशस्कन्धेनरकाभाषाटीकायांचतुर्विंशोऽध्यायः ॥ २४ ॥

श्रीभगवान ने कहा, कि हेउद्धव ! पृथक् २ सत्वादी गुणों में से जिसगुण द्वारा जिसप्रकार से पुरुष प्रकाशित होताहै, वह मैं कहताहूं, तुम सावधान मन होकर सुनो॥ १॥शम, दम, तितिक्षा, विवेक, स्वधर्म, निष्ठा, सत्य, दया, पूर्व परका अनुसंधान, दैवेच्छा से प्राप्त हुए पदार्थ द्वारा संतोष, दान, वैराग्य आस्तिकता, अनुचितकर्मोंमें लज्जा, सरलता, विनयऔर आत्मरति इत्यादि समस्त सत्व गुण की वृत्तियें हैं ॥२॥ अभिलाष, चेष्टा, अहङ्कार, लाभहोने परभी असंतोष, गर्व, धनादि कामनाओंके निमित्त देवताओं से प्रार्थना करना, भेद बुद्धि, विषयभोग, मद से युद्धादिकका अभिनिवेश, अपनी प्रशंसा में प्रीति, उपहास, पराक्रम, प्रसिद्धकरना और बलसे उद्यम ये सब रजो गुणकीवृत्तियें हैं॥ ३॥क्रोध, लोभ, झूठ हिंसा, मांगना, दम्भ, भ्रम, कलह, शोक, मोह, दुःख, दीनता तन्द्रा (आलस्य) बडी २ आशायें, भय और जडता ये तमोगुण की वृत्तियें हैं ॥ ४ ॥ यह सत्व गुण, रजोगुण और तमोगुण की वृत्तियां बहुतसी तौ कहदी हैं और ऐसी जो औरभी होवें वे इसी के अनुसार जानलेनी अब उनके मिश्रित भाव की वृत्तियों का वर्णन करता हूं सोसुनो ॥ ५ ॥ हे

पातो मनोमात्रेन्द्रियासुभिः ॥ ६ ॥ धर्मेचार्थेचकामेच यदाऽसौपरिनिष्ठितः । गुणानांसन्निकर्षोऽयं श्रद्धारतिधनावहः ॥ ७॥ प्रवृत्तिलक्षणेनिष्ठा पुमान्यर्हिगृहाश्रमे । स्वधर्मेचानुतिष्ठेत गुणानांसमितिर्हिसा ॥ ८ ॥ पुरुषसत्वसंयुक्त मनुमीयाच्छमादिभिः । कामादिभीरजोयुक्तं क्रोधाद्यैस्तमसायुतम् ॥९॥ यदाभजतिमांभक्त्या निरपेक्षःस्वकर्मभिः । तंसत्वप्रकृतिं विद्यात् पुरुषंस्त्रियमेववा॥१०॥ यदाआशिषआशास्य मांभजेतस्वकर्मभिः । तंरजःप्रकृतिंविद्याद्धिंसामाशास्यतामसम्। ॥११॥सत्वंरजस्तमइति गुणाजीवस्यनैवमे । चित्तजायैस्तुभूतानां सज्जमानोनिबध्यते ॥१२॥ यदेतरौजयेत्सत्वं भास्वरंविशदं शिवम् । तदासुखेनयुज्येत धर्मज्ञानादिभिःपुमान् ॥ १३ ॥ यदाजयेत्तमःसत्व रजःसङ्गंभिदाचलम् । तदा दुःखेनयुज्येत कर्मणायशसाश्रिया ॥ १४ ॥ यदाजयेद्रजःसत्वं तमोमूढलयंजडम् । युज्येतशोकमोहाभ्यां निद्रयाहिंसयाऽऽशया ॥ १५ ॥ यदाचित्तंप्रसीदेत इन्द्रियाणांचनिर्वृतिः । देहेऽभयंमनोसंगं तत्सत्वंविद्धिमत्पदम् ॥१६॥ विकुर्वन्क्रियया चाऽऽधीरनिर्वृत्तिश्चचेतसाम् । गात्रास्वास्थ्यंमनोभ्रान्तं रजएतैर्निशामय। ॥ १७ ॥सीदच्चित्तंविलीयेत चेतसोग्रहणेऽक्षमम् । मनोनष्टंतमोग्लानिस्तमस्तदुपधारय ॥ १८ ॥ एधमानेगुणेसत्वे देवानांबलमेधते ॥ असुराणांचरजसि तमस्यु-

उद्धव ! मैं और मेरा' इस प्रकार की जो बुद्धि होती है वह तीनोंगुणों का सन्निपात अर्थात् इकट्ठापन है मन, शब्दादि विषय, इन्द्रियां और प्राण से जो व्यवहार होता है उसको तीनोंगुणों का सन्निपात जानना चाहिये ॥ ६ ॥ पुरुष का धर्म, अर्थ और काममें लगना तीनोंगुणों के सन्निपात का कार्य है इससे मनुष्य श्रद्धा आशक्ति और धनको उत्पन्न करता है ॥ ७ ॥ जब मनुष्य कामधर्मोंमें लगता है, जब गृहाश्रम में आशक्त होताहै और फिर जब अपने नित्यनैमित्तिक धर्म में प्रवृत्तहोताहै तब जानोकि यह इसका वर्त्ताव तीनोंगुणों के संयोग से हुआ है ॥ ८ ॥ शमादि द्वारा पुरुष सत्वयुक्त, कामादि द्वारा रजोयुक्त और क्रोधादि द्वारा तमोयुक्त होताहै ॥ ९ ॥ जब स्त्री या पुरुष निरपेक्ष होकर अपने कर्मोंद्वारा भक्ति पूर्वक मेरी पूजा करताहै तबही वह सत्व स्वभाव कहा जासकताहै॥१०॥जब अपने कुशल की कामना करके अपने कर्मों द्वारा मेरी पूजाकरताहै तब वह रजो प्रकृति,और जब हिंसाकी कामनाकरके अपने कर्मोंद्वारा मेरी आराधनाकरताहै तब वहतामस प्रकृति कहाजाताहै ॥११॥सत्व,रज,तम यह सब जीवकेही गुण हैं मेरे नहीं क्योंकि यह सबचित्तसे उत्पन्न हुएहैं इनही गुणों से जीव पदार्थोंमें आशक्त होकर संसारके पाश मे बंध जाता है ॥ १२ ॥ प्रकाशक, स्वच्छ और शांत सत्वगुण जबरज और तमोगुण का जीतता है, तबहीं मनुष्य सुखी, धार्मिक और ज्ञानवान होताहै ॥१३॥ जबसंगत भेदका कारणरूप प्रवृत्ति स्वभाव रजोगुण, तम और सत्वगुण को जीतता है तब मनुष्य दुःख, कर्म, यश और श्री को प्राप्त करता है ॥ १४ ॥ जब विवेक भ्रंश कारक, आवरणात्मक और आलस्यात्मक तमोगुण रज और सत्वगुणको जीतता है तब मनुष्य शोक, मोह, निद्रा, हिंसा और आशायुक्त होताहै ॥१५॥ जब मन शांत होवे और सब इन्द्रियें अचंचलहोवें तथा देहमें अभय और मन निःसंगहोवे तब मेरीप्राप्ति के आश्रय सत्वगुणकी वृद्धि हुई जाननी॥१६॥जब क्रिया विकारके प्राप्तहोनेपर मनुष्यका चित्त चारोंओरसे भ्रमित होताहै बुद्धि और इन्द्रियोंमें अनिर्वृति उत्पन्नहोती है कर्मेन्द्रियों में अधिक विकार उपस्थितहोताहै मन भ्रमित होता है तब रजकी वृद्धिहुई जानना ॥ १७ ॥ जब अस्तहोताहुआ चित्त चिदाभास को ग्रहण करने में असमर्थ होकर लीन होजावे; और संकल्प रूप मनभी लीन होजावे तथा अज्ञान उत्पन्न होजाय और खेद होवे तब तमोगुणकी वृद्धि जाननी ॥ १८ ॥ हेउद्धव ! सत्व

द्धर्वरक्षसाम् ॥ १९ ॥ सत्त्वाज्जागरणं विद्याद्रजसा स्वप्नमादिशेत्। प्रस्वापं तमसा जन्तोस्तुरीयं त्रिषु सन्ततम् ॥ २० ॥ उपर्युपरि गच्छन्ति सत्त्वेन ब्राह्मणा जनाः। तमसाऽधोऽध आमुख्याद्रजसाऽन्तरचारिणः ॥ २१ ॥ सत्त्वे प्रलीनाः स्वर्यान्ति नरलोकं रजोलयाः। तमोलयास्तु निरयं यान्ति मामेव निर्गुणाः ॥ २२ ॥ मदर्पणं निष्फलं वा सात्त्विकं निजकर्म तत्। राजसं फलसङ्कल्पं हिंसाप्रायादि तामसम् ॥ २३ ॥ कैवल्यं सात्त्विकं ज्ञानं रजो वैकल्पिकं च यत्। प्राकृतं तामसं ज्ञानं मन्निष्ठं निर्गुणं स्मृतम् ॥ २४ ॥ वनं तु सात्त्विको वासो ग्रामो राजस उच्यते। तामसं द्यूतसदनं मन्निकेतं तु निर्गुणम् ॥ २५ ॥ सात्त्विकः कारकोऽसङ्गी रागान्धो राजसः स्मृतः। तामसः स्मृतिविभ्रष्टो निर्गुणो मदपाश्रयः ॥ २६ ॥ सात्त्विक्याध्यात्मिकी श्रद्धा कर्मश्रद्धा तु राजसी। तामस्यधर्मे या श्रद्धा मत्सेवायां तु निर्गुणा ॥ २७ ॥ पथ्यं पूतमनायस्तमाहार्यं सात्त्विकं स्मृतम्। राजसं चेन्द्रियप्रेष्ठं तामसं चार्तिदाऽशुचि ॥ २८ ॥ सात्त्विकं सुखमात्मोत्थं विषयोत्थं तु राजसम्। तामसं मोहदैन्योत्थं निर्गुणं मदपाश्रयम् ॥ २९ ॥ द्रव्यं देशः फलं कालो ज्ञानं कर्म च कारकः। श्रद्धावस्थाकृतिर्निष्ठा त्रैगुण्यः सर्व एव हि ॥ ३० ॥ सर्वे गुणमया भावाः पुरुषाव्यक्तधिष्ठिताः। दृष्टं श्रुतमनुध्यातं बुद्ध्या वा पुरुषर्षभ ॥ ॥ ३१ ॥ एताः संसृतयः पुंसो गुणकर्मनिबन्धनाः। येनेमे निर्जिताः सौम्य गुणा जी-

गुण के बढ़ने पर देवताओं का, रजके बढ़ने पर असुरों का और तमके बढ़ने पर राक्षसों का बल बढ़ता है ॥ १९ ॥ सत्त्व से प्राणियों का जागरण, रजसे स्वप्न और तमसे सुषुप्ति जानना। तुरीयअवस्था तीनों गुणों के ऊपर विस्तृत है ॥ २० ॥ मनुष्य सत्त्व द्वारा क्रमशः ऊपर के ब्रह्म-लोक तक जाता है, तमोगुण से स्थावर पर्यंत नीचे २ योनियों में जन्म लेता है और रजोगुण से फिर मनुष्य शरीर को प्राप्त होता है ॥ २१ ॥ जो सत्त्व में लीन होते हैं वे स्वर्ग में;जो रजो गुण में लीन होते हैं वे नरलोक मे और जो तमोगुण में लीन होते हैं वह नरक में जाते हैं। और जो निर्गुण हैं वे मुझकोही प्राप्त होते हैं ॥ २२ ॥ मेरी प्रीति के अभिप्राय से कियेहुए व केवल दासभावसे कियेहुए कर्म सात्त्विक हैं, फल की कामना से कियेहुए कर्म राजस हैं और हिंसादि के अभिप्राय से कियेहुए कर्म तामस हैं ॥ २३ ॥ आत्मा देहादिक से भिन्न है ऐसाज्ञान सात्त्विक है, आत्मा देहादिक से भिन्न नहीं है ऐसा ज्ञान राजस है बालककी समान प्राकृतज्ञान तामस है और मेरे विषय का ज्ञान निर्गुण ज्ञान है ॥ २४ ॥ वनमें रहना सात्त्विकवास है, ग्राममें रहना राजसवास है; द्यूत आदि के स्थल में रहना तमोगुणी वास है और मेरे मंदिर आदि में रहनेको निर्गुण निवास जानो ॥ २५ ॥ निःसंगहोकर जो कर्म करे वह सात्त्विक कर्त्ता है; अत्यन्त आस-क्तिसे अंधे होकर, जो कर्म करे वह राजसकर्त्ता है; अनुसन्धान रहित होकर जो कर्म करे वह तामस कर्त्ता है और जो मेरा आश्रय लेकर कर्म करे वह निर्गुण कर्त्ता है ॥ २६ ॥ आत्मा पर श्रद्धा सात्त्विक; कर्मों पर श्रद्धा राजस, अधर्म में श्रद्धा तामस और मेरी सेवामें श्रद्धा निर्गुण,हित कारी तथा श्रद्धा शुद्धहै ॥ २७ ॥ जो भोजन का पदार्थ अनायास से प्राप्त होजावे वह सात्त्विक; इंद्रियों को प्रिय भोजन राजस; दुःख दायक और अशुद्ध भोजन तामस है ॥ २८ ॥ आत्मा से उत्पन्नहुआ सुख सात्त्विक; विषयों से उत्पन्नहुआ सुख राजस; मोह और दीनता से उत्पन्न हुआ सुखाभास तामस और मेरे विषय का सुख निर्गुण है ॥ २९ ॥ द्रव्य, देश, फल, ज्ञान, कर्म कर्त्ता, श्रद्धा, अवस्था, आकृति और निष्ठा यह सबही त्रिगुणात्मक हैं ॥ ३० ॥ पुरुष और प्रकृति में अवस्थिति-देखे, सुने अथवा बुद्धिद्वारा विचारेहुए सबही पदार्थ गुणमय हैं ॥ ३१ ॥ हे सौम्य ! जीव के सब जन्म, गुण और कर्म अभिमान रूप कारणसेही होतेहैं । जो जीव चित्त

येन विज्ञः ॥ ३२ ॥ भक्तियोगेनमन्निष्ठो मद्भावायप्रपद्यते ॥ तस्माद्देहमिमंल-ब्ध्वा ज्ञानविज्ञानसंभवम् ॥३३॥ गुणसंगंविनिर्धूयमां भजन्तुविचक्षणाः । निःसंगो मां भजेद्विद्वानप्रमत्तो जितेन्द्रियः । रजस्तमश्चाभिजयेत्सत्वसंसेवया मुनिः ३४॥ सत्वंचाभिजयेद्युक्तो नैरपेक्ष्येणशान्तधीः । संपद्यतेगुणैर्मुक्तो जीवोजीवंविहायमा म् ॥ ३५ ॥ जीवोजीवविनिर्मुक्तो गुणैश्चाशयसंभवैः । मयैवब्रह्मणापूर्णो न बहिर्ना न्तरश्चरेत् ॥ ३६ ॥

इति श्रीमद्भा० महा० एकाद० पंचविंशोऽध्यायः ॥ २५ ॥

श्रीभगवानुवाच॥ मल्लक्षणमिमंकाय लब्ध्वामद्धर्मआस्थितः । आनन्दंपरमात्मा नमात्मस्थं समुपैतिमाम् ॥ १ ॥ गुणमय्याजीवयोन्या विमुक्तोज्ञाननिष्ठया । गुणेषु मायामात्रेषु दृश्यमानेष्ववस्तुतः । वर्तमानोऽपिन पुमान्युज्यते वस्तुभिर्गुणैः ॥२॥ संगंन कुर्यादसतां शिश्नोदरतृपांक्वचित् । तस्यानुगस्तमस्यन्धे पतत्यन्धानुगा-ऽन्धवत् ॥ ३ ॥ ऐलःसम्राडिमां गाथामगायत बृहच्छ्रवाः । उर्वशीविरहान्मुह्यन्नि-र्विण्णः शोकसंयमे ॥ ४ ॥ त्यक्त्वात्मान व्रजन्तीं तांनग्नउन्मत्तवन्नृपः । विलपन्न न्वगाज्जाये घोरेतिष्ठेतिविक्लवः ॥ ५ ॥ कामानतृप्तोऽनुजुषन्क्षुल्लकान्वर्षयामिनीः नवेदयान्तीर्नायान्तीरुर्वश्याऽऽकृष्टचेतनः ॥ ६ ॥ ऐल उवाच ॥ अहोमेमोहवि स्तारः कामकश्मलचेतसः । देव्यागृहीतकण्ठस्य नायुःखण्डाइमेस्मृताः ॥ ७ ॥

से होतेहुए इन गुणों को जीतगया होवे, वह फिर भक्तियोग द्वारा मेरा भक्तहो मोक्ष पाने के योग्य होजाता है ॥ ३२ ॥ अतएव जिससे ज्ञान और विज्ञान की उत्पत्ति होती है वह शरीर प्राप्तकर चतुर मनुष्यको नि.संगहो मेरी सेवा करनी चाहिये ॥ ३३ ॥ विद्वान् मुनि को निःसंग और प्रमाद रहितहो इंद्रियों को जीत मेरा भजन करना चाहिए और सत्व गुण के सेवनद्वारा रज तथा तमको जीतना चाहिये ॥ ३४ ॥ शांत बुद्धि विद्वान् मनुष्य को उपशमात्मक सत्वद्वारा सत्व को जीतना चाहिए । जीव गुणों से छुटकारा पाकर लिंग देह को छोड़ मुझको प्राप्त करता है ॥ ३५ ॥ लिंग शरीर भी अतःकरण से उत्पन्नहुए गुणों से छुटकारापाकर जीव विषयभोग व विषयोंकी चिंता नहीं करता । मैंही ब्रह्म; मुझ्से जीव परिपूर्ण होता है ॥ ३६ ॥

इतिश्रीमद्भा•महा•एकादशस्कंधेसरलाभाषाटीकायांपंचविंशोऽध्यायः॥ २५ ॥

श्रीभगवान ने कहा कि—जो मनुष्य जिससे मेरा स्वरूप जानने में आता है ऐसे नरदेहको प्राप्तकर मेरी भक्ति रूप धर्म में दृढरहता है वह परमानन्दआत्मस्वरूप मुझको प्राप्त होता है ॥ १ ॥ ज्ञान निष्ठाद्वारा गुणमय जीवोपाधि से मुक्ति प्राप्तकर पुरुष गुण कि जो मायामात्र औरयथार्थ रीति से प्रतीत होरहे हैं उनमें रहने परभी इन अवास्तविक गुणों के संग को प्राप्त नहीं होता ॥ २ ॥ ज्ञानी पुरुष को उपस्थ और उदर के तृप्त करनेवाले मनुष्यों का सग कदापि न करना चाहिये ।यदि उनमें से एककाभी अनुसरण कियाजाय तो अन्धे के पीछे चलेजाते अन्धेकीसमान वह मनुष्य घोर अन्धकार में गिरता है ॥ ३ ॥ चक्रवर्ती विपुलकीर्ति राजा पुरूरवा ने उर्वशी के विरह के कारण मोह में पतितहो उसको फिर पाने के निमित्त शोक के कारण वैराग्यको प्राप्तहो इस गाथा को गायाथा ॥ ४ ॥ वह उर्वशी जब उसको छोड़कर चलीगई तब राजाकातरहो शोक करते २ उन्मत्तकी समान नंगा और 'हे स्त्री ! हे घोरे ! ठहर २' इसप्रकार विलाप करताहुआ उसके पीछे २ दौड़ा ॥ ५ ॥ अतृप्त चित्त से तुच्छ काम की सेवाकरतेहुए बहुत वर्षों की रात्रि यों के आरम्भ और अन्त को वह न समझसका,—उर्वशी ने उसकी बुद्धि को हर लियाथा ॥६॥ फिर पुरूरवा ने उर्वशी के शोक को पाकर अन्त में कहाथा कि अहो ! मेरे काम विमूढ चित्तमें कैसा मोह का विस्तार हुआ ! उर्वशी ने जो मेरे कण्ठ का आलिंगन किया इससे मेरी परमायु

नाहंवेदाभिनिर्मुक्तः सूर्योवाऽभ्युदितोऽमुना । मुषितोवर्षपूगानां बताहानिगता न्युत ॥ ८ ॥ अहोमेआत्मसंमोहो येनात्मायोषितांकृतः । क्रीडामृगश्चक्रवर्तीनरदेवशिखामणिः ॥ ९ ॥ सपरिच्छदमात्मानं हित्वातृणमिवेश्वरम् । यान्तींस्त्रियंचान्वगमं नग्नउन्मत्तवद्रुदन् ॥ १० ॥ कुतस्तस्यानुभावः स्यात्तेजईशत्वमेववा । योऽन्वगच्छंस्त्रियंयान्तीं खरवत्पादताडितः ॥ ११ ॥ किंविद्ययाकिंतपसा किंत्यागेनश्रुतेनवा । किंविविक्तेनमौनेन स्त्रीभिर्यस्यमनोहृतम् ॥ १२ ॥ स्वार्थस्याकोविदंधिङ्मांमूर्खंपण्डितमानिनम् । योऽहमीश्वरतांप्राप्य स्त्रीभिर्गोखरवज्जितः ॥ १३ ॥ सेवतोवर्षपूगान्मे उर्वश्याअधरासवम् । नतृप्यत्यात्मभूःकामो वह्निराहुतिभिर्यथा ॥ १४ ॥ पुंश्चल्याऽपहृतंचित्तं कोन्वन्योमोचितुंप्रभुः । आत्मारामेश्वरमृते भगवन्तमधोक्षजम् ॥ १५ ॥ बोधितस्यापिदेव्यामे सूक्तवाक्येनदुर्मतेः । मनोगतोमहामोहो नापयात्यजितात्मनः ॥ १६ ॥ किमेतयानोऽपकृतं रज्ज्वावासर्पचेतसः । रज्जुस्वरूपाविदुषोयोऽहं यदजितेन्द्रियः ॥ १७ ॥ क्वायंमलीमसःकायो दौर्गन्ध्याद्यात्मकोऽशुचिः । क्वगुणाःसौमनस्याद्या ह्यध्यासोऽविद्ययाकृतः ॥ १८ ॥ पित्रोःकिंस्वंनुभार्यायाः स्वामिनोऽग्नेःश्वगृध्रयोः । किमात्मनःकिंसुहृदा मितियोनावसीयते ॥ १९ ॥ तस्मिन्कलेवरेऽमेध्ये तुच्छनिष्ठेविषज्जते । अहोसुभद्रंसु

का जितना समयबीतगया उसका मैंने स्मरण भी न किया ॥ ७ ॥ कैसा दुःख का विषय है ! मैं इसकेद्वारा ठगाजाकर—सूर्य के उदय अस्त को भी न जानसका, बीतेहुए वर्षों के दिनों का भी अनुभव न करसका ॥ ८ ॥ अहो मुझे कैसा आत्म भ्रम हुआ ! मैंने राजशिरोमणि-चक्रवर्ती राजा होकरभी अपने को स्त्रियों का क्रीडामृग किया ॥ ९ ॥ राज्यादि सामग्रियों समेत अपने चक्रवर्तित्व को तृणकी समान छोड़कर नग्नहो उन्मत्त की समान रोते २ स्त्री का पीछा किया ॥ १० ॥ जो मनुष्य गधे की समान मुँह पर लातेंखाता, छोडकर जातीहुई स्त्री के पीछेगया, उसके प्रभाव, बल और सामर्थ्य कहां से रहे ! ॥ ११ ॥ स्त्रियों ने जिसके मनका हरणकरलिया है, उसकी विद्या, तपस्या, सन्यास, शास्त्रज्ञान एकांत सेवा वाक्य संयम सबही वृथा हैं ॥ १२ ॥ मैं कि जो चक्रवर्ती राज्य को पाय बैल और गधे की समान स्त्रियों द्वारा पराजित हुआहूं उस अपने स्वार्थ को न जाननेवाले, अज्ञान, मूर्ख, पण्डिताभिमानी मुझको धिक्कार है ॥ १३ ॥ अनेकों वर्ष तक उर्वशी के अधरामृत का पान करके भी मुझे तृप्ति न हुई । परन्तु इसके विपरीत आहुति समूहद्वारा अग्नि की समान मनमें बारम्बार तृष्णा की वृद्धिही होती रही ॥ १४ ॥ आत्मा राम, अधोक्षज, भगवान ईश्वर के अतिरिक्त कुलटा स्त्रियोंसे हरण कियेहुए चित्तवाले मनुष्य को और कोई नहीं छुड़ासकता मैंनेतो कर्मों से देवताओं का आराधन करके दुःखही पाया इस कारण अबमैं परमेश्वरकीही आराधना करूंगा बिना भगवत् कृपाके दूसरोंकी शिक्षासे मोह नहीं दूर होसकता ॥ १५ ॥ क्यों कि मुझ कुमति और अजितेन्द्रियको उर्वशी ने यथार्थ वचनो से उप देशभी दिया तौभी मेरे मनमें रहाहुआ मोह किसी प्रकार से निवृत्त नहुआ ॥१६॥ उर्वशीने मेरा क्या अपराध किया है मुझको ही रस्सी से सर्प का भ्रमहुआ कि देखपड़ने वाले के स्वरूप को न समझ सका मैं अजितेन्द्रिय हूं ॥ १७ ॥ यह मलीन दुर्गंधित, अपवित्र देह कहां और फूल की स मान सुगंधित गुण कहां ! इस बीभत्सशरीरमें जो सुंदरता का प्रकाश है वह केवल अज्ञान क- ल्पित है ॥ १८ ॥ यह निश्चय नहीं होसकता कि देह माता, पिता, स्त्री, स्वामी, अग्नि, कुत्ता, गीध, स्वयं अपना व बांधवोंमें से किसकाहै ॥ १९ ॥ वह अहो स्त्रीका मुख कैसा सुंदरहै उसकी नासिका कैसी भली है उसका हास्य कैसा मनोहर है ऐसा विचारकर नाशवान् तुच्छ पदार्थ आप

मस्य सुविस्मितंच मुखं स्त्रियः ॥ २० ॥ त्वङ्मांसरुधिरस्नायुमेदोमज्जास्थिसंहतौ। विण्मूत्रपूयेरमतांकृमीणां कियदन्तरम् ॥ २१ ॥ अथापिनोपसज्जेत स्त्रीषुस्त्रैणेषु चार्थवित् । विषयेन्द्रियसंयोगान् मनःक्षुभ्यतिनान्यथा ॥ २२ ॥ अदृष्टादश्रुताद्भावान्नभावउपजायते । असंप्रयुञ्जतःप्राणाञ्छाम्यतिस्तिमितंमनः ॥ २३ ॥ तस्मात्सङ्गोनकर्तव्यः स्त्रीषुस्त्रैणेषुचेन्द्रियैः । विदुषांचाप्यविस्रब्धः षड्वर्गःकिमु मादृशाम् ॥ २४ ॥ श्रीभगवानुवाच ॥ एवंप्रगायन्नृपदेवदेवः सउर्वशीलोकमथो विहाय । आत्मानमात्मन्यवगम्यमांवै उपारमज्ज्ञानविधूतमोहः ॥ २५ ॥ ततोदुःसं गमुत्सृज्य सत्सुसज्जेतबुद्धिमान् । सन्तएतस्यछिन्दन्ति मनोव्यासंगमुक्तिभिः २६ सन्तोऽनपेक्षामच्चित्ताः प्रशान्ताःसमदर्शिनः । निर्ममानिरहंकारा निर्द्वन्द्वानिष्प रिग्रहाः ॥ २७ ॥ तेषुनित्यंमहाभाग महाभागेषुमत्कथाः । संभवन्तिहितानृणां जु षतांप्रपुनन्त्यघम् ॥ २८ ॥ तायेशृण्वन्तिगायन्ति ह्यनुमोदन्तिचादृताः । मत्पराः श्रद्दधानाश्च भक्तिंविन्दन्तितेमयि ॥ २९ ॥ भक्तिंलब्धवतःसाधोः किमन्यदवशि ष्यते । मय्यनन्तगुणेब्रह्मण्यानन्दानुभवात्मनि ॥ ३० ॥ यथोपश्रयमाणस्य भगव न्तंविभावसुम् । शीतंभयंतमोऽप्येति साधून्संसेवतस्तथा ॥ ३१ ॥ निमज्ज्योन्म ज्जतांघोरे भवाब्धौपरमायनम् । सन्तोब्रह्मविदःशान्ता नौर्दृढेवाप्सुमज्जताम् ३२ अन्नंहिप्राणिनांप्राण आर्तानांशरणंत्वहम् । धर्मोवित्तंनृणांप्रेत्य सन्तोऽर्वाग्बिभ्य

मित्र देह में भली प्रकार से आसक्त होजाता है ॥ २० ॥ यथार्थ में विचाराजाय तो त्वचा, मांस रक्त, नसें, मेद, मज्जा और अस्थिके समूह रूप देह में विलास करनेवाले और विष्ठा मूत्र व पूय में विहार करनेवाले कीड़ों में अंतर ही क्या है ॥ २१ ॥ विवेकी पुरुष यह विचार कर स्त्री और स्त्री संगियों में आसक्त नहींहोते । विषय और इन्द्रियों के साथ संयोग के कारणही मन क्षु- भित होता है दूसरे कारण से नहीं होता ॥ २२ ॥ दर्शन और श्रवण के अतिरिक्त कभी भी मनमें क्षोभ नहीं उत्पन्न होता अतएव जो इन्द्रियों का संयम करते हैं उनका मन स्थिर होकर शांत हो जाता है ॥ २३ ॥ इसही कारण इन्द्रियों द्वारा स्त्रियों और स्त्री संगियोंका संसर्ग न करना चाहिये छओं इन्द्रियों का पण्डित जनभी तो विश्वास नहीं करते अतएव मेरे समान मनुष्योंकी तो बातही क्या है ॥ २४ ॥ श्रीभगवानने कहा कि नरदेव शिरोमणि पुरूरवाने इसप्रकार कहकर उर्वशी लो क को स्वयंही त्यागदिया और उसने आत्मरूप से मुझको पहिचाना तथा ज्ञान द्वारा मोहका नाश कर उपरति को प्राप्त किया ॥ २५ ॥ इसही कारण बुद्धिमान मनुष्य को उचित है कि दुष्ट संगको छोड़ साधु संग करे साधुजन उत्तम २ उपदेशोंद्वारा उसके मनकी आशक्ति को नाशकर देते हैं। ॥ २६ ॥ जो अपेक्षा रहित मेरेमें चित्त रखने वाले, प्रशांत, समदर्शी, ममता रहित, अहंकार वर्जि त, द्वन्द्व रहित और परिग्रह शून्य हैं वही साधु हैं ॥ २७ ॥ हे महाभाग ! वह सबैवही अपने हि- तकारी मेरी कथाकी आलोचना किया करते हैं वे सब कथाएं सुनने वालोंका पाप नाश करती हैं। ॥ २८ ॥ जो आदर पूर्वक इन सब कथाओं को सुनते कहते वा अनुमोदन करते हैं वह मेरे भक्त और मुझमें श्रद्धावान् हो मेरी भक्तिको प्राप्त होते हैं ॥ २९ ॥ जो साधु कि अनंत गुण, आनंदा- नुभवात्मक मेरी भक्ति युक्त हैं उनको और क्या शेष रहा ॥ ३० ॥ जैसे भगवान् अग्निका आ- श्रय करनेपर मनुष्यों को शीत, भय और अंधकार नहीं रहता उसही प्रकार साधुओंकी सेवा क- रनेपर समस्त पाप नष्ट होजाते हैं ॥ ३१ ॥ जैसे जो जलमें डूबजाता हो उसका नावही परम आ- श्रय है वैसेही घोर भवसागर में डूबनेहुए पारजाने की इच्छा रखने वाले को ब्रह्मज्ञ साधुही परम अवलंबन हैं ॥ ३२ ॥ जिस प्रकार अन्न प्राणियों का प्राण है जैसे मैं कातर जनों के लिये शरण

तोऽरणम् ॥ ३३ ॥ सन्तोदिशन्तिचक्षूंषि बहिरर्कःसमुत्थितः । देवताबान्धवाःसन्तः सन्तआत्माऽहमेवच ॥ वैतसेनस्ततोऽप्येवं मुर्वश्यालोकनिस्पृहः । मुक्तसंगोमहीमेता मात्मारामश्चचारह ॥ ३५ ॥

इतिश्री भागवते महापुराणे एकादशस्कन्धे षड्विंशोऽध्यायः ॥ २६ ॥

उद्धवउवाच॥क्रियायोगंसमाचक्ष्व भवदाराधनंप्रभो । यस्मात्त्वांयेयथार्चन्ति सात्वताःसात्वतर्षभ॥१॥एतद्वदन्तिमुनयोमुहुर्निःश्रेयसंनृणाम् । नारदोभगवान्व्यासआचार्योऽङ्गिरसःसुतः ॥ २ ॥ निःसृतंतेमुखाम्भोजाद्यदाहभगवानजः । पुत्रेभ्योभृगुमुख्येभ्यो देव्यैचभगवान्भवः ॥ ३ ॥ एतद्वैसर्ववर्णानामाश्रमाणांचसंमतम् । श्रेयसामुत्तमंमन्ये स्त्रीशूद्राणांचमानद ॥ ४ ॥ एतत्कमलपत्राक्ष कर्मबन्धविमोचनम् । भक्तायचानुरक्ताय ब्रूहिविश्वेश्वरेश्वर ॥ ५ ॥ श्रीभगवानुवाच ॥ नह्यन्तोऽनन्तपारस्य कर्मकाण्डस्यचोद्धव । संक्षिप्तंवर्णयिष्यामि यथावदनुपूर्वशः ॥ ६ ॥ वैदिकस्तान्त्रिकोमिश्र इतिमेत्रिविधोमखः । त्रयाणामीप्सितेनैव विधिनामांसमर्चयेत् ॥ ७ ॥ यदास्वनिगमेनोक्तं द्विजत्वंप्राप्यपूरुषः । यथायजेतमांभक्त्या श्रद्धयातन्निबोधमे ॥ ८ ॥ अर्चायांस्थण्डिलेऽग्नौवासूर्येवाऽप्सुहृदिद्विजे । द्रव्येण भक्तियुक्तोऽर्चेत्स्वगुरुंमाममायया ॥ ९ ॥ पूर्वंस्नानंप्रकुर्वीत धौतदन्तोऽङ्गशुद्धये । उभयैरपिचस्नानं मन्त्रैर्मृद्ग्रहणादिना ॥ १० ॥ संध्योपास्त्यादिकर्माणि वेदेना

हू जैसे धर्म सबही मनुष्योंका धर्म है वैसेही साधु जन संसार में गिरने से भयभीत मनुष्यों को तारने वाले हैं ॥ ३३ ॥ साधु अनेक चक्षुओं को देते हैं और सूर्य तो भली प्रकार से उदय होनेपर बाहिरी एक चक्षु इन्द्रिय कोही देता है साधुगणही देवता बांधव और साधुगणही आत्मा तथा मद्रूप हैं ॥ ३४ ॥ हे उद्धव ! तदनंतर पुरूरवा इस प्रकार से उर्वशी के लोक को छोड निःसंगहुआ और आत्मा राम हो इस पृथ्वीपर भ्रमण करने लगा ॥ ३५ ॥

इति श्रीमद्भा० महा० एकाद सरला भाषाटीकायां षड्विंशोऽध्यायः ॥ २६ ॥

उद्धवजी ने कहा कि—हेयादवोत्तम ! हे प्रभु ! जो भक्त आपकी आराधना करते हैं आप उनकी आराधना रूप क्रिया योग का मुझसे उपदेश करियेगा ॥ १ ॥ नारदजी, भगवान व्यासजी और अंगिरा के पुत्र, आचार्य बृहस्पतिजी आदि मुनिगण इसको मनुष्य की मुक्तिका साधन कहगये हैं ॥ २ आपके मुख कमल से निकलेहुए वचनों को भगवान ब्रह्माजीने भृगु आदि अपने पुत्रों से और भगवान महादेवजी ने पार्वतीजी से कहाथा वह प्रकार मैं सुनना चाहताहूं ॥ ३ ॥ हेमानद ! यहसब वर्णों और आश्रमों को तथा स्त्रियों और शूद्रों को भी परम कल्याणकारक है। यह मैं मानताहूं ॥ ४ ॥ इसकारण हेकमलदललोचन ! हे विश्वेश्वरों के ईश्वर ! मैं भक्त और अनुरागी हूं । मुझसे कर्म बन्धनके छुटकारे का साधनकहो ॥ ५ ॥ श्रीभगवान ने कहा कि—हे उद्धव ! असीम, अपार कर्म काण्ड का अन्त नहीं है अतएव अनुक्रम के अनुसार यथावत्संक्षेप से वर्णन करूंगा ॥ ६ ॥ वैदिक, तांत्रिक और मिश्रित ऐसे तीन प्रकार की मेरी पूजा होती है तीनोंमेंसे जिसकी जो इच्छाहो उसके द्वारा वह मेरी पूजा करे ॥ ७ ॥ जिसका अपने वेद की शाखा में कही हुई रीति से उपनयनसंस्कारहुआहोवे उसको श्रद्धा पूर्वक भक्तिसे जिसप्रकारपूजा करनी चाहिये उसको मैं कहताहूं सो सुनो ॥ ८ ॥ द्विज निष्कपट भावसे प्रतिमा में बालुकामयी वेदी में, अग्नि में अथवा सूर्य में, जल में और हृदय में गुरुस्वरूप मेरा द्रव्यद्वारा आराधन करे ॥ ९ ॥ दातून करके शुद्धता के निमित्त पहिले स्नान करे, यह स्नान वैदिक और तांत्रिक मंत्रों से मिट्टी को ग्रहणकर उसके द्वारा स्नान करना चाहिये ॥ १० ॥ जिसका ईश्वर मेंही संकल्प है वह

ऽऽप्रोदिताभिमे। पूजांतैःकल्पयेत् सम्यक्संकल्पःकर्मपावनीम् ॥११॥ शैलीदारु-मयीलौही लेप्यालेख्या च सैकती। मनोमयीमणिमयीप्रतिमाऽष्टविधास्मृता ॥१२॥ चलाचलेतिद्विविधा प्रतिष्ठाजीवमन्दिरम्।उद्वासावाहनेनस्तः स्थिरायामुद्धवार्चने ॥१३॥अस्थिरायांविकल्पःस्यात् स्थण्डिलेतुभवेद्द्वयम्। स्नपनंत्वविलेप्यायामन्यत्रपरिमार्जनम् ॥ १४ ॥ द्रव्यैःप्रसिद्धैर्मद्यागः प्रतिमादिष्वमायिनः। भक्तस्यचयथालब्धैर्हृदिभावेनचैवहि ॥ १५ ॥ स्नानालंकरणंप्रेष्ठमर्चायामेवतूद्धव। स्थण्डिलेतत्त्वविन्यासोवह्नावाज्यप्लुतंहविः ॥१६॥ सूर्येचाभ्यर्हणंप्रेष्ठं सलिलेसलिलादिभिः। श्रद्धयोपाहृतंप्रेष्ठंभक्तेनममवार्यपि॥१७॥भूर्यप्यभक्तोपहृतं नमेतोषायकल्पते। गन्धो धूपःसुमनसोदीपोऽन्नाद्यंचकिंपुनः॥१८॥शुचिःसंभृतसंभारःप्राग्दर्भैःकल्पितासनः आसीनःप्रागुदग्वार्चेदर्चायामथसंमुखः॥१९॥कृतन्यासःकृतन्यासां मदर्चांपाणिनामृजेत्। कलशंप्रोक्षणीयंच यथावदुपसाधयेत्॥२०॥ तदद्भिर्देवयजनं द्रव्याण्यात्मानमेवच। प्रोक्ष्यपात्राणित्रीण्यद्भिस्तैस्तैर्द्रव्यैश्चसाधयेत्॥ २१ ॥ पाद्यार्घ्याचमनीयार्थं त्रीणिपात्राणिदैशिकः। हृदाशीर्ष्णाऽथशिखया गायत्र्याचाभिमन्त्रयेत्॥ २२ ॥ पिण्डेवाय्वग्निसंशुद्धे हृत्पद्मस्थांपरांमम। अण्वींजीवकलां ध्यायेन्नादान्तेसिद्धभाविताम् ॥ २३ ॥ तयात्मभूतयापिण्डे व्याप्तेसंपूज्यतन्मयः।

